नमो नमो निम्मल दंसणस्स



# आगमसुत्ताणि (सटीकं)

भागः - ५

: संशोधक सम्पादकश्च :

## मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित सुशील सुधर्मसागर गुरूभ्योनमः

# आगम सुत्ताणि (सटीकं)

## भाग-५ भगवतीअङ्गसूत्रं-१

-: संशोधकः सम्पादकश्च: :-

## मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५ आगम सुत्ताणि सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :
"आगम आराधना केन्द्र" शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## भगवत्यङ्गसूत्रस्य विषयानुक्रमः

शतकानि १ - १०, मूलाङ्काः-१....४९३


| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठा |
|---|---|---|---|---|---|
| □ | शतकं-१ | ५ | १९० | उद्देशकः-५ स्त्री | २० |
| १-२५ | उद्देशकः-१ चलनः | ६ | -१९२ | उद्देशकः-६ नगरं | २० |
| -३३ | उद्देशकः-२ दुखं | ४४ | -२०० | उद्देशकः-७ लोकपालः | २० |
| -४५ | उद्देशकः-३ काङ्क्षाप्रदोषः | ५९ | -२०४ | उद्देशकः-८ देवाधिपतिः | २१ |
| -५१ | उद्देशकः-४ कर्म्मप्रकृतिः | ६९ | -२०५ | उद्देशकः-९ इन्द्रियं | २१ |
| -६८ | उद्देशकः-५ पृथ्वी | ७४ | -२०६ | उद्देशकः-१० परिषद् | २१ |
| -७८ | उद्देशकः-६ यावन्तः | ८५ | □ | शतकं-४ | २१ |
| -८४ | उद्देशकः-७ नैरयिकः | ९२ | -२०९ | उद्देशकः-१-४ लोकपाल विमानं | २१ |
| -९३ | उद्देशकः-८ बालः | ९९ | -२१० | उद्देशकः-५-८ लोकपाल राजधानी | २१ |
| -१०१ | उद्देशकः-९ गुरुत्वं | १०४ | -२११ | उद्देशकः-९ नैरयिकः | २१ |
| -१०४ | उद्देशकः-१० चलतः | ११२ | -२१४ | उद्देशकः-१० लेश्या | २१ |
| □ | शतकं-२ | ११७ | □ | शतकं ५ | २१ |
| -११७ | उद्देशकः-१ स्कन्दकः | ११७ | -२१९ | उद्देशकः-१ रविः | २१ |
| -११८ | उद्देशकः-२ समुद्घातः | १३८ | -२२२ | उद्देशकः-२ वायुः | २२ |
| -१२१ | उद्देशकः-३ पृथ्वी | १३९ | -२२४ | उद्देशकः-३ जालग्रन्थिका | २२ |
| -१२२ | उद्देशकः-४ इन्द्रियं | १४० | -२४० | उद्देशकः-४ शब्दः | २२ |
| -१३७ | उद्देशकः-५ अन्यतीर्थिकः | १४१ | -२४३ | उद्देशकः-५ छद्मस्थः | २३ |
| -१३८ | उद्देशकः-६ भाषा | १५२ | -२५२ | उद्देशकः-६ आयुः | २३ |
| -१३९ | उद्देशकः-७ देवः | १५२ | -२६१ | उद्देशकः-७ पुद्गलः | २४ |
| -१४० | उद्देशकः-८ चमरचञ्चा | १५३ | -२६३ | उद्देशकः-८ निर्ग्रन्थीपुत्रः | २५ |
| -१४१ | उद्देशकः-९ समयक्षेत्रं | १५६ | -२७० | उद्देशकः-९ राजगृहः | २६ |
| -१५० | उद्देशकः-१० अस्तिकायः | १५७ | -२७१ | उद्देशकः-१० चन्द्रमा | २६ |
| □ | शतकं-३ | १६३ | □ | शतकं-६ | २६ |
| -१६९ | उद्देशकः-१ चमरविकुर्वणा | १६३ | -२७६ | उद्देशकः-१ वेदना | २६ |
| -१७७ | उद्देशकः-२ चमरोत्पात् | १८० | -२७७ | उद्देशकः-२ आहारः | २६ |
| -१८३ | उद्देशकः-३ क्रिया | १९१ | -२८५ | उद्देशकः-३ महाआश्रवः | २६ |
| -१८८ | उद्देशकः-४ यानं | १९७ | -२९० | उद्देशकः-४ सप्रदेशकः | २७ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठाङ्कः |
|---|---|---|---|---|---|
| -२९९ | उद्देशकः-५ तमस्कायः | २८४ | -४०४ | उद्देशकः-५ आजीविकः | ३९१ |
| -३०१ | उद्देशकः-६ भव्यः | २९० | -४०९ | उद्देशकः-६ प्रासुकआहारः | ३९७ |
| -३१२ | उद्देशकः-७ शाली | २९२ | -४११ | उद्देशकः-७ अदत्तादानं | ४०३ |
| -३१६ | उद्देशकः-८ पृथ्वी | २९६ | ४२१ | उद्देशकः-८ प्रत्यनीकं | ४०७ |
| -३१९ | उद्देशकः-९ कर्म | ३०१ | -४२९ | उद्देशकः-९ प्रयोगबन्धः | ४१९ |
| -३२६ | उद्देशकः-१० अन्ययुथिकः | ३०३ | -४३७ | उद्देशकः-१० आराधना | ४४५ |
| ❑ | शतकं-७ | ३०५ | ❑ | शतकं-९ | ४५४ |
| -३३८ | उद्देशकः-१ आहारः | ३०६ | -४३९ | उद्देशकः-१ जम्बू | ४५४ |
| -३४४ | उद्देशकः-२ विरतिः | ३१३ | -४४३ | उद्देशकः-२ ज्योतिष्कः | ४५६ |
| -३५० | उद्देशकः-३ स्थावरं | ३१९ | -४४४ | उद्देशकः-३-३० अन्तर्द्वीपः | ४५८ |
| -३५२ | उद्देशकः-४ जीवः | ३२२ | -४५० | उद्देशकः-३१ असोच्चा | ४६० |
| -३५४ | उद्देशकः-५ पक्षी | ३२३ | -४५९ | उद्देशकः-३२ गांगेयः | ४६९ |
| -३६० | उद्देशकः-६ आयुः | ३२४ | -४७० | उद्देशकः-३३ कुण्डग्रामः | ४८८ |
| -३६४ | उद्देशकः-७ अनगारः | ३३० | -४७२ | उद्देशकः-३४ पुरुषधातकः | ५२४ |
| -३७० | उद्देशकः-८ छद्मस्थः | ३३३ | ❑ | शतकं-१० | ५२७ |
| -३७६ | उद्देशकः-९ असंवृतः | ३३६ | -४७६ | उद्देशकः-१ दिशा | ५२७ |
| -३८० | उद्देशकः-१० अन्यतीर्थिकः | ३४४ | -४८१ | उद्देशकः-२ संवृत अनगारः | ५३० |
| ❑ | शतकं-८ | ३४९ | -४८६ | उद्देशकः-३ आत्मऋद्धिः | ५३४ |
| -३८८ | उद्देशकः-१ पुद्गलः | ३५० | -४८७ | उद्देशकः-४ श्यामहस्ती | ५३६ |
| -३९६ | उद्देशकः-२ आशिविषः | ३६२ | -४८९ | उद्देशकः-५ देवः | ५३८ |
| -३९९ | उद्देशकः-३ वृक्षः | ३८८ | -४९२ | उद्देशकः-६ समा | ५४२ |
| -४०० | उद्देशकः-४ क्रिया | ३९१ | -४९३ | उद्देशकाः-७-३४ अन्तर्दीपः | ५४२ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# भगवतीअङ्गसूत्रं-१ सटीकं

[अपरनाम - व्याख्याप्रज्ञप्तयङ्गसूत्रं]

शतकं - १....१०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્‌ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

**શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

# ५ भगवतीअङ्गसूत्रं

## सटीकं

## (अपरनाम - व्याख्या प्रज्ञप्त्यङ्गसूत्रं-सटीकं)

(मूलम् + अभयदेवसूरिविरचिता वृत्तिः)

॥१॥ सर्वज्ञमीश्वरमनन्तमसङ्गमग्र्यं, सार्व्वीयमस्मरमनीशमनीहमिद्धम्।
सिद्धिं शिवं शिवकरं करणव्यपेतं, श्रीमज्जिनं जितरिपुं प्रयतः प्रणौमि॥

॥२॥ नत्वा श्रीवर्द्धमानाय, श्रीमते च सुधर्म्मणे।
सर्वानुयोगवृद्धेभ्यो, वाण्यै सर्वविदस्तथा॥

॥३॥ एतट्टीकाचूर्णी जीवाभिगमादिवृत्तिलेशांश्च।
संयोज्य पञ्चमाङ्गं विवृणोमि विशेषतः किञ्चित्॥

व्याख्यातं समवायाख्यं चतुर्थमङ्गम्, अथावसरायातस्य 'विवाहपन्नत्ति'त्तिसञ्ज्ञितस्य पञ्चमाङ्गस्य समुन्नतजयकुञ्जरस्येव ललितपदपद्धतिप्रबुद्धजनमनोरञ्जकस्य उपसर्गनिपाताव्ययस्वरूपस्य घनोदारशब्दस्य लिङ्गविभक्तियुक्तस्य सदाख्यातस्य सल्लक्षणस्य देवताधिष्ठितस्य सुवर्णमण्डितोद्देशकसय नानाविधाद्भुतप्रवरचरितस्य षटत्रिंशत्प्रश्नसहस्रप्रमाणसूत्रदेहस्य चतुरनुयोगचरणस्य ज्ञानचरणनयनुगलस्य द्रव्यास्तिकपर्यायास्तिकनयद्वितयन्दमुशलस्य निश्चयव्यवहारनयसमुन्नतकुम्भद्वयस्य प्रस्तावनावचनरचनाप्रकाण्डशुण्डादण्स्य निगमनवचनातुच्छपुच्छस्य कालाद्यष्टप्रकारप्रवचनोपचारचारुपरिकरस्य उत्सर्गापवादसमुच्छलदतुच्छघण्टायुगलघोषस्य यशःपटहपटुप्रतिरवापूर्णदिकचक्रवालस्य स्याद्वादविशदाङ्कुशवशीकृतस्य विविधहेतुहेतिसमूहसमन्वितस्य मिथ्यात्वाज्ञानाविरमणलक्षणरिपुबलदलनाय श्रीमन्महावीरमहाराजेन नियुक्तस्य बलनियुक्तककल्पगणनायकमतिप्रकल्पितस्य मुनियोधैरनाबाधमधिगमाय पूर्वमुनिशिल्पिकल्पितोर्बहुप्रवरगुणत्वेऽपि ह्रस्वतया महातामेव वाञ्छितवस्तुसाधनसमर्थयोर्वृत्तिचूर्णिनाडिकयोस्तदन्येषां च जीवाभिगमादिविविधविवरणदवरकलेशानां संघट्टनेन बृहत्तरा अत एवामहतामप्युपकारिणी हस्तिनायकादेशादिव गुरुजनवचनात्पूर्वमुनिशिल्पि- कुलोत्पन्नैरस्माभिर्नाडिकेवेयं वृत्तिरारभ्यते, इति शास्त्रप्रस्तावना।

## शतकं-१

। अथ 'विवाहपन्नत्ति'त्ति कः शब्दार्थ?, उच्यते, विविधा जीवाजीवादिप्रचुरतरपदार्थविषयाः आ-अभिविधिना-कथञ्चिन्निखिलज्ञेयव्याप्तया मर्यादया वा-परस्परासंकीर्णलक्षणाभिधान रूपया? ख्यानानि-भगवतो महावीरस्य गौतमादिविनेयान् प्रति प्रश्नतपदार्थप्रितपादनानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्यास्ताः प्रज्ञाप्यन्ते-प्ररूप्यन्ते भगवता सुधर्मस्वामि जम्बूनामानमभियस्याम् १ ।

अथवा विविधतया विशेषेण वा आख्यायन्त इति व्याख्याः-अभिलाप्यपदार्थवृत्तयस्ताः प्रज्ञाप्यन्ते यस्याम् २ ।

व्याख्यानाम्-अर्थप्रतिपादनानां प्रकृष्टाः ज्ञप्तयो-ज्ञानानि यस्यां सा व्याख्याप्रज्ञप्ति ३ ।

अथवा व्याख्यायाः- अर्थकथनस्य प्रज्ञायाश्च-तद्धेतुभूतबोधस्य व्याख्यासु वा प्रज्ञाया आप्ति-प्राप्ति आत्तिर्वा-आदानं यस्याः सकाशादसौ व्याख्याप्रज्ञाप्तिव्यार्खयाप्रज्ञात्तिर्वा ४-५ ।

व्याख्याप्रज्ञाद्वा-भगवतः सकाशादाप्तिरात्तिर्वा गणधरस्य यस्याः सा तथा ६ ।

अथवा विवाहा-विविधा वा-प्रमाणाबाधिताः प्रज्ञा आप्यन्ते यस्याः; विवाहा चासौ विबाधा चासौ वा प्रज्ञप्तिश्च-अर्थप्रज्ञप्तिश्चार्थ प्ररूपणा विवाहप्रज्ञप्तिर्विवाहप्रज्ञाप्ति विबाधप्रज्ञाप्तिर्विबाध-प्रज्ञप्तिर्वा ७-८-९-१० । इयं च भगवतीत्यपि पूज्यत्वेनाभिधीयते इति ।

इह व्याख्यातारः शास्त्रव्याख्यानारम्भे फलयोगमङ्गलसमुदायार्थादीनि द्वाराणि वर्णयन्ति, तानि चेह व्याख्यायां विशेषावश्यकादिभ्योऽवसेयानि ।

शास्त्रकारास्तु विघ्नविनायकोपशमननिमित्तं विनेयजनप्रवर्त्तनाय च (मङ्गलं) शिष्टजन-समयसमाचरणाय वा मङ्गलाभिधेयप्रयोजनसम्बन्धानुदाहरन्ति, तत्र च सकलकल्याणकारण-तयाऽधिकृतशास्त्र श्रेयोभूतत्वेन विघ्नः संभवतीति तदुपशमनाय मङ्गलान्तरव्यपोहेन भावमङ्गल-मुपादेय, मङ्गलान्तरस्यानैकान्तिकत्वादनात्यन्तिकत्वाच्, भावमङ्गलस्य तु तद्विपरीततयाऽ-भिलषितार्थसाधनसमर्थत्वेन पूज्यत्वात्, आह च –

॥ १ ॥ "किं पुण तमणेगतियमच्चंतं च ण जओऽभिहाणाई ।
तव्विवरीयं भावे तेण विसेसेण तं पुज्जं ॥

भावमङ्गलस्य च तपःप्रभृतिभेदभिन्नत्वेनानेकविधत्येऽपि परमेष्ठिपञ्चकनमस्काररूपं विशेषेणोपादेयं, परमेष्ठिनां मङ्गलत्वालोकोत्तमत्वशरण्यत्वाभिधानात्, आह च-"चत्तारि मंगल" मित्यादि, तन्नमस्कारस्य च सर्वपापप्रणाशकत्वेन सर्वविघ्नोपशमहेतुत्वात् आह च –

॥ १ ॥ "एष पञ्चनमस्कारः, सर्वपापप्रणाशनः ।
मङ्गलानां च सर्वेषां, प्रथमं भवति मङ्गलम् ॥

अत एवायं समस्तश्रुतस्कन्धानामादावुपादीयते, अत एव चायं तेषामभ्यन्तरतयाऽ-भिधीयते, यदाह-'सो सव्वसुयक्खंधऽब्भंतरभूओ'"त्ति, अतः शास्त्रस्यादावेव परमेष्ठिपञ्चकन-मस्कारमुपदर्शयन्नाह–

## –: शतकं-१ उद्देशकः-१ :–

*मू. (१) नमो अरहंताणं नमो सिद्धाणं नमो आयरियाणं नमो उवज्झायाणं नमो (लोए) सव्वसाहूणं ।*

**वृ.** तत्र नम इति नैपातिकं पदं द्रव्यभासङ्कोचार्थम्, आह च-"नेवाइयं पयं दव्वभाव-संकोयण पयत्थो" 'नमः' करचरणमस्तकसुप्रणिधानरूपो नमस्कारो भवत्वित्यर्थः । केभ्य इत्याह–

'अर्हद्भ्यः' अमरवरविनिर्मिताशोकादिमहाप्रातिहार्यरूपां पूजामर्हन्तीत्य-र्हन्तः, यदाह–

॥ १ ॥ "अरिहंति वंदणनमंसणाणि अरिहंति पूयसक्कारं ।
सिद्धिगमणं च अरहा अरहंता तेण वुच्चंति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्तेभ्यः, इह च चतुर्थ्यर्थे षष्ठी प्राकृतशैलीवशात् ।

अविद्यमानं वा रहः-एकान्तरूपो देशः अन्तश्चमध्यं गिरिगुहादीनां सर्ववेदितया समस्तवस्तुस्तोमगतप्रच्छन्नत्वस्याभावेन येषां ते अरहोऽन्तरः अतस्तेभ्योऽरहोऽन्तर्भ्यः ।

अथवा-अविद्यमानो रथः-स्यन्दनः सकलपरिग्रहोपलक्षणभूतोऽन्तश्च-विनाशो जराद्युपलक्षणभूतो येषां ते अरथान्ता अतस्तेभ्यः ।

अथवा 'अरहंताणं'ति क्वचिदप्यासक्तिमगच्छद्भ्यः क्षीणरागत्वात् ।

अथवा अरहयद्भ्यः-प्रकृष्टरागादिहेतुभूतमनोज्ञेतरविषयसंपर्केऽपि वीतरागत्वादिकं स्वं स्वभावमत्यजद्भ्य इत्यर्थः ।

—'अरिहंताणंति पाठान्तरं, तत्र कर्मारिहन्तृभ्यः, आह च —

॥ १ ॥ "अट्ठविहंपिय कम्मं अरिभूयं होइ सयलजीवाणं ।
तं कम्ममरिं हंता अरिहंता तेण वुच्चंति ॥

'अरुहंताण' मित्यपि पाठान्तरं, तत्र 'अरोहद्भ्यः' अनुपजायमानेभ्यः, क्षीणकर्म्मबीजत्वात्, आह च —

॥ १ ॥ "दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः ।
कर्म्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥

नमस्करणीयता चैषां भीमभवगहनभ्रमणभीतभूतानामनुपमानन्दरूपपरमपदपुरपथप्रदर्शकत्वेन परमोपकारित्वादिति ।

'नमो सिद्धाणं' ति, सितंबद्धमष्टप्रकारं कर्म्मेन्धनं ध्मातं-दग्धं जाज्वल्यमानशुक्लध्यानानलेन यैस्ते निरुक्तविधिना सिद्धाः ।

अथवा 'षिधु गतौ' इति वचनात् सेधन्ति स्म-अपुनरावृत्त्या निर्वृतिपुरीमगच्छन् ।

अथवा 'षिधु संराद्धौ' इतिवचनात् सिद्धयन्ति स्म-निष्ठितार्था भवन्ति स्म, अथवा 'षिधूञ् शास्त्रे माङ्गल्ये च' इतवचनात् सेधन्ति स्म-शासितारोऽभूवन् मङ्गल्यरूपतां चानुभवन्ति स्मेति सिद्धाः ॥ अथवा सिद्धाः-नित्याः, अपर्यवसानस्थितिकत्वात्, प्रख्याता वा भव्यैरुपलब्धगुणसन्दोहत्वात्, आह च —

॥ १ ॥ "ध्मातं सितं येन पुराणकर्म्म, यो वा गतो निर्वृतिसौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो, यः सोऽस्तु सिद्धः कृतमङ्गलो मे ॥

अतस्तेभ्यो नमः, नमस्करणीयता चैषामविप्रणाशिज्ञादर्शनसुखवीर्यादिगुणयुक्ततया स्वविषयप्रमोदप्रकर्षोत्पादनेन भव्यानामतीवोपकारहेतुत्वादिति ।

'नमो आयरियाणं'ति, आ-मर्यादया तद्विषयविनयनरूपया चर्यन्ते-सेव्यन्ते जिनशासनार्थोपदेशकतया तदाकाङ्क्षिभिरित्याचार्या, उक्तञ्च —

॥ १ ॥ "सुत्तत्थविऊ लक्खणजुत्तो गच्छस्स मेढिभूओ य ।
गणतत्तिविप्पमुक्को अत्थं वाएइ आयरिओ ॥

अथवा-आचारो-ज्ञानाचारादि पञ्चधा आ-मर्यादया वा चारो-विहार आचारस्तत्र स्वयंकरणात् प्रभाषणात् प्रदर्शनाच्चेत्याचार्या, आह च—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "पंचविहं आयारं आयरमाणा तहा पयासंता।
आयारं दंसंता आयरिया तेण वुच्चंति ॥

अथवा आ-ईषद् अपरिपूर्णा इत्यर्थः, चारा-हेरिका ये ते आचाराः, चारकल्पा इत्यर्थः।

युक्तायुक्तविभागनिरूपणनिपुणा विनेयाः अतस्तेषु साधवो यथावच्छस्त्रार्थोपदेशकतया इत्याचार्या अतस्तेभ्यः, नमस्यता चैषामाचारोपदेशकतयोपकारित्वात्।

'नमो उवज्झायाणं' ति उप-समीपमागत्याधीय 'इङ अध्ययने' इतिवचनात् पठ्यते 'इण गता' वितिवचनाद्वा अधि-आधिक्येन गम्यते, 'इक् स्मरणे' इति वचनाद्वा स्मर्यते सूत्रतो जिनप्रवचनं येभ्यस्ते उपाध्यायाः, यदाह –

॥१॥ "बारसंगो जिणक्खाओ, सज्झाओ कहिओ बुहेहिं तं -
उवइसंति जम्हा उवझाया तेण वुच्चंति ॥

–अथवा उपाधानमुपाधि-संनिधिस्तेनोपाधिना उपाधौ वा आयो-लाभः –श्रुतस्य येषामुपाधीनां वा-विशेषणानां प्रक्रमाच्छेभवनानामायो-लाभो येभ्यः। अथवा उपाधिरेव-संनिधिरेव आयम्-इष्टफलं दैवजनितत्वेन अयानाम्-इष्टफलानां समूहस्तदेकहेतुत्वाद्येषाम्।

अथवा आधीनां-मनःपीडानामायो-लाभ आध्यायः अधियां वा-नञः कुत्सार्थत्वात् कुबुद्धीनामायोऽध्यायः 'ध्यै चिन्तायाम्' इत्यस्य धातोः प्रयोगान्नञः कुत्सार्थत्वादेव च दुध्यानं वाऽध्यायः उपहत आध्यार्यः अध्यायो वा यैस्ते उपाध्याया अतस्तेभ्यः, नमस्यता चैषां सुसंप्रदाया-यातजिनवचनाध्यापनतो विनयनेन भव्यानामुपकारित्वादिति।

'नमो सव्वसाहूण' मिति, साधयन्ति ज्ञानादिशक्तिभिर्मोक्षमिति साधवः समतां वा सर्वभूतेषु ध्यायन्तीति निरुक्तिन्यायात्साधवः, यदाह–

॥१॥ "निव्वाणसाहए जोए, जम्हा साहेंति साहुणो।
समा य सव्वभूएसु, तम्हा ते भावसाहुणो ॥

साहायकं वा संयमकारिणां धारयन्तीति साधवः, निरुक्तेरेव, सर्वे च ते सामायिकादिवि-शेषणाः प्रमत्तादयः पुलाकादयो वा जिनकल्पिकप्रतिमाकल्पिकयथालन्दकल्पिकपरिवाहार-विशुध्दिकल्पिकस्थविरस्थितकल्पि (कास्थितकल्पि) कस्थितास्थितकल्पिक क्पातीतभेदाः प्रत्येकबुद्ध- स्वयम्बुद्धबुद्धबोधितभेदाः भारतादिभेदाः सुषमदुष्षमादिविशेषिता वा साधवः सर्वसाधवः, सर्वग्रहणं च सर्वेषां गुणवतामविशेषनमनीयताप्रतिपादनार्थम्, इदं चार्हदादिपदेष्वपि बोद्धव्यं, न्यायस्य समानत्वादिति।

अथवा-सर्वेभ्यो जीवेभ्यो हिताः सार्वास्ते च ते साधवश्च सार्वस्य वा-अर्हतो न तु बुद्धादेः साधवः सार्वसाधवः, सर्वान् वा शुभयोगान् साधयन्ति-कुर्वन्ति सार्व्वान् वा-अर्हतः साधयन्ति-तदाज्ञाकरणादाराधयन्ति प्रतिष्ठापयन्ति वा दुर्नयनिराकरणादिति सर्व्वसाधवः सार्वसाधवो वा

अथवा-श्रव्येषु-श्रवणार्हेषु वाक्येषु, अथवा सव्यानि-दक्षिणान्यनुकूलानि यानि कार्याणि तेषु साधवो निपुणाः श्रव्यसाधवः सव्यसाधवो वाऽतस्तेभ्यः।

'नमो लोए सव्वसाहुणं' ति क्वचित्पाठः, तत्र सर्वशब्दस्य देशसर्वतायामपि दर्शनादप-रिशेषसर्वतोपदर्शनार्थमुच्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'लोके' मनुष्यलोके न तु गच्छदी ये सर्वसाधवस्तेभ्यो नम इति ।

एषां च नमनीयता मोक्षमार्गसाहायककरणेनोपकारित्वात्, आह च –

॥ १ ॥ "असहाए सहायत्तं करेंति मे संयमं करेंतस्स ।
एएण कारणेणं नमामिऽहं सव्वसाहूणं ॥

ननु यद्ययं सङ्क्षेपेण नमस्कारस्तदा सिद्धसाधूनामेव युक्तः, तद्ग्रहणेऽन्येषामप्यर्हदादीनां ग्रहणात्, यतोऽर्हदादयो न साधुत्वं व्यभिचरन्ति, अथ बिस्तरेण तदा ऋषभादिव्यक्तिसमुच्चारणतोऽसौ वाच्यः स्यादिति, नैवं ।

यतो न साधुमात्रनमस्कारेऽर्हदादिनमस्कारफलमवाप्यते, मनुष्यमात्रनमस्कारे राजादिनमस्कारफलवदिति कर्त्तव्यो विशेषतोऽसौ, प्रतिव्यक्ति तु नासौ वाच्योऽशक्यत्वादेवेति

ननु यथाप्रधानन्यानमङ्गीकृत्य सिद्धादिरानुपूर्वी युक्ताऽत्र, सिद्धानां सर्वथा कृतकृत्यत्वेन सर्वप्रधानत्वात्, नैवम्, अर्हदुपदेशेन सिद्धानां ज्ञानमानत्वादर्हतामेव च तीर्थप्रवर्त्तनेनात्यन्तोपकारित्वादित्यर्हदादिरेव सा, नन्वेवमाचार्यादि प्राप्नोति, क्वचित्काले आचार्येभ्यः सकाशादर्हदादीनां ज्ञायमानत्वात्, अत एव च तेषामेवात्यन्तोपकारित्वात्, नैवम्, आचार्याणामुपदेशदानसामर्थ्यमर्हदुपदेशत एव, न हि स्वतन्त्रा आचार्यादय उपदेशतोऽर्थज्ञापकत्व प्रतिपद्यन्ते, अतोऽर्हन्त एव परमार्थेन सर्वार्थज्ञापकाः ।

तथा अर्हत्परिषद्रूपा एवाचार्यादयोऽतस्तान् नमस्कृत्यार्हन्नमस्करणमयुक्तम्, उक्तं च–

॥ १ ॥ "ने य कोइवि परिसाए पणमित्ता पणमए रन्नो" त्ति ॥

एवं तावत्परमेष्ठिनो नमस्कृत्याधुनातनजनानां श्रुतज्ञानस्यात्यन्तोपकारित्वात् तस्य च द्रव्यभावश्रुतरूपत्वात् भावश्रुतस्य च द्रव्यश्रुतहेतुकत्वात्सञ्ज्ञाऽक्षररूपं द्रव्यश्रुतं नमस्कुर्व्वन्नाह-

**मू.** *(२) नमो बंभीए लिवीए ।*

**वृ.** लिपि-पुस्तकादावक्षरविन्यासः, सा चाष्टादशप्रकाराऽपि श्रीमन्नाभेयजिनेन स्वसुताया ब्राह्मीनामिकाया दर्शिता ततो ब्राह्मीत्यभिधीयते, आह च –

"ले हं लिवीविहाणं जिणेण बंभीइ दाहिणकरेणं" ।
इत्यतो ब्राह्मीतिस्वरूपविशेषणं लिपेरिति ॥

ननुअधिकृतशास्त्रस्यैव मङ्गलत्वात्किं मङ्गलेन ?, अनवस्थादिदोषप्राप्तेः, सत्यं, किन्तु शिष्यमतिमङ्गलपरिग्रहार्थं मङ्गलोपादानं शिष्टसमयपरिपालनाय वेत्युक्तमेवेति, अभिधेयादयः पुनरस्य सामान्येन व्याख्याप्रज्ञप्तिरिति नाम्नैवोक्ता इति ते पुनर्नोच्यन्ते, तत एव श्रोतृप्रवृत्त्यादीष्टफलसिद्धेः । तथाहि-इह भगवताऽर्थव्याख्या अभिधेयतया उक्ताः, तासां च प्रज्ञापना बोधो वाऽनन्त- रफलं, परम्परफलं तु मोक्षः, स चास्याऽऽप्तवचनत्वादेव फलतया सिद्धो, न ह्याप्तः साक्षात् पारम्पर्येण वा यन्नस्त्र मोक्षाङ्गं तत्प्रतिपादयितुमुत्सहे, अनाप्तत्वप्रसङ्गात्, तथाऽयमेव सम्बन्धो यदुतास्य शास्त्येदं प्रयोजनमिति ।

तदेवमस्य शास्त्यैकश्रुतस्कन्धरूपस्य सातिरेकाध्ययनशतस्वभावस्य उद्देशकसहस्री (१००००) प्रमाणस्य षटत्रिंशत्प्रश्न (३६०००) सहस्रपरिमाणस्य अष्टाशीतिसहस्राधिकलक्षद्वय (२८८०००) प्रमाणपदराशेर्मङ्गलादीन दर्शितानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ प्रथमे शते ग्रन्थान्तरपरिभाषयाऽध्ययने दशोद्देशका भवन्ति, उद्देशकाश्च-अध्ययनार्थदेशाभिधायिनोऽध्ययनविभागाः ॥ उद्दिश्यन्ते-उपधानविधिना शिष्यस्याचार्येण यथा-एतावन्तमध्यनभागमधीष्वे-त्येवमुद्देशास्त एवोद्देशकाः, तांश्च सुखधरणस्मरणादिनिमित्त-माद्याभिधेयाभिधानद्वारेण संग्रहीतुमि- मां गाथामाह-

**मू. (३)** *रायगिह चलण दुक्खे कंखपओसे य पगंइ पुढवीओ।*
*जावंते नेरइए बाले गुरुए य चलणाओ ॥*

**वृ.** अधिकृतगाथार्थो यद्यपि वक्ष्यमाणोद्देशकदशकाभिगमे स्वयमेवावगम्यते तथाऽपि बालानां सुखावबोधार्थमभिधीयते-

तत्र 'रायगिहे'ति लुप्तसप्तम्येकवचनत्वाद्राजगृहेनगरे वक्ष्यमाणोद्देशकदशकस्यार्थो भगवता श्रीमहावीरेण दर्शित इति व्याख्येयम्, एवमन्यत्रापीष्टविभक्त्यन्तताऽवसेया।

'चलण'त्ति चलनविषयः प्रथमोद्देशकः 'चलमाणे चलिए'इत्याद्यर्थनिर्णयार्थ इत्यर्थ :१

'दुक्खे'त्ति दुःखविषयो द्वितीयः 'जीवो भदन्त ! स्वयंकृतं दुःखं वेदयती'त्यादिप्रश्ननिर्णयार्थ इत्यर्थः २ ॥ 'कंखपओसे'त्ति काङ्क्षा-मिथ्यात्वमोहनीयोदयसमुत्थोऽन्यान्यदर्शनग्रहरूपो जीवपरिणामः स एव प्रकृष्टो दोषो-जीवदूषणं काङ्क्षाप्रदोषस्तद्विषयस्तृतीयः, 'जीवेन भदन्त काङ्क्षामोहनीयं कर्म्म कृतमित्याद्यर्थनिर्णयार्थ इत्यर्थः ३।

चकारः समुच्चये, 'पगइ'त्ति प्रकृतयः-कर्म्मभेदाश्चतुर्थोद्देशस्यार्थः, 'कति भदन्त ! कर्म्म-प्रकृतयः ?' इत्यादिश्चासौ ४॥ 'पुढवीओ'त्ति रत्नप्रभादिपृथिव्यः पञ्चमे वाच्याः, 'कति भदन्त! पृथिव्यः ?' इत्यादि च सूत्रमस्य ५।

'जावंते'त्ति यावच्छब्दोपलक्षितः षष्ठः 'यावतो भदन्त !' अवकाशान्तरात्सर्यं इत्यादिसूत्रश्चासौ ६॥ नेरइए त्ति नैरयिकशब्दोपलक्षितः सप्तः, नैरयिको भदन्त ! निरये उत्पद्यमान इत्यादि च तत्सूत्रं ७।

'बाले'त्ति बालशब्दोपलक्षितोऽष्टमः, 'एकान्तबालो भदन्त ! मनुष्य' इत्यादिसूत्रश्चासौ ८।

'गुरुए'त्ति गुरुकविषयो नवमः, 'कथं भदन्त ! जीवा गुरुकत्वमागच्छन्ति ?' इत्यादि च सूत्रमस्य ९। चः समुच्चयार्थः, 'चलणाओ'त्ति बहुवचननिर्देशाच्चलनाद्यादशमोद्देशकस्यार्था ॥

तत्सूत्रं चैवम्-'अन्ययूथिका भदन्त !' एवमाख्यान्ति-चलद् अचलितमित्यादिति प्रथमशतोद्देशकसङ्ग्रहणिगाथार्थः। तदेवं शास्त्रोद्देशे कृतमङ्गलादिकृत्योऽपि प्रथमशतस्यादौ विशेषतो मङ्गलमाह-

**मू. (४)** *नमो सुयस्स।*

**वृ.** 'नमो सुयस्स'त्ति नमस्कारोऽस्तु 'श्रुताय' द्वादशाङ्गीरूपायार्हत्प्रवचनाय, नन्विष्टदेव-तानमस्कारो मङ्गलार्थो भवति, न च श्रुतमिष्टवतेति कथमयं मङ्गलार्थ इति ?, अत्रोच्यते, श्रुतमिष्ट-देवतैव अर्हतां नमस्करणीयत्वात्, सिद्धवत्, नमस्कुर्वन्ति च श्रुतमर्हन्तो।

'नमस्तीर्थाये'ति भणनात्, तीर्थं च श्रुतं संसारसागरोत्तरणासाधारणकारणत्वात्, तदा-धारत्वेनैव च सङ्घस्य तीर्थशब्दाभिधेयत्वात्, तता सिद्धानपि मङ्गलार्थमर्हन्तो नमस्कुर्वन्त्येव।

॥ ३ ॥ "काऊण नमोक्कारं सिद्धाणमभिग्गहं तु सो गिण्हे" इति वचनादिति ॥

एवं तावत्प्रथमशतोद्देशकाभिधेयार्थलेशः प्राग्दर्शितः, ततश्च 'यथोद्देशं निर्देश' इति

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

न्यायमाश्रित्यादितः प्रथमोद्देशकार्थप्रपञ्चो वाच्यः, तस्य च गुरुपर्वक्रमलक्षणं सम्बन्धमुपदर्शयन् भगवान् सुधर्म्मस्वामी जम्बूस्वामिनमाश्रित्येदमाह—

**मू. (५)** *तेणं कालेणं तेणं समएणं रायगिहे नामं नयरे होत्था, वण्णओ, तस्स णं रायगिहस्स नगरस्स बहिया उत्तरपुरच्छिमे दिसीभाए गुणसिलए नामं चेइए होत्था, सेणिए राया, चेल्लणा देवी*

**वृ.** अथ कथमिदमवसीयते यदुत-सुधर्म्मस्वामी जम्बूस्वामिनमभि संबन्धग्रन्थमुक्तवान्-इति ?, उच्यते, सुधर्म्मस्वामिवाचनाया एवानुवृत्तत्वात्, आह च-"तित्थं च सुहम्माओ निरवच्चा गणहरा सेसा" सुधर्म्मस्वामिनश्च जम्बूस्वाम्येव प्रधानः शिष्योऽतस्तमाश्रित्येवं वाचना प्रवृत्तेति, तथा षष्ठाङ्गे उपोद्घात एवं दृश्यते-यथा किल सुधर्म्मस्वामिनं प्रति जम्बूनामा प्राह –

"जइ णं भंते ! पंचमस्स अंगस्स विवाहपन्नत्तीए समणेणं भगवया महावीरेणं अयमट्ठे पन्नत्ते, छट्ठस्स णं भंते ! के अट्ठे पन्नत्ते ?" त्ति, तत एवमिहापि सुधर्म्मैव जम्बूनामानं प्रत्युपोदघा-तमवश्यमभिहितवानित्यवसीयत इति। अयं चोपोद्घातग्रन्थो मूलटीकाकृता समस्तं शस्त्रमाश्रित्य व्याख्यातोऽप्यस्वाभिः प्रथमोद्देशकमाश्रित्य व्याख्यास्यते, प्रतिशतं प्रत्युद्देशकमुपोदघातस्येह शास्त्रेऽनेकधाऽभिधानादिति, अयं च प्राग् व्याख्यातो नमस्कारादिको ग्रन्थो वृत्तिकृता न व्याख्यातः कुतोऽपि कारणादिति।

'ते णं काले णं' ति, ते इति-प्राकृतशैलीवशात्तमस्मिन् यत्र तन्नगरमासीत्, णंकारोऽन्यत्रापि वाक्यालङ्कारार्थो यथा 'इमा णं भंते ! पुढवी' त्यादिषु 'काले' अधिकृतावसर्प्पिणीचतुर्थविभागलक्षण इति, 'ते णं' ति तस्मिन् यत्रासौ भगवान् धर्मकथामकरोत् 'समए णं' ति समये-कालस्यैव विशिष्टे विभागे, अथवा तृतीयैवेयं, ततस्तेन कालेन हेतुभूतेन तेन समयेन हेतुभूतेनैव 'रायगिहे' त्ति एकारः प्रथमैकवचनप्रभवः 'कयरे आगच्छइ दित्तरूवे" इत्यादाविव, ततश्च राजगृहं नाम नगरं 'होत्थ' त्ति भवत्।

नन्विदानीमपि तन्नगरमस्तीत्यतः कथमुक्तममवदिति ?, उच्यते, वर्णकग्रन्थोक्त-विभूतियुक्तं तदैवाभवत् न तु सुधर्म्मस्वामिनो वाचनादानकाले, अवसर्पिणीत्वात्कालस्य तदीयशुभ-भावानां हानिभावात्। 'वन्नओ' त्ति इह स्थानके नगरवर्णको वाच्यः, ग्रन्थगौरवभयादिह तस्यालिखि-तत्वात्, स चैवम्-"रिद्धत्थिमियसमिद्धे" ऋद्धं-पुरभवनादिभिर्वृद्धं स्तिमितं-स्थिरं स्वचक्रपरचक्रा-दिभयवर्जितत्वात् समृद्धं-धन धान्यादिविभूतियुक्तत्वात्, ततः पदत्रयस्य कर्म्मधारयः, 'पमुइय-जणजावए' प्रमुदिताःहृष्टाः प्रमोदकारणवस्तूनां सद्भावाज्जना-नगरवास्तव्यलोका जानपदाश्च-जनपदभवास्तत्रायाताः सन्तो यत्र तत् प्रमुदितजनजानपदमित्यादिरौपपातिकात् सव्याख्यानोऽत्र दृश्यः। 'तस्स णं' ति षष्ठयाः पञ्चम्यर्थत्वात्तस्माद्राजगृहान्नगरात् 'बहिय' त्ति बहिस्तात् 'उत्तरपुर-च्छिमे' त्ति उत्तरपौरस्त्ये 'दिसीभाए' त्ति दिशां भागो दिग्रूपो वा भागो गगनमण्डलस्य दिग्भागस्तत्र

'गुणसिलकं' नाम 'चेइयं' ति चितेर्लेप्यादिचयनस्य भावः कर्म्म वेति चैत्यं-सञ्ज्ञाशब्दत्वाद्देव-बिम्बं तदाश्रयत्वात्तद्गृहमपि चैत्यं, तच्चेह व्यन्तरायतनं न तु भगवतामर्हतमायतनं 'होत्थ' त्ति बभूव, इह च यन्न व्याख्यास्यते तत्प्रायः सुगमत्वादित्यवसेयमिति।

**मू. (६)** *ते णं काले णं ते णं समए णं समणे भगवं महावीरे।*

*आइगरे तित्थगरे सहसंबुद्धे परुसुत्तमे पुरिससीहे पुरिसवरपुंडरीए पुरिसवरगंधहत्थीए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*लोगुत्तमे लोगनाहे लोगप्पदीवे लोगपज्जोयगरे अभयदए चक्खुदए मग्गदए सरणदए धम्मदेसए धम्मसारहीए धम्मवरचाउरंतचक्कवट्टी अप्पडिहयवरनाणदंसणधरे वियट्टछउमे जिणे जाणए बुद्धे बोहए मुत्ते मोयए सव्वन्नू सव्वदरिसी सिवमयलमरुयमनंतमक्खयमव्वाबाहमपुनरावत्तयं सिद्धिगइनामधेयं ठाणं संपाविउकामे जाव समोसरणं ।*

**वृ.** 'समणे'त्ति 'श्रमु तपसि खेदे चे'ति वचनात् श्राम्यति-तपस्यतीति श्रमणः, अथवा सह शोभनेन मनसा वर्त्तत इति समनाः, शोभनत्वं च मनसो व्याख्यातं स्तवप्रस्तावात्, मनोमात्र-सत्त्वस्यास्तवत्वात्, संगतं वा-यथा भवत्येवमणतिभाषते समो वा सर्वभूतेषु सन् अणति-अनेकार्थ-त्वाद्धातूनां प्रवर्त्तत इति समणो निरुक्तिवशाद् भवति, 'भगवं'ति भगवान्-एश्वर्यादियुक्तः पूज्य इत्यर्थः । 'महावीरे'त्ति वीरः 'सूर वीर विक्रान्तावि'तिवचनात् रिपुनिराकरणतो विक्रान्तः, स च चक्रवर्त्यादिरपि स्यादतो विशेष्यते-महांश्चासौ दुर्जयान्तररिपुतिरस्करणाद्वीरश्चेति महावीरः, एतच्च देवैर्भगवतो गौणं नाम कृतं, यदाह-"अयमे भयभेरवाणं खंतिखमे परिसहोवसग्गाणं । देवेहिं (से नामं) कए (समणे भगवं) महावीरेत्ति," ।

'आदिकरे'त्ति आदौ-प्रथमतः श्रुतधर्मम्-आचारादिग्रन्थात्मकं करोति-तदर्थप्रणायकत्वेन प्रणयतीत्येवंशील आदिकरः, आदिकरत्वाच्चसौ किंविध इत्याह—तित्थयरे'त्ति तरन्ति तेन संसार-सागरमिति तीर्थ-प्रवचनं तदव्यतिरेकाच्चेह सङ्घस्तीर्थ तत्करणशीलत्वात्तीर्थकरः, तीर्थकरत्वं चास्य नान्योपदेशपूर्वकमित्यत आह–

'सहसंबुद्धे' त्ति, सह-आत्मनैव सार्द्धमनन्योपदेशत इत्यर्थः, सम्यग्-यथावद् बुद्धो-हेयोपादे-योपेक्षणीयवस्तुत्त्वं विदितवानिति सहसंबुद्धः । सहसंबुद्धत्वं चास्य न प्राकृतस्य सतः, पुरुषोत्तम-त्वादित्यत आह । 'पुरिसोत्तमो'त्ति, पुरुषाणां मध्ये तेन तेन रूपादिनाऽतिशयेनो द्गतत्वादूर्ध्वव-र्त्तित्वादुत्तमः पुरुषोत्तमः, अथ पुरुषोत्तमत्वमेवास्य सिंहाद्युपमानत्रयेण समर्थयन्नाह –

'पुरिससीहे'त्ति, सिहं इव सिंहः पुरुषश्चासौ सिंहश्चेति पुरुषसिंहः, लोकेन हि सिंहे शौर्यम-तिप्रकृष्टमभ्युपगतमतः शौर्ये स उपमानं कृतः, शौर्यं तु भगवतो बाल्ये प्रत्यनीकदेवेन भाप्य-मानस्याप्यभीतत्वात् कुलिशकठिनमुष्टिप्रहारप्रहतिप्रवर्द्धमानारशरीरकुब्जताकरणाच्चेति, तथा

'पुरिसवरपुंडरीए'त्ति, वरुपुण्डरीकं-प्रधानधवलसहपत्रं पुरुष एव वरपुण्डरीकमिवेति पुरुषवरपुण्डरीकं, धवलत्वं चास्य भगवतः सर्वाशुभमलीमसरहितत्वात् सर्वैश्च शुभानुभावैः शुद्धत्वात्, अथवा पुरुषाणां-तत्सेवकजीवानां वरपुण्डरीकमिव-वरच्छत्रमिव यः सन्तापातपनि-वारणसमर्थत्वात् भूषाकारणत्वाच्च स पुरुषवरपुण्डरीकमिति, तथा –

'पुरिसवरगंधहत्थि'त्ति पुरुष एव वरगन्धहस्ती पुरुवरगन्धहस्ती, यथा गन्धहस्तिनो गन्धेनापि समस्तेतरहस्तिनो भज्यन्ते तथा भगवतस्तद्देशविहरणेन ईतिपरचक्रदुर्भिक्षडमर-मरकादीनि दुरितानि नश्यन्तीति पुरुषवरगन्धहस्तीत्युच्यत इत्यत उपमात्रयात्पुरुषोत्तमोऽसौ । न चायं पुरुषोत्तम एव, किन्तु ?, लोकस्याप्युत्तमो, 'लोकनाथत्वाद्', एतदेवाह –

'लोगनाहे'त्ति, लोकस्य-सञ्ज्ञिभव्यलोकस्य नाथः-प्रभुर्लोकनाथः, नाथत्वं च योगक्षेम-कारित्वं, 'योगक्षेमकृन्नाथ' इति वचनात्, तच्चास्याप्राप्तस्य सम्यग्दर्शनादेर्योगकरणेन लब्धस्य च परिपालनेनेति, लोकनाथत्वं च यथाऽवस्थितसमस्तवस्तुस्तोमप्रदीपनादेवेत्यत आह –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'लोगपईवे'त्ति लोकस्य-विशिष्टतिर्यग्नरामररूपस्याऽऽन्तरतिमिरनिराकरणेन प्रकृष्ट-प्रकाशकारित्वात्प्रदीप इव प्रदीपः, इदं विशेषणं द्रष्ट लोकमाश्रित्योक्तम्, अथ दृश्यं आमाश्रित्याह ।। 'लोगपज्जोयगरे'त्ति, लोकस्य-लोक्यत इति लोकः अनया व्युत्पत्त्या लोकालोकस्वरूपस्य समस्तवस्तुस्तोमस्वभावस्याखण्डमार्त्तण्डमण्डलमिव निखिलभावस्वभावावभावससमर्थकेवलालोकपूर्वकप्रवचनप्रभापटलप्रवर्त्तनेन प्रद्योतं-प्रकाशं करोतीत्येवंशीलो लोकप्रद्योतकरः – उक्तविशेषणोपेतश्च 'मिहिरहरिहरहिरण्यगर्भादिरपि तत्तीर्थिकमतेन भवतीति कोऽस्य विशेष इत्याशङ्कायां तद्विशेषाभिधानायाह–'

'अभयदए'त्ति, न भयं दयते-ददाति प्राणापहरणरसिकेऽप्युपसर्गकारिणि प्राणिनीत्यभयदयः, अभया वा-सर्वप्राणिभयपरिहारवती दया-अनुकम्पा यस्य सोऽभयदयः, हरिहरमिहिरादयस्तु नैवमितिविशेषः, न केवलमसावपकारिणां तदन्येषां वाऽनर्थपरिहारमात्रं करोति अपि त्वर्थप्राप्तिमपि करोतीति दर्शयन्नाह–

'चक्खुदये'त्ति, चक्षुरिव चक्षु-श्रुतज्ञानं शुभाशुभार्थविभागोपदर्शकत्वात्, यदाह–

॥१॥ "चक्षुष्मन्तस्य एवेह, ये श्रुतज्ञानचक्षुषा ।
सम्यक् सदैव पश्यन्ति, भावान् हेयेतरान्नराः ॥

तद्दयत इति चक्षुर्दयः, यथा हि लोके कान्तारगतानां चौरैर्विलुप्तधनानां बद्धचक्षुषां चक्षुरुद्घाटनेन चक्षुर्दत्वा वाञ्छितमार्गदर्शनेनोपकारी भवति, एवमयंमपि संसारारण्यवर्त्तिनां रागादिचौरविलुप्तधर्मधनानां कुवासनाऽऽच्छदितसज्ज्ञानलोचनानां तदपनयनेन श्रुतचक्षुर्दत्त्वा निर्वाणमार्गं यच्छन्नुपकारीति दर्शयन्नाह। 'मग्गदए'त्ति, मार्गं-सम्यग्दर्शनज्ञानचारित्रात्मकं परमपदपुरपथं दयत इति मार्गदयः, यथा हि लोके चक्षुरुद्घाटनं मार्गदर्शनं च कृत्वा चौरादिविलुप्तान् निरुपद्रवं स्थानं प्रापयन् परमोपकारी भवतीत्येवमयमपीति दर्शयन्नाह –

'सरणदए'त्ति शरणं-त्राणं नानाविधोपद्रवोपद्रुतानां तद्रक्षास्थानं, तच्च परमार्थतो निर्व्वाणं तद्दयत इति शरणदयः, शरणदायकत्वं चास्य धर्मदिशनयैवेत्यत आह–

'धम्मदेसए'त्ति, धर्म–श्रुतचारित्रात्मकं देशयतीति धर्म्मदिशकः, 'धम्मदये'त्ति पाठान्तरं, तत्र च धर्म्म-चारित्ररूपं दयत इति धर्म्मदयः, यथा रथस्य सारथी रथं रथिकमश्वांश्च रक्षति एवं भगवान् चारित्रधर्माङ्गानां-संयमात्मप्रवचनाख्यानां रक्षणोपदेशाद्धर्मसारथिर्भवतीति, तीर्थान्तरीयमतेनान्येऽपि धर्मसारथयः सन्तीति विशेषयन्नाह–

'धम्मवरचाउरंतचक्कवट्टी'ति, त्रयः समुद्राश्चतुर्थश्च हिमवान् एते चत्वारोऽन्ताः-पृथिव्यान्ताः एतेषु स्वामितया भवतीति चातुरन्तः स चासौ चक्रवर्त्ती च चातुरन्तचक्रवर्त्ती वरश्चासौ चातुरन्तचक्रवर्त्ती च वरचातुरन्तचक्रवर्त्ती-राजातिशयः, धर्मविषये वरचातुरन्तचक्रवर्त्ती धर्मवरचातुरन्तचक्रवर्त्ती, यथा हि पृथिव्यां शेषराजातिशायी वरचातुरन्तवचक्रवर्त्ती भवति तथा भगवान् धर्मविषये शेषप्रणेतृणां मध्ये सातिशयत्वात्तथोच्यत इति, अथवा धर्म एव वरमितरचक्रापेक्षया कपिलादिधर्मचक्रापेक्षया वा चतुरन्तं-दानादिभेदेन चतुर्विभागं चतसृणां वा नरनारकादिगतीनामन्तकारित्वाच्चतुरन्तं तदे चातुरन्तं यच्चक्रं भावारातिच्छेदात् तेन वर्त्तितुं शीलं यस्य स तथा, एतच्च धर्मदेशकत्वादिविशेषणकदम्बकं प्रकृष्टज्ञानादियोगे सति भवतीत्याह –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अप्पडिहयवरनाणदंसणधरे' त्ति अप्रतिहते-कटकुड्यादिभिरस्खलिते अविसंवादके वा अत एव क्षायिकत्वाद्वा वरे-प्रधाने ज्ञानदर्शने केवलाख्ये विशेषसामान्यबोधात्मिके धारयति यः स तथा, छद्मवानप्येवंविधसंवेदनसंपदुपेतः कैश्चिदभ्युपगम्यते, स च मिथ्योपदेशित्वान्नोपकारी भवतीति निश्छद्मताप्रतिपादनायाऽस्याह, अथवा-कथमस्याप्रतिहतसंवेदनत्वं संपन्नम् ?, अत्रोच्यते, आवरणाभावाद्, एनमेवास्याऽऽवेदयन्नाह –

'वियट्टछउमे' त्ति व्यावृत्तं-निवृत्तमपगतं छद्म-शठत्वमावरणं वा यस्यासौ व्यावृत्तछद्मा, छद्माभावाश्चास्य रागादिजयाज्जात इत्यत आह –

'जिणे' त्ति, जयति-निराकरोति रागद्वेषादिरूपानरातीनिति जनः, रागादिजयश्चास्य रागादिस्वरूपतज्जयोपायज्ञानपूर्वक एव भवतीत्येतदस्याह –

'जाणए' त्ति, जानाति छाद्मस्थिकज्ञानचतुष्टयेनेति ज्ञायकः, ज्ञायक इत्यनेनास्य स्वार्थसंपत्त्युपाय उक्तः, अधुना तु स्वार्थसंपत्तिपूर्वकं परार्थसंपादकत्वं विशेषणचतुष्टयेनाह –

'बुद्धे' त्ति, बुद्धो जीवादितत्त्वं बुद्धवान् तथा 'बोहए' त्ति जीवादितत्त्वस्य परेषां बोधयिता

'तथा 'मुत्ते' त्ति मुक्तो बाह्याभ्यन्तरग्रन्थिबन्धनेन मुक्तत्वात्, तथा 'मोयए' त्ति परेषां कर्म्मबन्धनाम्नोचयिता। अथ मुक्तावस्थामाश्रित्य विशेषणान्याह–

'सव्वन्नू सव्वदरिसी' ति, सर्वस्य वस्तुस्तोमस्य विशेषरूपतया ज्ञायकत्वेन सर्वज्ञः, सामान्यरूपतया पुनः सर्वदर्शी, न तु मुक्तावस्थायां दर्शनान्तराभिमतपुरुषवद्भविष्यज्जडत्वम्, एतच्च पदद्वयं क्वचिन्न दृश्यति इति, तथा। 'सिवमयल' मित्यादि, तत्र 'शिवं' सर्वाऽऽबाधारहितत्वाद् 'अचलं' स्वाभाविकप्रायो- गिकचलनहेत्वभावाद्।

'अरुजम्' अविद्यमानरोगं तन्निबन्धनशरीरमनसोरभावात्।

'अनन्तम्' अनन्तार्थविषयज्ञानस्वरूपत्वात् 'अक्षयम्' अनाशंसाद्यपर्यवसितस्थितिकत्वात् अक्षतं वा परिपूर्णत्वात्पौर्णमासीचन्द्रमण्डलवत् 'अव्याबाधं' परेषामपीडाकारित्वात् 'अपुनरावत्तियं' ति कर्मबीजाभावाद्भवावताररहितं।

'सिद्धिगइनामधेयं' ति सिध्यन्ति-निष्ठितार्था भवन्ति तस्यां सा सिद्धि सा चासौ गम्यमानत्वादतिश्च सिद्धिगतिस्तदेव नामधेयं-प्रशस्तं नाम यस्य तत्तथा।

'ठाणं' ति तिष्ठति-अनवस्थाननिबन्धनकर्माभावेन सदाऽवस्थितो भवति यत्र तत्स्थानंक्षीणकर्म्मणो जीवस्य स्वरूपं लोकाग्रं वा, जीवस्वरूपविशेषणानि तु लोकाग्रस्याऽऽधेयधर्माणामाधारेऽध्यारोपादवसेयानि, तदेवंभूतं स्थानं।

'संपाविउकामे' त्ति यातुमनाः, न तु तत्प्राप्तः, तत्प्राप्तस्याकरणत्वेन विवक्षितार्थानां प्ररूपणाऽसम्भवात्, प्राप्तुकाम् इति च यदुच्यते तदुपचाराद्, अन्यथा हि निरभिलाषा एव भगवन्तः केवलिनो भवन्ति-'मोक्षे भवे च सर्वत्र, निस्पृहो मुनिसत्तमः' इति वचनादिति।

'जाव समोसरणं' ति, तावद्भगवद्वर्णको वाच्यो यावत्समवसरणं-समवसरणवर्णक इति, स च भगवद्वर्णक एवम्-''भुयमोयगभिंगनेकज्जलपहट्ठभमरगणनिद्धनिकुरुंबनिचिय-कुंचियपयाहिणावत्तमुद्धसिरए'' भुजमोचको-रत्नविशेषः भृङ्गः-कीटविशेषोऽङ्गारविशेषो वा नैलं-नीलीविकारः कज्जलं-मषी प्रहृष्टभ्रमरगणः-प्रतीतः एत एव स्निग्धः-कृष्णच्छयो निकुरम्बः-समूहो येषां ते तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते च ते निचिताश्च-निबिडाः कुञ्चिताश्च-कुण्डलीभूताः प्रदक्षिणावर्त्ताश्च मूर्द्धति शिरोजा यस्य स तथा, एवं शिरोजवर्णकादि "रतुप्पलपत्तमउयसुकुमालकोमलतले" इति पादतलवर्ण- कान्तः शरीरवर्णको भागवतो वाच्यः, पादतलविशेषणस्य चायमर्थ-रक्तं-लोहितम् उत्पलपत्रवत्-कमलदलवत् मृदुकम्-अस्तब्धं सुकुमालानां मध्ये कोमलं च तलं-पादतलं यस्य स तथा।

तथा-"अट्ठसहस्सवरपुरिसलक्खणधरे आगासगएणं चक्केणं आगासगएणं छत्तेणं आगास-गयाहिं चामराहिं आगासफलिहामएणं सपायपीढेणं सीहासणेणं' आकाशस्फटिकमूअतिस्वच्छ-स्फटिकविशेषस्तन्मयन उपलक्षित इति गम्यं, 'धम्मज्झएणं पउरओ पक्खिज्जमाणेणं' देवैरिति गम्यते 'चउदसहिं समणसाहससीहिं छत्तीसाए अज्जियासहस्सीहिं सद्धिं संपरिवुडे' साहीशब्दः सहपर्यायः सार्द्धसह, तेषां विद्यमानतयाऽपि सार्द्धमिति स्यादत उच्यते-संपरिवृतः-परिकरित इति।

'पुव्वाणुपुव्विं चरमाणे' न पश्चानुपूर्व्यादिना 'गामाणुगामं दूइज्जमाणे' ग्रामश्च प्रतीतः अनुग्रामश्च-तदन्तरं ग्रामो ग्रामानुग्रामं तद् 'द्रवन्' गच्छन् 'सुहंसुहेणं विहरमाणे जेणेव रायगिहे नगरे जेणेव गुणसिलए चेइए तेणेव उवागच्छइ उवागच्छित्ता अहापडिरूवं उग्गहं ओगिण्हइ ओगिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ'त्ति।

समवसरणवर्णको वाच्यः, तथाऽसुरकुमाराः शेषभवनपतयो व्यन्तरा ज्योतिष्का वैमानिका देवा (दिव्य) श्च भगवतः समीपमागच्छन्तो वर्णयितव्याः।

**मू.** *(७) परिसा निग्गया, धम्मो कहिओ, परिसा पडिगया।*

**वृ.** "परिसा निग्गय"त्ति राजगृहाद्राजादिलोको भगवतो वन्दनार्थ निर्गतः, तन्निर्गमश्चैवम्

"तए णं रायगिहे नगरे सिंधाडगतिगचउक्कचच्चरचउम्मुहमहापहपहेसु बहुजणो अन्नमन्नस्स एवमाइक्खइ ४-एवं खलु देवाणुप्पिया! समणे भगवं महावीरे इह गुणसिलए चेइए अहापडिरूवं उग्गहं ओगिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ, ते सेयं खलु तहारूवाणं अरहंताणं भगवंताणं नामगोयस्सवि सवणयाए किमंग पुण वंदननमंसणयाए? त्तिकट्टु बहवे उग्गा उग्गपुत्ता" इत्यादिर्वाच्यो यावद्भगवन्तं नमस्यन्ति पर्युपासते चेति, एवं राजनिर्गमोऽन्तःपुरनिर्गमश्च तत्पर्युपासना चौपपातिकवद्वाच्या।

'धम्मो कहिओ'त्ति, धर्मकथेह भगवतो वाच्या, सा चैवं-'तए णं समणे भगवं महावीरे सेणियसस रन्नो चिल्लणापमुहाण य देवीणं तीसे य महतिमहालियाए परिसाए व्वववभासानुगामिणीए सरस्सईए धम्णं परिकहेइ, तंजहा-अत्थिलोए अत्थि अलोए एवं जीवा अजीवा बंधे मोक्खे' इत्यादि। तथा –

॥ १ ॥ "जह नरगा गम्मंती जे नरया जा य वेयगा नरए।
सारीरमाणसाइं दुक्खाइं तिरिक्खजोणीए॥ इत्यादि

'पडिगया परिस'त्ति लोकः स्वस्थानं गतः, प्रतिगमश्च तस्या एवं वाच्यः-'तए णं सा महइमहालिया महच्च परिसा' महाऽतिमहती आलप्रत्ययस्य स्वार्थिकत्वादतिशयातिशयगुर्वी माहत्या पर्षत्-प्रशस्ता प्रधानपरिषत्, महार्चानां वा-सत्पूजानां महार्च्चा वा पर्षत् महार्च्चपर्षदिति

'समणस्स भगवओ महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठा समणं भगवं महावीरं तिक्खुत्तो आयाहिणयपयाहिणं करेइ करेत्ता वंदइ नमंसइ २।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं वयासी-सुयक्खाए णं भंते ! निग्गंथे पावयणे, नत्थि णं अन्ने केइ समे वा माहणे वा एरिसं धम्ममाइक्खित्तए, एवं वइत्ता जामेव दिसिं पाउब्भूया तामेव दिशं पडिगय'त्ति ॥

**मू. (८)** *तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूती नामं अनगारे गोयम सगोत्तेणं सत्तुस्सेहे समचउरंससंठाणसंठिए वज्ञरिसहनारायसंघयणे कणगपुलगणिधसपम्हगोरे। उग्गतवे दित्ततवे तत्ततवे महातवे ओराले धोरे धोरगुणे धोरतवस्सी धोरबंभचेवासी उच्छूढसरीरेसंखित्तविउलतेयलेसे चोद्दसपुव्वी चउनाणोवगए सव्वक्खरसन्निवाई समणस्स भगवओ महावीरस्स अदूरसामंते उड्ढंजाणू अहोसिरे झाणकोट्ठोवगए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ।*

**वृ.** तेन कालेन तेन समयेन श्रमणस्य भगवतो महावीरस्य 'जेट्ठे'त्ति प्रथमः 'अंतेवासि'त्ति शिष्यः, अनेन पदद्वयेन तस्य सकलसङ्घनायकत्वमाह –

'इंदभूइ'त्ति, इन्द्रभूतिरिति मातापितृकृतनामधेयः 'नामं'ति विभक्तिपरिणामान्नाम्नेत्यर्थः, अन्तेवासी किल विवक्षया श्रावकोऽपि स्यादित्यत आह।

'अनगारे'त्ति, नास्यागारं विद्यत इत्यनगारः, अयं चावगीतगोत्रोऽपि स्यादित्यत आह- 'गोयमसोत्तेणं'त्ति सप्तहस्तोच्छ्रयः, अयं च लक्षणहीनोऽपि स्यादित्यत आह –

समचउरंससंठाणसंठिए'त्ति, समं-नाभेरुपरि अधश्च सकलपुरुषलक्षणोपेतावयवतया तुल्यं तच्च तच्चतुरस्रं च-प्रधानं समचतुरस्रम्, अथवा-समाः-शरीरलक्षणोक्तप्रमाणाविसंवादिन्यश्चतस्रोऽस्रयो यस्य तत्समचतुरस्रम्, अस्रयस्त्विह चतुर्दिग्विभागोपलक्षिताः शरीरावयवा इति, अन्ये त्वाहुःसमा-अन्यूनाधिकाः चतोस्रऽप्यस्रयो यत्र यत्समचतुस्रम्, अयश्च पर्यङ्कासनोपविष्टस्य जानुनोरन्तरम् आसनस्य ललाटोपरिभागस्य चान्तरं दक्षिणस्कन्धस्य वामजानुनश्चान्तरं वामस्कन्धस्य दक्षिणजानुनश्चान्त- रमिति, अन्ये त्वाहुः-विस्तारोत्सेधयोः समत्वात् समचतुरस्रं तच्च तत् संस्थानं च-आकारः समचतुरसंस्थानं तेन संस्थितो-व्यवस्थितो यः स तथा, अयं च हीनसंहननोऽपि स्यादित्यत आह – 'वज्जरिसहनारायसंघयणे'त्ति, इह संहननम्-अस्थिसञ्चयविशेषः, इह वज्रादीनां लक्षणमिदम्।

॥१॥ "रिसहो य होइ पट्टो वज्जं पुण कीलियं वियाणाहि।
उभओ मक्कडबंधो नारायं तं वियाणाहि॥

तत्र वज्रं च तत् कीलिकाकीलिकाष्ठसंपुटोपमसामर्थ्ययुक्तत्वात् ऋषभश्च लोहादिमयपट्टबद्धकाष्ठसंपुटोपमसामृर्थ्यान्वितत्वाद् वज्रर्षभः स चासौ नाराचं च उभयतो मर्कटबन्धनिबद्धकाष्ठसंपुटोपमसामथ्योर्पेतत्वाद् वज्रर्षभनाराचं (तच्च) तत् संहननम्-अस्थिसञ्चयविशेषोऽनुपमसामर्थ्ययोगाद् यस्यासौ वज्रर्षभनाराचसंहननः, अन्ये तु कीलिकादिमत्त्वमस्थामेव वर्णयन्ति, अयं च निन्द्यवर्णोऽपि स्यादित्यत आह –

कणयपुलयनिहसपम्हगोरे कनकस्य-सुवर्णस्य 'पुलगं'ति यः पुलको-लवस्तस्य यो निकषः-कषपट्टके रेखालक्षणः, तथा 'पम्ह'त्ति पद्मपक्ष्माणि-केशराणि तद्वद्‌गौरो यः स तथा, वृद्धव्याख्या तु-कनकस्य न लोहादेर्य पुलकः-सारो वर्णातिशयस्तत्प्रधानो यो निकषो-रेखा तस्य यत्पक्ष्मबहलत्वं तद्वद्‌गौरो यः स तथा, अथवा-कनकस्य यः पुलको-द्रुतत्वे सति बिन्दुस्तस्य निकषो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्णतः सदृशो यः स तथा, 'पम्ह'त्ति पद्मं तस्य चेह प्रस्तावात्केशराणि गृह्यन्ते ततः पद्मवद्गौरो यः स तथा, ततः पदद्वयस्य कर्म्मधारयः, अयं च विशिष्टचरणरहितोऽपि स्यादित्यत आह –

'उग्गतवे'त्ति, उग्रम्-अप्रधृष्यं तः-अनशनादि यस्य स उग्रतपाः, यदन्येन प्राकृतपुंसा न शक्यते चिन्तयितुमपि तद्विधेन तपसा युक्त इत्यर्थः । 'दित्ततवेत्ति, दीप्तं-जाज्वल्यमानदहन इव कर्म्मवनगहनदहनसमर्थतया ज्वलितं तपो-धर्मध्यानादि यस्य स तथा ।

'तत्ततवे'त्ति, तप्तं तपो येनासौ तप्ततयाः, एवं हि तेन तत्तपस्तप्तं येन कर्माणि संताप्य तेन तपसा स्वात्माऽपि तपोरूपः संतापितो यतोऽन्यस्यास्पृश्यमिव जातमिति ।

'महातवे'त्ति आशंसादोषरहितत्वात्प्रशस्ततपाः ।

'ओराले'त्ति भीम उग्रादिविशेषणविशिष्टतपः करणात्पार्श्वस्थानामल्पसत्त्वानां भयानक इत्यर्थः, अन्ये त्वाहुः-'ओराले'त्ति भीम उग्रादिविशेषण विशिष्टतपः करणात्पार्श्वस्थानामल्पसत्त्वानां भयानक इत्यर्थः, अन्ये त्वाहुः-'ओराले'त्ति उदारः-प्रधानः ।

'घोरे'त्ति घोरः अतिनिर्घृणः, परीषहेन्द्रियादिरिपुगणविनाशमाश्रित्य निर्दय इत्यर्थः, अन्ये त्वात्मनिरपेक्षं घोरमाहुः, 'घोरगुणे'त्ति, घोरा-अन्यैर्दुरनुचरा गुणा-मूलगुणादयो यस्य स तथा ।

'घोरतवस्सि'त्ति घोरैस्तपोभिस्तपस्वीत्यर्थः ।

'घोरबंभचेरवासि'त्ति, घोरं-दारुणमल्पसत्त्वैर्दुरनुचरत्वाद्यद्ब्रह्मचर्यं तत्र वस्तुं शीलं यस्य स तथा, 'उच्छूढसरीरे'त्ति, उच्छूढम्-उज्झितमिवोज्झितं शरीरं येन ततसंस्कारत्यागात्स तथा ।

'संखित्तविउलतेयलेसे'त्ति, संक्षिप्ता-शरीरान्तर्लीनत्वेन ह्रस्वतां गता विपुला-विस्तीर्णा अनेकयोजनप्रमाणक्षेत्राश्रितवस्तुदहनसमर्थत्वात्तेजोलेश्या-विशिष्टतपोजन्यलब्धिविशेषप्रभवा तेजोज्वाला यस्य स तथामूलटीकाकृता तु 'उच्छूढसरीरसंसित्तविउलतेयलेस'त्ति कर्म्मधारयं कृत्वा व्याख्यातमिति ।

'चउदसपुव्वि'त्ति चतुर्दश पूर्वाणि विद्यन्ते यस्य तेनैव तेषां रचितत्वादसौ चतुर्दशपूर्वी, अनेन तस्य श्रुतकेवलितामाह, स चावधिज्ञानादिविकलोऽपि स्यादत आह । 'चउनाणोवगए'त्ति, केवलज्ञानवर्जज्ञानचतुष्कसमन्वित इत्यर्थः, उक्तविशेषण- द्वययुक्तोऽपि कश्चिन्न समग्रश्रुतविषयव्यापिज्ञानो भवति चतुर्दशपूर्वविदां षट्स्थानकपतितत्वेन श्रवणादित्यत आह –

'सव्वक्खरसन्निवाइ'त्ति, सर्वे च तेऽक्षरसन्निपाताश्च-तत्संयोगाः सर्वेषां वाऽक्षराणां सन्निपाताः सर्वाक्षरसन्निपातास्ते यस्य ज्ञेयतया सन्ति स सर्वाक्षरसन्निपाती, श्रव्याणि वा-श्रवणसुखकारीणि अक्षराणि साङ्गत्येन नितरां वदितुं शीलमस्येति श्रव्याक्षरसंनिवादी, स चैवंगुणविशिष्टो भगवान् विनयराशिरिव साक्षादितिकृत्वा शिष्याचारत्वाच्च ।

'समणस्स भगवओ महावीरस्स अदूरसामंते विहरती' ति योगः' तत्र दूरं च-विप्रकृष्टं सामन्तं च-संनिकृष्टं तन्निषेधाददूरसामन्तं तत्र, नातिदूरे नातिनिकट इत्यर्थः, किंविधः संस्तत्र विरहतीत्याह । 'उड्ढंजाणु'त्ति, उर्ध्वंजानुनी यस्यासावूर्द्धजानुः शुद्धपृथिव्यासनवर्जनादौपग्रहिक निषद्याया अभावोच्चोत्कुटुकासन इत्यर्थः ।

'अहोसिरे'त्ति अधोमुखः नोर्द्ध तिर्यग्वा विक्षिप्तदृष्टि, किन्तु नियतभूभागनियमितदृष्टिरिति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावः। 'झाणकोट्ठोवगए'त्ति, ध्यानं-धर्म्मं शुक्लं वा तदेव कोष्ठः- कुशूलो ध्यानकोष्ठस्तमुपगतः- तत्र प्रविष्टो ध्यानकोष्ठोपगतः, यथा हि कोष्ठके धान्यं प्रक्षिप्तमविप्रसृतं भवति एवं स भगवान् ध्यानतोऽविप्रकीर्णेन्द्रियान्तःकरणवृत्तिरिति।

'संजमेणं'ति संवरेण 'तवस'त्ति अनशनादिना, चशब्दः समुच्चयार्थो लुप्तोऽत्र द्रष्टव्यः, संयमतपोग्रहणं चानयोः प्रधानमोक्षाङ्गत्वख्यापनार्थं, प्रधानत्वं च संयमस्य नवकर्मानुपादानहेतुत्वेन तपसश्च पुराणकर्मनिर्जरणहेतुत्वेन, भवति चाभिनवकर्मानुपादानात् पुराणकर्मक्षपणाच्च सकल-कर्मक्षयलक्षो मोक्ष इति।

'अप्पाणं भावेमाणे विहरइ'त्ति, आत्मानं वासयंस्तिष्ठतीत्यर्थः॥

**मू. (९)** *तए णं से भगवं गोयमे जायसड्ढे जायसंसे जायकोउहल्ले उप्पन्नसड्ढे उप्पन्नसंसए उप्पन्नकोउहल्ले संजायसड्ढे संजायसंसए संजायकाउहल्ले समुप्पन्नसड्ढे समुप्पन्नसंसए समुप्पन्नकोउहल्ले उट्ठाए उट्ठेइ उट्ठाए उट्ठेत्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ २ त्ता वंदइ नमंसइ २ त्ता नच्चासन्ने नाइदूरे सुस्सूसमाणे नमंसमाणे अभिमुहे विणएणं पंजलिउडे पज्जुवासमाणे एवं वयासी*

*से नूणं भंते ! चलमाणे चलिए १, उदीरिज्जमाणए उदीरिए २, वेइज्जमाणे वेइए ३, पहिज्जमाणे पहीणे ४, छिज्जमाणे छिन्ने ५, भिज्जमाणे भिन्ने ६, दड्ढमाणे दड्ढे ७, मिज्जमाणे मए ८, निज्जरिज्जमाणे निज्जिन्ने ९ ? हंता गोयमा ! चलमाणे चलिए जाव निज्जरिज्जमाणे निज्जिण्णे।*

**वृ.** 'ततः' ध्यानकोष्ठोपगतविहरणानन्तरं णमिति वाक्यालङ्कारार्थ 'स' इति प्रस्तुत-परामर्शार्थः, तस्य तु सामान्योक्तस्य विशेषावधारणार्थमाह-'भगवं गोयमे'त्ति, किमित्याह-

'जायसड्ढे'इत्यादि, जातश्रद्धादिविशेषणः सन् उत्तिष्ठतीति योगः, तत्र जाता-प्रवृत्ता श्रद्धा-इच्छ वक्ष्यमाणार्थतत्त्वज्ञानं प्रति यस्यासौ जातश्रद्धः, तथा जातः संशयो यस्य स जातसंशयः, संशयस्तु अनवधारितार्थः ज्ञानं, स चैवं तस्य भगवतो जातः-भगवता हि महावीरेण 'चलमाणे चलिए'इत्यादौ सूत्रे चलन्नर्थश्चलितो निर्दिष्टः, तत्र च य एव चलन् स एव चलित इत्युक्तः, ततश्चैकार्थविषयावेतौ निर्देशौ, चलन्निति च वर्त्तमानकालविषयः चलित इति चातीतकालविषयः, अतोऽत्र संशयः-कथं नाम य एवार्थो वर्त्तमानः स एवातीतो भवति ?, विरुद्धत्वादनयोः काल-योरिति, तथा।

'जायकोउहल्ले'त्ति, जातं कुतूहलं यस्य स जातकुतूहलो, जातौत्सुक्य इत्यर्थः, कथमेतान् पदार्थान् भगवान् प्रज्ञापयिष्यतीति, तथा 'उप्पन्नसड्ढे'त्ति उत्पन्ना-प्रागभूता सती भूता श्रद्धा यस्य स उत्पन्नश्रद्धः, अथ जातश्रद्ध इत्येतावदेवास्तु किमर्थमुत्पन्नश्रद्ध इत्यभिधीयते ?, प्रवृत्तश्रद्ध-त्वेनैवोत्पन्नश्रद्धत्वस्य उत्पन्नश्रद्ध इति, हेतुत्वप्रदर्शनं चोचितमेव, काव्यालङ्कारत्वात्तस्य, यथाहुः- "प्रवृत्तदीपामप्रवृत्तभास्करां, प्रकाशचन्द्रां बुबुधे विभावरीम्" इह यद्यपि प्रवृत्तदीपत्वा-देवाप्रवृत्तभास्करत्वमगवतं तथाऽप्यप्रवृत्तभास्करत्वं प्रवृत्तदीपत्वादेर्हेतुतयोपन्यस्तमिति।

'उप्पन्नसंसए उप्पन्नकोउहल्ले'त्ति प्राग्वत्, तथा 'संजायसड्ढे'इत्यादि पदषट्कं प्राग्वत्।

नवरमिह संशब्दः प्रकर्षादिवचनो, यथा "संजातकामो बलभिद्विभूत्यां, मानात् प्रजाभिः प्रतिमाननाच्च।" (संजातकामः-) एन्द्रैश्वर्ये प्रकर्षेण जातेच्छः कार्त्तवीर्य इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये तु 'जायसड्ढे'इत्यादि विशेषणद्वादशकमेवं व्याख्यान्ति-जाता श्रद्धा यस्य प्रष्टुं स जातश्रद्धः, किमिति जातश्रद्धः ? इत्यत आह-यस्माज्जातसंशयः, इदं वस्त्वेवं स्यादेवं वेति, अथ जातसंशयोऽपि कथमित्यत आह-यस्माज्जातकुतूहलः कथं नामास्यार्थमवभोत्स्ये ? इत्यभिप्रायवानिति, एतच्च विशेषणत्रयमवगरहापेक्षया द्रष्टवयम्, एवमुत्पन्नसंजातसमुत्पन्नश्रद्धत्वादय ईहापायधारणाभेदेन वाच्याः, अन्ये त्वाहुः-जातश्रद्धत्वाद्पेक्षयोत्पन्नश्रद्धत्वादयः समानार्था विवक्षितार्थस्य प्रकर्षवृत्तिप्रतिपादनाय स्तुतिमुखेन ग्रन्थकृ तोक्ताः, न चैवं पुनरुक्तं दोषाय, यदाह–

॥ १ ॥ "वक्ता हर्षभयादिभिराक्षिप्तमनाः स्तुवंस्तथा निन्दन् ।
यत्पदमसकृद् ब्रूते त्पुनरुक्तं न दोषाय ॥" इति

'उट्ठाए उट्ठेइ'त्ति उत्थानमुत्था-उध्र्व्वंव वर्त्तनं तया उत्थया 'उत्तिष्ठति' उध्र्व्वो भवति, 'उट्ठेइ' इत्युक्ते क्रियारम्भमात्रमपि प्रतीयते यथा वक्तुमित्तिष्ठते इति ततस्तद्वयवच्छेदायोक्तमुत्थयेति, 'उट्ठाए उट्ठित्ति'त्ति उपागच्छतीत्युत्तरक्रियाऽपेक्षया उत्थानक्रियायाः पूर्वकालताऽभिधानाय उत्थयोत्थायेति कत्वाप्रत्ययेन निर्द्दिशतीति ।

'जेणेवे'त्यादि, इह प्राकृतप्रयोगादव्ययत्वाद्वा येनेति यस्मिन्नेव दिग्भागे श्रणमो भगवान् महावीरो वर्त्तते 'तेणेव'त्ति तस्मिन्नेव दिग्भागे उपागच्छति, तत्कालापेक्षया वर्त्तमानत्वादागमनक्रियाया वर्त्तमानविभक्त्या निर्द्देशः कृतः, उपागतवानित्यर्थः, उपागम्य च श्रमणं ३ कर्मतापन्नं ।

'तिक्खुत्तो'त्ति त्रीन् वारान् त्रिकृत्वः । 'आयाहिणपयाहिणं करेइ'त्ति आदक्षिणाद्-दक्षिणहस्तादारभ्य प्रदक्षिणः-परितो भ्राम्यतो दक्षिण एव आदक्षिणप्रदक्षिणोऽतस्तं करोतीति

'वंदइ'त्ति 'वन्दते' वाचा स्तौति 'नमंसइ'त्ति 'नमस्यति' कायेन प्रणमति ।

'नच्चासन्ने'त्ति, 'न' नैव 'अत्यासन्नः' अतिनिकटः, अवग्रहपरिहासतु, नात्यासन्ने वा स्थाने, वर्त्तमान इतिगम्यं, 'नाइदूरे'त्ति 'न' नैव 'अतिदूरः' अतिविप्रकृष्ट, अनौचित्यपरिहारात्, नातिदूरे वा स्थाने ॥ 'सुस्सूसमाणे'त्ति भगवद्वचनानि श्रोतुमिच्छन् ।

'अभिमुहे'त्ति, अभि-भगवन्तं लक्ष्यीकृत्य मुखमस्येत्यभिमुखः, तथा

'विणएणं'ति विनयेन हेतुना 'पंजलिउडे'त्ति प्रकृष्टः-प्रधानो ललाटतटघटतत्वेनाञ्जलिहस्तन्यासविशेषः कृतोःविहितो येन सोऽग्रयाहितादिदर्शनात् प्राञ्जलिकृतः ।

'पज्जुवासमाणे'त्ति 'पर्युपासीनः' सेवमानः, अनेन च विशेषणकदम्बकेन श्रवणविधिरुपदर्शितः, आह च–

॥ १ ॥ "निद्दाविगहापरिवज्जिएहि गुत्तेहि पंजलिउडेहिं ।
भत्तिबहुमानपुव्वं उवउत्तेहिं सुणेयव्वं ॥

'एवं वयासि'त्ति 'एवं' वक्ष्यमाणप्रकारं वस्तु 'अवादीत्' उक्तवान्-'से' इति तद् यदुक्तं पूर्ज्यैः 'चलच्चलित'मित्यादि, 'नूनं' ति एवमर्थे, तत्र तत्रास्यैवं व्याख्यातत्वात्, अथवा 'से' इतिशब्दो मागधदेशीप्रसिद्धोऽथशब्दार्थे वर्त्तते, अथशब्दस्तु वाक्योपन्यासार्थः परप्रश्नार्थो वा, यदाह-"अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेषु' ।

'नून'मिति निश्चितं 'भंते'त्ति गुरोरामन्त्रणं, ततश्च हे भदन्त !-कल्याणरूप ! सुखरूप ! इति वा 'भदि कल्याणे सुखे च' इति वचनात्, प्राकृतशैल्या वा भवस्यसंसारस्य भयस्य वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भीतेरन्तहेतुत्वाद्भवान्तो भयान्तो वा तस्यामन्त्रणं हे भवान्त ! हे भयान्त ! वा, भान् वा-ज्ञानादिभिर्दीप्यमान ! 'भा दीप्तौ' इति वचनात्, भ्राजमान ! वा-दीप्यमान ! 'भ्राजृ दीप्तौ' इति वचनात् अयं च आदित आरभ्य 'भंते' त्ति पर्यन्तो ग्रन्थो भगवता सुधर्म्मस्वामिना पञ्चमाङ्गस्य प्रथमशतस्य प्रथमोद्देशकस्य सम्बन्धार्थमभिहितः ।

अथानेन सम्बन्धेनायातस्य पञ्चमाङ्गप्रथमशतप्रथमोद्देशकस्येदमादिसूत्रम् ।

'चलमाणे चलिए' इत्यादि, अथ केनाभिप्रायेण भगवता सुधर्म्मस्वामिना पञ्चमाङ्गस्य प्रथमशतप्रथमोद्देशकस्यार्थानुकथनं कुर्वतैवमर्थवाचकं सूत्रमुपन्यस्तं नान्यानीति ?, अत्रोच्यते

इह चतुर्षु पुरुषार्थेषु मोक्षाख्यः पुरुषार्थो मुख्यः, सर्वातिशायित्वात्, तस्य च मोक्षस्य साध्यस्य साधनानां च सम्यग्दर्शनादीनां साधनत्वेनाव्यभिचारिणाभुयनियमस्य शासनाच्छं सद्भिरिष्यते, उभयनियमसत्वेवं-सम्यग्दर्शनादीनि मोक्षस्यैवसाध्यस्य साधनानि नान्यस्यार्थस्य, मोक्षश्च तेषामेत साधनानां साध्यो नान्येषा मिति, स च मोक्षो विपक्षक्षयात्, तद्विपक्षश्च बन्धः, स च मुख्यः कर्मभिरात्मनः सम्बन्धः, तेषां तु कर्मणां प्रक्षयेऽयमनुक्रम उक्तः-

'चलमाणे' इत्यादि तत्र 'चलमाणे' त्ति चलत्-स्थितिक्षयादुदयमागच्छद् विपाकाभिमुखीभवद्यत्कर्मेति प्रकरणगम्यं तच्चलितम्-उदितमिति व्यपदिश्यते, चलनकालो हि उदयावलिका, तस्य च कालस्यासङ्ख्येयसमयत्वादादिमध्यान्तयोगित्वं, कर्मपुद्गलानामप्यनन्ताः स्कन्धा अनन्तप्रदेशाः, ततश्च ते क्रमेण प्रतिसमयमेव चलन्ति, तत्र योऽसावाद्यश्चलनसमयस्तस्मिश्चलदेव तच्चलि- तमुच्यते, कथं पुनस्तद्वर्त्मानं सदतीतं भवतीति ।

अत्रोच्यते-यथा पट उत्पद्यमानकाले प्रथमतन्तुप्रवेशे उत्पद्यमान एवोत्पन्नो भवतीति, उत्पद्यमानत्वं च तस्य प्रथमतन्तुप्रवेशकालादारभ्य पट उत्पद्यते इत्येवं व्यपदेशदर्शनात् प्रसिद्धमेव, उत्पन्नत्वं तूपपत्त्या प्रसाध्यते, तथाहि-उत्पत्तिक्रियाकाल एव प्रथमतन्तुप्रवेशेऽसावुत्पन्नः, यदि पुनर्नोत्पन्नोऽभविष्यत्तदा तस्याः क्रियाया वैयर्थ्यमभविष्यत्, निष्फलत्वाद्, उत्पाद्योत्पादनार्था हि क्रियाः भवन्ति, यथा च प्रथमे क्रियाक्षणे नासावृत्पन्नस्तथोत्तरेष्वपि क्षणेष्वनुत्पन्न एवासौ प्राप्नोति, को ह्युत्तरक्षणक्रियाणामात्मनि रूपविशेषो ? येन प्रथमया नोत्पन्नस्तदुत्तराभिस्तूत्पाद्यते, अतः सर्वदैवानुत्पत्तिप्रसङ्गः, दृष्टा चोत्पत्तिः अन्त्यतन्तुप्रवेशे पटस्य दर्शनाद, अतः प्रथमतन्तुप्रवेशकाल एव किञ्चिदुत्पन्नं पटस्य, यावच्चोत्पन्नं न तदुत्तरक्रिययोत्पाद्यते, यदि पुनरुत्पाद्यते तदा तदेकदेशोत्पादन एव क्रियाणां कालानां च क्षयः स्यात्, यदि हि तदंशोत्पादननिरपेक्षा अन्याः क्रिया भवन्ति तदोत्तरांशानुक्रमणं युज्यते नान्यथा, तदेवं यथा पट उत्पद्यमान एवोत्पन्नस्तथैवासङ्ख्यातसमयपरिमाणत्वादुदयावलिकाया आदिसमयात्प्रभृति चलदेव कर्म्म चलितं, कथं

यतो यदि हि तत्कर्म चलनाभिमुखीभूतमुदयावलिकाया आदिसमय एव न चलितं स्यात्तदा तस्याद्यस्य चलनसमयस्य वैयर्थ्य स्यात्, तत्राचलितत्वात्, यथा च तस्मिन् समये न चलितं तथा द्वितीयादिसमयेष्वपि न चलेत्, को हि तेषामात्मनि रूपविशेषो ? येन प्रथमसमये न चलितमुत्तरेषु चलतीति, अतः सर्वदैवाचलनप्रसङ्गः, अस्ति चान्त्यसमये चलनं, स्थितेः परिमितत्वेन कर्माभावाभ्युपगमाद्, अत आवलिकाकालादिसमय एव किञ्चिच्चिलितं, यच्च तस्मिंश्चलितं तच्चोत्तरेषु समयेषु न चलति, यदि तु तेष्वपि तदेवाद्यं चलनं भवेत्तदा तस्मिन्नेव चलने सर्वेषामुदया-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वलिकाचलनसमयानां क्षयः स्यात्, यदि हि तत्समयचलननिरपेक्षाण्यन्यसमयचलनानि भवन्ति तदोत्तरचलनानुक्रमणं युज्येत नान्यथा, तदेवं चलदपि तत्कर्म चलितं भवतीति १ ।

तथा 'उदीरिज्जमाणे उदीरिए'त्ति, उदीरणा नाम अनुदयप्राप्तं चिरेणाऽऽगामिना कालेन यद्वेदयितव्यं कर्मदलिकं तस्य विशिष्टाध्यवसायलक्षणेन करणेनाकृष्योदये प्रक्षेपणं सा चासङ्ख्येय-समयवर्त्तिनी, तया च पुनरुदीरणया उदीरणप्रथमसमय एवोदीर्यमाणं कर्म्म पूर्वोक्तपट-दृष्टान्तेनोदीरितं भवतीति २ ।

तथा 'वेइज्जमाणे वेइए'-त्ति, वेदनं-कर्मणो भोगः, अनुभव इत्यर्थः, तच्च वेदनं स्थितिक्षयादुद-यप्राप्तस्य कर्मण उदीरणाकणेन वोदयमुपनीतस्य भवति, तस्य च वेदनाकालस्यासङ्ख्येसम-यत्वादाद्यसमये वेद्यमानमेव वेदितं भवतीति ३ ।

तथा 'पहिज्जमाणे पहीणे' त्ति, प्रहाणं तु-जीवप्रदेशैः सह संश्लिष्टस्य कर्मणस्तेभ्यः पतनम्, एतदप्यसङ्ख्येसमयपरिमाणमेव, तस्य तु प्रहाणस्यादिताकरणं, तच्चापवर्त्तनाभिधानेन करणविशेषेण करोति, तदपि च छेदनमसङ्ख्येयसमयपरिमाणमेव, तस्य तु प्रहाणस्यादिसमये प्रहीयमाणं कर्म प्रहीणं स्यादिति ४ ।

तथा 'छिज्जमाणे छिन्ने'त्ति, छेदनं तु-कर्मणो दीर्घकालानां स्थितीनां ह्रस्वताकरणं, तच्चापवर्त्तनाभिधानेन करणविशेषेण करोति, तदपि च छेदनमसङ्ख्येयसमयमेव, तस्य त्वादिसमये स्थिततस्तच्छिद्यमनं कर्म्म छिन्नमिति ५ ।

तथा 'भिज्जमाणे भिन्ने'त्ति भेदस्तु-कर्म्मणः शुभस्याशुभस्य वा तीव्ररसस्यापवर्त्तनाकरणेन मन्दताकरणं, मन्दस्य चोद्वर्त्तनारणेन तीव्रताकरणं, सोऽपि चासङ्ख्येयसमय एव, ततश्च तदाद्यसमये रसतो भिद्यमानं कर्म्म भिन्नमिति ६ ।

तथा 'डज्झमाणे दड्ढे'त्ति, दाहस्तु-कर्म्मदलिकदारूणां ध्यानाग्निना तद्रूपापनयनमकर्म्म-त्वजननमित्यर्थः, यथा हि काष्ठस्याग्निना दग्धस्य काष्ठरूपापनयनं भस्मात्मना च भवनं दाहस्तथा कर्म्मणोऽपीति, तस्याप्यन्तर्मुहूर्त्तवर्त्तित्वेनासङ्ख्येसयस्यादिसमये दह्यमानं कर्म दग्धमिति ७ ।

तथा 'मिज्जमाणे मडे'त्ति, म्रियमाणमायुःकर्म्म मृतमिति व्यपदिश्यते, मरणं ह्यायुःपुद्गलानां क्षयः, तच्चासङ्ख्येयसमयवर्त्ति भवति, तस्य च जन्मनः प्रथमसमयादारभ्यावीचिकमरणेनानुक्षणं मरणस्य भावान्म्रियमाणं मृतमिति ८ ।

तथा 'निज्जरिज्जमाणे निज्जिण्णे'त्ति, निर्जीर्यमाणं-नितरामपुनर्भावेन क्षीयमाणं कर्म निर्जीर्ण-क्षीणमिति व्यपदिश्यते, निर्जरणस्यासङ्ख्येयसमयभावित्वेन तत्प्रथमसमय एव पटनिष्पत्तिदृष्टान्तेन निर्जीर्णत्वस्योपपद्यमानत्त्वादिति, पटदृष्टान्तश्च सर्वपदेषु सभावनिको वाच्यः ९ ।

तदेवमेतान्नव प्रश्नान् गौतमेन भगवता भगवान् महावीरः पृष्टः सन्नुवाच-'हंते' त्यादि, अथ कस्माद् भगवन्तं गौतमः पृच्छति ?, विरचितद्वादशाङ्गतया विदितसकलश्रुतविषयतत्वेन निखिलसंशयातीतत्वेन च सर्वज्ञकल्पत्वात्तस्य, आह च–

॥१॥ "संखाईए उ भवे साहइ जं वा परो उ पुच्छेज्जा ।
ण य णं अणाइसेसी वियाणई एस छउमत्थो ॥

–नैवम्, उक्तगुणत्वेऽवि छद्मस्थतयाऽनाभोगसम्भवात्, यदाह –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ ''न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति ।
यस्माज्ज्ञानावरणं ज्ञानावरणप्रकृति कर्म्म ।। इति

अथवा जानत व तस्य प्रश्नः संभवति, स्वकीयबोधसंवादनार्थमज्ञलोकबोधनार्थं शिष्याणां वा स्ववचसि प्रत्ययोत्पादनार्थं सूत्ररचनाकल्पसंपादरनार्थं वेति । तत्र 'हंता गोयमे'ति, हन्तेति कोमलामन्त्रणार्थं, दीर्घत्वं च माग धदेशीप्रभवमुभयत्रापि, 'चलमाणे' इत्यादेः प्रत्युच्चारणं तु चलदेव चलितमित्यादीनां स्वानुमतत्वप्रदर्शनार्थम् ।

वृद्धाः पुनराहुः- 'हंता गोयमा' इत्यत्र 'हन्ते' ति एतमेतदिति अभ्युपगमवचनः, यदनुमतं तत्प्रदर्शनार्थं 'चलमाणे' इत्यादि प्रत्युच्चारितमिति, इह च यावत्करणलभ्यानि पदानि सुप्रतीतान्येव ।। एवमेताना नव पदानि कर्माधिकृत्य वर्त्तमानातीतकालसामानाधिकरण्यजिज्ञासया पृष्टानि निर्णीतानि च, अथैतान्येव चलनादीनि परस्परतः किं तुल्यार्थानि भिन्नार्थानि वेति पृच्छं निर्णयं च दर्शयितुमाह--

**मू. (१०)** *एए णं भंते ! नव पया किं एगट्ठा नानाघोसा नानावंजणा उदाहु नाणट्ठा नानाघोसा नानावंजणा ?,*

*गोयमा ! चलमाणे चलिए १ उदीरिज्जमाणए उदीरिए २ वेइज्जमाणे वेइए ३ पहिज्जमाणे पहीणे ४ ते एए णं चत्तारि पया एगट्ठा नानाघोसा नानावंजणा उप्पन्नपक्खस्स, छिज्जमाणे छिन्ने भिज्जमाणे भिन्ने दड्ढ-(डज्झ)-माणे दड्ढे मिज्जमाणे मडे निज्जरिज्जमाणे निज्झिण्णे एए णं पंच पया नाणट्ठा नानाघोसा नानावंजणा विगयपक्खस्स ।*

**वृ.** व्यक्तं, नवरम् 'एगट्ठ'त्ति 'एकार्थानि' अनन्यविषयाणि एकप्रयोजनानि वा 'नाणा-घोस'त्ति इह घोषाः-उदात्तादयः 'नाणावंजण'त्ति इह व्यञ्जनानि-अक्षराणि 'उदाहु'त्ति उताहोनिपातो विकल्पार्थः 'नाणट्ठ'त्ति भिन्नाभिधेयानि, इह च चतुर्भङ्गी पदेषु दृष्टा, तत्र कानिचिदेकार्थानि एकव्यञ्जनानि यथा क्षीरं क्षीरमित्यादीनि १, तथाऽन्यानि एकार्थानि नानाव्यञ्जनानि यथा क्षीरं पय इत्यादीनि २, तथाऽन्यान्येनेकार्थान्येक व्यञ्जनानि यथार्क्काव्यमाहिषाणि क्षीराणि-३ तथाऽन्यानि नानार्थानि नानाव्यञ्जनानि यथा घटपटलकुटादीनि ४ ।

तदेवं चतुर्भङ्गीसंभवेऽपि द्वितीयचतुर्थभङ्गकौ प्रश्नसूत्रे गृहीतौ, परिदृश्यमान-नानाव्यञ्जनतया तदन्ययोरसम्भवात्, निर्वचनसूत्रे तु चलनादीनि चत्वारि पदान्याश्रित्य द्वितीयः, छिद्यमानादीनि तु पञ्च पदान्याश्रित्य चतुर्थ इति । ननु चलनादीनामर्थानां व्यक्तभेदत्वात् कथमाद्यानि चत्वारि पदान्येकार्थानि ? इत्याशङ्क्याह-'उप्पन्नपक्खस्स'त्ति उत्पन्नमुत्पादो, भावे क्लीबे क्तप्रत्य-यविधानात्, तस्य पक्षः-परिग्रहोऽङ्गीकारः 'पक्ष परिग्रहे' इति धातुपाठादिति उत्पन्नपक्षः, इह च षष्ठ्यास्तृतीयार्थत्वाद् उत्पन्नपक्षेण-उत्पादाङ्गीकारेण-उत्पादाख्यं पर्यायं परिगृह्य एकार्थान्येता-न्युच्यन्ते, अथवा 'उत्पन्नपक्षस्य' उत्पादाख्यवस्तुविकल्पस्याभिधायकानीति शेषः, सर्वेषामेषामुत्पाद माश्रित्यैकार्थकारित्वादेकान्तर्मुहूर्त्तमध्यभावित्वेन तुल्यकालत्वाच्चैकार्थिकत्वमिति भावः, स पुनरुत्पादाख्यः पर्यायो विशिष्टः केवलोत्पाद् एव, यतः कर्मचिन्तायां कर्मणः प्रहाणेः फलद्वयं केवलज्ञानमोक्षप्राप्ती, तत्रैतानि पदानि केवलोत्पादविषयत्वादेकार्थान्युक्तानि, यस्मात् केवलज्ञान-पर्यायो जीवेन न कदाचिदपि प्राप्तपूर्व यस्माच्च प्रधानस्ततस्तदर्थ एव पुरुषप्रयासः तस्मात्स एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलज्ञानोत्पत्तिः- पर्यायोऽभ्युगतः एषां च पदानामेकार्यानामपि सतामयमर्थः सामर्थ्य प्राप्ति क्रमः

यदुत-पूर्वं तच्चलति-उदेतीत्यर्थः उदितं च वेद्यते, अनुभूयत इत्यर्थः, तच्च द्विधा-स्थितिक्षया-दुदयप्राप्तमुदीरणया चोदयमुपनीतं, ततश्चानुभवानन्तरं तत् प्रहीयने, दत्तफलत्वाज्जीवादपया-तीत्यर्थः, एतच्च टीकाकारमतेन व्याख्यातम्, अन्ये तु व्याख्यान्ति-स्थितिबन्धाद्यविशेषितसा-मान्यकर्माश्रयत्वादेकार्थिकान्येतानि केवलोत्पादपक्षस्य च साधकानीति, चत्वारि चलनादीनि-स्थितिबन्धाद्यविशेषितसामान्यकर्माश्रयत्वादेकार्थिकान्येतानि केवलोत्पादपक्षस्य च साधकानीति, चत्वारि चलनादीनि पदान्येकार्थिकानीत्युक्ते शेषाण्यनेकार्थिकानीति सामर्थ्यादवगतमपि सुखावबोधाय साक्षात्प्रतिपादयितुमाह-'छिज्जमाणे' इत्यादि, व्यक्तं।

नवरं 'णाणट्ठ' त्ति नानार्थानि, नानार्थत्वं त्वेवं-छिद्यमानं छिन्नमित्येतत्पदं स्थितिबन्धाश्रयं, यतः सयोगिकेवली अन्तकाले योगनिरोधं कर्तुकामो वेदनीयनामगोत्राख्यानां तिसॄणां प्रकृतीनां दीर्घकालस्थितिकानां सर्वापवर्त्तनयाऽऽन्तर्मौहूर्त्तिकं स्थितिपरिमाणं करोति। तथा 'भिद्यमानं भिन्न' मित्येतत्पदमनुभागबन्धाश्रयं, तत्र च तस्मिन् काले स्थितिघातं करोति तस्मिन्नेव काले रसघातमपि करोति, केवलं रसघातः स्थितिखण्डकेभ्यः क्रमप्रवृत्तेभ्योऽनन्तगुणाभ्यधिकः, अतोऽनेन रसघातकरणेन पूर्वस्माद्भिन्नार्थ पदं भवति।

तथा 'दह्यमानं दग्ध' मित्येतत्पदं प्रदेशबन्धाश्रयं, प्रदेशबन्धस्त्वनन्तानामनन्तप्रदेशानां स्कन्धानां कर्म्मत्वापादनं, तस्य च प्रदेशबन्धकर्म्मणः सत्कानां पञ्चह्रस्वाक्षरोच्चारणकालपरिमाण-याऽसङ्ख्यातसमयया गुणश्रेणीरचनया पूर्वं रचितानां शैलेश्यवस्थाभाविमुच्छिन्नक्रियध्यानाग्निना-प्रथमसमयादारभ्य यावदन्त्यसमयस्तावत्प्रतिसमयं क्रमेणासङ्ख्येयगुणवृद्धानां कर्मपुद्गलानां दहनं-दाहः, अनेन च दहनार्थेनेदं पूर्वस्मात्पदाद्भिन्नार्थं पदं भवति, दाहश्चान्यत्रान्यथा 'म्रियमाणं मृत' मित्यनेनायुःकर्मैवोक्तं, यतः कर्मैव तिष्ठज्जीवतीत्युच्यते, कर्मैव च जीवादपगच्छत् म्रियत इत्युच्यते, तच्च मरणं सामान्येनोक्तमपि विशिष्टमेवाभ्युपगन्तव्यं, यतः संसारवर्त्तीनि मरणानि अनेकशोऽनुभूतानि दुःखरूपाणि चेति किं तैः ?, इह पुनः पदेऽपुनर्भवमरणमन्त्यं सर्वकर्म्मक्षय-सहचरितमपवर्गहेतुभूतं विवक्षितमिति।

तथा 'निर्जीर्यमाणं निजीर्ण' मित्येतत्पदं सर्वकर्माभावविषयं, यतः सर्वकर्मनिर्ज्जरणं न कदाचिदप्यनुभूतपूर्वं जीवेनेति, अतोऽनेन सर्वकर्माभावरूपनिर्जरार्थेन पूर्वपदेभ्यो भिन्नार्थत्वा-द्भिन्नार्थं पदं भवति। अथैतानि पदानि विशेषतो नानार्थान्यपि सन्ति सामान्यतः कस्य पक्षस्याभिधा-यकतया प्रवृत्तानीत्यस्यामाशङ्कायामाह -

'विगयपक्खस्स' त्ति, विगतं विगमो-वस्तुनोऽवस्थान्तरापेक्षया विनाशः, स एव पक्षो-वस्तुधर्म, तस्य वा पक्षः-परिग्रहो विगतपक्षस्तस्य विगतपक्षस्य वाचकानीति शेषः, विगतत्वं त्विहाशेषकर्म्माभावोऽभिमतो, जीवेन तस्याप्राप्तपूर्वतयाऽत्यनतमुपादेयत्वात्, तदर्थत्वाच्च पुरुषप्रयासस्येति, एतान चैवं विगतार्थानि भवन्ति, छिद्यमानपदे हि स्थितिखण्डनं विगम उक्तः, भिद्यमानपदे त्वनुभावभेदो विगमः, दह्यमानपदे त्वकर्मताभवनं विगमः, म्रियमाणपदे पुनरायुः-कर्माभावो विगमः, निर्जीर्यमाणपदे त्वशेषकर्माभावो विगमः उक्तः, तदेवमेतानि विगतपक्षस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादकानीत्युच्यन्ते। एवं च यत्पञ्चमाङ्गादिसूत्रोपन्यासे प्रेरित, यदुत-केनाभिप्रायेणेदं सूत्रमुपन्यस्तमिति, तत् केवलज्ञानोत्पादसर्वकर्मविगमाभिधानरूपसूत्राभिप्रायव्याख्यानेन निर्णीतमिति। एतत्सूत्रसंवादिसिद्धसेनाचार्योऽप्याह –

॥१॥ "उप्पज्जमाणकालं उप्पण्णं विगययं विगच्छंतं।
दवियं पण्णवयंतो तिकालविसयं विसेसेइ ॥ इति

'उत्पद्यमानकाल'मित्यनेनाद्यसमयादारभ्योत्पत्त्यन्तसमयं यावदुत्पद्यमानत्वस्येष्टत्वाद्वर्त्तमानभविष्यत्कालविषयं द्रव्यमुक्तम्, उत्पन्नमित्यनेन त्वतीतकालविषयम् एवं विगतं विगच्छदित्यनेनापीति, ततश्चोत्पद्यमानादि प्रज्ञापयन् स भगवान् द्रव्यं विशेषयति, कथं ?, त्रिकालविषयं यथा भवतीति संवादगाथार्थः। अन्ये तु कर्मेतिपदस्य सूत्रेऽनभिधानाच्चलनादिपदानि सामान्येन व्याख्यान्ति, न कर्म्मापेक्षयैव।

तथाहि-'चलमाणे चलिए'त्ति, इह चलनम्-अस्थिरत्वपर्यायेण वस्तुन उत्पादः।

'वेइज्जमाणे वेइए'त्ति 'व्येजमानं' कम्पनमानं 'व्येजितं' कम्पितम्, 'एजृ कम्पने' इति वचनात्, व्येजनमपि तद्रूपापेक्षयोत्पाद एव। 'उदीरिज्जमाणे उदीरिए'त्ति, इहोदीरणं स्थिरस्य सतः प्रेरणं, तदपि चलनमेव, 'पहिज्जमाणे पहीणे'त्ति 'प्रहीयमाणं' प्रभ्रश्यत् परिपतदित्यर्थः 'प्रहीणं' प्रभ्रष्टं परिपतितमित्यर्थः, इहापि प्रहाणं चलनमेव, चलनादीनां चैकार्थत्वं सर्वेषां गत्यर्थत्वात्

'उप्पन्नपक्खस्स'त्ति चलत्वादिना पर्यायेणोत्पन्नत्वलक्षणपक्षस्याभिधायकान्येतानीति। तथा छेदभेददाहमरणनिर्जरणान्यकर्म्मार्थान्यपि व्याख्येयानि, तद्व्याख्यानं च प्रतीतमेव, भिन्नार्थता पुनरेषामेवं-कुठारादिना लतादिविषयश्छेदः, तोमरादिना शरीरादिविषयो भेदः, अग्निना दार्वादिविषयो दाहः, मरणं तु प्राणत्यागः, निर्जरा तु अतिपुराणीभवनमिति।

'विगयपक्खस्स'त्ति भिन्नार्थान्यपि सामान्यतो विनाशाभिधायकान्येतानीत्यर्थः, न च वक्तव्यं-किमेतैश्चलनादिभिरिह निरूपितैः?, अतत्त्वरूपत्वादेषाम्, अतत्त्वरूपत्वस्यासिद्धत्वात्, तदसिद्धिश्च निश्चयनयमतेन वस्तुस्वरूपस्य प्रज्ञापयितुमारब्धत्वात्, तथाहि-व्यवहारनयश्चलितमेव चलितमिति मन्यते, निश्चयस्तु चलदपि चलितमिति, अत्र च बहुवक्तव्यं तच्च विशेषावश्यकादिहैवाभिधायास्यमानजमालिचरिताद्वाऽवसेयमिति॥ इहाद्ये प्रश्नोत्तरसूत्रद्वये मोक्षतत्त्वं चिन्तितं, मोक्षः पुनर्जीवस्य जीवाश्च नारकादयश्चतुर्विंशतिविधाः, यदाह –

॥१॥ "नेरइया १ असुराई १० पुढवाई ५ बेंदियादओ ३ चेव।
पिंचिंदियतिरिय १ नरा १ वंतर१ जोइसिय १ वेमाणी १ (२४)॥

–तत्र नारकांस्तावत् स्थित्यादिभिश्चिन्तयन्नाह–

**मू. (११)** *नेरइयाणं भंते! केवइकालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं ठिई पन्नत्ता १। नेरइयाणं भंते! केवइकालस्स आणमंति वा पाणमंति वा ऊससंति वा नीससंति वा?, जहा ऊसासपए २।*

*नेरइया णं भंते आहारट्ठी?, जहा पन्नवणाए पढमए आहारुद्देसए तहा भाणियव्वं ३।*

**वृ.** निर्गतमयम्-इष्टफलं कर्म येभ्यस्ते निरयास्तेषु भवा नैरयिका नारकास्तेषां नैरयिकाणां 'भंते'त्ति भदन्त! 'केवइकालं' ति कियांश्चासौ कालश्चेति कियत्कालस्तं कियत्कालं यावत् 'ठिइ'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयुःकर्मवशान्नरकेऽवस्थानं 'पन्नत्त'त्ति 'प्रज्ञप्ता' प्ररूपिता ? भगवद्भिरन्यतीर्थकरैश्चेति प्रश्नः 'गोयमे' त्यादि निर्वचनं व्यक्तमेव, नवरं 'दस वाससहस्साइं' ति प्रथमपृथिवीप्रथमप्रस्तटापेक्षया 'तेत्तीसं सागरोवमाइं' ति सप्तमपृथिव्यपेक्षयेति, मध्यमा तु जघन्यापेक्षया समया- द्यधिका सामर्थ्यगम्येति ।। अनन्तरं नारकाणां स्थितिरुक्ता, ते चोच्छ्सादिमन्त इत्युच्छ- सादिनिरूपणायाह—

'नेरइयाण' मित्यादि व्यक्तं, नवरं केवइकालस्सत्ति प्राकृतशैल्या कियत्कालात् कियता कालेनेत्यर्थः, 'आणमंति'त्ति आनन्ति 'अन प्राणने' इति धातुपाठात् मकारस्यागमिकत्वात्, 'पाणमंति' त्ति प्राणन्ति, वाशब्दौ समुच्चयार्थौ, एतदेव पदद्वयं क्रमेणार्थतः स्पष्टयन्नाह 'ऊससंति वा नीससंति व'त्ति यदेवोक्तमानन्ति तदेवोक्तमुच्छसन्तीति, तथा यदेवोक्तं प्राणन्ति तदेवोक्तं निश्वसन्तीति, अथवा आनमन्ति प्राणमन्तीति 'णमु प्रह्वत्वे' इत्येतस्यानेकार्थत्वेन श्वसनार्थत्वात्, अन्ये त्वाहुः-'आनन्ति वा प्राणन्ति वा' इतियनेनाध्यात्मक्रिया परिगृह्यते, 'उच्छ्वसन्ति वा निश्वसन्ति वा' इत्यनेन च बाह्येति ।

'जहा ऊसासपए' त्ति' एतस्य प्रश्नस्य निर्वचनं यथा उच्छ्वासपदे प्रज्ञापनायाः सप्तमपदे तथा वाच्यं, तच्चेदम्-'गोयमा ! सययं संतयामेव आणमंति वा पाणमंति वा ऊससन्ति वा नीससंति वा' इति, तत्र 'सततम्' अनवरतम्, अतिदुःखिता हि ते, अतिदुःखव्याप्तस्य च निरन्तरमेवोच्छ- वसनिश्वासौ दृश्येते, सततत्वं च प्रायोवृत्त्याऽपि स्यादित्यत आह-'संतयामेव' त्ति सन्ततमेव नैकसमयेऽपि तद्विरहोऽस्तीति भावः, दीर्घत्वं चेह प्राकृतत्वात्, आनमन्तीत्यादेः पुनरुच्चारणं शिष्यवचने आदरोपदर्शनार्थं, गुरुभिराद्रियमाणवचना हि शिष्याः सन्तोषवन्तो भवन्ति, तथा च पौनःपुन्येन प्रश्नश्रवणार्थनिर्णयादिषु घटन्ते लोके चादेयवचना भवन्ति, तथा च भव्योपका- रस्तीर्थाभिवृद्धिश्चेति । अथ तेषामेवाहारं प्रश्नयन्नाह 'णेरइयाणमि' त्यादि व्यक्तं, नवरम् 'आहा- रट्ठि' त्ति आहार- मर्थयन्ते-प्रार्थयन्त इत्येवंशीलाः अर्थो वा-प्रयोजनमेषामस्तीत्यर्थिनः, आहारेण- भोजनेनार्थिन आहारार्थिनः, आहारस्य-भोजनस्य वाऽर्थिन आहारार्थिनः, 'जहा पन्नवणाए' त्ति 'आहारट्ठी' इत्येतत्पदप्रभृति यथा प्रज्ञापनायाश्चतुर्थोपाङ्गस्य 'पढमए' त्ति आद्ये 'आहारउद्देसए' त्ति आहार- पदस्याष्टविंशतितमस्योद्देशकः पदशब्दलोपाच्चाहारोद्देशकः तत्र भणितं 'तहा भाणियव्वं' ति तेन प्रकारेण वाच्यमिति । तत्र च नारकाहारवक्तव्यतायां बहूनि द्वाराणि भवन्ति, तत्सङ्ग्रहार्थ पूर्वो- क्तस्थित्युच्छसलक्षणद्वारद्वयदर्शनपूर्विकां गाथामाह ।

**मू. (१२)** *ठिई उस्साहारे किं वाऽऽहारेंति सव्वओ वावि ।*
*कतिभागं ? सव्वाणि व कीस व भुज्जो परिणमंति ।।*

**वृ.** 'ठिइगाहा' व्याख्या, स्थितिर्नारकाणां वाच्या, उच्छ्वासश्च, तौ चोक्तावेव ।

तथा 'आहारे' त्ति आहारविषयो विधिर्वाच्यः, स चैवम्-'नेरइयाणं भंते ! आहारट्ठी ?, हंता आहारट्ठी ३ । नेरइयाणं भंते! केवइकालस्स आहारट्ठे समुप्पज्जइ ?, 'आहारार्थ'' आहारप्रयोज- नमाहारार्थित्वमित्यर्थः, 'गोयमा ! नेरइयाणं दुविहे आहारे पन्नत्ते' अभ्यवहारक्रियेत्यर्थः 'तंजहा- आभोगनिव्वत्तिए य अनाभोगनिव्वत्तिए य' तत्राभोगः-अभिसन्धिस्तेन निर्वर्त्तितः-कृत आभोग- निर्वर्त्तितः, आहारयामीतीच्छपूर्वक इत्यर्थः, अनाभोगनिर्वर्त्तितस्तु आहारयामीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशिष्टेच्छमन्तरेणापि, प्रावृट्काले प्रचुरतरप्रश्रवणाद्यभिव्यङ्ग्यशीतपुद्गलाद्याहारवत्, 'तत्थ णं जे से अनाभोगनिव्वत्तिए से णं अणुसमयमविरहिए आहारट्ठे समुप्पज्जइ' 'अणुसमयं'ति प्रतिक्षणं सतता- तितीव्रक्षुद्वेदनीयकर्मोदयत ओजआहारादिना प्रकारेणेति, 'अविरहिए'त्ति चुक्कस्खलितन्यायादपि न विरहितः, अथवा प्रदीर्घकालोपभोग्याहारस्य सकृद्ग्रहणेऽपि भोगोऽ-नुसमयं स्यादतो ग्रहणस्यापि सातत्यप्रतिपादनार्थमविरहितमित्याह –

'तत्थ णं जे से आभोगनिव्वत्तिए से णं असंखेज्जसमइए अंतोमुहुत्तिए आहारट्ठे समुप्पज्जइ' असङ्ख्यातसामयिकः पल्योपमादिपरिमाणोऽपि स्यादत आह 'अंतोमुहुत्तिए'त्ति, इदमुक्तं भवति-आहारयामीत्यभिलाष एतेषां गृहीताहारद्रव्यपरिणामतीव्रतरदुःखजननपुरस्सरमन्तर्मुहूर्त्तान्निवर्त्तत इति ४। 'किं वाऽऽहारेंति'त्ति, किंस्वरूपं वा वस्तु नारका आहारयन्ति ? इति वाच्यं, वाशब्दः समुच्चये, तत्रेदं प्रश्ननिर्वचनसूत्रम्-'नेरइया णं भंते ! किमाहारमाहारेंति ?, गोयमा ! दव्वओ अनंतपएसियाइं' अनन्तप्रदेशवन्ति पुद्गलद्रव्याणीत्यर्थः, तदन्येषामयोग्यत्वात्, 'खेत्तओ असंखेज्जपएसावगाढाइं' न्यूनतरप्रदेशावगाढानि हि न तद्ग्रहणप्रायोग्यानि, अनन्तप्रदेशावगाढानि तु न भवन्त्येव, सकललोकस्याप्यसङ्ख्येयप्रदेशपरिमाणत्वात्, 'कालओ अन्नतरट्ठिइयाइं' जघन्य-मध्यमोत्कृष्टस्थितिकानीत्यर्थः स्थितिश्चाहारयोग्यस्कन्धपरिणामेनावस्थानमिति 'भावओ वन्नमंताइं गंधमंताइं रसमंताइं फासमंताइं आहारिंति ५।

जाइं भावओ वन्नमंताइं आहारिंति ताइं किं एगवन्नाइं आहारेंति ? जाव कि पंचवन्नाइं आहारेंति ?, गोयमा ! ठाणमग्गणं पडुच्च एगवन्नाइंपि आहारिंति जाव पंचवन्नाइंपि आहारिंति, विहाणमग्गणं पडुच्च कालवन्नाइंपि आहारेंति जाव सुक्किल्लाइंपि आहारेंति' तत्र 'ठाणमग्गणं पडुच्च'त्ति तिष्ठन्त्यस्मिन्निति स्थानं-सामान्यं यथैकवर्णं द्विवर्णमित्यादि, 'विहाणमग्गणं पडुच्च'त्ति विधानं-विशेषः कालादिरिति ६। 'जाइं वन्नओ कालवन्नाइं' आहारेंति ताइं किं एगगुणकालाइं आहारेंति जाव दसगुणकालाइं आहारेंति संखेज्जगुणकालाइं असंखेज्जगुणकालाइं अनंतगुणकालाइं आहारेंति ?, गोयमा ! एकगुणकालाइंपि आहारेंति जाव अनन्तगुणकालाइंपि आहारेंति ७।

एवं जाव सुक्किलाइं ११, एवं गंधओवि १३ रसओवि १८॥

जाइं भावओ फासमंताइं ठाणमग्गणं पडुच्च नो एगफासाइं आहारेंति नो दुफासाइंपि आहारेंति नो तिफासाइंपि आहारेंति' एकस्पर्शानामसम्भवादन्येषां चाल्पप्रदेशिकतासूक्ष्मपरि-णामाभ्यां ग्रहणायोग्यत्वात्, 'चउफासाइंपि आहारेंति जाव अट्ठफासाइंपि आहारेंति' बहुप्रदेशिकता-बादरपरिणामाभ्यां ग्रहणयोग्यत्वादिति, 'विहाणमग्गणं पडुच्च कक्खडाइंपि आहारेंति जाव लुक्खा-इंपि आहारेंति १९।

जाइं फासओ कक्खडाइंपि आहारेंति ताइं किं एगगुणकक्खडाइं आहारेंति २०।

एवं अट्ठवि फासा भाणियव्वा जाव अनंतगुणलुक्खाइंपि आहारेंति २७। जाइं भंते ! अनंतगुणलुक्खाइं आहारेंति ताइं किं पुट्ठाइं आहारेंति अपुट्ठाइं आहारेंति ?, गोयमा ! पुट्ठाइं आहारेंति नो अपुट्ठाइं आहारेंति २८'।

'पुट्ठाइं'ति आत्मप्रदेशस्पर्शवन्ति, तत्पुनरात्मप्रदेशस्पर्शनमवगाढक्षेत्राद्बहिरपि भवति अत उच्यते-'जाइं भंते ! पुट्ठाइं आहारेंति ताइं किं ओगाढाइं आहारेंति अणोगाढाइं आहारेंति ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा ! ओगाढाइं नो अणोगाढाइं 'अवगाढानी'ति आत्मप्रदेशैः सहैकक्षेत्रावगाढानीत्यर्थ २९

जाइं भंते ! ओगाढाइं आहारेंति ताइं किं अनंतरोगाढाइं आहारेंति परंपरोगाढाइं आहारेंति गोयमा ! अनंतरोगाढाइं आहारेंति नो परंपरोगाढाइं आहारेंति' 'अनन्तरावगाढानी'ति येषु प्रदेशेष्वात्माऽवगाढस्तेष्वेव यान्यवगाढानि तान्यनन्तरावगाढानि अन्तराऽभावेनावगढत्वात्, यानि च तदनन्तरवर्त्तीनि तान्यवगाढसम्बन्धात्परम्परावगाढानीति ३० ।

'जाइं भंते ! अनंतरोगाढाइं आहारेंति ताइं किं अणूइं आहारेंति बायराइं आहारेंति ?, गोयमा ! अणूइंपि आहारेंति बायराइंपि आहारेंति' तत्राणुत्वं बादरत्वं चापेक्षिकं तेषामेवाहारयोग्यानां स्कन्धानां प्रदेशवृद्धया वृद्धानामवसेयम् ३१ ।

जाइं भंते ! अणूइंपि आहारेंति बायराइंपि आहारेंति ताइं किं उड्ढंपि आहारेंति ? एवं अहेवि तिरियंपि ?, गोयमा ! उड्ढंपि आहारेंति एवं अहेवि तिरियंपि २ ।

जाइं भंते ! उड्ढंपि आहारेंति अहेवि तिरियंपि आहारेंति ताइं किं आइं आहारेंति मज्झे आहारेंति पज्जवसाणे आहारेंति ?, गोयमा ! तिहावि' अयमर्थ-आभोगनिर्वर्त्तितस्याहारस्यान्तर्मौहूर्त्तिकस्यादिमध्यावसानेषु सर्वत्राहारयन्तीति ३३ । 'जाइं भंते ! आइं मज्झे अवसाणेवि आहारेंति ताइं किं सविसए आहारेंति अविसए आहारेंति ?, गोयमा ! सविसए नो अविसए आहारेंति' तत्र स्वः-स्वकीयो विषयः स्पृष्टवगाढानन्त- रावगाढाख्यः स्वविषयस्तस्मिन्नाहारयन्ति ३४ ।

'जाइं भंते ! सविसए आहारेंति ताइं किं आणुपुव्विं आहारेंति अणाणुपुव्विं आहारेंति ?, गो० ! आणुपुव्विं आहारेंति नो अणाणुपुव्विं आहारेंति' तत्रानुपूर्व्या यथाऽऽसन्नं, नातिक्रम्य ३५ ।

'जाइं भंते ! आनुपुव्विं आहारेंति ताइं किं तिदिसिंआहारेंति जाव छद्दिसिं आहारेंति ? गोयमा ! नियमा छद्दिसिं आहारेंति' इह नारकाणां लोकमध्यवर्त्तित्वेन षण्णामप्यूर्द्धादिदिशामलोकेनानावृतत्वात् षट्सु दिक्ष्वाहारग्रहणमस्ति तत उक्तं-नियमात् षड्दिशि, दिक्त्रयादिविकल्पास्तु लोकान्तवर्त्तिषु पृथिवीकायिकादिषु दिशां त्रयस्य द्वयस्य एकास्याश्चालोकेनावरणे भवन्तीति । यद्यपि वर्णतः पञ्चवर्णानीत्याद्युक्तं तथापि प्राचुर्येण यद्वर्णगन्धादियुतानि द्रव्याण्याहारयन्ति तद् दर्शयति-'ओसन्नं कारणं पडुच्च'त्ति बाहुल्यलक्षणं कारणमाश्रित्य, तत्र च प्रकृत्यशुभानुभाव एव कारणमिति, 'वन्नओ कालनीलाइं गंधओ दुब्भिगंधाइं रसओ तित्तकडुयरसाइं फासओ कक्खडगुरुयसीयलुक्खाइं' एतानि च प्रायो मिथ्यादृष्टय एवाहारयन्ति, न तु भविष्यत्तीर्थकरादय इति । अथ तानि यथास्वरूपाण्येव नारका आहारयन्त्यन्यथा वेत्यस्यामाशङ्कायामभिधीयते- 'तेसिंपि पोराणे वन्नगुणे गंधगुणे रसगुणे फासगुणे विप्परिणामइत्ता परिपीलइत्ता परिसाडइत्ता परिविद्धंसइत्ता' विपरिणामादयो विनाशार्थत्वेनैकार्था एव ध्वनयः 'अन्ने य अपुव्वे वन्नगुणे गंधगुणे रसगुणे फासगुणे उप्पाएत्ता आयसरीरोगाढे पोग्गले सव्वप्पणयाए आहारमाहारेंति' 'सव्वप्पणयाए'त्ति सर्वात्मना सर्वैरात्मप्रदेशैरित्यर्थः ३६ ।

व्याख्यातं सूत्रे सङ्ग्रगाथायाः 'किं वाऽऽहारेंति'त्ति पदम् । अथ 'सव्वओ वा' इति व्याख्यायते-तत्र 'सर्वतः' सर्वप्रदेशैर्नैरयिका आहारयन्तीति, वाऽपीति वचनादभीक्ष्णमाहारयन्तीत्यपि वाच्यं, तच्चैवम्-''नेरइयाणं भंते ! सव्वओ आहारेंति सव्वओ परिणामेंति सव्वओ ऊससंति सव्वओ नीससंति अभिक्खणं आहारेंति अभिकखणं परिणामेंति अभिक्खणं ऊससंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिक्खणं नीससंति आहच्च आहारेंति ४ ?, हंता गोयमा ! नेरइया सव्वओ आहारेंति ।

'सव्वओ' त्ति सर्वात्मप्रदेशैः 'अभिक्खणं' ति अनवरतं पर्याप्तत्वे सति 'आहच्चे' ति कदाचित् न सर्वदा अपर्याप्तकावस्थायामिति ।

तथा 'कइभागं' ति आहारतयोपात्तपुद्‌गलानां कतिथं भागमाहारयन्ति इति वाच्यं, तच्चैवम्- 'नेरइयाणं भंते ! जे पोग्गले आहारत्ताए गिहंति तेणं तेसिं पोग्गलाणं सेयालंसि कइभागमाहारेंति कइमागं आसायंति ?, गो० ! असंखेज्जइमागं आहारेंति अणंतमागं आसाइंति' 'सेयालंसि' त्ति एष्यत्काले, ग्रहणकालोत्तरकालमित्यर्थः, 'असंखेज्जइभागमाहारेंति' इत्यत्र केचिद्वयाचक्षतेगवादि-प्रथमवृहदग्रासग्रहण इव कांश्चिद्रगृहीतासङ्क्ष्येयभागमात्रान् पुद्‌गलानाहारयन्ति तदन्ये तु पतन्तीति

अन्ये त्वाचक्षते-ऋ जुसूत्रनयदर्शनात्स्वशरीतया परिणतानामसङ्ख्येयभागमाहारयन्ति, ऋजुसूत्रो हि गवादिप्रथमबृद्‌ग्रासग्रहण इव गृहीतानां शरीरत्वेनापरिणतानामाहारतां नेच्छति, शरीरतया परिणानामपि केषाञ्चिदे विशिष्टाहारकार्यकारिणां तामभ्युपगच्छति, शुद्धनयत्वात्तस्येति अन्ये पुनरित्थमभिदधि-'असंखेज्जइभागमाहारेंति' त्ति शरीरतया परिणमन्ति, शेषास्तु किट्टीभूय मनुष्याभ्यवहताहारवन्मलीभवन्ति, न शरीरत्वेन परिणमन्तीत्यर्थ :। 'अनंतभागं आसाइंति' त्ति आहारतया गृहीतानामनन्तभागमास्वादयन्ति, तद्रसादीन् रसनादीन्द्रियद्वारेणोपलभन्ते इत्यर्थः

'सव्वाणि व' त्ति दारं, तत्र सर्वाण्येवाहारद्रव्याण्याहारयन्तीति वाच्यं, वाशब्दः समुच्चये, तच्चैवम्-'नेरइयाणं भंते ! जे पग्गले आहारत्ताए परिणमेंति ते किं सव्वे आहारेंति नो सव्वे आहरेंति ?, गोया ! सव्वे अपरिसेसिए आहारेंति' इह विशिष्टग्रहणगृहीता आहारपरिणामयोग्या एव ग्राह्याः, उज्झितशेषा इत्यर्थः, अन्यथा पूर्वापरसूत्रयोर्विरोधः स्यात्, इथ चैवं व्याख्या, यदाह-

"जं जह सुत्ते भणियं तहेव जइ तं वियालणा नत्थि ।
किं कालियानुओगो दिट्ठो दिट्ठिप्पहाणेहिं ।।

'कीस व भुज्जो २ परिणमंति' त्ति द्वारगाथापदं, तत्र 'कीस' त्ति पदावयवे पदसमुदायोपचारात् 'कीसत्ताए' त्ति दृश्यं, किंस्वतया-किंस्वभावतया कीदृशतया वा केन प्रकारेण किंस्वरूपतयेत्यर्थ वाशब्दः समुच्चये, 'भुज्जो' त्ति 'भूयो भूयः' पुनः पुनः परिणमन्ति आहारद्रव्याणीति प्रकृतमित्येतदत्र वाच्यं, तच्चैवम् ।

'नेरइया णं भंते ! जे पोग्गले आहारत्ताए गेण्हंति ते णं' तेसिं पोग्गला कीसत्ताए भुज्जो भुज्जो परिणमंति ?, गो० सोइंदियत्ताए जाव फासिंदियत्ताए अणिट्ठत्ताए अकंतत्ताए अपियत्ताए अमणुन्नत्ताए अमणामत्ताए अणिच्छियत्ताए अभिज्झियत्ताए अहत्ताए नो उड्ढत्ताए दुक्खत्ताए नो सुहत्ताए एएसि भुज्जो भुज्जो परिणमंति' तत्र 'अनिष्टतया' सदैव तेषां सामान्येनावल्लभतया, तथा 'अकान्ततया' सदैव तद्‌भावेनाकमनीयतया, तथा 'अप्रियतया' सर्वेषामेव द्वेष्यतया, तथा 'अमनोज्ञतया' कथयाऽप्यमनोरमतया, तथा 'अमनोऽगम्यतया' चिन्त-याऽपि अमनोगम्यतया, तथा 'अनीप्सिततया' आप्तुमनिष्टतया, एकार्थावेते शब्दाः, 'एहिज्झिय-त्ताए' त्ति अभिध्येयतया तृप्तेरनुत्पादकत्वेन पुनः पुनरप्यभिलाषनिमित्ततया, अहृद्यत्वेनेत्यन्ये, अशुभत्वेनेत्यर्थः, 'अहत्ताए' त्ति गुरुपरिणामतया 'ने उड्ढत्ताए' त्ति नो लघुपरिणामतयेति सङ्ग्रहगाथार्थः । इदं च सङ्ग्रहणि-गाथाविवरणसूत्रं क्वचित् सूत्रपुस्तक एव दृश्यत इति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ नैरयिकाऽऽहाराधिकारात्तद्विषयमेव प्रश्नचतुष्टयमाह–

**मू. (१३)** *नेरइयाणं भंते! पुव्वाहारिया पोग्गला परिणया १ ?, आहारिया आहारिज्जमाणा पोग्गला परिणया २ ?, अणाहारिया आहारिज्जिस्समाणा पोग्गला परिणया ३ ?, अणाहारिया अणाहारिज्जिस्समाणा पोग्गला परिणया ? ४।*

*गोयमा! नेरइयाणं पुव्वाहारिया पोग्गला परिणया १, आहारिया आहारिज्जमाणा पोग्गला परिणया परिणमंति य २, अणाहारिया आहारिज्जिस्समाणा पोग्गला नो परिणया परिणमिस्संति ३, अणाहारिया अणाहारिज्जिस्समाणा पोग्गला नो परिणता नो परिणमिस्संति ४।*

**वृ.** 'पुव्वाहारिय' त्ति ये पूर्वमाहृताः-पूर्वकाल एकीकृताः संगृहीता इतियावत् अभ्यवहृता वा 'पोग्गले'ति स्कन्धाः 'परिणय'त्ति ते 'परिणताः' पूर्वकाले शरीरेण सह संपृक्ताः परिणतिं गता इत्यर्थः, इति प्रथमः प्रश्नः १, इह च सर्वत्र प्रश्नत्वं काकुपाठादवगम्यते। तथा 'आहारिय'त्ति पूर्वकाले 'आहृताः' संगृहीता अभ्यवहृता वा, 'आहरिज्जमाण'त्ति ये च वर्त्तमानकाले 'आह्रियमाणाः' सङ्गृह्यमाणा अभ्यवह्रियमाणा वा पुद्गलाः 'परिणय'त्ति ते परिणता इति द्वितीयः २।

तथा 'अणाहारिय'त्ति येऽतीतकालेऽनाहृताः 'आहारिज्जिस्समाणे'त्ति ये चानागते काले आहरिष्यमाणाः पुद्गलास्ते परिणता इति तृतीयः ३।

तथा 'अणाहारिया अणाहारिज्जिस्समाणा' इत्यादि अतीतानागताहरणक्रियानिषेधाच्चतुर्थः ४।

इह च यद्यपि चत्वार एव प्रश्ना उक्तास्तथाऽप्येते त्रिषष्टिः संभवन्ति, यतः पूर्वाहृता आह्रियमाणा आहरिष्यमाणा अनाहृता अनाह्रियमाणा अनाहरिष्यमाणाश्चेति षट्पदानीह सूचितानि, तेषु चैकैकपदाश्रयणेन षड्, द्विकयोगे पञ्चदश, त्रिकयोगे विंशतिः, चतुष्कयोगे पञ्चदश, पञ्चकयोगे षट्, षड्योगे एक इति। अत्रोत्तरमाह-'गोयमे'त्यादि व्यक्तं, नवरं ये पूर्वमाहृतास्ते पूर्वकाल एव परिणताः, ग्रहणानन्तरमेव परिणामभावात् १।

ये पुनराहृता आह्रियमाणाश्च ते परिणताः, आहृतानां परिणामभावादेव, परिणमन्ति च आह्रियमाणानां परिणामभावस्य वर्त्तमानत्वादिति २।

वृत्तिकृता तु द्वितीयप्रश्नोत्तरविकल्प एवंविधो दृष्टः-यदुत आहृता आहरिष्यमाणाः पुद्गलाः परिणताः परिणंस्यन्ते च, यतोऽयं तेनैवं व्याख्यातः-यदुत ये पुनराहृता आहरिष्यन्ते पुनस्तेषां केचित्परिणताः परिणताश्च ये संपृक्ताः शरीरेण सह, ये तु न तावत्संपृच्यन्ते कालान्तरे तु संपृक्ष्यन्ते ते परिणंस्यन्त इति २। ये पुनरनाहृता आहरिष्यन्ते पुनस्ते नो परिणताः, अनाहृतानां संपर्काभावेन परिणामाभावात्, यस्मात्त्वाहरिष्यन्ते ततः परिणंस्यन्ते, आहृतस्यावश्यं परिणामभावादिति ३।

चतुर्थस्त्वतीतभविष्यदाहरणक्रियाया अभावेन परिणामाभावादवसेय इति ४।

एतदनुसारेणैव प्राग्दर्शितविकल्पानामुत्तरसूत्राणि वाच्यानीति ॥ अथ शरीरसंपर्कलक्षणपरिणामात्पुद्गलानां चयादयो भवन्तीति तद्दर्शनार्थं प्रश्नयन्नाह–

**मू. (१४)** *नेरइयाणं भंते! पुव्वाहारिया पोग्गला चिया पुच्छ, जहा परिणया तहा चियावि, एवं चिया उवचिया उदीरिया वेइया निज्जिन्ना, गाहा –*

**वृ.** 'नेरइयाण'मित्यादि चयादिसूत्राणि परिणामसूत्रसमानीतिकृत्वाऽतिदेशतोऽधीतानीति, तथाहि-'जहा परिणया तहा चियावी'त्यादि, इह च पुस्तकेषु वाचनाभेदो दृश्यते तत्र न संमोहः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कार्यः, सर्वत्राभिधेयस्य तुल्यत्वात्, केवलं परिणतसूत्रानुसारेण प्रश्नसूत्राणि व्याकरणानि च मतिमताऽध्येयानीति, तत्र 'चिताः' शरीरे चयं गताः, 'उपचिताः' पुनर्बहुशः प्रदेशसामीप्येन शरीरे चिता एवेति, उदीरितास्तु स्वभावतोऽनुदितान् पुद्गलानुदयप्राप्ते कर्मदलिके करणविशेषेण प्रक्षिप्य यान् वेदयते, उदीरणा लक्षणं चेदम्-''जं करणेणाकड्डिय उदए दिज्जइ उदीरणा एसा तथा 'वेदिताः' स्वेन रसविपाकेन प्रतिसमयमनुभूयमानाः अपरिसमाप्ताशेषानुभावा इति। तथा 'निर्जीर्णा' कार्त्स्न्येनानुसमयमशेषतद्विपाकहानियुक्ता इति।

'गाह'त्ति परिणतादिसूत्राणां संग्रहणाय गाथा भवति, सा चेयम् –

**मू. (१५)** *परिणय चिया उवचिय उदीरिया वेइया य निज्जिन्ना।*
*एक्केक्कंमि पदंमि चउव्विहा पोग्गला होंति।*

**वृ.** 'परिणये'त्यादि व्याख्यातार्था, नवरम्-एकैकस्मिन् पदे परिणतचिपचितादौ चतुर्विधाः आहृताः १ आहृता आह्रियमाणाश्च २ अनाहृता आहरिष्यमाणाश्च ३ अनाहृता अनाहरिष्यमाणाश्च ४, इत्येवं चतूरूपाः पुद्गला भवन्ति, प्रश्ननिर्वचनविषयाः स्युरिति।

पुद्गलाधिकारादेवेमामष्टादशसूत्रीमाह–

**मू. (१६)** *नेरइयाणं भंते ! कइविहा पोग्गला भिज्जंति ?, गोयमा ! कम्मदव्ववग्गण-महिकिच्च दुविहा पोग्गला भिज्जंति, तंजहा-अणू चेव बायरा चेव १।*

*नेरइयाणं भंते ! कतिविहा पोग्गला चिज्जंति ?, गोयमा ! आहारदव्ववग्गणमहिकिच्च दुविहा पोग्गला चिज्जंति, तंजहा-अणूं चेव बायरा चेव २। एवं उवचिज्जंति ३।*

*नेर० क० पो० उदीरेंति ? गो० ! कम्मदव्ववग्गणमहिकिच्च दुविहे पोग्गले उदीरेंति, तं०-अणूं चेव बायरा चेव, सेसावि एवं चेव भाणियव्वा, एवं वेदेंति ५ निज्जरेंति ६ उयट्टिंसु ७ उव्वट्टेंति ८ उव्वट्टिस्संति ९ संकामिंसु १० संकामेंति ११ संकामिस्संति १२ निहत्तिंसु १३ निहत्तेंति १४ निहत्तिस्संति १५ निकायंसु १६ निकायंति १७ निकाइस्संति १८ सव्वेसुवि कम्मदव्ववग्गणमहिकिच्च गाहा*

**वृ.** 'नेरइयाणं भंते! कइविहा पोग्गला भिज्जंती' त्यादि व्यक्तं, नवरं 'भिज्जंति' त्ति तीव्रमन्दम-ध्यतयाऽनुभागभेदेन भेदवन्तो भवन्ति, उद्वर्त्तनकरणापवर्त्तकरणाभ्यां मन्दरसास्तीव्ररसाः तीव्ररसास्तु मन्दरसा भवन्तीत्यर्थः उत्तरम् 'कम्मदव्ववग्गणमहिकिच्च'त्ति समानजातीयद्रव्याणां राशिर्द्रव्यवर्गणा, सा चौदारिकादिद्रव्याणामप्यस्तीत्यत आहकर्म्मरूपा द्रव्वर्गणा कर्म्मद्रव्याणां वा वर्गणा कर्म्मद्रव्यवर्गणा तामधिकृत्य-तामाश्रित्य, कर्म्मद्रव्यवर्गणासत्का इत्यर्थः कर्मद्रव्याणामेव च मन्देतरानुभावचिन्ताऽस्ति न द्रव्यान्तराणामितिकृत्वा कर्म्मद्रव्यवर्गणामधिकृत्येत्युक्तम् –

'अणूं चेव बायरा चेव'त्ति चेवशब्दः समुच्चायार्थः ततश्चाणवश्च बादराश्च, सूक्ष्माश्च स्थूलाश्चेत्यर्थः, सूक्ष्मत्वं स्थूलत्वं चैषां कर्म्मद्रव्यापेक्षयैवावगन्तव्यं नान्यापेक्षया, यत औदारि-कादिद्रव्याणां मध्ये कर्म्मद्रव्याण्येव सूक्ष्माणीति। एवं चयोपचयोदीरणवेदननिर्जराः शब्दार्थभेदेन वाच्याः, किन्तु चयसूत्रे उपचयसूत्रे च 'आहारदव्ववग्गणमहिकिच्चे'ति यदुक्तं तत्रायमभिप्रायः-शरीरमाश्रित्य चयोपचयौ प्राग् व्याख्यातौ, तौ चाहारद्रव्येभ्य एव भवतो नान्यतः, अत आहार-द्रव्यवर्गणामधिकृत्येत्युक्तमिति, उदीरणादयस्तु कर्म्मद्रव्याणामेव भवन्त्यतस्तत्सूत्रेषूक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म्मद्रव्यवर्गणामधिकृत्येति । 'उयट्टिसु'त्ति अपवर्त्तितवन्तः, इहापवर्तनंकर्म्मणां स्थित्यादेरध्यवसायविशेषेण हीनताकरणम्, अपवर्त्तनस्य चोपलक्षणत्वादुद्वर्त्तनमपीह दृश्यं, तच्च स्थित्यादेर्वृद्धिकरणस्वरूपं, 'संकामेंसु'त्ति संक्रमितवन्तः, तत्र संक्रमणं मूलप्रकृत्यभिन्नानामुत्तरप्रकृतीनामध्यवसायविशेषेण परस्परं संचारणं, तथा चाह–

॥१॥ "मूलप्रकृत्यभिन्नाः संक्रमयति गुणत उत्तराः प्रकृतीः ।
नन्वात्माऽमूर्त्तत्वादध्यवसायप्रयोगेण ॥

–अपरस्त्वाह–

॥१॥ "मोत्तूण आउयं खलु दंसणमोहं चरित्तमोहं च ।
सेसाणं पगईणं उत्तरविहिसंकमो भणिओ ॥

एतदेव निदर्श्यते-यथा कस्यचित्सद्वेद्यमनुभवतोऽशुभकर्मपरिणतिरेवंविधा जाता येन तदेव सद्वेद्यमसद्वेद्यतया संक्रामतीति, एवमन्यत्रापि योज्यमिति । 'निधत्तेंसु'त्ति निधत्तान् कृतवन्तः, इह च विश्लिष्टानां परस्परतः पुद्गलानां निचयं कृत्वा धारणं रूढिशब्दत्वेन निधत्तमुच्यते, उद्वर्त्तनापवर्त्तनव्यतिरिक्तकरणा नामविषयत्वेन कर्म्मणोऽवस्थानमिति । 'निकाइंसु'त्त निकाचितवन्तः, नितरां बद्धवन्त इत्यर्थः, निकाचनं चैषामेव पुद्गलानां परस्परविश्लिष्टनामेकीकरणमन्योऽन्यावगाहिता अग्निप्रतप्तप्रतिहन्यमानशूचीकलापस्येव, सकलकरणानामविषयतया कर्मणो व्यवस्थापनमितियावत् । 'भिज्रंती'त्यादिपदानां संग्रहणी यथा ।

**मू. (१७)** *भेइयचिया उवचिया उदीरिया वेइया य निज्जिन्ना ।*
*उयट्टणसंकामणनिहत्तणनिकायणे तिविह कालो ॥*

**वृ.** 'भेइय' इत्यादिगाथा गतार्था, नवरम्-अपवर्त्तनसंक्रमनिधत्तनिकाचनपदेषु त्रिविधः कालो निर्देष्टव्यः, अतीतवर्त्तमानानागतकालनिर्देशेन तानि वाच्यानीत्यर्थः, इह चापवर्त्तनादीनामिव भेदादीनामपि त्रिकालता युक्ता, न्यायस्य समानत्वात्, केवलमविवक्षणान्न तन्निर्देशः सूत्रे कृत इति । अथ पुद्गलाधिकारादिदं सूत्रचतुष्टयमाह–

**मू. (१८)** *नेरइयाणं भंते ! जे पोग्गले तेयाकम्मत्ताए गेण्हंति ते किं तीतकालसमए गेण्हंति पडुप्पन्नकालसमए गेण्हंति ? अणा० का० समए गेण्हंति ?, गोयमा ! नो तीयकालसमए गेण्हंति पडुप्पन्नकालसमए गेण्हंति नो अणा० समए गिण्हंति १ ।*

*नेरइयाणं भंते ! जे पोग्गला तेयाकम्मत्ताए गहिए उदीरेंति ते किं तीयकालसमयगहिए पोग्गले उदीरेंति पडुप्पन्नकालसमए धेप्पमाणे पोग्गले उदीरेंति गहणसमयपुरक्खडे पोग्गले उदीरेंति गोयमा ! अतीयकालसमयहिए पोग्गले उदीरेंति नो पडुप्पन्नकालसमए धेप्पमाणे पोग्गले उदीरेंति नो गहणसमयपुरक्खडे पोग्गले उदीरेंति २, एवं वेदेंति ३ निज्जरेंति ।*

**वृ.** 'नेरइयाण'मित्यादि व्यक्तं, नवरं 'तेयाकम्भत्ताए'त्ति तेजःशरीरकार्म्मणशरीरतया, तद्रूपतयेत्यर्थः, 'अतीतकालसमए'त्ति कालरूपः समयो न तु समाचाररूपः कालोऽपि समयरूपो न तु वर्णादिस्वरूप इति परस्परेण विशेषणात् कालसमयः अतीतः कालसमयः अतीतकालस्य चोत्सर्पिण्यादेः समयः-परमनिकृष्टोऽंशोऽतीतकालसमयस्तत्र । पडुप्पन्न'त्ति प्रत्युत्पन्नो-वर्त्तमानः, नोऽतीतकालेत्यादौ अतीतानगतकालविषय-ग्रहणप्रतिषेधो विषयातीतत्वात्, विषयातीतत्त्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च तयोर्विनष्टानुत्पन्नत्वेनासत्त्वादिति, प्रत्युत्पन्न- त्वेऽप्यभिमुखान् गृह्णाति नान्यान् ।

'गहणसमयपुरक्खडे'त्ति ग्रहणसमयः पुरस्कृतो-वर्त्तमानसमयस्य पुरोवर्त्ती येषां ते ग्रहणसमयपुरस्कृताः, प्राकृतत्वादेवं निर्देशः, अन्यथा पुरस्कृतग्रहणसमया इति स्याद्, ग्रहीष्यमाणा इत्यर्थः १, उदीरणा च पूर्वकालगृहीतानामेव भवति, ग्रहणपूर्वकत्वादुदीरणायाः ।

अत उक्तम्-अतीतकालसमयगृहीतानुदीरयन्तीति, गृह्यमाणानां ग्रहीष्यमाणानां चागृहीतत्वादुदीरणाऽभावस्तत उक्तं-'नो पडुप्पन्ने' त्यादि २ । वेदनानिर्जरासूत्रयोरप्येषैवोपपत्तिरिति ३-४ ।। अथ कर्माधिकारादेवयमष्टसूत्री-

*मू. (१९) नेरइयाणं भंते ! जीवाओ किं चलियं कम्मं बंधंति अचलियं कम्मं बंधंति ?, गोयमा ! नो चलियं कम्मं बंधंति अचलियं कम्मं बंधंति १ ।*

*नेरइयाणं भंते ! जीवाओ किं चलियं कम्मं उदीरेंति अचलियं कम्मं उदीरेंति ।*

*गोयमा ! नो चलियं कम्मं उदीरेंति अचलियं कम्मं उदीरेंति २ । एवं वेदेंति ३ उयट्टेंति ४ संकामेंति ५ निहत्तेंति ६ निकायेंति ७, सव्वेसु अचलियं नो चलियं ।*

*नेरइयाणं भंते ! जीवाओ किं चलियं कम्मं निज्जरेंति अचलियं कम्मं निज्जरेंति ?, गोयमा चलियं कम्मं निज्जरेंति नो अचलियं कम्मं निज्जरेंति ८, गाहा–*

**वृ.** 'नेरइयाण'मित्यादिर्व्यक्ता च नवरं 'जीवाओ किं चलियं'ति जीवप्रदेशेभ्यश्चलितं-तेष्वनवस्थानशीलं तदितरत्त्वचलितं तदेव बध्नाति, यदाह–

॥ १ ॥ "कृत्स्नैर्देशैः स्वकदेशस्थं रागादिपरिणतो योग्यम् ।
बध्नाति योगहेतोः कर्म स्नेहाक्त इव च मलम् ॥ इति

एवमुदीरणावेदनाऽपवर्त्तनासंक्रमणनिधत्तनिकाचनानि भाव्यानि, निर्जरा तु पुद्गलानां निरनुभावीकृतानामात्मप्रदेशेभ्यः सातनं, सा च नियमाच्चलितस्य कर्म्मणो नाचलितस्येति, इह सङ्ग्रहणीगाथा ।

*मू. (२०) बंधोदयवेदोयट्टसंकमे तह निहत्तणनिकाये ।*
*अचलियं कम्मं तु भवे चलियं जीवाउ निज्जरए ॥*

**वृ.** 'बंधोदये' त्यादिर्भावितार्था, केवलमुदयशब्देनोदीरणा गृहीतेति । उक्ता नारकवक्तव्यता, अथ चतुर्विंशतिदण्डकक्रमागतामसुरकुमारवक्तव्यतामाह–

*मू. (२१) ठिई आहारी य भाणियव्वो, ठिती-जहा ठितिपदे तहा भाणियव्वा, सव्वजीवाणं आहारोऽवि जहा पन्नवणाए पढमे आहारुद्देसए तहा भाणियव्वो, एत्तो आढत्तो-नेरइयाणं भंते आहारट्ठी ? जाव दुक्खत्ताए भुज्जो भुज्जो परिणमंति, गोयमा !*

*असुरकुमाराणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, जहन्नेणं दस वाससहस्साइं उक्कोसेणं सातिरेगं सागरोवमं, असुरकुमाराणं भंते ! केवइयं कालस्स आणमंति वा पाणमंति वा ?, गोयमा ! जहन्नेणं सत्तण्हं थोवाणं उक्कोसेणं साइरेगस्स पक्खस्स आणमंति वा पाणमंति वा, असुरकुमाराणं भंते ! आहारट्ठी ?, हंता आहारट्ठी, असुरकुमाराणं भंते ! केवइकालस्स आहारट्ठे समुप्पज्जइ ?, गोयमा ! असुरकुमाराणं दुविहे आहारे पन्नत्ते, तंजहा-आभोगनिव्वत्तिए य अनाभोगनिव्वत्तिए य, तत्थ णं जे से अनाभोगनिव्वत्तिए से अणुसमयं अविरहिए आहारट्ठे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुप्पज्जइ, तत्थ णं जे से आभोगनिव्वत्तिए से जहन्नेणं चउत्थभत्तस्स उक्कोसेणं साइरेगस्स वाससहस्सस्स आहारट्ठे समुप्पज्जइ, असुरकुमाराणं भंते ! किमाहारमाहारेंति ?, गोयमा ! दव्वओ अनंतपएसियाइं दव्वाइं खित्तकालभावपन्नवणागमेणं सेसं जहा नेरइयाणं जाव तेणं तेसिं पोग्गला कीसत्ताए भुज्जो भुज्जो परिणमंति ?, गोयमा ! सोइंदियत्ताए ५ सुरूवत्ताए सुवन्नत्ताए इट्ठत्ताए इच्छियत्ताए भिज्झियत्ताए उड्ढत्ताए नो अहत्ताए सुहत्ताए नो दुहत्ताए भुज्जो भुज्जो परिणमंति, असुरकुमाराणं पुव्वाहारिया पुग्गला परिणया असुरकुमाराभिलावे जहा नेरइयाणं जाव नो अचलियं कम्मं निज्जरंति।

नागकुमाराणं भंते ! केवइयं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं देसूणाइं दो पलिओवमाइं, नागकुमाराणं भंते ! केवइकालस्स आणमंति वा पा० ?, गोयमा ! जहन्नेणं सत्तण्हं थोवाणं उक्कोसेणं मुहुत्तपुहुत्तस्स आणमंति वा पा०, नागकुमाराणं आहारट्ठी ?, हंता आहारट्ठी, नागकुमाराणं भंते ! केवइकालसस आहारट्ठे समुप्पज्जइ ?, गोयमा ! नागकुमाराणं दुविहे आहारे पन्नत्ते, तंजहा-आभोगनिव्वत्तिए य अनाभोगनिव्वत्तिए य, तत्थ णं जे से अनाभोगनिव्वत्तिए से अनुसमयमविरहिए आहारट्ठे समुप्पज्जइ, तत्थ णं जे से आभोगनिव्वत्तिए से जहन्नेणं चउत्थभत्तस्स उक्कोसेणं दिवसपुहुत्तस्स आहारट्ठे समुप्पज्जइ, सेसं जहा असुरकुमाराणं जाव नो अचलियं कम्मं निज्जरंति।

एवं सुवन्नकुमाराविं जाव थणियकुमाराणंति।

पुढविक्काइयाणं भंते ! केवईयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं, पुढविक्काइया केवइकालस्स आणमंति वा० पा० ?, गो वेमाय आणमंति वा० पा० ?, पुढविक्काइया आहारट्ठी ?, हंता आहारट्ठी, पुढविक्काइयाणं केवइकालस्स आहारट्ठे समुप्पज्जइ ?, गोयमा ! अनुसमयं अविरहिए आहारट्ठे समुप्पज्जइ, पुढविक्काइया किमाहारेति !, गोयमा ! दव्वओ जहा नेरइयाणं जाव निव्वाधाएणं छद्दिसिं वाधायं पडुच्च सिय तिदिसिं सिय चउद्दिसिं सिय पंचदिसिं, वन्नओ कालनीलपीतलोहियहालिद्दसुक्किल्लाणि, गंधओ सुरभिगंध २ रसओ तित्त ५ फासओ कक्खड ८ सेसं तहेव, नाणत्तं कइभागं आहारेंति ? कइभागं फासाइंति गोयमा ! असंखिज्जइभागं आहारेन्ति अनंत भागं फासाइंति जाव तेसिं पोग्गला कीसत्ताए भुज्जो भुज्जो परिणमंति ?, गोयमा ! फासिंदियवेमायत्ताए भुज्जो भुज्जो परिणमंति, सेसं जहा नेरइयाणं जाव नो अचलियं कम्मं निज्जरंति ॥ एवं जाव वणस्सइकाइयाणं।

नवरं ठिई वण्णेयव्वा जा जस्स, उस्सासो वेमायाए।

बेइंदियाणं ठिई भाणियव्वा ऊसासो वेमायाए, बेइंदियाणं आहारे पुच्छ, गोयमा ! आभोगनिव्वत्तिए य अना भोगनिव्वत्तिए य तहेव, तत्थ णं जे से आभोगनिव्वत्तिए से णं असंखेज्जसमए अंतोमुहुत्तिए वेमायाए आहारट्ठे समुप्पज्जइ, सेसं तहेव जाव अनंतभागं आसायंति, बेइंदियाणं भंते ! जे पोग्गले आहारत्ताए गेण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारंति ?, गोयमा ! बेइंदियाणं दुविहे आहारे पन्नत्ते, तंजहा-लोमाहारे पक्खेवाहारे य, जे पोग्गले लोमाहारत्ताए गिण्हंति ते सव्वे अपरिसेसिए आहारेंति, जे पोग्गले पक्खेवाहारत्ताए गिण्हंति तेसिणं पोग्गलाणं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*असंखिज्जइभागं आहारेंति अनेगाइं च णं भागसहस्साइं अनासाइज्जमाणाइं अफासिज्जमाणाइं विद्धंसमागच्छंति, एएसि णं भंते ! पोग्गलाणं अनासाइज्जमाणाणं अफासाइज्जमाणाण य कयरे कयरे अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पुग्गला अनासाइज्जमा अफासाइज्जमाणा अनंतगुणा, बेइंदियाणं भंते ! जे पोग्गला आहारत्ताए गिण्हंति ते णं तेसिं पुग्गला कीसत्ताए भुज्जो भुज्जो परिणमंति ?, गोयमा ! जिब्भिंदियफासिंदियवेमायत्ताए भुज्जो भुज्जो परिणमंति, बेइंदियाणं भंते ! पुव्वाहारिया पुग्गला परिणया तहेव जाव चलियं कम्मं निज्जरंति ।*

*तेइंदियचउरिंदियाणं नाणत्तं ठिईए जाव नेगाइं च णं भागसहस्साइं अनाधाइज्जमाणाइं अनासाइज्जमाणाइं विद्धंसमागच्छंति, एएसि णं भंते ! पोग्गलाणं अनाधाइज्जमाणाइं ३ पुच्छ, गोयमा ! सव्वत्थोवा पोग्गला अनाधाइज्जमाणा अनासाइज्जमाणा अनंतगुणा अफासाइज्जमाणा अनंतगुणा, तेइंदियाणं धाणिंदियजिब्भिंदियफासिंदियवेमायाए भुज्जो २ परिणमंति ।*

*चउरिंदियाणं चक्खिदियधाणिंदियजिब्भिंदियफासिंदियत्ताए भुज्जो भुज्जो परिणमंति ।*

*पंचिंदियतिरिक्खजोणियाणं ठिई भणिऊणं ऊसासो वेमायाए, आहारो अनाभोगनिव्वत्तिए अनुसमयं अविरहिओ, आभोगनिव्वित्तिओ जहन्नेणं अंतोमुहुत्तस्स उक्कोसेणं छट्ठभत्तस्स, सेसं जहा चउरिंदियाणं जाव चलियं कम्मं निज्जरेंति ॥ एवं मणुस्साणवि*

*नवरं आभोगनिव्वत्तिए जहन्नेणं अंतोमुहुत्तं उक्कोसेणं उट्ठमभत्तस्स सोइंदियवेमायत्ताए भुज्जो भुज्जो परिणमंति सेसं जहा चउरिंदियाणं, तहेव जाव निज्जरेंति ।*

*वाणमंतराणं ठिईए नाणत्तं, परिणमंति अवसेसं जहा नागकुमाराणं, एवं जोइसियाणवि, नवरं उस्सासो जहन्नेणं मुहुत्तपहुत्तस्स उक्कोसेणवि मुहुत्तपहुत्तस्स, आहारो जहन्नेणं दिवसपुहुत्तस्स उक्कोसेणवि दिवसपुहुत्तस्स सेसं तहेव ।*

*वेमाणियाणं ठिई भाणियव्वा ओहिया, ऊसासो जहन्नेणं मुहुत्तपुहुत्तस्स उक्कोसेणं तेत्तीसाए पक्खाणं, आहारो आभोगनिव्वत्तिओ जहन्नेणं दिवसपुहुत्तस्स उक्कोसेणं तेत्तीसाए वाससहस्साणं, सेसं चलियाइयं तहेव जाव निज्जरेंति ।*

**वृ.** 'असुरकुमाराण' मित्यादि, तत्रासुरकुमारवक्तव्यता नारकवक्तव्यतावन्नेया, यतः 'ठिइऊसासाहारे' त्यादिगाथोक्तानि सूत्राणि ४० 'परिणयचिए' इत्यादिगाथागृहीतानि ६ 'भेइयचिए' इत्यादिगाथागृहीतानि १८ 'बंधोदये' त्यादिगाथागृहीतानि ८, तदेवं द्विसप्ततिः- सूत्राणि नारकप्रकरणोक्तानि त्रयोविंशतावसुरादिप्रकरणेषु समानि, नवरं विशेषोऽयम्-'उक्कोसेणं साइरेगं सागरोवम' मिति यदुक्तं तद्बलिसञ्ज्ञामसुरकुमारराजमाश्रित्योक्तं, यदाह-"चमर १ बलि २ सार १ महियं' ति, 'सत्तण्हं थोवाणं' ति सप्तानां स्तोकानामुपरीति गम्यते, स्तोकलक्षणं चैवमाचक्षते-

॥१॥ "हट्ठस्स अणवगल्लस्, निरुवकिट्ठस्स जंतुणो ।
एगे ऊसासनीसासे, एस पाणुत्ति वुच्चइ ॥

॥२॥ सत्तपाणूणि से थोवे, सत्त थोवाणि से लवे ।
लवाणं सत्तहत्तरिए, एस मुहुत्ते वियाहिए ॥

इदं जघन्यमुच्छ्रसादिमानं जघन्यस्थितिकानाश्रित्यावगन्तव्यम्, उत्कृष्टं चोत्कृष्टस्थितिकानाश्रित्येति ॥ 'चउत्थभत्तस्स' त्ति चतुर्थभक्तमित्येकोपवासस्य सञ्ज्ञा ततस्तस्योपरि, एकत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिने भुक्त्वाऽहोरात्रं चातिक्रम्य तृतीये भुञ्जत इति भावः।

नागकुमारवक्तव्यतायाम् 'उक्कोसेणं देसूणाइं दो पलिओवमाइं' ति यदुक्तं तदुत्तरश्रेणिमाश्रित्यावसेयं, यदाह-"दाहिण दिवड्डपलियं दो देसूणुत्तरिल्लाणं" इति। 'मुहुत्तपहुत्तस्स'त्ति, मुहूर्त्त उक्तलक्षण एव, पृथक्त्वं तु द्विप्रभृतिरानवभ्यः सङ्ख्याविशेषः समये प्रसिद्धः।

एवं 'सुवन्नकुमाराणवि'त्ति नागकुमाराणामिव सुपर्णकुमाराणामपि स्थित्यादि वाच्यम्, इदं च कियद्दूरं यावद्वाच्यम् ? इत्याह-'जाव थणियकुमाराणं'ति यावत्करणाद् विद्युत्कुमारादिपरिग्रहः, एषां चेहायं क्रमोऽवसेयः-।

॥१॥ "असुर १ नाग २ सुवन्ना ३ विज्जू ४ अग्गी य ५ दीव ६ उदही य ७।
दिसि ८ वाऊ ९ थणियाविय १० दस भेया भवणवासीणं॥

अथ भवनपतिवक्तव्यताऽनन्तरं दण्डकक्रमादेव पृथिव्यादीनां स्थित्यादि निरूपयन्नाह-

'पुढवी'त्यादि व्यक्तमावनस्पतिसूत्रात्, नवरम्- 'अंतोमुहुत्त'न्ति मुहूर्त्तस्यान्तरन्तर्मुहूर्त्तं, भिन्नमुहूर्त्तमित्यर्थः, 'उक्कोसेणं बावीसं वाससहस्साइं'ति यदुक्तं तत् खरपृथिवीमाश्रित्यावगन्तव्यं, यदाह–

॥१॥"सण्हा य १ सुद्ध १२ वालुय १४ मणोसिला १६ सक्करा य १८ खरपुढवी २२।
एगं बारस चोद्दस सोलस अट्ठार बावीसा॥ इति

'वेमायाए'त्ति विषमा विविधा वा मात्रा-कालविभागो विमात्रा तया, इदमुक्तं भवति-विषमकाला पृथिवीकायिकानामुच्छसादिक्रिया-इयत्कालादिति न निरूपयितुं शक्यते, 'जहा नेरइयाण'मित्यतिदेशात्, 'खेत्तओ असंखेज्जपएसोगाढाइं कालओ अन्नयरठिइयाइं' इत्यादि दृश्यं, 'निव्वाघाएणं छद्दिसिं'ति व्याघात आहारस्य लोकान्तनिष्कुटेषु संभवति नान्यत्, ततो निष्कुटेभ्योऽ- न्यत्र षट्सु दिक्षु, कथं ? -चतसृषु पूर्वादिदिक्षु ऊर्ध्वमधश्च पुद्गलग्रहणं करोति, 'वाघायं पडुच्च'त्ति व्याघातं प्रतीत्य, व्याघातश्च निष्कुटेषु, तत्र च 'सिय तिदिसिं'ति स्यात्-कदाचित्तिसृषु दिक्षु आहारग्रहणं भवति, कथं ?, यदा पृथिवीकायिकोऽधस्तने उपरितने वा कोणेऽवस्थितः स्यात्तदाऽ- धस्तादलोकः पूर्वदक्षिणयोश्चालोक इत्येवं तिसृणामलोकेनाऽऽवृतत्वात्तदन्यासु तिसृषु पुद्गलग्रहणम्, एवमुपरितनकोणेऽपि वाच्यं, यदा पुनरध उपरि चालोको भवति तदा चतसृषु (दिक्षु), यदा तु पूर्वादीनां षण्णां दिशामन्यतरस्यामलोको भवति तदा पञ्चस्विति, 'फासओ कक्खडाइं'ति इह कर्कशादयो रूक्षान्ताः स्पर्शा दृश्याः।

'सेसं तहेव'त्ति शेषं-भणितावशेषं तथैव यथा नारकाणां तथा पृथिवीकायिकानामपि, तच्चेदम्-"जाइं भंते! लुक्खाइं आहारेंति ताइं किं पुट्ठाइं अपुट्ठाइं ?, जइ पुट्ठाइं किं ओगाढाइं अनोगाढाइं?" इत्यादि। 'नाणत्तं'ति नानात्वं भेदः पुनः पृथिवीकायिकानां नारकापेक्षयाऽऽहारं प्रतीदं यथा 'कइभाग'मित्यादि तत्र 'फासाइंति'त्ति स्पर्शं कुर्वन्ति स्पर्शयन्ति-स्पर्शनेन्द्रियेणाहार-पुद्गलानां कतिभागं स्पृशन्तीत्यर्थः, अथवा स्पर्शेनास्वादयन्ति प्राकृतशैल्या फासायंति, स्पर्शेन वाऽऽददति-गृह्णन्ति उपलभन्द इति 'फासाइंति', इदमुक्तं भवति-यथा रसनेन्द्रियपर्याप्तिपर्याप्तका रसनेन्द्रियद्वारेणाहारमुपभुञ्जाना आस्वादयन्तीति व्यपदिश्यन्ते एवमेते स्पर्शनेन्द्रियद्वारेणेति।

'सेसं जहा नेरइयाणं'ति, तच्चैवम्-'पुढविकाइयाणं भंते! पुव्वाहारिया पोग्गला परिणया-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इत्यादि, प्राग्वच्च व्याख्येयमिति ॥ एवं 'जाव वणस्सइकाइयाणं'ति, अनेन पृथिवीकायिकसूत्रामिवाप्कायिकादिसूत्राणि समानीत्युक्तं, स्थितौ पुनर्विशेषोऽत एवाह–

नवरं 'ठिई वण्णेयव्वा जा जस्स'त्ति, तत्र जघन्या सर्वेषामन्तर्मुहूर्त्तम्, उत्कृष्टा त्वपां सप्त वर्षसहस्राणि तेजसामहोरात्रत्रयं वायूनां त्रीणि वर्षसहस्राणि वनस्पतीनां दशेति, उक्ता चेयं पृथिव्यादिक्रमेण–

॥१॥ ''बावीसाइं सहस्सा १ सत्त सहस्साइं २ तिन्निऽहोरत्ता ३ ।
वाए तिन्नि सहस्सा ४ दस वाससहस्सिया रुक्खे ५ ॥

'बेइंदियाणं ठिइ भणिऊण ऊसासो वेमायाए'त्ति वक्तव्य इति शेषः, स्थितिश्च द्वीन्द्रियाणां द्वादश वर्षाणि, द्वीन्द्रियाणामाहारसूत्रे यदुक्तम्-'तत्थ णं जे से आभोगनिव्वत्तिए से णं असंखेज्ज-समइए अंतोमुहुत्तिए वेमायाए आहारट्ठे समुप्पज्जइ'त्ति, तस्यायमर्थः-असङ्ख्यातसामयिक आहारकालो भवति, स चावसर्पिण्यादिरूपोऽप्यस्तीत्यत उच्यते-आन्तर्मौहूर्त्तिकः, तत्रापि विमात्रया अन्तर्मुहूर्त्ते समयासङ्ख्यातत्वस्यासङ्ख्येयभेदत्वादिति ।

'बेइंदियाणं, दुविहे आहारे पन्नत्ते, लोमाहारे पक्खेवाहारे य'त्ति, तत्र लोमाहारः खल्वोदातो वर्षादिषु यः पुद्गलप्रवेशः स मूत्रादगम्यत इति, प्रक्षेपाहारस्तु कावलिकः, तत्र प्रक्षेपाहारे बहवोऽस्पृष्टा एव शरीरादन्तर्बहिश्च विध्वंसन्ते स्थौल्यसौक्ष्म्याभ्याम्, अत एवाह-'जे पोग्गले पक्खेवाहारत्तए गिण्हंती'त्यादि 'अनेगाइं च णं भागसहस्साइं'ति असङ्ख्येया भागा इत्यर्थः, 'अनासाइज्जमाणाइं'ति रसनेन्द्रियतः 'अफासाइज्जमाणाइं'ति स्पर्शनेन्द्रियतः 'कयरे' इत्यादि यत्पदं तदेवं दृश्यम्-'कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया व' त्ति व्यक्तं च 'सव्वत्थोवा पोग्गला अनासाइज्जमाणे'त्यादि, येऽनास्वाद्यमानाः केवलं रसनेन्द्रियविषयास्ते स्तोकाः, अस्पृश्यमाणानामनन्तभागवर्त्तिन इत्यर्थः, ये त्वस्पृश्यमाणाः केवलं स्पर्शनविषयास्तेऽनन्तगुणा रसनेन्द्रियविषयेभ्यः सकाशादिति ।

'तेइंदियचउरिंदियाणं नाणत्तं ठिईए'त्ति, तच्चेदम्-'जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तेइंदियाणं एगूणपन्नासं राइंदियाइं चउरिंदियाणं छम्मासा' तथाऽऽहारेऽपि नानात्वं, तत्र च 'तेइंदियाणं भंते ! जे पोग्गले आहारत्ता गेण्हंति' इत्यत आरभ्य तावत्सूत्रं वाच्यं यावत् 'अणेगाइं च णं भाग-सहस्साइं अणाधाइज्जमाणाइं' इत्यादि, इह च द्वीन्द्रियसूत्रापेक्षयाऽनाघ्रायमाणानीत्यतिरिक्तमतो नानात्वम्, एवमल्पबहुत्वसूत्रे परिणामसूत्रे च ।

चतुरिन्द्रियसूत्रेषु तु परिणामसूत्रे 'चक्खिंदियत्ता घाणिंदियत्ताए' इत्यधिकमिति नानात्वमिति

पञ्चेन्द्रियतिर्यक्सूत्रे 'ठिइं भणिऊणं' ति जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं' ति, इत्येतद्रूपा स्थितिं भणित्वा 'उस्सासो' त्ति उच्छ्वासो विमात्रया वाच्य इति, तथा तिर्यक्पञ्चेन्द्रियाणामाहारार्थं प्रति यदुक्तम्-'उक्कोसेणं छट्ठभत्तस्स' त्ति तद्देवकुरूत्तरकुरुतिर्यक्षु लभ्यते ।

मनुष्यसूत्रे यदुक्तम् 'अट्ठमभक्तस्ये' ति तद्देवकुर्वादिमिथुनकनरानाश्रित्य समवसेयमिति

'वाणमंतराण'मित्यादि, वानमन्तराणां स्थितौ नानात्वम्, 'अवसेसं' ति स्थितेरवशेषमायुष्कवर्जमित्यर्थः, प्रागुक्तमाहारादि वस्तु यथा नागकुमाराणां तथा दृश्यं, व्यन्तराणां नागकुमाराणां च प्रायः समानधर्मत्वात्, तत्र व्यन्तराणां स्थितिर्जघन्येन दश वर्षसहास्राणि, उत्कर्षेण तु पल्योपमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जोइसियाणंपी'त्यादि, ज्योतिष्काणामपि स्थितेरवशेषं तथैव यथा नागकुमाराणां, तत्र ज्योतिष्काणां स्थितिर्जघन्येन पल्योपमाष्टभागः उत्कर्षेण पल्योपमं वर्षलक्षाधिकमिति, नवरम् 'उस्सास'त्ति केवलमुच्छसस्तेषां न नाग कुमारसमानः किन्तु वक्ष्यमाणः, तथा चाह-'जहन्नेणं मुहुत्तपुहुत्तस्से'त्यादि, पृथकत्वं द्विप्रभृतिरा नवभ्यः,तत्र यज्ञघन्यं मुहूर्त्तपृथक्त्वं तद्द्वित्रा मुहूर्ताः, यच्चोत्कृष्टं तदष्टौ नव वेति, आहारोऽपि विशेषित एव, तथा चाह-'आहारो' इत्यादि, 'वेमाणियाणं ठिई भाणियव्वा' ।'ओहिय'त्ति औधिकी-सामान्या, सा च पल्योपमादिका त्रयस्त्रिंशत्सागरोपमान्ता, तत्र जघन्या सौधर्ममाश्रित्य, उत्कृष्टा चानुत्तरविमानानीति, उच्छ्वासप्रमाणं तु जघन्यं जघन्यस्थितिकदेवानाश्रित्य इतरत्तूत्कृष्टस्थितिकानाश्रित्येत्यर्थः, अत्र गाथा –

॥१॥ "जस्स जइ सागराइं तस्स ठिई तत्तिएहिं पक्खेहिं ।
ऊसासो देवाणं वाससहस्सेहिं आहारो ॥ त्ति

तदेतावता ग्रन्थेनोक्ता चतुर्विंशतिदण्डकवक्तव्यता, इयं च केषुचित्सूत्रपुस्तकेषु 'एवं ठिई आहारो' इत्यादिनाऽतिदेशवाक्येन दर्शिता, सा चेतो विवरणग्रन्थादवसेयेति ।

उक्ता नारकादिधर्मवक्तव्यता, इयं चारम्भपूर्विकेति आरम्भनिरूपणायाह–

**मू. (२२)** *जीवा णं भंते ! किं आयारंभा परारंभा तदुभयारंभा अनारम्भा ?, गोयमा ! अत्थेगइया जीवा आयारंभावि परारंभावि तदुभयारंभावि नो अनारंभा अत्थेगइया जीवा नो आयारंभा नो परारंभा नो तदुभयारंभा अनारंभा ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ-अत्थेगइया जीवा आयारंभावि ? एवं पडिउच्चारेयव्वं, गोयमा ! जीवा दुविहा पन्नत्ता, तंजहा-संसारसमावन्नगा य असंसारसमावन्नगा य, तत्थ णं जे ते असंसारसमावन्नगा ते णं सिद्धा, सिद्धा णं नो आयारंभा जाव अनारम्भा, तत्थ णं जे ते संसारसमावन्नगा ते दुविहा पन्नत्ता, तंजहा-संजया य असंजया य ।*

*तत्थ णं जे ते संजया ते दुविहा पन्नत्ता, तंजहा-पमत्तसंजया य अप्पमत्तसंजया य, तत्थ णं जे ते अप्पमत्तसंजया ते णं नो आयारंभा नो परारंभा जाव अनारंभा, तत्थ णं जे ते पमत्तसंजया ते सुहं जोगं पडुच्च नो आयारंभा नो परारंभा जाव अनारंभा, असुभं जोगं पडुच्च आयारंभावि जाव नो अनारंभा, तत्थ णं जे ते असंजया ते अविरतिं पडुच्च आयारंभावि जाव नो अनारंभा, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-अत्थेगइया जीवा जाव अनारंभा ॥*

*नेरइयाणं भंते ! किं आयारंभा परारंभा तदुभयारंभा अनारंभा ?, गोयमा ! नेरइया आयारंभावि जाव नो अनारंभा, से केणट्ठेणं भन्ते एवं वुच्चइ ?, गोयमा ! अविरतिं पडुच्च, से तेणट्ठेणं जाव नो अनारंभा । एवं जाव असुरकुमाराणवि जाव पंचिंदियतिरिक्खजोणिया, मणुस्सा जहा जीवा, नवरं सिद्धविरहिया भाणियव्वा, वाणमंतरा जाव वेमाणिया जहा नेरइया ।*

*सलेस्सा जहा ओहिया, कण्हलेसस्स नीललेसस्स काउलेसस्स जहा ओहिया जीवा, नवरं पमत्तअप्पमत्ता न भाणियव्वा, तेउलेसस्स पम्हलेसस्स सुक्कलेसस्स काउलेसस्स जहा ओहिया जीवा, नवरं पमत्तअप्पमत्ता न भाणियव्वा, तेउलेसस्स पम्हलेसस्स सुक्कलेसस्स जहा ओहिया जीवा, नवरं सिद्धा न भाणियव्वा ।*

**वृ.** आरम्भो-जीवोपघातः, उपद्रवणमित्यर्थः, सामान्येन वाऽऽश्रवद्वारप्रवृत्ति, तत्र चात्मा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमारभन्ते आत्मना वा स्वयमारभन्त इत्यात्मारम्भाः, तथा परमारभनते परेण वाऽऽरम्भय तीति परारम्भाः, तदुभयम्-आत्मपररूपं, तदुभयेन वाऽऽरम्भन्त इति तदुभयारम्भाः, आत्मपरोभारम्भ-वर्जितास्त्वनारम्भा इति प्रश्नः, अत्रोत्तरं स्फुटमेव, नवरम् अस्तिशब्दस्याव्ययत्वेन बहुत्वार्थत्वाद् 'अस्ति' विद्यन्ते सन्तीत्यर्थः, अथवाऽस्ति अयं पक्षो यदुत 'एगइय'त्त एकका एके केचनेत्यर्थ जीवाः, आत्मारम्भा अपीत्यादावपिशब्द उत्तरपदापेक्षया समुच्चये, स चात्मारम्भत्वादिधर्माणा-मेकाश्रयताप्रतिपादनार्थ भिन्नाश्रयताप्रतिपादनार्थो वा एकाश्रयत्वं च कालभेदेनावगन्तव्यं, तथाहि-कदाचिदात्मारम्भाः कदाचित्परारम्भाः कदाचित्तदुभयारम्भाः, अत एव नो अनारम्भाः, भिन्नाश्रयत्वं त्वेवम्-एके जीवा असंयता इत्यर्थः आत्मारम्भा वा परारम्भा वेत्यादि ।

अथैकस्वभावत्वाज्ञीवानां भेदमसंभावयन्नाह-'से केणट्ठेणं'ति अथ केन कारणेनेत्यर्थः, 'दुविहा पन्नत्त'ित्ति मयाऽन्यैश्च केवलिभिः, अनेन समस्तसर्वविदां मताभेदमाह, मतभेदे तु विरोधि-वचनतया तेषामसत्यवचनतापत्तिः, पाटलीपुत्रस्वरूपभिधायकविरुद्धवचनपुरुष- कदम्बक-वदिति, प्रमत्तसंयतस्य हि शुभोऽशुभश्च योगः स्यात् संयतत्वात्प्रमादपरत्वाच्च इत्यत आह-'सुभं जोगं पडुच्च'त्ति शुभयोगः-उपयुक्ततया प्रत्युपेक्षणादिकरण, अशुभयोगस्तु तदेवानुपयुक्ततया, आह च --

॥ १ ॥ "पुढवी आउक्काए तेऊवाऊवणस्सइतसाणं ।
पडिलेहणापमत्तो छण्हंपि विराहओ होइ ॥

तथा "सव्वो पमत्तजोगो समणस्स उ होइ आरंभो" । त्ति अतः शुभाशुभौ योगावात्मा (ना) रम्भादिकारणमिति । 'अविरइं पडुच्च'त्ति, दहायं भावः-यद्यप्यसंयतानां सूक्ष्मैकेन्द्रियादीनां नात्मारम्भकादित्वं साक्षादस्ति तथाऽप्यविरतिं प्रतीत्य तदस्ति तेषां, न हि ते ततो निवृत्ताः, अतोऽसंयतानामविरतिस्तत्र कारणमिति, निवृत्तानां तु कथञ्चिदात्माधारम्भकत्वेऽप्यनारम्भकत्वं, यदाह–

॥ १ ॥ "जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।
सा होइ निज्जरफला अज्झत्थविसोहिजुत्तस्स ॥

'से तेणट्ठेणं'ति अथ तेन कारणेनेत्यर्थः । अथात्मारम्भकत्वादितवमेव नारकादिचतु-र्विंशतिदण्डकैर्निरूपयन्नाह-'नेरइयाण'मित्यादि व्यक्तं, नवरं 'मणुस्से'त्यादौ अयमर्थ-मनुष्येषु संयतासंयतप्रमत्ताप्रम्तभेदाः पूर्वोक्ताः सन्ति ततस्ते यथा जीवास्तथाऽध्येतव्याः किन्तु संसार-समापन्नाः, इतरे च ते न वाच्याः, अभववर्तित्त्वादेव तेषामिति, एतदेवाह-'सिद्धविरहिए'इत्यादि व्यन्तरादयो यथा नारकास्तथाऽध्येयाः, असंयतत्व- साधर्म्यादिति ।

आत्मारम्भकत्वादिभिर्द्धर्मैर्जीवा निरूपिताः ते च सलेश्याश्चालेश्याश्च भवन्ति सलेश्यां-स्तांस्तैरेव निरूपयन्नाह-'सलेसा जहा ओहिय'त्ति, लेश्या-कृष्णादिद्रव्यसान्निध्यजनितो जीवप-रिणामो, यदाह–

॥ १ ॥ "कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं, लेश्याशब्द प्रयुज्यते ॥

तत्र 'सलेश्याः' लेश्यावन्तो जीवाः 'जहा ओहिय'त्ति यथा नारकादिविशेषणवर्जिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवा अधीताः ।

'जीवा णं भंते ! किं आयारंभा परारंभे'त्यादिना दण्डकेन तथा सलेश्या जीवा अपि वाच्याः, सलेश्यानामसंसारसमापन्नत्वस्यासम्भवेन संसारसमापन्नेत्यादिविशेषणवर्जितानां शेषाणां संयतादिविशेषणानां तेष्वपि युज्यमानत्वात्, तत्र चायं पाठक्रमः-'सलेसा णं भंते ! जीवा किं आयारंभे'त्यादि तदेव सर्वं, नवरं-जीवस्थाने सलेश्या इति वाच्यमिति, अयमेको दण्डकः, कृष्णादिलेश्याभेदात्तदन्ये षट्, तदेवमेते सप्त, तत्र 'कण्हलेसस्से'त्यादि, कृष्णलेश्यस्य नीललेश्यस्य कापोतलेश्यस्य च जीवराशेर्दण्डको यथा औधिकजीवदण्डकस्तथाऽध्येतव्यः-प्रमत्ताप्रमत्तविशेषणवर्जः, कृष्णादिषु हि अप्रशस्तभावलेश्यासु संयतत्वं नास्ति, यच्चोच्यते-''पुव्वपडिवण्णओ पुण अन्नयरीए उ लेसाए''त्ति, तद्द्रव्यलेश्यां प्रतीत्येति मन्तव्यं, ततस्तासु प्रमत्ताद्यभावः, तत्र सूत्रोच्चारणमेवम्-

''कण्हलेसाणं भंते ! जीवा किं आयारंभा परारंभा तदुभयारंभा अनारंभा ४ ?, गोयमा आयारंभावि जाव नो अनारंभा, से केणट्ठेणं भंते ! एव वुच्चइ ?, गोयमा ! अविरइं पडुच्च'' एवं नीलकापोतलेश्यादण्डकावपीति, तथा तेजोलेश्यादेर्जीवराशेर्दण्डकाः ३ यथा औधिका जीवास्तथा वाच्याः, नवरं तेषु सिद्धा न वाच्याः, सिद्धानामलेश्यत्वात्, तच्चैवम्-'तेउवेस्साणं भंते ! जीवा किं आयारंभा ४ ?, गोयमा ! अत्थेगइया आयारंभावि जाव नो अनारंभा, अत्थेगइया नो आयारंभा जाव अनारंभा, से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! दुविहा तेउलेस्सा पन्नत्ता, तंजहा-संजया च असंजया ये'त्यादि ।

भवहेतुभूतमारम्भं निरूप्य भवाभावहेतुभूतं ज्ञानादिधर्मकदम्बकं निरूपयन्नाह–

**मू. (२३)** *इहभविए भंते ! नाणे परभविए नाणे तदुभयभविए नाणे ?, गोयमा ! इहभविएवि नाणे परभविएवि नाणे तदुभयभविएवि नाणे । दंसणंपि एवमेव ।*

*इहभविए भंते ! चरित्ते परभविए चरित्ते तदुभयभविए चरित्ते ?, गोयमा ! इहभविए चरित्ते नो परभविए चरित्ते नो तदुभयभविए चरित्ते। एवं तवे संजमे ।*

**वृ.** 'इहभविए'इत्यादि व्यक्तं, नवरम्-इह भवे वर्त्तमानजन्मनि यद्वर्त्तते न तु भवान्तरे तदैहभविकं, काकुपाठाच्चेह प्रश्नताऽवसेया, तेन किमैहभविकं ज्ञानमुत 'परभविए'त्ति परभवे-वर्त्तमानानन्तरभाविन्यनुगामितया यद्वर्त्तते तत्पारभविकम्, आहोश्वित् 'तदुभयभविए'त्ति तदुभयरूपयोः-इहपरलक्षणयोर्भवयोर्यदनुगामितया वर्त्तते तत्तदुभयभविकम्, इदं चैवं न पारभविकाद्भिद्यत इति परतरभवेऽपि यदनुयाति तद्ग्राह्यम्, इहभवव्यतिरिक्तत्वेन परतरभवस्यापि परभवत्वात्, ह्रस्वतानिर्देशश्चेह सर्वत्र प्राकृतत्वादिति प्रश्नः, निर्वचनमपि सुगमं, नवरम् 'इहभविए'त्ति ऐहभविकं यदिहाधीतं नानन्तरभवेऽनुयाति, पारभविकं यदनन्तरभवेऽनुयाति, तदुभयभविकं तु यदिहाधीतं परभवे चानुवर्त्तत इति ।

'दंसणंपि एवमेव'त्ति दर्शनमहि सम्यक्त्वमवसेयं, मोक्षमार्गाधिकारात्, यदाह ''सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः'' यत्र तु ज्ञानदर्शनयोरेव ग्रहणं स्यात्तत्र दर्शनं सामान्यावबोधरूपमवसेयमिति । 'एवमेवे'ति ज्ञानवत् प्रश्ननिर्वचनाभ्यां समवसेयं, चारित्रसूत्रे निर्वचने विशेषः, तथाहि-चारित्रमैहभविकमेव, न हि चारित्रवानिह भूत्वा तेनैव चारित्रेण पुनश्चारित्री भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावज्जीवताऽ-वधिकत्वात्तस्य, किञ्चचारित्रिणः संसारे सर्वविरतस्य देशविरतस्य च देवेष्वेवोत्पादात् तत्र च विरतेरत्यन्तमभावात् मोक्षगतावपि चारित्रसंभवाभावात्, चारित्रं हि कर्मक्षपणायानुष्ठीयते मोक्षे च तस्याकिञ्चित्करत्वात् यावज्जीवमिति प्रतिज्ञासमाप्तेः तदन्यस्याश्चाग्रहणाद् अनुष्ठानरूपत्वात् चारित्रस्य शरीराभावे च तदयोगाद्, अत एवोच्यते-'सिद्धे नोचरित्ती नोअचरित्ती' 'नो अचरित्ती'ति चाविरतेरभावादिति।

अनन्तरं चारित्रमुक्तं, तच्च द्विधा तपःसंयमभेदादिति, तयोर्निरूपणायातिदेशमाह-'एवं तवे संजमे'त्ति प्रश्ननिर्वचनाभ्यां चारित्रवत्तपःसंयमौ वाच्यौ, चारित्ररूपत्वात्तयोरिति। ननु सत्यपि ज्ञानादेर्मोक्षहेतुत्वे दर्शन एव यतिव्यं, तस्यैव मोक्षहेतुत्वात्, यदाह--

॥ १ ॥ "भट्ठेण चरित्ताओ सुट्ठुयरं दंसणं गहेयव्वं।
सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति॥

—इति यो मन्यते तं शिक्षयितुं प्रश्नयन्नाह—

**मू. (२४)** *असुंवडे णं भंते! अनगारे किं सिज्झइ बुज्झइ मुच्चइ परिनिव्वाइ सव्वदुक्खाण-मंतं करेइ?, गोयमा! नो इणट्ठे समट्ठे। से केणट्ठेणं जाव नो अंतं करेइ?, गोयमा असंवुडे अनगारे आउयवज्जाओ सत्त कम्मपगगडीओ सिढिलबंधणबद्धाओ धणियबंधणबद्धाओ पकरेइ हस्सकालठिइयाओ दीहकालिट्ठियाओ पकरेइ मंदाणुभावो तिव्वाणुभावाओ पकरेइ अप्पप-एसग्गाओ बहुपएसग्गाओ पकरेइ आउयं च णं कम्मं सियबंधइ सिय नो बंधइ अस्सायावेणिज्जं च णं स्मं भुजो भुज्जो उवचिणाइ अणाइयं च णं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारं अणुपरियट्टइ, से एएणट्ठेणं गोयमा! असंवुडे अनगारे नो सिज्झइ ५।*

*संवुडे णं भंते! अनगारे सिज्झइ ५?, हंता सिज्झइ जाव अंतं करेइ, से केणट्ठेणं?, गोयमा! संवुडे अनगारे आउयवज्जाओ सत्त कम्मपगडीओ धणियबंधणबद्धाओ सिढिलबंध-णबद्धाओ पकरेइ दीहकालठिईयाओ हस्सकालट्ठिइयाओ पकरेइ तिव्वाणुभावाओ मंदाणुभावाओ पकरेइ बहुप्पएसग्गाओ अप्पपएसग्गाओ पकरेइ, आउयं च णं कम्मं न बंधइ, अस्सायावेयणिज्जं च णं कम्मं नो भुज्जो भुज्जो उवचिणाइ, अनाइयं च णं अनवदग्गं दीहमद्धं चाउरंतसंकसारकंतारं वीइवयइ, से एएणट्ठेणं गोयमा! एवं वुच्चइ-संवुडे अनगारे सिज्झइ जाव अंतं करेइ॥*

**वृ.** 'असंवुडे ण'मित्यादि व्यक्तं, नवरम् 'असंवुडे णं'ति 'असंवृतः' अनिरुद्धाश्रवद्वारः 'अनगारे'त्ति अविद्यमानगृहः, साधुरित्यर्थः 'सिज्झइ'त्ति 'सिध्यति' अवाप्तचरमभवतया सिद्धिग-मनयोग्यो भवति 'बुज्झइ'त्ति स एव यदा समुत्पन्नकेवलज्ञानतया स्वपरपर्यायोपेतान्निखि-लान् जीवादिपदार्थान् जानाति तदा बुध्यत इति व्यपदिश्यते 'मुच्चइ'त्ति स एव संजातकेवलबोधो भवोपग्राहिकर्म्मभिः प्रतिसमयं विमुच्यमानो मुच्यत इत्युच्यते 'परिनिव्वाइ'त्ति स एव तेषां कर्मपुद्गलानामनुसमयं यथा यथा क्षयमाप्नोति तथा तथा शीतीभवन् परिनिर्वातीति प्रोच्यते 'सव्वदुक्खाणमंतं करेइ'त्ति स एव चरमभवायुषोऽन्तिमसमये क्षपिताशेषकर्मांशः सर्वदुःखानामन्तं करोतीति भण्यते इति प्रश्नः, उत्तरं तु कण्ठ्यं, नवरं 'नो इणट्ठे समट्ठे'त्ति 'नो' नैव 'इणट्ठे'त्ति 'अयम्' अनन्तरोक्तत्वेन प्रत्यक्षः 'अर्थ' भवः 'समर्थ' बलवान्, वक्ष्यमाणदूषणमुद्गरप्रहार-जर्जरितत्वात्।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

'आउयवज्जाओ' त्ति यस्मादेकत्र भवग्रहणे सकृदेवान्तर्मुहूर्त्तमात्रकाले एवायुषो बन्धस्तत उक्तमायुर्वर्ज्जा इति 'सिढिलबंधणबद्धाओ' त्ति श्लथबन्धनं-स्पृष्टता वा बद्धता वा निधत्तता वा तेन बद्धाः-आत्मप्रदेशेषु संबन्धिताः पूर्वावस्थायामशुभतरपरिणामस्य कथञ्चिदभावदिति शिथिलबन्धनबद्धाः, एताश्चाशुभा एव द्रष्टव्याः, असंवृतभावस्य निन्दाप्रस्तावात्, ताः किमित्याह- 'धणियबंधणबद्धाओ पकरेंति' त्ति गाढतरबन्धना बद्धावस्था वा निधत्तावस्था निकाचिता वा 'प्रकरोति' प्रशब्दस्यादिकर्मार्थत्वात्कर्तुमारभते, असंवृतत्वस्याशुभयोगरूपत्वेन

गाढतप्रकृतिबन्धहेतुत्वात्, आह च-'जोगा पयडिपएसं' ति, पौनःपुन्यभावे त्वसंवृतत्वस्य ताः करोत्येवेति, तथा ह्स्वकालस्थितिका दीर्घकालस्थितिकाः प्रकरोति, तत्र स्थिति-उपात्तस्य कर्म्मणोऽवस्थानं तामल्पकालां महतीं करोतीत्यर्थः, असंवृतत्वस्य कषायरूपत्वेन स्थितबन्ध-हेतुत्वात्, आह च-''ठिइमणुभागं कसायओ कुणइ'' त्ति।

तथा 'मंदाणुभावे-' तयादि, इहानुभावो विपाको रसविशेष इत्यर्थः, ततश्च मन्दानुभावाः-परिपेलवरसाः सतीर्गाढरसाः प्रकरोति, असंवृतत्वस्य कषायरूपत्वादे, अनुभागबन्धस्य च कषाय-प्रत्ययत्वादिति, 'अप्पपएसे' त्यादि, अल्पं-स्तोकं प्रदेशाग्रं-कर्मदलिकपरिमाणं यासां ताः तथा ता बहुप्रदेशाग्राः प्रकरोति, प्रदेशबन्धस्यापि योगप्रत्ययत्वाद्, असंवृतत्वस्य च योगरूपत्वादिति, 'आउयं चे' त्यादि, आयुः पुनः कर्म्म स्यात्-कदाचिद्बध्नाति स्यात्-कदाचिद् न बन्धाति, यस्मात्त्रि-भागाद्यवशेषायुषः परभवायुः प्रकुर्व्वन्ति, तेन यदा त्रिभागादिस्तदा बन्ध्नाति, अन्यदा न बन्धातीति

तथा 'असाए' त्यादि असातवेदनीयं च-दुःखवेदनीयं कर्म पुनः 'भूयो भूयः' पुनः पुनः 'उपचिनोति' उपचितं करोति, ननु कर्मसप्तकान्तवर्तित्वादसातवेदनीयस्य पूर्वोक्तविशेषणेभ्य एव तदुपचयप्रतिपत्तेः किमेतद्ग्रहणेन ? इति, अत्रोच्यते, असंवृतोऽत्यन्तदुःखितो भवतीति प्रतिपादनेन भयजननादसंवृतत्वपरिहारार्थमिदमित्यदुष्टमिति।

'अणाइयं' ति अविद्यमानादिकम् अज्ञातिकं वा-अविद्यमानस्वजनम् ऋणं-वाऽतीतम् ऋणजन्यदुःस्थताऽतिक्रान्त दुःस्थतानिमित्ततयेति ऋणातीतम्, अणं वाऽणकं-पापमतिशयेनेतं-गतमनातीतम्, 'अणवयग्गं' ति, 'अवयग्गं' ति देशीवचनोऽन्तवाचकस्ततस्तन्निषेधाद् अणव-यग्गम्, अनन्तमित्यर्थः अथवाऽवनतम्-आसन्नमग्रम्-अन्तो यस्य तत्तथा तन्निषेधाद् अनवनताग्रम्, एतदेव वर्णनाशादवनता (नवता) ग्रमिति, अथवाऽनवगतम्-अपरिच्छिन्नमग्रं-परिमाणं यस्य तत्तथा, अत एव 'दीहमद्धं' ति 'दीर्घाद्धं' दीर्घकालं 'दीर्घाध्वंवा' दीर्घमार्गं 'चाउरंत' न्ति चतुरन्तं-देवादिगतिभेदात्, पूर्वादिदिग्भेदाच्च चतुर्विभागं तदेव स्वार्थिकाणप्रत्ययोपादानाच्चातुरन्तं 'संसारकं-तारं' ति भवारण्यम् 'अणुपरियट्टइ' त्ति पुनः पुनर्भ्रमतीति।

असंवृतस्य तावदिदं फलं, संवृतस्य तु यत्स्यात्तदाह-'संवुडे ण' मित्यादि व्यक्तं, नवरं संवृतः-अनगारः प्रमत्ताप्रमत्तसंयतादि, स च चरमशरीरः स्यादचरमशरीरो वा, तत्र यश्चरमशरीर-स्तदपेक्षयेदं सूत्रं, यस्त्वचरमशरीरस्तदपेक्षया परम्परया सूत्रार्थोऽवसेयः ननु पारम्पर्येणासंवृतस्यापि सूत्रोक्तार्थस्यावश्यम्भावो, यतःशुक्लपाक्षिकस्यापि मोक्षोऽवश्यंभावी, तदेवं संवृतासंवृतयोः फलतो भेदाभाव एवेति, अत्रोच्यते, सत्यं, किन्तु यत्संवृतस्य पारम्पर्यं तदुत्कर्षतः सप्ताष्टभवप्रमाणं, यतो वक्ष्यति-'जहन्नियं चरित्ताराहणं आराहित्ता सत्तट्ठभवग्गहणेहिं सिज्झइ' त्ति, यच्चासंवृतस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पारम्पर्यं तदुत्कर्षतोऽपार्द्धपुद्गलपरावर्त्तमानमपि स्याद्, विराधनाफलत्वात्तस्येति, 'वीइवयइ' त्ति व्यतिव्रजति व्यतिक्रामतीत्यर्थः । अनगारः संवृतत्वात्सिध्यतीत्युक्तं, यस्तु तदन्यः स विशिष्ट-गुणविकलः सन् किं देवः स्यान्न वा ? इति प्रश्नयन्नाह-

**मू. (२५)** *जीवे णं भंते ! अस्संजए अविरए अप्पडिहयपच्चक्खायपावकम्मे इओ चुए पेच्चा देवे सिया ?, गोयमा ! अत्थेगइए देवे सिया अत्थेगइए नो देवे सिया । से केणट्ठेणं जाव इओ चुए पेच्चा अत्थेगइए देवे सिया अत्थेगइए नो देवे सिया ?*

*गोयमा ! जे इमे जवा गामागर नगरनिगम रायहाणि खेडकब्बड मडंबदोणमुह पट्टणासम सन्निवेसेसु अकामतण्हाए अकामछुहाए अकामबंभचेरवासेणं अकामसीतातवंदसमसगअण्हाण-गसेयजल्लमलपंकपरिदाहेणं अप्पतरं वा भुज्जतरं वा कालं अप्पाणं परिकिलेसंति अप्पाणं परिकिले-सित्ता कालमासे कालं किच्चा अन्नयरेसु वाणमंतरेसु देवलोगेसु देवत्ताए उववत्तारो भवंति*

*केरिसाणं भंते ! तेसिं वाणमंतराणं देवाणं देवलोगा पन्नत्ता ?, गोयमा ! से जहानामए-इहं मणुस्सलोगंमि असोगवने इ वा सत्तवन्नवने इ वा चंपयवने इ वा चूयवने इ वा तिलगवने इ वा लाउयवने इ वा निग्गोहवने इ वा छत्तोववने इ वा असणवने इ वा सणवने इ वा अयसिवने इ वा कुसुंभवणे इ वा सिद्धत्थवमे इ वा बंधुजीवगवने इ वा निच्चं कुसुमियमाइयलवइयथवइयगु-लइयगोच्छियजमलियजुवलियविणमियपणमियसुविभत्तपिंडिमंजरिवडेंसगरेधरे सिरीए अतीव अतीव उवसोभेमाणे उवसोभेमाणे चिट्ठइ, एवामेव तेसिं वाणमंतराणं देवाणं देवलोगा जहन्नेणं दसवाससहस्सट्ठितीएहिं उक्कोसेणं पलिओवमट्ठितीएहिं बहूहिं वाणमंतरेहिं देवेहिं तद्देवीहि य आइण्णा वितिकिण्णा उवत्थडा संथडा फुडा अवगाढगाढसिरीए अतीव अतीव उवसोभेमाणा चिट्ठंति । एरिसगा णं गोयमा ! तेसिं वाणमंतराणं देवाणं देवलोगा पन्नत्ता, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जीवे णं असंजए जाव देवे सिया ।*

*सेवं भंते ! सेवं भंते ! त्ति भगवं गोयमे समणं भगवं महावीरं वंदति नमंसति वंदइत्ता नमंसइत्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरति ।*

**वृ.** 'जीवे ण' मित्यादि, व्यक्तं, नवरम् 'असंजए' त्ति असाधुः संयमरहितो वा, 'अविरए' त्ति प्राणातिपातादिविरतिरहितः विशेषेण वा तपसि रतो यो न भवति सोऽविरतः, 'अप्पडिहए' त्यादि, प्रतिहतं-निराकृतमतीतकालकृतं निन्दादिकरणेन प्रत्याख्यातं च वर्जितमनागतकालविषयं पापकर्म-प्राणातपातादि येन स प्रतिहतप्रत्याख्यातपापकर्मा तन्निषेधादप्रतिहतप्रत्याख्यातपापकर्मा, अनेनातीतानागतपापकर्मानिषेध उक्तः, असंयतोऽविरतश्चेत्यनेन वर्त्तमानपापासंवरणम-भिहितम्, अथवा 'न' नैव 'प्रतिहतं' तपोविधानेन मरणकालाद् आरात्क्षपितं प्रत्याख्यातं च मरणकालेऽप्याश्रवनिरोधेन पापकर्म येन स तथा, अथवा 'न' नैव प्रतिहतं सम्यग्दर्शनप्रतिपत्तितः प्रत्याख्यातं च सर्वविरत्यङ्गीकरणतः पापकर्मज्ञानावरणाद्यशुभं कर्म येन स तथा । 'इओ' त्ति इतः प्रज्ञापकप्रत्यक्षात्तिर्यग्भवान्मनुष्यभवाद्वा च्युतो-मृतः 'पेच्च' त्ति जन्मान्तरे देवः स्यात् ? इति प्रश्नः । 'जे इमे जीवे' त्ति ये इमे प्रत्यक्षासन्नाः पञ्चेन्द्रियतिर्यञ्चो मनुष्या वा 'गामे' त्यादि ग्रामादिष्वधि-करणभूतेषु तत्र ग्रामोजनपदप्रायजनाश्रितः स्थानविशेष-, आकरो लोहाद्युत्पत्तिस्थान नकरं-कररहितं निगमो-वणिग्जनप्रधानं स्थानं राजधानी-यत्र राजा स्वयं वसति खेटं-धूलिप्राकारं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्बटं-कुनगरं मडम्बं-सर्वतो दूरवर्त्ति सन्निवेशान्तरं द्रोणमुखं-जलपथस्थलपथोपेतं पत्तनं-विविधदेशागतपण्यस्थानं, तच्च द्विधा-जलपत्तनं स्थलपत्तनं चेति, रत्नभूमिरित्यन्ते, आश्रमं-तापसादिस्थानं सन्निवेशो-घोषादि, एषां द्वन्द्वस्ततस्तेषु, अथवा ग्रामादयो ये सन्निवेशास्ते तथा तेषु।

'अकामतण्हाए' त्ति अकामानां-निर्जराद्यनभिलाषिणां सतां तृष्णा-तृड् अकामतृष्णा तया, एवमकामक्षुधा, 'अकामबंभचेरवासेणं' ति अकामानां-निर्जराद्यनभिलाषिणां सताम् अकामो वा-निरभिप्रायो ब्रह्मचर्येण स्त्र्यादिपरिभोगाभावमात्रलक्षणेन वासो-रात्रौ शयनमकामब्रह्मचर्यवा-सोऽतस्तेन, 'अकामअण्हाणगसेयजल्लमपंकपरिदाहेणं' ति अकामा येऽस्नानकादयस्तेभ्यो यः परिदाहः स तथा तेन, तत्र स्वेदः-प्रस्वेदः याति च लगति चेति जल्लो-रजोमात्रं मलः-कठिनीभूतं रज एव पङ्को-मल एव स्वेदेनार्द्रीभूत इति। 'अप्पतरो वा भुज्जतरो वा कालं' ति प्राकृतत्वेन विभक्ति-विपरिणामादल्पतरं वा भूयस्तरं वा बहुतरं कालं यावत्, वाशब्दौ देवत्वं प्रत्यल्पेतरकालयोः समताऽभिधानार्थौ, केवलं देवत्वे सामान्यतः सत्यपि अल्पतरकालकामनिर्जरावतामविशिष्टं तत्स्याद् इतरेषां तु विशिष्टमिति, 'अप्पाणं परिकिलेसंति' त्ति विबाधयन्ति।

'कालमासे' त्ति कालो-मरणं तस्य मासः-प्रक्रमादवसरः कालमासस्तत्र 'कालं किच्च' त्ति मृत्वा 'वाणमंतरेसु' त्ति वनान्तरेषु-वनविशेषेषु भवा(अ)वर्णागमकरणाद् वानमन्तराः, अन्ये त्वाहुः-वनेषु भवा वानास्ते च ते व्यन्तराश्चेति वानव्यन्तरास्तेषामेते वानमन्तरा वानव्यन्तरा वाऽतस्तेषु 'देवलोकेषु' देवाश्रयेषु 'देवत्ताए उववत्तारो भवंति' त्ति ये इमे इत्यत्र यच्छब्दोपादानात्ते देवतयोपपत्तारो भवन्तीति द्रष्टव्यम्।

'तेसिं' ति ये देवलोकेष्वकामनिर्जरावन्तो देवतयोत्पद्यन्ते तेषामिति 'से जहानामए' त्ति 'से' त्ति अथ 'यथा' येन प्रकारेण नामेति संभावने वाक्यालङ्कारे वा 'ए' इत्यामन्त्रणार्थोऽलङ्कारार्थ एव वा 'इहं' ति इह मर्त्यलोके 'असोगवणेइ व' त्ति अशोकवनम्, इतिशब्द उपप्रदर्शने, अनुस्वारलोपः सन्धिश्च प्राकृतत्वात्, 'वा' इति विकल्पार्थः, अथवा 'असोगवने' इत्यत्र प्रथमैकवचनकृत एकारः, इवशब्दस्तु वाक्यालङ्कारे, अशोकादयस्तु प्रसिद्धा एव नवरं 'सत्तवन्न' त्ति सप्तपर्ण सप्तच्छद इत्यर्थः 'कुसुमिय' त्ति संजातकुसुमं 'माइय' त्ति मयूरितं संजातपुष्पविशेषमित्यर्थः, 'लवइय' त्ति लवकितं संजातपल्लवलमङ्कुरवदित्यर्थः, 'थवइय' त्ति स्तबकितं संजातपुष्पस्तबकमित्यर्थः, 'गुलइय' त्ति संजात- गुल्मकं, गुल्मं च लतासमूहः, 'गुच्छिय' त्ति संजातगुच्छं, गुच्छश्च पत्रसमूहः, यद्यपि च स्तबक-गुच्छयोरविशेषो नामकोशेऽधीतस्तथाऽपीह पुष्पपत्रकृतो विशेषो भावनीयः, 'जमलिय' त्ति यमलतया-समश्रेणितया तत्तरूणां व्यवस्थितत्वात् संजातयमलत्वेन यमलितं, 'जुवलिय' त्ति युगलतया तत्तरूणां संजातत्वेन युगलितं, 'विणमिय' त्ति विशेषेण पुष्पफलभरेण नमितमितिकृत्वा विनमितं, 'पणमिय' त्ति तेनैव नमयितुमारब्धत्वात्प्रणमितं प्रशब्दस्यादिकर्मार्थत्वादिति, तथा 'सुविभक्ताः' अतिविभक्ताः सुनिष्पन्नतया पिण्डयो-लुम्ब्यो मञ्जर्यश्च प्रतीतास्ता एवावतंसका-शेखरकास्तान् धारयति यत्तत्सुविभक्तपिण्डीमञ्जर्यवतंसकधरं, ततः कुसुमितादीनां कर्मधारय इति। 'सिरीए' त्ति श्रिया-वनलक्ष्मया 'उवसोभेमाणे' त्ति इह द्विर्वचनमाभीक्ष्णये भृशत्वे इत्यर्थः,

'आइन्न' त्ति कचित्प्रदेशे देवानां देवीनांच वृन्दैरात्मीयात्मीयाऽऽवासमर्यादानुल्लङ्घनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याप्ताः, आङशब्दोऽत्र मर्यादावृत्ति, तथा क्वचित्तु 'विइइन्न' त्ति तैरेव वृन्दैर्निजावाससीमोल्लङ्घनेन व्याप्ताः, विशब्दो विशेषवाची, 'उवत्थड' त्ति उपस्तीर्णाः, उपशब्दः सामीप्यार्थः, स्तृञ् च आच्छदनार्थस्त-तश्चोत्पतद्भिर्निपतद्भिश्चानवरतक्रीडासक्तैरुपर्युपरि च्छदिताः, 'संथड' त्ति संस्तीर्णा, संशब्दः परस्परसंश्लेषार्थः, ततश्च क्वचित्तैरेव क्रीडमानैरन्योऽन्यस्पर्द्धया समन्ततश्चलद्भिराच्छदिता इति, 'फुड' त्ति 'स्पृष्टः' आसनशयनरमणपरिभोगद्वारेण परिभुक्ताः स्फुटा वाप्रकाशा व्यन्तरसुरनिक- रकिरणविसरनिराकृतान्धकारतया, 'अवगाढगाढ' त्ति गाढं-बाढमवगाढास्तैरेव सकलक्रीडास्थानपरिभोगनिहितमनोभिरधोऽपि व्याप्ताः, गाढावगाढा इति वाच्ये प्राकृतत्वादवगाढगाढाः, इह च देवत्वयोग्यस्य जीवस्याभिधानेन तदयोग्यः सामर्थ्यादवसीयत एवेति 'अत्थेगइए नो देवे सिया' इत्येतस्यादावुक्तस्य पक्षस्य निर्वचनं कृतं द्रष्टव्यमिति ।

अथोद्देशकनिगमनार्थमाह- 'सेवं भंते सेवं भंते' त्ति, यन्मया पृष्टं तद्भगवद्भिः प्रतिपादितं तदेवमित्थमेव भदन्त ! नान्यथा, अनेन भगवद्वचने बहुमानं दर्शयति, द्विर्वचनं चेह भक्तिसंभ्रमकृतमिति, एवं कृत्वा भगवान् गौतमः श्रमणं भगवन्तं महावीरं वन्दते नमस्यति चेति ।

शतकं-१ उद्देशकः-१ समाप्त

## -: शतकं-१ उद्देशकः-२ :-

**वृ.** व्याख्यातः प्रथमोद्देशकः, अथ द्वितीय आरभ्यते, अस्य चैवं संबन्धः-प्रथमोद्देशके चलनादिधर्मकं कर्म्म कथितं तदेवेह निरूप्यते, तथोद्देशकार्थसङ्ग्रहिण्यां 'दुक्खे' त्ति यदुक्तं तदिहोच्यते, तत्प्रस्तावनार्थं च पूर्वोक्तमेव ग्रन्थं स्मरन्नाह-

***मू. (२६)** रायगिहे नगरे समोसरणं, परिसा निग्गया जाव एवं वयासी-जीवे णं भंते ! सयंकडं दुक्खं वेदेइ ?, गोयमा ! अत्थेगइयं वेएइ अत्थेगइयं नो वेएइ, से केणट्ठेणं भंते ! एवं वुच्चइअत्थेगइयं वेदेइ अत्थेगइयं नो वेएइ ?, गोयमा ! उदिन्नं वेएइ अनुदिन्नं नो वेएइ, से तेणट्ठेणं एवं वुच्चइ-अत्थेगइयं वेएइ अत्थेगतियं वो वेएइ । एवं चउव्वीसदंडएणं जा वेमाणिए ।*

*जीवा णं भंते ! सयंकडं दुक्खं वेएन्ति ?, गोयमा ! अत्थेगइयं वेयन्ति अत्थेगइयं नोवेयन्ति, से केणट्ठेणं ?, गोयमा ! उदिन्नं वेयन्ति नो अणुदिन्नं वेयन्ति, से तेणट्ठेणं, एवं जाव वेमाणिया*

*जीवे णं भंते ! सयंकडं आउयं वेएइ ? गोयमा ! अत्थेगइयं वेएइ अत्थेगइयं नो वेएइ जहा दुक्खेणं दो दंडा तहा आउएणवि दो दंडगा एगत्तपुहुत्तिया ।*

*एगत्तेणं जाव वेमाणिया पुहुत्तेणवि तहेव ।*

**वृ.** 'रायगिहे' इत्यादि पूर्ववत्, 'जीवे ण' मित्यादि तत्र 'सयंकडं दुक्खं' ति यत्परकृतं तन्न वेदयतीति प्रतीतमेवातः स्वयंकृतमिति पृच्छति स्म 'दुक्खं' ति सांसारिकं सुखमपि वस्तुतो दुःखमिति दुःखहेतुत्वाद् 'दुःखं' कर्म वेदयतीति, काकुपाठात् प्रश्नः, निर्वचनं तु यदुदीर्णं तद्वेदयति, अनुदीर्णस्य हि कर्मणो वेदनमेव नास्ति तस्मादुदीर्णं वेदयति नानुदीर्णं, न च बन्धानन्तरमेवोदेति अतोऽवश्यं वेद्यमप्येकं वेदयत्येकं न वेदयति इत्येवं व्यपदिश्यते, अवश्यं वेद्यमेव च कर्म "कडाण कम्माण न मोक्खो अत्थि" इति वचनादिति ।

एवं 'जाव वेमाणिए' इत्यनेन चतुर्विंसतिदण्डकः सूचितः, स चैवम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नेरइए णं भंते ! सयंकड'मित्यादि । एवमेकत्वन दण्डकः, तथा बहुत्वेनान्यः, स चैवम्-'जीवा णं भंते ! सयंकडं दुक्खं वेदेंती'त्यादि तथा 'नेरइया णं भंते ! सयंकडं दुक्ख'मित्यादि, नन्वेकत्वे योऽर्थो बहुत्वेऽपि स एवेति किं बहुत्वप्रश्नेन ? इति, अत्रोच्यते, कुवचिद्वस्तुनि एकत्वब- हुत्वयोरर्थविशेषो दृष्टो यथा सम्यक्त्वादेः एकं जीवमाश्रित्य षट्षष्टिसागरोपमाणि साधिकानि स्थितिकाल उक्तो नानाजीवानाश्रित्य पुनः सर्वाद्धा इति, एवमत्रापि संभवेदिति सद्भायां बहुत्वप्रश्नो न दुष्टः अव्युत्पन्नमतिशिष्यव्युत्पादनार्थत्वाद्वेति ।

अथायुःप्रधानत्वान्नारकादिव्यपदेशस्यायुराश्रित्य दण्डकद्वयम्-एतस्य चेयं वृद्धोक्तभावना-यदा सप्तमक्षितावायुर्बद्धं पुनश्च कालान्तरे परिणामविशेषात्तृ तीयधरणीप्रायोग्यं निर्वर्त्तितं वासुदेवेन तत्तादृशमङ्गीकृत्योच्यते-पूर्वबद्धं कश्चिन्न वेदयति, अनुदीर्णत्वात्तस्य, यदा पुनर्यत्रैव बद्धं तत्रैवोत्पद्यते तदा वेदयतीत्युच्यते, तथैव तस्योदितत्वादिति ।

अथ चतुर्विंशतिदण्डकमाहारदिभिर्निरूपयन्नाह-

**मू. (२७)** *नेरइय णं भंते ! सव्वे समाहारा सव्वे समसरीरा सव्वे समुस्सासनीसासा ?, गोयमा ! नो इणट्ठे समट्ठे । से केणट्ठेणं भंते ! एवं वुच्चइ-नेरइया नो सव्वे समाहारा नो सव्वे समसरीरा नो सव्वे समुस्सासनिस्सासा ?, गोयमा ! नेरइया दुविहा पन्नत्ता, तंजहा-महासरीरा य अप्पसरीरा य, तत्थ णं जे ते महासरीरा ते बहुतराए पोग्गले आहारेंति बहुतराए पोग्गले परिणामेंति बहुतराए पोग्गले उस्ससंति बहुतराए पोग्गले नीससंति अभिक्खणं आहारेंति अभिक्खणं परिणामेंति अभिक्खणं ऊससंति अभिक्खणंनीससंति, तत्थ णं जे अप्पसरीरा ते णं अप्पतराए पुग्गले आहारेंति अप्पतराए पुग्गले परिणामेंति अप्पतराए पोग्गले उस्ससंति अप्पतराए पोग्गले नीससंति आहच्च आहारेंति आहच्च परिणामेंति आहच्च उस्ससंति आहच्च नीससंति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-नेरइया नो सव्वे समाहारा जाव नो सव्वे समुस्सासनिस्सासा ।*

*नेरईया णं भंते ! सव्वे समकम्मा ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं ?, गोयमा ! नेरइया दुविहा पन्नत्ता, तंजहा-पुव्वोववन्नगा य पच्छेववन्नगा य, तत्थ णं जे ते पुव्वोववन्नगा ते णं अप्पकम्मतरागा, तत्थ णं जे ते पच्छेववन्नगा ते णं महाकम्मतरागा, से तेणट्ठेणं गोयमा !*

*नेरइया णं भंते ! सव्वे समवन्ना ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं तहेव ? गोयमा जे ते पुव्वोववन्नगा ते णं विसुद्धवन्नतरागा, तत्थ णं जे ते पच्छेववन्नगा ते णं अविसुद्ध- वन्नतरागा तहेव से तेणट्ठेणं एवं० । नेरइया णं भंते ! सव्वे समलेस्सा ?, गोयमा ! ने इणट्ठे समट्ठे, से केणट्ठेणं जाव नो सव्वे समलेस्सा ?, गोयमा ! नेरइया दुविहा पन्नत्ता, तंजहा-पुव्वोववन्नगा य पच्छेववन्नगा य, तत्थ णं जे ते पुव्वोववन्नगा ते णं विसुद्धलेस्सतरागा, तत्थ णं जे ते पच्छेववन्नगा ते णं अविसुद्धले- स्सतरागा, से तेणट्ठेणं ०।*

*नेरइया णं भंते ! सव्वे समवेयणा ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं ?, गोयमा ! नेरइया दुविहा पन्नत्ता, तंजहा-सन्निभूया य असन्निभूया य, तत्थ णं जे ते सन्निभूया ते णं महावेयणा, तत्थ णं जे ते असन्निभूया ते णं अप्पवेयणतरागा, से तेणट्ठेणं गोयमा !०*

*नेरइया सव्वे समकिरिया ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं ?, गोयमा ! नेरइया तिविहा पन्नत्ता, तंजहा-सम्मदिट्ठी मिच्छदिट्ठी सम्मामिच्छदिट्ठी, तत्थ णं जे ते सम्मदिट्ठी तेसि णं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चत्तारि किरियाओ पन्नत्ताओ, तंजहा-आरंभिया १ परि० २ माया० ३ अप्पच्च० ४, तत्थ णं जे ते मिच्छदिट्ठी तेसि णं पंच किरियाओ कज्जंति-आरंभिया जाव मिच्छदंसणवत्तिया, एवं सम्मामिच्छदिट्ठीणंपि, से तेणट्ठेणं गोयमा !०

नेरइया णं भंते ! सव्वे समाउया सव्वे समोववन्नगा ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं ?, गोयमा ! नेरइया चउव्विहा पन्नत्ता, तंजहा-अत्थेगइया समाउया समोववन्नगा १ अत्थेगइया समाउया विसमोववन्नगा २ अत्थेगइया विसमाउया समोववन्नगा ३ अत्थेगइया विसमाउया विसमोववन्नगा ४ से तेणट्ठेणं गोयमा !०

असुरकुमारा णं भंते ! सव्वे समाहारा सव्वे समसरीरा, जहा नेरइया तहा भाणियव्वा, नवरं कम्मवन्नलेस्साओ परिवण्णेयव्वाओ, पुव्वोववन्नगा महाकम्मतरागा अविसुद्धवन्नतरागा अविसुद्धलेसतरागा, पच्छेववन्नगा पसत्था, सेसं तहेव, एवं जाव थणियकुमाराणं । पुढविक्काइयाणं आहारकम्मवन्नलेस्सा जहा नेरइयाणं ।

पुढविक्काइया णं भंते ! सव्वे समवेयणा ?, हंता समवेयणा, से केणट्ठेणं भंते ! समवेयणा गोयमा ! पुढविकाइया सव्वे असन्नी असन्निभूया अनिदाए वेयणं वेदेंति से तेणट्ठेणं०

पुढविक्काइया णं भंते ! सव्वे समकिरिया ?, हंता समकिरिया, से केणट्ठेणं ?, गोयमा ! पुढविक्काइया सव्वे माई मिच्छदिट्ठी ताणं निययाओ पंच किरियाओ कज्जंति, तंजहा-आरंभिया जाव मिच्छदंसणवत्तिया, से तेणट्ठेणं, समाउया समोववन्नगा, जहा नेरइया तहा भाणियव्वा, जहा पुढविक्काइया तहा जाव चउरिंदिया ।

पंचिंदियतिरिक्खजोणिया जहा नेरइया नाणत्तं किरियासु, पंचिंदियतिरिक्खजोणिया णं भंते ! सव्वे समकिरिया ?, गा०, नो ति०, से केणट्ठेणं, गो० पंचिंदियतिरिक्खजोणिया तिविहा पन्नत्ता, तंजहा-सम्मदिट्ठी मिच्छदिट्ठी सम्मामिच्छदिट्ठी, तत्थ णं जे ते सम्मदिट्ठी ते दुविहा पन्नत्ता, तंजहा-अस्संजया य संजयासंजया य, तत्थ णं जे ते संजयासंजया तेसिणं तिन्नि किरियाओ कज्जंति, तंजहा-आरंभिया परिग्गहिया मायावत्तिया, असंजयाणं चत्तारि, मिच्छदिट्ठीणं पंच, सम्मामिच्छदिट्ठीणं पंच, मणुस्सा जहा नेरइया नाणत्तं जे महासरीरा ते बहुतराए पोग्गले आहारेंति आहच्च आहारेंति जे अप्पसरीरा ते अप्पतराए आहारेंति अभिक्खणं आहारेंति सेसं जहा नेरइयाणं जाव वेयणा ।

मणुस्सा णं भंते ! सव्वे समकिरिया ?, गोयमा ! नो तिणट्ठे समट्ठे, से केणट्ठेणं ?, गोयमा मणुस्सा तिविहा पन्नत्ता, तंजहा-सम्मदिट्ठी मिच्छदिट्ठी सम्मामिच्छदिट्ठी, तत्थ णं जं ते सम्मदिट्ठी ते तिविहा पन्नत्ता, तंजहा-संजया अस्संजया संजयासंजया य, तत्थ णं जे ते संजया ते दुविहा पन्नत्ता, तंजहा-सरागसंजया य वीयरागसंजया य, तत्थ णं जे ते वीयरागसंजया ते णं अकिरिया, तत्थ णं जे ते सरागसंजया ते दुविहा पन्नत्ता, तंजहा-पमत्तसंजया य अपमत्तसंजया य, तत्थ णं जे ते अप्पमत्तसंजया तेसिणं एगा मायावत्तिया किरिया कज्जइ, तत्थ णं जे ते पमत्तसंजया तेसिणं दो किरियाओ कज्जंति, तं० -आरंभिया य मायावत्तिया य, तत्थ णं जे ते संजयासंजया तेसि णं आइल्लाओ तिन्नि किरियाओ कज्जंति, तं० आरंभिया १ परिग्गहिया २ मायावत्तिया ३, असंसजयाणं चत्तारि किरियाओ कज्जंति-आरं० १ परि० २ मायावत्ति० ३ अप्पच्च० ४ मिच्छदि- ट्ठीणं पंच,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आरंभि० १ परि० २ माया० ३ अप्पच्च० ४ मिच्छदंसण० ५ सम्मामिच्छदिट्ठीणं पंच ६*

*वाणमंतरजोतिसवेमाणिया जहा असुरकुमारा, नवरं वेयणाए नाणत्तं-मायिमिच्छदिट्ठी-उववन्नगा य अप्पवेदणतरा अमायिसम्मदिट्ठीउववन्नगा य महावेयणतरागा भाणियव्वा, जोतिसवेमाणिया ।*

*सलेस्सा णं भंते ! नेरइया सव्वे समाहारगा ?, ओहियाणं सलेस्साणं सुक्कलेस्साणं, एएसि णं तिण्हं एक्को गमो, कण्हलेस्साणं नीललेस्साणंपि एक्को गमो नवरं वेदणाए मायिमिच्छदिट्ठीउववन्नगा य अमायिसम्मदिट्ठीउवव० भाणियव्वा । मणुस्सा किरियासु सरागवीयरागपमत्तापमत्ता न भाणियव्वा । काउलेसाएवि एसेव गमो, नवरं नेरइए जहा ओहिए दंडए तहा भाणियव्वा, तेउलेस्सा पम्हलेस्सा जस्स अत्थि जहा ओहिओ दंडओ तहा भाणियव्वा नवरं मणुस्सा सरागा वीयरागा य न भाणियव्वा, गाहा –*

**वृ.** 'नेरइए' इत्यादि व्यक्तं, नवरं 'महासरीरा य अप्पसरीरा ये'त्यादि, इहाल्पत्वं महत्त्वं चापेक्षिकं, तत्र जघन्यम् अल्पत्वमङ्गुलासङ्खयेयभागमात्रत्वम्, उत्कृष्टं तु महत्वं पञ्चधनुःशतमानत्वम्, एतच्च भवधारणीयशरीरापेक्षया, उत्तरवैक्रियापेक्षया तु जघन्यमङ्गुलसङ्खयातभागमात्रत्वम्, इतरत्तु धनुःसहमानत्वमिति, एतेन च किं समशरीरा इत्यत्र प्रश्ने उत्तरमुक्तं, शरीरविषमताऽभिधाने सत्याहारोच्छसयोर्वैषम्यं सुखप्रतिपाद्यं भवतीति शरीरप्रश्नस्य द्वितीयस्थानोक्तस्यापि प्रथमं निर्वचनमुक्तम् ।

अथाहारोच्छसप्रश्नयोर्निर्वचनमाह-'तत्थ ण'मित्यादि ये यतो महाशरीरास्ते तदपेक्षया बहुतरान् पुद्गलान् आहारयन्ति, महाशरीरत्वादे, दृश्यते हि लोके बृहच्छरीरो बह्वाशी स्वल्पशरीरश्चाल्पभोजी, हस्तिशशकवत्, बाहुल्यापेक्षं चेदमुच्यते, अन्यथा बृहच्छरीरोऽपि कश्चिदल्पमश्नाति अल्पशरीरोऽपि कश्चिभूरि भुङ्क्ते, तथाविधमनुष्यवत्, न पुनरेवमिह, बाहुल्यपक्षस्यैवाश्रयणात्, ते च नारका उपपातादिसद्वेद्यानुभवादन्यत्रासद्वेद्योदयवर्त्तित्वेनैकान्तेन यथा महाशरीरा दुःखितास्तीव्राहारभिलाषाश्च भवन्तीति 'बहुतराग पोग्गले परिणामेंति'त्ति, आहारपुद्गलानुसारित्वात्परिणामस्य बहुतरानित्युक्तं, परिणामश्चापृष्टोऽप्याहारकार्यमितिकृत्वोक्तः ।

तथा 'बहुतराए पोग्गले उस्ससंति'त्ति उच्छ्वासतया गृह्णन्ति, 'निस्ससंति'त्ति निःश्वासतया विमुञ्चन्ति, महाशरीरत्वादेव, दृश्यते हि बृहच्छरीरस्तज्जातीयेतरापेक्षया बहूच्छसनिःश्वास इति, दुःखितोऽपि तथैव, दुःखिताश्च नारका इति बहुतरांस्तानुच्छसन्तीति । तथाऽऽहारस्यैव कालकृतं वैषम्यमाह-'अभिक्खणं आहारेंति'त्ति, अभीक्ष्णं-पौनःपुन्येन यो यतो महाशरीरः स तदपेक्षया शीघ्रशीघ्रतराहारग्रहण इत्यर्थः, 'अभिक्खणं ऊससंति अभिक्खणं नीससंति' एते हि महाशरीरत्वेन दुःखिततरत्वाद् 'अभीक्ष्णम्' अनवरतमुच्छसादि कुर्वन्तीति ।

तथा-'तत्थणं जे ते'इत्यादि, ये ते, इह 'ये' इत्येतावतैवार्थसिद्धौ यत्ते इत्युच्यते तद्भाषामात्रमेवेति, 'अप्पसरीरा अप्पतराए पोग्गले आहारेंति'त्ति, ये यतोऽल्पशरीरास्ते तदाहारणीय पुद्गलापेक्षयाऽल्पतरान् पुद्गलनाहारयन्ति, अल्पशरीरत्वादेव, आहच्च आहारेंति'त्ति कदाचिदाहारयन्ति कदाचिन्नाहारयन्ति, महाशरीराहारग्रहणान्तरालापेक्षया, बहुतरकालान्तरालतयेत्यर्थः, 'आहच्च ऊससंति नीससंति'त्ति एते ह्यल्पशरीरत्वेनैव महाशरीरापेक्षयाऽल्पतरदुःखत्वाद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहत्य-कदाचित् सान्तरमित्यर्थः उच्छ्वासादि कुर्वन्ति, यच्च नारकाः सन्ततमेवोच्छसादि कुर्वन्तीति प्रागुक्तं तन्महाशरीरापेक्षयेत्यवगन्तव्यमिति, अथवाऽपर्याप्तकालेऽल्पशरीराः सन्तो लोमाहारपेक्षया नाहारयन्ति उच्छ्वास अपर्याप्तकत्वेन च नोच्छ्वसन्ति, अन्यदा त्वाहारयन्ति उच्छ्वसन्ति चेत्यत आहत्याहारयन्ति आहत्योच्छसन्तीत्युक्तं, 'से तेणट्ठेणं गोयमा ! एवं वुच्चइ-नेरइया सव्वे नो समाहारे'त्यादि निगमनमिति ।

समकर्मसूत्रे-'पुव्वोववन्नगा य पच्छेववन्नगा य'त्ति 'पूर्वोत्पन्नाः' प्रथमतरमुत्पन्नास्तदन्ये तु पश्चादुत्पन्नाः, तत्र पूर्वोत्पन्नानामायुषस्तदन्यकर्मणां च बहुतरवेदनादल्पकर्मत्वं, पश्चादुत्पन्नानां च नारकाणामायुष्कादीनामल्पतराणां वेदितत्वात् महाकर्म्मत्वम्, एतच्च सूत्रं समानस्थितिका ये नारकास्तानङ्गीकृत्य प्रणीतम्, अन्यथा हि रत्नप्रभायामुत्कृष्टस्थितेर्नारकस्य बहुन्यायुषि क्षयमुपगते पल्योपमावशेषे च तिष्ठति तस्यामेव रत्नप्रभायां दशवर्षसहस्रस्थितिर्नारकोऽन्यः कश्चिदुत्पन्न इतिकृत्वा प्रागुत्पन्नं पल्योपमायुष्कं नारकमपेक्ष्य किं वक्तुं शक्यं महाकर्म्मेति ? ।

एवं वर्णसूत्रे पूर्वोत्पन्नस्याल्पं कर्म ततस्तस्य विशुद्धो वर्ण, पश्चादुत्पन्नस्य च बहुकर्मत्वादविशुद्धतरो वर्ण इति ॥ एवं लेश्यासूत्रेऽपि, इह च लेश्याशब्देन भावलेश्या ग्राह्याः, बाह्यद्रव्यलेश्या तु वर्णद्वारेणैवोक्तेति ।

'समवेयण'त्ति 'समवेदनाः' समानपीडाः 'सन्निभूय'त्ति सञ्ज्ञा-सम्यग्दर्शनं तद्वन्तः सञ्ज्ञिनः सञ्ज्ञिनो भूताः-सञ्ज्ञित्वं गताः सञ्ज्ञिभूताः, अथवाऽसञ्ज्ञिनः सञ्ज्ञिनो भूताः सञ्ज्ञिभूताः च्विप्रत्यययोगात्, मिथ्यादर्शनमपहा सम्यग्दर्शनजन्मना समुत्पन्ना इतियावत् तेषां च पूर्वकृत-कर्मविपाकमनुस्मरतामहो महद्दुखसङ्कटमिदमकस्मादस्माकमापतितं न कृतो भगव-दर्हत्प्रणीतः सकलदुःखक्षयकरो विषयविषमविषयपरिभोगविप्रलब्धचेतोभिर्द्धर्म इत्यये महद्दुखं मानसमुपजायतेऽतो महावेदनास्ते, असञ्ज्ञिभूतास्तु मिथ्यादृष्टयः, ते तु स्वकृतकर्मफलमि-दमित्येवमजानन्तोऽनुपतप्तमानसा अल्पवेदनाः स्युरित्येके, अन्ये त्वाहुः-सञ्ज्ञिनः-सञ्ज्ञिपञ्चेन्द्रियाः सन्तो भूता-नारकत्वं गताः सञ्ज्ञिभूताः, ते महावेदनाः, तीव्राशुभाध्यवसायेना-शुभतरकर्मबन्धनेन महानरकेषूत्पादात्, असञ्ज्ञिभूतास्त्वनुभूतपूर्वासञ्ज्ञिभवाः, ते पासञ्ज्ञित्वा-देवात्यताशुभाध्य-वसायाभावाद्रत्नप्रभायामनतितीव्रवेदननरकेषूत्पादादल्पवेदनाः, अथवा 'सञ्ज्ञिभूताः' पर्याप्त-कीभूताः, असञ्ज्ञिनस्तु-

अपर्याप्तकाः, ते च क्रमेण महावेदना इतरे च भवन्तीति प्रतीयत एवेति ।

'समकिरिय'त्ति, समाः-तुल्याः क्रियाः-कर्म्मनिबन्धनभूता आरम्भिक्यादिका येषां ते समक्रियाः, 'आरंभिय'त्ति आरम्भः-पृथिव्याद्युपमर्द स प्रयोजनं-कारणं यस्याः साऽऽरम्भिकी १, 'परिग्गहिय'त्ति, परिग्रहो-धर्मोपकरणवर्जवस्तुस्वीकारो धर्मोपकरणमूर्च्छ च स प्रयोजनं यस्याः सा पारिग्रहिकी २, 'मायावत्तिय'त्ति, माया-अनार्जवं उपलक्षणत्वात्क्रोधादिरपि च सा प्रत्ययःकारणं यस्याः सा मायाप्रत्यया ३, 'अप्पक्खाणकिरिय'त्ति अप्रत्याख्यानेन-निवृत्त्भावेन क्रिया-कर्मबन्धादिकरहणमप्रत्याख्यानक्रियेति ४ 'पंच किरियाओ कज्जंति'त्ति क्रियन्ते, कर्मकर्त्तरि प्रयोगोऽयं तेन भवन्तीत्यर्थः, 'मिच्छदंसणवत्तिय'त्ति मिथ्यादर्शनं प्रत्ययो-हेतुर्यस्याः सा मिथ्यादर्शन-प्रत्यया, ननु मिथ्यात्वाविरतिकषाययोगाः कमबन्धहेतव इति प्रसिद्धि इह तु आरम्भादयस्तेऽभिहिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति कथं न विरोधः ?, उच्यते, आरम्भपरिग्रहशब्दाभ्यां योगपरिग्रहो, योगानां तद्रूपत्वात्, शेषपदैस्तु शेषबन्धहेतुपरिग्रहः प्रतीयत एवेति, तत्र सम्यग्दृष्टीनां चत स्रएव, मिथ्यात्वाभावात्, शेषाणां तु पञ्चापि, सम्यग्मिथ्यात्वस्य मिथ्यात्वेनैवेह विवक्षितत्वादिति ।

'सव्वे समाउया' इत्यादिप्रश्नस्य निर्वचनचतुर्भङ्ग्या भावना क्रियते, निबद्धदशवर्षसहस्रप्रमाणायुषो युगपच्चोत्पन्ना इति प्रथमभङ्गः १, तेष्वेव दशवर्षसहस्रस्थितिषु नरकेष्वेके प्रथमतरमुत्पन्ना अपरे तु पश्चादिति द्वितीयः, २ अन्यैर्विषममायुर्निबद्धं कैश्चिद्दशवर्षसहस्रस्थितिषु कैश्चिच्च पञ्चदशवर्षसहस्रस्थितिषु उत्पत्ति पुनर्युगपदिति तृतीयः ३, केचित्सागरोपमस्थितयः केचित्तु दशवर्षसहस्रस्थितय इत्येवं विषमा युषोविषममेव चोत्पन्ना इति चतुर्थः ४, इह सङ्ग्रहगाथा–

॥ १ ॥ "आहाराईसु समा कम्मे वन्ने तहेव लेसाए ।
वियणाए किरियाए आउयउववत्तिचउभंगी ॥

'असुरुकुमारा णं भंते !' इत्यादिनाऽसुरकुमारप्रकरणमाहारदिपदनवकोपेतं सूचितं, तच्च नारकप्रकरणवन्नेयम्, एतदेवाह-'जहा नेरइया' इत्यादि, तत्राहारकसूत्रे नारकसूत्रसमानेऽपि भावना विशेषेण लिख्यते-असुरकुमाराणामल्पशरीरत्वं भवधारणीयशरीरापेक्षया जघन्यतोऽङ्गुलासङ्ख्येयभागमान्त्वं, महाशरीरत्वं तूत्कर्षतः सप्तहस्तप्रमाणत्वम्, उत्तरवैक्रियापेक्षया त्वल्पशरीरत्वं जघन्यतोऽङ्गुलासङ्ख्येयभागमानत्वं, महशरीरत्वं तूत्कर्षतो योजनलक्षमानमिति, तत्रैते महाशरीरा बहुतरान् पुद्गलानाहारयन्ति, मनोभक्षणालक्षणाहारापेक्षा, देवानां ह्यसौ स्यात् प्रधानश्च, प्रधानापेक्षया च शास्त्रे निर्देशो वस्तूनां विधीयते, ततोऽल्पशरीरग्राह्याहारपुद्गलापेक्षया बहुतरांस्तानाहारयन्तीत्यादि प्राग्वत्, अभिक्षणमाहारयन्ति अभीक्ष्णमुच्छसन्ति च इत्यत्र ये चतुर्थादिरुपर्याहारयन्ति स्तोकसप्तकादेश्चोपर्युच्छसन्ति तानाश्रित्याभीक्ष्णमित्यच्यते, उत्कर्षतो ये सातिरेकवर्षसहस्योपरि आहारयन्ति सातिरेकपक्षस्य चोपर्युच्छसन्ति तानङ्गीकृत्य एतेषामल्पकालीनाहारोच्छवासत्वेन पुनः पुनराहारयन्तीत्यादिव्यपदेशविषयत्वादिति, तथाऽल्पशरीरा अल्पतरान् पुद्गलानाहारयन्ति उच्छ्वासन्ति च अल्पशरीरत्वादेव, यत्पुनस्तेषां कादाचित्कत्वमाहारोच्छसयोस्तन्महाशरीराहारोच्छवासान्तरालापेक्षया बहुतमान्तरालत्वात्, तत्र हि अन्तराले ते नाहारादि कुर्वन्ति तदन्यत्र कुर्वन्तीत्येवं विवक्षणादिति, महाशरीराणामप्याहारोच्छसयोरन्तारालमस्ति किन्तु तदल्पमित्यविवक्षणादेवाभीक्ष्णमित्युक्तं, सिद्धं च महाशरीराण तेषामाहारोच्छसयोरल्पान्तरत्वम् अल्पशरीराणां तु महान्तरत्वं ।

यथा सौधर्मदेवानां सप्तहस्तमानतया महाशरीराणां तयोरन्तरं क्रमेण वर्षसहस्रद्वयं पक्षद्वयं च, अनुत्तरसुराणां च हस्तमानतया अल्पशरीराणां त्रयशिंद्वर्षसहस्राणि त्रयस्त्रिंशदेव च पक्षा इति, एषां च महाशरीराणामभीक्ष्णाहारोच्छसाभिधानेनाल्पस्थितिकत्वमवसीते, इतरेषां तु विपर्ययो वैमानिकवदेवेति, अथवा लोमाहारापेक्षयाऽभीक्ष्णम्-अनुसमयमाहारयन्ति महाशरीराः पर्याप्तकावस्थायाम्, उच्छ्वासस्तु यथोक्तमानेनापि भवन् परिपूर्णभवापेक्षया पुनः पुनरित्युच्यते, अपर्याप्तकावस्थायां त्वल्पशरीरा लोमाहारतो नाहारयन्ति ओजाहारत् एवाहरणात् इति कदाचित्ते आहारयन्तीत्युच्यते, उच्छ्वासापर्याप्तकावस्थायां च नोच्छसन्त्यन्यदातूच्छवसन्तीत्यते आहत्योच्छवसन्तीति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कम्मवन्नलेस्साओ परिवन्नेयव्वाओ' त्ति कर्म्मादीनि नारकापेक्षया विपर्ययेण वाच्यानि, तथाहि-नारका ये पूर्वोत्पन्नास्तेऽल्पकर्मकशुद्धतरवर्णशुभतरलेश्या उक्ताः असुरास्तु ये पूर्वोत्पन्नास्ते महाकर्माणोऽशुद्धवर्णा अशुभतरलेश्याश्चेति, कथम् ?, ये हि पूर्वोत्पन्ना असुरास्तेऽतिकन्दर्पदर्पाध्मातचित्तत्वान्नारकाननेकप्रकारया यातनया यातयन्तः प्रभूतमशुभं कर्म संचिन्वन्तीत्यतोऽभिधीयन्ते ते महाकर्माणः, अथवा ये बद्धायुषस्ते तिर्यगादिप्रायोग्यकर्म्मप्रकृतिबन्धनान्महाकर्म्माणः तथाऽशुभवर्णा अशुभलेश्याश्च ते, पूर्वोत्पन्नानां हि क्षीणत्वात् शुभकर्मणः शुभवर्णादयः-शुभो वर्णो लेश्या च ह्रसतीति, पश्चादुत्पन्नास्त्वबद्धायुषोऽल्पकर्माणो बहुतरकर्मणामबन्धनाद् शुभकर्मणामक्षीणत्वाच्च शुभवर्णादयः स्युरिति।

वेदनासूत्रं च यद्यपि नारकाणामिवासुरकुमाराणामपि तथाऽपि तद्भावनायां विशेषः, स चायम्-ये सञ्ज्ञिभूतास्ते महावेदनाः, चारित्रविराधनाजन्यचित्तसन्तापात्, अथवा सञ्ज्ञिभूताः सञ्ज्ञिपूर्वभवाः पर्याप्ता वा ते शुभवेदनामाश्रित्य महावेदना इतरे त्वल्पवेदना इति। एवं नागकुमारादयोऽपि ९ औचित्येन वाच्याः।

'पुढविक्काइया णं भंते ! आहारकम्मवन्नलेस्सा जहा नेरइयाणं' ति चत्वार्यपि सूत्राणि नारकसूत्राणीय पृथिवीकायिकाभिलापेनाधीयन्ति इत्यर्थः, केवलमाहारसूत्रे भावनैवं-पृथिवीकायिकानामङ्गुलासङ्ख्येयभागमात्रशरीरत्वेऽप्यल्पशरीरत्वम् इतरच्चेत आगमवचनादवसेयम् पुढवीकाइए पुढविक्काइयस्स ओगाहणट्टयाए चउट्ठाणवडिए' त्ति, ते च महाशरीरा लोभाहारतो बहुतरान् पुद्गलानाहारयन्ति उच्छ्वासन्ति च अभीक्ष्णं महाशरीरत्वादेव, अल्पशरीराणामल्पाहारोच्छसत्वमल्पशरीरत्वादेव, कादाचित्कत्वं च तयोः पर्याप्तकेतरावस्थापेक्षमवसेयम्।

तथा कर्मादिसूत्रेषु पूर्वपश्चादुत्पन्नानां पृथिवीकायिकानां कर्मवर्णलेश्याविभागो नारकैः समएव, वेदनाक्रियोस्तु नानात्वमत एवाह-'असन्नि' त्ति मिथ्यादृष्टयोऽमनस्का वा 'असन्निभूय' त्ति असञ्ज्ञिभूता असञ्ज्ञिनां या जायते तामित्यर्थः, एतदेव व्यनक्ति-'अनिदाए' त्ति अनिर्द्धारणया वेदनां वेदयन्ति, वेदनामनुभवन्तोऽपि न पूर्वोपात्ताशुभकर्मपरिणतिरियमिति मिथ्यादृष्टत्वादवगच्छन्ति, विमनस्कत्वाद्वामत्तमूर्च्छितादिवदिति भावना।

—'माईमिच्छदिट्ठि' त्ति मायावन्तो हि तेषु प्रायेणोत्पद्यन्ते, यदाह—

॥१॥ "उम्मग्गदेसओ मग्गणासओ गूढहियय माइल्लो।
सढसीलो य ससल्लो तिरियाउं बंधए जीवो॥

ततस्ते मायिन उच्यन्ते, अथवा मायेहानन्तानुबन्धिकषायोपलक्षणम् अतोऽनन्तानुबन्धिकषायोदयवन्तोऽत इव मिथ्यादृष्टयो-मिथ्यात्वोदयवृत्तय इति। 'ताणं नियइयाओ' त्ति तेषां पृथिवीकायिकानां नैयतिक्यो-नियता न तु त्रिप्रभृतय इति, पञ्चैवेत्यर्थः।

'से तेणट्ठेणं समयिरिय' त्ति निगमनं, 'जाव चउरिंदिय' त्ति, इह महाशरीरत्वमितरच्च स्वस्वावगाहनाऽनुसारेणावसेयम्, आहारश्च द्वीन्द्रियादीनां प्रक्षेपलक्षणोऽपीति।

'पंचिंदियतिरिक्खजोणिया जहा नेरइय' त्ति प्रतीतं, नवरमिह महाशरीरा अभीक्ष्णमहारयन्ति उच्छ्वसन्ति चेति यदुच्यते तत्सङ्ख्यातवर्षायुषोऽपेक्ष्येत्यसवेयं, तथैव दर्शनात्, नासङ्ख्यातवर्षायुषः, तेषां प्रक्षेपाहारस्य षष्ठस्योपरि प्रतिपादितत्वात्, अल्पशरीराणां त्वाहारोच्छसयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कादाचित्कत्वं वचनप्राणाण्यादिति, लोभाहारापेक्षया तु सर्वेषामप्यभीक्ष्णमिति घटत एव, अल्प-शरीराणां तु यत्कादाचित्कत्वं तदपर्याप्तकत्वे लोमाहारोच्छसयोरभवनेन पर्याप्तकत्वे च तद्भावेनावसेयमिति।

तथा कर्मसूत्रे यत्पूर्वोत्पन्नानामल्पकर्मत्वमितरेषां तु महाकर्मत्वं तदायुष्कादितद्भववेद्यकम-पिक्षयाऽवसेयम्। तथा वर्णलेश्यासूत्रयोर्यत्पूर्वोत्पन्नानां शुभवर्णाद्युक्तं तत्तारुण्यात् पश्चादुत्पन्नानां चाशुभवर्णादि बाल्यादवसेयं, लोके तथैव दर्शनादिति। तथा 'संजयासंजय'त्ति देसविरताः स्थूलात् प्राणातिपातादेर्निवृत्तत्वादितरस्माद- निवृत्तत्वाच्चेति।

'मणुस्सा जहा नेरइय'त्ति तथा वाच्य इति गम्यं, 'नाणत्तं'ति नानात्वं भेदः पुनरयं, तत्र 'मणुस्सा णं भंते! सव्वे समाहारगा?' इत्यादि प्रश्नः, 'नो इणट्ठे समट्ठे' इत्याद्युत्तरं 'जाव दुविहा मणुस्सा पन्नत्ता, तंजहा-महासरीरा य अप्पसरीरा य, तत्थ णं जे ते महासरीरा ते बहुतराए पोग्गले आहारेंति, एवं 'परिणामेंति ऊससंति नीससंति'।

इह स्थाने नारकसूत्रे 'अभिक्खणं आहारेंती'त्यधीतम्, इह तु 'आहच्चे'त्यधीयते, महाशरीरा हि देवकुर्व्वादिमिथुनकाः, ते च कदाचिदेवाहारयन्ति कावलिकाहारेण, 'अट्ठमभत्तस्स आहारो'त्ति वचनात्, अल्पशरीरास्त्वभीक्ष्णमल्पं च, बालानां तथैव दर्शनात् संमूर्च्छिमभनुष्याणामल्पशरी-राणाम नवरतमाहारसम्भवाच्च, यच्चेह पूर्वोत्पन्नानां शुद्धवर्णादि तत्तारुण्यात् संमूर्च्छिमापेक्षया चेति।

'सरागसंजय'त्ति अक्षीणानुपशान्तकषायाः 'वीयरागसंजय'त्ति उपशान्तकषायाः क्षीणकषायाश्च, 'अकिरिय'त्ति वीतरागत्वेनारम्भादीनामभावादक्रियाः, 'एगामायावत्तिय'त्ति अप्रमत्तसंयतानामेकैव मायाप्रत्यया 'किरिया कज्जइ'त्ति क्रियते-भवति कदाचिदुड्डाहारक्षण - प्रवृत्तानामक्षीणकषायत्त्वादिति, 'आरंभिय'त्ति प्रमत्तसंयतानां च 'सर्व प्रमत्तयोग आरम्भ' इतिकृत्वा- ऽऽरम्भिकी स्यात्, अक्षीणकषायत्वाच्च मायाप्रत्ययेति। 'वाणमंतरजोइसवेमाणिया जहा असुरकुमार'त्ति, तत्र शरीरस्याल्पत्वमहत्त्वे स्वावगाह- नानुसारेणा वसेये।

तथा वेदनायामसुरकुमाराः 'सन्निभूया य असन्निभूया य, सन्निभूया महावेयणा असन्निभूया अप्पवेयणा' इत्येवमधीताः, व्यन्तरा अपितथैवाध्येतव्याः, यतोऽसुरादिषु व्यन्तरान्तेषु देवेषु असञ्ज्ञिन उत्पद्यन्ते, यतोऽत्रैवोद्देशके वक्ष्यति-'असन्नी णं जहन्नेणं भवणवासीसु उक्कोसेणं वाणमंतरेसु'त्ति, ते चासुरकुमारप्रकरणोक्तयुक्तेरल्पवेदना भवन्तीत्यवसेयं, यत्तु प्रागुक्तं सञ्ज्ञिनः सम्यग्दृष्टयोऽसञ्ज्ञिनस्त्वितरे इति तद्वृद्धव्याख्यानुसारेणैवेति, ज्योतिष्कवैमानिकेषु त्वसञ्ज्ञिनो नोत्पद्यन्तेऽतो वेदनापदे तेष्वधीयते 'दुविहा जोतिसिया मायिमिच्छदिट्ठी उववन्नगा ये' त्यादि तत्र मायिमिथ्यादृष्टयोऽल्पवेदना इतिर च महावेदनाः शुभवेदनामाश्रित्येति, एतदेव दर्शयन्ना-नवरं 'वेयणाए'इत्यादि।

अथ चतुर्विंशतिदण्डकमेव लेश्याभेदविशेषणमाहारादिपदैर्निरूपयन् दण्डकसप्तकमाह 'सलेस्साणं भंते! नेरइया सव्वे समाहारग'त्ति अनेनाहारशरीरोच्छसकर्म्मवर्णलेश्या-वेदनाक्रियोपपाताख्यपूर्वोक्तन वपदोपेतनारकादिचतुर्विंशतिपददण्डको लेश्यापदविशेषितः सूचितः तदन्ये च कृष्णलेश्यादिविशेषिताः पूर्वोक्तनवपदोपेता एव यथासम्भवं नारकादिपदात्मकाः षड् दण्डकाः सूचिताः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवमेतेषां सप्तानां दण्डकानां सूत्रसङ्क्षेपार्थं यो यथाऽध्येतव्यस्तं तथा दर्शयन्नाह- 'ओहियाण'मित्यादि, तत्रौघिकानां पूर्वोक्तानां निर्विशेषणानां नारकादीनां तथा सलेश्यानामधिकृतानामेव शुक्ललेश्यानां तु सप्तमदण्डकवाच्यानामेषां त्रयाणामेको गमः-सदृशः पाठः, सलेश्यः शुक्लेश्यश्चेत्येवंविधविशेषणकृत एव तत्र भेदः, औधिकदण्डकसूत्रवदनयोः सूत्रमिति हृदयं, तथा 'जस्सत्थि' इत्येतस्य वक्ष्यमाणपदस्येह सम्बन्धाद्यस्य शुक्ललेश्याऽस्ति स एव तद्दण्डकेऽध्येतव्यः, तेनेह पञ्चेन्द्रियतिर्यञ्चो मनुष्या वैमानिकाश्च वाच्याः, नारकादीनां शुक्ललेश्याया अभा- वादिति, 'किण्हलेसनीललेसाणंपि एगो गमो' औघिक एवेत्यर्थः ।

विशेषमाह-'नवरमं वेयणा' इत्यादि, कृष्णलेश्यादण्डके नीललेश्यादण्डके च वेदनासूत्रे "दुविहा नेरइया पन्नत्ता-सन्निभूया य असन्निभूया य'त्ति औघिकदण्डकाधीतं नाध्येतव्यम्, असञ्ज्ञिनां प्रथमपृथिव्यामेवोत्पाद, 'असन्नी खलु पढम'मिति वचनात्, प्रथमायां च कृष्णनीललेश्ययोरभावात्, तर्हि किमध्येतव्यमित्याह- 'मायिमिच्छदिट्ठिउववन्नगा ये'त्यादि, तत्र मायिनो मिथ्यादृष्टयश्च महावेदना भवन्ति, यतः प्रकर्षपर्यन्तवर्त्तिनीं स्थिमशुभां ते निर्वर्त्तयन्ति, प्रकृष्ठायां च तस्यां महती वेदना संभवति, इत्तरेषां तु विपरीतेति ।

तथा मनुष्यपदे क्रियासूत्रे यद्यप्यौघिकदण्डके 'तिविहा मणुस्सा पन्नत्ता, तंजहा-संजया ३, तत्थ णं जे ते संजया ते दुविहा पन्नत्ता, तंजहा सरागसंजया य वीयरागसंजया य, तत्थ णं जे ते सरागसंजया ते दुविहा पन्नत्ता, तंजहा-पमत्तसंजया य अप्पमत्तसंजया य'त्ति पठितं, तथाऽपि कृष्णनीललेश्यादण्डकयोर्नाध्येतव्यं, कृष्णनीललेश्योदये संयमस्य निषिद्धत्वात्, यच्चोच्यते 'पुव्वपडिवन्नओ पुण अन्नयरीए उ लेस्साए'त्ति तत्कृष्णादिद्रव्यरूपां द्रव्यलेश्यामङ्गीकृत्य न तु कृष्णादिद्रव्यसाचिव्यजनितात्मपरिणामरूपां भावलेश्याम्, एतच्च प्रागुक्तमिति ।

एतदेव दर्शयन्नाह-'मणुस्से'त्यादि, तथा कापोतलेश्यादण्डकोऽपि नीलादिलेश्यादण्डकवदध्येतव्यो, नवरं नारकपदेवेदनासूत्रे नारका औघिकदण्डकवदेव वाच्याः, ते चैवम् नेरइया दुविहा पन्नत्ता, तंजहा-सन्निभूया य असन्निभूया य'त्ति, असञ्ज्ञिनां प्रथमपृथिव्युत्पादेन कापोतलेश्यासम्भवादत आह-'काउलेस्साणवी'त्यादि । तथा तेजोलेश्या पद्मलेश्या च यस्य जीवविशेषस्यास्ति वाद्यास्ति एव, भवनपतिपृथिव्यम्बुव- नस्पतिव्यन्तराणामाद्याश्चतस्रः, पञ्चेन्द्रियतिर्यग्मनुष्याणां षड्, ज्योतिषां तेजोलेश्या, वैमानिकानां तिस्रः प्रशस्ता इति, आह च –

॥१॥ "किण्हानीलाकाऊतेउलेसा य भवणवंतरिया ।
जोइससोहम्मीसाण तेउलेसा मुणेयव्वा ॥

॥२॥ कप्पे सणंकुमारे माहिंदे चेव बंभलोगे य ।
एएसु पम्हलेसा तेण परं सुक्कलेस्सा उ ॥

॥३॥ "पुढवीआउवणस्सइबायरपत्तेय लेस चत्तारि
गब्भयतिरियनरेसु छल्लेसा तिन्नि सेसाणं ॥

केवलमौधिकदण्डके क्रियासूत्रे मनुष्याः सरागवीतरागविशेषणा अधीताः इह तु तथा न वाच्याः, तेजःपद्मलेश्ययोर्वीतरागत्वासम्भवात् शुक्ललेश्यायामेव तत्सम्भवात्, प्रमत्ताप्रमत्तास्तूच्यन्त इति, एतदेव दर्शयन्नाह-'तेउलेसा पम्हलेसे'त्यादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (२८)** *दुक्खाउए उदिन्ने आहारे कम्मवन्नलेस्सा य।*
*समवेयणसमकिरिया समाउए चेव बोद्धव्वा।*

**वृ.** 'गाह'त्ति, उद्देशकादितः सूत्रार्थसङ्ग्रहगाथा गतार्थाऽपि सुखबोधार्थमुच्यते-दुःखमायुश्चोदीर्णं वेदयतीत्येकत्वबहुत्वाभ्यां दण्डकचतुष्टयमुक्तं, तथा 'आहारे'त्ति नेरइया किं समाहारा इत्यादि, तथा 'किं समकम्मा ?' तथा 'किं समवन्ना ?' समवन्ना ?' तथा 'किं समलेसा ?' तथा 'किं समवेयणा ?' तथा 'किं समकिरिया ?' तथा 'किं समाउया समोववन्नग'त्ति गाथार्थः।

प्राक् सलेश्या नारका इत्युक्तमथलेश्या निरूपयन्नाह–

**मू. (२९)** *कइ णं भंते ! लेस्साओ पन्नत्ताओ ?, गोयमा ! छल्लेस्साओ पन्नत्ता, तंजहा-लेसाणं बीयओ उद्देसओ भाणियव्वो जाव इड्डी।*

**वृ.** तत्रात्मन कर्मपुद्गलानां लेशनात्-संश्लेषणाल्लेश्या, योगपरिणामश्चैताः, योगनिरोधे लेश्यानामभावात्, योगश्य शरीरनामकर्मपरिणतिविशेषः।

'लेस्साणं बीओ उद्देसओ'त्ति प्रज्ञापनायां लेश्यापदस्य चतुरुद्देशकस्येह द्वितीयोद्देशको लेश्यास्वरूपावगमाय भणितव्यः, प्रथम इति क्वचिद्द्श्यते सोऽपपाठ इति। अथ कियद्दूरं याव दित्याह-'जाव इड्ढी' ऋद्धिवक्तव्यतां यावत्।

स चायं सङ्क्षेपतः-'कि णं भंते !' लेसाओ पन्नत्ताओ ?, गोयमा ! छलेसाओ पन्नत्ताओ, तंजहा-कण्हलेसा ६, एवं सर्वत्र प्रश्न उत्तरं च वाच्यं। 'नेरइयाणं तिन्नि कण्हलेस्सा ३, तिरिक्खजोणियाणं ६, एगिंदियाणं ४, पुढविआउवण- स्सईणं ४, तेउवाउबेइंदियतेइंदियचउरिंदियाणं ३, पंचिंदियतिरिक्खजोणियाणं ६' इत्यादि बहु वाच्यं यावत्।

'एएसि णं भंते ! जीवाणां कण्हलेस्साणं जाव सुक्कलेस्साणं कयरे२हिंतो अप्पड्ढिया वा महड्ढिया वा ?, गोयमा ! कण्हलेस्सेहिंतो नीललेसा महड्ढिया, नीललेसेहिंतो कावोयलेसे'त्यादि।

अथ पशवः पशुत्वमश्नुवते इत्यादिवचनविप्रलम्भाद् यो मन्यतेऽनादावपि भवे एकधैव जीवस्यावस्थानमिति तद्बोधनार्थं प्रश्नयन्नाह–

**मू. (३०)** *जीवस्स णं भंते ! तीतद्धाए आदिट्ठस्स कइविहे संसारसंचिट्ठणकाले पन्नत्ते गोयमा ! चउव्विहे संसारसंचिट्ठणकाले पन्नत्ते, तंजहा-नेरइयसंसारसंचिट्ठकाले तिरिक्ख० मणुस्स० देवसंसारसंचिट्ठणकाले य पन्नत्ते।*

*नेरइयसंसारसंचिट्ठणकाले णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! तिविहे पन्नत्ते, तंजहा-सुन्नकाले असुन्नकाले मिस्सकाले।*

*तिरिक्खजोणियसंसार पुच्छ, गोयमा ! दुविहे पन्नत्ते, तंजहा-असुन्नकाले य मिस्सकाले य, मणुस्साण य देवाण य जहा नेरइयाणं।*

*एयस्स णं भंते ! नेरइयसंसारसंचिट्ठणकालस्स सुन्नस्सकालस्स असुन्नकालस्स मीसकालस्स य कयरेरहिंतो अप्पा वा बहुए वा तुल्ले वा विसेसाहिए वा ?, गोयमा ! सव्व० असुन्नकाले मिस्सकाले अनंतगुणे सुन्नका० अनं० गुणे ॥ तिरि० जो० भंते ! सव्व० असुन्नकाले मिस्सकाले अनंतगुणे, मणुस्सदेवाण य जहा नेरइयाणं।*

*एयस्स णं भंते ! नेरइयस्स संसारसंचिट्ठणकालस्स जाव देवसंसारसंचिट्ठणजावविसे-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*साहिए वा ?, गोयमा ! सव्वत्थोवे मणुस्ससंसारसंचिट्ठणकाले, नेरइयसंसारसंचिट्ठणकाले असंखेज्जगुणे, देवसंसारसंचिट्ठणकाले असंखेज्जगुणे, तिरिक्खजोए अनंतगुणे ।*

**वृ.** 'जीवस्स ण' मित्यादि व्यक्तं, नवरं किंविधस्य जीवस्य ? इत्याह-'आदिष्टस्य' अमुष्य नारकादेरित्येवं विशेषितस्य 'तीतद्धाए' त्ति अनादावतीते काले 'कतिविधः' उपाधिभेदात्कतिभेदः संसारस्य-भवाद्भवान्तरे संचरणलक्षणस्य संस्थानम्-अवस्थितिक्रिया तस्य कालः-अवसरः संसारसंस्थानकालः, अमुष्य जीवस्यातीतकाले कस्यां कस्यां गताववस्थानमासीत् ? इत्यर्थः, अत्रोत्तरं-चतुर्विध उपाधिभेदादिति भावः, तत्र नारकभवानुगतसंसारास्थानकालस्त्रिधाः-शून्य-कालोऽशून्यकालो मिश्रकालश्चेति, तिरश्चां शून्यकालो नास्तीति तेषां द्विविधः, मनुष्यदेवानां त्रिविधोऽप्यस्ति, आह च–

॥१॥ "सुन्नासुन्नो मीसो तिविहो संसारचिट्ठणाकालो ।
तिरियाण सुन्नवज्जो सेसाणं होइ तिविहोवि ॥

तत्राशून्यकालस्तावदुच्यते, अशून्यकालस्वरूपपरिज्ञाने हि सतीतरौ सुज्ञानौ भविष्यत इति, तत्र वर्त्तमानकाले सप्तसु पृथिवीषु ये नारका वर्त्तन्ते तेषां मध्याद्यावन्न कश्चिदुद्वर्त्तते न चान्य उत्पद्यते तावन्मात्रा एव ते आसते स कालस्तान्नारकानङ्गीकृत्याशून्य इति भण्यते, आह च-

॥१॥ "आइट्ठसमइयाणं नेरइयाणं न जाव एक्कोवि ।
उव्वट्टइ अन्नो वा उववज्जइ सो असुन्नो उ ॥

मिश्रकालस्तु तेषामेव नारकाणां मध्यादेकादय उद्वृत्ताः यावदेकोऽपि शेषस्तावन्मिश्रकालः, शून्यकालस्तु यदा त एवादिष्टसामयिका नारकाः सामस्त्येनोद्वृत्ता भवन्ति नैकोऽपि तेषां शेषोऽस्ति स शून्यकाल इति, आह च–

॥१॥ "उव्वट्टेएक्कंमिवि वा मीसो धरइ जाव एक्कोवि ।
निल्लेविएहिं सव्वेहि वट्टमाणेहिं सुन्नो उ ॥

इदं च मिश्रनारकसंसारावस्थानकालचिन्तासूत्रं न तमेव वार्त्तमानिकनारकभवमङ्गीकृत्य प्रवृत्तम्, अपि तु वार्त्तमानिकनारकजीवानां गत्यन्तरगमने तत्रैवोत्पत्तिमाश्रित्य, यदि पुनस्तमेव नारकभवमङ्गीकृत्येदं सूत्रं स्यात्तदाऽशून्यकालापेक्षया मिश्रकालस्यानन्तगुणता सूत्रोक्ता न स्यात्, आह च–

॥१॥ "एयं पुण ते जीवे पडुच्च सुत्तं न तब्भवं चेय ।
जइ होज्ज तब्भवं तो अनन्तकालो नं संभवइ ॥

कस्मात् ? इति चेद् उच्यते, ये वार्त्तमानिका नारकास्ते स्वायुष्ककालस्यान्ते उद्वर्त्तन्ते असङ्ख्यातमेव च तदायुः, अत उत्कर्षतो द्वादशमौहूर्त्तिकाशून्यकालापेक्षया मिश्रकालस्यानन्तगुण-त्वाभावप्रसङ्गादिति, आह च–

॥१॥ "किं कारणमाइट्ठा नेरइया जे इमम्मि समयम्मि ।
ते ठिइकालस्संते जम्हा सव्वे खविज्जंति ॥"

इति 'सव्वत्थोवेअसुन्नकाले' त्ति नारकाणामुत्पादोद्वर्त्तनाविरहकालस्योत्कर्षतोऽपि द्वादशमुहूर्त्तप्रमाणत्वात्, 'मीसकाले अनंतगुणे' त्ति मिश्राख्यो विवक्षितनारकजीवनिर्लेपना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालोऽशून्यकालापेक्षयाऽनन्तगुणो भवति, यतोऽसौ नारकेतरेष्वागमनगमनकालः, स च त्रसवनस्पत्यादिस्थितिकालमिश्रितः सन्नन्तगुणो भवति, त्रसवनस्पत्यादिगमनागमनानामनन्तत्वात्, स च नारकनिर्लेपनाकालो वनस्पतिकायस्थितेरनन्तभागे वर्त्तत इति, उक्तं च-

॥१॥ "थोवो असुन्नकालो सो उक्कोसेण बारसमुहुत्तो।
तत्तो य अनंतगुणो मीसो निल्लेवणाकालो ॥

॥२॥ आगमणगमणकालो तसाइतरुमीसिओ अनंतगुणो।
अह निल्लेवणकालो अनंतभागे वणद्धाए ॥

'सुन्नकाले अनंतगुणेत्ति सर्वेषां विवक्षितनारकजीवानां प्रायो वनस्पतिष्वनन्तानन्तकालमवस्थानात्, एतदेव वनस्पतिष्वनन्तानन्तकालावस्थानं जीवानां नारकभवान्तरकाल उत्कृष्टो देशितः समय इति, उक्तं च-

॥१॥ "सुन्नो य अनंतगुणो सो पुण पायं वणस्सइगयाणं।
एयं चेव य नारयभवंतरं देसियं जेट्ठं ॥

'तिरिक्खजोणियाणं सव्वत्थोवे असुन्नकाले'त्ति, स चान्तर्मुहूर्त्तमात्रः, अयं च यद्यपि सामान्येन तिरश्चामुक्तस्तथाऽपि विकलेन्द्रियसंमूर्च्छिमानामेवावसेयः, तेषामेवान्तमर्मुहूर्त्तमानस्य विरहकालस्योक्तत्वात्, यदाह-"भिन्नमुहुत्तोविगलिंदिएसु सम्मुच्छिमेसुवि स एव" एकेन्द्रियाणां तूद्वर्त्तनोपपातविरहाभावेनाशून्यकालाभाव एव, आह च-

॥१॥ "एगो असंखभागो वट्टइ उव्वट्टणोववायंमि।
एगनिगोए निच्चं एवं सेसेसुवि स एव ॥

पृथिव्यादिषु पुनः 'अनुसमयमसंखेज्ज'त्ति वचनाद्विरहाभाव इति, 'मिस्सकाले अनंतगुणे'त्ति नारकवत् शून्यकालस्तु तिरश्चां नास्त्येव, यतो वार्त्तमानिकसाधारणवनस्पतीनां तत उद्वृत्तानां स्थानमन्यन्नास्ति, 'मणुस्सदेवाणं जहा नेरइयाणं'ति, अशून्यकालस्यापि द्वादशमुहूर्त्तप्रमाणत्वात्, अत्र गाथा-

॥१॥ "एवं नरामराणवि तिरियाणं नवरि नत्थि सुन्नद्धा।
जं निग्गयाण तेसिं भायणमन्नं तओ नत्थि ॥ इति

'एयस्से'त्यादि व्यक्तम्।

किं संसार एवावस्थानं जीवस्य स्यादुत मोक्षेऽपि ? इति शङ्कायां पृच्छमाह-

**मू. (३१)** *जीवे णं भंते! अंतकिरियं करेज्जा ?, गोयमा! अत्थेगतिया करेज्जा अत्थेगतिया नो करेज्ञा, अंतकिरियापयं नेयव्वं।*

**वृ.** 'जीवे ण'मित्यादि व्यक्तं, नवरम् 'अंतकिरियं'ति अन्त्या च सा पर्यन्तवर्त्तिनी क्रिया चान्त्यक्रिया, अन्तस्य वाकर्मान्तस्य क्रिया अन्तक्रिया, कृत्स्नकर्मक्षयलक्षणां मोक्षप्राप्तिमित्यर्थः 'अंतकिरियापयं नेयव्वं'ति, तच्च प्रज्ञापनायां विंशतितमं, तच्चैवम्।

'जीवे णं भंते! अंतकिरियं करेज्जा ?, गोयमा! अत्थेगइए करेज्जा अत्थेगइए नो करेज्जा, एवं नेरइए जाव वेमाणिए' भव्यः कुर्यान्नेतर इत्यर्थः।

'नेरइया णं भंते! नेरइएसु वट्टमाणे अंतं करेज्जा ?, गोयमा! नो इणट्ठे समट्ठे'इत्यादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरं 'मणुस्सेसु अंतं करेज्जा' मनुष्येषु वर्त्तमानो नारको मनुष्यीभूत इत्यर्थ।

कर्मलेशादन्तक्रियाया अभावे केचिज्जीवा देवेषूत्पद्यन्तेऽतस्तद्विशेषाभिधानायाह–

**मू. (३२)** *अह भंते! असंजयभवियदव्वदेवाणं १ अविराहियसंजमाणं २ विराहियसं० ३ अविराहियसंजमासंज० ४ विराहियसंजमासं० ५ असन्नीणं ६ तावसाणं ७ कंदप्पियाणं ८ चरगपरिव्वायगाणं ९ किव्विसियाणं १० तेरिच्छियाणं ११ आजीवियाणं १२ आभिओगियाणं १३ सलिंगीणं दंसणवावन्नगाणं १४ एएसिणं देवलोगेसु उववज्जमाणाणं कस्स कहिं उववाए पन्नत्ते?*

*गो ०! अस्संजयभवियदव्वदेवाणं जहन्नेणं भवणवासीसु उक्कोसेणं उवरिमगेविज्जएसु ?, अविराहियसंजमाणं जहन्नेणं सोहम्मे कप्पे उक्कोसेणं सव्वट्ठसिद्धे विमाणे २, विराहियसंजमाणं जहन्नेणं भवणवासीसु उक्कोसणं सोहम्मे कप्पे ३, अविराहियसंजमा० २ णं जह० सोहम्मे कप्पे उक्कोसेणं अच्चुए कप्पे ४, विराहियसंजमासं० जहन्नेणं भवणवासीसु उक्कोसेणं जोतिसिएसु ५, असन्नीणं जहन्नेणं भवणावासीसु उक्कोसेणं वाणमंतरेसु ६, अवसेसा सव्वे जह० भवणवा० उक्कोसगं वोच्छमि-तावसाणं जोतिसिएसु, कंदप्पियाणं सोहम्मे, चरगपरिव्वायगाणं बंभलोए कप्पे, किव्विसियाणं लंतगे कप्पे, तेरिच्छियाणं सहस्सारे कप्पे, आजीवियाणं अच्चुए कप्पे, आभिओगियाणं अच्चुए कप्पे, सलिंगीणं दंसणवावन्नगाणं उवरिमगेवेज्जएसु १४।*

**वृ.** 'अह भंते' इत्यादि व्यक्तं, नवरम् 'अथे'ति परिप्रश्नार्थः 'असंजयभवियदव्वदेवाणं'ति इह प्रज्ञापनाटीका लिख्यते-असंयताः-चरणपरिणामशून्याः भव्याः-देवत्वयोग्या अत एव द्रव्यदेवाः, समासश्चैवं-असंयताश्च ते भव्यद्रव्यदेवाश्चेति असंयतभव्यद्रव्यदेवाः, तत्रैतेऽसंयतसम्यग्दष्टयः किलेत्येके, यतः किलोक्तम्–

॥ १ ॥ "अणुव्वयमहव्वएहिं य बालतवोऽकामनिज्जराए य।
देवाउयं निबंधइ सम्मद्दिट्ठी य जो जीवो ॥

एतच्चायुक्तं, यतोऽमीषामुत्कृष्टत उपरिमग्रैवेयकेषूपपात् उक्तः, सम्यग्दष्टीनां तु देशविरतानामपि न तत्रासौ विद्यते, देशविरतश्रावकाणामच्युतादूर्ध्वमगमनात्, नाप्येते निह्नवाः, तेषामिहैव भेदेनाभिधानात्, तस्मान्मिथ्यादष्टय एवाभव्या भव्या वा असंयतभव्यद्रव्यदेवाः श्रमणगुणधारिणो निखिलसामाचार्यनुष्ठानयुक्ता द्रव्यलिङ्गधारिणो गृह्यन्ते, ते ह्यखिलकेवलक्रियाप्रभावत् एवोपरिमग्रैवेयकेषूत्पद्यन्त इति, असंयताश्च ते सत्यप्यनुष्ठाने चारित्रपरिणामशून्यत्वात्, ननु कथं तेऽभव्या भव्या वा श्रमणगुणधारिणो भवन्ति ? इति, अत्रोच्यते, तेषां हि महामिथ्यादर्शनमोहप्रादुर्भावे सत्यपि चक्रवर्त्तिप्रभृत्यनेकभूपतिप्रवरपूजासत्कारसन्मानदानान साधून् समवलोक्य तदर्थं प्रव्रज्याक्रियाकलापानुष्ठानं प्रति श्रद्धा जायते, ततश्च ते यथोक्तक्रियाकारिण इति।

तथा 'अविराहियसंजमाणं'ति प्रव्रज्याकालादारभ्याभग्नचारित्रपरिणामानां संज्वलनकषायसामर्थ्यात् प्रमत्तगुणस्थानकसामर्थ्याद्वा स्वल्पमायादिदोषसम्भवेऽप्यनाचरितचरणोपघातानामित्यर्थः, तथा 'विराहियसंजमाणं'ति उक्तविपरीतानाम्, 'अविरा-हियसंजमासंजमाणं'ति प्रतिपत्तिकालादारभ्याखण्डितदेशविरतिपरिणामानां श्रावकाणां, 'विराहियसंजमा संजमाणं'ति उक्तव्यतिरेकिणाम् 'असन्नीणं'ति मनोलब्धिरहितानामकामनिर्जरावतां, तथा 'तावसाणं'ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतितपत्राद्युपभोगवतां बालतपस्विनां, तथा 'कन्दप्पियाणं'ति कन्दर्प-परिहासः स येषामस्ति तेन वा ये चरन्ति ते कन्दर्पिकाः कान्दर्पिका वा-व्यवहारतश्चरणवन्त एव कन्दर्प्पकौकुच्यादिकारकाः, तथाहि–

॥१॥ "कहकहकहस्स हसनं कंदप्पो अनिहुया य उल्लावा।
कंदप्पकहाकहणं कंदप्पुवएस संसा य॥

॥२॥ भुमनयणवयणदसणच्छदेहिं करपायकन्नमाईहिं।
तं तं करेइ जह जह हसइ परो अत्तणा अहसं॥

॥३॥ वाया कुक्कुइओ पुण तं जंपइ जेण हस्सए अन्नो।
नानाविहजीवरुए कुव्वइ मुहतूरए चेव॥ इत्यादि,

॥१॥ "जो संजओवि एयासु अप्पसत्थासु भावणं कुणइ।
सो तव्विहेसु गच्छइ सुरेसु भइओ चरणहीणो॥

अतस्तेषां कन्दर्पिकाणां, 'चरगपरिव्वायगाणं'ति चरकपरिव्राजकाधाटिभैक्ष्योपजीविनस्त्रिदण्डिनः, अथवा चरकाः-कच्छेटकादयः परिव्राजकास्तु-कपिलमुनिसूनवोऽतस्तेषां, 'किव्विसियाणं'ति किल्बिषं-पापं तदस्ति येषां ते किल्बिषिकाः, ते च व्यवहारतश्चरणवन्तोऽपि ज्ञानावर्णवादिनः, यथोक्तम्–

॥१॥ "नाणस्स केवलीणं धम्मायरियस्स सव्वसाहूणं।
माई अवन्नवाई किव्विसियं भावणं कुणइ॥"

अतस्तेषां, तथा 'तेरिच्छियाणं'ति 'तिरश्चां' गवाश्वादीनां देशविरतिभाजाम् 'आजीवियाणं'ति पाषण्डिविशेषाणां नाग्न्यधारिणां, गोशालकशिष्याणामित्यन्ये, आजीवन्ति वा येऽविवेकिलोकतो लब्धिपूजाख्यात्यादिभिस्तपश्चरणादीनि ते आजीविकाऽस्तित्वेनाजीविका अतस्तेषां, तथा 'आभिओगियाणं'ति अभियोजनं-विद्यामन्त्रादिभि परेषां वशीकरणाद्यभियोगः, स च द्विधा, यदाह–

॥१॥ "दुविहो खलु अभिओगो दव्वे भावे य होइ नायव्वो।
दव्वंमि होंति जोगा विज्जा मंता य भावंमि॥ इति

सोऽस्ति येषां तेन वा चरन्ति ये तेऽभियोगिका आभियोगिका वा, ते च व्यवहारतश्चरणवन्त एव मन्त्रादिप्रयोक्तारः, यदाह–

॥१॥ "कोउयभूईकम्मे पसिणापसिणे निमित्तमाजीवी।
इड्ढिरससायगुरुओ अहिओगं भावणं कुणइ॥" इति

'सलिंगीणं'ति रजोहरणादिसाधुलिङ्गवतां किंविधानामित्याह-'दंसणवावन्नगाणं'ति दर्शनं-सम्यक्त्वं व्यापन्नं-भ्रष्टं येषां ते तथा तेषां, निह्नवानामित्यर्थः।

'एएसि णं देवलोएसु उववज्जमाणाणं'ति, अनेन देवत्वादन्यत्रापि केचिदुत्पद्यन्त इति प्रतिपादितं, 'विराहियसंजमाणं जहन्नेणं भवणईसु उक्कोसेणं सोहम्मे कप्पे'त्ति, इह कश्चिदाह-विराहितसंयमानामुत्कर्षेण सौधर्मे कल्पे इति यदुक्तं तत्कथं घटते?, द्रौपद्याः सुकुमालिकाभवे विराधितसंयमाया ईशाने उत्पादश्रवरणात् इति, अत्रोच्यते, तस्याः संयमविराधना उत्तरगुणविषया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बकुशत्वमात्रकारिणी न तु मूलगुणविराधनेति, सौधर्मोत्पादश्च विशिष्टतरसंयमविराधनायां स्यात्, यदि पुनर्विराधनमात्रमपि सौधर्मोत्पत्तिकारकं स्यात्तदा बकुशादीनामुत्तरगुणादिप्रतिसेवावतां कथमच्युतादिषूत्पत्ति स्यात् ?, कथञ्चिद्विराधकत्वात्तेषामिति ।

'असन्नीणं जहन्नेणं भवणवासीसु उक्कोसेणं वाणमंतरेसु'त्ति इह यद्यपि 'चमरबलिं सारमहिय'मित्यादिवचनादसुरादयो महर्द्धिकाः 'पलिओवममुक्कोसं वंतरियाणं'ति इति वचनाच्च व्यन्तरा अल्पर्द्धिकास्तथाऽप्यत एव वचनादवसीयते-सन्ति व्यन्तरेभ्यः सकाशादल्पर्द्धयो भवनपतयः केचनेति ।

असञ्ज्ञी देवेषूत्पद्यत इत्युक्तं स चायुषा इति तदायुर्निरूपयन्नाह–

**मू. (३३)** *कतिविहे णं भंते ! असन्नियाउए पन्नत्ते ?, गोयमा ! चउव्विहे असन्निआउए पन्नत्ते, तंजहा-नेरइयअसन्निआउए तिरिक्ख० मणुस्स० देव० । असन्नी णं भंते ! जीवे किं नेरइयाउयं पकरेइ तिरि० मणु० देवाउयं पकरेइ ?, हंता गोयमा ! नेरइयाउयंपि पकरेइ तिरि० मणु० देवाउयंपि पकरेइ, नेरइयाउयं पकरेमाणे जहन्नेणं दसवाससहस्साइं उक्कोसेणं पलिओवमस्स असंखेज्जइभागं पकरेति तिरिक्खजोणायउयं पकरेमाणे जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पलिओवमस्स असंखेज्जइभागं पकरेइ, मणुस्साउएवि एवं चेव, देवाउयं जहा नेरइया ।*

*एयस्स णं भंते ! नेरइयअसन्निआउयस्स तिरि० मणु० देवअसन्निआउयस्स कयरे कयरे जावविसेसाहिए वा ?, गोयमा ! सव्वत्थोवे देवअसन्निआउए, मणुस्स० असंखेज्जगुणे, तिरिय० असंखेज्जगुणे, नेरइए० असंखेज्जगुणे । सेवं भंते ! सेवं भंते ! त्ति ।*

**वृ.** 'कइविहे ण'मित्यादि व्यक्तं, नवरम् 'असन्निआउए'त्ति असञ्ज्ञी सन् यत्पर-भवयोग्यमायुर्बन्धाति तदसञ्ज्ञीयायुः, नेरइयअसन्निआउए'त्ति नैरयिकप्रायोग्यमसञ्ज्ञीयायु-र्नैरयिकासञ्ज्ञीयायुः, एवमन्यान्यपि ।

एतच्चासंज्ञ्यायुः संबन्धमात्रेणापि भवति यथा भिक्षोः पात्रम्, अतस्तत्कृतत्वलक्षण-संबन्धविशेषनिरूपणायाह-'असन्नी'-त्यादि व्यक्तं, नवरं 'पकरएइ'त्ति बन्धाति 'दसवाससह-स्साइं'ति रत्नप्रभाप्रथमप्रतरमाश्रित्य 'उक्कोसेणं पलिओवमस्स असंखिज्जइभागं'ति रत्नप्रभाच-तुर्थप्रतरे मध्यमस्थितिकं नारकमाश्रित्येति, कथम् ?, यतः प्रथमप्रस्तटे दश वर्षाणां सहस्राणि जघन्या स्थितिरुत्कृष्टा नवति सहस्राणि, द्वितीये तु दश लक्षाणि जघन्या इतरा तु नवतिर्लक्षाणि, एषैव तृतीये जघन्या इतरा तु पूर्वकोटी, एषैव चतुर्थे जघन्या इतरा तु सागरोपमस्य दशभागः एवं चात्र पल्योपमासङ्ख्येयभागो मध्यमा स्थितिर्भवति, तिर्यक्सूत्रे यदुक्तं 'पलिओवमस्स असंखेज्जइभागं' ति तन्मिथुनकतिरश्चोऽधिकृत्येति । 'मणुस्साउए वि एवं चेव'त्ति जघन्यतोऽ-न्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासङ्ख्येयभाग इत्यर्थः तत्र चासङ्ख्येययभागो मिथुनकनरानाश्रित्य ।

'देवा जहा नेरइया'त्ति, देवा इति सञ्ज्ञिविषयं देवायुरुपचारात्तथा वाच्यं 'जहा नेरइय'त्ति यथाऽसञ्ज्ञिविषयं नारकायुः, तच्च प्रतीतमेव, नवरं भवनपतिव्यन्तरानाश्रित्य तदवसेयमिति

'एयस्स णं भंते !'इत्यादिना यदसञ्ज्ञायुषोऽल्पबहुत्वमुक्तं तदस्य ह्रस्वदीर्घत्वमाश्रित्येति

शतकं-१ उद्देशकः-२ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शतकं-१ उद्देशकः-३

**वृ.** द्वितीयोद्देशकान्तिमसूत्रेष्वायुर्विशेषो निरूपितः, स च मोहदोषे सति भवतीत्यतो मोहनीयविशेषं निरूपयन्नादौ च सङ्ग्रहगाथायां यदुक्तं 'कंखपओसे'त्ति तद्दर्शयन्नाह--

*मू. (३४) जीवाणं भंते ! कंखामोहणिज्जे कम्मे कडे ?, हंता कडे ।। से भंते ! किं देसेणं देसे कडे ? १ देसेणं सव्वे कडे ? २ सव्वेणं देसे कडे ? ३ सव्वेणं सव्वे कडे ? ४ ।*

*गोयमा ! नो देसेणं देसे कडे १ नो देसेणं सव्वे कडे २ नो सव्वेणं देसे कडे ३ सव्वेणं सव्वे कडे ४ ।। नेरइया णं भंते ! कंखामोहणिज्जे कम्मे कडे ?, हंता कडे, जाव सव्वेणं सव्वे कडे ४ ।*

*एवं जाव वेमाणियाणं दंडओ भाणियव्वो ।*

**वृ.** 'जीवाण'मित्यादि व्यक्तं, नवरं जीवानां सम्बन्धि यत् 'कंखामोहणिज्जे'त्ति मोहयतीति मोहनीयं कर्म तच्च चारित्रमोहनीयमपि भवतीति विशिष्यते-काङ्क्षा-अन्यान्यदर्शनग्रहः, उपलक्षणत्वाच्चास्य शङ्कादिपरिग्रहः, ततः काङ्क्षया मोहनीयं काङ्क्षमोहनीयं, मिथ्यात्वमोहनीयमित्यर्थः, 'कडे'त्ति कृतं क्रियानिष्पाद्यमिति प्रश्नः, उत्तरं तु 'हंता कडे'त्ति अकृतस्य कर्मत्वानुपपत्तेः ।

इह च वस्तुनः करणे चतुर्भङ्गीदृष्टा, यथा देशेन हस्तादिना वस्तुनो देशस्याच्छदनं करोति अथवा हस्तादिदेशेनैव समस्तस्य वस्तुनः २ अथवा सर्वात्मना वस्तुदेशस्य ३ अथवा सर्वात्मना सर्वस्य वस्तुनः ४ इत्येतां काङ्क्षामोहनीयकरणं प्रति प्रश्नयन्नाह-'से'त्ति तस्य कर्मणः भदन्त ! 'किम्' इति प्रश्ने 'देशेन' जीवस्यांशेन 'देशः' काङ्क्षामोहनीयस्य कर्मणोऽशः कृतः ? इत्येको भङ्गः १, अथ 'देशेन' जीवांशेनैव सर्वं काङ्क्षामोहनीयं कृतम् ? इति द्वितीयः २ उत 'सर्वेण' सर्वात्मना देशः काङ्क्षामोहनीयस्य कृतः ? इति तृतीयः ३ उताहो ! 'सर्वेण' सर्वात्मना सर्वं कृतम् इति चतुर्थः ४ ।

अत्रोत्तरं-'सव्वेणं सव्वे कडे'त्ति जीवास्वाभाव्यात् सर्वस्वप्रदेशावगाढतदेकसमयबन्धनीयकर्म्मपुद्गलबन्धने सर्वजीवप्रदेशानां व्यापार इत्यत उच्यते-सर्वात्मना 'सर्वं' तदेककालकरणीयं काङ्क्षामोहनीयं कर्म 'कृतं' कर्मतया बद्धम्, अत एव च भङ्गत्रयप्रतिषेध इति, अत एवोक्तम्-

''एगपएसोगाढं सव्वपएसेहिं कम्मुणो जोग्गं । बंधइजहुत्तहेउं''ति, 'एगपएसोगाढं'ति जीवापेक्षया कर्म्मद्रव्यापेक्षया च ये एके प्रदेशास्तेष्ववगाढं, सर्वजीवप्रदेशव्यापारत्वाच्च तदेकसमयबन्धनार्हं सर्वमिति गम्यम् अथवा सर्वं यत्किञ्चित् काङ्क्षामोहनीयं तत्सर्वात्मना कृतं न देशेनेति ।

जीवानामिति सामान्योक्तौ विशेषो नावगम्यत इति विशेषावगमाय नारकादिदण्डकेन प्रश्नयन्नाह-'नेरइयाण'मित्यादि भावितार्थमेव ।

क्रियानिष्पाद्यं कर्मोक्तं, तत्क्रिया च त्रिकालविषयाऽतस्यां दर्शयन्नाह-

*मू. (३५) जीवा णं भंते ! कंखामोहणिज्जं कम्मं करिंसु ?, हंता करिंसु । तं भंते ! किं देसेणं देसं करिंसु ?, एएणं अभिलावेणं दंडओ भाणियव्वो जाव वेमाणियाणं, एवं करेंति एत्थवि दंडओ जाव वेमाणियाणं, एवं करेस्संति, एत्थवि दंडओ जाव वेमाणियाणं ।*

*एवं चिए चिणिंसु चिणंति चिणिस्संति, उवचिए उवचिणिंसु उवचिणंति उवचिणिस्संति, उदीरेंसु उदीरेंति उदीरिस्संति, वेदिंसु वेदंति वेदिस्संति, निज्जरेंसु निज्जरेंति निज्जरिस्संति, गाहा !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'जीवा ण'मित्यादि व्यक्तं, नवरं 'करिंसु'त्ति अतीतकाले कृतवन्तः, उत्तरं तु हन्त! अकार्षुः, तदकरणेऽनादिसंसाराभावप्रसङ्गात्। एवं 'करेंति' सम्प्रति कुर्वन्ति, एवं 'करिस्संति' अनेन च भविष्यत्कालता करणस्य दर्शितेति ॥ कृतस्य च कर्म्मणश्चयादयो भवन्तीति तान् दर्शयन्नाह-

'एवं चिए'इत्यादि व्यक्तं नवरं चयः-प्रदेशानुभागादेर्वर्द्धनम् उपचयस्तदेव पौनःपुन्येन, अन्ये त्वाहुः-चयनं-कर्म्म-पुद्गलोपादानमात्रम् उपचयनं तु चितस्याबाधाकालं मुक्त्वा वेदनार्थं निषेकः, स चैवम्-प्रथमस्तितौ बहुतरं कर्मदलिकं निषिञ्चति ततो द्वितीयायां विशेषहीनम् एवं यावदुत्कृष्टायां विशेषहीनं निषिञ्चति, उक्तं च –

॥ १ ॥　"मोत्तूण सगमबाहं पढमाइ ठिईइ बहुतरं दव्वं।
सेसं विसेसहीणं जावुक्कोसंति सव्वासिं ॥

उदीरणम्-अनुदितस्य करणविशेषादुदयप्रवेशनं, वेदनम्-अनुभवनं, निर्जरणं-जीवप्रदेशेभ्यः कर्मप्रदेशानां शातनमिति। इह च सूत्रसङ्ग्रहगाथा भवति, सा च गाहा-

**मू. (३६)**　*कडचिया उवचिया उदीरिया वेदिया य निज्जिन्ना।*
*आदितिए चउभेदा तियभेदा पच्छिमा तिन्नि ॥*

**वृ.** 'कडचिए'त्यादि, भावितार्था च, नवरम् 'आइतिए'त्ति कृतचितोपचितलक्षणे 'चउभेय'त्ति सामान्यक्रियाकालत्रयक्रियाभेदात्, 'तियभेय'त्ति सामान्यक्रियाविरहात्, 'पच्छिम'त्ति उदीरितवेदितनिर्जीर्णा मोहपुद्गला इति शेषः, 'तिन्नि'त्ति त्रयस्त्रिविधा इत्यर्थः। नन्वाद्ये सूत्रत्रये कृतचितोपचितान्युक्तानि उत्तरेषु कस्मान्नोदीरितवेदितनिर्जीर्णानि? इति, उच्यते, कृतं चितमुपचितं च कर्म चिरमप्यवतिष्ठत इति करणादीनां त्रिकालक्रियामात्रातिरिक्तं, चिरावस्थानलक्षणकृतत्वाद्याश्रित्य कृतादीन्युक्तानि, उदीरणादीनां तु न चिरावस्थानमस्तीति त्रिकालवर्त्तिना क्रियामात्रेणैव तान्यभिहितानीति।

जीवाः काङ्क्षमोहनीयं कर्म वेदयन्तीत्युक्तम्, अथ तद्वेदनकारणप्रतिपादनाय प्रस्तावयन्नाह-

**मू. (३७)** *जीवा णं भंते! कंखामोहणिज्जं कम्मं वेदेंति?, हंता वेदेंति। कहन्नं भंते! जीवा कंखामोहणिज्जं कम्मं वेदेंति?, गोयमा! तेहिं तेहिं कारणेहिं संकिया कंखिया वितिगिच्छिया भेदसमावन्ना कलुससमावन्ना, एवं खलु जीवा कंखामोहणिज्जं कम्मं वेदेंति।*

**वृ.** 'जीवा णं भंते! इत्यादि व्यक्तं, नवरं ननु जीवाः काङ्क्षामोहनीयं वेदयन्तीति प्राग निर्णीतं किं पुनः प्रश्नः?, उच्यते, वेदनोपायप्रतिपादनार्थम्, उक्तं च–

॥ १ ॥　"पुव्वमणियंपि पच्छ जं भण्णइ तत्थ कारणं अत्थि।
पडिसेहो य अणुन्ना हेउविसेसोवलंभोत्ति ॥

'तेहिं तेहिं'ति तैस्तैर्दर्शनान्तरश्रवणकुतीर्थिकसंसर्गादिभिर्विद्वत्यसिद्धैः, द्विर्वचनं चेह वीप्सायां, कारणैः-शङ्कादिहेतुभिः, किमित्याह-शङ्किताः-जिनोक्तपदार्थान् प्रति सर्वतो देशतो वा संजातसंशयाः काङ्क्षिताः-देशतः सर्वतो वा संजातान्यान्यदर्शनग्रहाः 'वितिगिच्छिय'त्ति विचिकित्सिताः-संजातफलविषयशङ्काः भेदसमापन्ना इति-किमिदं जिनशासनमाहोश्विदिदमित्येवं जिनशासनस्वरूपं प्रति मतेर्द्वैधीभावं गताः, अनध्यवसायरूपं वा मतिभङ्गं गताः, अथवा यत

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एव शङ्कितादिविशेषणा अत एव मतेर्द्वैधीभावं गताः 'कलुषसमापन्नाः' नैतदेवमित्येवं मतिविपर्यासं गताः । 'एवं खलु'इत्यादि, 'एवम्' इत्युक्तेन प्रकारेण 'खलु'त्ति वाक्यालङ्कारे निश्चयेऽवधारणे वा । ततश्च जीवानां काङ्क्षामोहनीयवेदनमित्थमेवावसेयं, जिनप्रवेदितत्वात्, तस्य च सत्यत्वादिति तत्सत्यतामेव दर्शयन्नाह–

**मू. (३८)** *से नूनं भंते ! तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं ?, हंता गोयमा ! तमेव सच्चं नीसंकं जं जिणेहिं पवेदितं ।*

**वृ.** 'से नून'मित्यादि व्यक्तं, नवरं 'तदेव' न पुरुषान्तरैः प्रवेदितं, रागाद्युपहतत्वेन तत्प्रवेदितस्यासत्यत्वसम्भवात्, 'सत्यं' सूनृतं, तच्च व्यवहारतोऽपि स्यादत आह-'निशङ्कम्' अविद्यमानसन्देहमिति । अथ जिनप्रवेदितं सत्यमित्यभिप्रायवान् यादृशो भवति तद्दर्शयन्नाह-

**मू. (३९)** *से नूनं भंते ! एवं मणं धारेमाणे एवं पकरेमाणे एवं चिट्ठेमाणे एवं संवरेमाणे आणाए आराहए भवति ?, हंता गोयमा ! एवं मणं धारेमाणे जाव भवइ ।*

**वृ.** 'से नून'मित्यादि व्यतं, नवरं 'नूनं'निश्चितम् 'एवं मणं धारेमाणे'त्ति 'तदेव सत्यं निशङ्कं यज्जिनैः प्रवेदित'मित्यनेन प्रकारेण मनो-मानसमुत्पन्नं सत् धारयन्-स्थिरीकुर्वन् 'एवं पकरेमाणे'त्ति उक्तरूपेणानुत्पन्नं सत् प्रकुर्वन्-विदधानः 'एवं चिट्ठेमाणे'त्ति उक्तन्यायेन मनश्चेष्टयन् नान्यमतानि सत्यानीत्यादिचिन्तायां व्यापारयन् चेष्टमानो वा विधेयेषु तपोध्यानादिषु

'एवं संवरेमाणे'त्ति उक्तवदेव मनः संवृण्वन्-मतान्तरेभ्यो निवर्त्तयन् प्राणातिपातादीन् वा प्रत्याचक्षाणो जीव इति गम्यते, 'आणाए'त्ति आज्ञायाः-ज्ञानाद्यासेवारूपजिनोपदेशस्य 'आराहए'त्ति आराधकः- पालयिता भवतीति । अथ कस्मात्तदेव सत्यं यज्जिनैः प्रवेदितम् ? इति, अत्रोच्यते, यथावद्वस्तुपरिणामाभिधा- नादिति तमेव दर्शयन्नाह–

**मू. (४०)** *से नूनं भंते ! अत्थित्तं अत्थित्ते परिणमइ नित्थित्तं नत्थित्ते परिणमइ ?, हंता गोयमा ! जाव परिणमइ । जण्णं भंते ! अत्थित्तं अत्थित्ते परिणमइ नत्थित्तं नत्थित्ते परिणमइ तं किं पयोगसा वीससा गोयमा ! पयोगसावि तं वीससावि तं ।*

*जहा ते भंते ! अत्थित्तं अत्थित्ते परिणमइ तहा ते नत्थित्तं नत्थित्ते परिणमइ ? जहा ते नत्थित्तं नत्थित्ते परिणमइ तहा ते अत्थित्तं अत्थित्ते परिणमइ ?, हंता गोयमा ! जहा मे अत्थित्तं अत्थित्ते परिणमइ तहा मे नत्थित्तं नत्थित्ते परिणमइ, जहा मे नत्थित्तं नत्थित्ते परिणमइ तहा मे अत्थित्तं अत्थित्ते परिणमइ ।*

*से नूनं भंते ! अत्थित्तं अत्थित्ते गमणिज्जं जहा परिणमइ दो आलावगा तहा ते इह गमणिज्जेणवि दो आलावगा भाणियव्वा जाव जहा मे अत्थित्तं अत्थित्ते गमणिज्जं ।*

**वृ.** 'से नूनमि'त्यादि 'अत्थित्तं अत्थित्ते परिणमइ'त्ति, अस्तित्वं-अङ्गुल्यादेः अङ्गुल्यादिभावेन सत्त्वम्, उक्तञ्च–

॥ १ ॥ "सर्वमस्ति स्वरूपेण, पररूपेण नास्ति च ।
अन्यथा सर्वभावानामेकत्वं संप्रसज्यते ॥

तच्चेह ऋजुत्वादिपर्यायरूपमवसेयम्, अङ्गुल्यादिद्रव्यास्तित्वस्य कथञ्चिदृजुत्वादिपर्याया-व्यतिरिक्तत्वात् अस्तित्वे-अङ्गुल्यादेरेवाङ्गुल्यादिभावेन सत्त्वे वक्रत्वादिपर्याये इत्यर्थः 'परिणमति'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा भवति, इदमुक्तं भवति-द्रव्यस्य प्रकारान्तरेण सत्ता प्रकारान्तरसत्त्या वर्त्तते यथा मृद्रव्यस्य पिण्डप्रकारेण सत्ता घटप्रकारसत्तायामिति।

'नत्थित्तं नत्थित्ते परिणमइ'त्ति नास्तित्वम्-अङ्गुल्यादेरङ्गुष्ठादिभावेनासत्त्वं तच्चाङ्गुष्ठादिभाव एव, ततश्चाङ्गुल्यादेर्नास्तित्वमङ्गुष्ठाद्यस्तित्वरूपमङ्गुल्यादेर्नास्तित्वे अङ्गुष्ठादेः पर्यायान्तरेणास्तित्वरूपे परिणमति, यथा मृदो नास्तित्वं तन्त्वादिरूपं मृन्नास्तित्वरूपे पटे इति, अथवाऽस्तित्वमिति-धर्मधर्मिणोरभेदात् सद्वस्तु अस्तित्वे-सत्त्वे परिणमति, तत्सदेव भवति, नात्यन्तं विनाशि स्याद्, विनाशस्य पर्यायान्तरगमनमात्ररूपत्वात्, दीपादिविनाशस्यापि तमिस्रादिरूपतया परिणामात्

तथा 'नास्तित्वम्' अत्यन्ताभावरूपं यत् खरविषाणादि तत् 'नास्तित्वे' अत्यन्ताभाव एव वर्त्तते, नात्यन्तमसतः सत्त्वमस्ति, खरविषाणस्येवेति, उक्तं च-"नासतो जायते भावो, नाभावो जायते सतः।" अथवाऽस्तित्वमिति धर्म्यभेदात् सद् 'अस्तित्वे' सत्त्वे वर्त्तते, यथा पटः पटत्व एव, नास्तित्वं चासत् 'नास्तित्वे' असत्त्वे वर्त्तते, यथा अपटोऽपटत्व एवेति।

अथ परिणामहेतुदर्शनायाह-'जं न'मित्यादि 'अत्थित्तं अत्थित्ते परिणमइ'त्ति पर्यायः पर्यायान्तरतां यातीत्यर्थः 'नत्थित्तं नत्थित्ते परिणमइ'त्ति वस्त्वन्तरस्य पर्यायस्तत्पर्यायान्तरतां यातीत्यर्थः, 'पओगसा'त्ति सकारस्यागमिकत्वात् 'प्रयोगेण' जीवव्यापारेण 'वीसस'त्ति यद्यपि लोके विश्रसाशब्दो जरापर्यायतया रूढस्तथाऽपीह स्वभावार्थो दृश्यः, इह प्राकृतत्वाद् 'वीससाए'त्ति वाच्ये 'वीससा' इत्युक्तमिति, अत्रोत्तरम्-'पओगसावि तं'ति प्रयोगेणापि तद्-अस्तित्वादि, यथा-कुलालव्यापारान्मृत्पिण्डो घट तया परिणमति, अङ्गुलिऋजुता वावक्रतयेति, अपिः समुच्चये,

विससानि तंत्ति यथा शुभ्राभ्रमशुभ्राभ्रतया, नास्तित्वस्यापि नास्तित्वपरिणामे प्रयोग-विश्रसयोरेतान्येवोदाहरणानि, वस्त्वन्तरापेक्षया मृत्पिण्डादेरस्तित्वस्य नास्तित्वात्, सत्सदेव स्यादिति व्याख्यानान्तरेऽप्येता-न्येवोदाहरणानि पूर्वोत्तरावस्थयोः सद्रूपत्वादिति, यदपि-'अभावोऽभाव एव स्याद्' इति व्याख्यातं तत्रापि प्रयोगेणापि तथा विस्रसयाऽपि अभावोऽभाव एव स्यात् प्रयोगादेः साफल्यमिति व्याख्येय- मिति॥ अथोक्तहेत्वोरुभयत्र समतां भगवदभिमततां च दर्शयन्नाह–

'जहा ते'इत्यादि, 'यथा' प्रयोगविश्रसाभ्यामित्यर्थः 'ते'इति तव मतेन अथवा सामान्येना-स्तित्वनास्तित्वपरिणामः प्रयोगविश्रसाजन्य उक्तः, सामान्यश्च विधि कचिदतिशयवति वस्तुन्य-न्यथाऽपि स्याद् अतिशयवांश्च भगवानिति तमाश्रित्य परिणामान्यथात्वमाशङ्कमान आह-'जहा ते'इत्यादि, 'ते'इति तव सम्बन्धि अस्तित्वं, शेषं तथैवेति।

अथोक्तस्वरूपस्यैवार्थस्य सत्यत्वेन प्रज्ञापनीयतां दर्शयितुमाह-'से नून'मित्यादि, अस्तित्वमस्तित्वे गमनीयं सद्वस्तु सत्त्वेनैव प्रज्ञापनीयमित्यर्थ, 'दो आलावग'त्ति 'से नूनं भंते! अत्थित्तं अत्थित्तेगमणिज्ज'मित्यादि 'पओगसावि तं वीससावि तं' इत्येतदन्त एकः, परिणामभेदा-भिधानात्, 'जहा ते भंते! अत्थित्तं अत्थित्ते गमणिज्ज'मित्यादि 'तहा मे अत्थित्तं अत्थित्ते गमणिज्ज' मित्येतदन्तस्तु द्वितीयोऽस्तित्वनास्तित्वपरिणामयोः समताऽभिधायीति।

एवं वस्तुप्रज्ञापनाविषया समभावतां भगवतोऽभिधायाय शिष्यविषयांतां दर्शयन्नाह-

**मू. (४१)** *जहा ते भंते! एत्थ गमणिज्जं तहा ते इहं गमणिज्जं, जहा ते इहं गमणिज्जं तहा ते*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एत्थं गमणिज्जं ?, हंता ! गोयमा !, जहा मे एत्थं गमणिज्जं जाव तहा मे एत्थं गमणिज्जं ।*

**वृ.** 'जहा ते'इत्यादि 'यथा' स्वकीयपरकीयताऽनपेक्षतया समत्वेन विहितमितिप्रवृत्त्या उपकारबुद्धया वा 'ते' तव भदन्त ! 'एत्थं'ति एतस्मिन् मयि संनिहिते स्वशिष्ये गमनीयं-वस्तु प्रज्ञापनीयं 'तथा' तेनैव समतालक्षणप्रकारेण उपकारधिया वा 'इहं'ति 'इह' अस्मिन् गृहिपाषण्डिकादौ जने गमनीयं ? वस्तु प्रकाशनीयमिति प्रश्नः । अथवा 'एत्थं'ति स्वात्मनि यथा गमनीयं सुखप्रियत्वादि तथा 'इह' परात्मनि, अथवा यथा प्रत्यक्षाधिकरणार्थतया 'एत्थ'मित्येतच्छब्दरूपं गमनीयं तथा 'इह'मित्येतच्छब्दरूपमिति ?, समानार्थत्वाद् द्वयोरपीति ।

काङ्क्षामोहनीयकर्मवेदनं सप्रसङ्गमुक्तम्, अथ तस्यैव बन्धमभिधातुमाह-

**मू. (४२)** *जीवाणं भंते ! कंखामोहणिज्जं कम्मं बंधंति ?, हंता बंधंति । कहं णं भंते ! जीवा कंखामोहणिज्जं कम्मं बंधंति ?, गोयमा ! पमादपच्चया जोगनिमित्तं च ।*

*से णं भंते ! पमाए किंपवहे ?, गोयमा ! जोगप्पवहे । से णं भंते ! सरीरे किंपवहे ?, गोयमा ! जीवप्पवहे ।*

*एवं सति अत्थि उट्ठाणे ति वा कम्मे ति वा बले इ वा वीरिए इ वा पुरिसक्कारपरक्कमेइ वा*

**वृ.** 'जीवाणं भंते ! कंखे'त्यादि 'पमायपच्चय'त्ति 'प्रमादप्रत्ययात्' प्रमत्ततालक्षणाद्धेतोः प्रमादश्च मद्यादि, अथवा प्रमादग्रहणेन मिथ्यात्वाविरतिकषायलक्षणं बन्धहेतुत्रयं गृहीतम्, इष्यते च प्रमादेऽन्तर्भावोऽस्य, यदाह-

॥१॥ "पमाओ य मुणिंदेहिं, भणिओ अट्ठभेयओ ।
अन्नाणं संसओ चेव, मिच्छनाणं तहेव य ॥
॥२॥ रागो दोसो मइब्भंसो, धम्मंमि य अणायरो ।
जोगाणं दुप्पणीहाणं, अट्ठहा वज्जियव्वओ ॥ त्ति

तथा 'योगनिमित्तं च' योगाः-मनःप्रभृतिव्यापाराः ते निमित्तं-हेतुर्यत्र तत्तथा बन्धन्तीति, क्रियाविशेषणंचेदम्, एतेन च योगाख्यश्चतुर्थ कर्मबन्धहेतुरुक्तः, चशब्दः समुच्चये । अथ प्रमादादेरेव हेतुफलभावं दर्शनायाह-

'से ण'मित्यादि 'पमाए किंपवहे'त्ति प्रमादोऽस कस्मात् प्रवहति-प्रवर्त्तत इति किंप्रवहः पाठान्तरेण किंप्रभवः ?, 'जोगप्पवहे'त्ति योगो-मनःप्रभृतिव्यापारः, तत्प्रवहत्वं च प्रमादस्य मद्याद्यासेवनस्य मिथ्यात्वादित्रयस्य च मनःप्रभृतिव्यापारसद्भावे भावात्, 'वीरियप्पवहे'त्ति वीर्यं नाम वीर्यान्तरायकर्मक्षयक्षयोपशमसमुत्थो जीवपरिणामविशेषः, 'सरीरप्पवहे'त्ति वीर्यं द्विधा-सकरणमकरणंच, तत्रालेश्यस्य केवलिनः कृत्योर्ज्ञेयदृश्ययोः केवलं ज्ञानंदर्शनं चोपयुञ्जानस्य योऽसावपरिस्पन्दोऽप्रतिघो जीवपरिणामविशेषस्तदकरणं तदिह नाधिक्रियते, यस्तु मनोवाक्कायकरणसाधनः सलेश्यजीवकर्तृको जीवप्रदेशपरिस्पन्दात्मको व्यापारोऽसौ सकरणं वीर्यं तच्च शरीरप्रवहं, शरीरं विना तदभावादिति । 'जीवप्पवहे'त्ति इह यद्यपि शरीरस्य कर्मापि कारणं न केवलमेव जीवस्तथाऽपि कर्मणो जीवकृतत्वेन जीवप्रधान्यात् जीवप्रवहं शरीरमित्युक्तम्

अथ प्रसङ्गतो गोशालकमतं निषेधयन्नाह-'एवं सइ'त्ति, 'एवम्' उक्तन्यायेन जीवस्य काङ्क्षामोहनीयकर्मबन्धकत्वे सति 'अस्ति' विद्यते नतु नास्ति, यथा गोशालकमते नास्ति जीवाना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुत्थानादि, पुरुषार्थासाधकत्वात्, नियतित एव पुरुषार्थसिद्धेः, यदाह–

"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थ सोऽवश्यं भवति नृणां शुभोऽशुभो वा।

भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥

इति एवं हि अप्रामाणिकाया नियतेरभ्युपगमः कृतो भवति अध्यक्षसिद्धपुरुषकारापलापश्च स्यादिति। 'उट्ठाणे इ व'त्ति उत्थानमिति वेति वाच्ये प्राकृतत्वात्सन्धिलोपाभ्यामेवं निर्देशः, तत्र 'उत्थानम्' उर्ध्वीभवनमू 'इति' उपप्रदर्शने वाशब्दो विकल्पे समुच्चये वा 'कम्मे इ व'त्ति कर्म-उत्क्षेपणापक्षेपणादि 'बले इ व'त्ति बलं-शारीरः प्राणः 'वीरिए इ व'त्ति वीर्य-जीवोत्साहः 'पुरिसक्कारपरक्कमे इ व'त्ति पुरुषकारश्च पौरुषाभिमानः पराक्रमश्च स एव साधिताभिमतप्रयोजनः पुरुषकारपराक्रमः अथवा पुरुषकारः-पुरुषक्रिया सा च प्रायः स्त्रीक्रियातः प्रकर्षवती भवतीति तत्स्वभावत्वादिति विशेषेण तद्ग्रहणं, पराक्रमस्तु शत्रुनिराकरणमिति

काङ्क्षामोहनीयस्य वेदनं बन्धश्च सहेतुक उक्तः, अथ तस्यैवोदीरणामन्यच्च तद्गतमेव दर्शयन्नाह–

**मू. (४३)** *से नूनं भंते! अप्पणा चेव उदीरेइ अप्पणा चेव गरइह अप्पणा चेव संवरइ?, हंता! गोयमा! अप्पणा चेव तं चेव उच्चारेयव्वं ३।*

*जं तं भंते! अप्पणा चेव उदीरेइ अप्पणा चेव गरहेइ अप्पणा चेव संवरेइ तं किं उदिन्नं उदीरेइ १ अणुदिन्नं उदीरेइ २ अणुदिन्नं उदीरणाभवियं कम्मं उदीरेइ ३ उदयाणंतरपच्छकडं कम्मं उदीरेइ ४?, गोयमा! नो उदिण्णं उदीरेइ १ नो अणुदिन्नं उदीरेइ २ अणुदिन्नं उदीरणाभवियं कम्मं उदीरेइ ३ णो उयाणंतरपच्छकडं कम्मं उदीरेइ ४।*

*जं तं भंते! अनुदिन्नं उदीरणाभवियं कम्मं उदीरेइ तं कि उट्ठाणेणं कम्मेणं बलेणं वीरिएणं पुरिसक्कारपरक्कमेणं अनुदिन्नं उदीरणाभवियं क० उदी०? उदाहु तं अनुट्ठाणेणं अकम्मेणं अबलेणं अवीरिएणं अपुरिसक्कारपक्कमेणं अनुदिन्नं उदीरणाभवियं कम्मं उदी०?, गोयमा! तं० अट्ठाणेणवि कम्मे० बले० वीरिए० पुरिसक्कारपरक्कमेणवि अनुदिन्नं उदीरणाभवियं कम्मं उदीरेइ, नो तं अनुट्ठाणेणं अकम्मेणं अबलेणं अवीरिएणं अपुरिसक्कार० अणुदिन्नं उदी० भ० क० उदी०, एवं सति अत्थि उट्ठाणे इ वा कम्मे इ वा बले इ वा वीरिए इ वा पुरिसक्कारपरक्कमे इ वा।*

*से नूनं भंते! अप्पणा चेव उवसामेइ अप्पणा चेव गरहइ अप्पणा चेव संवरइ?, हंता गोयमा! एत्थ वि तहेव भाणियव्वं, नवरं अणुदिन्नं उवसामेइ सेसा पडिसेहेयव्वा तिन्नि॥ जं तं भंते! अणुदिन्नं उवसामेइ तं किं उट्ठाणेणं जाव पुरिसक्कारपरक्कमेति वा, से नूनं भंते! अप्पणा चेव वेदेइ अप्पणा चेव गरहइ?, एत्थवि सच्चेव परिवाडी, नवरं उद्दिन्नं वेएइ नो अनुदिन्नं वेएइ, एवं जाव पुरिसक्कारपरिक्कमे इ वा।*

*से नूणं भंते! अप्पणा चेव निज्जरेति अप्पणा चेव गरहइ, एत्थवि सच्चेव परिवाडी नवरं उदयानंतरपच्छकडं कम्मं निज्जरेइ एवं जाव परिक्कमेइ वा।*

**वृ.** 'अप्पणा चेव'त्ति 'आत्मनैव' स्वयमेव जीवः, अनेन कर्मणो बन्धादिषुमुख्यवृत्त्याऽऽत्मन एवाधिकारः उक्तो, नापरस्य, आह च-"अणुमेत्तोवि न कस्सइ बंधो परवत्थुपच्चया भणिओ"त्ति

'उदीरेइति' करणविशेषेणाकृष्य भविष्यत्कालवेद्यं कर्म क्षपणायोदयावलिकायां प्रवेशयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'गरहइ'त्ति आत्मनैव गर्हते निन्दतीत्यतीतकालकृतं कर्म स्वरूपतः तत्कारणगर्हणद्वारेण वा जातविशेषबोधः सन्। तथा 'संवरइ'त्ति संवृणोति न करोति वर्त्तमानकालिकं कर्म स्वरूपतस्तद्धेतुसंवरणद्वारेण वेति, गर्हादौ च यद्यपि गुर्वादीनामपि सहकारित्वमस्ति तथाऽपि न तेषां प्राधान्यं जीववीर्यस्यैव तत्र कारणत्वात्, गुर्वादीनां च वीर्योल्लासनमात्र एव हेतुत्वादिति।

अथोदीरणामेवाश्रित्याह-'जं तं भंते !' इत्यादि व्यक्तं, नवरम् अथोदरीयतीत्यादिपदत्रयोद्देशेऽपि कस्मात् 'तं किं उदिन्नं उदीरेइ'इत्यादिनाऽऽद्यपदस्यैव निर्देशः कृतः ?, उच्यते-उदीरणादिके कर्मविशेषणचतुष्टये उदीरणामेवाश्रित्य विशेषणस्य सद्भावाद् इतरयोस्तु तदभावाद्, एवं तर्हि उद्देशसूत्रे गर्हते संवृणोतीत्येतत् पदद्वयं कस्मादुपात्तम्? उत्तरत्रानिर्देक्ष्यमाणत्वात्तस्येति, उच्यते-कर्मण उदीरणायां गर्हासंवरणे प्राय उपायावित्यभिधानार्थम्, एवमुत्तरत्तापि वाच्यमिति

प्रश्नार्थश्चेहोत्तरव्याख्यानाद्बोद्धव्यः, तत्र 'नो उदिन्नं उदीरेइ'त्ति १ उदीर्णत्वादेव, उदीर्णस्याप्युदीरणे उदीरणाऽविरामप्रसङ्गात्। 'नो अणुदिन्नं उदीरेइ'त्ति २ इहानुदीर्णं-चिरेण भविष्यदुदीरणम् अभविष्यदुदीरणं च तन्नोदीरयति तद्विषयोदीरणायाः सम्प्रत्यनागतकाले चाभावात्।

'अनुदिन्नं उदीरणाभवियं कम्मं उदीरेइ'त्ति ३ अनुदीर्णं स्वरूपेण किन्त्वनन्तरसमय एव यदुदीरणाभविकं तदुदीरयति, विशिष्टयोग्यताप्राप्तत्वात्, तत्र भविष्यतीति भवा सैव भविका उदीरणा भविका यस्येत प्राकृतत्वाद् उदीरणाभविकम्, अन्यथा भविकोदीरणमिति स्यात्, उदीरणायां वा भव्यं-योग्यमुदीरणाभव्यमिति।

'नो उदयानंतरपच्छकड'त्ति ४ उदयेनानन्तरसमये पश्चातकृतम्-अतीततां नीतं यत्तत्तथा-तदपि नोदीरयति, तस्यातीतत्वात् अतीतस्य चासत्त्वाद् असतश्चानुदीरणीयत्वादिति। इह च यद्यप्युदीरणादिषु कालस्वभावादीनां कारणत्वमस्ति तथाऽपि प्राधान्येन पुरुष- वीर्यस्यैव कारणत्वमुपदर्शयन्नाह-'जं त'मित्यादि व्यक्तं, नवरम् उत्थानादिनोदीरयतीत्युक्तं, तत् च यदापन्नं तदौह-'एवं सइ'त्ति 'एवम्' उत्थानादिसाध्ये उदीरणे सतीत्यर्थः, शेषं तथैव ॥ काङ्क्षामोहनीयस्योदीरणोक्ता, अथ तस्यैवोपशमनमाह-'से नून'मित्यादि, उपशमनं मोहनीयस्यैव, यदाह—

॥१॥ "मोहस्सेवोवसमो खाओवसमो चउण्ह घाईणं।
उदयक्खयपरिणाणा अट्ठण्हवि होंति कम्माणं॥

उपशमश्चोदीर्णस्य क्षयः अनुदीर्णस्य च विपाकतः प्रदेशतश्चाननुभवनं, सर्वथैव विष्कम्भितोदयत्वमित्यर्थः, अयं चानादिमिथ्यादृष्टेरौपशमिकसम्यक्त्वलाभे उपशमश्रेणिगतस्य चेति, 'अनुदिन्नं उवसामेति'त्ति उदीर्णस्य त्ववश्यं वेदनादुपशमनाभाव इति। उदीरणं सद्वेद्यते इति वेदनसूत्रं, तत्र 'उदिन्नं वेएइ'त्ति अनुदीर्णस्य वेदनाभावात्, अथानुदीर्णमपि वेदयति तर्हि उदीर्णानुदीर्णयोः को विशेषः स्यात्? इति। वेदितं सन्निजीर्यत इति निर्जरासूत्रं, तत्र 'उदयानंतरपच्छकडं'ति उदेयनान्तरसमये यत्पश्चात्कृतम्-अतीततां गमितं तत्तथा तत् 'निर्जरयति' प्रदेशेभ्यः शातयति, नान्यद्, अननुभूतरसत्वादिति। उदीरणोपशमवेदनानिर्जरणसूत्रोक्तार्थसङ्ग्रहगाथा-

॥१॥ "तईएण उदीरेंति उवसामेंति य पुणोवि बीएणं।
वेइंति निज्जरंति य पढमचउत्थेहिं सव्वेऽवि॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ काङ्क्षामोहनीयवेदनादिकं निर्ज्जरान्तं सूत्रप्रपञ्चं नारकादिचतुर्विंशतिदण्डकैर्नियोजयन्नाह–

**मू. (४४)** *नेरइयाणं भंते ! कंखामोहणिज्जं कम्मं वेएइ ?, जहा ओहिया जीवा तहा नेरइया, जाव थणियकुमारा ॥*

*पुढविक्काइयाणं भंते ! कंखामोहणिज्जं कम्मं वेइंति, हंता वेइंति, कहन्नं भंते ! पुढविक्का० कंखामोहणिज्जं कम्मं वेदेंति ?, गोयमा ! तेसिणं जीवाणं णो एवं तक्का इ वा सण्णा इ वा पण्णा इ वा मणे इ वा वइ ति वा-अम्हे णं कंखामोहणिज्जं कम्मं वेएमो, वेएंति पुण ते ।*

*से नूनं भंते ! तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं, सेसं तं चेव, जाव पुरिस्कारपरिक्कमेइ वा । एवं जाव चउरिंदियाणं पंचिंदियतिरिक्खजोणिया जाव वेमाणिया जहा ओहिया जीवा ।*

**वृ.** इह च 'जहा ओहिया जीवा' इत्यादिना 'हंता वेयंति, कहन्नं भंते !' नेरइयाणं कङ्खामोहणिज्जं कम्मं वेयंति ?, गोयमा ! तेहिं तेहिं कारणेहिं' इत्यादिसूत्रं निर्जरासूत्रान्तं स्तनितकुमारप्रकरणान्तेषु प्रकरणेषु सूचितं, तेषु च यत्र यत्र जीवपदं प्रागधीतं तत्रतत्र नारकादिपदमध्येयमिति

पञ्चेन्द्रियाणामेव शङ्कितत्वादयः काङ्क्षामोहनीयवेदनप्रकारा घटन्ते नैकेन्द्रियादीनाम्, अतस्तेषां विशेषेण तद्वेदनप्रकारदर्शनायाह-

'पुढविक्काइयाण' मित्यादि व्यक्तं, नवरम्- 'एवं तक्का इ व' त्ति एवं-वक्ष्यमाणोल्लेखेन तर्को-विमर्श, स्त्रीलिङ्गनिर्देशश्च प्राकृतत्वात्, 'सन्नाइ व' त्ति सञ्ज्ञा-अर्थावग्रहरूपं ज्ञानं, 'पण्णा इ व' त्ति प्रज्ञा-अशेषविशेषविषयं ज्ञानमेव, 'मणे इ व' त्ति मनः स्मृत्यादिशेषमतिभेदरूपं, 'वइ इ व' त्ति वाग्-वचनं, 'सेसं तं चेव' त्ति शेषं तदेव यथा औधिकप्रकरणेऽधीतं, तच्चेदम्- 'हंता गोयमा तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं । से नूनं भंते ! एवं मणं धारेमाणे' इत्यादि तावद्वाच्यं यावत् 'से नूनं भंते ! अप्पणा चेव निज्जरेइ अप्पणा चेव गरहइ' इत्यादेः सूत्रस्य 'पुरिसक्कार परक्कमेइ व' त्ति पदम् ।

'एवं जाव चउरिंदिय' त्ति पृथिवीकायप्रकरणवदप्कायादिप्रकरणानि चतुरिन्द्रियप्रकरणान्तान्यध्येयानि, तिर्यक्पञ्चेन्द्रियप्रकरणादीनि तु वैमानिकप्रकरणान्तानि औधिकजीवप्रकरणवत्तदभिलापेनाध्येयानीति, अत एवाह- 'पंचेदिए' त्यादि । भवतु नाम शेषजीवानां काङ्क्षामोहनीयवेदनं निग्रन्थानां पुनस्तन्न संभवति जिनागमावदा- तबुद्धित्वात्तेषामिति प्रश्नयन्नाह-

**मू. (४५)** *अत्थि णं भंते ! समणावि निग्गंथा कंखामोहणिज्जं कम्मं वेएइ ?, हंता अत्थि, कहन्नं भंते ! समणा निग्गंथा कंखामोहणिज्जं कम्मं वेएइ ?, गोयमा ! तेहिं २ नाणंतरेहिं दंसणंतरेहिं चरित्तंतरेहिं लिंगंतरेहिं पवयणंतरेहिं पावयणंतरेहिं कप्पंतरेहिं मग्गंतरेहिं मतंतरेहिं भंगंतरेहिं नयंतरेहिं नियमंतरेहिं पमाणंतरेहिं संकिया कंखिया वितिगिच्छिया भेयसमावन्ना कलुससमावन्ना, एवं खलु समणा निग्गंथा कंखामोहणिज्जं कम्मं वेइंति ।*

*से नूनं भंते ! तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं, हंता गोयमा ! तमेव सच्चं नीसंकं, जाव पुरिसक्कारपक्कमेइ वा सेवं भंते ।*

**वृ.** 'अत्थि ण' मित्यादि काकाऽध्येयम् 'अस्ति' विद्यतेऽयं पक्षः-यदुत 'श्रमणाः' व्रतिनः अपिशब्दः श्रमणानां काङ्क्षामोहनीयस्यावेदनसंभावनार्थः, ते च शाक्यादयोऽपि भवन्तीत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'निर्ग्रन्थाः' सबाह्याभ्यन्तरग्रन्थान्निर्गताः, साधव इत्यर्थः, 'नाणंतरेहिं' ति एकस्माज्ज्ञानादन्यानि ज्ञानानि ज्ञानान्तराणि तैर्ज्ञानविशेषैर्ज्ञानविशेषेषु वा शङ्किता इत्यादिभि संबन्धः, एवं सर्वत्र, तेषु चैवं सङ्कादयः स्युः-यदि नाम परमाण्वादिसकलरूपिद्रव्यावसानविषयग्राहकत्वेन सङ्ख्यातीतरूपाण्यवधिज्ञानानि सन्ति तत्किमपरेण मनःपर्यायज्ञानेन ?, तद्विषयभूतानां मनोद्रव्याणामवधिनैव दृष्टत्वात्, उच्यते चागमे मनःपर्यायज्ञानमिति किमत्र तत्वमिति ज्ञानतः शङ्का, इह समाधिः-यद्यपि मनोविषयमप्यवधिज्ञानमस्ति तथाऽपि न मनःपर्यायज्ञानमवधावन्तर्भवति, भिन्नस्वभावत्वात्, तथाहि-मनःपर्यायज्ञानं मनोमात्रद्रव्यग्राहकमेवादर्शनपूर्वकं च, अवधिज्ञानं तु किञ्चिन्मनोव्यतिरिक्तद्रव्यग्राहकं किञ्चिच्चोभयग्राहकं दर्शनपूर्वकं च न तु केवलमनोद्रव्यग्राहकम् इत्यादि बहु वक्तव्यमतोऽवधिज्ञानातिरिक्तं भवति मनःपर्यायज्ञानमिति ।

तथा दर्शनं-सामान्यबोधः, तत्र यदि नामेन्द्रियानिन्द्रियनिमित्तः सामान्यार्थविषयो बोधो दर्शनं तदा किमेकश्चक्षुर्दर्शनमन्यस्त्वचक्षुर्दर्शनम्, अथेन्द्रियानिन्द्रियभेदाद् भेदस्तदा चक्षुष इव श्रोत्रादीनामपि दर्शनभावात् षडिन्द्रियनोइन्द्रियजानि दर्शनानि स्युर्न द्वे एवेति, अत्र समाधि-सामान्यविशेषात्मकत्वाद्वस्तुनः क्वचिद्विशेषतस्तन्निर्देशः क्वचिच्च सामान्यतः, तत्र चक्षुदर्शन-मचक्षुर्दर्शनं चेत्युक्तं तदिन्द्रियाणामप्राप्तकारित्वप्राप्तकारित्वविभागात्, मनस्त्वप्राप्तकारित्वेऽपि प्राप्तकारीन्द्रियवर्गस्य तदनुसरणीयस्य बहुत्वात्तद्दर्शनस्याचक्षुर्दर्शनशब्देन ग्रहणमिति ।

अथवा दर्शनं-सम्यक्त्वं तत्र च शङ्का-"मिच्छत्तं जमुदिन्नं तं खीणं अनुदियं च उवसंतं" । इत्येवंलक्षणं क्षायोपशमिकम्, औपशमिकमप्येवंलक्षणमेव, यदाह–

॥१॥ "खीणम्मि उइन्नम्मी अणुदिज्जंति य सेसमिच्छत्ते ।
अंतोमुहुत्तमेत्तं उवसमसम्मं लहइ जीवो ॥

ततोऽनयोर्न विशेषः उक्तश्चासाविति, समाधिश्च-क्षयोपशमो हि उदीर्णस्य क्षयोऽनुदीर्णस्य च विपाकानुभवापेक्षयोपशमः, प्रदेशानुभवतस्तूदयोऽस्त्येव, उपशमे तु प्रदेशानुभवोऽपि नास्तीति, उक्तं च–

॥१॥ "वेएइ संतकम्मं खओवसमिएसु नाणुभावं सो ।
उवसंतकसाओ पुण वेदेइ न संतकम्मं ति ॥

तथा चारित्रं-चरणं तत्र यदि सामायिकं सर्वसावद्यविरतिलक्षणं छेदोपस्थापनीयमपि तल्लक्षणमेव, महाव्रतानामवद्यविरतिरूपत्वात्, तत्कोऽनयो र्भेदः ? उक्तश्चासाविति ।

अत्र समाधि-ऋजुजडवक्रजडानां प्रथमचरमजिनसाधूनामाश्वासनाय छेदोपस्थापनीय-मुक्तं, व्रतारोपणे हि मनाक् सामायिकाशुद्धावपि व्रताखण्डनाच्चारित्रिणो वयं चारित्रस्य व्रतरूप-त्वादिति बुद्धि स्यात्, सामायिकमात्रे तु तदशुद्धौ भग्नं नश्चारित्रं चारित्रस्य सामायिकमात्र-त्वादित्येवमना- श्वासस्तेषां स्यादिति, आह च–

॥१॥ "रिउवक्कजडा पुरिमेयराण सामाइए वयारुहणं ।
मणयसमुद्धेवि जओ सामइए हुंति हु वयाइं ॥ इति

तथा लिङ्गं-साधुवेषः, तत्र च यदि मध्यमजिनैर्यथालब्धवरूपं लिङ्गं साधूनामुपदिष्टं तदा किमिति प्रथमचरमजिनाभ्यां सप्रमाणधवलवसनरूपं तदेवोक्तं ?, सर्वज्ञानामविरोधि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वचनत्वादिति, अत्रापि ऋजुजडवक्रजडऋजुप्रज्ञशिष्यानाश्रित्य भगवतां तस्योपदेशः, तथैव तेषामुपकारसम्भवादिति समाधिः ।

तथा प्रवचनमत्रागमः, तत्र च यदि मध्यमजिनप्रवचनानि चतुर्यामधर्मप्रतिपादकानि कथं प्रथमेतरजिनप्रवचने पञ्चयामधर्मप्रतिपादके ? सर्वज्ञानामविरुद्धवचनत्वात्, अत्रापि समाधि-चतुर्यामोऽपि तत्त्वतः पञ्चायाम एवासौ, चतुर्थव्रतस्य परिग्रहेऽन्तर्भूतत्वात्, योषा हि नापरिगृहीता भुज्यते इति न्यायादिति । तथा प्रवचनमधीते वेत्ति वा प्रावचनः-कालापेक्षया बह्वागमः पुरुषः, तत्रैकः प्रावचनिक एवं कुरुते अन्यस्त्वेवमिति किमत्र तत्त्वमिति, समाधिश्चेह-चारित्रमोहनीय-क्षयोपशमविशेषेण उत्सर्गापवादादिभावितत्वेन च प्रावचनिकानां विचित्रा प्रवृत्तिरिति नासौ सर्वथाऽपि प्रमाणम्, आगमाविरुद्धप्रवृत्तेरेव प्रमाणत्वादिति ।

तथा कल्पो-जिनकल्पिकादिसमाचारः, तत्र यदि नाम जिनकल्पिकानां नाग्न्यादिरूपो महाकष्टः कल्पः कर्म्मक्षयाय तदा स्थविरकल्पिकानां वस्त्रपात्रादिपरिभोगरूपो यथाशक्तिकरणात्म-कोऽकष्टस्वभावः कथं कर्मक्षयायेति, इह च समाधि- द्वावपि कर्म्मक्षयहेतू, अवस्थाभेदेन जिनोक्त-त्वात्, कष्टाकष्टयोश्च विशिष्टकर्मक्षयं प्रत्यकारणत्वादिति ।

तथा मार्गः, पूर्वपुरुषक्रमागता सामाचारी, तत्र केषाञ्चिद्द्विश्चैत्यवन्दनानेकविधकायो-त्सर्गकरणादिकाऽऽवश्यकसमाचारी तदन्येषां तु न तथेति किमत्र तत्त्वमिति, समाधिश्च-गीतार्थाशठप्रवर्त्तिताऽसौ सर्वाऽपि न विरुद्धा, आचरितलक्षणोपेतत्वात्, आचरितलक्षणं चेदम्-

॥१॥ "असढेण समाइन्नं जं कत्थइ केणई असावज्जं ।
न निवारियमन्नेहिं बहुमणुमयमेयमायरियं ॥

तथा मतं,-समान एवागमे आचार्याणामभिप्रायः, तत्र च सिद्धसेनादिवाकरो मन्यते-केवलिनो युगपद् ज्ञानं दर्शनं च, अन्यथा तदावरणक्षयस्य निरर्थकता स्यात्, जिनभद्रगणिक्षमा-श्रमणस्तु भिन्नसमये ज्ञानदर्शने, जीवस्वरूपत्वात्, तथा तदावरणक्षयोपशमे समानेऽपि क्रमेणैव मतिश्रुतोपयोगौ, न चैकतरोपयोगे इतरक्षयोपशमाभावः, तत्क्षयोपशमस्योत्कृष्टतः षट्षष्टिसाग-रोपम- प्रमाणत्वादतः किं तत्त्वमिति, इह समाधि-यदेव मतमागमानुपाति तदेव सत्यमिति मन्तव्य-मितरत्पुनरुपेक्षणीयम्, अथ चाबहुश्रुतेन नैतदवसातुं शक्यते तदैवं भावनीयम्-आचार्याणां संप्रदाया-दिदोषादयं मतभेदः, जिनानां तु मतमेकमेवाविरुद्धं च, रागादिविरहित्वात्, आह च-

॥१॥ "अणुवकयपराणुग्गहपरायणा जं जिणा जुगप्पवरा ।
जियरागदोसमोहा य णण्णहावाइणो तेणं ॥

तथा भङ्गाः-द्व्यादिसंयोगभङ्गकाः, तत्र च द्रव्यतो नाम एका हिंसा न भावत इत्यादि चतुर्भङ्ग्युक्ता, न च तत्र प्रथमोऽपि भङ्गो युज्यते, यतः किल द्रव्यतो हिंसा-ईर्यासमित्या गच्छतः पिपीलिकादिव्यापादनं, न चेयं हिंसा, तल्लक्षणायोगात्, तथाहि-

॥१॥ "जो उ पमत्तो पुरिसो तस्स उ जोगं पडुच्च जे सत्ता ।
वावज्जंती नियमा तेसिं सो हिंसओ होइ ॥ इति

उक्ता चेयमतः शङ्का, न चेयं युक्ता, एतद्गाथोक्तहिंसालक्षणस्य द्रव्यभावहिंसाश्रयत्वात्, द्रव्यहिंसायास्तु मरणमात्रतया रूढत्वादिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा नया-द्रव्यास्तिकादयः, तत्र यदि नाम द्रव्यास्तिकमतेन नित्यं वस्तु पर्यायास्तिकनयमतेन कथं तदेवानित्यं? विरुद्धत्वात्, इति शङ्का, इयं चायुक्ता, द्रव्यापेक्षयैव तस्य नित्यत्वात्, पर्यायापेक्षया चानित्यत्वात्, दृश्यते चापेक्षयैकत्रैकदा विरुद्धानामपि धर्म्माणां समावेशो, यथा जनकापेक्षया य एव पुत्रः स एव पुत्रापेक्षया पितेति ।

तथा नियमः-अभिग्रहः, तत्र यदि नाम सर्वविरति सामायिकं तदा किमन्येन पौरुष्यादिनियमेन? सामायिकेनैव सर्वगुणावाप्तेः, उक्तश्चा सौइति शङ्का, इयं चायुक्ता, यतः सत्यपि सामायिके युक्तः पौरुष्यादिनियमः, अप्रमादवृद्धिहेतुत्वादिति, आह च–

॥ १ ॥ "सामाइए वि हु सावज्जचागरूवे उ गुणकरं एयं ।
अपमायवुड्ढिजणगत्तणेण आणाओ विन्नेयं ॥ ति

तथा प्रमाणं-प्रत्यक्षादि, तत्रागमप्रमाणम्-आदित्यो भूमेरुपरि योजनशतैरष्टभिः संचरति चक्षुप्रत्यक्षं च तस्य भुवो निर्गच्छतो ग्राहकमिति किमत्र सत्यमिति सन्देहः ।

अत्र समाधि-न हि सम्यक् प्रत्यक्षमिदं, दूरतरदेशतो विभ्रमादिति ।

शतकं-१ उद्देशकः-३ समाप्तः

## –: शतकं-१ उद्देशकः-४ :–

**वृ.** अनन्तरोद्देशके कर्म्मण उदीरणवेदनाद्युक्तमिति तस्यैव भेदादान् दर्शयितुं तथा द्वारगाथायां 'पगइ' त्ति यदुक्तं तच्चाभिधातुमाह–

**मू. (४६)** *कति णं भंते ! कम्मप्पगडीओ पन्नत्ताओ ? गोयमा ! अट्ठ कम्मप्पगडीओ पण्णत्ताओ । कम्मप्पगडीए पढमो उद्देसो नेयव्वो जाव अणुभागो सम्मत्तो ।*

**वृ.** 'कइ 'मित्यादि व्यक्तं, नवरं 'कम्मपगडीए'त्ति प्रज्ञापनायां त्रयोविंशतितमस्य कर्मप्रकृत्यभिधानस्य पदस्य प्रथमोद्देशको नेतव्यः, एतद्वाच्यानां चार्थानां सङ्ग्रहगाथाऽस्तीत्यत आह-गाहा, सा चेयम्–

**मू. (४७)** *कइ पयडी कह बंधइ कइहि व ठाणेहि बंधई पयडी ।*
*कइ वेदेइ य पयडी अणुभागो कइविहो कस्स ॥*

**वृ.** 'कई'त्यादि, तत्र 'कइप्पगडी'ति द्वारं, तच्चैवम्-'कइ णं भंते! कम्मप्पगडीओ पन्नत्ताओ गोयमा ! अट्ठ, तंजहा-नाणावरणिज्ज'मित्यादि । 'कह बंधई'त्यादि द्वारमिदं चैवम्-'कहन्नं भंते जीवे अट्ठ कम्मपगडीओ बंधइ ?' गोयमा ! नाणावरणिज्जस्स कम्मस्स उदएणं दंसणमोहणिज्जं कम्मं निग्गच्छइ' विपाकावस्थां करोतीत्यर्थः ।

दंसणमोहणिज्जस्स कम्मस्स उदएणं मिच्छत्तं निग्गच्छइ, मिच्छत्तेणं उदिन्नेणं एवं खलु जीवे अट्ठकम्मप्पगडीओ बंधइ' इत्यादि, न चैवमिहेतरेतराश्रयदोषः, कर्मबन्धप्रवाहस्यानादित्वादिति ।

'कइहि व ठाणेहि'त्ति द्वारं, तच्चैवम्-'जीवे णं भंते ! नाणावरणिज्जं कम्मं कइहिं ठाणेहिं बंधइ? गोयमा ! दोहिं ठाणेहिं, तंजहा-रागेण य दोसेण य' इत्यादि । 'कइ वेएइ य'त्ति द्वारमिदं चैवम्-'जीवे णं भंते ! कइ कम्मप्पगडीओ वेएइ ? गोयमा ! अत्थेगइए वेएइ अत्थेगतिए नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेएइ, जे वेएइ से ते अट्ठ' इत्यादि। 'जीवे णं भंते! नाणावरणिज्जं कम्मं वेएइ? गोयमा! अत्थेगइए वेएइ अत्थेगतिए नो वेएइ' केवलिनोऽवेदनात्, 'नेरइए णं भंते! नाणावरणिज्जं कम्मं वेएइ? गोयमा! नियमा वेएइ' इत्यादि।

'अनुभागो कइविहो कस्स' त्ति कस्य कर्म्मणः कतिविधो रसः? इति द्वारम्, इदं चैवम्-

"नाणावरणिज्जस्स णं भंते! कम्मस्स कतिविहे अणुभागे पन्नत्ते? गोयमा! दसविहे अणुभागे पन्नत्ते, तंजहा-सोयावरणे सोयविन्नाणावरणे" इत्यादि, द्रव्येन्द्रियावरणो भावेन्द्रियावरणश्चेत्यर्थः ॥ अथ कर्मचिन्ताऽधिकारान्मोहनीयमाश्रित्याह–

**मू. (४८)** *जीवे णं भंते! मोहणिज्जेणं कडेणं कम्मेणं उदिन्नेणं उवट्ठाएज्जा? हंता उवट्ठाएज्जा*

*से भंते! किं वीरियत्ताए उवट्ठाएज्जा अवीरियत्ताए उवट्ठाएज्जा? गो०! वीरियत्ताए उवट्ठाएज्जा नो अवीरियत्ताए उवट्ठाएज्जा, जइ वीरियत्ताए उवट्ठाएज्जा किं बालवीरियत्ताए उवट्ठाएज्जा पंडियवीरियत्ताए उवट्ठाएज्जा बालपंडियवीरियत्ताए उवट्ठाएज्जा?, गोयमा! बालवीरियत्ताए उवट्ठाएज्जा णो पंडियवीरियत्ताए उवट्ठाएज्जा णो बालपंडियवीरियत्ताए उवट्ठाएज्जा।*

*जीवे णं भंते! मोहणिज्जेणं कडेणं कम्मेणं उदिन्नेणं अवक्कमेज्जा? हंता अवक्कमेज्जा, से भंते! जाव बालपंडियवीरियत्ताए अवक्कमेज्जा ३?, गोयमा! बालवीरियत्ताए उवक्कमेज्जा नो पंडियवीरिय- त्ताए उवक्कमेज्जा, सिय बालपंडियवीरियत्ताए अवक्कमेज्जा। जहा उदिन्नेणं दो आलावगा तहा उवसंतेणवि दो आलावगा भाणियव्वा, नवरं उवट्ठाएज्जा पंडियवीरियत्ताए अवक्कमेज्जा बालपंडिय- वीरियत्ताए॥*

*से भंते! किं आयाए अवक्कमइ अणायाए अवक्कमइ? गोयमा! आयाए अवक्कमइ नो अणायाए अवक्कमइ, मोहणिज्जं कम्मं वेएमाणे से कहमेयं भंते! एवं? गोयमा! पुव्विं से एयं एवं रोयइ इयाणिं से एयं एवं नो रोयइ एवं खलु एवं॥*

**वृ.** 'मोहणिज्जेणं' ति मिथ्यात्वमोहनीयेन 'उदिन्नेणं' ति उदितेन 'उवट्ठाएज्ज' त्ति 'उपतिष्ठेत्' उपस्थानं-परलोकक्रियास्वभ्युपगमं कुर्यादित्यर्थः, 'वीरियत्ताए' त्ति वीर्ययोगाद्वीर्य-प्राणी तद्भावो वीर्यता, अथवा वीर्यमेव स्वार्थिकप्रत्ययाद्वीर्यता वीर्याणां वा भावो वीर्यता, तया, 'अवीरियत्ताए' त्ति अविद्यमानवीर्यतया वीर्याभावेनेत्यर्थः, 'नो अवीरियत्ताए' त्ति वीर्यहेतुकत्वादुपस्थानस्येति।

'बालवीरियत्ताए' त्ति बालः-सम्यगर्थानवबोधात् सद्बोधकार्यविरत्यभावाच्च मिथ्यादृष्टिस्तस्य या वीर्यता-परिणतिविशेषः सा तथा तया। 'पंडियवीरियत्ताए' त्ति पण्डितः-सकलावद्यवर्जकस्त-दन्यस्य परमार्थतो निर्ज्ञानत्वेनापण्डितत्वाद्, यदाह-

॥१॥　"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः।
तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम्॥

इति, सर्वविरत इत्यर्थः।

'बालपंडियवीरियत्ताए' त्ति बालो देशे विरत्यभावात् पण्डितो देश एव विरतिसद्भावादिति बालपण्डितो-देशविरतः, इह मिथ्यात्वे उदिते मिथ्यादृष्टित्वाज्जीवस्य बालवीर्येणैवोपस्थानं स्यान्नेतराभ्याम्, एतदेवाह-'गोयमे' त्यादि।

उपस्थानविपक्षोऽपक्रमणमतस्तदाश्रित्याह-'जीवे णमि' त्यादि 'अवक्कमेज्ज' त्ति 'अपक्रामेत्'

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अपसर्पेत्, उत्तमगुणस्थानकाद् हीनतरं गच्छेदित्यर्थः, 'बालवीरियत्ताए अवक्कमेज्ज'त्ति मिथ्यात्वमोहोदये सम्यक्त्वात् संयमाद्देशसंयमाद्वा 'अपक्रामेत' मिथ्यादृष्टिर्भवेदिति।

'नो पंडियवीरियत्ताए अवक्कमेज्ज'त्ति, नहि पण्डितत्वात्प्रधानतरं गुणस्थानकमस्ति यतः पण्डितवीर्येणापसर्पेत्, 'सिय बालपंडियवीरियत्ताए अवक्कमेज्ज'त्ति स्यात्-कदाचिच्चारित्रमोहनी-योदयेन संयमादपगत्य बालपण्डितवीर्येण देशविरतो भवेदिति। वाचनान्तरे त्वेवम्-'बालवीरियत्ताए नो पंडियवीरियत्ताए नो बालपंडियवीरियत्ताए'त्ति, तत्र च मिथ्यात्वमोहोदये बालवीर्यस्यैव भावादितरवीर्यद्वयनिषेध इति।

उदीर्णविपक्षत्वादुपशान्तस्येत्युपशान्तसूत्रद्वयं तथैव, नवरम् 'उवट्ठाएज्जा पंडियवीरिय-त्ताए'त्ति उदीर्णालापकापेक्षयोपशान्तालापकयोरयं विशेषः-प्रथमालापके सर्वथा मोहनीयेनोप-शान्तेन सतोपतिष्ठेत क्रियासु पण्डितवीर्येण, उपशान्तमोहावस्थायां पण्डितवीर्यस्यैव भावादित-रयोश्चाभावात्। वृद्धैस्तु काञ्चिद्वाचनामाश्रित्येदं व्याख्यातं-मोहनीयेनोपशान्तेन सता न मिथ्या-दृष्टिर्जायते, साधुः श्रावको वा भवतीति। द्वितीयालाके तु 'अवक्कमेज्ज बालपंडियीरियत्ताए'त्ति, मोहनीयेन हि उपशान्तेन संयतत्वाद्बालपण्डितवीर्येणापक्रामन् देशसंयतो भवति, देशतस्तस्य मोहोपशमसद्भावात्, न तु मिथ्यादृष्टि, मोहोदय एव तस्य भावात्, मोहोपशमस्य चेहाधिकृतत्वादिति

अथापक्रामतीति यदुक्तं तत्र सामान्येन प्रश्नयन्नाह-'से भंते! कि'मित्यादि, 'से'त्ति असौ जीवः, अथार्थो वा सेशब्दः, 'आयाए'त्ति आत्मना 'अणायाए'त्ति अनात्मना, परत इत्यर्थः 'अप- क्रामति' अपसर्प्पति, पूर्वं पण्डितत्वरुचिर्भूत्वा पश्चान्मिश्ररुचिर्मिथ्यारुचिर्वा भवतीति, कोऽसौ? इत्याह-मोहनीयं कर्म मिथ्यात्वमोहनीयं चारित्रमोहनीयं वा वेदयन्, उदीर्णमोह इत्यर्थ 'से' कहमेयं भंते!' त्ति अथ 'कथं' केन प्रकारेण 'एतद्' अपक्रमणम् 'एवं'ति मोहनीयं वेदयमा-नस्येति, इहोत्तरं-'गोयमे'त्यादि, 'पूर्वम्' अपक्रमणात् प्राग् 'असौ' अपक्रमणकारी जीवः 'एतद्' जीवादि अहिंसादि वा वस्तु 'एवं' यथा जिनैर्कुतं 'रोचते' श्रद्धत्ते करोति वा, 'इदानीं' मोहनीयोद-यकाले 'सः' जीवः 'एतत्' जीवादि अहिंसादि वा 'एवं' यथा जिनैरुक्तं 'नो रोचते' न श्रद्धत्ते न करोति वा, 'एवं खलु' उक्तप्रकारेण एतद् अपक्रमणम्, 'एवं' मोहनीयवेदने इत्यर्थः।

मोहनीयकर्माधिकारात् सामान्यकर्म चिन्तयन्नाह–

**मू. (४९)** *से नूनं भंते! नेरइयस्स वा तिरिक्खजोणियस्स वा मणूसस्स वा देवस्स वा जे कडे पावे कम्मे नत्थि तस्स अवेइयत्ता मोक्खो?, हंता गोयमा! नेरइयस्स वा तिरिक्ख० मणु० देवस्स वा जे कडे पावे कम्मे नत्थि तस्स अवेइत्ता मोक्खो। से केणट्ठेणं भंते! एवं वुच्चतिनेरइय-स्स वा जीव मोक्खो, एवंख लु मए गोयमा! दुविहे कम्मे पन्नत्ते, तंजहा-पएसकम्मे य अणुभागकम्मे य, तत्थ णं जं तं पएसकम्मं तं नियमा वेएइ, तत्थ णं जं तं अणुभागकम्मं तं अत्थेगइयं वेएइ अत्थेगइयं नो वेएइ।*

*नायमेयं अरहया सुयमेयं अरहया विन्नायमेयं अरहया इमं कम्मं अयं जीवे अज्झोवगमियाए वेयणाए वेदिस्सइ इमं कम्मं अयं जीवे उवक्कमियाए वेदणाए वेदिस्सइ, अहाकम्मं अहानिकरणं जहा जहा तं भगवया दिट्ठं तहा तहा तं विप्परिणमिस्सतीति, से तेणट्ठेणं गोयमा! नेरइयस्स वा ४ जाव मोक्खो।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'नेरइयस्स वे' त्यादौ नास्ति मोक्षः इत्येवं संबन्धात्षष्ठी, 'जे कडे' त्ति तैरेव यद्बद्धं 'पावे कम्मे' त्ति 'पापम्' अशुभं नारकगत्यादि, सर्वमेव वा 'पापं' दुष्टं, मोक्षव्याघातहेतुत्वात्, 'तस्स' त्ति तस्मात्कर्मणः सकाशात् 'अवेइयत्त' त्ति तत्कर्माननुभूय, 'एवं खलु' त्ति वक्ष्यमाणप्रकारेण 'खलु' वाक्यालङ्कारे 'मए' त्ति मया, अनेन च वस्तुप्रतिपादने सर्वज्ञत्वेनात्मनः स्वातन्त्र्यं प्रतिपादयति, 'पएसकम्मे य' त्ति प्रदेशाः-कर्मपुद्गला जीवप्रदेशेष्वोतप्रोतास्तद्रूपं कर्म प्रदेशकर्म 'अणुभागकम्मे य' त्ति अनुभागः-तेषामेव कर्म्मप्रदेशानां संवेद्यमानताविषयो रसस्तद्रूपं कर्मानुभागकर्म, तत्र यत्प्रदेशकर्म तन्नियमाद्वेदयति, विपाकस्याननुभवनेऽपि कर्मप्रदेशानामवश्यं क्षपणात्, प्रदेशेभ्यः प्रदेशान्नियमाच्छतयतीत्यर्थः, अनुभागकर्म च तथा भावं वेदयति वा न वा, यथा मिथ्यात्वं तत्क्षयोपशमकालेऽनुभागकर्मतया न वेदयति प्रदेशकर्मता तु वेदयत्येवेति ।

इह च द्विविधेऽपि कर्म्मणि वेदयितव्ये प्रकारद्वयमस्ति, तच्चार्हतैव ज्ञायते इति दर्शयन्नाह- 'ज्ञातं' सामान्येनावगतम् 'एतद्' वक्ष्यमाणं वेदनाप्रकारद्वयम् 'अर्हता' जिनेन 'सुयं' ति 'स्मृतं' प्रतिपादितम् अनुचिन्तितं वा, तत्र स्मृतमिव स्मृतं केवलित्वेन स्मरणाभावेऽपि जिनस्यात्यन्तम-व्यभिचारसाधर्म्यादिति, 'विण्णायं' ति विविधप्रकारैः-देशकालादिविभागरूपैर्ज्ञातं विज्ञातं, तदेवाह- 'इमं कम्मं अयं जीवे' त्ति, अनेन द्वयोरपि प्रत्यक्षतामाह केवलित्वादर्हतः, 'अज्झोवगमियाए' त्ति प्राकृतत्वादभ्युपगमः-प्रव्रज्याप्रतिपत्तितो ब्रह्मचर्यभूमिशयनकेशलुञ्चनादीनामङ्गीकारस्तेन निर्वृत्ता आभ्युपगमिको तया 'वेयइस्सइ' त्ति भविष्यत्कालनिर्देश- भविष्यत्पदार्थो विशिष्टज्ञानवतामेव ज्ञेयः अतीतो वर्त्तमानश्च पुनरनुभवद्वारेणान्यस्यापि ज्ञेयः संभवतीति ज्ञापनार्थः, 'उवक्कमियाए' त्ति उपक्रम्यतेऽनेनेत्युपक्रमः-कर्मवेदनोपायस्तत्र भवा औपक्रमिकी-स्वयमुदीर्णस्योदीरणाकरणेन वोदयमुपनीतस्य कर्मणोऽनुभवस्तया औपक्रमिक्या वेदनया वेदयिष्यति ।

तथा च 'अहाकम्मं' ति यथाकर्म-बद्धकर्मानतिक्रमेण 'अहानिगरणं' ति निकरणानां-नियतानां देशकालादीनां करणानां-विपरिणामहेतूनामनतिक्रमेण यथा यथा तत्कर्म भगवता दृष्टं तथा तथा विपरिणंस्यतीति, इतिशब्दो वाक्यार्थसमाप्ताविति ॥ अनन्तरं कर्म्म चिन्तितं, तच्च पुद्गलात्मकमिति परमाण्वादिपुद्गलांश्चिन्तयन्नाह-अथवा परिणामाधिकारात्पुद्गलपरिणाममाह-

***मू. (५०)*** *एस णं भंते ! पोग्गले तीतमनंतं सासयं समयं भुवीति वत्तव्वं सिया ?, हंता गोयमा ! एस णं पोग्गले अतीतमनंतं सासयं समयं भुवीति वत्तव्वं सिया ।*

*एस णं भंते ! पोग्गले पडुप्पन्नसासयं समयं भवतीति वत्तव्वं सिया ?, हंता गोयमा ! तं चेव उच्चारेयव्वं । एस णं भंते ! पोग्गले अनागयमनंतं सासयं समयं भविस्सतीति वत्तव्वं सिया हन्ता गोयमा ! तं चेव उच्चारेयव्वं । एवं खंधेणवि तिन्नि आलावगा, एवं जीवेणवि तिन्नि आलावगा भाणियव्वा –*

**वृ.** 'पोग्गले' त्ति परमाणुरुत्तरत्र स्कन्धग्रहणात् 'तीतं' ति अतीतम्, इह च सर्वेऽध्यमावकाला इत्यनेनाधारे द्वितीया, ततश्च सर्वस्मिन्नतीत इत्यर्थः, 'अणंतं' ति अपरिभाणम्, अनादित्वात्, 'सासयं' ति सदा विद्यमानं, न हि लोकोऽतीतकालेन कदाचिच्छून्य इति, 'समयं' ति कालं 'भुवि' त्ति अभूदिति, एतद्वक्तव्यं स्यात् ? सद्भूतार्थत्वात् ।

'पडुप्पन्नं' ति प्रत्युत्पन्नं वर्त्तमानमित्यर्थः, वर्त्तमानस्यापि शाश्वतत्वं सदाभावाद्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमनागतस्यापीति । अनन्तरं स्कन्ध उक्तः, स्कन्धश्च स्वप्रदेशापेक्षया जीवोऽपि स्यादिति जीवसूत्रं, जीवाधिकाराश्च प्रायो यथोत्तरप्रधानजीववस्तुवक्तव्यतामुद्देशकान्तं यावदाह–

**मू. (५१)** *छउमत्थे णं भंते ! मणूसे अतीतमनंतं सासयं समयं भुवीति केवलेणं संजमेणं केवलेणं संवरे० केवलेणं बंभचेरवासेणं केवलाहिं पवयणमाईहिं सिज्झिसु बुज्झिसु जाव सव्वदुक्खाणमंतं करिंसु ? गोयमा ! नो इणट्ठे समट्ठे । से केणट्ठेणं भंते ! एवं वुच्चइ तं चेव जाव अंतं करेंसु ? गोयमा ! जे केइ अंतकरा वा अंतिमसरीरिया वा सव्वदुक्खाणमंतं करेंसु वा करेंति वा करिस्संति वा सव्वे ते उप्पन्ननाणदंसणधरा अरहा जिणे केवली भवित्ता तओ पच्छ सिज्झंति बुज्झंति मुच्चंति परिनिव्वायंति सव्वदुक्खाणमंतं करेंसु वा करेंति वा करिस्संति वा, से तेणट्ठेणं गोयमा ! जाव सव्वदुक्खाणमंतं करेंसु० ।*

*पडुप्पन्नेऽवि एवं चेव नवरं सिज्झंति भाणियव्वं, अणागएवि एवं चेव, नवरं सिज्झिस्संति भाणियव्वं, जहा छउमत्थो तहा आहोहिओवि तहा परमाहोहिओऽवि तिन्नि तिन्नि आलावगा भाणियव्वा । केवली णं भंते ! मणूसे तीतमणंतं सासयं समयं जाव अंतं करेंसु ? हंता सिज्झिसु जाव अंतं करेंसु, एते तिन्नि आलावगा भाणियव्वा छउमत्थस्स जहा नवरं सिज्झिसु सिज्झिति सिज्झिस्संति ।*

*से नूनं भंते ! तीतमनंतं सासयं समयं पडुप्पन्नं वा सासयं समयं अनागयमनंतं वा सासयं समयं जे केइ अंतकरा वा अंतिमसरीरिया वा सव्वदुक्खाणमंतं करेंसु वा करेंति वा करिस्संति वा सव्वे त उप्पन्ननाणदंसणधरा अरहा जिणे केवली भवित्ता तओ पच्छ सिज्झंति जाव अंतं करेस्संति वा ? हंता गोयमा ! तीतमनंतं सासयं समयं जाव अंतं करेस्संति वा ।*

*से नूणं भंते ! उप्पन्ननाणदंसणधरे अरहा जिणे केवलि अलमत्थुत्ति वत्तव्वं सिया ? हंता गो० ! उप्पन्ननादंसणधरे अरहा जिणे केवली अलमत्थुत्ति वत्तव्वं सिया । सेवं भंते ! सेवं भंतेत्ति*

**वृ.** 'छउमत्थे ण'मित्यादि, इह छद्मस्थोऽवधिज्ञानरहितोऽवसेयो, न पुनरकेवलिमात्रम्, उत्तरत्रावधिज्ञानिनो वक्ष्यमाणत्वादिति, 'केवलेणं'ति असहायेन शुद्धेन वा परिपूर्णेन वाऽसाधारणेन वा, यदाह-''केवलमेगं सुद्धं सगलमसाहारणं अणंतं च'' 'संजमेणं'ति पृथिव्यादिरक्षणरूपेण 'संवरेणं'ति इन्द्रियकषायनिरोधेन 'सिज्झिसु' इत्यादौ च बहुवचनं प्राकृतत्वादिति ।

एतच्च गौतमेनानेनाभिप्रायेण पृष्टं-यदुत उपशान्तमोहाद्यवस्थायां सर्वविशुद्धाः संयमादयोऽपि भवन्ति विशुद्धसंयमादिसाध्या च सिद्धिरिति सा छद्मस्थस्यापि स्यादिति । 'अंतकरे'ति भवान्तकारिणः, ते च दीर्घतरकालापेक्षयाऽपि भवन्तीत्यत आह-'अंतिमसरीरिया व'त्ति अन्तिमं शरीरं येषामस्ति तेऽन्तिमशरीरिकाः, चरमदेहा इत्यर्थः, वाशब्दौ समुच्चये ।

'सव्वदुक्खाणमंतं करेंसु' इत्यादौ 'सिज्झिसु सिज्झंती'त्याद्यपि द्रष्टव्यं, सिद्धयाद्यविनाभूतत्वात् सर्वदुःखान्तकरणस्येति, 'उप्पन्ननाणदंसणधरे'ति उत्पन्ने ज्ञानदर्शने धारयन्ति ये ते तथा, न त्वनादिसंसिद्धज्ञानाः, अत एव 'अरह'त्ति पूजार्हा 'जिण'त्ति रागादिजेतारः, ते च छद्मस्था अपि भवन्तीत्यत आह-'केवली'ति सर्वज्ञाः, 'सिज्झंती' त्यादिषु चतुर्षु पदेषु वर्त्तमाननिर्देशस्य शेषोपलक्षणत्वात् 'सिज्झिसु सिज्झंति सिज्झिस्संती'त्येवमतीतादिनिर्देशो द्रष्टव्यः, अत एव 'सव्वदुक्खाण' मित्यादौ पञ्चमपदेऽसौ विहित इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जहा छउमत्थो' इत्यादेरियं भावना-'आहोहिएणं भंते! मणूसेऽतीतमनंतं सासय' मित्यादि दण्डकत्रयं, तत्राधः-परमावधेरधस्ताद् योऽवधि :सोऽधोऽवधिस्तेन यो व्यवहरत्यसौ आधोऽवधिकः-परिमितक्षेत्रविषयावधिकः 'परमाहोहिओ' त्ति परम आधोऽवधिकाद् यः स परमाधोऽवधिकः, प्राकृतत्वाच्च व्यत्ययनिर्देशः, 'परमोहिओ' त्ति क्वचित्पाठो व्यक्तश्च, स च समस्तरूपिद्रव्या-सङ्ख्यायतलोकमात्रालोकखण्डासङ्ख्यातावसर्पिणीविषयावधिज्ञानः, 'तिन्नि आलावग' त्ति कालत्रयभेदतः, 'केवली ण' मित्यादि केवलिनोऽप्येते एव त्रयो दण्डकाः विशेषस्तु सूत्रोक्त एवेति

'से णूण' मित्यादिषु कालत्रयनिर्देशो वाच्य एवेति, 'अलमत्थुत्ति वत्तव्वं सिय' त्ति 'अलमस्तु' पर्याप्तं भवतु नातः परं किञ्चिद् ज्ञानान्तरं प्राप्तव्यमस्यास्तीत्येतद्वक्तव्यं 'स्यात्' भवेत्, सत्यत्वादस्येति

शतकं-१ उद्देशकः-४ समाप्तः

## —: शतकं-१ उद्देशक-५ :—

**वृ.** अनन्तरोद्देशकस्यान्तिमसूत्रेष्वर्हदादय उक्तास्ते च पृथिव्यां भवन्तीति अथवा पृथिवीतोऽप्युद्धृत्य मनुजत्वमवाप्ताः सन्तस्ते भवन्तीति पृथिवीप्रतिपादनायाह तथा 'पुढवि' त्ति यदुद्देशकसङ्ग्रहिण्यामुक्तं तत्प्रतिपादनाय चाह—

**मू. (५२)** *कति णं भते ! पुढवीओ पन्नत्ताओ ?, गोयमा ! सत्त पुढवीओ पन्नत्ताओ, तंजहा-रयणप्पभा जाव तमतमा ।। इमीसे णं भंते ! रयणप्पभाए पुढवीए कति निरयावाससयसहस्सा पन्नत्ता ?, गोयमा ! तीसं निरयावाससयसहस्सा पन्नत्ता, गाहा—*

**वृ.** तत्र 'रयणप्पभ' त्ति नरकवर्ज्जं प्रायः प्रथमकाण्डे इन्द्रनीलादिबहुविधरत्नसम्भवात् रत्नानां प्रभा-दीप्तिर्यस्यां सा रत्नप्रभा, यावत्करणादिदं दृश्यं-शर्कराप्रभा वालुकाप्रभा पङ्कप्रभा धूमप्रभा तमःप्रभेति, शब्दार्थश्च रत्नप्रभावदिति, 'तमतम' त्ति तमस्तमःप्रभेत्यर्थः, तत्र प्रकृष्टं तमस्तम- स्तमस्तस्येव प्रभा यस्याः सा तमस्तमःप्रभा ।

एतासु च नरकावासा भवन्तीति तान् आवासाधिकाराच्च शेषजीवावासान् परिमाणतो दर्शयन्नाह-'इमीसे ण' मित्यादि, 'अस्यां' विनेयप्रत्यक्षायां 'नरयावाससयहसहस्स' त्ति आवसन्ति येषु ते आवासाः नरकाश्च ते आवासाश्चेति नरकावासास्तेषां यानि शतसहास्रणि तानि तथेति । शेषपृथिवीसूत्राणि तु गाथाऽनुसारेणाध्येयानि, अत एवाह-'गाह' त्ति०, सा चेयं—

**मू. (५३)** *तीसा य पन्नवीसा पन्नरस दसेव या सयसहस्सा ।*
*तिन्नेगं पंचूणं पंचेव अनुत्तरा निरया ।।*

**वृ.** 'तीसा य पन्नवीसा' इत्यादि, सूत्राभिलापश्च-'सक्करप्पभाए णं भंते ! पुढवीए कइ निरयावाससयसहस्सा पन्नत्ता ?, गोयमा पणवीसं निरयावाससयसहस्सा पन्नत्ता' इत्यादिरिति

**मू. (५४)** *केवइया णं भंते असुरकुमारावाससयसहस्सा पन्नत्ता ?, एवं—*

**मू. (५५)** *चउसट्ठी असुराणं चउरासीइं य होइ नागाणं ।*
*बावत्तरिं सुवन्नाण वाउकुमाराण छन्नउई ।*

**मू. (५६)** *दीवदिसाउदहीणं विज्जुकुमारिंदथणियमग्गीणं ।*
*छण्हंपि जुयलयाणं छावत्तरिमो सयसहस्सा ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** छण्हंपि जुयलयाणं'ति दक्षिणोत्तरदिग्भेदेनासुरादिनिकायो द्विभेदो भवतीति युगलान्युक्तानि, तत्र षट्सु युगलेषु प्रत्येकं षट्सप्ततिर्भवनलक्षाणामिति । एषां चासुरादिनिकाय-युगलानां दक्षिणोत्तरदिशोरयं विभागः-

॥१॥ "चउतीसा चउचता अट्ठत्तीसं च सयसहस्साओ ।
पन्ना चत्तालीसा दाहिणओ हुंति भवणाइं ॥

'चत्तालीस'त्ति द्वीपकुमारादीनां षण्णां प्रत्येकं चत्वारिंशद्भवनलक्षाः ।

॥१॥ "तीसा चत्तालीसा चोत्तीसं चेव सयसहस्साइं ।
छायाला छत्तीसा उत्तरओ होंतिभवणाइं ॥

'छत्तीस'त्ति द्वीपकुमारादीनां षण्णां प्रत्येकं षट्त्रिंशद्भवनलक्षाणीति ।

अथाधिकृतोद्देशकार्थसङ्ग्रहाय गाथामाह—

**मू. (५७)** *केवइया णं भंते ! पुढविक्काइयावाससयसहस्सा पन्नत्ता ?, गोयमा ! असंखेज्ञा पुढविक्काइयावाससयसहस्सा पन्नत्ता, गोयमा ! जाव असंखिज्ञा जोतिसियविमाणावाससयसहस्सा पण्णत्ता । सोहम्मे णं भंते ! कप्पे केवइया विमावाससयसहस्सा पन्नत्ता ?, गोयमा ! बत्तीसं विमाणावाससयसहस्सा पन्नत्ता, एवं ।*

**मू. (५८)** *बत्तीसट्ठावीसा बारस अट्ठ चउरो सयसहस्सा ।*
*पन्ना चत्तालीसा छच्च सहस्सा सहस्सारे ॥*

**मू. (५९)** *आणयपाणयकप्पे चत्तारि सयाऽऽरणच्चुए तिन्नि ।*
*सत्त विमाणसयाइं चउसुवि एएसु कप्पेसुं ।*

**मू. (६०)** *एक्कारसुत्तरं हेट्ठिमेसु सत्तुत्तरं सयं च मज्झिमए ।*
*सयमेगं उवरिमए पंचेव अनुत्तरविमाणा ॥*

**मू. (६१)** *पुढवि ट्ठिति ओगाहणसरीरसंघयणमेव संठाणे ।*
*लेस्सा दिट्ठी नाणे जोगुव ओगे य दस ठाणा ॥*

**वृ.** 'पुढवी'त्यादि, तत्र पुढवीति लुप्तविभक्तिकत्वान्निर्देशस्य पृथिवीषु, उपलक्षत्वाच्चास्य पृथिव्यादिषु जीवावासेष्विति द्रष्टव्यमिति । 'ठिइ'त्ति 'सूचनात् सूत्र'मिति न्यायात् स्थितस्थानानि वाच्यानीति शेषः । एवम् 'ओगाहणे'ति अवगाहनास्थानानि, शरीरादिपदानि तु व्यक्तान्येव, एकारान्त्तं च पदं प्रथमैकवचनान्तं श्यम्, इत्येवमेतानि स्थितिस्थानादीनि दश वस्तूनि इहोद्देशके विचारयितव्यानीति गाथासमासार्थः, विस्तरार्थं तु सूत्रकारः स्वयमेव वक्ष्यतीति ।

**मू. (६२)** *इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि नेरइयाणं केवइया ठितिठाणा पन्नत्ता ?, गोयमा ! असंखेज्ञा ठितिठाणा पन्नत्ता, तंजहा-जहन्निया ठिती समयाहिया जहन्निया ठिई दुसमयाहिया जाव असंखेज्ञसमयाहिया जहन्निया ठिई तप्पाउग्गुक्कोसिया ठिती ।*

*इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरया-वासंसि जहन्नियाए ठितीए वट्टमा णानेरइया किं कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता गोयमा ! सव्वेवि ताव होज्ञा कोहोवउत्ता १, अहवा कोहोवउत्ता य माणोवउत्ते य २, अहवा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कोहोवउत्ता य माणोवउत्ता य ३, अहवा कोहोवउत्ता य मायोवउत्ते य ४ अहवा कोहोवउत्ता य मायोवउत्ता य ५, अहवा कोहोवउत्ता य लोभोवउत्ते य ६, अहवा कोहोवउत्ता य लोभोवउत्ता य ७ ॥ अहवा कोहोवउत्ता य य माणोवउत्ते य मायोवउत्ते य १, कोहोवउत्ता य माणोवउत्ते य मायोवउत्ता य २, कोहोवउत्ता य माणोवउत्ता य मायोवउत्ते य ३, कोहोवउत्ता य माणोवउत्ता य मायाउवउत्ता य ४।*

*एवं कोहमाणलोभेणवि चउ ४, एवं कोहमायालोभेणवि चउ ४ एवं १२ ॥ पच्छ माणेण मायाए लोभेण य कोहो भइयव्वो, ते कोहं अमुंचता ८, एवं सत्तावीसं भंगा नेयव्वा।*

*इमीसे णं भंते! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि समयाहियाए जहन्नट्ठितीए वट्टमाणा नेरइया किं कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता?, गोयमा! कोहोवउत्ते य माणोवउत्ते य मायोवत्ते य लोभोवउत्ते, य, कोहोवउत्ता य माणोवउत्ता य मायोवउत्ता य लोभोवउत्ता य ॥*

*अहवा कोहोवउत्ते य माणोवउत्ते य, अहवा कोहोवउत्ते य माणोवउत्ता य एवं असीति भंगा नेयव्वा।*

*एवं जाव संखिज्जसमयाहिया ठिई असंखेज्जसमयाहियाए ठिईए तप्पाउग्गुक्कोसियाए ठिईए सत्तावीसं भगा भाणियव्वा ॥*

**वृ.** तत्र रत्नप्रभापृथिव्यां स्थितिस्थानानि तावत्प्ररूपयन्नाह-'इमीसे ण'मित्यादि व्यक्तं, नवरम् 'एगमेगंसि निरयावासंसि'त्ति प्रतिनरकावासमित्यर्थः 'ठितिठाण'त्ति आयुषो विभागाः 'असंखेज्ज'त्ति सङ्ख्यातीतानि कथं?, प्रथमपृथिव्यपेक्षया जघन्या स्थितिर्दश वर्षसहस्राणि उत्कृष्टा तु सागरोपमम्, एतस्यां चैकैकसमयवृद्ध्याऽसङ्ख्येयानि स्थितिस्थानानि भवन्ति, असङ्ख्येयत्वात्सागरोपमसमयानामिति, एवं नरकावासापेक्षयाऽप्यसङ्ख्येयान्येव तानि केवलं तेषु जघन्योत्कृष्टविभागो ग्रन्थान्तरादवसेयो, यथा प्रथमप्रस्तटनरकेषु जघन्या स्थितिर्दशवर्षसहस्राणि उत्कृष्टा तु नवतिरिति, एवदेव दर्शयन्नाह—

'जहन्निया ठिती'त्यादि, जघन्या स्थितिर्दशवर्षसहादिका इत्येकं स्थितिस्थानं, तच्च प्रतिनरकं भिन्नरूपं, सैव समयाधिकेति द्वितीयम्, इदमपि विचित्रम्, एवं यावदसङ्ख्येयसमयाधिका सा, सर्वान्तिमस्थितिस्थानदर्शनायाह-'तप्पाउग्गुक्कोसिय'त्ति, उत्कृष्टा असावनेकविधेति विशेष्यते तस्यविवक्षितनरकावासस्य पायोग्या-उचिता उत्कर्षिका तत्प्रायोग्योत्कर्षिका इत्यपरं स्थितिस्थानम्, इदमपि चित्रं, विचित्रत्वादुत्कर्षस्थितेरिति।

एवं स्थितस्थानानि प्ररूप्य तेष्वेव क्रोधाद्युपयुक्तत्वं नारकाणां विभागेन दर्शयन्निदमाह-इमीसे णं इत्यादि, 'जहन्नियाए ठिईए वट्टमाणस्स'त्ति या यत्र नारकावासे जघन्या तस्यां वर्त्तमानाः, किं कोहोवउत्ते त्यादि प्रश्ने 'सव्वेवी'त्याद्युत्तरं, तत्र च प्रतिनरकं जघन्यस्थिकानां सदैव भावात् तेषु च क्रोधोपयुक्तानां बहुत्वात्सप्तविंशतिर्भङ्गका, एकादिसङ्ख्यातमसमयाधिकजघन्यस्थितिकानां तु कादाचित्कत्वात् तेषु च क्रोधाद्युपयुक्तानामेकत्वानेकत्वसम्भवादशीतिर्भङ्गकाः, एकेन्द्रियेषु तु सर्वकषायोपयुक्तानां प्रत्येकं बहूनां भावादभङ्गकम्, आह च—

॥ १ ॥ "संभवइ जहिं विरहो असीई भंगा तहिं करेज्जाहि<br>जहियं न होइ विरहो अभंगयं सत्तवीसा वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयं च तत्सत्तापेक्षो विरहो द्रष्टव्यो, न तूत्पादापेक्षया, यतो रत्नप्रभायां चतुर्विंशतिर्मुहूर्ता उत्पादविरहकाल उक्तः, ततश्च यत्र सप्तविंशतिर्भङ्गका उच्यन्ते तत्रापि विरहभावादशीतिः प्राप्नोति, सप्तविंशतेश्चाभावा एवेति ॥ तत्र 'सव्वेवि ताव होज्ज कोहोवउत्त'त्ति, प्रतिनरकं स्वकीय-स्वकीयस्थित्यपेक्षया जघन्यस्थितिकानां नारकाणां सदैव बहूनां सद्भावात् नारकभवस्य च क्रोधोदयप्रचुरत्वात्सर्व एव क्रोधोपयुक्ता भवेयुरित्येको भङ्गः १ ।

'अहवा'इत्यादिना द्वित्रिचतुःसंयोगभङ्गा दर्शिताः, तत्र द्विकसंयोगे बहुवचनान्तं क्रोधममुञ्चता षड् भङ्गाः कार्याः, तथाहि-क्रोधोपयुक्तश्च मानोपयुक्तश्च १ तथा क्रोधोपयुक्ताश्च मानोपयुक्ताश्च २, एवं मायया एकत्वबहुत्वाभ्यां द्वौ, लोभेन च द्वौ, एवमेते द्विकसंयोगे षट् ।

त्रिकसंयोगे तु द्वादश भवन्ति १२, तथाहि-क्रोधे नित्यं बहुवचनं मानमाययोरेक-वचनमित्येकः १, मानैकत्वे मायाबहुत्वे च द्वितीयः २, माने बहुवचनं मायायामेकत्वमिति तृतीयः ३, मानबहुत्वे मायाबहुत्वे च चतुर्थः ४, पुनः क्रोधमानलोभैरित्थमेव चत्वारः ४, पुनः क्रोधमाया लोभैरित्थमेव चत्वारः ४, एवमेते द्वादश १२ । चतुष्कसंयोगे त्वष्टौ, तथाहि-क्रोधे बहुवचनेन मानमायालोभेषु चैकवचनेनैकः, एवमेव लोभे बहुवचनेन द्वितीयः, एवमेतावेकवचनान्तमायया जातौ, एवमेव बहुवचनान्तमाययाऽन्यौ द्वौ, एतमेते चत्वार एकवचनान्तमानेन जाताः, एवमेव बहुवचनान्तमानेन चत्वार इत्येवमष्टौ, एवमेते जघन्यस्थितिषु नारकेषु सप्तविंशतिर्भवन्ति, जघन्यस्थितौ हि बहवो नारका भवन्त्यतः क्रोधे बहुवचनमेव ।

'समयाहियाए जहन्नट्ठिईए वट्टमाणा नेरइया किं कोहोवउत्ता' इत्यादि प्रश्नः, इहोत्तरम्-'कोहोवउत्ते य' इत्यादयोऽशीतिर्भङ्गाः, इह समयाधिकायां यावत्सङ्ख्येयसमयाधिकायां जघन्यस्थितौ नारका न भवन्त्यपि, भवति चेदेको वाऽनेको वेति ततः क्रोधादिष्वेकत्वेन चत्वारो विकल्पाः, बहुत्वेन चान्ये चत्वार एव ४ । द्विकसंयोगे चतुर्विंशति, तथाहि-क्रोधमानयोरे-कत्वबहुत्वाभ्यां चत्वारः ४, एवं क्रोधमाययोः ४, एवं क्रोधलोभयोः ४, एवं मानमाययोः ४, एवं मानलोभयोः ४, एवं माया लोभयोरिति ४ द्विकसंयोगे चतुर्विंशति ।

त्रिकसंयोगे द्वात्रिंशत्, तथाहि-क्रोधमानमायास्वेकत्वेनैकः, एष्वेव मायाबहुत्वेन द्वितीयः, एतमेतौ मानैकत्वेन, द्वावेवान्यौ तद्बहुत्वेन, एवमेते चत्वारः क्रोधैकत्वेन चत्वार एवान्ये क्रोधबहुत्वे-नेत्यवमष्टौ क्रोधमानमायात्रिके जाताः, तथैवान्येऽष्टौ क्रोधमानलोभेषु तथैवान्येऽष्टौ क्रोधमायालोभेषु, तथैवान्येऽष्टौ मानमायालोभेष्विति द्वात्रिंशत् ।

चतुष्कसंयोगे षोडश, तथाहि-क्रोधादिष्वेकत्वेनैको लोभस्य बहुत्वेन द्वितीयः, एवमेतौ मायैकत्वेन, तथाऽन्यौ मायाबहुत्वेन, एवमेते चत्वारो मानैकत्वेन, तथाऽन्ये चत्वार एव मानबहुत्वेन, एवमेतेऽष्टौ क्रोधैकत्वेन, एवमन्येऽष्टौ क्रोधबहुत्वेनेति षोडश, एवमेते सर्व एवाशीतिरिति ।

एते च जघन्यस्थितौ एकादिसङ्ख्यातान्तसमयाधिकायां भवन्ति, असङ्ख्यातसमयाधि-कायास्तु जघन्यस्थितेरारभ्योत्कृष्टस्थितं यावत्सप्तविंशतिर्भङ्गास्त एव, तत्र नारकाणां बहुत्वादिति

अथावगाहनाद्वारं तत्र-

***मू. (६३)*** *इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसस्सेसु एगमेगंसि निरयावासंसि नेरइयाणं केवइया ओगाहणाठाणा पन्नत्ता ?, गोयमा ! असंखेज्ञा ओगाहणाठाणा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पन्नत्ता, तंजहा-जहन्निया ओगाहणा, पदेसाहिया जहन्निया ओगाहणा, दुप्पेसाहिया जहन्निया ओगाहणा, जाव असंखिज्ञपएसाहिया जहन्निया ओगाहणा, तप्पाउग्गुक्कोसिया ओगाहणा।*

*इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि जहन्नियाए ओगाहणाए वट्टमाणा नेरइया किं कोहोवउत्ता ?, असीइभंगा भाणियव्वा जाव संखिज्ञपएसाहिया जहन्निया ओगाहणा, असंखेज्ञपएसाहियाए जहन्नियाए ओगाहणाए वट्टमाणाणं तप्पाउग्गुक्कोसियाए ओगाहणाए वट्टमाणाणं नेरइयाणं दोसुवि सत्तावीसं भंगा ॥*

*इमिसे णं भंते ! रयण० जाव एगमेगंसि निरयावासंसि नेरइयाणं कइ सरीरया पन्नत्ता ?, गोयमा ! तिन्नि सरीरया पन्नत्ता, तंजहा-वेउव्विए तेयए कम्मए।*

*इमीसे णं भंते ! जाव वेउव्वियसरीरे वट्टमाणा नेरइया किं कोहोवउत्ता ? सत्तावीसं भंगा भाणियव्वा, एएणं गमएणं तिन्नि सरीरा भाणियव्वा।*

*इमीसे णं भंते ! रयणप्पभाए पुढविए जाव नेरइयाणं सरीरया किंसंघयणी पन्नत्ता ?, गोयमा ! छण्हं संघयणाणं असंघयणी, नेवट्ठी नेव छिरा नेव ण्हारूणि जे पोग्गला अनिट्ठा अकंता अप्पिया असुहा अमणुन्ना अमणाणा, एतेसिं सरीरसंघायत्ताए परिणमंति।*

*इमीसे णं भंते ! जाव छण्हं संघयणाणं असंघयणे वट्टमाणाणं नेरइया किं कोहोवउत्ता ? सत्तावीसं भंगा।*

*इमीसे णं भंते ! रयणप्पभा जाव सरीरिया किंसंठिया पन्नत्ता ?, गोयमा ! दुविहा पन्नत्ता, तंजहा-भवधारणिज्ञा य उत्तरविउव्विया य, तत्थ णं जे ते भवधारणिज्ञा ते हुंडसंठिया पन्नत्ता, तत्थ णं जे ते उत्तरवउव्विया तेवि हुंडसंठिया पन्नत्ता। इमीसे णं जाव हुंडसंठाणे वट्टमाणा नेरइया किं कोहोवउत्ता ? सत्तावीसं भंगा।*

*इमीसे णं भंते ! रयणप्पभाए पुढवीए नेरइयाणं कति लेस्साओ पन्नत्ता ?, गोयमा ! एगा काउलेस्सा पण्णत्ता। इमीसे णं भंते ! रयणप्पभाए जाव काउलेस्साए वट्टमाणा सत्तीवीसं भंगा ॥*

**वृ.** 'ओगाहणाठाण'त्ति अवगाहन्ते-आसते यस्यां साऽवगाहना-तनुस्तदाधारभूतं वा क्षेत्रं तस्याः स्थानानि-प्रदेशवृद्धया विभागाः अवगाहनास्थानानि, तत्र 'जहन्निय'त्ति जघन्या-ऽङ्गुलासङ्घेयभागमात्रा सर्वनरकेषु 'तप्पाउग्गुक्कोसियत्ति'तस्य विवक्षितनरकस्य प्रायोग्या या उत्कर्षिका सा तत्प्रायोग्योत्कर्षिका यथा त्रयोदशप्रस्तटे धनुःसप्तकं रत्नित्रयमङ्गुलषट्कं चेति 'जहन्नियाए'इत्यादि जघन्यायां तस्यामेव चैकादिसङ्घयातान्तप्रदेशाधिकायाधकायामवगाहनायां वर्त्तमानानां नारकाणामल्पत्वात् क्रोधाद्युपयुक्त एकोऽपि लभ्येऽतोऽशीतिर्भङ्गाः।

'असंखेज्ञपएसे'त्यादि, असङ्खयातप्रदेशाधिकायां तत्प्रायोग्योत्कृष्टायां च नारकाणां बहुत्वात् तेषु च बहूनां क्रोधोपयुक्तत्वेन क्रोधे बहुवचनस्य भावात् मानादिषु त्वेकत्वबहुत्वसम्भवात्सप्त-विंशतिर्भङ्गा भवन्तीति। ननु ये जघन्यस्थितय जघन्यावगाहनाश्च भवन्ति तेषां जघन्यस्थितिकत्वेन सप्तविंशतिर्भङ्गकाः प्राप्नुवन्ति जघन्यावगाहनत्वेन चाशीतिरिति विरोधः ?, अत्रोच्यते, जघन्य-स्थितिकानामपि जघन्यावगाहनाकालेऽशीतिरेव, उत्पत्तिकालभावित्वेन जघन्यावगाहनानामल्प-त्वादिति, या च जघन्यस्थितिकानां सप्तविंशति सा जघन्यावगाहनात्वमतिक्रान्तानामिति भावनीयम्

शरीरद्वारे 'सत्तावीसं भंग'त्ति, अनेन यद्यपि वैक्रियशरीरे सप्तविंशतिर्भङ्गका उक्तास्तथाऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

या स्थित्याश्रया अवगाहनाश्रया च भङ्गकप्ररूपणा सा तथैव दृश्या, निरवकाशत्वात्तस्याः, शरीराश्रयायाश्च सावकाशत्वात्, एवमन्यत्रापि विमर्शनीयमिति। 'एएणं गमेणं तिन्नि सरीरया भाणियव्वत्ति, वैक्रियशरीरसूत्रपाठेन त्रीणि शरीरकाणि वैक्रियतैसजकार्मणानि भणितव्यानि, त्रिष्वपि भङ्गकाः सप्तविंशतिर्वाच्येत्यर्थः, ननु विग्रहगतौ केवले ये तैजसकार्मणशरीरे स्यातां तयोरल्पत्वेना- शीतिरपि भङ्गकानां संभवतीति कथमुच्यते ? तयोः सप्तविंशतिरेवेति, अत्रोच्यते, सत्यमेतत् केवलं वैक्रियशरीरानुगतयोस्ययोरिहाश्रयणं केवलयोश्चानाश्रयणमिति सप्तविंशतिरेवेति, यच्च द्वयोरेवादिदेश्यत्वे त्रीणीत्युक्तं तच्च त्रयाणामपि गमस्यात्यन्तसाम्योपदर्शनार्थमिति ॥

संहननद्वारे 'छण्हं संघयणाणं असंघयणि'त्ति, षण्णां संहननानां-वज्रर्षभनाराचादीनां मध्यादेकतरेणापि संहननेनासंहननानीति, कस्मादेवमित्यत् आह- 'नेवट्ठी'त्यादि, नैवास्थ्यादीनि तेषां सन्ति अस्थिसञ्चयरूपं च संहननमुच्यत इति, 'अनिट्ठ'त्ति इष्यन्ते स्मेतीष्टास्तन्निषेधादनिष्टाः, अनिष्टमपि किञ्चित्कमनीयं भवतीत्यत उच्यते-अकान्ताः, अकान्तमपि किञ्चित्कारणवशात् प्रीतये भवतीत्याह- 'अप्पिया' अप्रीतिहेतवः, अप्रियत्वं तेषां कुतः ? , यतः 'असुभ'त्ति अशुभस्व-भावाः, ते च सामान्या अपि भवन्तीत्यतो विशेष्यते-'अमणुण्ण'त्ति न मनसा-अन्तःसंवेदनेन शुभतया ज्ञायन्त इत्यमनोज्ञाः, अमनोज्ञता चैकदाऽपि स्यादत आह-'अमणाम'त्ति न मनसा अभ्यन्ते-गम्यन्ते पुनः पुनः स्मरणतो ये ते अमनोऽमाः, एकार्थिका वैते शब्दाः अनिष्टताप्रक-र्षप्रतिपादनार्था इति। 'एतेसिं सरीरसंघायत्ताए'त्ति सङ्घाततया, शरीरपूपसञ्चयतयेत्यर्थः।

संस्थानद्वारे 'किंसंठिय'त्ति किं संस्थितं-संस्थानं येषां तानि किंसंस्थितानि, 'भवधारणिज्ज'त्ति भवधारणं-निजजन्मातिवाहनं प्रयोजनं येषां तानि भवधारणीयानि, आजन्मधारणीयानीत्यर्थः, 'उत्तरवेउव्विय'त्ति पूर्ववैक्रियापेक्षयोत्तराणि-उत्तरकालभावीनि वैक्रियाणि उत्तरवैक्रियाणि, 'हुंडसंठिय'त्ति सर्वत्रासंस्थितानि ॥

**मू. (६४)** *इमीसे णं जाव किं सम्मद्दिट्ठी मिच्छदिट्ठी सम्मामिच्छदिट्ठी ?, तिन्निवि। इमीसे णं जाव सम्मदंसणे वट्टमाणा नेरइया सत्तावीसं भंगा, एवं मिच्छदंसणेवि, सम्मामिच्छदंसणे असीति भंगा।*

*इमीसे णं भंते ! जाव किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि, तिन्नि नाणाइं नियमा, तिन्नि अन्नाणाइं भयणाए। इमीसे णं भंते ! जाव आभिनिबोहियनाणे वट्टमाणा सत्तावीसं भंगा, एवं तिन्नि नाणाइं तिन्नि अन्नाणाइं भाणियव्वाइं।*

*इमीसे णं जाव किं मणजोगी वइजोगी कायजोगी, ? तिन्निवि। इमीसे णं जाव मणजोए वट्टमाणा कोहोवउत्ता ?, सत्तावीसं भंगा। एवं वइजोए एवं कायजोए।*

*इमीसे णं जाव नेरइया किं सागारोवउत्ता अनागारोवउत्ता ?, गोयमा ! सागरोवउत्तावि अनागारोवउत्तावि। इमीसे मं जाव सागारोवओगे वट्टमाणा किं कोहोवउत्ता ?, सत्तावीसं भंगा एवं अनागारोवउत्तावि। इमीसे णं जावसागारोवओगे वट्टमाणा किं कोहोवउत्ता ?, सत्तावीसं भंगा। एवं अनागारोवउत्तावि। इमीसे णं जावसागारोवओगे वट्टमाणा किं कोहोवउत्ता ?, नाणत्तं लेसासु गाहा--*

**वृ.** दृष्टिद्वारे 'सम्मामिच्छादंसणे असीइभंग'त्ति मिश्रदृष्टीनामल्पत्वात्तद्भावस्यापि च कालतोऽल्पत्वादेकोऽपि लभ्ते इत्यशीतिर्भङ्गाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानद्वारे 'तिन्नि नाणाइं नियम' त्ति ये ससम्यक्त्वा नरकेषूत्पद्यन्ते तेषां प्रथमसमयादारभ्य भवप्रत्ययस्यावधिज्ञानस्य भावात् त्रिज्ञानिन एव ते, ये तु मिथ्यादृष्टयस्ते सञ्ज्ञिभ्योऽसञ्ज्ञिभ्य-श्चोत्पद्यन्ते, तत्र ये सञ्ज्ञिभ्यस्ते भवप्रत्ययादेव विभङ्गस्य भावात् त्र्यज्ञानिनः, ये त्वसञ्ज्ञिभ्य-स्तेषामाद्यादन्तर्मुहूर्तात्परतो विभङ्गस्योत्पत्तिरिति तेषां पूर्वमज्ञानद्वयं

पश्चाद्विभङ्गोत्पत्तावज्ञानत्रयमित्यत उच्यते-'तिन्नि अन्नाणाइं भयणाए' त्ति 'भजनया' विकल्पनया कदाचिद्द्वे कदाचित्त्रीणात्यर्थः, अत्रार्थे गाथे स्याताम्–

॥ १ ॥　　"सन्नी नेरइएसुं उरलपरच्चायणंतरे समए।
विब्भंगं ओहिं वा अविग्गहे विग्गहे लहइ ॥

॥ २ ॥　　अस्सन्नी नरएसुं पज्जत्तो जेण लहइ विब्भंगं।
नाणा तिन्नेव तओ अन्नाणा दोन्नि तिन्नेव ॥

एवं तिन्नि णाणे त्यादि, आभिनिबोधिकज्ञानवत् सप्तविंशतिभङ्गकोपेतानि आद्यानि त्रीणि ज्ञानानि अज्ञनानि चेति, इह च त्रीणि ज्ञानानीति यदुक्तं तदाभिनिबोधिकस्य पुनर्गणनेनान्यथा द्वे एव ते वाच्ये स्यातामिति। 'तिन्नि अन्नाणाइं' इत्यत्र यदि मत्यज्ञानश्रुताज्ञाने विभङ्गात्पूर्वकाल-भाविनी ववक्ष्येते तदाऽशीतिर्भङ्गा लभ्यन्ते, अल्पत्वात्तेषां, किन्तु जघन्यावगाहनास्ते ततो जघन्यावगाहनाश्रयेणैवाशीतिर्भङ्गकासेतषामवसेया इति।

योगद्वारे 'एवं कायजोए' त्ति, इह यद्यपि केवलकार्मणकाययोगेऽशीतिर्भङ्गाः संभवन्ति तथाऽपि तस्याविवक्षणात् सामान्याकाययोगाश्रयणाच्च सप्तविंशतिरुक्तेति।

उपयोगद्वारे 'सागरोवउत्त' त्ति, आकारो- विशेषांशग्रहणशक्तिस्तेन सहेति साकारः, तद्विकलोऽनाकारः सामान्यग्राहीत्यर्थः ।

'नाणत्तं लेसासु' त्ति, रत्नप्रभापृथिवीप्रकरणवच्छेषपृथिवीप्रकरणान्यध्येयानि, केवलं लेश्यासु विशेषः, तासां भिन्नत्वाद्, अत एव तद्दर्शनाय गाथा–

**मू. (६५)**　*काऊ य दोसु तइयाए मीसिया नीलिया चउत्थीए।*
*पंचमियाए मीसा कण्हा तत्तो परमकण्हा।*

**वृ.** 'काऊ' इत्यादि, तत्र 'तइयाए मीसिय' त्ति वालुकाप्रभाप्रकरणे उपरितननरकेषु कापोती अधस्तनेषु तु नीली भवतीति ते यथासम्भवं प्रश्नसूत्रे उत्तरसूत्रे चाध्येतव्य इत्यर्थः, यच्च सूत्राभिलापेषु नरकावाससङ्ख्यानानात्वं तत् 'तीसा य पन्नवीसा' इत्यादिना पूर्वप्रदर्शितेन समयवेयमिति, एवं सूत्राभिलापः कार्यः–

'सक्करप्पभाए णं भंते ! पुढवीए पणवीसाए निरयावाससयसहस्सेसु एकमेक्कंसि निरयावासंसि कइ लेस्साओ पन्नत्ताओ ?, गोयमा ! एगा काउलेस्सा पन्नत्ता। सक्करप्पभाए णं भंते ! जाव काउलेसाए वट्टमाणा नेरइया किं कोहोवउत्ता ?' इत्यादि 'जाव सत्तावीसं भंगा'।

एवं सर्वपृथिवीषु गाथाऽनुसारेण वाच्याः ॥

**मू. (६६)** *चउसट्ठीए णं भंते ! असुरकुमारावाससयसहस्सेसु एगमेगंसि असुर-कुमारावासंसि असुरकुमाराणं केवइया ठिइठाणा पन्नतता ?, गोयमा ! असंखेज्ञा ठितिठाणा पन्नत्ता, जहन्निया ठिई जहा नेरइया तहा।*

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

*नवरं पडिलोमा भंगा भाणियव्वा-सव्वेवि ताव होज्ज लोभोवउत्ता, अहवा लोभोवउत्ता य मायोवउत्ते य, अहवा लोभोवउत्ता य मायोवउत्ता य, एएणं गमेणं नेयव्वं जाव थणियकुमाराणं, नवरं नाणत्तं जाणियव्वं।*

**वृ.** असुरकुमारप्रकरणे 'पडिलोमा भंग'त्ति, नारकप्रकरणे हि क्रोधमानादिना क्रमेण भङ्गनिर्देशः कृतः, असुरकुमारादिप्रकरणेषु लोभमायादिनाऽसौ कार्य इत्यर्थः, अत एवाह-'सव्वेवि ताव होज्ज लोहावउत्त'त्ति, देवा हि प्रायो लोभवन्तो भवन्ति तेन सर्वेऽप्यसुरकुमारा लोभोपयुक्ताः स्युः, द्विकसंयोगे तु लोभोपयुक्तत्वे बहुवचनमेव, मायोपयोगे त्वेकत्वबहुत्वाभ्यां द्वौ भङ्गकौ, एवं सप्तविंशतिर्भङ्गकाः कार्याः। 'नवरं नाणत्तं जाणियव्वं'ति नारकाणामसुरकुमारादीनां च परस्परं नानात्वं ज्ञात्वा प्रश्नसूत्राणि उत्तरसूत्राणि चाध्येयानीति हृदयं, तच्च नारकाणामसुरकुमारादीनां च संहननसंस्थान- लेश्यासूत्रेषु भवति, तच्चैवम्-

'चउसट्ठीए णं भंते ! असुरकुमारावाससयसहस्सेसु एगमेगंसि असुरकुमारावासंसि असुरकुमाराणं सरीरगा किंसंघयणी ?, गोयमा ! असंघयणी, जे पोग्गला इट्ठा कंता ते तेसिं संघाय त्राए परिणमंति, एवं संठाणेवि, नवरं भवधारणिज्जा समचउरंससंठिया उत्तरवेउव्विया अन्नयरसंठिया एवं लेसासुवि। नवरं कइ लेस्साओ पन्नत्ताओ ?, गोयमा ! चत्तारि, तंजहा-किण्हा नीला काऊ तेऊलेसा, चउसट्ठीए णं जा कण्हलेसाए वट्टमाणा किं कोहोवउत्ता ?, गोयमा सव्वेवि ताव होज्ज लोहोवउत्ता' इत्यादि, एवं 'नीलाकाउतेऊवि' नागकुमारादिप्रकरणेषु तु 'चुलसीए नागकुमारावाससयसहस्सेसु' इत्येवं ''चउसट्ठी असुराणं नागकुमाराण होइ चुलसीइ''

इत्यादेर्वचनात् प्रश्नसूत्रेषु भवनसङ्ख्यानानात्वमवगम्य सूत्राभिलापः कार्य इति ॥

**मू. (६७)** *असंखेज्जेसु णं भंते ! पुढविकाइयावाससयसहस्सेसु एगमेगंसि पुढविकाइयावासंसि पुढविक्काइयाणं केवतिया ठितिठाणा पन्नत्ता ?, गोयमा ! असंखेज्जा ठितिठाणा पन्नत्ता, तंजहा-जहन्निया ठिई जाव तप्पाउग्गुक्कोसिया ठिई।*

*असंखेज्जेसु णं भंते ! पुढविकाइयावाससयसहस्सेसु एगमेगंसि पुढविकाइयावासंसि पुढविक्काइयाणं केवतिया ठितिठाणा पन्नत्ता ?, गोयमा ! असंखेज्जा ठितिठाणा पन्नत्ता, तंजहा-जहन्निया ठिई जाव तप्पाउग्गुक्कोसिया ठिई। असंखेज्जेसु णं भंते ! पुढविक्काइयावाससयसहस्सेसु एगमेगंसि पुढविक्काइयावासंसि जहन्नियाए ठितीए वट्टमाणा पुढविक्काइया किं कोहोवउत्ता माणोवउत्ता मायोवउत्ता लोभोवउत्ता गोयमा ! कोहोवउत्तावि माणोवउत्तावि मायोवउत्तावि लोभोवउत्तावि, एवं पुढविक्काइयाणं सव्वेसुवि ठाणेसु अभं गयं। नवरं तेउलेस्साए असीति भंगा, एवं आउक्काइयावि, तेउक्काइयवाउक्काइयाणं सव्वेसुवि ठाणेसु अभंगयं। वणस्सइकाइया जहा पुढविक्काइया।*

**वृ.** 'एवं पुढविक्काइयाणं सव्वेसु ठाणेसु अभंगयं'ति, पृथिवीकायिका एकैकस्मिन् कषाये उपयुक्ता बहवो लभ्यन्त इत्यभङ्गकं दशस्वपि स्थानेषु, नवरं 'तेउलेसाएअसीई भंग'त्ति, पृथिवीकायिकेषु लेश्याद्वारे तेजोलेश्या वाच्या, सा च यदा देवलोकाच्युतो देव एकोऽनेको वा पृथिवीकायिकेषूत्पद्य तदा भवति, ततश्च तदैकत्वादिभवनादशीतिर्भङ्गका भवन्तितीति।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह पृथिवीकायकप्रकरणे स्थितिस्थानद्वारं साक्षाल्लिखितमेवास्ति, शेषाणि तु नारकवद्वाच्यानि, तत्र च 'नवरं नाणत्तं जाणियव्वं' इत्येतस्यानुवृत्तेर्नानात्वमिह प्रश्नत उत्तरतश्चावसेयं, तच्च शरीरादिषु सप्तसु द्वारेष्विदम्-'असंखिज्जेसु णं भंते ! पुढविकाइयावाससयसहस्सेसु जाव पुढविकाइयाणं कइ सरीरा पन्नत्ता ?, गोयमा ! तिन्नि सरीरा, तंजहा ओरालिए तेयए कम्मए' एतेषु च 'कोहोवउत्तावि माणोवउत्तावी' त्यादि वाच्यं, तथा 'असंखेज्जेसु णं जाव पुढविकाइयाणं सरीरगा किंसंघयणी ?' इत्यादि तथैव, नवरं 'पोग्गला मणुन्ना अमणुन्ना सरीरसंघायत्ताए परिणमंति' एवं संस्थानद्वारेऽपि, किन्तु उत्तरे 'हुंडसंठिया' एतावदेव वाच्यं न तु 'दुविहा सरीरगा पन्नत्ता, तंजहा-भवधारणिज्जा य उत्तरवेउव्विया य' इत्यादि, पृथिवीकायिकानां तदभावादिति।

लेश्याद्वारे पुनरेवं वच्यं-'पुढविकाइयाणं भंते ! कइ लेसाओ पन्नत्ताओ ?, गोयमा ! चत्तारि, तंजहा-कण्हलेसा जाव तेउलेसा' एतासु च तिसृष्वभङ्गकमेव, तेजोलेश्यायां त्वशीतिर्भङ्गकाः, एतच्च प्रागेवोक्तमिति ॥ दृष्टिद्वारे इदं वाच्यम्-'असंखेज्जेसु जाव पुढविकाइया किं सम्मादिट्ठी मिच्छदिट्ठी' सम्मामिच्छदिट्ठी ?, गोयमा ! मिच्छदिट्ठी', शेषं तथैव। ज्ञानद्वारे तथैव, नवरं 'पुढविकाइया णं भंते ! किं नाणी अन्नाणी ?, गोयमा ! नो नाणी अन्नाणी नियमा दो अन्नाणी' योगद्वारेऽपि तथैव, नवरं 'पुढविकाइया णं भंते ! किं मणजोगी वइजोगी कायजोगी गोयमा ! नो मणजोगी नो वयजोगी कायजोगी'।

'एवं आउकाइयावि'त्ति पृथिवीकायिकवदप्कायिका अपि वाच्याः, ते हि दशस्वपि स्थानकेष्वभङ्गकाः, तेजोलेश्यायां चाशीतिभङ्गकवन्तो, यतस्तेष्वपि देव उत्पद्यत इति। 'तेउकाइए' त्यादी 'सव्वेसु ठाणेसु'त्ति स्थितिस्थानादिषु दशस्वप्यभङ्गकं, क्रोधाद्युपयुक्तानामेकदैव तेषु बहूनां भावात्, इह देवा नोत्पद्यन्त इयति तेजोलेश्या तेषु नास्ति, ततस्तत्सम्भवा नाशीतिरपीत्यभङ्गकमेवेति, एतषु च सूत्राणि पृथिवीकायिकसमानि केवलं वायुकायसूत्रेषु शरीरद्वारे एवमध्येयम्-

'असंखेज्जेसु णं भंते ! जाव वाउकाइयाणं कइ सरीरा पन्नत्ता ?, गोयमा ! चत्तारि, तंजहा-ओरालिए वेउव्विए तेयए कम्मए'त्ति।

'वणस्सइकाइए' त्यादि, वनस्पतयः पृथिवीकायिकसमाना वक्तव्याः, दशस्वपि स्थानकेषु भङ्गकाभावात्, तेजोलेश्यां च तथैवाशीतिभङ्गसद्भावादिति।

ननु पृथिव्यम्बुवनस्पतीनां दृष्टिद्वारे सास्वादनभावेन सम्यक्त्वं कर्मग्रन्थेष्वभ्युपगम्यते, तत एव च ज्ञानद्वारे मतिज्ञानं श्रुतज्ञानं च, अल्पाश्चैते इत्येवमशीतिर्भङ्गाः सम्यग्दर्शनाभिनिबोधिकश्रुतज्ञानेषु भवन्तु, नैवं, पृथिव्यादिषु सास्वादनभावस्यात्यन्तविरलत्वेनाविवक्षितत्वात्,

तत एवोच्यते-"उभयाभावो पुढवाइएसु विगलेसु होज्ज उववण्णो।" त्ति, 'उभयं' प्रतिपद्यमानपूर्वप्रतिपन्नरूपमिति ॥

***मू. (६८)*** *बेइंदियतेइंदियचउरिंदियाणं जेहिं ठाणेहिं नेरतियाणं असीइभंगा तेहिं ठाणेहिं असीइं चेव, नवरं अब्भहिया सम्मत्ते आभिनिबोहियनाणे सुयनाणे य, एएहिं असीइभंगा, जेहिं ठाणेहिं नेरतियणां सत्तावीसं भंगा तेसु ठाणेसु सव्वेसु अभंगयं।*

*पंचिंदियतिरिक्खजोणिया जहा नेरइया तहा भाणियव्वा, नवरं जेहिं सत्तावीसं भंगा तेहिं अभंगयं कायव्वं जत्थ असीति तत्थ असीतिं चेव।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मणुस्साणवि जेहिं ठाणेहिं नेरइयाणं असीतिभंगा तेहिं ठाणेहिं मणुस्साणवि असीतिभंगा भाणियव्वा, जेसु ठाणेसु सत्तावीसा तेसु अभंगयं, नवरं मणुस्साणं अब्भहियं जहन्निया ठिई आहारए य असीति भंगा।*

*वाणमंतरजोइसवेमाणिया जहा भवणवासी, नवरं नाणत्तं जाणियव्वं जं जस्स, जाव अनुत्तरा, सेवं भंते! सेवं भंते! त्ति।*

**वृ.** 'बेइंदिए' त्यादावेवमक्षरघटना-'जेहि ठाणेहिं नेरइयाणं असीइभंगा तेहिं ठाणेहिं बेइंदियतेइंदियचउरिंदियाणं असीइं चेव' त्ति, तत्रैकादिसङ्ख्यातान्तसमयाधिकायां जघन्यस्थितौ १ तथा जघन्यायामगाहनायां च २ तत्रैव च सङ्खेययान्तप्रदेशवृद्धायां ३ मिश्रदृष्टौ च नारकाणामशीतिर्भङ्गका उक्ताः, विकलेन्द्रियाणामप्येतेषु स्थानेषु मिश्रदृष्टिवर्जेष्वशीतिरेव, अल्पत्वात्तेषाम् एकैकस्यापि क्रोधाद्युपयुक्तस्य सम्भवात्, मिश्रदृष्टिस्तु विकलेन्द्रियेष्वेकेन्द्रियेषु च न संभवतीति न विकलेन्द्रियाणां तत्राशीतिभङ्गकसम्भव इति, वृद्धैस्त्विह सूत्रे कुतोऽपि वाचनाविशेषाद् यत्राशीतिस्तत्राप्यभङ्गकमिति व्याख्यातमिति।

इहैव विशेषाभिधानायाह-नवरमित्यादि, अयमर्थः-दृष्टिद्वारे ज्ञानद्वारे च नारकाणां सप्तविंशतिरुक्ता, विकलेन्द्रियाणां तु 'अब्भहिय' त्ति अभ्यधिकाऽन्याऽशीतिर्भङ्गकानां भवति, क्व ?, इत्याह-सम्यक्त्वे, अल्पीयसां हि विकलेन्द्रियाणां सास्वादनभावेन सम्यक्त्वं भवति, अल्पत्वाच्चैतेषामेकत्वस्यापि सम्भवेनाशीतिर्भङ्गकानां भवति, एवमाभिनिबोधिके श्रुते चेति।

तथा 'जेही' त्यादि, येषु स्थानकेषु नैरयिकाणां सप्तविंशतिर्भङ्गकास्तेषु स्थानेषु द्वि त्रि चतुरिन्द्रियाणां भङ्गकाभावः, तानि च प्रागुक्ताशीतिर्भङ्गकस्थानविशिष्टानि मन्तव्यानि, भङ्गकाभावश्च क्रोधाद्युपयुक्तानामेकदैव बहूनां भावादिति।

विकलेन्द्रियसूत्राणि च पृथिवीकायिकसूत्राणीवाध्येयानि, नवरमिह लेश्याद्वारे-तेजोलेश्या नाध्येतव्या, दृष्टिद्वारे च 'बेइंदिया णं भंते ! किं सम्मद्दिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी ?, गोयमा ! सम्मद्दिट्ठीवि मिच्छद्दिट्ठीवि नो सम्मामिच्छादिट्ठी, सम्मद्दंसणे वट्टमाणा बेइंदिया किं कोहोवउत्ता ?' इत्यादि प्रश्नोत्तरमशीतिर्भङ्गकाः। तथा ज्ञानद्वारे-'बेइंदिया णं भंते ! किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि, जइ णनमी दुन्नाणी मइनाणी सुयनाणी य' शेषं तथैवाशीतिश्च भङ्गा इति। योगद्वारे 'बेइंदिया णं भंते ! किं मणजोगी वइजोगी कायजोगी ?, गोयमा ! नो मणजोगी वइजोगी कायजोगी य' शेषं तथैव।

एवं त्रीन्द्रियचतुरिन्द्रियसूत्राण्यपि।

'पंचेंदिये' त्यादि 'जहिं सत्तावीसं भंग' त्ति, यत्र नारकाणां सप्तविंशतिर्भङ्गकास्तत्र पञ्चेन्द्रियतिरश्चामभङ्गकं, तच्च जघन्यस्थित्यादिकं पूर्वं दर्शितमेव, भङ्गकाभावश्च क्रोधाद्युपयुक्तानां बहूनामेकदैव तेषु भावादिति, सूत्राणि चेह नारकसूत्रवदध्येयानि, नवरं शरीरद्वारेऽयं विशेषः-'असंखेज्जेसु णं भंते ! पंचिंदयतिरिक्खजोणियावासेसु पंचिंदियतिरिक्खजोणियाणं केवइया सरीरा पन्नत्ता ?, गोयमा ? चत्तारि, तंजहा-ओरालिए वेउव्विए तेयए कम्मए' सर्वत्र चाभङ्गकमिति तथा संहननद्वारे 'पंचिंदियतिरिक्खजोणियाणं केवइया संघयणा पन्नत्ता ?, गोयमा ! छ संघयणा पं०, तंजहा-वइरोसहनारायं जाव छेवट्ठं' ति। एवं संस्थानद्वारेऽपि छ संठाणा पन्नत्ता, तंजहा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समचउरंसे ६। एवं लेश्याद्वारे-'कइ लेसाओ पन्नत्ताओ ?, गोयमा ! छ लेस्सा प०, तंजहा-किण्हलेस्सा' ६।

'मणुस्साणवि'त्ति, यथा नैरयिका दशसु द्वारेष्वभिहितास्तथा मनुष्या अपि भणितव्या इति प्रक्रमः, तदेवाह-'जेही' त्यादि, तत्र नारकाणां जघन्यस्थितावेकादिसङ्ख्यातान्तसमयाधिकायां १ तता जघन्यावगाहनायां २ तस्यामेव सङ्ख्यातान्तप्रदेशाधिकायां ३ मिश्रे च ४ अशीतिर्भङ्गका उक्ताः, मनुष्याणामप्येतेष्वशीतिरेव, तत्कारणं च तदल्पत्वमेवेति ।

नारकाणां मनुष्याणां च सर्वथा साम्यपरिहारायाह-'जेसु सत्तावीसा' इत्यादि, सप्तविंशतिर्भङ्गकस्थानानि च नारकाणां जघन्यस्थित्यसङ्ख्यातसमयाधिकजघन्यस्थितिप्रभृतीनि, तेषु च जघन्यस्थितौ विशेषस्य वक्ष्यमाणत्वेन तद्वर्जेषु मनुष्याणामभङ्गकं, यतो नारकाणां बाहुल्येन क्रोधोदय एव भवति तेन तेषां सप्तविंशतिर्भङ्गका उक्तस्थानेषु युज्यन्ते, मनुष्याणां तु प्रत्येकं क्रोधाद्युपयोगवतां बहूनां भावान्न कषायोदये विशेषोऽस्ति, तेन तेषां तेषु स्थानेषु भङ्गकाभाव इति । इहैव विशेषाभिधानायाह-नवरमित्यादि, येषु स्थानेषु नारकाणामशीतिस्तेषु मनुष्याणामप्यशीति तथा 'जेसु सत्तावीसा तेसु अभंगय' मित्युक्तं, केवलं मनुष्याणामिदमभ्यधिकं यदुत जघन्यस्थितौ तेषामशीतिर्न तु नारकाणां तत्र सप्तविंशतिरुक्तेत्यभङ्गकम् । तथाऽऽहारकशरीरे अशीतिराहारकशरीरवतां मनुष्याणामल्पत्वान्नारकाणां तन्नास्त्येवेत्येतदप्यभ्यधिकं मनुष्याणामिति, इह च नारकसूत्राणां मनुष्यसूत्राणां च प्रायः शरीरादिषु चतुर्षु ज्ञानद्वार एव च विशेषः, तथाहि-'असंखेज्जेसु णं भंते' ! मणुस्सावासेसु मणुस्साणं कइ सरीरा पन्नत्ता ?, गोयमा ! पंच, तंजहा-ओरालिए वेउव्विए आहारए तेयए कम्मए, असंखेज्जेसु णं जाव ओरालियसरीरे वट्टमाणा मणुस्सा किं कोहोवउत्ता ४, गो० ! कोहोवउत्तावि ४, एवं सर्वशरीरकेषु नवरमाहारकेऽशीतिर्भङ्गकानां वाच्या।

एवं संहननद्वारेऽपि नवरं 'मणुस्साणं भंते ! कइ संघयणा पन्नत्ता ?, गोयमा ! छस्संघयणा पन्नत्ता, तंजहा-वइरोसहनाराए जाव छेवट्टे' । संस्थानद्वारे 'छ संठाणा पन्नत्ता, तंजहा-समचउरंसे जाव हुंडे' । लेश्याद्वारे 'छ लेसाओ, तंजहा-किण्हलेस्सा जाव सुक्कलेसा' । ज्ञानद्वारे 'मणुस्साणं भंते ! कइ नाणाणि ? गोयमा ! पंच, तंजहा-आभिनिबोहियणाणं जाव केवलनाणं' । एतेषु च केवलवर्जेष्वभङ्गकं, केवलेतु कषायोदय एव नास्तीति ।

'वाणमंतरे'त्यादि, व्यन्तरादयो दशस्वपि स्थानेषु यथा भवनवासिनस्तथा वाच्याः, यत्रा सुरादीनामशीतिर्भङ्गकाः यत्र च सप्तविंशतिस्तत्र च व्यन्तरादीनामपि ते तथैव वाच्याः, भङ्गकास्तु लोभमादौ विधायाध्येतव्याः, तत्र भवनवासिभिः सह व्यन्तराणां साम्यमेव, ज्योतिष्कादीनां तु न तथैव वाच्याः, भङ्गकास्तु लोभमादौ विधायाध्येतव्याः, तत्र भवनवासिभिः सह व्यन्तराणां साम्यमेव, ज्योतिष्कादीनां तु न तथेति तैस्तेषां सर्वथा साम्यपरिहारसूचनायाह-'नवरं णाणत्तं जाणियव्वं जं जस्स'त्ति, 'यत्' लेश्यादिगतं 'यस्य' ज्योतिष्कादेः 'नानात्वम्' इतरापेक्षया भेदस्तदज्ञातव्यमिति, परस्परतो विशेषं ज्ञात्वैतेषां सूत्राण्यध्येयानीतिभावः ।

तत्र लेश्याद्वारे-ज्योतिष्काणामेकैव तेजोलेश्या वाच्या, ज्ञानद्वारे त्रीणि ज्ञानानि, अज्ञानान्यपि त्रीण्येव, असञ्ज्ञिनां तत्रोपपाताभावेन विभङ्गस्यापर्याप्तकावस्थायामपि भावात् । तथा वैमानिकानां लेश्याद्वारे तेजोलेश्यादयस्तिस्रो लेश्या वाच्याः । ज्ञानद्वारे च त्रीणि ज्ञानान्यज्ञानानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेति, वैमानिकसूत्राणि चैवमध्येयानि-'संखेज्जेसु णं भंते! वेमाणियावाससयसहस्सेसु एगमेगंसि वेमाणियावासंसि केवइया ठिइठाणा पन्नत्ता ?' इत्येवमादीनि।

शतकं-१ उद्देशकः-५ समाप्तः

## -: शतकं-१ उद्देशकः-६ :-

**वृ.** अथ षष्ठो व्याख्यायते, तस्य चायं सम्बन्धः-अनन्तरोद्देशकेऽन्तिमसूत्रेषु 'असंखेज्जेसु णं भंते! जाव जोतिसियवेमाणियावासेसु' तथा 'संखेज्जेसु णं भंते! वेमाणियावाससयसहस्सेसु' इत्येतदधीतं, तेषु च ज्योतिष्कविमानावासाः प्रत्यक्षा एवेति तद्गतदर्शनं प्रतीत्य तथा 'जावंते' इति यदुक्तमादिगाथायां तच्च दर्शयितुमाह-

**मू. (६९)** *जावइयाओ य णं भंते! उवासंतराओ उदयंते सूरिए चक्खुप्फासं हव्वमागच्छति अत्थमंतेविय णं सूरिए तावतियाओ चेव उवासंतराओ चक्खुप्फासं हव्वमागच्छति ?, हंता! गोयमा! जावइयाओ णं उवासंरताओ उदयंते सूरिए चक्खुप्फासं हव्वमागच्छति अत्थमंतेवि सूरिए जाव हव्वमागच्छति। जावइयाणं भंते! खित्तं उदयंते सूरिए आतावेणं सव्वओ समंता ओभासेइ उज्जोएइ तवेइ पभासेइ, अत्थमंतेविय णं सूरिए तावाइयं चेव खित्तं आयावेणं सव्वओ समंता ओभासेइ उज्जोएइ तवेइ पभासेइ ?, हंता गोयमा! जावतियण्णं खेत्तं जाव पभासेइ।*

*तं भंते! किं पुट्ठं ओभासेइ अपुट्ठं ओभासेइ ?, जाव छद्दिसिं ओभासेति, एवं उज्जोवेइ तवेइ पभसेइ जाव नियमा छद्दिसिं।*

*से नूणं भंते! सव्वंति सव्वासंति फुसमाणकालसमयंसि जावतियं खेत्तं फुसइ तावतियं फुसमाणे पुट्ठेत्ति वत्तव्वं सिया ?, हंता! गोयमा! सव्वंति जाव वत्तव्वं सिया।*

*तं भंते! किं पुट्ठं फुसइ अपुट्ठं फुसइ ? जाव नियमा छद्दिसिं।*

**वृ.** 'जावइयाओ' इत्यादि, यत्परिमाणात् 'उवासंतराओ' त्ति 'अवकाशान्तरात्' आकाशविशेषादवकाशरूपान्तरालाद्वा, यावत्यवकाशान्तरे स्थित इत्यर्थः 'उदयंते' त्ति 'उदयन्' उद्गच्छन् 'चक्खुप्फासं' ति, चक्षुषो-दृष्टेः स्पर्श इव स्पर्शो न तु स्पर्श एव चक्षुषोऽप्राप्तकारित्वादिति चक्षुस्पर्शस्तं 'हव्वं' ति शीघ्रं, स च किल सर्वाभ्यान्तरमण्डले सप्तचत्वारिंशति योजनानां सहस्रेषु द्वयोः शतयोस्त्रिषष्टौ (४७२६३) च साधकायां वर्त्तमान उदये दृश्यते, अस्तसमयेऽप्येवम्, एवं प्रतिमण्डलं दर्शने विशेषोऽस्ति, स च स्थानान्तरादवसेयः, 'सव्वओ समंत' त्ति 'सर्वतः' सर्वासु दिक्षु 'समन्तात्' विदिक्षु, एकार्थौवैतो, 'ओभासेई' त्यादि 'स्थानान्तरादवसेयः, 'सव्वओ समंत'' त्ति 'सर्वतः' सर्वासु दिक्षु 'समन्तात्' विदिक्षु, एकार्थौवैतो, 'ओभासेई' त्यादि 'अवभासयति' ईषत्प्रकाशयति यथा स्थूलतरमेव वस्तु दृश्यते 'उदद्योतयति' भृशं प्रकशयति यथा स्थूलमेव दृश्यते 'तपति' उपनीशतीतं करोति यथा वा सूक्ष्मं पिपीलिकादि दृश्यते तथा करोति 'प्रभासयत' अतितापयोगाद्विशेषतोऽपनीतशीतं विधत्ते यथा वा सूक्ष्मतरं वस्तु दृश्यते तथा करोतीति।

एतक्षेत्रमेवाश्रित्याह 'तं भंते' त्यादि 'तं भंते' त्ति-यत् क्षेत्रमवभासयति यदुद्योतयति तपति प्रभासयति च 'तत्' क्षेत्रं किं भदन्त! स्पृष्टमवभासयति अस्पृष्टमवभासयति ?, इह यावत्करणादिदं दृश्यम्-'गोयमा! पुट्ठं ओभासेइ नोअपुट्ठं, तं भंते! ओगाढं ओभासेइ अनोगाढं ओभासेइ ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा ! ओगाढं ओभासेइ नो अनोगाढं, एवं अनंतरोगाढं ओभासेइ परंपरोगाढं, तं भंते !, किं अणुं ओभासइ बायरं ओभासइ ?, गोयमा ! अणुंपि ओभासइ बायरंपि ओभासइ, तं भंते ! उड्ढं ओभासइ तिरियं ओभासइ अहे ओभासइ ?, गोयमा ! उड्ढंपि ३, तं भंते ! आइं ओभासइ मज्झे ओभासइ अंते ओभासइ ?, गोयमा नानु आइं ३, तं भंते !, सविसए ओभासइ अवसए ओभासइ गोयमा ! सविसए ओभासइ नो अविसए, तं भंते ! आनुपुव्विं ओभासेइ अनानुपुव्विं ओभासइ गोयमा ! आनुपुव्विं ओभासइ नो अनानुपुव्विं, तं भंते ! कइदिसिं ओभासइ ?, गोयमा ! नियमा छद्दिसिं'ति ।

एतेषां च पदानां प्रथमोद्देशकेनारकाहारसूत्र व्याख्या दश्येति । य एव 'ओभासइ' इत्यनेन सह सूत्रप्रपञ्च उक्तः स एव 'उज्जोयई'त्यादिना पदत्रयेण वाच्य इति दर्शयन्नाह-एवं 'उज्जोवेई'त्यादि। स्पृष्टं क्षेत्रं प्रभासयतीत्युक्तम्, अथ स्पर्शनामेव दर्शयन्नाह-'सव्वंति'त्ति प्राकृतत्वात् 'सर्वतः सर्वासु दिक्षु 'सव्वावंति'त्ति प्राकृतत्वादेव सर्वात्मना सर्वेण वाऽऽतपेनापत्ति-व्याप्तिर्यस्य क्षेत्रस्य तत्सर्वापत्ति, अथवा सर्व-क्षेत्रम्, इतिशब्दो विषयभूतं क्षेत्रं सर्वं न तु समस्तमेवेत्यस्यार्थस्योप-प्रदर्शनार्थः, तथा सर्वेणातपेनातो-व्याप्तिर्यस्य क्षेत्रस्य तत्सर्वापम् इतिशब्दः सामान्यतः सर्वेणातपेन व्याप्तिर्यस्य क्षेत्रस्य तत्सर्वापम्, इतिशब्दः सामान्यतः सर्वेणातपेन व्याप्तिर्न तु प्रतिप्रदेशं सर्वेणेत्य-स्यार्थस्योपप्रदर्शनार्थः, अथवा स्पृशतः-सूर्यस्य स्पर्शनायाः कालसमयः स्पृशतकाल- समयस्तत्र आतपेनेति गम्यते, यावत्क्षेत्रं स्पृशति सूर्य इति प्रकृतं तावत्क्षेत्रं स्पृश्यमानं स्पृष्टमिति वक्तव्यं स्यादिति प्रश्नः, इन्तेत्याद्युत्तरं, स्पृश्यमानस्पृष्टयोश्चैकत्वं प्रथमसूत्रादवगन्तव्यमिति ।

स्पर्शनामेवाधिकृत्याह—

**मू. (७०)** *लोयंते भंते ! अलोयतं फुसइ अलोयंतेवि लोयंतं फुसइ ?, हंता गोयमा ! लोयंते अलोयंतं फुसइ अलोयंतेवि लोयंतं फुसइ ३ । तं भंते ! किं पुट्ठं फुसइ अपुट्ठं फुसइ ! जाव नियमा छद्दिसिं फुसइ ।*

*दीवंते भंते ! सागरंतं फुसइ सागरंतेवि दीवंतं फुसइ ?, हंता जाव नियमा छद्दिसिं फुसइ*

*एवं एएणं अभिलावेणं उदयंते पोयंतं फुसइ छिद्दंते दूसंतं छायंते आयवंतं जाव नियमा छद्दिसिं फुसइ ।*

**वृ.** 'लोयंते भंते ! अलोयंत'मित्यादि, लोकान्तः-सर्वतो लोकावसानम्, अलोकान्तस्तु तदन्तर एवेति । इहापि 'पुट्ठं फुसइ' इत्यादिसूत्रप्रपञ्चो दृश्यः, अत एवोक्तं 'जाव नियमा छद्दिसिं'ति एतद्भावना चैवं-स्पृष्टमलोकान्तं लोकान्तः स्पृशति, स्पृष्टत्वं च व्यवहारतो दूरस्थस्यापि दृष्टं यथ चक्षुस्पर्श इत्यत उच्यते-अवगाढम्-आसन्नमित्यर्थः, अवगाढत्वं चासत्तिमात्रमपि स्यादत उच्यते-अनन्तरावगाढम्-अवयवधानेन संबद्धं, न तु परम्पराऽवगाढं-शृङ्खलाकटिका इव परम्पासम्बद्धं, तं चाणुं स्पृशति, अलोकान्तस्य क्वचिद्विवक्षया प्रदेशमात्रत्वेन सूक्ष्मत्वात्, बादरमपि स्पृशति, कचिद्विवक्षयैव बहुप्रदेशत्वेन बादरत्वात्, तमूर्ध्वमधस्तिर्यक् च स्पृशति, उर्द्धादिदिक्षुलोकान्त-स्यालोकान्तस्य च भावात्, तं चादौ मध्येऽन्ते च स्पृशति ।

कथम् ?, अधस्तिर्यगूर्ध्वलोकप्रान्तानामदिमध्यान्तकल्पनात्, तं च स्वविषये स्पृशति-स्पृष्टावगाढादौ, नाविषयेऽस्पृष्टादाविति, तं चानुपूर्वा स्पृशति, आनुपूर्वी चेह प्रथमे स्थाने लोकान्तस्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोऽनन्तरं द्वितीये स्थानेऽलोकान्त इत्येवमस्थानतया स्पृशति, अन्यथा तु स्पर्शनैव न स्यात्, तं च षट्सु दिक्षु स्पृशति, लोकान्तस्य पार्श्वतः सर्वतोऽलोकान्तस्य भावात्, इह च विदिक्षु स्पर्शना नास्ति, दिशां लोकविष्कम्भप्रमाणत्वाद् विदिशां च तत्परिहारेण भावादिति ।

एवं द्वीपान्तसारगान्तादिसूत्रेषु स्पृष्टादिपदभावना कार्या, नवरं द्वीपान्तसागरान्तादिसूत्रे 'छद्दिसिं' इत्यस्यैवं भावना-योजनसहस्रावगाढा द्वीपाश्च समुद्राश्च भवन्ति, ततश्चोपरितनानधस्तनांश्च द्वीपसमुद्रप्रदेशानाश्रित्य ऊर्ध्वाधोदिग्द्वयस्य स्पर्शना वाच्या, पूर्वादिदिशां तु प्रतीतैव, समन्ततस्तेषामवस्थानात् ॥ 'उदयंते पोयंतं'ति नद्याद्युदकान्तः 'पोतान्तं' नौपर्यवसानम्, इहाप्युच्छ्रयापेक्षया उर्द्धदिक्- स्पर्शना वाच्या जलनिमज्जेन वेति ।

'छिद्दंते दूसंत'न्ति छिद्रान्तः 'दूष्यान्तं' वस्त्रान्तं स्पृशति, इहापि षड्दिक्स्पर्शनाभावना वस्त्रेच्छ्र्यापेक्षया, अथवा कम्बलरूपवस्त्रपोट्टलिकायां तन्मध्योत्पन्नजीवभक्षणेन तन्मध्यरन्ध्रापेक्षया लोकान्तसूत्रवत् षड्दिक्स्पर्शना भावयितव्या ।

'छायंते आयवंतं'ति इह छायाभेदेन षड्दिग्भावनैवम्-आतपे व्योमवर्त्तिपक्षिप्रभृतिद्रव्यस्य या छाया तदन्त आतपान्तं चतसृषु दिक्षु स्पृशति तथा तस्या एव छायाया भूमेः सकाशात्तद्रव्यं यावदुच्छ्रयोऽस्ति, ततश्च छायान्त आतपान्तमूर्ध्वमधश्च स्पृशति, अथवा प्रासादवरण्डिकादेर्या छाया तस्या भित्तेरवतरन्त्या आरोहन्त्या वाऽन्त आतापान्तमूर्ध्वमधश्च स्पृशतीति भावनीयम्, अथवा तयोरेव छायाऽऽतपयोः पुद्गलानामसङ्ख्येयप्रदेशावगाहित्वादुच्छ्रयसद्भावः, तत्सद्भावाद्धोर्ध्वाधोविभागः, ततश्च छायान्त आतपान्तमूर्ध्वमधश्च स्पृशतीति ।

स्पर्शनाऽधिकारादेव च प्राणातिपातादिपापस्थानप्रभवकर्मस्पर्शनामधिकृत्याह–

**मू. (७१)** *अत्थि णं भंते ! जीवाणं पाणाइवाएणं किरिया कज्जइ ?, हंता अत्थि । सा भंते ! किं पुट्ठा कज्जइ अपुट्ठा कज्जइ ?, जाव निव्वाधाएणं छद्दिसिं वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं । सा भंते ! किं कडा कज्जइ अकडा कज्जइ ?, गोयमा ! कडा कज्जइ नो अकडा कज्जइ । सा भंते ! किं अत्तकडा कज्जइ परकडा कज्जइ तदुभयकडा कज्जइ ?, गोयमा ! अत्तकडा कज्जइ नो परकडा कज्जइ नो तदुभयकडा कज्जइ । सा भंते ! किं आनुपुव्विं कडा कज्जइ अनानुपुव्विं कडा कज्जइ ?, गोयमा ! आनुपुव्विं कडा कज्जइ नो अनानुपुव्विं कडा कज्जइ, जा य कडा जा य कज्जइ जा य कज्जिस्सइ सव्वा सा आनुपुव्विं कडा नो अनानुपुव्विं कडत्ति वत्तव्वं सिया ।*

*अत्थि णं भंते ! नेरइयाणं पाणाइवायकिरिया कज्जइ ?, हंता अत्थि । सा भंते ! किं पुट्ठा कज्जइ अपुट्ठा कज्जइ जाव नियमा छद्दिसिं कज्जइ, सा भंते ! किं कडा कज्जइ अकडा कज्जइ ?, तं चेव जाव नो अणनानुपुव्विं कडत्ति वत्तव्वं सिया, जहा नेरइया तहा एगिंदियवज्जा भाणियव्वा, जाव वेमाणिया, एगिंदिया जहा जीवा तहा भाणियव्वा ।*

*जहा पाणाइवाए तहा मुसावाए तहा अदिन्नादाणे मेहुणे परिग्गहे कोहे जाव मिच्छादंसणसल्ले, एवं एए अट्ठारस चउवीसं दंडगा भाणियव्वा ।*

*सेवं भंते ! सेवं भंते ! त्ति भगवं गोयमे समणं भगवं जाव विहरति ।*

**वृ.** 'अत्थि' त्ति अस्त्ययं पक्षः-'किरिया कज्जइ'त्ति, क्रियत इति क्रिया-कर्म सा क्रियतेभवति, 'पुट्ठे' इत्यादेव्याख्या पूर्ववत् । 'कडा कज्जइ'त्ति कृता भवति, अकृतस्य कर्मणोऽभावात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्तकडा कज्जइ' त्ति आत्मकृतमेव कर्म भवति, नान्यथा । 'अनानुपुव्विं कडा कज्जइ' त्ति पूर्वपश्चाद्विभागो नास्ति यत्र तदनानुपूर्वीशब्देनोच्यत इति ।

'जहा नेरइया तहा एगिंदियवज्जा भाणियव्व' त्ति नारकवदसुरादयोऽपि वाच्याः, एकेन्द्रियवर्जा, ते त्वन्यथा, तेषां हि दिक्पदे 'निव्वाधाएणं छद्दिसिं वाघायं पडुच्च सिय तिदिसिं' इत्यादेर्विशेषाभिलापस्य जीवपदोक्तस्य भावात्, अत एवाह--

एगिंदिया जहा जीवा तहा भाणियव्व' त्ति 'जाव मिच्छदंसणसल्ले' इह यावत्करणात् 'माणे माया लोभे पेज्जे' अनभिव्यक्तमायालोभस्वभावमभिष्वङ्गमात्रं प्रेम 'दोसे' अनभिव्यक्त-क्रोधमानस्वरूपमप्रीतिमात्रं द्वेषः 'कलहः' राटि 'अबब्भक्खाणे' असद्दोषाविष्करणं 'पेसुन्ने' प्रच्छन्नमसद्दोषाविष्करणं 'परपरिवाए' विप्रकीर्णं परेषां गुणदोषवचनम् 'अरइरई' अरति-मोहनीयोदयच्चित्तोद्वेगस्तत्फला रति-विषयेषु मोहनीयोदयाच्चित्ताभिरतिररतिरति, 'मायामोसे' तृतीयकषायद्वितीयाश्रवयोः संयोगः, अनेन च सर्वसंयोगा उपलक्षिताः, अथवा वेषान्तरभाषान्त-रकरणेन यत्परवञ्चनं तन्मायामृषेति, मिथ्यादर्शनं शल्यमिव विविधव्यथानिबन्धन- त्वान्मिथ्या-दर्शनशल्यमिति ।

एवं तावद्गौतमद्वारेण कर्म प्ररूपितं, तच्च प्रवाहतः शाश्वतमित्यतः शाश्वतानेव लोकादिभावान् रोहकाभिधानमुनिपुङ्गवद्वारेण प्ररूपयितुं प्रस्तावयन्नाह--

**मू.** *(७२) तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी रोहे नामं अनगारे पगइभद्दए पगइमउए पगइविणीए पगइउवसंते पगइपयगुकोहमाणमायालोभे मिउमद्दवसंपन्ने अल्लीणे भद्दए विणीए समणस्स भगवओ महावीरस्स अदूरसामंते उड्ढंजाणू अहोसिरे झाणकोट्ठोवगए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ, तए णं से रोहे नामं अनगारे जायसड्ढे जाव पज्जुवासमाणे एवं वदासी-पुव्विं भंते ! लोए पच्छ अलोए पुव्विं अलोए पच्छ लोए ?, रोहा ! लोए य अलोए य पुव्विंपेते पच्छपेते दोवि एए सासया भावा, अणनुपुव्वी एसा रोहा पुव्विं भंते ! जीवा पच्छ अजीवा पुव्विं अजीवा पच्छ जीवा ?, जहेव लोए य अलोए य तहेव जीवा य अजीवा य, एवं भवसिद्धिया य अभवसिद्धीया य सिद्धी असिद्धी सिद्धा असिद्धा*

*पुव्विं भंते ! अंडए पच्छ कुक्कुडी पुव्विं कुक्कुडी पच्छ अंडए ?, रोहा ! से णं अंडए कओ भयवं ! कुक्कुडीओ, सा णं कुक्कुडी कओ ?, भंते ! अंडयाओ, एवामेव रोहा ! से य अंडए सा य कुक्कुडी, पुव्विंपेते पच्छपेते दुवेते सासया भावा, अनानुपुव्वी एसा रोहा ! पुव्विं भंते ! लोयंते पच्छ अलोयंते पुव्वं अलोयंते पच्छ लोयंते ?, रोहा ! लोयंते य अलोयंते य जाव अनानुपुव्वी एसा रोहा ! । पुव्विं भंते ! लोयंते पच्छ सत्तमे उवासंतरे पुच्छ, रोहा ! लोयंते य सत्तमे उवासंतरे पुव्विंपि दोवि एते जाव अनानुपुव्वी एसा रोहा !*

*एवं लोयंते य सत्तमे य तनुवाए, एवं घनवाए घनोदहि सत्तमा पुढवी, एवं लोयंते एक्केक्केणं संजोएयव्वे इमेहिं ठाणेहिं-तंजहा--*

**वृ.** 'पगइभद्दए' त्ति स्वभावत एव परोपकारकरणशीलः 'पगइमउए' त्ति स्वभावत एव भावमार्दविकः, अत एव 'पगइविणीए' त्ति तथा 'पगइउवसंते' त्ति क्रोधोदयाभावात् 'पगइपयणु-कोहमाणमायालोभे' सत्यपि कषायोदये तत्कार्याभावात् प्रतनुक्रोधादिभावः 'मिउमद्दवसंपन्ने' त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृदु यन्मार्दवम्-अत्यर्थमहङ्कृतिजयस्तत्संपन्नः-प्राप्तो गुरूपदेशाद् यः स तथा 'आलीणे'त्ति गुरुस-माश्रितः संलीनो वा, 'भद्दए'त्ति अनुपतापको गुरिशिक्षागुणात्, 'विणीए'त्ति गुरुसेवागुणात् 'भवसिद्धीया य'त्ति गुरुसमाश्रितः संलीनो वा, 'भद्दए'त्ति अनुपतापको गुरुशिक्षागुणात्, 'विणीए'-त्ति गुरुसेवागुणात् 'भवसिद्धीया य'त्ति भविष्यतीति भवा भवा सिद्धि-निर्वृतिर्येषां ते भवसिद्धिकाः, भव्या इत्यर्थः, 'सत्तमे उवासंतरे'त्ति सप्तमपृथिव्या अधोवर्त्ताकाशमिति । सूत्रसङ्ग्रहगाथे-के ?

**मू. (७३)** *ओवासवायघनउदिहि पुढवी दीवा य सागरा वासा ।*
*नेरइयाई अत्थिय समया कम्माइं लेस्साओ ॥*

**वृ.** तत्र 'ओवासे'त्ति सप्तावकाशान्तराणि 'वाय'त्ति तनुवाताः घनवाताः 'घणउदहि'त्ति धनोदधयः सप्त 'पुढवि'त्ति नरकपृथिव्यः सप्तैव 'दीवा य'त्ति जम्बूद्वीपादयोऽसङ्ख्याताः असङ्ख्येया एव 'सागराः' लवणादयः 'वास'त्ति वर्षाणि भरतादीनि सप्तैव 'नेरइयाइ'त्ति चतुर्विंशतिदण्डकः 'अत्थि, य'त्ति अस्तिकायाः पञ्च 'समय'त्ति कालविभागाः कर्माण्यष्टौ लेश्याः षट् ।

**मू. (७४)** *दिट्ठी दंसण नाणा सन्न सरीरा य जोग उवओगे ।*
*दव्वपएसा पज्जव अद्धा किं पुव्विं लोयंते ? ॥*

**वृ.** दृष्यो-मिथ्यादृष्ट्यादयस्तिस्रः, दर्शनानि चत्वारि ज्ञानानि पञ्च सञ्ज्ञाश्चतस्रः शरीराणि पञ्च योगास्त्रयः उपयोगौ द्वौ द्रव्याणि षट् प्रदेशा अनन्ताः पर्यवा अनन्ता एव 'अद्ध'त्ति अतीताद्धा अनागताद्धा सर्वाद्धा चेति, 'किं पुव्विं लोयंति'त्ति, अयं सूत्राभिलापनिर्देशः, तथैव पश्चिमसूत्र्-भिलापं दर्शयन्नाह–

**मू. (७५)** *पुव्विं भंते ! लोयंते पच्छ सव्वद्धा । जहा लोयंतेणं संजोइया सव्वे ठाणा एते एवं अलोयंतेणवि संजोएयव्वा सव्वे । पुव्विं भंते ! सत्तमे उवासंतरे पच्छ सत्तमे तनुवाए ?, एवं सत्तमं उवासंतरं सव्वेहिं समं संजोएयव्वं जाव सव्वद्धाए । पुव्विं भंते ! सत्तमे तनुवाए पच्छ सत्तमे घनवाए, एयंपि तहेव नेयव्वं जाव सव्वद्धा, एवं उवरिल्लं एक्केक्कं संजोयंतणे जो जो हिट्ठिल्लो तं तं उड्डतेणं नेयव्वं जाव अतीयअनागयद्धा पच्छ सव्वद्धा जाव अनानुपुव्वी एसा रोहा सेवं भंते ! सेवं भंतेत्ति ! जाव विहरइ ॥*

**वृ.** 'पुव्विं भंते ! लोयंते पच्छ सव्वद्धे'त्ति । एतानि च सूत्राणि शून्यज्ञानादिवादनिरासेन विचित्रबाह्याध्यात्मिकवस्तुसत्ताऽभिधानार्थानि ईश्वरादिकृतत्वनिरासेन चानादित्वाभिधानार्थानीति लोकान्तादिलोकपदार्थप्रस्तावादथ गौतममुखेन लोकस्थितिप्रज्ञापनायाह-अयं सूत्राभिलापः-

**मू. (७६)** *भंतेत्ति भगवं गोयमे समणं जाव एवं वयासी-कतिविहा णं भंते ! लोयट्ठिती पण्णत्ता ?, गोयमा ! अट्ठविहा लोयट्ठिती पन्नत्ता, तंजहा-आगासपइट्ठिए वाए १ वायपइ- ट्ठिए उदही २ उदहीपइट्ठिया पुढवी ३ पुठविपइट्ठिया तसा थावरा पाणा ४ अजीवा जीव- पइट्ठिया ५ जीवा कम्मपइट्ठिया ६ अजीवा जीवसंगहिया ७ जीवा कम्मसंगहिया ८ ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ ?-अट्ठविहा जाव जीवा कम्मसंगहिया ?, गोयमा ! से जहानामए-केइ पुरिसे वत्थिमाडोवेइ वत्थिमाडोवित्ता उप्पिं सितं बंधइ २ मज्झेणं गंठिं बंधइ २ उवरिल्लं गंठिं मुयइ २ उवरिल्लं देसं वामेइ २ उवरिल्लं देसं वामेत्ता उवरिल्लं देसं आउयायस्स पूरेइ २ उप्पिंसि तं बंधइ २ मज्झिल्लं गंठिं मुयइ ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से नूणं गोयमा ! से आउयाए तस्स वाउयायस्स उप्पिं उवरितले चिट्ठइ ?, हंता चिट्ठइ, से तेणट्ठेणं जाव जीवा कम्मसंगहिया, से जहा वा केइ पुरिसे वत्थिमाडोवेइ २ कडीए बंधइ २ अत्थाहमतारमपोरसियंसि उदगंसि ओगाहेज्ञा, से नूणं गोयमा ! से पुरिसे तस्स आउयायस्स* उवरिमतले चिट्ठइ ?, हंता चिट्ठइ, एवं वा अट्ठविहा लोयट्ठिई पन्नत्ता जाव जीवा कम्मसंगहिया

**वृ.** आकाशप्रतिष्ठितो वायुः-तनुवातघनवातरूपः, तस्यावकाशान्तरोपरि स्थितत्वात्, आकाशं तु स्वप्रतिष्ठितमेवेति न तत्प्रतिष्ठाचिन् कृतेति । तथा वातप्रतिष्ठित उदधिघनोदधिस्त-नुवातघनवातोपरि स्थितत्वात् २ । तथा उदधिप्रतिष्ठिता पृथिवी, घनोदधीनामुपरि स्थितत्वात् रत्नप्रभादीनां, बाहुल्यापेक्षया चेदमुक्तम्, अन्यथा ईषत्प्राग्भारा पृथिवी आकाशप्रतिष्ठितैव । तथा पृथिवीप्रतिष्ठितस्त्रसस्थावराः प्राणाः, इदमपि प्रायिकमेव, अन्यथाऽऽकाशपर्वतविमान-प्रतिष्ठिता अपि ते सन्तिति ४ । तथाऽजीवाः-शरीरादिपुद्गलरूपा जीवप्रतिष्ठिताः, जीवेषु तेषां स्थितत्वात् ५ । तथा जीवाः कर्मप्रतिष्ठिताः, कर्मसु-अनुदयावस्थकर्मपुद्गलसमुदायरूपेषु संसारि-जीवानामाश्रितत्वात्, अन्ये त्वाहुः-जीवाः कर्मभिः प्रतिष्ठिताः-नारकादिभावेनावस्थिताः ६ । तथा अजीवा जीवसंगृहीताः, मनोभाषादिपुद्गलानां जीवैः संगृहीतत्वात्, अथाजीवाः जीवप्रतिष्ठि-तास्तथाऽजीवा जीवसंगृहीता इत्येतयोः को भेदः ?, उच्यते, पूर्वस्मिन् वाक्ये आधाराधेयभाव उक्तः, उत्तरे तु संग्राह्यसंग्राहकभाव इति भेदः, यच्च यस्य संग्राह्यं तत्तस्याधेयमप्यर्थापत्तितः स्याद् यथाऽपूपस्य तैलमित्याधाराधेयभावोऽप्युत्तरवाक्ये दृश्य इति ७ ।

तथा जीवाः कर्मसंगृहीताः संसारिजीवानामुदयप्राप्तकर्मवशवर्त्तित्वात्, ये च यद्वशास्ते तत्र प्रतिष्ठिताः, यथा घटे रूपादय इत्येवमिहाप्याधाराधेयता दृश्येति । 'से जहानामए केइ' त्ति, स 'यथानामकः' यत्प्रकारनामा, देवदत्तादिनामेत्यर्थः, अथवा 'से' इति स 'यथा' इति दृष्टान्तार्थ 'नाम' इति संभावनायाम् 'ए' इति वाक्यालङ्कारे, 'वत्थिं'ति 'बस्तिं' दृतिं 'आडोवेइ' त्ति आटोपयेत् वायुना पूरयेत्, 'उप्पिं सियं बंधइ' त्ति उपरि सितं 'षिञ् बन्धने' इति वचनात् क्तप्रत्ययस्य च भावार्थत्वात् कर्मार्थत्वाद्वा बन्धं-ग्रन्थिमित्यर्थ 'बन्धाति' करोतीत्यर्थः, अथवा 'उप्पिंसि' त्ति उपरि 'त'मिति बस्तिं 'से आउयाए' त्ति, सोऽप्कायस्तस्य वायुकायस्य 'उप्पिं' ति उपरि, उपरिभावश्च व्यवहारतोऽपि स्यादित्यत आह-उपरितले सर्वोपरीत्यर्थः, यथा वायुराधारो जलस्य दृष्ट एवमा-धाराधेयभावो भवति आकाशघनवातादिनामिति भावः, आधाराधेयभावश्च प्रागेव सर्वपदेषु व्यञ्जित इति । 'अत्थाहमतारमपोरुसियंसि' त्ति, अस्ताधम्-अविद्यमानस्ताधम्-अगाधमित्यर्थः, अस्ताधो वा निरस्ताधस्तलमिवेत्यर्थः, अत एवातारं-तरीतुमशक्यं, पाठान्तरेणापारं-पारवर्जितं, पुरुषः प्रमाणमस्येति पौरुषेयं तत्प्रतिषेधादपौरुषेयं ततः कर्मधारयोऽतस्तत्र, मकारश्चेहालाक्षणिकः, 'एवं वा' इत्यत्र वाशब्दो दृष्टान्तान्तरतासूचनार्थः ।

लोकस्थित्यधिकारादेवेदमाह-'अत्थि ण' मित्यादि, अनेय त्वाहुः-अजीवा जीवपइट्ठिया' इत्यादेः पदचतुष्टयस्य भावानार्थमिदमाह–

**मू. (७७)** *अत्थि णं भंते ! जीवा य पोग्गला य अन्नमन्नबद्धा अन्नमन्नपुट्ठा अन्नमन्नमोगाढा अन्नमन्नसिणेहपडिबद्धा अन्नमन्नघडत्ताए चिट्ठंति ?, हंता ! अत्थि । से केणट्ठेणं भंते ! जाव चिट्ठंति ?, गोयमा ! से जहानामए-हरदे सिया पुण्णे पुण्णप्पमाणे वोलट्टमाणे वोसट्टमाणे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समभरधडत्ताए चिट्ठइ, अहे णं केइ पुरिसे तंसि हरदंसि एगं महं नावं सयासवं सयछिड्डुं ओगाहेज्ञा से नूणं गोयमा ! सा णावा तेहिं आसवदारेहिं आपूरमाणी २ पुण्णा पुण्णप्पमाणा वोलट्टमाणा वोसट्टमाणा समभरधडत्ताए चिट्ठइ ?, हंता चिट्ठइ, से तेणट्टेणं गोयमा ! अत्थि णं जीवा य जाव चिट्ठंति ।*

**वृ.** 'पोग्गले' ति कर्मशरीरादिपुद्गलाः 'अन्नमन्नबद्ध' त्ति अन्योऽन्यं पुद्गलानां पुद्गलाश्च जीवाश्च जीवानां संबद्धा इत्यर्थः, कथं बद्धाः इत्याह-'अन्नमन्नपुट्ठा' पूर्वं स्पर्शनामात्रेणान्योऽन्यं स्पृष्टास्ततोऽन्योऽन्यं बद्धाः, गाढतरं संबद्धा इत्यर्थः, 'अन्नमन्नमोगाढ' त्ति परस्परेण लोलीभावं गताः, अन्योऽन्यं स्नेहप्रतिबद्धा इति, अत्र रागादिरूपः स्नेहः, यदाह-

॥ १ ॥ "स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम् ।
रागद्वेषक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥

इति, अत एव 'अन्नमन्नथडत्ताए' त्ति अन्योऽन्यं घटा-समुदायो येषां तेऽन्योऽन्यघटा-स्तद्भावस्तत्ता तयाऽन्योऽन्यघटतया । 'हरए सिय' त्ति 'ह्रदो' नदः स्यात्' भवेत् 'पुण्णे' त्ति भृतो जलस्य, स च किञ्चिन्न्यूनोऽपि व्यवहारत् स्यादत् आह-'पुण्णप्पमाणे' त्ति पूर्णप्रमाणः पूर्णं वा जलेनात्मनो मानं यस्य स पूर्णात्ममानः 'वोलमट्टमाणे' त्ति व्यपलोऽयन् अतिजलभरणाच्छर्द्यमान-जल इत्यर्थः 'वोसट्टमाणे' त्ति जलप्राचुर्यादेव विकशन्-स्फारीभवन् वर्द्धमान इत्यर्थः 'समभरघडत्ताए' त्ति समो न विषयमो घटैकदेशमनाश्रितत्वेन भरो-जलसमुदायो यत्र स समभरः सर्वथा भृतो वा समभरः, समशब्दस्य सर्वशब्दार्थत्वात्, समभरश्चासौ घटश्चेति समासः, समभरघट इव समभरघटस्तद्भावस्तत्ता तया समभरघटतया, सर्वथाभृतघटाकारतयेत्यर्थः ।

'अहे णं' ति अहेशब्दोऽथार्थ अथशब्दश्चानन्तर्यार्थः, णमिति वाक्यालङ्कारे, 'महं' ति महतीं 'सयासवं' ति आश्रवति-ईषत्क्षरतिजलं यैस्ते आश्रवाः-सूक्ष्मरन्ध्राणि सन्तो-विद्यमानाः सदा वा-सर्वदा शतसङ्ख्या वाऽऽश्रवा यस्यां सा सदाश्रवाः शताश्रवा वाऽतस्ताम्, एवं 'सयछिड्डुं' नवरं छिद्रं-महत्तरं रन्ध्रम्, 'ओगाहेज्ज' त्ति 'अवगाहयेत्' प्रवेशयेद् 'आसवदारेहिं' ति आश्रवच्छिद्रैः 'आपूरमाणी' त्ति आपूर्यमाणा जलेनेति शेषः ।

इह द्विर्वचनमाभीक्ष्णये, 'पुण्णे' त्यादि प्राग्वन्नवरं 'वोसट्टमाणा' इत्यादौ वृद्धैरयं विशेष उक्तः-'वोसट्टमाणा' भृता सतीय या तत्रैव निमज्जति सोच्यते 'समभरघडत्ताए' त्ति ह्रदक्षिप्तसमभर-घटवद् ह्रदस्याधस्त्योदकेन सह तिष्ठतीत्यर्थः, यथा नौश्च ह्रदोदकं चान्योऽन्यावगाहेन वर्त्तते एवं जीवाश्च पुद्गलाश्चेति भावना ।

लोकस्थितावेवेदमाह-

**मू. (७८)** *अत्थि णं भंते ! सया समियं सुहुमे सिणेहकाये पवडइ ?, हंता अत्थि । से भंते किं उड्ढे पवडइ अहे पवडइ तिरिए पवडइ ?, गोयमा ! उड्ढेवि पवडइ अहे पवडइ तिरिएवि पवडइ, जहा से बदरे आउयाए अन्नमन्नसमाउत्ते चिरंपि दीहकालं चिट्ठइ तहा णं सेवि ?, नो इणट्ठे समट्ठे, से णं खिप्पामेव विद्धंसमागच्छइ । सेवं भंते ! सेवं भंतेत्ति ।*

**वृ.** 'सदा' सर्वदा 'समियं' ति सपरिमाणं न बादराप्कायवदपरिमितमपि, अथवा 'सदा' इति सर्व्वर्त्तुषु 'समित' मिति रात्रौ दिवसस्य च पूर्वापरयोः प्रहरयोः, तत्रापि कालस्य स्निग्धेतरभाव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मपेक्ष्य बहुत्वमल्पत्वं चावसेयमिति, यदाह–

॥ १ ॥ "पढमचरिमाउ सिसिरे गिम्हे अद्धं तु तासिं वज्रेत्ता ।
पायं ठवे सिणेहाइरक्खणट्ठा पवेसे वा ॥"

लेपितपात्रं बहिर्न स्थापयेत् स्नेहादिरक्षणार्थायेति, 'सूक्ष्मः स्नेहकाय' इति अप्कायविशेष इत्यर्थः 'उड्ढे'त्ति ऊर्ध्वलोके वर्त्तुलवैताढ्यादिषु 'अहे'त्ति अधोलोकग्रामेषु 'तिरियं'ति तिर्यग्लोके 'दीहकालं चिट्ठइ'त्ति तडागादिपूरणात्, 'विद्धंसमागच्छइ'त्ति स्वल्पत्वात्तस्येति ।

शतकं-१ उद्देशकः-६ समाप्तः

## –: शतकं-१ उद्देशकः-७ :–

**वृ.** अथ सप्तम आरभ्यते, तस्य चैवं सम्बन्धः-विध्वंसमागच्छतीत्युक्तं प्राक् इह तु तद्विपर्यय उत्पादोऽभिधीयते, अथाव लोक्थिति प्रागुक्ता इहापि सैव, तथा 'नेरइए'त्ति यदुक्तं सङ्ग्रहिण्यां तच्चावसरायातमिहोच्यत इति, तत्रादिसूत्रम्–

**मू. (७९)** *नेरइए णं भंते ! नेरइएसु उववज्रमाणे किं देसेणं देसं उववज्रइ देसेणं सव्वं उववज्रइ सव्वेणं देसं उववज्रइ सव्वेणं सव्वं उववज्रइ ?, गोयमा ! नो देसेणं देसं उववज्रइ नो देसेणं सव्वं उववज्रइ नो सव्वेणं देसं उववज्रइ सव्वेणं सव्वं उववज्रइ ।*

*जहा नेरइए एवं जाव वेमाणिए १ ।*

**वृ.** 'नेरइए णं भंते ! नेरइएसु उववज्रमाणे'त्ति, ननूत्पद्यमान एव कथं नारक इति व्यपदिश्यते अनुत्पन्नत्वात्, तिर्यगादिवद् इति, अत्रोच्यते, उत्पद्यमान उत्पन्न एव, तदायुष्कोदयात्, अन्यथा तिर्यगाद्यायुष्काभावान्नारकायुष्कोऽदयेऽपि यदि नारको नासौ तदन्यः कोऽसौ ? इति, 'किं देसेणं देसं उववज्रइ'त्ति देशेन च देशेन च यदुत्पादनं प्रवृत्तं तद्देशेनदेशं, छान्दसत्वाच्चाव्ययीभावप्रतिरूपः समासः, एवमुत्तरत्रापि, तत्र जीवः किं 'देशेन' स्वकीयावयवेन 'देशेन' नारकावयविनोऽशतयोत्पद्यते अथवा देशेन देशमाश्रित्योत्पादयित्वेति शेषः, एवमन्यत्रापि ।

तथा 'देसेणं सव्वं'ति देशेन च सर्वेण च यत् प्रवृत्तं तद्देशेनसर्वं, तत्र देशेन-स्वावयवेन सर्वतः-सर्वात्मना नारकावयवितयोत्पद्यत इत्यर्थः, आहोश्विस्सर्वेण-सर्वात्मना देशतो-नारकांशतयोत्पद्यते, अथवा 'सर्वेण' सर्वात्मना सर्वतो नारकतयेति प्रश्नः ४, अत्रोत्तरम्-न देशेनदेशतयोत्पद्यते, यतो न परिणामिकारणावयवेन कार्यावयवो निर्व्वर्त्तयते, तन्तुना पटाप्रतिबद्धपटप्रदेशवत्, यथा हि पटदेशभूतेन तन्तुना पटाप्रतिबद्धः पटदेशो न निर्वर्त्तयते तथा पूर्वातयविप्रतिबद्धेन तद्देशेनोत्तरावयविदेशो न निर्व्वत्यत इति भावः । तथा न देशेन सर्वतयोत्पद्यते, अपरिपूर्णकारणत्त्वात्, तन्तुना पट इवेति । तथा न सर्वेण देशतयोत्पद्यते, संपूर्णपरिणामिकारणत्त्वात्, समस्तघटकारणैर्घटैकदेशवत् । 'सव्वेणं सव्वं उववज्रइ' सर्वेण तु सर्व उत्पद्यते, पूर्णकारणसमवायाद्, घटवदिति चूर्णिव्याख्या, टीकाकारस्त्वेवमाह ।

किमवस्थित एव जीवो देशमपनीय यत्रोत्पत्तव्यं तत्र देशत उत्पद्यते ? १, अथवा देशेन सर्वत उत्पद्यते ? २, अथवा सर्वात्मना यत्रोत्पत्तव्यं तस्य देशे उत्पद्यते ? ३, अथवा सर्वात्मना सर्वत्र ? ४ इति । एतेषु पाश्चात्यभङ्गी ग्राह्यो, यतः सर्वेण-सर्वात्मप्रदेशव्यापारेणेलिकागतौ यत्रोत्पत्तव्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य देशे उत्पद्यते, तद्देशेनोत्पत्तिस्थानदेशस्यैव व्याप्तत्वात्, कन्दुकगतौ वा सर्वेण सर्वत्रोत्पद्यते विमुच्यैव पूर्व्वस्थानमिति, एतच्च टीकाकारव्याख्यानं वाचनान्तरविषयमिति।

उत्पादे चाहारक इत्याहारसूत्रम्–

**मू. (८०)** *नेरइय णं भंते ! नेरइएसु उववज्जमाणे किं देसेणं देसं आहारेइ १ देसेणं सव्वं आहारेइ २ सव्वेणं देसं आहारेइ ३ सव्वेणं सव्वं आहारेइ ? ४, गोयमा ! नो देसेणं देसं आहारेइ नो देसेणं सव्वं आहारेइ सव्वेण वा देसं आहारेइ सव्वेण वा सव्वं आहारेइ, एवं जाव वेमाणिए २*

*नेरइए णं भंते ! नेरइएहिंतो उव्वट्टमाणे किं देसेणं देसं उववट्टइ ? जहा उववज्जमाणे तहेव उववट्टमाणेऽवि दंडगो भाणियव्वो ३। नेरइए णं भंते ! नेरइएहिंतो उववट्टमाणे किं देसेणं देसं आहारेह तहेव जाव सव्वेण वा देसं आहा० ? सव्वेण वा सव्वं आ० १, एवं जाव वेमाणिए*

*नेरइ० भंते ! नेर० उववन्ने किं देसेणं देसं उववन्ने, एसोऽवि तहेव जाव सव्वेणं सव्वं उववन्ने ?, जहा उववज्जमाणे उववट्टमाणे य चत्तारि दंडगा तहा उववन्नेणं उववट्टेणवि चत्तारि दंडगा भाणियव्वा, सव्वेणं सव्वं उववन्ने सव्वेण वा देसं आहारेइ० सव्वेण वा सव्वं आहारेइ, एएणं अभिलावेणं उववन्नेवि उव्वट्टणेवि नेयव्वं ८।*

*नेरइए णं भंते ! नेरइएसु उववज्जमाणे किं अद्धेणं अद्धं उववज्जइ ? १ अद्धेणं सव्वं उववज्जइ ? २ सव्वेणं अद्धं उववज्जइ ? ३ सव्वेणं सव्वं उववज्जइ ? ४, जहा पढमिल्लेणं अट्ठ दंडगा तहा अद्धेणवि अट्ठ दंडगा भाणियव्वा।*

*नवरं जहिं देसेणं देसं उववज्जइ तहिं अद्धेणं अद्धं उववज्जइ इति भाणियव्वं।*

*एवं नाणत्तं, एते सव्वेवि सोलसदंडगा भाणियव्वा।*

**वृ.** तत्र 'देशेन देश'मिति आत्मदेशेनाभ्यवहार्यद्रव्यदेशमित्येवं गमनीयम्। उत्तरम्- 'सव्वेण वा देसमाहारेइ'त्ति, उत्पत्त्यनन्तरसमयेषु सर्वात्मप्रदेशैराहारपुद्गलान् कांश्चिदादत्ते कांश्चिद्विमुञ्चति, तप्ततापिकागततैलग्राहकविमोचकापूपवद्, अत उच्यते-देशमाहारयतीति, 'सव्वेण वा सव्वं'ति सर्वात्मप्रदेशैरुत्पत्तिसये आहारपुद्गलानादत्ते एव प्रथमतः तैलभृततप्ततापिकाप्रथमसमय-पतितापूपवदित्युच्यते-सर्वमाहारयतीति। उत्पादस्तदाहारेण सह प्राग्दण्डकाभ्यामुक्तः, अथोत्पाद-प्रतिपक्षत्वाद्वर्त्तमानकालनिर्देशसा- धर्म्याच्चोद्वर्त्तनादण्डकस्तदाहारदण्डकेन सह ४।

तदनन्तरं च नोद्वर्त्तनाऽनुत्पन्नस्य स्यादित्युत्पन्नतदाहारदण्डकौ, उत्पन्नप्रतिपक्षत्वाच्चोद्वृ-त्ततदाहारदण्डकाविति।

पुस्तकान्तरे तूत्पादतदाहारदण्डकानन्तरमुत्पादे सत्युत्पन्नः स्यादित्युत्पन्नतदाहारदण्डकौ, ततस्तूत्पादप्रतिपक्षत्वादद्वर्त्तनाया उद्वर्त्तनातदाहारदण्डकौ, उद्वर्त्तनायां चौद्वृ ततः स्यादित्युद्वृ-त्ततदाहारदण्डकौ, कण्ठ्याश्चैत इति। एवं तावदष्टाभिर्दण्डकैर्देशसर्वाभ्यामुत्पादादि चिन्तितम्, अथाष्टाभिरेवार्द्धसर्वाभ्यामुत्पादाद्येव चिन्तयन्नाह-'नेरइएण'मित्यादि 'जहा पढमिल्लेणं'ति यथा देशेन, ननु देशस्य चार्धस्य च को विशेषः ?, उच्यते, देशभिागादिरनेकधा, अर्द्ध त्वेकधैवेति।

उत्पत्तिरुद्वर्त्तना च प्रायो गतिपूर्विका भवतीति गतिसूत्राणि–

**मू. (८१)** *जीवे णं भंते ! किं विग्गहगतिसमावन्नए अविग्गहगतिसमावन्नए ?, गोयमा ! सिय विग्गहगइसमावन्नए सिय अविग्गहगतिसमावन्नगे, एवं जाव वेमाणिए। जीवा णं भंते !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*किं विग्गहगइसमावन्नया अविग्गहगइसमावन्नगा ?, गोयमा ! विग्गहगइसमावन्नगावि अविग्गहगइसमावन्नगावि ।*

*नेरइया णं भंते ! किं विग्गहगतिसमावन्या अविग्गहगतिसमावन्नगा ?, गोयमा ! सव्वेवि ताव होज्ञा अविग्गहगतिसमावन्नगा १ । अहवा अविग्गहगतिसमावन्नगा य विग्गहगतिसमावन्ने य २ अहाव अविग्गहगतिसमावन्नगा य विग्गहगइसमावन्नगा य ३ ।*

*एवं जीवेगिंदियवज्ञो तियभंगो ।*

**वृ.** 'विग्गहगइसमावन्नए'त्ति विग्रहो-वक्रं तत्प्रधाना गतिर्विग्रहगति, तत्र यदा वक्रेण गच्छति तदा विग्रहगतिसमापन्न उच्यते, अविग्रहगतिसमापन्नस्तु ऋ जुगतिकः स्थितो वा, विग्रह-गतिनिषेध-मात्राश्रयणात्, यदि चाविग्रहगतिसमापन्न ऋजुगतिक एवोच्यते तदा नारकादिपदेषु सर्वदैवाविग्रहगतिकानां यद्बहुत्वं वक्ष्यति तन्न स्याद्, एकादीनामपि तेषूत्पादश्रवणात्, टीकाकारेण तु केनाप्यभिप्रायेणाविग्रहगतिसमापन्न ऋजुगतिक एव व्याख्यात इति ।

'जीवा णं भंते !' इत्यादि प्रश्नः, तत्र जीवानामानन्त्यात् प्रतिसमयं विग्रहगतिमतां तन्निषेध-वतां च बहूनां भावादाह-'विग्गहगइ'इत्यादि । नारकाणां त्वल्पत्वेन विग्रहगतिमतां कदाचिद-सम्भवात् सम्भवेऽपि चैकादीनामपि तेषां भावाद् विग्रहगतिप्रतिषेधवतां च सदैव बहूनां भावात् आह-'सव्वेवि ताव होज्ञ अविग्गहे'त्यादि विकल्पत्रयम्, असुरादिषु एतदेवातिदेशत आह-'एव'मित्यादि जीवानां निर्विशेषाणामेकेन्द्रियाणां चोक्तयुक्त्या विग्रहगतिसमापन्नत्वे तत्प्रतिषेधे च बहुत्वमेवेति न भङ्गत्रयं, तदन्येषु तु त्रयमेवेति, 'तियभंगो'त्ति त्रिकरूपो भङ्गस्त्रिकभङ्गो, भङ्गत्रयमित्यर्थः । गत्यधिकाराच्च्यवनसूत्रम्-

**मू. (८२)** *देवे णं भंते ! महिड्ढिए महज्जुईए महब्बले महायसे महासुक्खे महानुभावे अविउक्कंतियं चयमाणे किंचिविकालं हिरिवत्तियं दुगंछावतियं परिसहवत्तियं आहारं नो आहारेइ, अहेणं आहारेइ, आहारिज्जमाणे आहाविरिए परिणामिज्ञमाणे परिणामिए पहीणे य आउए भवइ जत्थ उववज्ञइ तमाउयं पडिसंवेएइ, तंजहा-*

*तिरिक्खजोणियाउयं वा मणुस्साउयं वा ?, हंता गोयमा ! देवे णं महिड्ढीए जाव मणुस्साउयं वा ।*

**वृ.** 'महिड्ढिए'त्ति महर्द्धिको विमानपरिवाराद्यपेक्षया 'महज्जुइए'त्ति महाद्युतिकः शरीराभर-णाद्यपेक्षया 'महब्बले'त्ति महाबलः शारीरप्राणापेक्षया 'महायसे'त्ति महायशाः बृहत्प्रख्याति महेस-क्खे'त्ति महेशो-महेश्वर इत्याख्या-अभिधानं यस्यासौ महेशाख्यः 'महासोक्खे'त्ति कचित् 'महानु-भावे'त्ति 'महानुभावः' विशिष्टवैक्रियादिकरणाचिन्त्यसामर्थ्यः अविउक्कंतियं चयमाणे''त्ति च्यव-मानता किलोत्पत्तिसमयेऽप्युच्यत इत्यत आह-व्युत्क्रान्ति-उत्पत्तिस्तन्निषेधादव्युत्क्रान्तिकम्, अथवा व्यवक्रान्ति-मरणं तन्निषेधादव्यवक्रान्तिकं तद्यथा भवत्येवं च्यवमानो जीवमानो, जीवन्नेव मरणकाल इत्यर्थः, 'अविउक्कंतियं चयं चयमाणे'त्ति कचिद्दृश्यते, तत्र च 'चयं' शरीरं 'चयमाणे'त्ति त्यज्ज न् 'किञ्चिवि कालं'ति कियन्तमपि कालं यावन्नाहारयेदिति योगः, कुतः ? इत्याह-

'ह्रीप्रत्ययं' लज्जानिमित्तं, स हि च्यवनसमयेऽनुक्रान्त एव पश्यत्युत्पत्तिस्थानमात्मनः, दृष्ट्वा च तद्देवभवविसदृशं पुरुषपरिभुज्यमानीस्त्रीगर्भाशयरूपं जिहेति, ह्रिया च नाहारयति, तथा 'जुगुप्साप्रत्ययं' कुत्सानिमित्तं, शुक्रादेरुत्पत्तिकारणस्य कुत्साहेतुत्वात्, 'परीसहवत्तियं'ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह प्रक्रमात् परीषहशब्देनारतिपरीषहो ग्राह्यः, ततश्चारतिपरीषहनिमित्तं, दृश्यते चारतिप्रत्ययाल्लोकेऽप्याहारग्रहणवैमुख्यमिति, 'आहारं' मनसा तथाविधपुद्गलोपादानरूपम्, 'अहे णं'ति अथ लज्जादिक्षणानन्तरमाहारयति बुभुक्षावेदनीयस्य चिरं सोढुमशक्यत्वादिति, 'आहारिज्जमाणे आहारिए' इत्यादौ भावार्थ प्रथमसूत्रवत्।

अनेन च क्रियाकालनिष्ठाकालयोरभेदाभिधाने तदीयाऽऽहारकालस्याल्पतोक्ता, तदनन्तरं च 'पहीणे य आउए भवइ'त्ति 'चः' समुच्चये प्रक्षीणं प्रहीणं वाऽऽयुर्भवति, ततश्च यत्रोत्पद्यते मनुजत्वादौ 'तमाउयं'ति तस्य-मनुजत्वादेरायुस्तदायुः 'प्रतिसंवेदयति' अनुभवतीति?, 'तिरिक्खजोणियाउयं वा' इत्यादौ देवनारकायुषोः प्रतिषेधो, देवस्य तत्रानुत्पादादिति।

उत्पत्त्यधिकारादिदमाह-

***मू. (८३)*** *जीवे णं भंते गब्भं वक्कमाणे किं सइंदिए वक्कमइ अनिंदिए वक्कमइ?, गोयमा सिय सइंदिए वक्कमइ सिय अनिंदिए वक्कमइ, से केणट्ठेणं?, गोयमा! दव्विंदियाइं पडुच्च अनिंदिए वक्कमइ भाविंदियाइं पडुच्च सइंदिए वक्कमइ, से तेणट्ठेणं०।*

*जीवे णं भंते! गब्भं वक्कममाणे किं ससरीरी वक्कमइ असरीरी वक्कमइ?, गोयमा! सिय ससरीरी व० सिय असरीरी वक्कमइ० से केणट्ठेणं?, गोयमा! ओरालियवेउव्वियआहारयाइं पडुच्च असरीरी च० तेयाकम्मा० प० सस० वक्क०से तेणट्ठेणं गोयमा!।*

*जीवे णं भंते! गब्भं वक्कम- माणे तप्पढमयाए किमाहारमाहारेइ?, गोयमा! माउओयं पिउसुक्कं तं तदुभयसंसिट्ठं कलुसं किब्बिसं तप्पढमयाए आहारमाहारेइ। जीवे णं भंते! गब्भगए समाणे किमाहारमाहारेइ?, गोयमा! जं से माया नाणाविहाओ रसविगईओ आहारमाहारेइ तदेक्कदेसेणं ओयमाहारेइ।*

*जीवस्स णं भंते! गब्भगयस्स समाणस्स अत्थि उच्चारेइ वा पासवणेइ वा खेलेइ वा सिंघाणेइ वा वंतेइ वा पित्तेइ वा?, नो इणट्ठे समट्ठे, से केणट्ठेणं?, गोयमा! जीवे णं गब्भगए समाणए जमाहारेइ तं चिणाइ तं सोइंदियत्ताए जाव फासिंदियत्ताए अट्ठिअट्ठिमिंज- केसमंसुरोमनहत्ताए, से तेणट्ठेणं०।*

*जीवे णं भंते! गब्भगए समाणे पभू मुहेणं कावलियं आहारं आहारित्तए?, गोयमा! नो इणट्ठे समट्ठे, से केणट्ठेणं?, गोयमा! जीवे णं गब्भगए समाणए सव्वओ आहारेइ सव्वओ परिणामेइ सव्वओ उस्ससइ सव्वओ निस्ससइ अभिक्खणं आहारेइ अभिक्खणं परिणामेइ अभिक्खणं उस्ससइ अभिक्खणं निस्ससइ आहच्च आहारेइ आहच्च परिणामेइ आहच्च उस्ससइ आहच्च नीससइ॥ माउजीवरसहरणी पुत्तजीवरसहरणी माउजीवपडिबद्धा पुत्तजीवं फुडा तम्हा आहारेइ तम्हा परिणामेइ, अवरावि य णं पुत्तजीवपडिबद्धा माउजीवफुडा तम्हा चिणाइ तम्हा उवचिणाइ से तेणट्ठेणं जाव नो पभू मुहेणं कावलियं आहारं आहारित्तए।*

*कइ णं भंते! माइअंगा पन्नत्ता?, गोयमा! तओ माइयंगा पन्नत्ता, तंजहा-मंसे सोणिए मत्थुलुंगे। कइ णं भंते! पिइयंगा पन्नत्ता? गोयमा! तओ पिइयंगा पन्नत्ता, तंजहा-अट्ठि अट्ठिमिंजा केसमंसुरोमनहे।*

*अम्मापिइए णं भंते! सरीरए केवइयं कालं संचिट्ठइ?, गोयमा! जावइयं से कालं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भवधारणिज्जे सरीरए अव्वावन्ने भवइ एवतियं कालं संचिट्ठइ, अहे णं समए समए वोक्कसिज्जमाणे २ चरमकालसमयंसि वोच्छिन्ने भवइ ।*

**वृ.** 'गब्भं वक्कममाणे'त्ति, गर्भ व्युत्क्रामन् गर्भ उत्पद्यमान इत्यर्थः 'दव्विंदियाइं'ति निर्वृत्त्युपकरणलक्षणानि, तानि हीन्द्रियपर्याप्तौ सत्यां भविष्यन्तीत्यनिन्द्रिय उत्पद्यते, 'भाविंदियाइं'ति लब्ध्युपयोगलक्षणानि, तानि च संसारिणः सर्वावस्थाभावीनीति ।

'ससरीरि'त्ति सह शरीरेणेति सशरीरी, इनसमासान्तभावात्, 'असरीरि'त्ति शरीरवान् शरीरी तन्निषेधादशरीरी 'वक्कमइ'त्ति व्युत्क्रामति, उत्पद्यत इत्यर्थः, 'तप्पढमयाए'त्ति तस्य-गर्भव्युत्क्रमणस्य प्रथमता तत्प्रथमता तथा 'किं'मितित प्राकृतत्वात् कथम् ?, 'माउओयं'ति 'मातुरोजः' जनन्या आर्त्तवं, शोणितमित्यर्थः, 'पिउसुक्कं'ति पितुः शुक्रम्, इह यदिति शेषः 'तं'ति आहारमिति योगः, 'तदुभयसंसिट्ठं'ति तयोरुभयं तदुभयंद्रव्यं तच्च तत् संश्लिष्टं च संसृष्टं वा-संसर्गवत् तदुभयसंश्लिष्टं तदुभयसंसृष्टं वा 'जं से'त्ति या तस्य गर्भसत्त्वस्य माता 'रसविगईओ'त्ति रसरूपा विकृतीः-दुग्धाद्या रसविकारास्ताः 'तदेगदेसेणं'ति तासां रसविकृतीनामेकदेशस्तदेकदेशस्तेन सह ओज आहारयतीति ।

'उच्चारेइ व'त्ति उच्चारो-विष्ठा 'इति' उपप्रदर्शने 'वा' विकल्पे खेलो-निष्ठीवनं 'सिंघाणं'ति नासिकाश्लेष्मा 'केसमंसुरोमनहत्ताए'त्ति इह श्मश्रूणि-कूर्चकेशाः रोमाणि-कक्षादिकेशाः ।

'जीवे ण' मित्यादि, 'सव्वओ'त्ति सर्वात्मना 'अभिक्खणं'ति पुनः पुनः 'आहच्च'त्ति कदाचिदाहारयति कदाचिन्नाहारयति, तथास्वभावत्वात्, यतश्च सर्वत आहरयतीत्यादि ततो मुखेन न प्रभुः कावलिकमाहारमाहर्त्तुमिति भावः, अथ कथं सर्वत आहारयति ? इत्याह-'माउजीवरसहरणी'त्यादि, रसो ह्रियते-आदीयते यया सा रसहरणी नाभिनालमित्यर्थः, मातृजीवस्य रसहरणी मातृजीवरसहरणी, किमित्याह-'पुत्तजीवरसहरणी' पुत्रस्य रसोपादाने कारणत्वात्, कथमेवमित्याह-मातृजीवस्य रसहरणी मातृजीवरसहरणी, किमित्याह 'पुत्तजीवरसहरणी' पुत्रस्य रसोपादाने कारणत्वात्, कथमेवमित्याह-मातृजीवप्रतिबद्धा सती सा यतः 'पुत्तजीवं फुड'त्ति पुत्रजीवं स्पृष्टवती, इह च प्रतिबद्धता गाढसम्बन्धः, तदंशत्वात्, स्पृष्टता च सम्बन्धमात्रम्, अतदंशत्वात्, अथवा मातृजीवरसहरणी पुत्रजीवरसहरणी चेति द्वे नाड्यौ स्तः, तयोश्चाद्या मातृजीवप्रतिबद्धा पुत्रजीवस्पृष्टेति, 'तम्हे'ति यस्मादेवं तस्मान्मातृजीवप्रतिबद्धया रसहरण्या पुत्रजीवस्पर्शना- दाहारयति

'अवराविय'त्ति पुत्रजीवरसहरण्यपि च पुत्रजीवप्रतिबद्धा सती मातृजीवं स्पृष्टवती 'तम्हं'त्ति यस्मादेवं तस्माच्चिनोति शरीरम्, उक्तं च तन्त्रान्तरे—

॥१॥ "पुत्रस्य नाभौ मातुश्च, हृदि नाडी निबध्यते ।
यथाऽसौ पुष्टिमाप्नोति, केदार इव कुल्यया ॥" इति

गर्भाधिकारादेवेदमाह-'कइण'मित्यादि 'माइअंग'त्ति आर्त्तवविकारबहुलानीत्यर्थः 'मत्थुलुंग'त्ति मस्तकभेज्जकम्, अन्ये त्वाहुः-मेदः फिप्फिसादि मस्तुलुङ्गमिति । 'पिइयंग'त्ति पैतृकाङ्गानि शुक्रविकारबहुलानीत्यर्थः, 'अट्ठिमिंज'त्ति अस्थिमध्यावयवः, केशादिकं बहुसमानरूपत्वादेकमेव, उभयव्यतिरिक्तानि तु शुक्रशोणितयोः समविकाररूपत्वात् मातापित्रोः साधारणाके- शादिकं बहुसमानरूपत्वादेकमेव, उभयव्यतिरिक्तानि तु शुक्रशोणितयोः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समविकाररूपत्वात् मातापित्रोः साधारणानीति।

'अम्मापिइए णं'ति अम्बापैतृकं, शरीरावयवेषु शरीरोपचाराद्, उक्तलक्षणानि मातापित्रज्ञानीत्यर्थः, 'जावइयं से कालं'ति यावन्तं कालं 'से'त्ति तत् तस्य वा जीवस्य 'भवधारणीयं' भवधारणप्रयोजनं मनुष्यादिभवोपग्राहकमित्यर्थः, 'अव्वावन्ने'त्ति अविनष्टम्, 'अहे णं'ति उपचयान्तिमसमयादनन्तरमेतद् अम्बापैतृकं शरीरं 'वोक्कसिज्जमाणे'त्ति व्यवकृष्यमाणं हीयमानं।

गर्भाधिकारादेवापरं सूत्रम्–

**मू. (८४)** *जीवे णं भंते! गब्भगए समाणे नेरइएसु उववज्जेज्जा?, गोयमा! अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा, से केणट्ठेणं?, गोयमा! से णं सन्नी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए वीरियलद्धीए वेउव्वियलद्धीए पराणीएणं आगयं सोच्चा निसम्म पएसे निच्छुभइ नि० २ वेउव्वियसमुग्घाएणं समोहणइ समो० २ चाउरंगिणिं सेन्नं विउव्वइ चाउरंगिणीसेन्नं विउव्वेत्ता चाउरंगिणीए सेनाए पराणीएणं सद्धिं संगामं संगामेइ।*

*से णं जीवे अत्थकामए रज्जकामए भोगकामए कामकामए अत्थकंखिए रज्जकंखिए भोगकंखिए कामकंखिए अत्थपिवासिए रज्जपिवासिए भोगपिवासिए कामपिवासिए तच्चित्ते तम्मने तल्लेसे तदज्झवसिए तत्तिव्वज्झवसाणे तदट्ठोवउत्ते तदप्पियकरणे तब्भावणाभाविए एयंसि णं अंतरंसि कालं करेज्ज नेरइएसु उववज्जइ, से तेणट्ठेणं गोयमा! जाव अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा।*

*जीवे णं भंते! गब्भगए समाणे देवलोगेसु उववज्जेज्जा?, गोयमा! अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा, से केणट्ठेणं?, गोयमा! से णं सन्नी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए तहारुवस्स समणस्स वा माहणस्स वा अंतिए एगमवि आयरियं धम्मियं सुवयणं सोच्चा निसम्म तओ भवइ संवेगजायसड्ढे तिव्वधम्माणुरागरत्ते, से णं जीवे धम्मकामए पुण्णकामए सग्गकामए मोक्खकामए धम्मकंखिए पुण्णकंखिए सग्गमोक्खकं० धम्मपिवासिए पुण्णसग्गमोक्खपिवासिए तच्चित्ते तम्मणे तल्लेसे तज्झवसिए तत्तिव्वज्झवसाणे तदट्ठोवउत्ते तदप्पियकरणे तब्भावणाभाविए एयंसि णं अंतरंसि कालं करे० देवलो० उव०, से तेणट्ठेणं गोयमा!०*

*जीवे णं भंते! गब्भगए समाणे उत्ताणए वा पासिल्लए वा अंबखुज्जए वा अच्छेज्ज वा चिट्ठेज्ज वा निसीएज्ज वा तुयट्टेज्ज वा माऊए सुयमाणीए सुवइ जागरमाणीए जागरइ सुहियाए सुहिए भवइ दुहियाए दुहिए भवइ?, हंता गोयमा! जीवेणं गब्भगए समाणे जाव दुहियाए दुहिए भवइ, अहे णं पसवणकालसमयंसि सीसेण वा पाएहिं वा आगच्छइ सममागच्छइ तिरियमागच्छइ विनिहायमागच्छइ।*

*वण्णवज्झाणि य से कम्माइं बद्धाइं पुट्ठाइं निहत्ताइं कडाइं पुट्ठवियाइं अभिनिविट्ठाइं अभिसमन्नागयाइं उदिन्नाइं नो उवसंताइं भवंति तओ भवइ दुरूवे दुव्वन्ने दुग्गंधे दूरसे दुप्फासे अनिट्ठे अकंते अप्पिए असुभे अमणुन्ने अमणामे हीणस्सरे दीणसरे अनिट्ठस्सरे अकंतस्सरे अप्पियस्सरे असुभस्सरे अमणुन्नस्सरे अमणामस्सरे अणाएज्जवयणे पच्चायाए यावि भवइ, वन्नवज्झाणि य से कम्माइं नो बद्धाइं पसत्थं नेयव्वं जाव आदेज्जवयणं पच्चायाए यावि भवइ।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सेवं भंते ! सेवं भंते ! ।*

**वृ.** 'गब्भगए समाणे'त्ति गर्भगतः सन् मृत्वेति शेषः 'एगइए'त्ति सगर्वराजादिगर्भरूपः, सञ्ज्ञित्वादिविशेषणानि गर्भस्थस्यापि नरकप्रायोग्यकर्मबन्धसम्भवाभिधायकतयोक्तानि, वीर्यलब्ध्या वैक्रियलब्ध्या संग्राममयतीति योगः, अथवा वीर्यलब्धिको वैक्रियलब्धिकश्च सन्निति, 'पराणीएणं'ति 'परानीकं' शत्रुसैन्यं 'सोच्च'त्ति आकर्ण्य 'निशम्य' मनसाऽवधार्य 'पएसे निच्छुभइ'त्ति (प्रदेशान्) गर्भदिशाब्दहि क्षिपति 'समोहणइ'त्ति 'समवहन्ति' समवहतो भवति तथाविधपुद्गलग्रहणार्थं, 'सङ्ग्रामं सङ्ग्रायति' युद्धं करोति, 'अत्थकामए' इत्यादि अर्थे-द्रव्ये कामो-वाञ्छामात्रं यस्यासावर्थकामः, एवमन्यान्यपि विशेषणानि, नवरं राज्यं-नृपत्वं भोगा-गन्धरसस्पर्शा कामौ-शब्दरूपे काङ्क्षा-गृद्धि, आसक्तिरित्यर्थः, अर्थे काङ्क्षा संजाताऽस्येत्यर्थकाङ्क्षितः, पिपासेव पिपासा-प्राप्तेऽप्यर्थेऽतृप्ति, 'तच्चित्ते'त्ति तत्र-अर्थादौ चित्तं-सामान्योपयोगरूपं यस्यासौ तच्चित्तः, 'तम्मणे'त्ति तत्रैव-अर्थादौ मनो-विशेषोपयोगरूपं यस्य स तन्मनाः, 'तल्लेसे'त्ति लेश्या आत्मपरिणामविशेषः, 'तदज्झवसिए'त्ति इहाध्यवसायोऽध्यवसितं ।

तत्र तच्चित्तादिभावयुक्तस्य सतस्तस्मिन्-अर्थादावेवाध्यवसितं-परिभोगक्रियासंपादनविषयमस्येति तदध्यवसितः, 'तत्तिव्वज्झवसाणे'त्ति तस्मिन्नेव-अर्थादौ तीव्रम्आरम्भकालादारभ्य प्रकर्षयायि अध्यवसानं-प्रत्यत्नविशेषलक्षणं यस्य स तथा, 'तदट्ठोवउत्ते'त्ति तदर्थम्-अर्थादिनिमित्तमुपयुक्तः-अवहितस्तदर्थोपयुक्तः, 'तदप्पियकरणे'त्ति तस्मिन्नेव-अर्थादावर्पितानि-आहितानि करणानि-इन्द्रियाणि कृतकारितानुमतिरूपाणि वा येन स तथा, 'तब्भावणाभाविए'त्त असकृदनादौ संसारे तद्भावनया-अर्थादिसंस्कारेण भावितो यः स तथा, 'एयंसि णं अंतरंसि'त्ति 'एतस्मिन्' सङ्ग्रामकरणावसरे कालं-मरणमिति ।

'तहारूवस्स'त्ति तथाविधस्य, उचितस्येत्यर्थः, 'श्रमणस्य' साधोः, वाशब्दो देवलोकोत्पादहेतुत्वं प्रति श्रमणमाहनवचनयोस्तुल्यत्वप्रकाशनार्थः, 'माहणस्स'त्ति मा हन इत्येवमादिशति स्वयं स्थूलप्राणातिपातादिनिवृत्तत्वाद्यः स माहनः, अथवा ब्राह्मणो-ब्रह्मचर्यस्य देशतः सद्भावाद् ब्राह्मणो देशविरतः तस्य वा 'अंतिए'त्ति समीपे एकमप्यास्तामनेकम् 'आर्यम्' आराद् यातं पापकर्मभ्य इत्यार्यम्, अत एव धार्मिकमिति, 'तओ'त्ति तदन्तरमेव 'संवेगजायसड्ढे'त्ति संवेगेन-भवभयेन जाता श्रद्धा-अश्रद्धानं धर्मादिषु यस्य स तथा 'तिव्वधम्माणुरागरत्ति'त्ति तीव्रो यो धर्मानुरागो-धर्मबहुमानस्तेन रक्त इव यः स तथा, 'धम्माकामए'त्ति धर्म-श्रुतचारित्रलक्षणः पुण्यं-तत्फलभूतं शुभकर्मेति । 'अंबुखुज्जए व'त्ति आम्रफलवत्कुजः 'अच्छेज्ज'ति आसीत सामान्यतः, एतदेव विशेषत उच्यते-'चिट्ठेज्ज'त्ति उर्द्धस्थानेन 'निसीएज्ज'त्ति निषदस्थानेन 'तुयट्टेज्ज'त्ति शयीत, 'सममा- गच्छइ'त्ति, समम्-अविषमं 'सम्मं'ति पाठे "सम्यग् अनुपघातहेतुत्वादागच्छतिमातुरुदराद योन्या निष्क्रामति "तिरियमागच्छइत्ति तिरश्चीनो भूत्वा जठरान्निर्गन्तुं प्रवर्त्तते यदि तदा 'विनिघातं' मरणमापद्यते, निर्गमाभावादिति ।

गर्भान्निर्गतस्य च यत्स्यात्तदाह-'वण्णवज्झाणि य'त्ति वर्ण-श्लाधा वध्यो-हन्तव्यो येषां तानि वर्णवध्यानि, अथवा वर्णाद्बाह्यानि वर्णबाह्यानि अशुभानीत्यर्थः, चशब्दो वाक्यान्तरत्वद्योतनार्थः, 'से'त्ति तस्य गर्भनिर्गतस्य 'बद्धाइं'ति सामान्यतो बद्धानि 'पुठाइं'ति पोषितानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाढतरबन्धतः 'निहत्ताइं' ति उद्वर्त्तनापवर्तनकरणवर्जशेषकरणायोग्यत्वेन व्यवस्थापितानीत्यर्थः, अथवा बद्धानि, कथम् ?-यतः पूर्वं स्पृष्टानीति, 'कडाइं' ति निकाचितानि सर्वकरणायोग्यत्वेन व्यवस्थापितानीत्यर्थः, 'पट्ठवियाइं' ति मनुष्यगतिपञ्चेन्द्रियजातित्रसादिनामकर्मादिना सहोदयत्वेन व्यवस्थापितानीत्यर्थः, 'अभिनिविट्ठाइं' ति तीव्रानुभावतया निविष्टान, 'अभिसमन्नागयाइं' ति उदयाभिमुखीभूतानीति, ततश्च 'उदिन्नाइं' ति 'उदीर्णानि' स्वत उदीरणाकरणेन चोदितानि ।

व्यतिरेकमाह-'नो उवसंताइं' ति, अनिष्टादीनि व्याख्या तान्येवैकार्थानि वा, 'हीणस्सरे' त्ति अल्पस्वरः 'दीनस्सरे' त्ति दीनस्येव-दुःस्थितस्येव स्वरो यस्य स दीनस्वरः 'अणादेयवयणे पच्चायाए यावि' त्ति, इहैवमक्षरघटना-प्रत्याजातश्चापि-समत्पन्नोऽपि चानादेयवचनो भवतीति ।

शतकं-१, उद्देशकः-७ समाप्तः

## -: शतकं-१ उद्देशकः-८ :-

**वृ.** गर्भवक्तव्यता सप्तमोद्देशकस्यान्ते उक्ता, गर्भवासश्चायुषि सतीत्यायुर्निरूपणायाह, तथाऽऽदिगाथायां यदुक्तं 'बाले' त्ति तदभिधानाय चाष्टमोद्देशकस्तत्र च सूचकसूत्रम्-

**मू. (८५)** *रायगिहे समोसरणं जाव एवं वयासी-एगंतबाले णं भंते ! मणूसे किं नेरइयाउयं पकरेइ तिरिक्खि० मणु देवा० पक० ?, नेरइयाउयं किच्चा नेरइएसु उव० तिरियाउयं कि० तिरिएसु उवव० मणुस्साउयं० मणुस्से० उव० देवाउ० कि० देवलोएसु० उववज्जइ ? ।*

*गोयमा ! एगंतबाले णं मणुस्से नेरइयाउयंपि पकरेइ तिरि० मणु० देवाउयंपि पकरेइ, नेरइयाउयंपि किच्चा नेरइएसु उव० तिरि० मणु० देवाउयं किच्चा तिरि० मणु० देवलोएसु उववज्जइ*

**वृ.** 'एगंतबाले' इत्यादि, 'एकान्तबालः' मिथ्यादृष्टिरविरतो वा, एकान्तग्रहणेन मिश्रतां व्यवच्छिनत्ति, यच्चैकान्तबालत्वे समानेऽपि नानाविधायुर्बन्धनं तन्महारम्भाद्युन्मार्गदेशनादितनुकषायत्वादि अकामनिर्जरादितद्धेतुविशेषवशादिति, अत एव बालत्वे समानेऽप्यविरतसम्यग्दृष्टिर्मनुष्यो देवायुरेव प्रकरोति न शेषाणि ।

एकान्तबालप्रतिपक्षत्वादेकान्तपण्डितसूत्रं, तत्र च-

**मू. (८६)** *एगंतपंडिए णं भंते ! मणुस्से किं नेर० पकरेइ जाव देवाउयं किच्चा देवलोएसु उवव० ?, गोयमा ! एगंतपंडिए णं मणुस्से आउयं सिय पकरेइ सिय नो पकरेइ, जइ पकरेइ नो नेरइया० पकरेइ नो तिरि० नो मणु० देवाउयं पकरेइ, नो नेरइयाउयं किच्चा नेर० उव० नो तिरि० नो मणुस्स० देवाउयं किच्चा देवेसु उव०, से केणट्ठेणं जाव देवा० किच्चा देवेसु उववज्जइ गोयमा ! एगंतपंडियस्स णं मणुसस्स केवलमेव दो गईओ पन्नायंति, तंजहा-अंतकिरिया चेव कप्पोववत्तिया चेव, से तेणट्ठेणं गोयमा ! जाव देवाउयं किच्चा देवेसु उववज्जइ ।*

*बालपंडिएणं भंते ! मणूस्से किं नेरइयाउयं पकरेइ जाव देवाउयं किच्चा देवेसु उववज्जइ गोयमा ! नो नेरइयाउयं पकरेइ जाव देवाउयं किच्चा देवेसु उववज्जइ, से केणट्ठेणं जाव देवाउयं किच्चा देवेसु उववज्जइ ?, गोयमा ! बालपंडिए णं मणुस्से तहारूवस्स समणस्स वा माहणस्स वा अंतिए एगमवि आयरियं धम्मियं सुवयणं सोच्चा निसम्म देसं उवरमइ देसं नो उवरमइ देसं पच्चक्खाइ देसं नो पच्चक्खाइ, से तेणट्ठेणं देसोवरमदेसपच्चक्खाणेणं नो नेरइयाउयं पकरेइ जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*देवाउयं किच्चा देवेसु उववज्जइ, से तेणट्ठेणं जाव देवेसु उववज्जइ ।*

**वृ.** 'एगंतपंडिए णं'ति एकान्तपण्डितः-साधुः 'मणुस्से'त्ति विशेषणं स्वरूपज्ञापनार्थमेव, अमनुष्यस्यैकान्तपण्डितत्वायोगात्, तदयोगश्च सर्वविरतेरन्यस्याभावादिति, 'एगंतपंडिए णं मणुस्से आउयं सिय पकरेइ सिय नो पकरेइ'त्ति, सम्यक्त्वसप्तके क्षपिते न बन्धात्यायुः साधुः अर्वाक् पुनर्बन्धातीत्यत उच्यते-स्यात्प्रकरोतीत्यादि, 'केवलमेव दो गईओ' पन्नायंति'त्ति केवलशब्दः सकलार्थस्ते साकल्येनैव द्वे गती 'प्रज्ञायेते' अवबुध्येते केवलिना, तयोरेव सत्त्वादिति 'अंतकिरिय'त्ति निर्वाणं 'कप्पोववत्तिय'त्ति कल्पेषु-अनुत्तरविमानान्तदेवलोकेषूपपत्ति सैव कल्पोपपत्तिका, इह च कल्पशब्दः सामान्येनैव वैमानिकदेवाऽऽवासाभिधायक इति ।

एकान्तपण्डितद्वितीयस्थानवर्त्तित्वाद्बालपण्डितस्य अतो बालपण्डितसूत्रं, तत्र च- 'बालपंडिए णं'ति श्रावकः 'देसं उवरमइ'त्ति विभक्तिविपरिणामाद्देशात् 'उपरमते' विरतो भवति, ततो 'देसं' स्थूलं प्राणातिपातादिकं 'प्रत्याख्याति' वर्जनीयतया प्रतिजानीते ।। आयुर्बन्धस्य क्रियाः कारणमिति क्रियासूत्राणि पञ्च, तत्र –

**मू.** *(८७) पुरिसे णं भंते ! कच्छंसि वा १ दहंसि वा २ उदगंसि वा ३ दवियंसि वा ४ वलयंसि वा ५ नूमंसि वा ६ गहणंसि वा ७ गहणविदुग्गंसि वा ८ पव्वयंसि वा ९ पव्वयविदुग्गंसि वा १० वणंसि वा ११ वनविदुग्गंसि वा १२ मियवित्तीए मियसंकप्पे मियपणिहाणे मियवहाए गंता एए मिएत्तिकाउं अन्नयरस्स मियस्स वहाए कूडपासं उद्दाइ ।*

*ततो णं भंते ! से पुरिसे कतिकिरए पन्नत्ते ?, गोयमा ! जावं च णं से पुरिसे कच्छंसि वा १२ जाव कूडपासं उद्दाइ तावं च णं से पुरिसे सिय तिकि० सिय चउ० सिय पंच०, से केणट्ठेणं सिय ति० सिय च० सिय पं० ?, गोयमा ! जे भविए उद्दवणयाए नो बंधणयाए नो मारण- याए तावं च णं से पुरिसे काइयाए अहिगरणियाए पाउसियाए तिहिं किरियाहिं पुट्ठे, जे भविए उद्दवणयाएवि बंधणयाएवि नो मारणयाए तावं च णं से पुरिसे काइयाए अहिगरणियाए पाउसियाए पारियावणियाए चउहिं किरियाहिं पुट्ठे, जे भविए उद्दवणयाएवि बंधणयाएवि मारणया एवि तावं च णं से पुरिसे काइयाए अहिगरणियाए पाउसियाए जाव पंचहिं पुट्ठे, से तेणट्ठेणं जाव पंचकिरिए ।*

**वृ.** 'कच्छंसि व'त्ति 'कच्छे' नदीजलपरिवेष्टिते वृक्षादिमति प्रदेशे 'दहंसि व'त्ति ह्रदे प्रतीते 'उदगंसि व'त्त उदके-जलाश्रयमात्रे 'दवियंसि व'त्ति 'द्रविके' तृणादिद्रव्यसमुदाये 'वलयंसि व'त्ति 'वलये' वृत्ताकारनद्याद्युदककुटिलगतियुक्तप्रदेशे 'नूमंसि व'त्ति 'नूमे' अवतमसे 'गहणंसि व'त्ति 'गहने' वृक्षवल्लीलतावितानवीरुत्समुदाये 'गहणविदुग्गंसि व'त्ति 'गहनविदुर्गे' पर्वतैकदेशावस्थितवृक्षवल्यादिसमुदाये 'पव्वयंसि व'त्ति पर्वते 'पव्वयविदुग्गंसि व'त्ति पर्वतसमुदाये 'वणंसि व'त्ति 'वने' एकजातीयवृक्षसमुदाये 'वनविदुग्गंसि व'त्ति नाना विधवृक्षसमूहे 'मिगवित्तीए'त्ति मृगैः-हरिणैर्वृत्ति-जीविका यस्य स मृगवृत्तिकः, स च मृगरक्षकोऽपि स्यादित्यत आह- 'मियसंकप्पे'त्ति मृगेषु सङ्कल्पो-वधाध्यवसायः छेदनं वा यस्यासौ मृगसङ्कल्पः, स च चलचित्ततयाऽपि भवतीत्यत आह-'मियपणिहाणे'त्ति मृगवधैकाग्रचित्तः 'मिगवहाए'त्ति मृगवधाय 'गंत'त्ति गत्वा कच्छदाविति योगः 'कूडपासं'ति कूटं च-मृगग्रहणकारणं गर्त्तादि पाशश्च-तद्बन्धनमिति कूटपाशम्

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

'उद्दाइ'त्ति मृगवधायोद्ददाति, रचयतीत्यर्थः ।

'तओ णं'ति ततः कूटपाशकरणात् 'कइकिरिए'त्ति कतिक्रियः ?, क्रियाश्च कायिक्यादिकाः, 'जे भविए'त्ति यो भव्यो योग्यः कर्त्तेतियावत् 'जावं च ण'मिति शेषः, यावन्तं कालमित्यर्थः, कस्याः कर्त्ता इत्याह-'उद्दवणयाए'त्ति कूटपाशधारणतायाः, ताप्रत्ययश्चेह स्वार्थिकः, 'तावं च णं'ति तावन्तं कालं 'काइयाए'त्ति गमनादिकायचेष्टारूपया 'अहिगरणियाए'त्ति अधिकरणेन-कटपाशरूपेण निर्वृत्ता या सा तथा तया 'पाउसियाए'त्ति प्रद्वेषो-मृगेषु दुष्टभावस्तेन निर्वृत्ता प्राद्वेषिकी तया 'तिहिं किरियाहिं'ति क्रियन्त इति क्रियाः-चेष्टाविशेषाः, 'पारितावणियाए'त्ति परितापनप्रयोजना पारितापनिकी, सा च बद्धे सति मृगे भवति प्राणातिपातक्रिया च घातिते इति

**मू. (८८)** *पुरिसे णं भंते! कच्छंसि वा जाव वणविदुग्गंसि वा तणाइं ऊसविय २ अगणिकायं निस्सरइ तावं च ण भंते! से पुरिसे कतिकिरिए?, गोयमा! सिय तिकिरिए सिय चउकि० सिय पंच० ।*

*से केणट्ठेणं?, गोयमा! जे भविए उस्सवणयाए तिहिं, उस्सवणयाएवि निस्सिरणयाएवि नो दहणयाए चउहिं, जे भविए उस्सवणयाएवि निस्सिरणयाएवि दहणयाएवि तावं च णं से पुरिसे काइयाए जाव पंचहिं किरियाहिं पुट्ठे, से तेणं० गोयमा! ।*

**वृ.** 'ऊसविए'त्ति उत्सर्प ऊसिक्किऊणेत्यर्थ उर्द्धीकृत्येति वा 'निसिरइ'त्ति निसृजति-क्षिपति यावदिति शेषः ।

**मू. (८९)** *पुरिसे णं भंते! कच्छंसि वा जाव वणविदुग्गंसि वा मियवित्तीए मियसंकप्पे मियपणिहाणे मियवहाए गंता एए मियेत्तिकाउं अन्नयरस्स मियस्स वहाए उसुं निसिरइ, ततो णं भंते! से पुरिसे कइकिरिए?, गोयमा! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए ।*

*से केणट्ठेणं?, गोयमा! जे भविए निस्सिरणयाए नो विद्धंसणयाएवि नो मारणयाए तिहिं, जे भविए निस्सिरणयाएवि विद्धंसणयाएवि नो मारणयाए चउहिं, जे भविए निस्सिरणयाएवि विद्धंसणयाएवि मारणयाएवि तावं च णं से पुरिसे जाव पंचहिं किरियाहिं पुट्ठे, से तेणट्ठेणं गोयमा सिय तिकिरिए सिय चउकिरिए सिय पंच किरिए ।*

**वृ.** 'उसुं' ति बाणम् 'आययकण्णायत्तं'ति कर्णं यावदायतः-आकृष्टः कर्णायतः आयतं-प्रयत्नवद् यथा भवतीत्येवं कर्णायत आयकर्णायतस्तम् 'आयामेत्त'त्ति 'आयम्य' आकृष्य 'मग्गओ'त्ति पृष्ठतः 'सयपाणिण'त्ति 'स्वकपाणिना' स्वकहस्तेन 'पुव्वायामणयाए'त्ति पूर्वाकर्षणेण

'से णं भंते! पुरिसे'त्ति 'सः' शिरश्छेत्ता पुरुषः 'मियवेरेणं'ति इह वैरं वैरहेतुत्वाद् वधः पापं वा वैरं वैरहेतुत्वादिति, अथ शिरश्छेतृपुरुषहेतुकत्वादिषुनिपातस्य कथं धनुर्द्धरपुरुषो मृगवधेन स्पृष्ट इत्याकूतवतो गौतमस्य तदभ्युपगमेवार्थमुत्तरतया प्राह-क्रियमाणं धनुःकाण्डादि कृतमिति व्यपदिश्यते?, युक्तिस्तु प्रागवत्, तथा सन्धीयमानं-प्रत्यञ्चायामारोप्यमाणं काण्डं धनुर्वाऽऽरोप्यमाणप्रत्यञ्चं 'सन्धितं' कृतसन्धानं भवति?

तथा 'निर्वृत्त्यमानं' नितरां वर्त्तुलीक्रियमाणं प्रत्यञ्चाकर्षणेन निर्वृत्तितं-वृत्तीकृतं मण्डलाकारं कृतं भवति?, तथा 'निसृज्यमानं' निक्षिप्यमाणं काण्डं निसृष्टं भवति?, यदा च निसृष्टं तदा निसृज्यमानताया धनुर्द्धरेण कृतत्वात् तेन काण्डं निसृष्टं भवति, काण्डनिसर्गाच्च मृगस्तेनैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मारितः, ततश्चोच्यते-'जे मियं मारेइ' इत्यादिति।

**मू. (९०)** *पुरिसे णं भंते ! कच्छंसि वा जाव अन्नयरस्स मियस्स वहाए आययकन्नाययं उसुं आयामेत्ता चिट्ठिज्ञा, अन्नयरे पुरिसे मग्गओ आगम्म सयपामिणा असिणा सीसं छिंदेज्ञा से य उसुं ताए चेव पुव्वायामणयाए तं विंधेज्ञा।*

*से णं भंते ! पुरिसे किं मियवेरेणं पुट्ठे पुरिसवेरेणं पुट्ठे ?, गोयमा ! जे मियं मारेइ से मियवेरेणं पुट्ठे, जे पुरिसं मारेइ से पुरिसवेरेणं पुट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ जाव से पुरिसवेरेणं पुट्ठे ?, से नूणं गोयमा ! कज्जमाणे कडे संधिज्जमाणे संधिए निव्वत्तिज्जमाणे निव्वत्तिए निसिरिज्जमाणे निसिट्ठेत्ति वत्तव्वं सिया ?*

*हंता भगवं ! कज्जमाणे कडे जाव निसिट्ठेत्ति वत्तव्वं सिया, से तेणट्ठेणं गोयमा ! जे मियं मारेइ से मियवेरेणं पुट्ठे, जे पुरिसं मारेइ से पुरिसवेरेणं पुट्ठे ॥ अंतो छण्हं मासाणं मरइ काइयाए जाव पंचहिं किरियाहिं पुट्ठे, बाहिं छण्हं मासाणं मरइ काइयाए जाव पारियावणियाए चउहिं किरियाहिं पुट्ठे।*

**वृ.** इह च क्रियाः प्रक्रान्ताः, ताश्चानन्तरोक्ते मृगादिवधे यावत्यो यत्र कालविभागे भवन्ति तावतीस्तत्र दर्शयन्नाह। 'अन्तो छण्ह'मित्यादि, षण्मासान् यावत् प्रहारहेतुकं मरणं परतस्तु परिणामान्तरापादितमितिकृत्वा षण्मासादूर्ध्वं प्राणातिपातक्रिया न स्यादिति हृदयम्, एतच्च व्यवहारनयापेक्षया प्राणातिपातक्रियाव्यपदेशमात्रोपदर्शनार्थमुक्तम्, अन्यथा यदा कदाऽप्यधिकृतं प्रहारहेतुकं मरणं भवति तदैव प्राणातिपातक्रिया इति।

**मू. (९१)** *पुरिसे णं भंते ! पुरिसे सत्तीए समभिधंसेज्ञा सयपाणिणा वा से असिणा सीसं छिंदेज्ञा तओ णं भंते ! से पुरिसे कतिकिरिए ?*

*गोयमा ! जावं च णं से पुरिसे तं पुरिसं सत्तीए अभिसंधेइ सयपाणिणा वा से असिणा सीसं छिंदइ तावं च णं से पुरिसे काइयाए अहिगरणि० जाव पाणाइवायकिरियाए पंचहिं किरियाहिं पुट्ठे, आसन्नवहएण य अणवकंखवत्तिएणं पुरिसवेरेणं पुट्ठे।*

**वृ.** 'सत्तीए'त्ति शक्त्या-प्रहरणविशेषेण 'समभिधंसेज्ज'त्ति हन्यात् 'सयपाणिण'त्ति स्वकहस्तेन 'से'त्ति तस्य 'काइयाए'त्ति 'कायिक्या' शरीरस्पन्दरूपया 'आधिकरणिक्या' शक्तिखड्गव्यापाररूपया 'प्राद्वेषिक्या' मनोदुष्प्रणिधानेन 'पारितापनिक्या' परितापनरूपया 'प्राणातिपातक्रियया' मारणरूपया। 'आसन्ने'त्यादि शक्त्याऽभिध्वंसकः असिना वा शिरश्छेत्ता पञ्चभि क्रियाभि स्पृष्टः, तथा पुरुषवैरेण च स्पृष्टः, मारितपुरुषवैरभावेन किम्भूतेनेत्याह-आसन्नो वधो यस्माद्वैरात्तत्तथा तेनासन्न- वधकेन, भवति च वैराद्वधो वधकस्य तमेव वध्यमाश्रित्यान्यतो वा तत्रैव जन्मनि जन्मान्तरे वा, यदाह-

॥१॥ वहमारणअब्भक्खानदाणपरधनविलोवणाईणं।
सव्वजहन्नो उदओ दसगुणिओ एक्कसिकयाणं॥ इति

'चः' समुच्चयेऽनवकाङ्क्षणा-परप्राणनिरपेक्षा स्वगतापायपरिहारनिरपेक्षा वा वृत्ति-वर्त्तनं यत्रैव वैरे तत्तथा तेनानवकाङ्क्षणवृत्तिकेनेति॥ क्रियाऽधिकार एवेदमाह-

**मू. (९२)** *दो भंते ! पुरिसा सरिसया सरित्तया सरिव्वया सरिसभंडमत्तोवगरणा अन्नमन्नेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सद्धिं संगामं संगामेन्ति, तत्थ णं एगे पुरिसे पराइणइ एगे पुरिसे पराइज्जइ, से कहमेयं भंते ! एवं ?, गोयमा ! सवीरिए पराइणइ अवीरिए पराइज्जइ ।*

*से केणट्ठेणं जाव पराइज्जइ ?, गोयमा ! जस्स णं वीरियवज्झाइं कम्माइं नो बद्धाइं नो पुट्ठाइं जाव नो अभिसमन्नागयाइं नो उदिन्नाइं उवसंताइं भवंति से णं पराइणइ, जस्स णं वीरियवज्झाइं कम्माइं बद्धाइं जाव उदिन्नाइं नो उवसंताइं भवंति से णं पुरिसे पराइज्जइ ।*

*से तेणट्ठेणं गोयमा ! एवं वुच्चइसवीरिए पराइणइ अवीरिए पराइज्जइ ।*

**वृ.** 'सरिसय'त्ति सदृशकौ कौशलप्रमाणादिना 'सरित्तय'त्ति 'सदृक्त्वचौ' सदृशच्छवी 'सरिव्वय'त्ति सदृग्वयसौ समानयौवनाद्यवस्थौ 'सरिसभंडमत्तोवगरण'त्ति भाण्डं-भाजनं मृन्मयादि मात्रो-मात्रया युक्त उपधि स च कांस्यभाजनादिभोजनभण्डिका भाण्डमात्रा वा-गणिमादिद्रव्यरूपः परिच्छदः उपकरणानि-अनेकधाऽऽवरणप्रहरणादीनि ततः सदृशानि भाण्डमात्रोपकरणानि ययोस्तौ तथा ।

अनेन स समानविभूतिकत्वं तयोरभिहितं, 'सवीरिए'त्ति सवीर्य 'वीरियवज्झाइं' ति वीर्यं वध्यं येषां तानि तथा ॥ वीर्यप्रस्तावादिदमाह–

**मू.** *(९३) जीवा णं भंते ! किं सवीरिया अवीरिया ?, गोयमा ! सवीरियावि अवीरियावि, से केणट्ठेणं ?, गोयमा ! जीवा दुविहा पन्नत्ता, तंजहा-संसारसमावन्नगा य असंसारसमावन्नगा य, तत्थ णं जे ते असंसारसमावन्नगा ते णं सिद्धा, सिद्धा णं अवीरिया, तत्थ णं जे ते संसारसमावन्नगा ते दुविहा पन्नत्ता, तंजहा-सेलेसिपडिवन्नगा य असेलेसिपडिवन्नगा य, तत्थ णं जे ते सेलेसिपडिवन्नगा ते णं लद्धिवीरिएणं सवीरिया करणवीरिएणं अवीरिया, तत्थ णं जे ते असेलेसिपडिवन्नगा ते णं लद्धिवीरिएणं सवीरिया करणवीरिएणं सवीरियावि अवीरियावि, से तेणट्ठेणं गोयमा ! एवं वुच्चइ– जीवा दुविहा पण्णत्ता, तंजहा-सवीरियावि अवीरियावि ।*

*नेरइया णं भंते ! किं सवीरिया अवीरिया ?, गोयमा ! नेरइया लद्धिवीरिएणं सवीरिया करणवीरिएणं सवीरियावि अवीरियावि, से केणट्ठेणं ?, गोयमा ! जेसि णं नेरइयाणं अत्थि उट्ठाणे कम्मे बले वीरिए पुरिसक्कारपरक्कमे ते णं नेरइया लद्धिवीरिएणवि सवीरिया करणवीरिएणवि सवीरिया, जेसि णं नेरइयाणं नत्थि उट्ठाणे जाव परक्कमे ते णं नेरइया लद्धिवीरिएणं सवीरिया करणवीरिएणं अवीरिया, से तेणट्ठेणं०, जहा नेरइया एवं जाव पंचिदियतिरक्खजोणिया, मणुस्सा जहा ओहिया जीवा, नवरं सिद्धवज्जा भाणियव्वा, वाणमंतरजोइसेवमाणिया जहा नेरइया ॥ स सेवं भंते ! सेवं भंते ! त्ति ॥*

**वृ.** 'सिद्धा णं अवीरिय'त्ति सकरणवीर्याभावादवीर्या सिद्धाः 'सेलेसिपडिवन्नगा य'त्ति शीलेशः-सर्वसंवररूपचरणप्रभुस्तस्येयमवस्था शैलेशो वा-मेरुस्तस्येव याऽवस्था स्थिरतासाधर्म्या-त्सा शैलेशी, सा च सर्वथा योगनिरोधे पञ्चह्रस्वाक्षरोच्चारकालमाना तां प्रतिपन्नका ये ते तथा, 'लद्धिवीरिएणं सवीरिए'ति वीर्यान्तरायक्षयक्षयोपशमतो या वीर्यस्य लब्धि सैव तद्धेतुत्वाद्वीर्यं लब्धिवीर्यं तेन सवीर्या, एतेषां च क्षायिकमेव लब्धिवीर्यं ।

'करणवीरिएणं'ति लब्भिवीर्यकार्यभूता क्रिया करणं तद्रूपं करणवीर्यं, 'करणवीरिएणं सवरियावि अवीरियावि'त्त तत्र 'सवीर्या' : उत्थानादिक्रियावन्तः अवीर्यास्तूत्थानादिक्रियाविकलाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते चापर्याप्तयाकालेऽवगन्तव्या इति । 'नवरं सिद्धवज्जा भाणियव्व'त्ति, औधिकजीवेषु सिद्धाः सन्ति मनुष्येषु तु नेति मनुष्यदण्डके वीर्यं प्रति सिद्धस्वरूपं नाध्येयमिति ।

शतकं-१ उद्देशकः-८ समाप्तः

## —: शतकं-१ उद्देशकः-९ :—

**वृ.** अष्टमोद्देशकान्ते वीर्यमुक्तं, वीर्याच्च जीवा गुरुत्वाद्यासादयन्तीति गुरुत्वादिप्रतिपादनपरः तथा सङ्ग्रहण्यां यदुक्तं 'गुरुए'त्ति तत्प्रतिपादनपरश्च नवमोद्देशकः, तत्र च सूत्रम्—

**मू. (९४)** *कहन्नं भंते ! जीवा गरुयत्तं हव्वमागच्छन्ति ?, गोयमा ! पाणाइवाएणं मुसावाएणं अदिन्ना० मेहुण० परि० कोह० माण० माया० लोभ० पे० दोस० कलह० अब्भक्खाण० पेसुन्न० रतिअरति० परपरिवाय० मायामोसमिच्छदंसणसल्लेणं० एव खलु गोयमा ! जीवा गरुयत्तं हव्वमागच्छंति ।*

*कहन्नं भंते ! जीवा लहुयत्तं हव्वमागच्छंति ?, गोयमा ! पाणाइवायवेरमणेणं जाव मिच्छदंसणसल्लवेरमणेणं एवं खलु गोयमा ! जीवा लहुयत्तं हव्वमागच्छन्ति, एवं संसारं आउलीकरेंति एवं परित्तीकरेंति दीहीकरेंति हस्सीकरेंति एवं अनुपरियट्टंति एवं वीइवयंति-पसत्था चत्तारि अप्पसत्था चत्तारि ।*

**वृ.** 'गरुयत्तं'ति 'गुरुकत्वम्' अशुभकर्मोपचयरूपमधस्ताद्गमनहेतुभूतं 'लघुकत्वं' गौरवविपरीतम्, एवम् 'आलीकरिंति'त्ति, इहैवंशब्दः पूर्वोक्ताभिलापसंसूचनार्थः, स चैवम्- 'कहन्नं भंते ! जीवा संसारं आउलीकरेंति ?, गोयमा ! पाणाइवाएण'मित्यादि, एवमुत्तरत्रापि, तत्र 'आउलीकरेंति' प्रचुरीकुर्वन्ति कर्मभिरित्यर्थः ।

'परित्तीकरेंति'त्ति स्तोकं कर्वन्ति कर्मभिरेव, 'दीहीकरेंति'त्ति दीर्घं प्रचुरकालमित्यर्थः, 'हस्सीरकेंति'त्ति अल्पकालमित्यर्थः 'अणुपरियट्टंति'त्ति पौनः-पुन्येन भ्रमन्तीत्यर्थः, 'वीइवयंति'त्ति व्यतिव्रजन्ति व्यतिक्रामन्तीत्यर्थः, 'पसत्था चत्तारि'त्ति लघुत्वपरीतत्वहस्वत्वव्यतिव्रजनदण्डकाः प्रशस्ताः मोक्षाङ्गत्वात्, 'अप्पसत्था चत्तारि'त्ति गुरुत्वाकुलत्वदीर्घत्वानुपरिवर्त्तनदण्डका अप्रशस्ताः अमोक्षाङ्गत्वादिति ॥ गुरुत्वलघुत्वाधिकारादिदमाह—

**मू. (९५)** *सत्तमे णं भंते ओवासंतरे किं गुरुए लहुए गुरुयलहुए अगुरुयलहुए ?, गोयमा नो गुरुए नो लहुए नो गुरुयलहुए अगुरुयलहुए ।*

*सत्तमे णं भंते ! तणुवाए किं गुरुए लहुए गुरुयलहुए अगुरुयलहुए ?, गोयमा ! नो गुरुए नो लहुए गुरुयलहुए नो अगुरुयलहुए ।*

*एवं सत्तमे घनवाए सत्तमे घनोदही सत्तमा पुढवी, उवासंतराइं सव्वाइं जहा सत्तमे ओवासंतरे, (सेसा) जहा तणुवाए, एवं-ओवासवायधणउदहि पुढवी दीवा य सागरा वासा । नेरइया णं भंते ! किं गुरुया जाव अगुरुलहुया ?, गोयमा ! नो गुरुया नो लहुया गुरुयलहुयावि अगुरुलहुयावि ।*

*से केणट्ठेणं ?, गोयमा ! वेउव्वियतेयाइं पडुच्च नो गुरुया नो लहुया गुरुयलहुया नो अगुरुलहुया, जीवं च कम्मणं च पडुच्च नो गुरुया नो लहुया नो गुरुयलहुया अगुरुयलहुया, से*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तेणट्ठेणं जाव वेमाणिया, नवरं नाणत्तं जाणियव्वं सरीरेहिं।*

*धम्मत्थिकाए जाव जीवत्थिकाए चउत्थपएणं। पोग्गलत्थिकाए णं भंते! किं गुरुए लहुए गुरुयलहुए अगुरुयलहुए ?, गोयमा! नो गुरुए नो लहुए गुरुयलहुएवि अगुरुयलहुएवि, से केणट्ठेणं ?, गोयमा! गुरुयलहुयदव्वाइं पडुच्च नो गुरुए नो लहुए गुरुयलहुए नो अगुरुयलहुए, अगुरुयलहुयदव्वाइं पडुच्च नो गुरुए नो लहुए नो गुरुयलहुए अगुरुयलहुए, समया कम्माणि य चउत्थपदेणं।*

*कण्हलेसा णं भंते! किं गुरुया जाव अगुरुयलहुया ?, गोयमा! नो गुरुया नो लहुया गुरुयलहुयावि अगुरुयलहुयावि, से केणट्ठेणं ?, गोयमा! दव्वलेसं पडुच्च ततियपदेणं भावलेसं पडुच्च चउत्थपदेणं, एवं जाव सुक्कलेसा, दिट्ठीदंसणनाणअन्नाणसण्णा चउत्थपदेणं नेयव्वाओ, हेट्ठिल्ला चत्तारि सरीरा नायव्वा ततियपदेणं, कम्म य चउत्थयपएणं, मणजोगो वइजोगो चउत्थएणं पदेणं, कायजोगो ततिएणं पदेणं, सागारोवओगो अनागारोवओगो चउत्थपदेणं, सव्वपदेसा सव्वदव्वा सव्वपज्जवा जहा पोग्गलत्थिकाओ, तीतद्धा अणागयद्धा सव्वद्धा चउतथएणं पदेणं।*

**वृ.** इह चेयं गुरुलघुव्यवस्था–

॥१॥ "निच्छयओ सव्वगुरुं सव्वलहुं वा न विज्जए दव्वं।
वबहारओ उ जुज्जइ बायरखंधेसु नऽन्नेसु॥

॥२॥ अगुरुलहू चउफासो अरूविदव्वा य होंति नायव्वा।
सेसा उ अट्ठफासा गुरुलहुया निच्छयणयस्स॥

'चउफास'त्ति सूक्ष्मपरिणामानि 'अट्ठफास'त्ति बादराणि, गुरुलघुद्रव्यं रूपि, अगुरुलघुद्रव्यं त्वरूपि रूपि चेति, व्यवहारतसतु गुर्वादीनि चत्वार्यपि सन्ति, तत्र च निदर्शनानिगुरुर्लोष्टोऽधोगमनात्, लघुर्धूमः ऊर्द्धगमनात्, गुरुलघुर्वायुस्तिर्यग्गमनात्, अगुरूलघ्वाकाशं तत्स्वभावात्वादिति। एतानि चावकाशान्तरादिसूत्राण्येतदाथाऽनुसारेणावगन्तव्यानि, तद्यथा-

॥१॥ "ओवासवायघनउदहीपुढविदीवा य सागरा वासा।
नेरइयाई अत्थि य समया कम्माइ लेसाओ॥

॥२॥ दिट्ठी दंसणनाणे सन्नि सरीरा य जोग उवओगे।
दव्वपएसा पज्जव तीयाआगामिसव्वद्ध॥ त्ति

'वेउव्वियतेयाइं पडुच्च' त्ति नारकादौ वैक्रियतैजसशरीरे प्रतीत्य गुरुकलघुका एव, यतो वैक्रियतैजसवर्गणात्मके ते, एताश्च गुरुलघुका एव, यदाह–

"ओरालियवेउव्वियआहारगतेय गुरुलहू दव्वं"ति, 'जीवं च कम्मणं च पडुच्च' त्ति जीवापेक्षया कार्मणशरीरापेक्षया च नारका अगुरुलघुका एव, जीवस्यारुपित्वेनागुरुलघुत्वात् कार्मणशरीरस्य च कार्मणवर्गणात्मकत्वात् कार्मणवर्गणानां चागुरुलघुत्वात्, आह च–

"कम्मगमणभासाई एयाइं अगुरुलहुयाइं"ति। 'नाणत्तं जाणियव्वं सरी रेहिं' ति, यस्य यानि शरीराणि भवन्ति तस्य तानि ज्ञात्वाऽसुरादिसूत्राण्यध्येयानीतिहृदयं, तत्रासुरादिदेवा नारकवद्वाच्याः, पृथिव्यादयस्तु औदारिकतैजसे प्रतीत्य गुरुलघवो जीवं कार्मणं च प्रतीत्यागुरुलघवः इति, वायवस्तु औदारिकवैक्रियतैजसानि प्रतीत्य गुरुलघवः, एवं पञ्चेन्द्रियतिर्यञ्चोऽपि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्यास्त्वौदारिकवैक्रियतैजसाहारकाणि प्रतीत्येति।

'धम्मत्थिकाए'त्ति, इह यावत्करणाद् 'अहम्मत्थिकाए आगासत्थिकाए'त्ति दृश्यं 'चउत्थपएणं'ति एते 'अगुरुलहु'इत्यनेन पदेन वाच्याः, शेषाणां तु निषेधः कार्यो, धर्मास्तिकाया-दीनामरूपितयाऽगुरुलघुत्वादिति।

पुद्गलास्तिकायसूत्रे उत्तरं निश्चयनयाश्रयम्, एकान्तगुरुलघुनोस्तन्मतेनाभावात् 'गुरुलहुयदव्वाइं'ति औदारिकादीनि चत्वारि अगुरुलहुयदव्वाइं'ति कार्मणादीनि ३।

'समया कम्माणि य चउत्थपएणं'ति समयाः-अमूर्ता कर्माणि च-कार्मणवर्गणात्मकानीत्य-गुरुलघुत्वमेषां। 'दव्वलेसं पडुच्च तइयपएणं'ति द्रव्यतः कृष्णलेश्या औदारिकादिशरीरवर्ण औदारिकादिकं च गुरुलघ्विितिकृत्वागुरुलघ्वित्यऽनेन तृतीयविकल्पेन व्यपदेश्या, भावलेश्या तु जीवपरिणतिस्तस्याश्चामूर्त्तत्वादगुरुलघ्वित्यनेन व्यपदेश इत्यत आह-'भावलेसं पडुच्च चउत्थ-पदेणं'ति।

'दिट्ठीदंसणे'त्यादि, दृष्ट्यादीनि जीवपर्यायत्वेनागुरुलघुत्वादगुरुलघुलक्षणेन चतुर्थपदेन वाच्यानि। अज्ञानपदंत्विह ज्ञानविपक्षत्वादधीतम्, अन्यथा द्वारेषु ज्ञानपदमेव दृश्यते।

'हेट्ठिल्लिए'त्ति औदारिकादीनि 'तइयपएणं'ति गुरुलघुपदेन, गुरुलघुवर्ग्गणात्मकत्वात्

'कम्मय चउत्थपएणं'ति अगुरुलघुद्रव्यात्मकत्वात् कार्मणशरीराणां, मनोयोगवाग्यो-गौचतुर्थपदेन वाच्यौ, तद्द्रव्याणामगुरुलघुत्वात्, काययोगः कार्मणवर्जस्तृतीयेन, गुरुलघुत्वात्त-द्रव्याणामिति। 'सव्वदव्वे' त्यादि, 'सर्वद्रव्याणि' धर्मास्तिकायादीनि 'सर्वप्रदेशाः' तेषामेव निर्विभागा अंशाः 'सर्वपर्यवाः' वर्णोपयोगादयो द्रव्यधर्म्माः, एते पुद्गलास्तिकायवद् व्यपदेश्याः, गुरुलघुत्वेना- गुरुलघुत्वेन चेत्यर्थः, यतः सूक्ष्माण्यमूर्त्तानि च द्रव्याण्यगुरुलघूनि, इतराणि तु गुरुलघूनि, प्रदेशपर्य- वास्तु तत्तद्रव्यसम्बन्धित्वेन तत्तत्स्वभावा इति॥ गुरुलघुत्वाधिकारादिदमाह-

**मू. (९६)** *से नूणं भंते! लाघवियं अप्पिच्छ अमुच्छ अगेही अपडिबद्धया समणाणं निग्गंथाणं पसत्थं? हंता गोयमा! लाघवियं जाव पसत्थं।*

*से नूणं भंते! अकोहत्तं अमाणत्तं अमायत्तं अलोभत्तं समपाणं निग्गंथाणं पसत्थं?, हंता गोयमा! अकोहत्तं अमाणत्तं जाव पसत्थं।*

*से नूणं भंते! कंखापदोसे खीणे समणे निग्गंथे अंतकरे भवति अंतिमसारीरिए वा बहुमोहेवि य णं पुव्विं विहरित्ता अह पच्छा संवुडे कालं करेति तओ पच्छा सिज्झति ३ जाव अंतं करेइ?, हंता गोयमा! कंखापदोसे खीणे जाव अंत करेति।*

**वृ.** 'लाघवियं'ति लाधवमेव लाघविकम्-अल्पोपधिकम् 'अप्पिच्छ'त्ति अल्पोऽभिलाष आहारादिषु 'अमुच्छ'त्ति उपधावसंरक्षणानुबन्धः 'अगेहि'त्त भोजनादिषु परिभोगकालेऽनासक्ति अप्रतिबद्धता-स्वजनादिषु स्नेहाभाव इत्येतत्पञ्चकमिति गम्यं, श्रमणानां निर्ग्रन्थानां 'प्रशस्तं' सुन्दरम्, अथवा लाघविकं प्रशस्तं, कथम्भूतमित्याह-'अप्पिच्छ' अल्पेच्छरूपमित्यर्थः, एवमित-राण्यपि पदानि।

उक्ता लाघविकस्य प्रशस्तता, तच्च क्रोधाद्यभावाविनाभूतमिति क्रोधादिदोषाभावप्रशस्त-ताऽभिधानार्थं क्रोधादिदोषाभावाविनाभूतकाङ्क्षाप्रदोषक्षयकार्याभिधानार्थं च क्रमेण सूत्रे, व्यक्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च, नवरं काङ्क्षा-दर्शनान्तरग्रहो गृद्धिर्वा सैव प्रकृष्टो दोषः काङ्क्षाप्रदोषः काङ्क्षाप्रद्वेषं वा, रागद्वेषावित्यर्थः । काङ्क्षाप्रदोषः प्रागुक्तः, प्रदोषत्वं च काङ्क्षायास्तद्विषयभूतदर्शनान्तरस्य विपर्यस्तत्वादिति दर्शनान्तरस्य विपर्यस्ततां दर्शयन्नाह–

**मू. (९७)** *अन्नउत्थिया णं भंते ! एवमाइक्खंति एवं भासेंति एवं पन्नवेंति एवं परूवेंति- एवं खलु एगे जीवे एगेणं समएणं दो आउयाइं पकरेति, तंजहा-इहभवियाउयं च परभवियाउयं च, जं समयं इहभवियाउयं पकरेति तं समयं परभवियाउयं पकरेति जं समयं परभवियाउयं पकरेति तं समयं इहभवियाउयं पकरेति, इहभवियाउयस्स पकरणयाए परभवियाउयं पकरेइ, परभवियाउयस्स पकरणयाए इहभवियाउयं पकरेति, एवं खलु एगे जीवे एगेणं समएणं दो आउयाइं पकरेति, तं० -इहभवियाउयं च परभवियाउयं च ।*

*से कहमेवं भंते ? एवं खलु गोयमा ! जण्णं ते अन्नउत्थिया एवमातिक्खंति जाव परभवियाउयं च, जे ते एहमाहंसु मिच्छं ते एवमाहंसु, अहं पुण गोयमा ! एवमाइक्खामि जाव परुवेमि-एवं खलु एगे जीवे एगेणं समएणं एगं आउयं पकरेति, तं० -इह भवियाउयं वा परभवयाउयं वा, जं समयं इहभवियाउयं पकरेति नो तं समयं परभवियाउयं पकरेति, जं समयं परभवियाउयं पकरेइ नो तं समयं इहभवियाउयं पकरेइ, इहभवियाउयस्स पकरणताए नो परभवियाउयं पकरेति, परभवियाउयस्स पकरणताए नो इहभवियाउयं पकरेति ।*

*एवं खलु एगे जीवे एगेणं समएणं एगं आउयं पकरेति, तं० -इहभवियाउयं वा परभवियाउयं वा । सेवं भंते ! सेवं भंते ! त्ति भगवं गोयमे जाव विहरति ।*

**वृ.** 'अन्नुत्थिए' इत्यादि, अन्ययूथं-विवक्षितसङ्घादपरः सङ्घस्तदस्ति येषां तेऽन्ययूथिकाः, तीर्थान्तरीया इत्यर्थः, 'एवम्' इति वक्ष्यमाणम् 'आइक्खंति' त्ति आख्यान्ति सामान्यतः 'भासंतित्ति विशेषतः 'पन्नवेंति' त्ति उपपत्तिभिः 'परूवेंति' ति भेदकथनतः, द्वयोर्जीवयोरेकस्य वा समय-भेदेनायुर्द्वयकरणे नास्ति विरोध इत्युक्तम्–

'एगे जीवे' इत्यादि 'दो आउयाइं पकरेइ' त्ति जीवो हि स्वपर्यायसमूहात्मकः, स च यदैकमायुःपर्यायं करोति तदाऽन्यमपि करोति, स्वपर्यायत्वात्, ज्ञानसम्यक्त्वपर्यायवत्, स्वपर्याय-कर्त्तृ त्वं च जीवस्याभ्युपगन्तव्यमेव, अन्यथा सिद्धत्वादिपर्यायाणामनुत्पादप्रसङ्ग इति भावः, उक्तार्थस्यैव भावनार्थमाह –

'जमि' त्यादि, विभक्तिविपरिणामाद् यस्मिन् समये इहभवो-वर्त्तमानभवो यत्रायुषि विद्यते फलतयैतदिहभवायुः, एवं परभवायुरपि, अनेन चेहभवायुःकरणसमये परभवायुःकरणं नियमितम्, अथ परभवायुःकरणसमये इहभवायुःकरणं नियमयन्नाह-'जं समंय परभवियाउय' मित्यादि, एवमेकसमयकार्यतां द्वयोरप्यभिधायैकक्रियाकार्यतामाह-

'इह भवियाउयस्से' त्यादि, 'पकरणयाए' त्ति करणेन 'एवं खलु' इत्यादि निगमनं । 'जण्णं ते अन्नउत्थिया एमाइक्खंती' त्याद्यनुवादवाक्यास्यान्ते तत् प्रतीतं न केवलमित्ययं वाक्यशेषो दृश्यः, 'जे ते एवमाहंसु मिच्छं ते एवमाहंसु' त्ति तत्र 'आहंसु' त्ति उक्तवन्तः, यच्चायं वर्त्तमान-निर्देशेऽधिकृतेऽतीतनिर्देशः स सर्वो वर्त्तमानः कालोऽतीतो भवतीत्यस्यार्थस्य ज्ञापनार्थः, मिथ्यात्वं चास्यैवम्-एकेनाध्यवसायेन विरुद्धयोरायुषोर्बन्धायोगात्, यच्चोच्यते-पर्यायान्तरकरणे पर्यायान्तरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करोति, स्वपर्यायित्वादिति, तदनैकान्तिकं, सिद्धत्वकरणे संसारित्वाकरणादिति ।

टीकाकारव्याख्यानं त्विहभवायुर्यदा प्रकरोति-वेदयते इत्यर्थ परभवायुस्तदा प्रकरोति बन्धातित्यर्थः, इहभवायुरुपभोगेन परभवायुर्बन्धातीत्यर्थः, मिथ्या चैतत्परमतं, यस्माज्जातमात्रो जीव इहभवायुर्वेदयते, तदैव तेन यदि परभवायुर्बद्धं तदा दानाध्ययनादीनां वैयर्थ्यः स्यादिति, एतच्चायुर्बन्धकालादन्यत्रावसेयम्, अन्यथाऽऽयुर्बन्धकाले इहभवायुर्वेदयेत परभवायुस्तु प्रकरोत्येवेति ।। अन्ययूथिकप्रस्तावादिदमाह-

**मू. (९८)** *तेणं कालेणं तेणं समएणं पासावच्चिज्जे कालासवेसियपुत्ते नामं अनगारे जेणेव थेरा भगवंतो तेणेव उवागच्छति २ त्ता थेरे भगवंते एवं वयासी-थेरा सामाइयं न जाणंति थेरा सामाइयस्स अट्ठं न याणंति थेरा पच्चक्खाणं नयाणंति थेरा पच्चक्खाणस्स अट्ठं न याणंति थेरा संजमं न याणंति थेरा संजमस्स अट्ठं न याणंति थेरा संवरं न याणंति थेरा संवरस्स अट्ठं ण याणंति थेरा विवेगं न याणंति थेरा विवेगस्स अट्ठं न याणंति थेरा विउस्सग्गं ण याणंति थेराविउस्सग्गस्स अट्ठं न याणंति ६ ।*

*तए णं ते थेरा भगवंतो कालासवेसियपुत्तं अनगारं एवं वयासी-जाणामो णं अज्जो ! सामाइयं जाणामो णं अज्जो ! सामाइयस्स अट्ठं जाव जाणामो णं अज्जो ! विउस्सगस्स अट्ठं । तए णं से कालासवेसियपुत्ते अणगारे थेरे भगवंते एवं वयासी- जति णं अज्जो ! तुब्भे जाणह सामाइयं जाणह सामाइयस्स अट्ठं जाव जाणह विउस्सग्गस्स अट्ठं किं भे अज्जो ! सामाइए किं भे अज्जो सामाइयस्स अट्ठे ? जाव किं भे विउस्सगस्स अट्ठे ?, तए णं ते थेरा भगवंतो कालाव- सेसियपुत्तं अनगारं एवंवयासी-आया णे अज्जो ! सामाइए आया णे अज्जो ! सामाइयस्स अट्ठे जाव विउस्सग्गस्स अट्ठे*

*तए णं से कालासवेसियपुत्ते अनगारे थेरे भगवंते एवं वयासी-'जति भे अज्जो ! आया सामाइए आया सामाइयस्स अट्ठे एवं जाव आया विउस्सग्गस्स अट्ठे अवहट्टु कोहमाणमायालोभे किमट्ठंअज्जो ! गरहह ?, कालास० संजमट्ठयाए, से भंते ! किं गरहा संजमे अगरहा संजमे ?, कालास० गरहा संजमे नो अगरहासंजमे, गरहावि णं सव्वं दोसं पविणेति सव्वं बालियं परिन्नाए, एवं खु णे आया संजमे उवहिए भवति, एवं खु णे आया संजमे उवचिए भवति, एवं खु णे आया संजमे उवट्ठिए भवति, एत्थ णं से कालासवेसियपुत्ते अनगारे संबुद्धे थेरे भगवंते वंदति नमंसति २ एवं वयासी-*

*एएसि णं भंते ! पयाणं पुव्विं अन्नाणयाए असवणयाए अबोहियाए अणभिगमेणं अदिट्ठाणं अस्सुयाणं असुयाणं अविन्नायाणं अव्वोगडाणं अव्वोच्छिन्नाणं अनिज्जूढाणं अनुवदारियाणं एयमट्ठं नो सद्दहिए नो पत्तिइए नो रोइए इयाणिं भंते ! एतेसिं पयाणं जाणणयाए सवणयाए बोहीए अभिगमेणं दिट्ठाणं सुयाणं मुयाणं विन्नायाणं वोगडाणं वोच्छिन्नाणं निज्जूढाणं उवधारियाणं एयमट्ठं सद्दहामि पत्तियामि रोएमि एवमेयं से जहेयं तुब्भे वदह ।*

*तए णं ते थेरा भगवंतो कालासवेसियपुत्तं अनगारं एवं वयासी-सद्दाहि अज्जो ! पत्तियाहि अज्जो ! रोएहि अज्जो ! से जहेयं अम्हे वदामो । तए णं से कालासवेसियपुत्ते अनगारे थेरे भगवंतो वंदइ नमंसइ २ एवं वदासी इच्छमि णं भंते ! तुब्भं अंतिए चाउज्जामा धम्माओ पंचमहव्वइयं सपडिक्कमणं धम्मं उवसंपज्जित्ता णं विहरित्तए, अहासुहं देवाणुप्पिया ! मा पडिबंधं ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तए णं से कालासवेसियपुत्ते अनगारे थेरे भगवंते वंदइ नमंसइ वंदित्ता नमंसित्ता चाउज्जामाओ धम्माओ पंचमहव्वइयं सपडिक्कमणं धम्मं उवसंपज्जित्ता णं विहरइ। तए णं से कालासवेसियपुत्ते अनगारे बहूणि वासाणि सामन्नपरियागं पाउणइ जस्सट्ठाए कीरइ नग्गभागे मुंडभावे अण्हाणयं अदंतधुवणयं अच्छत्तयं अनोवाहणयं भूमिसेज्ञा फलहसेज्ञा कट्ठसेज्ञा केसलोओ बंभचेरवासो परधरपसेवो लद्धावलद्धी उच्चावय गामकंटगा बावीसं परिसहोवसग्गा अहियासिज्जंति तमट्ठं आराहेइ २ चरिमेहं उस्सासनीसासेहिं सिद्धे बुद्धे मुक्के परिनिव्वुडे सव्वदुक्खप्पहीणे।*

**वृ.** 'पासावच्चिज्ञे'त्ति पार्श्वापत्यानां-पार्श्वजिनशिष्याणामयं पार्श्वापत्यीयः 'थेरे'ति श्रीमन्महावीरजिनशिष्याः श्रुतवृद्धाः 'सामाइयं'ति समभावरूपं 'न याणंति'त्ति न जानन्ति, सूक्ष्मत्वात्तस्य, 'सामाइयस्स अट्ठं'ति प्रयोजनं कर्मानुपादाननिर्जरणरूपं, 'पच्चक्खाणं'ति पौरुष्यादिनियमं, तदर्थं च-आश्रवद्वानिरोधं, 'संजमं'ति पृथिव्यादिसंरक्षणलक्षणं, तदर्थं च-अनाश्रवत्वं, 'संवरं'ति इन्द्रियनोइन्द्रियनिवर्त्तनं, तदर्थं-तु-अनाश्रवद्वारनिरोधं, 'संजमं'ति पृथिव्यादिसंरक्षणलक्षणं, तदर्थं च-अनाश्रवत्वं, 'संवरं'ति इन्द्रियनोइन्द्रियनिवर्त्तनं, तदर्थं तु-अनाश्रवत्वमेव, 'विवेगं'ति विशिष्टबोधं, तदर्थं च-त्याज्यत्यागादिकं, 'विउस्सग्गं'ति व्युत्सर्गं कायादीनां, तदर्थं चानभिष्वङ्गताम्।

अज्जो!'त्ति हे आर्य! ओकारान्तता सम्बोधने प्राकृतत्वात्, 'किं भे'त्ति किं भवामित्यर्थः, 'आया णे'त्ति आत्मा नः-अस्माकं मते सामायिकमिति, यदाह-"जीवो गुणपडिवन्नो नयस्स दव्वट्ठियस्स सामइयं"ति, सामयिकार्थोऽपि जीव एव, कर्मानुपादानदीनां जीवगुणत्वात् जीवाव्यतिरिक्तत्वाच्च तद्गुणानामिति।

एवं प्रत्याख्यानाद्यप्यवगन्तव्यम्। 'जइ भे अज्जो'त्ति यदि भवतां हे आर्या! स्थविराः सामायिकमात्मा तदा 'अवहट्टु'त्ति अपहृत्य त्यक्त्वा क्रोधादीन् किमर्थं गर्हध्वे? 'निंदामि गरिहामि अप्पाणं वोसिरामि'इति वचनात् क्रोधादीनेव अथवा 'अवज्ज'मिति गम्यते, अयमभिप्रायः-यः सामायिकवान् त्यक्तक्रोधादिश्च स कथं किमपि निन्दति?, निन्दा हि किल द्वेषसम्भवेति, अत्रोत्तरं-संयमार्थमिति, अवद्ये गर्हिते संयमो भवति, अवद्यानुमतेर्व्यवच्छेदनात्, तथा गर्हा संयमः, तद्धेतुत्वात्, न केललमसौ गर्हा कर्मानुपादानहेतुत्वात्संयमो भवति, 'गरहावि'त्ति गर्हैव च सर्वं 'दोसं'ति दोषं-रागादिकं पूर्वकृतं पापं वा द्वेषं वा 'प्रविनयति' क्षपयति, किं कृत्वा?

इत्याह-'सव्वं बालियं'ति बाल्यं-बालतां मिथ्यात्वमविरतिं च 'परिन्नाए'त्ति 'परिज्ञाय'ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया च प्रत्याख्यायेति, इह च गर्हायास्तद्वतश्चाभेदादेकर्तृकत्वेन परिज्ञायेत्यत्र क्त्वाप्रत्ययविधिरदुष्ट इति, 'एवं खु'त्ति एवमेव 'णे'इत्यस्माकम् 'आया संजमे उवहिए'त्ति उपहितः प्रक्षिप्तो न्यस्तो भवति, अथवाऽऽत्मरूपः संयमः 'उपहितः' प्राप्तो भवति, 'आया संजमे उवचिए'त्ति आत्मा संयमविषये पुष्टो भवति आत्मरूपो वा संयम उपचितो भवति, 'उवट्ठिए'त्ति 'उपस्थितः' अत्यन्तावस्थायी।

'एएसि णं भंते! पयाणं'इत्यस्य 'आदिट्ठाण'मित्यादिना सम्बन्धः, कथमदृष्टानामित्याह-'अन्नाणयाए'त्ति अज्ञानो-निर्ज्ञानस्तस्य भावोऽज्ञानता तयाऽज्ञानतया, स्वरूपेणानुपलम्भादित्यर्थः, एतदेव कथमित्याह-'असवणयाए'त्ति अश्रवणः-श्रुतिवर्जितस्तद्भावस्तत्ता तया 'अबोहीए'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अबोधि-जिनधर्मानवाप्तिः, इह तु प्रक्रमान्ममहावीरजिनधर्मानवाप्तिस्तया, अथवौत्पत्तिक्यादिबुद्ध्यभावेन, 'अनभिगमेणं'ति विस्तरबोधाभावेन हेतुना 'अदृष्टानां' साक्षात्स्वयमनुपलब्धानाम् 'अश्रुतानाम्' अन्यतोऽनाकर्णितानाम् 'अस्सुयाणं'ति 'अस्मृतानां दर्शनाकर्णनाभावेनाननुध्याता नाम्

अत एव 'अविज्ञातानां'' विशिष्टबोधाविषयीकृतानाम्, एतदेव कुत इत्याह-'अव्वोकडाणं'ति अव्याकृतानां विशेषतो गुरुभिरनाख्यातानाम्, 'अव्वोच्छिण्णाणं'ति विपक्षादव्यवच्छेदितानाम्, 'अनिज्जूढाणं'ति महतो ग्रन्थात्सुखावबोधाय सङ्क्षेपनिमित्तमनुग्रहपरगुरुभिरनुद्धृतानाम्, अत एवास्माभिः 'अनुपधारितानाम्' अनवधारितानाम्

'एयमट्ठे'त्ति एवंप्रकारोऽर्थ अथवाऽयमर्थः 'नो सद्दहिए'त्ति न श्रद्धितः 'नो पत्तिए'त्ति 'नो' नैव 'पत्तियं'ति प्रीतिरुच्यते तद्योगात् 'पत्तिए'त्ति प्रीतः-प्रीतिविषयीकृतः, अथवा न प्रतीतः न प्रत्ययितो वा हेतुभिः, 'नो रोइए'त्ति न चिकीर्षितः 'एवमेयं से जहेयं तुब्भे वयह'त्ति अथ यथैतद्वस्तु यूयं वदथ एवमेतद्वस्त्विति भावः ।

'चाउज्जामाउ'त्ति चतुर्महाव्रतात्, पार्श्वनाथजिनस्य हि चत्वारि महाव्रतानि, नापरिगृहीता स्त्रीभुज्यते इति मैथुनस्य परिग्रहेऽन्तर्भावादिति, 'सप्पडिक्कमणं' ति पार्श्वनाथधर्मो हि अप्रतिक्रमणः, कारण एव प्रतिक्रमणकरणादन्यथा त्वकरणात्, महावीरजिनस्य तु सप्रतिक्रमणः, कारणं विनाऽप्यवश्यं प्रतिक्रमणकरणादिति, 'देवाणुप्पिय'त्ति प्रियामन्त्रणं 'मा पडिबंधं'ति मा व्याघातं कुरुष्वेति गम्यम् ।

'मुंडभावे'त्ति मुण्डभावो-दीक्षितत्वं 'फलगसेज्ज'त्ति प्रतलातविष्कम्भवत्काष्ठरूपा 'कट्ठसेज्ज'त्ति असंस्कृतकाष्ठशयनं कष्टशय्या वाऽमनोज्ञा वसति 'लद्धाल्लध्धी'त्ति लब्धं च-लाभोऽपलब्धिश्च-अलाभोऽपरिपूर्णलाभो वा लब्धापलब्धिः 'उच्चावय'त्ति उच्चावचाः अनुकूलप्रतिकूला असमञ्जसा वा 'गामकंटय'त्ति ग्रामस्य-इन्द्रियसमूहस्य कण्टका इव कण्टका-बाधकाः शत्रवो ग्रामकण्टकाः, क एते इत्याह-'बावीसं परीसहवसग्ग'त्ति परीषहाः-क्षुदादयस्त एवोपसर्गा-उपसर्जनात् धर्मभ्रंशनात् परीषहोपसर्गा, अथवा द्वाविंशतिपरीषहाः, तथा उपसर्गा-दिव्यादयः कालस्यवैशिकपुत्रः प्रत्याख्यानक्रियया सिद्ध इति तद्विपर्ययभूताप्रत्याख्यानक्रियानिरूपणसूत्रम्–

**मू. (९९)** *भंतेत्ति भगवं गोयमे समणं भगवं महावीरं वंदति नमंसति २ एवं वदासी-से नूनं भंते ! सेट्ठियस्स य तणुयस्स य किवणस्स य खत्तियस्स य समा चेव अपच्चक्खाणकिरिया कज्जइ ?, हंता गोयमा ! सेट्ठियस्स य जाव अपच्चक्खाणकिरिया कज्जइ ।*

*से केणट्ठेणं भंते ! ?, गोयमा ! अविरतिं पडुच्च से तेण० गोयमा ! एवं वुच्चइ-सेट्ठियस्स य तणु० जाव कज्जइ ॥*

**वृ.** तत्र 'भंते'त्ति हे भदन्त ! 'इति' एवमामन्त्रयेति शेषः, अथवा भदन्त ! इतिकृत्वा, गुरुरितिकृत्वेत्यर्थः, 'सेट्ठियस्स'त्ति श्रीदेवताऽध्यासितसौवर्णपट्टविभूषितशिरोवेष्टनोपेतपौरजननायकस्य 'तणुयस्स'त्ति दरिद्रस्य 'किवणस्स'त्ति रङ्कस्य । खत्तियस्स त्ति राज्ञः 'अपच्चक्खाणकिरिय'त्ति प्रत्याख्यानक्रियाया अभावोऽप्रत्याख्यानजन्यो वा कर्मबन्धः, 'अविरइं'त्ति इच्छया अनिवृत्ति, सा हि सर्वेषां समैवेति । अप्रत्याख्यानक्रियायाः- प्रस्तावादिदमाह–

**मू. (१००)** *आहाकम्मं भुंजमाणे समणे निग्गंथे किं बंधइ किं पकरेइ किं चिणाइ किं*

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

*उवचिणाइ ?, गोयमा ! आहाकम्मं णं भुंजमाणे आउयवज्ञाओ सत्त कम्मप्पगडीओ सिढिलबंधण-बद्धाओ धणियबंधणबद्धाओ पकरेइ जाव अनुपरियट्टइ ।*

*से केणट्ठेणं जाव अणुपरियट्टइ ?, गोयमा ! आहाकम्मं णं भुंजमाणे आयाए धम्मं अइक्कमइ आयाए धम्मं अइक्कममाणे पुढविक्कायं नावकंखइ जाव तसकायं नावकंखइ, जेसिंपि य णं जीवाणं सरीराइं आहारमाहारेइ तेवि जीवे नावकंखइ । से तेणट्ठेणं गोयमा ! एवं वुच्चइ-आहाकम्मं णं भुंजमामे आउयवज्ञाओ सत्त कम्मपगडीओ जाव अणुपरियट्टइ ।*

*फासुएसणिज्ञं भंते ! भुंजमाणे किं बंधइ जाव उवचिणाइ ?, गोयमा ! फासुएसणिज्ञं णं भुंजमाणे आउयवज्ञाओ सत्त कम्मपयडीओ धणियबंधणबद्धाओ सिढिलबंधणबद्धाओ पकरेइ जहा संवुडे णं, नवरं आउयं च णं कम्मं सिय बंधइ सिय नो बंधइ, सेसं तहेव जाव वीईवयइ, से केणट्ठेणं जाव वीईवयइ ?*

*गोयमा ! फासुएसणिज्ञं भुंजमाणे समणे निग्गंथे आयाए धम्मं नो अइक्कमइ, आयाए धम्मं अणइक्कममाणे पुढिविक्काइयं अवकंखति जाव तसकायं अवकंखइ, जेसिंपि य णं जीवाणं सरीराइं आहारेइ तेऽवि जी अवकंखति से तेणट्ठेणं जाव वीईवयइ ।।*

**वृ.** 'आहाकम्म'मित्यादि आधया-साधुप्रणिधाने यत्सचेतनमचेनतं क्रियते अचेतनं वा पच्यते चीयते वा गृहादिकं व्यूयते वा वस्त्रादिकं तदाधाकर्म 'किं बंधइ' त्ति प्रकृतिबन्धमाश्रित्य स्पृष्टावस्थापेक्षया वा 'किं पकरेइ' त्ति स्थितिबन्धापेक्षया बद्धावस्थापेक्षय़ा वा 'किं चिणाइ' त्ति अनुभागबन्धापेक्षया निधत्तावस्थाऽपेक्षया वा 'किं उवचिणाइ' त्ति । पदेशबन्धापेक्षया निकाच-नापेक्षया वेति, 'आयाए' त्ति आत्मना धर्म श्रुतधर्मं चारित्रधर्मं वा 'पुढविकायं 'नावकंखइ' त्ति नापेक्षते, नानुकम्पत इत्यर्थः।। आधाकर्मविपक्षश्च प्रासुकैषणीयमिति प्रासुकैषणीयसूत्रम् ।

अनन्तरसूत्रे संसारव्यतिव्रजनमुक्तं, तच्च कर्मणोऽस्थिरतया प्रलोटने सति भवती-त्यस्थिरसूत्रम्–

**मू. (१०१)** *से नूनं भंते ! अथिरे पलोट्टइ नो थिरे पलोट्टति अथिरे भज्ञइ नो थिरे भज्ञइ सासए बालय बालियत्तं असासयं सासए पंडिए पंडियत्तं असासयं ?*

*हंता गोयमा ! अथिरे पलोट्टइ जाव पंडियत्तं असासयं*

*सेवं भंते ! सेवं भंतेत्ति जाव विहरति ।*

**वृ.** तत्र 'अथिरे' त्ति अस्थास्नु द्रव्यं लोष्टादि 'प्रलोटति' परिवर्त्तते अध्यात्मचिन्तायामस्थिरं कर्म तस्य जीवप्रदेशेभ्यः प्रतिसमयचलनेनास्थिरत्वात् 'प्रलोटयति' बन्धोदयनिर्जरणादिपरिणामैः परिवर्त्तते 'स्थिरं' शिलादि न प्रलोटयति, अध्यात्मचिन्ताया तु स्थिरो जीवः, कर्मक्षयेऽपि तस्याव-स्थितत्वात्, नासौ 'प्रलोटयति' उपयोगलक्षणस्वभावान्न परिवर्त्तते, तथा 'अस्थिरं' भङ्गुरस्वभावं तृणादि 'भज्यते' विदलयति, अध्यात्मचिन्तायामस्थिरं कर्म तद् 'भज्यते' व्यपैति, तथा 'स्थिरम्' अभङ्गुरमयःशलाकादि न भज्यते, अध्यात्मचिन्तायां स्थिरो जीवः स च न भज्यते शाश्वतत्वादिति

जीवप्रस्तावादिदमाह-'सासए बालए' त्ति बालको व्यवहारतः शिशुर्निश्चयतोऽसंयतो जीवः स च शाश्वतो द्रव्यत्वात्, 'बालियत्तं' ति इहेकप्रत्ययस्य स्वार्थिकत्वाद्बालत्वं व्यवहारतः शिशुत्वं निश्चयतस्त्वसंयतत्वं तच्चाशाश्वतं पर्यायत्वादिति । एवं पण्डितसूत्रमपि, नवरं पण्डितो व्यवहारेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रज्ञो जीवः निश्चयतस्तु संयत इति ।

शतकं-१ उद्देशकः-९ समाप्तः

## –: शतकं-१ उद्देशकः-१० :–

**वृ.** अनन्तरोद्देशकोऽस्थिरं कर्मेत्युक्तं, कर्मादिषु च कुतीर्थिका विप्रतिपद्यन्ते अतस्तद्विप्रतिपत्तिनिरासप्रतिपादनार्थं तथा सङ्ग्रहण्यां 'चलणाउ' त्ति यदुक्तं तत्प्रतिदनार्थश्च दशमोद्देशको व्याख्यायते, तत्र च सूत्रं–

**मू. (१०२)** *अन्नउत्थिया णं भंते ! एवमाइक्खंति जाव एवं परूवेंति-एवं खलु चलमाणे अचलिए जाव निज्जरिज्जमाणे अनिज्जिण्णे, दो परमाणुपोग्गला एगयओ न साहणंति, कम्हा दो परमाणुपोग्गला एगततो न साहणंति ?, दोण्हं परमाणुपोग्गलाणं नत्थि सिणेहकाए, तम्हा दो परमाणुपोग्गला एगयओ न साहणंति ।*

*तिन्नि परमाणुपोग्गला एगयओ साहणंति, कम्हा ? तिन्नि परमाणुपोग्गला एगयओ साहणंति, तिण्हं परमाणुपोग्गलाणं अत्थि सिणेहकाए, तम्हा तिन्नि परमाणुपोग्गला एगयओ सा०, ते भिज्जमाणा दुहावि तिहावि कज्जंति, दुहाकज्जमाणा एगयओ दिवड्ढे परमाणुपोग्गले भवति एगयओवि दिवड्ढे पर० पो० भवति, तिहा कज्जमाणा तिन्नि पमाणुपोग्गला भवंति ।*

*एवं जाव चत्तारि पंचपरमाणुपो० एगयओ साहणंति, एगयओ साहणित्ता दुक्खत्ताए कज्जंति, दुक्खेवि य णं से सासए सया समियं उवचिज्जइ य अविचिज्जइ य, पुव्विं भासा भासा भासिज्जमाणी भासा अभासा भासासमयवीतिक्कंतं च णं भासिया भासा, जा सा पुव्विं भासा भासा भासिज्जमाणी भासा अभासा भासासमयवीतिक्कंतं च णं भासिया भासा सा किं भासओ भासा अभासओ भासा ?, अभासओ णं सा भासा नो खलु सा भासओ भासा ।*

*पुव्विं किरिया दुक्खा कज्जमाणी किरिया अदुक्खा किरियासमयवीतिक्कंतं च णं कडा किरिया दुक्खा, जा सा पुव्विं किरिया दुक्खा कज्जमाणी किर्या अदुक्खा किरियासमयवीइक्कंतं च णं कडा किरिया दुक्खा सा किं करणओ दुक्खा अकरणओ दुक्खा ?, अकरणओ णं सा दुक्खा नो खलु सा करणओ दुक्खा, सेवं वत्तव्वं सिया-अकिच्चं दुक्खं अफुसं दुक्खं अकज्जमाणकडं दुक्खं अकट्टु अकट्टु पाणभूयजीवसत्ता देवणं वेदंतीति वत्तव्वं सिया ।*

*से कहमेयं भंते ! एवं ?, गोयमा ! जण्णं ते अण्णउत्थिया एवमातिक्खंति जाव वेदणं वेदेंति, त्तव्वं सिया, जे ते एवमाहंसु मिच्छ ते एवमाहंसु, अहं पुण गोयमा ! एवमातिक्खामि, एवं खलु चलमाणे चलिए जाव निज्जरिज्जमाणे निज्जिण्णे, दो परमाणुपोग्गला एगयओ साहणंति, कम्हा ? दो परमाणुपोग्गला एगयओ साहण्णंति ?, दोण्हं परमाणुपोग्गलाणं अत्थि सिणेहकाए, तम्हा दो परमाणुपोग्गला एगयओ सा० , ते भिज्जमाणा दुहा कज्जंति, दुहा कज्जमाणे एगयओ पर० पोग्गले एगयओ प० पोग्गले भवंति, तिण्णि परमा० एगओ आह०, कम्हा तिन्नि परमाणुपोग्गले एग० सा० ?, तिण्हं परमाणुपोग्गलाणं अत्थि सिणेहकाए, तम्हा तिण्णि परमाणुपोग्गलाएगयओ साहणंति, ते भिज्जमाणा दुहावि तिहावि कज्जंति, दुहा कज्जमाणा एगओ परमाणुपोग्गले एगयओ दुपदेसिए खंधे भवति, तिहा कज्जमाणा तिण्णि परमाणुपोग्गला भवंति, एवं जाव चत्तारिपंचपरमाणु पो० एगओ साहणित्ता २ खंधत्ताए कज्जंति, खंधेवि य णं से असासए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सया समियं उवचिज्जइ य अवचिज्जइ य ।*

*पुव्विं भासा अभासा भासिज्जमाणी भासा २ भासासमयवीतिक्कंतं च णं भासिया भासा अभासा जा सा पुव्विं भासा अभासा भासिज्जमाणी भासा २ भासासमयवीतिक्कंतं च णं भासिया भासा अभासा सा किं भासओ भासा अभासओ भासा ?, भासओ णं भासा नो खलु सा अभासओ भासा । पुव्विं किरिया अदुक्खा जहा भासा तहा भाणियव्वा, किरियावि जाव करणओ णं सा दुक्खा नो खलु सा अकरणओ दुक्खा । सेवं वत्तव्वं सिया–*

*किच्चं फुसं दुक्खं कज्जमाणकडं कट्टु २ पाणभूयजीवत्ता वेदणं वेदेंतीति वत्तव्वं सिया ।*

**वृ.** 'चलमाणे अचलिए' त्ति चलत्कर्माचलितं, चलता तेन चलितकार्याकरणात्, वर्त्तमानस्य चातीततया व्यपदेष्टुमशक्यत्वात्, एवमन्यत्रापि वाच्यमिति ।

'एगयओ न साहणंति' त्ति एकत एकत्वेनैकस्कन्धतयेत्यर्थः 'न संहन्येते' न संहतौ-मिलितौ स्यातां, 'नत्थि सिणेहकाए' त्ति स्नेहपर्यवराशिर्नास्ति, सूक्ष्मत्वात्, त्र्यादियोगे तु स्थूलत्वात्सोऽस्ति 'दुक्खत्ताए कज्जंति' त्ति पञ्च पुद्गलाः संहत्य दुःखतया-कर्मतया क्रियन्ते, भवन्तीत्यर्थः, 'दुक्खेऽवि य णं' ति कर्मापि च 'से' त्ति तत् शाश्वतमनादित्वात् 'सय' त्ति सर्वदा 'समियं' ति सम्यक् सपरिमाणं वा 'चीयते' चयं याति 'अपचीयते' अपचयं याति ।

तथा 'पुव्वं' ति भाषणात्प्राक् 'भास' त्ति वाग्द्रव्यसंहति 'भास' त्ति सत्यादिभाषा स्यात्, तत्कारणत्वात्, विभङ्गज्ञानित्वेन वा तेषां मतमात्रमेतत् निरुपपत्तिकमुन्मत्तकवचनवदतो नेहोपपत्तिरत्यर्थं गवेषणीया, एवं सर्वत्रापीति, तथा 'भासिज्जमाणी भासा अभास' त्ति निसृज्यमान-वाग्द्रव्याणि अभाषा, वर्त्तमानसमयस्यातिसूक्ष्मत्वेन व्यवहारानङ्गत्वादिति, 'भासासमयविइक्कंतं च णं' ति इह क्तप्रत्ययस्य भावार्थत्वाद् विभक्तिवि- परिणामाच्च भाषासमयव्यतिक्रमे च 'भासिय' त्ति निसृष्टा सती भाषा भवति, प्रतिपाद्यस्याभिधेये प्रत्ययोत्पादकत्वादिति, 'अभाशओ णं भास' त्ति अभाषमणास्य भाषा, भाषणात्पूर्वं पश्चाच्च तदभ्युपगमात्, 'नो खलु भासओ' त्ति भाष्यमाणायास्तस्या अनभ्युपगमादिति ।

तथा-'पुव्वं किरिए' त्यादि, क्रिया कायादिका सा यावन्न क्रियते तावत् 'दुक्ख' त्ति दुःखहेतुः, 'कज्जमाण' त्ति क्रियमाणा क्रिया 'न दुक्खा' न दुःखहेतुः, क्रियासमयव्यतिक्रान्ते च क्रियायाः क्रियमाणताव्यतिक्रमे च कृत सती क्रिया दुःखेति, इदमपि तन्मतमात्रमेव निरुपपत्तिकम्, अथवा पूर्वं क्रिया दुःखा, अनभ्यासात्, क्रियमाणा क्रिया न दुःखा, अभ्यासात्, कृता क्रिया दुःखा, अनुताप- श्रमादेः, 'करणओ दुक्ख' त्ति करणमाश्रित्य करण काले कुर्वत इत्यर्थः 'अकरणओ दुक्ख' त्ति अकरणमाश्रित्याकुर्वत इतियावत्, 'नो खलु सा करणओ दुक्खत्ति' अक्रियमाणत्वे दुःखतया तस्या अभ्युपगमात् ।

'सेवं वत्तव्वं सिया' अथैवं पूर्वोक्तं वस्तु वक्तव्यं स्यादुपपन्नत्वादस्येति ।

अथान्ययूथिकान्तरमतमाह-'अकृत्यम्' अनागतकालापेक्षयाऽनिर्वर्त्तनीयं जीवैरिति गम्यं 'दुःखम्' असातं तत्कारणं वा कर्म, तथाऽकृतत्वादेवास्पृश्यम्-अबन्धनीयं, तथा क्रियमाणं वर्त्तमान-काले कृतं चातीतकाले तन्निषेधादक्रियमाणकृतं, कालत्रयेऽपि कर्मणो बन्धनिषेधाद्



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

अकृत्वाऽकृत्वा, आभीक्ष्णये द्विर्वचनं, दुःखमिति प्रकृतमेव, के? इत्याह-प्राणभूतजीवसत्त्वाः, प्राणादिलक्षणं चेदम्–

॥ १ ॥ "प्राणा द्वित्रिचतुः प्रोक्ताः, भूतास्तु तरवः स्मृताः ।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा इतीरिताः ॥

'वेयणं'ति शुभाशुभकर्मवेदनां पीडां वा 'वेदयन्ति' अनुभवन्ति, इत्येतद्वक्तव्यं स्यात्, एतस्यैवोपपद्यमानत्वाद्, यार्धच्छिकं हि सर्वं लोके सुखदुःखमिति, यदाह-

॥ १ ॥ "अतर्कितोपस्थितमेव सर्वं, चित्रं जनानां सुखदुःखजातम् ।
काकस्य तालेन यथाऽभिधातो, न बुद्धिपूर्वोऽत्र वृथाऽभिमानः ॥

'से कहमेयं'ति अथ कथमेतद् भदन्त ! 'एवम्?' अन्ययूथिकोक्तन्यायेन? इति प्रश्नः 'जं णं ते अण्उत्थिया' इत्याद्युत्तरं, व्याख्या चास्य प्राग्वत्, मिथ्या चैतदेवं-यदि चलदेव प्रथमसमये चलितं न भवेत्तदा द्वितीयादिष्वपि तदचलितमेवेति न कदाचनापि चलेत्, अत एव वर्त्तमानस्यापि विवक्षयाऽतीतत्वं न विरुद्धम्, एतच्च प्रागेव निर्णीतमिति न पुनरुच्यते, यच्चोच्यते-चलितकार्याकरणादचलितमेवेति, तदयुक्तं, यतः प्रतिक्षणमुत्पद्यमानेषु स्थासकोशादिवस्तुष्वन्त्यक्षणभावि वस्तु आद्यक्षणे स्वकार्यं न करोत्येव, असत्त्वाद्, अतो यदन्त्यसमयचलित कार्यं विवक्षितं परेण तदाद्यसमयचलितं यदि न करोति तदा कइव दोषोऽत्र?, कारणानां स्वस्वकार्यकरणस्वभावत्वादिति

यच्चोक्तं-द्वौ परमाणू न संहन्येते, सूक्ष्मतया स्नेहाभावात्, तदयुक्तम्, एकस्यापि परमाणोः स्नेहसम्भवात्, सार्द्धपुद्गलस्य संहतत्वेन तैरेवाभ्युपगमाच्च, यत उक्तम्-"तिन्नि परमाणुपोग्गला एगयओ साहणंति ते भिज्जमाणा दुहावि तिहावि कज्जति, दुहा कज्जमाणा एगओ दिवड्ढे"त्ति, अनेन हि सार्द्धपुद्गलस्य संहतत्वाभ्युपगमेन तस्य स्नेहोऽभ्युपगत एवेत्यतः कथं परमाण्वोः स्नेहाभावेन सङ्घाताभाव इति, यच्चोक्तम्-एकतः सार्द्ध एकतः सार्द्ध इति, एतदप्यचारु, परमाणोरर्द्धीकरणे परमाणुत्वाभावप्रसङ्गात्, तथा यदुक्तं-पञ्च पुद्गलाः संहताः कर्मतया भवन्ति, तदप्यसङ्गतं, कर्मणोऽनन्तपरमाणुतयाऽनन्तस्कन्धरूपत्वात्, पञ्चाणुकस्य च स्कन्धमात्रत्वात्, तथा कर्म जीवावरणस्वभावमिष्यते, तच्च कथं पञ्चपरमाणुस्कन्धमात्ररूपं सदसङ्ख्यातप्रदेशात्मकं जीवमावृणुयादिति ।

तथा यदुक्तं-कर्म च शाश्वतं, तदपि असमीचीनं, कर्म्मणः शाश्वतत्वे क्षयोपशमाद्यभावेन ज्ञानादीनां हानेरुत्कर्षसय चाभावप्रसङ्गात्, दृश्यते च ज्ञानादिहानिवृद्धी, तता यदुक्तं-कर्म सदा चीयतेऽपचीयते चेति, तदप्येकान्तशाशवतत्वे नोपपद्यि इति ।

यच्चोक्तं-भाषणात्पूर्वं भाषा तद्धेतुत्वात्, तदयुक्तमेव, औपचारिकत्वात्, उपचारस्य च तत्त्वतोऽवस्तुत्वात्, किं च-उपचारस्तात्त्विके वस्तुनि सति भवतीति तात्त्विकी भाषाऽस्तीति सिध्धम्, यच्चोक्तं-भाष्यमाणाऽभाषा, वर्त्तमानसमयस्याव्यावहारिकत्वात्, तदप्यसम्यग्, वर्त्तमानसमयस्यैवास्तित्वेन व्यवहाराङ्गत्वाद् अतीतानागतयोश्च विनष्टानुत्पन्नतयाऽसत्त्वेन व्यवहारानङ्गत्वादिति, यच्चोक्तं-भाषासमयेत्यादि, तदप्यसाधु, भाष्यभाणभाषाया अभावे भाषासमय इत्यस्याभिलापस्याभावप्रसङ्गात्, यश्च प्रतिपाद्यस्याभिधेये प्रत्ययोत्पादकत्वादिति हेतुः सोऽनैकान्तिकः, करादिचेष्टानामभिधेयप्रतिपादकत्वे सत्यपि भाषात्वासिद्धेः । तथा यदुक्तम्-अभाषकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाषेति, तदसङ्गततरम्, एवं हि सिद्धस्याचेतनस्य वा भाषाप्राप्तिप्रसङ्ग इति।

एवं क्रियाऽपि वर्त्तमानकाल एव युक्ता, तस्यैव सत्त्वादिति, यच्चानभ्यासाभ्यासादिकं कारणमुक्तं तच्चानैकान्तिकम्, अनभ्यासादावपि यतः काचित्सुखादिरूपैव, तथा यदुक्तम्-अकरणतः क्रिया दुःखेति, तदपि प्रतीतिबाधितं, यतः करणकाल एव क्रिया दुःखा वा सुखा वा दृश्यते, न पुनः पूर्वं पश्चाद्वा, तदसत्त्वादिति।

तथा यदुक्तम् 'अकिच्च' मित्यादि यदृच्छदमताश्रयणात्, तदप्यसाधीयो, यतो यद्यकरणादेव कर्म दुःखं सुखं वा स्यात् तदा विविधैहिकपारलौकिकानुष्ठानाभावप्रसङ्गः स्यात्, अभ्युपगतं च किञ्चित्पारलौकिकानुष्ठानं तैरपि चेति, एवमेतत्सर्वमज्ञानविजृम्भितम्, उक्तं च वृद्धैः-

॥१॥ "परतित्थियवत्तव्वय पढमसए दसमयंमि उद्देसे।
विब्भंगीणादेसा मइभेया वावा सा सव्वा॥

॥२॥ सब्भूयमसब्भूय भंगा चत्तारि होंति विब्भंगे
उम्मत्तवायसरिसं तो अण्णाणंति निद्दिट्ठं॥

सद्भूते-परमाणौ असद्भूतं-अर्धादि १, असद्भूते-सर्वगात्मनि सद्भूतं चैतन्यं २, सद्भूते-परमाणौ सद्भूतं-निष्प्रदेशत्वम् ३, असद्भूते-सर्वगात्मनि असद्भूतं कर्तृत्वमिति ४। 'अहं पुण गोयमा! एवमाइक्खामी" त्यादि तु प्रतीतार्थमेवेति, नवरं 'दोण्हं परमाणुपोग्गलाणं अत्थि सिणेहकाए'त्ति एकस्यापि परमाणोः शीतोष्णस्निग्धरूक्षस्पर्शानामन्यतरदविरूद्धं स्पर्शद्वयमेकदैवास्ति, ततो द्वयोरपि तयोः स्निग्धत्वभावात् स्नेहकायोऽस्त्येव, ततश्च तौ विषमस्नेहात्संहन्येते, इदं च परमतानवृत्त्योक्तम्, अन्यथा रूक्षावपि रूक्षत्ववैषम्ये संहन्येते एव, यदाह-

॥१॥ "समनिद्धयाए बंधो न होइ समलुक्खयाएवि न होइ।
वेमायनिध्धलुक्खत्तणेण बंधो उ खंधाणं॥

'खंधेवि णं से असासए'त्ति उपचयापचयिकत्वात्, अत एवाह-'सया समिय'मित्यादि, 'पुव्विं भासा अभास'त्ति भाष्यत इति भाषा भाषणाच्च पूर्वं न भाष्यते इति न भाषेति 'भासिज्जमाणि भासा भास'त्ति शब्दार्थोपपत्तेः 'भासिया अभास'त्ति शब्दार्थवियोगात्। 'पुव्विं किरिया अदुक्ख'त्ति करणात्पूर्वं क्रियैव नास्तीत्यसत्त्वादेव च न दुःखा, सुखापि नासौ, असत्त्वादेव, केवलं परमतानुवृत्त्याऽदुःखेत्यक्तं 'जहा भास'त्ति वचनात्, 'कज्जमाणि किरिया दुक्खा' सत्त्वात्, इहापि यत्क्रियमाणा क्रिया दुःखेत्युक्तं तत्परमतानवृत्त्यैव, अन्यथा सुखाऽपि क्रियमाणैव क्रिया, तथा 'किरियासमयवितिक्कंतं च ण' मित्यादि दृश्यमिति।

'किच्चं दुक्ख'मित्यादि, अनेन च कर्म्मसत्ताऽऽवेदिता, प्रमाणसिद्धत्वादस्य, तथाहि-इह यद्द्वयोरिष्टशब्दादिविषयसुखसाधनसमेतयोरेकस्य दुःखलक्षणं फलमन्यस्येतरत् न तद्विशिष्टहेतुमन्तरेण संभाव्यते, कार्यत्वाद्, घटवत्, यश्चासौ विशिष्टो हेतुः स कर्मेति, आह च-

॥१॥ "जो तुल्लसाहणाणं फले विसेसो न सो विणा हेउं।
कज्जत्तणओ गोयम! घडो व हेऊ य से कम्मं॥

पुनरप्यन्ययूथिकान्तरमतमुपदर्शयन्नाह-

**मू. (१०३)** *अन्नउत्थिया णं भंते! एवमाइक्खंति जाव-एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेंति, तंजहा-इरियावहियं च संपराइयं च, [ जं समयं इरियावहियं पकरेइ तं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समयं संपराइयं पकरेइ, जं समयं संपराइयं पकरेइ तं समयं इरियावहियं पकरेइ, इरियावहियाए पकरणताए संपराइयं पकरेइ संपराइयपकरणयाए इरियावहियं पकरेइ,*

*एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेति, तंजहाइरियावहियं च संपराइयं च। से कहमेयं भंते एवं ?, गोयमा ! जं णं ते अन्नउत्थिया एवमाइक्खंति तं चेव जाव जे ते एवमाहंसु मिच्छ ते एवामाहंसु, अहं पुण गोयमा ! एवमाइक्खामि ४-एवं खलु एगे जीवे एगसमयए एक्कं किरियं पकरेइ ] परउत्थियवत्तव्वं नेयव्वं, ससमयवत्तव्वयाए नेयव्वं जाव इरियावहियं संपरा इयं वा।*

**वृ.** तत्र च 'इरियावहियं' ति ईर्या-गमनं तद्विषयः पन्था-मार्ग ईर्यापथस्तत्र भवा ऐर्यापथिकी, केवलकाययोगप्रत्ययः कर्मबन्ध इत्यर्थः, 'संपराइयं च' त्ति संपरैति-परिभ्रमति प्राणी भवे एभिरिति संपरायाः-कषायास्तत्प्रत्यया या सा साम्परायिकी, कषायहेतुकः कर्मबन्ध इत्यर्थः।

'परउत्थियवत्तव्वं नेयव्वं' ति इह सूत्रेऽन्ययूथिकवक्तव्यं स्वयमुच्चारणीयं, ग्रन्थगौरवभयेनालिखितत्वात्तस्य, तच्चेदम्-'जं समयं संपराइयं पकरेइ तं समयं इरियावहियं पकरेइ० इरियावहिया पकरणयाए संपराइयं पकरेइ संपराइयपकरणयाए इरियावहियं पकरेइ, एवं खलु एगे जीवे एगेणं समएणं दो किरियाओ पकरेइ, तंजहा-इरियावहियं च संपराइयं चे' ति।

'ससमयवत्तव्वयाए नेयव्वं' सूत्रमिति गम्यं, सा चैवम्-'से कहमेयं भंते ! एवं ?, गोयमा जन्नं ते अन्नउत्थिया एवमाइक्खंति जाव संपराइयं च जे ते एव माहंसु मिच्छ ते एवमाहंसु, अहं पुण गोयमा ! एवमाइक्खामि ४-एवं खलु एगे जीवे एगेणं समएणं एगं किरियं पकरेइ तंजहा' इत्यादि पूर्वोक्तानुसारेणाध्येयमिति।

मिथ्यात्वं चास्यैवम्-ऐर्यापथिकी क्रियाऽकषायोदयप्रभवा इतरा तु कषायप्रभवेति कथमेकस्यैकदा तयोः संभवः ?, विरोधादिति ॥ अनन्तरं क्रियोक्ता, क्रियावतां चोत्पादो भवतीत्युत्पादविरहप्ररूपणायाह–

**मू. (१०४)** *निरयगई णं भंते ! केवतियं कालं विरहिया उववाएणं पन्नत्ता ?, गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं बारस मुहुत्ता, एवं वक्कंतीपयं भाणियव्वं निरवसेसं।*

*सेवं भंते ! सेवं भंते त्ति जाव विहरइ।*

**वृ.** 'वक्कंतीपयं' ति व्युत्क्रान्ति-जीवानामुत्पादस्तदर्थं पदं-प्रकरणं व्युत्क्रान्तिपदं तच्च प्रज्ञापनायां षष्ठं, तच्चार्थलेशत एवं द्रष्टव्यं-पञ्चेन्द्रियतिर्यग्गतौ मनुष्यगतौ देवगतौ चोत्कर्षतो द्वादश मुहूर्ताः जघन्यतस्त्वेकसमय उत्पादविरह इति, तथा–

॥१॥ "चउवीसई मुहुत्ता १ सत्त अहोरत्त २ तह य पन्नरस ३।
मासो य ४ दो य ५ चउरो ६ छम्मासा ७ विरहकालो उ॥

॥२॥ उक्कोस रयणाइसु सव्वासु जहन्नओ भवे समओ।
एमेव य उव्वट्टण संखा पुण सुरवरा तुल्ला॥

सा चेयम्-

॥१॥ "एगो य दो य तिन्नि य संखमसंखा व एगसमएणं।
उववज्जंतेवइया उव्वट्टंतावि एमेव॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–तिर्यग्गतौ च विरहकालो यथा–

॥१॥ "भिन्नमुहुत्तो विगलिंदियाण संमुच्छिमाण य तहेव ।
बारस मुहुत्त गब्भे उक्कोस जहन्नओ समओ ॥

–एकेन्द्रियाणां तु विरह एव नास्ति, मनुष्गतौ तु –

॥१॥ "बारस मुहुत्त गब्भे मुहुत्त संमुच्छिमे चउव्वीसं ।
उक्कोस विरहकालो दोसुवि जहन्नओ समओ ॥

–देवगतौ तु–

॥१॥ "भवणवणजोइसोहम्मीसाणे चउवीसइ मुहुत्ता उ ।
उक्कोसविरहकालो पंचसुवि जहन्नओ समओ ॥

॥२॥ नवदिन वीस मुहुत्ता बारस दस चेव दिनमुहुत्ताओ ।
बावीस अद्धं चिय पणयालअसीइदिवससयं ॥

॥३॥ संखेज्जा मासा आणयपाणएसु तह आरणच्चुए वासा ।
संखेज्जा विन्नेया गेवेज्जेसु अओ वोच्छं ॥

॥४॥ हेट्ठिम वाससयाइं मज्झि सहस्साइ उवरिमे लक्खा ।
संखेज्जा विन्नेया जह संखेणं तु तीसुंपि ॥

॥५॥ पलिया असंखभागो उक्कोसो होइ विरहकालो उ ।
विजयाइसु निद्दिट्ठो सव्वेसु जहन्नओ समओ ॥

॥६॥ उववायविरहकालो इय एसो वण्णिओ उ देवेसु ।
उव्वट्टणावि एवं सव्वेसु होइ विण्णेया ॥

॥७॥ जहन्नेण एगसमओ उक्कोसेणं तु होंति छम्मासा ।
विरहो सिद्धिगईए उव्वट्टणवज्जिया नियमा ॥

शतकं-१ उद्देशकः-१० समाप्तः

**शतकं-१ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभय देवसूरि विरचिता भगवती अङ्गसूत्रस्य प्रथम शतकस्य टीका परिसमाप्ता ।**

## शतकं-२

**वृ.** व्याख्यातं प्रथमं शतमथ द्वितीयं व्याख्यायते, तत्रापि प्रथमोद्देशकः, तस्यचायम् अभिसम्बन्धः-प्रथमशतान्तिमोद्देशकान्ते जीवानामुत्पादविरहोऽभिहितः, इह तुतेषामेव उच्छ्वासादि चिन्त्यत इत्येवंसबम्बन्धस्यास्येदमुपोदघातसूत्रानन्तरसूत्रम्-

**–: शतकं-२ उद्देशकः-१ :–**

**मू. (१०५)** *ऊसासखंदए वि य १ समुग्धाय २ पुढवं ३ दिय ४ अन्नअत्थिभासा ५ य ।*
*देवा य ६ चमरचंचा ७ समय ८ खित्त ९ त्थिकाय १० बीयसए ॥*

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

**मू. (१०६)** *तेणं कालेणं तेणं समएणं रायगिहे नामं नगरे होत्था, वण्णओ, सामी समोसढे परिसा निग्गया धम्मो कहिओ पडिगया परिसा।*

*तेणं कालेणं २ जेट्ठे अंतेवासी जाव पज्जुवासमाणे एवं वयासी-जे इमे भंते ! बेइंदिया तेइंदिया चउरिंदिया पंचेंदिया जीवा एएसि णं आणामं वा पाणामं वा उस्सासं वा नीसासं वा जाणामो पासामो, जे इमे पुढविक्काइया जाव वणस्सइकाइया एगिंदिया जीवा एएसि णं आणामं वा पाणामं वा उस्सासं वा निस्सासं वा न याणामो न पासामो, एएसि णं भंते ! जीवा आणमंति वा पाणमंति वा उस्ससंति वा नीससंति वा।*

*हंता गोयमा ! एएवि य णं जीवा आणमंति वा पाणमंति वा उस्ससंति वा नीससंति वा।*

**वृ.** 'जे इमे'इत्यादि, यद्यप्येकेन्द्रियाणामागमादिप्रमाणाज्जीवत्वं प्रतीयते तथाऽपि तदुच्छसादीनां साक्षादनुपलम्भाज्जीवशरीरस्य च निरुच्छसादेरपि कदाचिद्दर्शनात् पृथिव्यादिषूच्छसादिविषया शङ्का स्यादिति तन्निरासाय तेषामुच्छसादिकमस्तीत्येतस्या गमप्रमाण-प्रसिद्धस्य प्रदर्शनपरमिदं सूत्रमवगन्तव्यमिति । उच्छ्वासाद्यधिकाराज्जीवादिषु पञ्चविंशतौ पदेषूच्छसादिद्रव्याणां स्वरूपनिर्णयाय प्रश्नयन्नाह--

**मू. (१०७)** *किण्णं भंते ! जीवा आण० पा० उ० नी० ?, गोयमा ! दव्वओ णं अनंत-पएसियाइं दव्वाइं खेत्तओ णं असंखपएसोगाढाइं कालओ अन्नयरट्ठितीयाइं भावओ वन्नमंताइं गंधमंताइं रसमंताइं फासमंताइं आणमंति वा पाणमंति वा ऊससंति वा नीससंति वा, जाइं भावओ वन्नमंताइं आण० पाण० ऊस० नीस० ताइं किं एगवन्नाइं आणमंति पाणमंति ऊस० नीस० ?, आहारगमोनेयव्वो जाव तिचउपंचदिसिं।*

*किण्णं भंते ! नेरइया आ० पा० उ० नी० तं चेव जाव नियमा छद्दिसिं आ० पा० उ० नी० जीवा एगिंदिया वाधाया य निव्वाधाया य भाणियव्वा, सेसा नियमा छद्दिसिं।*

*वाउयाए णं भंते ! वाउयाए चेव आणमंति वा पाणमंति वा उससंति वा नीससंति वा ? हंता गोयमा ! जाव नीससंति वा।*

**वृ.** 'किण्णं भंते ! जीवे'त्यादि, किमित्यस्य सामान्यनिर्देशत्वात् 'कानि' किंविधानि द्रव्याणीत्यर्थः। 'आहारगमो नेयव्वो'त्ति प्रज्ञापनाया अष्टाविंशतितमाहारपदोक्तसूत्रपद्धतिरिहाध्येयेत्यर्थः, सा चेयम्-'दुवन्नाइं तिवन्नाइं जाव पंचवन्नाइंपि, जाइं वन्नओ कालाइं ताइं किं एगगुणकालाइं जाव अनंतगुणकालाइंपि' इत्यादिरिति ॥ जीवा एगिंदिए'त्यादि, जीवा एकेन्द्रियाश्च 'वाघाया य निव्वाघाया य'त्ति मतुब्लोपाद् व्याघातनिर्व्याघातवन्तो भणितव्याः।

इह चैवं पाठेऽपि निर्व्याघातशब्दः पूर्वं द्रष्टव्यः, तदभिलापस्य सूत्रे तथैव दृश्यमानत्वात्, तत्र जीवा निर्व्याघाताः सव्याघाताः सूत्रे एव दर्शिताः, एकेन्द्रियास्त्वेवम्-'पुढविक्काइया णं भंते कइदिसं आणमंति ४ ? गोयमा ! निव्वाघाएणं छद्दिसिं वाघायं पडुच्च सिय तिदिसि'मित्यादि। एवमप्कायादिष्वपि, तत्र निर्व्याघातेन षड्दिशं षड्दिशो यत्रानमनदौ तत्तथा, व्याघातं प्रतीत्य स्यात्त्रिदिशं स्याच्चतुर्दिशं स्यात्पञ्चदिशमानमन्ति ४, यतस्तेषां लोकान्तवृत्तावलोकेन त्र्यादिदिक्षूच्छसादिपुद्गलानां व्याघातः संभवतीति 'सेसा नियमा छद्दिसिं'ति शेषा नारकादित्रसाः षड्दिशमानमन्ति, तेषां हि त्रसनाड्यन्तर्भूतत्वात् षड्दिशमुच्छसादिपुद्गलग्रहोऽस्त्येवेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैकेन्द्रियाणामुच्छ्सादिभावादुच्छ्सादेश्च वायुरूपत्वात् किं वायुकायिकानामप्युच्छ्सादिना वायुनैव भवितव्यमुतान्येन केनापि पृथिव्यादीनामिव तद्विलक्षणेन ? इत्याशङ्क्यां प्रश्नयन्नाह-'वाउया ए ण'मित्यादि, अथोच्छ्सस्यापि वायुत्वादन्येनोच्छ्सवायुना भाव्यं तस्याप्यन्येनैवमनवस्था, नैवमचेतनत्वात्तस्य, किंच योऽयमुच्छ्सवायुः स वायुत्वेऽपि न वायुसंभाव्यौदारिकवैक्रियशरीररूपः तदीय पुद्गलानामानप्राणसञ्ज्ञितानामौदारिकवैक्रियशरीरपुद्गलेभ्योऽनन्तगुणप्रदेशत्वेन सूक्ष्मतयैतच्छरीराव्यपदेश्यत्वात्, तथा च प्रत्युच्छ्सादीनामभाव इति नानवस्था

**मू. (१०८)** *वाउयाए णं भंते ! वाउयाए चेव अणेगसयसहस्सखुत्तो उद्दाइत्ता २ तत्थेव भुज्जो भुज्जो पच्चायाति ?, हंता गोयमा ! जाव पच्चायाति । से भंते किं पुट्ठे उद्दाति अपुट्ठे उद्दाति ?, गोयमा ! पुट्ठे उद्दाइ नो अपुट्ठे उद्दाइ ।*

*से भंते ! किं ससरीरि निक्खमइ असरीरी निक्खमइ?, गोयमा ! सिय ससरीरी निक्खमइ सिय असरीरी निक्खमइ । से केणट्ठेणं भंते ! एवं वुच्चइ सिय ससरीरी निक्खमइ सिय असरीरी निक्खमइ ?, गोयमा ! वाउयायस्स णं चत्तारि सरीरया पन्नत्ता, तंजहा-ओरालिए वेउव्विए तेयए कम्मए, ओरालियवेउव्वियाइं विप्पजहाय तैयकम्मएहिं निक्खमति ।*

*से तेणट्ठेणं गोयमा ! एवं वुच्चइ-सिय ससरीरी सियअसरीरी निक्खमइ ।*

**वृ.** 'वाउकाए णं भंते'इति, अयं च प्रश्नो वायुकायप्रस्तावाद्विहितोऽन्यथा पृथिवीकायिकादीनामपि मृत्वा स्वकाये उत्पादोऽस्त्येव, सर्वेषामेषां कायस्थितेरसङ्ख्याततयाऽनन्ततया चोक्तत्वात्, यदाह–

॥ १ ॥ "अस्सङ्खोसप्पिणीउस्सप्पिणीओ एगिंदियाण उ चउण्हं ।
ता चेव ऊ अनंता वणस्सईए उ बोद्धव्वा ॥

तत्र वायुकायो वायुकाय एवानेकशतसहकृत्वः 'उद्दाइत्त'त्ति 'अपहृत्य' मृत्वा 'तत्थेव'त्ति वायुकाय एव 'पच्चायाइ'त्ति 'प्रत्याजायते' उत्पद्यते ।

'पुट्ठे उद्दाइ'तति स्पृष्टः स्वकायशस्त्रेण परकायशस्त्रेण वा 'अपद्रवति' म्रियते 'नो अपुट्ठे'त्ति सोपक्रमापेक्षमिदं, 'निक्खमइ'त्ति स्वकडेवरान्निःसरति, 'सिय ससरीरी'त्ति स्यात्-कथञ्चित् 'ओरालियवेउव्वियाइं विप्पजहाये'त्यादि, अयमर्थःऔदारिकवैक्रियापेक्षयाऽशरीरी तैजसकार्मणापेक्षया तु सशरीरी निष्क्रामतीति ।

वायुकायस्य पुनः पुनस्तत्रैवोत्पत्तिर्भवतीत्युक्तम्, अथ कस्यचिन्मुनेरपि संसारचक्रापेक्षया पुनः पुनस्तत्रैवोत्पत्ति स्यादिति दर्शयन्नाह–

**मू. (१०९)** *मडाई णं भंते नियंठे नो निरुद्धभवे नो निरुद्धभवपवंचे नो पहीणसंसारे नो पहीणसंसारवेयणिज्जे नो वोच्छिन्नसंसारे णो वोच्छिन्नसंसारवेयणिज्जे नो निट्ठियट्ठे नो निट्ठियट्ठकरणिज्जे पुनरवि इत्थत्तं हव्वमागच्छति ?*

*हंता गोयमा ! मडाई णं नियंठे जाव पुनरवि इत्थत्तं हव्वमागच्छइ ।*

**वृ.** 'मडाई णं भंते ! नियंठे' इत्यादि, मृतादी-प्रासुकभोजी, उपलक्षत्वादेषणीयादी चेति दृश्यं, 'निर्ग्रन्थः-' साधुरित्यर्थः 'हव्वं' शीघ्रमागच्छतीति योगः । किंविधः सन् ? इत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नो निरुद्धभवे'त्ति अनिरुद्धाग्रेतजन्मा, चरमभवाप्राप्त इत्यर्थः, अयं च भवद्वयप्राप्तव्य-मोक्षोऽपि स्यादित्याह-'नो निरुद्धभवपवंचे'त्ति प्राप्तव्यभवविस्तार इत्यर्थः, अयं च देवमनुष्य-भवप्रपञ्चापेक्षयाऽपि स्यादित्यत आह-'नो पहीणसंसारे'त्ति अप्रहीणचतुर्गतिगमन इत्यर्थः, यत एवमत एव 'नो पहीणसंसारवेयणिज्ञे'त्ति अप्रक्षीणसंसारवेद्यकर्म्मा, अयं च सकृच्चतुर्गतिगम-नतोऽपि स्यादित्य आह-'नो वोच्छन्नसंसारे'त्ति अत्रुटितचतुर्गतिगमनानुबन्ध इत्यर्थः, अत एव 'नो वोच्छिन्नसंसारवेयणिज्ञे'त्ति 'नो' नैव व्यवच्छिन्नम्-अनुबन्धव्यवच्छेदेन चतुर्गतिगमनवेद्यं कर्म यस्य स तथा, अत एव 'निट्ठयट्ठे'त्ति अनिष्ठितप्रयोजनः ।

अत एव 'नो निट्ठियट्ठकरणिज्ञे'त्ति 'नो' नैव निष्ठितार्थानामिव करणीयानि-कृत्यानि यस्य स तथा, यत एवंविधोऽसावतः पुनरपीति, अनादौ संसारे पूर्वं प्राप्तमिदानीं पुनर्विशुद्धचरणा-वाप्तेः सकाशादसम्भावनीयम् 'इत्थत्थं'ति 'इत्यर्थम्' एनमर्थम्-अनेकशस्तिर्यङ्नरनाकिनार-कगतिगमनलक्षणम् 'इत्थत्त'मिति पाठान्तरं तत्रानेन प्रकारेणेत्थं तद्भाव इत्थत्वं, मनुष्यादित्वमिति भावः, अनुस्वारलोपश्च प्राकृतत्वात्, 'हव्वं'ति शीघ्रम् 'आगच्छइ'त्ति प्राप्नोति, अभिधीयते च-कषायोदयात्प्रतिपतितचरणानां चारित्रवतां संसारसागरपरिभ्रमणं, यदाह-"जइ उवसंतकसाओ लहइ अनंतं पुणोवि पडिवायं" ति । स च संसारचक्रगतो मुनिजीवः प्राणादिना नामषट्केन कालभेदेन युगपच्च वाच्यः स्यादिति बिभणिषुः प्रश्नयन्नाह–

**मू. (११०)** *से णं भंते ! किं वत्तव्वं सिया ? गोयमा ! पाणेति वत्तव्वं सिया भूतेति वत्तव्वं सिया जीवेत्ति वत्तव्वं० सत्तेति वत्तव्वं० विन्नूत्ति वत्तव्वं० वेदेति वत्तव्वं सिया पाणे भूए जीवे सत्ते विन्नू वेएति वत्तव्वं सिया ।*

*से केणट्ठेणं भंते ! पाणेत्ति वत्तव्वं सिया जाव वेदेति वत्तव्वं सिया ?, गोयमा ! जम्हा आ० पा० उ० नी० तम्हा पाणेति वत्तव्वं सिया, जम्हा भूते भवति भविस्सति य तम्हा भूएत्ति वत्तव्वं सिया, जम्हा जीवे जीवइ जीवत्तं आउयं च कम्मं उवजीवइ तम्हा जीवेत्ति वत्तव्वं सिया, जम्हा सत्ते सुहासुहेहिं कम्मेहिं तम्हा सत्तेत्ति वत्तव्वं सिया, जम्हा तित्तकडुयकसायअंबिलमहुरे रसे जाणइ तम्हा विन्नूत्ति वत्तव्वं सिया, वेदेइ य सुहदुक्खं तम्हा वेदेति वत्तव्वं सिया ।*

*से तेणट्ठेणं जाव पाणेत्ति वत्तव्वं सिया जाव वेदेति वत्तव्वं सिया ।*

**वृ.** 'से णमि'त्यादि, तत्र 'सः' निर्ग्रन्थजीवः किंशब्दः प्रश्ने सामान्यवाचित्वाच्च नपुंसकलिङ्गेन निर्दिष्टः 'इति' एवमन्वर्थयुक्ततयेत्यर्थः, वक्तव्यः स्यात्, प्राकृतत्वाच्च सूत्रे नपुसकलिङ्गताऽस्येति, अन्वर्थयुक्तशब्दैरुच्यमानः किमसौ वक्तव्यः स्यात् ? इति भावः । अत्रोत्तरं-'पाणेत्ति वत्तव्व'-मित्यादि, तत्र प्राण इत्येतत्तं प्रति वक्तव्यं स्यात् यदोच्छसादि- मत्त्वमात्रमाश्रित्य तस्य निर्देशः क्रियते, एवं भवनादिधर्मविवक्षया भूतादिशब्दपञ्चकवाच्यता तस्य कालभेदेन व्याख्येया, यदा तूच्छसादिधर्मैर्युगपदसौ विवक्ष्यते तदा प्राणो भूतो जीवः सत्त्वो विज्ञो वेदयितेत्येतत्तं प्रति वाच्यं स्यात्, अथवा निगमनवाक्यमेवेदमतो न युगपत्पक्षव्याख्या कार्येति ।

'जम्हा जीवे'इत्यादि, यस्मात् 'जीवः' आत्माऽसौ 'जीवति' प्राणान् धारयति, तथा 'जीवत्वम्' उपयोगलक्षणम् आयुष्कं च कर्म 'उपजीवति' अनुभवति तस्माज्जीव इति वक्तव्यं स्यादिति । 'जम्हा त्ते सुभासुभेहिं'ति सक्तः-आसक्तः शक्तो वा-समर्थः सुन्दरासुन्दरासु चेष्टासु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा सक्तः- संबद्धः शुभाशुभैः कर्मभिरिती ।

**मू. (१११)** *मडाई णं भंते ! नियंठे निरुद्धभवे निरुद्धभवपवंचे जाव निट्ठियट्ठकरणिज्ने नो पुनरवि इत्थत्तं हव्वमागच्छति ?, हंता गोयमा ! मडाई णं नियंठे जाव नो पुनरवि इत्थत्तं हव्वमागच्छति से णं भंते ! किंति वत्तव्वं सिया ?*

*गोयमा ! सिद्धेत्ति वत्तव्वं सिया बुद्धेत्ति वत्तव्वं सिया मुत्तेत्ति वत्तव्वं० पारगएत्ति व० परंपरगएत्ति व० सिद्धे बुद्धे मुत्ते परिनिव्वुडे अंतकडे सव्वदुक्खप्पहीणेत्ति वत्तव्वं सिया ।*

*सेवं भंते ! सेवं भंते ! त्ति भगवं गोयमे समणं भगवं महावीरं वंदइ नमंसइ २ संजमेणं तवसा अप्पाणं भावेमाणे विहरति ।*

**वृ.** अनन्तरोक्तस्यैवार्थस्य विपर्ययमाह-'पारगए'त्ति पारगतः संसारसागरस्य 'भाविनि भूतवदि'त्युपचारादिति 'परंपरागए'त्ति परम्परया-मिथ्यादृष्ट्यादिगुणस्थानकानां मनुष्यादिसुगतीनां वा पारम्पर्येण गतो भवम्भोधिपारं प्राप्तः परम्परागतः ।

इहानन्तरं संयतस्य संसारवृद्धिहानी उक्ते सिद्धत्वं चेति, अधुना तु तेषामन्येषां चार्थानां व्युत्पादनार्थं स्कन्दकचरितं विवक्षुरिदमाह-

**मू. (११२)** *तेण कालेणं तेणं समएणं समणे भगवं महावीरे रायगिहाओ नगराओ गुणसिलाओ चेइयाओ पडिनिक्खमइ पडिनिक्खमित्ता बहिया जणवयविहारं विहरइ ।*

*तेणं कालेणं तेणं समएणं कयंगलानामं नगरी होत्था वण्णओ, तीसे णं कयंगलाए नगरीए बहिया उत्तरपुरच्छिमे दिसीभाए छत्तपलासए नामं चेइए होत्थ वण्णओ, तए णं समणे भगवं महावीरे उप्पन्ननाणदंसणधरे जाव समोसरणं परिसा निगच्छत्ति, तीसे णं कयंगलाए नगरीए अदूरसामंते सावत्थी नामं नयरी होत्था वन्नओ, तत्थ णं सावत्थीए नयरीए गद्दभालिस्स अंतेवासी खंदए नामं कच्चायणस्सगोत्ते परिव्वायगे परिवसइ रिउव्वेदजजुव्वेदसामवेदअहव्वणवेद इतिहासपंचमाणं निग्घंटुछट्ठाणं चउण्हं वेदाणं संगोवंगाण सरसहस्साणं सारए वारए धारए पारए सडंगवी सट्ठितंतविसारए संखाणे सिक्खाकप्पे वागरणे छंदि निरुत्ते जोतिसामयणे अन्नेसु य बहूसु बंभण्णएसु परिव्वायएसु य नयेसु सुपरिनिट्ठिए यावि होत्था ।*

*तत्थ णं सावत्थीए नयरीए पिंगलए नामं नियंठे वेसालियासावए परिवसइ, तए णं से पिंगलए नामं नियंठे वेसालियसावए अन्नया कयाइं जेणेव खंदए कच्चायणस्सगोत्ते तेणेव उवागच्छइ २ खंदगं कच्चायणस्सगोत्तं इणमक्खेवं पुच्छए-मागहा ! किं सअंते लोए अनंते लोए १ सअंते जीवे अनते जीवे २ सअंता सिद्धी अनंता सिद्धी ३ सअंते सिद्धे अनंते सिद्धे ४ केण वा मरणेणं मरमाणे जीवे वड्ढति वा हायतिवा ५ ?, एतावं ताव आयक्खाहि वुच्चमाणे एवं ।*

*तएणं से खंदए कच्चा० गोत्ते पिंगलएणं नियंठेणं वेसालीसावएणं इणमक्खेवं पुच्छिए समाणे संकिए कंखिए वितिगिच्छिए भेदसमावन्ने कलुसमावन्ने नो संचाइए पिंगलयस्स नियंठस्स वेसालियसावयस्स किंचिवि पमोक्खमक्खाइउं, तुसिणीए संचिट्ठइ, तए णं से पिंगले नियंठे वेसालीसावए खंदयं कच्चायणस्सगोत्तं दोच्चंपि तच्चंपि इणमक्खेवं पुच्छे-मागहा ! किं सअंते लोए जाव केण वा मरणेणं मरमाणे जीवे वड्ढइ वा हायति वा ?*

*एतावं ताव आइक्खाहि वुच्चमाणे एवं, ततेणं खंदए कच्चा० गोत्ते पिंगलएणं नियंठेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेसालीसावएणं दोच्चंपितच्चंपि इणमक्खेवं पुच्छिए समाणे संकिए कंखिए वितिगिच्छिए भेदसमावन्ने कलुसमावन्ने नो संचाएइ पिंगलयस्स नियंठस्स वेसालिसावयस्स किंचिवि पमोक्खमक्खाउं तुसिणीए संचिट्ठइ।। तए णं सावत्थीए नयरीए सिंघाडग जावमहापहेसु महया जणसंमद्दे इ वा जणवूहे इ वा परिसा निगच्छइ।

तए णं तस्स खंदयस्स कच्चायणस्सगोत्तस्स बहुजणस्स अंतिए एयमट्ठं सोच्चा निसम्म इमेयारूवे अब्भत्थिए चिंतिए पत्थिए मनोगए संकप्पे समुप्पज्जित्था-एवं खलु समणे भगवं महावीरे कयंगलाए नयरीए बहिया छत्तपलासए चेइए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ, तं गच्छमि णं समणं भगवं महावीरं वंदामि नमंसामि, सेयं खलु मे समणं भगवं महावीरं वंदित्ता नमंसित्ता सक्कारेत्तासम्माणित्ता कल्लाणं मंगलं देवयं चेइयं पज्जुवासित्ता इमाइं च णं एयारूवाइं अट्ठाइं हेऊइं पसिणाइं कारणाइं पुच्छित्तएत्तिकट्टु एवं संपेहेइ २ – जेणेव परिव्वायावसहे तेणेव उवागच्छइ २ त्ता तिदंडं च कुंडियं च कंचणियं च करोडियं च भिसियं च केसरियं च छन्नालयं च अंकुसयं च पवित्तयं च गणेत्तियं च छत्तयं च वाहणाओ य पाउयाओ च धाउरत्ताओ य गेण्हइ गेण्हइत्ता परिव्वायावसहाओ पडिनिक्खमइ पडिनिक्खमइत्ता तिदंडकुंडियकंचणियकरोडियभिसियकेसरियछन्नालयअंकुसयपवित्तगणेत्तियहत्थगए छत्तोवाहणसंजुत्ते धाउरत्तवत्थपरिहिए सावत्थीए नगरीए मज्झंमज्झेणं निगच्छइ निगच्छइत्ता जेणेव कयंगला नगरी जेणेव छत्तपलासए चेइए जेणेव समणे भगवं महावीरे तेणेव पहारेत्थ गमणाए।

गोयमाइं समणे भगवं महावीरे भगवं गोयमं एवं वयासीदच्छिसि णं गोयमा! पुव्वसंगतियं, कहं भंते!?, खंदयं नाम, से काहं वा किहं वा केवच्चिरेण वा?, एवं खलु गोयमा! तेणं कालेणं २ सावत्थीनामं नगरी होत्था वन्नओ, तत्थ णं सावत्थीए नगरीए गद्दभालिस्स अंतेवासी खंदए नामं कच्चायणस्सगोत्ते परिव्वायए परिवसइ तं चेव जाव जेणेव ममं अंतिए तेणेव पहारेत्थ गमणाए, से तं अदूरागते बहुसंपत्ते अद्धाणपडिवन्ने अंतरापहे वट्टइ।

अज्जेव णं दच्छिसि गोयमा!, भंतेत्ति भगवं गोयमे समणं भगवं वंदइ नमंसइ २ एवं वदासी-पहू णं भंते! खंदए कच्चायणस्सगोत्ते देवाणुप्पियाणं अंतिए मुंडे भवित्ता अगाराओ अनगारियं पव्वइत्तए?, हंता पभू, जावं च णं समणे भगवं महावीरे भगवओ गोयमस्स एयमट्ठं परिकहेइ तावं च णं से खंदए कच्चायणस्सगोत्ते तं देसं हव्वमागते, तए णं भगवं गोयमे खंदए कच्चायणस्सगोत्ते तेणेव उवागच्छइ २ त्ता खंदयं कच्चायणस्सगोत्तं एवं वयासी-हे खंदया! सागयं खंदया! सुसागयं खंदया! अनुरागयं खंदया! सागयमनुरागयं खंदया! से नूणं तुमं खंदया!

सावत्थीए नयरीए पिंगलएयं नियंठेणं वेसालियसावएणं इणमक्खेवं पुच्छिए-मागहा! किं सअंते लोगे अनंते लोगे? एवं तं चेव जेणेव इहं तेणेव हव्वमागए, से नूणं खंदया! अट्ठे समट्ठे हंता अत्थि, तए णं से खंदए कच्चा० भगवं गोयमं एवं वयासी-से केणट्ठेणं गोयमा! तहारूवे नाणी वा तवस्सी वा जेणं तव एस अट्ठे मम ताव रहस्सकडे हव्वमक्खाए? जओ णं तुमं जाणसि, तए णं से भगवं गोयमे खंदयं कच्चायणस्सगोत्तं एवं वयासी -

–एवं खलु खंदया! मम धम्मायरिए धम्मोवएसए समणे भगवं महावीरे उप्पन्ननाणदंसणधरे अरहा जिणे केवली तीयपच्चुप्पन्नमणागयवियाणए सव्वन्नू सव्वदरिसी जेणं ममं एस अट्ठे तव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताव रहस्सकडे हव्वमक्खाए जओ णं अहं जाणामि खंदया ! तए णं से खंदए कच्चायणस्सगोत्ते भगवं गोयमं एवं वयासी–

गच्छामो णं गोयमा ! तव धम्मायरियं धम्मोवदेसयं समणं भगवं महावीरं वंदामो नमंसामो जाव पज्जुवासामो, अहासुहं देवाणुप्पिया ! मा पडिबंधं, तए णं से भगवं गोयमे खंदएणं कच्चायण-स्सगोत्तेणं सद्धिं जेणेव समणे भगवं महावीरे तेणेव पहारेत्थ गमणयाए ! तेणं कालेणं २ समणे भगवं महावीरे वियडभोतीयावि होत्था, तए णं समणस्स भगवओ महावीरस्स वियट्टभोगियस्स सरीरं ओरालं सिंगारं कल्लाणं सिवं धन्नं मंगल्लं सस्सिरीयं अणलंकियविभूसियं लक्खणवंजणघ-उणोववेयं सिरीए अतीव २ उवसोभमाणे चिट्ठइ ।

तएणं से खंदए कच्चायणस्सगोत्ते समणस्स भगवओ महावीरस्स वियट्टभोगिस्स सरीरं ओरालं जाव अतीव २ उवसोभेमाणं पासइ २ त्ता हट्ठतुट्ठचित्तमाणंदिए पीइमणे परमसोमणस्सिए हरिसवसविसप्पमाणहियए जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ त्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणप्पयाहिणं करेइ जाव पज्जुवासइ । खंदयाति समणे भगवं महावीरे खंदयं कच्चाय० एवं वयासी-से नूणं तुमं खंदया ! सावत्थीए नयरीए पिंगलएणं नियंठेणं वेसालिय-सावएणं इणमक्खेवं पुच्छिए मागहा ! किं सअंते लोए अनंते लोए एवं तं चेव जाव जेणेव मम अंतिए तेणेव हव्वमागए, से नूणं खंदया ! अयमट्ठे समट्ठे ?, हंता अत्थि –

जेविय ते खंदया ! अयमेयारूवे अब्भत्थिए चिंतिए पत्थिए मणोगए संकप्पे समुप्पज्जित्था-किं सअंते लोए अणंते लोए ? तस्सविय णं अयमट्ठे-एवं खलु मए खंदया ! चउव्विहे लोए पन्नत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावओ । दव्वओ णं एगे लोए सअंते ?, खेत्तओ णं लोए असंखेज्जाओ जोयणकोडाकोडीओ आयामविक्खंभेणं असंखेज्जाओ जोयणकोडाकोडीओ परिक्खेवेणं प० अत्थि पुण सअंते २, कालओ णं लोए न कयावि न आसी न कयावि न भवति न कयावि न भविस्सति प० अत्थि पुण सअंते २, कालओ णं लोए ण कयावि न आसी न कयावि न भवति न कयावि न भविस्सति भविंसु य भवति य भविस्सइ य धुवे नितिए सासते अक्खए अव्वए अवट्ठिए निच्चे, नत्थि पुण से अंते ३ ।

भावओ णं लोए अनंता वन्न पज्जवा गंध० रस० फासपज्जवा अनंता संठाणपज्जवा अनंता गुरुयलहुयपज्जवा अनंता अगुरुयलहुयपज्जवा, नत्थि पुण से अंते ४, सेत्तं खंदगा ! दव्वओ लोए सअंते खेत्तओ लोए सअंते कालतो लोए अनंते भावओ लोए अनंते । जेवि य ते खंदया ! जाव सअंते जीवे अनंते जीवे, तस्सवि य णं अयमट्ठे-एवं खलु जाव दव्वओ णं एगे जीवे सअंते, खेत्तओ णं जीवे असंखेज्जपएसिए असंखेज्जपदेसोगाढे अत्थि पुण से अंते, कालओ णं जीवे न कयावि न आसि जाव निच्चेनत्थि पुण से अंते, भावओ णं जीवे अनंता नाणपज्जवा अनंता दंसणप० अनंता चरित्तप० अनंता गुरुलहुयप० अनंता अगुरुलहुयप० नत्थि पुण से अंते, सेत्त दव्वओ जीवे सअंते खेत्तओ जीवे सअंते कालओ जीवे अनंते भावओ जीवे अनंते ।

जेवि य ते खंदया पुच्छ (इमेयारूवे चिंतिए जाव सअंता सिद्धी अनंता सिद्धी, तस्सवि य णं अयमट्ठे खंदया !-मए एवं खलु चउव्विहा सिद्धी प०, तं० -दव्वओ ४, दव्वओ णं एगा सिद्धी) खेत्तओ णं सिद्धी पणयालीसं जोयणसहस्साइं दोन्नि य अउणापन्नजोयणसए किंचि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विसेसाहिए परिक्खेवेणं अत्थि पुण से अंते, कालओ णं सिद्धी न कयावि न आसि, भावओ सिद्धि अनंता।*

*जेवि य ते खंदया! जाव किं अनंते सिद्धे तं चेव जाव दव्वओ णं एगे सिद्धे सअंते, खे० सिद्धे असंखेज्जपएसिए असंखेज्जपदेसोगाढे, अत्थि पुण से अंते, कालओ णं सिद्धे सादीए अपज्जवसिए नत्थि पुण से अंते, भा० सिद्धे अनंता नाणपज्जवा अनंता दंसणपज्जवा जाव अनंता अगुरुलहुयप० नत्थि पुण से अंते, सेत्तं दव्वओ सिद्धे सअंते खेत्तओ सिद्धे सअंते का० सिद्धे अनंते भा० सिद्धे अनंते। जेवि य ते खंदया! इमेयारूवे अब्भत्थिए चिंतिए जाव समुप्पज्जित्था-केण वा मरणेणं मरमाणे जीवे वड्ढति वा हायति वा?, तस्सवि य णं अयमट्ठे एवं खलु खंदया!-मए दुविहे मरणे पन्नत्ते, तंजहा-बालमरणे य पंडियमरणे य।*

*से किं तं बालमरणे?, २ दुवालसविहे प०, तं-वलयमरणे वसट्टमरणे अंतोसल्लमरणे तब्भवमरणे गिरिपडणे तरुपडणे जलप्पवेसे जलणप्प० विसभक्खणे सत्थोवाडणे वेहाणसे गिद्धपट्ठे*

*इच्चेतेणं खंदया! दुवालसविहेणं बालमरणेणं मरमाणे जीवे अनंतेहिं नेरइय भवग्गहणेहिं अप्पाणं संजोएइ तिरियमणुदेव० अनाइयं च णं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारं अनुपरियट्टइ, सेत्तं मरमाणे वड्ढइ २, सेत्तं बालमरणे। से किं तं पंडियमरणे?, २ दुविहे प०, तं० - पाओवगमणे य भत्तपच्चक्खाणे य।*

*से किं तं पाओवगमे?, २ दुविहे प० तं० -नीहारिमे य अनीहारिमे य नियमा अप्पडिकमे, सेत्तं पाओवगमणे। से किं तं भत्तपच्चक्खाणे?, २ दुविहे पं० तं० -नीहारिमे य अनीहारिमे य, नियमा सपडिक्कमे, सेत्तं भत्तपच्चक्खाणे। इच्चेते खंदया! दुविहेणं पंडियमरणेणं मरमाणे जीवे अनंतेहिं नेरइयभवग्गहणेहिं अप्पाणं विसंजोएइ जाव वीईवयति, सेत्तं मरमाणे हायइ, सेत्तं पंडियमरणे। इच्चेएणं खंदया! दुविहेणं मरणेणं मरमाणे जीवे वड्ढइ वा हायति वा।*

**वृ.** 'उप्पन्नणाणदंसणधरे' इह यावत्करणात् 'अरहा जिणे केवली सव्वन्नू सव्वदरिसी आगासगएणं छत्तेण' मित्यादि समवसरणान्तं वाच्यमिति।

'गद्दभालिस्स' त्ति गर्दालाभिधानपरिव्राजकस्य 'रिउव्वेयजजुव्वेयसामवेयअथव्वणवेय' त्ति, इह षष्ठीबहुवचनलोपदर्शनात् ऋग्वेदयजुर्वेदसामवेदाथर्वणवेदानामिति दृश्यम् इतिहासः-पुराणं स पञ्चमो येषां ते तथा तेषाम् 'चउण्हं वेयाणं' ति विशेष्यपदं 'निग्घंटुछट्ठाणं' ति निर्घण्टो नामकोशः 'संगोवंगाणं' ति अङ्गानिशिक्षादीनि षड् उपाङ्गानि-तदुक्तप्रपञ्चनपराः प्रबन्धाः 'सरहस्साणं' ति एदम्पर्ययुक्तानां 'सारए' त्ति सारकोऽध्यानपनद्वारेण प्रवर्त्तकः स्मारको वाऽन्येषां विस्मृतस्य सूत्रादेः स्मारणात् 'वारए' त्ति वारकोऽशुद्धपाठनिषेधात् 'धारए' त्ति कचित्पाठः तत्र धारकोऽधीतानामेषां धारणात् 'पारए' त्ति पारगामी 'षडङ्गविदि' ति षडङ्गानि-शिक्षादीनि वक्ष्यमाणानि, साङ्गोपाङ्गानामिति यदुक्तं तद्वेदपरिकरज्ञापनार्थम्।

अथवा षडङ्गविदित्यत्र तद्विचारकत्वं गृहीतं 'विद विचारणे इति वचनादिति न पुनरुक्तत्वमिति 'सट्ठितंतविसारए' त्ति कापिलयशास्त्रपण्डितः, तथा 'संखाणे' त्ति गणितस्कन्धे सुपरिनिष्ठित इति योगः, षडङ्गवेदकत्वमेव व्यनक्ति-सिक्खाकप्पे' त्ति शिक्षा-अक्षरस्वरूपनिरूपकं शास्त्रं कल्पश्चतथाविधसमाचारनिरूपकं शास्त्रमेव ततः समाहारद्वन्द्वात् शिक्षाकल्पे ''वागरणे'त्ति शब्दशास्त्रे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'छंदे' त्ति पद्यलक्षणशास्त्रे 'निरुत्ते' त्ति शब्दव्युत्पत्तिकारकशास्त्रे 'जोतिसामयणे' त्ति ज्योतिशास्त्रे 'बंभण्णएसु' त्ति ब्राह्मणसम्बन्धिषु 'परिव्वायएसु य' त्ति परिव्राजकसत्केषु 'नयेषु' नीतिषु दर्शनेष्वित्यर्थः । 'नियंठे' त्ति निर्ग्रन्थः, श्रमण इत्यर्थः "वेसालियसावएत्ति विशाला-महावीर- जननी तस्या अपत्यमिति वैशालिकः-भगवांस्तस्य वचनं श्र णोति तद्रसिकत्वादिति वैशालिक- श्रावकः, तद्वचनामृतपाननिरत इत्यर्थ 'इणमक्खेवं' ति एनम् 'आक्षेपं' प्रश्नं 'पुच्छे' त्ति पृष्टवान्, 'मागह' त्ति मगधजनपदजातत्वान्मागधस्तस्यामन्त्रणं हे मागध ! 'वड्ढइ' त्तिसंसारवर्द्धनात् 'हायइ' त्ति संसार-परिहान्येति ।

'एतावंतावे' त्यादि, एतावत् प्रश्नजातं तावदाख्याहि 'उच्यमानः' पृच्छयमानः, 'एवम्' अनेन प्रकारेण, एतस्मिन्नाख्याते पुनरन्यत्प्रक्ष्यामीति हृदयम् । 'संकिए' इत्यादि, किमिदमिहोत्तरमिदं वा ? इति संजातशङ्कः, इदमिहोत्तरं साधु इदं च न साधु अतः कथमत्रोत्तरं लप्स्ये ? इत्युत्तरलाभाकाङ्क्षवान् काङ्क्षितः अस्मिन्नुत्तरे दत्ते किमस्य प्रतीतिरुत्पत्स्यते न वा ? इत्येवं विचिकित्सितः 'भेदसमावन्ने' मतेर्भङ्गं-किंकर्त्तव्यताव्याकुलतालक्षणमापन्नः 'कलुषमापन्नः' नाहमिह किञ्चिज्जानामीत्येवं स्वविषयं कालुष्यं समापन्न इति 'नो संचाएइ' त्ति न शक्नोति 'पमोक्खमक्खाइउं' ति प्रमुच्यते पर्यनुयोगबंधनादनेनेति प्रमोक्षम्-उत्तरम् 'आख्यातुं' वक्तुम् । 'महया जणसंमद्दे इ वा जणवूहे इ वा' इत्यत्रेदमन्यद् दृश्यम्-'जणबोले इ वा जणकलकले इ वा जणुम्मी इ वा जणुक्कलिया इ वा जणसंनिवाए इ वा बहुजणो अन्नमन्नस्स एवामाइक्खइ ४' ।

एवं खलु देवाणुप्पिया ! समणे ३ आइगरे जाव संपाविउकामे पुव्वानुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे कयंगलाए नयरीए छत्तपलासए चेइए अहापडिरूवं उग्गहं उग्गिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ, तं महप्फलं खलु भो देवाणुप्पिया ! तहारूवाणं अरहंताणं भगवंताणं नामगोयस्सवि सवणयाए, किमंग पुण अभिगमनवंदणनमंसणपडिपुच्छणपज्जुवासणयाए एगस्सवि आयरियस्स धम्मियस्स सुवयणस्स सवणयाए ?

किमंग पुण विउलस्स अट्ठस्स गहणयाए ?, तं गच्छमो णं देवाणुप्पिया ! समणं भगवं महावीरं वंदामो नमंसामो सक्कारेमो सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासामो, एयं णो पेच्चभवे हियाए सुहाए खमाए निस्सेयसाए आनुगामियत्ताए भविस्सइत्तिकट्टु बहवे उग्गा उग्गपुत्ता एवं भोगा राइण्णा खत्तिया माहणा भडा जोहा मल्लई लेच्छई अन्ने य बहवे राईसरतलवरमाडंबियकोडुंबियइब्भसेट्ठिसेणावइसत्थवाहपभियओ जाव उक्किट्ठसीहनायबोलकलयलरवेणं समुद्दरवभूयंपिव करेमाणा साव्थीए नयरीए मज्झं मज्झेणं निगच्छंति' ।

अस्यायमर्थः-श्रावस्त्यां नगर्यां यत्र 'महय' त्ति महान् जनसंमर्दस्तत्र बहुजनोऽन्योऽन्यस्यैवमाख्यातीति वाक्यार्थः, तत्र जनसंमर्द-उरोनिष्पेषः 'इति' उपप्रदर्शने 'वा' समुच्चये पाठान्तरे शब्द इति वा जनव्यूहः-चक्राद्याकारो जनसमुदायः बोलः-अव्यक्तवर्णो ध्वनिकलकलः-स ओवेपलभ्यमानवचनविभागः- ऊर्मि-संबाधः कल्लोलाकारो वा जनसमुदायः उत्कलिका-समुदाय एव लघुतरः जनसन्निपातः-अपरापरस्थानेभ्यो जनानां मीलनं ।

'यथाप्रतिरूप' मित्युचितं 'तथारूपाणां' सङ्गतरूपाणां 'नामगोयस्सवि' त्ति नाम्नो याद्दच्छिकस्याभिधानस्य गोत्रस्य च-गुणनिष्पन्नस्य 'सवणयाए' श्रवणेन 'किमंग पुण' त्ति किंपुनरिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोक्तार्थस्य विशेषद्योतनार्थ अङ्गेत्यामन्त्रणे अभिगमनम्-अभिमुखगमनं वन्दनं-स्तुति नमस्यनं-प्रणमनं प्रतिप्रच्छनं-शरीरादिवार्त्ताप्रश्नः पर्युपासनं-सेवा तेषाम्-अभिगमनादीनां भावस्तत्ता तया आर्यस्येत्यार्यप्रणेतृकत्वात् धार्मिकस्य धर्मप्रतिबद्धत्वात्, 'वंदामो'त्ति स्तुमः 'नमस्यामः' इति प्रणमामः 'सत्कारयामः' आदरं कुर्मो वस्त्रार्चनं वा सन्मानयाम उचितप्रतिपत्तिभिः ।

किम्भूतम् ? इत्याह-कल्याणं-कल्याणहेतुं मङ्गलं-दुरितोपशमनहेतुं दैवतं-दैवं चैत्यम्-इष्टदेवप्रतिमा चैत्यमिव चैत्यं 'पर्युपासयामः' सेवामहे 'एतण्णे'त्त एतत् 'नः' अस्माकं 'प्रेत्यभवे' जन्मान्तरे 'हिताय' पथ्यान्नवत् 'सुखाय' शर्मणे 'क्षेमाय' सङ्गतत्वाय 'निश्रेयसाय' मोक्षाय 'आनुगामिकत्वाय' परम्पराशुभानुबन्धसुखाय भविष्यति 'इतिकृत्वा' इतिहेतोर्बहवः 'उग्राः' आदिदेवावस्थापिताऽऽरक्षकवंशजाताः 'भोगाः' तेनैवावस्थापितगुरुवंशजाताः 'राजन्याः' भगवद्वयस्यवंशजाः 'क्षत्रियाः' राजकुलीनाः 'भटाः' शौर्यवन्तः 'योधाः' तेभ्यो विशिष्टतराः मल्लकिनो लेच्छकिनश्च राजविशेषाः 'राजानः' नृपाः 'ईश्वराः' युवराजास्तदन्ये च महर्द्धिकाः 'तलवराः' प्रतुष्टनरपतिवितीर्णपट्टबन्धविभूषिता राजस्थानीयाः 'माडम्बिकाः' संनिवेशविशेषनायकाः 'कौटुम्बिकाः' कतिपयकुटुम्बप्रभवोराजसेवकाः ।

उत्कृष्टिश्च-आनन्दमहाध्वनि सिंहनादश्च-प्रतीतः बोलश्च-वर्णव्यक्तिवर्जितो महाध्वनि कलकलश्च-अव्यक्तवचनः स एवैतल्लक्षणो यो रवस्तेन समुद्ररवभूतमिव-जलधिशब्दप्राप्तमिव तन्मयमिवेत्यर् नगरमिति गम्यत इति ।

एतस्यार्थस्य सङ्क्षेपं कुर्वन्नाह-'परिसा निग्गच्छति'त्ति ।

'तए णं'ति 'ततः' अनन्तरम् 'इमेया-रूवे'त्ति 'अयं' वक्ष्यमाणतया प्रत्यक्षः स च कविनोच्यमानो न्यूनाधिकोऽपि भवतीत्यत आह-एतदेव रूपं यस्यासावेतद्रूपः 'अब्भित्थए'त्ति आध्यात्मिक आत्मविषयः 'चिंतिए'त्ति स्मरणरूपः 'पत्थिए'त्ति प्रार्थित--अभिलाषात्मकः 'मनोगए'त्ति मनस्येव यो गतो न बहि वचनेनाप्रकाशनात्स तथा 'सङ्कल्पः' विकल्पः 'समुप्पज्जित्थ'त्ति समुत्पन्नवान् ।

'सेयं'त्ति श्रेयः-कल्याणं 'पुच्छित्तए'त्ति योगः 'इमाइं च णं'ति प्राकृतत्वाद् 'इमान्' अनन्तरोक्तत्वेन प्रत्यक्षासन्नान् चशब्दादन्यांश्च 'एयारूवाइं'ति 'एतद्रूपान्' उक्तस्वरूपान्, अथवैतेषामेवानन्तरोक्तानामर्थानां रूपं येषां प्रष्टव्यतासाधर्म्याततेः तथा तान् 'अर्थान्' भावान् लोकसान्तत्वादींस्तदन्यांश्च 'हेऊइं'ति अन्वयव्यतिरेकलक्षणहेदुगम्यत्वाद्धेतवो-लोकसान्तत्वादयएव तदन्ये चातस्तान् 'पसिणाइं'ति प्रश्नविषयत्वात् प्रश्ना एत एव तदन्ये वाऽतस्तान् 'कारणाइं'ति कारणम्-उपपत्तिमात्रं तद्विषयत्वात्कारणानि एत एव तदन्ये वाऽतस्तानि 'वागरणाइं'ति व्याक्रियसमाणत्वाद्व्याकरणानि एत एव तदन्ये वाऽतस्तानि 'पुच्छित्तए'त्ति प्रष्टुं 'तिकट्टु'-इतिकृत्वाऽनेन कारणेन 'एवं संपेहेइ'त्ति ।

'एवम्' उक्तप्रकारं भगवद्नवन्दनादिकरणमित्यर्थः 'संप्रेक्षते' पर्यालोचयति 'परिव्वायावसहे'त्ति परिव्राजकमठः 'कुण्डिका' कमण्डलु 'काञ्चनिका' रुद्राक्षकृता 'करोटिका' मृद्भाजनविशेषः 'भृशिका' आसनविशेषः 'केशरिका' प्रमार्जनार्थं चीवरखण्डं 'षडनालकं' त्रिकाष्ठिका 'अङ्कुशकं' तरुपल्लवग्रहणार्थमङ्कुशाकृति 'पवित्रकम्' अङ्गुलीयकं 'गणेत्रिका' कलाचिकाऽऽभरणविशेषः 'धाउरत्ताओ'त्ति साटि इति विशेषः, 'तिदंडे'त्यादि त्रिदण्डकादीनि दश हस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतानि-स्थितानि यस्य स तथा, 'पहारेत्थ' त्ति 'प्रधारितवान्' सङ्कल्पितवान् 'गमनाय' गन्तुं।

'गोयमाइ' त्ति गौतम इति एवमामन्त्रेयति शेषः, अथवाऽयीत्यामन्त्रणार्थमेव। 'से काहे व' त्ति अथ कदा वा? कस्यां वेलायामित्यर्थः 'किह व' त्ति केन वा प्रकारेण? साक्षाद्दर्शनतःश्रवणतो वा 'केवच्चिरेण व' त्ति कियतो वा कालात्?, 'सावत्थी नामं नयरी होत्थ' त्ति विभक्तिपरिणामा-दस्तीत्यर्थः, अथवा कालस्यावसर्प्पिणीत्वात्प्रसिद्धगुणा कालान्तर एवाभवन्नेदानीमिति। 'अदूराइ-गए' त्ति अदूरे आगतः, स चावधिस्थानापेक्षयाऽपि स्यात् अथवा दूरतरमार्गापेक्षया क्रोशादिकम-प्यदूरं स्यादत उच्यते 'बहुसंपत्ते' ईषदूनसंप्रप्तो बहुसंप्राप्तः, स च विश्रामादिहेतोरारामादिगतोऽपि स्यादत उच्यते-'अद्धाणपडिवन्ने' त्ति मार्गप्रतिपन्नः।

किमुक्तं भवति? -'अंतापहे वट्टइ' त्ति विवक्षितस्थानयोरन्तरालमार्गे वर्त्तत इति। अनेन च सूत्रेण कथं द्रक्ष्यामि? इत्यस्योत्तरमुक्तं, कथं?, यतोऽदूरागतादिविशेषणस्य साक्षादेव दर्शनं संभवति, तथा 'अज्जेव णं दच्छसि' इत्यनेन कियच्चिरादित्यस्योत्तरमुक्तं, 'काहे' इत्यस्य चोत्तरं सामर्थ्यगम्यं, यतो यदि भगवता मध्याह्नसमये इयं वार्त्ताऽभिहिता तदा मध्याह्नस्योपरि मुहूर्त्ताद्यतिक्रमणे या वेला भवति तस्यां द्रक्ष्मसीति सामथ्यार्दुक्तम्, अदूरागतादिविशेषणस्य हि तद्देशप्राप्तौ मुहूर्त्तादिरेव कालः संभवति न बहुतर इति।

'अगाराओ' त्ति निष्क्रम्येतिशेषः 'अनगारितां' साधुतां 'प्रव्रजितुं' गन्तुम्, अथवा विभक्ति-परिणामादनगारितया 'प्रव्रजितुं' प्रव्रज्यां प्रतिपत्तुम्, 'अब्भुट्ठेति' त्ति आसनं त्यजति, यच्च भगवतो गौतमस्यासंयतं प्रत्यभ्युत्थानं तद्भाविसंयतत्वेन तस्य पक्षपातविषयत्वाद् गौतमस्य चाक्षीण-रागत्वात्, तथा भगवदाविष्कृततदीयविकल्पस्य तत्समीपगमनतस्तत्कथनाद् भगवज्ज्ञानातिशय-प्रकाशनेन भगवत्यतीव बहुमानोत्पादनस्य चिकीर्षितत्वादिति।

'हे खंदय' त्ति सम्बोधनमात्रं 'सागयं खंदय' त्ति 'स्वागतं' शोभनमागमनं तव स्कन्दक! महाकल्याणनिधेर्भगवतो महावीरस्य संपर्केण तव, कल्याणनिबन्धनत्वात्तस्य, 'सुसागयं' ति अतिशयेन स्वागतं, कथञ्चिदेकार्थौ वा शब्दावेतौ, एकार्थशब्दोच्चारणं च क्रियमाणं न दुष्टं, संभ्रमनिमि-त्तत्वादस्येति, 'अनुरागयं खंदय!' त्ति रेफस्यागमिकत्वाद् 'अन्वागतम्' अनुरूपमागमनं स्कन्दक! तवेति दृश्यं, 'सागयमनुरागयं' ति शोभनत्वानुरूपत्वलक्षणधर्मद्वयोपेतं तवागमनमित्यर्थः

'जेणेव इहं' ति यस्यामेव दिशीदं भगवत्समवसरणं 'तेणेव' त्ति तस्यामेव दिशि "अत्थे समत्थे" त्ति अस्त्येषोऽर्थः। 'अट्ठे समट्ठे' त्ति पाठान्तरं, काक्वा चेदमध्येयं, ततश्चार्थः किं 'समर्थः' सङ्गतः? इति प्रश्नः स्यात्, उत्तरं तु 'हंता अत्थि' सद्भूतोऽयमर्थ इत्यर्थः। 'नाणी' त्यादि, अस्यायमभिप्रायः-ज्ञानी ज्ञानसामर्थ्याज्जानाति तपस्वी च तपःसामर्थ्याद्देवतासान्नि-ध्याज्ज्ञानातीति प्रश्नः कृतः 'रहस्सकडे' त्ति रहः कृतः-प्रच्छन्नकृतो, हृदय एवावधारितत्वात्-

'धम्मायरिए' त्ति कुत एतत्? इत्याह-'धम्मोवएसए' त्ति, उत्पन्नज्ञानदर्शनधरो न तु सदा संशुद्धः, अर्हद्वन्दनाद्यर्हत्वात्, जिनो रागादिजेतृत्वात्, केवली असहायज्ञानत्वात्, अत एवातीत-प्रत्युत्पन्नानागतविज्ञायकः, स च देशज्ञोऽपि स्यादित्याह।

सर्वज्ञः सर्वदर्शी, 'वियट्टभोइ' त्ति व्यावृत्ते २ सूर्ये भुङ्क्ते इत्येवंशीलो व्यावृत्तभोजी प्रतिदि-नभोजीत्यर्थः, 'ओरालं' ति प्रधानं 'सिंगारं' ति श्रृङ्गारः-अलङ्कारादिकृता शोभा तद्योगात् श्रृङ्गारं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रृङ्गारमिव श्रृङ्गारमतिशयशोभावदित्यर्थः, 'कल्याणं' श्रेयः 'शिवम्' अनुपद्रवमनुपद्रवहेतुर्वा 'धन्यं' धर्मधनलब्धृ तत्र वा साधु तद्वाऽर्हत 'मङ्गल्यं' मङ्गले-हितार्थप्रापके साधु माङ्गल्यम्, अलङ्कृ तं मुकुटादिभिर्विभूषितं-वादिभिस्तन्निषेधादनलङ्कृतविभूषितं, 'लक्खणवंजण-गुणोववेयं'ति लक्षणंमानोन्मानादि, तत्र मानं-जलद्रोणमानता, जलभृतकुण्डिकायां हि मातव्यं पुरुषः प्रवेश्यते तत्प्रवेशे च यज्जलं ततो निस्सरति तद्यदि द्रोणमानं भवति तदाऽसौ मानोपेत उच्यते, उन्मानं त्वर्द्धभारमानता, मातव्यः पुरुषो हि तुलारोपितो यद्यर्द्धभारमानो भवति तदोन्मा-नोपेतोऽसावुच्यते, प्रमाणं पुनः स्वाङ्गुलेनाष्टेत्तरशताङ्गुलोच्छ्रयता, यदाह—

॥ १ ॥ "जलदोणमद्धभारं समुहाइ समूसिओ उ जो नव उ।
माणुम्माणपमाणं तिविहं खलु लक्खणं एयं ॥

व्यञ्जनं-मषतिलकादिकमथवा सहजं लक्षणं पश्चादुभवं व्यञ्जनमिति, गुणाः-सौभाग्यादयो लक्षणव्यञ्जनानां वा ये गुणास्तैरुपपेतं यत्तत्तथा, उपअपइतम् इत्येतस्य स्थाने निरुक्तिवशादुपपेतं भवतीति, 'सिरीए'त्ति लक्ष्म्या शोभया वा ॥

'हट्ठतुट्ठचित्तमाणंदिए'त्ति हृष्टतुष्टमत्यर्थं तुष्टं हृष्टं वा-वस्मितं तुष्टं च-सन्तोषवच्चित्तं-मनो यत्र तत्तथा, तद् हृष्टतुष्टचित्तं यथा भवति एवम् 'आनन्दितः' ईषन्मुखसौम्यतादिभावैः समृद्धिमपगतः, ततश्च 'नंदए'त्ति नन्दितस्तैरेव समृद्धतरतामुपगतः 'पीइमणे'त्ति प्रीति-प्रीणन-माप्यायनं मनसि यस्य स तथा 'परमसोमनस्सिए'त्ति परमं सौमनस्यंसुमनस्कता संजातं यस्य स परमसौमनस्यितस्तद्वाऽस्यास्तीति परमसौमनस्यिकः 'हरिसवसविसप्पमाणहियए'त्ति हर्षवशेन विसर्प्पद्-विस्तारं व्रजद् हृदयं यस्य स तथा, एकार्थिकानि वैतानि प्रमोदप्रकर्षप्रतिपादनार्थानीति 'दव्वओ णं एगे लोए सअंते'त्ति पञ्चास्तिकायमयैकद्रव्यत्वाल्लोकस्य सान्तोऽसौ, 'आयाम-विक्खंभेणं'ति आयामो-दैर्ध्यं विष्कम्भो-विस्तारः 'परिक्खेवेणं'ति परिधिना 'भुविंसु य'त्ति अभवत् इत्यादिभिश्च पदैः पूर्वोक्तपदानामेव तात्पर्यमुक्तं, 'धुवे'त्ति ध्रुवोऽचलत्वात् स चानियतरूपोऽपि स्यादत आह-'नियए'त्ति नियत एकस्वरूपत्वात्, नियतरूपः कादाचित्कोऽपि स्यादत आह-'सासए'त्ति शाश्वतः प्रतिक्षणं सद्भावात्, स च नियतकालापेक्षयाऽपि स्यादित्यत आह-

अक्खए'त्ति अक्षयोऽविनाशित्वात्, अयं च बहुतरप्रदेशापेक्षयाऽपि स्यादित्यत आह-'अव्वए'त्ति अव्ययस्तत्प्रदेशानामव्ययत्वात, अयं च द्रव्यतयाऽपि स्यादित्याह-'अवट्ठिए'त्ति अवस्थितः पर्यायाणामनन्ततयाऽवस्थितत्वात्, किमुक्तं भवति ?-नित्य इति, 'वन्नपज्जव'त्ति वर्णविशेषा एकगुणकालत्वादयः, एवमन्येऽपि गुरुलघुपर्यवास्तद्विशेषा बादरस्कन्धानाम्, अगुरुल-घुपर्यवा अणूनां सूक्ष्मस्कन्धानाममूर्त्तानां च, 'नाणपज्जव'त्ति ज्ञानपर्याया ज्ञानविशेषा बुद्धिकृता वाऽविभागपरिच्छेदाः, अनन्ता गुरुलघुपर्याया औदारिकादिशरीराण्याश्रित्य, इतरेतु कर्मणादि-द्रव्याणि जीवस्वरूपं चाश्रित्येति।

'जेवि य ते खंदया पुच्छ'त्ति अनेन समग्र सिद्धिप्रश्नसूत्रमुपलक्षणत्वाच्चोत्तरसूत्रांशश्च सूचितः, तच्च द्वयमप्येवम्-'जेवि य ते खंदया इमेयारूवे जाव किं सअंता सिद्धी अनंता सिद्धी तस्सवि य णं अयमट्ठे, एवं खलु मए खंदया ! चउव्विहा सिद्धी पन्नत्ता, तंजहा-दव्वओ खेत्तओ कालओ भावओत्ति, दव्वओ णं एगा सिद्धि'त्ति, इह सिद्धिर्यद्यपि परमार्थतः सकलकर्मक्षयरूपा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धाधाराऽऽकाशदेशरूपा वा तथाऽपि सिद्धाधाराकाशदेशप्रत्यासन्नत्वेनेषत्प्राग्भारा पृथिवी सिद्धिरुक्ता, 'किंचिविसेसाहिए परिक्खेवेणं'ति किञ्चिन्न्यूनगव्यूतद्वयाधिके द्वे योजनशते एकोनपञ्चाशदुत्तरे भवत इति।

'वलयमरणे'त्ति वलतो-बुभुक्षापरिगतत्वेन वलवलायमानस्य संयमाद्वा भ्रस्यतो (यत्) मरणं तद्वलन्मरणं, तथा वशेन-इन्द्रियवशेन ऋतस्य-पीडितस्य दीपकलिकारूपाक्षिप्तचक्षुषः शलभस्येव यन्मरणं तद् वशार्त्तमरणं, तथाऽन्तःशल्यस्य द्रव्यतोऽनुद्धृ ततोमरादेः भावतः सातिचारस्य यन्मरणं तदन्तःशल्यमरणं, तथा तस्मै भवाय मनुष्यादेः सतो मनुष्यादावेव बुद्धायुषो यन्मरणं तत्तद्भवमरणम्, इदं च नरतिरश्चामेवेति।

'सत्थोवाडणे'त्ति शस्त्रेण-क्षुरिकादिना अवपाटनं-विदारणं देहस्य यस्मिन् मरणे तच्छ-वपाटनं, 'वेहाणसे'त्ति विहायसि-आकाशे भवं वृक्षशाखाद्युद्धन्धनेन यत्तन्निरुक्तिवशाद्वैहानसं, 'गिद्धपट्ठे'त्ति गृध्रैः-पक्षिविशेषैर्गृद्धैर्वा-मांसलुब्ध श्रृगालादिभः स्पृष्टस्य-विदारितस्य करिकरभ-रासभादिशरीरान्तर्गतत्वेन यन्मरणं तद्गृध्रस्पृष्टं वा गृद्धस्पृष्टं वा गृध्रैर्वा भक्षितपृष्ठस्य-विदारितस्य करिकरभरासभादिशरीरान्तर्गतत्वेन यन्मरणं तद्गृध्रस्पृष्टं वा गृद्धस्पृष्टं वा गृध्रैर्वा भक्षितपृष्ठस्य तद्गृध्रपृष्ठम्।

'दुवालसविहेणं बालमरणेणं'ति उपलक्षणत्वादस्यान्येनापि बालमरणान्तःपातिना मरणेन भ्रियमाण इति 'वड्ढइ वड्ढइ'त्ति संसारवर्द्धनेन भृशं वर्द्धते जीवः, इदं हि द्विर्वचनं भृशार्थे इति। 'पाओवगमणे'त्ति पादपस्येवोपगमनम्-अस्पन्दतयाऽवस्थानं पादपोपगमनम्, इदं च चतुर्विधाहा-रपरिहारनिष्पन्नमेव भवतीति।

'नीहारिमे य'त्ति निहरिण निर्वृत्तं यत्तन्निर्हारिमंप्रतिश्रये यो म्रियते तस्यैतत्, तत्कडेवरस्य निर्हारणात्, अनिर्हारिमं तु योऽटव्यां म्रियते इति। यच्चान्यत्रेह स्थाने इङ्गितमरणमभिधीयते तद्भक्तप्रत्याख्यानस्यैव विशेष इति नेह भेदेन दर्शितमिति।

**मू. (११३)** *एत्थ णं से खंदए कच्चायणस्स गोत्ते संबुद्धे समणं भगवं महावीरं वंदइ नमंसइ २ एवं वदासी-इच्छमि णं भंते! तुब्भं अंतिए केवलिपन्नत्तं धम्मं निसामेत्तए, अहासुहं देवाणुप्पिया मा पडिबंधं। तए णं समणे भगवं महावीरे खंदयस्स कच्चायणस्सगोत्तस्स तीसे य महतिमहालियाए परिसाए धम्मं परिकहेइ, धम्मकहा भाणियव्वा। तए णं से खंदए कच्चायणस्सगोत्ते समणस्स भगवओ महावीरस्स अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठे जाव हियए उट्ठाए उट्ठेइ २ समणं भगवं महावीरं तिक्खुत्तो आयाहिणं पयाहिणं करेइ २ एवं वदासी।*

*सद्दहामि णं भंते! निग्गंथं पावयणं, पत्तियामि णं भंते! निग्गंथं पावयणं, रोएमि णं भंते निग्गंथं पावयणं, अब्भुट्ठेमि णं भंते! निग्गंथं पा०, एवमेयं भंते! तहमेयं भंते! अवितहमेयं भंते असंदिद्धमेयं भंते! इच्छियमेयं भंते! पडिच्छियमेयं भंते! इच्छियपडिच्छियमेयं भंते! से जहेयं तुब्भे वदहत्तिकट्टु समणं भगवं महावीरं वंदति नमंसति २ उत्तरपुरच्छिमं दिसीभायं अवक्कमइ २ तिदंडं च कुंडियं च जाव धाउरत्ताओ य एगंते एडेइ २।*

*जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं महावीरं तिक्खुत्तो आयाहिणं*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पयाहिणं करेइ करेइत्ता जाव नमंसित्ता एवं वदासी-आलित्ते णं भंते ! लोए पलित्ते णं भं०लो० आ० प० भं० लो० जरामरणेण य, से जहानामए-केइ गाहावती आगारंसि झियायमाणंसि जे से तत्थ बंडे भवइ अप्पसारे मोल्लगरूए तं गहाय आयाए एगंतमंतं अवक्कमइत्ति।

एस मे नित्थारिए समाणे पच्छ पुरा हियाए सुहाए खमाए निस्सेसाए आनुगामियत्ताए भविस्सइ, एवामेव देवाणुप्पिया ! मज्झवि आया एगे भंडे इट्ठे कंते पिए मणुन्ने मणामे थेज्ने वेसासिए संमए बहुमए अनुमए भंडकरंडगसमाणे मा णं सीयं मा णं उण्हं मा णं खुहा मा णं पिवासा मा णं चोरा मा णं वाला मा णं दंसा मा णं मसगा मा णं वाइयपित्तियसंभियसंनिवाइयविविहा रोगायंका परीसहोवसग्गा फुसंतुत्तिकट्टु एस मे नित्थारिए समाणे परलोयस्स हियाए सुहाए खमाए नीसेसाए अनुगामियत्ताए भविस्सइ।

तं इच्छामि णं देवाणुप्पिया ! सयमेवपव्वावियं सयमेव मुंडावियं सयमेव सेहावियं सयमेव सिक्खावियं सयमेव आयारगोयरं विणयवेणइयचरणकरणजायामायावत्तियं धम्ममाइक्खिअं

तए णं समणे भगवं महावीरे खंदयं कच्चायणस्सगोत्तं सयमेव पव्वावेइ जाव धम्ममातिक्खइ, एवं देवाणुप्पिया ! गंतव्वं एवं चिट्ठियव्वं एवं निसीतियव्वं एवं तुयट्टियव्वं एवं भुंजियव्वं एवं भासियव्वं एवं उट्ठाए २ पाणेहिं भूएहिं जीवेहिं सत्तेहिं संजमेणं संजमियव्वं, अस्सिं च णं अट्ठे नो किंचिवि पमाइयव्वं। तए णं से खंदए कच्चायणस्सगोत्ते समणस्स भगवओ महावीरस्स इमं एयारूवं धम्मियं उवएसं सम्मं संपडिवज्जति तमाणाए तह गच्छइ तह चिट्ठइ तह निसीयति तह तुयट्टइ तह भुंजइ तह भासइ तह उट्ठाए २ पामेहिं भूएहिं जीवेहिं सत्तेहिं संजमेणं संजमियव्वमिति, अस्सिं च णं अट्ठे नो पमायइ।

तए णं से खंदए कच्चाय० अनगारे जाते ईरियासमिए भासासमिए एसणासमिए आयाण-भंडमत्तनिक्खेवणासमिए उच्चारासवणखेलसिंधाणजल्लपारिट्ठावणियासमिए मणसमिए वयस-मिए कायसमिए मणगुत्ते वइगुत्ते कायगुत्ते गुत्ते गुत्तिंदिए गुत्तबंभयारी चाई लज्जू धन्ने खंतिखमे जिइंदिए सोहिए अनियाणे अप्पुस्सुए अबहिल्लेस्से सुसामण्णरए दंते इणमेव निग्गंथं पावयणं पुरओ काउं विहरइ।

**वृ.** 'धम्मकहा भाणियव्व'त्ति, सा चैवम्–

॥१॥ "जह जीवा बज्झंती मुच्चंती जह य संकिलिस्संती।
जह दुक्खाणं अंतं करेंति केई अपडिबद्धा॥

॥२॥ अट्टनियट्टियचित्ता जह जीवा दुक्खसागरमुवेंति।
जह वेरग्गमुवगया कम्मसमुग्गं विहाडिंति॥ इत्यादि,

इह च 'अट्टनियट्टियचित्ता' आर्त्त निर्वर्त्तितं चित्तं यैस्ते तथा, आर्त्ताद्वानिवर्त्तितं चित्तं यैस्ते आर्त्तानिर्वर्तितचित्ताः। 'सद्दहामि'त्ति निर्ग्रन्थ प्रवचनमस्तीति प्रतिपद्ये 'पत्तियामि'त्ति प्रीतिं प्रत्ययं वा सत्यमिदमित्येवंरूपं तत्र करोमीत्यर्थः 'रोएमि'त्ति चिकीर्षामीत्यर्थः 'अब्भुट्ठेमि'त्ति एतदङ्गीकरोमीत्यर्थः।

अथ श्रद्धानाद्युल्लेखं दर्शयति-एवमेतन्नैर्ग्रन्थं प्रवचनं सामान्यतः, अथ यथैतद्यूयं वदथेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगः। 'तहमेयं'ति तथैव तद्विशेषतः 'अवितहमेयं' सत्यमेतदित्यर्थः 'असंदिद्धमेयं'ति सन्देहवर्जितमेतत् 'इच्छियमेयं'ति इष्टमेतत् 'पडिच्छियमेयं'ति प्रतीप्सितं प्राप्तुमिष्टम् 'इच्छियपडिच्छियं'ति युगपदिच्छप्रतीप्साविषयत्वात् 'तिकट्टु'त्ति इतिकृत्वेति, अथवा 'एवमेयं भंते!' इत्यादीनि पदानि यथायोगमेकार्थान्यत्यादरप्रदर्शनायोक्तानि।

'आलित्ते णं'ति अभिविधिना ज्वलितः 'लोए'त्ति जीवलोकः 'पलित्ते णं'ति प्रकर्षेण ज्वलितः एवंविधश्चासौ कालभेदेनापि स्यादत उच्यते-आदीप्तप्रदीप्त इति, 'जराए मरणेण य'त्ति इह वह्निनेति वाक्यशेषो दृश्यः 'झियायमाणंसि'त्ति ध्मायमाने ध्मायति वा, दह्यमान इत्यर्थः 'अप्पसारे'त्ति अल्पं च तत्सारं चेत्यल्पसारम् 'आयाए'त्ति आत्मना एकान्तं-विजनम् अन्तं-भूभागं 'पच्छ पुरा य'त्ति विवक्षितकालस्य पश्चात् पूर्वं च सर्वदैवेत्यर्थ: 'थेज्जे'त्ति स्थैर्यधर्मयोगात् स्थैर्यो वैश्वासिको विश्वासप्रयोजनत्वात् संमतस्तत्कृतकार्याणां संमतत्वात् 'बहुमतः' बहुशो बहुभ्यो वाऽन्येभ्यः सकाशाद्बहुरिति वा मतो बहुमतः 'अनुमतः' अनुविप्रियकरणस्य पश्चादपि मतोऽनुमतः 'भंडकरंडगसमाणे'त्ति भाण्डकरण्डकम्-आभरणभाजनं तत्समान आदेयत्वादिति

'मा णं सीत'मित्यादौ माशब्दो निषेधार्थ णमिति वाक्यालङ्कारार्थः, इह च स्पृशत्विति यथायोगं योजनीयम्, अथवा मा एनमात्मानमिति व्याख्येयं, 'वाल'त्ति व्यालाः-श्वापदभुजगाः 'मा णं वाइयपित्तियसंभियसन्निवाइय'त्ति इह प्रथमाबहुवचनलोपो दृश्यः 'रोगायंक'त्ति रोगाः-कालसहा व्याधयः आतङ्कास्त एव सद्यो घातिनः 'परीसहोवसग्ग'त्ति अस्य मा णमित्यनेन सम्बन्धः 'स्पृशन्तु' छुपन्तु भवन्त्वित्यर्थः 'त्तिकट्टु' इत्यभिसन्धाय यः पालित इति शेषः, स किम्? इत्याह-

'तं इच्छामि'त्ति ततस्मादिच्छामि 'सयमेव'त्ति स्वयमेव भगवतैवेत्यर्थः प्रव्राजितं रजोहरणादिवेषदानेनात्मानमिति गम्यते, भावे वा क्तप्रत्ययस्तेन प्रव्राजनमित्यर्थः, मुण्डितं शिरोलुञ्चनेन 'सेहावियं'ति सेहितं प्रत्युपेक्षणादिक्रियाकलापग्राहणतः शिक्षितं सूत्रार्थग्राहणतः तथाऽऽचारः-श्रुतज्ञानादिविषयमनुष्ठानं कालाध्ययनादि गोचरो-भिक्षाटनम् एतयोः समाहारद्वन्द्वस्ततस्तदाख्यातमिच्छमीति योगः, तथा विनयः-प्रतीतो वैनयिकंतत्फलं कर्मक्षयादि चरणं-व्रतादि करणं-पिण्डविशुद्ध्यादि यात्रा-संयमयात्रा मात्रा-तदर्थमेवाहारमात्रा, ततो विनयादीनां द्वन्द्वः, ततश्च विनयादीनां वृत्ति-वर्त्तनं यत्रासौ विनयवैनयिकचरणकरणयात्रामात्रावृत्तिकोऽतस्तं धर्मम् 'आख्यातम्' अभिहितमिच्छामीति योगः।

'एवं देवाणुप्पिया! गंतव्वं'ति युगमात्रभून्यस्तदृष्टिनेत्यर्थः 'एवं चिट्ठियव्वं'ति निष्क्रमणप्रवेशादिवर्जिते स्थाने संयमात्मप्रवचनबाधापरिहारेणोर्ध्वस्थानेन स्यातव्यम्, 'एवं नीसीइयव्वं'ति, 'निषिक्तव्यम्' उपवेष्टव्यं संदंशकभूमिप्रमार्जनादिन्यायेनेत्यर्थः 'एवं तुयट्टियव्वं'ति शयितव्यं सामायिकोच्चारणादिपूर्वकम् 'एवं भुंजियव्वं'ति धूमाङ्गारादिदोषवर्जनतः 'एवं भासियव्वं'ति मधुरादिविशेषणोपपन्नतयेति 'एवमुत्थायोत्थाय' प्रमादनिद्राव्यपोहेन विबुद्धय २ प्राणादिषु विषये यः संयमो-रक्षा तेन संयंतव्यं-यतितव्यं 'तमाणाए'त्ति 'तद्' अनन्तरम् 'आज्ञया' आदेशेन 'ईरियासमिए'त्ति ईर्यायां-गमने समितः, सम्यक्प्रवृत्तत्वरूपं हि समितत्वम्।

'आयाणभंडमत्तनिक्खेवणासमिए'त्ति आदानेन-ग्रहणेन सह भाण्डमात्राया-उपकरणपरिच्छदस्य या निक्षेपणा-न्यासस्तस्यां समितो यः स तथा 'उच्चारे'त्यादि, इह च 'खेल'त्ति कण्ठ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुखश्लेष्मा सिङ्घानकं च-नासिकाश्लेष्मा, 'मणसमिए' त्ति संगतमनःप्रवृत्तिकः 'मणगुत्ते' त्ति मनोनिरोधवान् 'गुत्ते' त्ति मनोगुप्तत्वादीनां निगमनम्, एतदेव विशेषणायाह-'गुत्तिंदिए' त्ति 'गुत्तबंभयारी' त्ति गुप्तं-ब्रह्मगुप्तियुक्तं ब्रह्म चरित यः स तथा 'चाइ' त्ति सङ्गत्यागवान् 'लज्जु' त्ति संयमवान् रज्जुरिव वा रज्जु-अवक्रव्यवहारः 'धन्ने' त्ति धन्यो-धर्मधनलब्धेत्यर्थः 'खंतिखमे' त्ति क्षान्त्या क्षमते न त्वसमर्थतया योऽसौ क्षान्तिक्षमः 'जितेन्द्रियः' इन्द्रियविकाराभावात्, यच्च प्रागगुप्तेन्द्रिय इत्युक्तं तदिन्द्रियविका- रगोपनमात्रेणापि स्यादिति विशेषः 'सोहिए' त्ति शोभितः शोभावान् शोधितो वा निराकृतातिचारत्वात्, सौहृदं मैत्री सर्वप्राणिषु तद्योगात्सौहृदो वा।

'अनियाणे' त्ति प्रार्थनारहितः 'अप्पुस्सुए' त्ति 'अल्पौत्सुक्यः' त्वरारहितः 'अबहिल्लेस्से' त्ति अविद्यमाना बहि-संयमाद्बहिस्ताल्लेश्या-मनोवृत्तिर्यस्यासावबहिर्लेश्यः 'सुसामन्नरए' त्ति शोभने श्रमणत्वे रतोऽतिशयेन वा श्रामण्ये रतः 'दंते' त्ति दान्तः क्रोधादिदमनात् द्व्यन्तो वा रागद्वेषयोरन्तार्थं प्रवृत्तत्वात् 'इणमेव' त्ति इदमेव प्रत्यक्षं 'पुरओ काउं' ति अग्रे विधाय मार्गानभिज्ञो मार्गज्ञनरमिव पुरस्कृत्य वा-प्रधानीकृत्य 'विहरति' आस्ते इति।

**मू. (११४)** *तए णं समणे भगवं महावीरे कयंगलाओ नयरीओ छत्तपलासयाओ चेइयाओ पडिनिक्खमइ २ बहिया जणवयविहारं विहरति। तए णं से खंदए अनगारो समणस्स भगवओ महावीरस्स तहारूवाणं थेराणं अंतिए सामाइयमाइयाइं एक्कारस अंगाइं अहिज्जइ, जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं महावीरं वंदइ नमंसइ २ एवं वयासी-इच्छामि णं भंते! तुब्भेहिं अब्भणुण्णाए समाणे मासियं भिक्खुपडिमं उवसंपज्जित्ता णं विहरित्तए।*

*अहासुहं देवाणुप्पिया! मा पडिबंधं। तए णं से खंदए अनगारे समणेणं भगवया महावीरेणं अब्भणुण्णाए समाणे हट्ठे जाव नमंसित्ता मासियं भिक्खुपडिमं उवसंपज्जित्ता णं विहरइ, तए णं से खंदए अनगारे मासियभिक्खुपडिमं अहासुत्तं अहाकप्पं अहामग्गं अहातच्चं अहासम्मं काएण फासेति पालेति सोभेति तीरेति पूरेति किट्टेति अनुपालेइ आणाए आराहेइ संमंनुकाएण फासित्ता जाव आराहेत्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं जाव नमंसित्ता एवं वयासी-इच्छामि णं भंते! तुब्भेहिं अब्भणुण्णाए समाणे दोमासियं भिक्खुपडिमं उवसंपज्जित्ताणं विहरित्तए अहासुहं देवाणुप्पिया! मा पडिबंधं, तं चेव, एवं तेमासियं चाउम्मासियं पंचछसत्तमा, पढमं सत्तराइंदियं दोच्चं सत्तराइंदियं तच्चं सत्तरातिंदियं अहोरातिंदियं एगरा०, तए णं से खंदए अनगारे एगराइंदियं भिक्खुपडिमं अहासुत्तं जाव आराहेत्ता जेणेव समणे० तेणेव उवागच्छति २ समणं भगवं म०जाव नमंसित्ता एवं वदासी।*

*इच्छामि णं भंते! तुब्भेहिं अब्भणुण्णाए समाणे गुणरयणसंवच्छरं तवोकम्मं उवसंपज्जित्ता णं विहरित्तए, अहासुहं देवाणुप्पिया! मा पडिबंधं।*

*तए णं से खंदए अनगारे समणेणं भगवया महावीरेणं अब्भणुण्णाए समाणे जाव नमंसित्ता गुणरयणसंवच्छरं तवोकम्मं उवसंपज्जित्ता णं विहरति, तं० -पढमं मासं चउत्थंचउत्थेण अनिक्खित्तेणं तवोकम्मेणं दिया ठाणुक्कुडुए सूराभिमुहे आयावणभूमीए आयावेमाणे रत्तिं वीरासणेणं अवाउडेण य। एवं दोच्चं मासं छट्ठंछट्ठेणं एवं तच्चं मासं अट्ठमंअट्ठमेणं चउत्थं मासं दसमंदसमेणं पंचमं मासं बारसमंबारसमेणं छट्ठं मासं चोद्दसमंचोद्दसमेणं सत्तमं मासं सोलसमं २ अट्ठमं मासं अट्ठारसमं २*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नवमं मासं वीसतिमं २ दसमं मासं बावीसं २ एक्कारसमं मासं चउव्वीसतिमं २ बारसमं मासं छव्वीसतिमं २ तेरसमं मासं अट्ठावीसतिमं २ चोद्दसमं मासं तीसइमं २ पन्नरसमं मासंबत्तीसतिमं २ सोलसमं मासं चोत्तीसइमं २ अनिक्खित्तेणं तवोकम्मेणं दिया ठाणुक्कुडुए सूराभिमुहे आयावणभूमीए आयामेवाणे रत्तिं वीरासणेणं अवाउडेणं।*

*तए णं से खंदए अनगारे गुणरयणसंवच्छरं तवोकम्मं अहाकप्पं जाव आराहेत्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं महावीरं वंदइ नमंसइ २ बहूहिं चउत्थछट्ठ-ट्ठमदसमदुवालसेहिं मासद्धमासखमणेहिं विचित्तेहिं तवोकम्मेहिं अप्पाणं भावेमाणे विहरति।*

*तए णं से खंदए अणगारे तेणं ओरालेणं विउलेणं पयत्तेणं पग्गहिएणं कल्लाणेणं सिवेणं धन्नेणं मंगल्लेणं सस्सिरीएणं उदग्गेणं उदत्तेणं उत्तमेणं उदारेणं महानुभागेणं तवोकम्मेणं सुक्के लुक्खे निम्मंसे अट्ठिचम्मावणद्धे किडिकिडियाभूए किसे धमणिसंतए जाते यावि होत्था, जीवंजीवेण गच्छइ जीवंजीवेण चिट्ठइ भासं भासित्तावि गिलाइ भासं भासमाणे गिलाति भासं भासिस्सामीति गिलायति।*

*से जहा नामए-कट्ठसगडिया इ वा पत्तसगडिया इ वा पत्ततिलभंडगसगडिया इ वा एरंडकट्ठसगडिया इ वा इंगालसगडिया इ वा उण्हे दिण्णा सुक्का समाणी ससद्दं गच्छइ ससद्दं चिट्ठइ एवामेव खंदएवि अनगारे ससद्दं गच्छइ ससद्दं चिट्ठइ उवचिते तवेणं अवचिए मंससोणिएणं हुया सणेविव भासरासिपडिच्छन्ने तवेणं तेएणं तवतेयसिरीए अतीव २ उवसोभेमाणे २ चिट्ठइ*

**वृ.** 'एक्कारसअंगाइं अहिज्जइ'त्ति इह कश्चिदाह-नन्वनेन स्कन्दकचरितात्प्रागेवैका-दशाङ्गनिष्पत्तिरवसीयते, पञ्चमाङ्गान्तर्भूतं च स्कन्दकचरितमिदमुपलभ्यते इति कथं न विरोधः उच्यते, श्रीमन्महावीरतीर्थे किल नव वाचनाः, तत्र च सर्ववाचनासु स्कन्दकचरितात्पूर्वकाले ये स्कन्दकचरिताभिधेया अर्थास्ते चरितान्तरद्वारेण प्रज्ञाप्यन्ते, स्कन्दकचरितोत्पत्तौ च सुधर्मस्वामिना जम्बूनामानं स्वशिष्यमङ्गीकृत्याधिकृतवाचनायामस्यां स्कन्धकचरितमेवाश्रित्य तदर्थप्ररूपणा कृतेति न विरोधः, अथवा सातिशायित्वाद्गणधराणामनागतकालभाविचरतनिबन्धनमदुष्टमिति, भावि- शिष्यसन्तानापेक्षयाऽतीतकालनिर्देशोऽपि न दुष्ट इति। 'मासियं'ति मासपरिमाणां 'भिक्खुपडिमं'ति भिक्षूचितमभिग्रहविशेषम्, एतत्स्वरूपं च–

॥१॥ "गच्छा विनिक्खमित्ता पडिवज्जइ मासियं महापडिमं।
दत्तेगभोयणस्सा पाणस्सवि एग जा मासं॥ इत्यादि

नन्वयमेकादशाङ्गधारी पठितः, प्रतिमाश्च विशिष्टश्रुतवानेव करोति, यदाह-

॥१॥ "गच्छे च्चिय निम्माओ जा पुव्वा दस भवे असपुण्णा।
नवमस्स तइयवत्थू होइ जहन्नो सुयाहिगमो॥" इति

कथं न विरोधः ?, उच्यते, पुरुषान्तरविषयोऽयं श्रुतनियमः तस्य तु सर्वविदुपदेशेन प्रवृत्तत्वान्न दोष इति। 'अहासुत्तं'ति सामान्यसूत्रनतिक्रमेण 'अहाकप्पं'ति प्रतिमाकल्पानतिक्रमेण तत्कल्पवस्त्वनतिक्रमेण वा 'अहामग्गं'ति ज्ञानादिमोक्षमार्गानतिक्रमेण क्षायोपशमिकभावा-नतिक्रमेण वा 'अहातच्चं'ति यथातत्त्वं तत्त्वानतिक्रमेण मासिकी भिक्षुप्रतिमेति शब्दार्थानति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लङ्घनेनेत्यर्थः 'अहासम्मं'ति यथासाम्यं समभावानतिक्रमेण 'काएणं'ति न मनोरथमात्रेण 'फासेइ'त्ति उचितकाले विधिना ग्रहणात् 'पालेइ'त्ति असकृदुपयोगेन प्रतिजागरणात् 'सोहेइ'त्ति शोभयति पारणकदिने गुर्वादिदत्तशेषभोजनकरणात् शोधयति वाऽतिचारपङ्कक्षालनात् 'तीरेइ'त्ति पूर्णेऽपि तदवधौ स्तोककालावस्थानात् 'पूरेइ'त्ति पूर्णेऽपि तदवधौ तत्कृत्यपरिमाणपूरणात्।

—'किट्टेइ'त्ति कीर्त्तयति पारणकदिने इदं चेदं चैतस्याः कृत्यं तच्च मया कृतमित्येवं कीर्त्तनात् 'अनुपालेइ'त्ति तत्समाप्तौ तदनुमोदनात्, किमुक्तं भवति ? इत्याह-आज्ञयाऽऽराधयतीति एवमेताः सप्त सप्तमासान्ताः, ततोऽष्टमी प्रथमा सप्तरात्रिन्दिवा-सप्ताहोरात्रमानाः एवं नवमी दशमी चेति, एतास्तिस्रोऽपि चतुर्थभक्तेनापानकेनेति, उत्तानकादिस्थानकृतस्तु विशेषः, 'राइंदिय'त्ति रात्रिन्दिवा, एकादशी अहोरात्रपरिमाणा, इयं च षष्ठभक्तेन, 'एगराइय'त्ति एकरात्रिकी, इयं चाष्टमेन भवतीति।

'गुणरयणसंवच्छरं'ति गुणानां-निर्जराविशेषाणां रचनं-करणं संवत्सरेण-सत्रिभागवर्षेण यस्मिंस्तपसि तद् गुणरत्नसंवत्सरं, गुणा एव वा रत्नानि यत्र स तथा गुणरत्नः संवत्सरो यत्र तद्गुणरत्नसंवत्सरं-तपः, इह च त्रयोदश मासाः सप्तदशदिनाधिकास्तपः कालः, त्रिसप्ततिश्च दिनानि पारणककाल इति, एवं चायम्—

॥१॥ "पन्नरसवीसचउव्वीस चेव चउवीस पन्नवीसा य।
चउवीस एक्कवीसा चउवीसा सत्तवीसा य॥

॥२॥ तीसा तेत्तीसावि य चउव्वीस छवीस अट्ठवीसा य।
तीसा बत्तीसावि य सोलसमासेसु तवदिवसा॥

॥३॥ पन्नरसदसट्ठछप्पंचचउर पंचसु य तिन्नि तिन्नित्ति।
पंचसु दो दो य तहा सोलसमासेसु पारणगा॥

गुणरत्नसंवत्सर तपोयन्त्रमिदम्॥

| मास | तपोदि० | पा० दि० |
|---|---|---|
| १ | १५ | १५ |
| २ | २० | १० |
| ३ | २४ | ८ |
| ४ | २४ | ६ |
| ५ | २५ | ५ |
| ६ | २४ | ४ |
| ७ | २१ | ३ |
| ८ | २४ | ३ |

इह च यत्र मासेऽष्टमादितपसो यावन्ति दिनानि न पूर्यन्ते तावन्त्यग्रेतनमासादाकृष्य पूरणीयानि, अधिकानि चाग्रेतनमासे क्षेप्तव्यानि।

'चउत्थं चउत्थेणं'ति चतुर्थं भक्तं यावद्भक्तं त्यज्यते यत्र तच्चतुर्थम्, इयं चोपवासस्य सञ्ज्ञा, एवं षष्ठादिकमुपवासद्वयादेरिति।

'अनिक्खित्तेणं'ति अविश्रान्तेन 'दिय'त्ति दिवा दिवस इत्यर्थः 'ठाणुक्कुडुए'त्ति, स्थानम्-आसनमु- त्कुटुकम्-आधारे पुतालगनरूपं यस्यासौ स्थानोत्कुटुकः 'वीरासणेणं'ति सिंहासनोपविष्टस्य भून्यस्तपादस्याप- नीतसिंहासनस्येव यदवस्थानं तद्वीरासनं तेन, 'अवा-उडेण य'त्ति प्रावरणाभावेन च।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| ९ | २७ | ६ |
| १० | ३० | ३ |
| ११ | ३३ | ३ |
| १२ | २४ | २ |
| १३ | २६ | २ |
| १४ | २८ | २ |
| १५ | ३० | २ |
| १६ | ३२ | २ |
| | ४०७ | ७३ |

'ओरालेण'मित्यादि 'ओरालेन' आशंसारहिततया प्रधानेन, प्रधानं चाल्पमपि स्यादित्याह-'विपुलेन' विस्तीर्णेन बहुदिनत्वात्, विपुलं च गुरुभिरननुज्ञातमपि स्यादप्रयत्नकृतं वा स्यादत आह-'पयत्तेणं'ति प्रदत्तेनानुज्ञातेन गुरुभि प्रयतेन वा प्रयत्नवता-प्रमादरहितेनेत्यर्थः, एवंविधमपि सामान्यतः प्रतिपन्नं स्यादित्याह-'प्रगृहीतेन' बहुमानप्रकर्षादीश्रितेन, तथा 'कल्याणेन' नीरोगताकारणेल 'शिवेन' शिवहेतुना 'धन्येन' धर्मधनसाधुना 'माङ्गल्येन' दुरितोपशमसाधुना 'सश्रीकेण' सम्यकपालनात्तशोभेन 'उदग्रेण' उन्नतपर्यवसानेन उत्तरोत्तरं वृद्धिमतेत्यर्थ 'उदात्तेन' उन्नतभाववता 'उत्तमेणं'ति ऊर्ध्वं तमसः-अज्ञानाद्यत्तत्तथा तेन ज्ञानयुक्तेनेत्यर्थ उत्तमपुरुषासेवितत्वाद्वोत्तमेन 'उदारेण' औदार्यवता निस्पृहत्वातिरेकात्, 'महानुभागेन' महाप्रभावेण 'सुक्कि'त्ति शुष्को नीरसशरीरत्वात् 'लुक्खे'त्ति बुभुक्षावशेन रूक्षीभूतत्वात्

अस्थीनि चर्मावनद्धानि यस्य सोऽस्थिचर्मावनद्धः किटिकिटिका निर्मांसास्थिसम्बन्ध्युपवेशनादिक्रियासमुत्थः शब्दविशेषस्तां भूतः-प्राप्तो यः स किटिकिटिकाभूतः 'कृशः' दुर्बलः 'धमनीसन्ततो' नाडीव्याप्तो मांसक्षयेण दृश्यमाननाडीकत्वात्, 'जीवंजीवेणं'ति अनुस्वारस्यागमिकत्वात् 'जीवजीवेन' जीवबलेन गच्छति न शरीरबलेनेत्यर्थः 'भासं भासित्ते'त्याद कालत्रयनिर्देशः 'गिलाइ'त्ति ग्लायति ग्लानो भवति ।

'से जहा नामए'त्ति 'से'त्ति यथार्थः यथेति दृष्टान्तार्थः नामेति सम्भावनायाम् 'इति' वाक्यालङ्कारे 'कट्ठसगडिय'त्ति काष्ठभृता शकटिका काष्ठशकटिका 'पत्तसगडिय'त्ति पलाशादिपत्रभृता गन्त्री 'पत्ततिलभंडगसगडिय'त्ति पत्रयुक्ततिलानां भाण्डकानां चमृन्मयभाजनानां भृता गन्त्रीत्यर्थः 'तिलकट्ठगसगडिय'त्ति क्वचित्पाठः प्रतीतार्थः 'एरण्डक-ड्डसगडिय'त्ति एरण्डकाष्ठमयी एरण्डकाष्ठभृता वा शकटिका, एरण्डकाष्ठग्रहणं च तेषामसारत्वेन तच्छकटिकायाः शुष्कायाः सत्या अतिशयेन गमनादी सशब्दत्वं स्यादिति, 'अङ्गारशकटिका' अङ्गारभृतागन्त्री 'उण्हे दिण्णा सुक्का समाणी'ति विशेषणद्वयं काष्ठादीनामार्द्राणामेव संभवतीति यथासम्भवमायोज्यमिति हुताशन इव भस्मराशिप्रतिच्छन्नः ।

'तवेणं तेएणं'ति तपोलक्षणेन तेजसा, अयमभिप्रायः-यथा भस्मच्छन्नोऽग्निर्बहिर्वृत्त्या तेजोरहितोऽन्तर्वृत्त्या तु ज्वलति, एवं स्कन्दकोऽपि अपचितमांसशोणितत्वाद्बहिर्निस्तेजा अन्तस्तु शुभध्यानतपसा ज्वलतीति ॥ उक्तमेवार्थमाह–

***मू. (११५)*** *तेणं कालेणं २ रायगिहे नगरे जाव समोसरणं जाव परिसा पडिगया, तए णं तस्स खंदयस्स अन० अन्नया कयाइ पुव्वरत्तावरत्तकालसमयंसि धम्मजागरियं जागरमाणस्स इमेयारूवे अब्भत्थिए चिंतिए जाव समुप्पज्जित्था –*

*–एवं खलु अहं इमेणं एयारूवेणं ओरालेणं जाव किसे धमनिसंतए जाते जीवंजीवेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गच्छामि जीवंजीवेणं चिट्ठामि जाव गिलामि जाव एवामेव अहंपि ससद्दं गच्छामि ससद्दं चिट्ठामि तं अत्थि ता मे उट्ठाणे कम्मे बले वीरिए पुरिसक्कारपरक्कमे तं जाव ता मे अत्थि उट्ठाणे कम्मे बले वीरिए पुरिसक्कारपरक्कमे जाव य मे धम्मायरिए धम्मोवदेसए धम्मोवदेसए समणे भगवं महावीरे जिने सुहत्थी विहरइ ताव ता मे सेयं कल्लं पाउप्पभयाए रयणीए फुल्लुप्पलक-मलकोमलुम्मिल्लियंमि अहापांडुरे पभाए रत्तासोयप्पकासकिंसुयसुयमुहगुंजद्धरागसरिसे कमलागरसंडबोहए उट्ठियंमि सूरे सहस्सरस्सिंमि दिनयरे तेयसा जलंते समणं भगवं महावीरं वंदित्ता जाव पज्जुवासित्ता–*

*–समणेणं भगवया महावीरेणं अब्भणुण्णाए समाणे सयमेव पंच महव्वयाणि आरोवेत्ता समणा य समणीओ य खामेत्ता तहारूवेहिं थेरेहिं कडाईहिं सद्धिं विपुलं पव्वयं सणियं २ दुरूहित्ता मेघधनसन्निगासं देवसन्निवातं पुढवीसिलावट्टयं पडिलेहित्ता दब्भसंथारयं संथरित्ता दब्भसंथा-रोवगयस्स संलेहणाजोसणाजूसियस्स भत्तपाणपडियाइक्खियस्स पाओवगयस्स कालं अणवकंखमाणस्स विहरित्तएत्तिकट्टु एवं संपेहेइ २ त्ता कल्लं पाउप्पभायए रयणीए जाव जलंति जेणेव समणे भग० जाव पज्जुवासति, खंदयाइ समणे भगवं महावीरे खंदयं अणगारं एवं वयासी-*

*–से नूणं तव खंदया ! पुव्वरत्तावरत्तकालस० जाव जागरमाणस्स इमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था-एवं खलु अहं इमेणं एयारूवेणं तवेणं ओरालेणं विपुलेणं तं चेव जाव कालं अनवकंखमाणस्स विहरित्तएत्तिकट्टु एवं संपेहेति २ कल्लं पाउप्पभाए जाव जलंते जेणेव मम अंतिए तेणेव हव्वमागए ।*

*से नूणं खंदया ! अट्ठे समट्ठे ?, हंता अत्थि, अहासहं देवाणुप्पिया ! मा पडिबंधं ।।*

**वृ.** 'पुव्वरत्तावरत्तकालसमयंसि'त्ति पूर्वरात्रश्च-रात्रेः पूर्वो भागः अपररात्रश्च-अपकृष्टा रात्रि पश्चिमतद्भाग इत्यर्थः, तल्लक्षणो यः कालसमयः कालात्मकः समयः स तथा तत्र, अथवा पूर्वरात्रापररात्रकालसमय इत्यत्र रेफलोपात् 'पुव्वरत्तावरत्तकालसमयंसि'त्ति स्याद्, धर्मजागरिकां जाग्रतः-कुर्वत इत्यर्थः, 'तं अत्थि ता मे'त्ति तदेवमप्यस्ति तावन्मम उत्थानादि न सर्वथा क्षीणमिति भावः 'तं जाव ता मे अत्थि'त्ति तत्-तस्माद्यावत्ता इति भाषामात्रे 'मे' ममास्ति 'जावय'त्ति यावच्च 'सुहत्थि'त्ति शुभार्थी भव्यान् प्रति सुहस्ती वा पुरुषवरगन्धहस्ती ।

एतच्च भगवत्साक्षिकोऽनशनविधिर्महाफलो भवतीत्यभिप्रायेण भगवन्निर्वाणे शोकदुःखभाजनं मा भूवमहम् इत्यभिप्रायेण वा चिन्तितमनेनेति, 'कल्लमि'त्यादि, 'कल्लं'ति श्वः प्रादुः-प्राकाश्ये ततः प्रकाशप्रभातायां रजन्यां 'फुल्लोत्पलकमलकोमलोन्मीलिते' फुल्लं-विकसितं तच्चतदुत्पलं च फुल्लोत्पलं तच्च कमलश्च-हरिणविशेषः फुल्लोत्पलकमलौ तयोः कोमलम्-अकठोर-मुन्मीलितं-दलानां नयनयोश्चोन्मीलनं यस्मिंस्तत्तथा तस्मिन् 'अथे'ति रजनीविभातानन्तरं पाण्डुरे प्रभाते रक्ताशोकप्रकाशेन किंशुकस्य शुकमुखस्य गुञ्जार्द्धस्य च रागेण सदृशो यः स तथा तस्मिन्, तथा कमलाकरा-ह्रदादयस्तेषु षण्डानि-नलिनीषण्डानि तेषां बोधक यः स कमलाकर-षण्डबोधकस्तस्मिन् 'उत्थिते' अभ्युद्गते कस्मिन् ? इत्याह-सूरे, पुनः किम्भूते ? इत्याह-सहस्सर-स्सिमित्यादि, 'कडाईहिं'ति, इह पदैकदेशात्पदसमुदायो दृश्यस्ततः कृतयोग्यादिभिरिति स्यात् ।

तत्र कृता योगाः-प्रत्युपेक्षणादिव्यापार येषां सन्ति ते कृतयोगिनः आदिशब्दात् प्रियधर्माणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृढधर्म्माण इत्यादि गृह्यत इति, 'विउलं' ति विपुलं विपुलाभिधानं 'मेघघनसंनिगासं' ति धनमेघसदृशं-शान्द्रजलदसमानं कालकमित्यर्थ 'देवसंनिवायं' ति देवानां संनिपातः-समागमो रमणीयत्वाद् यत्र स तथा तं 'पुढविसिलापट्टयं' ति पृथिवीशिलारूपः पट्टकःआसनविशेषः पृथिवीशिलापट्टकः, काष्ठशिलाऽपि शिला स्यादतस्तद्व्यवच्छेदाय पृथिवीग्रहणं, 'संलेहणाजूसणाजूसियस्स' त्ति संलिख्यते-कृशीक्रियतेऽनयेति संलेखना-तपस्तस्या जोषणा-सेवा तया जुष्टः-सेवितो जूषितो वा क्षपितो यः स तथा तस्य 'भत्तपाणपडियाइक्खियस्स' त्ति प्रत्याख्यातभक्तपानस्य 'कालं' ति मरणं 'तिकट्टु' इतिकृत्वा इदं विषयीकृत्य।

**मू. (११६)** *तए णं से खंदए अनगारे समणेणं भगवया महावीरेणं अब्भणुण्णाए समाणे हट्ठतुट्ठ जाव हयहियए उट्ठाए उट्ठेइ २ समणं भगवं महा० तिक्खुत्तो आयाहिणं पयाहिणं करेइ २ जाव नमंसित्ता सयमेव पंच महव्वयाइं आरुहेइ २ त्ता समणेय समणीओ य खामेइ २ त्ता तहारूवेहिं थेरेहिं कडाईहिं सद्धिं विपुलं पव्वयं सणियं २ दुरूहेइ मेहधनसन्निगासं देवसन्निवायं पुढविसिलावट्टयं पडिलेहेइ २ उच्चारपासवणभूमिं पडिलेहेइ २ दब्भसंथारयं संथरइ २ त्ता पुरत्थाभिमुहे संपलियंकनिसन्ने करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु एवं वदासि।*

*नमोऽत्थु णं अरहंताणं भगवंताणं जाव संपत्ताणं, नमोऽत्थु णं समणस्स भगवओ म जाव संपाविउकामस्स, वंदामि णं भगवंतं तत्थ गयं इहगते, पासउ मे भयवं तत्थगए इहगयंतिकट्टु वंदइ नमंसति २ एवं वदासी—*

*पुव्विंपि मए समणस्स भगवओ महावीरस्स अंतिए सव्वे पाणाइवाए पच्चक्खाए जावज्जीवाए जाव मिच्छदंसणसल्ले पच्चक्खाए जावज्जीवाए इयाणिंपि य णं समणस्स भ० मं० अंतिए सव्वं पाणाइवायं पच्चक्खामि जावज्जीवाए जाव मिच्छदंसणसल्लं पच्चक्खामि, एवं सव्वं असणं पाणं खा० सा० चउव्विहंपि आहारं पच्चक्खामि जावज्जीवाए, जंपि य इमं सरीरं इट्ठं कंतं पियं जाव फुसंतुत्तिकट्टु एयंपि णं चरिमेहिं उश्सासनीसासेहिं वोसिरामित्तिकट्टु संलेहणाजूसणाजूसिए भत्तपाणपडियाइक्खिए पाओवगए कालं अणवकंखमाणे विहरति।*

*तए णं से खंदए अण० समणस्स भ० मं० तहारूवाणं थेराणं अंतिए सामाइयमादियाइं इक्कारस अंगाइं अहिज्जित्ता बहुपडिपुन्नाइं दुवालसवासाइं सामन्नपरियागं पाउणित्ता मासियाए संलेहणाए अत्ताणं झूसित्ता सट्ठिं भत्ताइं अनसणाए छेदेत्ता आलोइयपडिक्कंते समाहिपत्ते आनुपुव्वीए कालगए।*

**मू. (११७)** *तए णं ते थेरा भगवंतो खंदयं अण० कालगयं जाणित्ता परिनिव्वाणवत्तियं काउस्सग्गं करेंति २ पत्तचीवराणि गिण्हंति २ विपुलाओ पव्वयाओ सणियं २ पच्चोरुहंति २ जेणेव समणे भगवं म तेणेव उवा समणं भगवं म वंदंति नमंसंति २ एवं वदासी—*

*एवं खलु देवाणुप्पियाणं अंतेवासी खंदए नामं अनगारे पगइभद्दए पगतिविणीए पगतिउवसंते पगतिपयणुकोहमाणमायालोभे मिउमद्दवसंपन्ने अल्लीणे भद्दए विनीए, से णं देवाणुप्पिएहिं अब्भणुण्णाए समाणे सयमेव पंच महव्वयाणि आरोवित्ता समणे य समणीओ य खामेत्ता अम्हेहिं सद्धिं विपुलं पव्वयं तं चेव निरवसेसं जाव आनुपुव्वीए कालगए इमे य से आयारभंडए।*

*भंते त्ति भगवं गोयमे समणं भगवं म० वंदति नमंसति २ एवं वयासी-एवं खलु देवाणुप्पियाणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अंतेवासी खंदए नामं अन० कालमासे कालं किच्चा कहिं गए ? उववन्ने ?, गोयमाइ समणे भगवं महा० भगवं गोयमं एवं वयासी-एवं खलु गोयमा ! मम अंतेवासी खंदए नामं अनगारे पगतिभ० जाव से णं मए अब्भणुण्णाए समाणे सयमेव पंच महव्वयाइं आरुहेत्ता तं चेव सव्वं अविसेसियं नेयव्वं जाव आलोतियपडिक्कंते समाहिपत्ते कालमासे कालं किच्चा अच्चुए कप्पे देवत्ताए उववन्ने ।*

*तत्थ णं अत्थेगइयाणं देवाणं बावीसं सागरोवमाइं ठिती प०, तस्स णं खंदयस्सवि देवस्स बावीसं सागरोवमाइं ठिती पन्नत्ता । से णं भंते ! खंदए देवे ताओ देवलोगाओ आउक्खएणं भवक्खएणं ठितीख० अनंतरं चयं चइत्ता कहं गच्छिहिति ? कहिं उववज्जिहिति ? गोयमा ! महाविदेहे वासे सिज्झिहिति बुज्झिहिति मुच्चिहिति परिनिव्वाहिति सव्वदुक्खाणमंतं करेहिति ।*

**वृ.** 'एवं संपेहेइ' त्ति 'एवम्' उक्तलक्षणमेव 'संप्रेक्षते' पर्यालोचयति सङ्गतासङ्गतविभागतः 'उच्चारपासवणभूमिं पडिलेहेइ' त्ति पादपोपगमनादाराादुच्चारादेस्तस्य कर्त्तव्यत्वादुच्चारादिभूमिप्रत्युपेक्षणं न निरर्थकं, 'संपलियंकनिसण्णे' त्ति पद्मासनोपविष्टः 'सिरसावत्तं' ति शिरसाऽप्राप्तम्-अस्पृष्टम्, अथवा शिरसि आवर्त्त आवृत्तिरावर्त्तनं-परिभ्रमणं यस्यासौ सप्तम्यलोपाच्छिरस्यावर्त्तस्तं, 'सट्ठिं भत्ताइं' ति प्रतिदिनं भोजनद्वयस्य त्यागात्त्रिंशता दिनैः षष्टिर्भक्तानि त्यक्तानि भवन्ति 'अनसणाए' त्ति प्राकृतत्वादनशनेन 'छेइत्त' त्ति 'छित्त्वा' परित्यज्य 'आलोइय-पडिक्कंते' त्ति आलोचितं गुरूणां निवेदितं यदतिचारजातं तत् प्रतिक्रान्तम्-अकरणविषयीकृतं येनासावालोचितप्रतिक्रान्तः अथवाऽऽलोचितश्चासावालोचनादानात् प्रतिक्रान्तश्च मिथ्यादुष्कृतदानादालोचितप्रतिक्रान्तः ।

'परिनिव्वाणवत्तियं' ति परिनिर्वाणंमरणं तत्र यच्छरीरस्य परिष्ठापनं तदपि परिनिर्वाणमेव तदेव प्रत्ययो-हेतुर्यस्य स परिनिर्वाणप्रत्ययोऽस्तं 'कहिंगए' त्ति कस्यां गतौ 'कहिं उववन्ने' त्ति क देवलोकादौ ? इति

'एगइयाणं' ति एकेषां न तु सर्वेषाम् । 'आउक्खएणं' ति आयुष्ककर्मदलिकनिर्जरणेन 'भवक्खएणं' ति देवभवनिबन्धनभूतकर्मणां गत्यादीनां निर्जरणेन 'ठितिक्खएणं' ति आयुष्ककर्मणः स्थितेर्वेदनेन 'अनंतरं' ति देवभवसम्बन्धिनं 'चय' न्ति शरीरं 'चइत्त' त्ति त्यक्त्वा, अथवा 'चयं' ति च्यवं-च्यवनं 'चइत्त' त्ति च्युत्वा कृत्वाऽनन्तरं क गमिष्यति ?

इत्येवमनन्तरशब्दस्य सम्बन्धः कार्य इति ॥

<u>शतकं-२ उद्देशकः-१ समाप्तः</u>

## —: शतकः-२ उद्देशकः-२ :—

**वृ.** अथ द्वितीय आरभ्यते, अस्य चायमभिसम्बन्धः-'केण वा मरणेण मरमाणे जीवे वड्ढइ' त्ति प्रागुक्तं, मरणं च मारणान्तिकसमुद्घातेन समवहतस्यान्यथा च भवतीति समुद्घातस्वरूपमिहोच्यते, इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू.** *(११८) कति णं भंते ! समुग्घाया पन्नत्ता ?, गोयमा ! सत्त समुग्घाया पन्नत्ता, तंजहा-वेदणासमुग्घाए एवं समुग्घायपदं छाउमत्थियसमुग्घायवज्जं भाणियव्वं, जाव वेमाणियाणं कसायसमुग्घाया अप्पाबहुयं ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणगारस्स मं भंते ! भावियप्पणो केवलिसमुग्घाय जाव सासयमणागयद्धं चिट्ठंति, समुग्घायपदं नेयव्वं ।

**वृ.** 'कइ णं भंते ! समुग्घाए'त्यादि, तत्र 'हन हिंसागत्योः'इति वचनाद् हननानि-घाताः सम्-एकीभावे उत्-प्राबल्येन ततश्चैकीभावेन प्राबल्येन च घाताः समुदघाताः, अथ केन सहैकीभावः उच्यते, यदाऽऽत्मा वेदनादिसमुद्घातगतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवतीति वेदनाद्यनुभवज्ञानेन सहैकीभावः, अथ प्राबल्येन घाताः कथम् ?, उच्यते, यस्माद्वेदनादिसमुद्घात-परिणतो बहून् वेदनीयादिकर्मप्रदेशान् कालान्तरानुभवयोग्यानुदीरणाकरणेनाकृष्य उदये प्रक्षिप्यानुभूय निर्जरयति, आत्मप्रदेशैः सह श्लिष्टान् शातयतीत्यर्थः, अतः प्राबल्येन घाता इति ।

'सत्त समुग्घाय'त्ति वेदनासमुद्घातादयः, एते च प्रज्ञापनायामिव द्रष्टव्याः, अत एवाह-'छाउमत्थिए'त्यादि, 'छाउमत्थियसमुग्घायवज्जं'ति 'कइ णं भंते ! छाउमत्थिया समुग्घाया पन्नत्ता' इत्यादिसूत्रवर्जितं 'समुग्घायपयं'ति प्रज्ञापनायाः षट्त्रिंशत्तमपदं समुद्घातार्थमिह नेतव्यं, तच्चैवम्-

'कइ णं भंते ! समुग्घाया पन्नत्ता ?, गोयमा ! सत्त समुग्घाया पन्नत्ता, तंजहा-वेयणास-मुग्घाए कसायसमुग्घाए'इत्यादि, इह सङ्ग्रहगाथा–

॥१॥ "वेयण १ कसाय २ मरणे ३ वेउव्विय ४ तेयए य ५ आहारे ६ ।
केवलिए चेव ७ भवे जीवमणुस्साण सत्तेव ॥

जीवपदे मनुष्यपदे च सप्त वाच्याः, नारकादिषु तु यथायोगमित्यर्थः, तत्र वेदनासमुद्घातेन समुद्धत आत्मा वेदनीयकर्मपुद्गलानां शातं करोति, कषायसमुद्घातेन कषायपुद्गलानां मारणा-न्तिकसमुद्घातेनायुःकर्म्मपुद्गलानां वैकुर्विकसमुद्घातेन समुद्धतो जीवः प्रदेशान् शरीरा-द्बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमात्रमायामतश्च सङ्ख्येययोजनानि दण्डं निसृजति निसृज्य च यथास्थूलान् वैक्रियशीरनामकर्म्मपुद्गलान् प्राग्बद्धान् शातयति यथासूक्ष्मांश्चादत्ते, यथोक्तम्-

"वेउव्वियसमुग्धाएणं समोहणइ २ संखेज्जाइं जोयणाइं दंडं निसिरइ २ अहाबायरे पोग्गले परिसाडेइ अहासुहुमे पोग्गले आइयइ"त्ति ।

एवं तैजसाहारकसमुद्घातावपि व्याख्येयौ, केवलिसमुद्घातेन तु समुद्धतः केवली वेदनी-यादिकर्मपुद्गलान् शातयतीति, एतेषु च सर्वेष्वपि समुद्घातेषु शरीराज्जीवप्रदेशनिर्गमोऽस्ति, सर्वेचैतेऽन्तर्मुहूर्त्तमानाः, नवरं केवलिकोऽष्टसामयिकः, एते चैकेन्द्रियविकलेन्द्रियाणामादितस्त्रयो, वायुनारकाणां चत्वारः, देवानां पञ्चेन्द्रियतिरश्चां च पञ्च, मनुष्याणां तु सप्तेति ॥

शतकं-२ उद्देशकः-२ समाप्तः

## –: शतकं-२, उद्देशकः-३ :–

**वृ.** अथ तृतीया आरभ्यते, अस्य चायमभिसम्बन्धः-द्वितीयोद्देशके समुद्घाताः प्ररूपिताः, तेषु च मारणान्तिकसमुद्घातः, तेन च समवहताः केचित्पृथिवीषूत्पद्यन्त इतीह पृथिव्यः प्रतिपाद्यन्ते, इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (११९)** *कति णं भंते ! पुढवीओ पन्नत्ताओ ?, जीवाभिगमे नेरइयाणं जो बितिओ उद्देसो सो नेयव्वो ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१२०) *पुढविं ओगाहित्ता निरया संठाणमेव बाहल्लं।*
*विक्खंभपरिक्खेवो वण्णो गंधो य फासो य ॥*

**वृ.** 'कइ णं भंते ! पुढवीओ' इत्यादि, इह च जीवाभिगमे नारकद्वितीयोद्देशकार्थसङ्ग्रहगाथा-

॥१॥ "पुढवी ओगाहित्ता निरया संठाणमेव बाहल्लं।
विक्खंभपरिक्खेवो वन्नो गंधो य फासो य ॥

सूत्रपुस्तकेषु च पूर्वार्द्धमेव लिखितं, शेषाणां विवक्षितार्थानां यावच्छब्देन सूचितत्वादिति, तत्र 'पुढवि'त्ति पृथिव्यो वाच्याः, ताश्चैवम्-'कइ णं भंते ! पुढवीओ पन्नत्ताओ ?, गोयमा ! सत्त, तंजहा-रयणप्पभे'त्यादि, 'ओगाहित्ता निरय'त्ति पृथिवीमवगाह्य कियद्दूरे नरकाः ? इति वाच्यं, तत्रास्यां रत्नप्रभायामशीतिसहस्रोत्तरयोजनलक्षबाहल्यायामुपर्येकं योजनसहस्रमवगाह्याधोऽप्येकं वर्जयित्वा त्रिंशन्नरकलक्षाणि भवन्ति, एवं शर्कराप्रभादिषु यथायोगं वाच्यं, 'संठाणमेव'त्ति नरकसंस्थानं वाच्यं, तत्र ये आवलिकाप्रविष्टास्ते वृत्तायाश्चतुरश्राश्च, इतरे तु नानासंस्थानाः, 'बाहल्लं'ति नरकाणां बाह्यं वाच्यं, तच्च त्रीणि योजनसहस्राणि, कथम् ?, अध एकं मध्ये शुषिरमेकमुपरि च सङ्कोच एकमिति।

'विक्खंभपरिक्खेवो'त्ति एतौ वाच्यौ, तत्र सङ्ख्यातविस्तृतानां सङ्ख्यातयोजन आयामो विष्कम्भः परिक्षेपश्च, इतरेषां त्वन्यथेति। तथा वर्णादयो वाच्याः, ते चात्यन्तमनिष्टा इत्यादि बहु वक्तव्यं यावदयमुद्देशकान्तः, यदुत–

**मू. (१२१)** *जाव किं सव्वपाणा उववन्नपुव्वा ?, हंता गोयमा ! असतिं अदुवा अनंतखुत्ता*

**वृ.** 'किं सव्वपाणा ?' इत्यादि, अस्य चैवं प्रयोगः-अस्यां रत्नप्रभायां त्रिंशन्नरकलक्षेषु किं सर्वे प्राणादय उत्पन्नपूर्वा, अत्रोत्तरम्-'असइं'ति असकृद्-अनेकशः, इदं च वेलाद्वयादावपि स्यादतोऽत्यन्तबाहुल्यप्रतिपादनायाह-'अदुव'त्ति अथवा 'अनंतखुत्तो'त्ति 'अनन्तकृत्वः' अनन्तवारानिति।

शतकं-२ उद्देशकः-३ समाप्तः

## –ः शतकः-२ उद्देशकः-४ ः–

**वृ.** तृतीयोद्देशके नारका उक्ताः, ते च पञ्चेन्द्रिया इतीन्द्रियप्ररूपणाय चतुर्थोद्देशकः, तस्य चादिसूत्रम्-

**मू. (१२२)** *कति णं भंते ! इंदिया पन्नत्ता ?, गोयमा ! पंचिंदिया पन्नत्ता, तंजहा-पढमिल्लो इंदियउद्देसो नेयव्वो, संठाणं बाहल्लं पोहत्तं जाव अलोगो।*

**वृ.** 'पढमिल्लो इंदियउद्देसओ नेयव्वो'त्ति प्रज्ञापनायामिन्द्रियपदाभिधानस्य पञ्चदशपदस्य प्रथम उद्देशकोऽत्र 'नेतव्यः' अध्येतव्यः, तत्र च द्वारगाथा–

॥१॥ "संठाणं बाहल्लं पोहत्तं कइपएसओगाढे।
अप्पाबहुपुट्ठपविट्ठविसय अनगार आहारे ॥

इह च सूत्रपुस्तकेषु द्वारत्रयमेव लिखितं, शेषास्तु तदर्था यावच्छब्देन सूचिताः, तत्र संस्थानं श्रोत्रादीन्द्रियाणां वाच्यं, तच्चेदं-श्रोत्रेन्द्रियं कदम्बपुष्पसंस्थितं चक्षुरिन्द्रियं मसूरकचन्द्रसंस्थितं मसूरकम्-आसनविशेषश्चन्द्रः-शशी, अथवा मसूरकनचन्द्रो-धान्यविशेषदलं, घ्राणेन्द्रियम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिमुक्तचन्द्रकसंस्थितम्, अतिमुक्तचन्द्रकः-पुष्पविशेषदलं, रसनेन्द्रियं क्षुरप्रसंस्थित स्पर्शनेन्द्रियं नानाकारं, 'बाहल्लं'ति इन्द्रियाणां बाहल्यं वाच्यं, तच्चेदं-सर्वाण्यङ्गुलाङ्ख्येयभागबाहल्यानि।

'पोहत्तं'ति पृथुत्वं, तच्चेदं-श्रोत्रचक्षुर्घ्राणानामङ्गुलासङ्ख्येयभागो जिह्वेन्द्रियस्याङ्गुलपृथक्त्वं स्पर्शनेन्द्रियस्य च शरीरमनं, 'कइपएस'त्ति अनन्तप्रदेशनिष्पन्नानि पञ्चापि 'ओगाढे'त्ति असङ्ख्येय-प्रदेशावगाढानि, 'अप्पाबहु'त्ति सर्वस्तोकं चक्षुरवगाहतस्ततः श्रोत्रघ्राणरसनेन्द्रियाणि क्रमेण सङ्ख्यात- गुणानि ततः स्पर्शनं त्वसङ्ख्येययगुणमित्यादि 'पुट्ठपविट्ठ'त्ति श्रोत्रादीनि चक्षूरहितानि स्पृष्टमर्थं प्रविष्टं च गृह्णन्ति 'विसय'त्ति सर्वेषां जघन्यतोऽङ्गुलस्यासङ्ख्येयभागो विषयः, उत्कर्षतस्तु श्रोत्रस्य द्वादश योजनानि, चक्षुषः सातिरेकं लक्षं, शेषाणां च नव योजनानीति, 'अनगारे'त्ति अनगारस्य समुद्घातगतस्य ये निर्जरापुद्गलास्तान्न छद्मस्थो मनुष्यः पश्यतीति, 'आहारे'त्ति निर्जरापुद्गलान्नारकादयो न जानन्ति न पश्यन्ति आहारयन्ति चेत्येवमादि बहु वाच्यम्।

अथ किमन्तोऽयमुद्देशकः ? इत्याह-'यावदलोकः' अलोकसूत्रान्तः, तच्चेदम्-'अलोगे णं भंते! किण्णा फुडे कइहिं वा काएहिं फुडे?, गोयमा! नो धम्मत्थिकाएणं फुडे जाव नो आगा-सत्थिकाएणं फुडे आगासत्थिकायस्स देसेणं फुडे आकासत्थिकायस्स पएसेहिं फुडे नो पुढविकाइएणं फुडे जाव नो अद्धासमएणं फुडे एगे अजीवदव्वदेसे अगुरुलहुए अनंतेहिं अगुरुलहुयगुणेहिं संजुत्ते सव्वागासे अनंतभागूने'त्ति।

नालोको धर्मास्तिकायादिना पृथिव्यादिकायैः समयेन च स्पृष्टो-व्याप्तः, तेषां तत्रासत्त्वात्, आकाशास्तिकायदेशादिभिश्च स्पृष्टः, तेषां तत्र सत्त्वात्, एकश्चासावजीवद्रव्यदेशः, आकाश-द्रव्यदेशत्वात्तस्येति।

शतकं-२, उद्देशकः-४ समाप्तः

## —: शतकं-२ उद्देशकः-५ :—

**वृ.** अनन्तरमिन्द्रियाण्युक्तानि, तद्वशाच्च परिचारणा स्यादिति तन्निरूपणाय पञ्चमोद्देश-कस्येदमादिसूत्रम्-

**मू. (१२३)** *अन्नउत्थिया णं भंते! एवमाइक्खंति भासंति पन्नवेंति परूवेंति, तंजहा-एवं खलु नियंठे कालगए समाणे देवब्भूएणं अप्पाणेणं से णं तत्थ नो अन्ने देवे नो अन्नेसिं देवाणं देवीओ अहिजुंजिय २ पारियारेइ १ नो अप्पणच्चियाओ देवीओ अभिभुंजिय २ परियारेइ २ अप्पणामेव अप्पाणं विउव्विय २ परियारेइ ३ एगेवि य णं जीवे एगेणं समएणं दो वेदे वेदेइ, तंजहा-इत्थिवेदं पुरिसवेदं च, एवं परउत्थियवत्तव्वया नेयव्वा जाव इत्थिवेदं च पुरिसवेदं च।*

*से कहमेयं भंते! एवं?, गोयमा! जन्नं ते अन्नउत्थिया एवमाइक्खंति जाव इत्थिवेदं च पुरिसवेदं च, जे ते एवमाहंसु मिच्छं ते एवमाहंसु, अहं पुण गोयमा! एवमातिक्खामि भा० प० पु० -एवं खलु नियंठे कालगए समाणे अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवन्ति महिड्ढिएसु जाव महानुभागेसु दूरगतीसु चिरट्ठितीएसु, से णं तत्थ देवे भवति महिड्ढीए जाव दस दिसाओ उज्जोवेमाणे पभासेमाणे जाव पडिरूवे।*

*से णं तत्थ अन्ने देवे अन्नेसिं देवाणं देवीओ अभिभुंजिय २ परियारेइ १ अप्पणच्चियाओ देवीओ अभिभुंजिय २ परियारेइ २ नो अप्पणामेव अप्पाणं विउव्विय २ परियारेइ ३, एगेविय*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*णं जीवे एगेणं समएणं एगं वेदं वेदेइ, तंजहा ।–*

*इत्थिवेदं वा पुरिसवेदं वा, जं समयं इत्थिवेदं वेदेइ नो तं समयं पुरुसवेयं वेएइ जं समयं परिसवेयं वेएइ नो तं समयं इत्थिवेयं वेदेइ, इत्थिवेयस्स उदएणं नो पुरिसवेदं वेएइ, पुरिसवेयस्स उदएणं नो इत्थिवेयं वेएइ, एवं खलु एगे जीवे एगेणं समएणं एगं वेदं वेदेइ, तंजहा – इत्थीवेयं वा पुरिसवेयं वा पुरिसवेयं वा, इत्थी इत्थिवेएणं उदिन्नेणं पुरिसं पत्थेइ, पुरिसो पुरिसवेएणं उदिन्नेणं इत्थिं पत्थेइ, दोवि ते अन्नमन्नं पत्थेंति, तंजहा-इत्थी वा पुरिसं पुरिसे वा इत्थिं ।*

**वृ.** 'देवब्भूएणं' ति देवीभूतेनात्मना करणभूतेन नो परिचारयतीति योगः, 'से णं' ति असौ निर्ग्रन्थदेवः 'तत्र' देवलोके 'नो' नैव 'अन्ने' त्ति 'अन्यान्' आत्मव्यतिरिक्तान् 'देवान्' सुरान् १ तथा नो अन्येषां देवानां सम्बन्धिनीर्देवीः 'अभिमुंजिय' त्ति 'अभियुज्य' वशीकृत्य आश्लिष्य वा 'परिचारयति' परिभुङ्क्ते नो 'अप्पणच्चियाओ' त्ति आत्मीयाः 'अप्पणामेव अप्पाणं विउव्विय' त्ति स्त्रीपुरुषरूपतया विकृत्, एवं च स्थिते-'परउत्थियवत्तव्वया नेयव्व' त्ति एवं चेयं ज्ञातव्या-'जं समयं इत्थिवेयं वेएइ तं समयं पुरिसवेयं वेएइ जं समयं पुरिसवेयं वेएइ तं समयं इत्थिवेयं वेएइ, इत्थिवेयस्स वेयणयाए पुरिसवेयं वेएइ पुरिसवेयस्स वेयणयाए इत्थीवेयं वेएइ, एवं 'खलु एगेऽविय 'णं' इत्यादि ।

मिथ्यात्वं चैषामेवं-स्त्रीरूपकरणेऽपि तस्य देवस्य पुरुषत्वात् पुरुषवेदस्यैवैकत्र समये उदयो न स्त्रीवेदस्य, स्त्रीवेदपरिवृत्त्या वा स्त्रीवेदस्यैव न पुरुषवेदोदयः, परस्परविरुद्धत्वादिति

'देवलोएसु' त्ति देवजनेषु मध्ये 'उववत्तारो भवंति' त्ति प्राकृतशैल्या उपपत्तारो भवन्तीति दृश्यं, 'महिड्ढिए' इत्यत्र यावत्करणादिदं दृश्यम्-'महज्जुइए महाबले महायसे महासोक्खे महानुभागे हारविराइयवच्छे कडयतुडियथंभियभुए' त्रुटिका-बाहुरक्षिका 'अंगयकुंडलमट्ठगंडकण्ण-पीठधारी' अङ्गदानिबाह्वाभरणविशेषान् कुण्डलानि-कर्णाभरणविशेषान् मृष्टगण्डानि च-उल्लिखित-कपोलानि कर्णपीठानि-कर्णाभरणविशेषान् धारयतीत्येवंशीलो यः स तथा –

–'विचित्तहत्थाभरणे विचित्तमालामउलिमउडे' विचित्रमाला च-कुसुमस्रग् मौलोमस्तके मुकुटं च यस्य स तथा, इत्यादि यावत् 'रिद्धीए जुईए पभाए छायाए अच्चीए तेएणं लेसाए दस दिसाओ उज्जोवेमाणे' त्ति तत्र ऋद्धि-परिवारादिका युति-इष्टार्थसंयोगः प्रभा-यानादिदीप्तिः छाया-शोभा अर्चिःशरीरस्थरत्नादितेजोज्वाला तेजः-शरीरार्चि लेश्या-देहवर्णः, एकार्था वैते, उद्घोतयन् प्रकाशकरणेन 'पभासेमाणे' त्ति 'प्रभासयन्' शोभयन् ।

इह यावत्करणादिदं द्दश्यम्-'पासाइए' द्रष्टॄ णां चित्तप्रसादजनकः 'दरिसणिज्जे' यं पश्यच्चक्षुर्न श्राम्यति 'अभिरूवे' मनोज्ञरूपः 'पडिरूवे' त्ति द्रष्टारं २ प्रति रूपं यस्य स तथेति, एकेनैकदैक एव वेदो वेद्यते, इह कारणमाह-'इत्थी इत्थिवेएणमि' त्यादि ।

परिचारणायां किल गर्भः स्यादिति गर्भप्रकरणं, तत्र–

***मू. (१२४)** उदगगब्भे णं भंते! उदगगब्भेत्ति कालतो केवच्चिरं होइ ?, गोयमा! जहन्नेणं एक्कं समयं उक्कोसेणं छम्मासा ।। तिरिक्खजोणियगब्भे णं भंते! तिरिक्खजोणियगब्भेत्ति कालओ केवच्चिरं होति ?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अट्ठ संवच्छराइं ।*

*मणुस्सीगब्भे णं भंते! मणुस्सीगब्भेत्ति कालओ केवच्चिरं होइ ?, गोयमा! जहन्नेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अंतोमुहुत्तं उक्कोसेणं बारस संवच्छराइं ॥*

**वृ.** 'उदगगब्भे णं' क्वचित् 'दगगब्भे णं'ति दृश्यते, तत्रोदकगर्भ-कालान्तरेण जलप्रवर्षणहेतुः पुद्गलपरिणामः, तस्य चावस्थानं जघन्यतः समयः, समयानन्तरमेव प्रवर्षणात्, उत्कृष्टतस्तु षण्मा-सान्, षण्णां मासानामुपरि वर्षणात्, अयं च मार्गशीर्षपौषादिषु वैशाखान्तेषु सन्ध्या-रागमेघोत्पा- दादिलिङ्गो भवति, यदाह–

॥ १ ॥ "पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः ।
नात्यर्थं मार्गशिरे शीतं पोषेऽतिहिमपातः ॥" इत्यादि ॥

**मू. (१२५)** *कायभवत्थे णं भंते ! कायभवत्थेत्ति कालओ केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं चउव्वीसं संवच्छराइं ।*

**मू. (१२६)** *मणुस्सपंचेंदियतिरिक्खजोणियबीए णं भंते ! जोणियब्भूए केवतियं कालं संचिट्ठइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बारस मुहुत्ता ।*

**वृ.** 'कायभवत्थे णं भंते'इत्यादि, काये-जनन्युदरमध्यव्यवस्थितनिजदेह एव यो भवो-जन्म स कायभवस्तत्र तिष्ठति यः स कायभवस्थः, स च कायभवस्थ इति, एतेन पर्यायेणेत्यर्थः, 'चउव्वीसं संवच्छराइं'ति स्त्रीकाये द्वादश वर्षाणि स्थित्वा पुनर्मृत्वा तस्मिन्नेवात्मशरीरे उत्पद्यते द्वादशवर्षस्थितिकतया, इत्येवं चतुर्विंशतिर्वर्षाणि भवन्ति । केचिदाहुः-द्वादशवर्षाणि स्थित्वा पुनस्तत्रैवान्यबीजेन तच्छरीरे उत्पद्यते, द्वादशवर्षस्थितिरिति ।

**मू. (१२७)** *एगजीवे णं भंते ! जोणिए बीयब्भूए केवतियाणं पुत्तत्ताए हव्वमागच्छइ ?, गोयमा ! जहन्नेणं इक्कस्स वा दोण्हं वा तिण्हं वा, उक्कोसेणं सयपुहुत्तस्स जीवाणं पुत्तत्ताए हव्वमागच्छति ।*

**वृ.** 'एगजीवे णं भंते'इत्यादि, मनुष्याणां तिरश्चां च बीजं द्वादश मुहूर्त्तान् यावद्योनिभूतं भवति, ततश्च गवादीनां शतपृथक्त्वस्यापि बीजं गवादियोनिप्रविष्टं बीजमेव, तत्र च बीजसमुदाये एको जीव उत्पद्यते, स च तेषां बीजस्वामिनां सर्वेषां पुत्रो भवतीत्यत् उक्तम्-'उक्कोसेणं सयपुहुत्त-स्से'त्यादि । 'सयसहस्सपुहुत्तं'ति मत्स्यादीनामेकसंयोऽपि शतसहस्रपृथक्त्वं गर्भे उत्पद्यते निष्पद्यते चेत्येकस्यैकभवग्रहणे लक्षपृथक्त्वं पुत्राणां भवतीति, मनुष्ययोनौ पुनरुत्पन्ना अपि बहवो न निष्पद्यन्त इति ।

**मू. (१२८)** *एगजीवस्स णं भंते ! एगभवग्गहणेणं केवइया जीवा पुत्तत्ताए हव्वमागच्छंति गोयमा ! जहन्नेणं इक्को वा दो वा तिन्नि वा, उक्कोसेणं सयसहस्सपुहत्तं जीवा णं पुत्तत्ताए हव्वमा-गच्छंति, से केणट्ठेणं भंते ! एवं वुच्चइ-जाव हव्वमागच्छइ ?, गोयमा ! इत्थीए य पुरिसस्स य कम्मकडाए जोणीए मेहुणवत्तिए नामं संजोए समुप्पज्जइ, ते दुहओ सिणेहं संचिणंति २ तत्थ णं जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सयसहस्सपुहत्तं जीवाणं पुत्तत्ताए हव्वमागच्छंति, से तेणट्ठेणं जाव हव्वमागच्छइ ।*

**वृ.** 'इत्थीए पुरिसस्स य' इत्येतस्य 'मेहुणवत्तिए नामं संयोगे समुप्पज्जति' इत्यनेन सम्बन्धः, कस्यामसौ उत्पद्यते ? इत्याह-'कम्मकडाए जोणीए'त्ति नामकर्मनिर्वर्त्तितायां योनौ, अथवा कर्म-मदनोद्दीपको व्यापारस्तत् कृतं यस्यां सा कर्मकृताऽतस्तस्यां मैथुनस्य वृत्ति-प्रवृत्तिर्यस्मिन्नसौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मैथुनवृत्तिको मैथुनं वा प्रत्ययो-हेतुर्यस्मिन्नसौ स्वार्थिकेकप्रत्यय मैथुनप्रत्ययिकः 'नामं'ति नाम नामवतोरभेदोपचारादेतन्नामेत्यर्थः 'संयोगः' संपर्क, 'ते' इति स्त्रीपुरुषौ 'दुहओ'त्ति उभयतः 'स्नेहं' रेतःशोणितलक्षणं 'संचिनुतः' सम्बन्धयतः इति 'मेहुणवत्तिए नामं संजोए'त्ति प्रागुक्तम्।

**मू. (१२९)** *मेहुणे णं भंते! सेवमाणस्स केरिसिए असंजमे कज्जइ?, गोयमा! से जहा-नामए केइ पुरिसे रूयनालियं वा बूरनालियं वा तत्तेणं कणएणं समभिधंसेज्जा एरिसएणं गोयमा मेहुणं सेवमाणस्स असंजमे कज्जइ, सेवं भंते! सेवं भंते! जाव विहरति।*

**वृ.** अथ मैथुनस्यैवासंयमहेतुताप्ररूपणसूत्रम्-'रूयनालियं व'त्ति रूतं-कर्प्पासविकार-स्तद्भृता नालिका-शुषिरवंशादिरूपा रूतनालिका ताम्, एवं बूरनालिकामपि, नवरं बूरं-वनस्प-तिविशेषावयवविशेषः, 'समभिद्धंसेज्ज'त्ति रूतादिसमभिध्वंसनात्, इह चायं वाक्यशेषो दृश्यः-एवं मैथुनं सेवमानो योनिगतसत्त्वान् मेहनेनाभिध्वंसयेत्, एते च किल ग्रन्थान्तरे पञ्चेन्द्रियाः श्रूयन्त इति, 'एरिसए ण'मित्यादि च निगमनमिति।

पूर्वं तिर्यङ्मनुष्योत्पित्तिर्विचारिता, अथ देवोत्पत्तिविचारणायाः प्रस्तावनायेदमाह-

**मू. (१३०)** *तए णं समणे भगवं महावीरे रायगिहाओ नगराओ गुणसिलाओ चेइयाओ पडिनिक्खमइ २ बहिया जणवयविहारं विहरति।*

*तेणं कालेणं २ तुंगिया नामं नगरी होत्था वण्णओ, तीसे णं तुंगियाए नगरीए बहिया उत्तरपुरच्छिमे दिसीभाए पुप्फवतिए नामं चेतिए होत्था, वण्णओ, तत्थ णं तुंगियाए नयरीए बहवे समणोवासया परिवसंति अड्ढा दित्ता विच्छिन्नविपुलभवणसयणासणजाणवाहणाइण्णा बहुधणबहुजायरूवरयया आओगपओगसंपउत्ता विच्छड्डियविपुलभत्तपाणा बहुदासीदासगो-महिसगवेलयप्पभूया बहुजणस्स अपरिभूया अभिगयजीवाजीवा उवलद्धपुण्णपावा आसवसंवर निज्जरकिरियाहिकरणबंधमोक्खकुसला असहेज्जदेवासुरनागसुवन्नजक्खरक्खसकिंनर-किंपुरिसगरुलगंधव्वमहोरगादीएहिं देवगणेहिं निग्गंथाओ पावयणाओ अणतिक्कमणिज्जा निग्गंथ पावयणे निस्संकिया निक्कंखिया निव्वितिगिच्छ लद्धट्ठा गहियट्ठा पुच्छियट्ठा अभिगयट्ठा विनि-च्छियट्ठा अट्ठिमिंजपेम्माणुरागरत्ता अयमाउसो!*

*निग्गंथे पावयणे अट्ठे अयं परमट्ठे सेसे अणट्ठे उसियफलिहा अवंगुयदुवारा चियत्तंतेउ-रघरप्पवेसा बहूहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं, चाउद्दसट्ठमुद्दिट्ठपुण्ण-मासिणीसु पडिपुन्नं पोसहं सम्मं अनुपालेमाणे समणे निग्गंथे फासुएसणिज्जेणं असणपाणखाइम- साइमेणं वत्थपडिग्गहकंबलपायपुंछणेणं पीढफलगसेज्जासंथारएणं ओसहभेसज्जेण य पडिलाभेमाणा आहापडिग्गहिएहिं तवोकम्मेहिं अप्पाणं भावेमाणा विहरंति।*

**वृ.** 'अड्ड'त्ति आढ्या धनधान्यादिभिः परिपूर्णा 'दित्त'त्ति दीप्ताः-प्रसिद्धाः दृप्ता वा-दर्प्पिताः 'विच्छिन्नविपुलभवणसयणासणजावाहणाइण्णा' विस्तीर्णानि-विस्तारवन्ति विपुलानि-प्रचुराणि भवनानि-गृहाणि शयनासनयानवाहनैराकीर्णानि येषां ते तथा, अथवा विस्तीर्णानि-विपुलानि भवनानि येषां, ते शयनासनयानवाहनानि चाकीर्णानिगुणवन्ति येषां ते तथा, तत्र यानं-गन्त्र्यादि वाहनं तु-अश्वादि, 'बहुधनबहुजायरूवरयया' बहु-प्रभूतं धनं-गणिमादिकं तथा बहु एव जातरूपं-सुवर्णं रजतं च-रूप्यं येषां ते तथा –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

–'आओगपओगसंपउत्ता' आयोगो-द्विगुणादिवृद्धयाऽर्थप्रदानं प्रयोगश्च-कलान्तरं तौ संप्रयुक्तौ-व्यापारितौ यैस्ते तथा, 'विच्छड्डियविउलभत्तपाणा' विच्छर्दितं-विविधमुज्झितं बहुलोकभोजनत उच्छिष्टावशेषसम्भवात् विच्छर्दितं वा-विविधविच्छित्तिमद्विपुलं भक्तं च पानकं च येषां ते तथा, 'बहुदासीदासगोमहिसगवेलगप्पभूया' बहवो दासीदासा येषां ते गोमहिषगवेलकाश्च प्रभूता येषां ते तथा, गवेलका-उरभ्राः, 'बहुजणस्स अपरिभूया बाहोर्लोकस्यापरिभवनीयाः–

–सवे'त्यादौ क्रियाः-कायिक्यादिकाः 'अधिकरणं' गन्त्रीयन्त्रकादि 'कुसल'त्ति आश्रवादीनां हेयोपादेयतास्वरूपवेदिनः, 'असहेज्जे'त्यादि, अविद्यमानं साहाय्यंपरासहायकम् अत्यन्तसमर्थ- त्वाद्येषां तेऽसाहाय्यास्ते च ते देवादयश्चेति कर्मधारयः, अथवा व्यस्तमेवेदं तेनासाहाय्याआपद्यपि देवादिसाहायकानपेक्षाः स्वयं कृतं कर्म स्वयमेव भोक्तव्यमित्यदीनमनोवृत्तय इत्यर्थः अथवा पाषण्डिभि प्रारब्धाः सम्यक्त्वाविचलनं प्रति न परसाहाय्यमपेक्षन्ते, स्वयमेव तत्प्रतिधात- समर्थत्वाज्जिनशासनात्यन्तभावितत्वाच्चेति ।

तत्र देवा-वैमानिकाः 'असुरे'ति असुरकुमाराः 'नाग'त्ति नागकुमाराः, उभयेऽप्यमी भवनपतिविशेषाः, 'सुवण्ण'त्ति सद्वर्णा ज्योतिष्काः यक्षराक्षसकिंनरकिंपुरुषाः-व्यन्तरविशेषाः 'गरुल'त्ति गरुडध्वजाः सुपर्ण्णकुमाराः-भवनपतिविशेषाः गन्धर्वा महोरगाश्च-व्यन्तरविशेषाः 'अनतिक्कमणिज्ज'त्ति अनतिक्रमणीयाः-अचालनीयाः, 'लद्धट्ठ'त्ति अर्थश्रवणात् 'गहियट्ठ'त्ति अर्थावधारणात् 'पुच्छियट्ठ'त्ति सांशयिकार्थप्रश्नकरणात् 'अभिगहियट्ठ'त्ति प्रश्नितार्थस्याभिगमनात् 'विनिच्छियट्ठ'त्ति एदम्पर्यार्थस्योपलम्भाद् अत एव 'अट्ठिमिंजपेम्मानुरागरत्ता' अस्थीनि चकीकसानि मिञ्जा च-तन्मध्यवर्त्ती धातुरस्थिमिञ्जास्ताः प्रेमानुरागेण-सर्वज्ञप्रवचनप्रीतिरूपकुसुम्भादिरागेण रक्ता इव रक्ता येषां ते तथा, अथवाऽस्थिमिञ्जासु जिनशासनगत प्रेमानुरागेण रक्ता ये ते तथा, केनोल्लेखेन ? इत्याह–

'अयमाउसो'इत्यादि, अयमिति प्राकृतत्वादिदम् 'आउसो'त्ति आयुष्मन्निति पुत्रादेरामन्त्रणं 'सेसे'त्ति शेषं-निर्ग्रन्थप्रवचनव्यतिरिक्तं धनधान्यपुत्रकलत्रमित्रकुप्रवचनादिकमिति, 'ऊसियफलिह'त्ति उच्छ्रितम्-उन्नतं स्फटिकमिव स्फटिकं चित्तं येषां ते उच्छ्रितस्फटिकाः मौनीन्द्रप्रवचनावाप्तया परितुष्टमानसा इत्यर्थ इति वृद्धव्याख्या, अन्ये त्वाहुः-उच्छ्रितः-अर्गलास्थानादपनीयोर्ध्वीकृतो न तिरश्चीनः कपाटपश्चाद्भागादपनीत इत्यर्थः परिघः–अर्गला येषां ते उच्छ्रितपरिघाः, अथवोच्छ्रितो-गृहद्वारादपगतः परिघो येषां ते उच्छ्रितपरिघाः, औदार्यातिशयदतिशयदानदायित्वेन भिक्षुकाणां गृहप्रवेशनार्थमनर्गलितगृहद्वारा इत्यर्थः, 'अवंगुयदुवारे'ति अप्रावृतद्वाराः-कपाटादिभिरस्थगितगृहद्वारा इत्यर्थः, सद्दर्शनलाभेन न कुतोऽपि पाषण्डिकाद्बिभ्यति, शोभनमार्गपरिग्रहेणोद्घाट- शिरसस्तिष्ठन्तीति भाव इति वृद्धव्याख्या ।

अन्ये त्वाहुः-भिक्षुकप्रवेशार्थमौदार्यादस्थगितगृहद्वारा इत्यर्थः, 'चियत्तंतेउरघरप्पवेसा' 'चियत्तो'त्ति लोकानां प्रीतिकर एवान्तःपुरे वा गृहे वा प्रवेशो येषां ते तथा, अतिधार्मिकतया सर्वत्रानाशङ्कनीयास्त इत्यर्थः, अन्ये त्वाहुः-'चियत्तो'त्ति नाप्रीतिकरोऽन्तःपुरगृहयोः प्रवेशः-शिष्टजनप्रवेशनं येषां ते तथा, अनीर्ष्यालुताप्रतिपादनपरं चेत्थं विशेषणमिति, अथवा 'चियत्तो'त्ति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यक्तोऽन्तःपुरगृहयोः परकीययोर्यथाकथञ्चित्प्रवेशो यैस्ते तथा, 'बहूहिं'इत्यादि, शीलव्रतानि-अणुव्रतानि गुणा-गुणव्रतानि विरमणानि-औचित्येन रागादिनिवृत्तयःप्रत्याख्यानानि-पौरुष्यादीनि पौधषं-पर्वदिनानुष्ठानं तत्रोपवासः-अवस्थानं पौषधोपवासः, एषां द्वन्द्वोऽतस्तैर्युक्ता इति गम्यम्

पौषधोपवास इत्युक्तं, पौषधं च यदा यथाविधं च ते कुर्वन्तो विहरन्ति तद्दर्शयन्नाह- 'चाउद्दसे'त्यादि, इहोद्दिष्टा-अमावास्या 'पडिपुन्नं पोसहं'ति आहारादिभेदाच्चतुर्विधमपि सर्वतः 'वत्थपडिग्गहकंबलपायपुंछणेणं'ति इह पतद्ग्रहं-पात्रं पादप्रोञ्छनं-रजोहरणं 'पीढे'त्यादि पीठम्-आसनं फलकम्-अवष्टम्भनफलकं शय्यावसतिर्बृहत्संस्तारको वा संस्तारको-लघुतरः एषां समाहारद्वन्द्वोऽतस्तेन 'अहापरिग्गहिएहिं'ति यथाप्रतिपन्नैर्नपुनर्ह्रासं नीतैः ॥

**मू. (१३१)** *तेणं कालेणं २ पासावच्चिज्जा थेरा भगवंतो जातिसंपन्ना कुलसंपन्ना बलसंपन्ना रूवसंपन्ना विनयसंपन्ना नाणसंपन्ना दंसणसंपन्ना चरित्तसंपन्ना लज्जासंपन्ना लाघवसंपन्ना ओयंसी तेयंसी वच्चंसी जसंसी जियकोहा जियमाणा जियमाया जियलोभा जियनिद्दा जितिंदिया जियपरीसहा जीवियासमरणभयविप्पमुक्का जाव कुत्तियावणभूता ।*

*बहुस्सुया बहुपरिवारा पंचहिं अनगारसएहिं सद्धिं संपरिवुडा अहानुपुव्विं चरमाणा गामाणुगामं दुइज्जमाणा सुहंसुहेणं विहरमाणा जेणेव तुंगिया नगरी जेणेव पुप्फवतीए चेइए तेणेव उवागच्छंति २ अहापडिरूवं उग्गहं उगिण्हित्ता णं संजमेणं तवसा अप्पाणं भावेमाणे विहरंति ।*

**वृ.** 'थेर'त्ति श्रुतवृद्धाः 'रूवसंपन्न'त्ति इहरूपं-सुविहितनेपथ्यं शरीरसुन्दरता वा तेन संपन्ना-युक्ता रूपसंपन्नाः 'लज्जा० लाघवसंपन्न'त्ति लज्जा-प्रसिद्धा संयमो वा लाघवं-द्रव्यतोऽल्पोपधित्वं भावतो गौरवत्यागः, 'ओयंसी'ति 'ओजस्विनो'मानसावष्टम्भयुक्ताः 'तेयंसी'ति 'तेजस्विनः' शरीरप्रभायुक्ताः 'वच्चंसी'ति 'वर्चस्विनः' विशिष्टप्रभावोपेताः 'वचस्विनो वा' विशिष्टवचनयुक्ताः 'जसंसी'ति ख्यातिमन्तः, अनुस्वारश्चैतेषु प्राकृतत्वात्, 'जीवियासमरणभयविप्पमुक्क'त्ति जीविताशया मरणभयेन च विप्रमुक्ता ये ते तथा, इह यावत्करणादिदं दृश्यं-'तवप्पहाणा गुणप्पहाणा' गुणाश्च संयमगुणाः, तपःसंयमग्रहणं चेह तपःसंयमयोः प्रधानमोक्षाङ्गताभिधानार्थं, तथा 'करणप्पहाणा चरणप्पहाणा' तत्र करणं-पिण्डविशुद्ध्यादि चरणं-व्रतश्रमणधर्मादि 'निग्गहप्पहाणा' निग्रहः-अन्यायकारिणां दण्डः 'निच्छयप्पहाणा' निश्चयः-अवश्यंकरणाभ्युपगमस्तत्वनिर्णयो वा 'मद्दवप्पहाणा अज्जवप्पहाणा' ननु जितक्रोधादित्वान्मार्द्दवादिप्रधानत्वमवगम्यत एव तत्किं मार्दवेत्यादिना ? उच्यते, तत्रोदयविफलतोक्ता मार्दवादिप्रधानत्वे तूदयाभाव एवेति,

'लाघवप्पहाणा' लाघवं-क्रियासु दक्षत्वं 'खंतिप्पहाणा मुत्तिप्पहाणा एवं विज्जामंतवेयबंभनयनियमसच्चसोयप्पहाणा' 'चारुपन्न' सत्प्रज्ञाः 'सोही' शुद्धिहेतुत्वेन शोधयः सुहृदो वा मित्राणि जीवानामिति गम्यम्, 'अनियाणा अप्पुस्सुया अबहिल्लेसा सुसामण्णरया अच्छिद्दपसिणवागरणे'ति अच्छिद्राणि-अविरलानि निर्दूषणानि वा प्रश्नव्याकरणानि येषां ते तथा, तथा 'कुत्तियावणभूय'त्ति कुत्रिकं-स्वर्गमर्त्त्यपाताललक्षणं भूमित्रयं तत्सम्भवं वस्त्वपि कुत्रिकं तत्संपादक आपणोहट्टः कुत्रिकापणस्तद्भूताः समीहितार्थसम्पादनलब्धियुक्तत्वेन सकलगुणोपेतत्वेन वा तदुपमाः, 'सद्धिं'तिसार्द्धंसहेत्यर्थ 'संपरिवुडा' सम्यकपरिवारिताः परिकरभावेनपरिकरिताइत्यर्थपञ्चभिश्रमणशतैरेव

**मू. (१३२)** *तए णं तुंगियाए नगरीए सिंघाडगतिगचउक्कचच्चरमहापहपहेसु जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एगदिसाभिमुहा निज्ञायंति, तए णं ते समणोवासया इमीसे कहाए लद्धट्ठा समाणा हट्ठतुट्ठा जाव सद्दावेंति २ एवं वदासी-एवं खलु देवाणुप्पिया ! पासायच्चेज्ञा थेरा भगवंतो जातिसंपन्ना जाव अहापडिरूवं उग्गहं उग्गिण्हित्ता णं संजमेणं तवसा अप्पाणं भावेमाणा विहरंति, तं महाफलं खलु देवाणुप्पिया ! तहारूवाणं थेराणं भगवंताणं नामगोयस्सवि सवणयाए किमंग पुन अभिगम-नवंदननमंसणपडिपुच्छणपज्जुवासणयाए ? जाव गहणयाए ?*

*तं गच्छामो णं देवाणुप्पिया ! थेरे भगवंते वंदामो नमंसामो जाव पज्जुवासामो, एयं णं इह भवे वा परभवे वा जाव अनुगामियत्ताए भविस्सतीतिकट्टु अन्नमन्नस्स अंतिए एयमट्ठं पडिसुणेंति २ जेणेव सयाइं २ गिहाइं तेणेव उवागच्छंति २ ण्हाया कयबलिकम्मा कयकोउयमंगलपायच्छित्ता सुद्धप्पावेसाइं मंग्लाइं वत्थाइं पवराइं परिहिया अप्पमहग्घाभरमालंकियसरीरा सएहिं २ गेहेहिंतो पडिनिक्खमंति २ त्ता एगयओ मेलायंति २ पायविहारचारेणं तुंगियाए नगरीए मज्झंमज्झेणं निगच्छंति । २ जेणेव पुप्फवतीए चेइए तेणेव उवागच्छंति २ थेरे भगवंते पंचविहेणं अभिगमेणं अभिगच्छंति, तंजहा-सचित्ताणं दव्वाणं विउसरणयाए १ अचित्ताणं दव्वाणं अविउसरणयाए २ एगसाडिएणं उत्तरासंगकरणेणं ३ चक्खुप्फासे अंजलिप्पग्गहेणं ४ मणसो एगत्तीकरणेणं ५ जेणेव थेरा भगवंतो तेणेव उवागच्छंति २ तिक्खुत्तो आयाहिणं पयाहिणं करेइ २ जाव तिविहाए पज्जुवासणाए पज्जुवासंति ।*

**वृ.** 'सिंघाडग'त्त श्रृङ्गाटकफलाकारं स्थानं त्रिकं-रथ्यात्रयमीलनस्थानं चतुष्कं-रथ्याचतुष्कमीलनस्थानं घत्वरं-बहुतररथ्यामीलनस्थानं महापथो-राजमार्ग पन्था-रथ्यामात्रं यावत्करणाद् 'बहुजणसद्दे इ वा' इत्यादि पूर्वं व्याख्यातमत्र द्दश्यं 'एयमट्ठं पडिसुणेंति'त्ति अभ्युपगच्छन्ति 'सयाइं २'ति स्वकीयानि २ 'कयबलिकम्म'त्ति स्नानानन्तरं कृतं बलिकर्म यैः स्वगृहदेवतानां ते तथा।

'कयकोउयमंगलपायच्छित्त'त्ति कृतानि कौतुकमङ्गलान्येव प्रायश्चित्तानि दुःस्वप्नादि-विधातार्थमवश्यकरणीयत्वाद्यैस्ते तथा, अन्ये त्वाहुः-'पायच्छित्त'त्ति पादेन पादे वा छुप्ताश्चक्षुर्दोष-परिहारार्थं पादच्छुप्ताः कृतकौतुकमङ्गलाश्च ते पादच्छुप्ताश्चेति विग्रहः, तत्र कौतुकानिमषीतिल-कादीनि मङ्गलानि तु-सिद्धार्थकदध्यक्षतदूर्वाङ्कुरादीनि 'सुद्धप्पावेसाइं'ति शुद्धात्मनां वैष्याणि-वेषोचितानि अथवा शुद्धानि च तानि प्रवेश्यानि च-राजादिसभाप्रवेशोचितानि शुद्धप्रवेश्यानि 'वत्थाइं पवराइं परिहिय'त्ति क्वचिद्दृश्यते ।

क्वचिच्च 'वत्थाइं पवरपरिहिय'त्ति, तत्र प्रथमपाठो व्यक्तः, द्वितीयस्तु प्रवरं यथाभवत्येवं परिहिताः प्रवरपरिहिताः 'पायविहारचारेणं'ति पादविहारेण न यानविहारेण यश्चारो-गमनं स तथा तेन 'अभिगमेणं'ति प्रतिपत्त्या 'अभिगच्छन्ति' तत् समीपं अभिगच्छन्ति 'सच्चित्ताणं'ति पुष्पताम्बूलादीनां 'विउसरणयाए'त्ति 'व्यवसर्जनया' त्यागेन 'अच्चित्ताणं'ति वस्त्रमुद्रिकादीनाम् 'अविउसरणयाए'त्ति अत्यागेन 'एगसाडिएणं'ति अनेकोत्तरीयशाटकानां निषेधार्थमुक्तम् ।

'उत्तरासंगकरणेणं'ति उत्तरासङ्गः-उत्तरीयस्य देहे न्यासविशेषः 'चक्षुस्पर्शे' द्दष्टिपाते 'एगत्तीकरणेणं'ति अनेकत्वस्य-अनेकालम्बनत्वस्य एकत्वकरणम्-एकालम्बनत्वकरणमेक-त्रीकरणं तेन 'तिविहाए पज्जुवासणाए'त्ति, इह पर्युपासनात्रैविध्यं मनोवाक्कायभेदादिति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (१३३) तए णं ते थेरा भगवंतो तेसिं समणोवासयाणं तीसे य महतिमहालियाए चाउज्जामं धम्मं परिकहेंति जहा केसिसामिस्स जाव समणोवासियत्ताए आणाए आराहगे भवति जाव धम्मो कहिओ। तए णं ते समणोवासया थेराणं भगवंताणं अंतिए धम्मं सोच्चा निसम्म हट्ठ तुट्ठ जाव हयहियया तिक्खुत्तो आयाहिणप्पयाहिणं करेंति २ जाव तिविहाए पज्जुवासणाए पज्जुवसति २ एवं वदासी–*

*संजमे णं भंते! किंफले ? तवे णं भंते! किंफले?, तए णं ते थेरा भगवतो ते समणोवासए एवं वदासी-संजमे णं अज्जो! अणण्हयफले तवे वोदाणफले, तए णं ते समणोवासया थेरे भगवंते एवं वदासी-जति णं भंते! संजमे अणण्हयफले तवे वोदाणफले किंपत्तियं णं भंते! देवा देवलोएसु उववज्जंति ॥ तत्थ णं कालियपुत्ते नामं थेरे ते समणोवासए एवं वदासी-पुव्वतवेणं अज्जो! देवा देवलोएसु उववज्जंति, तत्थ णं मेहिले नामं थेरे ते समणोवासए एवं वदासी-पुव्वसंजमेणं अज्जो! देवा देवलोएसु उववज्जंति।*

*तत्थ णं आनंदरक्खिए नामं थेरे ते समणोवासए एवं वदासी-कम्मियाए अज्जो! देवा देवलोएसु उववज्जंति, तत्थ णं कासवे नामं थेरे ते समणोवासए एवं वदासी-संगियाए अज्जो! देवा देवलोएसु उववज्जंति, पुव्वतवेणं पुव्वसंजमेणं कम्मियाए संगियाए अज्जो! देवा देवलोएसु उववज्जंति।*

*सच्चे णं एस अट्ठे नो चेव णं आयभाववत्तव्वयाए, तए णं ते समणोवासया थेरेहिं भगवंतेहिं इमाइं एयारूवाइं वागरणाइं वागरिया समाणा हट्ठतुट्ठा थेरे भगवंते वंदंति नमंसंति २ पसिणाइं पुच्छंति २ अट्ठाइं उवादियंति २ उट्ठाइ उट्ठेति २ थेरे भगवंते तिक्खुत्तो वंदंति नमंसंति २ थेराणं भगवं० अंतियाओ पुप्फवतियाओ चेइयाओ पडिनिक्खमंति २ जामेव दिसिं पाउब्भूया तामेव दिसिं पडिगया ॥ तए णं ते थेरा अन्नया कयाइं तुंगियाओ पुप्फवतिचेइयाओ पडिनिगच्छइ २ बहिया जणवयविहारं विहरइ।*

**वृ.** 'महइमहालियाए' त्ति आलप्रत्ययस्य स्वार्थिकत्वान्महातिमहत्याः 'अणण्हयफले' त्ति न आश्रवः अनाश्रवः अनाश्रवो-नवकर्म्मानुपादानं फलमस्येत्यनाश्रवफलः संयमः 'वोदाणफले' त्ति 'दाप् लवने' अथवा 'दैप् शोधने' इति वचनाद् व्यवदानं-पूर्वकृतकर्म्मवनगहनस्य लवनं प्राककृतकर्म्मकचवरशोधनं वा फलं यस्य तद्व्यवदानफलं तप इति। किंपत्तियं' ति कः प्रत्ययः-कारणं यत्र तत् किंप्रत्ययं ?, निष्कारणमेव देवा देवलोकेषूत्पद्यन्ते तपःसंयमयोरुक्तनीत्या तदकारणत्वादित्यभिप्रायः।

'पुव्वतवेणं' ति पूर्वतपः-सरागावस्थाभावि तपस्या, वीतरागावस्थाऽपेक्षय सरागावस्थायाः पूर्वकालभावित्वात्, एवं संयमोऽपि अयथाख्यातचारित्रमित्यर्थः, ततश्च सरागकृतेन संयमेन तपसा च देवत्वावाप्ति, रागांशस्य कर्मबन्धहेतुत्वात्। 'कम्मियाए' त्ति कर्म विद्यते यस्यासौ कर्मी तद्भावस्तत्ता तया कर्म्मितया, अन्ये त्वाहुः- कर्म्मणां विकारः कार्मिका तयाऽक्षीणेन कर्म्मशेषेण देवत्वावाप्तिरित्यर्थः, 'संगियाए' त्ति सङ्गो यस्यास्ति स सङ्गी तद्भावस्तत्ता तया, ससङ्गो हि द्रव्यादिषु संयमादियुक्तोऽपि कर्म बन्धाति ततः सङ्गितया देवत्वावाप्तिरिति, आह च–

॥१॥ "पुव्वतवसंजमा होंति रागिणो पच्छिमा अरागस्स।
रागो संगो वुत्तो संगा कम्मं भवो तेणं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सच्चे णं'मित्यादि सत्योऽयमर्थः, कस्मात् ? इत्याह-'नो चेव ण'मित्यादि नैवात्मभाववक्तव्यतयाऽयमर्थः, आत्मभाव एव-स्वाभिप्राय एव न वस्तुतत्त्वं वक्तव्यो-वच्योऽभिमानाद्येषां ते आत्मभाववक्तव्यास्तेषां भाव-आत्मभाववक्तव्यता-अहंमानिता तया, न वयमहंमानितयैवं ब्रूमः अपि तु परमार्थ एवायमेवंविध इति भावना ॥

**मू. (१३४)** *तेणं कालेणं २ रायगिहे नामं नगरे जाव परिसा पडिगया, तेणं कालेणं २ समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूतीनामं अनगारे जाव संखित्तविउलतेयलेस्से छट्ठंछट्ठेणं अनिक्खित्तेणं तवोकम्मेणं संजमेणं तवसा अप्पाणं भावेमाणे जाव विहरति ।*

*तए णं से भगवं गोयमे छट्ठक्खमणपारणगंसि पढमाणे पोरिसीए सज्झायं करेइ बीयाए पोरिसीए झाणं झियायइ तइयाए पोरिसीए अतुरियमचवलमसंभंते मुहपोत्तियं पडिलेहेइ २ भायणाइं वत्थाइं पडिलेहेइ २ भायणाइं पमज्जइ २ भायणाइं उग्गाहेइ २ जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं महावीरं वंदइ नमंसइ २ एवं वदासी-इच्छामि णं भंते तुब्भेहिं अब्भणुन्नाए छट्ठक्खमणपारणगंसि रायगिहे नगरे उच्चनीयमज्झिमाइं कुलाइं घरसमुदानस्स भिक्खायरियाए अडित्तए, अहासुहं देवाणुप्पिया ! मा पडिबंधं ।*

*तए णं भगवं गोयमे समणेणं भगवया महावीरेणं अब्भणुन्नाए समाणे समणस्स भगवओ महावीरस्स अंतियाओ गुणसिलाओ चेइयाओ पडिनिक्खमइ २ अतुरियमचवलमसंभंते जुगंतरपलोयणाए दिट्ठीए पुरओ रियं सोहेमाणे २ जेणेव रायगिहे नगरे तेणेव उवागच्छइ २ रायगिहे नगरे उच्चनीयमज्झिमाइं कुलाइं घरसमुदानस्स भिक्खायरियं अडइ ।*

*तए णं से भगवं गोयमे रायगिहे न० जाव अडमाणे बहुजणसद्दं निसामेइ-एवं खलु देवाणुप्पिया ! तुङ्गियाए नगरीए बहिया पुप्फवतीए चेएइ पासावच्चिज्जा थेरा भगवंतो समणोवासएहिं इमाइं एयारूवाइं वागरणाइं पुच्छिया-संजमे णं भंते ! किंफले ? तवे णं भंते ! किंफले ?, तए णं ते थेरा भगवंतो ते समणोवासए एवं वदासी-संजमे णं अज्जो ! अणण्हफले तवे वोदाणफले तं चेव जाव पुव्वतवेणं पुव्वसंजमेणं कम्मियाए संगियाए अज्जो ! देवा देवलोएसु उववज्जंति, सच्चे णं एसमट्ठे नो चेव णं आयभाववत्तव्वयाए ॥*

*से कहमेयं मन्ने एवं ?, तए णं समणे० गोयमे इमीसे कहाए लद्धट्ठे समाणे जायसड्ढे जाव समुप्पन्नकोउहल्ले अहापज्जत्तं समुदानं गेण्हइ २ रायगिहाओ नगराओ पडिनिक्खमइ २ अतुरियं जाव सोहेमाणे जेणेव गुणसिलए चेइए जेणेव समणे भगवं महावीरे तेणेव उवा० सम० भ० महावीरस्स अदूरसामंते गमणागमणाए पडिक्कमइ एसणमणेसणं आलोएइ २ भत्तपाणं पडिदंसेइ २ समणं भ० महावीरं जाव एवं वयासी-एवं खलु भंते ! अहं तुब्भेहिं अब्भणुण्णाए समाणे रायगिहे नगरे उच्चनीयमज्झिमाणि कुलाणि घरसमुदाणस्स भिक्खायरियाए अडमाणे बहुजणसद्दं निसामेमि ॥ एवं खलु देवा० तुंगियाए नगरीए बहिया पुप्फवईए चेइए पासावच्चिज्जा थेरा भगवंतो समणोवासएहिं इमाइं एयारूवाइं वागरणाइं पुच्छिया-संजमे णं भंते ! किंफले ? तवे किंफले ? तं चेव जाव सच्चे णं एसमट्ठे नो चेव णं आयभाववत्तव्वयाए, तं पभू णं भंते ! ते थेरा भगवंतो तेसिं समणोवासयाणं इमाइं एयारूवाइं वागरणाइं वागरित्तए उदाहु अप्पभू ?*

*समिया णं भंते ! ते थेरा भगवंतो तेसिं समणोवासयाणं इमाइं एयारूवाइं वागरणाइं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वागरित्तए उदाहु असमिया ? आउज्झिया णं भंते ! ते थेरा भगवंतो तेसिं समणोवासयाणं इमाइं एयारूवाइं वागरणाइं वागरित्तए ? उदाहु अनाउज्झिया ? पलिउज्झया णं भंते ! ते थेरा भगवंतो तेसिं समणोवासयाणं इमाइं एयारूवाइं वागरणाइं वागरित्तए उदाहु अपलिउज्झिया ?, पुव्वतवेणं अज्ञो ! देवा देवलोएसु उववज्ञंति पुव्वसंजमेणं कम्मियाए संगियाए अज्ञो ! देवा देवलोएसु उववज्ञंति, सच्चे णं एसमट्ठे नो चेव णं आयभाववत्तव्वयाए, पभू णं गोयमा ! ते थेरा भगवंतो तेसिं समणोवासयाणं इमाइं एयारूवाइं वागरणाइं वागरेत्तए ।*

*नो चेव णं अप्पभू, तह चेव नेयव्वं अविसेसियं जाव पभू समियं आउज्झिया पलिउज्झिया जाव सच्चे णं एसमट्ठे नो चेव णं आयभाववत्तव्वयाए, अहंपि णं गोयमा ! एवमाइक्खामि भासेमि पन्नवेमि परूवेमि पुव्वतवेणं देवा देवलोएसु उववज्ञंति पुव्वसंजमेणं देवा देवलोएसु उववज्ञंति कम्मियाए देवा देवलोएसु उववज्ञंति संगियाए देवा देवलोएसु उववज्ञंति, पुव्वतवेणं पुव्वसंजमेणं कम्मियाए संगियाए अज्ञो ! देवा देवलोएसु उवज्ञंति, सच्चे णं एसमट्ठे नो चेव णं आयभाववत्तव्वयाए*

**वृ.** 'अतुरियं'ति कायिकत्वरारहितम् 'अचवलं'ति मानसचापल्यरहितम् 'असंभंते'त्ति असंभ्रान्तज्ञानः 'घरसमुदानस्स' गृहेषु समुदानं-भैक्षं गृहसमुदानं तस्मै गृहसमुदानाय 'भिक्खायरियाए'त्ति भिक्षासमाचारेण 'जुगंतरपलोयणाए'त्ति युगं-यूपस्तत्प्रमाणमन्तरंस्वदेहस्य दृष्टिपातदेशस्य च व्यवधानं प्रलोकयति या सा युगान्तरप्रलोकना तया दृष्ट्या 'रियं'ति ईर्यां गमनम् ॥

'से कहमेयं मन्ने एवं'ति अथ कथमेतत् स्थविरवचनं मन्ये इति वितर्कार्थो निपातः 'एवम्' अमुना प्रकारेणेति बहुजनवचनं 'पभू णं'ति 'प्रभवः' समर्थास्ते 'समिया णं'ति सम्यगिति प्रशंसार्थो निपातस्तेन सम्यक् ते व्याकर्त्तुं वर्त्तन्ते अविपर्यासास्त इत्यर्थः समञ्चन्तीति वा सम्यञ्चः समिता वा-सम्यकप्रवृत्तयः श्रमिता वा-अभ्यासवन्तः 'आउज्झिय'त्ति 'आयोगिकाः' उपयोगवन्तो ज्ञानिन इत्यर्थः जानन्तीति भावः 'पलिउज्झिय'त्ति परि-समन्ताद् योगिकाः परिज्ञानिन इत्यर्थ परिजानन्तीति भावः

अनन्तरं श्रमणपर्युपासनासंविधानकमुक्तम्, अथ सा यत्फला तद्दर्शनार्थमाह-

***मू. (१३५)*** *तहारूवं भंते ! समणं वा माहणं वा पज्जुवासमाणस्स किंफला पज्जुवासणा ?, गोयमा ! सवणफला, से णं भंते ! सवणे किंफले ?, नाणफले, से णं भंते ! नाणे किंफले ?, विन्नाणफले, से णं भंते ! विन्नाणे किंफले ?, पच्चक्खाणफले, से णं भंते ! पच्चक्खाणे किंफले ?, संजमफले, से णं भंते ! संजमे किंफले ?, अणण्हयफले, एवं अणण्हये तवफले, तवे वोदाणफले, वोदाणे अकिरियाफले, से णं भंते ! अकिरिया किं फला ?, सिद्धिपज्जवसाणफला पन्नत्ता गोयमा !, गाहा-*

**वृ.** 'तहारूव' मित्यादि 'तथारूपम्' उचितस्वभावं कञ्चन पुरुषं श्रमणं वा तपोयुक्तम्, उपलक्षणत्वादस्योत्तरगुणवन्तमित्यर्थः, 'माहनं वा' स्वयं हननिवृत्तत्वात्परं प्रति मा हनेतिवादिनम्, उपलक्षणत्वादेव मूलगुणयुक्तमिति भावः, वाशब्दौ समुच्चये, अथवा 'श्रमणः' साधुः 'माहनः' श्रावकः 'सवणफले'ति सिद्धान्तश्रवणफला, 'नाणफले'त्ति श्रुतज्ञानफलं, श्रवणाद्धि श्रुतज्ञानमवाप्यते, 'विन्नाणफले'त्ति विशिष्टज्ञानफलं, श्रुतज्ञानाद्धि हेयोपादेयविवेककारिविज्ञानमुत्पद्यत एव, 'पच्चक्खाणफले'त्ति विनिवृत्तिफलं, विशिष्टज्ञानो हि पापं प्रत्याख्याति, 'संजमफले'त्ति कृतप्रत्याख्यानस्य हि संयमो भवत्येव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अणण्हयफले'त्ति अनाश्रवफलः, संयमवान् किल नवं कर्म नोपादत्ते, 'तवफले'त्ति अनाश्रवो हि लघुकर्मत्वात्तपस्यतीति, 'वोदाणफले'त्ति व्यवदानं-कर्मनिर्जरणं, तपसा हि पुरातनं कर्म निर्जरयति, 'अकिरियाफले'त्ति योगनिरोधफलं, कर्मनिर्जरातो हि योगनिरोधं कुरुते, 'सिद्धिपज्ञवसाणफले'ति सिद्धिलक्षणं पर्यवसानफलं-सकलफलपर्यन्तवर्त्ति फलं यस्यां सा तथा –

**मू. (१३६)** *सवणे नाणे य विन्नाणे पच्चक्खाणे य संजमे।*
*अणण्हए तवे चेव वोदाणे अकिरिया सिद्धी ॥*

**वृ.** 'गाह'त्ति सङ्ग्रहगाथा, एतल्लक्षणं चैतद्-''विषमाक्षरपादं वा''इत्यादि छन्दःशास्त्रप्रसिद्धमिति ॥ ततारूपस्यैव श्रमणादेः पर्युपासना यथोक्तफला भवति, नातथारूपस्य।

असम्यग्भाषित्त्वादिति असम्यग्भाषितामेव केषाञ्चिद्दर्शयन्नाह–

**मू. (१३७)** *अन्नउत्थिया णं भंते! एवमातिक्खंति भासंति पन्नवेंति परूवेंति-एवं खलु रायगिहस्स नगरस्स बहिया वेभारस्स पव्वयस्स अहे एत्थ णं महं एगे हरए अघे पन्नत्ते अणे- गाइं जोयणाइं आयामविक्खंभेणं नाणादुमसंडमंडितउद्देसे सस्सिरीए जाव पडिरूवे, तत्थ णं बहवे ओराला बलाहया संसेयंति सम्मुच्छिंति वासंति तव्वतिरित्ते य णं सया समिओ उसिणए २ आउकाए अभिनिस्सवइ। से कहमेयं भंते! एवं?, गोयमा! जन्नं ते अन्नउत्थिया एवमातिक्खंति जाव जे ते एवं परूवेंति मिच्छं ते एवमातिक्खंति जाव सव्वं नेयव्वं।*

*जाव अहं पुन गोयमा! एवमातिक्खामि भा० पं० प० एवं खलु रायगिहस्स नगरस्स बहिया वेभारपव्वयस्स अदूरसामंते, एत्थ णं महातवोवतीरप्पभवे नामं पासवणे पन्नत्ते पंचधनुसयाणि आयामविक्खंभेणं नाणादुमसंडमंडिउद्देसे सस्सिरीए पासादीए दरिसणिज्जे अभिरूवे पडिरूवे तत्थ णं बहवे उसिणजोणिया जीवा य पोग्गला य उदगत्ताए वक्कमंति विउक्कमंति चयंति उववज्जंति तव्वतिरित्तेवि य णं सया समियं उसिणे २ आउयाए अभिनिस्सवइ।*

*एस णं गोयमा! महातवोवतीरप्पभवे पासवणं एस णं गोयमा! महातवोवतीरप्पभवस्स पासवणस्स अट्ठे पन्नत्ते, सेवं भंते २ त्ति भगवं गोयमे समणं भगवं महावीरं वंदति नमंसति ॥*

**वृ.** 'पव्वयस्स अहे'त्ति अधस्तात्तस्योपरि पर्वत इत्यर्थ 'हरए'त्ति ह्रदः 'अधे'त्ति अधाभिधानः, क्वचित्तु 'हरए'त्ति न दृश्यते, अधेत्यस्य च स्थाने 'अप्पे'त्ति दृश्यते, तत्र चाप्यः-अपां प्रभवो ह्रद एवेति, 'ओराल'त्ति विस्तीर्ण-'बलाहय'-त्ति मेघाः- 'संसेयंति' 'संस्विद्यन्ति' उत्पादाभिमुखीभवन्ति 'संमूर्च्छन्ति' उत्पद्यन्ते 'तव्वइरित्ते य'त्ति ह्रदपूरणादतिरिक्तश्चोत्कलित इत्यर्थः 'आउयाए'त्ति अप्कायः 'अभिनिस्सवइ'त्ति 'अभिनिश्रवति' क्षरति 'मिच्छंते एवमाइक्खंति'त्ति मिथ्यात्वं चैतदाख्यानस्य विभङ्गज्ञानपूर्वकत्वात् प्रायः सर्वज्ञवचनविरुद्धत्वाद्वयावहारिकप्रत्यक्षेण प्रायोऽन्यथोपलम्भाच्चावगन्तव्यम्।

'अदूरसामंते'त्ति नातिदूरे नाप्यतिसमीप इत्यर्थः 'एत्थ णं'ति प्रज्ञापकेनोपदर्श्यमाने 'महातवोवतीरप्पभवे नामं पासवणे'त्ति आतप इवातपः-उष्णता महांश्चासावातपश्चेति महातपः महातपस्योपतीरं-तीरसमीपे प्रभव-उत्पादो यत्रासौ महातपोपतीरप्रभवः, प्रश्रवति-क्षरतीति प्रश्रवणः प्रस्यन्दन इत्यर्थः, 'वक्कमंति' उत्पद्यन्ते 'विउक्कमंति' विनश्यन्ति, एतदेव व्यत्ययेनाह-च्यवन्ते चेति उत्पद्यन्ते चेति। उक्तमेवार्थं निगमयन्नाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एस ण'मित्यादि 'एषः' अनन्तरोक्तरूपः एष चान्ययूथिकपरिकल्पिताघसञ्ज्ञो महातपोपतीरप्रभवः प्रश्रवण उच्यते, तथा 'एषः' योऽयमनन्तरोक्तः 'उसिणजोणीए'त्यादि स महातपोपतीरप्रभवस्य प्रश्रवणस्यार्थः-अभिधानान्वर्थ प्रज्ञप्तः इति ॥

शतकं-२ उद्देशकः-५ समाप्तः

## -: शतकं-२ उद्देशकः-६ :-

**वृ.** पञ्चमोद्देशकस्यान्तेऽन्ययूथिका मिथ्याभाषिण उक्ताः, अथ षष्ठे भाषास्वरूपमुच्यते, तत्र सूत्रम्-

**मू. (१३८)** *से नूनं भंते ! मण्णामीति ओहारिणी भासा, एवं भासापदं भाणियव्वं ।*

**वृ.** 'से नूनं भंते ! मण्णामी'ति 'ओहारिणी भास'त्ति सेशब्दोऽथशब्दार्थे स च वाक्योपन्यासे, 'नूनम्' उपमानावदारणतर्कप्रश्नहेतुषु' इह अवधारणे 'भदन्त' इति गुर्वामन्त्रणे 'मन्ये' अवबुध्ये इति, एवमवधार्यते-अवगम्यतेऽनयेत्यवधारणी, अवबोधबीजभूतेत्यर्थः भाष्यत इति भाषा-तद्योग्यतया परिणामितनिसृष्टनिसृज्यमानद्रव्यसंहतिरिति हृदयम्, एष पदार्थः ।

अयं पुनर्वाक्यार्थ-अथ भदन्त ! एवमहं मन्येऽवश्यमवधारणी भाषेति । एवममुना सूत्रक्रमेण भाषापदं प्रज्ञापनायामेकादशं भणितव्यमिह स्थाने, इह च भाषा द्रव्यक्षेत्रकालभावैः सत्यादिभिश्च भेदैरन्यैश्च बहुभिः पर्यायैर्विचार्यते ।

शतकं-२ उद्देशकः-६ समाप्तः

## -: शतकं-२ उद्देशकः-७ :-

**वृ.** भाषाविशुद्धेर्देवत्वंभवतीति देवोद्देशकः सप्तमः समारभ्यते, तस्य चेदमादिसूत्रम्-

**मू. (१३९)** *कतिविहा णं भंते ! देवा पन्नत्ता ?, गोयमा ! चउव्विहा देवा पन्नत्ता, तंजहा-भवणवइवाणमंतरजोतिसवेमाणिया ।*

*कहि णं भंते ! भवणवासीणं देवाणं ठाणा प० ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए जहा ठाणपदे देवाणं वत्तव्वया सा भाणियव्वा, नवरं भवणा प०, उववाएणं लोयस्स असंखेज्जइभागे, एवं वेमाणिउद्देसो भाणियव्वो सिद्धगंडिया समत्ता-कप्पाण पइट्ठाणं बाहुल्लुच्चत्तमेव संठाणं ।*

*जीवाभिगमे जाव वेमाणिउद्देसो भाणियव्वो सव्वो ।*

**वृ.** 'कइ णं'ति कति देवा जात्यपेक्षयेति गम्यं, कतिविधा देवाः ? इति हृदयं, 'जहा ठाणपए'त्ति यथा-यत्प्रकारा यादृशी प्रज्ञापनाया द्वितीये स्थानपदाख्ये पदे देवानां वक्तव्यता 'से'ति तथाप्रकारा भणितव्येति, नवरं 'भवणा पन्नत्त'त्ति क्वचिद् दृश्यते, तस्य च फलं न सम्यगवगम्यते, देववक्तव्यता चैवम्- 'इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्सं ओगाहेत्ता हेट्ठा चेगं जोयणसहस्सं वज्जेत्ता मज्झे अट्ठहत्तरे जोयण सयसहस्से, एत्थ णं भवणवासीणं ? देवाणं सत्त भवनकोडीओ बावत्तरिं च भवणावाससयसहस्सा भवंतीति मक्खायं'इत्यादि ।

तद्गतमेवाभिदेयविशेषं विशेषेण दर्शयति-'उववाएणं लोयस्स असंखेज्जइभागे'त्ति, उपपातो-भवनपतिस्वस्थानप्राप्त्याभिमुख्यं तेनोपपातमाश्रित्येत्यर्थः, लोकस्यासङ्ख्येयतमे भागे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्त्तन्ते भवनवासिन इति । 'एवं सव्वं भाणियव्वं'ति 'एवम्' उक्तन्यायेनान्यदिप भणितव्यं, तच्चेदम्-'समुग्घाएणं लोयस्स असंखेज्जइभागे'त्ति मारणान्तिकादिसमुदधातवर्तिनो भवनपतयो लोकस्यासङ्ख्येय एव भागे वर्त्तन्ते ।

तथा 'सट्ठाणेणं लोयस्स असंखेज्जे भागे' स्वस्थानस्य-उक्त भवनवाससातिरेक-कोटीसप्तकलक्षणस्य लोकासङ्ख्येयभागवर्त्तित्वादिति, एवमसुरकुमाराणाम्, एवं तेषामेव दाक्षिणात्यानामौदीच्यानाम्, एवं नागकुमारादिभवनपतीनां यथौचित्येन व्यन्तराणां ज्योतिष्काणां वैमानिकानां च स्थानानि वाच्यानि, कियद्दूरं यावदित्याह--

'जाव सिद्धे'त्ति यावत्सिद्धगण्डिका-सिद्धस्थानप्रतिपादनपरं प्रकरणं, सा चैवम्-'कहि णं भंते ! सिद्धाणं ठाणा पन्नत्ता ?' इत्यादि, इह च देवस्थानाधिकारे यत्सिद्धगण्डिकाऽभिधानं तत्स्थानाधिकारबलादित्यवसेयं, तथेदमपरमपि जीवाभिगमप्रसिद्धं वाच्यं, तद्यथा-'कप्पाण पइट्ठाणं' कल्पविमानानामाधारो वाच्य इत्यर्थः, स चैवम्-

'सोहम्मीसाणेसु णं भंते ! कप्पेसु विमाणपुढवी किंपइट्ठिया पन्नत्ता ?, गोयमा ! घनोदहिपइट्ठिया पन्नत्ता'इत्यादि, आइ च--

॥ १ ॥ "घनउदहिपइट्ठाणा सुरभवणा होंति दोसु कप्पेसु ।
तिसु वाउपइट्ठाणा तदुभयसुपइट्ठिया तिसु य ॥

तेण परं उवरिमगा आगासंतरपइट्ठिया सव्वे ।"त्ति । तथा 'बाहल्ल'त्ति विमानपृथिव्याः पिण्डो वाच्यः, स चैवम्-'सोहम्मासाणेसु णं भंते ! कप्पेसु विमाणपुढवी केवइयं बाहल्लेणं प० ? गोयमा ! सत्तावीसं जोयणसयाइं'इत्यादि, आह च--

॥ १ ॥ "सत्तावीस सयाइं आइमकप्पेसु पुढविबाहल्लं ।
एक्किक्कहाणि सेसे दु दुगे य दुगे चउक्के य ॥

ग्रैवेयकेषु द्वाविंशतिर्योजनानां शतानि, अनुत्तरेषु त्वेकविंशतिरिति । 'उच्चत्तमेव'त्ति कल्पविमानोच्चत्वं वाच्यं, तच्चैवम्-'सोहम्मीसानेसु णं भंते ! कप्पेसु विमाणा केवइयं उच्चत्तेणं पन्नत्ता ?, गोयमा ! पंचजोयणसयाइं इत्यादि, आह च--

॥ १ ॥ "पंचसउच्चत्तेणं आइमकप्पेसु होंति उ विमाणा ।
एक्केक्कवुड्ढि सेसे दु दुगे य दुगे चउक्के य ॥

ग्रैवेयकेषु दश योजनशतानि अनुत्तरेषु त्वेकादशेति, 'संठाणं'ति विमानसंस्थानं वाच्यं, तच्चैवम्-"सोहम्मीसानेसु णं भंते ! कप्पेसु विमाणा किंसंठिया पन्नत्ता ?, गोयमा ! जे आवलियापविट्ठा ते वट्टा तंसा चउरंसा, जे आवलियाबाहिरा ते नाणासंठिय'त्ति ।

उक्तार्थस्य शेषमतिदिशन्नाह-जीवाभिगेत्यादि, स च विमानानां प्रमाणवर्णप्रभागन्धादि-प्रतिपादनार्थः ॥ इति द्वितीयशते सप्तमः ॥

शतकं-२ उद्देशकः-७ समाप्तः

## --: शतकं-२ उद्देशकः-८ :--

**वृ.** अथ देवस्थानाधिकाराच्चमरचञ्चाभिधानदेवस्थानादिप्रतिपादनायाष्टमोद्देशकः, तस्य चेदं सूत्रम्--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (१४०) कहि णं भंते ! चमरस्स असुरिंदस्स असुरकुमारन्नो सभा सुहम्मा पन्नत्ता ?, गोयमा ! जंबूद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं तिरियमसंखेज्ज्ञे दीवसमुद्दे वीईवइत्ता अरुणवरस्स दीवस्स बाहिरिल्लाओ वेइयंताओ अरुणोदयं समुद्दं बायालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं चमरस्स असुरिंदस्स असुरकुमाररन्नो तिगिच्छियकूडे नामं उप्पायपव्वए पन्नत्ते, सत्तरसएक्कवीसे जोयणसए उड्ढं उच्चत्तेणं चत्तारि जोयणसए कोसं च उव्वेहेणं गोत्थुभस्स आवासपव्वयस्स पमाणेणं नेयव्वं नवरं उवरिल्लं पमाणं मज्झे भाणियव्वं ।*

*[मूले दसबावीसे जोयणसए विक्खंभेणं मज्झे चत्तारि चउवीसे जोयणसते विक्खंभेणं उवरिं सत्ततेवीसे जोयणसते विक्खंभेणं मूले तिन्नि जोयणसहस्साइं दोन्नि य बत्तीसुत्तरे जोयणसते किंचिविसेसूणे परिक्खेवेणं मज्झे एगं जोयणसहस्सं तिन्नि य इगयाले जोयणसते किंचिविसेसूणे परिक्खेवेणं उवरि दोन्नि य जोयणसहस्साइं दोन्नि य छलसीते जोयणसते किंचिविसेसाहिए परिक्खेवेणं ।]*

*जाव मूले वित्थड मज्झे संखित्ते उप्पिं विसाले मज्झे वरवइरविग्गहिए महामउंदसंठाणसंठिए सव्वरयणामए अच्छे जाव पडिरूवे, से णं एगाए पउमवरवेइयाए एगेणं वनसंडेण य सव्वओ समंता संपरिक्खित्ते, पउमवरवेइयाए वनसंडस्स य वन्नओ, तस्स णं तिगिच्छिकूडस्स उप्पाय-पव्वयस्स उप्पिं बहुसमरमणिज्जे भूमिभागे पन्नत्ते ।*

*—वण्णओ तस्स णं बहुसमरमणिज्जस्स भूमिभागस्स बहुमज्झदेसभागे एत्थ णं महं एगे पासायवडिंसए पन्नत्ते अड्ढाइज्जाइं जोयणसयाइ उड्ढं उच्चत्तेणं पणवीसं जोयणसयाइं विक्खंभेणं, पासायवण्णओ उल्लोयभूमिवन्नओ अट्ठ जोयणाइं मणिपेढिया चमरस्स सीहासणं सपरिवारं भाणियव्वं, तस्स णं तिगिच्छिकूडस्स दाहिणेणं छक्कोडिसए पणपन्नं च कोडीओ पणतीसं च सयसहस्साइं पन्नासं च सहस्साइं अरुणोदे समुद्दे तिरियं वीइवइत्ता अहे रयणप्पभाए पुढवीए चत्तालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं चमरस्सअसुरिंदस्स असुरकुमाररन्नो चमरचंचा नामं रायहाणी पं० ।*

*एगं जोयणसयसहस्सं आयामविक्खंभेणं जंबूद्दीवप्पमाणं, पागारो दिवड्ढं जोयणसयं उड्ढं उच्चत्तेणं मूले पन्नासं जोयणाइं विक्खंभेणं उवरिं अद्धतेरसजोयणा कविसीसगा अद्ध- जोयणआयामं कोसं विक्खंभेणं देसूणं अद्धजोयणं उड्ढं उच्चत्तेणं एगमेगाए बाहाए पंच २ दारसया अड्ढाइज्जाइं जोयणसयाइं २५० उड्ढं उच्चत्तेणं १२५ अद्धं विक्खंभेणं उवरियलेणं सोलसजोयणसहस्साइं आयामविक्खंभेणं पन्नासं जोयणसहस्साइं पंच य सत्तानउयजोयणसए किंचिविसेसूणे परिक्खेवेणं सव्वप्पमाणं वेमाणियप्पमाणस्स अद्धं नेयव्वं, सभा सुहम्मा, उत्तरपुच्छिमे णं जिणघरं । ततो उववायसभा हरओ अभिसेय० अलंकारो जहा विजयस्स संकप्पो अभिसेयविभूसणा य ववसाओ अच्चणिय सुहमाय सिद्धायण गमोवि य णं चमर परिवार इड्ढत्तं ।*

**वृ.** 'असुरिंदस्स' त्ति असुरेन्द्रस्य, स चेश्वरतामात्रेणापि स्यादित्याह-असुरराजस्य, वश-वर्त्यसुरनिकायस्येत्यर्थः, 'उप्पायपव्वए' त्ति तिर्यग्लोकगमनाय यत्रागत्योत्पतति स उत्पातपर्वत इति । 'गोत्थुभस्से' त्यादि, तत्र गोस्तुभो लवणसमुद्रमध्ये पूर्वस्यां दिशि नागराजावासपर्वतस्तस्य चादिमध्यान्तेषु विष्कम्भप्रमाणमिदम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ "कमसो विक्खंभो से दसबावीसाइ जोयणसयाइं १ ।
सत्तसए तेवीसे २ चत्तारिसए य चउव्वीसे ३ ॥

इहैव विशेषमाह-'नवर' मित्यादि, ततश्चेदमापन्नम्-'मूले दसबावीसे जोयणसए विक्खंभेणं मज्झे चत्तारि चउवीसे उवरिं सत्ततेवीसे, मूले तिन्नि जोयणसहस्साइं दोन्नि य बत्तीसुत्तरेजोयणसए किंचिविसेसूणे परिक्खेवेणं मज्झे एगं जोयणसहस्सं तिन्नि य इगुयाले जोयणए किंचिविसेसूणे परिक्खेवेणं उवरिं दोन्नि य जोयणसहस्साइं दोन्नि य छलसीए जोयणसए किंचिविसेसाहिए परिक्खेवेणं' पुस्तकान्तरे त्वेतत्सकलमस्त्येवेति ।

'वरवइरविग्गहिए'त्ति वरवज्रस्येव विग्रह-आकृतिर्यस्य स स्वार्थिकेकप्रत्यये सति वरवज्रविग्रहिको, मध्ये क्षाम इत्यर्थः, एतदेवाह-'महामउंदे'त्यादि मुकुन्दो-वाद्यविशेषः 'अच्छे'त्ति स्वच्छ आकाशस्फटिकवत्, यावत्करणादिदं दृश्यम्-'सण्हे' श्लक्ष्णः श्लक्ष्णपुद्गलनिर्वृत्तत्वात् 'लण्हे' मसृणः 'घट्ठे' घृष्ट इव घृष्टः खरशानया प्रतिमेव 'मट्ठे' मृष्ट इव मृष्टः सुकुमारशानया प्रतिमेव प्रमार्जनिकयेव वा शोधितः अत एव 'निरए' नीरजा रजोरहितः 'निम्मले' कठिनमलरहितः 'निप्पंके' आर्द्रमलरहितः 'निक्कंकडच्छए' निरावरणदीप्तिः 'सप्पभे' सत्प्रभावः 'समरिईए'-सकिरणः 'सउज्जोए' प्रत्यासन्नवस्तूदद्योतकः पासाईए ४, 'पउमवरवेइयाए वनसंडस्स य वण्णओ-'त्ति, वेदिकावर्णको यथा–

'सा णं पउमवरवेइया अद्धं जोयणं उड्ढं उच्चत्तेणं पंचधनुसयाइं विक्खंभेणं सव्वरयणामई तिगिच्छकूडउवरितलपरिक्खेवसमा परिक्खेवेणं, तीसे णं पउमवरवेइयाए इमे एयारूवे वण्णावासे पन्नत्ते' 'वर्णकव्यासः' वर्णकविस्तरः 'वइरामया नेमा' इत्यादि, 'नेम'त्ति स्तम्भानां मूलपादाः वनखण्डवर्णकस्त्वेवम्- 'से णं वनसंडे देसूणाइं दो जोयणाइं चक्कवालविक्खंभेणं पउमवरवेइयापरिक्खेवसमे परिक्खेवेणं, किण्हे किण्हाभासे' इत्यादि ।

'बहुसमरमणिज्जे'त्ति अत्यन्तसमो रमणीयश्चेत्यर्थः 'वन्नओ'त्ति वर्णकस्तस्य वाच्यः, स चायम्-'से जहानामए आलिंगपुक्खरे इ वा' आलिंगपुष्करं-मुरजमुखं तद्वत्सम इत्यर्थः, 'मुइंगपुक्खरे इ वा सरतले इ वा करतले इ वा आयंसमंडले इ वा चंदमंडले इ वे'त्यादि ।

'पासायवडिंसए'त्ति प्रासादोऽवसंतक इव-शेखरक इव प्रधानत्वात् प्रासादावतंसकः, 'पासायवण्णओ'त्त प्रासादवर्णको वाच्यः, स चैवम्-'अब्भुग्गयमूसियपहसिए' अभ्युद्गतमभ्रोद्गतं वा यथाभवत्येवमुच्छ्रितः, अथवा मकारस्यागमिकत्वाद् अभ्युद्गतश्चासावुच्छ्रितश्चेत्यभ्युद्गतोच्छ्रितः, अत्यर्थमुच्च इत्यर्थः, प्रथमैकवचनलोपश्चात्र दृश्यः, तथा प्रहसित इव प्रभापटलपरिगत प्रहसितः प्रभया वा सितः-शुक्लः संबद्धो वा प्रभासित इति, 'मणिकणगरयणभत्तिचित्ते' मणिकनकरत्नानां भक्तिभिः-विच्छित्तिभिश्चित्रो विचित्रो यः स तथा, इत्यादि ।

'उल्लोयभूमिवण्णओ'ति उल्लोचवर्णकः प्रासादस्योपरिभागवर्णकः, स चैवम्-'तस्स णं पासायवडिंसगस्स इमेयारूवे उल्लोए पन्नत्ते-ईहामिगउसभतुरगनरमगरविहगवालग-किन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ते जाव सव्वतवणिज्जमए अच्छे जाव पडिरूवे' भूमिवर्णकस्त्वेवम्-'तस्स णं पासायवडिंसयस्स बहुसमरमणिज्जे भूमिभागे पन्नत्ते, तंजहा-आलिंगपुक्खरे इ वे'त्यादि, 'सपरिवारं'ति चमरसम्बन्धिसपरिवारसिंहासनोपेतं, तच्चैवम्-'तस्स णं सिंहासणस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवरुत्तरेणं उत्तरेणं उत्तरपुरच्छिमेणं एत्थ णं चमरस्स चउसट्ठीए सामाणिय-साहस्सीणं चउसट्ठीए भद्दासणसाहस्सीओ पन्नत्ताओ एवं पुरच्छिमेणं पंचण्हं अग्गमहिसीणं सपरिवाराणं पंच भद्दासणाइं सपरिवाराइं दाहिणपुरच्छिमेणं अब्भितरियाए परिसाए चउव्वीसाए देवसाहस्सीणं चउव्वीसं भद्दासणसाहस्सीओ –

एवं दाहिणेणं मज्झिमाए अट्ठावीसं भद्दासनसाहस्सीओ, दाहिणपच्चत्थिमेणं बाहिरियाए बत्तीसं भद्दासणसाहस्सीओ पच्चत्थिमेणं सत्तण्हं अनियाहिवईणं सत्त भद्दासणाइं चउद्दिसिं आयरक्खदेवाणं चत्तार भद्दासणसहस्सचउसट्ठीओ' त्ति, 'तेत्तीसं भोम' त्ति वाचनान्तरे दृश्यते, तत्र भौमानि-विशिष्टस्थानानि नगराकाराणीत्यन्ते, 'उवयारियलेणं' ति गृहस्य पीठबन्धकल्पं 'सव्वप्पमाणं चेमाणियप्पमाणस्स अद्धंनेयव्वं' ति, अयमर्थः यत्तस्यां राजधान्यां प्राकारप्रासादसभादिवस्तु तस्य सर्वस्योच्छ्रयादिप्रमाणं सौधर्मवैमानिकविमानप्राकारप्रासादसभादिवस्तुगतप्रमाणस्यार्द्धं च नेतव्यं, तथाहि–

सौधर्मवैमानिकानां विमानप्राकारो योजनानां त्रीणि शतान्युच्चत्वेन, एतस्यास्तु सार्द्धं शतं, तथा सौधर्मवैमानिकानां मूलप्रासादः पञ्च योजनानां शतानि तदन्ये चत्वारस्तत्परिवारभूताः सार्द्धे द्वे शते ४ प्रलोकं च तेषां चतुर्णामप्यन्ये परिवारभूताश्चत्वारः सपादशतम् १६ एवमन्ये तत्परिवारभूताः सार्द्धा द्विषष्टि ६४ एवमन्ये सपादैकत्रिंशत् २५६, इह तु मूलप्रासादाः सार्द्धे द्वे योजनशते एवमर्द्धार्द्धहीनास्तदपरे यावदन्तिमाः पञ्चदश योजनानि पञ्च च योजनस्याष्टांशाः, एतदेव वाचनान्तरे उक्तम्–

'चत्तारि परिवाडीओ पासायवडेंसगाणं अद्धद्धहीनाओ' त्ति एतेषां च प्रासादानां चतसृष्वपि परिपाटीषु त्रीणि शतान्येकचत्वारिंशदधिकानि भवन्ति, एतेभ्यः प्रासादेभ्य उत्तरपूर्वस्यां दिशि सभा सुधर्मा सिद्धायतनमुपपातसभा ह्रदोऽभिषेकसभाऽलङ्कारसभा व्यवसायसभा चेति, एतानि च सुधर्मसभादीनि सौधर्मवैमानिकसभादिभ्यः प्रमाणतोऽर्द्धप्रमाणानि, ततश्चोच्छ्रय इहैषां षट्त्रिंशद्योजनानि पञ्चाशदायामो विष्कम्भश्च पञ्चविंशतिरिति, एतेषां च विजयदेवसम्बन्धिनामिव 'अनेगखम्भसयसन्निविट्ठा अब्भुग्गयसुकयवइरवेइया' इत्यादिवर्णको वाच्यः ।

तथा 'दाराणं उप्पिं बहवे अट्ठट्ठमंगलगा झया छत्ता' इत्यादि, अलङ्कारश्च सभादीनां वाच्यः, सर्वं च जीवाभिगमोक्तं विजयदेवसम्बन्धि चमरस्य वाच्यं यावदुपपातसभायां सङ्कल्पश्चाभिनवोत्पन्नस्य किं मम पूर्वं पश्चाद्वा कर्त्तुं श्रेयः ? इत्यादिरूपः, अभिषेकश्चाभिषेकसभायां महर्द्ध्या सामानिकादिदेवकृतः, विभूषणा च वस्त्रालङ्कारकृताऽलङ्कारसभायां, व्यवसायश्च व्यवसायसभायां पुस्तकवाचनतः, अर्चनिका च सिद्धायतने सिद्धप्रतिमादीनां, सुधर्मसभागमनं च सामानिकादिपरिवारोपेतस्य चमरस्य, परिवारश्च सामानिकादि, ऋद्धिमत्त्वं च 'एवंमहिड्ढिए' इत्यादिवचनैर्वाच्यमस्येति । एतद् वाचनान्तरेऽर्थतः प्रायोऽवलोक्यत एवेति ।

शतकं-२ उद्देशकः-८ समाप्तः

## –: शतकं-२ उद्देशकः-९ :–

**वृ.** चमरचञ्चालक्षणं क्षेत्रमष्टमोद्देशक उक्तम्, अथ क्षेत्राधिकारादेव नवमे समयक्षेत्रमुच्यत इत्येवंसम्बन्धस्यास्येदं सूत्रम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (१४१)** *किमिदं भंते ! समयखेत्तेत्ति पवुच्चति ?, गोयमा ! अड्डाइज्जा दीवा दो य समुद्दा एस णं एवइए समयखेत्तेति पवुच्चति, तत्थ णं अयं जंबूद्दीवे २ सव्वदीवसमुद्दाणं सव्वब्भंतरे एवं जीवाभिगमवत्तव्वया नेयव्वा जाव अब्भिंतरं पुक्खरद्धं जोइसविहूणं ।*

**वृ.** 'किमिद'मित्यादि तत्र समयः-कालस्तेनोपलक्षितं क्षेत्रं समयक्षेत्रं, कालो हि दिनमासादिरूपः सूर्यगतिसमभिव्यङ्ग्यो मनुष्यक्षेत्र एव न परतः, परतो हि नादित्याः संचरिष्णव इति, 'एवं जीवाभिगमवत्तव्वया नेयव्व'त्ति, एषा चैवम्-'एगं जोयणसयसहस्सं आयामवि-क्खंभेण'मित्यादि 'जोइसविहूणं' ति, तत्र जम्बूद्वीपादिमनुष्यक्षेत्रवक्तव्यतायां जीवाभिगमोक्तायां ज्योतिष्कवक्तव्यताऽप्यस्ति ततस्तद्विहीनं यथा भवत्येवं जीवाभिगमवक्तव्यता नेतव्येति ।

वाचनान्तरे तु 'जोइसअड्डविहूणं'ति इत्यादि बहु दृश्यते, तत्र 'जंबूद्दीवे णं भंते ! कइ चंदा पभासिंसु वा ३ ? कति सूरीया तविंसु वा ३ ? कइ नक्खत्ता जोयं जोइंसु व ३ ? इत्यादिकानि प्रत्येकं ज्योतिष्कसूत्राणि, तथा-से केणट्ठेणं भंते ! एवं वुच्चइ जंबूद्दीवे दीवे ?, गोयमा ! जंबूद्दीवे णं दीवे मंदरस्स पव्वयस्स उत्तरेणं लवणस्स दाहिणेणं जाव तत्थ २ बहवे जंबूरुक्खा जंबूवन्ना जाव उवसोहेमाणा चिट्ठंति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जंबूद्दीव् दीवे' इत्यादीनि प्रत्येकमर्थसूत्राणि च सन्ति । ततश्चैतद्विहीनं यथा भवत्येवं जीवाभिगमवक्तव्यतया नेयं अस्योद्देशकस्य सूत्रं 'जाव इमा गाह'त्ति सङ्ग्रहगाथा, सा च—

॥१॥ "अरहंत समय बायर विज्जू थणिया बलाहगा अगनी ।
आगर निहि नइ उवराग निग्गमे वुड्ढिवयणं च ॥

अस्याश्चार्थस्तत्रानेन सम्बन्धेनायातो-जम्बूद्वीपादीनां मानुषोत्तरान्तानामर्थानां वर्णनस्यान्ते इदमुक्तम्-'जावं च णं मानुसुत्तरे पव्वए तावं च णं अस्सिंलोएत्ति पवुच्चइ' मनुष्यलोके उच्यत इत्यर्थः तथा 'अरहंते'त्ति जावं च णं अरहंता चक्कवट्टी जाव सावियाओ मणुया पगइभद्दया विनीया तावं च णं अस्सिंलोएत्ति पवुच्चइ ।

'समय'त्ति जावं च णं समयाइ वा आवलिया इ वा जाव अस्सिंलोएत्ति पवुच्चइ, एवं जावं च णं बायरे विज्जुयारे बायरे थणियसद्दे जावं च णं बहवे ओराला बलाहया संसेयंति, 'अगनि'त्ति जावं च णं बायरे तेउयाए जावं च णं आगरा इ वा निही इ वा नई इ वा 'उवराग'त्ति चंदोवरागा इ वा सूरोवरागा इ वा तावं च णं अस्सिंलोएत्ति पवुच्चइ' उपरागो-ग्रहणं ।

'निग्गमे वुड्ढिवयणं च'त्ति यावच्च निर्गमादीनां वचनं-प्रज्ञापनं तावन्मनुष्यलोक इति प्रकृतं, तत्र 'जावं च णं चंदिमसूरियाणं जाव तारारूवाणं अइगमणं निग्गमणं वुड्ढी निव्वुड्ढी आघविज्जइ तावं च णं अस्सिंलोएत्ति पुवच्चइ'त्ति, अतिगमनमिहोत्तरायणं निर्गमनं-दक्षिणायनं वृद्धि-दिनस्य वर्द्धनं निवृद्धि-तस्यैव हानिरिति ।

शतकं-२ उद्देशकः-९ समाप्तः

## —: शतकं-२ उद्देशकः-१० :—

**वृ.** अनन्तरं क्षेत्रमुक्तं तच्चास्तिकायदेशरूपमित्यस्तिकायाभिधानपरस्य दशमोद्देशक-स्यादिसूत्रम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (१४२)** *कति णं भंते ! अत्थिकाया पन्नत्ता ?, गोयमा ! पंच अत्थिकाया पन्नत्ता, तंजहा-धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवत्थिकाए पोग्गलत्थिकाए ।*

*धम्मत्थिकाएणं भंते ! कतिवन्ने कतिगंधे कतिरसे कतिफासे ?, गोयमा ! अवन्ने अगंधे अरसे अफासे अरूवे अजीवे सासए अवट्ठिए लोगदव्वे, से समासओ पंचविहे पन्नत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावओ गुणओ, दव्वओ णं धम्मत्थिकाए एगे दव्वे, खेत्तओ णं लोगप्पमाणमेत्ते, कालओ न कयावि न आसि न कयाइ नत्थि जाव निच्चे, भावओ अवन्ने अगंधे अरसे अफासे, गुणओ गमणगुणे ।*

*अहम्मत्थिकाएवि एवं चेव, नवरं गुणओ ठाणगुणे, आगासत्थिकाएवि एवं चेव, नवरं खेत्तओ णं आगासत्थिकाए लोयालोयप्पमाणमेत्ते अनंते चेव जाव गुणओ अवगाहणागुणे ।*

*जीवत्थिकाए णं भंते ! कतिवन्ने कतिगंधे कतिरसे कइफासे ?, गोयमा ! अवन्ने जाव अरूवी जीवे सासए अवट्ठिए लोगदव्वे, से समासओ पंचविहे पन्नत्ते, तंजहा-दव्वओ जाव गुणओ, दव्वओ णं जीवत्थिकाए अनंताइं जीवदव्वाइं, खेत्तओ लोगप्पमाणमेत्ते कालओ न कयाइ न आसि जाव निच्चे, भावओ पुण अवनने अगंधे अरसे अफासे, गुणओ उवओगगुणे ।*

*पोग्गलत्थिकाए णं भंते ! कतिवण्णे कतिगंधे० रसे० फासे ?, गोयमा ! पंचवन्ने पंचरसे दुगंधे अट्ठफासे रूवी अजीवे सासए अवट्ठिए लोगदव्वे, से समासओ पंचविहे पण्णत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावओ गुणओ, दव्वओ णं पोग्गलत्थिकाए अनंताइं दव्वाइं, खेत्तओ लोयप्पमाणमेत्ते, कालओ न कयाइ न आसि जाव निच्चे, भावओ वण्णमंते गंध० रस० फासमंते, गुणओ गहणगुणे ।*

**वृ.** 'कइ णमि' त्यादि, अस्तिशब्देन प्रदेशा उच्यन्तेऽतस्तेषां काया-राशयोऽस्तिकायाः, अथवाऽस्तीत्ययं निपातः कालत्रयाभिधायी, ततोऽस्तीति-सन्ति आसन् भविष्यन्ति च ये कायाः-प्रदेशराशयस्तेऽस्तिकाया इति, धर्मास्तिकायादीनां चोपन्यासेऽयमेव क्रमः, तथाहि-धर्मास्तिकायादिपदस्य माङ्गलिकत्वाद्धर्मास्तिकाय आदावुक्तः, तदनन्तरं च तद्विपक्षत्वादधर्मास्तिकायः, ततश्च तदाधारत्वादाकाशास्तिकायः, ततोऽनन्तत्वामूर्तत्वसाधर्म्याज्जीवास्तिकायः, ततस्तदुपष्टम्भकत्वात्पुद्गलास्तिकाय इति ।

'अवन्ने' इत्यादि, यत एवावर्णादिरत एव 'अरूपी' अमूर्त्तो न तु निस्वभावो, नञः पर्युदासवृत्तित्वात्, शाश्वतो द्रव्यतः अवस्थितः प्रदेशतः 'लोगदव्वे' त्ति लोकस्य-पञ्चास्तिकायात्मकस्यांशभूतं द्रव्यं लोकद्रव्यं, भावत इति पर्यायतः, 'गुणओ' त्ति कार्यतः 'गमणगुणे' त्ति जीवपुद्गलानां गतिपरिणतानां गत्युपष्टम्भहेतूर्मत्स्यानां जलमिवेति । 'ठाणगुणे' त्ति जीवपुद्गलानां स्थितिपरिणतानां स्थित्युपष्टम्भहेतुर्मत्स्यानां स्थलमिवेति ।

'अवगाहनागुणे' त्ति जीवादीनामवकाशहेतुर्बदराणां कुण्डमिव । 'उवओगगुणे' त्ति उपयोगः-चैतन्यं साकारनाकारभेदं । 'गहणगुणे' त्ति ग्रहणं-परस्परेण सम्बन्धनं जीवेन वा औदारिकादिभिः प्रकारैरिति ।

**मू. (१४३)** *एगे भंते ! धम्मत्थिकायपदेसे धम्मत्थिकाएत्ति वत्तव्वं सिया ?, गोयमा ! नो इणट्ठे समट्ठे, एवं दोन्निवि तिन्निवि चत्तारि पंच छ सत्त अट्ठ नव दस संखेज्ञा, असंखेज्ञा भंते !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*धम्मत्थिकायप्पएसा धम्मत्थिकाएत्ति वत्तव्वं सिया ?, गोयमा ! नो इणट्ठे समट्ठे, एगपदेसूणेविय णं भंते ! धम्मत्थिकाए २ त्ति वत्तव्वं सिया ? नो तिणट्ठे समट्ठे ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ ? एगे धम्मत्थिकायपदेसे नो धम्मत्थिकाएत्ति वत्तव्वं सिया जाव एगपदेसूणेवि य णं धम्मत्थिकाए नो धम्मत्थिकाएत्ति वत्तव्वं सिया ?*

*से नूनं गोयमा ! खंडे चक्के सगले चक्के ?, भगवं ! नो खंडे चक्के सगले चक्के, एवं छत्ते चम्मे दंडे दूसे आउहे मोयए, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-एगे धम्मत्थिकायपदेसे नो धम्मत्थिकाएत्ति वत्तव्वं सिया जाव जगपदेसूणेविय णं धम्मत्थिकाए नो धम्मत्थिकाएत्ति वत्तव्वं सिया ।*

*से किंखातिए णं भंते ! धम्मत्थिकाए त्ति वत्तव्वं सिया ?, गोयमा ! असंखेज्ञा धम्मत्थिकायपए ते सव्वे कसिणा पडिपुन्ना निरवसेसा एगगहणगहिया एस णं गोयमा ! धम्मत्थिकाएत्ति वत्तव्वं सिया ।। एवं अहम्मत्थिकाएवि, आगासत्थिकाएवि, जीवत्थिकायपोग्गलकायावि एवं चेव, नवरं तिण्हंपि पदेसा अनंता भाणियव्वा ।। सेसं तं चेव ।।*

**वृ.** 'खंडं चक्के' इत्यादि, यथा खण्डचक्रं चक्रं न भवति, खण्डचक्रमित्येवं तस्य व्यपदिश्यमानत्वात्, अपि तु सकलमेव चक्रं चक्रं भवति ।

एवं धर्मास्तिकायः प्रदेशेनाप्यूनो न धर्मास्तिकाय इति वक्तव्यः स्याद्, एतच्च निश्चयनयदर्शनं व्यवहारनयमतं तु-एकदेशेनोनमपि वस्तु वस्त्वेव, यथा खण्डोऽपि घटो घट एव, छिन्नकर्णोऽपि श्वा श्वैच, भणन्ति च-'एकदेशविकृतमनन्यवदि' ति ।

'से किंखाइंति' अथ किं पुनरित्यर्थः 'सव्वेऽवि' समस्ताः, ते च देशापेक्षयाऽपि भवन्ति, प्रकारकात्स्न्र्येऽपि सर्वशब्दप्रवृत्तेरित्यत आह-'कसिण' त्ति कृत्स्ना न तु तदेकदेशापेक्षया सर्व इत्यर्थः, ते च स्वस्वभावरहिता अपि भवन्तीत्यत आह-प्रतिपूर्णा-आत्मस्वरूपेणाविकलाः, ते च प्रदेशान्तरापेक्षया स्वस्वभावन्यूना अपि तथोच्यन्त इत्याह-'निरवसेस' त्ति प्रदेशान्तरतोऽपि स्वस्वभावेनान्यूनाः, तथा 'एगग्गहणगहिय' त्ति एकग्रहणेन-एकशब्देन धर्मास्तिकाय इत्येवंलक्षणेन गृहीता ये ते तथा, एकशब्दाभिधेया इत्यर्थः, एकार्था वैते शब्दाः, 'पएसा अणंता भाणियव्व' त्ति धर्माधर्मयोरसङ्खयेयाः प्रदेशा उक्ताः, आकाशादीनां पुनः प्रदेशा अनन्ता वाच्याः, अनन्तप्रदेशिकत्वात्रयाणामपीति ।

उपयोगगुणो जीवास्तिकायः प्राग्दर्शितः, अथ तद्देशभूतो जीव उत्थानादिगुण इति दर्शयन्नाह-

***मू. (१४४)*** *जीवे णं भंते ! सउट्ठाणे सकम्मे सबले सवीरिए सपुरिक्कारपरक्कमे आयभावेणं जीवभावं उवदंसेतीत्ति वत्तव्वं सिया ?, हंता गोयमा ! जीवे णं सउट्ठाणे जाव उवदंसेतीत्ति वत्तव्वं सिया ।*

*से केणट्ठेणं जाव वत्तव्वं सिया ?, गोयमा ! जीवे णं अनंताणं आभिनिबोहियनाणपज्ञवाणं एवं सुयनाणपज्ञवाणं ओहिनाणपज्ञवाणं मणपज्ञवनाणप० केवलानाणप० मइअन्नाणप० सुय- अन्नाणप० विभंगणाणपज्ञवाणं चक्खुदंसणप० अचक्खुदंसणप० ओहिदंसणप० केवलदंसणप० - उवओगं गच्छइ, उवओगलक्खणे णं जीवे, से तेणट्ठेणं एवं वुच्चइ ।*

*गोयमा ! जीवेणं सउट्ठाणे जाव वत्तव्वं सिया ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'जीवे ण'मित्यादि, इह च 'सउट्ठाणे'इत्यादीनि विशेषणानि मुक्तजीवव्युदासार्थानि 'आयभावेणं'ति आत्मभावेन-उत्थानशयनगमनभोजनादिरूपेणात्मपरिणामविशेषेण 'जीवभावं'ति जीवत्वं चैतन्यम् 'उपदर्शयति' प्रकाशयतीति वक्तव्यं स्याद् ?, विशिष्टस्योत्थानादेर्विशिष्ट-चेतनापूर्वकत्वादिति।

'अनंताणं आभिनिबोहिए'त्यादि, 'पर्यवाः' प्रज्ञाकृता अविभागाः पलिच्छेदाः, ते चानन्ता आभिनिबोधिकज्ञानस्यातोऽनन्तानामाभिनिबोधिकज्ञानपर्यवाणां सम्बन्धिनम्, अनन्ता-भिनिबोधिकज्ञानपर्यवात्मकमित्यर्थः, 'उपयोगं' चेतनाविशेषं गच्छतीति योगः, उत्थानादावा-त्मभावे वर्त्तमान् इति हृदयम्, अथ यद्युत्थानाद्यात्मभावे वर्त्तमानो जीव आभिनिबोधिकज्ञानाद्युपयोगं गच्छति तत्किमेतावतैव जीवभावमुपदर्शयतीति वक्तव्यं स्यात् ? इत्याशङ्क्याह–

'उवओगे'त्यादि, अत उपयोगलक्षणं जीवभावमुत्थानाद्यात्मभावेनोपदर्शयतीति वक्तव्यं स्यादेवेति ॥ अनन्तरं जीवचिन्तासूत्रमुक्तम्, अथ तदाधारत्वेनाकाशचिन्तासूत्राणि–

**मू. (१४५)** *कतिवहे णं भंते ! आगासे पन्नत्ते ?, गोयमा ! दुविहे आगासे प० तंजहा-लोयागासे य अलयागासे य।*

*लोयागासे णं भंते ! किं जीवा जीवदेसा जीवपदेसा अजीवा अजीवदेसा अजीवपएशा गोयमा ! जीवावि जीवदेसावि जीवपदेसावि अजीवदेसावि अजीवपदेसावि जे जीवा ते नियमा एगिंदिया बेंदिया तेइंदिया चउरिंदिया पंचेंदिया अनिंदिया।*

*जे जीवदेसा ते नियमा एगिंदियदेसा जाव अनिंदियदेसा, जे जीवपदेसा ते नियमा एगिंदिय-पदेसा जाव अनिंदियपदेसा।*

*जे अजीवा ते दुविहा पन्नत्ता, तंजहा-रूवी य अरूवी य, जे रूवी ते चउव्विहा पन्नत्ता, तंजहा-खंधा खंधदेसा खंधपदेसा परमाणुपोग्गला, जे अरूवी ते पंचविहा पन्नत्ता, तंजहा-धम्मत्थिकाए नो धम्मत्थिकायस्स देसे धम्भत्थिकायस्स पदेसा अधम्मत्थिकाए नो अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पदेसा अद्धासमए।*

**वृ.** तत्र लोकालोकाकाशयोर्लक्षणमिदं–

॥१॥ "धर्म्मादीनां वृत्तिर्द्रव्याणां भवति यत्र तत्क्षेत्रम्।
तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम्॥ इति॥

'लोगागासे ण'मित्यादौ षट् प्रश्नाः, तत्र लोकाकाशेऽधिकरणे 'जीव'त्ति संपूर्णानि जीवद्रव्याणि 'जीवदेस'त्ति जीवस्यैव बुद्धिपरिकल्पिता द्व्यादयो विभागाः, 'जीवपएस'त्ति तस्यैव बुद्धिकृता एव प्रकृष्टा देशाः प्रदेशा, निर्विभागा भागा इत्यर्थः।

'अजीव'त्ति धर्मास्तिकायादयो, ननु लोकाकाशे जीवा अजीवाश्चेत्युक्ते तद्देशप्रेशास्तत्रोक्ता एव भवन्ति, जीवाद्यव्यतिरिक्तत्वाद्देशादीनां, ततो जीवाजीवग्रहणे किं देशादिग्रहणेनेति ?, नैवं, निरवयवा जीवादय इति मतव्यवच्छेदार्थत्वादस्येति, अत्रोत्तरं-

'गोयमा ! जीवावी'त्यादि, (जे जीवेत्यादि) अनेन चाद्यप्रश्नत्रयस्य निर्वचनमुक्तम्। अथान्त्यस्य प्रश्नत्रयस्य निर्वचनमाह-'रूवी य'त्ति मूर्त्ताः, पुद्गला इत्यर्थः, 'अरूवी य'त्ति अमूर्त्ताः, धर्मास्तिकायादय इत्यर्थः, 'खंध'त्ति परमाणुप्रचयात्मकाः स्कन्धाः 'स्कन्धदेशाः' द्व्यादयो विभागाः

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

'स्कन्धप्रदेशाः', तस्यैव निरंशा अंशाः 'परमाणुपुद्गलाः' स्कन्धभावमनापन्नाः परमाणव इति, ततो लोकाकाशे रूपिद्रव्यापेक्षया 'अजीवावि अजीवदेसावि अजीवपएसावि' इत्येतदर्थतः स्याद्, अणूनां स्कन्धानां चाजीवग्रहणेन ग्रहणात् ।

'जे अरूवी ते पंचविहे'त्यादि, अन्यत्रारूपिणो दशविधा उक्ताः, तद्यथा-आकाशास्तिकायस्तद्देशस्तप्रदेशश्चेत्येवं धर्माधर्मास्तिकायौ समयश्चेति दश, इह तु सभेदस्याकाशस्याधारत्वेन विवक्षितत्वात्तदाधेयाः सप्त वक्तव्या भवन्ति, न च तेऽत्र विवक्षिताः, वक्ष्यमाणकारणात्, ये तु विवक्षितास्तानाह-पञ्चेति, कथमित्याह –

'धम्मत्थिकाए'इत्यादि, इह जीवानां पुद्गलानां च बहुत्वादेकस्यापि जीवस्य पुद्गलस्य वा स्थाने सङ्कोचादितथाविधपरिणामवशाद्बहवो जीवाः पुद्गलाश्च तथा तद्देशास्तत्प्रदेशाश्च संभवन्तीतिकृत्वा जीवाश्च जीवदेशाश्च जीवप्रदेशाश्च, तथा रूपिद्रव्यापेक्षयाऽजीवाश्चाजीवदेशाश्चाजीवप्रदेशाश्चेति संगतम्, एकत्राप्याश्रये भेदवतो वस्तुत्रयस् सद्भावात्, धर्मास्तिकायादौ तु द्वितयमेव युक्तं, यतो यदा संपूर्णं वस्तु विवक्ष्यते तदा धर्मास्तिकायादीत्युच्यते, तदंशविवक्षायां तु तत्प्रदेशा इति, तेषामवस्थितरूपत्वात्, तद्देशकल्पना त्वयुक्ता, तेषामनवस्थितरूपत्वादिति, यद्यपि चानवस्थितरूपत्वं जीवादिदेशानामप्यस्ति तथाऽपि तेषामेकत्राश्रये भेदेन सम्भवः प्ररूपणाकारणम् इह तु तन्नास्तिधर्मास्तिकायादेरेकत्वादसङ्कोचादिधर्मकत्वाच्चेति, अत एव धर्मास्तिकायादिदेशनिषेधायाह ।

'नोधम्मत्थिकायस्स देसे' तथा 'नो अधम्मत्थिकायस्स देसे'त्ति ।

चूर्णिकारोऽप्याह-'अरूविणो दव्वा समुदयसद्देणं भन्नंति, नीसेसा, पएसेहिं वा नीसेसा भनिज्जा, नो देसेणं, तस्स अणवट्ठियप्पमाणत्तणओ, तेण न देसेण निद्देसो, जो पुण देससद्दो एएसु कओ सो सविसयगयववहारत्थं परदव्वफुसणादिगयववहारत्थं चे'ति, तत्र स्वविषये-धर्मास्तिकायादिविषये यो देशस्य व्यवहारो-यथा धर्मास्तिकायः स्वदेशेनोर्ध्वलोकाकाशं व्याप्नोतीत्यदिस्तदर्थं, तथा परद्रव्येण-उर्ध्वलोकाकाशादिना यः स्वस्य स्पर्शनादिगतो व्यवहारो यथोर्ध्वलोकाकाशेन धर्मास्तिकायस्य देशः स्पृश्यते इत्यादिस्तदर्थःमिति ।

'अद्धासमय'त्ति अद्धा-कालस्तल्लक्षणः समयः-क्षणोऽद्धासमयः, स चैक एव वर्त्तमानक्षणलक्षणः, अतीतानागतयोरसत्त्वादिति ।

कृतं लोकाकाशगतप्रश्नषट्कस्य निर्वचनम्, अथालोकाकाशं प्रति प्रश्नयन्नाह–

**मू. (१४६)** *अलोगागासे णं भंते ! किं जीवा ? पुच्छा तह चेव, गोयमा ! नो जीवा जाव नोअजीवप्पएसा एगे अजीवदव्वदेसे अगुरुयलहुए अनंतेहिं अगुरुयलहुयगुणेहिं संजुत्ते सव्वागासे अनंतभागूणे ।*

**वृ.** 'पुच्छा तह चेव'त्ति यथा लोकप्रश्ने, तथाहि-'अलोकाकासे णं भंते ! किं जीवा जीवदेसा जीवप्पएसा अजीवा अजीवदेसा अजीवप्पएस'त्ति ।

निर्वचनं त्वेषां षन्नामपि निषेधः, तथा 'एगे अजीवदव्वदेसे'त्ति अलोकाकाशस्य देशत्वं लोकालोकरूपाकाशद्रव्यस्य भागरूपत्वात् 'अगरुयलहुए'त्ति गुरुलघुत्वाव्यपदेश्यत्वात् 'अनंतेहिं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगुरुयलहुयगुणेहिं'ति 'अनन्तैः' स्वपर्यायपरपर्यायरूपैर्गुणैः, अगुरुलघुस्वभावैरित्यर्थः, 'सव्वागासे अनंतभागूणे'त्ति लोकाकाशस्यालोकाकाशापेक्षयाऽनन्तभागरूपत्वादिति।

**मू. (१४७)** *धम्मत्थिकाए णं भंते! के महालए पन्नत्ते?, गोयमा! लोए लोयमेत्ते लोयप्पमाणे लोयफुडे लोयं चेव फुसित्ता णं चिट्ठइ, एवं अहम्मत्थिकाए लोयागासे जीवत्थिकाए पोग्गलत्थिकाए पंचवि एक्काभिलावा।*

**वृ.** अथानन्तरोक्तान् धर्मास्तिकायादीन् प्रमाणतो निरूपयन्नाह-'केमहालए'त्ति लुप्तभावप्रत्ययत्वान्निर्देशस्य किं महत्त्वं यस्यासौ किमहत्त्वः?, 'लोए'त्ति लोकः, लोकप्रमितत्वाल्लोकव्यपदेशाद्वा, उच्यते च-"पंचत्थिकायमइयं लोयं"इत्यादि।

लोके चासौ वर्त्तते, इदं चाप्रश्नितमप्युक्तं, शिष्यहितत्वादाचार्यस्येति, 'लोकमात्रः' लोकपरिमाणः, स च किञ्चिन्न्यूनोऽपि व्यवहारतः स्यादित्यत आह-लोकप्रमाणः, लोकप्रदेशप्रमाणत्वात्तत्प्रदेशानां, स चान्योऽन्यानुबन्धेन स्थित इत्येतदेवाह- 'लोयफुडे'त्ति लोकेन-लोकाकाशेन सकलस्वप्रदेशैः स्पृष्टो लोकस्पृष्टः, तथा लोकमेव च सकलस्वप्रदेशैः स्पृष्ट्वा तिष्ठतीति।

पुद्गलास्तिकायो लोकं स्पृष्ट्वा तिष्ठतीत्यनन्तरमुक्तमिति स्पर्शनाऽधिकारादधोलोकादीनां धर्मास्तिकायादिगतां स्पर्शनां दर्शयन्निदमाह-

**मू. (१४८)** *अहेलोए णं भंते! धम्मत्थिकायस्स केवइयं फुसति?, गोयमा! सातिरेगं अद्धं फुसति।*

*तिरयलोए णं भंते! पुच्छा, गोयमा! असंखेज्जइभागं फुसइ।*

*उड्ढलोए णं भंते! पुच्छा, गोयमा! देसूनं अद्धं फुसइ॥*

**वृ.** 'सातिरेगं अद्धं'ति लोकव्यापकत्वाद्धर्मास्तिकायस्य सातिरेकसप्तरज्जुप्रमाणत्वाच्चाधोलोकस्य।

असंखेज्जइभागं'ति असङ्ख्यातयोजनप्रमाणस्य धर्मास्तिकायस्याष्टादशयोजनशतप्रमाणस्तिर्यग्लोकोऽसङ्ख्यातभागवर्त्तीति तस्यासावसङ्ख्येयभागं स्पृशतीति।

'देसोनं अद्धं'ति देशोनसप्तरज्जुप्रमाणत्वादूर्ध्वलोकस्येति।

**मू. (१४९)** *इमा णं भंते! रयणप्पभापुढवी धम्मत्थिकायस्स किं संखेज्जइभागं फुसति? असंखेज्जइभागं फुसइ? संखिज्जे भागे फुसति? असंखेज्जे भागे फुसति? सव्वं फुसति?, गोयमा! नो संखेज्जइभागं फुसति असंखेज्जइभागं फुसइ नो संखेज्जे नो असंखेज्जे नो सव्वं फुसति*

*इमीसे णं भंते! रयणप्पभाए पुढवीए घनोदही धम्मत्थिकायस्स पुच्छा, किं संखेज्जइभागं फुसति? जहा रयणप्पभा तहा धनोदहिघनवायतनुवाया।*

*इमीसे णं भंते! रयणप्पभाए पुढवीए उवासंतरे धम्मत्थिकायस्स किं संखेज्जतिभागं फुसति असंखेज्जइभागं फुसइ जाव सव्वं फुसइ?, गोयमा! संखेज्जइभागं फुसइ नो असंखेज्जइ भागं फुसइ नो संखेज्जे० नो असंखेज्जे० नो सव्वं फुसइ, उवासंतराइं सव्वाइं, जहा रयणप्पभाए पुढवीए वत्तव्वया भनिया एवं जाव अहेसत्तमाए, जंबूदीवाइया दीवा लवणसमुद्दाइया समुद्दा।*

*एवं सोहम्मे कप्पे जाव ईसिपब्भारापुढवीए, एते सव्वेऽवि असंखेज्जतिभागं फुसति, सेसा पडिसेहेयव्वा॥ एवं धम्मत्थिकाए, एवं लोयागासेवि, गाहा-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'इमा णं भंते' इत्यादि, इह प्रतिपृथिवि पञ्च सूत्रानि देवलोकसूत्रानि द्वादश ग्रैवेयकसूत्रानि त्रीनि अनुत्तरेषत्प्राग्भारासूत्रे द्वे एं द्विपञ्चाशत्सूत्रानि धर्मास्तिकायस्य किं सङ्ख्येयं भागं स्पृशन्तीत्याद्यभिलापेनावसेयानि, तत्रावकाशान्तरानि सङ्ख्येयभागं स्पृशन्ति, शेषास्त्वसङ्ख्येयभागमिति निर्वचनम्, एतान्येव सूत्राण्यधर्मास्तिकायलोकाकाशयोरिति ।

**मू. (१५०)** *पुढवोदहीधणतणुकप्पा गेवेज्जणुत्तरा सिद्धी ।*
*संखेज्जतिभागं अंतरेसु सेसा असंखेज्जा ॥*

**वृ.** इहोक्तार्थःसङ्ग्रहगाथा भावितार्थैवेति ॥

शतकं-२ उद्देशकः-१० समाप्तः

॥ १ ॥ श्रीपञ्चमाङ्गे गुरुसूत्रपिण्डे, शतं स्थितानेकशते द्वितीयम् ।
अनैपुणेनापि मया व्यचारि, सूत्रप्रयोगज्ञवचोऽनुवृत्त्या ॥ इति ॥

शतकं-२ समाप्तम्

**मुनिदीपरत्नसागरेण संशोधिता सम्पादिता अभयदेवसूरि विरचिता भगवतीअङ्गसूत्रे द्वितीय शतकस्य टीका परिसमाप्ता ।**

## शतकं-३

**वृ.** व्याख्यातं द्वितीयशतमथ तृतीयं व्याख्यायते, अस्य चायमभिसम्बन्धः-अनन्तरशतेऽस्तिकाया उक्ताः, इह तु तद्विशेषभूतस्य जीवास्तिकायस्य विविधधर्मा उच्यन्ते, इत्येवंसम्बन्धस्यास्य तृतीयशतस्योद्देशकार्थःसङ्ग्रहायेयं गाथा–

**मू. (१५१)** *केरिसविउव्वणा चमर किरिय जाणित्थि नगर पाला य ।*
*अहिवइ इंदियपरिसा ततियम्मि सए दसुद्देसा ॥*

**वृ.** तत्र 'केरिसविउव्वण' त्ति कीदृशी चमरस्य विकुर्वणाशक्तिरित्यादिप्रश्ननिर्वचनार्थः प्रथम उद्देशकः १, 'चमर' त्ति चमरोत्पाताभिधानार्थो द्वितीयः २, 'किरिय' त्ति कायिक्यादिक्रियाद्यर्थाभिधानार्थःस्तृतीयः ३, 'जाण' त्ति यानं देवेन वैक्रियं कृतं जानाति साधुरित्याद्यर्थःनिर्णयार्थःश्चतुर्थः ४, 'इत्थि' त्ति साधुर्बाह्यान् पुद्गलान् पर्यादाय प्रभुः स्त्र्यादिरूपानि वैक्रियानि कर्त्तुमित्याद्यर्थःनिर्णयार्थः पञ्चमः ५ ।

'नगर' त्ति वाराणस्यां नगर्यां कृतसमुदघातोऽनगारो राजगृहे रूपानि जानातीत्याद्यर्थःनिश्चयपरः षष्ठः ६, 'पाला य' त्ति सोमादिलोकपालचतुष्टयस्वरूपाभिधायकः सप्तमः ७, 'अहिवइ' त्ति असुरादीनां कति देवा अधिपतयः ? इत्याद्यर्थःपरोऽष्टमः, 'इंदिय' त्ति इन्द्रियविषयाभिधानार्थो नवमः ९, 'परिस' त्ति चमरपरिषदभिधानार्थो दशमः १० इति ।

तत्र कीदृशी विकुर्वणा ? इत्याद्यर्थःस्य प्रथमोद्देशकस्येदं सूत्रम्–

### –ः शतकं-३, उद्देशकः-१ :–

**मू. (१५२)** *तेणं कालेणं तेणं समएणं मोया नामं नगरी होत्था वन्नओ, तीसे णं मोयाए नगरीए बहिया उत्तरपुरच्छिमे दिसीभागे णं नंदणे नाम चेतिए होत्था, वन्नओ, तेणं कालेणं २ सामी समोसढे, परिसा निगच्छइ पडिगया परिसा, तेणं कालेणं तेणं समएणं समणस्स भगवओ*

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

*महावीरस्स दोच्चे अंतेवासी अग्गिभूतीनामं अनगारे गोयमगोत्तेणं सत्तुस्सेहे जाव पज्जुवासमाणे एवं वदासी –*

*चमरे णं भंते! असुरिंदे असुरराया के महिड्ढीए ? केमहज्जुत्तीए ? केमहाबले ? केमहायसे केमहासोक्खे ? केमहानुभागे ? केवइयं च णं पभू विउव्वित्तए ?, गोयमा ! चमरे णं असुरिंदे असुरराया महिड्ढीए जाव महानुभागे से णं तत्थ चोत्तीसाए भवणावाससयसहस्साणं चउसट्ठीए सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं जाव विहरइ, एवंमहिड्ढीए जाव महानुभागे।*

*एवतियं च णं पभू विउव्वित्तए से जहानामए-जुवती जुवाणे हत्थेणं हत्थे गेण्हेज्ज्ञा, चक्कस्स वा नाभी अरगाउत्ता सिया, एवामेव गोयमा ! चमरे असुरिंदे असुरराया वेउव्वियसमुग्घाएणं समोहणइ २ संखेज्जाइं जोयणाइं दंडं निसिरइ, तंजहा-रयणाणं जाव रिट्ठाणं अहाबायरे पोग्गले परिसाडेइ २ अहासुहुमे पोग्गले परियाएति २ दोच्चंपि वेउव्वियसमुग्धाएणं समोहणति २।*

*पभू णं गोयमा ! चमरे असुरिंदे असुरराया केवलकप्पं जंबूद्दीवं २ बहुहिं असुरकुमारेहिं देवेहिं देवीहि य आइन्नं वितिकिन्नं उवत्थडं संथडं फुडं अवगाढाअवगाढं करेत्तए। अदुत्तरं च णं गोयमा ! पभू चमरे असुरिंदे असुरराया तिरियमसंखेज्जे दीवसमुद्दे बहूहिं असुरकुमारेहिं देवेहिं देवीहि य आइन्ने वितिकिन्ने उवत्थडे संथडे फुडे अवगाढावगाढे करेत्तए।*

*एस णं गोयमा ! चमरस्स असुरिंदस्स असुररन्नो अयमेयारूवे विसए विसयमेत्ते वुइए नो चेव णं संपत्तीए विकुव्विंसु वा विकुव्वति वा विकुव्विस्सति वा।*

**वृ.** 'तेणं कालेण' मित्यादि सुगमं, नवरं 'केमहिड्ढिए' त्ति केन रूपेण महर्द्धिकः ? किरूपा वा महर्द्धिरस्येति किंमहर्द्धिकः, कियन्महर्द्धिक इत्यन्ये, 'सामानियसाहस्सीणं' ति समानया-इन्द्रतुल्या ऋद्धया चरन्तीति सामानिकाः 'तायत्तीसाए' त्ति त्रयस्त्रिंशतः 'तायत्तीसगाणं' ति मन्त्रिकल्पानां, यावत्करणादिदं दृश्यं 'चउण्हं लोगपालाणं पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अमियाहिवईणं चउण्हं चउसट्ठीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं चमरचंचारायहानिवत्थव्वाणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं आणाईसरसेणावच्चं कारेमाणे पालेमाणे महयाऽऽहयनट्टगीयवाइयतंतीतलताल-तुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे' त्ति तत्राधिपत्यम्-अधिपतिकर्म पुरोवर्त्तित्वम्-अधिपतिकर्म पुरोवर्त्तित्वम्-अग्रगामित्वं स्वामित्वं-स्वस्वामिभावं भर्तृत्वं-पोषकत्वम् आज्ञेश्वरस्य-आज्ञाप्रधानस्य सतो यत्सेनापत्यं तत्तथा तत्कारयन् अन्यैः पालयन् स्वयमिति तथा महता रवेणेति योगः।

'आहय' त्ति आख्यानकप्रतिबद्धानीति वृद्धाः, अथवा 'अहय' त्ति अहतानि-अव्याहतानि नाट्यगीतवादितानि, तथा तन्त्री-वीणा तलतालाः-हस्ततालाः तला वा-हस्ताः तालाः-कंसिकाः 'तुडिय' त्ति शेषतूर्यानि, तथा घनाकारो ध्वनिसाधर्म्यादयो मृदङ्गो-मर्दलः पटुना-दक्षपुरुषेण प्रवादित इत्येतेषां द्वन्द्वोऽत एषां यो रवः स तथा तेन 'भोग भोगाइं' ति भोगार्हान्शब्दादीन् 'एवंम-हिड्ढिए' त्ति एवं महर्द्धिक इव महर्द्धिकः इयन्महर्द्धिक इत्यन्ये।

'से जहानामए' इत्यादि, यथा युवतिं युवा हस्तेन हस्ते गृह्णाति, कामवशाद्गाढतरग्रहणतो निरन्तरहस्ताङ्गुलियतेत्यर्थः, दृष्टान्तान्तरमाह-'चक्कसे' त्यादि, चक्रस्य वा नाभि, किंभूता ?-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अरगउत्त' त्ति अरकैरायुक्ता-अभिविधिनाऽन्विता अरकायुक्ता 'सिय' त्ति 'स्यात्' भवेत् अथवाऽ-रका उत्तासिता-आस्फालिता यस्यां साऽरकोत्तासिता, 'एवमेव' त्ति निरन्तरतयेत्यर्थः प्रभुर्जम्बूद्वीपं बहुभिर्देवादिभिराकीर्णं कर्तुमिति योगः, वृद्धैस्तु व्याख्यातं-यथा यात्रादिषु युवतिर्यूनो हस्ते लग्ना-प्रतिबद्धा गच्छति बहुलोकप्रचिते देशे, एवं यानि रूपानि विकुर्व्वितानि तान्येकस्मिन् कर्त्तरि प्रतिबद्धानि, यथा वा चक्रस्य नाभिरेका बहुभिररकैः प्रतिबद्धा घना निश्छिद्रा, एवमात्मशरीरप्रतिबद्धैरसुरदेवैर्देवीभिश्च पूरयेदिति।

'वेउव्वियसमुग्धाएणं' ति वैक्रियकरणाय प्रयत्नविशेषेण 'समोहणइ' त्ति समुपहन्यते समुपहतो भवति समुपहन्ति वा-प्रदेशान् विक्षिपतीति। तत्स्वरूपमेवाह-'संखेज्जाइं' इत्यादि, दण्ड इव दण्डः-ऊर्ध्वाधआयतः शरीरबाहल्यो जीवप्रदेशकर्मपुद्गलसमूहः तत्र च विविधपुद्गलानादत्त इति दर्शयन्नाह-तद्यथा-'रत्नानां' कर्केतनादीनाम्, इह च यद्यपि रत्नादिपुद्गला औदारिका वैक्रिय-समुदघाते च वैक्रिया एव ग्राह्या भवन्ति तथाऽपीह तेषां रत्नादिपुद्गलानामिव सारताप्रतिपादनाय रत्नानामित्याद्युक्तं, तच्च रत्नानामिवेत्यादि व्याख्येयम्, अन्ये त्वाहुः-औदारिका अपि ते गृहिताः सन्तो वैक्रियतया परिणमन्तीति, यावत्करणादिदं दृश्यम्-'वइराणं वेरुलियाणं लोहियक्खाणं मसारगल्लाणं हंसगब्भाणं पुलयाणं सोगंधियाणं जोतीरसाणं अंकाणं अंजणाणं रयणाणं जायरूवाणं अंजणपुलयाणं फलियाणं' ति, किम्?

अत आह-'अहाबायरे' त्ति यथाबादरान्-असारान् पुद्गलान् परिशातयति दण्डनिस-र्गगृहीतान्, यच्चोक्तं प्रज्ञापनाटीकायां 'यथास्थूलान् वैक्रियशरीरनामकर्मपुद्गलान् प्राग्बद्धान् शातयती' ति तत्समुदघातशब्दसमर्थःनार्थःमनाभोगिकं वैक्रियशरीरकर्मनिर्जरणमाश्रित्येति, 'अहासुहुमे' त्ति यथासूक्ष्मान् सारान् 'परियाएति' पर्यादत्ते, दण्डनिसर्गगृहीतान् सामस्त्येनादत्त इत्यर्थः, 'दोच्चंपि' त्ति द्वितीयमपि वारं समुद्घातं करोति, चिकीर्षितरूपनिर्माणार्थं, ततश्च 'पभु' त्ति समर्थः 'केवलकप्पं' ति केवलः-परिपूर्णं कल्पत इति कल्पः-स्वकार्यकरणसामर्थ्योपेतस्ततः कर्म-धारयः, अथवा 'केवलकल्पः' केवलज्ञानसदृशः परिपूर्णतासाधर्म्यात्, संपूर्णपर्यायो वा केवलकल्प इतिशब्दः। 'आइन्न' मित्यादय एकार्था अत्यन्तव्याप्तिदर्शनायोक्ताः।

'अदुत्तरं च णं' ति अथापरं च, इदं च सामर्थ्यातिशयवर्णनं 'विसए' त्ति गोचरो वैक्रियकरण-शक्तेः, अयं च तत्करणयुक्तोऽपि स्यादित्यत आह-'विउव्विसु वा' विकुर्वितवान् विकुर्वति वा विकुर्विष्यति वा, विकुर्व इत्ययं धातुः सामयिकोऽस्ति, विकुर्वणेत्यादिप्रयोगदर्शनादिति।

**मू. (१५३)** *जति णं भंते! चमरे असुरिंदे असुरराया एमहिड्डीए जाव एवइयं च णं पभू विकुव्वित्तए, चमरस्स णं भंते! असुरिंदस्स असुररन्नो सामानिया देवा केमहिड्डीया जाव केवतियं च णं पभू विकुव्वित्तए?, गोयमा! चमरस्स असुरिंदस्स असुररन्नो सामानिया देवा महिड्डिया जाव महानुभागा, ते णं तत्थ साणं २ भवणाणं साणं २ सामानियाणं साणं २ अग्गमहिसीणं जाव दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति।*

*एवंमहिड्डीया जाव एवइयं च णं पभू विकुव्वित्तए, से जहानामए-जुवतिं जुवाणे हत्थेणं हत्थे गेण्हेज्जा चक्कस्स वा नाभी अरयाउत्ता सिया एवामेव गोयमा! चमरस्स असुरिंदस्स असुररन्नो एगमेगे सामानिए देवे वेउव्वियसमुग्घाएणं समोहणइ २ जाव दोच्चंपि वेउव्वियसमुग्घाएणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समोहणति २ पभू णं गोयमा ! चमरस्स असुरिंदस्स असुररन्नो एगमेगे सामानिए देवे केवलकप्पं जंबूद्दीवं २ बहूहिं असुरकुमारेहिं देवेहिं देवीहि य आइन्नं वितिकिन्नं उवत्थडं संथडं फुडं अवगाढावगाढं करेत्तए ।*

*अदुत्तरं च णं गोयमा ! पभू चमरस्स असुरिंदस्स असुररन्नो एगमेगे सामानियदेवे तिरियम-संखेज्जे दीवसमुद्दे बहूहिं असुरकुमारेहिं देवेहिं देवीहि य आइन्ने वितिकिन्ने उवत्थडे संथडे फुडे अवगाढावगाढे करेत्तए, एस णं गोयमा ! चमरस्स असुरिंदस्स असुररन्नो एगमेगस्स सामानियदेवस्स अयमेयारूवे विसए विसयमेत्ते बहुए नो चेव णं संपत्तीए विकुव्विंसु वा विकुव्वति वा विकुव्विस्संति वा । जति णं भंते ! चमरस्स असुरिंदस्स असुरन्नो सामानिया देवा एवंमहिड्डिया जाव एवतियं च णं पभू विकुव्वित्तए चमरस्स णं भंते ! असुरिंदस्स असुररन्नो तायत्तीसिया देवा केमहिड्डीया ? तायत्तीसिया देवा जहा सामानिया तहा नेयव्वा, लोयपाला तहेव, नवरं संखेज्जा दीवसमुद्दा भानियव्वा बहूहिं असुरकुमारेहिं २ आइन्ने जाव विउव्विस्संति वा । जति णं भंते ! चमरस्स असुरिंदस्स असुररन्नो लोगपाला देवा एवंमहिड्डीया जाव एवतियं च णं पभू विउव्वित्तए ।*

*चमरस्स णं भंते ! असुरिंदस्स असुरन्नो अग्गमहिसीओ देवीओ केमहिड्डीयाओ जाव केवतियं च णं पभू विकुव्वित्तए ?, गोयमा ! चमरस्स णं असुरिंदस्स असुररन्नो अग्गमहिसीओ महिड्डियाओ जाव महानुभागाओ, ताओ णं तत्थ साणं २ भवणाणं साणं २ सामानियसाहस्सीणं साणं २ महत्तरियाणं साणं २ परिसाणं जाव एमहिड्डियाओ अन्नं जहा लोगपालाणं अपरिसेसं । सेवं भंते ! २ त्ति ।*

**वृ.** 'नवरं संखेज्जा दीवसमुद्द'त्ति लोकपालादीनां सामानिकेभ्योऽल्पतरर्द्धिकत्वेनाल्प-तरत्वाद्वैक्रियकरणलब्धेरिति ।

***मू. (१५४)*** *भगवं दोच्चे गोयमे समणं भगवं महावीरं वंदइ नमंसइ २ जेणेव तच्चे गोयमे वायुभूतिअनगारे तेणेव उवागच्छति २ तच्चं गोयमं वायुभूतिं अनगारं एवं वदासि-एवं खलु गोयमा ! चमरे असुरिंदे असुरराया एवंमहिड्डीए तं चेव एवं सव्वं अपुट्ठवागरणं नेयव्वं अपरिसेसियं जाव अग्गमहिसीणं वत्तव्वया समत्ता ।*

*तए णं से तच्चे गोयमे वायुभूती अनगारे दोच्चस्स गोयमस्स अग्गिभूइस्स अनगारस्स एवमाइक्खमाणस्स भा० प० परू० एयमट्ठं नो सद्दहइ नो पत्तियइ नो रोयइ एयमट्ठं असद्दहमाणे अपत्तियमाणे अरोएमाणे उट्ठाए उट्ठेइ २ जेणेव समणे भगवं महावीरे तेणेव उवागच्छि जाव पज्जुवासमाणे एवं वयासी-एवं खलु भंते ! दोच्चे गोयमे अग्गिभूतिअनगारे मम एवमातिक्खइ भासइ पन्नवेइ परूवेइ-एवं खलु गोयमा ! चमरे असुरिंदे असुरराया महिड्डीए जाव महानुभावे से णं तत्थ चोत्तीसाए भवणावाससयसहस्साणं एवं तं चेव सव्वं अपरिसेसं भानियव्वं जाव अग्गमहिसीणं वत्तव्वया समत्ता, से कहमेयं भंते ! ?*

*—एवं गोयमादि समणे भगवं महावीरे तच्चं गोयमं वाउभूतिं अनगारं एवं वदासि-जन्नं गोयमा ! दोच्चे गो० अग्गिभूइअनगारे तव एवमातिक्खइ ४-एवं खलु गोयमा ! चमरे ३ महिड्डिए एवं तं चेव सव्वं जाव अग्गमहिसीणं वत्तव्वया समत्ता, सच्चे णं एसमट्ठे, अहंपि णं गोयमा ! एवमातिक्खामि भा० प० परू०, एवं खलु गोयमा !-चमरे ३ जाव महिड्डिए सो चेव बितिओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गमो भानियव्वो जाव अग्गमहिसीओ, सच्चे णं एसमट्ठे, सेव भंते २, तच्चे गोयमे ! वायुभूती अनगारे समणं भगवं महावीरं वंदइ नमंसइ २ जेणेव दोच्चे गोयमे अग्गिभूती अनगारे तेणेव उवागच्छइ २ दोच्चं गो० अग्गिभूतिं अनगारं वंदइ नमंसति २ एयमट्ठं सम्मं विनएणं भुज्जो २ खामेति ।

**वृ.** 'अपुट्ठवागरणं'ति अपृष्टे सति प्रतिपादनं ।

**मू. (१५५)** तए णं से तच्चे गोयमे वाउभूति अनगारे दोच्चेणं गोयमेणं अग्गिभूतीनामेणं अनगारेणं सद्धिं जेणेव समणे भगवं महावीरे जाव पज्जुवासमाणे एवं वयासि-जति णं भंते ! चमरे असुरिंदे असुराया एवंमहिड्ढीए जाव एवतियं च णं पभू विकुव्वित्ते बली णं भंते ! वइरोयणिंदे वइरोयणराया केमहिड्ढीए जाव केवइयं च णं पभू विकुव्वित्तए ?

गोयमा ! बली णं वइरोयणिंदे वइरोयणराया महिड्ढीए जाव महानुभागं, से णं तत्थ तीसाए भवणावाससयसहस्साणं सट्ठीए सामानियसाहस्सीणं सेसं जहा चमरस्स तहा बलियस्सवि नेयव्वं, नवरं सातिरेगं केवलकप्पं जंबूद्दीवंति भानियव्वं, सेसं तं चेव निरवसेसं नेयव्वं, नवरं नाणत्तं जानियव्वं भवणेहिं सामानिएहिं, सेवं भंते २ त्ति तच्चे गोयमे वायुभूति जाव विहरति ।

भंते त्ति भगवं दोच्चे गोयमे अग्गिभूतीअनगारे समणं भगवं महावीरं वंदइ २ एवं वदासी-जइ णं भंते ! बली वइरोयणिंदे वइरोयणराया एमहिड्ढीए जाव एवइयं च णं पभू विकुव्वित्तए धरणे णं भंते ! नागकुमारिंदे नागकुमारराया केमहिड्ढीए जाव केवतियं च णं पभू विकुव्वित्तए

गोयमा ! धरणेणं नागकुमारिंदे नागकुमारराया एमहिड्ढीए जाव से णं तत्थ चोयालीसाए भवणावाससयसहस्साणं छण्हं सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं छण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं चउवीसाए आयरक्खदेवसाहस्सीणं अन्नेसिं च जाव विहरइ, एवतियं च णं पभू विउव्वित्तए से जहानामए-जुवतिं जुवाणे जाव पभू केवलकप्पं जंबूदीवं २ जाव तिरियं संखेज्जे दीवसमुद्दे बहूहिं नागकुमारीहिं जाव विउव्विस्संति वा ।

सामानिया तायत्तीसलोगपालग्ग महिसीओ य तहेव जहा चमरस्स, एवं धरणे णं नागकुमारराया महिड्ढिए जाव एवतियं जहा चमरे तहा धरणेवि, नवरं संखेज्जे दीवसमुद्दे भानियव्वं, एवं जाव थनियकुमारा वाणमंतरा जोइसियावि, नवरं दाहिनिल्ले सव्वे अग्गिभूती पुच्छति, उत्तरिल्ले सव्वे वाउभूति पुच्छइ, भंतेत्ति भगवं दोच्चे गोयमे अग्गिभूती अनगारे समणं भगवं म० वंदति नमंसति २ एवं वयासी-जति णं भंते ! जोइसिंदे जोतिसराया एवंमहिड्ढीए जाव एवतियं च णं पभू विकुव्वित्तए सक्के णं भंते ! देविंदे देवराया केमहिड्ढीए जाव केवतियं च णं पभू विउव्वित्तए

गोयमा ! सक्के णं देविंदे देवराया महिड्ढीए जाव महानुभागे, से णं तत्थ बत्तीसाए विमाणावाससयसहस्साणं चउरासीए सामानियसाहस्सीणं जाव चउण्हं चउरासीणं आयरक्ख(देव)साहस्सीणं अन्नेसिं च जाव विहरइ, एवंमहिड्ढीए जाव एवतियं च णं पभू विकुव्वित्तए, एवं जहेव चमरस्स तहेव भानियव्वं, नवरं दो केवलकप्पे जंबूद्दीवे २ अवसेसं तं चेव, एस णं गोयमा ! सक्कस्स देविंदस्स देवरन्नो इमेयारूवे विसए विसयमेत्ते णं बुइए नो चेव णं संपत्तीए विउव्विंसु वा विउव्वति वा विउव्विस्सति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'वइरोयणिंदे'त्ति दाक्षिणात्यासुरकुमारेभ्यः सकाशाद्विशिष्टं रोचनं-दीपनं येषामस्ति ते वैरोचना-औदीच्यासुरास्तेषु मध्ये इन्द्रः-परमेश्वरो वैरोचनेन्द्रः।

'साइरेगं केवलकप्पं'ति औदीच्येन्द्रत्वेन बलेर्विशिष्टतरलब्धिकत्वादिति। 'एवं जाव थनियकुमार'त्ति धरणप्रकरणमिव भूतानन्दादिमहाघोषान्तभवनपतीन्द्रप्रकरणान्यध्येयानि, तेषु चेन्द्रनामान्येतद्‌गाथानुसारतो वाच्यानि-

॥१॥ "चमरे १ धरणे २ तह वेणुदेव ३ हरिकंत ४ अग्गिसीहे य ५।
पुन्ने ६ जलकंतेवि य ७ अमिय ८ विलंबे य ९ घोसे य १०॥

-एते दक्षिणनिकायेन्द्राः, इतरे तु-

"बलि १ भूयानंदे २ वेणुदालि ३ हरिसह ४ ऽग्गिमानव ५ वसिट्ठे ६।
जलप्पभे ७ अमियवाहणे ८ पभंजण ९ महाघोसे १०॥

एतेषां च भवनसङ्ख्या "चउतीसा १ चउचत्ता २" इत्यादिपूर्वोक्तगाथाद्वयदवसेया, सामानिकात्मरक्षसङ्ख्या चैवम्-

॥१॥ "चउसट्ठी सट्ठी खल छच्च सहस्सा उ असुरवज्जाणं।
सामानिया उ एए चउग्गुणा आयरक्खा उ॥

अग्रमहिष्यस्तु प्रत्येकं धरणादीनां षट्, सूत्राभिलापस्तु धरणसूत्रवत्कार्यः, 'वाणमंतर-जोइसियावि'त्ति व्यन्तरेन्द्रा अपि धरणेन्द्रवत्सपरिवारा वाच्याः, एतेषु च प्रतिनिकायं दक्षिणोत्तरभेदेन द्वौ द्वौ इन्द्रौ स्यातां, तद्यथा-

॥१॥ "काले य महाकाले १ सुरूव पडिरूव २ पुन्नभद्दे य।
अमरवइ मानिभद्दे ३ भीमे य तहा महाभीमे ४॥

॥२॥ किंनर किंपुरिसे ५ खलु सप्पुरिसे चेव तह महापुरिसे ६।
अइकाय महाकाए ७ गीयरई चेव गीयजसे ८॥

एतेषां ज्योतिष्काणां च त्रायस्त्रिंश लोकपालाश्च न सन्तीति ते न वाच्याः, सामानिकास्तु चतुःसहस्रसङ्ख्याः, एतच्चतुर्गुणाश्चात्मरक्षा अग्रमहिष्यश्चतस्र इति, एतेषु च सर्वेष्वपि दाक्षिणात्या-निन्द्रानादित्यं चाग्निभूति पृच्छति। उदीच्यांश्चन्द्रं च वायुभूति।

तत्र च दाक्षिणात्येष्वादित्ये च केवलकल्पं जम्बूद्वीपं संस्तृतमित्यादि, औदीच्येषु च चन्द्रे च सातिरेकं जम्बूद्वीपमित्यादि च वाच्यं, यच्चेहाधिकृतवाचनायामसूचितमपि व्याख्यातं तद्वाचनान्तर- मुपजीव्येति भावनीयमिति, तत्र कालेन्द्रसूत्राभिलाप एवम्-

'काले णं भंते! पिसाइंदे पिसायराया केमहिड्डीए ६ केवइयं च णं पभू विउव्वित्तए?, गोयमा! काले णं महिड्डीए ६ से णं तत्थ असंखेज्जाणं नगरवाससयसहस्साणं चउण्हं सामानियसाह-स्सीणं सोलसण्हं आयरक्खदेवसाहस्सीणं चउण्हं अग्गमहिसीणं सपरिवाराणं अन्नेसिं च बहूणं पिसायाणं देवाणं देवीण य आहेवच्चं जाव विहरइ, एवंमहिड्डिए ६ एवतियं च णं पभू विउव्वित्तए जाव केवलकप्पं जंबूद्दीवं २ जाव तिरियं संखेज्जे दीवसमुद्दे'इत्यादि, शक्रप्रकरणे 'जाव चउण्हं चउरासीण'मित्यत्र यावत्करणादिदं दृश्यम्-'अट्ठण्हं अग्गमहिसीणं सपरिवाराणं चउण्हं लोगपालाणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं'ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्रस्य विकुर्वणोक्ता, अथ तत्सामानिकानां सा वक्तव्या, तत्र च स्वप्रतीतं सामानिकविशेषमाश्रित्य तच्चरितानुवादस्तान् प्रश्नयन्नाह-

**मू. (१५६)** *जइ णं भंते ! सक्के देविंदे देवराया एवमहिड्ढीए जाव तवतियं च णं पभू विकुव्वित्तए।*

*एवं खलु देवाणुप्पियाणं अंतेवासी तीसए नामं अनगारे पगतिभद्दए जाव विनीए छट्ठंछट्ठेणं अनिक्खित्तेणं तवोकम्मेणं अप्पाणं भावेमाणे बहुपडिपुन्नाइं अट्ठ संवच्छराइं सामन्नपरियागं पाउनित्ता मासियाए संलेहणाए अत्ताणं झूसेत्ता सट्ठिं भत्ताइं अनसणाए छेदेत्ता आलोतियपडिक्कंते समाहिपत्ते कालमासे कालं किच्चा सोहम्मे कप्पे सयंसि विमाणंसि उववायसभाए देवसयनिज्जंसि देवदूसंतरिए अंगुलस्स असंखेज्जइभागमेत्ताए ओगाहणाए सक्कस्स देविंदस्स देवरन्नो सामानियदेवत्ताए उववन्ने, तए णं तीसए देवे अहुणोववन्नमेत्ते समाणे पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ, तंजहा-आहारपज्जत्तीए सरीर० इंदिय० आणुपाणुपज्जत्तीए भासामणपज्जत्तीए, तए णं तं तीसयं देवं पंचविहाए पज्जत्तीए पज्जत्तिभावं गयं समाणं सामानियपरिसोववन्नया देवा करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु जएणं विजएणं वद्धाविंति २ एवं वदासि –*

*अहो णं देवाणुप्पिए ! दिव्वा देविड्ढी दिव्वा देवजुत्ती दिव्वे देवानुभावे लद्धे पत्ते अभिसमन्नागते, जारिसिया णं देवाणुप्पिएहिं दिव्वा देविड्ढी दिव्वा देवजुत्ती दिव्वे देवानुभावे लद्धे पत्ते अभिसमन्नागते तारिसिया णं सक्केणं देविंदेणं देवरन्ना दिव्वा देविड्ढी जाव अभिसमन्नागया,*

*जारिसिया णं सक्केणं देविंदेणं देवरन्ना दिव्वा देविड्ढी जाव अभिसमन्नागया तारिसिया णं देवाणुप्पिएहिं दिव्वा देविड्ढी जाव अभिसमन्ना गया।*

*से णं भंते ! तीसए देवे केमहिड्ढीए जाव केवतियं च णं पभू विउव्वित्तए ?, गोयमा ! महिड्ढीए जाव महानुभागे, से णं तत्थ सयस्स विमाणस्स चउण्हं सामानियसाहस्सणं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं वेमानियाणं देवाण य देवीण य जाव विहरति, एवंमहिड्ढीए जाव एवइयं च णं पभू विउव्वित्तए, से जहानामए जुवतिं जुवाणे हत्थेणं हत्थे गेण्हेज्जा जहेव सक्कस्स तहेव जाव एस णं गोयमा ! तीसयस्स देवस्स अयमेयारूवे विसए विसयमेत्ते बुइए नो चेव णं संपत्तीए विउव्विंसु वा ३।*

*जति णं भंते ! तीसए देवे महिड्ढीए जाव एवइयं च णं पभू विउव्वित्तए सक्कस्स णं भंते ! देविंदस्स देवरन्नो एगमेगस्स सामानियस्स देवस्स इमेयारूवे विसयमेत्ते बुइए नो चेव णं संपत्तीए विउव्विंसु वा विउव्विंति वा विउव्विस्संति वा तायत्तीसा य लोगपालअग्गमहिसीणं जहेव चमरस्स नवरं दो केवलकप्पे जंबूद्दीप्पे जंबूद्दीवे २ अन्नं तं चेव।*

*सेवं भंते २ त्ति दोच्चे गोयमे जाव विहरति।*

*जति णं भंते ! देविंदे महिड्डीए जाव अनुपरियट्टित्ता णं गेण्हित्तए कम्हा णं भंते ! सक्केणं देविंदे णं देवरन्ना चमरे असुरिंदे असुरराया नो संचातिए साहत्थिं गेण्हित्तए ?, गोयमा ! असुरकुमाराणं देवाणं अहे गतिविसए सीहे २ चेव तुरिए २ चेव उड्ढं गतिविसए अप्पे २ चेव मंदे मंदे चेव वेमानियाणं देवाणं उड्ढं गतिविसए सीहे २ चेव तुरिए २ चेव अहे गतिविसए अप्पे २ चेव मंदे २ चेव, जावतियं खेत्तं सक्के देविंदे देवराया उड्ढं उप्पयति एक्केणं समएणं तं वज्जे दोहिं, जं वज्जे दोहिं तं चमरे तिहिं, सव्वत्थोवे सक्कस्स देविंदस्स देवरन्नो उड्ढलोयकंडए अहेलोयकंडए संखेज्जगुणे, जावतियं खेत्तं चमरे असुरिंदे असुरराया अहे ओवयति एक्केणं समएणं तं सक्के दोहिं जं सक्के दोहिं तं वज्जे तिहिं, सव्वत्थोवे समरस्स असुरिंदस्स असुररन्नो अहेलोयकंडए उड्ढलोयकंडए संखेज्जगुणे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एवं खलु गोयमा ! सक्केणं देविंदेणं देवरन्ना चमरे असुरिंदे असुरराया नो संचातिए साहत्थिं गेण्हित्तए।*

*सक्कस्स णं भंते ! देविंदस्स देवरन्नो उड्ढं अहे तिरियं च गतिविसयस्स कयरे २ हिंतो अप्पे वा बहुए वा तुल्ले वा विसेसाहिए वा ?, गोयमा ! सव्वत्थोवं खेत्तं सक्के देविंदे देवराया अहे ओवयइ एक्केणं समएणं तिरियं संखेज्जे भागे गच्छइ उड्ढं संखेज्जे भागे गच्छइ।*

*चमरस्स णं भंते ! असुरिंदस्स असुररन्नो उड्ढं अहे तिरियं च गतिविसयस्स कयरे २ हिंतो अप्पे वा बहुए वा तुल्ले वा विसेसाहिए वा ?, गोयमा ! सव्वत्थोवं खेत्तं चमरे असुरिंदे असुरराया उड्ढं उप्पयति एक्केणं समएणं तिरयंसंखेज्जे भागे गच्छइ अहे संखेज्जे भागे गच्छइ, वज्जं जहा सक्कस्स देविंदस्स तहेव नवरं विसेसाहियं कायव्वं ॥*

*सक्कस्स णं भंते ! देविंदस्स देवरन्नो ओवयणकालस्स य उप्पयणकालस्स य कयरे२ हिंतो अप्पे वा बहुए वा तुल्ले वा विसेसाहिए वा ?, गोयमा ! सव्वत्थोवे सक्कस्स देविंदस्स देवरन्नो उड्ढं उप्पयणकाले ओवयणकाले संखेज्जगुणे।*

*चमरस्सवि जहा सक्कस्स नवरं सव्वत्थोवे ओवयणकाले उप्पयणकाले संखेज्जगुणे।*

*वज्जस्स पुच्छा, गोयमा ! सव्वत्थोवे उप्पयणकाले ओवयणकाले विसेसाहिए ॥ एयस्स णं भंते ! वज्जस्स वज्जाहिवइस्स चमरस्स य असुरिंदस्स असुररन्नो ओवयणकालस्स य उप्पयणकालस्स य कयरेरहिंतो अप्पेवा ४ ?, गोयमा ! सक्कस्स य उप्पयणकाले चमरस्स य ओवयणकाले एए णं दोन्निवि तुल्ला सव्वत्थोवा, सक्कस्स य ओवयणकाले वज्जस्स य उप्पयणकाले एस णं दोण्हवि तुल्ले संखेज्जगुणे चमरस्स उ उप्पयणकाले वज्जस्स य ओवयणकाले एसणं दोण्हवि तुल्ले विसेसाहिए।*

**वृ.** 'भंते !' इत्यादि, 'सीहे'त्ति शीघ्रो वेगवान्, स च शीघ्रगमनशक्तिमात्रापेक्षयाऽपि स्यादत आह-'सीहगई चेव'त्ति शिघ्रगतिरेव नाशीघ्रगतिरपि, एवंभूतश्च कायापेक्षयाऽपि स्यादत आह-'तुरिय'त्ति त्वरितः-त्वरावान्, स च गतेरन्यत्रापि स्यादित्यत आह-'तुरियगइ'त्ति 'त्वरितगति' मानसौत्सुक्यप्रवर्तितवेगवद्गतिरिति, एकार्था वैते शब्दाः 'संचाइए'त्ति शकितः 'साहत्थि'न्ति स्वहस्तेन।

'गइविसए'त्ति, इह यद्यपि गतिगोचरभूतं क्षेत्रं गतिविषयशब्देनोच्यते तथाऽपि गतिरेवेह गृह्यते, शीघ्रादिविशेषणानां क्षेत्रेऽयुज्यमानत्वादिति, 'सीहे'त्ति शीघ्रो वेगवान्, स चानैकान्तिकोऽपि स्यादत आह-'सीहे चेव'त्ति शीघ्र एव, एतदेव प्रकर्षवृत्तिप्रतिपादनाय पर्यायान्तरेणाह-त्वरितस्त्वरितश्चैवेति, 'अप्पे अप्पे चेव'त्ति अतिशयेनाल्पोऽतिस्तोक इत्यर्थः, 'मंदे मंदे चेव'त्ति अत्यन्तमन्दः, एतेन च देवानां गतिस्वरूपमात्रमुक्तम् ॥

एतस्मिंश्च गतिस्वरूपे सति शक्रवज्रचमराणामेकमाने ऊर्ध्वादौ क्षेत्रे गन्तव्ये यः कालभेदो भवति तं प्रत्येकंदर्शयन्नाह- 'जावइय'मित्यादि, अथेन्द्रस्योर्ध्वाधः क्षेत्रगमने कालभेदमाह-'सव्वत्थोवे सक्कस्से'त्यादि, 'सर्वस्तोकं' स्वल्पं शक्रस्य उर्ध्वलोकगमने कण्डकं-कालखण्डं ऊर्ध्वलोक-कण्डकं ऊर्ध्वोकगमनेऽतिशीघ्रत्वात्तस्य, अधोलोकगमने कण्डकं-कालखण्डमधोलोककण्डकं सङ्ख्यातगुणं, ऊर्ध्वलोककण्डकापेक्षया द्विगुणमित्यर्थः, अधोलोकगमने शक्रस्य मन्दगतित्वात्, द्विगुणत्वं च 'सक्कस्स उप्पयणकाले चमरस्स य ओवयणकाले एए णं दोन्निवि तुल्ला' तथा 'जावतियं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खेत्तं चमरे ३ अहे ओवयइ इक्केणं समएणं तं सक्को दोहिं' ति वक्ष्यमाणवचनद्वयसामर्थ्याल्लभ्यमिति, 'जावइय' मित्यादिसूत्रद्वयमधःक्षेत्रापेक्षं पूर्ववद्व्याख्येयं, 'एवं खलु' इत्यादि च निगमनम्।

अथ शक्रादीनां प्रत्येकं गतिक्षेत्रस्याल्पबहुत्वोपदर्शनाय सूत्रत्रयमाह- 'सक्कस्से'त्यादि, तत्र ऊर्द्धमधस्तिर्यक् च यो गतिविषयो-गतिविषयभूतं क्षेत्रमनेकविधं तस्य मध्ये कतरो गतिविषयः कतरस्मादतिविषयात्सकाशादल्पादि? इति प्रश्नः, उत्तरं तु सर्वस्तोकमधःक्षेत्रं समयेनावपतति, अधो मन्दगतित्वाच्छक्रस्य, 'तिरियं संखेज्जे भागे गच्छइ' त्ति कल्पनया किलैकेन समयेन योजनमधो गच्छति शक्रः, तत्र च योजने द्विधाकृते द्वौ भागौ भवतः, तयोश्चैकस्मिन् द्विभागे मीलिते त्रयः सङ्ख्येया भागा भवन्ति अतस्तान् तिर्यग् गच्छति, सार्द्ध योजनमित्यर्थः, तिर्यग्गतौ तस्य शीघ्रगतित्वात्, 'उड्ढं संखेज्जे भागे गच्छइ' त्ति यान् किल कल्पनया त्रीन् द्विभागांस्तिर्यग्गच्छति तेषु चतुर्थेऽन्यस्मिन् द्विभागे मीलिते चत्वारो द्विभागरूपाः सङ्ख्यातभागाः संभवन्ति अतस्तानूर्द्धं गच्छति। अथ कथं सूत्रे सङ्ख्यातभागमात्रग्रहणे सतीदं नियतभागव्याख्यानं क्रियते?,

उच्यते, 'जावइयं खेत्तं चमरे ३ अहे ओवयइ एक्केणं समएणं तं सक्के दोहिं', तथा 'सक्कस्स उप्पयणकाले चमरस्स ओवयणकाले एते णं दोन्निवि तुल्ला' इति वचनतो निश्चीयते शक्रो यावदधो द्वाभ्यां समयाभ्यां गच्छति तावदूर्द्धमेकेनेति द्विगुणमधःक्षेत्रादूर्ध्वक्षेत्रं, एतयोश्चापान्तरालवर्त्ति तिर्यक्- क्षेत्रमतोऽपान्तरालप्रमाणेनैव तेन भवितव्यमित्यधःक्षेत्रापेक्षया तिर्यक्क्षेत्रं सार्द्ध योजनं भवतीति व्याख्यातं, आह च चूर्निकारः-'एगेणं समएणं ओवयइ अहे जोयणं एगेणेव समएणं तिरियं दिवड्ढं गच्छइ उड्ढं दो जोयणानि सक्को' त्ति।

'चमरस्स ण' मित्यादि 'सव्वत्थोवं खेत्तं चमरे ३ उड्ढं उप्पयइ एक्केणं समएणं' ति, ऊर्ध्वगतौ मन्दगतित्वात्तस्य, तच्च किल कल्पनया त्रिभागन्यूनं गव्यूतत्रयं, 'तिरियं संखेज्जे भागे' त्ति तस्मिन्नेव पूर्वोक्ते त्रिभागन्यूनगव्यूतत्रये द्विगुनिते ये योजनस्य सङ्ख्येया भागा भवन्ति तान् गच्छति, तिर्यग्गतौ शीघ्रतरगतित्वात्तस्य, 'अहे संखेज्जे भागे गच्छइ' ति पूर्वोक्ते त्रिभागद्वयन्यूने गव्यूतषट्के त्रिभागन्यूनगव्यूतत्रये मीलिते य सङ्ख्येयभागा भवन्ति तान् गच्छति, योजनद्वयमित्यर्थः

अथ कथं सङ्ख्यातभागमात्रोपादाने नियतसङ्ख्येयभागत्वं व्याख्यायते?, उच्यते, शक्रस्योर्द्धगतेश्चमरस्य चोधोगतेः समत्वमुक्तं, शक्रस्य चोर्द्धगमनं समयेन योजनद्वयरूपं कल्पितमतश्चमरस्याधोगमनं समयेन योजनद्वयमुक्तं, तथा 'जावइयं सक्के ३ उड्ढं उप्पयइ एगेमं समएणं तं वज्जं दोहिं जं वज्जं दोहिं तं चमरे तिहिं' ति वचनसामर्थ्यात् प्रतीयते शक्रस्य यदूर्ध्वं गतिक्षेत्रं तस्य त्रिभागमात्ररूपं चमरस्योर्द्धगतिक्षेत्रमतो व्याख्यातं त्रिभागन्यूनत्रिगव्यूतमानं तदिति, ऊर्ध्वक्षेत्राधोगतिक्षेत्रयोश्चापानतरालवर्त्ति तिर्यक्क्षेत्रमितिकृत्वा त्रिभागद्वयन्यूनषडगव्यूतमानं तद्व्याख्यातमिति।

यच्च चूर्निकारेणोक्तं 'चमरो उड्ढं जोयण' मित्यादि तन्नावगतं, 'वज्जं जहा सक्कस्स तहेव' त्ति वज्रमाश्रित्य गतिविषयस्याल्पबहुत्वं वाच्यं यथा शक्रस्य तथैव, विशेषद्योतनार्थं त्वाह-'नवरं विसेसाहियं कायव्वं' ति, तच्चैवम्-'वज्जस्स णं भंते! उड्ढं अहे तिरियं च गइविसयस्स कयरे कयरेहिंतो अप्पे वा ४?, गोयमा! सव्वत्थोवं खेत्तं वज्जे अहे ओवयइ एक्केणं समएणं तिरियं विसेसाहिए भागे गच्छइ उड्ढं विसेसाहिए भागे गच्छइ' त्ति, वाचनान्तरे तु एतत्साक्षादेवोक्तमिति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यायमर्थः-सर्वस्तोकं क्षेत्रं वज्रमधो व्रजत्येकेन समयेन, अधो मन्दगतित्वात्तस्य वज्रस्यस, तच्च किल कल्पनया त्रिभागन्यूनं योजनं, तिर्यक् तच्च विशेषाधिकौ भागौ गच्छति, शीघ्रतरगतित्वात्

तौ च किल योजनस्य द्वौ त्रिभागौ विशेषाधिकौ सत्रिभागं गव्यूतत्रयमित्यर्थः, तथोर्ध्वं विशेषाधिकौ भागौ गच्छति, यौ किल तिर्यग्विशेषाधिकौ भागौ गच्छति तावेवोर्द्धगतौ किञ्चिद्विशेषाधिकौ, ऊर्द्धगतौ शीघ्रतरगतित्वात्परिपूर्णं योजनमित्यर्थः, अथ कथं सामान्यतो विशेषाधिकत्वेऽभिहिते नियतभागत्वं व्याख्यायते ?, उच्यते, 'जावइयं चमरे ३ अहे ओवयइ एक्केणं समएणं तावइयं सक्के दोहिं जं सक्के दोहिं तं वज्जे तिहिं'ति वचनसामर्थ्याच्छक्राधोगत्यपेक्षया वज्रस्य त्रिभागन्यूनाधोगतिर्लब्धेति त्रिभागन्यूनं योजनमिति सा व्याख्याता, तथा 'सक्कस्स ओवयणकाले वज्जस्स य उप्पयणकाले एस णं दोण्हवि तुल्ले' इति वचनादवसीयते यावदेकेन समयेन शक्रोऽधो गच्छति तावद्वज्रमूर्ध्व, शक्रश्चैकेनाधः किल योजनं एवं वज्रमूर्द्धं योजनमितिकृत्वोर्ध्वयोजनं तस्योक्तं, उर्ध्वाधोगत्योश्च तिर्यग्गतेरपान्तरालवर्तित्वात्तदपान्तरालवर्त्तेव सत्रिभागगव्यूतत्रयलक्षणं तिर्यग्गतिप्रमाणमुक्तमिति ।

अनन्तरं गतिविषयस्य क्षेत्रस्याल्पबहुत्वमुक्तं, अथ गतिकलस्य तदाह-'सक्कस्स ण'मित्यादि सूत्रत्रयं । सक्रादीनां गतिकालस्य प्रत्येकमल्पबहुत्वमुक्तं अथ परस्परापेक्षया तदाह-'एयस्स णं भंते! वज्जस्से'त्यादि, 'एए णं बिन्निवि तुल्ल'त्ति शक्रचमरयोः स्वस्थानगमनं प्रति वेगस्य समत्वादुत्पतनावपतनकालौ तयोस्तुल्यौ परस्परेण, 'सव्वत्थोव'त्ति वक्ष्यमाणापेक्षयेति, तथा 'सक्कस्से' त्यादौ 'एस णं दोण्हवि तुल्ले'त्ति उभयोरपि तुल्यः शक्रावपतनकालो वज्रोत्पातकालस्य तुल्यः वज्रोत्पातकालश्च शक्रावपतनकालस्य तुल्य इत्यर्थः, 'संखेज्जगुणे'त्ति शक्रोत्पातचमरावपातकालपेक्षया एवमनन्तरसूत्रमपि भावनीयम् ॥

*मू. (१७६) तए णं चमरे असुरिंदे असुरराया वज्ज भयविप्पमुक्के सक्केणं देविंदेणं देवरन्ना महया अवमाणेणं अवमानिए समाणे चमरचंचाए रायहाणीए सभाए सुहम्माए चमरंसि सीहासणंसि ओहयमणसंकप्पे चिंतासोयसागरसंपविट्ठे करयलपल्हत्थमुहे अट्टज्झाणोवगए भूमिगयदिट्ठीए झियाति, तते णं तं चमरं असुरिंदं असुररायं सामानियपरिसोववन्नया देवा ओहयमणसंकप्पं जाव झियायमाणं पासंति २ करयल जाव एवं वयासि-*

*किण्णं देवाणुप्पिया ! ओहयमणसंकप्पा जाव झियायह ? तए णं से चमरे असुरिंदे असुर० ते सामानियपरिसोववन्नएए देवे एवं वयासी-एवं खलु देवाणुप्पिया ! मए समणं भगवं महावीरं नीसाए सक्के देविंदे देवराया सयमेव अच्चासादिए, तए णं तेणं परिकुविएणं समाणेणं ममं वहाए वज्जे निसिट्ठे तं भद्दन्नं भवतु देवाणुप्पिया ! समणस्स भगवओ महावीरस्स जस्स मम्हिंमनुपभावेण अक्किट्ठे अव्वहिए अपरितावए इहमागए इह समोसढे इह संपत्ते इहेव अज्जं उवसंपज्जित्ता णं विहरामि, तं गच्छामो णं देवाणुप्पिया ! समणं भगवं महावीरं वंदामो नमंसामो जाव पज्जुवासामोत्तिकट्टु चउसट्ठीए सामानियसाहस्सीहिं जाव सव्विड्ढीए जाव जेणेव असोगवरपायवे जेणेव मम अंतिए तेणेव उवागच्छइ २ ममं तिक्खुत्तो आयाहिणं पयाहिणं जाव नमंसित्ता एवं वदासि ।*

*एवं खलु भंते ! मए तुब्भं नीसाए सक्के देविंदे देवराया सयमेव अच्चासादिए जा तं भद्दं णं भवतु देवाणुप्पियाणं मम्हिं जस्स अणुपभावेणं अक्किट्ठे जाव विहरामि तं खामेमि णं देवाणुप्पिया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जाव उत्तरपुरच्छिमं दिसीभागं अवक्कमइ २ त्ता जाव बत्तीसइबद्धं नट्टविहिं उवदंसेइ २ जामेव दिसिं पाउब्भूए तामेव दिसं पडिगए, एवं खलु गोयमा! चमरेणं असुरिंदेण असुररन्ना सा दिव्वा देविड्ढी लद्धा पत्ता जाव अभिसमन्नागया, ठिती सागरोवमं, महाविदेहे वासे सिज्झिहिति जाव अंतं काहिति ॥*

**वृ.** 'ओहयमणसंकप्पे'त्ति उपहतो-ध्वस्तो मनसः सङ्कल्पो-दर्पहर्षादिप्रभवो विकल्पो यस्य स तथा, 'चिंतासोगसागरमनुपविट्ठेत्ति चिन्ता-पूर्वकृतानुस्मरणं शोको-दैन्यं तावेव सागर इति विग्रहोऽतस्तं 'करतलपल्हत्थमुहे''त्ति करते पर्यस्तं-अधोमुखतया न्यस्तं मुखं येन स तथा, 'जस्समम्हि मनुभावेणं'ति यस्य प्रभावेण इहागतोऽस्मि-भवामीति योगः, किंभूतः सन्नित्याह- 'अकिट्ठे'त्ति 'अकृष्टः' अविलिखितः अक्लिष्टो वा-अबाधितो निर्वेदनमित्यर्थः ।

एतदेव कथमित्याह-'अव्वहिए'त्ति अव्यथितः, अताडितत्वेऽपि ज्वलनकल्पकुलिशसन्निकर्षात्परितापः स्यादतस्तं निषेधयन्नाह- 'अपरिताविए'त्ति, 'इहमागए'त्यादि विवक्षया पूर्ववद्व्याख्येयं, 'इहेव अज्ज्ञे'त्यादि, इहैव स्थाने 'अद्य' अस्मिन्नहनि 'उपसंपद्य' प्रशान्तो भूत्वा विहरामीति

पूर्वमसुराणां भवप्रत्ययो वैरानुबन्धः सौधर्मगमने हेतुरुक्तः, अथ तत्रैव हेत्वन्तरभिधानायाह–

**मू. (१७७)** *किं पत्तिए णं भंते! असुरकुमारा देवा उड्ढं उप्पयंति जाव सोहम्मो कप्पो ?, गोयमा! तेसिणं देवाणं अहुणोववन्नगाण वा चरिमभवत्थाण वा इमेयारूवे अज्झत्थिए जाव समुप्पज्जइ-अहो णं अम्हेहिं दिव्वा देविड्ढी लद्धा पत्ता जाव अभिसमन्नागया जारिसिया णं अम्हेहिं दिव्वा देविड्ढी जाव अभिसमन्नागया तारिसिया णं सक्केणं देविंदेणं देवरन्ना दिव्वा दिविड्ढी जाव अभिसमन्नागया जारिसिया णं सक्केणं देविंदेणं देवरन्ना जाव अभिसमन्नागया तारिसियाणं अम्हेहिवि जाव अभिसमन्नागया तं गच्छामो णं सक्कस्स देविंदस्स देवरन्नो अंतियं पाउब्भवामो पासामो ताव सक्कस्स देविंदस्स देवरन्नो दिव्वं देविड्ढिं जाव अभिसमन्नागयं पासतु ताव अम्हवि सक्के देविंदे देवराया दिव्वं देविड्ढिं जाव अभिसमन्नागयं ।*

*तं जाणामो ताव सक्कस्स देविंदस्स देवरन्नो दिव्वं देविड्ढिं जाव अभिसमन्नागयं जाणउ ताव अम्हवि स्के देविंदे देवराया दिव्वं देविड्ढिं जाव अभिसमन्नागयं, एवं खलु गोयमा! असुरकुमारा देवा उड्ढं उप्पयंति जाव सोहम्मो कप्पो । सेवं भंते! सेवं भंते! त्ति ॥*

**वृ.** 'किं पत्तियन्न'मित्यादि, तत्र 'किंपत्तियं'ति कः प्रत्ययः-कारणं यत्र तत् किंप्रत्ययम् 'अहुणोववन्नाणं'ति उत्पन्नमात्राणां 'चरिमभवत्थाण व'त्ति भवचरमभागस्थानां ? च्यवनावसर इत्यर्थः ॥

शतकं-३ उद्देशकः-२ समाप्तः

## –: शतकं-३ उद्देशकः-३ :–

**वृ.** द्वितीयोद्देशके चमरोत्पात उक्तः, स च क्रियारूपोऽतः क्रियास्वरूपाभिधानाय तृतीयोद्देशकः, स च–

**मू. (१७८)** *तेणं कालेणं तेणं समएणं रायगिहे नामं नगरे होत्था जाव परिसा पडिगया ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तेणं कालेणं तेणं समएणं जाव अंतेवासी मंडियपुत्ते नामं अनगारे पगतिभद्दए जाव पज्जुवासमाणे एवं वदासी-कति णं भंते! किरिया पन्नत्ता?, मंडियपुत्ता! पंच किरियाओ पन्नत्ताओ, तंजहा -काइया अहिगरनिया पाउसिया पारियावनिया पाणाइवायकिरिया।*

*काइया णं भंते! किरिया कतिविहा पन्नत्ता?, मंडियपुत्ता! दुविहा पन्नत्ता, तंजहा-अणुवरयकायकिरिया य दुप्पउत्तकायकिरिया य। अहिगरनिया णं भंते! किरिया कतिविहा पन्नत्ता?, मंडियपुत्ता! दुविहा पन्नत्ता, तंजहा-संजोयणाहिगरणकिरिया य निव्वत्तणाहिगरणकिरिया य। पाओसिया णं भंते! किरिया कतिविहा पन्नत्ता?, मंडियपुत्ता! दुविहा पन्नत्ता, तंजहा-जीवपाओसिया य अजीवपादोसिया य। पारियावनिया णं भंते! किरिया कइविहा पन्नत्ता?, मंडियपुत्ता! दुविहा पन्नत्ता, तंजहा-सहत्थपारियावनिया य परहत्थपारियावनिया य पाणाइवायकरिया णं भंते! कइविहा पन्नत्ता?, मंडियपुत्ता! दुविहा पन्नत्ता, तंजहा-सहत्थपा० परहत्थपा० किरिया य॥*

**वृ.** 'तेणं कालेण' मित्यादि तत्र 'पंच किरियाओ' त्ति करणं क्रिया कर्मबन्धनिबन्धना चेष्टेत्यर्थः 'काइय' त्ति चीयत इति कायः-शरीरं तत्र भवा तेन वा निर्वृत्ता कायिकी १, 'अहिगरनिय' त्ति अधिक्रियते नकरादिष्वात्माऽनेनेत्यधिकरणं-अनुष्ठानविशेषः बाह्यं वा वस्तु चक्रखड्गादि तत्र भवा तेन वा निर्वृत्तेत्याधिकरनिकी २, 'पाउसिय' त्ति प्रद्वेषो-मत्सरस्तत्र भवा तेन वा निर्वृत्ता स एव वा प्राद्वेषिकी ३, 'पारितावनिय' त्ति परितापनं परितापः-पीडाकरणं तत्र भवा तेन वा निर्वृत्ता तदेव वा पारितापनिकी ४, 'पारितावनिय' त्ति प्राणातिपातः-प्रसिद्धस्तद्विषय क्रिया प्राणातिपात एव वा क्रिया प्राणातिपातक्रिया ५।

'अनुवरयकायकिरिया य' त्ति अनुपरतः-अविरतस्तस्य कायक्रियाऽनुपरतकायक्रिया, इयमविरतस्य भवति, 'दुपपउत्तकायकिरिया य' त्ति दुष्टं प्रयुक्तो दुष्प्रयुक्तः स चासौ कायश्च दुष्प्रयुक्तकायस्तस्य क्रिया दुष्प्रयुक्तकायक्रिया, अथवा दुष्टंप्रयुक्तं-प्रयोगो यस्य स दुष्प्रयुक्तस्तस्य कायक्रिया दुष्प्रयुक्तकायक्रिया, इयं प्रमत्तसंयतस्यापि भवति, विरतिमतः प्रमादे सति कायदुष्प्रयोगस्य सद्भावात्, 'संजोयणाहिगरणकिरिया य' त्ति संयोजनं हलगरविषकूटयन्त्राद्यङ्गानां पूर्वनिर्वर्त्तितानां मीलनं तदेवाधिकरणयक्रिया संयोजनाधिकरणक्रिया।

'निव्वत्तमाहिगरणकिरिया य' त्ति, निर्वर्त्तनं-असिशक्तितोमरादीनां निष्पादनं तदेवाधिकरणक्रिया निर्वर्त्तनाधिकरणक्रिया, 'जीवपाओसिया य' त्ति जीवस्य-आत्मपरतदुभयरूपस्योपरि निष्पादनं तदेवाधिकरणक्रिया निर्वर्त्तनाधिकरणक्रिया, 'जीवपाओसिया य' त्ति अजीवस्योपरि प्रद्वेषाद्या क्रिया प्रद्वेषकरणमेव वा, 'सहत्थपारितावनिया य' त्ति स्वहस्तेन स्वस्य परस्य तदुभयस्य वा परितापनाद्-असातोदीरणाद्या क्रिया परितापनाकरणमेव वा सा स्वहस्तपारितापनिकी।

एवं परहस्तपारितापनिक्यपि, एवं प्राणातिपातक्रियाऽपि।

उक्ता क्रिया, अथ तज्जन्यं कर्म तद्वेदनां चाधिकृत्याह-

**मू. (१७९)** *पुव्विं भंते! किरिया पच्छा वेदणा पुव्विं वेदणा पच्छा किरिया?, मंडियपुत्ता पुव्विं किरिया पच्छा वेदणा, नो पुव्विं वेदणा पच्छा किरिया॥*

*अत्थि णं भंते! समणाणं निग्गंथाणं किरिया कज्जइ?, हंता! अत्थि। कहं णं भंते! सम-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*णाणं निग्गंथाणं किरिया कज्जइ ?, मंडियपुत्ता ! पमायपच्चया जोगनिमित्तं च, एवं खलु समणाणं निग्गंथाणं किरिया कज्जति ।।*

**वृ.** 'पुव्विं भंते !' इत्यादि क्रिया-करणं तज्जन्यत्वात्कर्मापि क्रिया, अथवा क्रियत इति क्रिया कर्मैव, वेदना तु कर्मणोऽनुभवः, सा च पश्चादेव भवति, कर्म्मपूर्वकत्वात्तदनुभवस्येति ।

अथ क्रियामेव स्वामिभावतो निरूपयन्नाह-'अत्थि ण'मित्यादि, अस्त्ययं पक्षो यदुत क्रिया क्रियते-क्रिया भवति, प्रमादप्रत्ययात् तथा दुष्प्रयुक्तकायक्रियाजन्यं कर्म्म, योगनिमित्तं च यथैर्यापथिकं कर्म ।। क्रियाधिकारादिदमाह–

***मू. (१८१)*** *जीवे णं भंते ! सया समियं एयति वेयति चलति फंदइ घट्ट खुब्भइ उदीरइ तं तं भावं परिणमति ?, हन्ता ! मंडियपुत्ता ! जीवे णं सया समियं एयति जाव तं तं भावं परिण- मइ जावं च णं भंते ! से जीवेसया समितं जाव परिणमइ तावं च णं तस्स जीवस्स अंते अंतकि- रिया भवति ?, नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ-जावं च णं से जीवे सया समितं जाव अंते अंतकिरिया न भवति ?, मंडियपुत्ता ? जावं च णं से जीवे सया समितं जाव परिणमति तावं च णं से जीवे आरंभइ सारंभइ समारंभइ आरंभे वट्टइ सारंभे वट्टइ समारंभे वट्टइ आरंभमाणे सारंभमाणे समारंभमाणे आरंभे वट्टमाणे सारंभे वट्टमाणे समारंभे वट्टमाणे बहूणं पाणाणं भूयाणं जीवाणं सत्ताणं दुक्खावणयाए सोयावणयाए जूरावणयाए तिप्पावणयाए पिट्टावणयाए परियावणयाए वट्टइ ।*

*से तेणट्ठेणं मंडियपुत्ता ! एवं वुच्चइ-जावं च णं से जीवे सया समियं एयति जाव परिणमति तावं च णं तस्स जीवस्स अंते अंतकिरिया न भवइ ।। जीव णं भंते ! सया समियं नो एयइ जाव नो तं तं भावं परिणमइ ?, हंता मंडियपुत्ता ! जीवे णं सया समियं जाव नो परिणमति । जावं च णं भंते ! से जीवे नो एयति जाव नो तं तं भावं परिणमत तावं च णं तस्स जीवस्स अंत अंतकिरिया भवइ ? हंता ! जाव भवति ।*

*से केणट्ठेणं भंते ! जाव भवति ?, मंडियपुत्ता ! जावं च णं से जीवे सया समियं नो एयति जाव नो परिणमइ तावं च णं से जीवे नो आरंभइ नो सारंभइ नो समारंभइ नो आरंभे वट्टइ नो सारंभे वट्टइ नो समारंभे वट्टइ अनारंभमाणे असारंभमाणे असमारंभमाणे आरंभे अवट्टमाणे सारंभे अवट्टमाणे समारंभे अवट्टमाणे बहूणं पाणाणं ४ अदुक्खावणयाए जाव अपरियावणयाए वट्टइ । से जहानामए केइ पुरिसे सुक्कं तणहत्थयं जायतेयंसि पक्खिवेज्जा, से नूणं मंडियपुत्ता ! से सुक्के तणहत्थए जायतेयंसि पक्खित्ते समाणे खिप्पामेव मसमसाविज्जइ ? हंता ! मसमसाविज्जइ, से जहानामए-कइ पुरिसे तत्तंसि अयकवल्लंसि उदयबिंदू पक्खिवेज्ञा, से नूणं मंडियपुत्ता ! से उदयबिंदू तत्तंसि अयकवल्लंसि पक्खित्ते समाणे खिप्पामेव विद्धंसमागच्छइ ?, हंता ! विद्धंसमागच्छइ, से जहानामए हरए सिय पुन्ने पुन्नप्पमाणे वोलट्टमाणे वोसट्टमाणे समभरघडत्ताए चिट्ठति ?, हंता चिट्ठति ।*

*अहे णं केइ पुरिसे तंसि हरयंसि एवं महं नावं सतासवं सयच्छिद्दं ओगाहेज्ञा से नूणं मंडियपुत्ता ! सा नावा तेहिं आसवदारेहिं आपूरेमाणी २ पुन्ना पुन्नप्पमाणा वोलट्टमाणा वोसट्टमाणा*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समभरघडत्ताए चिट्ठति ! हंता ! चिट्ठति, अहे णं केइ पुरिसे तीसे नावाए सव्वतो समंता आसवदाराइं पिहेइ २ नावाउस्सिंचणएणं उदयं उस्सिंचिज्ञा से नूणं मंडियपुत्ता ! सा नावा तंसि उदयंसि उस्सिंचिज्रंसि समाणंसि खिप्पामेव उड्ढं उदाइ ?, हंता ! उदाइज्ञा ।*

*एवामेव मंडियपुत्ता ! अत्तत्तासंवुडस्स अनगारस्स ईरियासमियस्स जाव गुत्तबंभयारियस्स आउत्तं गच्छमाण्स चिट्ठमाणस्स निसीयमाणस्स तुयट्टमाणस्स आउत्तं वत्थपडिग्गह-कंबलपायपुंछणं गेण्हमाणस्स निक्खिवमाणस्स जाव चक्खुपम्हनिवायमवि वेमाया सुहुमा ईरियावहिया किरिया कज्ञइ, सा पढमसमयबद्धपुट्ठा बितियसमयवेतिया ततियसमयनिज्ञरिया सा बद्धा पुट्ठा उदीरिया वेदिया निज्ञिन्ना सेयकाले अकम्मं वावि भवति, से तेणट्ठेणं मंडियपुत्ता ! एवं वुच्चति-जावं च णं से जीवे सया समियं नो एयति जाव अंते अंतकिरिया भवति ॥*

**वृ.** 'जीवेण'मित्यादि, इह जीवग्रहणेऽपि सयोग एवासौ ग्राह्यः, अयोगस्यैजनादेरसम्भवात्, 'सदा' नित्यं 'समियं'ति सप्रमाणं 'एयइ'त्ति एजते-कम्पते 'एजृ कम्पने' इति वचनात् 'वेयइ'त्ति 'व्येजते' विविधं कम्पते 'चलइ'त्ति स्थानान्तरं गच्छति 'फंदइ'त्ति 'स्पन्दते' किञ्चिच्चलति 'स्पदि किञ्चिच्चलने' इति वचनात्, अन्यमवकाशं गत्वा पुनस्तत्रैवागच्छतीत्यन्ते 'घट्टइ'त्ति सर्वदिक्षु चलति पदार्थान्तरं वा स्पृशति 'खुब्भइ'त्ति 'क्षुभ्यति' पृथिवीं प्रविशति क्षोभयति वा पृथिवीं बिभेति वा 'उदीरइ'त्ति प्राबल्येन प्रेरयति पदार्थान्तरं प्रतिपादयति वा, शेषक्रियाभेदसङ्ग्रहार्थःमाह

'तं तं भावं परिणमइ'त्ति उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणादिकं परिणामं यातीत्यर्थः, एषां चैजनादिभावानां क्रमभावित्वेन सामान्यतः सदेति मन्तव्यं न तु प्रत्येकापेक्षया, क्रमभाविनां युपगदभावादिति, 'तस्स जीवस्स अंते'त्ति मरणान्ते 'अंतकिरिय'त्ति सकलकर्म्मक्षयरूपा, 'आरंभइ'त्ति आरभते पृथिव्यादीनुपद्रवयति 'सारिंभइ'त्ति 'संरभते' तेषु विनाशसङ्कल्पं करोति 'समारंभइ'त्ति 'समारभते' तानेव परितापयति, आह च–

॥ १ ॥ "संकप्पो संरंभो परितावकरो भवं समारंभो ।
आरंभो उद्दवओ सव्वनयाणं विसुद्धाणं ॥

इदं च क्रियाक्रियावतोः कथञ्चिदभेद इत्यभिधानाय तयोः समानाधिकरणतः सूत्रमुक्तम्, अथ तयोः कथञ्चिद्भेदोऽप्यस्तीति दर्शयितुं पूर्वोक्तमेवार्थं व्यधिकरणत आह-'आरंभे'इत्यादि, आरम्भे-अधिकरणभूते वर्त्तते जीवः, एवं संरम्भे समारम्भे च, अनन्तरोक्तवाक्यार्थःद्वयानुवादेन प्रकृतयोजनामाह-आरम्भमाणः संरभमाणः समारभमाणो जीव इत्यनेन प्रथमो वाक्यार्थोऽनूदितः आरम्भे वर्त्तमान इत्यादिना तु द्वितीयः, 'दुक्खावणयाए' इत्यादौ ताशब्दस्य प्राकृतप्रभवतत्वात् 'दुःखापनायां' मरणलक्षणदुःखप्रापणायाम् अथवा इष्टवियोगादिदुःखहेतुप्रापणायां वर्त्तत इति योगः । तथा 'शोकापनायां' दैन्यप्रापणायां 'जूरावणताए'त्ति सोकातिरेकाच्छरीरजीर्णताप्रापणायां 'तिप्पावणयाए'त्ति 'तेपापनायां' 'तिपृ ष्टेपृ क्षरणार्थौ' इतिवचनात् शोकातिरेकादेवाश्रुलालादिक्षरजीर्णताप्रापणायां 'पिट्टावणताए'त्ति पिट्टनप्रापणायां ततश्च परितापनायां-शरीरसन्तापे वर्त्तते, क्वचित्पठ्यते 'दुक्खावणयाए'इत्यादि, तच्च व्यक्तमेव, यच्च तत्र 'किलामणयाए उद्दावणयाए' इत्यधिकमभिधीयते तत्र 'किलामणयाए'त्ति ग्लानिनयने 'उद्दावणयाए'त्ति उत्त्रासने उक्तार्थःविपर्ययमाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जीवे ण' मित्यादि, 'नो एयइ' त्ति शैलेशीकरणे योगनिरोधान्नो एजत इति, एजनादिरहितस्तु नारम्भादिषु वर्त्तते तथा च न प्राणादीनां दुःखापनादिषु ततोऽपि च योगनिरोधाभिधानशुक्लध्यानेन सकलकर्मध्वंसरूपाऽन्तक्रिया भवति, तत्र दृष्टान्तद्वयमाह-'से जहे' त्यादि, 'तिणहत्थयं' ति तृणपूलकं 'जायतेयंसि' त्ति वह्नौ 'मसमसाविज्जइ' त्ति शीघ्रं दह्यते, इह च दृष्टान्तद्वयस्याप्युपनयार्थः सामर्थ्यगम्यो यथा-एवमेजनादिरहितस्य शुक्लध्यानचतुर्थःभेदानलेन कर्मदाह्यदहनं स्यादिति अथ निष्क्रियस्यैवान्तक्रिया भवतीति नौदृष्टान्तेनाह ।

'से जहानामए' इत्यादि, इह शब्दार्थः प्राग्वन्नवरम् 'उद्दाइ' त्ति उद्याति जलस्योपरि वर्त्तते 'अत्तत्तासंवुडस्स' त्ति आत्मन्यात्मना संवृतस्य प्रतिसंलीनस्येत्यर्थः, एतदेव 'इरियासमियस्से' त्यादिना प्रपञ्चयति 'आउत्तं' ति आयुक्तमुपयोगपूर्वकमित्यर्थः 'जाव चक्खुपम्हनिवायमवि' त्ति किं बहुना आयुक्तगमनादिना स्थूलक्रियाजालेनोक्तेन ? यावच्चक्षुपक्ष्मनिपातोऽपि, प्राकृतत्वाल्लिङ्गव्यत्ययः, उन्मेषनिमेषमात्रक्रियाऽप्यस्ति आस्तां गमानिदका तावदिति शेषः 'वेमाय' त्ति विविधमात्रा, अन्तर्मुहूर्त्तादिर्देशोनपूर्वकोटीपर्यन्तस्य क्रियाकालस्य विचित्रत्वात्, वृद्धाः पुनरेवमाहुः-यावता चक्षुषो निमेषोन्मेषमात्राऽपि क्रिया क्रियते तावताऽपि कालेन विमात्रया स्तोकमात्रयाऽपीति, क्वचि- द्विमात्रेत्यस्य स्थाने 'सपेहाए' त्ति दृश्यते तत्र च 'स्वप्रेक्षया' स्वेच्छया चक्षुःपक्ष्मनिपातो न तु परकृतः 'सुहुम' त्ति सूक्ष्मबन्धादिकाला 'ईरियावहिय' त्ति ईर्यापथो-गमनमार्गस्तत्र भवा एर्यापथिकी केवलयोगप्रत्ययेति भावः 'किरिये' ति कर्म सातवेदनीयमित्यर्थः 'कज्जइ' त्ति क्रियते भवतीत्यर्थः ।

उपशान्तमोहक्षीणमोहसयोगिकेवलिलक्षणगुणस्थानकत्रयवर्त्ती वीतरागोऽपि हि सक्रियत्वात्सातवेद्यं कर्म बन्धीतिति भावः, 'से' ति ईर्यापथिकी क्रिया 'पढमसमयबद्धपुट्ठ' त्ति (प्रथमसमये) बद्धा कर्मतापादनात् स्पृष्टा जीवप्रदेशैः स्पर्शनात्ततः कर्मधारयो तत्पुरुषे च सति प्रथमसमयबद्धस्पृष्टा, तता द्वितीयसमये वेदिता-अनुभूतस्वरूपा, एवं तृतीयसमये 'निर्जीर्णा' अनुभूतस्वरूपत्वेन जीवप्रदेशेभ्यः परिशाटितेति ।

एतदेव वाक्यान्तरेणाह-सा बद्धा स्पृष्टा प्रथमे समये द्वितीये तु 'उदीरिता' उदयमुपनीता, किमुक्तं भवति ? -वेदिता, न ह्येकस्मिन् समये उदीरणा उदयश्च संभवतीत्येवं व्याख्यातं, तृतीये नु निर्जीर्णा, ततश्च 'सेयकाले' त्ति एष्यत्काले 'अकम्मं वावि' त्ति अकर्माऽपि च भवति, इह च यद्यपि तृतीयऽपि समये कर्माकर्म भवति तथाऽपि तत्क्षण एवातीतभावकर्मत्वेन द्रव्यकर्मत्वात्, तृतीये निर्जीर्णं कर्मेति व्यपदिश्यते, चतुर्थादिसमयेषुत्वकर्मेति, 'अत्तत्तासंवुडस्से' त्यादिना चेदमुक्तं-यदि संयतोऽपि साश्रवः कर्म बन्धाति तदा सुतरामसंयतः, अनेन च जीवनावः कर्म्मजल-पूर्यमाणतयार्थःतोऽधोनिमज्जनमुक्तं, सक्रियस्य कर्मबन्धभणनाच्चाक्रियस्य तद्विपरीतत्वा-त्कर्मबन्धाभाव उक्तः, तथा च जीवनावोऽनाश्रवतायामूर्द्धगमनं सामर्थ्यादुपनीतमवसेयमिति

अथ यदुक्तं श्रमणानां प्रमादप्रत्यया क्रिया भवतीति, तत्र प्रमादपरत्वं तद्विपक्षत्वात्तदितरत्वं संयतस्य कालतो निरूपयन्नाह—

***मू. (१८२) पमत्तसंजयस्स णं भंते ! पमत्तसंजमे वट्टमाणस्स सव्वावि य णं पमत्तद्धा कालओ केवच्चिरं होइ ?, मंडियपुत्ता ! एगजीवं पडुच्च जहन्नेणं एक्कं समयं उक्कोसेणं देसूणा***

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पुव्वकोडी, नानाजीवे पडुच्च सव्वद्धा ॥*

*अप्पमत्तसंजयस्स णं भंते ! अप्पमत्तसंजमे वट्टमाणस्स सव्वावि य णं अप्पमत्तद्धा कालओ केवच्चिरं होइ ?, मंडियपुत्ता ! एगजीवं पडुच्च जहन्नेणं अंतोमुहुत्तं उक्को० पुव्वकोडी देसूणा, नानाजीवे पडुच्च सव्वद्धं, सेवं भंते ! २ त्ति ।*

*भयवं मंडियपुत्ते अनगारे समणं भगवं महावीरं वंदइ नमंसइ २ संजमेणं तवसा अप्पाणं भावेमाणे विहरइ ॥*

**वृ.** 'सव्वावि य णं पमत्तद्ध'त्ति 'सर्वाऽपि च' सर्व्वकालसम्भवाऽपि च 'प्रमत्ताद्धा' प्रमत्तगुणस्थानककालः 'कालतः' प्रमत्ताद्धासमूहलक्षणं कालमाश्रित्य 'कियच्चिरं' कियन्तं कालं यावद्भवतीति प्रश्नः, ननु कालत इति न वाच्यं, कियच्चिरमित्यनेनैव गतार्थःत्वात्, नैवं क्षेत्रत इत्यस्य व्यवच्छेदार्थःत्वात्, भवति हि क्षेत्रतः कियच्चिरमित्यपि प्रश्नः, यथाऽवधिज्ञानं क्षेत्रतः कियच्चिरं भवति ?, त्रयस्त्रिंशत्सागरोपमानि, कालतस्तु सातिरेका षट्षष्टिरिति, 'एक्कं समयं'ति, कथम् ?, उच्यते, प्रमत्तसंयमप्रतिपत्तिसमयसमनन्तरमेव मरणात्, 'देसूणा पुव्वकोडि'त्ति किल प्रत्येकमन्तर्मुहूर्त्तप्रमाणे एव प्रमत्ताप्रमत्तगुणस्थानके, ते च पर्यायेण जायमाने देशोनपूर्वकोटिं यावदुत्कर्षेण भवतः, संयमवतो हि पूर्वकोटिरेव परमायुः, स च संयममष्टासु वर्षेषु गतेष्वेव लभते, महान्ति चाप्रमत्तान्तर्मूहूर्तापेक्षया प्रमत्तन्तर्मुहूर्त्तानि कल्प्यन्ते, एवं चान्तर्मुहूर्त्तप्रमाणानां प्रमत्ताद्धानां सर्वासां मीलनेन देशोना पूर्वकोटी कालमानं भवति, अन्ये त्वाहुः-अष्टवर्षोनां पूर्वकोटिं यावदुत्कर्षतः प्रमत्तसंयतता स्यादिति ।

एवमप्रमत्तसूत्रमपि, नवरं 'जहन्नेणं अंतोमुहुत्तं'ति किलाप्रमत्ताद्धायां वर्त्तमानस्यान्तर्मुहूर्तमध्ये मृत्युर्न भवतीति, चूर्निकारमतं तु प्रमत्तसंयतवर्ज सर्वोऽपि सर्ववरतोऽप्रमत्त उच्यते, प्रमादाभावात्, स चोपशमश्रेणीं प्रतिपद्यमानो मुहूर्त्ताभ्यन्तरे कालं कुर्वन् जघन्यकालो लभ्यत इति, देशोनपूर्वकोटी तु केलिनमाश्रित्येति 'नानाजीवे पडुच्च सव्वद्ध' मित्युक्तं ।

अथ सर्वाद्धाभाविभावान्तरप्ररूपणायाह–

**मू. (१८३)** *भंते ! त्ति भगवं गोयमे समणं भगवं महवीरं वंदइ नमंसइ २ त्ता एवं वयासी-कम्हा णं भंते ! लवणसमुद्दे चाद्दसट्ठमुद्दिट्ठपुन्नमासिणीसु अतिरेयं वड्ढति वा हायति वा ?, जहा जीवाभिगमे लवणसमुद्दवत्तव्वया नेयव्वा जाव लोयट्ठिती ।*

*जन्नं लवणसमुद्दे जंबूद्दीवं २ नो उप्पीलेति नो चेव णं एगोदगं करेइ लोयट्ठिई लोयाणुभावे सेवं भंते ! २ त्ति जाव विहरति ॥*

**वृ.** 'भन्ते'त्ति इत्यादि 'अतिरेगंति' तित्यन्तरापेक्षया अधिकतरमित्यर्थः 'लवणसमुद्दवत्तव्वया नेयव्व'त्ति जीवाभिगमोक्ता, कियद्दूरं यावदित्याह-'जावलोयट्ठिई'त्यादि, सा चैवमर्थःतः-कस्माद् भदन्त ! लवणसमुद्रश्चतुर्दश्यादिष्वतिरेकेण वर्द्धते वा हीयते वा ?, इह प्रश्ने उत्तरं-लवणसमुद्रस्य मध्य भागे दिक्षु चत्वारो महापातालकलशा योजनलक्षप्रमाणाः सन्ति, तेषां चाधस्तने त्रिभागे वायुर्मध्यमे वायुदके उपरितने तूदकमिति, तथाऽन्ये क्षुद्रपातालकलशा योजनसहस्रप्रमाणाश्चतुरशीत्युत्तराष्टशताधिकसप्तसहस्रसङ्ख्या वाच्यादियुक्तत्रिभागवन्तः सन्ति, तदीयवातविक्षोभवशाज्जलवृद्धिहानी अष्टम्यादिषु स्यातां –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा लवणशिखाया दशयोजनानां सहस्राणि विष्कम्भः षोडशोच्छ्रयो योजनार्द्धमुपरि वृद्धिहानी इत्यादि, अथ कस्माल्लवणो जम्बूद्वीपं नोत्प्लावयति ?, अर्हदादिप्रभावाल्लोकस्थितिर्वैषा इति, एतदेवाह-'लोयट्ठिइ'त्ति लोकव्यवस्था 'लोयाणुभावे'त्ति लोकप्रभाव इति ।।

शतकं-३ उद्देशकः-३ समाप्तः

## –: शतकं-३ उद्देशकः-४ :–

**वृ.** अनन्तरोद्देशके क्रियोक्ता, सा च ज्ञानवतां प्रत्यक्षेति तदेव क्रियाविशेषमाश्रित्य विचित्रतया दर्शयंश्चतुर्थोद्देशकमाह, तस्य चेदं सूत्रम्-

**मू. (१८४)** *अनगारे णं भंते ! भावियप्प देवं विउव्वियसमुग्घाएणं समोहयं जाणरूवेणं जायमाणं जाणइ पासइ ? गोयमा ! अत्थेगइए देवं पासइ नो जाणं पासइ १ अत्थेगइ जाणं पासइ नो देवं पासइ २ अत्थेगइए देवंपि पासइ जाणंपि पासइ ३ अत्थेइए नो देवं पासइ नो जाणं पासइ ४ ।*

*अनगारे णं भंते ! भावियप्पा देविं वेउव्वियसमुग्घाएणं समोहयं जाणरूवेणं जायमाणं जाणइ पासइ ?, गोयमा ! एवं चेव ।। अणगारे णं भंते ! भावियप्पा देवं सदेवीयं वेउव्वियसमुग्घाएणं समोहयं जाणरूवेणं जायमाणं जाणइ पासइ ?, गोयमा ! अत्थेगइए देवं सदेवीयं पासइ नो जाणं पासइ, एएणं अभिलावेणं चत्तारि भंगा ४ ।*

*अनगारे णं भंते ! भावियप्पा रुक्खस्स किं अंतो पासइ बाहिं पासइ चउभंगो । एवं किं मूलं पासइ कंदं पा० ?, चउभंगो, मूलं पा० खंदं पा० चउभंगो, एवं मूलेणं बीजं संजोएयव्वं, एवं कंदेणवि समं संजोएयव्वं जाव बीयं, एवं जाव पुप्फेण समं बीयं संजोएयव्वं ।। अनगारे णं भंते ! भावियप्पा रुक्खस्स किं फलं पा० बीयं पा० ?, चउभंगो ।।*

**वृ.** 'अनगारे ण'मित्यादि, तत्र 'भावियप्प'त्ति भावितात्मा संयमतपोभ्यामेवं विधानामनगाराणां हि प्रायोऽवधिज्ञानादिलब्धयो भवन्तीतिकृत्वा भावितात्मेत्युक्तं, 'विउव्वियसमुग्घाएणं समोहयं'ति विहितोत्तरवैक्रियशरीरमित्यर्थः 'जाणरूवेणं'ति यानप्रकारेण शिबिकाद्याकारवता वैक्रियविमानेनेत्यर्थः 'जायमाणं'ति यान्तं गच्छन्तं 'जाणइ'त्ति ज्ञानेन 'पासइ' त्ति दर्शनेन ?, उत्तरमिह चतुर्भङ्गी, विचित्रत्वादवधिज्ञानस्येति ।

'अंतो'त्ति मध्यं काष्ठसारादि 'बाहिं' ति बहिर्वर्त्ति त्वक्पत्रसञ्चयादि, 'एवं मूलेण' मित्यादि, 'एव'मिति मूलकन्दसूत्राभिलापेन मूलेन सह कन्दादिपदानि वाच्यानि यावद्बीजपदं, तत्र मूलं १ कन्दः २ स्कन्धः ३ त्वक् ४ शाखा ५ प्रवालं ६ पत्रं ७ पुष्पं ८ फलं ९ बीजं १० चेति दश पदानि, एषा च पञ्चचत्वारिंशद्द्विकसंयोगाः, एतावन्त्येवेह चतुर्भङ्गीसूत्राण्यध्येयानीति ।

एतदेव दर्शयितुमाह-'एवं कंदेणवी'त्यादि ।। 'देवं विउव्वियसमुग्घाएणं समोहयं'ति प्रागुक्तमतो वैक्रियाधिकारादिदमाह–

**मू. (१८५)** *पभू णं भंते ! वाउकाए एगं महं इत्थिरूवं वा पुरिसरूवं वा हत्थिरूवं वा जाणरूवं वा एवं जुग्गगिल्लिथिल्लिसीयसंदमानियरूवं वा विउव्वित्तए ?, गोयमा ! नो तिणट्ठे समट्ठे, वाउक्काएणं विकुव्वमाणे एगं महं पडागासंठियं रूवं विकुव्वइ । पभू णं भंते ! वाउकाए एगं महं पडागासंठियं रूवं विउव्वित्ता अनेगाइं जोयणाइं गमित्तए ?, हंता ! पभू ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से भंते! किं आयड्ढीए गच्छइ परिड्ढीए गच्छइ?, गोयमा! आयड्ढीए ग० नो परिड्ढीए ग० जहा आयड्ढीए एवं चेव आयकम्मुणावि आयप्पओगेणवि भानियव्वं। से भंते! किं ऊसिओदगं गच्छइ पयतोदगं ग०?, गोयमा! ऊसिओदयंपि ग० पयोदयंपि ग० से भंते! किं एगओपडागं गच्छइ दुहुपडागं गच्छइ?, गोयमा! एगओ पडागं गच्छइ नो दुहओ पडागं गच्छइ, से णं भंते! किं वाउकाए पडागा?, गोयमा! वाउकाए णं से नो खलु सा पडागा।*

**वृ.** 'पभूण' मित्यादि, 'जाणं' ति शकटं 'जुग्गं' ति गोल्लविषयप्रसिद्धं जम्पानं द्विहस्तप्रमाणं वेदिकोपशोभितं 'गेल्लि' त्ति हस्तिन उपरि कोल्लररूपा या मानुषं गिलतीव 'थिल्ली' ति लाटानां यदश्वदुपल्यानं तदन्यविषयेषु थिल्लीत्युच्यते 'सिय' त्ति शिबिका कूटाकाराच्छादितो जम्पानविशेषः 'संदमानिय' त्ति पुरुषप्रमाणायामो जम्पानविशेषः 'एगं महं पडागासंठियं' ति महत् पूर्वप्रमाणापेक्षया पताकासंस्थितं स्वरूपेणैव वायोः पताकाकारशरीरत्वाद् वैक्रियावस्थायामपि तस्य तदाकारस्यैव भावादिदि।

'आइड्ढिए' त्ति आत्मद्धर्या' आत्मशक्त्याऽऽत्मलब्ध्या वा 'आयकम्मुण' त्ति आत्मक्रियया 'आयप्पओगेणं' ति न परप्रयुकत इत्यर्थः, 'ऊसिओदयं' ति, उच्छृत-ऊर्ध्वम् उदय-आयामो यत्र गमने तदुच्छ्रितोदयम्, ऊर्ध्वपताकमित्यर्थः, क्रियाविशेषणं चेदं, 'पतोदयं' ति पतदुदयं-पतितपताकं गच्छति, ऊर्ध्वपताका स्थापना चेयम्, पतितपताकास्थापना त्वियम्-, 'एगओपडागं' ति एकतः-एकस्यां दिशि पताका यत्र तदेकतः पताकं, स्थापना त्वियम्-, 'दुहओपडागं' ति द्विधापताकं, स्थापनात्वियम्–

**मू. (१८६)** *पभू णं भंते! बलाहगे एगं महं इत्थिरूवं वा जाव संदमानियरूवं वा परिणामेत्तए हंता पभू। पभू णं भंते! बलाहए एगं महं इत्थिरूवं परिणामेत्ता अणेगाइं जोयणाइं गमित्तए?, हंता पभू, से भंते! किं आयड्ढीए गच्छइ परिड्ढीए गच्छइ?, गोयमा! नो आयड्ढीए गच्छति, परिड्ढीए ग० एवं नो आयकम्मुणा परकम्मुणा नो आयपओगेणं परप्पओगेणं ऊसितोदयं वा गच्छइ पयोदयं वा गच्छइ, से भंते! किं बलाहए इत्थी?, गोयमा! बलाहए णं से नो खलु सा इत्थी, एवं पुरिसेण आसे हत्थी।*

*पभू णं भंते! बलाहए एगं महं जाणरूवं परिणामेत्ता अनेगाइं जोयणाइं गमित्तए जहा इत्थिरूवं तहा भानियव्वं, नवरं एगओचक्कवालंपि दुहओचक्कवालंपि गच्छइ (त्ति) भानियव्वं, जुग्गगिल्लिथिल्लिसीयासंदमानियाणं तहेव–*

**वृ.** रूपान्तरक्रियाधिकारादुबलाहकसूत्रानि-'बलाहए' त्ति मेघः 'परिणामेत्तए' त्ति बलाहकस्याजीवत्वेन विकुर्वणाया असम्भवात् परिणामयितुमित्युक्तं, परिणामश्चास्य विश्रसारूपः, 'नो आयड्ढीए' त्ति अचेतनात्वान्मेधस्य विवक्षितायाः शक्तेरभावान्नात्मद्धर्या गमनमस्ति, वायुना देवेन वा प्रेरितस्य तु स्यादपि गमनमतोऽभिधीयते-'परिड्ढीए' त्ति, एवं 'पुरिसे आसे हत्थि' त्ति स्त्रीरूपसूत्रमिव पुरुषरूपाश्वरूपहस्तिरूपसूत्राण्यध्येतव्यानि, यानरूपसूत्रे विशषोऽस्तीति तद्दर्शयति-'पभूणं भंते! बलाहए एगं महं जाणरूवं परिणामेत्ता' इत्यादि 'पतोदयंपि गच्छइ' इत्येतदन्तं स्त्रीरूपसूत्रसमानमेव, विशेषः पुनरयम् –

'से भंते! किं एगओचक्कवालं दुहओचक्कवालं गच्छइ?, गोयमा! एगओचक्कवालंपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गच्छइ दुहओचक्कवालंपि गच्छइ' त्ति, अस्यैवोत्तररूपमंशमाह-नवरं 'एगओ' इत्यादि, इह यानं-शकटं चक्रवालं-चक्रं, शेषसूत्रेषु त्वयं विशेषो नास्ति, शकट एव चक्रवालसद्भावात्, ततश्च युग्यगिल्लिथिल्लिशिबिकास्यन्दमानिकारूपसूत्राणि स्त्रीरूपसूत्रवदध्येयानि, एतदेवाह-'जुग्ग-गिल्लिथिल्लिसीयासंदमानियाणं तहेव' त्ति । परिणामाधिकारादिदमाह—

**मू. (१८७)** *जीवे णं भंते! जे भविए नेरइएसु उववज्जित्तए से णं भंते! किंलेसेसु उववज्जति गोयमा! जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसेसु उववज्जइ, तं०-कण्हलेसेसु वा नीललेसेसु वा काललेसेसु वा, एवं जस्स जा लेस्सा सा तस्स भानियव्वा जाव जीवे णं भंते ! जे भविए जोतिसिएसु उववज्जित्तए ? पुच्छा, गोयमा! जल्लेसाइं दव्वाइं परियाइतिर त्ता कालं करेइ तल्लेसेसु उववज्जइ, तं०-तेउलेस्सेसु ।*

*जीवे णं भंते ! जे भविए वेमानिएसु उववज्जित्तए से णं भंते ! किंलेस्सेसु उववज्जइ ?, गोयमा! जल्लेस्साइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसेसु उववज्जइ, तं०-तेउलेस्सेसु वा पम्हलेसेसु वा सुक्कलेसेसु वा ॥*

**वृ.** 'जीवे ण' मित्यादि, 'जे भविए' त्ति यो योग्यः 'किंलेसेसु' त्ति का कृष्णादीनामन्यतमा लेश्या येषां ते तथा तेषु किंलेश्येषु मध्ये, 'जल्लेसाइं' ति या लेश्या येषां द्रव्याणां तानि यल्लेश्यानि, यस्या लेश्यायाः सम्बन्धीनीत्यर्थः, 'परियाइत्त' त्ति पर्यादाय परिगृह्य भावपरिणामेन कालं करोति-म्रियते तल्लेश्येषु नारकेषूत्पद्यते, भवन्ति चात्र गाथाः ।

॥१॥ "सव्वाहिं लेसाहिं पढमे समयंमि परिणयाहिं तु ।
नो कस्सवि उववाओ परे भवे अत्थि जीवस्स ॥

॥२॥ अंतमुहुत्तंमि गए अंतमुहुत्तंमि सेसए चेव ।
लेस्साहिं परिणयाहिं जीवा गच्छन्ति परलोयं ॥

चतुर्विंशतिदण्डकस्य शेषपदान्यतिदिशन्नाह-'एव' मित्यादि, 'एव' मिति नारकसूत्रा-भिलापेनेत्यर्थः 'जस्स' त्ति असुरकुमारादेर्या लेश्या कृष्णादिका सा लेश्या तस्या- सुरकुमारादेर्भनि-तव्येति । नन्वेतावतैव विवक्षितार्थःसिद्धेः किमर्थं भेदेनोक्तं 'जाव जीवे णं भंते' (जोइसिए) इत्यादि ?, उच्यते, दण्डकपर्यवसानसूत्रदर्शनार्थःम्, एवं तर्हि वैमानिकसूत्रमेव वाच्यं स्यान्न तु ज्योतिष्कसूत्रमिति, सत्यं ।

किन्तु ज्योतिष्कवैमानिकः प्रशस्तलेश्या एव भवन्तीत्यस्य दर्शनार्थं तेषां भेदेनाभिदानं, विचित्रत्वाद्वा सूत्रगतेरिति ॥ देवपरिणामाधिकारादनगाररूपद्रव्यदेवपरिणामसूत्रानि—

**मू. (१८८)** *अनगारे णं भंते ! भावियप्पा बाहिरए पोग्गले अपरियाइत्ता पभू वेभारं पव्वयं उल्लंघेत्तए वा पलंघेत्तए वा ?, गोयमा ! नो तिणट्ठे समट्ठे । अनगारे णं भंते ! भावियप्पा बाहिरए पोग्गले परियाइत्ता पभू वेभारं पव्वयं उल्लंघेत्तए वा पलंघेत्तए वा ?, हंता पभू । अनगारे णं भंते ! भावियप्पा बाहिरए पोग्गले अपरियाइत्ता जावइयाइं रायगिहे नगरे रूवाइं एवइयाइं विकुव्वित्ता वेभारं पव्वयं अंतो अनुप्पविसित्ता पभू समं वा विसमं करेत्तए विसमं वा समं करेत्तए गोयमा ! नो इणट्ठे समट्ठे, एवं चेव बितिओऽवि आलावगो नवरं परियातित्ता पभू ।*

*से भंते ! किं माई विकुव्वति अमाई विकुव्वइ ?, गोयमा ! माई विकुव्वइ नो अमाई*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विकुव्वति, से केणट्ठेणं भंते ! एवं वुच्चइ जाव नो अमाई विकुव्वइ ?, गोयमा ! माईणं पणीयं पाणभोयणं भोच्चा २ वामेति तस्स णं तेणं पणीएणं पाणभोयणेणं अट्ठि अट्ठिमिंजा बहली- भवंति पयणुए मंससोनिए भवति, जेविय से अहाबायरा पोग्गला तेविय से परिणमंति, तंजहा- सोतिंदियत्ताए जाव फासिंदियत्ताए अट्ठिअट्ठिमिंजकेसमंसुरोमनहत्ताए सुक्कत्ताए सोनियत्ताए, अमाई णं लूहं पाणभोयणं भोच्चा २ नो वामेइ, तस्स णं तेणं लूहेणं पाणभोयणेणं अट्ठिअट्ठिमिंजा० पयणु भवति बहले मंससोनिए, जेविय से अहाबादरा पोग्गला तेविय से परिणमंति, तंजहा- उच्चारत्ताए पासवणत्ताए जाव सोनियत्ताए, से तेणट्ठेणं जाव नो अमाई विकुव्वइ ।*

*माईणं तस्स ठाणस्स अणालोइयपडिक्कंते कालं करेइ नत्थि तस्स आराहणा । अमाई णं तस्स ठाणस्स आलोइयपडिक्कंते कालं करेइ अत्थि तस्स आराहणा । सेवं भंते ! सेवं भंते ! त्ति ।*

**वृ.** 'बाहिरए'त्ति औदारिकशरीरव्यतिरिक्तान् वैक्रियानित्यर्थः 'वेभारं'ति वैभाराभिधानं राजगृहक्रीडापर्वतं 'उल्लंधित्तए वे'त्यादि तत्रोल्लङ्घनं सकृत् प्रलङ्घनं पुनः पुनरिति, 'नो इणट्ठे समट्ठे'त्ति वैक्रियपुद्‌गलपर्यादानं विना वैक्रियकरणस्यैवाभवात्, बाह्यपुद्‌गलपर्यादाने तु सति पर्वतस्योल्लङ्घनादौ प्रभुः स्यात्, महतः पर्वतातिक्रामिणः शरीरस्य सम्भवादिति, 'जावइयाइं'इत्यादि यावन्ति रूपानि पशुपुरुषादिरूपानि 'एवइयाइं'ति एतावन्ति 'विउव्वित्त'त्ति वैक्रियानि कृत्वा वैभारं पर्वतं समं सन्तं विषमं विषमं तु समं कर्त्तुमिति सम्बन्धः, किं कृत्वेत्याह-'अन्तः' मध्ये वैभारस्यैवानुप्रविश्य ।

'मायी'ति मायावान्, उपलक्षणत्वादस्य सकषायः प्रमत्त इतियावत्, अप्रमत्तो हि न वैक्रियं कुरुत इति, 'पणीयं' ति प्रणीतं गलत्स्नेहबिन्दुकं 'भोच्चा भोच्चा वामेति' वमनं करोति विरेचनं वा करोति वर्णबलाद्यर्थं, यथा प्रणीतभोजनं तद्वमनं च विक्रियास्वभावं मायित्वाद्भवति एवं वैक्रियकरणमपीति तात्पर्यं, 'बहलीभवन्ति'घनीभवन्ति, प्रणीतसामर्थ्यात्, 'पयणुए'त्ति अधनम् 'अहाबायर'त्ति यथोचितबादराः आहारपुद्‌गला इत्यर्थः परिणमन्ति श्रोत्रेन्द्रियादित्वेन, अन्यथा शरीरस्य दाढर्यासम्भवात्, 'लूहं'ति 'रूक्षम्' अप्रणीतं 'नोवामेइ'त्ति अकषायितया विक्रियाया- मनर्थित्वात्, 'पासवणत्ताए' इह यावत्करणादिदं दृश्यम्-'खेलत्ताए सिंघाणत्ताए वंतत्ताए पित्तत्ताए पूयत्ताए'त्ति, रूक्षभोजिन उच्चा रादितयैवाहारादिपुद्‌गलाः परिणमन्ति अन्यथा शरीरस्यासारताऽ- नापत्तेरिति ।। अथ माय्यमायिनोः फलमाह-'माई णं'मित्यादि, 'तस्स ठाणस्स'त्ति तस्मात्स्थाना- द्विकुर्वणाकरणलक्षणात्प्रणीतभोजनलक्षणाद्वा, 'अमाई ण'मित्यादि, पूर्वं मायित्वाद्वैक्रियं प्रणीतभोजनं वा कृतवान् पश्चाज्जातानुतापोऽमायी सन् तस्मात्स्थानादालोचितप्रतिक्रान्तः सन् कालं करोति यस्तस्यास्त्याराधनेति ।

शतकं-३ उद्देशकः-४ समाप्तः

## —: शतकं-३ उद्देशकः-५ :—

**वृ.** चतुर्थोद्देशके विकुर्वणोक्ता, पञ्चमेऽपि तामेव विशेषत आह-

**मू. (१८९)** *अनगारे णं भंते ! भावियप्पा बाहिरए पोग्गले अपरियाइत्ता पभू एगं महं इत्थिरूवं वा जाव संदमानियरूवं वा विउव्वित्तए ? नो ति०, अनगारे णं भंते ! भावियप्पा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाहिरए पोग्गले परियाइत्ता पभू एगं महं इत्थिरूवं वा जाव संदमानियरूवं वा विउव्वित्तए ?, हंता पभू, अनगारे णं भंते ! भावि, केवतियाइं पभू इत्थिरूवाइं विकुव्वित्तए ?, गोयमा ! से जहानामए जुवइं जुवाणे हत्थेणं हत्थे गेण्हेज्ञा चक्कस्स वा नाभी अरगा उत्तासिया एवामेव अनगारेवि भावियप्पा वेउव्वियसमुग्घाएणं समोहणइ जाव पभू णं गोयमा ! अनगारेणं भावियप्पा केवलकप्पं जंबूद्दीवं बहुहं इत्थीरूवेहिं आइन्नं वितिकिन्नं जाव एस णं गोयमा ! अनगारस्स भावि० अयमेयारूवे विसए विसयमेत्ते वुच्चइ नो चेव णं संपत्तीए विकुव्विंसु वा ३, एवं परिवाडिए नेयव्वं जाव संदमानिया ।

से जहानामए केइ पुरिसे असिचम्मपायं गहाय गच्छेज्ञा एवामेव भावियप्पा अनगारे वि असिचम्मपायहत्थकिच्चगएणं अप्पाणेणं उड्ढं वेहासं उप्पइज्ञा ?, हंता उप्पइज्ञा, अनगारे णं भंते ! भावियप्पा केवतियाइं पभू असिचम्मपायहत्थकिच्चगयाइं रूवाइं विउव्वित्तए ?, गोयमा ! से जहानामए-जुवतिं जुवाणे हत्थेणं हत्थे गेण्हेज्ञा तं चेव जाव विउव्विंसु वा ३ ।

से जहानामए केइ पुरिसे एगओपडागं काउं गच्छेज्ञा, एवामेव अनगारेवि भावियप्पा एगओपडागहत्थकिच्चगएणं अप्पाणेणं उड्ढं वेहासं उप्पएज्ञा ? हंता गोयमा ! उप्पएज्ञा, अनगारे णं भंते ! भावियप्पा केवतियाइं पभू एगओपडागाहत्थकिच्चगयाइं रूवाइं विकुव्वित्तए ? एवं चेव जाव विकुव्विंसु वा ३ । एवं दुहओपडागंपि ।

से जहानामए-केइ पुरिसे एगओजंनोवइतं काउं गच्छेज्ञा, एवामेव अण० भा० एगओजन्नोवइयकिच्चगएणं अप्पाणेणं उड्ढं वेहासं उप्पएज्ञा ? हंता ! उप्पएज्ञा, अनगारे णं भंते भावियप्पा केवतियाइं पभू एगओजण्णो वइयकिच्चगयाइं रूवाइं विकुव्वित्तए तं चेव जाव विकुव्विंसु वा ३, एवं दुहओजन्नोवइयंपि ।

से जहानामए-केइ पुरिसे एगओ पल्हत्थियं काउं चिट्ठेज्ञा, एवामेव अनगारेवि भावियप्पा एवं चेव जाव विकुव्विंसु वा ३ एवं दुहओ पलियंकं पि । अनगारे णं भंते ! भावियप्पा बाहिरए पोग्गले अपरियाइत्ता पभू एगं महं आसरूवं वा हत्थिरूवं वा सीहरूवं वा वग्घवगदीवियअच्छतर-च्छपरासररूवं वा अभिभुंजित्तए ?, नो तिणट्ठे समट्ठे, अनगारे णं एवं बाहिरए पोग्गले परियादित्ता पभू । अनगारे णं भंते ! भा० एगं महं आसरूवं वा अभिभुंजित्ता अनेगाइं जोयणाइं गमित्तए ? हंता ! पभू ।

से भंते ! किं आयड्डीए गच्छति परिड्डीए गच्छति ?, गोयमा ! आइड्डीए गच्छइ नो परिड्डीए, एवं आयकम्मुणा नो परकम्मुणा आयप्पओगेणं नो परप्पओगेणं उस्सिओदयं वा गच्छइ पयोदगं वा गच्छइ । से णं भंते ! किं अनगारे आसे ? गोयमा ! अनगारे णं से नो खलु से आसे, एवं जाव परासररूवं वा ।

से भंते ! किं मायी विकुव्वति मायी विकुव्वति ?, गोयमा ! मायी विकुव्वति नो अमायी विकुव्वति, माई णं भंते ! तस्स ठाणस्स अनालोइयपडिक्कंते कालं करेइ कहिं उववज्ञति ?, गोयमा ! अन्नयरेसु आभियोगेसु देवलोगेसु देवत्ताए उववज्ञइ, अमाई णं तस्स ठाणस्स आलोइ-यपडिक्कंते कालं करेइ कहिं उववज्ञति ?, गोयमा ! अन्नयरेसु अणाभिओगेसु देवलोगेसु देवत्ताए उववज्ञइ, सेवं भंते २ त्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'अनगारेण'मित्यादि, 'असिचम्मपायं गहाय'त्ति असिचर्मपात्रं-स्फुरकः, अथवाऽसिश्च-खडः चर्मपात्रं च-स्फुरकः खड्गकोशको वा असिचर्मपात्रं तद् गृहीत्वा 'असिचम्मपायहत्थकिच्चगएणं अप्पाणेणं'ति असिचर्मपात्रं हस्ते यस्य स तथा कृत्यं-सङ्घादिप्रयोजनं गतः-आश्रितः कृतयगतः ततः कर्मधारयः, अतस्तेनात्मना, अथवाऽसिचर्मपात्रं कृत्वा हस्ते कृतं येनासौ असिचर्मपात्र-हस्तकृत्वाकृतस्तेन, प्राकृतत्वाच्चैवं प्रतीतश्च 'वग'त्ति वृकः 'दीविय'त्ति चतुष्पदविशेषः 'अच्छ'त्ति ऋक्षः 'तरच्छ'त्ति व्याघ्रविशेषः 'परासर'त्ति सरभः, इहान्यान्यपि श्रृगालादिपदानि वाचनान्तरे दृश्यन्ते ।

'अभिमुंजित्तए'त्ति 'अभियोक्तुं' विद्यादिसामर्थ्यतस्तदनुप्रवेशेन व्यापारयितुं, यच्च स्वस्यानुप्रवेशनेनाभियोजनं तद्विद्यादिसामर्थ्योपात्तबाह्यपुद्गलान् विना न स्यादितिकृत्वोच्यते-'नो बाहिरए पुग्गले अपिरयाइत्त'त्ति । 'अनगारे णं से'-त्ति अनगार एवासौ तत्त्वतोऽनगारस्यैवाश्वाद्यनुप्रवेशेन व्याप्रियमाणत्वात् । 'माई अभिभुंजइ'त्ति कषायवानभियुङ्क्ते इत्यर्थः, अधिकृतवाचनायां 'माई विउव्वइ'त्ति दृश्यते, तत्र चाभियोगोऽपि विकुर्वणेतिं, मन्तव्यं, विक्रियारूपत्वात्तस्येति, 'अन्नयरेसु'त्ति आभियोगिकदेवा अच्युतान्ता भवन्तीतिकृत्वाऽन्यतरेष्वित्युक्तं, केषुचिदित्यर्थः, उत्पद्यते चाभियोजनभावानायुक्तः साधुराभियोगिकदेवेषु, करोति च विद्यादिलब्ध्युपजीवकोऽभियोगभावनां, यदाह-

॥१॥ "मंता जोगं काउं भूईकम्मं तु जो पउंजेति ।
सायरसइड्ढिहेउं अभिओगं भावणं कुणइ ॥

**मू. (१९०)** *इत्थीअसीपडागा जन्नोवइए य होइ बोद्धव्वे ।*
*पल्हत्थियपलियंके अभिओगविकुव्वणा माई ॥*

**वृ.** 'इत्थी' त्यादिसङ्ग्रहगाथा गतार्था ॥

शतकं-३ उद्देशकः-५ समाप्तः

## -: शतकं-३ उद्देशकः-६ :-

**वृ.** विकुर्वणाऽधिकारसंबद्ध एव षष्ठ उद्देशकः, तस्य चादिसूत्रम्-

**मू. (१९१)** *अनगारे णं भंते ! भावियप्पा माई मिच्छदिट्ठी वीरियलद्धीए वेउव्वियलद्धीए विभंगनाणलद्धीए वाणारसिं नगरिं समोहए समोहनित्ता रायगिह नगरे रूवाइं जाणति पासति हंता जाणइ पासइ । से भंते ! किं तहाभावं जाण० पा० अन्नहाभावं जा० पा० ?, गोयमा ! नो तहाभावं जाण० पा० अन्नहाभावं जा० पा० । से केणट्ठेणं भंते ! एवं वुच्च नो तहाभावं जा० पा० अन्नहाभावं जाण० पा० ?, गोयमा ! तस्स णं एवं भवति-एवं खलु अहं रायगिहे नगरे समोहए समोहनित्ता वाणारसीए नगरीए रूवाइं जाणामि पासामि, से से दंसणे विवच्चासे भवति, से तेणट्ठेणं जाव पासति ।*

*अनगारे णं भंते ! भावियप्पा माई मिच्छदिट्ठी जाव रायगिहे नगरे समोहए समोहनित्ता वाणारसीए नगरीए रूवाइं जाणइ पासइ ?, हंता जाणइ पासइ, तं चेव जाव तस्सं णं एवं होइ-एवं खलु अहं वाणारसीए नगरीए समोहए २ रायगिहे नगरे रूवाइं जाणामि पासामि, से से दंसणे विवच्चासे भवति, से तेणट्ठेणं जाव अन्नहाभावं जाणइ पासइ ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनगारे णं भंते ! भावियप्पा माई मिच्छदिट्ठी वीरियलद्धीए वेउव्वियलद्धीए विभंगनाणलद्धीए वाणारसिं नगरिं रायगिहं च नगरं अंतरा एगं महं जणवयवग्गं समोहए २ वाणारसिं नगरिं रायगहं च नगरं अंतरा एगं महं जणवयवग्गं जाणति पासति से भंते ! किं तहाभावं जाणइ पासइ अन्नहाभावं जाणइ पा० ?, गोयमा ! नो तहाभावं जाणति पासइ अन्नहाभावं जाणइ पासइ, से केणट्ठेणं जाव पासइ ? गोयमा ! तस्स खलु एवं भवति एस खलु वाणारसी नगरी एस खलु रायगिहे नगरे एस खलु अंतरा एगे महं जणवयवग्गे नो खलु एस महं वीरियलद्धी वेउव्वियलद्धी विभंगनाणल० इड्ढी जुत्ती जसे बले वीरिए पुरिसक्कारपरक्कमे लद्धे पत्ते अभिसमन्नागए, से से दंसणे विवच्चासे भवति, से तेणट्ठेणं जाव पासति ॥*

**वृ.** 'अनगारेण'मित्यादि, अनगारो गृहवासत्यागाद् भावितात्मा स्वसमयानुसारिप्रशमादिभिः मायीत्युपलक्षणत्वात्कषायवान्, सम्यग्दृष्टिरप्येवं स्यात्याह-मिथ्यादृष्टिरन्यतीर्थिःक इत्यर्थः, वीर्यलब्ध्यादिभिः करणभूताभिः 'वाणारसिं नगरिं समोहए'त्ति विकुर्वितवान्, राजगृहे नगरे रूपानि पशुपुरषप्रासादप्रभृतीनि जानाति पश्यति विभङ्गज्ञानलब्ध्या 'नो तहा भावं'ति यथा वस्तु तथा भावः-अभिसन्धिर्यत्र ज्ञाने तत्तथाभावं अथवा यथैव संवेद्यते तथैव भावो-बाह्यं वस्तु यत्र तत्तथाभावं अन्यथा भावो यत्र तदन्यथाभावं, क्रियाविशेषणे चेमे, स हि मन्यते-

अहं राजगृहं नगरं समवहतो वाराणस्यां रूपाणि जानामि पश्यामीत्येवं 'से'त्ति तस्यानगारस्येति 'से'त्ति असौ दर्शनि विपर्यासो-विपर्ययो भवति, अन्यदीयरूपाणामन्यदीयतया विकल्पितत्वात्, दिग्मोहादिव पूर्वामपि पश्चिमां मन्यमानस्येति, क्वचित् 'से से दंसणे विवरीए विवच्चासे'त्ति दृश्यते तत्र च तस्य तद्दर्शनं विपरीतं पूर्वामपि पश्चिमां मन्यमानस्येति, विपरीतं क्षेत्रव्यत्ययेनेतिकृत्वा विपर्यासो-मिथ्येत्यर्थः। एवं द्वितीयसूत्रमपि ॥

**मू. (१९२)** *अनगारे णं भंते ! भावियप्पा अमाई सम्मदिट्ठी वीरियलद्धीए वेउव्वियलद्धीए ओहिनाणलद्धीए रायगिहे नगरे समोहए २ वाणारसीए नगरीए रूवाइं जाणइ पासइ ?, हंता, से भंते ! किं तहाभावं जाणइ पासइ अन्नहाभावं जाणति पासति ?, गोयमा ! तहाभावं जाणति पासति नो अन्नहाभावं जाणति पासति । से केणट्ठेणं भंते ! एवं वुच्चइ ?, गोयमा ! तस्स णं एवं भवति-एवं खलु अहं रायगिहे नगरे समोहनित्ता वाणारसीए नगरीए रूवाइं जाणामि पासामि, से से दंसणे अविवच्चासे भवति, से तेणट्ठेणं गोयमा ! एवं वुच्चति, बीओ आलावगो एवं चेव नवरं वाणारसीए नगरीए समोहणा नेयव्वा रायगिहे नगरे रूवाइं जाणइ पासइ ।*

*अनगारे णं भंते ! भावियप्पा अमाई सम्मदिट्ठी वीरियलद्धीए वेउव्वियलद्धीए ओहिनाणलद्धीए रायगिहं नगरं वाणारसिनगरिं च अंतरा एगं महं जणवयवग्गं समोहए २ रायगिहं नगरं वाणारसिं च नगरिं तं च अंतरा एगं महं जणवयवग्गं जाणइ पासइ ?, हंता जा० पा०, से भंते ! किं तहाभावं जाणइ पासइ अन्नहाभावं जाणइ पासइ ?, गोयमा ! तहाभावं जाणइ पा०, नो अन्नहा भावं जा० पा० । से केणट्ठेणं ? गोयमा ! तस्स णं एवं भवति-नो खलु एस रायगिहे नगरे नो खलु एस वाणारसी नगरी नो खलु एस अंतरा एगे जणवयवग्गे एस खलु ममं वीरियलद्धी वेउव्वियलद्धी ओहिनाणलद्धी इड्ढी जुत्ती जसे बले वीरिए पुरिसकार परक्कमे लद्धे पत्ते अभिसमन्नागए से से दंसणे अविवच्चासे भवति से तेणट्ठेणं गोयमा ! एवं वुच्चति तहाभावं जाणति पासति नो*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अन्नहा भावं जाणति पासति ।*

*अनगारे णं भंते ! भावियप्पा बाहिरए पोग्गले अपरियाइत्ता पभू एगं महं गामरूवं वा नगररूवं वा जाव सन्निवेसरूवं वा विकुव्वित्तए ?, नो तिणट्ठे समट्ठे, एवं बितिओवि आलावगो, नवरं बाहिरए पोग्गले परियाइत्ता पभू । अनगारे णं भंते ! भावियप्पा केवतियाइं पभू गामरूवाइं विकुव्वित्तए ?, गोयमा ! से जहानामए जुवतिं जुवाणे हत्थेणं हत्थे गेण्हेज्ञा तं चेव जाव विकुव्विंसु वा ३ एवं जाव सन्निवेसरूवं वा ॥*

**वृ.** तृतीये तु 'वाणारसिं च नगरिं रायगिहं नगरं अंतरा य एगं महं जणवयवग्गं समोहए' त्ति वाणारसीं राजगृहं तयोरेव चान्तरालवर्त्तिनं 'जनपदवर्गं' देशसमूहं समवहतो विकुर्व्वितवान् तथैव च तानि विभङ्गतो जानाति पश्यति केवलं नो तथाभावं, यतोऽसौ वैक्रियाण्यपि तानि मन्यते स्वाभाविकानीति, 'जसे' त्ति यशोहेतुत्वाद्यशः, 'नगररूवं वा' इह यावत्करणादिदं दृश्यं- 'निगमरूवं वा रायहानिरूवं वा खेडरूवं वा मंडबरूवं वा दोणमुहरूवं वा पट्टणरूवं वा आगरूवं वा आसमरूवं वा संवाहरूवं व' त्ति ।

विकुर्व्वणाधिकारात्तत्समर्थःदेवविशेषप्ररूपणाय सूत्राणि-

**मू. (१९३)** *चमरस्स णं भंते ! असुरिंदस्स असुररन्नो कति आयरक्खदेवसाहस्सी प० ? गोयमा ! चत्तारि चउसट्ठीओ आयरक्खदेवसाहस्सीओ पन्नत्ताओ, ते णं आयरक्खा वन्नओ जहा रायप्पसेणइज्ने, एवं सव्वेसिं इंदाणं जस्स जत्तिया आयरक्खा भानियव्वा । सेवं भंते २ ॥*

**वृ.** 'वन्नओ' त्ति आत्मरक्षदेवानां वर्णको वाच्यः, स चायम-'सन्नद्धबद्धवम्मियकवय-उप्पीलियसरासणयपट्टिया पिणद्धगेवेज्ञा बद्धआविद्धविमलवरचिंधपट्टा गहियाउहपहरणा तिणयाइं तिसंधियाइं वयरामयकोडीनि धनूइं अभिगिज्झ पयओ परिमाइयकंडकलावा नील-पानिणो पीयपानिणो रत्तपानिणो एवं चारुचावचम्मदंडखग्गपासपानिणो नीलपीयरत्त-चारुचावचम्मदंडखग्गपासवराधरा आयरक्खा रक्खोवगया गुत्ता गुत्तपालिया जुत्ता जुत्तपालिया पत्तेयं पत्तेयं समयओ विनयओ किंकरभूया इव चिट्ठंति' त्ति अस्यायमर्थः-संनद्धाः-संनिहतिकया कृतसन्नाहाः बद्धः कशाबन्धनतः वर्मितश्च वर्मीकृतः शरीरारोपणतः कवचः-कङ्कटो यैस्ते तथा ततः सन्नद्धशब्देन कर्मधारयः, तथोत्पीडिता प्रत्यञ्चारोपणेन शरासनपट्टिका-धनुर्यष्टिर्यैस्ते तथा अथवा उत्पीडिता-बाहौ बद्धा शरासनपट्टिका-धनुर्द्धरप्रतीता यैस्ते तथा, तता पिनद्धं परिहितं ग्रैवेयकं-ग्रीवाभरणं यैस्ते तथा, तथा बद्धो ग्रन्थिदानेन आविद्धश्च शिरस्यारोपणेन विमलो वरश्च चिह्नपट्टो-योधतासूचको नेत्रादिवस्त्ररूपः सौवर्णो वा पट्टो यैस्ते तथा, तथा गृहीतान्यायुधानि प्रहरणाय यैस्ते तथा, अथवा गृहीतान्यायुधानि-क्षेप्यास्त्रानि प्रहरणानि च-तदितराणी यैस्ते तथा 'त्रिनतानि' मध्यपार्श्वद्वयलक्षणे स्थानत्रयेऽवनतानि, 'त्रिसन्धितानि' त्रिषु स्थानके, कृतसन्धिकानि नैकाङ्किकानीत्यर्थः, वज्रमयकोटीनि धनूंषि अभिगृह्य पदतः-पदे मुष्टिस्थाने-तिष्ठन्तीति सम्बन्धः, परिमात्रिकः-सर्वतो मात्रावान् काण्डकलापो येषां ते तथा, नीलपाणय इत्यादिषु नीलादि- वर्णपुङ्खत्वान्नीलादयो बाणभेदाः संभाव्यन्ते, चारुचापपाणय इत्यत्र चापं-धनुरेवानारोपितज्यमतो न पुनरुक्तता, चर्मपाणय इत्यत्र चर्म्मशब्देन स्फुरक उच्यते, दण्डादयः प्रतीताः, उक्तमेवार्थं सङ्ग्रहणेनाह-'नीलपीए' त्यादि, अथवा नीलादीन् सर्वानेव युगपत्केचिद्धार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्ति देवशक्तेरिति दर्शयन्नाह-'नीलपीए'त्यादि, ते चात्मरक्षा न सञ्ज्ञामात्रेणैवेत्याह–

आत्मरक्षाः स्वाम्यात्मरक्षा इत्यर्थः, त एव विशेष्यन्ते-'रक्षोपगताः' रक्षामुपगताः सततं प्रयुक्तरक्षा इत्यर्थः, एतदेव कथमित्याह-'गुप्ताः' अभेदवृत्तयः, तथा 'गुप्तपालिकाः' तदन्यतो व्यावृत्तमनोवृत्तिकाः मण्डलीकाः 'युक्ताः' परस्परसंबद्धाः 'युक्तपालिकाः' निरन्तरमण्डलीकाः प्रत्येकम्-एकैकशः समयतः-पदातिसमाचारेण विनयतो-विनयेन किङ्करभूता इव-प्रेष्यत्वं प्राप्ता इवेति, अयं च पुस्तकान्तरे साक्षाद्दृश्यत एवेति।

'एवं सव्वेसिमिंदाणं'ति एवमिति-चमरवत् सर्वेषामिन्द्राणां सामानिकचतुर्गुणा आत्मरक्षा वाच्याः, ते चार्थःत एवं-सर्वेषामिन्द्राणा सामानिकचतुर्गुणा आत्मरक्षाः, तत्र चतुःषष्टि सहस्राणि चमरेन्द्रस्येन्द्रसामानिकानां बलेस्तु षष्टि शेषभवनपतीन्द्राणां प्रत्येकं षट् सहस्राणि शक्रस्य चतुरशीति ईशानस्याशीति सनत्कुमारस्य द्विसप्तति माहेन्द्रस्य सप्तति ब्रह्मणः षष्टिः लान्तकस्य पञ्चाशत् शुक्रस्य चत्वारिंशत् सहस्रारस्य त्रिंशात् प्राणतस्य विंशतिः अच्युतस्य दश सहस्राणि सामानिकानामिति, यदाह–

॥१॥ "चउसट्ठी सट्ठी खलु छच्च सहस्सा उ असुरवज्ञाणं।
सामानिया उ एए चउग्गुणा आयरक्खा उ॥
॥२॥ चउरासीइ असीई बावत्तरि सत्तरी य सट्ठी य।
पन्ना चत्तालीसा तीसा वीसा दस सहस्सा॥ इति॥

शतकं-३ उद्देशकः-६ समाप्तः

## –: शतकं-३ उद्देशकः-७ :–

**वृ.** षष्ठोद्देशके इन्द्राणामात्मरक्षा उक्ताः, अथ सप्तमोद्देशके तेषामेव लोकपालान् दर्शयितुमाह-

**मू. (१९४)** *रायगिहे नगरे जाव पज्जुवासमाणे एवं वयासी-सक्कस्स णं भंते! देविंदस्स देवरन्नो कति लोगपाला पन्नत्ता?, गोयमा! चत्तारि लोगपाला पन्नत्ता, तंजहा-सोमे जमे वरुणे वेसमणे। एएसि णं भंते! चउण्हं लोगपालाणं कति विमाणा पन्नत्ता?, गोयमा! चत्तारि विमाणा पन्नत्ता, तंजहा-संझप्पभे वरसिट्ठे सयंजले वग्गू। कहिं णं भंते! सक्कस्स देविंदिस्स देवरन्नो सोमस्स महारन्नो संझप्पभे नामं महाविमाणे पन्नत्ते?*

*गोयमा! जंबूद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए बहुसमरमनिज्ञाओ भूमिभागाओ उड्ढं चंदिमसूरियगहगणनक्खत्ततारारूवाणं बहूइं जोयणाइं जाव पंच वडिंसया पन्नत्ता, तंजहा-असोयवडेंसए सत्तवन्नवडिंसए चंपयवडिंसए चूयवडिंसए मज्झे सोहम्मवडिंसए, तस्स णं सोहम्मवडेंसयस्स महाविमाणस्स पुरच्छिमेणं सोहम्मे कप्पे असंखेज्ञाइं जोयणाइं वीतिवइत्ता एत्थ णं सक्कस्स देविंदस्स देवरन्नो सोमस्स महारन्नो संझप्पभे नामं महाविमाणे पन्नत्ते अद्धतेरस जोयणसयसहस्साइं आयामविक्खंभेणं उयालीसं जोयणसयसहस्साइं बावन्नं च सहस्साइं अट्ठ य अडयाले जोयणसए किंचिविसेसाहिए परिक्खेवेणं प० जा सूरियाभविमाणस्स वत्तव्वया सा अपरिसेसा भानियव्वा जाव अभिसेयो नवरं सोमे देवे।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संझप्पभस्स णं महाविमाणस्स अहे सपक्खिं सपडिदिसिं असंखेज्जाइं जोयणसयसहस्साइं ओगाहित्ता एत्थ णं सक्कस्स देविंदस्स देवरन्नो सोमस्स महारन्नो सोमा नामं रायहाणी पन्नत्ता एगं जोयणसयसहस्सं आयामविक्खंभेणं जंबूद्दीवपमाण वेमानियाणं पमाणस्स अद्धं नेयव्वं जाव उवरियलेणं सोलस जोयणसहस्साइं आयामविक्खंभेणं पन्नासं जोयणसहस्साइं पंच य सत्तानउए जोयणसते किंचिविसेसूणे परिक्खेवेणं पन्नत्ते पासायाणं चत्तारि परिवाडीओ नेयव्वाओ, सेसा नत्थि।*

*सक्कस्स णं देविंदस्स देवरन्नो सोमस्स महारन्नो इमे देवा आणाउववायवयणनिद्देसे चिट्ठंति, तंजहा-सोमकाइयाति वा सोमदेवयकाइयाति वा विज्जुकुमारा विज्जुकुमारीओ अग्गिकुमारा अग्गिकुमारीओ वाउकुमारा वाउकुमारीओ चंदा सूरा गहा नक्खत्ता तारारूवा जे यावन्ने तहप्पगारा सव्वे ते तब्भत्तिया तप्पक्खिया तब्भारिया सक्कस्स देविंदस्स देवरन्नो सोमस्समहारन्नो आणाउववायवयणनिद्देसे चिट्ठंति।*

*जंबूद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं जाइं इमाइं समुप्पज्जंति, तंजहा-गहदंडाति वा गहमुसलाति वा गहगज्जियाति वा, एवं गहयुद्धाति वा गहसिंघाडगाति वा गहावसव्वाइ वा अब्भाति वा अब्भरुक्खाति वा संज्झाइ वा गंधव्वनगराति वा उक्कापायाति वा दिसीदाहाति वा (निग्घायाइ वा) गज्जियाति वा विज्जुयाति वा पंसुवुट्ठीति वा जूवेत्ते वा जक्खालित्तत्ति धूमियाइ वा महियाइ वा रयुग्घयाइ वा चंदोवरागाति वा सूरोवरागाति वा चंदपरिवेसाति वा सूरपरिवेसाति वा पडिचंदाइ वा पडिसूराति वा इंदधणूति वा उदगमच्छकपिहसियअमोहापाईणवायाति वा पडीणवाताति वा जाव संवट्टयवाताति वा गामदाहाइ वा जाव सन्निवेसदाहाति वा पाणक्खया जणक्खया धणक्खया कुलक्खया वसणब्भूया।*

*अनारिया जे यावन्ने तहप्पगारा न ते सक्कस्स देविंदस्स देवरन्नो सोमस्स महारन्नो अन्नाया अदिट्ठा असुया अमुया अविन्नाया तेसिं वा सोमकाइयाणं देवाणं, सक्कस्स णं देविंदस्स देवरन्नो सोमस्स महारन्नो इमे आहावच्चा अभिन्नाया होत्था, तंजहा-इंगालए वियालए लोहियक्खे सनिच्चरे चंदे सूरे सुक्के बुहे बवहस्सती राहू॥ सक्कस्स णं देविंदस्स देवरन्नो सोमस्स महारन्नो सत्तिभागं पलिओवमं ठिती पन्नत्ता, अहावच्चाभिन्नायाणं देवाणं एगं पलिओवमं ठिई पन्नत्ता, एवमहिड्डीए जाव महानुभागे सोमे महाराया।*

**वृ.** 'रायगिहे' इत्यादि, 'बहूइं जोयणाइं' इह यावत्करणादिदं दृश्यम्-'बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं बहूओ जोयणकोडीओ बहूओ जोयणकोडाकोडीओ उड्ढं दूरं वीइवइत्ता एत्थ णं सोहम्मे नामं कप्पे पन्नत्ते पाईणपडीणायए उदीणदाहिणविच्छिन्ने अद्धचंदसंठाणसंठिए अच्चिमालिभासरासिवन्नाहे असंखेज्जाओ जोयण कोडाकोडीओ आयामविक्खंभेणं असंखेज्जाओ जोयणकोडाकोडीओ परिक्खेवेणं एत्थ णं सोहम्माणं देवाणं बत्तीसं विमाणावाससयसहस्साइं भवन्तीति अक्खाया। ते णं विमाणा सव्वरयणामया अच्छा जाव पडिरूवा, तस्स मं सोहम्मकप्पस्स बहुमज्झदेस- भाए' इति, 'वीइवइत्त' त्ति व्यतिव्रज्य-व्यतिक्रम्य 'जा सूरियाभविमाणस्स' त्ति सूरिकाभविमानं राजप्रश्नीयोपाङ्गोक्तस्वरूपं तद्वक्तव्यतेह वाच्या, तत्समानलक्षणत्वादस्येति, कियती सा वाच्या? इत्याह-'यावदभिषेकः' अभिनवोत्पन्नस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोमस्य राज्याभिषेकं यावदिति, सा चेहातिबहुत्वान्न लिखितेति।

'अहे'इति तिर्यग्लोके 'वेमानिया ण पमाणस्स'त्ति वैमानिकानां सौधर्मविमान-सत्कप्रासादप्राकारद्वारादीनां प्रमाणस्येह नगर्यामर्द्धं ज्ञातव्यं 'सेसा नत्थि'त्ति सुधर्मादिकासभा इह न सन्ति, उत्पत्तिस्थानेष्वेव तासां भावात्, 'सोमकाइय'त्ति सोमस्य कायो-निकायो येषामस्ति ते सोमकायिकाः-सोमपरिवारभूताः 'सोमदेवकाइय'त्ति सोमदेवताः-तत्सामानिकादयस्तासां कायो येषामस्ति ते सोमदेवताकायिकाः सोमसामानिकादिदेवपरिवारभूता इत्यर्थः, 'ताराख्व'त्ति तारकरूपाः 'तब्भत्तिय'त्ति तत्र-सोमे भक्ति-सेवा बहुमानो वा येषां ते तद्भक्तिकाः 'तप्पक्खिय'त्ति सोमपाक्षिकाः' सोमस्य प्रयोजनेषु सहायाः 'तब्भारिय'त्ति 'तद्भार्या' तस्य सोमस्य भार्या इव भार्या अत्यन्तं वश्यत्वात्पोषणीयत्वाच्चेति तद्भार्या, तद्भारो वा येषां वोढव्यतयाऽस्ति ते तद्भारिकाः

'गहदंड'त्ति दण्डा इव दण्डाः-तिर्यगायताः श्रेणयः ग्रहाणां-मङ्गलादीनां त्रिचतुरादीनां दण्डा ग्रहदण्डाः, एवं ग्रहमुशलादीनि नवरमूर्द्धायताः श्रेणयः, 'गहगज्जिय'त्ति ग्रहसञ्चालादौ गर्जितानि-स्तनितानि ग्रहगर्जितानि 'ग्रहयुद्धानि ग्रहयोरेकत्र नक्षत्रे दक्षिणोत्तरेण समश्रेनि-तयाऽवस्थानानि' 'ग्रहसिङ्घाटकानि'ग्रहाणां सिङ्घाटकफलाकारेणावस्थानानि 'ग्रहापसव्या-नि'ग्रहाणामपसव्यगमानि प्रतीपगमनानीत्यर्थः, अभ्रात्मका वृक्षा अभ्रवृक्षाः 'गन्धर्वनगरानि' आकाशे व्यन्तरकृतानि नगराकाप्रतिबिम्बानि, 'उल्कापाताः' सरेखाः सोद्योता वा तारकस्येव पाताः 'दिग्दाहाः' अन्यतमस्यां दिशि अधोऽन्धकारा उपरि प्रकाशात्मका दह्यमानमहानगर-प्रकाशकल्पाः 'जूवय'त्ति शुक्लपक्षे प्रतिपदादिदिनत्रयं यावद्यै- सन्ध्याछेदा आव्रियन्ते ते यूपकाः 'जक्खालित्तय'त्ति 'यक्षोद्दीप्तानि' आकाशे व्यन्तरकृतज्चलनानि, धूमिकामहिकयोर्वर्णकृतो विशेषः, तत्र धूमिका-धूम्रवर्णा घूसरा इत्यर्थः, महिका त्वापाण्डुरेति, 'रउग्घाय'त्ति दिशां रजस्वलत्वानि 'चंदोवरागा सूरोवरागा' चन्द्रसूर्यग्रहणानि 'पडिचंद'तति द्वितीयचन्द्राः 'उदगमच्छ'त्ति इन्द्रधनुःखण्डानि 'कविहसिय'त्ति अनभ्रे या विद्युत्सहसा तत् कपिहसितम्।

अन्ये त्वाहुः-कपिहसितं नाम यदाकाशे वानरमुखसदृशस्य विकृतमुखस्य हसनम् 'अमोह'त्ति अमोधा आदित्योदयास्तसमययोरादित्यकिरणविकारजनिताः आताम्राः कृष्णाः श्यामा वा शकटोद्धिसंस्थिता दण्डा इति, 'पाईणवाय'त्ति पूर्वदिग्वाताः 'पडीणवाय'त्ति प्रतीचीनवाताः, यावत्करणादिदं दृश्यम्-'दाहिणवायाइ वा उदीणवायाइ वा उड्ढवायाइ वा अहोवायाइ वा तिरिय-वायाइ वा विदिसीवायाइ वा वाउब्भामाइ वा वाउक्कलियाइ वा वायमंडलियाइ वा उक्कलियावायाइ वा मण्डलियावायाइ वा गुंजावायाइ वा झंझावायाइव'त्ति, इह 'वातोद्रामाः' अनवस्थितवाताः 'वातोत्कलिकाः' समुद्रोत्कलिकावत् 'वातमण्डलिका' वातोल्यः 'उत्कलि- कावाताः' उत्कलि-काभिर्ये वान्ति 'मण्डलिकावाताः' मण्डलिकाभिर्ये वान्ति 'गुञ्जवाताः' गुञ्जन्तः सशब्दं ये वान्ति 'झञ्झावाताः' अशुभनिष्ठुराः 'संवर्त्तकवाताः' तृणादिसंवर्त्तनस्वभावा इति।

अथानन्तरोक्तानां ग्रहदण्डादीनां प्रायिकफलानिदर्शयन्नाह—'पाणक्खय'त्ति बलक्षयाः 'जणक्खय'त्ति लोकमरणानि, निगमयन्नाह-'वसणब्भूया अनारिया जे यावन्ने तहप्पगार'त्ति, इहैवमक्षरघटना-न केवं प्राणक्षयादय एव, ये चान्ये एतद्व्यतिरिक्तास्तत्प्रकाराः-प्राणक्षयादितुल्याः 'व्यसनभूताः' आपद्रूपाः 'अनार्या' पापा- त्मकाः न तेऽज्ञाता इति योगः 'अन्नाय'त्ति अनुमानतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अदिट्ठ'त्ति प्रत्यक्षापेक्षया 'असुय'त्ति परवचनद्वारेण 'अमुय'त्ति अस्मृता मनोऽपेक्षया 'अविन्नाय'त्ति अवध्यपेक्षयेति ।

'अहावच्च'त्ति यथाऽपत्यानि तथा ये ते यथाऽपत्या देवाः पुत्रस्थानीया इत्यर्थः, 'अभिन्ना-या'इति अभिमता अभिमतवस्तुकारित्वादिति 'होत्थ'त्ति अभवन्, उपलक्षणत्वाच्चास्य भवन्ति भविष्यन्तीति द्रष्टव्यम्, 'अहावच्चाभिन्नायाणं'ति यथाऽपत्यमेवमभिज्ञाता-अवगता यथाऽप-त्याभिज्ञाताः, अथवा यथाऽपत्याश्च तेऽभिज्ञाताश्चेति कर्म्मधारयः, ते चाङ्गारकादयः पूर्वोक्ताः, एतेषु च यद्यपि चन्द्रसूर्ययोर्वर्षलक्षाद्यधिकं पल्योपमं तथाऽप्याधिक्यस्याविवितत्वादङ्गारकादीनां च ग्रहत्वेन पल्योपमस्यैव सद्भावात् पल्योपममित्युक्तमिति ।

**मू. (१९५)** *कहिणं भंते! सक्कस्स देविंदस्स देवरन्नो जमस्स महारन्नो वरसिट्ठे नामं महाविमाणे पन्नत्ते ?, गोयमा ! सोहम्मवडिंसयस्स महाविमाणस्स दाहिणेणं सोहम्मे कप्पे असंखेज्जाइं जोयणसहस्साइं वीइवतित्ता एत्थ णं सक्कस्स देविंदस्स देवरन्नो जमस्स महारन्नो वरसिट्ठे नामं महाविमाणे पन्नत्ते अद्धतेरस जोयणसयसहस्साइं जहा सोमस्स विमाणे तहा जाव अभिसेओ रायहाणी तहेव जाव पासायपंतीओ ।*

*सक्कस्स णं देविंदस्स देवरन्नो जमस्स महारन्नो इमे देवा आणा० जाव चिट्ठंति, तंजहा-जमकाइयाति वा जमदेवकाइयाइवा पेयकाइया इ वा पेयदेवकाइयाति वा असुरकुमारा असुरकुमारीओ कंदप्पा निरयवाला आभिओगा जे यावन्ने तहप्पगारा सव्वे ते तब्भत्तिगा तप्पक्खिया तब्भारिया सक्कस्स देविंदस्स देवरन्नो जमस्स महारन्नो आणाए जाव चिट्ठंति ।*

*जंबूद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं जाइं इमाइं समुप्पज्जंति, तंजहा-डिंबाति वा डमराति वा कलहाति वा बोलाति वा खाराति वा महायुद्धाति वा महासंगामाति वा महासत्थनिवडणाति वा एवं पुरिसनिवडणाति वा महारुधिरनिवडणाइ वा दुब्भूयाति वा कुलरोगाति वा गामरोगाति वा मंडलरोगाति वा नगररोगाति वा सीसवेयणाइ वा अच्छिवेयणाइवा कन्ननहदंतवेयणाइ वा इंदगाहाइ वा खंदगाहाइ वा कुमारगाहा जक्खगा० भूयगा० एगाहियाति वा बेआहियाति वा तेयाहियाति चाउत्थहियाति वा उव्वेयगाति कासा० (खासाइवा) सासाति वा सोसेतिवा जराइ वा दाहा० कच्छकोहाति वा अजीरया पंडुरगा हरिसाइ वा भगंदराइ वा हिययसुलाति वा मत्थयसू० जोनिसू० पाससू० कुच्छिसू० गाममारीति वा नगर० खेड० कब्बड० दोणमुह० मडंब० पट्टण० आसम० संवाह० संनिवेसमारीति वा पाणक्खया धणक्खया जणक्खया कुल० वसणब्भूयमणारिया जे यावन्ने तहप्पगारा न ते सक्कस्स देविंदस्स देवरन्नो जमस्स महारन्नो अन्नाया० ५ तेसिं वा जमकाइयाणं देवाणं ।*

*सक्कस्स देविंदस्स देवरन्नो जमस्स महारन्नो इमे देवा अहावच्चा अभिन्नाया होत्था, तंजहा-*

**वृ.** 'पेयकाइय'त्ति 'प्रेतकायिकाः' व्यन्तरविशेषाः 'पेयदेवतकाइय'त्ति प्रेतसत्कदेवतानां सम्बन्धिनः 'कंदप्प'त्ति ये कन्दर्प्पभावनाभावितत्वेन कान्दर्पिकदेवेषूत्पन्नाः कन्दर्पशीलाश्च, कन्दर्पश्च-अतिकेलिः, 'आहियोग'त्ति येऽभियोगभावनाभावितत्वेनाभियोगिकदेवेषूत्पन्ना अभियोगवर्त्तिनश्च, अभियोगश्च-आदेश इति ॥ डिंबाइ व'त्ति डिम्बा-विघ्नाः 'डमर'त्ति एकराज्य एव राजकुमारा-दिकृतोपद्रवाः 'कलह'त्ति वचनराटयः 'बोल'त्ति अव्यक्ताक्षरध्वनिसमूहाः 'खार'त्ति परस्परमत्सराः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'महायुद्ध'त्ति महायुद्धानि व्यवस्थाविहीनमहारणाः 'महासंगाम'त्ति सव्यवस्थचक्रादिव्यूहरचनोपेत-महारणाः महाशस्त्रनिपातनादयस्तु त्रयो महायुद्धादिकार्यभूताः ।

'दुब्भूय'त्ति दुष्टा-जनधान्यादीनामुपद्रवहेतुत्वाद् भूताः-सत्त्वाः यूकामत्कुणोन्दुरतिड्डप्रभृतयो दुर्भूता ईतय इत्यर्थः, इन्द्रग्रहादयः उन्मत्तताहेतवः, एकाहिकादयो ज्वरविशेषाः, 'उव्वेयग'त्ति उद्वेगका इष्टवियोगादिजन्या उद्वेगाः उद्वेजका वा लोकोद्वेगकारिणश्चौरादयः 'कच्छकोह'त्ति कक्षाणां-शरीरवयवविशेषाणां वनगहनानां वा कोथाः-कुथितत्वानि शटितानि वा कक्षाकोथाः कक्षकोथा वा ।

**मू. (१९६)** *अंबे १ अंबरिसे चेव २, सामे ३ सबलेत्ति यावरे ४ ।*
*रुद्दो ५-वरुद्दे ६ काले ७ य, महाकालेत्ति यावरे ८ ॥*

**वृ.** 'अम्ब' इत्यादयः पञ्चदशासुरनिकायान्तर्वर्त्तिनः परमाधार्मिकनिकायाः, तत्र यो देवो नारकानम्बरतले नीत्वा विमुञ्चत्यसौ अम्बइत्यभिदीयते १, यस्तु नारकान् कल्पनिकाभि खण्डशः कृत्वा भ्राष्ट्रपाकयोग्यान् करोतीत्यसावम्बरीषस्य-भ्राष्ट्रस्य सम्बन्धादम्बरीष एवोच्यते २, यस्तु तेषां शातनादि करोति वर्णतस्तु श्यामः स श्याम इति ३, 'सबलेत्ति यावरे'त्ति शबल इति चापरो देव इति प्रक्रमः, स च तेषामन्त्रहृदयादीन्युत्पाटयति वर्णतश्च शबलः कर्बुर इत्यर्थः ४ ।

यः शक्तिकुन्तादिषु नारकान् प्रोतयति स रौद्रत्वाद्रौद्र इति ५, यस्तु येषामेवाङ्गोपाङ्गानि भनक्ति सोऽत्यन्तरौद्रत्वादुपरौद्र इति ६, यः पुनः कण्डादिषु पचति वर्णतश्च कालः स काल इति ७, 'महाकालेत्ति यावरे'त्ति महाकाल इति चापरो देव इति प्रक्रमः, तत्र यः श्लक्ष्णमांसानि खण्डयित्वा खादयति वर्णतश्च महाकालः स महाकाल इति ८ ।

**मू. (१९७)** *असिपत्ते ९ धणू १० कुंभे ११ वालू १२ वेयरणीत्ति य १३ ।*
*खरस्सरे १४ महाघोसे १५, एए पन्नरसाहिया ॥*

**वृ.** 'असी य'त्ति यो देवोऽसिना तान् छिनत्ति सोऽसिरेव ९, 'असिपत्ते'त्ति अस्याकारपत्र-वदनवनविकुर्वणादसिपत्रः १०, 'कुंभे'त्ति कुम्भादिषु तेषां पचनात्कुम्भः १, क्वचित्पठ्यते 'असिप-त्तेघणूं कुंभे'त्ति, तत्रासिपत्रकुम्भौ पूर्ववत्, 'घणु'त्ति यो धनुर्विमुक्तार्द्धचन्द्रादिभिर्बाणैः कर्णादीनां छेदनभेदनादि करोति स धनुरिति ११, 'वालु'त्ति कदम्बपुष्पाद्याकारवालुकासु यः पचति स वालुक इति १२ ।

'वेयरणीति य' वैतरणीति च देव इति प्रक्रमः, तत्र पूयरुधिरादिभृतवैतरण्यभिधान-नदीविकुर्वणाद्वैतरणीति १३, 'खरस्सर'त्ति यो वज्रकण्टकाकुलशाल्मलीवृक्षमारोप्य नारकं खरस्वरं कुर्वन्तं कुर्वन् वा कर्षत्यसौ खरस्वरः १४, 'महाघोसि'त्ति, यस्तु भीतान् पलायमानान्नारकान् पशूनिव वाटकेषु महाघोषं कुर्वन्निरुणद्धि स महाघोष इति १५ ।

'एए पन्नर'त्ति 'एवम्' उक्तन्यायेन 'एते' यमयथाऽपत्यदेवाः पञ्चदश आख्याता इति

**मू. (१९८)** *सक्कस्स णं देविंदस्स देवरन्नो जमस्स महारन्नो सत्तिभागं पलिओवमं ठिती पन्नत्ता, अहावच्चाभिन्नायाणं देवाणं एगं पलिओवमं ठिती प०, एवंमहिड्डिए जाव जमे महाराया २ ।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (१९९) कहि णं भंते ! सक्कस्स देविंदस्स देवरन्नो वरुणस्स महारन्नो सयंजले नामं महाविमाणे पन्नत्ते ?, गोयमा ! तस्स णं सोहम्मवडिंसयस्स महाविमाणस्स पच्चत्थिमेणं सोहम्मे कप्पे असंखेज्जाइं जहा सोमस्स तहा विमाणरायहाणीओ भानियव्वा जाव पासायवडिंसया नवरं नामणाणत्तं । सक्कस्स णं वरुणस्स महारन्नो इमे देवा आणा० जाव चिट्ठंति, तं०-वरुणकाइयाति वा वरुणदेवयकाइयाइ वा नागकुमारा नागकुमारीओ उदहिकुमारा उदहिकुमारीओ थनियकुमारा थनियकुमारीओ जे यावन्ने तहप्पगारा सव्वे ते तब्भत्तिया जाव चिट्ठंति ।*

*जंबूद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं जाइं इमाइं समुप्पज्जंति, तंजहा-अतिवासाति वा मंदवासाति वा सुवुट्ठीति वा दुव्वुट्ठीति वा उदब्भेयाति वा उदप्पीलाइ वा उदवाहाति वा पव्वाहाति वा गामवाहाति वा जाव सन्निवेसवाहाति वा पाणक्खया जाव तेसिं वा वरुणकाइयाणं देवाणं सक्कस्स णं देविंदस्स देवरन्नो वरुणस्स महारन्नो जाव अहावच्चा भिन्नाया होत्था, तंजहा-कक्कोडए कद्दमए अंजणे संखवालए पुंडे पलासे मोएज्जए दहिमुहे अयंपुले कायरिए ।*

*सक्कस्स देविंदस्स देवरन्नो वरुणस्स महारन्नो देसूणाइं दो पलिओवमाइं ठिती पन्नत्ता, अहावच्चाभिन्नायाणं देवाणं एगं पलिओवमं ठिती प० एवंमहिड्डीए जाव वरुणे महाराया ३ ।*

**वृ.** 'अतिवास'त्ति अतिशयवर्षा वेगवद्वर्षणानीत्यर्थः, 'मन्दवास'त्ति शनैर्वर्षणानि 'सुवुट्ठि'त्ति धान्यादिनिष्पत्तिहेतुः 'दुव्वुट्ठि'त्ति धान्याद्यनिष्पत्तिहेतुः 'उदब्भेय'त्ति उदकोद्भेदाः गिरितटादिभ्यो जलोद्भवाः 'उदप्पील'त्ति उदकोत्पीलाः- तडागादिषु जलसमूहाः 'उदवाह'त्ति अपकृष्टान्यल्पान्युदकवहनानि, तान्येव प्रकर्षवन्ति प्रवाहाः, इह प्राणक्षयादयो जलकृता द्रष्टव्याः

'कक्कोडए'त्ति कर्कोटकाभिधानोऽनुवेलन्धरनागराजावासभूतः पर्वतो लवणसमुद्रे ऐशान्यां दिश्यस्ति तन्निवासी नागराजः कर्कोटकः, 'कद्दमए'त्ति आग्नेय्यां तथैव विद्युत्प्रभपर्वतस्तत्र कर्दमको नाम नागराजः 'अंजणे'त्ति वेलम्बाभिधानवायुकुमारराजस्य लोकपालोऽञ्जनाभिधानः 'संखवालए'त्ति धरणाभिधाननागराजस्य लोकपालः शङ्खपालक नाम ।

शेषास्तु पुण्ड्रादयोऽप्रतीता इति ॥

*मू. (२००) कहि णं भंते ! सक्कस्स देविंदस्स देवरन्नो वेसमणस्स महारन्नो वग्गूनामं महाविमाणे पन्नत्ते ?, गोयमा ! तस्स णं सोहम्मवडिंसयस्स महाविमाणस्स उत्तरेणं जहा सोमस्स विमाणरायहानिवत्तव्वया तहा नेयव्वा जाव पासायवडिंसया ।*

*सक्कस्स णं देविंदस्स देवरन्नो वेसमणस्स महारन्नो इमे देवा आणाउववायवयणनिद्देसे चिट्ठंति, तंजहा-वेसमणकाइयाति वा वेसमणदेवकाइयाति वा सुवन्नकुमारा सुवन्नकुमारीओ दीवकुमारा दीवकुमारीओ दिसाकुमारा दिसाकुमारीओ वाणमंतरा वाणमंतरीओ जे यावन्ने तहप्पगारा सव्वे ते तब्भत्तिया जाव चिट्ठंति ।*

*जंबूद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं जाइं इमाइं समुप्पज्जंति, तंजहा-अयागराइ वा तउयागराइ वा तंबयागराइ वा एवं सीसागराइ वा हिरन्न० सुवन्न० रयण० वयरागराइ वा वसुहाराति वा हिरन्नवासाति वा सुवन्नवासाति वा रयण० वइर० आभरण० पत्त० पुप्फ० फल० बीय० मल्ल०वन्न० चुन्न० गंध० वत्थवासाइ वा हिरन्नवुट्ठीइ वा सु० र० व० आ० प० पु० फ० बी० व० चुन्न० गंधवुट्ठी वत्थवुट्ठीति वा भायणवुट्ठीति वा खीरवुट्ठीति वा सुयालाति वा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*दुक्कालाति वा अप्पग्घाति वा महग्घाति वा सुभिक्खाति वा दुभिक्खाति वा कयविक्कयाति वा सन्निहियाति वा संनिचयाति वा निहीति वा निहाणाति वा चिरपोरामाइं पहीणसामियाति वा पहीणसेउयाति वा (पहीणमग्गानि वा) पहीणगोत्तागाराइ वा उच्छिन्नसामियाति वा उच्छिन्नसेउयाति वा उच्छिन्नगोत्तागाराति वा सिंघाडगतिगचउक्कचच्चरचउम्मुहमहापहपहेसु नगरनिद्धमणेसु वा सुसाणगिरिकंदरसंतिसेलोव- ट्ठाणभवणगिहेसु संनिक्खित्ताइं चिट्ठंति।*

*सक्कस्स देविंदस्स देवरन्नो वेसमणस्स महारन्नो नताइं अन्नायाइं अदिट्ठाइं असुयाइं अविन्नायाइं तेसिं वा वेसमणकाइयाणं देवाणं, सक्कस्स देविंदस्स देवरन्नो वेसमणस्स महारन्नो इमे देवा अहावच्चाभिन्नाया होत्था, तंजहा-पुन्नभद्दे मानिभद्दे सालिभद्दे सुमणभद्दे चक्के रक्खे पुन्नरक्खे सव्वाणे सव्वजसे सव्वकामे समिद्धे अमोहे असंगे, सक्कस्स णं देविंदस्स देवरन्नो वेसमणस्स महारन्नो दो पलिओवमानि ठिती पन्नत्ता, अहावच्चाभिन्नायाणं देवाणं एगं पलिओवमं ठिती पन्नत्ता, एमहिड्डीए जाव वेसमणे महाराया। सेवं भंते २ ॥*

**वृ.** 'वसुहाराइ व' त्ति तीर्थःकरजन्मादिष्वाकाशाद्रव्यवृष्टि 'हिरन्नवास' त्ति हिरण्यं-रूप्यं घटितसुवर्णमित्यन्ते, वर्षोऽल्पतरो वृष्टिस्तु महतीति वर्षवृष्ट्योर्भेदः माल्यं तु ग्रथितपुष्पानि वर्ण-चन्दनं चूर्णो-गन्धद्रव्यसम्बन्धी गन्धाः-कोष्ठपुटपाकाः 'सुभिक्खाइ व' त्ति सुकाले दुष्काले वा भिक्षुकाणां भिक्षासमृद्धयः दुर्भिक्षास्तूक्तविपरीताः 'संनिहि' (याइ) त्ति घृतगुडादिस्थापनानि 'संनिचय (याइ) त्ति धान्यसञ्चयाः 'निहीइ व' त्ति लक्षादिप्रमाणद्रव्यस्थापनानि 'निहाणाइं व' त्ति भूमिगतसहस्रादिसङ्ख्यद्रव्यस्य सञ्चयाः।

किंविधानि ? इत्याह-'चिरपोराणाइं' ति चिरप्रतिष्ठितत्वेन पुराणानि चिरपुराणानि अत एव 'पहीणसामियाइं' ति स्वल्पीभूतस्वामिकानि 'पहीणसेउयाइं' ति प्रहीणाः-अल्पीभूताः सेक्तारः-सेचकः- धन प्रक्षेप्तारो येषां तानि तथा, प्रहीणमार्गानि वा, 'पहीणगोत्तागाराइं' ति प्रहीणं-विरलीभूत-मानुषं गोत्रागारं-तत्स्वामिगोत्रगृहं येषां तानि तथा –

–'उच्छिन्नसामियाइं' ति निसत्ताकीभूतप्रभूनि 'नगरनिद्धमणेसु' त्ति 'नगरनिर्द्धमनेषु' नगरजलनिर्गमनेषु 'सुसाणगिरिकन्दरसंतिसेलोवट्ठाणभवणगिहेसु' त्ति गृहशब्दस्य प्रत्येकं सम्बन्धात् श्मशानगृहं-पितृवनगृहं गिरिगृहं-पर्वतोपरिगृहं कन्दरगृहं-गुहा शान्तिगृहं-शान्तिकर्मस्थानं शैलगृहं-पर्वतमुत्कीर्य यत्कृतं उपस्थानगृहंआस्थानमण्डपो भवनगृहं-कुटुम्बिवसनगृहमिति।

शतकं-३ उद्देशकः-७ समाप्तः

## –: शतकं-३ उद्देशकः-८ :–

*मू. (२०१) रायगिहे नगरे जाव पज्जुवासमाणे एवं वदासी-असुरुकुमाराणं भंते ! देवाणं कति देवा आहेवच्चं जाव विहरंति ?, गोयमा ! दस देवा आहेवच्चं जाव विहरंति, तंजहा-चमरे असुरिंदे असुरराया सोमे जमे वरुणे वेसमणे बली वइरोयणिंदे वइरोयणराया सोमे जमे वरुणे वेसमणे।*

*नागकुमाराणं भंते ! पुच्छा, गोयमा ! दस देवा आहेवच्चं जाव विहरंति, तंजहा-धरणे नागकुमारिंदे नागकुमारराया कालवाले कोलवाले सेलवाले संखवाले भूयानंदे नागकुमारिंदे नागकुमारराया कालवाले कोलवाले संखवाले सेलवाले, जहा नागकुमारिंदाणं एयाए वत्तव्वयाए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नेयव्वं एवं इमाणं नेयव्वं ।*

*सुवन्नकुमाराणं वेणुदेवे वेणुदाली चित्ते विचित्ते चित्तपक्खे विचित्तपक्खे विज्जुकुमाराणं हरिस्सहपभ १ सुप्पभ २ पभकंत ३ सुप्पभकंत ४, अग्गिकुमाराणं अग्गिसीहे अग्गिमाणव तेउ तेउसीहे तेउकंते तेउप्पभे दीवकुमाराणं पुन्नविसिट्ठरूयसुरूयरूयकंतरूयप्पभा उदहिकुमाराणं जलकंते जलप्पभ जलजलरूयजलकंतजलप्पभा ।*

*दिसाकुमाराणं अमियगति अमियवाहण तुरियगति खिप्पगति सीहगति सीहविक्कमगति वाउकुमाराणं वेलंब पभंजण काल महाकाला अंजण रिट्ठा थनियकुमाराणं घोस महाघोस आवत्तवियावत्तनंदियावत्तमहानंदियावत्ता, एवं भानियव्वं जहा असुरकुमारा सो० १ का० २ चि० ३ प० ४ ते० ५ रु० ६ ज० ७ तु० ८ का० ९ आ० १० ।*

*पिसायकुमाराणं पुच्छा, गोयमा ! दो देवा आहेवच्चं जाव विहरंति, तंजहा-*

**वृ.** देववक्तव्यताप्रतिबद्ध एवाष्टमोद्देशकः, स च सुगम एव, नवरं 'सो १ का २ चि ३ प ४ ते ५ रु ६ ७ तु ८ का ९ आ १०' इत्यनेनाक्षरदशकेन दक्षिणभवनपतीन्द्राणां प्रथमलोकपालनामानि सूचितानि, वाचनान्तरे त्वेतान्येव गाथायां, सा चेयम्-

॥ १ ॥ सोमे य १ कालवाले २ चित्त ३ प्पभ ४ तेउ ५ तह रुए चेव ६ ।
जल तह ७ तुरयगई य ८ काले ९ आउत्त १० पढमा उ ॥

एवं द्वितीयादयोऽप्यभ्यूह्याः, इह च पुस्तकान्तरेऽयमर्थो दृश्यते-दाक्षिणात्येषु लोकपालेषु प्रतिसूत्रं यौ तृतीयचतुर्थौ तावौदीच्येषु चतुर्थःतृतीयाविति ।

**मू. (२०२)** *काले य महाकाले सुरुवपडिरूव पुन्नभद्देय ।*
*अमरवइ मानिभद्दे भीमे य तहा महाभीमे ॥*

**मू. (२०३)** *किंनरकिंपुरिसे खलु सप्पुरिसे खलु तहा महापुरिसे ।*
*अतिकाय महाकाए गीयरती चेव गीयजसे ॥*

**मू. (२०४)** *एते वाणमंतराणं देवाणं । जोतिसियाणं देवाणं दो देवा आहेवच्चं जाव विहरंति, तंजहा-चंदे य सूरे य । सोहम्मीसानेसु णं भंते ! कप्पेसु कइ देवा आहेवच्चं जाव विहरंति ? गोयमा ! दस देवा जाव विहरंति, तंजहा-सक्के देविंदे देवराया सोमे जमे वरुणे वेसमणे, ईसाने देविंदे देवराया सोमे जमे वरुणे वेसमणे, एसा वत्तव्वया सव्वेसुवि कप्पेसु, एए चेव भानियव्वा, जे य इंदा ते य भानियव्वा सेवं भंते २ ॥*

**वृ.** एसा वत्तव्वया सव्वेसुवि कप्पेसु एए चेव भानियव्व'त्ति, 'एषा' सौधर्मेशानोक्ता वक्तव्यता सर्वेष्वपि कल्पेषु-इन्द्रनिवासभूतेषु भनितव्या-सनत्कुमारादीन्द्रयुग्मेषु पूर्वेन्द्रापेक्षयोत्तरेन्द्रसम्बन्धिनां लोकपालानां तृतीयचतुर्थःयोर्व्यत्ययो वाच्य इत्यर्थः ।

तथैत एव सोमादयः प्रतिदेवलोकं वाच्या न तु भवनपतीन्द्राणामिवापरापरे, 'जे य इंदा ते य भानियव्वा' शक्रादयो दशेन्द्रा वाच्याः, अन्तिमे देवलोकचतुष्टये इन्द्रद्वयभावादिति ॥

शतकं-३ उद्देशकः-८ समाप्तः

## -: शतकं-३ उद्देशकः-९ :-

**वृ.** देवानां चावधिज्ञानसद्भावेऽपीन्द्रियोपयोगोऽप्यस्तीत्यत इन्द्रियविषयं निरूप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्नवमोद्देशकमाह-

**मू. (२०५)** *रायगिहे जाव एवं वदासी-कतिविहे णं भंते! इंदियविसए पन्नत्ते?, गोयमा पंचविहे इंदियविसए पन्नत्ते, तं०-सोतिंदियविसए जीवाभिगमे जोतिसियउद्देसो नेयव्वो अपरिसेसो*

**वृ.** 'रायगिहे' इत्यादि, 'जीवाभिगमे जोइसियउद्देसओ नेयव्वो'त्ति, स चायम्-'सोइंदियविसए जाव फासिंदियविसए। सोइंदियविसए णं भंते! पोग्गलपरिणामे कतिविहे पन्नत्ते?, गोयमा! दुविहे पन्नत्ते, तंजहा-सुब्भिसद्दपरिणामे य दुब्भिसद्दपरिणामे य' शुभाशुभशब्दपरिणाम इत्यर्थः। 'चक्खिंदियविसए पुच्छा, गोयमा! दुविहे पन्नत्ते, तंजहा-सुरूवपरिणामे य दुरूवपरिणामे य, घाणिंदियविसए पुच्छा गोयमा! दुविहे पन्नत्ते, तंजहा-सुब्भिगंधपरिणामे य दुब्भिगंधपरिणामेय, एवं जिब्भिंदियविसए सुरसपरिणामे य दुरसपरिणामे च, फासिंदियविसए सुहफासपरिणामे य दुहफासपरिणामे य' इत्यादि, वाचनान्तरे च 'इंदियविसए उच्चावयसुब्भिणो'त्ति दृश्यते तत्रेन्द्रियविषयं सूत्रं दर्शितमेव, उच्चावयसूत्रं त्वेवम्।

'से नूनं भंते! उच्चावएहिं सद्दपरिमामेहिं परिणममाणा पोग्गला परिणमंतीति वत्तव्वं सिया?, हंता, गोयमा!' इत्यादि, 'सुब्भिणो'त्ति, इदं सूत्रं पुनरेवम्-'से नूनं भंते! सुब्भिसद्दपोग्गला दुब्भिसद्दत्ताए परिणमंति? हंता गोयमा!' इत्यादीति॥

शतकं-३ उद्देशकः-९ समाप्तः

## —: शतकं-३ उद्देशकः-१० :—

**मू. (२०६)** *रायगिहे जाव एवं वयासी-चमरस्स णं भंते! असुरिंदस्स असुररन्नो कति परिसाओ पन्नत्ताओ?, गोयमा! तओ परिसाओ पन्नत्ताओ, तंजहा-समिता चंडा जाया, एवं जहानुपुव्वीए जावऽच्चुओ कप्पो, सेवं भंते २॥*

**वृ.** प्रागिन्द्रियाण्युक्तानि, तद्वन्तश्च देवा इत देववक्तव्यताप्रतिबद्धो दशम उद्देशकः, स च सुगम एव, नवरं 'समिय'त्ति समिका उत्तमत्वेन स्थिरप्रकृतितया समवती स्वप्रभोर्वा कोपौत्सुक्यादिभावान् शमयत्युपादेयवचनतयेति शमिका शमिता वा-अनुद्धता, 'चंड'त्ति तथाविधमहत्त्वाभावेनेषत्कोपादिभावाच्चण्डा, 'जाय'त्ति प्रकृतिमहत्त्ववर्जितत्वेनास्थानकोपादीनां जातत्वाज्जाता, एषा च क्रमेणाभ्यन्तरा मध्यमा बाह्या चेति, तत्राभ्यन्तरा समुत्पन्नप्रयोजनेन प्रभुणा गौरवार्हत्वादाकारितैव पार्श्वेसमागच्छति तां चासौ अर्थःपदं पृच्छति, मध्यमा तूभयथाऽप्यागच्छति अल्पतरगौरवविषयत्वात्।

अभ्यन्तरया चादिष्टमर्थःपदं तया सह प्रबन्धाति-ग्रन्थिबन्धं करोतीत्यर्थः, बाह्या त्वनाकारितैवागच्छति अल्पतमगौरवविषयत्वात्, तस्याश्चार्थःपदं वर्णयत्येव, तत्राद्यायां चतुर्विंशतिर्देवानां सहस्राणि द्वितीयायामष्टाविंशति तृतीयायां द्वात्रिंशदिति, तथा देवीशतानि क्रमेणाध्युष्टानि त्रीनि सार्द्धे च द्वे इति, तथा तद्देवानामायुः क्रमेणार्द्धतृतीयानि पल्योपमानि द्वे सार्द्धे चेति देवीनां तु सार्द्धमेकं तदर्द्धं चेति। एवं बलेरपि नवरं देवप्रमाणं तदेव चतुश्चतुःसहस्रहीनं, देवीमानं तु शतेन शतेनाधिकमिति, आयुर्मानमपि तदेव नवरं पल्योपमाधिकमिति, एवमच्युतान्तानामिन्द्राणां प्रत्येकं तिः पर्षदो भवन्ति, नामतो देवादिप्रमाणतः स्थितिमानतश्च क्वचित्किंश्चद्भेदेन भेदवत्यस्ताश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाभिगमादवसेया इति ।।

शतकं-३ उद्देशकः-१० समाप्तः

शतकं-३ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभयदेवसूरि विरचिता भगवती अङ्गसूत्रे तृतीयं शतकस्य टीका परिसमाप्ता ।**

## शतकं-४

**वृ.** तृतीयशते प्रायेण देवाधिकार उक्तोऽतस्तदधिकारवदेव चतुर्थः शतं, तस्य पुनरुद्देशकार्थाधिकारसङ्ग्रहाय गाथा–

**मू. (२०७)** *चत्तारि वेमाणेहिं चत्तारि य होंतिरायहाणीहिं ।*
*नेरइए लेस्साहि य दस उद्देसा चउत्थसए ।।*

**–ः शतकं-४, उद्देशकाः १-२-३-४ :–**

**मू. (२०८)** *रायगिहे नगरे जाव एवं वयासी-ईसाणस्स णं भंते ! देविंदस्स देवरन्नो कति लोगपाला पन्नत्ता ?, गोयमा ! चत्तारि लोगपाला पन्नत्ता, तंजहा-सोमे जमे वेसमणे वरुणे । एएसि णं भंते ! लोगपालाणं कति विमाणा पन्नत्ता ?, गोयमा ! चत्तारि विमाणा पन्नत्ता, तंजहा-सुमणे सव्वओभद्दे वग्गू सुवग्गू ।*

*कहि णं भंते ! ईसाणस्स देविंदस्स देवरन्नो सोमस्स महारन्नो सुमणो नामं महाविमाणे पन्नत्ते ?, गोयमा ! जंबूद्दीवे २ मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए जाव ईसाणे णामं कप्पे पन्नत्ते, तत्थ णं जाव पंचवडेंसया पन्नत्ता, तंजहा-अंकवडेंसए फलिहवडिंसए रयणवडेंसए जायरूववडिंसए मज्झे य तत्थ ईसाणवडेंसए, तस्स णं ईसाणवडेंसयस्स महाविमाणस्स पुरच्छिमेणं तिरियमसंखेज्जाइं जोयणसहस्साइं वीतिवतित्ता एत्थ णं ईसाणस्स ३ सोमस्स २ सुमणे नामं महाविमाणे पन्नत्ते अद्धतेरसजोयण जहा सक्कस्स वत्तव्वया ततियसए तहा ईसाणस्सवि जाव अच्चनिया समत्ता ।*

*चउण्हवि लोगपालाणं विमाणे २ उद्देसओ, चउसु विमाणेसु चत्तारि उद्देसा अपरिसेला, नवरं ठितिए नाणत्तं ।*

**मू. (२०९)** *'आदिदुय तिभागूणा पलिया धणयस्स होंति दो चेव ।*
*दो सतिभागा वरुणे पलियमहावच्चदेवाणं ।।'*

**वृ.** चत्तारीत्यादि व्यक्तार्था 'अच्चनिय' त्ति सिद्धायतने जिनप्रतिमाद्यर्चनमभिनवोत्पन्नस्य सोमाख्यलोकपालस्येति ।।

शतकं-४ उद्देशकाः-१,२,३,४ समाप्ताः

**–ः शतकं-४ उद्देशकाः-५,६,७,८ :–**

**मू. (२१०)** *रायहानिसुवि चत्तारि उद्देसा भानियव्वा जाव एवमहिड्ढीए जाव वरुणे महाराया*

**वृ.** 'रायहाणीसु चत्तारि उद्देसया भानियव्वा' ते चैवम्- 'कहिं णं भंते ! ईसाणस्स देविंदस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवरन्नो सोमस्स महारन्नो सोमानामं रायहाणी पन्नत्ता ?, गोयमा ! सुमणस्स महाविमाणस्स अहे सपक्खिं' इत्यादिपूर्वोक्तानुसारेण जीवाभिगमोक्तविजयराजधानीवर्णकानुसारेण चैकैक उद्देशकोऽध्येतव्य इति, नन्वेता राजधान्यः किल सोमादीनां शक्रस्येशानस्य च सम्बन्धिनां लोकपालानां प्रत्येकं तत एकादशे कुण्डलवराभिधाने द्वीपे द्वीपसागरप्रज्ञप्त्यां श्रूयन्ते, उक्तं हि तत्सङ्ग्रहिण्याम्-

॥ १ ॥ "कुंडलनगस्स अब्भिंतरपासे होंति रायहाणीओ ।
सोलस उत्तरपासे सोलस पुण दक्खिणे पासे ॥
॥ २ ॥ जा उत्तरेण सोलस ताओ ईसाणलोगपालाणं ।
सक्कस्स लोगपालाण दक्खिणे सोलस हवंति ॥

एताश्च सोमप्रभयमप्रभवैश्रमणप्रभवरुणप्रभाभिधानानां पर्वतानां प्रत्येकं चतसृषु दिक्षु भवन्ति, तत्र वैश्रमणनगरीरादौ कृत्वाऽभिहितम्-

॥ ३ ॥ "मज्झे होइ चउण्हं वेसमणपभो नगुत्तमो सेलो ।
रइकरयपव्वयसमो उव्वेहुच्चत्तविक्खंभे ॥
॥ ४ ॥ तस्स य नगुत्तमस्स उ चउद्दिसिं होंति रायहाणीओ ।
जंबूद्दीवसमाओ विक्खंभायामओ ताओ ॥
॥ ५ ॥ पुव्वेण अयलभद्दा समुक्कसा रायहानि दाहिणओ ।
अवरेण ऊ कुबेरा धणप्पभा उत्तरे पासे ॥
॥ ६ ॥ एएणेव कमेणं वरुणस्सवि होंति अवरपासंमि ।
वरुणप्पभसेलस्सवि चउद्दिसिं रायणाहीओ ॥
॥ ७ ॥ पुव्वेण होइ वरुणा वरुणपभा दक्खिणे दिसीभाए ।
अवरेण होइ कुमुया उत्तरओ पुंडरगिणीया ॥
॥ ८ ॥ एएणेव कमेणं सोमस्सवि होंति अवरपासंमि ।
सोमप्पभसेलस्सवि चउद्दिसिं रायहाणीओ ॥
॥ ९ ॥ पुव्वेण होइ सोमा सोमप्पभ दक्खिणे दिसीभाए ।
सिवपागारा अवरेण होइ नलिणाम उत्तरओ ॥
॥ १० ॥ एएणेव कमेणं अंतकरस्सवि य होंति अवरेणं ।
समवित्तिप्पभसेलस्स चउद्दिसिं रायहाणीओ ॥
॥ ११ ॥ पुव्वेण ऊ विसाला अतिव्विसाला उ दाहिणे पासे ।
सेज्जप्पभाऽवरेणं अमुया पुण उत्तरे पासे ॥

इति, इह च ग्रन्थे सौधर्मावतंसकादीशानावतंसकाच्चासङ्ख्येयया योजनकोटीर्व्यतिक्रम्य प्रत्येकं पूर्वादिदिक्षु स्थितानि यानि सन्ध्याप्रभादीनि सुमनःप्रभृतीनि च विमानानि तेषामधोऽसङ्ख्याता योजनकोटीरवगाह्य प्रत्येकमेकैका नगर्युक्ता ततः कथं न विरोधः इति ?, अत्रोच्यते, अन्यास्ता नगर्यो याः कुण्डलेऽभिधीयन्ते एताश्चान्या इति, यथा शक्रेशानाग्रमहिषीणां नन्दीश्वरद्वीपे कुण्डलद्वीपे चेति

शतकं-४ उद्देशकाः-५, ६, ७, ८ समाप्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं-४ उद्देशक-९ :—

**वृ.** अनन्तरं देववक्तव्यतोक्ताऽथ वैक्रियशरीरसाधर्म्यान्नारकवक्तव्यताप्रतिबद्धो नवमोद्देशक उच्यते, तत्रेदमादिसूत्रम्—

**मू. (२११)** *नेरइए णं भंते ! नेरतिएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ पन्नवणाए लेस्सापए ततिओ उद्देसओ भानियव्वो जाव नाणाइं ।*

**वृ.** 'नेरइए ण'मित्यादि, 'लेस्सापए'त्ति सप्तदशपदे 'तइओउद्देसओ भानियव्वो'त्ति क्वचिद् द्वितीय इति दृश्यते स चापपाठ इति, स चैवम्-'गोयमा ! नेरइए नेरइएसु उववज्जइ नो अनेरइए नेरइएसु उववज्जइ' इत्यादि, अयं चास्यार्थः- नैरयिको नैरयिकेषूत्पद्यते न पुनरनैरयिकः, कथं पुनरेतत् ?, उच्यते, यस्मान्नारकादिभवोपग्राहकमायुरेवातो नारकाद्यायुः-प्रथमसमयसंवेदन-काल एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन, यत उक्तं नयविद्भिऋजुसूत्र-स्वरूपनिरूपणं कुर्वद्भिः

॥१॥ "पलालं न दहत्यग्निर्भिद्यते न घटः कचित् ।
न शून्यान्निर्गमोऽस्तीह, न च शून्यं प्रविश्यते ॥

॥२॥ नारकव्यतिरिक्तश्च, नरके नोपपद्यते ।
नरकान्नारकश्चास्य, न कश्चिद्विप्रमुच्यते ॥

इत्यादीति, 'जाव नाणाइं'त्ति, अयमुद्देशको ज्ञानाधिकारावसानोऽध्येतव्यः, स चायम्-'कण्हलेस्से णं भंते ! जीवे कयरेसु नाणेसु होज्जा ?, गोयमा ! दोसु वा तिसु वा चउसु वा नाणेसु होज्जा, दोसु होज्जमाणे आभिनिबोहियसुयनाणेसु होज्जा' इत्यादि ॥

शतकं-४, उद्देशकः-९ समाप्तः

## —: शतकं-४ उद्देशकः-१० :—

**वृ.** लेश्याधिकारात्तद्गत एव दशमोद्देशकस्येदमादिसूत्रम्—

**मू. (२१२)** *से नूनं भंते ! कण्हलेस्सा नीललेस्सं पप्प तारुवत्ताए तावन्नत्ताए एवं चउत्थो उद्देसओ पन्नवणाए चेव लेस्सापदे नेयव्वो जाव —*

**वृ.** 'से नून'मित्यादि, 'तारूवत्ताए'त्ति तद्रूपतया-नीललेश्यास्वभावेन, एतदेव व्यनक्ति-'तावन्नत्ताए'त्ति तस्या इवनीललेश्यावा इव वर्णो यस्याः सा तद्वर्णा तद्भावस्तत्ता तया तद्वर्णतया, 'एवं चउत्थो उद्देसओ' इत्यादिवचनादेवं द्रष्टव्यम्-'तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो २ परिणमति ? हंता गोयमा ! कण्हलेसा नीललेसं पप्प तारूवत्ताए ५ भुज्जो २ परिणमति' अयमस्य भावार्थःयदा कृष्णलेश्यापरिणतो जीवो नीललेश्यायोग्यानि द्रव्यानि गृहीत्वा कालं करोति तदानीललेश्यापरिणत उत्पद्यते 'जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसे उववज्जइ'त्ति वचनात्, अतः कारणमेव कार्यं भवति, 'कण्हलेसा नीललेसं पप्पे'त्यादि तु कृष्णनीललेश्य-योर्भेदपरमुपचारादुक्तमिति ।

से केणट्ठेणं भंते ! एवं वुच्चइ किण्हलेसा नीललेसं पप्प तारूवत्ताए ५ भुज्जो २ परिणमइ गोयमा ! से जहानामए-खीरे दूसिं पप्प (तक्रमित्यर्थः) सुद्धे वा वत्थे रागं पप्प तारूवत्ताए भुज्जो २ परिणमइ, से एएणट्ठेणं गोयमा ! एवं वुच्चइ-कण्हलेसा' इत्यादि, एतेनैवाभिलापेन नीललेश्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कापोतीं कापोती तैजसीं तैजसी पद्मां पद्माशुक्लां प्राप्य तद्रूपत्वादिना परिणमतीति वाच्यं, अथ कियद्दूरमयमुद्देशको वाच्यः ? इत्याह-'जावे' त्यादि।

**मू. (२१३)** *परिणामवन्नरसगंधसुद्धअपसत्थसंकिलिट्ठुण्हा।*
*गतिपरिणामपदेसोगाहवग्गणाठाणमप्पबहुं॥*

**वृ.** 'परिणामे' त्यादिद्वारगाथोक्तद्वारपरिसमाप्तिं यावदित्यर्थः, तत्र परिणामो दर्शित एव, तथा 'वन्न'त्ति कृष्णादिलेश्यानां वर्णो वाच्यः, सचैवम्-'कण्हलेसा णं भंते ए केरिसिया वन्नेणं पन्नत्ते ?' त्यदि, उत्तरं तु कृष्णलेश्या कृष्णा जीमूतादिवत् नीललेश्या नीला भृङ्गादिवत् कापोती कापोतवर्णा खदिरसारादिवत् तैजसी लोहिता शशकरक्तादिवत् पद्मा पीता चम्पकादिवत् शुक्ला २ शङ्खादिवदिति।

तथा 'रस'त्ति रसस्तासां वाच्यः, तत्र कृष्णा तिक्तरसा निम्बादिवत् नीला कटुकरसा नागरवत् कापोती कषायरसा अपक्वबदरवत् तेजोलेश्या अम्लमधुरापक्वाम्रादिफलवत् पद्मलेश्या कटुकषायमधुररसा चन्द्रप्रभासुरादिवत् शुक्ललेश्या मधुररसा गुडादिवत्, 'गंध'त्ति लेश्यानां गन्धो वाच्यः, तत्राद्यास्तिस्रो दुरभिगन्धाः अन्त्यास्तु तदितराः 'सुद्ध'त्ति अन्त्याः शुद्धा आद्यास्त्वितराः 'अप्पसत्थ'त्ति आद्या अप्रशस्ता अन्त्यास्तु प्रशस्ताः 'संकिलिट्ठ'त्ति आद्याः सङ्क्लिष्टा अन्त्यास्त्वितराः 'उण्ह'त्ति अन्त्या उष्णाः स्निग्धाश्च आद्यास्तु शीता रूक्षाश्च 'गति'त्ति आद्या दुर्गतिहेतवोऽन्त्यास्तु सुगतिहेतवः 'परिणाम'त्ति लेश्यानां कतिविधः परिणामः ? इति वाच्यं।

तत्रासौ जघन्यमध्यमोत्कृष्टभेदात्त्रिधा उत्पातादिभेदाद्वा त्रिधेति 'पएस'त्ति आसां प्रदेशा वाच्यास्तत्र प्रत्येकमनन्तप्रदेशिका एता इति 'ओगाह'त्ति अवगाहना आसां वाच्या तत्रैता असङ्ख्यातप्रदेशावगाढाः 'वग्गण'त्ति वर्गणा आसां वाच्याः, तत्र वर्गणाः कृष्णलेश्या-दियोग्यद्रव्यवर्गणाः, ताश्चानन्ता औदारिकादिवर्गणावत्, 'ठाण'त्ति तारतम्येन विचित्राध्यवसायनिबन्धनानि कृष्णादिद्रव्यवृन्दानि तानि चासङ्ख्येययानि अध्यवसायस्थानानामसङ्ख्यातत्वादिति, 'अप्पबहुं' ति लेश्यास्थानानामल्पबहुत्वं वाच्यं, तच्चैवम्-'एएसि णं भंते! कण्हलेस्साठाणाणं जाव सुक्कलेसाठाणाण य जहन्नगाणं दव्वट्ठयाए ३ कयरेरहिंतो अप्पा वा ४।

गोयमा ! सव्वत्थोवा जहन्नगा काउलेस्साठाणा दव्वट्ठयाए जहन्नगा नीललेस्साठाणा दव्वट्ठयाए असंखेज्जगुणा जहन्नगा कण्हलेसाठाणा दव्वट्ठयाए असंखेज्जगुणा जहन्नगा तेउलेसाठाणा दव्वट्ठयाए असंखेज्जगुणा जहन्नगा पम्हलेसाठाणा दव्वट्ठयाए असंखेज्जगुणा जहन्नगा सुक्कलेस्साठाणा दव्वट्ठयाए असंखेज्जगुणा' इत्यादीनि॥

**मू. (२१४)** *सेवं भंते! सेवं भंते! त्ति॥*

शतकं-४ उद्देशकः-१० समाप्तः

स्वतः सुबोधेऽपि शते तुरीये, व्याख्या मया काचिदियं विदब्धा।
दुग्धे सदा स्वादुतमे स्वभावात्, क्षेपो न युक्तः किमु शर्करायाः।

**शतकं-४ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभयदेवसूरि विरचित्ता भगवती अङ्गसूत्रे चतुर्थःशतकस्य टीका परिसमाप्ता।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शतकं-५

**वृ.** चतुर्थःशतान्ते लेश्या उक्ताः, पञ्चमशते तु प्रायो लेश्यावन्तो निरूप्यन्ते इत्येवंसम्ब्ध-स्यास्योद्देशकसङ्ग्रहाय गाथेयम्–

### –: शतकं-५, उद्देशकः १ :–

**मू. (२१५)** *चंपरवि १ अनिल २ गंठिय ३ सद्दे ४ छउमायु ५-६ एयण ७ नियंठे ८।*
*रायगिहं ९ चंपाचंदिमा १० य दस पंचमंमि सए ॥*

**वृ.** 'चंपे'त्यादि, तत्र चम्पायां रविविषयप्रश्ननिर्णयार्थः प्रथम उद्देशकः १ 'अनिल'त्ति वायुविषयप्रश्ननिर्णयार्थो द्वितीयः २ 'गंठिय'त्ति जालग्रन्थिकाज्ञातज्ञापनीयार्थःनिर्णयपरस्तृतीयः ३ 'सद्दे'त्ति शब्दविषयप्रश्ननिर्णयार्थःश्चतुर्थः ४ 'छउम'त्ति छद्मस्थवक्तव्यतार्थः पञ्चमः ५।

'आउ'त्ति आयुषोऽल्वादिप्रतिपादनार्थः षष्ठः ६ 'एयण'त्ति पुद्‌गलानामेजना-द्यर्थःप्रतिपादकः सप्तमः ७ 'नियंठे'त्ति निर्ग्रन्थीपुत्राभिधानानगारविहित वस्तुविचारसारोऽष्टमः ८ 'रायगिहं'ति राजगृहनगरविचारणपरो नवमः ९ 'चंपाचंदिमा य'त्ति चम्पायां नगर्यां च चन्द्रमसो वक्तव्यतार्थो दशमः १०।

**मू. (२१६)** *तेणं कालेणं २ चंपानामं नगरी होत्था, वन्नओ, तीसे णं चंपाए नगरीए पुन्न भद्दे नामे चेइए होत्था वन्नओ, सामी समोसढे जाव परिसा पडिगया। तेणं कालेणं २ समणस्स भगवओ महावीरस्स जेट्ठ अंतेवासी इंदभूतीनामं अनगारे गोयमगोत्तेणं जाव एवं वदासी-जंबूद्दीवे णं भंते! दीवे सूरिया उदीणपादीणमुग्गच्छ पादीणदाहिणमागच्छंति, पादीण- दाहिणमुग्गच्छ दाहिणपडीणमागच्छंति, दाहिणपडीणमुग्गच्छ पडीणउदीणमागच्छंति पदीणउदीणं उग्गच्छ उदीचिपादीणमागच्छंति?, हंता! गोयमा! जंबूद्दीवे णं दीवे सूरिया उदीचिपाईणमुग्गच्छ जाव उदीचिपाईणमागच्छंति॥*

**वृ.** तत्र प्रथमोद्देशके किञ्चिल्लिख्यते- 'सूरिय'त्ति द्वौ सूर्यौ, जम्बूद्वीपे द्वयोरेव भावात् 'उदीणपाईणं'ति उदगेव उदीचीनं प्रागेव प्राचीनं -उदीचीनं च तदुदीच्या आसन्नत्वात् प्राचीनं च तत्प्राच्याः प्रत्यासन्नत्वाद् उदीचीनप्राचीनंदिगन्तरं क्षेत्रदिगपेक्षया पूर्वोत्तरदिगित्यर्थः 'उग्गच्छ'त्ति उद्‌गत्य क्रमेण तत्रोद्‌गमनं कृत्वेत्यर्थः 'पाईणदाहिणं'ति प्राचीनदक्षिणं दिगन्तरं पूर्वदक्षिणमित्यर्थः 'आगच्छंति'त्ति आगच्छतः क्रमेणैवास्तं यात इत्यर्थः, इह चोद्‌गमनमस्तमयं च द्रष्टलोकवि-वक्षयाऽवसेयं, तथाहि-येषामदृश्यौ सन्तौ दृश्यौ तौ स्यातां ते तयोरुद्‌गमनं व्यवहरन्ति येषां तु दृश्यौ सन्तावदृश्यौ स्तस्ते तयोरस्तमयं व्यवहरन्तीत्यनियतावुदयास्तमयौ आह च–

॥१॥ "जह २ समए २ पुरओ संचरइ भक्खरो गयणे।
तह तह इओवि नियमा जायइ रयणीय भावत्थो ॥

॥२॥ एवं च सइ नराणं उदयत्थमणाइं होंतऽनिययाइं।
सइ देसभेए कस्सइ किंची ववदिस्सए नियमा ॥

॥३॥ सइ चेव य निद्दिट्ठो रूद्दमुहुत्तो कमेण सव्वेसिं।
केसिंचीदाणिंपि य विसयपमाणे रवी जेसिं ॥

इत्यादि, अनेन च सूत्रेण सूर्यस्य चतसृषु दिक्षु गतिरुक्ता, ततश्च ये मन्यन्ते सूर्य पश्चिमसमुद्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रविश्य पातालेन गत्वा पुनः पूर्वसमुद्रमुदेतीत्यादि तन्मतं निषिद्धमिति ।

इह च सूर्यस्य सर्वतो गमनेऽपि प्रतिनियतत्वात्तत्प्रकाशस्य रात्रिदिवसविभागोऽस्तीतितं क्षेत्रभेदेन दर्शयन्नाह–

**मू. (२१७)** *जयाणं भंते ! जंबूद्दीवे २ दाहिणड्ढे दिवसे भवति तदा णं उत्तरड्ढे दिवसे भवति जदा णं उत्तरड्ढेवि दिवसे भवति तदा णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिपच्चत्थिमेणं राती भवति ?, हंता गोयमा ! जया णं जंबूद्दीवे २ दाहिणड्ढेवि दिवसे जाव राती भवति ।*

*जदा णं भंते ! जंबू० मंदरस्स पव्वयस्स पुरच्छिमेणं दिवसे भवति तदा णं पच्चत्थिमेणवि दिवसे भवति जया णं पच्चत्थिमेणं दिवसे भवति तदा णं जंबूद्दीवे २ मंदरस्स पव्वयस्स उत्तरदाहिणेणं राती भवति ?, हंता गोयमा ! जदा णं जंबू० मंदरपुरच्छिमेणं दिवसे जाव राती भवति, जदा णं भंते ! जंबूद्दीवे २ दाहिणड्ढे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तदा णं उत्तरड्ढेवि उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति जदा णं उत्तरद्धे उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तदा णं जंबूद्दीवे २ मंदरस्स पुरच्छिमपच्चत्थिमेणं जहन्निया दुवालसमुहुत्ता राती भवति ?, हंता गोयमा जदा णं जंबू० जाव दुवालसमुहुत्ता राती भवति ।*

*जदा णं जंबू० मंदरस्स पुरच्छिमेणं उक्कोसए अट्ठारस जाव तदा णं जंबूद्दीवे २ पच्चत्थिमेणवि उक्को० अट्ठारसमुहुत्ते दिवसे भवति जया णं पच्चत्थिमेणं उक्कोसए अट्ठारसमुहुत्ते दिवसे भवति तदा णं भंते ! जंबूद्दीवे २ उत्तर० दुवालसमुहुत्ता जाव राती भवति ?, हंता गोयमा ! जाव भवति*

*जया णं भंते ! जंबू० दाहिणड्ढे अट्ठारसमुहुत्तानंतरे दिवसे भवति तदा णं उत्तरे अट्ठारसमुहुत्तानंतरे दिवसे भवति जदा णं उत्तरे अट्ठारसमुहुत्तानंतरे दिवसे भवति तदा णं जंबू० मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं सातिरेगा दुवालस मुहुत्ता राती भवति ?, हंता गोयमा ! जदा णं जंबू० जाव राती भवति । जदा णं भंते ! जंबूद्दीवे २ पुरच्छिमेणं अट्ठारमुहुत्ताणंतरे दिवसे भवति तदा णं पच्चत्थिमेणं अट्ठारसमुहुत्तानंतरे दिवसे भवति जदा णं पच्चत्थिमेणं अट्ठारसमुहुत्तानंतरे दिवसे भवति तदा णं जंबू० २ मंदरस्स पव्वयस्स दाहिणेणं साइरेगा दुवालसमुहुत्ता राती भवति हंता गोयमा ! जाव भवति ।*

*एवं एतेणं कमेणं ओसारेयव्वं सत्तरसमुहुत्ते दिवसे तेरसमुहुत्ता राती भवति सत्तरमुहुत्तानंतरे दिवसे सातिरेगा तेरसमुहुत्ता राती सोलसमुहुत्ते दिवसे चोद्दसमुहुत्ता राई सोलसमुहुत्तानंतरे दिवसे सातिरेगचोद्दसमुहुत्ता राती पन्नरसमुहुत्ते दिवसे पन्नरसमुहुत्ता राती भवति पन्नरसमुहुत्तानंतरे दिवसे सातिरेगा पन्नरसमुहुत्ता राती चोद्दसमुहुत्ते दिवसे सोलसमुहुत्ता राती चोद्दसमुहुत्तानंतरे दिवसे सातिरेगा सोलसमुहुत्ता राती तेरसमुहुत्ते दिवसे सत्तरसमुहुत्ता राती तेरसमुहुत्तानंतरे दिवसे सातिरेगा सोलसमुहुत्ता राती तेरसमुहुत्ते दिवसे सत्तरसमुहुत्ता राती तेरसमुहुत्तानंतरे दिवसे सातिरेगा सत्तरसमुहुत्ता राती ।*

*जया णं जंबू० दाहिणड्ढे जहन्नए दुवालसमुहुत्ते दिवसे भवति तया णं उत्तरड्ढेवि, जया णं उत्तरड्ढे तया णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमेणं उक्कोसिया अट्ठारसमुहुत्ता राती भवति हंता गोयमा ! एवं चेव उच्चारेयव्वं जाव राई भवति ।*

*जया णं भंते ! जंबू० मंदरस्स पव्वयस्स पुरच्छिमेणं जहन्नए दुवालसमुहुत्ते दिवसे भवति*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तया णं पच्चत्थिमेणवि० तया णं जंबू० मंदरस्स उत्तरदाहिणेणं उक्कोसिया अट्ठारसमुहुत्ता राती भवति ?, हंता गोयमा ! जाव राती भवति ॥*

**वृ.** 'जया ण'मित्यादि, इह सूर्यद्वयभावादेकदैव दिग्द्वये दिवस उक्तः, इह च यद्यपि दक्षिणार्द्धे तथोत्तरार्द्धे इत्युक्तं तथाऽपि दक्षिणभागे उत्तरभागे चेति बोद्धव्यं, अर्द्धशब्दस्य भागमात्रार्थःत्वात्, यतो यदि दक्षिणार्द्धे उत्तरार्द्धे च समग्र एव दिवसः स्यात्तदा कथं पूर्वेणापरेण च रात्रि स्यादिति वक्तुं युज्येत, अर्द्धद्वयग्रहणेन सर्वक्षेत्रस्य गृहीतत्वात्, इतश्च दक्षिणार्द्धादिशब्देन दक्षिणादिदिग्भागमात्रमेवावसेयं न त्वर्द्धं अतो यदाऽपि दक्षिणोत्तरयोः सर्वोत्कृष्टो दिवसो भवति तदाऽपि जम्बूद्वीपस्य दशभागत्रयप्रमाणमेव तापक्षेत्रं तयोः प्रत्येकं स्याद्, दशभागद्वयमानं च पूर्वपश्चिमयोः प्रत्येकं रात्रिक्षेत्रं स्यात् ।

तथाहि-षष्ट्या मुहूर्तैः किल सूर्यो मण्डलं पूरयति, उत्कृष्टदिनं चाष्टादशभिर्मुहूर्तैरुक्तं, अष्टादश च षष्टेर्दशभागत्रितयरूपा भवन्ति, तथा यदाऽष्टादशमुहूर्त्तो दिवसो भवति तदा रात्रिर्द्वादशमुहूर्त्ता भवति, द्वादश च षष्टेर्दशभागद्वयरूपा भवन्तीति, तत्र च मेरुं प्रति नव योजनसहस्राणि चत्वारि शतानि षडशीत्यदिकानि नव च दश भागा योजनस्येत्येतत्सर्वोत्कृष्टदिवसे दशभागत्रयरूपं तापक्षेत्रप्रमाणं भवति कथम् ?, मन्दरपरिक्षेपस्य किञ्चिन्न्यूनत्रयो विंशत्युत्तरषट्शताधिकैकत्रिंशद्योजनसहस्रमानस्य दशभिर्भागे हृते यल्लब्धं तस्य त्रिगुणितत्वे एतस्य भावादिति ।

तथा लवणसमुद्रं प्रति चतुर्नवतिर्योजनानां सहस्राणि अष्टौ शतान्यष्टषष्ट्यधिकानि चत्वारश्च दशभागा योजनस्येत्येतदुत्कृष्टदिने तापक्षेत्रप्रमाणं भवति कथम् ?, जम्बूद्वीपपरिधेः किञ्चिन्न्यूनाष्टाविंशत्युत्तरसतद्वयाधिकषोडशसहस्रोपेतयोजनलक्षत्रयमानस्य दशभिर्भागे हृते यल्लब्धं तस्य त्रिगुनितत्वे एतस्य भावादिति । जघन्यरात्रिक्षेत्रप्रमाणं चाप्येवमेव, नवरं परिधेर्दशभागो द्विगुणः कार्य, तत्राद्यं षड् योजनानां सहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि षट् च दशभागा योजनस्य द्वितीयं तु त्रिषष्टि सहाणि द्वे पञ्चचत्वारिंशदधिके योजनानां शते षट् च दशभागा योजनस्य सर्वलघौ च दिवसे तापक्षेत्रमनन्तरोक्तरात्रिक्षेत्रतुल्यं रात्रिक्षेत्रं त्वनन्तरोक्ततापक्षेत्रतुल्यमिति, आयामतस्तु तापक्षेत्र जम्बूद्वीपमध्ये पञ्चचत्वारिंशद्योजनानां सहस्राणीति, लवणे च त्रयस्त्रिंशत्सहस्राणि त्रीनि शतानि त्रयशिंदधिकानि त्रिभागश्च योजनस्य उभयमीलने त्वष्टसप्ततिः सहास्राणि त्रीनि शतानि त्रयशिंदधिकानि योजनत्रिभागश्चेति।

'उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ'त्ति इह किल सूर्यस्य चतुरशीत्यधिकं मण्डलशतं भवति, तत्र किल जम्बूद्वीपमध्ये पञ्चषष्टिर्मण्डलानि भवन्ति, एकोनविंशत्यधिकं च तेषां शतं लवणसुद्रस्य मध्ये भवति, तत्र च सर्वाभ्यन्तरे मण्डले यदा वर्त्तते सूर्यस्तदाऽष्टादशमुहूर्त्तो दिवसो भवति, कथम् ?, यदा सर्वबाह्ये मण्डले वर्त्तेऽसौ तदा सर्वजघन्यो द्वादशमुहूर्त्तो दिवसो भवति, ततश्च द्वितीयमण्डलादारभ्य प्रतिमण्डलं द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यां दिनस्य वृद्धौ त्र्यशीत्यधिकशततमे मण्डले षड् मुहूर्त्ता वर्द्धन्त इत्येवमष्टादशमुहूर्त्तो दिवसो भवति, अत एव द्वादशमुहूर्त्ता रात्रिर्भवति, त्रिंशन्मुहूर्त्तत्वादहोरात्रस्य ।

'अट्ठारसमुहुत्तानंतरे'त्ति यदा सर्वाभ्यन्तरमण्डलानन्तरे मण्डले वर्त्तते सूर्यस्तदा मुहूर्त्तैकषष्टिभागद्वयहीनाष्टादशमुहूर्त्तो दिवसो भवति, स चाष्टदशमुहूर्त्ताद्दिवसादनन्तरोऽ-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

ष्टादशमुहूर्त्तानन्तरमिति व्यपदिष्टः, 'सातिरेगा दुवालसमुहुत्ता राइ' त्ति द्वाभ्यां मुहूर्त्तैकषष्टिभागाभ्यामधिका द्वादशमुहूर्त्ता 'राई भवइ' त्ति रात्रिप्रमाणं भवतीत्यर्थः, यावता भागेन दिनं हीयते तावता रात्रिर्वर्द्धते, त्रिंशन्मुहूर्त्तत्वादहोरात्रस्येति ॥

'एवं एएणं कमेणं' एवमित्युपसंहारे 'एतेन' अनन्तरोक्तेन 'जया णं भंते! जंबूद्दीवे २ दाहिणड्ढे' इत्यनेनेत्यर्थः, 'ओसारेयव्वं' ति दिनमानं ह्रस्वीकार्यं, तदेव दर्शयति-'सत्तरसे' त्यादि, तत्र सर्वाभ्यन्तरमण्डलानन्तरमण्डलादारभ्यैकत्रिंशत्तममण्डलार्द्धे यदा सूर्यस्तदा सप्तदशमुहूर्त्तो दिवसो भवति, पूर्वोक्तहानिक्रमेण त्रयोदशमुहूर्त्ता च रात्रिरिति।

'सत्तरसमुहुत्तानंतरे' त्ति मुहूर्त्तैकषष्टिभागद्वयहीनसप्तदशमुहूर्त्तप्रमाणो दिवसः, अयं च द्वितीयादारभ्य द्वात्रिंशत्तममण्डलार्द्धे भवति, एवमनन्तरत्वमन्यत्राप्यूह्यं, 'साइरेगतेरसमुहुत्ता राइ' त्ति मुहूर्त्तैकषष्टिभाद्वयेन सातिरेकत्वम्, एवं सर्वत्र 'सोलसमुहुत्ते दिवसे' त्ति द्वितीयादारभ्यैकषष्टितमण्डले षोडशमुहूर्त्तो दिवसो भवति, 'पन्नरसमुहुत्ते दिवसे' त्ति द्विनवतितममण्डलार्द्धे वर्त्तमाने सूर्ये, 'चोद्दसमुहुत्ते दिवसे' त्ति द्वाविंशत्युत्तरशततमे मण्डले, 'तेरसमुहुत्ते दिवसे' त्ति सार्धद्विपञ्चाशदुत्तरशततमे मण्डले, 'बारसमुहुत्ते दिवसे' त्ति त्र्यशीत्यधिकशततमे मण्डले सर्वबाह्य इत्यर्थः। कालाधिकारादिदमाह–

***मू. (२१८)*** *जया णं भंते! जंबू० दाहिणड्ढे वासाणं पढमे समए पडिवज्जइ तया णं उत्तरड्ढेवि वासाणं पढमे समए पडिवज्जइ जया णं उत्तरड्ढेवि वासाणं पढमे समए पडिवज्जइ तया णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं अणंतरपुरक्खडसमयंसि वासाणं प० स० प० ?, हंता गोयमा! जया णं जंबू० २ दाहिणड्ढे वासाणं प० स० पडिवज्जइ तह चेव जाव पडिवज्जइ। जया णं भंते! जंबू० मंदरस्स० पुरच्छिमेणं वासाणं पढमे स० पडिवज्जइ तया णं पच्चत्थिमेणवि वासामं पढमे समए पडिवज्जइ, जया णं पच्चत्थिमेणवि वासाणं पढमे समए पडिवज्जइ तया णं जाव मंदरस्स पव्वयस्स उत्तरदाहिणेणं अनंतरपच्छाकडसमयंसि वासाणं प० स० पडिवन्ने भवति हंता गोयमा! जया णं जंबू० मंदरस्स पव्वयस्स पुरच्छिमेणं, एवं चेव उच्चारेयव्वं जाव पडिवन्ने भवति।*

*एवं जहा समएणं अभिलावो भनिओ वासाणं तहा आवलियाएवि २ भाणियव्वो, आणापाणुणवि ३ थोवेणवि ४ लवेणवि ५ महुत्तेणवि ६ अहोरत्तेणवि ७ पक्खेणवि ८ मासेणवि ९ उऊणावि १०, एएसिं सव्वेसिं जहा समयस्स अभिलावो तहा भाणियव्वो।*

*जया णं भंते! जंबू० दाहिणड्ढे हेमंताणं पढमे समए पडिवज्जति जहेव वासाणं अभिलावो तहेव हेमंताणवि २० गिम्हाणवि ३० भाणियव्वो जाव उऊ, एवं एए तिन्निवि, एएसिं तीसं आलावगा भानियव्वा। जया णं भंते! जंबू० मंदरस्स पव्वयस्स दाहिणड्ढे पढमे अयणे पडिवज्जइ तया णं उत्तरड्ढेवि पढमे अयणे पडिवज्जइ, जहा समएणं अभिलावो तहेव अयणेणवि भानियव्वो जाव अनंतरपच्छाकडसमयंसि पढमे अयणे पडिवन्ने भवति, जहा अयणेणं अभिलावो तहा संवच्छरेणवि भाणियव्वो, जुएणवि वाससएणवि वाससहस्सेणवि वाससयसहस्सेणवि पुव्वंगेणवि पुव्वेणवि तुडियंगेणवि तुडिएणवि, एवं पुव्वे २ तुडिए २ अडडे २ अववे २ हूहूए २ उप्पले २ पउमे २ नलिणे २ अच्छनिउरे २ अउए २ नउए २ पउए २ चूलिया २ सीसपहेलिया २ पलिओवमेणवि सागरोवमेणवि भाणियव्वो।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जया णं भंते ! जंबूद्दीवे २ दाहिणड्ढे पढमा ओसप्पिणी पडिवज्जइ तया णं उत्तरड्ढेवि पढमाओसप्पिणी पडिवज्जइ, जया णं उत्तरड्ढेवि पडिवज्जइत दा णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेण नेवत्थि ओसप्पिणी नेवत्थि उस्सप्पिणी अवट्ठिए णं तत्थ काले पन्नत्ते ? समणाउसो !, हंता गोयमा ! तं चेव उच्चारेयव्वं जाव समणाउसो !, जहा ओसप्पिणीए आलावओ भनिओ एवं उस्सप्पिणीएवि भाणियव्वो ।*

**वृ.** 'जया णं भंते ! जंबूद्दीवे २ दाहिणड्ढे वासाणं पढमे समए पडिवज्जइ' इत्यादि, 'वासाणं' ति चतुर्मासप्रमाणवर्षाकालस्य सम्बन्धी 'प्रथमः' आद्यः 'समयः' क्षणः 'प्रतिपद्यते' संपद्यते भवतीत्यर्थः, 'अनंतरपुरक्खडसमयंसि' त्ति अनन्तरो-निर्व्यवधानो दक्षिणार्द्धे वर्षाप्रथमतापेक्षया स चातीतोऽपि स्यादत आह-पुरस्कृतःपुरोवर्त्ती भविष्यन्नित्यर्थः, समयः-प्रतीतः, ततः पदत्रयस्य कर्मधारयोऽ-तस्तत्र, 'अनंतरपच्छाकडसमयंसि' त्ति पूर्वापरविदेहवर्षाप्रथमसमयापेक्षया योऽनन्तरपश्चात्कृतोऽ-तीतः समयस्तत्र दक्षिणोत्तरयोर्वर्षाकालप्रथमसमयो भवतीति ।। 'एवं जहा समएण' मित्यादि, आवलिकाऽभिलापश्चैवम्-'जया णं भंते ! जंबूद्दीवे २ दाहिणड्ढे वासाणं पढमा आवलिया पडिवज्जति तया णं उत्तरड्ढेवि, जया णं उत्तरड्ढे वासाणं पढमावलिया पडिवज्जति तया णं जंबूद्दीवे २ मंदरस्स पव्वयस्स पुरच्छिमपच्चत्थिमेणं अनंतरपुरक्खडसमयंसि वासाणं पढमा आवलिया पडिवज्जइ हंता गोयमा !, इत्यादि । एवमानप्राणादिपदेष्वपि, आवलिकाद्यर्थः पुनरयम्-आवलिकाअसङ्ख्या-तसमयात्मिका आनप्राणः-उच्छ्वासनिश्वासकालः स्तोकः-सप्तप्राणप्रमाणः लवस्तुसप्तस्तोकरूपः मुहूर्त पुनर्लवसप्तसप्ततिप्रमाणः, ऋतुस्तु मासद्वयमानः, 'हेमंताणं' ति शीतकालस्य 'गिम्हाण व' त्ति उष्णकालस्य 'पढमे अयणे' त्ति दक्षिणायनं श्रावणादित्वात्संवत्सरस्य 'जुएणवि' त्ति युगं-पञ्चसंवत्सरमानं 'पुव्वंगेणवि' त्ति पूर्वाङ्ग चतुर- शीतिर्वर्षलक्षाणां 'पुव्वेणवि' त्ति पूर्वं पूर्वाङ्गमेव चतुरशीतिवर्षलक्षेण गुनितं, एवं चतुर- शीतिवर्षलक्षगुनितमुत्तरोत्तरं स्थानं भवति, चतुर्नवत्यधिकं चाङ्कशतमन्तिमेस्थाने भवतीति । 'पढमा ओसप्पिनि' त्ति अवसर्प्पयति भावानित्येवंशीलाऽवसर्प्पिणी तस्याः प्रथमो विभागः-प्रथमावसर्प्पिणी 'उस्सप्पिनि' त्ति उत्सर्प्पयति भावानित्येवंशीला उत्सर्प्पिणीति

**मू. (२१९)** *लवणे णं भंते ! समुद्दे सूरिया उदीचिपाईणमुग्गच्छ जच्चेव जंबूद्दीवस्स वत्तव्वया भनिया सच्चेव सव्वा अपरिसेसिया लवणसमुद्दस्सवि भाणियव्वा, नवरं अभिलावो इमो नेयव्वो-जया णं भंते ! लवणे समुद्दे दाहिणड्ढे दिवसे भवति तं चेव जाव तदा णं लवणे समुद्दे पुरच्छिमपच्चत्थिमेणं राई भवति, एएणं अभिलावेणं नेयव्वं ।*

*जदा णं भंते ! लवणसमुद्दे दाहिणड्ढे पढमाओस्सप्पिणी पडिवज्जइ तदा णं उत्तरड्ढेवि पढमाओस्सप्पिणी पडिवज्जइ, जदा णं उत्तरड्ढे पढमाओसप्पिणी पडिवज्जइ तदा णं लवणसमुद्दे पुरच्छिमपच्चत्थिमेणं नेवत्थि ओसप्पिणी २ समणाउसो ! ?, हंता गोयमा ! जाव समणाउसो ! ।। घायईसंडे णं भंते ! दीवे सूरिया उदीचिपादीणमुग्गच्छ जहेव जंबूद्दीवस्स वत्तव्वया भणिया सच्चेव घायइसंडस्सवि भानियव्वा, नवरं इमेणं अभिलावेणं सव्वे आलावगा भाणियव्वा ।*

*जया णं भंते ! घायइसंडे दीवे दाहिणड्ढे दिवसे भवति तदा मं उत्तरड्ढेवि जया णं उत्तरड्ढेवि तदा मं धायइसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमपच्चत्थिमेणं राती भवति ?, हंता गोयमा ! एवं चेव जाव राती भवति । जदा णं भंते ! घायदसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमेण दिवसे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भवति तदा णं पच्चत्थिमेणवि, जदाणं पच्चत्थिमेणवि तदा णं धायइसंडे दीवे मंदराणं पव्वयाणं उत्तरेणं दाहिणेणं राती भवति ?, हंता गोयमा ! जाव भवति ।*

*एवं एएणं अभिलावेणं नेयव्वं जाव जया णं भंते ! दाहिणड्ढे पढमा ओस्स० तया णं उत्तरड्ढे जया णं उत्तरड्ढे तया णं धायदसंडे दीवे मंदराणं पव्वयाणं पुरच्छिमपच्चत्थिमेणं नत्थि ओस० जाव ? समणाउसो !, हंता गोयमा ! जाव समणाउसो !, जहा लवणसमुद्दस्स वत्तव्वया तहा कालोदस्सवि भाणियव्वा, नवरं कालोदस्स नामं भानियव्वं ।*

*अब्भिंतरपुक्खरद्धे णं भंते ! सूरिया उदीचिपाईणमुग्गच्छ जहेव धायइसंडस्स वत्तव्वया तहेव अब्भिंतरपुक्खरद्धस्सवि भाणियव्वा नवरं अभिलावो जाव जाणेयव्वोजाव तया णं अब्भिंतरपुक्खरद्धे मंदराणं पुरच्छिमपच्चत्थिमेणं नेवत्थि ओस० नेवत्थि उस्सप्पिणी अवट्ठिए णं तत्थ काले पन्नत्ते समणाउसो ! सेवं भंते २ ॥*

शतकं-५ उद्देशकः-१ समाप्तः

## —: शतकं-५ उद्देशकः-२ :—

**वृ.** प्रथम उद्देशके दिक्षु दिवसादिविभाग उक्तः, द्वितीये तु तास्वेव वातं प्रतिपिपादयिषुर्वातभेदांस्तावदभिधातुमा–

**मू. (२२०)** *रायगिहे नगरे जाव एवं वदासी-अत्थि णं भंते ! ईसिं पुरेवाता पत्थावा० मंदावा० महावा० वायंति ? हंता अत्थि, अत्थि णं भंते ! पुरच्छिमेणं ईसिं पुरेवाया पत्थावाया मंदावाय महावाया वायंति ? हंता अत्थि । एवं पच्छत्थिमेणं दाहिणेणं उत्तरेणं उत्तरपुरच्छिमेणं पुरच्छिमदाहिणेणं दाहिणपच्चत्थिमेणं पच्छिमउत्तरेणं ॥*

*जया णं भंते ! पुरच्छिमेणं इसिं पुरेवाया पत्थावाय मंदावा० महावा० वायंति तया णं पच्चत्थिमेणवि ईसिं पुरेवाया जया णं पच्चत्थिमेणं ईसिं पुरेवाया तया णं पुरच्छिमेणवि ?, हंता गोयमा ! जया णं पुरच्छिमेणं तया णं पच्चत्थिमेणवि ईसिं जया णं पच्चत्थिमेणवि ईसिं तया णं पुरच्छिमेणवि ईसिं, एवं दिसासु विदिसासु ।*

*अत्थि णं भंते ! दीविच्चया ईसिं ?, हंता अत्थि । अत्थि णं भंते ! सामुद्दया ईसिं ?, हंता अत्थि । जया णं भंते ! दीविच्चया ईसिं तया णं सा सामुद्दयावि ईसिं जया णं सामुद्दया ईसिं तया णं दीविच्चयावि ईसिं ?, नो इणट्ठे समट्ठे ।*

*से केणट्ठेणं भंते ! एवं वुच्चति जया णं दीविच्चया ईसिं नो णं तया सामुद्दया ईसिं जया णं सामुद्दया ईसिं नो णं तया दीविच्चया ईसिं ?, गोयमा ! तेसि णं वायाणं अन्नमन्नस्स विवच्चासेणं लवणे समुद्दे वेलं नातिक्कमइ से तेणट्ठेणं जाव वाया वायंति।*

*अत्थि णं भंते ! ईसिं पुरेवाया पत्थावाया मंदावाया महावाया वायंति ?, हंता अत्थि । कया णं भंते ! ईसिं जाव वायंति ?, गोयमा ! जया णं वाउयाए अहारियं रियंति तया णं ईसिं जाव वायं वायंति । अत्थि णं भंते ! ईसिं० ? हंता अत्थि, कया णं भंते ! ईसिं पुरेवाया पत्था० ?, गोयमा ! जया णं वाउयाए उत्तरकिरियं रियइ तया णं ईसिं जाव वायंति ।*

*अत्थि णं भंते ! ईसिं० ?, हंता अत्थि, कया णं भंते ! ईसिं पुरेवाया पत्था० ?, गोयमा !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जया णं वाउकुमारा वाउकुमारीओ वा अप्पणो वा परस्स वा तदुभयस्स वा अट्ठाए वाउकायं उदीरेंति तया णं ईसिं पुरेवाया जाव वायंति ।*

*वाउकाए णं भंते ! वाउकायं चेव आणमंति पाण० जहा खंदए तहा चत्तारि आलावगा नेयव्वा अणेगसयसहस्स० पुट्ठे उद्दाति वा, ससरीरी निक्खमति ।।*

**वृ.** 'रायगिहे'इत्यादि, 'अत्थि'त्ति अस्त्ययमर्थो-यदुत वाता वान्तीति योगः, कीदृशाः ? इत्याह-'ईसिं पुरेवाय'त्ति मनाक् सत्रेहवाताः 'पत्थावाय'त्ति पथ्या वनस्पत्यादिहिता वायवः 'मंदावाय'त्ति मन्दाः शनैःसंचारिणोऽमहावाता इत्यर्थः 'महावाय'त्ति उद्दण्डवाता अनल्पा इत्यर्थः 'पुरच्छिमेणं'ति सुमेरोः पूर्वस्यां दिशीत्यर्थः, एवेतानि दिगविदिगपेक्षयाऽष्टौ सूत्रानि ।

उक्तं दिगभेदेन वातानां वानम्, अथ दिशामेव परस्परोपनिबन्धेन तदाह-''जया ण'मित्यादि, इह च द्वे दिकसूत्रे द्वे विदिकसूत्रे इति ।

अथ प्रकारान्तेण वातस्वरूपनिरूपणसूत्रं, तत्र 'दीविच्चग'त्ति द्वैप्याद्वीपसम्बन्धिनः 'सामुद्दय'त्ति समुद्रस्यैते सामुद्रिकाः 'अन्नमन्नविवच्चासेणं'ति अन्योऽन्यव्यत्यासेन यदैके ईषत्पुरोवातादिविशेषेण वान्ति तदेतरे न तथाविधा वान्तीत्यर्थः, 'वेलं नाइक्कमइ'त्ति तथाविधवातद्रव्यसामर्थ्याद्विवेलायास्तथास्वभावत्वाच्चेति ।

अथ वातानां वाने प्रकारान्तरेण वातस्वरूपत्रयं सूत्रत्रयेम दर्शयन्नाह-'अत्थि ण'मित्यादि, इह च प्रथमवाक्यं प्रस्तावनार्थःमिति न पुनरुक्तमित्याशङ्कनीयं, 'अहारियं रियंति'त्ति रीतं रीति स्वभाव इत्यर्थः तस्यानतिक्रमेण यथारीतं 'रीयते' गच्छति यदा स्वाभाविक्या क्रिया गतिलक्षणा यत्र गमने तदुत्तरक्रियं, तद्यथा भवतीत्येवं रीयतेगच्छति, इह चैकसूत्रेणैव वायुवानकारणत्रयस्य वक्तुं शक्यत्वे यत्सूत्रत्रयकरणं तद्विचित्रत्वात्सूत्रगतेरिति मन्तव्यं, वाचनान्तरे त्वाद्यं कारणं महावातवर्जितानां, द्वितीयं तु मन्दवातवर्जितानां, तृतीयं तु चतुर्णामप्युक्तमिति ।

वायुकायाधिकारादेवेदमाह-'वायुकाए ण'मित्यादि, 'जहा खंदए'इत्यदि, तत्र प्रथमो दर्शित एव, 'अनेगे'त्यादिर्द्वितीयः, सचैवम्-'वाउयाए णं भंते ! वाउयाए चेव अनेगसयसहस्सखुत्तो उद्दाइत्ता २ तत्थेव भुज्जो २ पच्चायाइ ?, हंता गोयमा !, 'पुट्ठे उद्दाइ'त्ति तृतीयः, स चैवम्-'से भंते ! किं पुट्ठे उद्दाइ अपुट्ठे उद्दाइ ?, गोयमा ! पुट्ठे उद्दाइ नो अपुट्ठे, 'ससररी' त्यादि :चतुर्थः, स चैवम्-'से भंते ! किं ससरीरी निक्खमइ असरीरी निक्खमइ ?, गोयमा ! सिय ससरीरी'त्यादि ।

वायुकायश्चिन्तितः, अथ वनस्पतिकायादीन् शरीरतश्चिन्तयन्नाह–

**मू. (२२१)** *अह भंते ! ओदणे कुम्मासे सुरा एए णं किंसरीराति वत्तव्वं सिया ?, गोयमा ओदणे कुम्मासे सुराए य जे घणे दव्वे एए णं पुव्वभावपन्नवणं पडुच्च वणस्सइजीवसरीरा तओ पच्छा सत्थातीया सत्थपरिणामिआ अगनिज्झामिया अगणज्झूसिया (अगनिसेविया) अगनिपरिणामिया अगनिजीवसरीरा वत्तव्वं सिया, सुराए य जे दवे दव्वे एए णं पुव्वभावपन्नवणं पडुच्च आउसीवसरीरा, तओ पच्छा सत्थातीया जाव अगनिकायसरीराति वत्तव्वं सिया । अहन्नं भंते ! अए तंबे तउए सीसए उवले कसट्टिया एए णं किंसरीराइ वत्तव्वं सिया ? गोयमा ! अए तंबे तउए सीसए उवले कसट्टिया, एए णं पुव्वभावपन्नवणं पडुच्च पुढविजीवसरीरा तओ पच्छा सत्थातीया जाव अगनिजीवसरीराति वत्तव्वं सिया ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अहन्नं भंते ! अट्ठी अट्ठिज्झामे चम्मे चम्मज्झामे रोमे २ सिंगे २ खुरे २ नखे २ एते णं किंसरीराति वत्तव्वं सिया ?, गोयमा ! अट्ठी चंमे रोमे सिंगे खुरे नहे एए णं तसपाणजीवसरीरा अट्ठिज्झामे चम्मज्झामे रोमज्झामे सिंग० खुर० नहज्झामे एए णं पुव्वभावपन्नवणं पडुच्च तसपाण-जीवसरीरा तओ पच्छा सत्थातीया जाव अगनिजीव० त्ति वत्तव्वं सिया ।*

*अह भंते ! इंगाले छारिए भुसे गोमए एस णं किंसरीरा वत्तव्वं सिया ?, गोयमा ! इंगाले छारिए भुसे गोमए एए णं पुव्व भावपन्नवणं पडुच्च एगिंदियजीवसरीरप्पओगपरिणामियावि जाव पंचिंदियजीवसरीरप्पओगपरिणामियावि तओ पच्छा सत्थातीया जाव अगनिजीवसरीराति वत्तव्वं सिया ॥*

**वृ.** 'अहे'त्यादि, 'एए णं'ति एतानि णमित्यलङ्कारे 'किंसरीर'त्ति केषां शरीरानि किंशरीरानि ? 'सुराए य जे घणे'त्ति सुरायां द्वे द्रव्ये स्यातां-घनद्रव्यं द्रवद्रव्यं च, तत्र यद् धनद्रव्यं 'पुव्वभावपन्नवणं पडुच्च'त्ति अतीतपर्यायप्ररूपणामङ्गीकृत्य वनस्पतिशरीरानि, पूर्वं हि ओदनादयो वनस्पतयः, 'तओ पच्छ'त्ति वनस्पतिजीवशरीरवाच्यत्वानन्तमग्निजीवशरीराणीति वक्तव्यं स्यादिति सम्बन्धः, किम्भूतानि सन्ति ? इत्याह-'सत्थातीय'त्ति शस्त्रेण-उदूखलमुशलयन्त्रकादिना करमभूतेनातीतानि-अतिक्रान्तानि पूर्वपर्यायमिति शस्त्रातीतानि 'सत्थपरिणामिय'त्ति शस्त्रेण परिणामितानि-कृतानि नवपर्यायानि शस्त्रपरिणामितानि ।

ततश्च 'अगनिज्झामिय'त्ति वह्निना ध्यामितानि-श्यामीकृतानि स्वकीयवर्णत्याजनात्, तथा 'अगनिज्झूसिय'त्ति अग्निना शोषितानि पूर्वस्वभावक्षपणात्, अग्निना सेवितानि वा 'जुषी प्रीतिसेवनयोः' इत्यस्य धातोः प्रयोगात्, 'अगनिपरिणामियाइं'ति संजाताग्निपरिणामानि उष्णयोगादिति, अथवा 'सत्थातीता'इत्यादौ शस्त्रमग्निरेव, 'अगनिज्झामिया'इत्यादि तु तद्वयाख्यानमेवेति, 'उवले'त्ति इह दग्धपाषाणः 'कसट्टिय'त्ति क(षप)ट्टः 'अट्ठिज्झामि'त्ति अस्थि च तद्धयामं च-अग्निना ध्यामलीकृतम्-आपादितपर्यायान्तरमित्यर्थः, 'इंगाले'इत्यादि, 'अङ्गारः' निर्ज्वलितेन्धनं 'छारिए'त्ति 'क्षारकं' भस्म 'भुसे'त्ति बुसं 'गोयम'त्ति छगणम्, इह च बुसगोमयौ भूतपर्यायानुवृत्त्या दग्धावस्थौ ग्राह्यौ अन्यथाऽग्निध्यामितादिवक्ष्यमानिविशेषणानामपनुपपत्ति स्यादिति ।

एते पूर्वभावप्रज्ञापनां प्रतीत्यैकेन्द्रियजीवैः शरीरतया प्रयोगेण-स्वव्यापारेण परिणामिता ये ते तथा एकेन्द्रियशरीराणीत्यर्थः, 'अपि' समुच्चे, यावत्करणाद् द्वीन्द्रियजीवशरीरप्रयोग-परिणामिता अपीत्यादि दृश्यं, द्वीन्द्रियादिजीवशरीरपरिणतत्वं च यथासम्भवमेव न तु सर्वपदेष्विति, तत्र पूर्वमङ्गारो भस्म चैकेन्द्रियादिशरीररूपं भवति, एकेन्द्रियादिशरीराणामिन्धनत्वात्, बुसं तु यवोगधूमहरितावस्थायामेकेन्द्रियशरीरं, गोमयस्तु तृणाद्यवस्थायामेकेन्द्रियशरीरं, द्वीन्द्रियादीनां तु गवादिभिर्भक्षणे द्वीन्द्रियादिशरीरमिति ॥ पृथिव्यादिकायाधिकारादप्कायरूपस्य लवणोदधेः स्वरूपमाह-

**मू.** *(२२२) लवणे णं भंते ! समुद्दे केवतियं चक्कवालविक्खंभेणं पन्नत्ते ?, एवं नेयव्वं जाव लोगट्ठिती लोगानुभावे, सेवं भंते ! २ त्ति भगवं जाव विहरइ ॥*

**वृ.** 'लवणे ण'मित्यादि, 'एवं नेयव्वं'ति उक्ताभिलापानुगुणतया नेतव्यं जीवाभिगमोक्तं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

लवणसमुद्रसूत्रं, किमन्तमित्याह 'जाव लोगे'त्यादि, तच्चेदम्-'केवइयं परिक्खेवेणं ?, गोयमा! दो जोयणसयसहस्साइं चक्कवालविक्खंभेणं पन्नरस सयसहस्साइं एक्कासीयं च सहस्साइं सयं च इगुणयालं किंचिविसेसूणं परिक्खेवेणं पन्नत्ते' इत्यादि।

एतस्य चान्ते 'कम्हा णं भंते! लवणसमुद्दे जंबूद्दीवं दीवं नो उव्वीलेइ' इत्यादौ प्रश्ने 'गोयमा जंबुद्दीवे २ भरहेरवएसु वासेसु अरहंता चक्कवट्टी'त्यादेरुत्तरग्रन्थस्यान्ते 'लोगट्ठिइ' इत्यादि द्रष्टव्यमिति

शतकं-५ उद्देशकः-२ समाप्तः

## —: शतकं-५ उद्देशकः-३ :—

**वृ.** अनन्तरोक्तं लवणसमुद्रादिकं सत्यं सम्यग्ज्ञानिप्रतिपादितत्वात्, मिथ्याज्ञानिप्रतिपादितं त्वसत्यमपि स्यादिति दर्शयंस्तृतीयोद्देशकस्यादिसूत्रमिदमाह—

**मू. (२२३)** *अन्नउत्थिया णं भंते! एवमातिक्खंति भा० प० एवं प० से जहानामए जालगंठिया सिया आनुपुव्विगढिया अनंतरगढिया परंपरगढिया अन्नमन्नगढिया अन्नमन्नगुरुयत्ताए अन्नमन्नभारियत्ताए अन्नमन्नगुरुयसंभारियत्ताए अन्नमन्नघडत्ताए जाव चिट्ठंति, एवामेव बहूणं जीवाणं बहूसु आजातिसयसहस्सेसु बहूइं आउयसहस्साइं आनुपुव्विंगढियाइं जाव चिट्ठंति, एगेऽविय णं जीवे एगेणं समएणं दो आउयाइं पडिसंवेदयति, तंजहा-इहभवियाउयं च परभवियाउयं च, जं समयं इहभवियाउयं पडिसंवेदेइ तं समयं परभवियाउयं पडिसंवेदेइ जाव से कहमेयं भंते! एवं ?*

*गोयमा! जन्नं ते अन्नउत्थिया तं चेव जाव परभवियाउयं च, जे ते एवमाहंसु तं मिच्छा, अहं पुण गोयमा! एवमातिक्खामि जाव परूवेमि० अन्नमन्नघडत्ताए चिट्ठंति, एवामेव एगमेगस्स जीवस्स बहूहिं आजातिसहस्सेहिं बहूइं आउयसहस्साइं आनुपुव्विंगढियाइं जाव चिट्ठंति, एगेऽविय णं जीवे एगेणं समएणं एगं आउयं पडिसंवेदेइ, तंजहा-इहभवियाउयं वा परभवियाउयं वा, जं समयं इहभवियाउयं पडिसंवेदेइ नो तं समयं पर० पडिसंवेदेति जं समयं प० नो तं समयं इहभवियाउयं प०, इहभवियाउयस्स पडिसंवेयणाए नो परभवियाउयं पडिसंवेदेइ परभवियाउयस्स पडिसंवेयणाए नो इहभवियाउयं पडिसंवेदेति।*

*एवं खलु एगे जीवे एगेणं समएणं एगं आउयं प० तंजहा इहभ० वा परभ० वा ॥*

**वृ.** 'अन्नउत्थिया ण' मित्यादि, 'जालगंठिय'त्ति जालं-मत्स्यबन्धनं तस्येव ग्रन्थयो यस्यां सा जालग्रन्थिका-जालिका, किंस्वरूपा सा? इत्याह-'आनुपुव्विंगढिय'त्ति आनुपूर्व्या-परिपाट्या ग्रथिता-गुम्फिता आद्युचितग्रन्थीनामादौ विधानाद् अन्तोचितानां क्रमेणान्त एव करणात्, एतदेव प्रपञ्चयन्नाह-'अनंतरगढिय'त्ति प्रथमग्रन्थीनामनन्तरं व्यवस्थापितैर्ग्रन्थिभि सह ग्रथिता अनन्तरग्रथिता, एवं परम्परैः-व्यवहितैः सह ग्रथिता परम्परग्रथिता, किमुक्तं भवति?-'अन्नमन्नगढिय'त्ति अन्योऽन्यं-परस्परेण एकेन ग्रन्थिना सहान्यो ग्रन्थिरन्येन च सहान्य इत्येवं ग्रथिता अन्योऽन्यग्रथिता, एवं च 'अन्नमन्नगरुयत्ताए'त्ति अन्योऽन्येन ग्रन्थनाद् गुरुकता-विस्तीर्णता अन्योऽन्यगुरुकता तया, 'अन्नमन्नभारियत्ताए'त्ति अन्योऽन्यस्य यो भारः स विद्यते यत्र तदन्योऽन्यभारिकं तद्भावस्तत्ता तया, एतस्यैव प्रत्येकोक्तार्थःद्वयस्य संयोजनेन तयोरेव प्रकर्षमभिधातुमाह—

'अन्नमन्नगुरुयसंभारियत्ताए'त्ति अन्योऽन्येन गुरुकं यत्सम्भारिकं च तत्तथा तद्भावस्तत्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तया, 'अन्नमन्नघडत्ताए' त्ति अन्योऽन्यं घटा-समुदायरचना यत्र तदन्योऽन्यघटं तद्भावस्तत्ता तया 'चिट्ठइ' त्ति आस्ते, इति दृष्टान्तोऽथ दार्ष्टान्तिक उच्यते-'एवामेव' त्ति अनेनैव न्यायेन बहूनां जीवनां सम्बन्धीनि 'बहूसु आजाइसहस्सेसु' त्ति अनेकेषु देवादिजन्मसु प्रतिजीवं क्रमप्रवृत्तेष्व-धिकरणभूतेषु बहून्यायुष्कसहस्राणि तत्स्वामिजीवानामाजीतानां च बहुशतसहस्रसङ्ख्यत्वात्, आनुपूर्वीग्रथितानीत्यादि पूर्ववद्व्याख्येयं नवरमिह भारिकत्वं कर्मपुद्गलापेक्षया वाच्यम् ॥ अथैतेषामायुषां को वेदनविधि- ? इत्याह-

'एगेऽविये' त्यादि, एकोऽपि च जीव आस्तामनेकः, एकेन समयेनेत्यादि प्रथमशतकवत्, अत्रोत्तरं-'जे ते एवमाहंसु' इत्यादि, मिथ्यात्वं चैषामेवम्-यानि हि बहूनां जीवनां बहून्यायूंषि जालग्रन्थिकावत्तिष्ठन्ति तानि यथास्वं जीवप्रदेशेषु संबद्धानि स्युरसंबद्धानि वा ?, यदि संबद्धानि तदा कथं भिन्नभिन्नजीवस्थितानां तेषां जालग्रन्थिकाकल्पना कल्पयितुं शक्या ?, तथाऽपि तत्कल्पने जीवानामपि जालग्रन्थिकाकल्पत्वं स्यात्तत्संबद्धत्वात्, तथा च सर्वजीनां सर्वायुःसंवेदनेन सर्वभवभवनप्रसङ्ग इति । अथ जीवानामसंबद्धान्यायूंषि तदा तद्वशाद्देवादिजन्मेति न स्याद-संबद्धत्वादेवेत, यच्चोक्तमेको जीव एकेन समयेन द्वे आयुषी वेदयति तदपि मिथ्या, आयुर्द्वयसंवेदने युगपद्भवद्वय- प्रसङ्गादिति ।

'अहं पुण गोयमे' त्यादि, इह पक्षे जालग्रन्थिका-सङ्कलिकामात्रम्, 'एगमेगस्से' त्यादि, एकैकस्य जीवस्य न तु बहूनां बहुधा ष्वाजातिसहस्रेषु क्रमवृत्तिष्वतीतकालिकेषु तत्कालापेक्षया सत्सु बहून्यायुःसहस्राण्यतीतानि वर्त्तमानभवान्तानि अन्यभविकमन्यभविकेन प्रतिबद्धमित्येवं सर्वानि परस्परं प्रतिबद्धानि भवन्ति न पुनरेकभव एव बहूनि 'इहभवियाउयं च' त्ति वर्त्तमानभवायुः 'परभवियाउयं व' त्ति परभवप्रायोग्यं यद्वर्त्तमानभवे निबद्धं तच्च परभवगतो यदा वेदयति तदा व्यपदिश्यते 'परभवियाउयं व' त्ति ॥ आयुः- प्रस्तावादिदमाह–

**मू. (२२४)** *जीवे णं भंते ! जे भविए नेरइएस उववज्जित्तए से णं भंते ! किं साउए संकमइ निराउए संकमइ ?, गोयमा ! साउए संकमइ नो निराउए संकमइ । से णं भंते ! आउए कहिं कडे कहिं समाइन्ने ?, गोयमा ! पुरिमे भवे कडे पुरिमे भवे समाइन्ने, एवं जाव वेमानियाणं दंडओ ।*

*से नूनं भंते ! जे जंभविए जोणिं उववज्जित्तए से तमाउयं पकरेइ, तंजहा-नेरइयाउयं वा जाव देवाउयं वा ?, हंता गोयमा ! जे जंभविए जोणिं उववज्जित्तए से तमाउयं पकरेइ, तंजहा-नेरइयाउयं वा तिरि० मणु० देवाउयं वा, नेरइयाउयं पकरेमाणे सत्तविहं पकरेइ, तंजहा-रयणप्प-भापुढविनेरइयाउयं वा जाव अहेसत्तमापुढविनेरइयाउयं वा, तिरिक्खजोणियाउयं पकरेमाणे पंचविहं पकरेइ । तंजहा-एगिंदियतिरिक्खजोनियाउयं वा, भेदो सव्वो भाणियव्वो,*

*मणुस्साउयं दुविहं, देवाउयं चउव्विहं, सेवं भंते ! सेवं भंते ! ॥*

**वृ.** 'जीवे ण' मित्यादि, 'से णं भंते' त्ति अथ तद्भदन्त ! 'कहिं कडे' त्ति क्व भवे बद्धं 'समाइन्ने' त्ति समाचरितं तद्धेतुसमाचरणात्, 'जे जंभविए जोनि उववज्जित्तए' त्ति विभक्ति-परिणामाद्यो यस्यां योनावुत्पत्तुं योग्य इत्यर्थः 'मणुस्साउयं दुविहं' ति संमूर्च्छिमगर्भव्युत्क्रान्तिक-भेदाद्द्विधा 'देवाउयं चउव्विहं' ति भवनपत्यादिभेदादिति ।

शतकं-५ उद्देशकः-३ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं-५ उद्देशकः-४ :—

**वृ.** अनन्तरोद्देशेऽन्ययूथिकछद्मस्थमनुष्यवक्तव्यतोक्ता, चतुर्थे तु मनुष्याणां छद्मस्थानां केवलिनां च प्रायः सोच्यते इत्येवंसंबन्धस्यास्येदमादिसूत्रम्-

**मू.** *(२२५) छउमत्थे णं भंते ! मणुस्से आउडिज्जमाणाइं सद्दाइं सुणेइ, तंजहा-संखसद्दानि वा सिंगस० संखियस० खरमुहिस० पोयास० परिपिरियास० पणवस० पडहस० भंभास० होरंभस० भेरिसद्दानि वा झल्लरिस० दंदुहिस० तयानि वा वितयानि धणानि वा झुसिरानि वा ?, हंता गोयमा ! छउमत्थे णं मणूसे आउडिज्जमाणाइं सद्दाइं सुणेइ, तंजहा-संखसद्दानि वा जाव झुसिरानि वा ।*

*ताइं भंते ! किं पुट्ठाइं सुणेइ अपुट्ठाइं सुणेइ ?, गोयमा ! पुट्ठाइं सुणेइ नो अपुट्ठाइं सुणेइ, जाव नियमा छद्दिसिं सुणेइ ।*

*छउमत्थे णं मणुस्से किं आरगयाइं सद्दाइं सुणेइ पारगयाइं सद्दाइं सुणेइ ?, गोयमा ! आरगयाइं सद्दाइं सुणेइ नो पारगयाइं सद्दाइं सुणेइ ।*

*जहा णं भंते ! छउमत्थे मणुस्से आरगयाइं सद्दाइं सुणेइ नो पारगयाइं सद्दाइं सुणेइ तहा णं भंते ! केवली मणुस्से किं आरगयाइं सद्दाइं सुणेइ पारगयाइं सद्दाइं सुणेइ ?, गोयमा ! केवली णं आरगयं वा पारगयं वा सव्वदूरमूलमणंतियं सद्दं जाणेइ पासेइ, से केणट्ठेणं तं चेव केवली णं आरगयं वा पारगयं वा जाव पासइ ?, गोयमा ! केवली णं पुरच्छिमेणं मियंपि जाणइ अमियंपि जा० एवं दाहिणेणं पच्चत्थिमेणं उत्तरेणं उड्ढं अहे मियंपि जाणइ अमियंपि जा० सव्वं जाणइ केवली सव्वं पासइ केवली सव्वओ जाणइ पासइ सव्वकालं जा० पा० सव्वभावे जाणइ केवली सव्वभावे पासइ केवली ।*

*अनंते नाणे केवलिस्स अनंते दंसणे केवलिस्स निव्वुडे नाणे केवलिस्स निव्वुडे दंसणे केवलिस्स से तेणट्ठेणं जाव पासइ ॥*

**वृ.** 'छउमत्थे ण'मित्यादि, 'आउडिज्जमाणाइं'ति 'जुड बन्धने' इतिवचनाद् 'आजोड्यमानेभ्यः' आसंबध्यमानेभ्यो मुखहस्तदण्डादिना सह शङ्खपटहझल्लर्यादिभ्यो वाद्यविशेषेभ्य आकुट्यमानेभ्यो वा एभ्य एव ये जाताः शब्दास्ते आजोड्यमाना आकुट्यमाना एव वोच्यन्तेऽतस्तानाजोड्यमानानाकुट्यमानान् वा शब्दान् श्रृणोति, इह च प्राकृतत्वेन शब्दशब्दस्य नपुंसकनिर्देशः

अथवा 'आउडिज्जमाणाइं'ति 'आकुट्यमानानि' परस्परेणाभिहन्यमानानि 'सद्दाइं'ति शब्दानि शब्दद्रव्यानि शङ्खादयः प्रतीताः नवरं 'संखिय'त्ति शङ्खिका ह्रस्वः शङ्खः 'खरमुहि'त्ति काहला 'पोया' महती काहला 'परिपिरिय'त्ति कोलिकपुटकावनद्धमुखो वाद्यविशेषः 'पणव'त्ति भाण्डपटहो लघुपटहो वा तदन्यस्तु पटह इति 'भंभ'त्ति ढक्का 'होरंभ'त्ति रूढिगम्या 'भेरि'त्ति महाढक्का 'झल्लरि'त्ति वलयाकारो वाद्यविशेषः 'दुंदुहि'त्ति देववाद्यविशेषः, अथोक्तानुक्तसङ्ग्रहद्वारेणाह-'ततानि वे'त्यादि, 'ततानि' वीणादिवाद्यानि तज्जनितशब्दा अपि तताः एवमन्यदपि पदत्रयं, नवरमयं विशेषस्ततादीनाम्—

॥१॥ "ततं वीणादिकं ज्ञेयं, विततं पटहादिकम् ।
धनं तु कांश्यतालादि, वंशादि शुषिरं मतम् ॥" इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'पुड्डाइं सुणेह' इत्यादि तु प्रथमशते आहारधिकारवदवसेयमिति । 'आरगायाइं'ति आराद्भागस्थितानिन्द्रियगोचरमागतानित्यर्थः 'पारगयाइं'ति इन्द्रियविषयात्परतोऽवस्थितानिति, 'सव्वदूरमूलमनंतियं'ति सर्वथा दूरं-विप्रकृष्टं मूलं च-निकटं सर्वदूरमूलं तद्योगाच्छब्दोऽपि सर्वदूरमूलोऽतस्तम् अत्यर्थं दूरवर्त्तिनमत्यन्तासन्नं चेत्यर्थः अन्तिकम्-आसन्नं तन्निषेधादनन्तिकम्, नञोऽल्पार्थःत्वान्नात्यन्तमन्तिकमदूरासन्नमित्यर्थः, तद्योगाच्छब्दोऽप्यनन्तिकोऽतस्तम्, अथवा 'सव्व'त्ति अनेन 'सव्वओ समंता' इत्युपलक्षितं, 'दूरमूलं'ति अनादिकमितिहृदयम्, 'अनंतियं'ति अनन्तिकमित्यर्थः, 'मियंपि'त्ति परिमाणवद् गर्भजमनुष्यजीवद्रव्यादि, 'अमियंपि'त्ति अनन्तमसङ्खयेयं वा वनस्पतिपृथिवीजीवद्रव्यादि 'सव्वं जाणइ'इत्यादि द्रव्याद्यपेक्षयोक्तम् ।

अथ कस्मात् सर्वं जानाति केवलीत्याद्युच्यते ? इत्यत आह-'अनंते'इत्यादि, अनन्तं ज्ञानमनन्तार्थःविषयत्वात्, तथा 'निव्वुडे नाणे केवलिस्स' त्ति 'निवृतं' निरावरणं ज्ञानं केवलिनः क्षायिकत्वात् शुद्धमित्यर्थः, वाचनान्तरे तु 'निव्वुडे वितिमिरे विसुद्धे'त्ति विशेषणत्रयं ज्ञानदर्शनयोरभिधीयते, तत्र च 'निर्वृतं' निष्ठागतं 'वितिमिरं' क्षीणावरणमत एव विशुद्धमिति

अथ पुनरपि छद्मस्थमनुष्यमेवाश्रित्याह—

**मू. (२२६)** *छउमत्थे णं भंते ! मणुस्से हसेज्ज वा उस्सुयाएज्ज वा ?, हंता सहेज्ज वा उस्सुयाएज्ज वा, जहा णं भंते ! छउमत्थे मणुसे हसेज्ज जाव उस्सु० तहा णं केवलीवि हसेज्ज वा उस्सुयाएज्ज वा ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! जाव नो णं तहा केवली हसेज्ज वा जाव उस्सुयाएज्ज वा ?, गोयमा ! जन्नं जीवा चरित्तमोहनिज्जस्स कम्मस्स उदएणं हसंति वा उस्सुयायंति वा से णं केवलिस्स नत्थि, से तेणट्ठेणं जाव नो णं तहा केवली हसेज्ज वा उस्सुयाएज्ज वा ।*

*जीवे णं भंते ! हसमाणे वा उस्सुयमाणे वा कइ कम्मपयडीओ बंधइ ?, गोयमा ! सत्तविहबंधए वा अट्ठविहबंधए वा, एवं जाव वेमानिए, पोहत्तिएहिं जीवेगिंदियवज्जो तिय भंगो ।*

*छउमत्थे णं भंते ! मणूसे निद्दाएज्ज वा पयलाएज्ज वा !, हंता निद्दाएज्ज वा पयलाएज्ज वा, जहा हसेज्ज वा तहा नवरं दरिसणावरनिज्जस्स कम्मस्स उदएणं निद्दायंति वा पयलायंति वा, से णं केवलिस्स नत्थि, अन्नं तं चेव ।*

*जीवे णं भंते ! निद्दायमाणे वा पयलायमाणे वा कति कम्मपयडीओ बंधइ ?, गोयमा ! सत्तविहबंधए वा अट्ठविहबंधए वा, एवं जाव वेमानिए, पोहत्तिएसु जीवेगिंदियवज्जो तियभंगो*

**वृ.** 'छउमत्थे'त्यादि, 'उस्सुयाएज्ज'त्ति अनुत्सुक उत्सुको भवेदुत्सुकायेत, विषयादानं प्रत्यौत्सुक्यं कुर्यादित्यर्थः, 'जन्नंजीव'त्ति यस्मात् कारणाज्जीवः 'से णं केवलिस्स नत्थि'त्ति तत्पुनश्चारित्रमोहनीयं कर्म केवलिनो नास्तीत्यर्थः, 'एवं जाव वेमानिए'त्ति, एवमिति जीवाभिलापवन्नारकादिर्दण्डको वाच्यो यावद्वैमानिक इति ।

स चैवम्-'नेरइए णं भंते ! हसमाणे वा उस्सुयमाणे वा कइ कम्मपयडीओ बंधइ ?, गोयमा ! सत्तविहबंधए वा अट्ठविहबंधए वा' इत्यादि, इह च पृथिव्यादीनां हासः प्राग्भविकतत्परिणामादवसेय इति, 'पोहत्तिएहिं'ति पृथक्त्वसूत्रेषु-बहुवचनसूत्रेषु 'जीवा णं भंते ! हसमाणा वा उस्सुयमाणा वा कइ कम्मपयडीओ बंधंति ?, गोयमा ! सत्तविहबंधगावि अट्ठविहबंधगावि' इत्यादिषु 'जीवेगिंदिए'त्यादि जीवपदमेकेन्द्रियपदानि च पृथिव्यादीनि वर्जयित्वाऽन्येष्वेकोनविंशतौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नारकादिपदेषु 'त्रिकभङ्गः' भङ्गत्रयं वाच्यं, यतो जीवपदे पृथिव्यादिपदेषु च बहुत्वाज्जीवानां सप्तविधबन्धकाश्चाष्टविधबन्धकाश्चेत्येवमेक एव भङ्गको लभ्यते।

नारकादिषु तु त्रयं, तथाहि-सर्व एव सप्तविधबन्धकाः स्युरित्येकः १, अथवा सप्तविधबन्धकाश्चाष्टविधबन्धकश्चेत्येवं द्वितीयः २, अथवा सप्तविधबन्धकाश्चाष्टविधबन्धकाश्चेत्येवं तृतीयः ३ इति।

अत्रैव छद्मस्थकेवल्यधिकारे इदमपरमाह-'छउमत्थे'त्यादि, 'निद्दाएज्ज व'त्ति निद्रां-सुखप्रतिबोधलक्षणां कुर्यात् निद्रायेत 'पयलाएज्ज व'त्ति प्रचलाम्-उर्द्धस्थितनिद्राकरणलक्षणां कुर्यात् प्रचलायेत्।

केवल्यधिकारात्केवलिनो महावीरस्य संविधानकमाश्रित्येदमाह-

**मू. (२२७)** *हरी णं भंते! हरिनेगमेसी सक्कदूए इत्थीगब्भं संहरणमाणे किं गब्भाओ गब्भं साहरइ १ गब्भाओ जोणिं साहरइ २ जोणीओ गब्भं साहरइ ३ जोणीओ जोणिं साहरइ ४?, गोयमा! नो गब्भाओ गब्भं साहरइ नो गब्भाओ जोणिं साहरइ नो जोणीओ जोणिं साहरइ परामुसिय २ अव्वाबाहेणं अव्वाबाहं जोणीओ गब्भं साहरइ।*

*पभू णं भंते! हरिनेगमेसी सक्कस्स णं दूए इत्थीगब्भं नहसिरंसि वा रोमकूवंसि वा साहरित्तए वा नीहरित्तए वा?, हंता पभू, नो चेव णं तस्स गब्भस्स किंचिवि आबाहं वा विबाहं वा उप्पाएज्जा छविच्छेदं पुण करेज्जा, एसुहुमं च णं साहरिज्ज वा नीहरिज्ज वा॥*

**वृ.** 'हरी'त्यादि, इह च यद्यपि महावीरसंविधानाभिधायकं पदं न दृश्यते तथाऽपि हरिनैगमेषीति वचनात्तदेवानुमीयते, हरिनैगमेषिणा भगवतो गर्भान्तरे नयनात्, यदि पुनः सामान्यतो गर्भहरणविवक्षाऽभविष्यत्तदा 'देवे णं भंते!' इत्यवक्ष्यदिति, तत्र हरि-इन्द्रस्तत्सम्बन्धित्वात् हरिनैगमेषीति, नाम, 'सक्कदूए'त्ति शक्रदूतः शक्रादेशकारी पदात्यनीकाधिपतिर्येन शक्रादेशाद्भगवान् महावीरो देवानन्दागर्भात्त्रिशलागर्भे संहृत इति, 'इत्थीगब्भं'ति स्त्रियाः सम्बन्धी गर्भसजीवपुद्गलपिण्डकः स्त्रीगर्भस्तं 'संहरेमाणे'त्ति अन्यत्र नयन्, इह चतुर्भङ्गिका, तत्र 'गर्भाद्' गर्भाशयादवधेः 'गर्भं' गर्भाशयान्तरं 'संहरति' प्रवेशयति 'गर्भं' सजीवपुद्गलपिण्डलक्षणमिति प्रकृतमित्येकः १, तथा गर्भादवधेः 'योनिं' गर्भनिर्गमद्वारं संहरति योन्योदरान्तरं प्रवेशयतीत्यर्थः २, तथा 'योनीतो' योनिद्वारेण गर्भं संहरति गर्भाशयं प्रवेशयतीत्यर्थः ३, तथा 'योनीतः' योनेः सकाशाद्योनिं 'संहरति' नयित योन्योदरान्निष्काश्य योनिद्वारेणैवोदरान्तरं प्रवेशयतीत्यर्थः ४।

एतेषु शेषनिषेधेन तृतीयमनुजानन्नाह-'परामुसिए'त्यादि, 'परामृश्य २' तथाविधकरणव्यापारेण संस्पृस्य २ स्त्रीगर्भम् 'अव्याबाधमव्याबाधेन' सुखंसुखेनेत्यर्थः 'योनीतः' योनिद्वारेण निष्काश्य 'गर्भं' गर्भाशयं 'संहरति' गर्भमिति प्रकृतं, यच्चेह योनीतो निर्गमनं स्त्रीगर्भस्योक्तं तल्लोकव्यवहारानुवर्त्तनात्, तथाहि-निष्पन्नोऽनिष्पन्नो वा गर्भ स्वभावाद्योन्यैव निर्गच्छतीति।

अयं च तस्य गर्भसंहरणे आचार उक्तः, अथ तत्सामर्थ्यं दर्शयन्नाह-'पभू ण'मित्यादि, 'नहसिरंसि'त्ति नखाग्रे 'साहरित्तए'त्ति संहर्त्तु-प्रवेशयितुं 'नीहरित्तए'त्ति विभक्तिपरिणामेन नखशिरसो रोमकूपाद्वा 'निहर्त्तुं' निष्काशयितुम् 'आबाहं'ति ईषद्बाधां 'विबाहं'ति विशिष्टबाधां 'छविच्छेदं'ति शरीरच्छेदं पुनः कुर्यात्, गर्भस्य हि छविच्छेदमकृत्वा नखाग्रादौ प्रवेशयितुमशक्यत्वात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एसुहुमं च णं'ति इतिसूक्ष्ममिति एवं लब्धिति ।

अनन्तरं महावीरस्य सम्बन्धि गर्भान्तरसङ्क्रमणलक्षणमाश्चर्यमुक्तम्, अथ तच्छिष्यसम्बन्धि तदेव दर्शयितुमाह–

**मू. (२२८)** *तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी अइमुत्ते नामं कुमारसमणे पगतिभद्दए जाव विनीए, तए णं से अइमत्ते कुमारसमणे अन्नया कयाइ महावुट्ठिकायंसि निवयमाणंसि कक्खपडिग्गहरयहरणमायाए बहिया संपट्ठिए विहाराए, तए णं से अइमुत्ते कुमारसमणे वाहयं वहमाणं पासइ २ मट्टियाए पालिं बंधइ नाविया मे २ नाविओविव नावमयं पडिग्गहगं उदगंसि कट्टु पव्वाहमाणे २ अभिरमइ, तं च थेरा अद्दक्खु, जेणेव समणे भगवं० तेणेव उवागच्छंति २ एवं वदासी–*

*एवं खलु देवाणुप्पियाणं अंतेवासी अतिमुत्ते नामं कुमारसमणे से णं भंते ! अतिमुत्ते कुमारसमणे कतिहिं भवग्गहणेहिं सिज्झिहिति जाव अंतं करेहिति ?, अज्जो समणे भगवं महावीरे ते थेरे एवं वयासी–*

*एवं खलु अज्जो ! मम अंतेवासी अइमुत्ते नामं कुमारसमणे पगतिभद्दए जाव विनीए से णं अइमुत्ते कुमारसमणे इमेणं चेव भवग्गहणेणं सिज्झिहिति जाव अंतं करेहिति, तं मा णं अज्जो ! तुब्भे अतिमुत्तं कुमारसमणं हीलेह निंदह खिंसह गरहह अवमन्नह, तुब्भे णं देवाणुप्पिया ! अतिमुत्तं कुमारसमणं अगिलाए संगिण्हह अगिलाए उवगिण्हह अगिलाए भत्तेणं पाणेणं विनयेणं वेयावडियं करेह, अइमत्ते णं कुमारसमणे अंतकरे चेव अंतिमसरीरिए चेव ।*

*तए णं ते थेरा भगवंतो समणेणं भगवया म० एवं वुत्ता समाणा समणं भगवं महावीरं वंदंति नमंसंति अइमुत्तं कुमरसमणं अगिलाए संगिण्हंतित्ति जाव वेयावडियं करेंति ॥*

**वृ.** 'तेण'मित्यादि, 'कुमारसमणे'त्ति षड्वर्षजातस्य तस्य प्रव्रजितत्वात्, आह च-''छव्वरिसो पव्वइओ निग्गंथं रोइऊण पावयणंति, एतदेव चाश्चर्यमिह, अन्यथा वर्षाष्टकादाराञ्च प्रव्रज्या स्यादिति, 'कक्खपडिग्गहरयहरणमायाए'त्ति कक्षायां प्रतिग्रहकं रजोहरणं चादायेत्यर्थः 'नाविया मे'त्ति 'नौका' द्रोनिका 'मे' ममेयमिति विकल्पयन्निति गम्यते 'नाविओ विव नावं'ति नाविक इव-नौवाहक इव 'नावं' द्रोणीम् 'अयं'ति असावतिमुक्तकमुनि प्रतिग्रहकं प्रवाहयन्नभिरमते, एवं च तस्य रमणक्रिया बालावस्थाबलादिति, 'अद्दक्खु'त्ति 'अद्राक्षु' दृष्टवन्तः, ते च तदीयामत्यन्तानुचितां चेष्टां दृष्ट्वा तमुपहसन्त इव भगवन्तं पप्रच्छुः ।

एतदेवाह-'एवं खलु'इत्यादि, 'हीलेह'त्ति जात्याद्युद्घट्टनतः 'निंदह'त्ति मनसा 'खिंसह'त्ति जनसमक्षं 'गरहह'त्ति तत्समक्षम् 'अवमन्नह'त्ति तदुचितप्रतिपत्त्यकरणेन 'परिभवह'त्ति क्वचित्पाठस्तत्र परिभवः-समस्तपूर्वोक्तपदाकरणेन 'अगिलाए'त्ति 'अग्लान्या' अखेदेन 'संगिण्हह'त्ति 'सङ्गृह्णीत' स्वीकुरुत 'उवगिण्हह'त्ति 'उपगृह्णीत' उपष्टम्भं कुरुत, एतदेवाह-'वेयावडियं'ति वैयावृत्त्यं कुरुतास्येति शेषः, 'अंतकरे चेव'त्ति भवच्छेदकरः, स च दूरतरभवेऽवि स्यादत आह-'अंतिमसररिए चेव'त्त चरमशरीर इत्यर्थः ।

यथाऽयमतिमुक्तको भगवच्छिष्योऽन्तिमशरीरोऽभवत् एवमन्येऽन्तिमशरीरोऽभवत् एवमन्येऽपि यावन्तस्तच्छिष्या अन्तिमशरीराः संवृत्तास्तावतो दर्शयितुं प्रस्तावनामाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (२२९)** *तेणं कालेणं २ महासुक्काओ कप्पाओ महासग्गाओ महाविमाणाओ दो देवा महिड्डीया जाव महानुभागा समणस्स भगवओ महावीरस्स अंतियं पाउब्भूया, तए णं ते देवा समणं भगवं महावीरं मणसा वंदंति नमंसंति मणसा चेव इमं एयारूवं वागरणं पुच्छंति-कति णं भंते ! देवाणुप्पियाणं अंतेवासीसयाइं सिज्झिहिंति जाव अंतं करेहिंति ?, तए णं समणे भगवं महावीरे देवेहिं मणसा पुट्ठे तेसिं देवाणं मणसा चेव इमं एतारूवं वागरणं वागरेति-एवं खलु देवाणुप्पिया ! मम सत्त अंतेवासीसयाइं सिज्झिहिंति जाव अंतं करेहिंति ।*

*तए णं ते देवा समणेणं भगवया महावीरेणं मणसा पुट्ठेणं मणसा चेव इमं एयारूवं वागरणं वागरिया समाणा हट्ठतुट्ठा जाव हयहिया समणं भगवं महावीरं वंदंति णमंसंति २ त्ता मनसा चेव सुस्सूसमाणा नमंसमाणा अभिमुहा जाव पज्जुवासंति ।*

*तेणं कालेणं २ समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूती नामं अनगारे जाव अदूरसामंते उड्ढंजाणू जाव विहरति, तए णं तस्स भगवओ गोयमस्स झाणंतरियाए वट्टमाणस्स इमेयारूवे अज्झत्थिए जाव समुप्पज्जित्था, एवं खलु दो देव महिड्डीया जाव महानुभागा समणस्स भगवओ महावीरस्स अंतियं पाउब्भूया तं नो खलु अहं ते देवे जाणामि कयराओ कप्पाओ वा सग्गाओ वा विमाणाओ कस्स वा अत्थस्स अट्ठाए इहं हव्वमागया ?*

*तं गच्छामि णं भगवं महावीरं वंदामि नमंसामि जाव पज्जुवासामि इमाइं च णं एयारूवाइं वागरणाइं पुच्छिस्सामित्ति कट्टु एवं संपहेति २ उट्ठाए उट्ठेति २ जेणेव समणे भगवं महा० जाव पज्जुवासति, गोयमादि समणे भगवं म० भगवं गोयमं एवं वदासी-से नूनं तव गोयमा ! झाणंतरियाए वट्टमाणस्स इमेयारूवे अज्झत्थिए जाव जेणेव मम अंतिए तेणेव हव्वमागए से नूनं गोयमा अत्थे समत्थे ?, हंता अत्थि, तं गच्छाहि णं गोयमा ! एए चेव देवा इमाइं एयारूवाइं वागरणाइं वागरेहिंति ।*

*तए णं भगवं गोयमे समणेणं भगवया महावीरेणं अब्भणुन्नाए समाणे समणं भगवं महावीरं वंदइ नमंसति २ जेणेव ते देवा तेणेव पहारेत्थ गमणाए, तए णं ते देवा भगवं गोयमं एज्जमाणं पासंति २ हट्ठा जाव हयहियया खिप्पामेव अब्भुट्ठेंति २ खिप्पामेव पच्चुवागच्छंति २ जेणेव भगवं गोयमे तेणेव उवागच्छंति २ त्ता जाव नमंसित्ता एवं वयासी-एवं खलु भंते ! अम्हे महासुक्कातो कप्पातो महासग्गातो महाविमाणाओ दो देवा महिड्डिया जाव पाउब्भूता तए णं अम्हे समणं भगवं महावीरं वंदामो नमंसामो २ मणसा चेव इमाइं एयारूवाइं वागरणाइं पुच्छामो ।*

*कति णं भंते ! देवाणुप्पियाणं अंतेवासीसयाइं सिज्झिहिंति जाव अंतं करेहिंति ?, तए णं समणे भगवं महावीरे अम्हेहिं मणसा पुट्ठे अम्हं मणसा चेव इमं एयारूवं वागरणं वागरेति-एवं खलु देवाणु० मम सत्त अंतेवासीसयाइं जाव अंतं करेहिंति ।*

*तए णं अम्हे समणेणं भगवया महावीरेणं मणसा चेव पुट्ठेणं मणसा चेव इमं एयारूवं वागरणं वागरिया समाणा समणं भगवं महावीरं वंदामो नमंसामो २ जाव पज्जुवासामोत्तिकट्टु भगवं गोतमं वंदंति नमंसंति २ जामेव दिसिं पाउ० तामेव दिसिं प० ।*

**वृ.** 'तेण'मित्यादि, 'महाशुक्रात्' सप्तमदेवलोकात् 'झाणंतरियाए' त्ति अन्तरस्य-विच्छेदस्य करणमन्तरिका ध्यानस्यान्तरिका ध्यानान्तरिका-आरब्धध्यानस्य समाप्तिरपूर्वस्यानारम्भणमित्यर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्तस्यां वर्त्तमानस्य 'कप्पाओ'त्ति देवलोकात् 'सग्गाओ'त्ति स्वर्गाद्, देवलोकदेशात्प्रस्तटादित्यर्थः, 'विमाणाओ'त्ति प्रस्तटैकदेशादिति, 'वागरणाइं'ति व्याक्रियन्त इति व्याकरणाः-प्रश्नार्था अधिकृता एव कल्पविमानादिलक्षणाः ॥ देवप्रस्तावादिदमाह–

**मू. (२३०)** *भंतेत्ति भगवं गोयमे समणं जाव एवं वदासी-देवा णं भंते! संजयाति वत्तव्वं सिया?, गोयमा! नो तिणट्ठे समट्ठे, अब्भक्खाणमेयं, देवा णं भंते! असंजताति वत्तव्वं सिया?*

*गोयमा! नो तिणट्ठे०, निट्ठुरवयणमेयं, देवा णं भंते! देवा णं भंते! संजयासंजयाति वत्तव्वं सिया?, गोयमा! नो तिणट्ठे समट्ठे, असब्भूयमेयं देवाणं, से किं खाति णं भंते! देवाति वत्तव्वं सिया?, गोयमा! देवा णं नोसंजयाति वत्तव्वं सिया॥*

**वृ.** 'देवा ण'मित्यादि, 'से किं खाइ णं भंते! देवाइ वत्तव्वं सिय'त्ति 'से' इति अथार्थः किमिति प्रश्नार्थः खाइत्ति पुनरर्थः णं वाक्यालङ्कारार्थः देवा इति यद्वस्तु तद्वक्तव्यं स्यादिति। 'नोसंजयाइ वत्तव्वं सिय'त्ति नोसंयता इत्येतद्वक्तव्यं स्यात्, असंयतशब्दपर्यायत्वेऽपि नोसंयतशब्दस्यानिष्ठुरवचनत्वान्मृतशब्दापेक्षया परलोकीभूतशब्दवदिति।

**मू. (२३१)** *देवा णं भंते! कयराए भासाए भासंति?, कयरा वा भासा भासिज्जमाणी विसिस्सति?, गोयमा! देवा णं अद्धमागहाए भासाए भासंति, सावि य णं अद्धमागहा भासा भासिज्जमाणी विसिस्सति॥*

**वृ.** देवाधिकारादेवेदमाह-'देवा ण'मित्यादि 'विसिस्सइ'त्ति विशिष्यते विशिष्टा भवतीत्यर्थः, 'अद्धमागह'त्ति भाषा किल षड्विधा भवति, यदाह–

॥१॥ "प्राकृतसंस्कृतमागधपिशाचभाषा च सौरसेनी च।
षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः॥

तत्र मागधभाषालक्षणं किञ्चित्किञ्चिच्च प्राकृतभाषालक्षणं यस्यामस्ति सार्द्ध मागध्या इति व्युत्पत्त्याऽर्द्धमागधीति। केवलिछद्मस्थस्य वक्तव्यताप्रस्ताव एवेदमाह–

**मू. (२३२)** *केवली णं भंते! अंतकरं वा अंतिमसरीरियं वा जाणति पासइ?, हंता! गोयमा! जाणति पासति। जहा णं भंते! केवली अंतकरं वा अंतिमसरीरियं वा जाणति पासति तहा णं छउमत्थेवि अंतकरं वा अंति मसरीरियं वा जाणति पासति?, गोयमा! नो तिणट्ठे समट्ठे, सोच्चा जाणति पासति, पमाणतो वा, से किं तं सोच्चा णं?, केवलिस्स वा केवलिसावयस्स वा केवलिसावियाए वा केवलिउवासगस्स वा केवलिउवासियाए वा तप्पक्खियस्स वा तप्पक्खियसावगस्स वा तप्पक्खियसावियाए वा तप्पक्खियउवासगस्स वा तप्पक्खियउवासियाए वा से तं सोच्चा।*

**वृ.** 'केवली'त्यादि, यथा केवली जानाति तथा छद्मस्थो न जानाति, कथञ्चित्पुनर्जानात्यपीति, एतदेव दर्शयन्नाह- 'सोच्चे'त्यादि 'केवलिस्स'त्ति 'केवलिनः' जिनस्यायमन्तकरो भविष्यतीत्यादि वचनं श्रुत्वा जानातीति, 'केवलिसावगस्स व'त्ति जनस्य समीपे यः श्रवणार्थी सन् श्रृणोति तद्वाक्यान्यसौ केवलिश्रावकः तस्य वचनं श्रुत्वा जानाति।

स हि किल जिनस्य समीपे वाक्यान्तरानि श्रृ ण्वन् अयमन्तकरो भविष्यतीत्यादकमपि वाक्यं श्रृ णुयात् ततश्च तद्वचनश्रवणाज्ज्ञानातीति, 'केवलिउवासगस्स'त्ति केलिनमुपास्ते यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रवणानाकाङ्क्षीतदुपासनामात्रपरः सन्नसौ केवल्युपासकः तस्य वचः श्रुत्वा जानति, भावना प्रायः प्राग्वत्, 'तप्पक्खियस्स'त्ति केवलिपाक्षिकस्य स्वयंबुद्धस्येत्यर्थः, इह च श्रुत्वेति वचनेन प्रकीर्णकं वचनमात्रं ज्ञानमिमित्ततावसेयं, न त्वागमरूपं, तस्य प्रमाणग्रहणेन ग्रहीष्यमाणत्वादिति

**मू. (२३३)** *से किं तं पमाणे ?, पमाणे चउव्विहे पन्नत्ते, तंजहा-पच्चक्खेअनुमाने ओवम्मे आगमे, जहा अनुओगादारे तहा नेयव्वं पमाणं जाव तेण परं नो अत्तागमे नो अनंतरागमे परंपरागमे ।*

**वृ.** 'पमाणे'त्ति प्रमीयते येनार्थःस्तत्प्रमाणं प्रमितिर्वा प्रमाणं 'पच्चक्खे'त्ति अक्षं-जीवम् अक्षानि वेन्द्रियानि प्रति गतं प्रत्यक्षम् 'अनुमाणे'त्ति अनु-लिङ्गग्रहणसम्बन्धस्मरणादेः पश्चान्मीयतेऽनेनेत्यनुमानम् 'ओवम्मे'त्ति उपमीयते-सदृशतया गृह्यते वस्त्वनयेत्युपमा सैव औपम्यम् 'आगमे'त्ति आगच्छति गुरुपारम्पर्येणेत्यागमः, एषां स्वरूपं शास्त्रलाघवार्थःमतिदेशत आह

'जहे'त्यादि, एवं चैतत्स्वरूपम्-द्विविधं प्रत्यक्षमिन्द्रियनोइन्द्रियभेदात्, तत्रेन्द्रिप्रत्यक्षं पञ्चधा-श्रोत्रादीन्द्रियभेदात, नोइन्द्रियप्रत्यक्षं त्रिधा-अवध्यादिभेदादिति, त्रिविधमनुमानं-पूर्ववच्छेषवद्-दृष्टसाधर्म्यवच्चेति, तत्र पूर्ववत् पूर्वोयलब्ध्यासाधारणलक्षणान्मात्रादि प्रमातुः प्राप्ते पुत्रादिपरिज्ञानं, शेषवत् यत्कार्यादिलिङ्गात्परोक्षार्थःज्ञानं यथा मयूरोऽतर केकायितादिति, दृष्टसाधर्म्यवत् यथैकस्य कार्षापणादेर्दर्शनादन्येऽप्येवंविधा एवेति प्रतिपत्तिरित्यादि, औपम्यं यथा गौर्गवयस्तथेत्यादि, आगमस्तु द्विधा-लौकिकलोकोत्तरभेदात्, त्रिधा वा सूत्रार्थोभयभेदात् ।

अन्यथा वा त्रिधा-आत्मागमानन्तरागमपरम्परागभेदात्, तत्रात्मागमादयोऽर्थःतः क्रमेण जिनगणधरतच्छिष्यापेक्षया द्रष्टव्याः, सूत्रतस्तु गणधरतच्छिष्यप्रशिष्यापेक्षयेति, एतस्य प्रकरणस्य सीमां कुर्वन्नाह-'जावे'त्यादि, 'तेण परं'ति गणधरशिष्याणां सूत्रतोऽनन्तरागमोऽर्थःतस्तु परम्परागमः ततः परं प्रशिष्याणामित्यर्थः ॥ केवलीतरप्रस्ताव एवेदमपरमाह-

**मू. (२३४)** *केवली णं भंते ! चरिमकम्मं वा चरिमनिज्जरं वा जाणति पासति ?, हंता गोयमा ! जाणति पासति । जहा णं भंते ! केवली चरिमकम्मं व जहा णं अंतकरेणं आलावगो तहा चरिमकम्मेणवि अपरिसेसेओ नेयव्वो ।*

**वृ.** 'केवली ण'मित्यादि, चरमकर्म यच्छैलेशीचरमसमयेऽनुभूयते चरमनिर्जरा तु यत्ततोऽनन्तरसमये जीवप्रदेशेभ्यः परिशटतीति ।

**मू. (२३५)** *केवली णं भंते ! पणीयं मणं वा वइं वा धारेज्जा ?, हंता धारेज्जा, जहा णं भंते केवली पणीयं मणं वा वइं वा धारेज्जा ते णं वेमामिया देवा जाणंति पासंति ?, गोयमा ! अत्थेगतिया जाणंति पा० अत्थेगतिया न जाणंति न पा०, से केणट्ठेणं जाव न जाणंति न पासंति ?, गोयमा वेमामिया देवा दुविहा पन्नत्ता, तंजहा-माइमिच्छादिट्ठिउववन्नगा य अमाइस- म्मदिट्ठिउवन्नया य, तत्थ णं जे ते माइमिच्छादिट्ठीउववन्नगा ते न याणंति न पासंति, तत्थ णं जे ते अमाईसम्म-दिट्ठीउववन्नगा ते णं जाणंति पासंति, से केणट्ठेणं एवं वु० अमाईसम्मदिट्ठी जाव पा० ?, गोयमा अमाई सम्मदिट्ठी दुविहा पन्नत्ता-अनंतरोववन्नगा य परंपरोववन्नगा य, तत्थ अनंतरोववन्नगान जा० परंपरोववन्नगा जाणंति, से केणट्ठेणं भंते ! एवं० परंपरोववन्नगा जाव जाणंति ?, गोयमा परंपरोववन्नगा दुविहा पन्नत्ता-पज्जत्तगा य अपज्जत्तगा य, पज्जत्ता जा० अपज्जत्ता न जा०, एवं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनंतरपरंपरपज्जत्तअपज्जत्ता य उवउत्ता अनुउवत्ता, तत्थ णं जे ते उवउत्ता ते जा० पा० से तेणट्ठेणं तं चेव।*

**वृ.** 'पणीय'न्ति प्रणीतं शुभतया प्रकृष्टं 'धारेज्ज'त्ति धारयेद्व्यापारयेदित्यर्थः।

'एवं अनंतरे'त्यादि, अस्यायमर्थः-यथा वैमानिका द्विविधा उक्ताः, मायिमिथ्यादृष्टीनां चज्ञाननिषेधः, एवममायिसम्यग्दृष्टयोऽनन्तरोपपन्नपरम्परोपपन्नकभेदेन द्विधा वाच्याः, अनन्तरोपपन्नकानां च ज्ञाननिषेधः, तथा परम्परोपपन्नका अपि पर्याप्तकापर्याप्तकभेदेन द्विधा वाच्याः, अपर्याप्तकानां च ज्ञाननिषेधः, तथा पर्याप्तका उपयुक्तानुपयुक्तभेदेन द्विधा वाच्याः, अनुपयुक्तानां च ज्ञाननिषेधश्चेति।

**मू. (२३६)** *पभू णं भंते! अनुत्तरोववाइया देवा तत्थगया चेव समाणा इहगएणं केवलिणा सद्धिं आलावं वा संलावं वा करेत्तए?, हंता पभू, से केणट्ठेणं जाव पभू णं अनुत्तरोववाइया देवा जाव करेत्तए?, गोयमा! जन्नं अनुत्तरोववाइया देवा तत्थगया चेव समाणा अट्ठं वा हेउं वा पसिणं वा वागरणं वा कारणं वा पुच्छंति तए णं इहगए केवली अट्ठं वा जाव वागरणं वा वागरेति से तेणट्ठेणं। जन्नं भंते! इहगए चेव केवली अट्ठं वा जाव वागरेति तन्नं अनुत्तरोववाइया देवा तत्थगया चेव समाभा जा० पा०?, हंता! जाणंति पासंति, से केणट्ठेणं जाव पासंति?, गोयमा! तेसिणं देवाणं अनंताओ मणोदव्ववग्गणाओ लद्धाओ पत्ताओ अभिसमन्नागयाओ भवंति से तेणट्ठेणं जन्नं इहगए केवली जाव पा०॥*

**वृ.** वाचनान्तरे त्विदं सूत्रं साक्षादेवोपलभ्यते 'आलावं व'त्ति सकृज्जल्पं 'संलावं व'त्ति मुहुर्मुहुर्जल्पं मानसिकमेवेति 'लद्धाओ'त्ति तदवधेर्विषयभावं गताः 'पत्ताओ'त्ति तदवधिना सामान्यतः प्राप्ताः परिच्छिन्ना इत्यर्थः 'अभिसमन्नागयाओ'त्ति विशेषतः परिच्छिन्नाः, यतस्तेषामवधिज्ञानं संभिन्नलोकनाडीविषयं, यच्च लोकनाडीग्राहकं तन्मनोवर्गणाग्राहकं भवत्येव, यतो योऽपिलोकसङ्ख्येयभागविषयोऽवधि सोऽपि मनोद्रव्यग्राही यः पुनः संभिन्नलोकनाडीविषयोऽसौ कथं मनोद्रव्यग्राही न भविष्यति?, इष्यते च लोकसङ्ख्येयभागावधेर्मनोद्रव्यग्राहित्वं, यदाह- "संखेज्ज मनोदव्वे भागो लोगपलियस्स बोद्धव्वो"त्ति॥

**मू. (२३७)** *अनुत्तरोववाइया णं भंते! देवा किं उदिन्नमोहा उवसंतमोहा खीणमोहा?, गोयमा! नो उदिन्नमोहा उवसंतमोहा नो खीणमोहा॥*

**वृ.** अनुत्तरसुराधिकारादिदमाह-'अनुत्तरे'त्यादि, 'उदिन्नमोह'त्ति उत्कट-वेदमोहनीयाः 'उवसंतमोह'त्ति अनुत्कटवेदमोहनीयाः, परिचारणायाः कथञ्चिदप्यभावात्, नतु सर्वथोपशान्तमोहाः, उपशमश्रेणेस्तेषामभावात्, 'नो खीणमोह'त्ति क्षपकश्रेण्या अभावादिति

पूर्वतनसूत्रे केवल्यधिकारादिदमाह-

**मू. (२३८)** *केवली णं भंते! आयाणेहिं जा० पा०?, गोयमा! नो तिणट्ठे स० से केणट्ठेणं जाव केवली णं आयाणेहिं न जाणइ न पासइ?, गोयमा! केवली णं पुरच्छिमेणं मियंपि जाणइ अमियंपि जा० जाव निव्वुडे दंसणे केवलिस्स से तेण०।*

**वृ.** 'केवली'त्यादि, 'आयाणेहिं'ति आदीयते-गृह्यतेऽर्थः एभिरित्यादानानि-इन्द्रियानि तैर्न जानाति केवलित्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू.** *(२३९) केवली णं भंते ! अस्सिं समयंसि जेसु आगासपदेसेसु हत्थं वा पायं वा बाहुं वा उरुं वा ओगाहित्ताणं चिट्ठति पभू णं भंते ! केवली सेयकालंसिवि तेसु चेव आगासपदेसेसु हत्थं वा जाव ओगाहित्ता णं चिट्ठित्तए ?, गोयमा ! णो ति०, से केणट्ठेणं भंते ! जाव केवली णं अस्सिं समयंसि जेसु आगासपदेसेसु हत्थं वा जाव चिट्ठति नो णं पभू केवली सेयकालंसिवि तेसु चेव आगासपएसेसु हत्थं वा जाव चिट्ठित्तए ?, गो० ! केवलिस्स णं वीरियसजोगसद्दव्वयाए चलाइं उवकरणाइं भवंति चलोवगरणट्ठयाए य णं केवली अस्सिं समयंसि जेसु आगासपदेसेसु हत्थं वा जाव चिट्ठति नो णं पभू केवली सेयकालंसिवि तेसु चेव जाव चिट्ठित्तए, से तेणट्ठेणं जाव वुच्चइ-केवली णं अस्सिं समयंसि जाव चिट्ठित्तए ।*

**वृ.** 'अस्सिं समयंसि'त्ति अस्मिन् वर्त्तमाने समये 'ओगाहित्ताणं'ति 'अवगाह्य' आक्रम्य 'सेयकलंसिवि'त्ति एष्यत्कालेऽपि 'वीरियसजोगसद्दव्वयाए'त्ति वीर्यं-वीर्यान्तरायक्षयप्रभवा शक्ति तत्प्रधानं सयोगं-मानसादिव्यापारयुक्तं यत्सद्-विद्यमानं द्रव्यं-जीवद्रव्यं तत्तथा ।

वीर्यसद्भावेऽपि जीवद्रव्यस्य योगान्विना चलनं न स्यादिति सयोगशब्देन सदद्रव्यं विशेषितं, सदिति विशेषणं च तस्य सदा सत्तावधारणार्थं, अथवा स्वम्-आत्मा तद्रूपं द्रव्यं स्वद्रव्यं ततः कर्मधारयः, अथवा वीर्यप्रधानः सयोगो-योगवान् वीर्यसयोगः स चासौ सद्द्रव्यश्च-मनःप्रभृतिवर्गणायुक्तो वीर्यसयोगसद्द्रव्यस्तस्य भावस्तत्ता तया हेतुभूतया 'चलाइं'ति अस्थिरानि 'उवकरणाइं'ति अङ्गानि 'चलोवगरणट्ठायाए'त्ति चलोपकरलक्षणो योऽर्थःस्तद्भावश्चलोपकरणार्थःता तया, चशब्दः पुनरर्थः ।

**मू.** *(२४०) पभू णं भंते ! चोद्दसपुव्वी घडाओ घडसहस्सं पडाओ पडसहस्सं कडाओ २ रहाओ २ छत्ताओ छत्तसहस्सं दंडाओ दंडसहस्सं अभिनिव्वट्टेत्ता उवदंसेत्तए ?, हंता पभू, से केणट्ठेणं पभू चोद्दसपुव्वी जाव उवदंसेत्तए ?, गोयमा ! चउद्दसपुव्वस्स णं अनंताइं दव्वाइं उक्करिया भेएणं भिज्जमाणाइं लद्धाइं पत्ताइं अभिसमन्नागयाइं भवंति, से तेणट्ठेणं जाव उवदंसित्तए सेवं भंते ! सेवं भंते ।*

**वृ.** केवल्यधिकारात् श्रुतकेवलिनमधिकृत्याह-'घडाओ घडसहस्सं'ति घटादवधेर्घटं निश्रां कृत्वा घटसहस्रं 'अभिनिव्वट्टित्ता'विधाया श्रुतसमुत्थलब्भिविशेषेणोपदर्शयितुं प्रभुरिति प्रश्नः, 'उक्करियाभेएणं'ति, इह पुद्गलानां भेदः पञ्चधा भवति, खण्डादिभेदात्, तत्र खण्डभेदः खण्डशो यो भवति लोष्टादेरिव प्रतरभेदोऽभ्रपटलानामिव चूर्निकाभेदस्तिलादिचूर्णवत् अनुतटिका-भेदोऽवटतटभेदवत् उत्कारिकाभेद एरण्डबीजानामिवेति, तत्रोत्कारिकाभेदेन भिद्यमानानि ।

'लद्धाइं'ति लब्धिविशेषाद्ग्रहणविषयतां गतानि 'पत्ताइं'ति तत एव गृहीतानि 'अभिसमन्नागयाइं'ति घटादिरूपेण परिणमयितुमारब्धानि, ततस्तैर्घटसहस्रादि निर्वर्त्तयति, आहारकशरीरवत्, निर्वर्त्तय च दर्शयति जनानां, इह चोत्कारिकाभेदग्रहणं तद्भिन्नानामेव द्रव्याणां विवक्षितघटादिनिष्पादनसामर्थ्यमस्ति नान्येषामितिकृत्वेति ।।

शतकं-५ उद्देशकः-४ समाप्तः

## —: शतकं-५ उद्देशकः-५ :-

**वृ.** अनन्तरोद्देशके चतुर्दशपूर्वविदो महानुभावतोक्ता, स च महानुभावत्वादेव छद्मस्थोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेत्स्यतीति कस्याप्याशङ्का स्यादतस्तदपनोदाय पञ्चमोद्देशकस्येदमादिसूत्रम्-

**मू. (२४१)** *छउमत्थे णं भंते ! मणूसे तीयमनंतं सासयं समयं केवलेणं संजमेणं जहा पढमसए चउत्थुद्देसे आलावगा तहा नेयव्वा जाव अलमत्थुत्ति वत्तव्वं सिया।*

**वृ.** 'छउमत्थे ण'मित्यादि, 'जहा पढमसए'इत्यादि, तत्र च छद्मस्थः आधोऽवधिकः पराधोऽवधिकश्च केवलेन संयमादिना न सिद्ध्यतीत्याद्यर्थःपरं तावन्नेयं यावदुत्पन्नज्ञानादिधरः केवली अलमस्त्विति वक्तव्यं स्यादिति, यच्चेदं पूर्वाधीतमपीहाधीतं तत्सम्बन्धविशेषात्, स पुनरुद्देशकपातनायामुक्त एवेति।

**मू. (२४२)** *अन्नउत्थिया णं भंते ! एवमातिक्खंति जाव परूवेंति सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता एवंभूयं वेदणं वेदेंति से कहमेयं भंते ! एवं ?, गोयमा ! जन्नं ते अन्नउत्थिया एवमातिक्खंति जाव वेदेंति जे ते एवमाहंसु मिच्छा ते एवमाहंसु, अहं पुण गोयमा ! एवमातिक्खामि जाव परूवेमि अत्थेगइया पाणा भूया जीवा सत्ता एवंभूयं वेदणं वेदेंतिअत्थेगइया पाणा भूया जीवा सत्ता अनेवंभूयं वेदणं वेदेंति।*

*से केणट्ठेणं अत्थेगतिया ? तं चेव उच्चारेयव्वं, गोयमा ! जे णं पाणा भूया जीवा सत्ता जहा कडा कम्मा तहा वेदणं वेदेंति ते णं पाणा भूया जीवा सत्ता एवंभूयं वेदणं वेदेंति, जे णं पाणा भूया जीवा सत्ता जहा कडा कम्मा नो तहा वेदणं वेदेंति ते णं पाणा भूया जीवा सत्ता अनेवंभूयं वेदणं वेदंति, से तेणट्ठेणं तहेव।*

*नेरइया णं भंते ! किं एवंभूयं वेदणं वेदेंति अनेवंभूयं वेदणं वेदंति ?, गोयमा ! नेरइया णं एवंभूयं वेदणं वेदेंति अनेवंभूयंपि वेदणं वेदंति।*

*से केणट्ठेणं तं चेव ?, गोयमा ! जे णं नेरइया णं एवंभूयं वेदणं वेदेंति अनेवंभूयंपि वेदणं वेदंति।*

*से केणट्ठेणं तं चेव ?, गोयमा ! जे णं नेरइया जहा कडा कम्मा तहा वेयणं वेदेंति ते णं नेरइया एवंभूयं वेदणं वेदेंति जे णं नेरतिया जहा कडा कम्मा नो तहा वेदणं वेदेंति ते णं नेरइया अनेवंभूयं वेदणं वेदेंति, से तेणट्ठेणं, एवं जाव वेमानिया संसारमंडलं नेयव्वं।*

**वृ.** स्वयूथिकवक्तव्यताऽनन्तरमन्ययूथिकवक्तव्यतासूत्रं, तत्र च 'एवंभूयं वेयणं'ति यथाविधं कर्म निबद्धमेवंप्रकारतयोत्पन्नां 'वेदनां' असातादिकर्मोदयं 'वेदयन्ति' अनुभवन्ति, मिथात्वं चैतद्वादिनामेवं-न हि यथा बद्धं तथैव सर्वं कर्मानुभूयते।

आयुःकर्मणो व्यभिचारात्, तथाहि-दीर्घकालानुभवनीयस्याप्यायुःकर्मणोऽल्पीयसाऽपि कालेनानुभवो भवति, कथमन्यथाऽपमृत्युव्यपदेशः सर्वजनप्रसिद्धः स्यात् ?, कथं वा महासंयुगादौ जीवलक्षाणामप्येकदैव मृत्युरुपपद्येतेति ?, 'अनेवंभूयंपि'त्ति यथा बद्धं कर्म नैवंभूता अनेवंभूता अतस्तां, श्रूयन्ते ह्यागमे कर्म्मणः स्थितिघातरसघातादय इति, 'एवं जाव वेमानिया संसारमंडलं नेयव्वं'ति 'एवम्' उक्तक्रमेण वैमानिकवसानं संसारिजीवचक्रवालं नेतव्यमित्यर्थः।

**मू. (२४३)** *जंबूददीवे णं भंते ! भारहे वासे इमीसे ओस० कइ कुलगरा होत्था ?, गोयमा सत्त एवं तित्थयरा तित्थयरमायरो पियरो पढमा सिस्सिणीओ चक्कवट्टीमायरो इत्थिरयणं बलदेवा वासुदेवा वासुदेवमायरो पियरो, एएसिं पडिसत्तू जहा समवाए परिवाडी तहा नेयव्वा, सेवं भंते २ जाव विहरइ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** अथ चेह स्थाने वाचनान्तरे कुलकरतीर्थःकरादिवक्तव्यता दृश्यते, ततश्च संसारमण्डलशब्देन पारिभाषिकसंज्ञया सेह सूचितेति संभाव्यत इति ॥

शतकं-५ उद्देशकः-५ समाप्तः

## –: शतकं-५ उद्देशकः-६ :–

**वृ.** अनन्तरोद्देशके जीवनां कर्मवेदनोक्ता, षष्ठे तु कर्म्मण एव बन्धनिबन्धनविशेषमाह, तस्य चादिसूत्रमिदम्–

**मू. (२४४)** *कहन्नं भंते ! जीवा अप्पाउयत्ताए कम्मं पकरेंति ?, गोयमा ! तिहिं ठाणेहिं, तंजहा-पाणे अइवाएत्ता मुसं वइत्ता तहारूवं समणं वा माहणं वा अफासुएणं अनेसनिज्ञेणं असनपानखाइमसाइमेणं पडिलाभेत्ता, एवं खलु जीवा अप्पाउयत्ताए कम्मं पकेइ ।*

*कहन्नं भंते ! जीवा दीहाउयत्ताए कम्मं पकरेंति ?, गोयमा ! तिहिं ठाणेहिं-नो पाणे अतिवाइत्ता नो मुसं वइत्ता तहारूवं समणं वा माहणं वा फासुएसनिज्ञेणं असनपानखाइमसाइमेणं पडिलाभेत्ता एवं खलु जीवा दीहाउयत्ताए कम्मं पकरेंति ।*

*कहन्नं भंते ! जीवा असुभदीहाउयत्ताए कम्मं पकरेंति ?, गोयमा! पाणे अइवाइत्ता मुसं वइत्ता तहारूवं समणं वा माहणं वा हीलित्ता निंदित्ता खिंसित्ता गरहित्ता अवमन्नित्ता अन्नयरेणं अमणुन्नेणं अपीतिकारेणं असनपानखाइमसाइमेणं पडिलाभेत्ता एवं खलु जीवा असुभदीहाउयत्ताए कम्मं पकरेंति ।*

*कहन्नं भंते ! जीवा सुभदीहाउयत्ताए कम्मं पकरेंति ?, गोयमा ! नो पाणे अइवाइत्ता नो मुसं वइत्ता तहारूवं समणं वा माहणं वा वंदित्ता नमंसित्ता जाव पज्जुवासित्ता अन्नयरेणं मणुन्नेणं पीइकारएणं असनपानखाइमसाइमेणं पडिला भेत्ता एवं खलु जीवा सुभदीहाउयत्ताए कम्मं पकरेंति*

**वृ.** 'कहन्न'मित्यादि, 'अप्पाउयत्ताए'त्ति अल्पमायुर्यसावल्पायुष्कस्तस्य भावस्तत्ता तस्यै अल्पायुष्कतायै अल्पजीवितव्यनिबन्धनमित्यर्थः, अल्पायुष्कतया वा, 'कर्म' आयुष्कलक्षणं 'प्रकुर्वन्ति' बध्नन्ति ?, 'पाणे अइवाएत्त'त्ति 'प्राणान्' जीवान् 'अतिपात्य' विनाश्य 'मुसं वइत्त'त्ति मृषावादमुक्त्वा 'तहारूवं'ति तथाविधस्वभावं भक्तिदानोचितपात्र मित्यर्थः ।

'समणं व'त्ति श्राम्यते-तपस्यतीति श्रमणोऽतस्तं 'माहणं व'त्ति मा हनेत्येवं योऽन्यं प्रति वक्ति स्वयं हनननिवृत्तः सन्नसौ माहनः, ब्रह्म वा ब्रह्मचर्यं कुशलानुष्ठानं वाऽस्यास्तीति ब्राह्मणोऽतस्तं, वाशब्दौ समुच्चये ।

'अफासुएणं'ति न प्रगता असवः-असुमन्तो यस्मात्तदप्रासुकं सजीवमित्यर्थः 'अनेसनिज्ञेणं'ति एष्यत इत्येषमीयं-कल्प्यं तन्निषेधादनेषणीयं तेन, अशनादिना-प्रसिद्धेन 'पडिलाभेत्त'त्ति 'प्रतिलम्भ्य' लाभवन्तं कृत्वा, अथ निगमयन्नाह–

'एव'मित्यादि, 'एवम्' उक्तलक्षणेन क्रियात्रयेणेति, अयमत्र भावार्थः-अध्यवसायविशेषादेतत्त्रयं जघन्यायुःफलं भवति, अथवेहापेक्षिकी अल्पायुष्कता ग्राह्या, यतः किल जिनागमाभिसंस्कृतमतयो मुनयः प्रथमवयसं भोगिनं कञ्चन मृतं दृष्ट्वा वक्तारो भवन्ति-नूनमनेन भवान्तरे किञ्चिदशुभं प्रानिघातादि वा सेवितमकल्प्यं वा मुनिभ्यो दत्तं येनायं भोग्यप्यल्पायुः संवृत्त इति, अनेय त्वाहुः-यो जीवो जिनसाधुगुणपक्षपातितया तत्पूजार्थं पृथिव्याद्यारम्भेण स्वभाण्डास-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्योत्कर्षणादिनाऽऽधाकर्मादिकरणेन च प्राणातिपातादिषु वर्त्तते तस्य वधादिविरतिनिरवद्यदाननिमित्तायुष्कापेक्षयेयमल्पायुष्कताऽवसेया ।

अथ नैवं निर्विशेषणत्वात्सूत्रस्य, अल्पायुष्कत्वस्य च क्षुल्लकभवग्रहणरूपस्यापि प्राणातिपतादिहेतुतो युज्यमानत्वाद् अतः अथमभिधीयते सविशेषणप्राणातिपातादिवर्त्ती जीव आपेक्षिकी चाल्पायुष्कता इति ?, उच्यते, अविशेषणत्वेऽपि सूत्रस्य प्राणातिपातादेर्विशेषणमवश्यं वाच्यं, यत इतस्तृतीयसूत्रे प्राणातिपातादि एवाशुभदीर्घायुष्कता वक्ष्यति, न हि सामान्यहेतौ कार्यवैषम्यं युज्यते, सर्वत्रानाश्वासप्रसङ्गात् ।

तथा 'समणोवासयस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासुएणं २ असणं ४ पडिलाभेमाणस्स किं कज्जइ ?, गोयमा ! बहुतरिया निज्जरा कज्जइ अप्पतरे से पावे कम्मे कज्जइ'त्ति वक्ष्यमाणवचनादवसीयते-नैवेयं क्षुल्लकभवग्रहणरूपाऽल्पायुष्कता, न हि स्वल्पपापबहुनिर्जरानिबन्धनस्यानुष्ठानस्य क्षुल्लकभवग्रहणनिमित्ता संभाव्यते, जनपूजाद्यनुष्ठानस्यापि तथाप्रसङ्गात्

नन्वेवं धर्मार्थं प्राणातिपातमृषावादाप्रासुकदानं च कर्त्तव्यमापन्नमिति, अत्रोच्यते, आपद्यतां नाम भूमिकापेक्षया को दोषः ?, यतो यतिधर्माशक्तस्य गृहस्थस्य द्रव्यस्तवद्वारेण प्राणातिपातादिकमुक्तमेव प्रवचने, दानाधिकारे श्रूयते-द्विविधाः श्रमणोपासकाः-संविग्नभाविता लुब्धकदृष्टान्तभाविता श्च भवन्ति, यथोक्तम्-

॥१॥ "संविग्गभावियाणं लोद्धयदिट्ठंतभावियाणं च ।
मोत्तूण खेत्तकाले भावं च कहिंति सुद्धुंछं ॥"

तत्र लुब्धकदृष्टान्तभाविता आगमार्थानभिज्ञत्वाद्यथाकथञ्चिद्ददति, संविग्नाविताास्त्वागमज्ञत्वात्साधुसंयमबाधापरिहारित्वात्तदुपष्टम्भकत्वाच्चौचित्येन, आगमश्चैवम्-

॥१॥ "संथरणंमि असुद्धं दोण्हवि गेण्हंतदिंतयाणऽहियं ।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे ॥" (तथा)

नायागयाणं कप्पनिज्ञाणं अन्नपाणाईणं दव्वाण मित्यादि, अथवेहाप्रासुकदानमल्पायुष्कतायां मुख्यं कारणं, इतरे तु सहकारिकारणे इति व्याख्येयं, प्राणातिपातनमृषावादनयोर्दानविशेषणत्वात्, तथाहि-प्राणानतिपात्याधाकर्मादिकरणतो मृषोक्त्वा यथा भोः साधो ! स्वार्थःमिदं सिद्धं भक्तादि कल्पनीयं चातो नानेषणीयमिति शङ्का कार्येति, ततः प्रतिलंभ्य तथा कर्म कुर्वन्तीति प्रक्रम इति, गम्भीरार्थं चेदं सूत्रमतोऽन्यथाऽपि यथाऽऽगमं भावनीयमिति ।

अथ दीर्घायुष्कताकारणान्याह-'कहन्न'मित्यदि, भवति हि जीवदयादिमतो दीर्घमायुर्यतोऽत्रापि तथैव भवन्ति दीर्घायुषं दृष्ट्वा वक्तारो-जीवदयादि पूर्वं कृतमनेन तेनायं दीर्घायुः संवृत्तः, तथा सिद्धमेव वधादिविरतेदीर्घमायुस्तस्य देवगतिहेतुत्वात्, आह च-

॥१॥ "अनुव्वयमहव्वएहि य बालतवोऽकामनिज्ञराए य ।
देवाउयं निबंधइ सम्मदिट्ठी य जो जीवो ॥"

देवगतौ च विवक्षया दीर्घमेवायुः, दानं चाश्रित्यैहैव वक्ष्यति-"समणोवासयस्स णं भंते ! तहारूवं समणं वा २ फासुएणं २ असण ४ मेणं पडिलाभेमाणस्स किं कज्जइ ?, गोयमा ! एगंतसो निज्ञरा कज्जइ"त्ति, यच्च निर्जराकारणं तद्विशिष्टदीर्घायुःकारणतया न विरुद्धं महाव्रतवदिति, व्याख्यानान्तरमपि पूर्ववदेवेति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथायुष एव दीर्घस्य सूत्रद्वयेनाशुभशुभत्वकारणान्याह-'कहन्न'मित्यादि, प्राग्वन्नवरं श्रमणादिकं हीलनादिकरणतः प्रतिलंभ्येत्यक्षरघटना, तत्र हीलनं-जात्याद्युद्घट्टनतः कुत्सा निन्दनं-मनसा खिंसनं-जनसमक्षं गर्हणं-तत्समक्षम् 'अपमाननं' अनभ्युत्थानादिकरणं 'अन्यतरेण' बहूनामेकतमेन 'अमनोज्ञेन' स्वरूपतोऽशोभनेन कदन्नादिना, अत एवाप्रीतिकारकेण, भक्तिमतस्त्वमनोज्ञं मनोज्ञमेव मनोज्ञफलत्वात्, इह च सूत्रेऽशनादि प्रासुकाप्रासुकादिना न विशेषितं, हीलनादिकर्त्तु प्रासुकादिविशेषणस्य दानस्य फलविशेषं प्रत्यकारणत्वेन मत्सरजनितहीलनादिविशेषणानामेव च प्रधानतया तत्कारणत्वेन विवक्षणात् ।

—वाचनान्तरे तु 'अफासुएणं अनेसनिज्जेणं'ति दृश्यते तत्र च प्रासुकदानमपि हीलनादिविशेषितमशुभदीर्घायुःकारणं, अप्रासुकदानं तु विशेषत इत्युपदर्शयता 'अफासुएण' इत्याद्युक्तमिति, प्राणातिपातमृषावादनयोर्दानविशेषणपक्षव्याख्यानमपि घटत एव, अवज्ञादानेऽपि प्राणातिपातादेर्दृश्यमानत्वादिति, भवति च प्राणातिपातादेरशुभदीर्घायुः, तेषां नरकगतिहेतुत्वात्, यदाह—

॥१॥　"मिच्छद्दिट्ठिमहारंभपरिग्गहो तिव्वलोभ निस्सीलो ।
नरयाउयं निबंधइ पावमई रोद्दपरिणामो ॥"

नरकगतौ च विवक्षया दीर्घमेवायुः ।

विपर्ययसूत्रं प्रागिव, नवरं इहापि प्रासुकाप्रासुकतया दानं न विशेषितं, पूर्वसूत्रविपर्यत्वाद् अस्य, पूर्वसूत्रस्य चाविशेषणतया प्रवृत्तत्वात्, न च प्रासुकाप्रासुकदानयोः फलं प्रति न विशेषोऽस्ति, पूर्वसूत्रयोस्तस्य प्रतिपादितत्वात्, तस्मादिह प्रासुकैषणीयस्य दानस्य कल्प्याप्राप्तावितरस्य चेदं फलमवसेयं, वाचनान्तरे तु 'फासुएण'मित्यादि दृश्यत एवेति, इह च प्रथममल्पायुःसूत्रं द्वितीयं तद्विपक्षस्तृतीयमशुभदीर्घायुःसूत्रं चतुर्थं तु तद्विपक्ष इति ॥

अनन्तरं कर्मबन्धक्रियोक्ता, अथ क्रियान्तराणां विषयनिरूपणायाह—

**मू. (२४५)** *गाहावइस्स णं भंते! भंडं विक्किणमाणस्स केइ भंडं अवहरेज्जा? तस्स णं भंते तं भंडं अनुगेसमाणस्स किं आरंभिया किरिया कज्जइ परिग्गहिया० माया० अप० मिच्छा० ?, गोयमा! आरंभिया किरिया कज्जइ परि० माया० अपच्च० मिच्छादंसणकिरिया सिय कज्जइ सिय नो कज्जइ ।*

*अह से भंडे अभिसमन्नागए भवति, तओ से पच्छा सव्वाओ ताओ पयणुईभवंति ।*

*गाहावतिस्स णं भंते! तं भंडं विक्किणमाणस्स कतए भंडे सातिज्जेज्जा?, भंडे य से अनुवणीए सिया, गाहावतिस्स णं भंते! ताओ भंडाओ किं आरंभिया किरया कज्जइ जाव मिच्छादंसणकिरिया कज्जइ? कइयस्स वा ताओ भंडाओ किं आरंभिया किरिया कज्जइ जाव मिच्छादंसणकिरिया कज्जइ? गोयमा! गाहावइस्स ताओ भंडाओ आरंभिया किरिया कज्जइ जाव अपच्चक्खानिया मिच्छादंसणवत्तिया किरिया सिय कज्जइ सिय नो कज्जइ, कतियस्स णं ताओ सव्वाओ पयणुई भवंति । गाहावतिस्स णं भंते! भंडं विक्किणमाणस्स जाव भंडे से उवणीए सिया?*

*कतियस्स णं भंते! ताओ भंडाओ किं आरंभिया किरिया कज्जति?, गाहावइस्स वा ताओ भंडाओ किं आरंभिया किरिया कज्जति?, गोयमा! कइयस्स ताओ भंडाओ हेट्ठिल्लाओ*

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

*चत्तारि किरियाओ कज्जंति मिच्छादंसणकिरिया भयणाए गाहावतिस्स णं ताओ सव्वाओ पयणुईभवंति।*

*गाहावतिस्स णं भंते ! भंडं जाव धणे य से अनुवणीए सिया ? एवंपि जहा भंडे उवनीए तहा नेयव्वं, चउत्थो आलावगो धणे से उवनीए सिया जहा पडमो आलावगो भंडे य से अनुवणीए सिया तहा नेयव्वो, पढमचउत्थाणं एक्को गमो बितियतइयाणं एक्को गमो।*

*अगनिकाए णं भंते ! अहुणोज्जलिते समाणे महाकम्मतराए चेव महाकिरियतराए चेव महासवतराए चेव महावेदनतराए चेव भवति, अहे णं समए २ वोक्कसज्जमाणे २ चरिमकालसमयंसि इंगालभूए मुम्मुरभूते छारियभूए तओ पच्छा अप्पकम्मतराए चेव अप्पकिरियतराए चेव अप्पासवतराए चेव अप्पवेदनतराए चेव भवति ?, हंता गोयमा ! अगनिकाएणं अहुनुज्जलिए समाणे तं चेव ॥*

**वृ.** 'गाहावइस्से'त्यादि, गृहपति-गृही ''मिच्छादंसणकिरया सिय कज्जइ'' इत्यादि, मिथ्यादर्शनप्रत्यया क्रिया स्यात्-कदाचित् क्रियते-भवति स्यान्नो क्रियते-कदाचिन्न भवति, यदा मिथ्याद्दष्टिर्गृहपतिस्तदाऽसौ भवति यदा तु सम्यग्द्दष्टिस्तदा न भवतीत्यर्थः।

अथ क्रियास्वेव विशेषमाह-'अहे'त्यादि, 'अथे'ति पक्षान्तरद्योतनार्थः 'से भंडे'त्ति तद्भाण्डं 'अभिसमन्नागए'त्ति गेवषयता लब्धं भवति 'तओ'त्ति समन्वागमनात् 'से'त्ति तस्य गृहपतेः 'पश्चात्' समन्वागमानन्तरमेव 'सव्वाओ'त्ति यासां सम्भवोऽस्ति ता आरम्भिक्यादिक्रियाः 'पतणुईभवंति'त्ति प्रतनुकीभवन्ति ह्रस्वीभवन्ति अपहृतभाण्डगवेषणकाले हि महत्यस्ता आसन् प्रयत्नविशेषपरत्वाद्गृहपतेस्तल्लाभकाले तु प्रयत्नविशेषस्योपरतत्वात्ता ह्रस्वीभवन्तीति।

'कइए भंडं साइज्जेज्'त्ति क्रयिको-ग्राहको भाण्डं 'स्वादयेत्' सत्यङ्कारदानतः स्वीकुर्यात् 'अनुवणीए सिय'त्ति क्रयिकायासमर्प्पितत्वात्, 'कइयस्स णं ताओ सव्वाओ पतणुईभवंति'त्ति अप्राप्तभाण्डत्वेन तद्गतक्रियाणामल्पत्वादिति, गृहपतेस्तु महत्यो, भाण्डस्य तदीयत्वात्, क्रयिकस्य भाण्डे समर्प्पिते महत्यस्ताः, गृहपतेस्तु प्रतनुकाः २।

इदं भाण्डस्यानुपनीतोपनीतभेदात्सूत्रद्वयमुक्तम्, एवं धनस्यापि वाच्यं, तंत्र प्रथममेवम्-'गाहावइस्स णं भंते ! भंडं विक्किणमाणस्स कइए भंडे साइज्जेज्जा ? धणे य से अनुवणीए सिया, कइयस्स णं भंते ! ताओ धणा किं आरंभिया किरिया कज्जई ५ ?'

गाहावइस्स य ताओ धणाओ किं आरंभिया किरिया कज्जइ ५ ?, गोयमा ! कइयस्स ताओ धणाओ हेट्ठिल्लाओ चत्तारि किरियाओ कज्जंति, मिच्छादंसणकिरिया भयणाए, गाहावतिस्स णं ताओ सव्वाओ पतनुईभवंति,' धनेऽनुपनीते क्रयिकस्य महत्यस्ता भवन्ति, धनस्य तदीयत्वात्, गृहपतेस्तु तास्तनुकाः, धनस्य तदानीमतदीयत्वात्, एवं द्वितीयसूत्रसमानमिदं तृतीयमत एवाह-'एयंपि जहा भंडे उवनीए तहा नेयव्वं'ति द्वितीयसूत्रसमतयेत्यर्थः ३।

चतुर्थं त्वेवमध्येयम्-'गाहावइस्स णं भंते ! भंडं विक्किणमाणस्स कइए भंडे साइज्जेज्जा धणे य से उवनीए सिया, गाहावइस्स णं भंते ! ताओ धणाओ किं आरंभिया किरिया कज्जइ ५ ? कइयस्स वा ताओ धणाओ किं आरंभिया किरिया कज्जइ ५ ?, गोयमा ! गाहावइस्स ताओ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

धणाओ आरंभिया ४ मिच्छादंसणवत्तिया किरिया सिय कज्जइ सिय नो कज्जइ, कइयस्स णं ताओ सव्वाओ पयणुईभवंति' धने उपनीते धनप्रत्ययत्वात्तासां गृहपतेर्महत्यः, क्रयिकस्य तु प्रतनुकाः धनस्य तदानीमतदीयत्वात्, एवं च प्रथमसूत्रसममिदं चतुर्थःमित्येतदनुसारेण च सूत्रपुस्तकाक्षराण्यनुगन्तव्यानि।

क्रियाऽधिकारादिदमाह-'अगनी'त्यादि, 'अहुणोज्जलिए'त्ति 'धुनोज्ज्वलितः' सद्यःप्रदीप्तः 'महाकम्मतराए'त्ति विध्यायमानानलापेक्षयाऽतिशयेन महान्ति कर्मानि-ज्ञानावरणादीनि बन्धमाश्रित्य यस्यासौ महाकर्म्मतरः, एवमन्यान्यपि, नवरं क्रिया-दाहरूपा आश्रयो-नवकर्मोपादानहेतुः वेदना-पीडा भाविनि तत्कर्मजन्या परस्परशरीरसंबाधजन्या वा 'वोक्कसिज्जमणे'त्ति 'व्यवकृष्यमाणः' अपकर्ष गच्छन् 'अप्पकम्मतराए'त्ति अङ्गाराद्यवस्थामाश्रित्य, अल्पशब्दः स्तोकार्थः, क्षारावस्थायां त्वभावार्थः ॥ क्रियाऽधिकारादेवेदमाह–

**मू. (२४६)** *पुरिसे णं भंते ! धणुं परामुसइ धणुं परामुसित्ता उसुं परामुसइ २ ठाणं ठाइ ठाणं ठिच्चा आयतकन्नाययं उसुं करेंति आययकन्नाययं उसुं करेत् उड्ढं वेहासं उसुं उव्विहइ २ ततो णं से उसुं उड्ढं वेहासं उव्विहिए समाणे जाइं तत्थ पाणाइं भूयाइं जीवाइं सत्ताइं अभिहणइ वत्तेति लेस्सेति संधाएइ संघट्टे परितावेइ किलामेइ ठाणाओ ठाणं संकामेइ जीवियाओ ववरोवेइ तए णं भंते ! से पुरिसे कतिकिरिए ?*

*गोयमा ! जावं च णं से पुरिसे धणुं परामुसइ २ जाव उव्विहइ तावं च णं से पुरिसे कातियाए जाव पाणातिवायकिरियाए पंचहिं किरियाहिं पुट्ठे, जेसिंपि य णं जीवाणं सरीरेहिं धणू निव्वत्तिए तेऽवि य णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठे, एवं धणुपुट्ठे पंचहिं किरियाहिं, जीवा पंचहिं, ण्हारू पंचहिं, उसू पंचहिं, सरे पत्तणे फले ण्हारू पंचहिं, ।*

**वृ.** 'पुरिसे ण'मित्यादि 'परामुसइ'त्ति 'परामृशति' गृह्णाति 'आययकन्नाययं'ति आयतः-क्षेपाय प्रसारितः कर्णायतः-कर्णं यावदाकृष्टस्ततः कर्मधारयाद् आयतकर्णायतः अतस्तं, 'इषुं' बाणं 'उड्ढं वेहासं'ति उर्ध्वमिति वृक्षशिखराद्यपेक्षयाऽपि स्यादत आह-'विहायसि' इत्याकाशे 'उव्विहइ'त्ति 'ऊर्ध्वं विजहाति' ऊर्ध्वंक्षिपतीत्यर्थः, 'अभिहणइ'त्ति अभिमुखमागच्छतो हन्ति 'वत्तेइ'त्ति वर्त्तुलीकरोति शरीरसङ्कोचापादनात् 'लेसेइ'त्ति 'श्लेषयति' आत्मनि श्लिष्टान् करोति 'संधाएइ'त्ति अन्योऽन्यं गात्रैः संहतान् करोति 'संघट्टेइ'त्ति मनाक् स्पृशति 'परितावेइ'त्ति समन्ततः पीडयति 'किलामेइ'त्ति मारणान्तिकादिसमुद्घातं नयति 'ठाणाओ ठाणं संकामेइ' स्वस्थानात्स्थानान्तरं नयति 'जीवियाओ ववरोवेइ'त्ति च्युतजीवितान् करोतीति।

'किरियाहिं पुट्ठे'त्ति क्रियाभि स्पृष्टः, क्रियाजन्येन कर्मणा बद्ध इत्यर्थः, 'धणु'त्ति धनुः-दण्डगुणादिसमुदायः, ननु पुरुषस्य पञ्च क्रिया भवन्तु, कायादिव्यापाराणां तस्य दृश्यमानत्वात्, धनुरादिनिर्वर्त्तकशरीराणां तु जीवानां कथं पञ्च क्रियाः ?, कायमात्रस्यापि तदीयस्य तदानीमचेनत्वात्, अचेतनकायमात्रादपि बन्धाभ्युपगे सिद्धानामपि तत्प्रसङ्गः, तदीयशरीराणामपि प्राणातिपातहेतुत्वेन लोके विपरिवर्त्तमानत्वात्।

किञ्च-यथा धनुरादीनि कायिक्यादिक्रियाहेतुत्वेन पापकर्मबन्धकारणानि भवन्ति तज्जीवानामेवं पात्रदण्डकादीनि जीवरक्षाहेतुत्वेन पुणयकर्मनिबन्धनानि स्युः, न्यानस्य समानत्वाद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, अत्रोच्यते, अविरतिपरिणामाद् बन्धः, अविरतिपरिणामश्च यथा पुरुषस्यास्ति एवं धनुरादिनिर्वर्त्तकशरीरजीवानामपीति, सिद्धानां तु नास्त्यसाविति न बन्धः, पात्रादिजीवानां तु न पुण्यबन्धहेतुत्वं, तद्धेतोर्विवेकादेस्तेष्वभावादिति, किञ्च-सर्वज्ञवचनप्रामाण्याद्यथोक्तं तत्तथा श्रद्धेयमेवेति, इषुरितिशरपत्रफलादिसमुदायः ।

**मू. (२४७)** *अहे णं से उसुं अप्पणो गुरुयत्ताए भारियत्ताए गुरुसंभारियत्ताए अहे वीससाए पच्चोवयमाणे जाइं तत्थ पाणाइं जाव जीवियाओ ववरोवेइ तावं च णं से पुरिसे कतिकिरिए*

*गोयमा ! जावं च णं से उसुं अप्पणो गुरुययाए जाव ववरोवेइ तावं च णं से पुरिसे काइयाए जाव चउहिं किरियाहिं पुट्ठे, जोसिंपि य णं जीवाणं सरीरेहिं धणू निव्वत्तिए तेवि जीवा चउहिं किरियाहिं, धणूपुट्ठे चउहिं, जीवा चउहिं, ण्हारू चउहिं, उसू पंचहिं, सरे पत्तणे फले ण्हारू पंचहिं, जेवि य से जीवा अहे पच्चोवमाणस्स उवग्गहे चिट्ठंति तेवि य णं जीवा कातियाए जाव पंचहिं किरियाहिं पुट्ठा ।।*

**वृ.** 'अहे णं से उसू'इत्यादि, इह धनुष्मदादीनां यद्यपि सर्वक्रियासु कथञ्चिन्निमित्तभावोऽस्तितथाऽपि विवक्षितबन्धं प्रत्यमुख्यप्रवृत्तिकतया विवक्षितवधक्रियायास्तैः कृतत्वेनाविवक्षमाच्छेषक्रियाणां च निमित्तभावमात्रेणापि तत्कृतत्वेन विवक्षणाच्चतस्रा उक्ताः, बाणादिजीवशरीराणां तु साक्षाद् वधक्रियायां प्रवृत्तत्वात्पञ्चेति ।। अथ सम्यक्प्ररूपणाधिकारान्मिथ्याप्ररूपणानिरासपूर्वकं सम्यकप्ररूपणामेव दर्शयन्नाह–

**मू. (२४८)** *अन्नउत्थिया णं भंते ! एवमातिक्खंति जाव परूवेंति से जहानामए-जुवतिं जुवाणे हत्थेणं हत्थे गेण्हेज्जा चक्कस्स वा नाभी अरगा उत्तासिया एवामेव जाव चत्तारि पंच जोयणसयाइं बहुसमाइन्ने मणुयलोए मणुस्सेहिं, से कहमेयं भंते ! एवं ?, गोयमा ! जन्नं ते अन्नउत्थिया जाव मणुस्सेहिं जे ते एवमाहंसु मिच्छा०, अहं पुण गोयमा ! एवमातिक्खामि जाव एवामेव चत्तारि पंच जोयणसयाइं बहुसमाइन्ने निरयलोए नेरइएहिं ।।*

**वृ.** 'अन्नउत्थिए'त्यादि, 'बहुसमाइन्ने'त्ति अत्यन्तमाकीर्णं, मिथ्यात्वं च तद्वचनस्य विभङ्गज्ञानपूर्वकत्वादवसेयमिति ।

**मू. (२४९)** *नेरइया णं भंते ! किं एगत्तं पभू विउव्वित्तए पहुत्तं पभू विउव्वित्तए ?, जहा जीवाभिगमे आलावगो तहा नेयव्वो जाव दुरहियासे ।।*

**वृ.** 'नेरइएहिं' इत्युक्तमतो नारकवक्तव्यतासूत्रम्-'एगत्तं'ति एकत्वं प्रहरणानां 'पुहुत्तं'ति 'पृथक्त्वं' बहुत्वं प्रहरणानामेव 'जहा जीवाभिगमे'इत्यादि, आलापकश्चैवम्-'गोयमा ! एगत्तंपि पहू विउव्वित्तए पुहुत्तंपि पहू विउव्वित्तए, एगत्तं विउव्वमाणे एगं महं मोग्गररूवं वा मुसुंढिरूवं वा'इत्यादि, 'पुहुत्तं विउव्वमाणे मोग्गररूवानि वा'इत्यादि, ताइं संखेज्जाइं नो असंखेज्जाइं एवं संबद्धाइं २ सरीराइं विउव्वंति विउव्वित्ता अन्नमन्नस्स कायं अभिहणमाणा २

वेयणं उदीरेंति उज्जलं विउलं पगाढं कक्कसं कडुयं फरुसं निट्ठुरं चंडं तिव्वं दुक्खं दुग्गं दुरहियासं'ति, तत्र 'उज्ज्वलां' विपक्षलेशेनाप्यकलङ्किता 'विपुलां' शरीरव्यापिकां 'प्रगाढां' प्रकर्षवतीं 'कर्कशां' कर्कशद्रव्योपमामनिष्टामित्यर्थः, एवं कटुकां परुषां निष्ठुरां चेति 'चण्डां' रौद्रां 'तीव्रा' झगिति शरीरव्यापिकां 'दुःखाम्' असुखरूपां 'दुर्गां' दुःखाश्रयणीयाम्, अत एव दुरधिसह्यामिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इयं च वेदना ज्ञानाद्याराधनाविरहेण भवतीत्याराधनाऽभावं दर्शयितुमाह–

**मू. (२५०)** *आहाकम्मं अनवज्जेत्ति मणं पहारेत्ता भवति, से णं तस्स ठाणस्स अनालोइयपडिक्कंते कालं करेइ नत्थि तस्स आराहणा, से णं तस्स ठाणस्स आलोइयपडिक्कंते कालं करेइ अत्थि तस्स आराहणा, एएणं गमेणं नेयव्वं-कीयगडं ठवियं रइयं कंतारभत्तं दुब्भिक्खभत्तं वद्दलियाभत्तं गिलाणभत्तं सेज्जायरपिंडं रायपिंडं।*

*आहाकम्मं अणवज्जेत्ति बहुजणमज्झे भासित्ता सयमेव परिभुंजित्ता भवति से णं तस्स ठाणस्स जाव अत्थि तस्स आराहणा, एयंपि तह चेव जाव रायपिंडं।*

*आहाकम्मं अणवज्जेत्ति सयं अन्नमन्नस्स अनुप्पदावेत्ता भवति, से णं तस्स एयं तह चेव जाव रायपिंडि। आहाकम्मं णं अणवज्जेत्ति बहुजणमज्झे पन्नवतित्ता भवति से णं तस्स जाव अत्थि आराहणा जाव रायपिंडं॥*

**वृ.** 'आहाकम्मे'त्यादि, 'अणवज्जे'त्ति 'अनवद्य'मिति निर्दोषमिति 'मनं पहारेत्त'त्ति मानसं 'प्रधारयिता' स्थापयिता भवति, 'रइयगं'ति मोदकचूर्णादि पुनर्मोदकादितया रचितमौद्देशिकभेदरूपं 'कंतारभत्तं'ति कान्तारम्-अरण्यं तत्र भिक्षुकाणां निर्वाहार्थं यद्विहितं भक्तं तत्कान्तारभक्तं, एवमन्यन्यपि, नवरं वार्दलिका-मेघदुर्दिनं।

'गिलाणभत्तं'ति ग्लानस्य नीरोगतार्थं भिक्षुकदानाय यत्कृतं भक्तं तद् ग्लानभक्तं, आधाकर्मादीनां सदोषत्वेनागमेऽभिहितानां निर्दोषताकल्पनं तत एव स्वयं भोजनमन्यसाधुभ्योऽनुप्रदानं सभायां निर्दोषताभणनं च विपरीतश्रद्धानादिरूपत्वान्मिथ्यात्वादि, ततश्च ज्ञानादीनां विराधना स्फुटैवेति॥

आधाकर्मादींश्च पदार्थानाचार्यादयः सभायां प्रायः प्रज्ञापयन्तीत्याचार्यादीन् फलतो दर्शयन्नाह-

**मू. (२५१)** *आयरियउवज्झाए णं भंते! सविसयंसि गणं अगिलाए संगिण्हमाणे अगिलाए उवगिण्हमाणे कतिहिं भवग्गहणेहिं सिज्झति जावं अंतं करोति?*

*गोयमा! अत्थेगतिए तेणेव भवग्गहणेणं सिज्झति अत्थेगतिए दोच्चेणं भवग्गहणेणं सिज्झति तच्चं पुण भवग्गहणं नातिक्कमति॥*

**वृ.** 'आयरिये'त्यादि, 'आयरियउवज्झाए णं'ति आचार्येण सहोपाध्याय आचार्योपाध्यायः 'सविसयंसि'त्ति 'स्वविषये' अर्थःदानसूत्रदानलक्षणे 'गणं'ति शिष्यवर्गं 'अगिलाए'त्ति अखेदेन संगृह्णन् स्वीकुर्वन् 'उपगृह्णन्' उपष्टम्भयन्, द्वितीयः तृतीयश्च भवो मनुष्यभवो देवभवान्तरितो दृश्यः, चारित्रवतोऽनन्तरो देवभव एव भवति न च तत्र सिद्धिरस्तीति॥ परानुग्रहस्यानन्तरफलमुक्तं, अथ परोपघातस्य तदाह–

**मू. (२५२)** *जे णं भंते! परं अलिएणं असब्भूतेणं अब्भक्खाणेणं अब्भक्खाति तस्स णं कहप्पगारा कम्मा कज्जंति?, गोयमा! जे णं परं अलिएणं असंतवयणेणं अब्भक्खाणेणं अब्भक्खाति तस्स णं तहप्पगारा चेव कम्मा कज्जंति।*

*जत्थेव णं अभिसमागच्छंति तत्थेव णं पडिसंवेदेंति ततो से पच्छा वेदेंति सेवं भंते २ त्ति॥*

**वृ.** 'जेण'मित्यादि, 'अलिएणं'ति 'अलीकेन भूतनिह्नवरूपे पालितब्रह्मचर्यसाधुविषयेऽपि नानेन ब्रह्मचर्यमनुपालि तमित्यादिरूपेण 'असब्भूएणं''ति अभूतोद्भावनरूपेण अचौरेऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चौरोऽयमित्यादिना, अथवा 'अलीकेन' असत्येन, तच्च द्रव्यतोऽपि भवति लुब्धकादिना मृगादीन् पृष्टस्य जानतोऽपि नाहं जानीमीत्यादि ।

अत एवाह-'असद्भूतेन' दुष्टाभिसन्धित्वादशोभनरूपेण अचौरेऽपि चौरोऽयमित्यादिना 'अब्भक्खाणेणं'ति आभिमुख्येनाख्यानं-दोषाविष्करणमभ्याख्यानं तेन 'अभ्याख्याति' ब्रूते 'कहप्पगार'त्ति कथंप्रकारानि किंप्रकाराणीत्यर्थः, 'तहप्पगार'त्ति अभ्याख्यानफलानीत्यर्थः ।

'जत्थेव ण'मित्यादि, यत्रैव मानुषत्वादौ 'अभिसमागच्छति' उत्पद्यते तत्रैव प्रतिसंवेदयत्यभ्याख्यानफलं कर्म्म ततः पश्चाद्वेदयति-निर्जरयतीत्यर्थः ॥

शतकं-५ उद्देशकः-६ समाप्तः

## –: शतकं-५ उद्देशकः-७ :–

**वृ.** षष्ठोद्देशकान्त्यसूत्रे कर्म्मपुद्गलनिर्जरोक्ता, निर्जरा च चलनमिति सप्तमे पुद्गलचलनमधिकृत्येदमाह-

**मू. (२५३)** *परमाणुपोग्गले णं भंते! एयति वेयति जाव तं तं भावं परिणमति?, गोयमा सिय एयति वेयति जाव परिणमति सिय नो एयति जाव नो परिणमति ।*

*दुपदेसिए णं भंते! खंधे एयति जाव परिणमइ?, गोयमा! सिय एयति जाव परिणमति सिय नो एयति जाव णो परिणमति, सिय देसे एयति देसे नो एयति ।*

*तिप्पएसिए णं भंते! खंधे एयति० गोयमा! सिय एयति १ सिय नो एयति, २ सिय देसे एयति नो देसो एयति ३ सिय देसे एयति नो देसा एयंति ४ सिय देसा एयंति नो देसे एयति ५ ।*

*चउप्पएसिए णं भंते खंधे एयति० ? गोयमा! सिय एयति सिय नो एयति सिय देसे एयति नो देसे एयति सिय देसे एयति नो देसा एयंति सिय देसा एयंति नो देसे एयति सिय देसा एयंति नो देसा एयंति जहा चउप्पदेसिओ तहा पंचपदेसिओ तहा जाव अनंतपदेसिओ ॥*

**वृ.** 'परमाणु'इत्यादि, 'सिय एयइ'त्ति कदाचिदेजते, कादाचित्कत्वात्सर्वपुद्गलेष्वेजनादिधर्म्माणां । द्विप्रदेशिके त्रयो विकल्पाः-स्यादेजनं १ स्यादनेजनं २ स्याद्देशेनैजनं देशेनानेजनं चेति ३, द्व्यंशत्वात्तस्येति । त्रिप्रदेशिसे पञ्च-आद्यास्त्रयस्त एव द्व्यणुकस्यापि तदीयस्यैकस्यांशस्य तथाविधपरिणामेनैकदेशतया विवक्षितत्वात्, तथा देशस्यैजनं देशयोश्चानेजनमिति चतुर्थः, तथा देशयोरेजनं देशस्य चानेजनमिति पञ्चमः । एवं चतुःप्रदेशिकेऽपि नवरं षट्, तत्र षष्ठो देशोरेजनं देशयोरेव चानेजनमिति ।

**मू. (२५४)** *परमाणुपोग्गले णं भंते! असिधारं वा खुरधारं वा ओगाहेज्ञा?, हंता! ओगाहेज्ञा ।*

*से णं भंते! तत्थ छिज्जेज्ज वा भिज्जेज्ज वा?, गोयमा! नो तिणट्ठे समट्ठे, नो खलु तत्थ सत्थं कमति, एवं जाव असंखेज्जपएसिओ ।*

*अनंतपदेसिए णं भंते! खंधे असिधारं वा खुरधारं वा ओगाहेज्ञा?, हंता! ओगाहेज्ञा ।*

*से णं तत्थ छिज्जेज्ज वा भिज्जेज्ज वा?, गोयमा! अत्थेगतिए छिज्जेज्ज वा भिज्जेज्ज वा अत्थेगतिए नो छिज्जेज्ज वा नो भिज्जेज्ज वा, एवं अगनिकायस्स मज्झंमज्झेणं तहिं नवरं झियाएज्ञा भाणितव्वं,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एवं पुक्खलसंवट्टगस्स महामेहस्स मज्झंमज्झेणं तहिं उल्ले सिया, एवं गंगाए महाणदीए पडिसोयं हव्वमागच्छेज्ञा, तहिं विनिहायमावज्ञेज्ञा, उदगावत्तं वा उदगबिंदुं वा ओगाहेज्ञा से णं तत्थ परियावज्ञेज्ञा ॥*

**वृ.** पुद्गलाधिकारादेवेदं सूत्रवृन्दम्-'परमाणु'इत्यादि, 'ओगाहेज्ञ'त्ति अवगाहेत आश्रयेत 'छिद्येत' द्विधाभावं यायात् 'भिद्येत' विदारणभावमात्रं यायात्, 'नो खलु तत्थ सत्थं कमइ'त्ति परमाणुत्वादन्यथा परमाणुत्वमेव न स्यादिति। 'अत्थेगइए छिज्ञेज्ञ'त्ति तथाविधबादरपरिणामत्वात् 'अत्थेगइए नो छिज्ञेज्ञ'त्ति सूक्ष्मपरिणामत्वात् 'उल्ले सिय'त्ति आर्द्रो भवेत् 'विनिहायमावज्ञेज्ञ'त्ति प्रतिस्खलनमापद्येत 'परियावज्ञेज्ञ'त्ति 'पर्य्यापद्येत' विनश्येत् ॥

**मू.** *(२५५) परमाणुपोग्गले णं भंते ! किं सअड्ढे समज्झे सपएसे ? उदाहु अणड्ढे अमज्झे अपएसे ?, गोयमा ! अणड्ढे अमज्झे अपएसे नो सअड्ढे नो समज्झे नो सपएसे ।*

*दुपदेसिए णं भंते ! खंधे किं सअद्धे समज्झे सपदेसे उदाहु अणद्धे अमज्झे अपदेसे ?, गोयमा ! सअद्धे अमज्झे सपदेसे नो अणद्धे नो समज्झे नो अपदेसे ।*

*तिपदेसिए णं भंते ! खंधे पुच्छा, गोयमा ! अणद्धे समज्झे सपदेसे नो सअद्धे नो अमज्झे नो अपदेसे, जहा दुपदेसिओ तहा जे समा ते भानियव्वा, जे विसमा जहा तिपएसिओ तहा भाणियव्वा ।*

*संखेज्ञपदेसिए णं भंते ! खंधे किं सअड्ढे ६ ? पुच्छा, गोयमा ! सिय सअद्धे अमज्झे सपदेसे सिय अणड्ढे समज्झे सपदेसे जहा संखेज्ञपदेसिओ तहा असंखेज्ञपदेसिओऽवि अनंतपदेसिओऽवि ॥*

**वृ.** 'दुपएसिए'इत्यादि, यस्य स्कन्धस्य समाः प्रदेशाः स सार्द्धो यस्य तु विषमाः स समध्यः, सङ्ख्येयप्रदेशिकादिस्तु स्कन्धः समप्रदेशिकः इतरश्च, तत्र यः समप्रदेशिकः स सार्द्धोऽमध्यः, इतरस्तु विपरीत इति ॥

**मू.** *(२५६) परमाणुपोग्गले णं भंते ! परमाणुपोग्गलं फुसमाणे किं देसेणं देसं फुसइ १ देसेणं देसे फुसइ २ देसेणं सव्वं फुसइ ३ देसेहिं देसं फुसति ४ देसेहिं देसे फुसइ ५ देसेहिं सव्वं फुसइ ६ सव्वेणं देसं फुसति ७ सव्वेणं देसे फुसति ८ सव्वेणं सव्वं फुसइ ९ ?, गोयमा ! नो देसेणं देसं फुसइ नो देसेणं देसे फुसति नो देसेणं सव्वं फुसइ नो देसेहिं देसं फुसति नो देसेहिं देसे फुसइ नो देसेहिं सव्वं फुसति नो सव्वेणं देसं फुसइ नो सव्वेणं देसे फुसति सव्वेणं सव्वं फुसइ ।*

*एवं परमाणुपोग्गले दुपदेसियं फुसमाणे सत्तमणवमेहिं फुसति, परमाणुपोग्गले तिपएसियं फुसमाणे निप्पच्छिमएहिं तिहिं फु०, जहा परमाणुपोग्गले तिपएसियं फुसाविओ एवं फुसावेयव्वो जाव अनंतपएसिओ ।*

*दुपएसिए णं भंते ! खंधे परमाणुपोग्गलं फुसमाणे पुच्छा, ततियनवमेहिं फुसति, दुपदेसियं फुसमाणो पढमतइयसत्तमणवमेहिं फुसइ, दुपदेसओतिपदेसियं फुसमाणो आदिल्लएहि य पच्छिल्लएहि य तिहिं फुसति, मज्झमएहिं तिहिं विपडिसेहेयव्वं, दुपदेसिओ जहा तिपदेसियं फुसावितो एवं फुसावेयव्वो जाव अनंतपएसियं ।*

*तिपएसिए णं भंते ! खंधे परमाणुपोग्गलं फुसमाणे पुच्छा, ततियछट्ठनवमेहिं फुसति,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तिपएसिओ दुपएसियं फुसमाणो पढमएणं ततिएणं चउत्थछट्ठसत्तमनवमेहिं फुसति, तिपएसिओ तिपएसियं फुसमाणो सव्वेसुवि ठाणेसु फुसति, जहा तिपएसिओ तिपदेसियं फुसावितो एवं तिपदेसिओ जाव अनंतपएसिएण संजोएयव्वो, जहा तिपएसिओ एवं जाव अनंतपएसिओ भानियव्वो ॥*

**वृ.** 'परमाणुपोग्गले णं भंते !' इत्यादि, 'किं देसेणं देस'मित्यादयो नव विकल्पाः, तत्र देशेन स्वकीयेन देशं तदीयं स्पृशति, देशेनेत्यनेन दशं देशान् सर्वमित्येवं शब्दत्रयपरेण त्रयः, एवं देशैरित्यनेन ३, सर्वेणेत्यनेन च त्रय एवेति ३।

अत्र च सर्वेण सर्वमित्येक एव घटते, परमाणोर्निरंशत्वेन शेषाणामसम्भवात्, ननु यदि सर्वेण सर्वं स्पृशतीत्युच्यते तदा परमाण्वोरेकत्वापत्तेः कथमपरापरपरमाणुयोगेन घटादिस्कन्ध-निष्पत्ति ? इत, अत्रोच्यते, सर्वेण सर्व्वं स्पृशतीति कोऽर्थः ?, स्वात्मना तावन्योऽन्यस्य लगतो, न पुनरर्द्धाद्यंशेन, अर्द्धादिदेशस्य तयोरभावात्, घटाद्यभावापत्तिस्तु तदैव प्रसज्येत यदा तयोरेकत्वापत्ति, न च तयोः सा, स्वरूपभेदात् ।

'सत्तमनवमेहिं फुसइ'त्ति सर्वेण देशं सर्वेण सर्वमित्येताभ्यामित्यर्थः, तत्र यदा द्विप्रदेशिकः प्रदेशद्वयावस्थितो भवति तदा तस्य परमाणुः सर्वेण देशं स्पृशति, परमाणोस्तद्देशस्यैव विषयत्वात्, यदा तु द्विप्रदेशिकः परिणामसौक्ष्म्यादेकप्रदेशस्थो भवति तदा तं परमाणुः सर्वेण सर्वं स्पृशतीत्युच्यते, 'निपच्छिमएहिं तिहिं फुसइ'त्ति त्रिप्रदेशिकमसौ स्पृशंस्त्रिभिरन्त्यैः स्पृशति, तत्र यदा त्रिप्रदेशिकः प्रदेशत्रयस्थितो भवति तदा तस्य परमाणुः सर्वेण देशं स्पृशति परमाणोस्तद्देशस्यैव विषयत्वात्, यदा तु तस्यैकत्र प्रदेशे द्वौ प्रदेशौ अन्यत्रैकोऽवस्थितः स्यात्तदा एकप्रदेशस्थितपरमाणुद्वयस्य परमाणोः स्पर्शविषयत्वेन सर्वेण देशौ स्पृशतीत्युच्यते, ननु द्विप्रदेशिकेऽपि युक्तोऽयं विकल्पस्तत्रापि प्रदेशद्वयस्य स्पृश्यमानत्वात् ?, नैवं, यतस्तत्र द्विप्रदेशमात्र एवावयवीति कस्य देशौ स्पृशति ?, त्रिप्रदेशिके तु त्रयापेक्षया द्वयस्पर्शने एकोऽवशिष्यते ततश्च सर्वेण देशौ त्रिप्रदेशिकस्य स्पृशतीति व्यपदेशः साधुः स्यादित्ति, यदा त्वेकप्रदेशावगाढोऽसौ तदा सर्वेण सर्वं स्पृशतीति स्यादिति ।

'दुपएसिए ण'मित्यादि, 'तइयनवमेहिं फुसइ'त्ति यदा द्विप्रदेशिकः द्विप्रदेशस्थस्तदा परमाणुं देशेन सर्वं स्पृशतीति तृतीयः, यदा त्वेकप्रदेशावगाढोऽसौ तदा सर्वेण सर्वमिति नवमः । 'दुपएसिओ दुपएसिय'मितयादि, यदा द्विप्रदेशिकौ प्रत्येकं द्विप्रदेशावगाढौ तदा देशेन देशमिति प्रथमः, यदा त्वेक एकत्रान्यस्तु द्वयोस्तदा देशेन सर्वमिति तृतीयः, तथा सर्वेण देशमिति सप्तमः, नवमस्तु प्रतीति एवेति, अनया दिशाऽन्येऽपि व्याख्येया इति ॥ पुद्गलाधिकारादेव पुद्गलानां द्रव्यक्षेत्र-भावान् कालतश्चिन्तयति, तत्र–

**मू. (२५७)** *परमाणुपोग्गले णं भंते ! कालतो केवच्चिरं होति ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं, एवं जाव अनंतपएसिओ । एगपदेसोगाढे णं भंते ! पोग्गले सेए तम्मि वा ठाणेसु अन्नंमि वा ठाणे कालओ केवचिरं होइ ?, गोयमा ! जह० एगं समयं उक्को० आवलियाए असंखेज्जइभागं, एवं जाव असंखेज्जपदेसोगाढे ।*

*एगपदेसोगाढे णं भंते ! पोग्गले निरेए कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं, एवं जाव असंखेज्जपदेसोगाढे ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एगगुणकालएण णं भंते ! पोग्गले कालओ केवचिरं होइ ?, गोयम ! जह० एगं समयं उ० असंखेज्जं कालं एवं जाव अनंतगुणकालए, एवं वन्नगंधरसफास० जाव अनंतगुणलुक्खे, एवं सुहुमपरिणए पोग्गले एवं बादरपरिणए पोग्गले ।*

*सद्दपरिणए णं भंते ! पुग्गले कालओ केवचिरं होइ ?, गोयमा ! ज० एगं समयं उ० आवलियाए असंखेज्जइभागं, असद्दपरिणए जहा एगगुणकालए ।*

*परमाणुपोग्गलस्स णं भंते ! अंतरं कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं ।*

*दुप्पएसियस्स णं भंते ! खंधस्स अंतरं कालओ केवचिर होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं ।*

*दुप्पएसियस्स णं भंते ! खंधस्स अंतरं कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं अनंतं कालं, एवं जाव अनंतपएसिओ । एगपएसोगाढस्स णं भंते ! पोग्गलस्स सेयस्स अंतरं कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं, एवं जाव असंखेज्जपएसोगाढे ।*

*एगपएसोगाढस्स णं भंते ! पोग्गलस्स निरेयस्स अंतरं कालओ केवचिरं होइ ?, गोयमा जहन्नेणं एगं समयं उक्कोसेणं आवलियाए असंखेज्जइभागं, एवं जाव असंखेज्जपएसोगाढे ।*

*वन्नगंधरसफासमुहुमपरिणयबायरपरिणयाणं एतेसिं जं चेव संचिट्ठणा तं चेव अंतरंपि भाणियव्वं ।*

*सद्दपरिणयस्स णं भंते ! पोग्गलस्स अंतरं कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं ।*

*असद्दपरिणयस्स णं भंते ! पोग्गलस्स अंतरं कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एगं समयं उक्कोसेणं आवलियाए असंखेज्जइभागं ॥*

**वृ.** 'परमाणु'इत्यादि द्रव्यचिन्ता 'उक्कोसेणं असंखेज्जं कालं'ति असंख्येयकालात्परः पुद्गलानामेकरूपेण स्थित्यभावात् 'एगपएसोगाढे ण'मित्यादि क्षेत्रचिन्ता, 'सेए'त्ति 'सैजः' सकम्पः 'तम्मि वाठाणे'त्ति अधिकृत एव 'अन्नम्मि व'त्ति अधिकृतादन्यत्र 'उक्कोसेणं आवलियाए असंखेज्जइभागं'ति पुद्गलानामाकस्मिकत्वाच्चलनस्य न निरेजत्वादीनामिवासङ्ख्येयकालत्वं, 'असंखेज्जपएसोगाढे'त्ति अनन्तप्रदेशावगाढस्यासम्भवादसङ्ख्यातप्रदेशावगाढ इत्युक्तं, 'निरेए'त्ति 'निरेजः' निष्प्रकम्पः ।

'परमाणुपोग्गलस्से'त्यादि, परमाणोरपगते परमाणुत्वे यदपरमाणुत्वेन वर्त्तनमापरमाणुत्वपरिणतेः तदन्तरं-स्कन्धसम्बन्धकालः, स चोत्कर्षतोऽसङ्ख्यात इति ।

द्विप्रदेशिकस्य तु शेषस्कन्धसम्बन्धकालः परमाणुकालश्चान्तरकालः, स च तेषामनन्तत्वात् प्रत्येकं चोत्कर्षतोऽसङ्ख्येयस्थितिकत्वादनन्तः, तथा यो निरेजस्य कालः स सैजस्यान्तरमितिकृत्वोक्तं सैजस्यान्तरमुत्कर्षतोऽसङ्ख्यातकाल इति, यस्तु सैजस्य कालः स निरेजस्यान्तरमितिकृत्वोक्तं निरेजस्यान्तरमुत्कर्षत आवलिकाया असङ्ख्यातो भाग इति ।

एकगुणकालकत्वादीनां चान्तरमेकगुणकालकत्वादिकालसमानमेव, न पुनर्द्विगुणकाल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वादीनामनन्तत्वेन तदन्तरस्यानन्तत्वं, वचनप्रामाण्यात् । सूक्ष्मादिपरिणतानां त्ववस्थानतुल्यमेवान्तरं, यतो यदेवैकस्यावस्थानं तदेवान्यस्यान्तरं, तच्चासङ्खेयकालमानमिति ।

'सद्दे'त्यादि तु सूत्रसिद्धम् ॥

**मू. (२५८)** *एयस्स णं भंते ! दव्वट्ठाणाउयस्स खेत्तट्ठाणाउयस्स ओगाहणट्ठाणाउयस्स भावट्ठाणाउयस्स कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे खेत्तट्ठाणाउए ओगाहणट्ठाणाउए असंखेज्जगुणे दव्वट्ठाणाउए असंखेज्जगुणे भावट्ठाणाउए असंखेज्जगुणे-*

**वृ.** 'एयस्स णं भंते ! दव्वट्ठाणाउयस्स'त्ति द्रव्यं-पुद्गलद्रव्यं तस्य स्थानं-भेदः परमाणुद्विप्रदेशिकादि तस्यायुः-स्थिति, अथवा द्रव्यस्याणुत्वादिभावेन यत्स्थानं तद्रूपमायुः द्रव्यस्थानायुस्तस्य 'खित्तट्ठाणाउयस्स'त्ति क्षेत्रस्य-आकाशस्य स्थानं-भेदः पुद्गलावगाहकृतस्तस्यायुः-स्थिति, अथवा क्षेत्रे-एकप्रदेशादौ स्थानं-यत्पुद्गलानामवस्थानं तद्रूपमायुः क्षेत्रस्थानायुः, एवमवगाहनास्थानायुः भावस्थानायुश्च, नवरमवगाहना-नियतपरिमाणक्षेत्रावगाहित्वं पुद्गलानां भावस्तुकालत्वादि, ननु क्षेत्रस्यावगाहनायाश्च को भेदः ?, उच्यते, क्षेत्रमवगाढमेव, अवगाहना तु विवक्षितक्षेत्रादन्यत्रापि पुद्गलानां तत्परिमाणावगाहित्वमिति । 'कयरे'इत्यादि कण्ठ्यं ।

**मू. (२५९)** *खेत्तोगाहणदव्वे भावट्ठाणाउयं च अप्पबहुं ।*
*खेत्ते सव्वत्थोवे से सा ठाणा असंखेज्जा ॥*

**वृ.** एषां च परस्परेणाल्पबहुत्वव्याख्या गाथानुसारेण कार्या, ताश्चेमाः-

॥ १ ॥ खेत्तोगाहणदव्वेभावट्ठाणाउअप्पबहुयत्ते ।
थोवा असंखगुनिया तिन्नि य सेसा कहं नेया ॥
॥ २ ॥ श्वेतामुत्तत्ताओ तेण समं बंधपच्चयाभावा ।
तो पोग्गलाण थोवो खेत्तावट्ठाणकालो उ ॥
॥ ३ ॥ अन्नकखेत्तगयस्सवि तं चिय माणं चिरंपि संभवइ ।
ओगाहणनासे पुण खेत्तन्नत्तं फुडं होइ ॥
॥ ४ ॥ ओगाहणावबद्धा खेत्तद्धा अकिरियावबद्धा य ।
न उ ओगाहणकालो खेत्तद्धामेत्तसंबद्धो ॥
॥ ५ ॥ जम्हा तत्थऽन्नत्थ य सच्चिय ओगाहणा भवे खेत्ते ।
तम्हा खेत्तद्धाओऽवगाहणद्धा असंखगुणा ॥
॥ ६ ॥ संकोयविकोएण व उवरमियाएऽवगाहणाएवि ।
तत्तियमेत्ताणं चिय चिरंपि दव्वाणऽवत्थाणं ॥
॥ ७ ॥ संघायभेयओ वा दव्वोवरमे पुणाइ संखेत्ते ।
नियमा तद्दव्वोगाहणाए नासो न संदेहो ॥
॥ ८ ॥ ओगाहद्धा दव्वे संकोयविकोयओ य अवबद्धा ।
न उ दव्वं संकोयणविकोयमित्तेण संबद्धं ॥
॥ ९ ॥ जम्हा तत्थऽन्नत्थ व दव्वं ओगाहणाए तं चेव ।
दव्वद्धाऽसंखगुणा तम्हा ओगाहणद्धाओ ॥
॥ १० ॥ संघायमेयओ वा दव्वोवरमेऽवि पज्जवा संति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं कसिणगुणविरामे पुणाइ दव्वं न ओगाहो ॥
॥११॥ संघायभेयबंधानुवत्तिणी निच्चमेव दव्वद्धा ।
न उ गुणकालो संघायभेयमेत्तऽद्धसंबद्धो ॥
॥१२॥ जम्हा तत्थऽन्नत्थ य दव्वे खेत्तावगाहणासुं च ।
ते चेव पज्जवा संति तो तदद्धा असंखगुणा ॥
॥१३॥ आह अनेगंतोऽयं दव्वोवरमे गुणाणऽवत्थाणं ।
गुणविप्परिणामंमि य दव्वविसेसो यऽनेगंतो ॥
॥१४॥ विप्परिमयंमि दव्वे कम्मिं गुणपरिणई भवे जुगवं ।
कम्मिवि पुण तदवत्थे होई पुण गुणा परीणामी गुणविप्परीणामो ॥
॥१५॥ भन्नइ सच्चं किं पुण गुणबाहुल्ला न सव्वगुणनासो ।
दव्वस्स तदन्नत्तेऽवि बहुतराणं गुणाण ठिई ॥

अयमर्थः-क्षेत्रस्यामूर्त्तत्वेन क्षेत्रेण सह पुद्गलानां विशिष्टबन्धप्रत्ययस्य-स्नेहादेरभावान्नैकत्र ते चिरं तिष्ठन्तीति शेषः, यस्मादेवं तत इत्यादि व्यक्तं ।

अथावगाहनायुर्बहुत्वं भाव्यते-इह पूर्वार्द्धेन क्षेत्राद्धाया अधिका अवगाहनाद्धेत्युक्तम्, उत्तरार्द्धेन त्ववगाहनाद्धातो नाधिका क्षेत्राद्धेति ।कथमेतदेवमिति ?, उच्यते, अवगाहना-यामगमनक्रियायां च नियता क्षेत्राद्धाःविवक्षेत्राद्धाया अभावेऽपि तस्या भावादिति अथ निगमनम् 'जम्हें'त्यादि ।

अथ द्रव्यायुर्बहुत्वं भाव्यते-सङ्कोचेन विकोचेन चोपरतायामप्यवगाहनायां यावन्ति द्रव्यानि पूर्वमासंस्तावतामेव चिरमपि तेषामवस्थानं संभवति, अनेनावगाहनानिवृत्तावपि द्रव्यं न निवर्त्तत इत्युक्तं, अथ द्रव्यनिवृत्तिविशेषेऽवगाहना निवर्त्तत एवेत्युच्यते-सङ्घातेन पुग्दलानां भेदेन वा तेषामेव यः सङ्क्षिप्तः-स्तोकावगाहनः स्कन्धो न तु प्राक्तनावगाहनः तत्र यो द्रव्योपरमो-द्रव्यान्यथात्वं तत्र सति, न च सङ्घातेन स सङ्क्षिप्तः स्कन्धो भवति, तत्र सति सूक्ष्मतरत्वेनापि तत्परिणतेः श्रवणात्, नियमात्तेषां-द्रव्याणामवगाहनाया नाशो भवति, कस्मादेवमित्यत उच्यते-अवगाहनाद्धा द्रव्येऽवबद्धा-नियतत्वेन संबद्धा कथं ?, सङ्कोचाद्विकोचाच्च, सङ्कोचविकोचादि परिहृत्येत्यर्थः, अवगाहना हि द्रव्ये सङ्कोचविकोचयोरभावे सति भवति तत्सद्भावे च न भवतीत्येवं द्रव्येऽवगाहना नियतत्वेन संम्बद्धेत्युच्यते द्रुमत्वे खदिरत्वमिवेति

उक्तविपर्ययमाह– न पुनद्रव्यं सङ्कोचविकोच मात्रे सत्यप्यवगाहनायां नियतत्वेन संबद्धं, सङ्कोचविकोचाभ्यामवागनानिवृत्तावपि द्रव्यं न निवर्त्तत इत्यवगाहनायां तन्नियतत्वेनासंब-द्धमित्युच्यते, खदिरत्वे द्रुमत्ववदिति । अथ निगमनम् ।

अथ भावायुर्बहुत्वं भाव्यते-सङ्घातादिना द्रव्योपरमेऽपि पर्यवाः सन्ति, यथा मृष्टपटे शुक्लादिगुणाः, सकलगुणोपरमे तु न तद्रव्यं न चावगाहनाऽनुवर्त्तते, अनेन पर्यवाणां चिरं स्थानं द्रव्यस्य त्वचिरमित्युक्तम्, अथ कस्मादेवमिति ?, उच्यते-सङ्घातभेदलक्षणाभ्यां धर्माभ्यां यो बन्धः-सम्बन्धस्तदनुवर्त्तनी-तदनुसारिणी, सङ्घाताद्यभाव एव द्रव्याद्धायाः सद्भावातद्भावे चाभावात्, न पुनर्गुणकालः सङ्घातभेदमात्रकालसंबद्धः, सङ्घातादिभावेऽपि गुणानामनुवर्त्तनादिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ निगमनम्-'द्रव्यविशेषः' द्रव्यपरिणामः ।

अनन्तरमायुरुक्तम्, अथायुष्मत आरम्भादिना चतुर्विंशतिदण्डकेन प्ररूपयन्नाह–

**मू.** *(२६०) नेरइया णं भंते ! किं सारंभा सपरिग्गहा उदाहु अनारंभा अपरिग्गहा ?, गोयमा ! नेरइया सारंभा स परिग्गहा नो अनारंभा नो अपरिग्गहा । से केणट्ठेणं जाव अपरिग्गहा गोयमा ! नेरइया णं पुढविकायं समारंभंति जाव तसकायं समारंभंति सरीरा परिग्गहिया भवंति कम्मा परिग्गहिया भवंति सचित्ताचित्तमीसयाइं दव्वाइं परि० भ० , से तेणट्ठेणं तं चेव ।*

*असुरकुमारा णं भंते ! किं सारंभा ४ ? पुच्छा, गोयमा ! असुरकुमारा सारंभा सपरिग्गहा नो अनारंभा अप० । से केणट्ठेणं० ?, गोयमा ! असुरकुमारा णं पुढविकायं समारंभंति जाव तसकायं समारंभंति सरीरा परिग्गहिया भवंति कम्मा परिग्गहिया भवंति भवणा परि० भवंति देवा देवीओ मणुस्सा मणुस्सीओ तिरिक्खजोनिया तिरिक्खजोनिणीओ परिग्गहियाओ भवंति आसणसयणभंडमत्तोवगरणा परिग्गहिया भवंति सच्चित्ताचित्तमीसयाइं दव्वाइं परिग्गहियाइं भवंति से तेणट्ठेणं तहेव एवं जाव थणियकुमारा ।*

*एगिंदिया जहा नेरइयआ ।*

*बेइंदिया णं भंते ! किं सारंभा सपरिग्गहा तं चेव जाव सरीरा परिग्गहिया भवंति बाहिरिया भंडमत्तोवगरणा परि० भवंति सचित्ताचित्त० जाव भवंति एवं जाव चउरिंदिया ।*

*पंचेंदियतिरिक्खजोनिया णं भंते ! तं चेव जाव कम्मा परि० भवन्ति टंका कूडा सेला सिहरी पब्भारा परिग्गहिया भवंति जलथलबिलगुहालेणा परिग्गहिया भवंति उज्झरनिज्झर-चिल्ललपल्ललवप्पिणा परिग्गहिया भवंत अगडतडागदहनदीओ वाविपुक्खरिणीदीहिया गुंजालिया सरा सरपंतियाओ सरसरपंतियाआ बिलपंतीयाओ परिग्गहियाओ भवंति आरामुज्जाणा काणणा वनाइं वनसंडाइं वनराईओ परिग्गहियाओ भवन्ति देवउलसभाप- वाथूभाखातियपरिखाओ परिग्गहियाओ भवंति पागारट्टालगचरियदारगोपुरा परिग्गहिया भवंति पासादघरसरणलेणआवणा परिग्गहिता भवंति सिंघाडगतिगचउक्कचच्चरचउम्मुहमहापहा परिग्गहिया भवंति सगडरहजाण-जुग्गगिल्लिथिल्लिसीयसंदमानियाओ परिग्गहियाओ भवंति लोहीलोहकडाकडुच्छुया परिग्गहिया भवंति भवणा परिग्गहिया भवंति देवा देवीओ मणुस्सा मणुस्सीओ तिरिक्खजोनिओ तिरिक्ख-जोणिणीओ आसणसयणखंभभंडसचित्ताचित्तमीसयाइं दव्वाइं परिग्गहियाइं भवंति से तेणट्ठेणं०, जहा तिरिक्खजोनिया तहा मणुस्साणवि भाणियव्वा ।*

*वाणमंतरजोतिसवेमानिया जहा भवणवासी तहा नेयव्वा ॥*

**वृ.** 'नेरइए'त्यादि, 'भंडमत्तोवगरण' त्ति इह भाण्डानि-मृन्मयभाजनानि मात्रानिकांस्य-भाजनानि उपकरणानिलौहीकडुच्छुकादीनि, एकेन्द्रियाणां परिग्रहोऽप्रत्याख्यानादवसेयः, 'बाहिरया भंडमत्तोवगरण' त्ति उपकारसाधर्म्याद्द्वीन्द्रियाणां शरीररक्षार्थं तत्कृतगृहकादीन्यवसेयानि 'टंक' त्ति छिन्नटङ्कः 'कुड' त्ति कूटानि शिखरानि वा हस्त्यादिबन्धनस्थानानि वा 'सेल' त्ति मुण्डपर्वतः 'सिहर' त्ति शिखरिणः-शिखरवन्तो गिरय- 'पब्भार' त्ति ईषदवनता गिरिदेशाः 'लेण' त्ति उत्कीर्ण-पर्वतगृहाः 'उज्झर' त्ति अवझरः-पर्वततटादुदकस्याधः पतनं 'निज्झर' त्ति निर्झर-उदकस्य श्रवणं 'चिल्लल' त्ति चिक्खल्लमिश्रोदको जलस्थानविशेषः 'पल्लल' त्ति प्रह्लादनशीलः स एव 'वप्पिण' त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केदारवान् तटवान् वा देशः केदार एवेत्यन्ये ।

'अगड'त्ति कूपः 'वावि'त्ति वापी चतुरस्रो जलाशयविशेषः 'पुक्खरिनि'त्ति पुष्करिणी वृत्तः स एव पुष्करवान् वा 'दीहिय'त्ति सारिण्यः 'गुंजालिय'त्ति वक्रसारिण्यः 'सर'त्ति सरांसि-स्वयंसंभूतजलाशयविशेषाः 'सरपंतियाओ'त्ति सरःपङ्क्तयः 'सरसरपंतियाओ'त्ति यासु सरःपङ्क्तिषु एकस्मात्सरसोऽन्यस्मिन्नन्यस्मादन्यत्र एवं सञ्चारकपाटकेनोदकं संचरति ताः सरःसरःपङ्क्तयः बिलपङ्क्तयः-प्रतीताः 'आराम'त्ति आरमन्ति येषु दमाधवीलतादिषु म्पत्यादीनि ते आरामाः 'उज्जाण'त्ति 'उद्यानानि' पुष्पादिमद्वृक्षसङ्कुलानि उत्सवादौ बहुजनभोग्यानि 'काणण'त्ति 'काननानि' सामान्यवृक्षसंयुक्तानि नगरासन्नानि 'वण'त्ति वनानि नगरविप्रकृष्टानि 'वनसंडाइं'ति वनषण्डाः-एकजातीयवृक्षसमूहात्मकाः ।

'वनराइ'त्ति वनराजयो-वृक्षपङ्क्तयः 'खाइय'त्ति 'खातिकाः' उपरिविस्तीर्णाधः-सङ्कटखात-रूपाः 'परिह'त्ति परिखाः अध उपरि च समखातरूपाः 'अट्टालग'त्ति प्राकरोपर्याश्रय-विशेषाः 'चरिय'त्ति 'चरिका' गृहप्राकारान्तरो हस्त्यादिप्रचारमार्ग 'दार'त्ति द्वारं खडक्किका 'गोउर'त्ति 'गोपुरं' नगरप्रतोली 'पासाय'त्ति प्रासाद देवानां राज्ञां च भवनानि, अथवा उत्सेधबहुलाः-

प्रासादाः 'घर'त्ति गृहानि सामान्यजनानां सामान्यानि वा 'सरण'त्ति 'शरणानि' तृणमयाव-सरिकादीनि 'आवण'त्ति 'आपणा' हट्टाः चतुर्मुखं-चतुर्मुखदेवकुलकादि 'महापह'त्ति राजमार्ग 'सगडे'त्यादि प्राग्वत् 'लोहि'त्ति 'लौहि' मण्डकादिपचनिका 'लोहकडाहि'त्ति कवेल्ली 'कडुच्छुय'त्ति परिवेषणाद्यर्थो भाजनविशेषः 'भवण'त्ति भवनपतिनिवासः ।

एते च नारकादयश्छद्मस्थत्वेन हेतुव्यवहारकत्वाद्धेतव उच्यन्ते इति तद्भेदान्निरूपयन्नाह-

**मू. (२६१)** *पंच हेऊ पन्नत्ता, तंजहा-हेउं जाणइ हेउं पासइ हेउं बुज्झइ हेउं अभिसमागच्छति हेउं छउमत्थमरणं मरइ पंचेव हेऊ पं० तंजहा-हेउणा जाणइ जाव हेउणा छउमत्थमरणं मरइ। पंच हेऊ पन्नत्ता, तंजहा-हेउं न जाणइ जाव हेउं अन्नाणमरणं मरइ ।। पंच हेऊ पन्नत्ता, तंजहा-हेउणा न जाणति जाव हेउणा अन्नाण मरणं मरति ।।*

*पंच अहेउ पन्नत्ता, तंजहा-अहेउं जाणइ जाव अहेउं केवलिमरणं मरइ ।। पंच अहेऊ पन्नत्ता, तंजहा-अहेउणा जाणइ जाव अहेउणा केवलिमरणं मरइ ।। पंच अहेऊ पन्नत्ता, तंजहा-अहेउणा न जाणइ जाव अहेउणा छउमत्थमरणं मरइ । सेवं भंते २ त्ति ।।*

**वृ.** 'पंच हेउ' इत्यादि, इह हेतुषु वर्त्तमानः पुरुषो हेतुरेव तदुपयोगानन्यत्वात्, पञ्चविधत्वं चास्य क्रियाभेदादित्यत आह 'हेउं जाणइ'त्ति 'हेतुं' साध्याविनाभूतं साध्यनिश्चयार्थं 'जानाति' विशेषतः सम्यगवगच्छति सम्यग्दृष्टित्वात्, अयं पञ्चविधोऽपि सम्यग्दृष्टिर्मन्तव्यो मिथ्यादृष्टेः सूत्रद्वयात्परतो वक्ष्यमाणत्वादित्येकः, एवं हेतुं पश्यति सामान्यत एवावबोधादिति द्वितीयः, एवं हेतुं 'बुध्यते' सम्यक् श्रद्धत्त इति बोधेः सम्यक्श्रद्धानपर्यायत्वादिति तृतीयः, तथा हेतुम् 'अभिसमागच्छति' साध्यसिद्धौ व्यापारणतः सम्यक् प्राप्नोतीति चतुर्थः, तथा "हेउं छउमत्थेत्यादि, हेतुः-अध्यवसानादिर्मरणकारणं तद्योगान्मरणमपि हेतुरतस्तं हेतुमदित्यर्थः छद्मस्थमरणं, न केवलिमरणं, तस्याहेतुकत्वात्, नाप्यज्ञानमरणमेतस्य सम्यगज्ञानित्वात् अज्ञानमरणस्य च वक्ष्य-माणत्वादित्येकः, एवं हेतुं पश्यति सामान्यत एवावबोधादिति द्वितीयः, एवं हेतुं 'बुध्यते' सम्यक्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रद्धत्त इति बोधेः सम्यक्श्रद्धानपर्यायत्वादिति तृतीयः, तथा हेतुम् 'अभिसमागच्छति' साध्यसिद्धौ व्यापारणतः सम्यक् श्रद्धत्त प्राप्नोतीति चतुर्थः, तथा 'हेउं छउमत्थे'त्यादि, हेतुः-अध्यवसानादिर्मरणकारणं तद्योगान्मरणमपि हेतुरतस्तं हेतुमदित्यर्थः छद्मस्थमरणं, न केवलिमरणं, तस्याहेतुकत्वात्, नाप्यज्ञानमरणमेतस्य सम्यग्ज्ञानित्वात् अज्ञानमरणस्य च वक्ष्यमाणत्वात् म्रियते-करोतीति पञ्चमः।

प्रकारान्तरेण हेतूनेवाह-'पंचे'त्यादि, 'हेतुना' अनुमानोत्थापकेन जानाति-अनुमेयं सम्यगवगच्छति सम्यग्दृष्टित्वादेकः, एवं पश्यतीति द्वितीयः, एवं 'बुध्यते' श्रद्धत्त इति तृतीयः, एवम् 'अभिसमागच्छति' प्राप्नोतीति चतुर्थः, तथाऽकेवलित्वात् 'हेतुना' अध्यवसानादिना छद्मस्थमरणं म्रियते इति पञ्चमः॥ अथ मिथ्यादृष्टिमाश्रित्य हेतूनाह-'पंचे'त्यादि, पञ्च क्रियाभेदात् हेतवो हेतुव्यवहारित्वात्, तत्र 'हेतुं' लिङ्गं न जानाति, नञः कुत्सार्थःत्वादसम्यगवैति मिथ्यादृष्टित्वात् १, एवं न पश्यति २, एवं न बुध्यते ३, एवं नाभिसमागच्छति ४, तथा 'हेतुम्' अध्यवसानादिहेतुयुक्तमज्ञानमरणं 'म्रियते' करोति मिथ्यादृष्टित्वेनासम्यग्ज्ञानत्वादिति ५॥ हेतूनेव प्रकारान्तरेणाह-'पंचे'त्यादि, 'हेतुना' लिङ्गेन न जानाति-असम्यगवगच्छति, एवमन्येऽपि चत्वारः।

अथोक्तविपक्षभूतानहेतूनाह-'पंचे'त्यादि, प्रत्यक्षज्ञानित्वादिनाऽहेतुव्यवहारित्वादहेतवः-केवलिनः, ते च पञ्च क्रियाभेदात् तद्यथा-'अहेतुं जाणइ'त्ति अहेतुं-न हेतुभावेन सर्वज्ञत्वेनानुमानानपेक्षत्वाद्धूमादिकं जानाति स्वस्यानुमानोत्थापकतयेत्यर्थः अतोऽसावहेतुरेव, एवं पश्यतीत्यादि, तथा 'अहेतुं केवलिमरणं मरइ'त्ति 'अहेतुं' निर्हेतुकं अनुपक्रमत्वात् केवलिमरणं 'म्रियते' करोतीत्यहेतुरसौ पञ्चम इति।

प्रकारान्तरेणाहेतूनेवाह-'पंचे'त्यादि तथैव नवरम् 'अहेतुना' हेत्वभावेन केवलित्वाज्जानाति योऽसावहेतुरेव, एवं पश्यतीत्यादयोऽपि ३, 'अहेउणा केवलिमरणं मरइ'त्ति 'अहेतुना' उपक्रमाभावेन केवलिमरणं म्रियते, केवलिनो निर्हेतुकस्यैव तस्य भावादिति।

अहेतूनेव प्रकारान्तरेणाह-'पंच अहेऊ'इत्यादि, 'अहेतवः अहेतुव्यवहारिणः, ते च पञ्च ज्ञानादिभेदात्, तद्यथा- 'अहेउं न जाणइ'त्ति, 'अहेतुं' न हेतुभावेन स्वस्यानुमानानुत्थापकतयेत्यर्थः 'न जानाति' न सर्वथाऽवगच्छति, कथञ्चिदेवावगच्छतीत्यर्थः, नञो देशप्रतिषेधार्थःत्वात् ज्ञातुश्चावध्यादिज्ञानवत्वात् कथञ्चिज्ज्ञानमुक्तं, सर्वथाज्ञानं तु केवलिन एव स्यादिति, एवमन्यान्यपि ३, तथा 'अहेउं छउमत्थमरणं मरइ'त्ति अहेतुरध्यवसानादेरुपक्रमकारणस्याभावात् छद्मस्थमरणमकेवलित्वात् न त्वज्ञानमरणमवध्यादिज्ञानवत्त्वेन ज्ञानित्वात्तस्येति॥ अहेतूनेवान्यथाऽऽह-'पंचे'त्यादि, तथैव नवरम् 'अहेतुना' हेत्वभावेन न जानाति कथञ्चिदेवाध्यवस्यतीति।

गमनिकामात्रमेवेदमष्टानामप्येषां सूत्राणां, भावार्थं तु बहुश्रुता विदन्तीति॥

शतकं-५, उद्देशकः-७ समाप्तः

## –: शतकं-५ उद्देशकः-८ :–

**वृ.** सप्तमे उद्देशके पुद्‌गलाः स्थितितो निरूपिताः, अष्टमे तु त एव प्रदेशतो निरूप्यन्ते, इत्येवंसम्बन्धस्यास्येदं प्रस्तावनासूत्रम्-

***मू. (२६२)** तेणं कालेणं २ जाव परिसा पडिगया, तेणं कालेणं २ समणस्स ३ जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंतेवासी नारयपुत्ते नामं अनगारे पगतिभद्दए जाव विहरति, तेणं कालेणं २ समणस्स ३ जाव अंतेवासी नियंठिपुत्ते नामं अन० पगतिभद्दए जाव विहरति, तए णं से नियंठीपुत्ते अन० जेणामेव नारयपुत्ते अनगारे तेणेव उवागच्छइ २ नारयपुत्तं अन० एवं वयासी-सव्वा पोग्गला ते अज्जो ! किं सअड्ढा समज्झा सपएसा उदाहु अणड्ढा अमज्झा अपएसा ?, अज्जोत्ति नारयपुत्ते अनगारे नियंठिपुत्तं अनगारं एवं वयासी-सव्वपोग्गला मे अज्जो ! सअड्ढा समज्झा सपदेसा नो अणड्ढा अमज्झा अप्पेसा ।

तए णं से नियंठिपुत्ते अनगारे नारयुपुत्तं अ० एवं वदासि-जति णं ते अज्जो ! सव्वपोग्गला सअड्ढा समज्झा सपदेस नो अणड्ढा अमज्झा अपदेस किं दव्वादेसेणं अज्जो ! सव्वपोग्गला सअड्ढा समज्झा सपदेसा नो अणड्ढा अमज्झा अपदेसा ? खेत्तादेसेणं अज्जो ! सव्वपोग्गला सअड्ढा समज्झा सपएसा तहेव चेव, कालादेसेणं तं चेव, भावादेसेणं अज्जो ! तं चेव, तएणं से नारयपुत्ते अनगारे नियंठिपुत्तं अनगारं एवं वदासी-दव्वादेसेणवि मे अज्जो ! सव्वपोग्गला सअड्ढा समज्झा सपदेसा नो अणड्ढा अमज्झा अपदेसा खेत्ताएसेणवि सव्वे पोग्गला सअड्ढा तह चेव कालादेसेणवि, तं चेव भावादेसेण वि । तए णं से नियंठीपुत्ते अन० नारयपुत्तं अनगारं एवं वयासी –

जति णं हे अज्जो ! दव्वादेसेणं सव्वपोग्गला सअड्ढा समज्झा सपएसा नो अणड्ढा अमज्झा अपएसा, एवं ते परमाणुपोग्गलेवि सअड्ढे समज्झे सपएसे नो अणड्ढे अमज्झे अपएसे, जति णं अज्जो ! खेत्तादेसेणवि सव्वपोग्गला सअ० ३ जाव एवं ते एगपएसोगाढेवि पोग्गले सअ- ड्ढे समज्झे सपएसे, जति णं अज्जो ! कालादेसेणं सव्वपोग्गला सअड्ढा समज्झा सपएसा, एवं ते एगसमयठितीएवि पोग्गले ३ तं चेव, जति णं अज्जो ! भावादेसेणं सव्वपोग्गला सअड्ढा सम- ज्झा सपएसा ३ ।

एवं ते एगगुकालएवि पोग्गले सअ० ३ तं चेव, अह ते एवं न भवति तो जं वयसि दव्वादेसेणवि सव्वपोग्गला सअ० ३ नो अणड्ढा अमज्झा अपदेसा एवं खेत्तादेसेणवि काला० भावादेसेणवि तन्नं मिच्छा, तए णं से नारयपुत्ते अनगारे नियंठीपुत्तं अ० एवं वयासी-नो खलु वयं देवा० एयमट्ठं जाणामो पासामो, जति णं देवा० नो गिलायंति परिकहित्तए तं इच्छामि णं देवा० अंतिए एयमट्ठं सोच्चा निसम्म जानित्तए, तए णं से नियंठीपत्ते अनगारे नारयपुत्तं अनगारं एवं वयासी-दव्वादेसेणवि मे अज्जो सव्वे पोग्गला सपदेवासि अपदेसावि अनंता खेत्तादेसेणवि एवं चेव कालादेसेणवि भावादेसेणवि एवं चेव ।

जे दव्वओ अप्पदेसे से खेत्तओ नियमा अप्पदेसे कालओ सिय सपदेसे सिय अपदेसे भावओ सिय सपदेसे सिय अपदेसे । जे खेत्तओ अप्पदेसे से दव्वओ सिय सपदेसे सिय अपदेसे कालओ भयणाए भावओ भयणाए । जहा खेत्तओ एवं कालओ भावओ ।। जे दव्वओ सपदेसे से खेत्तओ सिय सपदेसे सिय अपदेसे, एवं कालओ भावओवि, जे खेत्तओ सपदेसे से दव्वतो नियमा सपदेसे कालओ भयणाए भावओ भयणाए जहा दव्वओ तहा कालओ भावओवि ।

एएसि णं भंते ! पोग्गलाणं दव्वादेसेणं खेत्तादेसेणं कालादेसेणं भावादेसेणं सपदेसाण य अपदेसाण य कयरे २ जाव विसेसाहिया वा ?, नारयपुत्ता ! सव्वत्थोवा पोग्गला भावादेसेणं अपदेसा कालादेसेणं अपदेसा असंखेज्जगुणा दव्वादेसेणं अपदेसा असंखेज्जगुणा खेत्तादेसेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अपदेसा असंखेज्जगुणा खेत्तादेसेणं चेव सपदेसा असंखेज्जगुणा दव्वादेसेणं सपदेसा विसेसाहिया कालादेसेणं सपदेसा विसेसाहिया भावादेसेणं सपदेसा विसेसाहिया।*

*तए णं से नारयपुत्ते अनगारे नियंठीपुत्तं अनगारं वंदइ नमंसइ नियंठिपुत्तं अनगारं वंदित्ता नमंसित्ता एयमट्ठं सम्मं विणएणं भुज्जो २ खामेति २ त्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ*

**वृ.** 'तेण'मित्यादि, 'दव्वादेसेणं'ति द्रव्यप्रकारेण द्रव्यत इत्यर्थः परमाणुत्वाद्याश्रित्येतियावत् 'खेत्तादेसेणं'ति एकप्रदेशावगाढत्वादिनेत्यर्थः 'कालादेसेणं'ति एकादिसमयस्थितिकत्वेन 'भावादेसेणं'ति एकगुणकालकत्वादिना 'सव्वपोग्गलासपएसावी'त्यादि, इह च यत्सविपर्यसा-र्द्धादिपुद्गलविचारे प्रक्रान्ते सप्रदेशाप्रदेशा एव ते प्ररूपिताः तत्तेषां प्ररूपणे सार्द्धत्वादि प्ररूपितमेव भवतीतिकृत्वेत्यवसेयं, तथाहि-सप्रदेशाः साद्धाः समध्या वा, इतरे त्वनर्द्धा अमध्याश्चेति, 'अनंत'त्ति तत्परिमाणज्ञानपनपरं तत्स्वरूपाभिधानम्।

अथ द्रव्यतोऽप्रदेशस्य क्षेत्रादयाश्रित्याप्रदेशादित्वं निरूपयन्नाह-'जे दव्वओ अप्प-एसे'इत्यादि, यो द्रव्यतोऽप्रदेशः-परमाणुः स च क्षेत्रतो नियमादप्रदेशो, यस्मादसौ क्षेत्रस्यैकत्रैव प्रदेशेऽवगाहते प्रदेशद्वयाद्यवगाहे तु तस्याप्रदेशत्वमेव न स्यात्, कालतस्तु यद्यसावेकसमय-स्थितिकस्तदाऽप्रदेशोऽनेकसमयस्थितिकस्तु सप्रदेश इति, भावतः पुनर्यद्येकगुणकालका-दिस्तदाऽ- प्रदेशोऽनेकगुणकालकादिस्तु सप्रदेश इति।

निरूपितो द्रव्यतोऽप्रदेशोऽथ क्षेत्रतोऽप्रदेशं निरूपयन्नाह-'जे खेत्तओ अप्पएसे'इत्यादि, यः क्षेत्रतोऽप्रदेशः स द्रव्यतः स्यात्सप्रदेशः, द्व्यणुकादेरप्येकप्रदेशावगाहित्वात्, स्यादप्रदेशः, परमाणोरप्येकप्रदेशावगाहित्वात्, 'कालओ भयणाए' त्ति क्षेत्रतोऽप्रदेशो यः स कालतो भजनयाऽ-प्रदेशादिर्वाच्यः, तथाहि-एकप्रदेशावगाढः एकसमयस्थितिकत्वादप्रदेशोऽपि स्यात् अनेक-समयस्थितिकत्वाच्च सप्रदेशोऽपि स्यादिति 'भावओ भयणाए' त्ति क्षेत्रतोऽप्रदेशो योऽसावेकगुण-कालकत्वादप्रदेशोऽपि स्यात् अनेकगुणकालकादित्वाच्च सप्रदेशोऽपि स्यादिति।

अथ कालाप्रदेशं भावाप्रदेशं च निरूपयन्नाह-'जहा खेत्तओ एवं कालओ भावओ'त्ति यथा क्षेत्रतोऽप्रदेश उक्तं एवं कालतो भावतश्चासौ वाच्यः, तथाहि-'जे कालओ अप्पएसे से दव्वओ सिय सप्पएसे सिय अप्पएसे'।

एवं क्षेत्रतो भावतश्च, तथा-'जे भावओ अप्पएसे से दव्वओ सिय सप्पएसे सिय अप्पएसे' एवं क्षेत्रतः कालतश्चेति।

उक्तोऽप्रदेशोऽथ सप्रदेशमाह-'जे दव्वओ सप्पएसे'इत्यादि, अयमर्थः-यो द्रव्यतो द्व्यणुकादित्वेन सप्रदेशः स क्षेत्रतः स्यात्सप्रदेशो द्वयादिप्रदेशावगाहित्वात् स्यादप्रदेश एकप्रदेशाव-गाहित्वात्, एवं कालतो भावतश्च, तथा यः क्षेत्रतः सप्रदेशो द्वयादिप्रदेशावगाहित्वात् स द्रव्यतः सप्रदेश एव, द्रव्यतोऽप्रदेशस्य द्वयादिप्रदेशावगाहित्वाभावत् कालतो भावातश्चासौ द्विधाऽपि स्यादिति, तथा यः कालतः सप्रदेशः स द्रव्यतः क्षेत्रतो भावतश्च द्विधाऽपि स्यात्, तथा यो भावतः सप्रदेशः स द्रव्यक्षेत्रकालैर्द्विधाऽपि स्यादिति सप्रदेशसूत्राणां भावार्थः इति।

अथैषामेव द्रव्यादितः सप्रदेशाप्रदेशानामल्पबहुत्वविभागमाह-'एएसि णं'मित्यादि सूत्रसिद्धं, नवरमस्यैव सूत्रोक्तात्पबहुत्वस्य भावनार्थं गाथाप्रपञ्चो वृद्धोक्तोऽभिधीयते–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ वोच्छं अप्पाबहुयं दव्वेखेत्तद्धभावओ वावि ।
अपएससप्पएसाण पोग्गलाणं समासेणं ॥
॥ २ ॥ दव्वेणं परमाणू खेत्तेणेगप्पएसमोगाढा ।
कालेणेगसमइया अपएसा पोग्गला होंति ॥
॥ ३ ॥ [वर्णादिभिरित्यर्थः] भावेणं अपएसा एगगुणा जे हवंति वन्नाई ।
ते च्चिय थोवा जं गुणबाहल्लं पायसो दव्वे ॥
॥ ४ ॥ एत्तो कालाएसेण अप्पएसा भवे असंखगुणा ।
किं कारणं पुण भवे भन्नति परिणामबाहल्ला ॥
॥ ५ ॥ भावेणं अपएसा जे ते कालेण हुंति दुविहावि ।
दुगुणादओवि एवं भावेणं जावऽनंतगुणा ॥
॥ ६ ॥ कालापएसयाणं एवं एक्केकओ हवति रासी ।
एक्केक्कगुणट्ठाणम्मि एगगुणकालयाईसु ॥
॥ ७ ॥ आहानंतगुणत्तणमेवं कालापएसयाणंति ।
जमणंतगुणट्ठाणेसु होंति रासीवि हु अनंता ॥
॥ ८ ॥ मन्नइ एगगुणानि अनंतभागंमि जं अनंतगुणा ।
तेणासंखगुण च्चिय हवंति नानंतगुनियत्तं ॥
॥ ९ ॥ एवं वा भावमिणं पडुच्च कालापएसया सिद्धा ।
परमाणुपोग्गलाइसु दव्वेवि हु एस चेव गमो ॥
॥ १० ॥ एमेव होइ खेत्ते एगपएसावगाहणाईसुं ।
ठाणंतरसंकंतिं पडुच्च कालेण मग्गणया ॥
॥ ११ ॥ संकोयविकोयंपि हु पडुच्च ओगाहणाए एमेव ।
तह सुहुमबायरनिरेयसेयसद्दाइपरिणामं ॥
॥ १२ ॥ एवं जो सव्वो च्चिय परिणामो पुग्गलाण इह समये ।
तं तं पडुच्च एसिं कालेणं अप्पएसत्तं ॥
॥ १३ ॥ कालेण अप्पएसा एवं भावापएसएहिंतो ।
होंति असंखिज्जगुणा सिद्धा परिणामबाहल्ला ॥
॥ १४ ॥ एत्तो दव्वाएसेण अप्पएसा हवंतिऽसंखगुणा ।
के पुण ते ? परमाणू कह ते बहुयत्ति ? तं सुणसु ॥
॥ १५ ॥ अणु १ संखेज्जपएसिय २ असंख ३ ऽनंतपएसिया चेव ४ ।
चउरो च्चिय रासी पोग्गलाण लोए अनंताणं ॥
॥ १६ ॥ तत्थानंतेहिंतो सुत्तेऽनंतप्पएसिएहिंतो ।
जेण पएसट्ठाए भनिय अणवो अनंतगुणा ॥
॥ १७ ॥ संखेज्जतिमे भागे संखेज्जपएसियाण वट्टंति ।
नवरमसंखेज्जपएसियाण भागे असंखइमे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१८॥ सइवि असंखेज्जपएसियाण तेसिं असंखभागत्ते ।
बाहुल्लं साहिज्जइ फुडमवसेसाहिं रासीहिं ॥
॥१९॥ जेणेक्करासिणो च्चिय असंखभागेण सेसरासीणं ।
तेणासंखेज्जगुणा अणवो कालापएसेहिं ॥
॥२०॥ एत्तो असंखगुनिया एवंति खेत्तापए सिया समए ।
जं तो ते सव्वेवि य अपएसा खेत्तओ अणवो ॥
॥२१॥ दुपएसियाइएसुवि पएसपरिवड्ढिएसु ठाणेसु ।
लब्भइ इक्किक्को चिय रासी खेत्तापएसाणं ॥
॥२२॥ एत्तो खेत्ताएसेण चेव सपएसया असंखगुणा ।
एगपएसोगाढे मोत्तुं सेसावगाहणया ॥
॥२३॥ ते पुण दुपएसोगाहणाइया सव्वपोग्गला सेसा ।
ते य असंखेज्जगुणा अवगाहणठाणबाहुल्ला ॥
॥२४॥ दव्वेण होंति एत्तो पएसा पोग्गला विसेसहिया ।
कालेण य भावेण य एमेव भवे विसेसहिया ॥
॥२५॥ भावाईया वुड्ढी असंखगुनिया जमप्पएसाणं ।
तो सप्पएसयाणं खेत्ताइविसेसपरिवुड्ढी ॥
॥२६॥ मीसाण संकमं पइ सपएसा खेत्तओ असंखगुणा ।
भनिया सट्ठाणे पुण थोवच्चिय ते गहेयव्वा ॥
॥२७॥ खेत्तेतण सप्पएसा थोवा दव्वट्ठभावओ अहिया ।
सपएसप्पाबहुयं सट्ठाणे अत्थओ एवं ॥
॥२८॥ पढमं अपएसाणं वीयं पुण होइ सप्पएसाणं ।
तइयं पुण मीसाणं अप्पबहुं अत्थओ तिन्नि ॥
॥२९॥ ठाणे ठाणे वड्ढइ भावाईणं जमप्पएसाणं ।
तं चिय भावाईणं परिभस्सति सप्पएसाणं ॥
॥३०॥ अहवा खेत्ताईणं जमप्पएसाण हायए कमसो ।
तं चिय खेत्ताईणं परिवड्ढइ सप्पएसाणं ॥
॥३१॥ अवरोपरप्पसिद्धा वुड्ढी हानी य होइ दोण्हंपि ।
अपएससप्पएसाण पोग्गलाणं सलक्खणओ ॥
॥३२॥ ते चेव ते चउहिवि जमुवचरिज्जंति पोग्गला दुविहा ।
तेण उ वुड्ढी हानी तेसिं अन्नोन्नसंदिद्धा ॥
॥३३॥ एएसिं रासीणं निदरिसणमिणं भणामि पच्चक्खं ।
वुड्ढीए सव्वपोग्गल जावं तावाण लक्खाओ ॥
॥३४॥ एक्कं च दो य पंच य दस य सहस्साईं अप्पएसाणं ।
भावाईणं कमसो चउण्हवि जहोवइट्ठाणं ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ३५ ॥ नउई पंचानउई अट्ठानउई तहेव नवनवई ।
एवइयाइं सहस्साइं सप्पएसाण विवरीयं ॥
॥ ३६ ॥ एएसिं जहसंभवमत्थोवणयं करिज्ज रासीणं ।
सब्भावओ य जानिज्ज ते अनंते जिणाभिहिए ॥

द्रव्ये प्रायेण द्वयादिगुणा अनन्तगुणान्ताः कालकत्वादयो भवन्ति एकगुणकालकादयस्त्वल्पा इति भावः । ३ ॥

अयमर्थःयो हि यस्मिन् समये यद्वर्णगन्धरसस्पर्शसङ्घातभेदसूक्ष्मत्वबादरत्वादिपरिणामान्तरमापन्नः स तस्मिन् समये तदपेक्षया कालतोऽप्रदेश उच्यते, तत्र चैकसमयस्थितिरित्यन्ते, परिणामाश्च बहव इति प्रतिपरिणामं कालाप्रदेशसंभवात्तद्बहुत्वमिति । ४ ॥

एतदेव भाव्यते-भावतो येऽप्रदेशा एकगुणकालत्वादयो भवन्ति ते कालतो द्विविधा अपि भवन्ति-सप्रदेशा अप्रदेशाश्चेत्यर्थः, तथा भावेन द्विगुणादयोऽप्यनन्तगुणान्ताः, 'एव'मिति द्विविधा अपि भवन्ति, ततश्च एकगुणकालाद् द्विगुणकालादिषु गुणस्थानकेषु मध्ये एकैकस्मिन् गुणस्थानके कालाप्रदेशानामेकैको राशिर्भवति, ततश्चानन्तत्वाद् गुणस्थानकराशीनामनन्ता एव कालाप्रदेशराशयो भवन्ति ॥ ५-६ ॥

अथ प्रेरकः-एवमिति-यदि प्रतिगुणस्थानकं कालाप्रदेशराशयोऽभिधीयन्त इति, अत्रोत्तरम्-अयमभिप्रायः-यद्यप्यनन्तगुणकालत्वादीनामनन्ता राशयस्तथाऽप्येकगुणकालत्वादीनामनन्तभाग एव ते वर्त्तन्त इति न तदद्वारेण कालाप्रदेशानामनन्तगुणत्वं अपि त्वसङ्ख्यातगुणत्वमेवेति ॥ ७-८ ।

एवं तावत् 'भावं' वर्णादिपरिणामम् 'इमं' उक्तरूपमेकाद्यनन्तगुणस्थानवर्त्तिनमित्यर्थः प्रतीत्य कालाप्रदेशिकाः पुद्गलाः सिद्धाः, कालाप्रदेशता वा पुद्गलानां 'सिद्धा प्रतिष्ठिता, 'द्रव्येऽपि' द्रव्यपरिणाममप्यङ्गीकृत्य परमाण्वादिषु 'एष एव' भावपरिणामोक्त एव गमः-व्याख्या ॥ ९ ॥

'एवमेव' द्रव्यपरिणामवद् भवति 'क्षेत्रे' क्षत्रमधिकृत्य एकप्रदेशावगाढादिषु पुद्गलभेदेषु स्थानान्तरगमनं प्रतीत्य कालेन कालाप्रदेशानां मार्गणा ॥ १० ॥

यथा क्षेत्रतः एवमवगाहनादितोऽपीत्येतदुच्यतेअवगाहनायाः सङ्कोचं च प्रतीत्य कालाप्रदेशाः स्युः, तथा सूक्ष्मबादरस्थिरास्थिरशब्दमनः कर्मादिपरिणामं चव प्रतीत्येति ॥ ११

'एसिं'ति पुद्गलानामित्यर्थः ॥ १२-१३-१४-१५ ॥

अनन्तेभ्यः अनन्तप्रदेशिकस्कन्धेभ्यः प्रदेशार्थःतया परमाणवोऽनन्तगुणाः सूत्र उक्ताः, सूत्रं चेदम् "सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए ते चेव पएसट्ठयाए अनंतगुणा परमाणुपोग्गला दव्वट्ठयाए पएसट्ठयाए अनंतगुणा, संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा ते चेव पएसट्ठयाए असंखेज्जगुणा असंखेज्जपएसिया खंदा दव्वट्ठयाए असंखेज्जगुणा ते चेव पएसट्ठयाए असंखेज्जगुण''त्ति । सङ्ख्येयतमे भागे सङ्ख्यातप्रदेशिकानामसङ्ख्येयतमे चासङ्ख्यातप्रदेशिकानामणवो वर्त्तन्ते, उक्तसूत्रप्रमाण्यादिति ॥ १६-१७ ॥

रासीहिं सङ्ख्येयप्रदेशिकानन्तप्रदेशकाभिधानाभ्याम्, वाऽभविष्यन्निति ॥ १८ ॥

'न शेषराश्यो'रिति, कालतः अस्यायमर्थःअनन्तप्रदेशिकराशेरनन्तगुणास्ते, सङ्ख्यातप्रदेशिकराशेस्तु सङ्ख्यातभागे, सङ्ख्यातभागस्य च विवक्षया नात्यन्तमल्पता, कालतः सप्रदेशेष्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशेषु च वृत्तिमतामणूनां बहुत्वात्, कालप्रदेशानां च सामयिकत्वेनात्यन्तमल्पत्वात् कालाप्रदेशेभ्योऽसङ्खयातगुणत्वं द्रव्याप्रदेशानामिति। एतद्भावना च वक्ष्यमाणस्थापनातोऽवसेया ॥१९-२०-२१-२२-२३-२४-२५॥

'मिश्राणा'मित्यप्रदेशसप्रदेशानां मीलितानां सङ्क्रमं प्रति-अप्रदेशेभ्यः सप्रदेशेष्वल्प-बहुत्वविचारे सङ्क्रमे क्षेत्रतः सप्रदेशा असङ्खयेयगुणाः क्षेत्रतोऽप्रदेशेभ्यः सकाशात्, स्वस्थाने पुनः केवलसप्रदेशचिन्तायां स्तोका एव ते क्षेत्रतः सप्रदेशा इति ॥२६॥

एतदेवोच्यते-अर्थःत इति व्याख्यानापेक्षया अर्थःतो-व्याख्यानद्वारेण त्रीण्यल्पबहुत्वानि भवन्ति, सूत्रे त्वेकमेव मिश्राल्पबहुत्वमुक्तमिति ॥२७॥

यथा किल कल्पनया लक्षं समस्तपुद्गलास्तेषु भावकाल द्रव्यक्षेत्रतोऽप्रदेशाः क्रमेण एकद्विपञ्चदशसहस्रसङ्खयाः, सप्रदेशास्तु नवनवत्यष्टनवतिपञ्चनवतिनवतिसहस्रसङ्खयाः, ततश्च भावाप्रदेशेभ्यः कालाप्रदेशेषु सहस्रं वर्द्धते तदेव भावसप्रदेशेभ्यः कालसप्रदेशेषु हीयत इत्येवमन्यत्रापीति ॥२८-२९-३०-३१॥

चतुर्भिरिति-भावकालादिभिरुपचर्यन्तां इति-विशेष्यन्ते ॥३२॥

कल्पनया यावन्तः सर्वपुद्गलास्तावत लक्ष इति ॥३३॥

अनन्तरं पुद्गला निरूपितास्ते च जीवोपग्राहिण इति जीवांश्चिन्तयन्नाह-

**मू. (२६३)** *भन्तेत्ति भगवं गोयमे जाव एवं वयासी-जीवा णं भंते! किं वड्ढंति हायंति अवट्ठिया?, गोयमा! जीवा नो वड्ढंति नो हायंति अवट्ठिया। नेरइया णं भंते! किं वड्ढंति हायंति अवट्ठिया?, गोयमा! नेरइया वड्ढंतिवि हायंतिवि अवट्ठियावि, जहा नेरइया एवं जाव वेमाणिया। सिद्धा णं भंते! पुच्छा, गोयमा! सिद्धा वड्ढंति नो हायंति अवट्ठियावि।*

*जीवा णं भंते! केवतियं कालं अवट्ठिया? सव्वद्धं। नेरइया णं भंते! केवतियं कालं वड्ढंति?, गोयमा! ज० एगं समयं उक्को० आवलियाए असंखेज्जतिभागं, एवं हायति, नेरइया णं भंते! केवतियं कालं अवट्ठिया?, गोयमा! जहन्नेणं एगं समयं उक्को० चउव्वीसं मुहुत्ता, एवं सत्तसुवि पुढवीसु वड्ढंति हायंति भानियव्वं, नवंर अवट्ठिएसु इमं नाणत्तं, तंजहा-रयणप्पभाए पुढवीए अडतालीसं मुहुत्ता सक्कर० चोद्दस रातिंदियाणं वालु० मासं पंक० दो मासा धूम० चत्तारि मासा तमाए अट्ठ मासा तम तमाए बारस मासा।*

*असुरकुमारावि वड्ढंति हायंति जहा नेरइया, अवट्ठिया जह० एक्कं समयं उक्को० अट्ठचत्तालीसं मुहुत्ता, एवं दसविहावि, एगिंदिया वड्ढंतिवि हायंतिवि अवट्ठियावि, एएहिं तिहिवि जहन्नेणं एक्कं समयं उक्को० आवलियाए असंखेज्जतिभागं, बेइंदिया वड्ढंति हायंति तहेव, अवट्ठया ज० एक्कं समयं उक्को० दो अंतोमुहुत्ता, एवं जाव चउरिंदिया, अवंसेसा सव्वे वड्ढंति हायंति तहेव, अवट्ठियाणं नामत्तं इमं, तं०-संमुच्छिमपंचिंदियतिरिक्खजोनियाणं दो अंतोमुहुत्ता, गब्भवक्कंतियाणं चउव्वीसं मुहुत्ता, संमुच्छिममणुस्साणं अट्ठचत्तालीसं मुहुत्ता, गब्भवक्कंतियमणुस्साणं चउव्वीसं मुहुत्ता।*

*वाणमंतरजोतिसमोहम्मीसाणेसु अट्ठचत्तालीसं मुहुत्ता, सणंकुमारे अट्ठारस रातिंदियाइं चत्तालीस य मुहु० माहिंदे चउवीसं रातिंदियाइं वीस य मु० बंभलोए पंचचत्तालीसं रातिंदियाइं, लंतए नउति रातिंदियाइं, महासुक्के सट्ठिं रातिंदियसतं, सहस्सारे दो रातिंदियसयाइं, आणय-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पाणयाणं संखेज्ञा मासा, आरणच्चुयाणं संखेज्ञाइं वासाइं, एवं गेवेज्जदेवाणं विजयवेजयंतजयंतअपराजियाणं असंखिज्ञाइं वाससहस्साइं, सव्वट्ठसिद्धे य पलिओवमस्स संखेज्ञतिभागो, एवं भाणियव्वं। वड्ढंति हायंति जह० एक्कं समयंउ० आवलियाए असंखेज्ञतिभागं, अवट्ठियाणं जं भणियं।*

*सिद्धा णं भंते! केवतियं कालं वड्ढंति?, गोयमा! जह० एक्कं समयं उक्को० अट्ठ समया, केवतियं कालं अवट्ठिया?, गोयमा! जह० एक्कसमयं उक्को० छम्मासा।*

*जीवा णं भंते! किं सोवचया सावचया सोवचयावचया निरुवचयनिरवचया?, गोयमा जीवा नो सोवचया नो सावचया नो सोवचयसावचया निरुवचयनिरवचया।*

*एगिंदिया ततियपए, सेसा जीवा चउहिवि पदेहिवि भानियव्वा, सिद्धा णं भंते! पुच्छा, गोयमा! सिद्धा सोवचया नो सावचया नो सोवचयसावचया निरुवचयनिरवचया।*

*जीवा णं भंते! केवतियं कालं निरुवचयनिरवचया?, गोयमा! सव्वद्धं, नेरतिया णं भंते! केवतियं कालं सोवचया?, गोयमा! जह० एक्कं समयं उ० आवलियाए असंखेज्ञइभागं केवतियं कालं सावचया? एवं चेव। केवतियं कालं सोवचयसावचया?, एवं चेव। केवतियं कालं निरुवचयनिरवचया?, गोयमा! ज० एक्कं समयं उक्को० बारसमु० एगिंदिया सव्वो सोवचयसावचया सव्वद्धं सेसा सव्वे सोवचयावि सावचयावि सोवचयसावचयावि निरवचयनिरवचयावि जहन्नेणं एगं समयं उक्कोसेणं आवलियाए असंखेज्ञतिभागं अवट्ठिएहिं वक्कंतिकालो भाणियव्वो*

*सिद्धा णं भंते! केवतियं कालं सोवचया?, गोयमा! जह० एक्कं समयं उक्को० अट्ठ समया, केवतियं कालं निरवचयनिरवचया?, जह० एक्कं उ० छम्मासा। सेवं भंते २॥*

**वृ.** 'जीवा ण'मित्यादि, 'नेरइया णं भंते! केवतियं कालं अवट्ठिया?, गोयमा! जहन्नेणं एक्कं समयं उक्कोसेणं चउवीसमुहुत्तं'ति, कथं?, सप्तस्वपि पृथिवीषु द्वादश मुहूर्त्तान् यावन्न कोऽप्युत्पद्यते उद्वर्त्तते वा, उत्कृष्टतो विरहकालस्यैवंरूपत्वात्, अन्येषु पुनर्द्वादशमुहूर्त्तेषु यावन्त उत्पद्यन्ते तावन्त एवोद्वर्त्तन्त इत्येवं चतुर्विंशतिमुहूर्त्तान् यावन्नारकाणामेकपरिमाणत्वादवस्थितत्वं वृद्धिहान्योरभाव इत्यर्थः, एवं रत्नप्रभादिषु यो यत्रोत्पादोद्वर्त्तनाविरह कालश्चतुर्विंशतिमुहूर्त्तादिको व्युत्क्रान्तिपदेऽभिहितः स तत्र तेषु तत्तुल्यस्य समसङ्ख्यानामुत्पादोद्वर्त्तनाकालस्य मीलनाद् द्विगुनितः सन्नवस्थितकालोऽष्टचत्वारिंशन्मुहूर्त्तादिकः सूत्रोक्तो भवति, विरहकालश्च प्रतिपदमवस्थानकालार्द्धभूतः स्वयमभ्यूह्य इति।

'एगिंदिया वड्ढंतिवि'त्ति तेषु विरहाभावेऽपि बहुतराणामुत्पादादल्पतराणां चोद्वर्त्तनात्, 'हायंतिवि'त्ति बहुतराणामुद्वर्त्तनादल्पतरामां चोत्पादात्, 'अवट्ठियावि'त्ति तुल्यानामुत्पादादुद्वर्त्तनाच्चेति, 'एतेहिं तिहिवि'त्ति एतेषु त्रिष्वपि एकेन्द्रियवृद्धयादिष्वावलिकाया असङ्ख्येयो भागस्ततः परं यथायोगं वृद्धयादेरभावात्, 'दो अंतोमुहुत्त'त्ति एकमन्तर्मुहूर्त्तं विरहकालो द्वितीयं तु समानानामुत्पादोद्वर्त्तकाल इति।

'आणयपाणयाणं संखेज्ञा मासा आरणच्चुयाणं संखेज्ञा वास'त्ति, इह विरहकालस्य सङ्ख्यातमासवर्षरूपस्य द्विगुनितत्वेऽपि सङ्ख्यातत्वमेवेत्यतः सङ्ख्याता मासा इत्याद्युक्तम्, 'एवं

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

गेवेज्जदेवाणं'ति इह यद्यपि ग्रैवेयकधस्तनत्रये सङ्ख्यातानि वर्षाणां शतानि मध्यमे सहस्राणि उपरिमे लक्षानि विरह उच्यते तथापि द्विगुनितेऽपि च सङ्ख्यातवर्षत्वं न विरुध्यते, विजयादिषु त्वसङ्ख्या-तकालो विरहः स च द्विगुणोतोऽपि स एव, सर्वार्थःसिद्धे पल्योपमसङ्ख्येयभागः सोऽपि द्विगुनितः सङ्ख्येयभाग एव स्यादतएव उक्तं 'विजयवेजयंतजयंतापराजियाणं असंखेज्जाइं वाससहस्साइं' इत्यादीति ।

जीवादीनेव भङ्गयन्तरेणाह-'जीवाण'मित्यादि, 'सोपचयाः' सवृद्धयः प्राक्तनेष्वन्ये-षामुत्पादात् 'सापचयाः' प्राक्तनेभ्यः केषाञ्चिदुद्वर्त्तनात्सहानयः 'सोपचयसापचयाः' उत्पादोद्वर्त्त-नाभ्यां वृद्धिहान्योर्युगपद्भावात् 'सापचयाः' प्राक्तनेभ्यः केषाञ्चिदुद्वर्त्तनात्सहानयः 'सोपचय-सापचयाः' उत्पादोद्वर्त्तनाभ्यां वृद्धिहान्योर्युगपद्भावात्, निरुपचयनिरपचयाः उत्पादोद्वर्त्तनयोर-भावेन वृद्धिहान्योरभावात्, ननूपचयो वृद्धिरपचयस्तु हानि, युगपद्द्वयाभावरूपश्चावस्थितत्वं, एवं च शब्दभेदव्यतिरेकेण कोऽनयोः सूत्रयोर्भेदः ?, उच्यते, पूर्वं परिमाण मात्रमभिप्रेतम् ।

इह तु तदनपेक्षमुत्पादोद्वर्त्तनामात्रं, ततश्चेह तृतीयभङ्गके पूर्वोक्तवृद्धयादिविकल्पानां त्रयमपि स्यात्, तथाहि-बहुतरोत्पादे वृद्धिर्बहुत्तरोद्वर्त्तने च हानि, समोत्पादोद्वर्त्तनयोश्चाव-स्थितत्वमित्येवं भेद इति ।

'एगिंदिया तइयपए'त्ति सोपचयसापचया इत्यर्थः, युगपदुत्पादोद्वर्त्तनाभ्यां वृद्धि-हानिभावात्, शेषभङ्गकेषु तु ते न संभवन्ति, प्रत्येकमुत्पादोद्वर्त्तनयोस्तद्विरहस्य चाभावादिति । 'अवट्ठिएहिं'ति निरपचयनिरपचयेषु 'वक्कंतिकालो भानियव्वो'त्ति विरहकालो वाच्यः ।।

शतकं-५ उद्देशकः-८ समाप्तः

## –: शतकं-५ उद्देशकः-९ :–

**वृ.** इदं किलार्थःजातं गौतमो राजगृहे प्रायः पृष्टवान् बहुशो भगवतस्तत्र विहारादिति राजगृहादिस्वरूपनिर्णयपरसूत्रप्रपञ्च नवमोद्देशकमाह-

**मू. (२६४)** *तेणं कालेणं तेणं समएणं जाव एवं वयासी-किमिदं भंते ! नगरं रायगिहंति पवुच्चइ ?, किं पुढवी नगरं रायगिहंति पवुच्चइ, आऊ नगरं रायगिहंति पवुच्चइ ? जाव वणस्सइ ?, जहा एयणुद्देसइ पंचिंदियतिरिक्खजोनियाणं वत्तव्वया तहा भानियव्वं जाव सचित्ताचि-त्तमीसयाइं दव्वाइं नगरं रायगिहंति पवुच्चइ ? गोयमा ! पुढवीवि नगरं रायगिहंति पवुच्चइ जाव सच्चत्ताचित्तमीसियाइं दव्वाइं नगरं रायगिहंति पवुच्चइ ।*

*से केणट्ठेणं ?, गोयमा ! पुढवी जीवातिय अजीवातिय नगरं रायगिहंति पवुच्चई जाव सचित्ताचित्तमीसियाइं दव्वाइं जीवातिय अजीवातिय नगरं रायगिहंति पवुच्चति से तेणट्ठेणं तं चेव ।।*

**वृ.** 'तेण'मित्यादि, 'जहा एयणुद्देसए'त्ति एजनोद्देशकोऽस्यैव पञ्चमशतस्य सप्तमः, तत्र पञ्चेन्द्रियतिर्यग्वक्तव्यता 'टङ्काकूडा सेला सिहरी'त्यादिका योक्ता सा इह भनितव्येति ।

अत्रोत्तरं-'पुढवीवि नगर'मित्यादि, पृथिव्यादिसमुदायो राजगृहं, न पृथिव्यादिसमुदायाद्दते राजगृहशब्दप्रवृत्ति, 'पुढवी जीवाइय अजीवाइय नगरं रायगिहंति पवुच्चइ'त्ति जीवाजीवस्वभावं राजगृहमिति प्रतीतं, ततश्च विवक्षिता पृथिवी सचेतनाचेतनत्वेन जीवाश्चाजीवाश्चेति राजगृहमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोच्यत इति। पुद्‌गलाधिकारादिदमाह–

**मू. (२६५)** *से नूणं भंते ! दिया उज्ञोए रातिं अंधयारे ?, हंता गोयमा ! जाव अंधयारे। से केणट्ठेणं० ?, गोयमा ! दिया सुभा पोग्गला सुभे पोग्गलपरिणामे रातिं असुभा पोग्गला असुभे पोग्गलपरिणामे से तेणट्ठेणं०। नेरइया णं भंते ! किं उज्ञोए अंधयारे ?, गोयमा ! नेरइयाणं नो उज्ञोए अंधयारे, से केणट्ठेणं० ?, गोयमा ! नेरइया णं असुहा पोग्गला असुभे पोग्गलपरिणामे से तेणट्ठेणं०।*

*असुरकुमाराणं भंते ! किं उज्ञोए अंधयारे ?, गोयमा ! असुरकुमाराणं उज्ञोए नो अंधयारे से केणट्ठेणं ?, गोयमा ! असुरकुमाराणं सुभा पोग्गला सुभे पोग्गलपरिणामे, से तेणट्ठेणं एवं वुच्चइ, एवं जाव थनिय कुमाराणं, पुढविकाइया जाव तेइंदिया जहा नेरइया।*

*चउरिंदियाणं भंते ! किं उज्ञोए अंधयारे ?, गोयमा ! उज्ञोएवि अंधयारेवि, से केणट्ठेणं० गोयमा ! चउरिंदियाणं सुभासुभा पोग्गला सुभासुभे पोग्गलपरिणामे, से तेणट्ठेणं एवं जाव मणुस्साणं*

*वाणमंतरजोतिसवेमानिय जहा असुरकुमारा॥*

**वृ.** 'से नून'मित्यादि, 'दिवा सुभा पोग्गल'त्ति 'दिवा' दिवसे शुभाः पुद्‌गला भवन्ति, किमुक्तं भवति ? -शुभः पुद्‌गलपरिणामः स चार्ककरसम्पर्कात्, 'रत्तिं'ति रात्रौ 'नेरइयाणं असुभा पोग्गल'त्ति तत्क्षेत्रस्य पुद्‌गलशुभतानिमित्तभूतरविकरादिप्रकाशकवस्तुवर्जितत्वात्, 'असुरकुमाराणं सुभा पोग्गल'त्ति तदाश्रयादीनां भास्वरत्वात्।

'पुढविकाइए' इत्यादि, पृथिवीकायिकादयस्त्रीन्द्रियान्ता यथा नैरयिका उक्तास्तथा वाच्याः, एषां हि नास्त्युदद्योतोऽन्धकारं चास्ति, पुद्‌गलानामशुभत्वात्, इह चेयं भावना-एषामेतत्क्षेत्रे सत्यपि रविकरादिसंपर्के एषां चक्षुरिन्द्रियाभावेन दृश्यवस्तुनो दर्शनाभावाच्छुभपुद्‌गलकार्याकरणेना शुभाः पुद्‌गला उच्यन्ते ततश्चैषामन्धकारमेवेति।

'चउरिंदियाणं सुभासुभे पोग्गल'त्ति एषां हि चक्षुसद्‌भावे रविकरादिसद्‌भावे दृश्यार्थावबोधहेतुत्वाच्छुभाः पुद्‌गलाः, रविकराद्यभावे त्वर्थावबोधाजनकत्वादशुभा इति।

**मू. (२६६)** *अत्थि णं भंते ! नेरइयाणं तत्थगयाणं एवं पन्नायति-समयाति वा आवलियाति वा जाव ओसप्पिणीत वा उस्सप्पिणीति वा, नो तिणट्ठे समट्ठे। से केणट्ठेणं जाव समयाति वा आवलियाति वा ओसप्पिणीति वा उस्सप्पिणीति वा ?, गोयमा ! इहं तेसिं माणं इहं तेसिं पमाणं इहं तेसिं पन्नायति, तंजहा समयाति वा जाव उस्सप्पिणीति वा।*

*से तेणट्ठेणं जाव नो एवं पन्नायए, तंजहा-समयाति वा जाव उस्सप्पिणीति वा, एवं जाव पंचेंदियतिरिक्खजोनियाणं, अत्थि णं भंते ! मणुस्साणं एवं पन्नायति, तंजहा-समयाति वा जाव उस्सप्पिणीति वा ?, हंता ! अत्थि।*

*से केणट्ठेणं० ? गोयमा ! इंह तेसिं माणं इहं तेसिं पमाणं इहं चेव तेसिं एवं पन्नायति, तंजहा-समयाति वा जाव उस्सप्पिणीति वा से तेण०,*

*वाणमंतरजोतिसवेमानियाणं जहा नेरइयाणं।*

**वृ.** पुद्‌गला द्रव्यमिति तच्चिन्ताऽनन्तरं कालद्रव्यचिन्तासूत्रम्-'तत्थ गयाणं'ति नरके स्थितैः षष्ठयास्तृतीयार्थःत्वात्, 'एवं पन्नायति'त्ति इदं हिविज्ञायते 'समयाइव'त्ति समया इति वा 'इहंते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिं'ति 'इह' मानुष्यक्षेत्रे 'तेषां' समयादीनां 'मानं' परिमाणम्, आदित्यगतिसमभिव्यङ्ग्यत्वात्तस्य, आदित्यगतेशच मनुष्यक्षेत्र एव भावात् नरकादौ त्वमादिति, 'इहं तेसिं पमाणं'ति 'इह' मनुष्यक्षेत्रे तेषां-समयादीनां प्रमाणं-प्रकृष्टं मानं सूक्ष्ममानमित्यर्थः, तत्र मुहूर्त्तस्तावन्मानं तदपेक्षया लवः सूक्ष्मत्वात्प्रमाणं तदपेक्षया स्तोकः प्रमाणं लवस्तु मानमित्येवं नेयं यावत्समय इति।

ततश्च 'इहं तेसि'मित्यादि, 'इह' मर्त्यलोके मनुजैस्तेषां-समयादीनां सम्बन्धि 'एवं' वक्ष्यमाणस्वरूपं समयत्वाद्येव ज्ञायते, तद्यथा-'समया इति वे'त्यादि, इह च समयक्षेत्राद्बहिर्वर्त्तिनां सर्वेषामपि समयाद्यज्ञानमवसेयं, तत्र समयादिकालस्याभावेन तद्व्यवहाराभावात्, तथा पञ्चेन्द्रियतिर्यञ्चो भवनपतिव्यन्तरज्योतिष्काश्च यद्यपि केचित् मनुष्यलोके सन्ति तथापि तेऽल्पाः प्रायस्तदव्यहारिणश्च इतरे तु वहव इति तदपेक्षया ते न जानन्तीत्युच्यत इति।

कालनिरूपणाधिकाराद्रात्रिन्दिवलक्षणविशेषकालनिरूपणार्थःमिदमाह–

**मू. (२६७)** *तेणं कालेणं २ पासावच्चिज्ञा थेरा भगवंतो जेणेव समणे भगंव महावीरे तेणेव उवागच्छंति २ समणस्स भगवओ महावीरस्स अदूरसामंते ठिच्चा एवं वदासी-से नूनं भंते असंखेज्जे लोए अनंता रातिंदिया उप्पज्जिंसु वा उप्पज्जंति वा उप्पज्जिस्संति वा विगच्छिंसु वा विगच्छंति वा विगच्छिस्संति वा परित्ता रातिंदिया उप्पज्जिंसु वा ३ विगच्छिंसु वा ३ ?, हंता अज्जो असंखेज्जे लोए अनंता रातिंदिया तं चेव, से केणट्ठेणं जाव विगच्छिस्संति वा ?*

*से नूनं भंते ! अज्जो ! पासेणं अरहया पुरिसादानीएणं सासए लोए वुइए अनादीए अणवदग्गे परित्ते परिवुडे हेट्ठा विच्छिन्ने मज्झे संखित्ते उप्पिं विसाले अहे पलियंकसंठिए मज्झे वरवइरविग्गहिते उप्पिं उद्धमुइंगाकारसंठिए (तं) सि च णं सासयंसि लोगंसि अनादियंसि अणवदग्गंसि परित्तंसि परिवडंसि हेट्ठा विच्छिन्नंसि मज्झे संखित्तंसि उप्पिं विसालंसि अहे पलियंकसंठियंसि मज्झे वरवइरविग्गहियंसि उप्पिं उद्धमुइंगाकारसंठियंसि अनंता जीवघणा उप्पज्जित्ता २ निलीयंति परित्ता जीवघणा उप्पज्जित्ता २ निलीयंति से नूनं भूए उप्पन्ने विगए परिणए अजीवेहिं लोक्कति पलोक्कइ, जे लोक्कइ से लोए ?, हंता भगवं !, से तेणट्ठेणं अज्जो ! एवं वुच्चइ असंखेज्जे तं चेव।*

*तप्पभितिं च णं ते पासावच्चेज्जा थेरा भगवतो समणं भगवं महावीरं पच्चभिजाणंति सव्वन्नू सव्वदरिसी, तए णं ते थेरा भगवंतो समणं भगवं महावीरं वंदंति नमंसंति २ एवं वदासि-इच्छामि णं भंते ! तुब्भं अंतिए चाउज्जामाओ धम्माओ पंचमहव्वइयं सप्पडिक्कमणं धम्मं उवसंपज्जित्ता णं विहरित्तए, अहासुहं देवाणुप्पिया ! मा पडिबंधं करेह, तए णं ते पासावच्चिज्जा थेरा भगवंतो जाव चरिमेहिं उस्सासनिस्सासेहिं सिद्धा जाव सव्वदुक्खप्पहीणा अत्थेगतिया देवा देवलोएसु उववन्ना*

**वृ.** 'तेणं कालेण'मित्यादि, तत्र 'असंखेज्जे लोए' त्ति असङ्ख्यातेऽसङ्ख्यातप्रदेशात्मकत्वात् लोके-चतुर्दशरज्ज्वात्मके क्षेत्रलोके आधारभूते 'अनता राइंदिय'त्ति अनन्तपरिमाणानि रात्रिन्दिवानि-अहोरात्रानि 'उप्पज्जिंसु वा' इत्यादि उत्पन्नानि वा उत्पद्यन्ते वा उत्पत्स्यन्ते वा, पृच्छातामयमभिप्रायः-यदि नामासङ्ख्यातो लोकस्तदा तत्रानन्तानि तानि कथं भवितुमर्हन्ति ?, अल्पत्वादाधारस्य महत्त्वाच्चाधेयस्तेति, तथा 'परित्ता राइंदिय'त्ति परीत्तानि-नियतपरिमाणानि नानन्तानि, इहायमभिप्रायः-यद्यनन्तानि तानि तदा कथं परीत्तानि ? इत विरोधः, अत्र हन्तेत्याद्युत्तरं, अत्र चायमभिप्रायः-असङ्ख्यातप्रदेशेऽपि लोकेऽनन्ता जीवा वर्त्तते तथाविधस्वरूपत्वाद्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकत्राश्रये सहस्रादिसङ्ख्यप्रदीपप्रभा इव, ते चैकत्रै समयादिके कालेऽनन्ता उत्पद्यन्ते विनश्यन्ति च, स च समयादिकालस्तेषु साधारणशरीरावस्थायामनन्तेषु प्रत्येकशरीरावस्थायां च परीत्तेषु प्रत्येकं वर्त्तते, तत्स्थितिलक्षणपर्यायरूपत्वात्तस्य, तथा च कालोऽनन्तः परीत्तश्च भवतीति, एवं चासङ्ख्येयेऽपि लोके रात्रिन्दिवान्यनन्तानि परीत्तानि च कालत्रयेऽपि युज्यन्त इति

एतदेव प्रश्नपूर्वकं तत्संमतजिनमतेन दर्शयन्नाह-'से नून'मित्यादि, 'भे'त्ति भवतां सम्बन्धिना 'अज्जो'त्ति हे आर्या ! 'पुरिसादानीएणं'ति पुरुषाणां मध्ये आदानीयः-आदेयः पुरुषादानीयस्तेन 'सासए'त्ति प्रतिक्षणस्थायी, स्थिर इत्यर्थः, 'वुइए'त्ति उक्तः, स्थिरश्चोत्पत्तिक्षणादारभ्य स्यादित्यत आह-'अनाइए'त्ति अनादिकः, स च सान्तोऽपि स्याद्भव्यत्ववदित्याह-'अनवयग्गे'त्ति अनवदग्रः-अनन्तः 'परित्ते'त्ति परिमितः प्रदेशतः, अनेन लोकस्यासङ्ख्येयत्वं पार्श्वजिनस्यापि संमतमिति दर्शितम् ।

तथा 'परिवुडे'त्ति अलोकेन परिवृतः 'हेट्ठा विच्छिन्ने'त्ति सप्तरज्जुविस्तृतत्वात् 'मज्झे संखित्ते'त्ति एकरज्जुविस्तारत्वात् 'उप्पिं विसाले'त्ति ब्रह्मलोकदेशस्य पञ्चरज्जुविस्तारत्वात्, एतदेवोपमानतः प्राह-'अहे पलियंकसंठिए'त्ति उपरिसङ्कीर्णत्वाधोविस्तृतत्वाभ्यां 'मज्झे वरवइरविग्गहिए'त्ति वरवज्रवद्विग्रहः-शरीरमाकारो मध्यक्षामत्वेन यस्य स तथा, स्वार्थिःक-श्चेकप्रत्ययः, 'उप्पिं उद्धमुइंगागारसंठिए'त्ति ऊर्द्धो न तु तिरश्चीनो यो मृदङ्गस्तस्याकारेण संस्थितो यः स तथा, मल्लकसंपुटाकार इत्यर्थः, 'अनंता जीवघण'त्ति 'अनन्ताः' परिमाणतः सूक्ष्मादि-साधारण- शरीराणां विवक्षितत्वात्, सन्तत्यपेक्षया वाऽनन्ताः, जीवसन्ततीनामपर्यवसानत्वात्

जीवाश्च ते घनाश्चानन्तपर्यायसमूहरूपत्वादसङ्ख्येयप्रदेशपिण्डरूपत्वाच्च जीवघनाः, किमित्याह-'उप्पज्जित्ते'ति उत्पद्योत्पद्य 'विलीयन्ते' विनश्यन्ति, तथा 'परीत्ता' प्रत्येकशरीरा अनपेक्षितातीतानागतसन्तानतया वा सङ्क्षिप्ताः, जीवधना इत्यादि तथैव, अनेन च प्रश्ने यदुक्तम् 'अनंता राइंदिया'इत्यादि तस्योत्तरं सूचितं, यतोऽनन्तपरीत्तजीवसम्बन्धात्कालविशेषा अप्यनन्ताः परीत्ताश्च व्यपदिश्यन्तेऽतो विरोधः परिहृतो भवतीति । अथ लोकमेव स्वरूपत आह-

'से (नूनं) भूए'त्ति यत्र जीवघना उत्पद्य २ विलीयन्ते स लोकोभूतः-सद्भूतो भवनधर्मयोगात्, स चानुत्पत्तिकोऽपि स्याद् यथा नयमतेनाकाशमत आह-उत्पन्नः, एवंविधश्चान- श्वरोऽपि स्याद् यथा विवक्षितघटाभाव इत्यत आह-विगतः, स चानन्वयोऽपि किल भवतीत्यत आह-परिणतः-पर्यायान्तरानि आपन्नो न तु निरन्वयनासेन नष्टः ।

अथ कथमयमेवंविधो निश्चीयते ? इत्याह-'अजीवेहिं'ति 'अजीवैः' पुद्गलादिभिः सत्तां बिभ्रद्भिरुत्पद्यमानैर्विगच्छद्भिः परिणमद्भिश्च लोकानन्यभूतैः 'लोक्यते' निश्चीयते 'प्रलोक्यते' प्रकर्षेण निश्चीयते, भूतादि धर्मकोऽयमिति, अत एव यथार्थःनामाऽसाविति दर्शयन्नाह-'जे लोक्कइ से लोए'त्ति यो लोक्यते-विलोक्यते प्रमाणेन स लोको-लोकशब्दवाच्यो भवतीति, एवं लोकस्वरूपाभिधायकपार्श्वजिनवचनसंस्मरणेन स्ववचनं भगवान् समर्थिःतवानिति । 'सपडिक्कमणं'ति आदिमान्तिमजिनयोरेवावश्यंकरणीयः सप्रतिक्रमणो धर्मोऽन्येषां तु कदाचि-त्प्रतिक्रमणं, आह च-

॥१॥ "सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिनस्स ।
मज्झिमगाण जिणाणं कारणजाए पडिक्कमणं ॥" ति ॥

अनन्तरं 'देवलोएसु उववन्ना ।इत्युक्तमतो देवलोकप्ररूपणसूत्रम्-'कतिविहा ण"मित्यादि

**मू. (२६८)** *कतिविहा णं भंते ! देवलोगा पन्नत्ता ?, गोयमा ! चउव्विहा देवलोगा पन्नत्ता, तंजहा-भवणवासीवाणमंतरजोतिसियवेमानियभेदेण, भवणवासी दसविहा वाणमंतरा अट्ठविहा जोइसिया पंचविहा वेमानिया दुविहा ।*

**मू. (२६९)** *किमियं रायगिहंति य उज्जोए अंधयार समए य ।*
*पासंतिवासि पुच्छा रातिंदिय देवलोगा य ।*

**मू. (२७०)** *सेवं भंते ! २ त्ति ॥*

शतकं-५ उद्देशकः-९ समाप्तः

## -: शतकं-५ उद्दशेकः-१० :-

**वृ.** अनन्तरोद्देशकान्ते देवा उक्ता इति देवविशेषभूतं चन्द्रं समुद्दिश्य दशमोद्देशकमाह, तस्य चेदं सूत्रम्--

**मू. (२७१)** *तेणं कालेणं तेणं समएणं चंपानामं नयरी जहा पढमिल्लो उद्देसओ तहा नेयव्वो एसोवि, नवरं चंदिमा भानियव्वा ॥*

**वृ.** 'तेणं कालेण'मित्यादि, एतच्च चन्द्राभिलापेन पञ्चमशतकप्रथमोद्देशकवन्नेयमिति ॥

शतकं-५ उद्देशकः-१० समाप्तः

श्रीरोहणाद्रेरिव पञ्चमस्य, शतस्य देशानिव साधुशब्दान् ।
विभिद्य कुश्येव बुधोपदिष्या, प्रकाशिताः सन्मनिवन्मयाऽर्थाः ॥१॥

**शतकं-५ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभयदेवसूरिविरचिता भगवतीअङ्गसूत्रे सप्तमशतकस्य टीका परिसमाप्ता ।**

## शतकं-६

**वृ.** व्याख्यातं विचित्रार्थं पञ्चमं शतं, अथावसरायातं तथाविधमेव षष्ठमारभ्यते, तस्य चोद्देशकार्थःसङ्ग्रहणी गाथेयम्—

**मू. (२७२)** *वेयण १ आहार २ महस्सवे य ३ सपएस ४ तमुए य ५ ।*
*भविए ६ साली ७ पुढवी ८ कम्म ९ अन्नउत्थी १० दस उद्दगंमि सए ॥*

**वृ.** 'वेयणे'त्यादि, तत्र 'वेयण'त्ति महावेदनो महानिर्ज़र इत्याद्यर्थप्रतिपादनपरः प्रथमः १ 'आहार'त्ति आहाराद्यर्थाभिधायको द्वितीयः २ 'महस्सवे य'त्ति महाश्रयवस्य पुद्गला बध्यन्ते इत्याद्यर्थाभिधानपरस्तृतीयः ३ 'सपएस'त्ति सप्रदेशो जीवोऽप्रदेशोवा इत्याद्यर्थाभिधायकश्चतुर्थः ४ 'तमुए य'त्ति तमस्कायार्थःनिरूपणार्थः पञ्चमः ५ । 'भविए'त्ति भव्योनारकत्वादिनोत्पादस्य योग्यस्तद्वक्तव्यताऽनुगतः षष्ठः ६ 'सालि'त्ति शाल्यादिधान्यवक्तव्यताऽऽश्रितः सप्तमः ७ 'पुढवि'त्ति

रत्नप्रभादिपृथिवीवक्तव्यताऽर्थोऽष्टमः ८ 'कम्म'त्ति कर्मबन्धाभिधायको वनमः ९ 'अन्नउत्थि'त्ति अन्ययूथिकवक्तव्यतार्थो दशमः १० इति ।

**-: शतकं-६ उद्देशकः-१ :-**

**मू. (२७३)** *से नूनं भंते ! जे महावेदणे से महानिज्ञरे जे महानिज्ञरे से महावेदणे, महावेदणस्स य अप्पवेदणस्स य से सेए जे पसत्थनिज्ञराए ?, हंता गोयमा ! जे महावेदणे एवं चेव । छट्ठसत्तमासु णं भंते ! पुढवीसु नेरइया महावेयणा ?, हंता महावेयणा, ते णं भंते ! समणेहिंतो निग्गंथेहिंतो महानिज्ञरतरा ?, गोयमा ! नो तिणड्ढे समड्ढे, से केणड्ढेणं भंते ! एवं वुच्चइ जे महावेदणे जाव पसत्थनिज्ञराए ?*

*गोयमा से जहानामए-दुवे वत्था सिया, एगे वत्थे कद्दमरागरत्ते एगे वत्थे खंजणरागरत्ते, एएसि णं गोयमा ! दोण्हं वत्थाणं कयरे वत्थे दुधोयतराए चेव दुवामतराए चेव दुपरिकम्मतराए चेव कयरे वा वत्थे सुधोयतराए चेव सुवामतराए चेव सुपरिकम्मतराए चेव ?, जे वा से वत्थे कद्दमरागरत्ते जे वा से वत्थे खंजणरागरत्ते ?, भगवं ! तत्थ णं जे से वत्थे कद्दमरागरत्ते से णं वत्थे दुधोयतराए चेव दुवामतराए चेव दुप्परिकम्मतराए चेव ।*

*एवामेव गोयमा ! नेरइयाणं पावाइं कम्माइं गाढीकयाइं चिक्कणीकयाइं (अ) सिलिट्ठीकयाइं खिलीभूयाइं भवंति संपगाढंपि य णं ते वेदणं वेदेमाणा नो महानिज्ञरा नो महापज्ञवसाणा भवंति, से जहा वा केइ पुरिसे अहिगरणिं आकोडेमाणे महया २ सद्देणं महया २ घोसेणं महया २ परंपराधाएणं नो संचाएइ तीसे अहिगरणीए केई अहाबायरे पोग्गले परिसाडित्तए एवामेव गोयमा ! नेरइयाणं पावाइं कम्माइं गाढीकयाइं जाव नो महापज्ञवसाणाइं भवंति ।*

*भगवं ! तत्थ जे से वत्थे खंजणरागरत्ते से णं वत्थे सुधोयतराए चेव सुवामतराए चेव सुपरिकम्मतराए चेव, एवामेव गोयमा ! समणाणं निग्गंथाणं अहाबायराइं कम्माइं सिढिलीकयाइं निट्ठियाइं कडाइं विप्परिणामियाइं खिप्पामेव विद्धत्थाइं भवंति, जावतियं तवतियंपि णं ते वेदणं वेदेमाणे महानिज्ञरा महापज्ञवसाणा भवंति । से जहानामए-केइ पुरिसे सुक्कतणहत्थयं जायतेयंसि पक्खिवेज्ञा से नूनं गोयमा ! से सुक्के तणहत्थए जायतेयंसि पक्खित्ते समाणे खिप्पामेव मसमसाविज्ञति हंता मसमसाविज्ञति ।*

*एवामेव गोयमा ! समणाणं निग्गंथाणं अहाबायराइं कम्माइं जाव महापज्ञवसाणा भवंति, से जहानामए केइ पुरिसे तत्तंसि अयकवल्लंसि उदगबिंदू जाव हंता विद्धंसमागच्छइ, एवामेव गोयमा ! समणाणं निग्गंथाणं जाव महापज्ञवसाणा भवंति, से तेणड्ढेणं जे महावेदणे से महानिज्ञरे जाव निज्ञराए ॥*

**वृ.** 'से नूनं भंते ! जे महावेयणे' इत्यादि, 'महावेदनः' उपसर्गादिसमुद्भूतविशिष्टपीडः 'महानिर्जरः' विशिष्टकर्मक्षयः, अनयोश्चान्योऽन्याविनाभूतत्वाविर्भावनाय 'जे महानिज्ञरे' इत्यादि प्रत्यावर्त्तनमित्येकः प्रश्नः, तथा महावेदनस्य चाल्पवेदनस्य च मध्ये स श्रेयान् यः 'प्रशस्तनिर्जराकः' कल्याणानुबन्धनिर्जर इत्येष च द्वितीयः प्रश्नः, प्रश्नता च काकुपाठादवगम्या, हन्तेत्याद्युत्तरं, इह च प्रथमप्रश्नस्योत्तरे महोपसर्गकाले भगवान् महावीरो ज्ञातं, द्वितीयस्यापि स एवोपसर्गानुपसर्गावस्थायामिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यो महावेदनः स महानिर्जर इति यदुक्तं तत्र व्यभिचारं शङ्कमान आह-'छट्ठी'त्यादि, 'दुधोयतराए'त्ति दुष्करतरधावनप्रक्रियं 'दुवातमतराए'त्ति 'दुर्वाम्यतरकं' दुस्त्याज्यतरकलङ्कं 'दुप्परिकम्मतराए'त्ति कष्टकर्त्तव्यतेजोजननभङ्गकरणादिप्रक्रियम्, अनेन च विशेषणत्रयेणापि दुस्त्याज्यतरकलङ्कं 'दुप्परिकम्मतराए'त्ति कष्टकर्त्तव्यतेजोजननभङ्गकरणादिप्रक्रियम्, अनेन च विशेषणत्रयेणापि दुर्विशोध्यमित्युक्तं, 'गाढीकयाइं'ति आत्मप्रदेशैः सह गाढबद्धानि सन-सूत्रगाढबद्धसूचीकलापवत् 'चिक्कणीकयाइं'ति सूक्ष्मकर्मस्कन्धानां सरसतया परस्परं गाढसम्बन्धकरणतो दुर्भेदीकृ तानि तताविधमृत्पिण्डवत् ।

(अ)सिलिट्ठिकियाइं'ति निधत्तानि सूत्रबद्धाग्नितप्तलोहशलाकाकलापवत् 'खिलीभूतानि' अनुभूतिव्यतिरिक्तोपायान्तरेण क्षपयितुमशक्यानि निकाचितानीत्यर्थः, विशेषणचतुष्टयेनाप्येतेन दुर्विशोध्यानि भवन्तीत्युक्तं भवति, एवं च 'एवामेवे' त्याद्युपनयवाक्यं सुघटनं स्याद्, यतश्च तानि दुर्विशोध्यानि स्युस्ततः 'संपगाढ'मित्यादि 'नो महापज्ञवसाणा भवंति'त्ति, अनेन महानिर्जराया अभावस्य निर्वाणाभावलक्षणं फलमुक्तमिति नाप्रस्तुतत्वमित्याशङ्कनीयमिति ।

तदेवं यो महावेदनः स महानिर्जर इति विशिष्टजीवापेक्षमवगन्तव्यं न पुनर्नारका-दिक्लिष्टकर्मजीवापेक्षं,यदपि यो महानिर्जरः स महावेदन इत्युक्तं तदपि प्रायिकं, यतो भवत्ययोगी महानिर्जरो महावेदनस्तु भजनयेति ।

'अहिगरनि'त्ति अधिकरणी यत्र लोहकारा अयोधनेन लोहानि कुट्टयन्ति 'आउडेमाणे'त्ति अकुट्टयन् 'सद्देणं'ति अयोधनघातप्रभवेण ध्वनिना पुरुषहुङ्कृतिरूपेण वा 'घोसेणं'ति तस्यैवानुनादेन 'परंपराघाएणं'ति परम्परा-निरन्तरता तत्प्रधानो घातः-ताडनं परम्पराघातस्तेन उपर्युपरिघातेनेत्यर्थः, 'अहाबायरे'त्ति स्थूलप्रकारान्, 'एवामेवे'त्याद्युपनये 'गाढीकयाइं'इत्यादि-विशेषणचतुष्केण दुष्परिशाटनीयानि भवन्तीत्युक्तं भवति, 'सुधोयतराए'इत्यादि ।

अनेन सुविशोध्यं भवतीत्युक्तं स्यात्, 'अहाबायराइं'ति स्थूलतरस्कन्धान्यसाराणीत्यर्थः 'सिढिलीकयाइं'ति श्लथीकृतानि मन्दविपाकीकृतानि 'निट्ठियाइं कयाइं'ति निस्सत्ताकानि विहितानि 'विपरिणामियाइं'ति विपरिणामं नीतानि स्थितिधातरसघातादिभिः, तानि च वेदना उक्ता, सा च करणतो भवतीति करणसूत्रं, तत्र–

*मू. (२७४) कतिविहे णं भंते ! करणे पन्नत्ते ?, गोयमा ! चउव्विहे करणे पन्नत्ते, तंजहा-मनकरणे वइकरणे कायकरणे कम्मकरणे । नेरइयाणं भंते ! कतिविहे करणे पन्नत्ते ?, गोयमा चउव्विहे पन्नत्ते, तंजहा-मनकरणे वइकरणे कायकरणे कम्मकरणे ४, पंचिंदियाणं सव्वेसिं चउव्विहे करणे पन्नत्ते । एगिंदियाणं दुविहे-कायकरणे य, विगलेंदियाणं ३-वइकरमे कायकरणे कम्मकरणे*

*नेरइयाणं भंते ! किं करणओ असायं वेयणं वेयंति अकरणओ असायं वेयणं वेदेंति ?, गोयमा ! नेरइयाणं करणओ असायं वेयणं वेयंति नो अकरणओ असायं वेयणं वेयंति । से केणट्ठेणं० ?, गोयमा ! नेरइयाणं चउव्विहे करणे पन्नत्ते, तंजहा- मणकरणे वइकरणे कायकरणे कम्मकरणे, इच्चेएणं चउव्विहेणं करणेणं नेरइया करणओ असायं वेयणं वेयंति नो अकरणओ, से तेणट्ठेणं० ।*

*असुरकुमाराणं किं करणओ अकरणओ ?, गोयमा ! करणओ नो अकरणओ, से केण-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*ट्ठेणं० ?, गोयमा ! असुरकुमाराणं चउव्विहे करणे पन्नत्ते, तंजहा-मनकरणे वयकरणे कायकरणे कम्मकरणे, इच्चेएणं सुभेणं करणेणं असुरकुमाराणं करणओ सायं वेयणं वेयंति नो अकरणओ, एवं जाव थनियकुमाराणं । पुढविकाइयाणं एवामेव पुच्छा, नवरं इच्चेएणं सुभासुभेणं करणेणं पुढविकाइया करणओ वेमायाए वेयणं वेयंति नो अकरणओ, ओरालियसरीरा सव्वे सुभासुभेणं वेमायाए । देवा सुभेणं सायं ।।*

**वृ.** 'कम्मकरणं'ति कर्मविषयं करणं-जीववीर्यं बन्धनसङ्क्रमादिनिमित्तभूतं कर्मकरणं 'वेमायाए'त्ति विविधमात्रया कदाचित्सातां कदाचिदसातामित्यर्थः ।

**मू.** *(२७५) जीवा णं भंते ! किं महावेयणा महानिज्जरा १ महावेदणा अप्पनिज्जरा २ अप्पवेदणा महानिज्जरा ३ अप्पवेदणा अप्पनिज्जरा ४ ?, गोयमा ! अत्थेगतिया जीवा महावेदणा महानिज्जरा १ अत्थेगतिया जीवा महावेयणा अप्पनिज्जरा २ अत्थेगतिया जीवा अप्पवेदणा महानिज्जरा ३ अत्थेगतिया जीवा अप्पवेदणा अप्पनिज्जरा४ ।*

*से केणट्ठेणं० ?, गोयमा ! पडिमापडिवन्नए अनगारे महावेदणे महानिज्जरे छट्ठसत्तमासु पुढवीसु नेरइया महावेदणा अप्पनिज्जरा सेलेसिं पडिवन्नए अनगारे अप्पवेदणे महानिज्जरे अनुत्तरोववाइया देवा अप्पवेदणा अप्पनिज्जरे अनुत्तरोववाइया देवा अप्पवेदणा अप्पनिज्जरा, सेवं भंते २ त्ति ।*

**मू.** *(२७६) महवेदणे य वत्थे कद्दमखंजणमए य अहिगरणी ।*
*तणहत्थे य कवल्ले करण महावेदणा जीवा ।।*

**वृ.** 'महावेयणे'इत्यादि सङ्ग्रहगाथा गतार्थाः ।।

शतकं-६ उद्देशकः-१ समाप्तः

## -: शतकं-६ उद्देशकः-२ :-

**वृ.** अनन्तरोद्देशको य एते सवेदना जीवा उक्तास्ते आहारका अपि भवन्तीत्याहारोद्देशकः-

**मू.** *(२७७) रायगिहं नगरं जाव एवं वयासी-आहारुद्देसो जो पन्नवणाए सो सव्वो निरवसेसो नेयव्वो । सेवं भंते ! सेवं भंते ! त्ति ।।*

**वृ.** स च प्रज्ञापनायामिव दृश्यः, एवं चासौ-'नेरइया णं भंते ! किं सच्चित्ताहारा १ अच्चित्ताहारा २ मीसाहारा ३ ?, गोयमा ! नो सच्चित्ताहारा १ अच्चित्ताहारा २ नो मीसाहारा ३' इत्यादि ।।

शतकं-६ उद्देशकः-२ समाप्तः

## -: शतकं-६ उद्देशकः- :-३

**वृ.** अनन्तरोद्देशके पुद्गला आहारतश्चिन्तिताः, इह तु बन्धादि इत्येवंसम्बन्धस्य तृतीयोद्देशकस्यादावर्थःसङ्ग्रहगाथाद्वयम्-

**मू.** *(२७८) बहुकम्मवत्थपोग्गलपयोगसावीससा य सादीए ।*
*कम्मट्ठितीत्थिसंजय सम्मं द्दिट्ठी य सन्नी य ।।*

**वृ.** 'बहुकम्मे'त्यादि, 'बहुकम्म'त्ति महाकर्म सर्वतः पुद्गला बध्यन्त इत्यादि वाच्यं, 'वत्थे पोग्गला पयोगसा वीससा य'त्ति यथा वस्त्रे पुद्गलाः प्रयोगतो विश्रसातश्च चीयन्ते किमेवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवानामपीति वाच्यं, 'साइए' त्ति वस्त्रस्य सादि पुद्गलचयः, एवं किं जीवानामप्यसौ ? इत्यादि प्रश्नः, उत्तरं च वाच्यं 'कम्मट्टिइ' त्ति कर्म्मस्थितिर्वाच्या, 'थिइ' त्ति किं स्त्री पुरुषादिर्वा कर्म बन्धाति ? इति वाच्यं, 'संजय' त्ति किं संयतादि ? 'सम्मदिट्ठि' त्ति किं सम्यग्दृष्ट्यादि ?, एवं सञ्ज्ञी ।

**मू. (२७९)** *भविय दंसण पज्जत्ते भासवपरत्त नाणजोगे य ।*
*अवओगाहारगसुहुमचरिमबंधी य अप्पबहुं ॥*

**वृ.** भव्यो दर्शनी पर्याप्तको भाषकः परीत्तो ज्ञानी योगी उपयोगी आहारकः सूक्ष्मः चरमः 'बंधे य' त्ति एतानाश्रित्य बन्धो वाच्यः, 'अप्पबहुं' ति एषामेव स्त्रीप्रभृतीनां कर्मबन्धकानां परस्परेणाल्पबहुता वाच्येति । तत्र बहुकर्म्मद्वारे–

**मू. (२८०)** *से नूनं भंते ! महाकम्मस्स महाकिरियस्स महासवस्स महावेदणस्स सव्वओ पोग्गला बज्झंति सव्वओ पोग्गला चिज्जंति सव्वओ पोग्गला उवचिज्जंति सया समियं च णं पोग्गला बज्झंति सया समियंपोग्गला चिज्जंति सया समियं पोग्गला उवचिज्जंति सया समियं च णं तस्स आया दुरूवत्ताए दुवन्नत्ताए दुगंधत्ताए दुरसत्ताए दुफासत्ताए अनिट्ठत्ताए अकंत० अप्पिय० असुभ० अमणुन्न० अमणामत्ताए अनिच्छियत्ताए अभिज्झियत्ताए अहत्ताए नो उड्ढत्ताए अकंत० अप्पिय० असुभ० अमणुन्न० अमणामत्ताए अनिच्छियत्ताए अभिज्झियत्ताए अहत्ताए नो उड्ढत्ताए दुक्खत्ताए नो सुहत्ताए भुज्जो २ परिणमंति ? हंता गोयमा ! महाकम्मस्स तं चेव ।*

*से केणट्ठेणं० ?, गोयमा ! से जहानामए-वत्थस्स अहयस्स वा धोयस्स वा तंतुगयस्स वा आनुपुव्वीए परिभुज्जमाणस्स सव्वओ पोग्गला वज्झंति सव्वओ पोग्गला चिज्जंति जाव परिणमंति से तेणट्ठेणं० ।*

*से नूनं भंते ! अप्पासवस्स अप्पकम्मस्स अप्पकिरियस्स अप्पवेदणस्स सव्वओ पोग्गला भिज्जंति सव्वओ पोग्गला छिज्जंति सव्वओ पोग्गला विद्धंसंति सव्वओ पोग्गला परिविद्धंसंति सया समियं पोग्गला भिज्जंति पोग्गला छिज्जंति विद्धस्संति परिविद्धस्संति सया समियं च णं तस्स आया सुरूवत्ताए पसत्थं नेयव्वं जाव सुहत्ताए नो दुक्खत्ताए भुज्जो २ परिणमंति ?, हंता गोयमा जाव परिणमंति ।*

*से केणट्ठेणं० ?, गोयमा ! से जहानामए-वत्थस्स जल्लियस्स वा पंकियस्स वा मइल्लियस्स वा रइल्लियस्स वा आनुपुव्वीए परिकम्मिज्जमाणस्स सुद्धेणं वारिणा धोवेमाणस्स पोग्गला भिज्जंति जाव परिणमंति से तेणट्ठेणं० ॥*

**वृ.** 'महाकम्मस्से' त्यादि, महाकर्मणः स्थित्याद्यपेक्षया 'महाक्रियस्य' अलघुकायिक्यादिक्रियस्य 'महाश्रवस्य' बृहन्मिथ्यात्वादिकर्मबन्धहेतुकस्य 'महावेदनस्य' महापीडस्य 'सर्वतः' सर्वासु दिक्षु सर्वान् वा जीवप्रदेशानाश्रित्य बध्यन्ते आसङ्कलनतः चीयन्ते-बन्धनतः उपचीयन्ते-निषेकर- चनतः, अथवा बध्यन्ते-बन्धनतः चीयन्ते-निधत्ततः उपचीयन्ते निकाचनतः 'सया समियं' ति 'सदा' सर्वदा, सदात्वं च व्यवहारतोऽसातत्येऽपि स्यादित्यत आह-'समितं' सन्ततं 'तस्सआय' त्ति यस्य जीवस्य पुद्गला बध्यन्ते तस्यात्मा बाह्यात्मा शरीरमित्यर्थः ।

'अनिट्ठत्ताए' त्ति इच्छाया अविषयतया 'अकंतत्ताए' त्ति असुन्दरतया 'अप्पियत्ताए' त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्रेमहेतुतया 'असुभत्ताए' त्ति इच्छाया अविषयतया 'अकंतत्ताए' त्ति असुन्दरतया 'अप्पियत्ताए' त्ति अप्रेमहेतुतया 'असुभत्ताए' त्ति अमङ्गल्यतयेत्यर्थः 'अमणुन्नत्ताए' त्ति न मनसा-भावतो ज्ञायते सुन्दरोऽयमित्यमनोज्ञस्तद्भावस्तत्ता तया, 'अमणामत्ताए' त्ति न मनसा अम्यते-गम्यते संस्मरणतोऽमनोऽभ्यस्तद्भावस्तत्ता तया, प्राप्तुमवाञ्छितत्वेन, 'अनिच्छियत्ताए' त्ति अनीप्सिततया प्राप्तुमनभिवाञ्छितत्वेन 'अभिज्झियत्ताए' त्ति भिध्या-लोभः सा संजाता यत्र सो भिध्यितो न भिध्यितोऽभिध्यितस्तद्भावसतत्ता तया 'अहत्ताए' त्ति जघन्यतया।

'नो उड्ढत्ताए' त्ति न मुख्यतया 'अहयस्स व' त्ति अपरिभुक्तस्य 'धोयस्स व' ति परिभुज्यापि प्रक्षालितस्य 'तंतुगयस्स व' त्ति तन्त्रात्-तुरीवेमादेरपनीतमात्रस्य, 'बज्झंती' त्यादिना पदत्रयेणेह वस्त्रस्य पुद्गलानां च यथोत्तरं सम्बन्धप्रकर्ष उक्तः, 'भिज्झंति' त्ति प्राक्तनसम्बन्धविशेषत्यागात् 'विद्धंसंति' त्ति ततोऽधः पापात् 'परिविद्धंसंति' त्ति निशेषतया पातात् 'जल्लियस्स' त्ति 'यल्लिस्य' यानलगनधर्मोपेतमलयुक्तस्य 'पंकियस्स' त्ति आर्द्रमलोपेतस्य 'मइल्लियस्स' त्ति कठिनमलयुक्तस्य 'रइल्लियस्स' त्ति रजोयुक्तस्य 'परिकम्मिज्झमाणस्स' त्ति क्रियमाणशोधनार्थोपक्रमस्य॥

**मू. (२८१)** *वत्थस्स णं भंते! पोग्गलोवचए किं पयोगसा वीससा?, गोयमा! पओगसावि वीससावि। जहा णं भंते! वत्थस्स णं पोग्गलोवचए पओगसावि वीससावि तहा णं जीवाणं कम्मोवचए किं पओगसा वीससा?, गोयमा! पओगसा नो वीससा।*

*से केणड्ढेणं०?, गोयमा! जीवाणं तिविहे पओगे पन्नत्ते, तंजहा-मणप्पओगे वइ० का० इच्चेतेणं तिविहेणं पओगेणं जीवाणं कम्मोवचए पओगसा नो वीससा, एवं सव्वेसिं पंचेंदियाणं तिविहे पओगे भानियव्वे०।*

*पुढविकाइयाणं एगविहेणं पओगेणं एवं जाव वणस्सइकाइयाणं, विगलिंदियाणं दुविहे पओगे पन्नत्ते, तंजहा-वइपओगे य कायप्पओगे य, इच्चेतेणं दुविहेणं पओगेणं कम्मोवचए पओगसा नो वीससा, से एएणट्ठेणं जाव नो वीससा एवं जस्स जो पओगो जाव वेमानियाणं॥*

**वृ.** वस्त्रेत्यादिद्वारे 'पओगसा वीससा य' त्ति छान्दसत्वात्, 'प्रयोगेण' पुरुषव्यापारेण 'विश्रसया' स्वभावेनेति। 'जीवाणं कम्मोवचए पओगसा नो वीसस' त्ति प्रयोगेणैव, अन्यथाऽयोगस्यापि बन्धप्रसङ्गः॥

**मू. (२८२)** *वत्थस्स णं भंते! पोग्गलोवचए किं सादीए सपज्जवसिए १ सादीए अपज्जवसिते २ अनादी सपज्ज० ३ अणा० अप० ४?, गोयमा! वत्थस्स णं पोग्गलोवचए सादीए सपज्जवसिए नो सादीए अप० नो अणा० स० नो अणा० अप०।*

*जहा णं भंते! वत्थस्स पोग्गलोवचए सादीए सपज्ज० नो सादीए अप० नो अणा० सप० नो अणा० अप० तहा णं जीवाणं कम्मोवचए पुच्छा, गोयमा! अत्थेगतियाणं जीवाणं कम्मोवचए सादीए सपज्जवसिए अत्थे० अनादीए सपज्जवसिए अत्थे० अनादीए अपज्जवसिए नो चेव णं जीवाणं कम्मोवचए सादीए अप०।*

*से केण०?, गोयमा! ईरियावहियाबंधयस्स कम्मोवचए सादीए सप० भवसिद्धियस्स कम्मोवचए अनादीए सपज्जवसिए अभवसिद्धियस्स कम्मोवचए अनीदीए अपज्जवसिए, से तेणड्ठेणं गोयमा! एवं वुच्चति अत्थे० जीवाणं कम्मोवचए सादीए नो चेव णं जीवाणं कम्मोवचए*

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

*सादीए अपज्जवसिए, वत्थे णं भंते ! किं सादीए सपज्जवसिए चउभंगो ?, गोयमा ! वत्थे सादीए सपज्जवसिए अवसेसा तिन्नि विपडिसेहेयव्वा ।*

*जहा णं भंते ! वत्थे सादीए सपज्जवसिए नो सादीए अपज्ज० नो अनादीए सप० नो अनादीए अपज्जवसिए तहा णं जीवाणं किं सादीया सपज्जवसिया ? चउभंगो पुच्छा, गोयमा ! अत्थेगतिया सादीया सपज्जवसिया चत्तारिवि भानियव्वा ।*

*से केणट्ठेणं० ?, गोयमा ! नेरतिया तिरिक्खजोनिया मणुस्सा देवा गतिरागतिं पडुच्च सादीया सपज्जवसिया सिद्धा गतिं पडुच्च सादीया अपज्जवसिया, भवसिद्धिया लद्धिं पडुच्च अनादीया सपज्जवसिया अभवसिद्धिया संसारं पडुच्च अनादीया अपज्जवसिया, से तेणट्ठेणं० ॥*

**वृ.** सादिद्वारे 'ईरियावहियबंधयस्से'त्यादि, ईर्यापथो-गमनमार्गस्तत्र भवमैर्यापथिकं, केवलयोगप्रयोगप्रत्ययं कर्मेत्यर्थः तद्बन्धकस्योपशान्तमोहस्य क्षीणमोहस्य सयोगिकेवलिनश्चेत्यर्थः, ऐर्यापथिककर्मणो हि अबद्धपूर्वस्य बन्धनात् सादित्वं, अयोग्यवस्थायां श्रेनिप्रतिपाते वाऽबन्धनात् सपर्यवसितत्वं, 'गतिरागइं पडुच्च'त्ति नारकादिगतौ गमनमाश्रित्य सादयः- आगमनमाश्रित्य सपर्यवसिता इत्यर्थः 'सिद्धा गइं पडुच्च साइया अपज्जवसिय'त्ति, इहाक्षेपपरिहारावेवम्-

॥१॥ ''साईअपज्जवसिया सिद्धा न य नाम तीयकालंमि ।
आसि कयाइवि सुन्ना सिद्धी सिद्धेहिं सिद्धंते ॥

॥२॥ सव्वं साइ सरीरं न य नामादि मय देहसब्भावो ।
कालाणाइत्तणओ जहा व राइंदियाईणं ॥

॥३॥ सव्वो साई सिद्धो न यादिमो विज्जई तहा तं च ।
सिद्धी सिद्धा य सया निद्दिट्ठा रोहपुच्छाए ॥ त्ति

'तं च'त्ति तच्च सिद्धानादित्वमिष्यते, यतः 'सिद्धी सिद्धा ये'त्यादीति । 'भवसिद्धिया लद्धि'मित्यादि, भवसिद्धिकानां भव्यत्वलब्धि सिद्धत्वेऽपैतीतिकृत्वाऽनादि सपर्यवसिता चेति

**मू.** *(२८३) कति णं भंते ! कम्मप्पगडीओ पन्नत्ताओ ?, गोयमा ! अट्ठ कम्मप्पगडीओ पन्नत्ता, तंजहा-नाणावरनिज्जं दरिसणावरनिज्जं जाव अंतराइयं ।*

*नाणावरनिज्जस्स णं भंते ! कम्मस्स केवतियं कालं बंधठिती पन्नत्ता ?, गोयमा ! जह० अंतोमुहुत्तं उक्को० तीसं सागरोवमकोडाकोडीओ तिन्नि य वाससहस्साइं अबाहा, अबाहूनिया कम्मट्ठिती कम्मनिसेओ, एवं दरिसणावरनिज्जंपि, वेदनिज्जं जह० दो समया उक्को० जहा नाणावरनिज्जं, मोहनिज्जं जह० अंतोमुहुत्तं उक्को० सत्तरि सागरोवमकोडाकोडीओ ।*

*सत्त य वाससहस्साणि अबाधा, अबाहूनिया कम्मठिई कम्मनिसेगो, आउगं जहन्नेणं अंतोमुहुत्तं उक्को० तेत्तीसं सागरोवमानि पुव्वकोडितिभागमब्भहियानि, (पुव्वोकोडितिभागो अबाहा, अबाहूनिया) कम्मट्ठिती कम्मनिसेओ, नामगोयाणं जह० अट्ठ मुहुत्ता उक्को० वीसं सागरोवमकोडाकोडीओ दोन्नि य वाससहस्सानि अबाहा ।*

*अबाहूनिया कम्मट्ठिती कम्मनिसेओ, अंतरातियं जहा नाणावरनिज्जं ॥*

**वृ.** कर्मस्थितिद्वारे 'तिन्नि य वाससहस्साइं अबाहा, अबाहाऊनिया कम्मठिई कम्मनिसेगो'त्ति 'बाध-लोडने' बाधत इति बाधा-कर्मण उदयः न बाधा अबाधा-कर्मणो बन्धस्योदय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्य चान्तरं अबाधया-उक्तलक्षणया ऊनिका अबाधोनिका कर्म्मस्थिति कर्मावस्थानकाल उक्त-लक्षणः कर्म्मनिषेको भवति, तत्र कर्मनिषेको नाम कर्मदलिकस्यानुभवनार्थं रचनाविशेषः, तत्र च प्रथमसमये बहुकं निषिञ्चति द्वितीयसमये विशेषहीनं तृतीयसमये विशेषहीनमेवं यावदुत्कृष्टस्थितिकं कर्मदलिकं तावद्विशेषहीनं निषिञ्चति, तथा चोक्तम्–

॥१॥ "मोत्तूण सगमबाहं पढमाइ ठिईइ बहुतरं दव्वं।
सेसे विसेसहीणं जा उक्कोसंति सव्वासिं॥

इदमुक्तं भवति-बद्धमपि ज्ञानावरणं कर्म त्रीनि वर्षसहस्राणि यावदवेद्यमानमास्ते, ततस्तदूनोऽनुभवनकालस्तस्य, स च वर्षसहस्रत्रयन्यूनास्त्रिंशत्सागरोपमकोटीकोटीमान इति। अन्ये त्वाहुः-अबाधाकालो वर्षसहत्रयमानो, बाधाकालश्च सागरोपमकोटीकोटीत्रिंशल्लक्षणः, तद्द्वितयमपि च कर्मस्थितिकालः, स चाबाधाकालवर्तिजतः कर्मनिषेककालो भवति, एवमन्य-कर्मस्वप्यबाधाकालो व्याख्येयो, नवरमायुषि त्रयशिंत्सागरोपमानि निषेकः, पूर्वकोटीत्रिभाग-श्चाबाधाकाल इति।

'वेयणिज्जं जहन्नेणं दो समय'त्ति केवलयोगप्रत्ययबन्धापेक्षया वेदनीयं द्विसमयस्थितिकं भवति, एकत्र बध्यते द्वितीये वेद्यते, यच्चोच्यते 'वेयणियस्स जहन्ना बारस नामगोयाण अट्ठ(उ)-मुहुत्त'त्ति तत्सकषायस्थितिबन्धमाश्रित्येति वेदितव्यमिति॥

**मू. (२८४)** *नाणावरणिज्जं णं भंते! कम्मं किं इत्थी बंधइ पुरिसो बंधइ नपुंसओ बंधइ? नोइत्थी नोपुरिसो नोनपुंसओ बंधइ?, गोयमा! इत्थीवि बंधइ पुरिसोवि बंधइ नपुंसओवि बंधइ नोइत्थी नोपुरिसो नोनपुंसओ सिय बंधइ सिय नो बंधइ एवं आउगवज्जाओ सत्त कम्मप्पगडीओ आउगे णं भंते! कम्मं कं इत्थी बंधइ पुरिसो बंधइ नपुंसओ बंधइ० ? पुच्छा गोयमा! इत्थी सिय बंधइ सिय नो बंधइ, एवं तिन्निवि भानियव्वा, नोइत्थी नोपुरिसो नोनपुंसओ न बंधइ।*

*नाणावरणिज्जं णं भंते! कम्मं किं संजए बंधइ असंजए० एवं संजयासंजए बंधइ नोसंजयनोअसंजएनोसंजयासंजए बंधति? गोयमा! संजए सिय बंधति सिय नो बंधति असंजए बंधइ संजयासंजएवि बंधइ नोसंजएनोअसंजएनोसंजयासंजए न बंधति, एवं आउगवज्जाओ सत्तवि, आउगे हेट्ठिल्ला तिन्नि भयणाए उवरिल्ले न बंधइ।*

*नाणावरणिज्जं णं भंते! कम्मं किं सम्मदिट्ठी बंधइ सम्मामिच्छदिट्ठी बंधइ, एवं आउगवज्जाओ सत्तवि, आऊए हेट्ठिल्ला दो भयणाए सम्मामिच्छदिट्ठी न बंधइ।*

*नाणावरणिज्जं किं सन्नी बंधइ असन्नी बंधइ नोसन्नीनोअसन्नी बंधइ?, गोयमा! सन्नी सिय बंधइ सिय नो बंधइ असन्नी बंधइ नोसन्नीनोअसन्नी न बंधइ, एवं वेदनिज्जाउगवज्जाओ छ कम्मप्पगडीओ, वेदनिज्जं हेट्ठिल्ला दो बंधंति, उवरिल्ले भयणाए, आउगं हेट्ठिल्ला दो भयणाए, उवरिल्लो न बंधइ।*

*नाणावरणिज्जं कम्मं किं भवसिद्धीए बंधइ अभवसिद्धीए बंधइ नोभवसिद्धीएनोअभव-सिद्धीए बंधति?, गोयमा! भवसिद्धीए भयणाए अभवसिद्धीए बंधति नोभवसिद्धीएनोअ-भवसिद्धीए न बंधइ, एवं आउगवज्जाओ सत्तवि, आउगं हेट्ठिल्ला तिन्नि भयणाए उवरिल्ले न बंधइ, एवं वेदणिज्जवज्जाओ सत्तवि, वेदणिज्जं हेट्ठिल्ला तिन्नि बंधंति केवलदंसणी भयणाए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नाणावरणिज्जं कम्मं किं पज्जत्तओ बंधइ अपज्जत्तओ बंधइ नोपज्जत्तएनोअपज्जत्तए बंधइ गोयमा ! पज्जत्तए भयणाए, अपज्जत्तए बंधइ, नोपज्जत्तएनोअपज्जत्तए न बंधइ, एवं आउगवज्जाओ, आउगं हेट्ठिल्ला दो भयणाए उवरिल्ले ण बंधइ ।*

*नाणावरणिज्जं किं भासए बंधइ अभासए० ?, गोयमा ! दोवि भयणाए, एवं वेदनियवज्जाओ सत्त, वेदनिज्जं भासए बंधइ अभासए भयणाए ।*

*नाणावरणिज्जं किं परित्ते बंधइ अपरित्ते बंधइ नोपरित्तेनोअपरित्ते बंधइ ?, गोयमा ! परित्ते भयणाए अपरित्ते बंधइ नोपरित्तेनोअपरित्ते न बंधइ, एवं आउगवज्जाओ सत्त कम्मप्पगडीओ, आउए परित्तोवि अपरित्तोवि भयणाए, नोपरित्तोनोअपरित्तो न बंधइ ।*

*नाणावरणिज्जं कम्मं किं आभिनिबोहियनाणी बंधइ सुयनाणी ओहिनाणी मणपज्जवनाणी केवलनाणी बं० ?, गोयमा ! हेट्ठिल्ला चत्तारि भयणाए केवलनाणी न बंधइ, एवं वेदनिज्जवज्जाओ सत्तवि, वेदणिज्जं हेट्ठिल्ला चत्तारि बंधंति केवलनाणी भयणाए । नाणावरनिज्जं किं मतिअन्नाणी बंधइ सुय० विभंग० ?, गोयमा ! (सव्वेवि) आउगवज्जाओ सत्तवि बंधंति, आउगं भयणाए ।*

*नाणावरणिज्जं किं मणजोगी बंधइ वय० काय० अजोगी बंधइ ?, गोयमा ! हेट्ठिल्ला तिन्नि भयणाए अजोगी न बंधइ, एवं वेदनिज्जवज्जाओ, वेदनिज्जं हेट्ठिल्ला बंधंति अजोगी न बंधइ*

*नाणावरणिज्जं किं सागारोवउत्ते बंधइ अनागारोवउत्ते बंधइ ?, गोयमा ! अट्ठसुवि भयणाए*

*नाणावरणिज्जं किं आहाए बंधइ अनाहारए बंधइ ?, गोयमा ! दोवि भयणाए, एवं वेदनिज्जाआउगवज्जाणं छण्हं, वेदनिज्जंआहारए बंधति अनाहारए भयणाए, आउए आहारए भयणाए, अनाहारए न बंधति ।*

*नाणावरणिज्जं किं सुहुमे बंधइ बायरे बंधइ नोसुहुमेनोवादरे बंधइ ?, गोयमा ! सुहुमे बंधइ बायरे भयणा नोसुहुमेनोबादरे न बंधइ, एवं आउगवज्जाओ सत्तवि, आउए सुहुमे बायरे भयणाए नोसुहुमेनोबायरे न बंधइ ॥*

*नाणावरणिज्जं किं चरिमे अचरिमे बं० ?, गोयमा ! अट्ठवि भयणाए ॥*

**वृ.** स्त्रीद्वारे 'नाणावरणिज्जं णं भंते ! कम्मं किं इत्थी बंधइ' इत्यादि प्रश्नः, तत्र न स्त्री न पुरुषो न नपुंसको वेदोदयरहितः, स चानिवृत्तिवादरसम्परायप्रभृतिगुणस्थानकवर्त्ती भवति, तत्र चानिवृत्तिवादरसम्परायसूक्ष्मसम्परायौ ज्ञानावरणीयस्य बन्धकौ सप्तविधषड्विधबन्धकत्वात्, उपशान्तमोहादिस्त्वबन्धक एकविधबन्धकत्वात् अत उक्तं स्याद्बध्नाति स्यान्न बन्धातीति ॥

'आउगे णं भंते' इत्यादिप्रश्नः, तत्र स्त्र्यादित्रयमायुः स्याद्बध्नाति स्यान्न बन्धाति, बन्धकाले बध्नाति अबन्धकाले तु न बध्नाति, आयुषः सकृतेवैकत्र भवे बन्धात्, निवृत्तयादिवेदस्तु न बन्धाति, निवृत्तिवादरसम्परायादिगुणस्थानकेष्वायुर्बन्धस्य व्यवच्छिन्नत्वात् ।

संयतद्वारे 'नाणावरणिज्ज' मित्यादि, 'संयतः' आद्यसंयमचतुष्टयवृत्तिर्ज्ञानावरणं बध्नाति, यथाख्यातसंयतस्तूपशान्तमोहादिर्न बध्नाति अत उक्तं 'संजए सिये' त्यादि, असंयतो मिथ्याद्दष्टयादि संयतासंयतस्तु देशविरतस्तौ च बन्धीतः, निषिद्धसंयमादिभावस्तु सिद्धः, स च न बध्नाति, हेत्वभावादित्यर्थः, 'आउगे हेट्ठिल्ला तिन्नि भयणाए' त्ति संयतोऽसंयतः संयतासंयतश्चायुर्बन्धकाले बध्नाति अन्यदा तु नेति भजनयेत्युक्तं, 'उवरिल्ले न बंधइ' त्ति संयतादिषूपरितनः सिद्धः स



Jain Education International For Private & Personal Use Only www.jainelibrary.org

चायुर्न बध्नाति।

सम्यग्दष्टिद्वारे 'सम्मदिट्ठी सिय'त्ति सम्यग्दष्टिः वीतरागस्तदितरश्च स्यात्तत्र वीतरागो ज्ञानावरणं न बन्धाति एकविधबन्धकत्वात् इतरश्च बध्नातिति स्यादित्युक्तं, मिथ्याद्दष्टिमिश्रदष्टी तु बन्धीत एवेति, 'आउए हेट्ठिल्ला दो भयणाए'त्ति सम्यग्दष्टिमिथ्यादष्टी आयुः स्याद्बध्नीत इत्यर्थः, तथाहि-सम्यग्दष्टिरपूर्वकरणादिरायुर्न बध्नाति इतरस्तु आयुर्बन्धकाले तद्बध्नाति अन्यदा तु न बध्नाति, एवं मिथ्याद्दष्टिरपि, मिश्रदष्टिस्त्वायुर्न बध्नात्येव तद्बन्धाध्यवसायस्थानाभावादिति

सञ्ज्ञिद्वारे 'सन्नी सिय बंधइ'त्ति 'सञ्ज्ञी' मनः- पर्याप्तियुक्तः, स च यदि वीतरागस्तदा ज्ञानावरणं न बध्नाति यदि पुनरितरस्तदा बध्नाति ततः स्यादित्युक्तम्, 'असन्नी बंधइ'त्ति मनःपर्याप्तिविकलो बध्नात्येव 'नोसन्नीनोअसन्नि'त्ति केवली सिद्धश्च न बध्नाति, हेत्वभावात्, 'वेयनिज्जं हेट्ठिल्ला दो वंधंति'त्ति सञ्ज्ञी च वेदनीयं बध्नीतः, अयोगिसिद्धवर्जानां तद्बन्धकत्वात्, 'उवरिल्ले भयणाए'त्ति उपरितनो नोसञ्ज्ञीनोअसञ्ज्ञी, स च सयोगायोगकेवली सिद्धश्च, तत्र यदि सयोगिकेवी तदा वेदनीयं बध्नाति यदि पुनरयोगिकेवली सिद्धो वा तदा न बध्नाति अतो भजनयेत्युक्तम्, 'आउगं हेट्ठिल्ला दो भयणाए'त्ति सञ्ज्ञी असञ्ज्ञी वायुः स्याद्बध्नीतः, अन्तर्मुहूर्त्तमेव तद्बन्धनात्, 'उवरिल्ले न बंधइ'त्ति केवली सिद्धश्चायुर्न वध्नातीति।

भवसिद्धिकद्वारे 'भवसिद्धिए भयणाए'त्ति भवसिद्धिको यो वीतरागः स न बध्नाति ज्ञानावरणं तदन्यस्तु भव्यो वध्नातीति भजनयेत्युक्तं 'नो भवसिद्धिएनो अभवसिद्धिए'त्ति सिद्धः, स च न बध्नाति, ज्ञानावरणं तदन्यस्तु भव्यो बध्नातीति भजनयेत्युक्तं 'नो भवसिद्धिएनो-अभवसिद्धिए'त्ति सिद्धः, स च न वध्नाति, 'आउयं दो हेट्ठिल्ला भयणाए'त्ति भव्योऽभव्यश्चायु-र्बन्धकाले बध्नीतोऽन्यदा तु न बध्नीत इत्यतो भजनयेत्युक्तम्, 'उवरिल्ले न बंधइ'त्ति सिद्धो न बध्नातीत्यर्थः।

दर्शनद्वारे 'हेट्ठिल्ला तिन्नि भयणाए'त्ति चक्षुरचक्षुरवधिदर्शनिनो यदि छद्मस्थवीतरागास्तदा न ज्ञानावरणं वध्नन्ति, वेदनीयस्यैव बन्धकत्वात्तेषां, सरागास्तु बध्नन्ति अतो भजनयेत्युक्तम्, 'उवरिल्ले न बंधइ'त्ति केवलदर्शनी भवस्थः सिद्धो वा न बन्धाति, हेत्वभावादित्यर्थः, 'वेयनिज्जं हेट्ठिल्ला तिन्नि बंधंति'त्ति आद्यास्त्रयो दर्शनिनश्छद्मस्थवीतरागाः सरागाश्च वेदनीयं बध्नन्त्येव, 'केवलदंसणी भयणाए'त्ति केवलदर्शनी सयोगिकेवली बध्नाति अयोगिकेवली सिद्धश्च वेदनीयं न बध्नातीति भजनयेत्युक्तम्।

पर्याप्तकद्वारे 'पज्जत्तए भयणाए'त्ति पर्याप्तको वीतरागः सरागश्च स्यात्तत्र वीतरागो ज्ञानावरणं न बध्नाति सरागस्तु बध्नाति ततो भजनयेत्युक्तं, 'नोपज्जत्तएनोअपज्जत्तए न बंधइ'त्ति सिद्धो न बध्नातीत्यर्थः, 'आउगं हेट्ठिल्ला दो भयणाए'त्ति पर्याप्तकापर्याप्तकावायुस्तद्बन्धकाले बध्नीतोऽन्यदानेति भजना, 'उवरिल्ले ने'त्ति सिद्धो न बध्नातीत्यर्थः।

भाषकद्वारे 'दोवि भयणाए'त्ति भाषको-भाषालब्धिमांस्तदन्यस्त्वभाषकः, तत्र भाषको वीतरागो ज्ञानावरणीयं न बध्नाति सरागस्तु बध्नाति अभाषकस्त्वयोगी सिद्धश्च न वध्नाति पृथिव्यादयो विग्रहगत्यापन्नाश्च बध्नन्तीति 'दोवि भयणाए'इत्युक्तं, 'वेयनिज्जं भासए बंधइ'त्ति सयोग्यवसायनस्यापि भाषकस्य सद्वेदनीयबन्धकत्वात् 'अभासए भयणाए'त्ति अभाषकस्त्वयोगी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धश्च न बध्नाति पृथिव्यादिकस्तु बध्नातीति, भजना।

परीत्तद्वारे 'परीत्ते भयणाए'त्ति 'परीत्तः' प्रत्येकशरीरोऽल्पसंसारो वा स च वीतरागोऽपि स्यात् न चासौ ज्ञानावरणीयं बध्नाति सरागपरीत्तस्तु बध्नातीति भजना, 'अपरित्ते बंधइ'त्ति 'अपरीत्तः' साधारणकायोऽनन्तसंसारो वा, स च बध्नाति, नोपरित्तेनोअपरित्ते न बंधइत्ति सिद्धो न बध्नातीत्यर्थः 'आउयं परीत्तोवि अपरित्तोवि भयणाए'त्ति प्रत्येकशरीरादि आयुर्वन्धकाल एवायुर्बन्घातीति न तु सर्वदा ततो भजना, सिद्धस्तु न बध्नात्येवेत्यत आह-'नो परित्ते'इत्यादि।

ज्ञानद्वारे 'हिट्ठिल्ला चत्तारि भयणाए'त्ति आभिनिबोधिकज्ञानिप्रभृतयश्चत्वारो ज्ञानिनो ज्ञानावरणं वीतरागावस्थायां न बध्नन्तीति सरागावस्थायां तु बध्नन्तीति भजना, 'वेयनिज्जं हेट्ठिल्ला चत्तारिवि बंधंति' त्ति वीतरागाणामपि छद्मस्थानां वेदनीयस्य बन्धकत्वात्, 'केवलनाणी भयणाए'त्ति सयोगिकेवलिनां वेदनीयस्य बन्धनादयोगिनां सिद्धानां चाबन्धनाद्भजनेति।

योगद्वारे 'हेट्ठिल्ला तिन्नि भयणाए'त्ति मनोवचनकाययोगिनो ये उपशान्तमोहक्षीणमोहस-योगिकेवलिनस्ते ज्ञानावरणं न बध्नन्ति तदन्ये तु बघनन्तीति भजना 'अजोगी न बंधइ'त्ति अयोगी केवली सिद्धश्च न बध्नातीत्यर्थः 'वेयणिज्जं हेट्ठिल्ला बंधंति'त्ति मनोयोग्यादयो बध्नन्ति सयोगानां वेदनीयस्य बन्धकत्वात्, 'अयोगी न बंधइ'त्ति अयोगिनः सर्वकर्म्मणामबन्धकत्वादिति

उपयोगद्वारे 'अट्ठसुवि भयणाए'त्त साकारनाकारो उपयोगौ सयोगानामयोगानां च स्यातां तत्रोपयोगद्वयेऽपि सयोगा ज्ञानावरणादि प्रकृतीर्यथायोगं बध्नन्ति अयोगास्तु नेति भजनेति

आहारकद्वारे 'दोवि भयणाए'त्ति आहारको वीतरागोऽपि भवति न चासौ ज्ञानावरणं बध्नाति सरागस्तु बध्नातीति आहारको भजनया बध्नाति, तथाऽनाहारकः केवली विग्रहगत्यापन्नश्च स्यात्तत्र केवली न बध्नाति इतरस्तु बध्नातीति अनाहारकोऽपि भजनयेति। 'वेयणिज्जं आहारए बंधइ'त्ति अयोगिवर्ज्जानां सर्वेषां वेदनीयस्य बन्धकत्वात्।

'अनाहारए भयणाए'त्ति अनाहारको विग्रहगत्यापन्नः समुद्घातगतकेवली च बध्नाति अयोगि सिद्धश्च न बध्नातीति भजना, 'आउए आहारए भयणाए'त्ति आयुर्बन्धकाल एवायुषो बन्धनात् अन्यदा त्वबन्धकत्वाद्भजनेति 'अनाहारए न बंधति'त्ति विग्रहगतिगतानामप्यायुष्क-स्याबन्धकत्वादिति॥

सूक्ष्मद्वारे 'बायरे भयणाए'त्ति वीतरागबादराणां ज्ञानावरणस्याबन्धकत्वात् सरागबादराणां च बन्धकत्वाद्भजनेति, सिद्धस्य पुनरबन्धकत्वादाह-'नो सुहुमे' इत्यादि, 'आउए सुहुमे बायरे भयणाए'त्ति बन्धकाले बन्धनादन्यदा त्वबन्धनाद् भजनेति।

चरमद्वारे 'अट्ठवि भयणाए'त्ति, इह यस्य चरमो भवो भविष्यति स चरमाः, यस्य तु नासौ भविष्यति सोऽचरमः, सिद्धश्चाचरमः, चरमभवाभावात्, तत्र चरमो यथायोगमष्टापि बध्नाति अयोगित्वे तु नेत्येवं भजना, अचरमस्तु संसारी अष्टापि बध्नाति सिद्धस्तु नेत्येवमत्रापि भजनेति॥

***मू. (२८५)*** *एएसि णं भंते! जीवाणं इत्थिवेदगाणं पुरिसवेदगाणं नपुंसगवेदगाणं अवेयगाण य कयरे २ अप्पा वा ४ ?, गोयमा! सव्वत्थोवा जीवा पुरिसवेदगा इत्थिवेदगा संखेज्जगुणा अवेदगा अनंतगुणा नपुंसगवेदगा अनंतगुणा।*

*एएसिं सव्वेसिं पदाणं अप्पबहुगाइं उच्चारेयव्वाइं जाव सव्वत्थोवा जीवा अचरिमा चरिमा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनंतगुणा। सेवं भंते! सेवं भंते! त्ति॥*

**वृ.** अथाल्पबहुत्त्वद्वारं, तत्र 'इत्थीवेयगा संखेज्जगुणे'ति यतो देवनरतिर्यक्पुरुषेभ्यः तत्स्त्रियः क्रमेण द्वात्रिंशतसप्तविंशतित्रिगुणा द्वात्रिंशत्सप्तविंशतित्रिरूपाधिकाश्च भवन्तीति, 'अवेयगा अनंतगुण'त्ति अनिवृत्तिवादरसम्परायादयः सिद्धाश्चावेदा अतस्तेषामनन्तत्वात् स्त्रीवेद-भ्योऽनन्तगुणा भवन्ति, 'नपुंसगवेयगा अनंतगुण'त्ति अनन्तकायिकानां सिद्धेभ्योऽनंतगुणानामिह गणनादिति।

'एएसिं सव्वेसि'मित्यादि, 'एतेषां' पूर्वोक्तानां संयतादीनां चरमान्तानां चतुर्दशानां द्वाराणां तद्गतभेदापेक्षयाऽल्पबहुत्वमुच्चारयितव्यं, तद्यथा-'एएसि णं भंते १ संजयाणं असंजयाणं संजयासंजयाणं नोसंजयनोअसंजयनोसंजायसंजयाणं कयेर कयरेहिंतो अप्पा वा बहुया वा ४ गोयमा! सव्वत्थोवा संजया संजयासंजया असंखेज्जगुणा नोसंजयनोअसंजयनोसंजयासंजया अनंतगुणा असंजया अनंतगुणा' इत्यादि प्रज्ञापनानुसारेण वाच्यं यावच्चरमाद्यल्पबहुत्वं, एतदेवाह-'जाव सव्वत्थोवा जीवा अचरिमे'त्यादि, अत्राचरमा अभव्याः चरमाश्च ये भव्याश्चरमं भवं प्राप्स्यन्ति-सेत्स्यन्तीत्यर्थः।

ते चाचरमेभ्योऽनन्तगुणा-, यस्मादभव्येभ्यः सिद्धा अनन्तगुणा भनिताः, यावन्तश्च सिद्धास्तावन्त एव चरमाः, यस्माद्यावन्तः सिद्धा अतीताद्धायां तावन्त एव सेत्स्यन्त्यनाग-ताद्धायामिति॥

शतकं-६ उद्देशकः-३ समाप्तः

## —: शतकं-६ उद्देशकः-४ :—

**वृ.** अनन्तरोद्देशके जीवो निरूपितोऽथ चतुर्थोद्देशकेऽपि तमेव भङ्ग्यन्तरेण निरूपयन्नाह-

**मू. (२८६)** *जीवे णं भंते! कालाएसेणं किं सपदेसे अपदेसे?, गोयमा! सपदेसे। नेरतिए णं भंते! कालादेसेणं किं सपदेसे अपदेसे?, गोयमा! सिय सपदेसे सिय अपदेसे, एवं जाव सिद्धे। जीवा णं भंते! कालादेसेणं किं सपदेसा अपदेसा?, गोयमा! नियमा सपदेसा। नेरइया णं भंते! कालादेसेणं किं सपदेसा अपदेसा?, गोयमा! सव्वेवि ताव होज्जा सपदेसा १ अहवा सपएसा य अपदेसे य २ अहवा सपदेसा य अपदेसा य ३, एवं जाव थनियकुमारा।*

*पुढविकाइया णं भंते! किं सपदेसा अपदेसा?, गोयमा! सपदेसा वि अपदेसावि एवं जाव वणप्फइकाइया, सेसा जहा नेरइया तहा जाव सिद्धा।*

*आहारगाणं जीवेगेंदियवज्जो तियभंगो, अनाहारगाणं जीवेगिंदियवज्जा छब्भंगा एवं भानियव्वा-सपदेसा वा १ अपएसा वा २ अहगा सपदेसे य अप्पदेसे य ३ अहवा सपदेसे य अपदेसा य ४ अहवा सपदेसा य अपदेसे य ५ अहवा सपदेसा य अपदेसा य ६, सिद्धेहिं तियभंगो, भवसिद्धिया अभवसिद्धिया जहा ओहिया, नो भवसिद्धियनोअभवसिद्धिया जीवसिद्धेहिं तियभंगो, सन्नीहिं जीवादिओ तियभंगो, असन्नीहिं एगिंदियवज्जो तिय भंगो, नेरइयदेवमणुएहिं छब्भंगो, नोसन्निनोअसन्निजीवमणुयसिद्धेहिं तिय भंगो।*

*सलेसा जहा ओहिया, कण्हलेस्सानीललेस्सा काउलेस्सा जहा आहारओ नवरं जस्स अत्थि एयाओ, तेउलेस्साए जीवादिओ तियभंगो, नवरं पुढविकाइएसु आउवणप्फतीसु छब्भंगा,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पम्हलेससुक्कलेस्साए जीवादिओहिओ तियभंगो, अलेसीहिं जीवसिद्धेहिं तियभंगो मणुस्से छभंगा, सम्मद्दिट्ठिहिं जीवाइतियभंगो, विगलिंदिएसु छब्भंगा, मिच्छदिट्ठिहिं एगिंदियवज्ञो तियभंगो सम्मामिच्छदिट्ठिहिं छब्भंगा, संजएहिं जीवाइओ तियभंगो, असंजएहिं एगिंदियवज्ञो तियभंगो, संजयासंजएहिं तियभंगो जीवादिओ।*

*नोसंजयनोअसंजयनोसंजयासंजय जीवसिद्धेहिं तियभंगो, सकसाईहिं जीवादिओ तियभंगो, एगिंदिएसु अभंगकं, कोहकसाईहिं जीवएगिंदियवज्ञो तियभंगो, देवेहिं छब्भंगा, मानकसाईमायाकसाई जीवेगिंदियवज्ञो तियभंगो।*

*नेरतियदेवेहिं छब्भंगा, लोभकसाईहिं जीवेगिंदियवज्ञो तियभंगो, नेरितएसु छब्भंगा, अकसाईजीवमणुएहिं सिद्धेहिं तियभंगो, ओहियनाणे आभिनिबोहियनाणे सुयनाणे जीवादिओ तियभंगो विगलिंदिएहिं छब्भंगा।*

*ओहिनाणे मण०केवलनाणे जीवादिओ तियभंगो, ओहिए अन्नाणे मतिअन्नाणे सुयअन्नाणे एगिंदियवज्ञो तियभंगो, विभंगनाणे जीवादिओ तियभंगो।*

*सजोगी जहा ओहिओ मनजोगी वयजोगी कायजोगी जीवादिओ तियभंगो नवरं कायजोगी एगिंदिया तेसु अभंगकं।*

*अजोगी जहा अलेसा, सागारोवउत्ते अनागारोवउत्ते जीवएगिंदियवज्ञो तियभंगो सवेयगा य जहा सकसाई, इत्थिवेयगपुरिसवेयगनपुंसगवेयगेसु जीवादिओ तियभंगो, नवरं नपुंसगवेदे एगिंदिएसु अभंगयं, अवेयगा जहा अकसाई।*

*ससरीरी जहा ओहिओ, ओरालियवेउव्वियसरीराणं जीवएगिंदियवज्ञो तियभंगो, आहारगसरीरे जीवमणुएसु छब्भंगा, तेयगकम्मगाणं जहा ओहिया, असरीरेहिं जीवसिद्धेहिं तियभंगो।*

*आहारपज्ञत्तीए सरीरपज्ञत्तीए इंदियपज्ञतीए आणापाणुपज्ञत्तीए जीवएगिंदियवज्ञो तियभंगो, भासमनपज्ञत्तीए जहा सन्नी, आहारअपज्ञत्तीए जहा अनाहारगा, सरीरअपज्ञत्तीए इंदियअपज्ञत्ती आणापाणअपज्ञत्तीए जीवेगिंदियवज्ञो तियभंगो। नेरइयदेवमणुएहिं छब्भंगा, भासामणअपज्ञत्तीए जीवादिओ तियभंगो, नेरइयदेवमणुएहिं छब्भंगा॥*

**वृ.** 'जीवे ण' मित्यादि, 'कालाएसेणं'ति कालप्रकारेण कालमाश्रित्येत्यर्थः 'सपएसे'त्ति सविभागः 'नियमा सपएसे'त्ति अनादित्वेन जीवस्यानन्तसमयस्थितकत्वात् सप्रदेशता, यो ह्येकसमयस्थिति सोऽप्रदेशः द्वयादिसमयस्थितस्तु सप्रदेशः, इह चानया गाथया भावना कार्या

॥१॥ "जो जस्स पढमसमए वट्टति भावस्स सो उ अपदेसो।
अन्नम्मि वट्टमाणो कालाएसेण सपएसो॥"

नारकस्तु यः प्रथमसमयोत्पन्नः सोऽप्रदेशः द्वयादिसमयोत्पन्नः पुनः सप्रदेशोऽत उक्तं 'सियसप्पएसे सिय अप्पएसे' एष तावदेकत्वेन जीवादि सिद्धावसानः षड्विंशतिदण्डकः कालतः सप्रदेशत्वादिना चिन्तितः, अथायमेव तथैव पृथक्त्वेन चिन्त्यते-'सव्वेवि ताव होज्ञ सपएस'त्ति उपपातविरहकालेऽसङ्ख्यातानां पूर्वोत्पन्नानां भावात्सर्वेऽपि सप्रदेशा भवेयुः, तथा पूर्वोत्पन्नेषु मध्ये यदैकोऽप्यन्यो नारक उत्पद्यते तदा तस्य प्रथमसमयोत्पन्नत्वेनाप्रदेशत्वात् शेषाणां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयादिसमयोत्पन्नत्वेन सप्रदेशत्वाद् उच्यते-'सप्पएसा य अपएसे य'त्ति ।

एवं यदा बहव उत्पद्यमाना भवन्ति ते तदोच्यन्ते 'सपएसा य अप्पएसा य'त्ति, उत्पद्यन्ते चैकदैकादयो नारकाः, यदाह–

॥ १ ॥ "एगो व दो व तिन्नि व संखमसंखा व एगसमएणं ।
उववज्जन्तेवइया उव्वट्टंतावि एमेव ॥"

'पुढविकाइया ण'मित्यादि, एकेन्द्रियाणां पूर्वोत्पन्नानामुत्पद्यमानानां च बहूनां सम्भवात् 'सपएसावि अप्पएसावी'त्युच्यते, 'सेसा जहा नेरइए'त्यादि, यथा नारका अभिलापत्रयेणोक्तास्तथा शेषा द्वीन्द्रियादयः सिद्धावसाना वाच्याः, सर्वेषामेषां विहरसद्भावादेकाद्युत्पत्तेश्चेति । एवमाहारकानाहारकशब्दविशेषितावेतावेकत्वपृथक्त्वदण्डकावध्येयौ ।

अध्ययनक्रमश्चायम्-'आहारए णं भंते ! जीवे कलाएसेणं किं सपएसे २ ?, गोयमा ! सिय सप्पएसे सिय अप्पएसे'इत्यादि स्वधिया वाच्याः, तत्र यदा विग्रहे केवलिसमुद्घातेवाऽनाहारको भूत्वा पुनराहारकत्वं प्रतिपद्यते तदा तत्प्रथमसमयेऽप्रदेशो द्वितीयादिषु तु सप्रदेश इत्यत उच्यते-सिय सप्पएसे सिय अप्पएसे'त्ति, एवमेकत्वे सर्वेष्वपि सादिभावेषु, अनादिभावेषु तु 'नियमा सप्पएसे'त्ति वाच्यं ।

पृथक्त्वदण्डके त्वेवमभिलापो दृश्यः-आहारया णं भंते ! जीवा कालाएसेणं किं सप्पएसा अप्पएसा ?, गोयमा ! सप्पएसावि अप्पएसावि'त्ति तत्र बहूनामाहारकत्वेनावस्थितानां भावात्सप्रदेशत्वं तथा बहूनां विग्रहगतेरनन्तरं प्रथमसमये आहारकत्वसम्भवादप्रदेशत्वमप्याहारकाणां लभ्यत इति सप्रदेशा अपि अप्रदेशा अपीत्युक्तं, एवं पृथिव्यादयोऽप्यध्येयाः, नारकादयः पुनर्विकल्पत्रयेण वाच्याः, तद्यथा ।

'आहारया णं भंते ! नेरइया किं सप्पएसा अप्पएसा ?, गोयमा ! सव्वेऽवि ताव होज्ज सप्पएसा १ अहवा सप्पएसा य अप्पएसे य २ अहवा सप्पएसा य अप्पएसा ये'ति ३, एतदेवाह-आहारगाणं जीवेगिंदियवज्जो तियभंगो' जीवपदमेकेन्द्रियपदपञ्चकं च वर्जयित्वा त्रिकरूपो भङ्गःत्रिकभङ्गो-भङ्गत्रयं वाच्यमित्यर्थः, सिद्धपदं त्विह न वाच्यं, तेषामनाहारकत्वात्, अनाहारकदण्डकद्वयमप्येवमनुसरणीयं, तत्रानाहारको विग्रहगत्यापन्नः समुद्घातगतकेवली अयोगी सिद्धो वा स्यात्, स चानाहारकत्वप्रथमसमयेऽप्रदेशः द्वितीयादिषु तु सप्रदेशस्तेन स्यात् सप्रदेश इत्याद्युच्यते

पृथक्त्वदण्डके विशेषमाह-'अनाहारगा ण'मित्यादि, जीवानेकेन्द्रियांश्च वर्जयन्तीति जीवैकेन्द्रियवर्जा, तान् वर्जयित्वेत्यर्थः, जीवपदे एकेन्द्रियपदे च 'सपएसा य अप्पएसा ये'त्येवंरूप एक एव भङ्गको, बहूनां विग्रहगत्यापन्नानां सप्रदेशानामप्रदेशानां च लाभात्, नारकादीनां द्वीन्द्रियादीनांच स्तोकतराणामुत्पादः, तत्र चैकद्वयादीनामनाहारकाणां भावात् षड्भङ्गिकासम्भवः, तत्र द्वौ बहुवचनान्तौ अन्ये तु चत्वार एकवचनबहुवचनसंयोगात्, केवलैकवचनभङ्गकाविह न स्तः, पृथक्त्वस्याधिकृतत्वादिति ।

'सिद्धेहिं तियभंगो'त्ति सप्रदेशपदस्य बहुवचनान्तस्यैव सम्भवात्, 'भवसिद्धी य अभवसिद्धी य जहा ओहिय'त्ति, अयमर्थःऔधिकदण्डकवदेषां प्रत्येकं दण्डकद्वयं, तत्र च भव्योऽभव्यो वा जीवो नियमात्सप्रदेशः, नारकादिस्तु सप्रदेशोऽप्रदेशो वा, बहवस्तु जीवाः सप्रदेशा एव, नारकाद्यास्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिभङ्गवन्तः, एकेन्द्रियाः पुनः सप्रदेशाश्चाप्रदेशाश्चेत्येकभङ्ग एवेति, सिद्धपदं तु न वाच्यं, सिद्धानां भव्याभव्यविशेषणानुपपत्तेरिति।

तथा 'नोभवसिद्धियनोअभवसिद्धिय'त्ति एतद्विशेषणं जीवादिदण्डकद्वयमध्येयं, तत्र चाभिलापः-'नोभवसिद्धीएनोअभवसिद्धिए णं भंते ! जीवे सप्पएसे अप्पएसे ?' इत्यादि, एवं पृथक्त्वदण्डकोऽपि, केवलमिह जीवपदं सिद्धपदं चेति द्वयमेव, नारकादिपदानां नोभव्यनोअभव्यविशेषणस्यानुपपत्तेरिति, इह च पृथक्त्वदण्डके पूर्वोक्तं भङ्गकत्रयमनुसर्त्तव्यमत एवाह-'जीवसिद्धेहिं तियभंगो'त्ति।

सञ्ज्ञिषु यौ दण्डकौ तयोर्द्वितीयदण्डके जीवादिपदेषु भङ्गत्रयं भवतीत्यत आह-'सन्नीहिं'इत्यादि, तत्र सञ्ज्ञिनो जीवाः कालतः सप्रदेशा भवन्ति चिरोत्पन्नानपेक्ष्य उत्पादविरहानन्तरं चैकस्योत्पत्तौ तत्प्राथम्यो सप्रदेशाश्चाप्रदेशश्चेति स्यात्, बहूनामुत्पत्तिप्राथम्ये तु सप्रदेशाश्चाप्रदेशाश्चेति स्यात्, तदेवं भङ्गकत्रयमिति, एवं सर्वपदेषु, केवलमेतयोर्दण्डकयोरेकेन्द्रियविकलेन्द्रियसिद्धपदानि न वाच्यानि, तेषु सञ्ज्ञिविशेषणस्यासम्भवादिति, 'असन्नीहिं'इत्यादि, अयमर्थः-असञ्ज्ञिषु-असञ्ज्ञिविषये द्वितीयदण्डके पृथिव्यादिपदानि वर्जयित्वा भङ्गकत्रयं प्रागदर्शितमेव वाच्यं, पृथिव्यादिपदेषु हि सप्रदेशाश्चाप्रदेशाश्चेत्येक एव, सदा बहूनामुत्पत्त्या तेषामप्रदेशबहुत्वस्यापि सम्भवात्, नैरयिकादीनां च व्यन्तरान्तानां सञ्ज्ञिनामप्यसञ्ज्ञित्वमसञ्ज्ञिभ्य उत्पादाद्भूतभावतयाऽवसेयं, तथा नैरयिकादिष्वसञ्ज्ञित्वस्य कादाचित्कत्वेनैकत्वबहुत्वसम्भवात्षड् भङ्गा भवन्ति, ते च दर्शिता एव।

एतदेवाह-'नेरइयदेवमणुए' इत्यादि, ज्योतिष्कवैमानिकसिद्धास्तु न वाच्यास्तेषामसञ्ज्ञित्वस्यासम्भवात्, तथा नोसञ्ज्ञिनोअसञ्ज्ञिविशेषणदण्डकयोर्द्वितीयदण्डके जीवमनुजसिद्धपदेषुक्तरूपं भङ्गकत्रयं भवति, तेषु बहूनामवस्थितानां लाभादुत्पद्यमानानां चैकादीनां सम्भवादिति, एतयोश्च दण्डकयोर्जीवमनुजसिद्धपदान्येव भवन्ति, नारकादिपदानां नोसञ्ज्ञीनोअसञ्ज्ञीतिविशेषणस्याघटनादिति, सलेश्यदण्डकद्वये औघिकदण्डकवज्जीवनारकादयो वाच्याः, सलेश्यतायां जीवत्ववदनादित्वेन विशेषानुत्पादकत्वात् केवलं सिद्धपदं नाधीयते सिद्धानामलेश्यत्वादिति।

कृष्णलेश्या नीललेश्याः कापोतलेश्याश्च जीवनारकादयः प्रत्येकं दण्डकद्वयेनाहारकजीवादिवदुपयुज्य वाच्याः, केवलं यस्य जीवनारकादेरेताः सन्ति स एव वाच्यः, एतदेवाह-'कण्हलेसे'त्यादि, एताश्च ज्योतिष्कवैमानिकानां न भवन्ति सिद्धानां तु सर्वा न भवन्तीति तेजोलेश्याद्वितीयदण्डके जीवादिपदेषु त एव त्रयो भङ्गाः पृथिव्यब्वनस्पतिषु पुनः षड् भङ्गाः यत एतेषु तेजोलेश्या एकादयो देवाः पूर्वोत्पन्ना उत्पद्यमानाश्च लभ्यन्त इति सप्रदेशानामप्रदेशानां चैकत्वबहुत्वसम्भव इति, एतदेवाह-'तेउलेसाए'इत्यादि, इह नारकतेजोवायुविकलेन्द्रियसिद्धपदानि न वाच्यानि, तेजोलेश्याया अभावादिति, पद्मलेश्याशुक्ललेश्ययोर्द्वितीयदण्डके जीवादिषु पदेषु त एव त्रयो भङ्गकास्तदेवाह 'पम्हलेसे'त्यादि, इह च पञ्चेन्द्रियतिर्यग्मनुष्यवैमानिकपदान्येव वाच्यानि, अन्येष्वनयोरभावादिति, अलेश्यदण्डकयोर्जीवमनुष्यसिद्धपदान्येवोच्यन्ते, अन्येषामलेश्यत्वस्यासम्भवात्, तत्र च जीवसिद्धयोर्भङ्गकत्रयं तदेव, मनुष्येषु तु षड् भङ्गाः, अलेश्यतां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्नानां प्रतिपद्यमानानां चैकादीनां मनुष्याणां सम्भवेन सप्रदेशत्वेऽप्रदेशत्वे चैकत्वबहुत्व-सम्भवादिति, इदमेवाह-'अलेसीहिं'इत्यादि।

सम्यग्दष्टिदण्डकयोः सम्यग्दर्शनप्रतिपत्तिप्रथमसमयेऽप्रदेशत्वं द्वितियादिषु तु सप्रदेशत्वं, तत्र द्वितीयदण्डके जीवादिपदेषु त्रयो भङ्गाःतथैव, विकलेन्द्रियेषु तु षड् यतस्तेषु सासादनसम्यग्दष्टय एकादयः पूर्वोत्पन्ना उत्पद्यमानाश्च लभ्यन्तेऽतः सप्रदेशत्वाप्रदेशत्वयोरेकत्वबहुत्वसम्भव इति।

एतदेवाह-'सम्मदिट्ठीही'त्यादि, इहैकेन्द्रियपदानि वाच्यानि, तेषु सम्यग्दर्शनाभावादिति, 'मिच्छद्दिट्ठीहिं'इत्यादि, मिथ्यादष्टिद्वितीयदण्डके जीवादिपदेषु तु त्रयो भङ्गाः-मिथ्यात्वं प्रतिपन्ना बहवः सम्यक्त्वभ्रंशे तत्प्रतिपद्यमानाश्चैकादयः सम्भवन्तीतिकृत्वा, एकेन्द्रियपदेषु पुनः सप्रदेशाश्चाप्रदेशाश्चेत्येक एव, तेष्ववस्थितानामुत्पद्यमानानां च बहूनामेव भावादिति, इह च सिद्धा न वाच्याः, तेषां मिथ्यात्वाभावादिति, सम्यग्मिथ्यादष्टिबहुत्वदण्डके 'सम्मामिच्छद्दिट्ठीहिं छब्भंगा' अयमर्थः-सम्यग्मिथ्यादष्टित्वं प्रतिपन्नकाः प्रतिपद्यमानाश्चैकादयोऽपि लभ्यन्त इत्यतस्तेषु षड् भङ्गा भवन्तीति, इह चैकेन्द्रियविकलेन्द्रियसिद्धपदानि न वाच्यान्यसम्भवादिति।

'संजएहिं'इत्यादि, 'संयतेषु' संयतशब्दविशेषितेषु जीवादिपदेषु त्रिकभङ्गः, संयमं प्रतिपन्नानां बहूनां प्रतिपद्यमानानां चैकादीनां भावात्, इह च जीवपदमनुष्यपदे एव वाच्ये, अन्यत्र संयतत्वाभावादिति, असंयतद्वितीयदण्डके-'असंजएही'त्यादि, इहासंयतत्वं प्रतिपन्नानां बहूनां संयतत्वादिप्रतिपातेन तत्प्रतिपद्यमानानां चैकादीनां भावाद्भङ्गकत्रयं, एकेन्द्रियाणां तु पूर्वोक्तयुक्त्यासप्रदेशाश्चाप्रदेशाश्चैक एव भङ्गः इति, इह सिद्धपदं नाध्येयमसम्भवादिति। संयतासंयतबहुत्वदण्डके 'संजयासंजएहिं' इत्यादि, इह देशविरतिं प्रतिपन्नानां बहूनां संयमादसंयमाद्वा निवृत्य तां प्रतिपद्यमानानां चैकादीनां भावाद्भङ्गकत्रयस्भवः, इह जीवपश्चेन्द्रियतिर्यग्मनुष्यपदान्येवाध्येयानि, तदन्यत्र संयतासंयतत्वस्याभावादिति।

'नोसंजए'त्यादौ सैव भावना, नवरमिह जीवसिद्धपदे एव वाच्ये अत एवोक्तं 'जीवसिद्धेहिं तियभंगो'त्ति। 'सकसाईहिं जीवाइओ तियभंगो'त्ति, अयमर्थः-सकषायाणां सदाऽवस्थितत्वात्ते सप्रदेशा इत्येको भङ्गः, तथोपशमश्रेणीतः प्रच्यवमानत्वे सकषायत्वं प्रतिपद्यमाना एकादयो लभ्यन्ते ततश्च सप्रदेशाश्चाप्रदेशश्च तथा सप्रदेशाश्चाप्रदेशाश्चेत्यपरभङ्गकद्वयमिति, नारकादिषु तु प्रतीतमेव भङ्गकत्रयम्, 'एगिंदिएसु अभंगयं'ति अभङ्गकं-भङ्गकानामभावोऽभङ्गकं सप्रदेशाश्चाप्रदेशाश्चेत्येक एव विकल्प इत्यर्थः, बहूनामवस्थितानामुत्पद्यमानानां च तेषु लाभादिति, इह च सिद्धपदं नाध्येयमकषायित्वात्, एवं क्रोधादिदण्डकेष्वपि, 'कोहकसाईहिं जीवेगिंदियवज्जो तियभंगो'त्ति, अयमर्थः-क्रोधकषायिद्वितीयदण्डके जीवपदे पृथिव्यादिपदेषु च सप्रदेशाश्चाप्रदेशाश्चेत्येक एव भङ्ग शेषेषु त्रयः, ननु सकषायिजीवपदवत्कथमिह भङ्गत्रयं न लभ्यते ?, उच्यते, इह मानमायालोभेभ्यो निवृत्ताः क्रोधं प्रतिपद्यमाना बहव एवं लभ्यन्ते, प्रत्येकं तद्राशीनामनन्तत्वात्, न त्वेकादयो यथोपशमश्रेणीतः प्रच्यवमानाः सकषायित्वं प्रतिपत्तार इति

'देवेहिं छब्भंग'त्ति देवपदेषु त्रयोदशस्वपि षड् भङ्गाः, तेषु क्रोधोदयवतामल्पत्वेनैकत्वे बहुत्वे च सप्रदेशाप्रदेशत्वयोः सम्भवादिति, मानकषायिमायाकषायिद्वितीयदण्डके 'नेरइयदेवेहिं छब्भंग'त्ति नारकाणां देवानां च मध्येऽल्पा एव मानमायोदयवन्तो भवन्तीति पूर्वोक्तन्यायात्

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

षड् भङ्गा भवन्तीति, 'लोहकसाईहिं जीवेगेंदियवज्जो तियभंगो'त्ति एतस्य क्रोधसूत्रवद्भावना, 'नेरइएहि छब्भंग'त्ति नारकाणां लोभोदयवतामल्पत्वात्पूर्वोक्ताः षड् भंगा भवन्तीति, आह च-

॥१॥ "कोहे माणे माया बोद्धवा सुरगणेहिं छब्भंगा।
माणे माया लोभे नेरइएहिंपि छब्भंगा॥"

देवा लोभप्रचुरा नरकाः क्रोधप्रचुरा इति, अकषायिद्वितीयदण्डके जीवमनुष्यसिद्धपदेषु भङ्गत्रयमन्येषासम्भवात्, एतदेवाह-'अकसाई' इत्यादि।

'ओहियनाणे आभिनिबोहियणाणे सुयनाणे जीवाईओ तियभंगो'त्ति, औधिकज्ञानं-मत्यादिभिरविशेषितं तत्र मतिश्रुतज्ञानयोश्च वहुत्वदण्डके जीवादिपदेषु त्रयो भङ्गाः पूर्वोक्ता भवन्ति, तत्रोघिकज्ञानमतिश्रुतज्ञानिनां सदाऽवस्थितत्वेन सप्रदेशानां भावात्, सप्रदेशा इत्येकः, तथा मिथ्याज्ञानान्मत्यादिज्ञानमात्रं मत्यज्ञानान्मतिज्ञानं श्रुताज्ञानाच्च श्रुतज्ञानं प्रतिपद्यमानानामेकादीनां लाभात्सप्रदेशाश्चाप्रदेशश्च तथा सप्रदेशाश्च अप्रदेशाश्चेति द्वाविल्येवं त्रयमिति।

'विगलेंदिएहिं छब्भंग'त्ति द्वित्रिचतुरिन्द्रियेषु सासादनसम्यक्त्वसम्भवेनाभिनिबोधिकादिज्ञानिनामेकादीनां सम्भवात्त एव षड् भङ्गाः, इह च यथायोगं पृथिव्यादयः सिद्धाश्च न वाच्याः, असम्भवादिति, एवमवध्यादिष्वपि भङ्गत्रयभावना, केवलमवधिदण्डकयोरेकेन्द्रिय-विकलेन्द्रियाः सिद्धाश्च न वाच्याः, मनःपर्यायदण्डकयोस्तु जीवा मनुष्याश्च वाच्याः, केवलदण्ड-कयोस्तु जीवमनुष्यसिद्धा वाच्याः, अत एव वाचनान्तरे दृश्यते 'विन्नेयं जस्स जं अत्थि'त्ति।

'ओहिए अन्नाणे'इत्यादि, सामान्येऽज्ञाने मत्यज्ञानादिभिरविशेषिते मत्यज्ञाने श्रुताज्ञाने च जीवादिषु त्रिभङ्गी भवति, एते हि सदाऽवस्थितत्वात्सप्रदेशा इत्येकः, यदा तु तदन्ये ज्ञानं विमुच्य मत्यज्ञानादितया परिणमन्ति तदैकादिसम्भवेन सप्रदेशाश्चाप्रदेशश्चेत्यादिभङ्गद्वयमित्येवं भङ्गत्रयमिति, पृथिव्यादिषु तु सप्रदेशाश्चाप्रदेशाश्चेत्येक एवेत्यत आह-'एगिंदियवज्जो तियभंगो'त्ति, इह च त्रयेऽपि सिद्धा न वाच्याः, विभङ्गे तु जीवादिषु भङ्गत्रयं, तद्भावना च मत्यज्ञानादिवत्, केवलमिहैकेन्द्रियविकलेन्द्रियाः सिद्धाश्च न वाच्या इति, 'सजोई जहा ओहिओ'त्ति सयोगी जीवादिदण्डकद्वयेऽपि तथा वाच्यो यथौघिको जीवादिः, –

–स चैवम्-सयोगी जीवो नियमात्सप्रदेशो नारकादिस्तु सप्रदेशोऽप्रदेशो वा, वहवस्तु जीवाः सप्रदेशा एव, नारकाद्यास्तु त्रिभङ्गवन्तः, एकेन्द्रियाः पुनस्तृतीयभङ्गा इति, इह सिद्धपदं नाध्येयं, 'मणजोई' इत्यादि, मनोयोगिनो योगत्रयवन्तः सञ्ज्ञिन इत्यर्थः, वाग्योगिन एकेन्द्रियवर्जा, काययोगिनस्तु सर्वेऽप्येकेन्द्रियादयः, एतेषु च जीवादिषु त्रिविधो भङ्गः, तद्भावना च मनोयोग्यादीनामवस्थितत्वे प्रथमः, अमनोयोगित्वादित्यागाच्च मनोयोगित्वाद्युत्पादेनाप्रदेशत्वाभेऽन्यद्भङ्गकद्वयमिति नवरं काययोगिनो ये एकेन्द्रियास्तेष्वभङ्गकं, सप्रदेशा अप्रदेशाश्चेत्येक एव भङ्गक इत्यर्थः, एतेषु च योग त्रयदण्डकेषु जीवादिपदानि यथासम्भवमध्येयानि सिद्धपदं च न वाच्यमिति

'अजोगी जहा अलेस'त्ति दण्डकद्वयेऽप्यलेश्यसमवक्तव्यत्वात्तेषां, ततो द्वितीयदण्डकेऽयोगिषु जीवसिद्धपदयोर्भङ्गकत्रयं मनुष्येषु च षड्भङ्गीति॥ 'सागारे'त्यादि साकारोपयुक्तेष्वनाकारोपयुक्तेषु च नारकादिषु त्रयो भङ्गाः, जीवपदे पृथिव्यादिपदेषु च सप्रदेशास्श्चाप्रदेशाश्चेत्येक एव, तत्र चान्यतरोपयोगादन्यतरमगमने प्रथमेतरसमयेष्वप्रदेशत्वसप्रेदशत्वे भावनीये, सिद्धानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वेकसमयोपयोगित्वेऽपि साकारस्येतरस्य चोपयोगस्यासकृत्प्राप्तया सप्रदेशत्वं सकृत्प्राप्तया चाप्रदेशत्वमवसेयम्, एवं चासकृदवाप्तसाकारोपयोगान् बहूनाश्रित्य सप्रदेशा इत्येको भङ्गः, तानेव सकृदवाप्तसाकारोपयोगं चैकमाश्रित्य द्वितीयः, तथा तानेव सकृदवाप्तसाकारोपयोगांश्च बहूनधिकृत्य तृतीयः, अनाकारोपयोगे त्वसकृत्प्राप्तानाकारोपयोगानाश्रित्य प्रथमः, तानेव सकृत्प्राप्तानाकारोपयोगं चैकमाश्रित्य द्वितीयः, उभयेषामप्यनेकत्वे तृतीय इति ।

'सवेयगा जहा सकासाइ' त्ति सवेदानामपि जीवादिपदेषु भङ्गकत्रयभावात्, एकेन्द्रियेषु चैकभङ्गसद्भावात्, इह च वेदप्रतिपन्नान् बहून् श्रेनिभ्रंशे च वेदं प्रतिपद्यमानकादीनपेक्ष्य भङ्गकत्रयं भावनीयम्, 'इत्थीवेयगे'त्यादि, इह वेदाद्वेदान्तरसङ्क्रान्तौ प्रथमे समयेऽप्रदेशत्वमितरेषु च सप्रदेशत्वमवगम्य भङ्गकत्रयं पूर्ववद्योज्यं नपुंसकवेददण्डकयोस्त्वेकेन्द्रियेष्वेको भङ्गः सप्रदेशाश्चाप्रदेशाश्चेत्येवंरूपः प्रागुक्तयुक्तेरेवेति, स्त्रीदण्डकपुरुषदण्डकेषु देवपञ्चेन्द्रियतिर्यग्मनुष्यपदान्येव, नपुंसकदण्डकयोस्तु देववर्जानि वाच्यनि, सिद्धपदं च सर्वेष्वपि न वाच्यमिति ।

"अवेयगा जहा अकसाइत्ति जीवमनुष्यसिद्धपदेषु भङ्गकत्रयमकषायिवद्वाच्यमित्यर्थः 'ससरीरी जहा ओहिओ' त्ति औधिकदण्डकवत्सशरीरिदण्डकयोर्जीवपदे सप्रदेशतैव वाच्याऽनादित्वात्सशरीरत्वस्य, नारकादिषु तु बहुत्वे भङ्गकत्रयमेकेन्द्रियेषु तृतीयभङ्ग इति ।

'ओरालियवेउव्वियसरीराणं जीवेगिंदियवज्जो तियभंगो' त्ति औदारिकादिशरीरिसत्त्वेषु जीवपदे एकेन्द्रियपदेषु च बहुत्वे तृतीयभङ्ग एव, बहूनां प्रतिपन्नानां प्रतिपद्यमानानां चानुक्षणं लाभात्, शेषेषु भङ्गकत्रयं, बहूनां तेषु प्रतिपन्नानां तथौदारिकवैक्रियत्यागेनौदारिकं वैक्रियं च प्रतिपद्यमानानामेकादीनां लाभात्, इहौदारिकदण्डकयोर्नारका देवाश्च न वाच्याः, वैक्रियदण्डकयोस्तु पृथिव्यप्तेजोवनस्पतिविकलेन्द्रिया न वाच्याः, यश्च वैक्रियदण्डके एकेन्द्रियपदे तृतीयभङ्गोऽभिधीयते स वायूनामसङ्ख्यातानां प्रतिसमयं वैक्रियकरणमाश्रित्य, तथा यद्यपि पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च वैक्रियलब्धिमन्तोऽल्पे तथाऽपि भङ्गकत्रयवचनसामर्थ्याद् बहूनां वैक्रियावस्थानसम्भवः, तथैकादीनां तत्प्रतिपद्यमानता चावसेया ।

'आहारगे'त्यादि, आहारकशरीरे जीवमनुष्ययोः षड् भङ्गकाः पूर्वोक्ता एव, आहारकशरीरिणामल्पत्वात्, शेषजीवानां तु तन्न संभवतीति, 'तेयगे'त्यादि, तैजसकार्मणशरीरे समाश्रित्य जीवादयस्तथा वाच्या यथौघिकास्त एव, तत्र च जीवाः सप्रदेशा एव वाच्याः, अनादित्वात्तैजसादिसंयोगस्य, नारकादयस्तु त्रिभङ्गाः, एकेन्द्रियास्तु तृतीयाभङ्गाः, एतेषु च सशरीरादिदण्डकेषु सिद्धपदं नाध्येयमिति, 'असरीरे'त्यादि अशरीरेषु जीवादिषु सप्रदेशतादित्वेन वक्तव्येषु जीवसिद्धपदयोः पूर्वोक्ता त्रिभङ्गी वाच्या, अन्यत्राशरीरत्वस्याभावादिति ।

'आहारपज्जत्तीए' इत्यादि, इह च जीवपदे पृथिव्यादिपदेषु च बहूनामाहारदिपर्याप्तीः प्रतिपन्ननां तदपर्याप्तित्यागेनाहारपर्याप्त्यादिभिः पर्याप्तिभावं गच्छतां च बहूनामेव भावात्सप्रदेशाश्चाप्रदेशाश्चेत्येक एव भङ्गः, शेषेषु तु त्रयो भङ्गा इति, 'भासामणे'त्यादि, इह भाषामनसोः पर्याप्तिर्भाषामनःपर्याप्ति, भाषामनःपर्याप्तयोस्तु बहुश्रुताभिमतेन केनापि कारणेनैकत्वं विवक्षितं, ततश्च तया पर्याप्तका यथा सञ्ज्ञिनस्तथा सप्रदेशादितया वाच्याः, सर्वपदेषु भङ्गकत्र- यमित्यर्थः, पञ्चेन्द्रियपदान्येव चेह वाच्यानि, पर्याप्तीनां चेदं स्वरूपमाहुः-येन करणेन भुक्तमाहारं खलं रसं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च कर्त्तुं समर्थो भवति तस्य करणस्य निष्पत्तिराहारपर्याप्तिः, करणं शक्तिरिति पर्यायौ, तथा शरीरपर्याप्तिर्नाम येन करणेनौदारिकवैक्रियहारकाणां शरीराणां योग्यानि द्रव्यानि गृहीत्वौदारिकादिभावेन परिणमयति तस्य करणस्य निर्वृत्ति शरीरपर्याप्तिरिति, तथा येन करणेनैकादीनामिन्द्रियाणां प्रायोग्यानि द्रव्यानि गृहीत्वाऽऽत्मीयान् विषयान् ज्ञातुं समर्थो भवति तस्य करणस्य निर्वृत्तिरिन्द्रियपर्याप्तिः, तथा येन करणेनानप्राणप्रायोग्यानि द्रव्याण्यवलम्ब्यानप्राणतया निःस्रष्टुं समर्थो भवति तस्य करणस्य निर्वृत्तिरानप्राणपर्याप्तिरिति, तथा येन करणेन सत्यादिभाषाप्रायोग्यानि द्रव्याण्यवलम्ब्यावलम्ब्य चतुर्विधया भाषया परिणम्य भाषानिसर्जनसमर्थो भवति तस्य करणस्य निष्पत्तिर्भाषापर्याप्तिः, तथा येन करणेन चतुर्विधमनोयोग्यानि द्रव्यानि गृहीत्वा मननसमर्थो भवति तस्य करणस्य निष्पत्तिर्मनःपर्याप्तिरिति ।

'आहारअप्पज्ञत्तीए'इत्यादि, इह जीवपदे पृथिव्यादिपदेषु च सप्रदेशाश्चाप्रदेशाश्चेत्येक एव भङ्गकोऽनवरतं विग्रहगतिमतामाहारापर्याप्तिमतां बहूनां लाभात्, शेषेषु च षड् भङ्गाः पूर्वोक्ता एवाहारपर्याप्तिमतामल्पत्वात्, 'सरीरअपज्ञत्तीए'इत्यादि, इह जीवेष्वेकेन्द्रियेषु चैव एव भङ्गोऽन्यत्र तु त्रयं, शरीराद्यपर्याप्तकानां कालतः सप्रदेशानां सदैव लाभात् अप्रदेशानां च कदाचिदेकादीनां च लाभात्, नारकदेवमनुष्येषु च षडेवेति ।

'भासे'त्यादि, भाषामनःपर्याप्तयाऽपर्याप्तकास्ते येषां जातितो भाषामनोयोग्यत्वे सति तदसिद्धिः, ते च पञ्चेन्द्रिया एव, यदि पुनर्भाषामनसोऽभावमात्रेण तदपर्याप्तका अभविष्यंस्तदैकेन्द्रिया अपि तेऽभविष्यंस्ततश्च जीवपदे तृतीय एव भङ्गः स्यात्, उच्यते च-'जीवाइओ तियभंगो'त्ति, तत्र जीवेषु पञ्चेन्द्रियतिर्यक्षु च बहूनां तदपर्याप्तिं प्रतिन्नानां प्रतिपद्यमानानां चैकादीनां लाभात् पूर्वोक्तमेव भङ्गत्रयं, 'नेरदयदेवमणुएसु छब्भंग'त्ति नैरयिकादिषु मनोऽपर्याप्तिकानामल्पतरत्वेन सप्रदेशानामेकादीनां लाभात्त एव षड् भङ्गाः, एषु च पर्याप्त्यपर्याप्तिदण्डकेषु सिद्धपदं नाध्येयमसम्भवादिति पूर्वोक्तद्वाराणां सङ्ग्रहगाथा–

**मू. (२८७)** *सपदेसा आहारगभवियसन्निलेस्सा दिट्ठी संजयकसाए ।*
*नाणे जोगुवओगे वेदे य सरीरपज्ञत्ती ॥*

**वृ.** 'सपएसे'त्यादि, 'सपएस'त्ति कालतो जीवाः सप्रदेशाः इतरे चैकत्वबहुत्वाभ्यामुक्ताः, 'आहारग'त्ति आहारका अनाहारकाश्च तथैव, 'भविय'त्ति भव्या अभव्या उभयनिषेधाश्च तथैव, 'सन्नि'त्ति सञ्ज्ञिनोऽसञ्ज्ञिनो द्वयनिषेधवन्तश्च तथैव, 'लेस'त्ति सलेश्याः कृष्णादिलेश्याः अलेश्याश्च तथैव, दिट्ठित्ति दृष्टि सम्यगदृष्ट्यादिका ३ तद्वन्तास्तथैव 'संजय'त्ति संयता असंयता मिश्रायनिषेधिनश्च तथैव ,।

-'कसाय'त्ति कषायिणः क्रोधादिमन्तः ४ अकषायाश्च तथैव, 'नाणे'त्ति ज्ञानिनः आभिनिबोधिकादिज्ञानिनः ५ अज्ञानिनो मत्यज्ञानादिमन्तश्च ३ तथैव, 'जोग'त्ति सयोगाः, मनआदियोगिनः अयोगिनश्च तथैव, 'उवओगे'त्ति साकारनाकारोपयोगास्तथैव, 'वेद'त्ति सवेदाः स्त्रीवेदादिमन्तः ३ अवेदाश्च तथैव, 'ससरीर'त्तिसशरीरा औदारिकादिमन्तः ५ अशरीराश्च तथैव, 'पज्ञत्ति'त्ति आहारादिपर्याप्तिमन्तः ५ तदपर्याप्तकाश्च ५ तथैवोक्ता इति ॥

जीवाधिकारादेवाह –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (२८८)** *जीवा णं भंते ! किं पच्चक्खाणी अपच्चक्खाणी पच्चक्खाणापच्चक्खाणी ?, गोयमा ! जीवा पच्चक्खाणीवि अपच्चक्खाणीवि पच्चक्खाणापच्चक्खाणीवि । सव्वजीवाणं एवं पुच्छा, गोयमा ! नेरइया अपच्चक्खाणी जाव चउरिंदिया, सेसा दो पडिसेहेयव्वा, पंचेंदियतिरिक्खजोनिया नो पच्चक्खाणी अपच्चक्खाणीवि पच्चक्खाणापच्चक्खाणीवि, मणुस्सा तिन्निवि, सेसा जहा नेरतिया ॥*

*जीवा णं भंते ! किं पच्चक्खाणं जाणंति अपच्चक्खाणं जाणंति पच्चक्खाणापच्चक्खाणं जाणंति ?, गोयमा ! जे पंचेंदिया ते तिन्निवि जाणंति अवसेसा पच्चक्खाणं न जाणंति ३ ।*

*जीवा णं भंते ! किं पच्चक्खाणं कुव्वंति अपच्चक्खाणं कुव्वंति पच्चक्खाणापच्चक्खाणं कुव्वंति ?, जहा ओहिया तहा कुव्वणा ।*

*जीवा णं भंते ! किं पच्चक्खाणनिव्वत्तियाउया अपच्चक्खाणनि० पच्चक्खाणापच्चक्खाणनि० गोयमा ! जीवा य वेमानिया य पच्चक्खाणनिव्वत्तियाउया तिन्निवि, अवसेसा अपच्चक्खाणनिव्वत्तियाउया ।*

**वृ.** 'जीवा ण'मित्यादि, 'पच्चक्खानि'त्ति सर्वविरताः 'अपच्चक्खानि'त्ति अविरताः 'पच्चक्खाणापच्चक्खानि'त्ति देशविरता इति 'सेसा दो पडिसेहेयव्वा' प्रत्याख्यानदेशप्रत्याख्याने प्रतिषेधनीये, अविरतत्वान्नारकादीनामिति ॥ प्रत्याख्यानं च तज्ज्ञाने सति स्यादिति ज्ञानसूत्रं, तत्र च 'जे पंचिंदिया ते तिन्निवि'त्ति नारकादयो दण्डकोक्ताः पञ्चेन्द्रियाः प्रत्याख्यानादित्रयं न जानन्त्यमनस्कत्वादिति ।

कृतं च प्रत्याख्यानं भवतीति तत्करणसूत्रं, प्रत्याख्यानमायुर्बन्धहेतुरपि भवतीत्यायुःसूत्रं, तत्र च 'जीवा ये'त्यादि, जीवपदे जीवाः प्रत्याख्यानादित्रयनिबद्धायुष्का वाच्याः, वैमानिकपदे च वैमानिका अप्येवं, प्रत्याख्यानादित्रयवतां तेषूत्पादात्, 'अवसेस'त्ति नारकादयोऽप्रत्याख्याननिर्वृत्तायुषो, यतस्तेषु तत्त्वेनाविरता एवोत्पद्यन्त इति ।

**मू. (२८९)** *पच्चक्खाणं १ जाणइ २ कुव्वति ३ तिन्नेव आउनिव्वत्ती ४ ।*
*सपदेसुद्देसंमि य एमेए दंडगा चउरो ॥*

**मू. (२९०)** *सेवं भंते ! सेवं भंते ! त्ति ।*

**वृ.** उक्तार्थःसङ्ग्रहगाथा-'पच्चक्खाण'मित्यादि, प्रत्याख्यानमित्येतदर्थः एको दण्डकः, एवमन्ये त्रयः ।

शतकं-६ उद्देशकः-४ समाप्तः

## —: शतकं-६ उद्देशकः-५ :—

**वृ.** अनन्तरोद्देशके सप्रदेशा जीवा उक्ताः, अथ सप्रदेशमेव तमस्कायादिकं प्रतिपादयितुं पञ्चमोद्देशकमाह—

**मू. (२९१)** *किमियं भंते ! तमुक्काएत्ति पवुच्चइ किं पुढवी तमुक्काएत्ति पवुच्चति आऊ तमुक्काएत्ति पवुच्चति ? गोयमा ! नो पुढवी तमुक्काएत्ति पवुच्चति आऊ तमुक्काएत्ति पवुच्चति । से केणट्ठेणं० ?, गोयमा ! पुढविकाए णं अत्थेगतिए सुभे देसं पकासेति अत्थेगइए देसं नो पकासेइ,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से तेणट्ठेणं० ।

तमुक्काए णं भंते ! कहिं समुट्ठिए कहिं संनिट्ठिए ?, गोयमा ! जंबुद्दीवस्स २ बहिया तिरियमसंखेज्जे दीवसमुद्दे वीईवतित्ता अरुणवरस्स दीवस्स बाहिरिल्लाओ वेतियन्ताओ अरुणो॰ यं समुद्दं बायालीसं जोयणसहस्सानि ओगाहित्ता उवरिल्लाओ जलंताओ एकपदेसियाए सेढीए इत्थ णं तमुक्काए समुट्ठिए, सत्तरस एक्कवीसे जोयणसए उड्ढं उप्पइत्ता तओ पच्छा तिरियं पवित्थरमाणे २ सोहम्मीसाणसणंकुमारमाहिंदे चत्तारिवि कप्पे आवरित्ताणं उड्ढंपि य णं जाव बंभलोगे कप्पे रिट्ठविमाणपत्थडं संपत्ते एत्थ णं तमुक्काए णं संनिट्ठिए ।

तमुक्काए णं भंते ! किंसिंठिए पन्नत्ते ?, गोयमा ! अहे मल्लगमूलसंठिए उप्पिं कुक्कडग-पंजरगसंठिए पन्नत्ते ।। तमुक्काए णं भंते ! केवत्तियं विक्खंभेणं केवतियं परिक्खेवेणं पन्नत्ते ?, गोयमा ! दुविहे पन्नत्ते, तंजहा-संखेज्जवित्थडे य असंखेज्जवित्थडे य, तत्थ णं जे से संखेज्जवित्थडे से णं संखेज्जाइं जोयणसहस्साइं विक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं प०, तत्थ णं जे से असंखिज्जवित्थडे से णं असंखेज्जाइं जोयणसहस्साइं विक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पन्नत्ताइं ।

तमुक्काए णं भंते ! केमहालए प० ?, गोयमा ! अयं णं जंबुद्दीवे २ सव्वदीवसमुद्दाणं सव्वब्भंतराए जाव परिक्खेवेणं पन्नत्ते ।

देवे णं महिड्ढीए जाव महानुभावे इणामेव २ त्तिकट्टु केवलकप्पं जंबुद्दीवं २ तिहिं अच्छरानिवाएहिं तिसत्तखुत्तो अनुपरियट्टित्ताणं हव्वमागच्छिज्जा से णं देवे ताए उक्किट्ठाए तुरियाए जाव देवगईए वीईवयमाणे २ जाव एकाहं वा दुयाहं वा तियाहं वा उक्कोसेणं छम्मासे वीतीवएज्जा अत्थेगतियं तमुकायं वीतीवएज्जा अत्थेगतियं नो तमुकायं वीतीवएज्जा, तमहालए णं गोयमा ! तमुक्काए पन्नत्ते ।

अत्थि णं भंते ! तमुकाए गेहाति वा गेहावणाति वा ?, नो तिणट्ठे समट्ठे, अत्थि णं भंते !, तमुकाए गामाति वा जाव संनिवेसाति वा ?, नो तिणट्ठे समट्ठे । अत्थि णं भंते ! तमुक्काए ओराला बलाहया संसेयंति संमुच्छंति संवासंति वा ?, हंता अत्थि, तं भंते ! किं देवो पकरेति असुरो पकरेति नागो पकरेति ?, गोयमा ! देवोवि पकरेति असुरोवि पकरेति नागोवि पकरेति

अत्थि णं भंते ! तमुकाए बादरे थनियसद्दे बायरे विज्जुए ?, हंता अत्थि, तं भंते ! किं देवो पकरेति ? ३, तिन्निवि पकरेति अत्थि णं भंते ! तमुकाए बायरे पुढविकाए बादरे अगनिकाए ?, नो तिणट्ठे समट्ठे नन्नत्थ विग्गहगतिसमावन्नएणं । अत्थि णं भंते ! तमुकाए चंदिमसूरिय-गहगणनक्खत्ततारारूवा ?, नो तिणट्ठे समट्ठे, पलियस्सतो पुन अत्थि ।

अत्थि णं भंते ! तमुकाए चंदा भाति वा सूरा भाति वा ?, नो तिणट्ठे समट्ठे, कादूसनिया पुण सा । तमुकाए णं भंते ! केरिसए वन्नेणं पन्नत्ते ?, गोयमा ! काले कालावभासे गंभीरलोमहरिस-जणणे भीमे उत्तासणए परमकिण्हे वन्नेणं पन्नत्ते, देवेवि णं अत्थेगतिए जे णं तप्पढमयाए पासित्ता णं खुभाएज्जा अहे णं अभिसमागच्छेज्जा तओ पच्छा सीहं २ तुरियं २ खिप्पामेव वीतीवएज्जा

तमुकायस्स णं भंते ! कति नामधेज्जा पन्नत्ता ?, गोयमा ! तेरस नामधेज्जा पन्नत्ता, तंजहा-तमेति वा तमुकाएति वा अंधकारेइ वा महांधकारेइ वा लोगंधकारेइ वा लोगतमिस्सेइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वा देवंधकारेति वा देवतमिस्सेति वा देवारन्नेति वा देववूहेति वा देवफलिहेति वा देवपडिक्खोमेति वा अरुणोदएति वा समुद्दे।*

*तमुकाए णं भंते ! किं पुढवीपरिणांमे आउपरिणामे जीवपरिणामे पोग्गलपरिणामे ?, गोयमा ! नो पुढविपरिणामे आउपरिणामेवि जीवपरिणामेवि पोग्गलपरिणामेवि। तमुकाए णं भंते ! सव्वे पाणा भूया जीवा सत्ता पुढविकाइयत्ताए जाव तसकाइयत्ताए उववन्नपुव्वा ?, हंता गो० ! असतिं अदुवा अनंतखुत्तो नो चेव णं बादरपुढविकाइयत्ताए बादरअगनिकाइयत्ताए वा*

**वृ.** 'किमिय'मित्यादि, 'तमुक्काए'त्ति तमसां-तमिश्रपुद्गलानां कायो-राशिस्तमस्कायः स च नियत एवेह स्कन्धः कश्चिद्विवक्षितः, स च तादृशः पृथ्वीरजःस्कन्धो वा स्यादुदकरजःस्कन्धो वा न त्वन्यस्तदन्यस्यातादृशत्वादिति पृथिव्यब्विषयसन्देहादाह-'किं पुढवी'त्यादि, व्यक्तं, 'पुढविकाए ण'मित्यादि, पृथिवीकायोऽस्त्येककः कश्चिच्छुभो-भास्वरः, यः किंविधः ? इत्याह-देशं विवक्षितक्षेत्रस्य प्रकाशयति भास्वरत्वान्मण्यादिवत्, तथाऽस्त्येककः पृथवीकायो देशं-पृथिवीकायान्तरं प्रकाश्यमपि न प्रकाशयत्यभास्वरत्वादन्धोपलवत्, नैवं पुनरप्कायस्तस्य सर्वस्याप्यप्रकाशकत्वात्, ततश्च तमस्कायस्य सर्वथैवाप्रकाशकत्वादप्कायपरिणामतैव।

'एगपएसियाए'त्ति एक एव च न द्व्यादय उत्तराधर्यं प्रति प्रदेशो यस्यां सा तथा तया, सममित्तितयेत्यर्थः, न च वाच्यमेकप्रदेशप्रमाणयेति, असङ्ख्यातप्रदेशावगाहस्वभावत्वेन जीवानां तस्यां जीवावगाहाभावप्रसङ्गात्, तमस्कायस्य च स्तिबुकाकाराप्कायिकजीवात्मकत्वात् बाहल्यमान- स्य च प्रतिपादयिष्यमाणत्वादिति, 'इत्थ णं'ति प्रज्ञापकालेख्यलिखितस्यारुणोदसमुद्रा-देरधिकरण- तोपदर्शनार्थःमुक्तत्वात्, 'अहे'इत्यादि, अधः-अधस्तान्मल्लकमूलसंस्थितः-शरावबुघ्न-संस्थानः, समजलान्तस्योपरि सप्तदश योजनशतान्येकविंशत्यधिकानि यावद्वलयसंस्थानत्वात्

'केवइयं विक्खंभेणं'ति विस्तारेण क्वचिद् 'आयामविक्खंभेणं'ति दृश्यते, तत्र चायाम-उच्चत्वमिति। 'संखेज्जवित्थडे'इत्यादि, सङ्ख्यातयोजनविस्तृतः, आदित आरभ्योर्ध्वं सङ्ख्येययोज-नानि यावत्ततोऽसङ्ख्यातयोजनविस्तृत उपरि तस्य विस्तारगामित्वेनोक्तत्वात्, 'असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं'ति सङ्ख्यातयोजनविस्तृतत्वेऽपि तमस्कायस्यासङ्ख्याततमद्वीपर-रिक्षेपतो बृहत्तरत्वात्परिक्षेपस्यासङ्ख्यातयोजनसहप्रमाणत्वम्, आन्तरवहिपरिक्षेपविभागस्तु नोक्तः, उभयस्याप्यसङ्ख्याततया तुल्यत्वादिति।

'देवे ण'मित्यादि, अथ किंपर्यन्तमिदं देवस्य महद्धर्यादिकं विशेषणम् ? इत्याह-'जाव इणामेवे'त्यादि, इह यावच्छब्द एदम्पर्यार्थः, यतो देवस्य महद्धर्यादिविशेषणानि गमनसामर्थ्यप्रक-र्षप्रतिपादनाभिप्रायेणैव प्रतिपादितानि 'इणामेवत्तिकट्टु' इदं गमनमेवम्-अतिशीघ्रत्वावेदकचप्पुटि-कारूपहस्तव्यापारोपदर्शनपरम्, अनुस्वाराश्रवणं च प्राकृतत्वात् द्विर्वचनं च शीघ्रत्वातिशयोपदर्शन-परमिति-उपदर्शनार्थः 'कृत्वा' विधायेति, 'केवलकप्पं'ति केवलज्ञानकल्पं परिपूर्णमित्यर्थः, वृद्धव्या-ख्या तु-केवलः-संपूर्ण कल्पत इति कल्पः-स्वकार्यकरणसमर्थो वस्तुरूप इतियावत्, केवलश्चासौ कल्पश्चेति केवलकल्पस्तं।

'तिहिं अच्छरानिवाएहिं'ति तिसृभिश्चप्पुटिकाभिरित्यर्थः 'तिसत्तखुत्तो'त्ति त्रिगुणाः सप्त त्रिसप्त त्रिसप्तवारांस्त्रिसप्तकृत्व एकविंशतिवारानित्यर्थः 'हव्वं'ति शीघ्रम् 'अत्थेगइय'मित्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्यातयोजनमानं व्यतिव्रजेदितरं तु नेति। 'ओराला बलाहय' त्ति महान्तो मेघाः 'संसेयंति' त्ति संस्विद्यन्ते तज्जनकपुद्गलस्नेहसम्पत्त्या, संमूर्च्छन्ति तत्पुद्गलमीलनात्तदाकारतयोत्पत्तेः। 'तं भंते' त्ति तत् संस्वेदनं संमूर्छनं वर्षणं च।

'बायरे विज्जुयारे' त्ति, इह न बादरतेजस्कायिका मन्तव्याः, इहैव तेषां निषेत्स्यमाणत्वात्, किन्तु देवप्रभावजनिता भास्वराः पुद्गलास्त इति, 'नन्नत्थ विग्गहगईसमावन्नेणं' ति न इति योऽयं निषेधो बादरपृथिवीतेजसोः सोऽन्यत्र विग्रहगतिसमापन्नानविग्रहत्यैव बादरे ते भवतः, पृथिवी हि बादरा रत्नप्रभाद्यास्वष्टासु पृथिवीषु गिरिवमानेषु, तेजस्तु मनुजक्षेत्र एवेति, तृतीया चेह पञ्चम्यर्थे प्राकृतत्वादिति, 'पलियस्सओ पुण अत्थि' त्ति परिपार्श्वतः पुनः सन्ति तमस्कायस्य चन्द्रादय इत्यर्थः, 'कादूसनिया पुण सा' इति ननु त्पार्श्वतश्चन्द्रादीनां सद्भावात्तत्प्रमाऽपि तत्रास्ति सत्यं, केवलं कम्-आत्मानं दूषयति तमस्कायपरिणामेन परिणमनात् कदूषणा सैव कदूषनिका, दीर्घता च प्राकृतत्वात्, अतः सत्यप्यसावसतीति, 'काले' त्ति कृष्ण- 'कालावभासे' त्ति कालोऽपि कश्चित् कुतोऽपि कालो नावभासत इत्यत आह-कालावभासः कालदीप्तिर्वा 'गंभीरलोमहरिस-जणणे' त्ति गम्भीरश्चासौ भीषणत्वाद्रोमहर्षजननश्चेति गम्भीररोमहर्षजननः, रोमहर्षजनकत्वे हेतुमाह—

'भीमे' त्ति भीष्मः 'उत्तासणए' त्ति उत्कम्पहेतुः, निगमयन्नाह-'परमे' त्यादि, यत एवमत एवाह-'देवेवि ण' मित्यादि, 'तप्पढमयाए' त्ति दर्शनप्रथमतायां 'खुभाएज्ज' त्ति 'स्कभ्नीयात्' क्षुभ्येद्, 'अहे ण' मित्यादि अथ 'एनं' तमस्कायम् 'अभिसमागच्छेत्' प्रविशेत्ततो भयात् 'सीहं' ति कायव-तेरतिवेगेन 'तुरियं तुरियं' ति मनोगतेरतिवेगात्, किमुक्तं भवति ? क्षिप्रमेव, 'वीइवएज्ज' त्ति व्यतिव्रजेदिति ॥

'तमेति वे' त्यादि, तमः अन्धकाररूपत्वात् इत्येतत् 'वा' विकल्पार्थः, तमस्काय इति वाऽन्धकारराशिरूपत्वात्, अन्धकारमिति वा तमोरूपत्वात्, महान्धकारमिति वा महातमोरूपत्वात्, लोकान्धकारमिति वा लोकमध्ये तथाविधस्यान्यस्यान्धकारस्याभावात्, एवं लोकतमिश्रमिति वा, देवान्धकारमिति वा देवानामपि तत्रोद्योताभावेनान्धकारात्मकत्वात्, एवं देवतमिश्रमिति वा, देवारण्यमित वा, बलवद्देवभयान्नश्यतां देवानां तथाविधारण्यमिव शरणभूतत्वात्, देवव्यूह इति वा देवानां दुर्भेदत्वाद्व्यूह इव-चक्रादिव्यूह इव देवव्यूहः, देवपरिघ इति वा देवानां भयोत्पादकत्वेन गमनविघातहेतुत्वात्, देवप्रतिक्षोम इति वा तत्क्षोभहेतुत्वात्, अरुणोदक इति वा समुद्रः, अरुणोदकसमुद्रजलविकारत्वादिति।

पूर्वं पृथिव्यादेस्तमस्कायशब्दवाच्यता पृष्टा अथ पृथिव्यप्कायपर्यायतां पृथिव्यपकायौ च जीवपुद्गलरूपाविति तत्पर्यायतां च प्रश्नयन्नाह-'तमुक्काए ण' -मित्यादि, बादरवायुवनस्पत-यसाश्च तत्रोत्पद्यन्तेऽप्काये तदुत्पत्तिसम्भवान्न त्वितरेऽस्वस्थानत्वात्, अत उक्तं 'नो नेव ण' मित्यादि।

तमस्कायसादृश्यात्कृष्णराजिप्रकरणम्—

*मू. (२९२) कति णं भंते! कण्हराईओ पन्नत्ताओ ?, गोयमा अट्ठ कण्हराईओ पन्नत्ताओ। कहि णं भंते! एयाओ अट्ठ कण्हराईओ पन्नत्ताओ ?, गोयमा! उप्पिं सणंकुमारमाहिंदाणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कप्पाणं हिट्ठं बंभलोए कप्पे रिट्ठे विमाणे पत्थडे, एत्थ णं अक्खाडगसमचउरंससंठाणसंठियाओ अट्ठ कण्हरातीओ पन्नत्ताओ, तंजहा-पुरच्छिमेणं दो पच्चत्थिमेणं दो दाहिणेणं दो उत्तरेणं दो, पुरच्छिमब्भंतरा कण्हराई दाहिणं बाहिरं कण्हरातिं पुट्ठा दाहिणब्भंतरा कण्हराती पच्चत्थिमबाहिरं कण्हराइं पुट्ठा पच्चत्थिमब्भंतरा कण्हराई उत्तरबाहिरं कण्हरातिं पुट्ठा उत्तरमब्भंतरा कण्हराती पुरच्छिमबाहिरं कण्हरातिं पुट्ठा, दो पुरच्छिमपच्चत्थिमाओ बाहिराओ कण्हरातीओ छलंसाओ दो उत्तरदाहिणबाहिराओ कण्हरातीओ तंसाओ दो पुरच्छिमपच्चत्थिमाओ अब्भिंतराओ कण्हरातीओ चउरंसाओ दो उत्तरदाहिणाओ अबभिंतराओ कण्हरातीओ चउरंसाओ।*

**मू. (२९३)** *'पुव्वावरा छलंसा तंसा पुण दाहिणुत्तरा बज्झा।*
*अब्भंतर चउरंसा सव्वावि य कण्हरातीओ ॥'*

**मू. (२९४)** *कण्हराईओ णं भंते! केवतियं आयामेणं केवतियं विक्खंभेणं केवतियं परिक्खेवेणं पन्नत्ता?, गोयमा! असंखेज्जाइं जोयणसहस्साइं आयामेणं असंखेज्जाइं जोयणसहस्साइं विक्खंभेणं असंखेज्जाइं जोयणसहस्साइं परिक्खेवेणं पन्नत्ताओ। कण्हरातीओ णं भंते! केमहालियाओ पन्नत्ता?, गोयमा! अयन्नं जंबुद्दीवे २ जाव अद्धमासं वीतीवएज्जा अत्थेगतियं कण्हरातीं वीतीवएज्जा अत्थेगइयं कण्हरातीं नो वीतीवएज्जा, एमहालियाओ णं गोयमा! कण्हरातीओ पन्नत्ताओ।*

*अत्थि णं भंते! कण्हरातीसु गेहाति वा गेहावणाति वा?, नो तिणट्ठे समट्ठे। अत्थि णं भंते कण्हरातीसु गामाति वा०?, नो तिणट्ठे समट्ठे। अत्थि णं भंते! कण्ह० ओराला बलाहया संमुच्छंति ३?, हंता अत्थि, तं भंते! किं देवो प० ३?, गो० देवो पकरेति नो असुरो नो नागो य। अत्थि णं भंते! कण्हराईसु बादरे थनियसद्दे जहा ओराला तहा।*

*अत्थि णं भंते! कण्हराईए बादरे आउकाए बादरे अगनिकाए बायरे वणप्फइकाए?, नो तिणट्ठे समट्ठे, नन्नत्थ विग्गहगतिसमावन्नएणं। अत्थि णं० चंदिमसूरिय ४ प०?, नो तिण० अत्थि णं कण्ह० चंदाभाति वा २?, नो तिणट्ठे समट्ठे। कण्हरातीओ णं भंते? केरिसियाओ वन्नेणं पन्नत्ताओ?, गोयमा! कालाओ जाव खिप्पामेव वीतीवएज्जा।*

*कण्हरातीओ णं भंते! कति नामधेज्जा पन्नत्ता? गोयमा! अट्ठ नामधेज्जा पन्नत्ता, तंजहा-कण्हरातित्ति वा मेहरातीति वा मघाइति वा माघवतीति वा वायफलिहेति वा वायप- लिक्खोभेइ वा देवफलिहेइ वा देवपलिक्खभेति वा। कण्हरातीओ णं भंते! किं पुढविपरिणामाओ आउपरिणामाओ जीवपरिणामाओ पुग्गलपरिणामाओ?, गोयमा! पुढवीपरिणामाओ नो आउपरिणामाओ जीवपरिणामाओ वि पुग्गलपरिणामाओवि।*

*कण्हरातीसु णं भंते! सव्वे पाणा भूया जीवा सत्ता उववन्नपुव्वा?, हंता गोयमा! असइं अदुवा अनंतखुत्तो नो चेव णं बादर आउकाइयत्ताए बादरअगनिकाइयत्ताए वा बादरवण-प्फतिकाइयत्ताए वा।*

**वृ.** 'कण्हराईओ'त्ति कृष्णवर्णपुद्गलरेखाः 'हव्वं'ति समं किलेति वृत्तिकारः प्राह 'अक्खा-डगे'त्यादि, इह आखाटकः-प्रेक्षास्थाने आसनविशेषलक्षणस्तत्सं स्थिताः, 'नो असुरो' इत्यादि, असुरनागकुमाराणां तत्र गमनासम्भवादिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कण्हराईति व'त्ति पूर्ववत्, मेघराजीति वा कालमेघरेखातुल्यत्वात्, मघेति वा तमिश्रतया षष्ठनारकपृथवीतुल्यत्वात्, माघवतीति वा तमिश्रतयैव सप्तमनरकपृथिवीतुल्यत्वात्, 'वायफलिहेइव'त्ति वातोऽत्र वात्या तद्वद्वातमिश्रत्वात् परिघश्च दुर्लङ्घयत्वात् सा वातपरिघः।

'वायपरिक्खोभेइ व'त्ति वातोऽत्रापि वात्या तद्वद्वातमिश्रत्वात् परिक्षोभश्च परिक्षोभहेतुत्वात् सा वातपरिक्षोभ इति, 'देवफलिहेइ व'त्ति क्षोभयति देवानां परिघेव-अर्गलेव दुर्लङ्घयत्वाद्देवपरिघ इति 'देवपलिक्खोभेइ व'त्ति देवानां परिक्षोभहेतुत्वादिति ॥

**मू. (२९५)** *एतेसि णं अट्ठण्हं कण्हराईणं अट्ठसु उवासंतरेसु अट्ठ लोगंतियविमाणा पन्नत्ता, तंजहा-१ अच्ची २ अच्चिमाली ३ वइरोयणे ४ पभंकरे ५ चंदाभे६ सूराभे ७ सुक्का भे ८ सुपतिट्ठाभे मज्झे ९ रिट्ठाभे। कहि णं भंते! अच्चीविमाणे प० ?, गोयमा! उत्तरपुरच्छिमेणं, कहि णं भंते! अच्चिमालीविमाणे प० ?, गोयमा! पुरच्छिमेणं, एवं परिवाडीए नेयव्वं जाव कहि णं भंते! रिट्ठे विमाणे पन्नत्ते ?, गोयमा! बहुमज्झदेसभागे। एएसु णं अट्ठसु लोगंतियविमाणेसु अट्ठविहा लोगंतियदेवा परवसंति, तंजहा।*

**वृ.** 'अट्ठसु उवासंतरेसु'त्ति द्वयोरन्तरमवकाशान्तरं तत्राभ्यन्तरोत्तरपूर्वयोरेकं पूर्वयोर्द्वितीयं अभ्यन्तरपूर्वदक्षिणयोस्तृतीयं दक्षिणयोश्चतुर्थं अभ्यन्तरदक्षिणपश्चिमयोः पञ्चमं पश्चिमयोः षष्ठं अभ्यन्तपरश्चिमोत्तरयोः सप्तमं उत्तरयोरष्टमं, 'लोगंतियविमाण'त्ति लोकस्य-ब्रह्मलोकस्यान्ते-समीपे भवानि लोकान्तिकानि तानि च तानि विमानानि चेति समासः, लोकान्तिका वा देवास्तेषां विमानानीति समासः, इह चावकाशान्तरवर्त्तिष्वष्टासु अर्चिप्रभृतिषु विमानेषु वाच्येषु यत् कृष्णराजीनां मध्यभागवर्त्ति रिष्ठं विमानं नवममुक्तं तद्विमानप्रस्तावादवसेयम्।

**मू. (२९६)** *सारस्सयमाइच्चा वण्ही वरुणा य गद्दतोया य।*
*तुसिया अव्वाबाहाअग्गिच्चा चेव रिट्ठा य॥*

**वृ.** 'सारस्सयमाइच्चाण'मित्यादि, इह सारस्वतादित्ययोः समुदितयोः सप्त देवाः सप्त च देवशतानि परिवार इत्यक्षरानुसारेणावसीयत।

**मू. (२९७)** *कहि णं भंते! सारस्सया देवा परिवसंति?, गोयमा! अच्चिविमाणे परिवसंति, कहि णं भंते! आदिच्चा देवा परिवसंति?, गोयमा! अच्चिमालिविमाणे, एवं नेयव्वं जहानुपुव्वीए जाव कहि णं भंते! रिट्ठा देवा परिवसंति?, गोयमा! रिट्ठविमाणे॥ सारस्सयमाइच्चाणं भंते! देवाणं कति देवा कति देवसया पन्नत्ता?, गोयमा! सत्त देव सत्त देवसया परिवारो पन्नत्तो, वण्हीवरुणाणं देवाणं चउद्दस देवा चउद्दस देवसहस्सा परिवारो पन्नत्तो, गद्दतोयतुसिया णं देवाणं सत्त देवा सत्त देवसहस्सा पन्नत्ता, अवसेसाणं नव देवा नव देवसया पन्नत्ता।*

**मू. (२९८)** *'पठमजुगलम्मि सत्त उ सयानि बीयंमि चोद्दससहस्सा।*
*तइए सत्तसहस्सा नव चेव सयानि सेसेसु॥*

**वृ.** एवमुत्तत्रापि, 'अवसेसाणं'ति अव्याबाधाग्नेयरिष्ठानाम्।

**मू. (२९९)** *लोगंतिगविमाणा णं भंते! किंपतिट्ठिया पन्नत्ता?, गोयमा! वाउपइट्ठिया पन्नत्ता, एवं नेयव्वं॥ 'विमाणाणं पतिट्ठाणं बाहल्लुच्चत्तमेव संठाणं।' बंभलोयवत्तव्वया नेयव्वा*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*(जहा जीवाभिगमे देवुद्देसए) जाव हंता गोयमा ! असतिं अदुवा अनंतखुत्तो । नो चेव णं देवित्ताए लोगंतियविमाणेसु णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! अट्ठ सागरोवमाइं ठिती पन्नत्ता । लोगंतियविमाणेहिंतो णं भंते ! केवतियं अबाहाए लोगंते पन्नत्ते ?, गोयमा ! असंखेज्जाइं जोयणसहस्साइं अबाहाए लोगंते पन्नत्ते । सेवं भंते ! सेवं भंते !*

**वृ.** 'एवं नेयव्वं' ति पूर्वोक्तप्रश्नोत्तराभिलापेन लोकान्तकविमानवक्तव्यताजातं नेतव्यं, तदेव पूर्वोक्तेन सह दर्शयति-'विमाणाण' मित्यादि गाथार्द्धं, तत्र विमानप्रतिष्ठानं दर्शितमेव, बाहल्यं तु विमानानां पृथिवीबाहल्यं तच्च पञ्चविंशतिर्योजनशतानि, उच्चत्वं तु सप्त योजनशतानि, संस्थानं पुनरेषां नानाविधमनावलिकाप्रविष्टत्वात्, आवलिकाप्रविष्टानि हि वृत्तत्र्यस्रचतुरस्रभेदात् त्रिसंस्थानान्येव भवन्तीति ।

'बंभलोए' इत्यादि, ब्रह्मलोके या विमानानां देवानां च जीवाभिगमोक्ता वक्तव्यता सा तेषु 'नेतव्या' अनुसर्त्तव्या, कियद्दूरम् ? इत्यत आह-'जावे' त्यादि, सा चेयं लेशतः-'लोयंतियविमाणा णं भंते ! कतिवन्ना पन्नत्ता ? गोयमा ! तिवन्ना पं० लोहिया हालिद्दा सुक्किल्ला, एवं पभाए निच्चालोया गंधेणं इट्ठगंधा एवं इट्ठफासा एवं सव्वरयणमया तेसु देवा समचउरंसा अल्लमहुगवन्ना पम्हलेस ।'

लोयंतियविमाणेसु णं भंते ! सव्वे पाणा ४ पुढविकाइयत्ताए ५ देवत्ताए उववन्नपुव्वा ?, 'हंते' त्यादि लिखितमेव, 'केवतियं' ति छान्दसत्वात् कियत्या 'अबाधया' अन्तरेण लोकान्तः प्रज्ञप्त इति ।।

शतकं-६ उद्देशकः-५ समाप्तः

## —: शतकं-६ उद्देशकः-६ :—

व्याख्यातो विमानादिवक्तव्यताऽनुगतः पञ्चमोद्देशकः, अथ षष्ठस्तथाविध एव व्याख्यायते, तत्र—

**मू. (३००)** *कति णं भंते ! पुढवीओ पन्नत्ताओ ?, गोयमा ! सत्त पुढवीओ पन्नत्ताओ, तंजहा-रयणप्पभा जाव तमतमा, रयणप्पभादीणं आवासा भानियव्वा जाव अहेसत्तमाए, एवं जे जत्तिया आवासा ते भानियव्वा जाव कति णं भंते ! अनुत्तरविमाणा पन्नत्ता ?, गोयमा ! पंच अनुत्तरविमाणा पन्नत्ता, तंजहा-विजए जाव सव्वट्ठसिद्धे ।*

**वृ.** 'कइ ण' मित्यादि सूत्रम्, इह पृथिव्यो नरकपृथिव्य ईषत्प्राग्भाराया अनधिकरिष्यमाणत्वात्, इह च पूर्वोक्तमपि यत् पृथिव्याद्युक्तं तत्तदपेक्षमारणान्तिकसमुद्घातवक्तव्यताऽभिधानार्थमिति न पुनरुक्तता ।

**मू. (३०१)** *जीवे णं भंते ! मारणंतियसमुग्घाएणं समोहए समोहनित्ता जे भविए इमीसे रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु अन्नयरंसि निरयावासंसि नेरइयत्ताए उववज्जित्तए से णं भंते ! तत्थगते चेव आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्जा ?, गोयमा ! अत्थेगतिए तत्थगए चेव आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्ज वा, अत्थेगतिए तओ पडिनियत्तति, ततो पडिनियत्तित्ता इहमागच्छति २ दोच्चंपि मारणंतियसमुग्घाएणं समोहणइ २ इमीसे रयणप्पभए पुढवीए तीसाए निरयावाससयसहस्सेसु अन्नयरंसि निरयावाससंसि नेरइयत्ताए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उववज्जित्तए, ततो पच्छा आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्जा एवं जाव अहेसत्तमा पुढवी*

*जीवे णं भंते ! मारणंतियसमुग्घाएणं समोहए २ जे भविए चउसट्ठीए असुरकुमारावाससयसहस्सेसु अन्नयरंसि असुरकुमारावासंसि असुरकुमारत्ताए उववज्जित्तए जहा नेरइया तहा भानियव्वा जाव थनियकुमारा ।*

*जीवे णं भंते ! मारणंतियसमुग्घाएणं समोहए २ जे भविए असंखेज्जेसु पुढविकाइयावाससयसहस्सेसु अन्नयरंसि पुढविकाइयावासंसि पुढविकाइयत्ताए उववज्जित्तए से णं भंते ! मंदरस्स पव्वयस्स पुरच्छिमेणं केवतियं गच्छेज्जा केवतियं पाउणेज्जा ?, गोयमा ! लोयंतं गच्छेज्जा लोयंतं पाउनिज्जा, से णं भंते ! तत्थगए चेव आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्जा ?, गोयमा ! अत्थेगतिए तत्थए चेव आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्ज अत्थेगतिए तओ पडिनियत्तति २ त्ता इह हव्वमागच्छइ २ त्ता दोच्चंपि मारणंतियसमुग्घाएणं समोहणति २ त्ता मंदरस्स पव्वयस्स पुरच्छिमेणं अंगुलस्स असंखेज्जभागमेत्तं वा संखेज्जतिभागमेत्तं वा वालग्गं वा वालग्गपुहुत्तं वा एवं लिक्खं जूयं जवंअंगुलं जाव जोयणकोडिं वा जोयणकोडाकोडिं वा संखेज्जेसु वा असंखेज्जेसु वा जोयणसहस्सेसु लोगंते वा एगपदेसियं सेढिं मोत्तूण असंखेज्जेसु पुढविकाइयावाससयसहस्सेसु अन्नयरंसि पुढविकाइयावासंसि पुढविकाइयत्ताए उववज्जेत्ता तओ पच्छा आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्जा जहा पुरच्छिमेणं मंदरस्स पव्वयस्स आलावओ भणिओ एवं दाहिणेणं पच्चत्थिमेणं उत्तरेणं उड्ढे अहे, जहा पुढविकाइया तहा एगिंदियाणं सव्वेसिं, एक्केक्कस्स छ आलावया भाणियव्वा ।*

*जीवे णं भंते ! मारणंतियसमुग्धाएणं समोहए २ त्ता जे भविए असंखेज्जेसु बेंदियावाससयसहस्सेसु अन्नयरंसि बेंदियावासंसि बेइंदियत्ताए उववज्जित्तए से णं भंते ! तत्थगए चेव जहा नेरइया, एवं जाव अनुत्तरोववाइया ।*

*जीवे णं भंते ! मारणंतियसमुग्धाएणं समोहए २ जे भविए एवं पंचसु अनुत्तरेसु महतिमहालएस महाविमाणेसु अन्नयरंसि अनुत्तरविमाणंसि अनुत्तरोववाइयदेवत्ताए उववज्जित्तए, से णं भंते ! तत्थगए चेव जाव आहारेज्ज वा परिणामेज्ज वा सरीरं वा बंधेज्ज । सेवं भंते ! सेवं भंते*

**वृ.** 'तत्थगए चेव'त्ति नरकावासप्राप्त एव 'आहारेज्ज वा' पुद्गलानादद्यात् 'परिणामेज्ज व'त्ति तेषामेव खलरसविभागं कुर्यात् 'सरीरं वा बंधेज्ज' त्ति तैरेव शरीरं निष्पादयेत्। 'अत्थेगइए'त्ति यस्तस्मिन्नेव समुद्घाते म्रियते 'ततो पडिनियत्तति' ततो-नरकावासात्समुद्घाताद्वा 'इह समागच्छइ'त्ति स्वशरीरे 'केवइयं गच्छेज्ज'त्ति कियद्दूरं गच्छेद् ? गमनमाश्रित्य –

–'केवइयं पाउणेज्ज'त्ति कियद्दूरं प्राप्नुयात् ? अवस्थानमाश्रित्य, 'अंगुलस्स असंखेज्जइभागमेत्तं वे'त्यादि, इह द्वितीया सप्तम्यर्थे द्रष्टव्या, अङ्गुलं इह यावत्करणादिदं दृश्यं-'विहत्थिं वा रयणिं वा कुच्छिं वा घणुं वा कोसं वा जोयणं वा जोयणसयं वा जोयणसहस्सं वा जोयणसयसहस्सं वा' इति 'लोगंते वे'त्यत्र गत्वेति शेषः ।

ततश्चायमर्थः-उत्पादस्थानानुसारेणाङ्गुलासङ्ख्येयभागमात्रादिके क्षेत्रे समुद्घाततो गत्वा, कथम् ? इत्याह-'एगपएसियं सेढिं मोत्तूण'त्ति यद्यप्यसङ्ख्येयप्रदेशावगाहस्वभावो जीवस्तथाऽपि नैकप्रदेशश्रेणीवर्त्यसङ्ख्यप्रदेशावगाहनेन गच्छति तथास्वभावत्वादित्यतस्तां मुक्त्वेत्युक्तमिति

शतकं-६ उद्देशकः-६ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं-६ उद्देशकः-७ :–

**वृ.** षष्ठोद्देशके जीववक्तव्यतोक्ता सप्तमे तु जीवविशेषयोनिवक्तव्यतादिरर्थः उच्यते, तत्र चेदं सूत्रम्-

**मू. (३०२)** *अह णं भंते ! सालीणं वीहीणं गोधूमाणं जवाणं जवजवाणं एएसि णं धन्नाणं कोट्ठाउत्ताणं पल्लाउत्ताणं मंचाउत्ताणं मालाउत्ताणं उल्लित्ताणं लित्ताणं पिहियाणं मुद्दियाणं लंछियाणं केवतियं कालं जोणी संचिट्ठइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि संवच्छराइं तेण परं जोणी पमिलायइ तेण परं जोनि पविद्धंसइ तेणप रं बीए अबीए भवति तेण परं जोणीवोच्छेदे पन्नत्ते समणाउसो !*

*–अह भंते ! कलायमसूरतिलमुग्गमासनिप्फावकुलत्थआलिसंदगसतीणपिमंथगमादीणं एएसि णं धन्नाणं जहा सालीणं तहा एयाणवि, नवरं पंच संवच्छराइं, सेसं तं चेव ।*

*अह भंते ! अयसिकुसुंभगकोद्दवकंगुवरगरालगकोदूसगसणसरिसवमूलगबीयमादीणं एएसि णं धन्नाणं, एयानिवि तहेव, नवरं सत्त संवच्छराइं, सेसं तं चेव ॥*

**वृ.** 'अह भंते' इत्यादि, 'सालीणं'ति कलमादीनां 'वीहणं'ति सामान्यतः 'जवजवाणं'ति यवविशेषाणाम् 'एतेसि ण'-मित्यादि, उक्तत्वेन प्रत्यक्षाणां, 'कोट्ठाउत्ताण'त्ति कोष्ठे-कुशूले आगुप्तानि-तत्प्रक्षेपणेन (संरक्षणेन) संरक्षितानि कोष्ठागुप्तानि तेषां 'पल्लाउत्ताणं'ति इह पल्यो-वंशादिमयो धान्याधारविशेषः 'मंचाउत्ताणं मालाउत्ताण'मित्यत्र मञ्चमालयोर्भेदः- 'अक्कुड्डे होइ मंचो मालो य घरोवरिं होति' 'ओलित्ताणं'ति द्वारदेशे पिधानेन सह गोमयादिनाऽवलिप्तानां 'लित्ताणं'ति सर्वतो गोमयादिनैव लिप्तानां 'पिहियाणं'ति स्थगितानां तथाविधाच्छादनेन 'मुद्दियाणं'ति मृत्तिकादिमुद्रावतां 'लंछियाणं'ति रेखादिकृतलाञ्छनानां, 'जोनि'त्ति अङ्कुरोत्पत्तिहेतुः 'तेण परं'ति ततः परं 'परिमलायइ'त्ति प्रम्लायति वर्णादिना हीयते 'पविद्धंसइ'त्ति क्षीयते ।

एवं च बीजमबीजं च भवति-उप्तमपि नाङ्कुरमुत्पादयति, किमुक्तं भवति ? -'तेण परं जोणीवोच्छेए पन्नत्ते'त्ति । 'कलाय'त्ति कलाया वृत्तचनका इत्यन्ये 'मसूर'त्ति भिलङ्गाः चवलका एवान्ये 'सईण'त्ति तुवरी 'पलिमंथग'त्ति वृत्तचनकाः कालचनका इत्यन्ये 'अयसि'त्ति भङ्गी 'कुसुंभग'त्ति लट्टा 'वरग'त्ति वरट्टो, 'रालग'त्ति कङ्गुविशेषः 'कोदूसग'त्ति कोद्रवविशेषः 'सण'त्ति त्वकप्रधाननालो धान्यविशेषः 'सरिसव'त्ति सिद्धार्थःकाः 'मूलगबीय'त्ति मूलकबीजानि शाकवि-शेषबीजानीत्यर्थः ।

अनन्तरं स्थितिरुक्ताऽतः स्थितेरेव विशेषाणां मुहूर्तादीनां स्वरूपाभिधानार्थःमाह-

**मू. (३०३)** *एगमेगस्स णं भंते ! मुहुत्तस्स केवतिया ऊसासद्धा वियाहिया ?, गोयमा ! असंखेज्जाणं समयाणं समुदयसमितिसमागमेणं सा एगा आवलियत्ति पवुच्चइ, संखेज्जा आवलिया ऊसाओ संखेज्जा आवलिया निस्साओ–*

**वृ.** 'ऊसासद्धा वियाहिय'त्ति उच्छ्वासाद्धा इति उच्छ्वासप्रमितकालविशेषाः 'व्याख्याताः' उक्ता भगवद्भिरिति, अत्रोत्तरम् 'असंखेज्जे'त्यादि, असङ्ख्यातानां समयानां सम्बन्धिनो ये समुदाया-वृन्दानि तेषां याः समितयो-मीलनानि तासां यः समागमः-संयोगः समुदायसमितिसमागमस्तेन यत्कालमानं भवतीति गम्यते सैकाऽऽवलिकेति प्रोच्यते, 'संखेज्जा आवलिय'त्ति किल षट्पञ्चाश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दधिकशतद्वयेनावलिकानां क्षुल्लकभवग्रहणं भवति, तानि च सप्तदश सातिरेकानि उच्छ्वासनिश्वासकाले, एवं च सङ्घयाता आवलिका उच्छ्वासकालो भवति।

**मू. (३०४)** *हट्ठस्स अणवगल्लस, निरुवकिट्ठस्स जंतुणो।*
*एगे ऊसासनीसासे, एस पाणुत्ति वुच्चति॥*

**वृ.** 'हट्ठस्से'त्यादि, 'हृष्टस्य' तुष्टस्य 'अनवकल्पस्य' जरसाऽनभिभूतस्य 'निरुपक्लिष्टस्य' व्याधिना प्राक् साम्प्रतं चानभिभूतस्य 'जन्तोः' मनुष्यादेरेक उच्छ्वासेन सह निःश्वास उच्छ्वासनिश्वासः य इति गम्यते एष प्राण इत्युच्यते ।

**मू. (३०५)** *सत्तपाणूइं से थोवे सत्तं थोवाइ से लवे।*
*लवाणं सत्तहत्तरिए एस मुहूत्ते वियाहिए ॥*

**वृ.** 'सत्ते' त्यादि गाथा, 'सत्त पाणू' इति प्राकृतत्वात् सप्त प्राणा उच्छ्वासनि-श्वासा य इति गम्यते स स्तोक इत्युच्यत इति वर्त्तते, एवं सप्त स्तोका ये स लवः, लवानां सप्तसप्तत्या एषः-अधिकृतो मुहूर्त्तो व्याख्यात इति।

**मू. (३०६)** *तिन्नि सहस्सा सत्त य सयाइं तेवत्तरिं च ऊसासा।*
*एस मुहुत्तो दिट्ठो सव्वेहिं अनंतनाणीहिं॥*

**वृ.** 'तिन्नि सहस्सा' गाहा अस्या भावार्थोऽयम्-सप्तभिरुच्छासैः स्तोकः स्तोकाश्च लवे सप्त ततो लवः सप्तभिर्गुनितो जातैकोनपञ्चाशत्, मुहूर्त्ते च सप्तसप्ततिर्लवा इति सा एकोनपञ्चाशता गुनितेते जातं यथोक्तं मानमिति ।

**मू. (३०७)** *एएणं मुहुत्तपमाणेणं तीसमुहुत्तो अहोरत्तो, पन्नरस अहोरत्ता पक्खो दो पक्खा मासे दो मासा उऊ तिन्नि उउए अयणे दो अयणे संवच्छरे पंचसवच्छरिए जुगे वीसं जुगाइं वाससयं दस वाससयाइं वाससहस्सं सयं वाससहस्साइं वाससयसहस्सं चउरासीत वाससयसहस्सानि से एगे पुव्वंगे चउरासीती पुव्वंगसयसहस्सां से एगे पुव्वे, ।*

*एवं तुडिए २ अडडे २ अववे २ हूहूए २ उप्पले २ पउमे २ नलिणे २ अच्छनिउरे २ अउए २ पउए य २ नउए य २ चूलिया २ सीसपहेलया २ एताव ताव गनिए एताव ताव गनियस्स विसए, तेण परं ? ओवमिए।*

*से कि तं ओवमिए ?, २ दुविहे पन्नत्ते, तंजहा-पलिओवमे य सागरोवमे य, से किं तं पलिओवमे ? से किं तं सागरोवमे ? ।*

**वृ.** 'एताव ताव गनियस्स विसए' त्ति एतावान्-शीर्षप्रहेलिकाप्रमेयराशिपरिमाणः तावदिति क्रमार्थः गनितविषयो-गनितगोचरः गनितप्रमेय इत्यर्थः। 'ओवमिय' त्ति उपमया निर्वृत्तामौपमिकं उपमामन्तरेण यत् कालप्रमाणमनतिशयिना ग्रहीतुं न शक्यते तदौपमिकमिति भावः ॥ अथ पल्योपमादिप्ररूपणाय परमाण्वादिस्वरूपमभिधित्सुराह–

**मू. (३०८)** *सत्थेण सुतिक्खेणवि छेत्तुं भेत्तुं च जं किर न सक्का।*
*तं परमाणुं सिद्धा वयंति आदिं पमाणाणं॥*

**वृ.** 'सत्थेणे'त्यादि, छेत्तुमिति खड्गादिना द्विधा कर्त्तु 'भेत्तुं' सूच्यादिना सच्छिद्रं कर्त्तु 'वा' विकल्पे किलेति इत्यर्थः न तु सिद्धाः- सिद्धिं गतास्तेषां वदनस्यासम्भवादिति, 'आदिं' प्रथमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'प्रमाणानं' वक्ष्यमाणोत्श्लक्ष्णश्लक्ष्णिकादीनामिति, यद्यपि च नैश्चयिकरपमाणोरपीदमेव लक्षणं तथाऽपीह प्रमाणाधिकाराद्व्यावहारिकपरमाणुलक्षणमिदमवसेयम् ॥

**मू. (३०९)** *अनंताणं परमाणुपोग्गलाणं समुदयसमितिसमागमेणं सा एगा उस्सण्हसण्हियाति वा सण्हसण्हियाति वा उड्ढरेणूति वा तसरेणूति वा रहरेणूति वा वालग्गेइ वा लिक्खाति वा जूयाति वा जवमज्झेति वा अंगुलेति वा, अट्ठ उस्सण्हसण्हियाओ सा एगा सण्हसण्हिया अट्ठ सण्हसण्हियाओ सा एगा उड्ढरेणू अट्ठ उड्ढरेणूओ सा एगा तसरेणू अट्ठ तसरेणूओ सा एगा रहरेणू अट्ठ रहरेणूओ से एगे देवकुरुउत्तरकुरुगाणं मणूसाणं वालग्गे एवं हरिवासरम्मगहेमवएरन्नवयाणं पुव्वविदेहाणं मणूसाणं अट्ठ वालग्गा सा एगा लिक्खा अट्ठ लक्खाओ सा एगा जूया।*

*अट्ठ जूयाओ से एगे जवमज्झे अट्ठट्ठजवमज्झाओ से एगे अंगुले, एएणं अंगुलपमाणेणं च अंगुलानि पादो बारस अंगुलाइं विहत्थी चउव्वीसं अंगुलाइं रयणी अडयालीसं अंगुलाइं कुच्छी छन्नउति अंगुलानि से एगे दंडेति वा धनूति वा जूएति वा नालियाति वा अक्खेति वा मुसलेति वा, एएणं धनुप्पमाणेणं दो धनुसहस्साइं गाउयं चत्तारि गाउयाइं जोयणं।*

*एएणं जोयणप्पमाणेणं जे पल्ले जोयणं आयामविक्खंभेणं जोयणं उड्ढं उच्चत्तेणं तं तिउणं सविसेसं परिरएणं, से णं एगाहियबेहायतेयाहिय उक्कोसं सत्तरत्तप्परूढाणं संभट्ठे संनिचिए भरिए वालग्गकोडीणं, से णं वालग्गे नो अग्गी दहेज्जा नो वाऊ हरेज्जा नो कुत्थेज्जा नो परिविद्धंसेज्जा नो पूतित्ताए हव्वमागच्छेज्जा, ततो णं वाससए २ एगमेगं वालग्गं अवहाय जावतिएणं कालेणं से पल्ले खीणे नीरए निम्मले निट्ठिए निल्लेवे अवहडे विसुद्धे भवति, से तं पलिओवमे। गाहा-*

**वृ.** अथ प्रमाणान्तरलक्षणमाह-'अनंताण'मित्यादि, 'अनन्तानां' व्यावहारिकपरमाणुपुद्गलानां समुदयाः-द्व्यादिसमुदयास्तेषां समितयोमीलनानि तासां समागमः-परिणामवशादेकीभवनं समुदयसमितिसमागमस्तेन या परिमाणमात्रेति गम्यते, सा एकाऽत्यन्तं श्लक्ष्णा श्लक्ष्णश्लक्ष्णा सैव श्लक्ष्णश्लक्ष्णिका उत्-प्राबल्येन श्लक्ष्णश्लक्ष्णिका उतश्लक्ष्णश्लक्ष्णिका 'इति' उपदर्शने 'वा' समुच्चये, एते च उत्श्लक्ष्णशलक्ष्णिकादयोऽङ्गुलान्ता दश प्रमाणभेदा यतोत्तरमष्टगुणाः सन्तोऽपि प्रत्येकमनन्तपरमाणुत्वं न व्यभिचरन्तीत्यत उक्तम्-

'उस्सण्हसण्हियाइ वे'त्यादि, 'सण्हसण्हिय'त्ति प्राक्तनप्रमाणापेक्षयाऽष्टगुणत्वाद् उर्द्धरेण्वपेक्षया त्वष्टमभागत्वात् श्लक्ष्णश्लक्ष्णिका इत्युच्यते, 'उड्ढरेणु'त्ति उर्द्धाधस्तिर्यक्चलनधर्मोपलभ्यो रेणुः उर्द्धरेणुः 'तसरेणु'त्ति त्र्यस्यति-पौरस्त्यादिवायुप्रेरितो गच्छति यो रेणुः स त्रसरेणुः 'रहरेणु'त्ति रथगमनोत्खातो रेणू रथरेणुः, वालाग्रलिक्षादयः प्रतीताः 'रयनि'त्ति हस्तः 'नालिय'त्ति यष्टिविशेषः 'अक्खे'त्ति शकटावयवविशेषः 'तं तिउणं सविसेसं परिरएणं'ति तद् योजनं त्रिगुणं सविशेषं, वृत्तपरिधेः किञ्चिन्न्यूनषड्भागाधिकत्रगुणत्वात्, 'सेणं एक्काहियबेहियतेहिय'त्ति षष्ठीबहुवचनलोपाद् एकाहिकद्व्याहिकत्र्याहिकानाम् 'उक्कोस'त्ति उत्कर्षतः सप्तरात्रप्ररूढानां भृतो वालाग्रकोटीनामिति सम्बन्धः, तत्रैहिक्यो मुण्डिते शिरसि एकेनाह्ना यावत्यो भवन्तीति, एवं शेषास्वपि भावना कार्या।

कथम्भूतः ? इत्याह-'संमृष्टः' आकर्णभृतः संनिचितः प्रचयविशेषान्निविडः, किंबहुना ?० एवं भृतोऽसौ येन 'ते णं'ति तानि वालाग्रानि 'नो कुत्थेज्ज'त्ति न कुथ्येयुः प्रचयविशेषाच्छुषिरा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावाद्वायोरसम्भवाच्च नासारतां गच्छेयुरित्यर्थः, अत एव 'नो परिविद्धंसेज्ज'त्ति न परिविध्वंसेरन्-कतिपयपरिशाटमप्यङ्गीकृत्य न विध्वंसं गच्छेयुः, अत एव च 'नो पूइत्ताए हव्वमागच्छेज्ज'त्ति न पूतितया-न पूतिभावं कदाचिदागच्छेयुः 'तओ णं'ति तेभ्यो वालाग्रेभ्यः 'एगमेगं वालग्गं अवहाय'त्ति एकैकं वालाग्रमपनीय कालो मीयत इति शेषः, ततश्च 'जावइएण'मित्यादि, यावता कालेन स पल्यः 'खीणे'त्ति वालाग्राकर्षणात्क्षयमुपगत आकृष्टधान्यकोष्ठागारवत्, तथा 'नीरए'त्ति निर्गत-रजःकल्पसूक्ष्मतरवालाग्रोऽपकृष्टधान्ययरजःकोष्ठागारवत्, तथा 'निम्मले'त्ति विगतमलकल्प-सूक्ष्मतरवालाग्रः प्रमार्जनिकाप्रमृष्टकोष्ठागारवत्, तथा 'निट्ठिय'त्ति अपनेयद्रव्यापनयमाश्रित्य निष्ठां गतः विशिष्टप्रयत्नप्रमार्जितकोष्ठागारवत्, तथा 'निल्लेव'त्ति अत्यन्तसंश्लेषात्तन्मयतागत-वालाग्रापहारादपनीतभित्त्यादिगत धान्यलेपकोष्ठागारवत्, अथ कस्मान्निर्लेपः ? इत्यत आह-'अवहडे'त्ति निशेषवालाग्रलेपापहारात् अत एव 'विसुद्धे'त्ति रजोमलकल्पवालाग्रविगमकृतशुद्ध-त्वापेक्षया लेपकल्पवालाग्रापहरणेन विशेषतः शुद्धो विशुद्धः, एकार्थाश्चेते शब्दाः, व्यावहारिकं चेदमद्धापल्योपमं, इदमेव यदाऽसङ्ख्येयखण्डीकृतैकैकवालाग्रभृतपल्याद्वर्षशते २ खण्डशोऽ-पोद्धारः क्रियते तदा सूक्ष्ममुच्यते, समये समयेऽपोद्धारे तु द्विधैवोद्धारपल्योपमं भवति, तथा तैरेव पालाग्रैर्ये स्पृष्टाः प्रदेशास्तेषां प्रतिसमयापोद्धारे यः कालस्तद्व्यावहारिकं क्षेत्रपल्योपमं, पुनस्तैरेवासङ्ख्येय- खण्डीकृतैः स्पृष्टास्पृष्टानां तथैवापोद्धारे यः कालस्तत्सूक्ष्मं क्षेत्रपल्योपमम् ॥

**मू. (३१०)** *एएसिं पल्लाणं कोडाकोडी हवेज्ज दसगुनिया ।*
*तं सागरोवमस्स उ एक्कस्स भवे परिमाणं ॥*

**मू. (३११)** *एएणं सागरोवमपमाणेणं चत्तारि सागरोवमकोडाकोडीओ कालो सुसमसुसमा १ तिन्नि सागरोवमकोडाकोडीओ कालो सुसमा २ दो सागरोवमकोडाकोडीओ कालो सुसमदूसमा ३ एगा सागरोवमकोडाकोडी बायालीसाए वाससहस्सेहिं ऊनिया कालो दूसमसुसमा ४ एक्कवीसं वाससहस्साइं कालो दूसमा ५ एक्कवीसं वाससहस्साइं कालो दूसमदूसमा ६ ।*

*पुनरवि उस्सप्पिणीए एक्कवीसं वाससहस्साइं कालो दूसमदूसमा १ एक्कवीसं वाससहस्साइं जाव चत्तारि सागरोवमकोडाकोडीओ कालो सुसमसुसमा, दस सागरोवमकोडाकोडीओ कालो ओसप्पिणी दस सागरोवमकोडाकोडी कालो उस्सप्पिणी वीसं सागरोवमकोडाकोडीओ कालो ओसप्पिणी य उस्सप्पिणी य ॥*

**वृ.** एवं सागरोपममपि विज्ञेयमिति ॥ कालाधिकारादिदमाह–

**मू. (३१२)** *जंबूद्दीवे णं भंते ! दीवे इमीसे ओसप्पिणीए सुसमसुसभाए समाए उत्तमट्ठ-पत्ताए भरहस्स वासस्स केरिसए आगारभावपडोयारे होत्था ?, गोयमा ! बहुसमरमनिज्जे भूमिभागे होत्था, से जहानामए-आलिंगपुक्खरेति वा एवं उत्तरकुरुवत्तव्वया नेयव्वा जाव आसयंति सयंति, तीसे णं समाए भारहे वासे तत्थ २ देसे २ तहिं २ बहवे ओराला कुद्दाला जाव कुसविकुसविसुद्ध-रुक्खमूला जाव छव्विहा मणुस्सा अणुसज्जित्था पन्नत्ता० तं०-पम्हगंधा १ मियगंधा २ अममा ३ तेयतली ४ सहा ५ सनिंचारि ६ । सेवं भंते ! सेवं भंते ! ॥*

**वृ.** 'जंबुद्दीवेण'मित्यादि, 'उत्तमट्ठपत्ताए'त्ति उत्तमान्-तत्कालापेक्षयोत्कृष्टानर्थान्-आयुष्का-दीन् प्राप्ता उत्तमार्थःप्राप्ता उत्तमकाष्ठां प्राप्ता वा-प्रकृष्टावस्थां गता तस्याम् 'आगारभावपडोयारे'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकारस्य-आकृतेर्भावाः-पर्यायाः, अथवाऽऽकाराश्च भावाश्च आकारभावास्तेषां प्रत्यवतारः-अवतरणमाविर्भाव आकारभावप्रत्यवतारः 'बहुसमरमनिज्ज'त्ति बहुसमः-अत्यन्तसमोऽत एव रमणीयो यः स तथा, 'आलिंगपुक्खरे'त्ति मुरजमुखपुटं, लाघवाय सूत्रमतिदिशन्नाह–

'एव'मित्यादि, उत्तरकुरुवक्तव्यता च जीवनाभिगमोक्तैवं दृश्या-'मुइंगपुक्खरेइ वा सरतलेइ वा' सरस्तलं सर एव 'करतलेइ वा' करतलं करएवेत्यादिति। एवं भूमिसमताया भूमिभागगततृणमणीनां वर्णपञ्चकस्य सुरभिगन्धस्य मृदुस्पर्शस्य शुभशब्दस्य वाप्यादीनां वाप्याद्यनुगतोत्पातपर्वतादीनामुत्पातपर्वताद्याश्रितानां हंसासनादीनां लतागृहादीनां शिलापट्टकादीनां च वर्णको वाच्यः, तदन्ये चैतद् दृश्यम्-'तत्थ णं बहवे भारया मणुस्सा मणुस्सीओ य आसयंति सयंति चिट्ठंति निसीयंति तयट्टंती'त्यादि।

'तत्थ तत्थे'त्यादि, तत्र तत्र भारतस्य खण्डे खण्डे 'देसे देसे' खण्डांशे खण्डांशे 'तहिं तहिं'ति देशस्यान्ते, २, उद्दालकादयो वृक्षविशेषाः यावत्करणात् 'कयमाला नट्टमाला'इत्यादि दृश्यं, 'कुसविकुसविसुद्धरुक्खमूल'त्ति कुशाः-दर्भा विकुशा-बल्वजादयः तृणविशेषास्तैर्विशुद्धानि-तदपेदानि वृक्षमूलानितदधोभागा येषां ते तथा, यावत्करणात् 'मूलमंतो कंदमंतो'इत्यादि दृश्यम्, 'अनुसज्जित्थ'त्ति 'अनुसक्तवन्तः' पूर्वकालात् कालान्तरमनुवृत्तवन्तः 'पम्हगंध'त्ति पद्मसमगन्धयः 'मियगंध'त्ति मृगभदगन्धयः 'अनुसक्तवन्तः' पूर्वकालात् कालान्तरमनुवृत्तवन्तः 'पम्हगंधत्ति पद्मसमगन्धयः 'मियगंध''त्ति मृगमदगन्धयः 'अमम'तति ममकाररहिताः 'तेयतलि'त्ति तेजश्च तलं च-रूपं येषामस्ति ते तेजस्तलिनः 'सह'त्ति सहिष्णवः समर्था 'सनिंचारे'त्ति शनैः-मन्दमुत्सुकत्वाभावाच्चरन्तीत्येवंशीलाः शनैश्चारिणः ॥

शतकं-६ उद्देशकः-७ समाप्तः

## –: शतकं-६ उद्देशकः-८ :–

**वृ.** सप्तमोद्देशके भारतस्य स्वरूपमुक्तमष्टमे तु पृथिवीनां तदुच्यते, तत्र चादिसूत्रम्-

**मू. (३१३)** *कइ णं भंते! पुढवीओ पन्नत्ताओ?, गोयमा! अट्ठ पुढवीओ पन्नत्ताओ, तंजहा-रयणप्पभा जाव इसीपब्भारा। अत्थि णं भंते! इमीसे रयणप्पभाए पुढवीए अहे गेहाति वा गेहावणाति वा?, गोयमा! नो तिणट्ठे समट्ठे।*

*अत्थि णं भंते! इमीसे रयणप्पभाए अहे गामाति वा जाव संनिवेसाति वा? नो तिणट्ठे समट्ठे। अत्थि णं भंते! इमीसे रयमप्पभाए पुढवीए अहे उराला बलाहया संसेयंति संमुच्छंति वासं वासंति?, हंता अत्थि, तिन्निवि पकरेंति देवोवि पकरेति असुरोवि प० नागोवि प०।*

*अत्थि णं भंते! इमीसे रयण० बादरे थनियसद्दे?, हंता अत्थि, तिन्निवि पकरेंति। अत्थि णं भंते! इमीसे रयण० अहे बादरे अगनिकाए?, गोयमा! नो तिणट्ठे समट्ठे, नन्नत्थ विग्गहगतिसमावन्नएणं। अत्थि णं भंते! इमीसे रयण० अहे चंदिम जाव तारारूवा?, नो तिणट्ठे समट्ठे। अत्थि णं भंते! इमीसे रयणप्पभाए पुढवीए चंदाभाति वा २?, नो इणट्ठे समट्ठे।*

*एवं दोच्चाएवि पुढविए भानियव्वं, एवं तच्चाएवि भानियव्वं, नवरं देवोवि पकरेति असुरोवि पकरेति नो नागो पकरेति, चउत्थाएवि एवं नवरं देवो एक्को पकरेति नो असुरो० नो नागो पकरेति, एवं हेट्ठिल्लासु सव्वासु देवो एक्को पकरेति।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अत्थि णं भंते ! सोहम्मीसाणाणं कप्पाणं अहे गेहाइ वा २ ?, नो इणट्ठे समट्ठे । अत्थि णं भंते ! उराला बलाहया ? हंता अत्थि, देवो पकरेति असुरोवि पकरेइ नो नाओ पकरेइ, एवं थनियसद्देवि ।*

*अत्थि णं भंते ! बायरे पुढविकाए बादरे अगनिकाए ?, नो इणट्ठे समट्ठे, नन्नत्थ विग्गहगतिसमावन्नएणं । अत्थि णं भंते ! चंदिम० ?, नो तिणट्ठे समट्ठे । अत्थि णं भंते ! गामाइ वा ?, नो तिणट्ठे स० । अत्थि णं भंते ! चंदाभाति वा ?, नो तिणट्ठे समट्ठे ।*

*एवं सणंकुमारमाहिंदेसु नवरं देवो एगो पकरेति । एवं बंभलोएवि । एवं बंभलोगस्स उवरिं सव्वहिं देवो पकरेति, पुच्छियव्वो य, बायरे आउकाए बायरे अगनिकाए बायरे वन्नस्सइकाए अन्नं तं चेव ।। गाहा–*

**वृ.** 'कइ ण'मित्यादि, 'बादरे अगनिकाए'इत्यादि, ननु यथा बादराग्नेर्मनुष्यक्षेत्र एव सद्‌भावान्निषेध इहोच्यते एवं बादरपृथिवीकायस्यापि निषेधो वाच्यः स्यात् पृथिव्यादिष्वेव स्वस्थानेषु तस्य भावादिति, सत्यं, किन्तु नेह यद्यत्र नास्ति तत्तत्र सर्वं निषिध्यते मनुष्यादिवद् विचित्रत्वात् सूत्रगतेरतोऽसतोऽपीह पृथिवीकायस्य न निषेध उक्तः, अप्कायायुवनस्पतीनां त्विह घनोदध्यादिभावेन भावान्निषेधाभावः सुगम एवेति, 'नो नाओ'त्ति नागकुमारस्य तृतीयायाः पृथिव्या अधोगमनं नास्तीत्यत एवानुमीयते ।

'नो असुरो नो नागो'त्ति, इहाप्यत इव वचनाच्चतुर्थ्यादीनामधोऽसुरकुमारनागकुमारयोर्गमनं नास्तीत्यनुमीयते, सौधर्मेशानयोस्त्वधोऽसुरो गच्छति चमरवत् न नागकुमारः अशक्तत्वात्, अत एवाह- 'देवो पकरे'इत्यादि, इह च बादरपृथिवीतेजसोर्निषेधः सुगम एवास्वस्थानत्वात्, तथाऽब्वायुवनस्पतीनामनिषेधोऽपि सुगम एव, तयोरुदधिप्रतिष्ठितत्वेनाब्वनस्पतिसम्भवाद् वायोश्च सर्वत्र भावादिति ।

'एवं सणंकुमारमाहिंदेसु'त्ति इहातिदेशतो बादराब्वनस्पतीनां सम्भवोऽनुमीयते, स च तमस्कायसद्‌भावतोऽवसेय इति । 'एवं बंभलोयस्स उवरिं सव्वहिं'ति अच्युतं यावदित्यर्थः, परतो देवस्यापि गमो नास्तीति न तत्कृतबलाहकादेर्भावः 'पुच्छियव्वो य'त्ति बादरोऽप्कायोऽग्निकायो वनस्पतिकायश्च प्रष्टव्यः, 'अन्नं तं चेव'त्ति वचनान्निषेधश्च, यतोऽनेन विशेषोक्तादन्यत्सर्वं पूर्वोक्तमेव वाच्यमिति सूचितं, तथा ग्रैवेयकादीषत्प्राग्भारान्तेषु पूर्वोक्तं सर्वं गेहादिकमधिकृतवाचनायामनुक्तमपि निषेधतोऽध्येयमिति ।। अथ पृथिव्यादयो ये यत्राध्येतव्यास्तां सूत्रसङ्ग्रहगाथयाऽऽह–

**मू. (३१४)** *तमुकाए कप्पपणए अगनी पुढवी य अगनि पुढवीसु ।*
*आउतेऊवणस्सइ कप्पुवरिमकण्हराईसु ।।*

**वृ.** 'तमुकाय'गाहा, 'तमुकाए'त्ति तमस्कायप्रकरणे प्रागुक्ते 'कप्पपणए'त्ति अनन्तरोक्तसौधर्मादिदेवलोकपञ्चके च 'अगनी पुढवी य'त्ति अग्निकायपृथिवीकायावध्यतव्यौ-'अत्थि णं भंते ! बादरे पुढविकाए बादरे अगनिकाए ?, नो इणट्ठे समट्ठे, नन्नत्थ विग्गहगतिसमावन्नएणं' इत्यनेनाभिलापेन ।

तथा 'अगनि'त्ति अग्निकायोऽध्येतव्यः 'पुढवीसु'त्ति रत्नप्रभादिपृथिवीसूत्रेषु, 'अत्थि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं भंते ! इमीसे रयणप्पभाए पुढवीए अहे बादरे अगनिकाए' इत्याद्यभिलापेनेति । तथा 'आउतेऊव-णस्सइ' त्ति अप्कायतेजोवनस्पतयोऽध्येतव्याः-'अत्थि णंभंते !' बादरे आउकाए बायरे तेउक्काए बायरे वणस्सइकाए ?, नो इणट्ठेण समट्ठे' इत्यादिनाऽभिलापेन, केषु ?

इत्याह-'कप्पुवरिम' त्ति कल्पपञ्चकोपरितनकल्पसूत्रेषु, तथा 'कण्हराईसु' त्ति प्रागुक्ते कृष्णराजीसूत्र इति, इह च ब्रह्मलोकोपरितनस्थानामधो योऽब्वनस्पतिनिषेधः स यान्यब्वायुप्रति-ष्ठितानि तेषामध आनन्तर्येण वायोरेव भावादाकाशप्रतिष्ठितानामाकाशस्यैव भावादवगन्तव्यः, अग्नेस्त्वस्थस्थानादिति ।

अनन्तरं बादराप्कायादयोऽभिहितास्ते चायुर्बन्धे सति भवन्तीत्यायुर्बन्धसूत्रम्-

**मू. (३१५)** *कतिविहे णं भंते ! आउयबंधए पन्नत्ता ?, गोयमा ! छव्विहे आउयबंधे पन्नत्ते, तंजहा-जातिनामनिहत्ताउए १ गतिनामनिहत्ताउए २ ठितिनामनिहत्ताउए ३ ओगाहणा-नामनिहत्ताउए ३ पएसनामनिहत्ताउए ५ अनुभागनामनित्ताउए ६ दंडओ जाव वेमानियाणं ।*

*जीवा णं भंते ! किं जाइनामनिहत्ता जाव अनुभागनिहत्ता ?, गोयमा ! जातिनामनिहत्तावि जाव अनुभागनामनिहत्तावि, दंडओ जाव वेमानियाणं । जीवा णं भंते ! किं जाइनामनिहत्ताउया जाव अनु भागनामनिहत्ताउया ?, गोयमा ! जाइनामनिहत्ताउयावि जाव अनुभागनामनिहत्ता-उयावि, दंडओ जाव वेमानियाणं । एवं एए दुवालस दंडगा भानियव्वा ।*

*जीवा णं भंते ! किं जातिनामनिहत्ता १ जाइनाम- निहत्ताउया २ ?, १२ ।*

*जीवा णं भंते ! किं जाइनामनिउत्ता ३ जातिनामनिउत्ताउया ४ जाइगोयनिहत्ता ५ जाइगोय-निहत्ताउया ६ जातिगोयनिउत्ता ७ जाइगोयनिउत्ताउया ८ जाइनामगोयनिहत्ता ९ जाइनाम-गोयनिहत्ताउया १० जाइनामगोयनिउत्ता ११ ? जीवा णं भंते ! किं जाइनामगोयनिउत्ताउया १२ जाव अनुभागनामगोयनिउत्ताउया ?, गोयमा ! जाइनामगोयनिउत्ताउयावि जाव अनुभाग-नामगोयनिउत्ताउयावि दंडओ जाव वेमानियाणं ॥*

**वृ.** तत्र 'जातिनामनिहत्ताउए' त्ति जाति एकेन्द्रियजात्यादि पञ्चधा सैव नामेति-नामकर्मण उत्तरप्रकृतिविशेषो जीवपरिणामो वा तेन सह निधत्तं-निषिक्तं यदायुस्तज्जातिनामनिधत्तायुः, निषेकश्च कर्म्मपुदूगलानां प्रतिसमयमनुभवनार्थं रचनेति १, 'गतिनामनिधत्ताउए' त्ति गति-नरकादिका चतुर्धा शेषं तथैव २, 'ठिइनामनिधत्ताउए' त्ति स्थितिरिति यत्स्थातव्यं क्वचिद्विवक्षित-भवे जीवेनायुः कर्मणा वा सैव नामः-परिणामो धर्म स्थितिनामः तेन विशिष्टं निधत्तं यदायुर्दलिकरूपं तत् स्थितिनामनिधत्तायुः ३ ।

अथवेह सूत्रे जातिनामगतिनामावगाहनानामग्रहणाज्जातिगत्यवगाहनानां प्रकृतिमात्रमुक्तं, स्थितिप्रदेशानुभागनामग्रहणात्तु तासामेव स्थित्यादय उक्तास्ते च जात्यादिनामसम्बन्धित्वान्नाम कर्मरूपा एवेति नामशब्दः सर्वत्र कर्मार्थो घटत इति स्थितिरूपं नाम-नामकर्म्म स्थितिनाम तेन सह निधत्तं यदायुस्तत्स्थितिनामनिधत्तायुरिति ३, 'ओगाहणानामनिधत्ताउए' त्ति अवगाहते यस्यां जीवः साऽवगाहना-शरीरं औदारिकादि तस्या नाम-औदारिकादिशरीरनामकर्म्मेत्यवगाहनानाम अवगाहनारूपो वा नामःपरिणामोऽवगाहनानाम तेन सह यन्निधत्तमायुस्तदवगाहनानामनिध त्तायुः ४, 'पएसनामनिहत्ताउए' त्ति प्रदेशानां-आयुःकर्म्मद्रव्याणां नाम-तथाविधा परिणति प्रदेश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामः प्रदेशरूपं वा नाम-कर्मविशेष इत्यर्थः प्रदेशनाम तेन सह निधत्तमायुस्तत्प्रदेशनामनिधत्तायुरिति ५।

'अनुभागनामनिधत्ताउए'त्ति अनुभाग-आयुर्द्रव्याणामेव विपाकस्तल्लक्षण एव नाम-परिणामोऽनुभागनामः अनुभागरूपं वा नामकर्म अनुभागनाम तेन सह निधत्तं यदायुस्तद-नुभागनामनिधत्तायुरिति ६।

अथ किमर्थं जात्यादिनामकर्म्मणाऽऽयुर्विशेष्यते?, उच्यते, आयुष्कस्य प्राधान्योपदर्शनार्थं यस्मान्नारकाद्यायुरुदये सि जात्यादिनामकर्म्मणामुदयो भवति, नारकादिभवोपग्राहकं चायुरेव, यस्मादुक्तमिहैव।

'नेरइए णं भंते! नेरइएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ?, गोयमा! नेरइए नेरइएसु उववज्जइ नो अनेरइए नेरइएसु उववज्जइ'त्ति, एतदुक्तं भवति-नारकायुःप्रथमसमयसंवेदन एव नारका उच्यन्ते तत्सहचारिणां च पञ्चेन्द्रियजात्यादिनामकर्मणामप्युदय इति, इह चायुर्बन्धस्य षड्विधत्वे उपक्षिप्ते यदायुषः षड्विधत्वमुक्तं तदायुषो बन्धाव्यतिरेकाद्बद्धस्यैव चायुर्व्यपदेश-शिष्यत्वादिति। 'दंडओ'त्ति 'नेरइयाणं भंते! कतिविहे आउयबंधे पन्नते'? इत्यादिर्वैमानि-कान्तश्चतुर्विंशतिदण्डको वाच्योऽत एवाह-'जाव वेमानियाणं'ति॥

अथ कर्म्मविशेषाधिकारात्तद्विशेषितानां जीवादिपदानां द्वादश दण्डकानाह-'जीवा णं भंते!' इत्यादि, 'जातिनाम निहत्त'त्ति जातिनाम निधत्तं-निषिक्तं विशिष्टबन्धं वा कृतं यैस्ते जातिनामनिधत्ताः १ एवं गतिनामनिधत्ताः २, यावत्करणात् 'ठितिनामनिहत्ता ३ ओगाहणा-नामनिहत्ता ४ पएसनामनिहत्ता ५ अनुभागनामनिहत्ता ६' इति दृश्यं, व्याख्या तथैव।

नवरं जात्यादिनाम्नां या स्थितिर्ये च प्रदेशा यश्चानुभागस्तत्स्थित्यादिनाम अवगाहनानाम-शरीरनामेति, अयमेको दण्डको वैमानिकान्तः १, तथा 'जातिनामनिहत्ताउ'त्ति जातिनाम्ना सह निधत्तमायुर्यैस्ते जातिनामनिधत्तायुषः, एवमन्यान्यपि पदानि, अयमन्यो दण्डकः २, एवमेते 'दुवालस दंडग'त्ति अमुना प्रकारेण द्वादश दण्डका भवन्ति, तत्र द्वावाद्यौ दर्शितावपि सङ्ख्यापूरणार्थं पुनर्दर्शयति-जातिनामनिधत्ता इत्यादिरेकः, 'जाइनामनिहत्ताउया' इत्यादिर्द्वितीयः २।

'जीवा णं भंते! किं जाइनामनिउत्ता'इत्यादिस्तृतीयः ३, तत्र जातिनाम नियुक्तं-नितरां युक्तं संबद्धं निकाचितं वेदेन वा नियुक्तं यैस्ते जातिनामनियुक्ताः, एवमन्यान्यपि ५, 'जाइना-मनिउत्ताउया'इत्यादिश्चतुर्थः, तत्र जातिनाम्ना सह नियुक्तं-निकाचितं वेदयितुमारब्धं वाऽऽयुर्यैस्ते तथा, एवमन्यान्यपि ५, 'जाइगोयनिहत्ता' इयादि पञ्चमः, तत्र जातेः-एकेन्द्रियादिकाया यदुचितं गोत्रं-नीचैर्गोत्रादि तज्जातिगोत्रं तन्निधत्तं यैस्ते जातिगोत्रनिधत्ता, एवमन्यान्यपि ५, जाइगोयनिह-त्ताउया य इत्यादि षष्ठः, तत्र जितागोत्रेण सह निधत्तमायुर्यैस्ते जातिगोत्रनिधत्तायुष एवमन्यान्यपि ५ 'जाइगोयनिउत्ता'इत्यादिसप्तमः ७ तत्र जातिगोत्रं नियुक्तं यैस्ते तथा, एवमन्यान्यपि ५।

-'जाइगोयनिउत्ताउया'इत्यादिरष्टमः ८ तत्र जातिगोत्रेण सह नियुक्तमायुर्यैस्ते तथा एवम- न्यान्यपि ५, 'जातिनामगोयनिहत्ता'इत्यादिर्नवमः ९ तत्र जातिनाम गोत्रं च निधत्तं यैस्ते तथा, एवमन्यान्यपि ५।

'जीवा णं भंते! किं जाइनामगोयनिहत्ताउया?' इत्यादिर्दशमः १० तत्र जातिनाम्ना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोत्रेण च सह निधत्तमायुर्यैस्ते तथा, एवमन्यान्यपि ५, 'जाइनामगोयनिउत्ता' इत्यादिरेकादशः ११ तत्र जातिनाम गोत्रं च नियुक्तं यैस्ते तथा, एवमन्यान्यपि ५, 'जीवा णं भंते ! किं जाइनामगोयनिउत्ताउया' इत्यादिर्द्वादशः १२, तत्र जातिनाम्ना गोत्रेण च सह नियुक्तमायुर्यैस्ते तथा, एवमन्यान्यपि ५।

इह च जात्यादिनामगोत्रयोरायुषश्च भवोपग्राहे प्राधान्यख्यापनार्थं यतायोगं जीवा विशेषिताः, वाचनान्तरे चाद्या एवार्थी दण्डका दृश्यन्त इति।

पूर्वं जीवाः स्वधर्मतः प्ररूपिताः, अथ लवणसमुद्रं स्वधर्मत एव प्ररूपयन्नाह–

**मू. (३१६)** *लवणे णं भंते ! समुद्दे किं उस्सिओदए पत्थडोदए खुभियजले अखुभियजले गोयमा ! लवणे णं समुद्दे उसिओदए नो पत्थडोदए खुभियजले नो अखुभियजले एत्तो आढत्तं जहा जीवाभिगे जाव से तेण० गोयमा ! बाहिरया णं दीवसमुद्दा पुन्ना पुन्नप्पमाणा वोलट्टमाणा वोसट्टमाणा समभरघडत्ताए चिट्ठंति संठाणओ एगविहिविहाणा वित्थारओ अनेगविहिविहाणा दुगुणादुगुणप्पमाणओ जाव अस्सिं तिरियलोए असंखेज्जा दीवसमुद्दा सयंभुरमणपज्जवसाणा पन्नत्ता समणाउसो !*

*दीवसमुद्दा णं भंते ! केवतिया नामधेज्जेहिं पन्नत्ता ?, गोयमा ! जावतिया लोए सुभा नामा सुभा रूवा सुभा गंधा सुभा रसा सुभा फासा एवतिया णं दीवसमुद्दा नामधेज्जेहिं पन्नत्ता, एवं नेयव्वा सुभा नामा उद्धारो परिणामो सव्वजीवा णं। सेवं भंते ! सेवं भंते !।*

**वृ.** 'लवणे ण' मित्यादि, 'उस्सिओदए' त्ति 'उच्छ्रितोदकः' ऊर्ध्ववृद्धिगतजलः, तद्वृद्धिश्च साधिकषोडशयोजनसहस्राणि 'पत्थडोदए' त्ति प्रस्तृतोदक समजल इत्यर्थः 'खुभियजले' त्ति वेलावशात्, वेला च महापातालकलशगतवायुक्षोभादिति, 'एत्तो आढत्त' मित्यादि, इतः सूत्रादारब्धं सद्यथा जीवाभिगमे तथाऽध्येतव्यं, तच्चेदम्-'जहा णं भंते ! लवणसमुद्दे उस्सिओदए नो पत्थडोदए खुभियजले नो अखुभियजले तहा णं बाहिरगा समुद्दा किं उस्सिओदगा ४ ?, गोयमा ! बाहिरगा समुद्दा नो उस्सिओदगा पत्थडोदगा नो खुभियजला अखुभियजला पुन्ना पुन्नप्पमाणा वोलट्टमाणा वोसट्टमाणा समभरघडत्ताए चिट्ठंति।

अत्थि णं भंते ! लवणसमुद्दे बहवे ओराला बलाहया संसेयंति संमुच्छंति वासं वासंति ?, हंता अत्थि। जहा णं भंते ! लवणे समुद्दे बहवे ओराला ५ तहा णं बाहिरेसुवि समुद्देसु ओराला ५ नो इणट्ठे समट्ठे। से केणट्ठेणं भंते ! एवं वुच्चइ-बाहिरगा णं समुद्दा पुन्ना जाव घडत्ताए चिट्ठंति ?, गोयमा ! बाहिरएसु णं समुद्देसु बहवे उदगजोणीया जीवा पोग्गला य उदगत्ताए वक्कमंति विउक्कमंति चयंति उववज्जंति' शेषं तु लिखितमेवास्ति, व्यक्तं चेदमिति।

'संठाणओ' इत्यादि, एकेन 'विधिना' प्रकारेण चक्रवाललक्षणेन विधानं-स्वरूपस्य करणं येषां ते एकविधिविधानाः, विस्तारतोऽनेकविधिविधानाः, कुतः ? इत्याह-'दुगुणे' त्यादि, इह यावत्करणादिदं दृश्यम्-'पवित्थरमाणा २ बहुउप्पलपउमकुमुयनलिणसुभगसोगंधियपुंडरीयमहापुंडरीयसतपत्तसहस्सपत्तकेसरफुल्लोवइया' उत्पलादीनां केशरैः फुल्लैश्चोपपेता इत्यर्थः 'उब्भासमाणवीइय' त्ति, (अवभासमानवीचयः सामान्यवातस्य सर्वत्र भावात् पातालकलशानामन्यत्राभावेऽपि नासंगतिर्वीचीनां) 'सुभा नाम' त्ति स्वस्तिकश्रीवत्सादीनि 'सुभा रूव' त्ति शुक्ल-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पीतादीनि देवादीनि वा 'सुभागंध'त्ति सुरभिगन्धभेदाः गन्धवन्तो वा कर्पूरादयः 'सुभा रस'त्ति मधुरादयः रसवन्तो वा शर्करादयः 'सुभाफास'त्ति मृदुप्रभृतयः स्पर्शवन्तो वा नवनीतादयः

'एवं नेयव्वा सुभानाम'त्ति एवमिति-द्वीपसमुद्राभिधायकतया नेतव्यानि शुभनामानि पूर्वोक्तानि, तथा 'उद्धारो'त्ति द्वीपसमुद्रेषूद्धारो नेतव्यः, स चैवम्-'दीवसमुद्दा णं भंते! केवइया उद्धारसमएणं पन्नत्ता?, गोयमा! जावइया अड्डाइज्ञाणं उद्धारसागरोवमाणं उद्धारसमया एवइया दीवसमुद्दाउद्धारसमएणं पन्नत्ता' येनैकैकेन समयेन एकैकं वालाग्रमुद्धियतेऽसावुद्धारसमयोऽतस्तेन।

तथा 'परिणामो'त्ति परिणामो नेतव्यो द्वीपसमुद्रेषु, स चैवम्-'दीवसमुद्दा णं भंते! किं पुढविपरिणामा आउपरिणामा जीवपरिणामा पोग्गलपरिणामा?, गोयमा! पुढवीपरिणामावि आउपरिणामावि जीवपरिणामावि पोग्गलपरिणामावी'त्यादि।

तथा 'सव्वजीवाणं'ति सर्वजीवानां द्वीपसमुद्रेषूत्पादो नेतव्यः, स चैवम्-'दीवसमुद्देसु णं भंते! सव्वे पाणा ४ पुढविकाइयत्ताए जाव तसकाइयत्ताए उववन्नपुव्वा?, हंता गोयमा! असइं अदुवा अनंतखुत्तो'त्ति॥

शतकं-६ उद्देशकः-८ समाप्तः

## -: शतकं-६ उद्देशकः-९ :-

**वृ.** द्वीपादिषु जीवाः पृथिव्यादित्वेनोत्पन्नपूर्वा इत्यष्टमोद्देशके उक्तं, नवमे तूत्पादस्य कर्मबन्धपूर्वकत्वादसावेव प्ररूप्यत इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (३१७)** *जीवे णं भंते! नाणावरणज्ञं कम्मं बंधमाणे कति कम्मप्पगडीओ बंधति?, गोयमा! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा, बंधुद्देसो पन्नवणाए नेयव्वो*

**वृ.** 'जीवे ण' मित्यादि, 'सत्तविहबंधए' आयुर्बन्धकाले 'अट्ठविहबंधए'त्ति आयुर्बन्धकाले 'छव्विहबंधए'त्ति सूक्ष्मसम्परायावस्थायां मोहायुषोरबन्धकत्वात्।

'बंधुद्देसो'इत्यादि, बन्धोद्देशकः प्रज्ञापनायाः सम्बन्धी चतुर्विंशतितमपदात्मकोऽत्र स्थाने 'नेतव्यः' अध्येतव्यः, स चायम्-'नेरइए णं भंते! नाणावरनिज्ञं कम्मं बंधमाणे कइ कम्मपगडीओ बंधइ?, गोयमा! अट्ठविहबंधगे वा सत्तविहबंधगे वा एवं जाव वेमानिए, नवरं मणुस्से जहा जीवे'इत्यादि॥ जीवाधिकारादेवजीवमधिकृत्याह-

**मू. (३१८)** *देवे णं भंते! महिड्डीए जाव महानुभाए बाहिरए पोग्गले अपरियाइत्ता पभू एगवन्नं एगरूवं विउव्वित्तए?, गोयमा! नो तिणट्ठे०। देवे णं भंते! बाहिरए पोग्गले परियाइत्ता पभू?, हंता पभू, से णं भंते! किं इहगए पोग्गले परियाइत्ता विउव्वति तत्थगए पोग्गले परियाइत्ता विकुव्वति अन्नत्थगए पोग्गले परियाइत्ता विउव्वति?, गोयमा! नो इहगए पोग्गले परियाइत्ता विउव्वति, तत्थगए पोग्गले परियाइत्ता विकुव्वति, नो अन्नत्थगए पोग्गले परियाइत्ता विउव्वति, एवं एएणं गमेणं जाव एगवन्नं एगरूवं १ एगवन्नं अणेगरूवं २ अनेगवन्नं एगरूवं ३ अनेगवन्नं अनेगरूवं ४ चउभंगो।*

*देवे णं भंते! महिड्डीए जाव महानुभागे बाहिरए पोग्गले अपरियाइत्ता पभू कालयं पोग्गलं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नीलगपोग्गलत्ताए परिणामेत्तए नीलगं पोग्गलं वा कालगपोग्गलत्ताए परिणामेत्तए ?, गोयमा नो तिणट्ठे समट्ठे, परियाइत्ता पभू। से णं भंते ! किं इहगए पोग्गले तं चेव नवरं परिणा- मेतित्ति भानियव्वं, एवं कालगपोग्गलं लोहियपोग्गलत्ताए, एवं कालएणं जाव सुक्किलं, एवं णीलएणं जाव सुक्किल्लं, एवं लोहियपोग्गलं जाव सुक्किलत्ताए, एवं हालिद्दएणं जाव सुक्किलं।*

*एवं एयाए परिवाडीए गंधरसफास० कक्खडफासपोग्गल मउयफासपोग्गलत्ताए २ एवं दो गरुयलहुय २ सीयउसिण २ निद्धलुक्ख २, वन्नाइ सव्वत्थ परिणामेइ, आलावगा य दो दो पोग्गले अपरियाइत्ता परियाइत्ता ॥*

**वृ.** 'देवे ण'मित्यादि, 'एगवन्नं'ति कालाद्येकवर्णम् 'एकरूपम्' एकविधाकारं स्वशरीरादि, 'इहगए'त्ति प्रज्ञापकापेक्षया इहगतान् प्रज्ञापकप्रत्यक्षासन्नक्षेत्रस्थितानित्यर्थः 'तत्थगए'त्ति देवः किल प्रायो देवस्थान एव वर्त्तत इति तत्रगतान्- देवलोकादिगतान् 'अन्नत्थगए'त्ति प्रज्ञापक-क्षेत्राद्देवस्थानाच्चापरत्रस्थितान्, तत्र च स्वस्थान एव प्रायोविकुर्व्वते यतः कृतोत्तरवैक्रियरूप एव प्रायोऽन्यत्र गच्छतीति नो इहगतान् पुद्गलान् पर्यादाय इत्याद्युक्तमिति।

'कालयं पोग्गलं नीलपोग्गलत्ताए' इत्यादौ कालनीललोहितहारिद्रशुक्ललक्षणानां पञ्चानां वर्णानां दश द्विकसंयोगसूत्राण्यध्येयानि।

'एवं एयाए परिवाडीए गंधरसफास'त्ति इह सुरभिदुरभिलक्षणगन्धद्वयस्यैकमेव, तिक्तकटुकषायाम्लमधुररसलक्षणानां पञ्चानां रसानां दश द्विकसंयोगसूत्राण्यध्येयानि, अष्टानां च स्पर्शानां चत्वारि सूत्रानि, परस्परविरुद्धेन कर्कशमृद्वादिना द्वयेनैकैकसूत्रनिष्पादनादिति।

देवाधिकारादिदमाह–

**मू. (३१९)** *अविसुद्धलेसे णं भंते ! देवे असमोहएणं अप्पाणएणं अविसुद्धलेसं देवं देविं अन्नयरं जाणति पासति १ ? नो तिणट्ठे समट्ठे, एवं अविसुद्धलेसे असमोहएणं अप्पाणेणं विसुद्धलेसं देवं ३, २।*

*अविसुद्धलेसे समोहएणं अप्पाणेणं अविसुद्धलसं देवं ३,।*

*अविसुद्धलेसे देवे समोहएणं अप्पाणेणं विसुद्धलेसं देवं ३, ४। अविसुद्धलेसे समोहया असमोहएणं अप्पाणेणं अविसुद्धलेसं देवं ३, ५ अविसुद्धलेसे समोहया० विसुद्धलेसं देवं ३, ६*

*विसुद्धलेसे असमो० अविसुद्धलेस देवं ३, १। विसुद्धलेसे असमोहएणं विसुद्धलेसं देवं ३ २। विसुद्धलेसे णं भंते ! देवे समोहएणं अविसुद्धलेसं देवं ३ जाणइ०, हंता जाणइ०, एवं विसुद्ध० समो० विसुद्धलेसं देवं ३ जाणइ ?, हंता जाणइ ४।*

*विसुद्धलेसे समोहयासमोहएणं अविसुद्धलेसं देवं ३, ५। विसुद्धलेसे समोहयासमोहएणं विसुद्धलेसं देवं ३, ६। एवं हेट्ठिल्लिएहिं अट्ठहिं न जाणइ न पासइ उवरिल्लएहिं चउहिं जाणइ पासइ। सेवं भंते ! सेवं भंते ! ॥*

**वृ.** 'अविसुद्धे'त्यादि, 'अविसुद्धलेसे णं'ति अविसुद्धलेश्यो-विभङ्गज्ञानो देवः 'असमोहएणं अप्पाणेणं'ति अनुपयुक्तेनात्मना इहाविशुद्धलेश्यः १ असमवहतात्मा देवः २ अविशुद्धलेश्यं देवादिकम् ३, इत्यस्य पदत्रयस्य द्वादश विकल्पा भवन्ति, तद्यथा-'अविसुद्धलेसे णं देवे असमोहएणं अप्पाणेणं अविसुद्धलेस्सं देवं ३ जाणइ पासइ ?, नो इणट्ठे समट्ठे' इत्येको विकल्पः १।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अविसुद्धलेसे असम्मोहएणं विसुद्धलेसं देवं ३ नो इणट्ठे समट्ठे'इति द्वितीयः २ । अविसुद्धलेसे समोहएणं अविसुद्धलेसं देवं० नो इणट्ठे समट्ठे'इति तृतीयः ३ । 'अविसुद्धलेसे समोहएणं विसुद्धलेसं देवं०, नो इणट्ठे समट्ठे'इति चतुर्थः ४।

'अविसुद्धलेसे समोहयासमोहएणं अप्पाणेणं अविसुद्धलेसं देवं ३, नो इणट्ठे समट्ठे' इति पञ्चमः ५। 'अविसुद्धलेसे समोहयासमोहएणं विसुद्धलेसं देवं ३, नो इणट्ठे समट्ठे'इति षष्ठः ६।

'विसुद्धलेसे' असमोहएणं अप्पाणेणं अविसुद्धलेसं देवं ३ नो इणट्ठेत्ति सप्तमः ७। विसुद्धलेसे असमोहएणं विसुद्धलेसं देवं ३, नो इणट्ठे समट्ठे'त्ति अष्टमः ८ एतैरष्टभिर्विकल्पैर्न जानाति, तत्र षड्भिमिथ्याद्दष्टित्वात्, द्वाभ्यां त्वनुपयुक्तत्वादिति।

'विसुद्धलेसे समोहएणं अविसुद्धलेसं देव ३ जाणइ ?, हंता जाणइ'इति नवमः ९। 'विसुद्धलेसे समोहएणं विसुद्धलेसं देवं ३ जाणइ ? हंता जाणइ'इति दशमः १०।

विसुद्धलेसे समोहयासमोहएणं अप्पाणेणं अविसुद्धलेसं देवं ३ जाणइ २ ?, हंता जाणइ'त्ति एकादश ११। 'विसुद्धलेसे समोहयासमोहएणं अप्पाणेणं विसुद्धलेसं देवं ३ जाणइ २'त्ति द्वादश १२।

एभिः पुनश्चतुर्भिर्विकल्पैः सम्यग्द्दष्टित्वादुपयुक्तत्वानपयुक्तत्वाच्च जानाति, उपयोगानुपयोगपक्षे उपयोगांशस्य सम्यगज्ञानहेतुत्वादिति। एतदेवाह-'एवं हेट्ठिल्लेहिं'इत्यादि, वाचनान्तरे तु सर्वमिवेदं साक्षाद् द्दश्यत इति ॥

शतकं-६ उद्देशकः-९ समाप्तः

## –: शतकं-६ उद्देशकः-१० :–

**वृ.** प्रागविशुद्धलेश्यस्य ज्ञानाभाव उक्तः, अथ दशमोद्देशकेऽपि तमेव दर्शयन्निदमाह-

**मू. (३२०)** *अन्नउत्थिया णं भंते ! एवमाइक्खंति जाव परूवेंति जावतिया रायगिहे नयरे जीवा एवइयाणं जीवाणं नो चक्किया केइ सुहं वा दुहं वा जाव कोलट्ठिगमायमवि निप्फा- वमयमवि कलममायमवि ! एवं ?, गोयमा ! जन्नं ते अन्नउत्थिया एवमाइक्खंति जाव मिच्छं ते एवमाहंसु*

*अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि सव्वलोएवि य णं सव्वजीवाणं नो चक्किया कोई सुहं वा तं चेव जाव उवदंसित्तए। से केणट्ठेणं ?, गोयमा ! अयन्नं जंबूदीवे २ जाव विसेसाहिए परिक्खेवेणं पन्नत्ते, देवे णं महिड्ढीए जाव महानुभागे एगं महं सविले वणं गंधसमुग्गगं गहाय तं अवद्दलेति तं अवद्दलेत्ता जाव इणामेव कट्टु केवलकप्पं जंबुद्दीवं २ तिहिं अच्छरानिवाएहिं तिसत्तखुत्तो अनुपरियट्टित्ता णं हव्वमागच्छेज्ञा।*

*से नूनं गोयमा ! से केवलकप्पे जंबुद्दीवे २ तेहिं घाणपोग्गलेहिं फुडे ?, हंता फुडे, चक्किया णं गोयमा ! केति तेसिं घाणपोग्गलाणं कोलट्ठियामायमवि जाव उवदंसित्तए ?, नो तिणट्ठे समट्ठे, से तेणट्ठेणं जाव उवदंसेत्तए ॥*

**वृ.** 'अन्नउत्थी'त्यादि, 'नो चक्किय'त्ति न शक्नुयात् 'जाव कोलट्ठियमायमवि'त्ति आस्तां बहु बहुतरं वा यावत् कुवलास्थिकमात्रमपि तत्र कुवलास्थिकं-बदरकुलकः 'निप्फाव'त्ति वल्लः 'कल'त्ति कलायः 'जूय'त्ति यूका 'अयन्न'मिथ्यादिर्दष्टान्तोपनयः, एवं यथा गन्धपुद्गलाना मतिसूक्ष्म- त्वेनामूर्तकल्पत्वात् कुवलास्थिकमात्रादिकं न दर्शयितं शक्यते एवं सर्वजीवानां सुखस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुःखस्य चेति ।। जीवाधिकारादेवेदमाह–

**मू. (३२१)** *जीवे णं भंते ! जीवे २ जीवे ?, गोयमा ! जीवे ताव नियमा जीवे जीवेवि नियमा जीवे ।*

*जीवे णं भंते ! नेरइए नेरइए जीवे ?, गोयमा ! नेरइए ताव नियमा जीवे पुण सिय नेरइए सिय अनेरइए, जीवे णं भंते ! असुरकुमारे असुरकुमारे जीवे ?, गोयमा ! असुरकुमारे ताव नियमा जीवे जीवे पुण सिय असुरकुमारे सिय नो असुरकुमारे, एवं दंडओ भानियव्वो जाव वेमानियाणं ।*

*जीवति भंते ! जीवे जीवे जीवति ?, गोयमा ! जीवति ताव नियमा जीवे जीवे पुण सिय जीवति सिय नो जीवति, जीवति भंते ! नेरइए २ जीवति ?, गोयमा ! नेरइए ताव नियमा जीवति २ पुण सिय नेरइए सिय अनेरइए, एवं दंडओ नेयव्वो जाव वेमानियाणं ।*

*भवसिद्धीए णं भंते ! नेरइए २ भवसिद्धीए ?, गोयमा ! भवसिद्धीए सिय नेरइए सिय अनेरइए नेरइएऽविय सिय भवसिद्धीए सिय अभवसिद्धीए, एवं दंडओ जाव वेमानियाणं ।।*

**वृ.** 'जीवे णं भंते ! जीवे जीवे जीवे ?' इह एकेन जीवशब्देन जीव एव गृह्यते द्वितीयेन च चैतन्यमित्यतः प्रश्नः, उत्तरं पुनर्जीवचैतन्ययोः परस्परेणाविनाभूतत्वाज्जीवश्चैतन्येव चैतन्यमपि जीव एवेत्येवमर्थःमवगन्तव्यं, नारकादिषु पदेषु पुनर्जीवत्वमव्यभिचारि जीवेषु तु नारकादित्वं व्यभिचारीत्यत आह ।

'जीवे णं भंते ! नेरइए' इत्यादि । जीवाधिकारादेवाह- 'जीवति भंते ! जीवे जीवे जीवइ' त्ति, जीवति-प्राणान् धारयति यः स जीवः उत यो जीवः स जीवति ? इति प्रश्नः, उत्तरं तु यो जीवति स तावन्नियमाज्ञीवः, अजीवस्यायुःकर्म्माभावेन जीवनाभावात्, जीवस्तु स्याज्ञीवति स्यान्न जीवति, सिद्धस्य जीवनभावादिति, नारकादिस्तु नियमाज्ञीवति, संसारिणः सर्वस्य प्राणधारणधर्मकत्वात्

जीवतीति पुनः स्यान्नारकादिः स्यादनारकादिरिति, प्राणधारणस्य सर्वेषां सद्भावादिति जीवाधिकारात्तद्गतमेवान्यतीर्थिःकवक्तव्यतामाह–

**मू. (३२२)** *अन्नउत्थिया णं भंते ! एवमाइक्खंति जाव परूवेंति एवं खलु सव्वे पाणा भूया जीवा सत्ता एगंतदुक्खं वेयणं वेयंति, से कहमेयं भंते ! एवं ?, गोयमा ! जन्नं ते अन्नउत्थिया जाव मिच्छं ते एवमाहंसु, अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि अत्थेगइया पाणा भूया जीवा सत्ता एगंतदुक्खं वेयणं वेयंति आहच्च सायं ।*

*अत्थेगतिया पाणा भूया जीवा सत्ता एगंतसायं वेयणं वेयंति आहच्च अस्सायं वेयणं वेयंति, अत्थेगइया पाणा भूया जीवा सत्ता वेमायाए वेयणं वेयंति आहच्च सायमसायं ।*

*से केणट्ठेणं० ?, गोयमा ! नेरइयाएगंतदुक्खंवेयणं आहच्च सायं, भवणवइवाण-मंतरजोइसवेमानिया एगंतसायं वेदणं वेयंति आहच्च असायं, पुढविक्काइया जाव मणुस्सा वेमायाए वेयणं वेयंति आहच्च सायमसायं, से तेणट्ठेणं० ।।*

**वृ.** 'अन्नउत्थिया' इत्यादि, 'आहच्च सायं' ति कदाचित्सातां वेदनां, कथम् ? इति चेदुच्यते- "उववाएण व सायं नेरइओ देवकम्मुणा वावि" । 'आहच्च असायंति देवा आहननप्रियविप्रयोगा-दिष्वसातां वेदनां वेदयन्तीति, 'वेमायाए' त्ति विविधया मात्रया कदाचित्सातां कदाचिदसातामित्यर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाधिकारादेवेदमाह–

**मू. (३२३)** *नेरइया णं भंते ! जे पोग्गले अत्तमायाए आहारेंति ते किं आयसरीरखेत्तोगाढे पोग्गले अत्तमायाए आहारेंति अनंतरखेत्तोगाढे पोग्गले अत्तमायाए आहारेंति परंपरखेत्तोगाढे पोग्गले अत्तमायाए आहारेंति ?, गोयमा ! आयसरीरखेत्तोगाढे पोग्गले अत्तमायाए आहारेंति नो अनंतरखेत्तोगाढे पोग्गले अत्तमायाए आहारेंति नो परंपरखेत्तोगाढे, जहा नेरइया तहा जाव वेमाणियाणं दंडओ ।*

**वृ.** 'नेरइया ण'मित्यादि 'अत्तमायाए'त्ति आत्मना आदाय-गृहीत्वेत्यर्थः 'आयसरीरखेत्तोगाढे'त्ति स्वशरीरक्षेत्रेऽवस्थितानित्यर्थः 'अनंतरखेत्तोगाढे'त्ति आत्मशरीरावगाहक्षेत्रापेक्षया यदनन्तरं क्षेत्रं तत्रावगाढानित्यर्थः, 'परंपराखेत्तोगाढे'त्ति आत्मक्षेत्रानन्तरक्षेत्राद्यत्परं क्षेत्रं तत्रावगाढानित्यर्थः । 'अत्तमायाए'इत्युक्तमत आदानसाधर्म्यात् ।

**मू. (३२४)** *केवली णं भंते ! आयाणेहिं जाणति पासति ?, गोयमा ! नो तिणट्ठे० । से केणट्ठेणं ?, गोयमा ! केवली णं पुरच्छिमेणं मियंपि जाणइ अमियंपि जाणइ जाव निव्वुडे दंसणे केवलिस्स से तेणट्ठेणं० ।*

**वृ.** 'केवली ण'मित्यादि सूत्रं, तत्र च 'आयाणेहिं'ति इन्द्रियैः ।

**मू. (३२५)** *जीवाण सुहं दुक्खं जीवे जीवति तहेव भविया य ।*
*एगंतदुक्खवेयण अत्तमाया य केवली ।*

**वृ.** दशमोद्देशकार्थःसङ्ग्रहाय गाथा-'जीवाण'मित्यादि गतार्थः ॥

**मू. (३२६)** *सेवं भंते ! सेवं भंते ! ।*

शतकं-६ उद्देशकः-१० समाप्तः

॥ १ ॥ प्रतीत्य भेदं किल नालिकेरं, षष्ठं शतं मन्मतिदन्तभञ्जि ।
तथाऽपि विद्वत्सभसच्छिलायां, नियोज्य नीतं स्वपरोपयोगम्

**शतकं-६ समाप्तः**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभयदेवसूरि विरचिता**
**भगवतीअङ्गसूत्रे षष्ठस्यशतकस्य टीका परिसमाप्ता ।**

## शतकं-७

**वृ.** व्याख्यातं जीवाद्यर्थःप्रतिपादनपरं षष्ठं शतम्, अथ जीवाद्यर्थःप्रतिपादनपरमेव सप्तमशतं व्याख्यायते, तत्र चादावेवोद्देशकार्थःसङ्ग्रहगाथा-

**मू. (३२७)** *आहार १ विरति २ थावर ३ जीवा ४ पक्खी य ५ आउ ६ अनगारे ७ ।*
*छउमत्थ ८ असंवुड ९ अन्नउत्थि १० दस सत्तमंसि सए ॥*

**वृ.** 'आहारे'त्यादि, तत्र 'आहार'त्ति आहारकानाहारकवक्तव्यतार्थः प्रथमः १ 'विरइ'त्ति प्रत्याख्यानार्थो द्वितीयः २ 'थावर'त्ति वनस्पतिवक्तव्यतार्थःस्तृतीयः ३ 'जीव'त्ति संसारिजीव-



Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

प्रज्ञापनार्थश्चतुर्थः ४ 'पक्खी य'त्ति खचरजीवयोनिवक्तव्यतार्थः पञ्चमः ५ ।

'आउ'त्ति आयुष्कवक्तव्यतार्थः षष्ठः 'अनगार'त्ति अनगारवक्तव्यतार्थः सप्तमः ७ 'छउ-मत्थ'त्ति छद्मस्थमनुष्यवक्तव्यतार्थोऽष्टमः ८ 'असंवुड'त्ति असंवृतानगारवक्तव्यतार्थो नवमः ९ 'अन्नउत्थिय'त्ति कालोदायिप्रभृतिपरतीर्थिःकवक्तव्यतार्थो दशमः १० इति ॥

## –: शतकं-७ उद्देशकः-१ :–

**मू. (३२८)** *तेणं कालेणं तेणं समएणं जाव एवं वदासी-जीवे णं भंते ! कं समयमनाहारए भवइ ?, गोयमा ! पढमे समए सिय आहारए सिय अनाहारए बितिए समए सिय आहारए सिय अनाहारए ततिए समए सिय आहारए सिय अणाहारए चउत्थे समए नियमा आहारए, एवं दंडओ ।*

*जीवा य एगिंदिया य चउत्थे समए सेसा ततिए समए ।*

*जीवे णं भंते ! 'कं समयं सव्वप्पाहारए भवति ?, गोयमा ! पढमसमयोववन्नए वा चरमसमए भवत्थे वा एत्थ णं जीवे णं सव्वप्पाहारए भवइ, दंडओ भानियव्वो जाव वेमानियाणं ॥*

**वृ.** 'कं समयं अणाहारए'त्ति परभवं गच्छन् कस्मिन् समयेऽनाहारको भवति ? इति प्रश्नः, उत्तरं तु यदा जीव ऋजुगत्योत्पादस्थानं गच्छति तदा परभवायुषः प्रथम एव समये आहारको भवति, यदा तु विग्रहगत्या गच्छति तदा प्रथमसमये वक्रेऽनाहारको भवति, उत्पत्तिस्थानानवाप्तौ तदाहारणीयपुद्गलानामभावाद्, अत आह –

'पढमे समए सिय आहारए सिय अणाहारए'त्ति, तथा यदैकेन वक्रेण द्वाभ्यां समयाभ्या-मुत्पद्यते तदा प्रथमेऽनाहारको द्वितीये त्वाहारकः, यदा तु वक्रद्वयेन त्रिभिः समयैरुत्पद्यते तदा प्रथमे द्वितीये चानाहारक इत्यत आह –

'बीयसमये सिय आहारए सिय अनाहारए'त्ति, तथा यदा वक्रद्वयेन त्रिभिः समयैरुत्पद्यते तदाऽऽद्ययोरनाहारकस्तृतीये त्वाहारकः, यदा तु वक्रत्रयेण चतुर्भिः सयमैरुत्पद्यते समयत्रयेऽ-नाहारकश्चतुर्थे तु नियमादाहारक इतिकृत्वा –

–'तइए समए सिय' इत्याद्युक्तं, वक्रत्रयं चेत्थं भवति-नाड्या बहिर्विदिगव्यवस्थितस्य सतो यस्याधोलोकादूर्ध्वलोके उत्पादो नाड्या बहिरेव दिशि भवति सोऽवश्यमकेने समयेन विश्रेनितः समश्रेणीं प्रतिपद्यते द्वितीयेन नाडीं प्रविशति तृतीयेनोर्द्धलोकं गच्छति चतुर्थेन लोक-नाडीतो निर्गत्योत्पत्तिस्थाने उत्पद्यते, इह चाद्ये समयत्रये वक्रत्रयमवगन्तव्यं, समश्रेण्यैव गमनात्।

अन्ये त्वाहुः-वक्रचतुष्टयमपि संभवति, यदा हि विदिशो विदिश्येवोत्पद्यते तत्र समयत्रयं प्राग्वत् चतुर्थे समये तु नाडीतो निर्गत्य समश्रेणिं प्रतिपद्यते पञ्चमेन तूत्पत्तिस्थानं प्राप्नोति, तत्र चाद्ये समयचतुष्टये वक्रचतुष्टयं स्यात्, तत्र चानाहारक इति, इदं च सूत्रे न दर्शितं, प्रायेणेत्थ-मनुत्पत्तेरिति ।

'एवं दंडओ'त्ति अमुनाऽभिलापेन चतुर्विंशतिदण्डको वाच्यः, तत्र च जीवपदे एकेन्द्रियपदेषु च पूर्वोक्तभावनयैव चतुर्थे समये नियमादाहारक इति वाच्यं, शेषेषु तृतीयसमये नियमादाहारक इति, तत्र यो नारकादित्रसस्त्रसेष्वेवोत्पद्यते तस्य नाड्या बहिस्तादागमनं गमनं च नास्तीति तृतीयसमये नियमादाहारकत्वं, तथाहि –

यो मत्स्यादिर्भरतस्य पूर्वभागादैरवतपश्चिमभागस्याधो नेरकेषूत्पद्यते स एकेन समयेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भरतस्य पूर्वभागात्पश्चिमं भागं याति द्वितीयेन तु तत ऐरवतपश्चिमं भागं ततस्तृतीयेन नरकमिति, अत्र चाद्ययोरनाहारकस्तृतीये त्वाहारकः, एतदेव दर्शयति-'जीवा एगिंदिया य चउत्थे समये सेसा तइयसमए'त्ति ।

'कं समयं सव्वप्पाहारए'त्ति कस्मिन् समये सर्वाल्पः-सर्वथा स्तोको न यस्मादन्यः स्तोकतरोऽस्ति स आहारो यस्य स सर्वाल्पाहारः य एव सर्वालपाहारकः, 'पढमसमयोववन्नए'त्ति प्रथमसमय उत्पन्नस्य प्रथमो वा समयो यत्र तत् प्रथमसमयं तदुत्पन्नं-उत्पत्तिर्यस्य स तथा, उत्पत्तेः प्रथमसमय इत्यर्थः, तदाहारग्रहणहेतोः शरीरस्याल्पत्वात्सर्वाल्पाहारता भवतीति ।

'चरमसमयभवत्थेव'त्ति चरमसमये भवस्य-जीवितस्य तिष्ठति यः स तथा, आयुषश्चरम-समय इत्यर्थः, तदानीं प्रदेशानां संहतत्वेनाल्पेषु शरीरावयवेषु स्थितत्वात्सर्वाल्पाहारतेति

अनाहारकत्वं च जीवानां विशेषतो लोकसंस्थानवशाद्भवीति लोकप्ररूपणसूत्रम्—

**मू. (३२९)** *किंसंठिए णं भंते! लोए पन्नत्ते?, गोयमा! सुपइट्ठगसंठिए लोए पन्नत्ते, हेट्ठा विच्छिन्ने जाव उप्पिं उड्ढंमुइंगागारसंठिए ।*

*तेसिं णं सासयंसि लोगंसि हेट्ठा विच्छिन्नंसि जाव उप्पिं उड्ढंमुइंगागारसंठियंसि उप्पन्ननाणदंसणधरे अरहा जिणे केवली जीवेवि जाणइ पासइ अजीवेवि जाणइ पासइ तओ पच्छा सिज्झति जाव अंतं करेइ ॥*

**वृ.** 'सुपइट्ठगसंठिए'त्ति सुप्रतिष्ठकं शरयन्त्रकं तच्चेह उपरिस्थापितकलशादिकं ग्राह्यं, तथाविधेनैव लोकसादृश्योपपत्तेरिति, एतस्यैव भावनार्थःमाह- 'हेट्ठा विच्छिन्ने'इत्यादि, यावत्करणात् 'मज्झे संखित्ते उप्पिं विसाले अहे पलियंकसंठाणसंठिए मज्झे वरवयरविग्गहिए'त्ति दृश्यं, व्याख्या चास्य प्राग्वदिति ॥ अनन्तरं लोकस्वरूपमुक्तं, तत्र यत्केवली करोती तद्दर्शयन्नाह- 'तंसी'त्यादि

'अंतं करेइ'त्ति, अत्र क्रियोक्ता, अथ तद्विशेषमेव शरमणोपासकस्य दर्शयन्नाह—

**मू. (३३०)** *समणोवासगस्स णं भंते! सामाइयकडस्स समणोवासए अच्छमाणस्स तस्स णं भंते! किं ईरियावहिया किरिया कज्जइ? संपराइया किरिया कज्जइ?, गोयमा! नो ईरियावहिया किरिया कज्जइ संपराइया किरिया कज्जइ, से केणट्ठेणं जाव संप० गो० समणोवासयस्स णं सामाइयकडस्स समणोवासए अच्छमाण्स्स आया अहिगरणी भवइ आयाहिगरणवत्तियं चणं तस्स नो ईरियावहिया किरिया कज्जर संपराइया किरिया कजजई, से तेणट्ठेणं जाव संपराइया*

**वृ.** 'समणे'त्यादि, 'सामाइयकडस्स'त्ति कृतसामायिकस्य, तथा 'श्रमणोपाश्रये' साधुवसता-वासीनस्य-तिष्ठतः 'तस्सण'न्ति यो यथार्थःस्तस्य श्रमणोपासकस्यैवेति, किलाकृत-सामायिकस्य तथा साध्वाश्रयेऽनवतिष्ठमानस्य भवति साम्परायिकी क्रिया, विशेषणद्वययोगे पुनरैर्यापथिकी युक्ता निरुद्धकषायत्वादित्याशङ्का अतोऽयं प्रश्नः ।

उत्तरं तु 'आयाहिकरणीभवति'त्ति आत्मा-जीवः अधिकरणानि-हलशकटादीनि कषायाश्रयभूतानि यस्य सन्ति सोऽधिकरणी, ततश्च 'आयाहिकरणवत्तियं च णं' ति आत्मनोऽ-धिकरणानि आत्माधिकरणानि तान्येव प्रत्ययः-कारणं यत्र क्रियाकरणे तदात्माधिकरणप्रत्ययं साम्परायिकी क्रिया क्रियत इति योगः ।

**मू. (३३१)** *समणोवासगस्स णं भंते! पुव्वामेव तसपाणसमारंभे पच्चक्खाए भवति*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पुढविसमारंभे अपच्चक्खाए भवइ से य पुढविं खणमाणेऽन्नयरं तसं पाणं विहिंसेज्ञा से णं भंते! तं वयं अतिचरति ?, नो तिणट्ठे समट्ठे, नो खलु से तस्स अतिवायाए आउट्टति।*

*समणोवासयस्स णं भंते! पुव्वामेव वणस्सइसमारंभे पच्चक्खाए से य पुढविं खणमाणे अन्नयरस्स रुक्खस्स मूलं छिंदेज्ञा से णं भंते! तं वयं अतिचरति, ! नो तिणट्ठे समट्ठे, नो खलु तस्स अइवायाए आउट्टति।*

**वृ.** श्रमणोपासकाधिकारादेव 'समणोवासगे' त्यादि प्रकरणम्, तत्र च 'तसपाणसमारंभे'त्ति त्रसवधः 'नो खलु से तस्स अतिवायाए आउट्टइ'त्ति न खलु असौ 'तस्य' त्रसप्राणस्य 'अतिपाताय' वधाय 'आवर्त्तते' प्रवर्तते इति न सङ्कल्पवधोऽसौ, सङ्कल्पवधादेव च निवृत्तोऽसौ, न चैष तस्य संपन्न इति नासावतिचरति व्रतं।

**मू. (३३२)** *समणोवासए णं भंते! तहारूवं समणं वा माहणं वा फासुएसनिज्ञेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे किं लब्भइ ?, गोयमा! समणोवासए णं तहारूवं समणं वा जाव पडिलाभेमाणे तहारूवस्स समणस्स वा माहणस्स वा समाहिं उप्पाएति, समाहिकारएणं तमेव समाहिं पडिलभइ। समणोवासए णं भंते! तहारूवं समणं वा जाव पडिलाभेसाणे किं चयति ?, गोयमा! जीवियं चयति दुच्चयं चयति दुक्करं करेति दुल्लहं लहइ बोहिं बुज्झइ तओ पच्छा सिज्झति जाव अंतं करेति।*

**वृ.** 'किं चयइ ?' किं ददातीत्यर्थः 'जीवियं चयइ'त्ति जीवितमिव ददाति, अन्नादि द्रव्यं यच्छन् जीवितस्यैव त्यागं करोतीत्यर्थः, जीवितस्येवान्नादिद्रव्यस्य दुस्त्यजत्वात्, एतदेवाह- 'दुच्चयं चयइ'त्ति दुस्त्यजमेतत्, त्यागस्य दुष्करत्वात्, एतदेवाह- दुष्करं करोतीति, अथवा किं त्यजति- किं विरहयति ?, उच्यते, जीवितमिव जीवितं कर्म्मणो दीर्घा स्थितिं 'दुच्चयं' ति दुष्टं कर्म्मद्रव्यसञ्चयं 'दुक्करं' ति दुष्करमपूर्वकरणतो ग्रन्थिभेदं, ततश्च 'दुल्लभं लभइ'त्ति अनिवृतिकरणं लभते, ततश्च 'बोहिं बुज्झइ'त्ति 'बोधिं सम्यग्दर्शनं 'बुध्यते' अनुभवति।

इह च श्रमणोपासकः साधूपासनामात्रकारी ग्राह्यः, तदपेक्षयैवास्य सूत्रार्थस्य घटमानतवात्, 'तओ पच्छ'त्ति तदनन्तरं सिद्ध्यतीत्यादि प्राग्वत् अन्यत्राप्युक्तं दानविशेषस्य बोधिगुणत्वं, यदाह-"अनुकंपऽकामनिज्ञरबालतवे दानविनए" त्यादि, तथा-

॥१॥ "केई तेणेव भवेण निव्वुया सव्वकम्मओ मुक्का।
केई तइयभवेणं सिज्झिस्संति जिनसगासे॥"

—अनन्तरमकर्मत्वमुक्तमतोऽकर्म्मसूत्रम्—

**मू. (३३३)** *अत्थि णं भंते! अकम्मस्स गती पन्नायति ?, हंता अत्थि।*

*कहन्नं भंते! अकम्मस्स गती पन्नायति ?, गोयमा! निस्संगयाए निरंगणयाए गतिपरिणामेवं बंधणछेयणयाए निरंधणयाए पुव्वपओगेणं अकम्मस्स गती पन्नत्ता।*

*कहन्नं भंते! निस्संगयाए निरंगणयाए गइपरिणामेणं बंधणछेयणयाए निरंधणयाए पुव्वप्पओगेणं अकम्मस्स गती पन्नायति ?*

*से जहानामए-केइ पुरिसे सुक्कं तुंबं निच्छिड्डं निरुवहयंति आनुपुव्वीए परिकम्मेमाणे २ दब्भेहि य कुसेहि य वेढेइ २ अट्ठहिं मट्टियालेवेहिं लिंपइ २ उण्हे दलयति भूतिं २ सुक्कं समाणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अत्थाहमतारमपोरसियंसि उदगंसि पक्खिवेज्जा ।*

*से नूनं गोयमा ! से तुंबे तेसिं अट्ठण्हं मट्टियालेवाणं गुरुयत्ताए भारियत्ताए गुरुसंभारियत्ताए सलिलतलमतिवइत्ता अहे धरनितलपइट्ठाणे भवइ ?, हंता भवइ, अहे णं से तुंबे अट्ठण्हं मट्टियालेवाणं परिक्खएणं धरनितलमतिवइत्ता उप्पिं सलिलतलपइट्ठाणे भवइ ?, हंता भवइ*

*एवं खलु गोयमा ! निस्संगयाए निरंगणयाए गइपरिणामेणं अकम्मस्स गई पन्नायति । कहन्नं भंते ! बंधणछेदणयाए अकम्मस्स गई पन्नत्ता ?, गोयमा ! से जहानामए-कलसिंबलियाइ वा मुग्गसिंबलियाइ वा माससिंबलियाइ वा सिंबलिसिंबलियाइ वा एरंडमिंजियाइ वा उण्हे दिन्ना सुक्का समाणी फुडित्ता णं एगंतमंतं गच्छइ, एवं खलु गोयमा ! ।*

*कहन्नं भंते ! निरंधणयाए अकम्मस्स गती ?, गोयमा ! से जहानामए-धूमस्स इंधणविप्पमुक्कस्स उड्ढं वीससाए निव्वाघाएणं, गती पवत्तति, एवं खलु गोयमा !०*

*कहन्नं भंते ! पुव्वप्पओगेणं अकम्मस्स गती पन्नत्ता ?, गोयमा ! से जहानामए-कडस्स कोदंडविप्पमुक्कस्स लक्खाभिमुही निव्वाघाएणं गती पवत्तइ, एवं खलु गोयमा ! नीसंगयाए निरंगणयाए जाव पुव्वप्पओगेणं अकम्मस्स गती पन्नत्ता ॥*

**वृ.** 'गई पन्नायइ' त्ति गतिप्रज्ञायते अभुयपगम्यते इतियावत् 'निस्संगयाए' त्ति 'निसङ्गतया' कर्म्मलापगमेन 'निरंगणयाए' त्ति नीरागतया मोहापगमेन 'गतिपरिणामेणं' ति गतिस्वभावतयाऽलाबुद्रव्यस्येव 'बंधणच्छेयणयाए' त्ति कर्म्मबन्धनछेदनेन एरण्डफलस्येव 'निरन्धणताए' त्ति कर्मेन्धनविमोचनेन घूमस्येव 'पुव्वपओगेणं' ति सकर्म्मतायां गतिपरिणामवत्त्वेन बाणस्येवेति ।

एतदेव विवृण्वन्नाह- 'कहन्न' मित्यादि, 'निरुवहयं' ति वाताद्यनुपहतं 'दब्भेहि य' त्ति दर्भैः समूलैः 'कुसेहि य' त्ति कुशैः-दर्भैरेव छिन्नमूलैः 'भूइं भूइ' न्ति भूयो भूयः 'अत्थाहे' त्यादि, इह मकारौ प्राकृतप्रभवावतः अस्ताघेऽत एवातारेऽत एव 'अपौरुषेये' अपुरुषप्रमाणे 'कलसिंबलियाइ वा' कलायाभिधानधान्यफलिका 'सिंबलि' त्ति वृक्षविशेषः 'एरंडमिंजिया' एरण्डफलम् 'एगंतमंत गच्छइ' त्ति एक इत्येवमन्तो-निश्चयो यत्रासावेकान्त एक इत्यर्थः अतस्तमनतं भूभागं गच्छति । इह च बीजस्य गमनेऽपि कलायसिंबलिकादेस्तदुक्तं तत्तयोरभेदोपचारादिति, 'उड्ढंवीससाए' त्ति ऊध्ध्वं 'विसया' स्वभावेन 'निव्वाधाएणं' ति कटाद्याच्छादनाभावात् ।

अकम्मणो वक्तव्यतोक्ता, अथाकर्म्मविपर्ययभूतस्य स कर्म्मणो वक्तव्यतामाह-

**मू. (३३४)** *दुक्खी भंते ! दुक्खेणं फुडे अदुक्खी दुक्खेणं फुडे ?, गोयमा ! दुक्खी दुक्खेणं फुडे नो अदुक्खी दुक्खेणं फुडे ।*

*दुक्खी णं भंते ! नेरतिए दुक्खेण फुडे अदुक्खी नेरतिए दुक्खेणं फुडे ?, गोयमा ! दुक्खी नेरइए दुक्खेणं फुडे नो अदुक्खी नेरतिए दुक्खेणं फुडे, एवं दंडओ जाव वेमानियाणं ।*

*एवं पंच दंडगा नेयव्वा-दुक्खी दुक्खेणं फुडे १ दुक्खी दुक्खं परियायइ २ दुक्खी दुक्खं उदीरेइ ३ दुक्खी दुक्खं वेदेति ४ दुक्खी दुक्खं निज्जरेति ५ ॥*

**वृ.** 'दुक्खी भंते ! दुक्खेण फुडे' त्ति दुःखनिमित्तत्वात् दुःखं-कर्म्म तद्वान् जीवो दुःखो भदन्त ! दुःखेन-दुःखहेतुत्वात् कर्म्मणा-स्पृष्टो बद्धः 'नो अदुक्खी' त्यादि, 'नो' नैव अदुःखी-अकर्म्मा दुःखेन स्पृष्टः सिद्धस्यापि तत्प्रसङ्गादिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एवं पंच दंडका नेयव्व'त्ति 'एवम्' इत्यनन्तरोक्ताभिलापेन पञ्च दण्डका नेतव्याः, तत्र दुःखी दुःखेन स्पृष्ट इत्येक उक्त एव १, 'दुक्खी दुक्खं परियायई'ति द्वितीयः, तत्र 'दुःखी' कर्म्मवान् 'दुःखं' कर्म्म 'पर्याददाति' सामस्त्येनोपादत्ते, निधत्तादि करोतीत्यर्थः २, 'उदीरेइ'त्ति तृतीयः ३, 'वेएइ'त्ति चतुर्थः ४, 'निज्जरेइ'त्ति पञ्चमः ५।

उदीरणवेदननिर्जरणानि तु व्याख्यातानि प्रागिति। कर्म्मबन्धाधिकारात्कर्म्मबन्ध-चिन्तान्वितमनगारसूत्रं, अनगाराधिकाराच्च तत्पानक- भोजनसूत्रानि–

**मू. (३३५)** *अनगारस्स णं भंते! अनाउत्तं गच्छमाणस्स वा चिट्ठमाणस्स वा निसियमाणस्स वा तुयट्टमाणस्स वा अनाउत्तं वत्थं पडिग्गहं कंबलं पायपुंछणं गेण्हमाणस्स वा निक्खिवमाणस्स वा तस्सं णं भंते! किं ईरियावहिया किरिया कज्जइ? संपराइया किरिया कज्जइ?, गो० नो ईरियावहिया किरिया कज्जति संपराइया किरिया कज्जति।*

*से केणट्ठेणं०?, गोयमा! जस्स णं कोहमाणमायालोभा वोच्छिन्ना भवंति तस्स णं ईरियवहिया किरिया कज्जइ नो संपराइया किरिया कज्जइ, जसस णं कोहमानमायालोभा अवोच्छिन्ना भवंति तस्स णं संपराय किरिया कज्जइ नो ईरिया वहिया, अहासुत्तं रीयमाणस्स ईरियावहिया किरिया कज्जइ उस्सुत्तं रीयमाणस्स संपराइया किरिया कज्जइ, से णं उस्सुत्तमेव रियति, से तेणट्ठेणं०*

**वृ.** तत्र च 'वोच्छिन्ने'ति अनुदिताः

**मू. (३३६)** *अह भंते! सइंगालस्स सधूमस्स संजोयणादोसदुट्ठस्स पाणभोयणस्स के अट्ठे पन्नत्ते?, गोयमा! जे णं निग्गंथे वा निग्गंथी वा फासुएसनिज्जं असनपान ४ पडिगाहित्ता मुच्छिए गिद्धे गढिए अज्झोववन्ने आहारं आहारेति एस णं गोयमा! सइंगाले पानभोयणे, जे णं निग्गंथे वा निग्गंथी वा फासुएसनिज्जं असनपान ४ पडिगाहित्ता महया २ अप्पत्तियकोहकिलामं करेमाणे आहारमाहारेइ एस णं गोयमा! सधूमे पाणभोयणे, जे णं निग्गंथे वा २ जाव पडिग्गहेत्ता गुणुप्पायणहेउं अन्नदव्वेण सद्धिं संजोएत्ता आहारमाहारेइ एस णं गोयमा! संजोयणादोसदुट्ठे पाणभोयणे, एस णं गोयमा! सइंगालस्स सधूमस्स संजोयणादोसदुट्ठस्स पाणभोयणस्स अट्ठे प०*

*अह भंते! वीतिंगालस्स वीयधूमस्स संजोयणादोसविप्पमुक्कस्स पाणभोयणस्स के अट्ठे पन्नत्ते?, गोयमा! जे णं निग्गंथो वा जाव पडिगहेत्ता अमुच्छिए जाव आहारेति एस णं गोयमा वीतिंगाले पानभोयणे, जे णं निग्गंथे निग्गंथी वा २ जाव पडिगाहेत्ता नो महया अप्पत्तियं जाव आहारेइ, एस णं गोयमा! वीयधूमे पानभोयणे, जे णं निग्गंथे निग्गंथी वा २ जाव पडिगाहेत्ता जहालद्धं तहा आहारमाहारेइ एस णं गोयमा! संजोयणादोसविप्पमुक्के पानभोयणे, एस णं गोयमा! वीतिंगालस्स वीयधूमस्स संजोयणादोसविप्पमुक्कस्स पाणभोयणस्स अट्ठे पन्नत्ते।*

**वृ.** 'सइंगालस्स'त्ति चारित्रेन्धनमङ्गारमिव यः करोति भोजनविषयरागाग्नि सोऽङ्गार एवोच्यते तेन सह यद्वर्त्तते पानकादि तत् साङ्गारं तस्य 'सधूमस्स'त्ति चारित्रेन्धनधूमहेतुत्वात् धूमो-द्वेषस्तेन सह यत्पानकादि तत् सधूमं तस्य 'संजोयणादोसदुट्ठस्स'त्ति संयोजना-द्रव्यस्य गुणविशेषणार्थं द्रव्यान्तरेण योजनं सैव दोषस्तेन दुष्टं यत्तत्तथा तस्य।

'जे णं'ति विभक्तिपरिणामाद्यमाहारमाहारयतीति सम्बन्धः 'मुच्छिए'त्ति मोहवान् दोषानभिज्ञत्वात् 'गिद्धे'त्ति तद्विशेषाकाङ्क्षावान् 'गढिए'त्ति तद्गतस्नेहतन्तुभिः संदर्भितः

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

'अज्झोववन्ने'त्ति तदेकाग्रतां गतः 'आहारमाहारेइ'त्ति भोजनं करोति 'एस णं'ति 'एषः' आहारः साङ्गारं पानभोजनं, 'महया अप्पत्तियं'ति महदप्रीतिकम् अप्रेम 'कोहकिलामं'ति क्रोधात्क्लमः- शरीरायासः क्रोधक्लमोऽतस्तं, 'गुणुप्पायणहेउं'ति रसविशेषोत्पादनायेत्यर्थः, वीइंगालसत्ति वीतो गतोऽङ्गारो-रागो यस्यमात्तद्वीताङ्गारं,

**मू. (३३७)** *अह भंते ! खेत्तातिक्कंतस्स कालातिक्कंतस्स मग्गातिक्कंतस्स पमाणातिक्कंतस्स पाणभोयणस्स के अट्ठे पन्नत्ते ?, गो० जे णं निग्गंथे वा निग्गंथी वा फासुएसनिज्जं णं असणं ४ अनुग्गए सूरिए पडिग्गाहित्ता उग्गए सूरिए आहारमाहारेति एस णं गोयमा ! खित्तातिक्कंते पाणभोयणे*

*जे णं निग्गंथो वा २ जाव साइमं पढमाए पोरिसीए पडिग्गाहेत्ता पच्छिमं पोरिसिं उवायणावेत्ता आहारं आहारेइ एस णं गोयमा ! कालातिक्कंते पानभोयणे, जे णं निग्गंथो वा २ जाव साइमं पडिगाहित्ता परं अद्धजोयणमेराए वीइक्कमावइत्ता आहारमाहारेइ एस णं गोयमा ! मग्गातिक्कंते पाणभोयणे, जे णं निग्गंथो वा निग्गंथी वा फासुएसनिज्जं जाव साइमं पडिगाहित्ता परं बत्तीसाए कुक्कुडिअंडगपमाणमेत्ताणं कवलाणं आहारमाहारेइ ।*

*एस णं गोयमा ! पमाणाइक्कंते पाणभोयणे, अट्ठकुक्कुडिअंडगप्पमाणमेत्ते कवले आहारमा- हारेणामे अप्पाहारे दुवालसकुक्कुडिअंडगप्पमाणमेत्ते कवले आहारमाहारेमाणे अवड्ढोमोयरिया सोलसकक्कुडिअंडगप्पमाणमेत्ते कवले आहारमाहारेमाणे दुभागप्पत्ते चउव्वीसं कुक्कुडिअंडगप्पमाणे जाव आहारमाहारेमाणे ओमोदरिए बत्तीसं कुक्कुडिअंडगमेत्ते कवले आहारमाहारेमाणे पमाणप्पत्ते*

*एत्तो एक्केणवि गासेणं ऊणगं आहारमाहारेमाणे समणे निग्गंथे नो पकामरसभोई इति वत्तव्वं सिया, एस णं गोयमा ! खेत्तादिक्कंतस्स कालातिक्कंतस्स मग्गातिक्कंतस्स पमाणातिक्कंतस्स पाणभोयणस्स अट्ठे पन्नत्ते ॥*

**वृ.** 'खेत्ताइक्कंतस्स'त्ति क्षेत्रं-सूर्यसम्बन्धि तापक्षेत्रं दिनमित्यर्थः तदतिक्रान्तं यत्तत् क्षेत्रातिक्रान्तं तस्य । 'कालाइक्कंतस्स'त्ति कालं-दिवसस्य प्रहरत्रयलक्षणमतिक्रान्तं कालातिक्रान्तं तस्य, 'मग्गाइक्कंतस्स'त्ति अर्द्धयोजनमतिक्रान्तस्य 'पमाणाइक्कंतस्स'त्ति द्वात्रिंशत्कवललक्षण- मतिक्रान्तस्य, 'उवाइणावित्त'त्ति उपादापय्य-प्रापय्येत्यर्थः परं 'अद्धजोयणमेराए'त्ति द्वात्रिंशत्क- वललक्षणमतिक्रान्तस्य, 'उवाइणावित्त'त्ति उपादापय्य-प्रापय्येत्यर्थः परं 'अद्धजोयणमेराए'त्ति अर्द्धयोजनल- क्षण-मर्यादायाः परत इत्यर्थः 'वीतिक्कमावेत्त'त्ति उपादापय्य-प्रापय्येत्यर्थः ।

'कुक्कुडिअंडगपमाणमेत्ताणं'ति कुक्कुट्यण्डकस्य यत् प्रमाणं-मानं तत् परिमाणं-मानं येषां ते तथा, अथवा कुकुटीव-कुटीरमिव जीवस्याश्रयत्वात्, कुटी-शरीरं कुत्सिता अशुचिप्रायत्वात् कुटी कुकुटी तस्या अण्डमिवाण्डकं-उदरपूरकत्वादाहारः कुकुट्यण्डकं तस्य प्रमाणतो मात्रा- द्वात्रिंशत्तमांशरूपा येषां ते कुक्कुट्यण्डकप्रमाणमात्रा अतस्तेषामयमभिप्रायः ।

यावान् यस्य पुरुषस्याहारस्तस्याहारस्य द्वात्रिंशत्तमो भागस्तत् पुरुषापेक्षया कवलः, इदमेव कवलमानमाश्रित्य प्रसिद्धकवलचतुःषष्ट्यादिमानाहारस्यापि पुरुषस्य द्वात्रिंशता कवलैः प्रमाणप्राप्ततोपपन्ना स्यात्, न हि स्वभोजनस्यार्द्धं भुक्तवतः प्रमाणप्राप्तत्वमुपपद्यते, प्रथमव्याख्यानं तुप्रायिकपक्षापेक्षयाऽवगन्तव्यमिति । 'अप्पाहारे'त्ति अल्पाहारः साधुर्भवतीति गम्यम्, अथवाऽष्टौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुक्कुट्यण्डकप्रमाणमात्रान् कवलानाहारम् 'आहारयति' कुर्वति साधौ 'अल्पाहारः' स्तोकाहारः, चतुर्थांशरूपत्वात्तस्य, एवमुत्तरत्रापि 'आहारेमाणे' इत्येतत्पदं प्रथमैकवचनान्तं सप्तम्येकवचनान्तं वा व्याख्येयम्।

'अवड्ढोमोयरिय'त्ति अवमस्य-ऊनस्योदरस्य करणमवमोदरिका, अपकृष्टं-किञ्चिदूनमर्द्धं यस्यां साऽपार्द्धा द्वात्रिंशत्कवलापेक्षया द्वादशानामपार्द्धरूपत्वात् अपार्द्धा चासाववमोदरिका चेति समासः सा भवतीत्येवं सप्तम्यन्तव्याख्यानं नेयं, प्रथमान्तव्याख्यानं तु धर्म्मधर्म्मिणोरभेदादपार्द्धावमौदरिकः साधुर्भवतीत्येवं नेतव्यं, 'दुभागप्पत्ते'त्ति द्विभागः-अर्द्धं तत्प्राप्तो द्विभागप्राप्त आहारो भवतीति गम्यं, द्विभागो वा प्राप्तोऽनेनेति द्विभागप्राप्तः साधुर्भवतीति गम्यम्।

'ओमोयरिय'त्तिअवमोदरिका भवति धर्म्मधर्म्मिणोरभेदाद्वाऽवमोदरिकः साधुर्भवतीति गम्यं, 'पकामरसभोइ'त्ति प्रकामं-अत्यर्थं रसानां-मधुरादिभेदानां भोगी-भोक्ता प्रकारमरसभोगीति

**मू. (३३८)** *अह भंते! सत्थातीयस्स सत्थपरिणामियस्स एसियस्स वेसियस्स समुदानियस्स पाणभोयणस्स के अट्ठे पन्नत्ते?*

*गोयमा! जे णं निग्गंथे वा निग्गंथी वा निक्खित्तसत्थमुसले ववगयमालावन्नगविलेवणे ववगयचुयइयत्तत्तदेहं जीवविप्पजढं अकयमकारियमसंकप्पियमणाहूयमकीयकडमणुद्दिट्ठं नवकोडीपरिसुद्धं दसदोसविप्पमुक्कं उग्गमुप्पायसेसणासुपरिसुद्धं वीतिंगालं वीतधूमं संजोयणादोसविप्पमुक्कं असुरसुरं अचवचवं अदुयमविलंबियं अपरिसाडीं अक्खोवंजणवणाणुलेवणभूयं संयमजायामायावत्तियं संजमभारवहणट्ठयाए बिलमिव पन्नगभूएणं अप्पाणेणं आहारमाहारेति एस णं गोयमा! सत्थातीयस्स सत्थपरिणामियस्स जाव पाणभोयणस्स अयमट्ठे पन्नत्ते।*

*सेवं भंते! सेवं भंते! त्ति॥*

**वृ.** 'सत्थातीतस्स'त्ति शश्त्राद्-अग्न्यादेरतीतं-उत्तीर्णं शस्त्रातीतम्, एवंभूतं च तथाविधपृथुकादिवदपरिणतमपि स्यादत आह- 'सत्थपरिणामियस्स'त्ति वर्णादीनामन्यथाकरणेनाचित्तीकृतस्येत्यर्थः, अनेन प्रासुकत्वमुक्तम्, 'एसियस्स'त्ति एषणीयस्य गवेषणाविशुद्धया वा गवेषितसय 'वेसियस्स'त्ति विशेषेण विविधैर्वा प्रकारैरेषितं-व्येषितं ग्रहणैषणाग्रासैषणाविशोधितं तस्य, अथवा वेषो-मुनिनेपथ्यं स हेतुलभि यस्य तद्वैषिकम्-आकारमात्रदर्शनादवाप्तं न त्वावर्ज्जनया, अनेन पुनरुत्पादनादोषापोहमाह, 'सामुदानियस्स'त्ति ततस्ततो भिक्षारूपस्य, किंभूतो निर्ग्रन्थः? इत्याह-

'निक्खित्तसत्थमुसले'त्ति त्यक्तखङ्गादिशस्त्रमुशलः 'ववगयमालावन्नगविलेवणे'त्ति व्यपगतपुष्पमालाचन्दनानुलेपनः, स्वरूपविशेषणे चेमे न तु व्यवच्छेदार्थे, निर्ग्रन्थानामेवंरूपत्वादेवेति, 'ववगयचुयचइयचत्तदेहं'ति व्यपगताः-स्वयं पृथग्भूता भोज्यवस्तुसंभवा आगन्तुका वा कृम्यादयः च्युता-मृताः स्वत एव परतो वाऽभ्यवहार्यवस्त्वात्मकाः पृथिवीकायिकादयः 'चइय'त्ति त्याजिता-भोज्यद्रव्यात् पृथक्कारिता दायकेन 'चत्त'त्ति स्वयमेव दायकेन त्यक्ता-भक्ष्यद्रव्यात्पृथक्कृता 'देहा' अभेदविवक्षया देहिनो यस्मात् स तथा तमाहारं, वृद्धव्याख्या तु व्यपगतः-ओघतश्चेतनापर्यायादपेतः च्युतः-जीवनक्रियातो भ्रष्टः च्यावितः-स्वत एवायुष्कक्षयेण भ्रंशितः त्यक्तदेहः-परित्यक्तजीवसंसर्गजनिताहारप्रभवोपचयः, –

–तत एषांकर्म्मधारयोऽतस्तं, किमुक्तं भवति? इत्याह-'जीवविप्पजढं'ति प्रासुकमित्यर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अकयमकारियमसंकप्पियमणाहूयमकीयगडमणुद्दिट्ठं' अकृतं-साध्वर्थःमनिर्वर्तितं दायकेन, एवमकारितं दायकेनैव, अनेन विशेषणद्वयेनानाधाकर्म्मिकउपात्तः 'असङ्कल्पितं' स्वार्थं संस्कुर्वता साध्वर्थःतया न सङ्कल्पितम्, अनेनाप्यनाधाकर्म्मिक एव गृहीतः, स्वार्थःमारब्धस्य साध्वर्थं निष्ठां गतस्याप्याधाकर्म्मिकत्वात्, न च विद्यते आहूतं-आह्वानमामन्त्रणं नित्यं मद्गृहे पोषमात्रमन्नं ग्राह्यमित्येवंरूपं कर्म्मकराद्याकारणं वा साध्वर्थं स्थानान्तरादन्नाद्यानयनाय यत्र सोऽनाहूतः- अनित्यपिण्डोऽनभ्याहृतो वेत्यर्थः, स्पर्द्धा वाऽऽहूतं तन्निषेधादनाहूतो, दायकेनास्पर्द्धया दीयमानमित्यर्थः, अनेन भावतोऽपरिणताभिधानएषणादोषनिषेध उक्तोऽतस्तम् 'अक्रीतकृतं' क्रयेण साधुदेयं न कृतम्, अनुद्दिष्टम्-अनौद्देशिकं, 'नवकोडीपरिसुद्धं'ति इह कोटयो विभागा स्ताश्चेमाः

बीजादिकं जीवं न हन्ति न घातयति घ्नन्तं नानुमन्यते ३, एवं न पचति ३ न क्रीणाति ३ इत्येवंरूपाः, 'दसदोसविप्पमुक्कं'ति दोषाः-शङ्कितम्रक्षितादयः 'उग्गमुपायणेसणासुपरिसुद्धं'ति उद्गमश्च-आधाकर्म्मादि षोडशविधः उत्पादना च-धात्रीदूत्यादिका षोडशविधैव उद्गमोत्पादने एतद्विषया या एषणा-पिण्डविशुद्धिस्तया सुष्ठु परिशुद्धो यः स उद्गमोत्पादनैषणा- सुपरि- शुद्धोऽतस्तम्, अनेन चोक्तानुक्तसङ्ग्रहः कृतः, वीताङ्गारादीनि क्रियाविशेषणान्यपि भवन्ति प्रायोऽनेन च ग्रासैषणाविशुद्धिरुक्ता ।

'असुरसुरं'त अनुकरणशब्दोऽयम् एमचवचवमित्यपि, 'अदुयं'ति अशीघ्रम् 'अविलंबियं'- ति नातिमन्थरं 'अपरिसाडिंति अनवयवोज्झनम् 'अक्खोवंजणवणानुलेवणभूयं'ति अक्षोपाञ्जनं च-शकटधूर्म्रक्षणं व्रणानुलेपनं च-क्षतस्यौषधेन विलेपनं अक्षोपाञ्जनव्रणानुलेपने ते इव विवक्षि- तार्थःसिद्धिरसादिनिरभिष्वङ्गतासाधर्म्यादयः सोऽक्षोपाञ्जनव्रणानुलेपनभूतोऽतस्तं, क्रियाविशेषणं वा, 'संजमजायामायावत्तियं'ति संयमयात्रा-संयमानुपालनं सैव मात्रा-आलम्बनसमूहांशः संयमयात्रामात्रा प्रत्ययो यत्र स तथाऽतस्तं संयमयात्रामात्राप्रत्ययं वा यथा भवति, एतदेव वाक्यान्तरेणाह ।

'संयमभारवहणट्ठयाए'त्ति संयम एव भारस्तस्य वहनं-पालनं स एवार्थः संयमभारवहनार्थः स्तद्भावस्तत्ता तस्यै, 'बिलमिव पन्नगभूएणं अप्पाणेणं'ति बिले इव-रन्ध्रे इव 'पन्नगभूतेन' सर्प्पकल्पेन आत्मना करणभूतेनाहारमुक्तविशेषणम् 'आहारयति' शरीरकोष्ठके प्रक्षिपति, यथा किल बिले सर्प्प आत्मानं प्रवेशयति पार्श्वानसंस्पृशन् एवं साधुर्वदनकन्दरपार्श्वानसंस्पृश-न्नाहारेण तदसञ्चा- रणतो जठरबिले आहारं प्रवेशयतीति ।

'एस णं'ति 'एषः' अनन्तरोक्तविशेषण आहारः शस्त्रातीतादिविशेषणस्य पानभोजनस्य अर्थः-अभिधेयः प्रज्ञप्त इति ।।

शतकं-७ उद्देशकः-१ समाप्तः

## –: शतकं-७ उद्देशकः-२ :–

**वृ.** प्रथमोद्देशके प्रत्याख्यानिनो वक्तव्यतोक्ता द्वितीये तु प्रत्याख्यानं निरूपयन्नाह—

**मू. (३३९)** *से नूनं भंते ! सव्वपाणेहिं सव्वभूएहिं सववजीवेहिं सव्वसत्तेहिं पच्चक्खाय- मिति वदमाणस्स सुपच्चक्खायं भवति दुपच्चक्खायं भवति ?, गोयमा ! सव्वपाणेहिं जाव सव्वसत्तेहिं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पच्चक्खायमिति वदमाणस्स सिय सुपच्चक्खायं भवति सिय दुपच्चक्खायं भवति।*

*से केणट्ठेणं भंते! एवं वुच्चइ सव्वपाणेहिं जाव सिय दुपच्चक्खायं भवति?, गोयमा! जस्स णं सव्वपाणेहिं जाव सव्वसत्तेहिं पच्चक्खायमिति वदमाणस्स नो एवं अभिसमन्नागयं भवति इमे जीवा इमे अजीवा इमे तसा इमे थावरा तस्स णं सव्वपाणेहिं जाव सव्वसत्तेहिं पच्चक्खायमिति वदमाणस्स नो सुपच्चक्खायं भवति दुपच्चक्खायं भवति।*

*एवं खलु से दुपच्चक्खाई सव्वपाणेहिं जाव सव्वसत्तेहिं पच्चक्खायमिति वदमाणो नो सच्चं भासं भासइ मोसं भासं भासइ, एवं खलु से मुसावाई सव्वपाणेहिं जाव सव्वसत्तेहिं तिविहं तिविहेणं असंजयविरयपडिहयपच्चक्खायपावकम्मे सकिरिए असुवंडे एगंतदंडे एगंतबाले यावि भवति, जस्स णं सव्वपाणेहिं जाव सव्वसत्तेहिं पच्चक्खायमिति वदमाणस्स एवं अभिसमन्नागयं भवइ।*

*इमे जीवा इमे अजीवा इमे तसा इमे थावरा, तस्स णं सव्वपाणेहिं जाव सव्वसत्तेहिं पच्चक्खायमिति वदमाणस्स सुपच्चक्खायं भवति नो दुपच्चक्खायं भवति, एवं खलु से सुपच्चक्खाई सव्वपाणेहिं जाव सव्वसत्तेहिं पच्चक्खायमिति वयमाणे सच्चं भासं भासइ नो मोसं भासं भासइ, एवं खलु से सच्चवादी सव्वपाणेहिं जाव सव्वसत्तेहिं तिविहं तिविहेणं संजयविरयपडिहयपच्चक्खायपावकम्मे अकिरिए संवुडे एगंतपंडिएयावि भवति।*

*से तेणट्ठेणं गोयमा! एवं वुच्चइ जाव सिय दुपच्चक्खायं भवति॥*

**वृ.** 'से नून'मित्यादि, 'सिय सुपच्चक्खायं सिय दुपच्चक्खायं'इति प्रतिपाद्य दुष्प्रत्याख्यानत्वर्णनं कृतं तद्यथासङ्ख्यन्यायत्यागेन यथाऽऽसन्नतान्यायमङ्गीकृत्येति द्रष्टव्यं, 'नो एवं अभिसमन्नागयं भवति'त्ति 'नो' नैव 'एवम्' इति वक्ष्यमाणप्रकारमभिसमन्वागतं-अवगतं स्यात्, 'नो सुपच्चक्खायं भवति'त्ति ज्ञानाभावेन यथावदपरिपालनात् सुप्रत्याख्यानत्वाभावः, 'सव्वपाणेहिं'ति सर्वप्राणेषु ४ 'तिविहं'ति त्रिविधं कृतकारितानुमतिभेदभिन्नं योगमाश्रित्य 'तिविहेणं'ति त्रिविधेन मनोवाक्कायलक्षणेन करणेन।

'असंजयविरयपडिहयपच्चक्खायपावकम्मे'त्ति संयतो-वधादिपरिहारे प्रयतः विरतो-वधादेर्निवृत्तः प्रतिहतानि-अतीतकालसम्बन्धीनि निन्दातः प्रत्याख्यातानि चानागतप्रत्याख्यानेन पापानि कर्मानि येन स तथा, ततः संयतादिपदानां कर्म्मतविधारयस्ततस्तन्निषेधाद् असंयतविरतप्रतिहतप्रत्याख्यातपापकर्मा, अत एव 'सकिरिए'त्ति कायिक्यादिक्रियायुक्तः सकर्म्मबन्धनो वाऽत एव 'असंवुडे'त्ति असंवृताश्रवद्वारः, अत एव 'एगंतदंडे'त्ति एकान्तेन-सर्वथैव परान् दण्डतीत्येकान्तदण्डः, अत एव 'एकान्तबालः' सर्वथा बालिशोऽज्ञ इत्यर्थः।

प्रत्याख्यानाधिकारादेव तद्भेदानाह–

**मू. (३४०)** *कतिविहे णं भंते! पच्चक्खाणे पन्नत्ते?, गोयमा! दुविहे पच्चक्खाणे पन्नत्ते, तंजहा-मूलगुणपच्चक्खाणे य उत्तरगुणपच्चक्खाणे य।*

*मूलगुणपच्चक्खाणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! दुविहे पन्नत्ते, तंजहा-सव्वमूलगुणपच्चक्खाणे य देसमूलगुणपच्चक्खाणे य, सव्वमूलगुणपच्चक्खाणे णं भंते! कतिविहे पन्नत्ते गोयमा! पंचविहे पन्नत्ते, तंजहा-सव्वाओ पाणाइवायाओ वेरमणं जाव सव्वाओ परिग्गहाओ वेरमणं।*

*देसमूलगुणपच्चक्खाणे णं भंते! कइविहे पन्नत्ते?, गोयमा! पंचविहे पन्नत्ते, तंजहा-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*थूलाओ पाणाइवायाओ वेरमणं जाव थूलाओ परिग्गहाओ वेरमणं ।*

*उत्तरगुणपच्चक्खामेणं भंते! कतिविहे पन्नत्ते?, गोयमा! दुविहे पन्नत्ते, तंजहा-सव्वुत्तरगुणपच्चक्खाणे य देसुत्तरगुणपच्चक्खाणे य ।*

*सव्वुत्तरगुणपच्चक्खाणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! दसविहे पन्नत्ते, तंजहा ।*

**वृ.** 'कतिविहे ण'मित्यादि, 'मूलगुणपच्चक्खाणे य'त्ति चारित्रकल्पवृक्षस्य मूलकल्पा गुणाः-प्राणातिपातविरमणादयो मूलगुणास्तद्रूपं प्रत्याख्यानं-निवृत्तिर्मूलगुणविषयं वा प्रत्याख्यानं-अभ्युपगमो मूलगुणप्रत्याख्यानम् ।

उत्तरगुणपच्चक्खाणे य'त्ति मूलगुणापेक्षयोत्तरभूत गुणा वृक्षस्य शाखा इवोत्तरगुणास्तेषु प्रत्याख्यानमुत्तरगुणप्रत्याख्यानं ।

'सव्वमूलगुणे'त्यादि, सर्वथा मूलगुणप्रत्याख्यानं सर्वमूलगुणप्रत्याख्यानं देशतो मूलगुणप्रत्याख्यानं देशमूलगुणप्रत्याख्यानं, तत्र सर्वमूलगुणप्रत्याख्यानं सर्वविरतानां, देशमूलगुणप्रत्याख्यानं तु देशविरतानाम् ।

**मू. (३४१)** *अनागय १ मइक्कंतं २ कोडीसहियं ३ नियंटियं ४ चेव ।*
*सागार ५ मनागारं ६ परिमाणकडं ७ निरवसेसं ८-*
*साकेयं ९ चेव अद्धाए १० पच्चक्खाणं भवे दसहा ॥*

**वृ.** 'अनागय'गाहा, अनागतकरणादनागतं, पर्युषणादावाचार्यादिवैयावृत्त्यकरणेनान्तरायसद्भावादारत एव तत्तपःकरणमित्यर्थः, आह च-

॥१॥ "हो ही पज्जोसवणा मम य तया अंतराइयं होज्जा ।
गुरुवेयावच्चेणं १ तवस्सि २ गेलन्नयाए वा ३ ॥
॥२॥ सो दाइ तवोकम्मं पडिवज्जइ तं अनागए काले ।
एयं पच्चक्खाणं अनागयं होइ नायव्वं ॥

-इति, एवमतिक्रान्तकरणादतिक्रान्तं, भावना तु प्राग्वत, उक्तं च-

॥१॥ "पज्जोसवणाइ तवं जो खलु न करेइ कारणज्जाए ।
गुरुवेयावच्चेणं १ तवस्सि २ गेलन्नयाए वा ३ ॥
॥२॥ सो दाइ तवोकम्मं पडिवज्जइ तं अइच्छिए काले ।
एयं पच्चक्खाणं अतिकंतं होइ नायव्वं ॥ ति,

कोटीसहितमिति-मीलितप्रत्याख्यानद्वयकोटि चतुर्थादि कृत्वाऽनन्तरमेव चतुर्थादिः करणमित्यर्थः, अवाचि च-

॥२॥ "पट्ठवणओ उ दिवसो पच्चक्खाणस्स निट्ठवणओ य ।
जहियं समेंति दोन्नि उ तं भन्नइ कोडिसहियं तु ॥"

'नियंटितं चेव'नितरां यन्त्रितं नियन्त्रितं, प्रतिज्ञातदिनानौद ग्लानत्वाद्यन्तरायभावेऽपि नियमात्कर्त्तव्यमिति हृदयं, यदाह-

॥१॥ "मासे मासे य तवो अमुगो दिणंमि एवइओ ।
हट्ठेण गिलाणेण च कायव्वो जाव ऊसासो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२॥ एयं पच्चक्खाणं नियंटियं धीरपुरिसपन्नत्तं।
जं गेण्हंतऽनगारा अनिस्सियप्पा अपडिबद्धा ॥

'साकार'मिति आक्रियन्त इत्याकाराः-प्रत्याख्यानापवादहेतवो महत्तराकारादयः सहाकारैर्वर्त्तत इति साकारम्, अविद्यमानाकारमनाकारं-यद्विशिष्टप्रयोजनसम्भवाभावे कान्तार-दुर्भिक्षादौ महत्तराद्याकारमनुच्चारयद्भिर्विधीयते तदनाकारमिति भावः, केवलमनाकारेऽप्य-नाभोगसहसाकारावुच्चारयितव्यावेव, काष्ठाङ्गुल्यादेर्मुखे प्रक्षेपणतो भङ्गो मा भूदिति, अतोऽना-भोगसहसाकारापेक्षया सर्वदा साकारमेवेति, 'परिमाणकृत'मिति इत्यादिभि कृतपरिमाणम्, अभानि च-

॥१॥ "दत्तीहि व कवलेहि व घरेहि भिक्खाहिं अहव दव्वेहिं।
जो भत्तपरिच्चायं करेति परिमाणकडमेयं ॥"

–'निरवशेषं' समग्राशनादिविषयं, भनितं च–

॥१॥ "सव्वं असणं सव्वं च पाणगं सव्वखज्जपेज्जविहिं।
परिहरइ सव्वभावेणेयं भनियं निरवसेसं ॥

साएयं चेव'त्ति केतः-चिह्नं सह केतेन वर्त्तते सकेतं, दीर्घता च प्राकृतत्वात्, सङ्केतयुक्तत्वाद्वा सङ्केतम्-अङ्गुष्ठसहितादि, यदाह–

"अंगुट्ठगंठीघरसेऊसासथिबुगजोइक्खे।
भनियं सकेयमेयं धीरेहिं अनंतणाणीहिं ॥

'अद्धाए'त्ति अद्धा-कालस्तस्याः प्रत्याख्यानं-पौरुष्यादिकालस्य नियमनम्, आह च–

॥१॥ "अद्धापच्चक्खाणं जं तं कालप्पमाणछेणं।
पुरिमड्ढपोरुसीहिं मुहुत्तमासद्धमासेहिं ॥

**मू. (३४२)** *देसुत्तरगुणपचच्क्खाणे णं भंते! कइविहे पन्नत्ते?, गोयमा! सत्तविहे पन्नत्ते, तंजहा-दिसिव्वयं १ उवभोगपरीभोगपरिमाणं २ अनत्थदंडवेरमणं ३ सामाइयं ४ देसावगासियं ५ पोसहोववासो ६ अतिहिसंविभागो ७ अपच्छिममारणंतियसंलेहणाझूसणाराहणता।*

**वृ.** 'उवभोगपरिभोगपरिमाणं'ति उपभोगः-सकृद्भोगः, स चाशनपानानुलेपनादीनां, परिभोग- स्तु पुनः पुनर्भोगः, स चासनशयनवसनवनितादीनाम्।

'अपच्छिममारणंतियसंलेहणाझूसणाराहणय'त्ति पश्चिमैवामङ्गलपरिहारार्थःमपश्चिमा मरणं-प्राणत्यागलक्षणम्, इह यद्यपि प्रतिक्षणमावीचीमरणमस्ति तथापि न तद्गृह्यते, किं तर्हि ?, विवक्षितसर्वायुष्कक्षयलक्षणं इति, मरणमेवान्तो मरणान्तस्तत्र भवा मारणान्तिकी संलिख्यते-कृशीक्रियतेऽनया शरीरकषायादीति संलेखना-तपोविशेषलक्षणा ततः कर्म्मधारयाद् अपश्चिम-मारणान्तिकसंलेखना तस्या जोषणं-सेवनं तस्याराधनम्-अखण्डकालकरणं तद्भावः अपश्चिममारणान्तिकसंलेखनाजोषणाराधनता।

इह च सप्त दिग्व्रतादयो देशोत्तरगुणा एव, संलेखना तु भजनया, तथाहि-सा देशोतर-गुणवतो देशोत्तरगुणः, आवश्यके तथाऽभिधानात्, इतरस्य तु सर्वोत्तरगुणः साकारानाकारा-दिप्रत्याख्यानरूपत्वादिति संलेखनामविगणय्य सप्त देशोत्तरगुणा इत्युक्तम्, अस्याश्चैतेषु पाठो देशोत्तरगुणधारिणाऽपीयमन्ते विधातव्येत्यस्यार्थःस्य ख्यापनार्थः इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथोक्तभेदेन प्रत्याख्यानेन तद्विपर्ययेण च जीवादिपदानि विशेषयन्नाह–

**मू. (३४३)** *जीवा णं भंते ! किं मूलगुणपच्चक्खाणी उत्तरगुणपच्चक्खाणी अपच्चक्खाणी गोयमा ! जीवा मूलगुणपच्चक्खाणीवि उत्तरगुणपच्चक्खाणीवि अपच्चक्खाणीवि ।*

*नेरइया णं भंते ! किं मूलणगुणपच्चक्खाणी० पुच्छा ?, गोयमा ! नेरइया नो मूलगुणपच्चक्खाणी नो उत्तरगुणपच्चखाणी अपच्चक्खाणी, एवं जाव चउरिंदिया ।*

*पंचिंदियतिरिक्खजोनिया मणुस्सा य जहा जीवा, वाणमंतरजोइसियवेमानिया जहा नेरइया*

*एएसि णं भंते ! मूलगुणपच्चक्खाणी उत्तरगुणपच्चक्खाणी अपच्चक्खाणी य कयरे २ हिंतो जाव विसेसाहिया वा ?, गोयमा ! सवत्थोवा जीवा मूलगुणपच्चक्खाणी उत्तरगुणपच्चक्खाणी असंखेज्जगुणा अपच्चक्खाणी अनंतगुणा ।*

*एएसि णं भंते ! पंचिंदियतिरिक्खजोनियाणं पुच्छा, गोयमा ! सव्वत्थोवा जीवा पंचेंदियतिरिक्खजोनिया मूलगुणपच्चक्खाणी उत्तरगुणपच्छक्खाणी असंखेज्जगुणा अपच्चक्खाणी असंखिज्जगुणा ।*

*एएसि णं भंते ! मणुस्साणं मूलगुणपच्चक्खाणीणं० पुच्छा, गोयमा ! सव्वत्थोवा मणुस्सा मूलगुणपच्चक्खाणी उत्तरगुणपच्चक्खाणी संखेज्जगुणा अपच्चक्खाणी असंखेज्जगुणा ।*

*जीवा णं भंते ! किं सव्वमूलगुणपच्चक्खाणी देसमूलगुणपच्चक्खाणी अपच्चक्खाणी ?, गोयमा ! जीवा सव्वमूलगुणपच्चक्खाणी देसमूलगुणपच्चक्खाणी अपच्चक्खाणीवि । नेरइयाणं पुच्छा, गोयमा ! नेरइया नो सव्वमूलगुणपच्चक्खाणी नो देसमूलगुणपच्चक्खाणी अपच्चक्खाणी, एवं जाव चउरिंदिया*

*पंचिंदियतिरिक्खपुच्छा, गोयमा ! पंचिंदियतिरिक्ख० नो सव्वमूलगुणपच्चक्खाणी देसमूलगुणपच्चक्खाणी अपच्चक्खाणीवि, मणुस्सा जहा जीवा, वाणमंतरजोइसवेमानिया जहा नेरइया*

*एएसि णं भंते ! जीवाणं सव्वमूलगुणपच्चक्खाणीणं देसमूलगुणपच्चक्खाणीणं अपच्चक्खाणीण य कयरे२ हिंतो जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सव्वमूलगुणपच्चक्खाणी देसमूलगुणपच्चक्खाणी असंखेज्जगुणा अपच्चक्खाणी अणंतगुणा । एवं अप्पाबहुगानि तिन्निवि जहा पढमिल्लए दंडए, नवरं सव्वत्थोवा पंचिंदियतिरिक्खजोनिया देसमूलगुणपच्चक्खाणी अपच्चक्खाणी असंखेज्जगुणा ।*

*जीवा णं भंते ! किं सव्वुत्तरगुणपच्चक्खाणी देसुत्तरगुणपच्चक्खामी अपच्चक्खाणी ?, गोयमा ! जीवा सव्वुत्तरगुणपच्चक्खाणीवि तिन्निवि, पंचिंदियतिरिक्खजोनिया मणुस्सा य एवं चेव, सेसा अपच्चक्खाणी जाव वेमानिया ।*

*एएसि णं भंते ! जीवाणं सव्वुत्तरगुणपच्चक्खाणी अप्पाबहुगानि तिन्निव जहा पढमे दंडए जाव मणूसाणं ।*

*जीवा णं भंते ! किं संजया असंजया संजयासंजया ?, गोयमा ! जीवा संजयावि असंजयावि संजयासंजयावि तिन्निवि, एवं जहेव पन्नवणाए तहेव भानियव्वं, जाव वेमानिया, अप्पाबहुगं तहेव तिण्हवि भानियव्वं ।*

*जीवा णं भंते ! किं पच्चक्खाणी अपच्चक्खाणी पच्चक्खाणापच्चक्खाणी ?, गोयमा !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जीवा पञ्चक्खाणीवि एवं तिन्निवि, एवं मणुस्साणवि तिन्निवि, पंचिंदियतिरिक्खजोनिया आइल्लविरहिया सेसा सव्वे अपञ्चक्खाणी जाव वेमाणिया।*

*एएसि णं भंते ! जीवाणं पञ्चक्खाणीणं जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा पञ्चक्खाणी पञ्चक्खाणापञ्चक्खाणी असंखेज्ज-गुणा अपञ्चक्खाणी अणंतगुणा, पंचेंदियतिरिक्खजोनिया सव्वत्थोवा पञ्चक्खाणापञ्चक्खाणी अपञ्चक्खाणी असंखेज्जगुणा, मणुस्सा सव्वत्थोवा पञ्चक्खाणी पञ्चक्खाणापञ्चक्खाणी संखेज्जगुणा अपञ्चक्खाणी असंखेज्जगुणा ।।*

**वृ.** 'जीवा ण'मित्यादि, 'पंचिंदियतिरिक्खजोनिया मणुस्सा य जहा जीव'त्ति मूलगुणप्रत्याख्यानिन उत्तरगुणप्रत्याख्यानिनोऽप्रत्याख्यानिनश्च, नवरं पञ्चेन्द्रियतिर्यञ्चो देशत एव मूलगुणप्रत्याख्यानिनः, सर्वविरतेस्तेषामभावात्, इह चोक्तं गाथया-

॥ १ ॥ "तिरियाणं चारित्तं निवारियं अह य तो पुणो तेसिं।
सुव्वइ सुव्वइ बहुयाणं चिय महव्वयारोवणं समए ॥"

—परिहारोऽपि गाथयैव—

॥ २ ॥ "न मइ० महव्वयसब्भावेऽवि चरमपरिणामसंभवो तेसिं।
न बहुगुणाणंपि जहा केवलसंभूइपरिणामो ॥" त्ति

अथ मूलगुणप्रत्याख्यानादिमतामेवाल्पत्वादि चिन्तयति-'एएसि ण'मित्यादि, 'सव्वत्थोवा जीवा मूलगुणपञ्चक्खाणी'ति देशतः सर्वतो वा ये मूलगुणवन्तस्ते स्तोकाः, देशसर्वाभ्यामुत्तरगुणवतामसङ्ख्येयगुणत्वात्, इह च सर्वविरतेषु ये उत्तरगुणवन्तस्तेऽवश्यं मूलगुणवन्तः, मूलगुणवन्तस्तु स्यादुत्तरगुणवन्तः स्यात्तद्विकलाः, य एव च तद्विकलास्त एवेह मूलगुणवन्तो ग्राह्याः, ते चेतरेभ्यः स्तोका एव, बहुतरयतीनां दशविधप्रत्याख्यानयुक्तत्वात्, तेऽपि च मूलगुणेभ्यः सङ्ख्यातगुणा एव नासङ्ख्यातगुणाः, सर्वयतीनामपि सङ्ख्यातत्वात्।

देशविरतेषु पुनर्मूलगुणवद्भयो भिन्ना अप्युत्तरगुनिनो लभ्यन्ते, ते च मधुमांसादिविचित्राभिग्रहवशाद्बहुतरा भवन्तीतिकृत्वा देशविरतोत्तरगुणवतोऽधिकृत्योत्तरगुणवतां मूलगुणवद्भयोऽसङ्ख्यातगुणत्वं भवति, अत एवाह-'उत्तरगुणपञ्चक्खाणी असंखेज्जगुण'त्ति, 'अपञ्चक्खाणी अनंतगुण'त्ति मनुष्यपञ्चेन्द्रियतिर्यञ्च एव प्रत्याख्यानिनोऽन्ये त्वप्रत्याख्यानिन एव, वनस्पतिप्रभृतिकत्वात्तेषामनन्तगुणत्वमिति।

मनुष्यसूत्रे 'अपञ्चक्खाणी असंखेज्जगुणे'ति यदुक्तं तत्संमूर्च्छिममनुष्यग्रहणेनावसेयमितरेषां सङ्ख्यातत्वादिति। 'एवं अप्पबहुगानि तिन्निवि जहा पढमिल्लए दंडए'त्ति तत्रैकं जीवानामिदमेव, द्वितीयं पञ्चेन्द्रियतिरश्चां, तृतीयं तु मनुष्याणाम्, एतानि च यथा निर्विशेषणमूलगुणादिप्रतिबद्धे दण्डके उक्तानि एवमिह त्रीण्यपि वाच्यानि, विशेषमाह-'नवर'मित्यादि, 'पंचेंदियतिरिक्खजोनिया मणुस्सा य एवं चेव'त्ति यथा जीवाः सर्वोत्तरगुणप्रत्याख्यानादय उक्ता एवं पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च वाच्याः, इह च पञ्चेन्द्रियतिर्यञ्चोऽपि सर्वोत्तरगुणप्रत्याख्यानिनो भवन्तीत्यवसेयं, देशविरतानां देशतः सर्वोत्तरगुणप्रत्याख्यानस्याभिमतत्वादिति।

मूलगुणप्रत्याख्यानिप्रभृतयश्च संयतादयो भवन्तीति संयतादिसूत्रम्-तिन्निवि'त्ति जीवास्त्रिविधा अपीत्यर्थः, 'एवं जहेवे'त्यादि, 'एवम्' अनेनाभिलापेन यथैव प्रज्ञापनायां तथैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रमिदमध्येयं, तच्चैवम्-'नेरइया णं भंते ! किं संजया असंजया संजयासंजया ?, गोयमा ! नो संजया असंजया नो संजयासंजये'त्यादि।

'अप्पा' इत्यादि, अल्पबहुत्वं संयतादीनां तथैव यथा प्रज्ञापनायामुक्तं 'तिण्हवि'त्ति जीवानां पञ्चेन्द्रियतिरश्चां मनुष्याणां च, तत्र सर्वस्तोकाः संयता जीवाः, संयतासंयता असङ्ख्येयगुणाः, असंयतास्त्वनन्तगुणाः, पञ्चेन्द्रियतिर्यञ्चस्तु सर्वस्तोकाः संयतासंयताः असंयता असङ्ख्येयगुणाः, मनुष्यास्तु सर्वस्तोकाः संयताः संयतासंयताः सङ्ख्येयगुणाः असंयता असंङ्ख्येयगुणा इति।

संयतादयश्च प्रत्याख्यान्यादित्वे सति भवन्तीति प्रत्याख्यान्यादिसूत्रम्-ननु षष्ठशते चतुर्थोद्देशके प्रत्याख्यान्यादयः प्ररूपिता इति किं पुनस्तत्प्ररूपणेन ?, सत्यमेतत् किन्त्वल्पबहुत्वचिन्ता-रहितास्तत्र प्ररूपिता इह तु तद्युक्ताः सम्बन्धान्तरद्वारायाताश्चेति।

जीवाधिकारात्तच्छाश्वतत्वसूत्रानि-तत्र च-

**मू. (३४४)** *जीवा णं भंते ! किं सासया असासया ?, गोयमा ! जीवा सिय सासया सिय असासया।*

*से केणट्ठेणं भंते ! एवं वुच्चइ-जीवा सिय सासया सिय असासया ?, गोयमा !, दव्वट्ठयाए सासया भावट्ठयाए असासया, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-जाव सिय असासया।*

*नेरइया णं भंते ! किं सासया असासा ?, एवं जहा जीवा तहा नेरइयावि, एवं जाव वेमानिया जाव सिय सासया सिय असासया। सेवं भंते ! सेवं भंते ! ॥*

**वृ.** 'दव्वट्ठयाए'त्ति जीवद्रव्यत्वेनेत्यर्थः 'भावट्ठयाए'त्ति नारकादिपर्यायत्वेनेत्यर्थः ॥

शतकं-७ उद्देशकः-२ समाप्तः

## -: शतकं-७ उद्देशकः-३ :-

**वृ.** जीवाधिकारप्रतिबद्ध एव तृतीयोद्देशकस्तत्सूत्रम्-

**मू. (३४५)** *वणस्सइकाइया णं भंते ! किंकालं सव्वप्पाहारगा वा सव्वमहाहारगा वा भवंति ?, गोयमा ! पाउसवरिसारत्तेसु णं भंते ! किंकालं सव्वप्पाहारगा वा सव्वमहाहारगा वा भवंति ?, गोयमा ! पाउसवरिसारत्तेसु णं एत्थ णं वणस्सइकाइया सव्वमहाहारगा भवंति तदानंतरं च णं सरए तयानंतरं च णं हेमंते तदानंतरं च णं वसंते तदानंतरं च णं गिम्हे सु णं वणस्सइकाइया सव्वप्पाहारगा भवंति।*

*जइ णं भंते ! गिम्हासु वणस्सइकाइया सव्वप्पाहारगा भवंति। कम्हा णं भंते ! गिम्हासु बहवे वणस्सइकाइया पत्तिया पुप्फिया फलि हरिगरेरिज्ञमाणा सिरीए अईव अईव उवसोभेमाणा उवसोभेमाणा चिट्ठंति ?, गोयमा ! गिम्हा सु णं बहवे उसिणजोनिया जीवा य पोग्गला य वणस्सइकाइयत्ताए वक्कमंति विउक्कमंति चयंति उववज्जंति, एळं खलु गोयमा ! गिम्हासु बहवे वणस्सइकाइया पत्तिया पुप्फिया जाव चिट्ठंति।*

**वृ.** 'वणस्सइकाइया णं भंते !'इत्याति, 'किंकालं'ति कस्मिन् काले 'पाउसे'त्यादि प्रावृडादौ बहुत्वाज्जलस्नेहस्य महाहारतोक्ता, प्रावृट् श्रावणादिर्वर्षारात्रोऽश्वयुजादि 'सरदे'ति शरत् मार्गशीर्षादिस्तत्र चाल्पाहारा भवन्तीति ज्ञेयं।

ग्रीष्मे सर्वाल्पाहारतोक्ताऽत एव च शेषेष्वप्यल्पाहारता क्रमेण द्रष्टव्येति, 'हरितगरेरिज्ञ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणे'ति हरितकाश्च ते नीलका रेरिज्झमानाश्च-देदीप्यमाना हरितकेरेरिज्यमानाः 'सिरिए'त्ति वनलक्ष्म्या 'उसिणजोनिय'त्ति उष्णमेव योनिर्येषां ते उष्णयोनिकाः।

**मू. (३४६)** *से नूनं भंते! मूला मूलजीवफुडा कंदा कंदजीवफुडा जाव बीया बीयजीवफुडा हंता गोयमा! मूला मूलजीवफुडा जाव बीया बीयजीवफुडा।*

*जति णं भंते! मूला मूलजीवफुडा जाव बीया बीयजीवफुडा कम्हा णं भंते! वणस्सइकाइया आहारेंति कम्हा परिणामेंति?, गोयमा! मूला मूजीवफुडा पुढविजीवपडिबद्धा तम्हा आहारेंति तम्हा परिणामेंति कंदा कंदजीवफुडा मूलजीवपडिबद्धा तम्हा आहारेइ तम्हा परिणामेइ।*

*एवं जाव बीया बीयजीवफुडा फलजीवपडिबद्धा तम्हा आहारेइ तम्हा परिणामेइ॥*

**वृ.** 'मूला मूलजीवफुड'त्ति मूलानि मूलजीवैः स्पृष्टानि व्याप्तानीत्यर्थः, यावत्करणात् 'खंधा खंधजीवफुडा एवं तया साला पवाला पत्ता पुप्फा फल'त्ति दृश्यम्।

'जइ ण'मित्यादि, यदि भदन्त! मूलादीन्येवं मूलादिजीवैः स्पृष्टानि तदा 'कम्ह'त्ति 'कस्मात्' केन हेतुना कथमित्यर्थः वनस्पतय आहारयन्ति?, आहारस्य भूमिगतत्वात् मूलादिजीवानां च मूलादिव्याप्त्यैवावस्थितत्वात् केषाञ्चिच्च परस्परव्यवधानेन भूमेर्दूरवर्त्तित्वादिति, अत्रोत्तरं, मूलानि मूलजीवस्पृष्टानि केवलं पृथिवीजीवप्रतिबद्धानि 'तम्ह'त्ति 'तस्मात्' तत्प्रतिबन्धाद्धेतोः पृथिवीरसं मूलजीवा आहारयन्तीति।

कन्दाः कन्दजीवस्पृष्टाः केवलं मूलजीवप्रतिबद्धाः 'तस्मात्' तत्प्रतिबन्धात् मूलजीवोपात्तं पृथिवीरसमाहारयन्तीत्येवं स्कन्धादिष्वपि वाच्यम्।

**मू. (३४७)** *अह भंते! आलुए मूलए सिंगबेरे हिरिली सिरिलि सिस्सिरिली किट्ठिया छिरिया छीरिविरालिया कण्हकंदे वज्रकंदे सूरणकंदे खेलूडे अद्दए भद्दमुत्था पिंडहलिद्दा लोही नीहू थीहू थिरूगा मुग्गकन्नी अस्सकन्नी सीहंढी मुंसुंढी जे यावन्ने तहप्पगारा सव्वे ते अनंतजीवा विविहसत्ता? हंता गोयमा! आलुए मूलए जाव अनंतजीवा विविहसत्ता॥*

**वृ.** 'आलुए'इत्यादि, एते चानन्तकायभेदा लोकरूढिगम्याः, 'तहप्पगार'त्ति 'तथाप्रकाराः' आलुकादिसदृशाः 'अनंतजीव'त्ति अनन्ता जीवा येषु ते तथा 'विविहसत्त'त्ति विविधा-बहुप्रकारा वर्णादिभेदात् सत्त्वा येषामनन्तकायिकवनस्पतिभेदानां ते तथा –

–अथवैकस्वरूपैरपि जीवैरेषामनन्तजीविता स्यादित्याशङ्कायामाह-विचित्रकर्म्मतयाऽनेकविधाः सत्त्वा येषु ते तथा, 'विविहसत्त'त्ति क्वचिद् दृश्यते तत्र विचित्रा विधयो-भेदा येषां ते तथा ते सत्त्वा येषु ते तथा॥　जीवाधिकारादेवेदमाह–

**मू. (३४८)** *सिय भंते! कण्हलेसे नेरइए अप्पकम्मतराए नीललेसे नेरइए महाकम्मतराए हंता सिया। से केणट्ठेणं एवं वुच्चइ-कण्हलेसे नेरइए अप्पकम्मतराए नीललेसे नेरइए महाकम्मतराए गोयमा! ठितिं पडुच्च, से तेणट्ठेणं गोयमा! जाव महाकम्मतराए।*

*सिय भंते! नीललेसे नेरइए अप्पकम्मतराए काउलेसे नेरइए महाकम्मतराए?, हंता सिया, से केणट्ठेणं भंते! एवं वुच्चति-नीललेसे अप्पकम्मतराए काउलेसे नेरइए महाकम्मतराए गोयमा! ठितिं पडुच्च, से तेणट्ठेणं गोयमा! जाव महाकम्मतराए।*

*एवं असुरकुमारेवि, नवरं तेउलेस्सा अब्भहिया एवं जाव वेमानिया, जस्स जइ लेसाओ*

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

*तस्स तत्तिया भानियव्वाओ, जोइसियस्स न भन्नइ, जाव सिय भंते! पम्हलेसे वेमानिए अप्पकम्म-तराए सुक्कलेसे वेमानिए महाकम्मतराए?, हंता सिया, से केणट्ठेणं० सेसं जहा नेरइयस्स जाव-कम्मतराए ॥*

**वृ.** 'सिय भंते ! कण्हलेसे नेरइए'इत्यादि, 'ठितिं पडुच्च'त्ति, अत्रेयं भावना-सप्तम-पृथिवीनारकः कृष्णलेश्यस्तस्य च स्वस्थितौ बहुक्षपितायां तच्छेषे वर्त्तमाने पञ्चमपृथिव्यां सप्तदशसागरोपमस्थितिर्नारको नीललेश्यः समुत्पन्नः, तमपेक्ष्य स कृष्णलेश्योऽल्पकर्मा व्यपदिश्यते, एवमुत्तरसूत्राण्यपि भावनीयानि।

'जोइसियस्स न भन्नइ' त्ति एकस्या एव तेजोलेश्यायास्तस्य सद्भावात् संयोगो नास्तीति सलेश्या जीवाश्च वेदनावन्तो भवन्तीति वेदनासूत्राणि-

***मू. (३५०)** से नूनं भंते! जा वेदणा सा निज्जरा जा निज्जरा वेदणा?, गोयमा! नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ जा वेयणा न सा निज्जरा जा निज्जरा न सा वेयणा?, गोयमा कम्म वेदणा नोकम्म निज्जरा, से तेणट्ठेणं गोयमा! जाव न सा वेदणा।*

*नेरइयाणं भंते! जा वेदणा सा निज्जरा जा निज्जरा सा वेयणा?, गोयमा! नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ नेरइयाणं जा वेयणा न सा निज्जरा जा निज्जरा न सा वेयणा?, गोयमा! नेरइयाणं कम्म वेदणा नोकम्म निज्जरा, से तेणट्ठेणं गोयमा! जाव न सा वेयणा, एवं जाव वेमानियाणं।*

*से नूनं भंते! जं वेदेंसु तं निज्जरिंसु जं निज्जरिंसु तं वेदेंसु?, नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ जं वेदेंसु नो तं निज्जरेंसु जं निज्जरेंसु नो तं वेदेंसु?, गोयमा! कम्मं वेदेंसु नोकम्मं निज्जरिंसु, से तेणट्ठेणं गोयमा! जाव नो तं वेदेंसु, नेरइया णं भंते! जं वेदेंसु तं निज्जरिंसु? एवं नेरइयावि एवं जाव वेमानिया।*

*से नूनं भंते! जं वेदेंति तं निज्जरेंति जं निज्जरिंति तं वेदेंति?, गोयमा! नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ जाव नो तं वेदेंति?, गोयमा! कम्मं वेदेंति नोकम्मं निज्जरेंति, से तेणट्ठेणं गोयमा! जाव नो तं वेदेंति, एवं नेरइयावि जाव वेमानिया।*

*से नूनं भंते! जं वेदिस्संति तं निज्जरिस्संति जं निज्जरिस्संति तं वेदिस्संति?, गोयमा! नो तिणट्ठे समट्ठे, से केणट्ठेणं जाव नो तं वेदेस्संति?, गोयमा! कम्मं वेदिस्संति नोकम्मं निज्जरिस्संति, से तेणट्ठेणं जाव नो तं निज्जरिस्संति, एवं नेरइयावि जाव वेमानिया।*

*से नूनं भंते! जे वेदनासमए से निज्जरासमए जे निज्जरासमए से वेदणासमए?, नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ जे वेयणासमए न से निज्जरासमए जे निज्जरासमए न से वेदणासमए?, गोयमा! जं समयं वेदेंति नो तं समयं निज्जरेंति जं समयं निज्जरेंति नो तं समयं वेदेंति, अन्नम्मि समए वेदेंति अन्नम्मि समए निज्जरेंति अन्ने से वेदणासमए अन्ने से निज्जरासमए, से तेणट्ठेणं जाव न से वेदणासमए न से निज्जरासमए।*

*नेरइयाणं भंते! जे वेदणासमए से निज्जरासमए जे निज्जरासमए से वेदणासमए?, गोयमा नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ नेरइयाणं जे वेदणासमए न से निज्जरासमए जे*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*निज्जरासमए न से वेदणासमए ?, गोयमा ! नेरइया णं जं समयं वेदेंति नो तं समयं निज्जरेंति जं समयं निज्जरंति नो तं समयं वेदेंति अन्नम्मि समए वेदेंति अन्नम्मि समए निज्जरेंति अन्ने से वेदणासमए अन्ने से निज्जरासमए, से तेणट्ठेणं जाव न से वेदणासमए एवं जाव वेमानिया ।।*

**वृ.** 'कम्म वेयण'त्ति उदयं प्राप्तं कर्म्म वेदना धर्मधर्म्मिणोरभेदविवक्षणात्, 'नोकम्मं निज्जरे'ति कर्म्माभावो निर्जरा तस्या एवंस्वरूपत्वादिति 'नोकम्मं निज्जरेंसु'त्ति वेदितरसं कर्म नोकर्म तन्निर्ज्जरितवन्तः ।

कर्म्मभूतस्य कर्म्मणो निर्ज्जरणासम्भवादिति ।। पूर्वकृतकर्म्मणश्च वेदना तद्वत्ता च कथञ्चिच्छाश्वतत्वे सति युज्यत इति तच्छाश्वतत्वसूत्रानि, तत्र च–

**मू. (३५०)** *नेरइया णं भंते ! किं सासया असासया ?, गोयमा ! सिय सासया सिय असासया । से केणट्ठेणं भंते ! एवं वुच्चइ नेरइया सिय सासया सिय असासया ?, गोयमा ! अव्वोच्छित्तिणयट्ठयाए सासया वोच्छित्तिणयट्ठयाए असासया से तेणट्ठेणं जाव सिय सासया सिय असासया ।*

*एवं जाव वेमानिया जाव सिय असासया । सेवं भंते ! सेवं भंते त्ति ।।*

**वृ.** 'अव्वोच्छित्तिणयट्ठयाए'त्ति अव्यवच्छित्तिप्रधानो नयोऽव्यवच्छित्तिनयस्तस्यार्थोद्रव्यमव्यवच्छित्तिनयार्थःस्तद्भावस्तत्ता तयाऽव्यवच्छित्तिनयार्थःतया-द्रव्यमाश्रित्य शाश्वता इत्यर्थः ।

'वोच्छित्तिणयट्ठयाए'त्ति व्यवच्छित्तिप्रधानो यो नयस्तस्य योऽर्थः-पर्यायलक्षणस्तस्य यो भावः सा व्यवच्छित्तिनयार्थःता तया २-पर्यायानाश्रित्य अशाश्वता नारका इति ।।

शतकं-७ उद्देशकः-३ समाप्तः

## –: शतकं-७ उद्देशकः-४ :–

**वृ.** तृतीयोद्देशके संसारिणः शाश्वतादिस्वरूपतो निरूपिताश्चतुर्थोद्देशके तु तानेव भेदतो निरूपयन्नाह–

**मू. (३५१)** *रायगिहे नगरे जाव एवं वदासी-कतिविहा णं भंते ! संसारसमावन्नगा जीवा पन्नत्ता ?, गोयमा ! छव्विहा संसारसमावन्नगा जीवा पन्नत्ता, तंजहा-पुढविकाइया एवं जहा जीवाभिगमे जाव सम्मत्तकिरियं वा मिच्छत्तकिरियं वा । सेवं भंते सेवं भंतेत्ति ।*

**वृ.** 'कतिविहा ण'मित्यादि, 'एवं जहा जीवाभिगमे'त्ति एवं च तत्रैतत्सूत्रम्-'पुढविकाइया जाव तसकाइया, से किं तं पुढविकाइया ?, पुढविकाइया दुविहा पन्नत्ता, तंजहा-सुहुमपुढविकाइया बायरपुढविकाइया'इत्यादि, अन्तः पुनरस्य 'एगे जीवे एगेणं समएणं एक्कं किरियं पकरेइ' ।

तंजहा-सम्मत्तकिरियं वा मिच्छत्तकिरियं वा अत एवोक्तं 'जाव सम्मत्ते'त्यादि, वाचनान्तर त्विदं दृश्यते–

**मू. (३५२)** *जीवा छव्विह पुढवी जीवाण ठिती भवट्ठिती काए ।*
*निल्लेवण अनगारे किरिया सम्मत्तमिच्छत्ता ।।*

**वृ.** "जीवा छविह पुढवी जीजाण ठिती भवट्ठिती काए ।
निल्लेवण अनगारे किरिया सम्मत्त मिच्छत्ता ।।" इति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र च षड्विधा जीवा दर्शिता एव, 'पुढवि'त्ति षड्विधा बादरपृथ्वी श्लक्ष्णा १ शुद्धा २ वालुका ३ मनःशिला ४ शर्करा ५ खरपृथिवी ६ भेदात्, तथैषामेव पृथिवीभेद- जीवानां स्थितिरन्तर्मूहूर्त्तादिका यथा योगं द्वाविंशतिवर्षसहस्रान्ता वाच्या।

तथा नारकादिषु भवस्थितिर्वाच्या, सा च सामान्यतोऽन्तर्मुहूर्त्तादिका त्रयस्त्रिंशत्सागरोपमान्ता, तथा कायस्थितिर्वाच्या, सा च जीवस्य जीवकाये सर्वाद्धमित्येवमादिका, तथा निर्लेपना वाच्या, साचैवं-प्रत्युत्पन्नपृथिवीकायिकाः समया पहारेण जघन्यपदेऽसङ्ख्याभिरुत्सर्पिण्यवसर्प्पिणीभिरपह्रियन्ते, एवमुत्कृष्टपदेऽपि, किन्तु जघन्यपदादुत्कृष्टपदसङ्ख्येययगुनित्यादि।

'अनगारे'त्ति अनगारवक्तव्यता वाच्या, सा चेयम्-अविशुद्धलेश्योऽनगारोऽसमवहतेनात्मनाऽविशुद्धलेश्यं देवं देवीमनगारं जानाति ?, नायमर्थः (समर्थः) इत्यादि। 'किरिया समत्त मिच्छत्ते'ति एवं द्दश्यः-अन्ययूथिका एवमाख्यान्ति-एको जीव एकेन समयेन द्वे क्रिये प्रकरोति सम्यक्त्वाक्रियां मिथ्यात्वक्रियांचेति, मिथ्या चैतद्विरोधादिति।

शतकं-७ उद्देशकः-४ समाप्तः

## -: शतकं-७ उद्देशकः-५ :-

**वृ.** चतुर्थे संसारिणो भेदत उक्ताः, पञ्चमे तु तद्विशेषाणामेव योनिसङ्ग्रहं भेदत आह-

**मू. (३५३)** *रायगिहे जाव एवं वदासी-खहयरपंचिंदियतिरिक्खजोनियाणं भंते ! कतिविहे णं जोणीसंगहे पन्नत्ते ?, गोयमा ! तिविहे जोणीसंगहे पन्नत्ते, तंजहा-अंडया पोयया संमुच्छिमा, एवं जहा जीवाभिगमे जाव नो चेव णं ते विमाणे वीतीवएज्जा।*

*एवंमहालयाणं गोयमा ! ते विमाणा पन्नत्ता।*

**वृ.** 'खहयरे'त्यादि, 'जोणीसंगहे'त्ति योनि-उत्पत्तिहेतुर्जीवस्य तया सङ्ग्रहः-अनेकेषामेकशब्दा- भिलाप्यत्वं योनिसङ्ग्रहः, 'अंडय'त्ति अण्डाज्जायन्ते अण्डजाः-हंसादयः, 'पोयय'त्ति पोतवद्वस्त्रवज्जरायुवर्जिततया शुद्धदेहा योनिविशेषाज्जाताः पोतादिव वा-बोहित्थाज्जाताः पोता इव वावस्त्रसंमार्जिता इव जाताः पोतजाः-वल्गुल्यादयः 'संमुच्छिम'त्ति संमूर्च्छनयोनिविशेषधर्मेण निर्वृत्ताः संमूर्च्छिमाः वहिकादयः।

'एवं जहा जीवाभिगमे'त्ति एवं च तत्रैतत्सूत्रम्-'अंडया तिविहा पन्नत्ता, तंजहा-इत्थी पुरिसा नपुंसया, एवं पोययावि, वत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा'इत्यादि, एतदन्तसूत्रं त्वेवम्-'अत्थि णं भंते ! विमाणाइं विजयाइं जयंताइं वेजयंताइं अपराजियाइं ?, हंता अत्थि, ते णं भंते ! विमाणा केमहालया पन्नत्ता ?, गोयमा ! आवइयं च णं सूरिए उदेइ जावइयं च णं सूरिए अत्थमेइ यावताऽन्तरेणेत्यर्थः एवंरूवाइं नव उवासंतराइं अत्थेगइयस्स देवस्स एगे विक्कमे सिया णं देवे ताए उक्किट्ठाए तुरियाए जाव दिव्वाए देवगईए वीईवयमाणे २ जाव एगाहं वा दुयाहं वा उक्कोसेणं छम्मासे वीईवएज्ज'त्ति, शेषं तु लिखितमेवास्ते, तदेव च पर्यन्तसूत्रतया यावत्करणेन दर्शितमिति।

**मू. (३५४)** *जोणीसंग्रह लेसा दिट्ठी नाणे य जोग उवओगे।*
*उववायठितिसमुग्धाय- चवणजातीकुलविहीओ*

*सेवं भंते सेवं भंते त्ति।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** वाचनान्तरे त्विदं ध्श्यते–

जोणिसंगहलेसा दिट्ठी नाणे य जोग उवओगे ।
उववा- यठिइसमुग्घायचवणजाईकुलविहीओ ।

तत्र योनिसङ्ग्रहो दर्शित एव, लेश्यादीनि त्वर्थो दर्श्यन्ते-एषां लेश्याः षड् ध्ष्टयस्तिस्त्रः- ज्ञानानि त्रीनि आद्यानि भजनया अज्ञानानि तु त्रीनि भजनयैव योगास्त्रयः उपयोगौ द्वौ उपपातः सामान्य तश्चतसृभ्योऽपि गतिभ्यः स्थितिरन्तर्मुहूर्त्तादिका पल्योपमासङ्खयेयभागपर्यवसाना समुद्घाताः केवल्याहारकवर्ज्जाः पञ्च तथा च्युत्वा ते गतिचतुष्टयेऽपि यान्ति तथैषां जातौ द्वादश कुलकोटीलक्षा भवन्तीति ।

<u>शतकं-७ उद्देशकः-५ समाप्तः</u>

## –: शतकं-७ उद्देशकः-६ :–

**वृ.** अनन्तरं योनिसङ्ग्रहादिरर्थः उक्तः, स चायुष्मतां भवतीत्यायुष्कादिनिरूपणार्थः षष्ठः-

**मू. (३५५)** *रायगिहे जाव एवं वदासी-जीवे णं भंते ! जे भविए नेरइएसु उववज्जित्तए से णं भंते ! किं इहगए नेरइयाउयं पकरेति उववज्जमाणे नेरइयाउयं पकरेइ उववन्ने नेरइयाउयं पकरेइ ? गोयमा ! इहगए नेरइयाउयं पकरेइ नो उववज्जमाणे नेरइयाउयं पकरेइ नो उववन्ने नेरइयाउयं पकरेइ ?, एवं असुरकुमारेसुवि एवं जाव वेमाणिएसु ।*

*जीवे णं भंते ! जे भविए नेरइएसु उववज्जित्तए से णं भंते ! किं इहगए नेरइयाउयं पडिसंवेदेति उववज्जमाणे नेरइयाउयं पडिसंवेदेति उववन्ने नेरइयाउयं पडिसंवेदेति ?, गोयमा ! नेरइए नो इहगए नेरइयाउयं पडिसंवेदेइ उववज्जमाणे नेरइयाउयं पडिसंवेदेइ उववन्नेवि नेरइयाउयं पडिसंवेदेति एवं जाव वेमानिएसु ।*

*जीवे णं भंते ! जे भविए नेरइएसु उववज्जित्तए से णं भंते ! किं इहगए महावेदणे ? उववन्ने महावेदणे ?, गोयमा ! इहगए सिय महावेयणे सिय अप्पवेदणे उववज्जाणे सिय महावेदणे सिय अप्पवेदणे अहे णं उववन्ने भवति तओ पच्छा एगंतदुक्खं वेयणं वेयति आहच्च सायं ।*

*जीवे णं भंते ! जे भविए असुरकुमारेसु उववज्जित्तए पुच्छा, गोयमा ! इहगए सिय महावेदणे सिय अप्पवेदणे उववज्जमाणे सिय महावेदणे सिय अप्पवेदणे अहे णं उववन्ने भवइ तओ पच्छा एगंतसायं वेयणं वेदेति आहच्च असायं, एवं जाव थनियकुमारेसु ।*

*जीवे णं भंते ! जे भविए पुढविकाएसु उववज्जित्तए पुच्छा, गोयमा ! इहगए सिय महावेयणे सिय अप्पवेयणे, एवं उववज्जमाणेवि, अहे णं उववन्ने भवति तओ पच्छा वेमायाए वेयणं वेयति एवं जाव मणुस्सेसु, वाणमंतरजोइसियवेमानिएसु जहा असुरकुमारेसु ।*

**वृ.** तत्र च 'एगंतदुक्खं वेयणं'ति सर्वथा दुःखरूपां वेदनयकर्म्मानुभूतिम् 'आहच्च सायं'ति कदाचित्सुखरूपां नरकपालादीन्नमसंयोगकाले, 'एगंतसायं'ति भवप्रत्ययात् 'आहच्च असायं'ति प्रहाराद्युपनिपातात् ।

**मू. (३५६)** *जीवा णं भंते ! किं आभोगनिव्वत्तियाउया अनाभोगनिव्वत्तियाउया ?, गोयमा ! नो आभोगनिव्वत्तियाउया अणनभोगनिव्वत्तियाउया, एवं नेरइयावि, एवं जाव वेमानिया*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (३५७)** *अत्थि णं भंते ! जीवा णं कक्कसवेयनिज्ञा कम्मा कज्जंति ?, हंता अत्थि, कहन्नं भंते ! जीवा णं कक्कसवेयनिज्ञा कम्मा कज्जंति ?, गोयमा ! पाणाइवाएणं जाव मिच्छादंसणसल्लेणं, एवं खलु गोयमा ! जीवाणं कक्कसवेयनिज्ञा कम्मा कज्जंति ?,*

*अत्थि णं भंते ! नेरइयाणं कक्कसवेयनिज्ञा कम्मा कज्जंति, एवं चेव एवं जाव वेमानियाणं अत्थि णं भंते ! जीवा णं अकक्कसवेयनिज्ञा कम्मा कज्जंति ?, हन्ता अत्थि, कहन्नं भंते ! सकक्कसवेयनिज्ञा कम्मा कज्जंति ?, गोयमा ! पाणाइवायवेरमणेणं जाव परिग्गहवेरमणेणं कोहविवेगेणं जाव मिच्छादंसणसल्लविवेगेणं, एवं खलु गोयमा ! जीवाणं अकक्कसवेयनिज्ञा कम्मा कज्जंति*

*अत्थि णं भंते ! नेरइय अकक्कसवेयनिज्ञा कम्मा कज्जंति ?, गोयमा ! नो तिणट्ठे समट्ठे, एवं जाव वेमानिया, नवरं मणुस्साणं जहा जीवाणं ।*

**वृ.** 'कक्कसवेयनिज्ञाकम्म' त्ति कर्कशैः-रौद्रदुःखैर्वेद्यंते यानि तानि कर्कशवेदनीयानि स्कन्दकाचार्यसाधूनामिवेति 'अकक्कसवेयनिज्ञे' ति अकर्कशेन-सुखेन वेद्यन्ते यानि तान्यकर्कशवेदनीयानि भरतादीनामिव, 'पाणाइवायवेरमणेणं' ति संयमेनेत्यर्थः, नारकादीनां तु संयमाभावात्तदभावोऽवसेयः ।

**मू. (३५८)** *अत्थि णं भंते ! जीवाणं सायावेयनिज्ञा कम्मा कज्जंति ?, हंता अत्थि, कहन्नं भंते ! जीवाणं सातावेयनिज्ञा कम्मा कज्जंति ?, गोयमा ! पाणाणुकंपाए भूयाणुकंपाए जीवाणुकंपाए सत्ताणुकंपाए बहूणं पाणाणं जाव सत्ताणं अदुक्खणयाए असोयणयाए अजूरणयाए अतिप्पणयाए अपिट्टणयाए अपरियावणयाए एवं खलु गोयमा ! जीवाणं सायावेयनिज्ञा कम्मा कज्जंति, एवं नेरइयाणवि, एवं जाव वेमानियाणं ।*

*अत्थि णं भंते ! जीवाणं अस्सायवेयनिज्ञा कम्मा कज्जंति ?, हंता अत्थि ।*

*कहन्नं भंते ! जीवाणं अस्सायावेयनिज्ञा कम्मा कज्जंति ?, गोयमा ! परदुक्खणयाए परसोयणयाए परजूरणयाए परतिप्पणयाए परपिट्टणयाए परपरियावणयाए बहूणं पाणाणं जाव सत्ताणं दुक्खणयाए सोयणयाए व परियावणयाए एवं खलु गोयमा ! जीवाणं अस्सायावेयनिज्ञा कम्मा कज्जंति, एवं नेरइयाणवि, एवं जाव वेमानियाणं ॥*

**वृ.** 'अदुक्खणयाए' त्ति दुःखस्य करणं दुःखनं तदविद्यमानं यस्यासावदुःखनस्तद्भावस्तत्ता तया अदुःखनतया अदुःखकरणेनेत्यर्थः, एतदेव प्रपञ्च्यते-'असोयणयाए' त्ति दैन्यानुत्पादनेन 'अजूरणयाए' त्ति शरीरापचयकारिशोकानुत्पादनेन 'अतिप्पणयाए' त्ति अश्रुलालादिक्षरणकारणशोकानुत्पादनेन 'अपिट्टणयाए' त्ति यष्टयादिताडनपरिहारेण 'अपरियावणयाए' त्ति शरीरपरितापानुत्पादनेन ॥ दुःखप्रस्तावादिदमाह–

**मू. (३५९)** *जंबुद्दीवे णं भंते ! दीवे भारहे वासे इमीसे ओसप्पिणीए दूसमदूसमाए समाए उत्तमकट्ठपत्ताए भरहस्स वासस्स केरिसए आगारभावपडोयारे भविस्सति ?, गोयमा ! कालो भविस्सइ हाहाभूए भंभाभूए कोलाहलब्भूए समयानुभावेण य णं खरफरुसधूलिमइला दुव्विसहा वाउला भयंकरा वाया संवट्टगा य वाइंति, इह अभिक्खं धूमाइंति य दिसा समंता रउस्सला रेणुकलुसतमपडलनिरालोगा समयलुक्खयाए य णं अहियं चंदा सीयं मोच्छंति अहियं सूरिया तवइस्संति अदुत्तरं च णं अभिक्खणं बहवे अरसमेहा विरसमेहा खारमेहा खट्टमेहा अग्गिमेहा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विज्जुमेहा विसमेहा असनिमेहा अप्पवनिज्जोदगा वाहिरोगवेदणोदीरणापरिणामसलिला अमणुन्नपानियगा चंडानिलपहयतिक्खधारानिवायपउर वासंवासिहिंति।*

*जे णं भारहे वासे गामागरनगरखेडकब्बडमडंबदोणमुहपट्टणासमागयं जणवयं चउप्पयगवेलगए खहयरे य पक्खिसंदे गामारन्नपयारनिरए तसे य पाणे बहुप्पगारे रुक्खगुच्छगुम्मलयवल्लितणपव्वगहरितोसहिपवालंकुरमादए यत णवणस्सइकाए विद्धंसेहिंति पव्वयगिरिडोंगर उच्छल भट्टिमादीए वेयड्ढगिरिवज्जे वेरावेहिंति सलिलिबिल-गड्ड-दुग्-विसमंनिन्नुन्नयाइं च गंगासिंधुवज्जाइं समीकरेहिंति।*

*तीसे णं भंते! समाए भरहवासस्स भूमीए केरिसए आगारभावपडोयारे भविस्सति?, गोयमा! भूमी भविस्सति इंगालब्भूया मुम्मुरभूया छारियभूया वत्तकवेल्लयभूया तत्तसमजोतिभूया धूलिबहुला रेणुबहुला पंकबहुला पणगबहुला चलनिबहुला बहूणं धरनिगोयराणं सत्ताणं दोनिक्कमा य भविस्सति॥*

**वृ.** 'जंबुद्दीवे ण'मित्यादि, 'उत्तमकट्ठपत्ताए'त्ति परमकाष्ठाप्राप्तायाम्, उत्तमावस्थायां गतायामित्यर्थः, परमकष्टप्रासायां वा, 'आगारभावडोयारे'त्ति आकारभावस्य-आकृतिलक्षणपर्यायस्य प्रत्यवतारः-अवतरणम् आकारभावप्रत्यवतारः 'हाहाभूए'त्ति हाहाइत्येतस्य शब्दस्य दुःखार्त्तलोकेन करणं हाहेच्यते तद्भूतः-प्राप्तो यः कालः स हाहाभूतः 'भंभाभूए'त्ति भां भां इत्यस्य शब्दस्य दुःखार्त्तगवादिभिः करणं भंभोच्यते तद्भूतो यः स भंभाभूतः, भम्भा वा-भेरी सा चान्तः शून्या ततो भम्भेव यः कालो जनक्षयाच्छून्यः स भम्भाभूत उच्यते।

'कोलाहलभूए'त्ति कोलाहल इहार्त्तशकुनिसमूहध्वनिस्तं भूतः-प्राप्तः कोलाहलभूतः 'समयानभावेण य णं'ति कालविशेषसामर्थ्येयन च णमित्यलङ्कारे 'खरफरुसधूलिमइल'त्ति खरपरुषाः-अत्यन्तकठोरा धूल्या च मलिना ये वातास्ते तथा 'दुव्विसह'त्ति दुःसहा 'वाउल'त्ति व्याकुला असमञ्जसा इत्यर्थः 'संवट्टय'त्ति तृणकाष्ठादीनां संवर्त्तकाः 'इह'त्ति अस्मिन् काले 'अभिक्खं'ति अभीक्ष्णं 'घूमाहिंति य दिसं'त्ति घूमायिष्यन्ते-घूममुद्वमिष्यन्ति दिशः, पुनः किंभूतास्ताः इत्याह।

'समंता रउस्सल'त्ति समन्तात्-सर्वतो रजस्वला-रजोयुक्ता अत एव 'रेणुकलुसतमपटलनिरालोगा' रेणुना-धूल्या कलुषा-मलिना रेणुकलुषाः तमःपटलेन अन्धकारवृन्देन निरालोकाःनिरस्तप्रकाशा निरस्तदृष्टिप्रसरा वा तमःपटलनिरालोकाः, ततः कर्मधारयः, 'समयलुक्खपाए णं' कालरूक्षतया चेत्यर्थः 'अहिय'न्ति अरसा-अमनोज्ञा मनोज्ञरसवर्जितजला ये मेघास्ते तथा 'वेरसमेह'त्ति विरुद्धरसा मेघाः, एतदेवाभिव्यज्यते-'खारमेह'त्ति सर्जादिक्षारसमानरसजलोपेतमेघाः 'खत्तमेह'त्ति करीषसमानरसजलोपेतमेघाः।

'खट्टमेह'त्ति कचिद्दृश्यते तत्राम्लजला इत्यर्थः 'अग्गिमेह'त्ति अग्निवद्दाहकारिजला इत्यर्थः 'विज्जुमेह'त्ति विद्युत्प्रधाना एव जलवर्जिता इत्यर्थः विद्युन्निपातवन्तो वा विद्युन्निपातकार्यकारिजलनिपातवन्तो वा 'विसमेह'त्ति जनमरणेहतुजर्ला इत्यर्थः 'असनिमेह'त्ति करकादिनिपातवन्तः पर्वतादिदारणसमर्थःजलत्वेनवा वज्रमेघाः 'अप्पवनिज्जोदग'त्ति अपातव्यजलाः 'अजवनिज्जोदए'त्ति क्वचिद् दृश्यते तत्रायापनीयं-न यापनाप्रयोजनमुदकं येषां अयापनीयोदकाः 'वाहिरोगवेदणोदीरणापरिणामसलिल'त्ति व्याधयः-स्थिराः कुष्ठादयो रोगाः-सद्योघातिनः शूलादयस्तज्जन्याया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदनाया योदीरणा सैव परिणामो यस्य सलिलस्य तत्तथा तदेवंविधं सलिलं येषां ते तथाऽत एवामनोज्ञपानीयकाः ।

'चंडानिलपहयतिक्खधारानिवायपउरं'ति चण्डानिलेन प्रहतानां तीक्ष्णानां-वेगवतीनां धाराणां यो निपातः स प्रचुरो यत्र वर्षे स तथाऽतस्तं 'जेणं'ति येन वर्षेण करणभूतेन पूर्वोक्तविशेषणा मेघा विध्वंसयिष्यन्तीति सम्बन्धः 'जणवयं'ति मनुष्यलोकं 'चउप्पयगवेलए'त्ति इह चतुष्पदशब्देन महिष्यादयो गृह्यन्ते गोशब्देन गावः एलकशब्देन तु उरभ्राः 'खहयरे'त्ति खचरांश्च, कान् ? इत्याह– 'पक्खिसंघे'त्ति पक्षिसङ्घातान्, तथा 'गामारन्नपयारनिरए'त्ति ग्रामारण्ययोर्य प्रचारस्तत्र निरता ये ते तथा तान्, कान् ? इत्याह–

'तसे पाणे बहुप्पयारे'त्ति द्वीन्द्रियादीनित्यर्थः, 'रुक्खे'त्यादि, तत्र वृक्षाः-चूतादयः गुच्छाः-वृन्ताकीप्रभृतयः गुल्मानवमालिकाप्रभृतयः लता-अशोकलतादयः वल्यो-वालुङ्कीप्रभृतयः तृणानि-वीरणादीनि पर्वगा-इक्षुप्रभृतयः हरितानि दूर्वादीनि औषध्यः-शाल्यादयः प्रवालाः-पल्लवाङ्कुराः अङ्कुराः-शाल्यादिबीजसूचयः ततो वृक्षादीनां द्वन्द्वस्ततस्ते आदिर्येषां ते तथा तांश्च, आदिशब्दात्, कदल्यादिवलयानि पद्मादयश्च जलजविशेषा ग्राह्याः, कानेवंविधान् ? इत्याह-'तणवणस्सइ-काइए'त्ति बादरवनस्पतीनित्यर्थः 'पव्वए'त्यादि, यद्यपि पर्वतादयोऽन्यत्रैकार्थःतया रूढास्तथापीह विशेषो दृश्यः, तथाहि-पर्वतननात्-उत्सवविस्तारणात्पर्वताः-क्रीडापर्वता उज्जयन्तवैभारादयः गृणन्ति-शब्दायन्ते जननिवासभूतत्वेनेति गिरयः-गोपालगिरिचित्रकूटप्रभृतयः, डुङ्गानां-शिलावृन्दानां चौरवृन्दानां चास्तित्वात् डुङ्गाराः-शिलोच्चयमात्ररूपाः 'उच्छ(त्थ)ल'त्ति उत्-उन्नतानि स्थलानि घूल्यच्छ्रयरूपाण्युच्छ (त्थ)लानि, क्वचिदुच्छब्दो न दृश्यते, 'भट्ठि'त्ति पांशवादिवर्जिता भूमयस्तत एषां द्वद्वन्स्ततस्ते आदिर्येषां ते तथा तान्, आदिशब्दात् प्रासादशिखरादिपरिग्रहः ।

'विरावेहिंति'त्ति विद्रावयिष्यन्ति, 'सलिले'त्यादि सलिलबिलानि च-भूमिननिर्ज्झरा गर्त्ताश्च-श्वभ्रानि दुर्गानि च-खातवलयप्राकारादिदुर्गमानि विषमानि च-विषमभूमिप्रतिष्ठितानि निम्नोन्न-तानि च-प्रतीतानि द्वन्द्वोऽतस्तानि ।

'तत्तसमजोइभूय'त्ति तप्तेन-तापेन समाः-तुल्याः ज्योतिषा-वह्निना भूता-जाता या सा तथा 'धूलीबहुले'त्यादौ धूली-पांशुः रेणुः-वालुका पङ्कः-कर्दमः पनकः-प्रबलः कर्दमविशेषः, चलनप्रमाणः कर्दमश्चलनीत्युच्यते, 'दुन्निकम'त्ति दुःखेन नितरां क्रमः-क्रमणं यस्यां सा दुर्निक्रमा

**मू. (३६०)** *तीसे णं भंते ! समाए भारहे वासे मणुयाणं केरिसए आगारभावपडोयारे भविस्सति ?, गोयमा ! मणुया भविस्संति दुरूवा दुवन्ना दुगंधा दुरसा दुफासा अनिट्ठा अकंता जाव अमणामा हीनस्सरा दीनस्सरा अनिट्ठस्सरा जाव अमणामस्सरा अनादेज्जवयणपच्चायाया निल्लज्जा कूडकवडकलहवहबंधवेरनिरया मज्जायातिक्कमप्पहाणा अकज्जनिच्चुज्जता गुरुनियोयविनय-रहिया य विकलरूवा परूढनहकेसमंसुरोमा काला खरफरुसझामवन्ना फुट्टसिरा कविलपलियकेसा बहुण्हारु(नि)संपिनद्धदुद्दंसनिज्जरूवा संकुडियवलीतरंगपरिवेढियंगमंगा जरापरिणतव्व थेरगनरा पविरलपरिसडियदंतसेढी उब्भडघडमुहा विसमनयणा वंकनासा वंगवली विगयभेसणमुहा कच्छूकसाराभिभूया –*

*–खरतिक्खनखकंडूइयविक्खयतणू दद्दुकिडिभसिंझफुडियफरुसच्छवी चित्तलंगा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*टोलागतिविसमसंधिबंधणउक्कुडुअट्ठिगविभत्तदुब्बलकुसंघयणकुप्पमाणकुसंठिया कुरूवा कुठाणासणकुसेज्जकुभोइणो असुइणो अनेगवाहिपरिपीलियंगमंगा खलंतवेज्झलगती निरुच्छाहा सत्तपरिवज्जिया वेगयचिट्ठा नट्ठतेया अभिक्खणं सीयउण्हखरफरुसवायविज्झडिया मलिण-पंसुरयगुंडियंगमंगा बहुकोहमाणमाया बहुलोभा असुहदुक्खभोगी ओसन्नं धम्मसन्नसम्म- त्तपरिब्भट्ठा उक्कोसेणं रयनिप्पमाणमेत्ता सोलसवीसतिवासपरमाउसो पुत्तनत्तुपरियालपणयबहुला गंगासिंधूओ महानदीओ वेयड्ढं च पव्वयं निस्साए बावत्तरिं निओदा बीयं बीयामेत्ता बिलवासिओ भविस्संति*

*ते णं भंते ! मणुया किमाहारमाहारेंति ?, गोयमा ! ते णं काले णं ते णं समए णं गंगासिंधूओ महानदीओ रहपहवित्थराओ अक्खसोयप्पमाणमेत्तं जलं वोज्झिहिंति सेवि य णं जले बहुमच्छक- च्छभाइन्ने नो चेव णं आउयबहुले भविस्सति, तए णं ते मणुया सुरुग्गमणमुहुत्तंसि य सूरत्थमणमुहुत्तंसि य बिलेहिंतो २ निद्धाइत्ता मच्छकच्छभे थलाइं गाहेहिंति सीयायवतत्तएहिं मच्छकच्छएहिं एक्कवीसं वाससहस्साइं वित्तिं कप्पेमाणा विहरिस्संति ।*

*ते णं भंते ! मणुया निस्सीला निग्गुणा निम्मेरा निप्पच्चक्खाणपोसहोववासा ओसन्नं मंसाहारा मच्छाहारा खोद्दाहारा कुनिमाहारा कालमासे कालं किच्चा कहिं गच्छिहिंति ? कहिं उववज्जिहिंति गोयमा ! ओसन्नं नरगतिरिक्खजोनिएसु उववज्जंति, ते णं भंते ! सीहा वग्घा वगा दीविया अच्छा तरच्छा परस्सरा निस्सीला तहेव जाव कहिं उववज्जिहिंति ?*

*गोयमा ! ओसन्नं नरगतिरिक्खजोनिएसु उववज्जिहिंति, ते णं भंते ! ढंका कंकाविलका मद्दुगा सिही निस्सीला तहेव जाव ओसन्नं नरगतिरिक्खजोनिएसु उववज्जिहिंति । सेवं भंते ! सेवं भंते ! त्ति ॥*

**वृ.** 'दुरूव'त्ति दुःखभावा 'अणाएज्जवयणपच्चायाय'त्ति अनादेयवचनप्रत्याजाते येषां ते तथा, प्रत्याजातं तु जन्म, 'कूडे'त्यादौ कूडं-भ्रान्तिजनकद्रव्यं कपटं-वञ्चनाय वेषान्तरादिकरणं 'गुरुनिओगविनयरहिया य'त्ति गुरुषु-मात्रादिषु नियोगेन-अवश्यंतया यो विनयस्तेन रहिता ये ते तथा, चःसमुच्चये 'विकलरूव'त्ति सम्पूर्णरूपाः 'खरफरुसज्झामवन्न'त्ति खरपरुषाः स्पर्शतोऽ-तीवकठोराः ध्यामवर्णा-अनुज्ज्वलवर्णास्ततः कर्म्मधारयः 'फुट्टसिर'त्ति विकीर्णशिरोजा इत्यर्थः 'कविलपलियकेस'त्ति कपिलाः पलिताश्च-शुक्लाः केशा येषां ते तथा 'बहुण्हारुसंपिणद्ध-दुद्दंसनिज्जरूव'त्ति बहुस्नायुभिः संपिनद्धं-बद्धमत एव दुःखेन दर्शनीयं रूपं येषां ते तथा 'संकुडिय-वलीतरंगपरिवेढियंगमंगा' सङ्कुटितं वलीलक्षणतरङ्गैः परिवेष्टितं चाङ्गं येषां ते तथा, क इव ? इत्यत आह—

'जरापरिणयव्व थेरयणर'त्ति जरापरिगतस्थविरनरा इवेत्यर्थः, स्थविराश्चान्यथाऽपि व्यपदिश्यन्त इति जरापरिणतग्रहणं, तथा 'परिवलपरिसडियदंतसेढी' प्रविरला दन्तविरलत्वेन परिशटिता च दन्तानां केषाञ्चित्पतितत्वेन भग्नत्वेन वा दन्तश्रेनिर्येषां ते तथा 'उब्भडघडमुह'त्ति उद्भटं-विकरालं घटकमुखमिव मुखं तुच्छदशनच्छदत्वाद्येषां ते तथा 'उब्भडघाडामुह'त्ति क्वचित्तत्र उद्भटे-स्पष्टे घाटामुखे-शिरोदेशविशेषौ येषां ते तथा 'वंकवलीविगयभेसणमुह'त्ति वङ्कं-वक्रं पाठान्तरेण व्यङ्ग-सलाञ्छनं वलिभिर्विकृतं च-बीभत्सं भेषणं-भयजनकं मुखं येषां ते तथा 'कच्छू-कसराभिभूया' कच्छूः-पामा तया कशरैश्च-खशरैरभिभूता-व्याप्ता ये ते तथा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत एव 'खरतिक्खनखकंडुइयविक्खयतणु' त्ति खरतीक्ष्णनखानां कण्डूयितेन विकृता-कृतव्रणा तनुः-शरीरं येषां ते तथा, 'दद्दुकिडिभसिंझफुडियफरुसच्छवि' त्ति दद्रुकिडिभसिध्मानि क्षुद्रकुष्ठविशेषास्तत्प्रधाना स्फुटिता परुषा च छविशरीरत्वग् येषां ते तथा, अत एव 'चित्तलंग' त्ति कर्बुरावयवाः, 'टोले' त्यादि, टोलगतयः-उष्ट्रादिसमप्रचाराः पाठान्तरेण टोलाकृतयः-अप्रशस्ता-काराः विषभानि ह्रस्वदीर्घत्वादिना सन्धिरूपानि बन्धनानि येषां ते विषमसन्धिबन्धनाः उत्कुटुकानि-यथास्थानमनिविष्टानि अस्थिकानि-कीकसानि विभक्तानीव च-दृश्यमानान्तरालानीव येषां ते उत्कुटुकास्थिकविभक्ताः अथवोत्कुटुकस्थितास्तथास्वभावत्वाद्विभक्ताश्च-भोजन विशेषरहिता ये ते तथा, दुर्बला-बलहीनाः कुसंहननाः-सेवार्त्तसंहननाः कुप्रमाणाः-प्रमाणहीनाः कुसंस्थिताः-दुःसंस्थानाः ।

तत एषां 'टोलगे' त्यादिपदानां कर्मधारयः, अत एव 'कुरूव' त्ति कुरूपाः 'कुट्ठाणा-सणकुसेज्जकुभोइणो' त्ति कुत्सिताश्रयविष्टरदुःशयनदुर्भोजनाः 'असुइणो' त्ति अशुचयः स्नानब्रह्म-चर्यादिवर्जितत्वात्, अश्रुतयो वा शास्त्रवर्जिताः, 'खलंतविज्झलगइ' त्ति खलन्ती-स्खलन्ती विह्वला च-अर्दवितर्दा गतिर्येषां ते तथा अनेकव्याधिरोगपीडितत्वात् 'विगयचेट्ठानट्ठतेय' त्ति विकृतचेष्टा नष्टतेजसश्चेत्यर्थः 'सीए' त्यादि शीतेनोष्णेन खरपुरुषवातेन च 'विज्झडिय' त्ति मिश्रितं व्याप्तमित्यर्थः मलिनं च पांशुरूपेण रजसा द्रव्यरजसेत्यर्थः 'उग्गुंडिय' त्ति उद्धूलितं चाङ्गं २ येषां ते तथा 'असुहदुक्खभागि' त्ति दुःखानुबन्धिदुःखभागिन इत्यर्थः ।

'ओसन्नं' ति बाहुल्येन 'धम्मसन्न' त्ति धर्म्मश्रद्धाऽवसन्ना गलिता सम्यक्त्वभ्रष्टा 'रयनिपमाणमेत्त' त्ति रत्नेः-हस्तस्य यत्प्रमाणं-अङ्गुलचतुर्विंशतिलक्षणं तेन मात्रा-परिमाणं येषां ते रत्निप्रमाणमात्राः 'सोलवीसइवासपरमाउसो' त्ति इह कदाचित् षोडश वर्षानि कदाचिच्च विंशतिर्वर्षानि परमायुर्येषां ते तथा 'पुत्तनत्तुपरियालपमयबहुल' त्ति पुत्राः-सुताः नप्तारः-पौत्रा दौहित्राश्च एतल्लक्षणो यः परिवारस्तत्र यः प्रणयः-स्नेहः स बहुलो-बहुर्येषां ते तथा –

–पाठान्तरे 'पुत्तनत्तुपरिपालणबहुल' त्ति तत्र च पुत्रादीनां परिपालनं बहुलं-बाहुल्येन येषां ते तथा, अनेनाल्पायुष्कत्वेऽपि बह्वपत्यया तेषामुक्ताऽल्पेनापि कालेन यौवनसद्भावादिति, 'निस्साए' त्ति निश्राय-निश्रां कृत्वेत्यर्थः 'निओय' त्ति निगोदाः-कुटुम्बानीत्यर्थः 'बीयं' ति बीजमिव बीजं भविष्यतां जनसमूहानां हेतुत्वात् 'बीयमेत्त' त्ति बीजस्येव मात्रा-परिमाणं येषां ते बीजमात्राः स्वल्पाः स्वरूपत इत्यर्थः ।

'रहपह' त्ति रथपथः-शकटचक्रद्वयप्रमितो मार्ग 'अक्खसोयप्पमाणमेत्तं' ति अक्षश्रोतः-चक्रधुरः प्रवेशरन्ध्रं तदेव प्रमाणमक्षश्रोतःप्रमाणं तेन मात्रा-परिमाणमवगाहतो यस्य तत्तथोक्ता 'वोज्झिहिंति, सेविय णं जले' वक्ष्यतः 'आऊबहुले' त्ति बह्वप्कायमित्यर्थः 'निद्धाहिंति' त्ति 'निद्धा-विष्यन्ति' निर्गमिष्यन्ति 'गाहेहिंति' त्ति 'ग्राहयिष्यन्ति' प्रापयिष्यन्ति स्थलेषु स्थापयिष्यन्तीत्यर्थः 'वित्तिं कप्पेमाणे' ति जीविकां कुर्वन्तः ।

'निस्सील' त्ति महाव्रताणुव्रतविकलाः 'निग्गुण' त्ति उत्तरगुणविकलाः 'निम्मेर' त्ति अविद्य-मानकुलादिमर्यादाः 'निपच्चक्खाणपोसहोववास' त्ति असत्पौरुष्यादिनियमा अविद्यमानाष्टम्या-दिपर्वोपवासाश्चेत्यर्थः 'ओसन्नं' ति प्रायो मांसाहाराः, कथम् ? इत्याह-मत्स्याहारा यतः, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'खोद्दाहार'त्ति मधुभोजिनः भूक्षोदेन वाऽऽहारो येषां ते क्षोदाहाराः 'कुनिमाहारे'ति कुणपः-शबस्तद्रसोऽपि वसादि कुणपस्तदाहाराः ।

'ते णं'ति ये तदानी क्षीणावशेषाश्चतुष्पदाः केचन भविष्यन्ति 'अच्छ'त्ति ऋक्षाः 'तरच्छ'त्ति व्याघ्रविशेषाः 'परस्सर'त्ति शरभाः, 'ढंक'त्ति काकाः 'मद्दुग'त्ति मद्गवो-जलवायसाः 'सिहि'त्ति मयूराः ॥

शतकं-७ उद्देशकः-६ समाप्तः

## —: शतकं-७ उद्देशकः-७ :—

**वृ.** अनन्तरोद्देशके नरकादावुत्पत्तिरुक्ता, सा चासंवृतानाम्, अथैतद्विपर्ययभूतस्य संवृतस्य यद्भवति तत्सप्तमोद्देशके आह—

**मू. (३६१)** *संवुडस्स णं भंते ! अणगारस्स आउत्तं गच्छमाणस्स जाव आउत्तं तुयट्टमाणस्स आउत्तं वत्थं पडिग्गहं कंबलं पायपुंछणं गेण्हमाणस्स वा निक्खिवमाणस्स वा तस्स णं भंते ! किं ईरियावहिया किरिया कज्जइ संपराइया किरिया कज्जइ ?, गोयमा ! संवुडस्स णं अनगारस्स जाव तस्स णं ईरियावहिया करिया कज्जइ नो संपराइया किरिया कज्जइत्ति ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ-संवुडस्स णं जाव नो संपराइया किरिया कज्जइ ?, गोयमा ! जस्स णं कोहमाणमायालोभा वोच्छिन्ना भवंति तस्स णं ईरियावहिया किरिया कज्जइ, तहेव जाव उस्सुत्तं रीयमाणस्स संपराइया किरिया कज्जइ, से णं अहासुत्तमेव रीयइ, से तेणट्ठेणं गोयमा ! जाव नो संपराईया किरिया कज्जइ ॥*

**वृ.** 'संवुडे'त्यादि ॥ संवृतश्च कामभोगानाश्रित्य भवतीति कामभोगप्ररूपणाय ।

**मू. (३६२)** *रूवी भंते ! कामा अरूवी कामा ?, गोयमा ! रूवी कामा समणाउसो ! नो अरूवी कामा । सचित्ता भंते ! कामा अचित्ता कामा ?, गोयमा ! सचित्तावि कामा अचित्तावि कामा । जीवा भंते ! कामा अजीवा कामा ?, गोयमा ! जीवावि कामा अजीवावि कामा ।*

*जीवाणं भंते ! कामा अजीवाणं कामा ?, गोयमा ! जीवाणं कामा नो अजीवाणं कामा, कतिविहा णं भंते ! कामा पन्नत्ता ?, दुविहा कामा पन्नत्ता, तंजहा-सद्दा य रूवा य,*

*रूवी भंते ! भोगा अरूवी भोगा ?, गोयमा ! रूवी भोगा नो अरूवी भोगा, सचित्ता भंते भोगा अचित्ता भोगा ?, गोयमा ! सचित्तावि भोगा अचित्तावि भोगा, जीवा णं भंते ! भोगा ? पुच्छा, गोयमा ! जीवावि भोगा अजीवावि भोगा, जीवाणं भंते ! भोगा अवीजाणं भोगा ?, गोयमा ! जीवाणं भोगा नो अजीवाणं भोगा, कतिविहा णं भंते ! भोगा पन्नत्ता ?, गोयमा ! तिविहा भोगा पन्नत्ता तंजहा-गंधा रसा फासा ।*

*कतिविहा णं भंते ! कामभोगा पन्नत्ता ?, गोयमा ! पंचविहा कामभोगा पन्नत्ता, तंजहा-सद्दा रूवा गंधा रसा फासा ।*

*जीवा णं भंते ! किं कामी भोगी ?, गोयमा ! जीवा कामीवि भोगीवि । से केणट्ठेणं भंते ! एवं वुच्चइ जीवा कामीवि भोगीवि ?, गोयमा ! सोइंदियचक्खिंदियाइं पडुच्च कामी घाणिंदिय-जिब्भिंदियफासिंदियाइं पडुच्च भोगी, से तेणट्ठेणं गोयमा ! जाव भोगीवि ।*

*नेरइया णं भंते ! किं कामी भोगी ?, एवं चेव एवं जाव थनियकुमारा ।*

*पुढविकाइयाणं पुच्छा, गोयमा ! पुढविकाइया नो कामी भोगी, से केणट्ठेणं जाव भोगी*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गोयमा ! फासिंदियं पडुच्च से तेणट्ठेणं जाव भोगी, एवं जाव वणस्सइकाइया, बेइंदिया एवं चेव नवरं जिब्भिंदियफासिंदियाइं पडुच्च भोगी, तेइंदियावि एवं चेव नवरं घाणिंदियजिब्भिंदियफासिंदियाइं पडुच्च भोगी, चउरिंदियाणं पुच्छा गोयमा ! चउरिंदिया कामीवि भोगीवि, से केणट्ठेणं जाव भोगीवि ?, गोयमा ! चक्खिंदियं पडुच्च कामी घाणिंदियजिब्भिंदियफासिंदियाइं पडुच्च भोगी, से तेणट्ठेणं जाव भोगीवि, अवसेसा जहा जीवा जाव वेमानिया ।*

*एसि णं भंते ! जीवाणं कामभोगीणं नोकामीणं नोभोगीणं भोगीण य कयरे कयरेहिंतो जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा कामभोगी नोकामीनोभोगी अनंतगुणा भोगी अनंतगुणा ।।*

**वृ.** 'रूवी'त्यादि सूत्रवृन्दमाह-तत्र रूपं-मूर्त्तता तदस्ति येषां ते रूपिणः, तद्विपरीतास्त्वरूपिणः, काम्यन्ते-अभिलष्यन्ते एव न तु विशिष्टशरीरसंस्पर्शद्वारेणोपयुज्यन्ते ये ते कामाः-मनोज्ञाः शब्दाः संस्थानानि वर्णाश्च, अत्रोत्तरं-रूपिणः कामा नो अरूपिणः, पुद्गलधर्मत्वेन तेषां मूर्त्तत्वादिति, 'सचित्ते'त्यादि, सचित्ता अपि कामाः समनस्कप्रानिरूपापेक्षया, अचित्ता अपि कामा भवन्ति, शब्दद्रव्यापेक्षयाऽसञ्ज्ञिजीवशरीररूपापेक्षया चेति ।

'जीवे'त्यादि, जीवा अपि कामा भवन्ति जीवशरीररूपापेक्षया, अजीवा अपि कामा भवन्ति शब्दापेक्षया चित्रपुत्रिकादिरूपापेक्षया चेति । 'जीवाण'मित्यादि, जीवानामेव कामा भवन्ति कामहेतुत्वात्, अजीवानां न कामा भवन्ति तेषां कामासम्भवादिति ।

'रूवि'मित्यादि, भुज्यन्ते-शरीरेण उपभुज्यन्ते इति भोगाः-विशिष्टगंधरसस्पर्शद्रव्यानि 'रूविं भोग'त्ति रूपिणो भोगा नो अरूपिणः पुद्गलधर्मत्वेन तेषां मूर्त्तत्वादिति । 'सचित्ते'त्यादि, सचित्ता अपि भोगा भवन्ति गन्धादिप्रधानजीवशरीराणां केषाञ्चित्समनस्कत्वात्, तथाऽचित्ता अपि भोगा भवन्ति केषाञ्चिद्गन्धादिविशिष्टजीवशरीराणाममनस्कत्वात् ।

'जीवावि भोग'त्ति जीवशरीराणां विशिष्टगन्धादिगुणयुक्तत्वात्, 'अजीवावि भोग'त्ति अजीवद्रव्याणां विशिष्टगन्धादिगुणोपेतत्वात्, 'अजीवावि भोग'त्ति अजीवद्रव्याणां विशिष्टगन्धादिगुणोपेतत्वादिति ।

'सव्वत्थोवा कामभोगि'त्ति ते हि चतुरिन्द्रियाः पञ्चेन्द्रियाश्च स्युस्ते च स्तोका एव, 'नो कामी नो भोगि'त्ति सिद्धास्ते च तेभ्योऽनन्तगुणा एव, 'भोगि'त्ति एकद्वित्रीन्द्रियास्ते च तेभ्योऽनन्तगुणा वनस्पतीनामनन्तगुणत्वादिति । भोगाधिकारादिदमाह–

**मू. (३६३)** *छउमत्थे णं भंते ! मणूसे जे भविए अन्नयरेसु देवलोएसु देवत्ताए उववज्जित्तए, से नूनं भंते ! से खीणभोगी नो पभू उट्ठाणेणं कम्मेणं बलेणं वीरिएणं पुरिसक्कारपरक्कमेणं विउलाइं भोगभोगाइं भुंजमाणे विहरित्तए ।*

*से नूनं भंते ! एयमट्ठं एवं वयह ?, गोयमा ! नो इणट्ठे समट्ठे, पभू णं उट्ठाणेणवि कम्मेणवि बलेणवि वीरिएणवि पुरुसक्कारपरक्कमेणवि अन्नयराइं विपुलाइं भोगभोगाइं भुंजमाणे विहरित्तए, तम्हा भोगी भोगे परिच्चयमाणे महानिज्जरे महापज्जवसाणे भवइ १ ।*

*आहोहिए णं भंते ! मणुस्से जे भविए अन्नयरेसु देवलोएसु एवं चेव जहा छउमत्थे जाव महापज्जवसाणे भवति २ । परमाहोहिए णं भंते ! मणुस्से जे भविए तेणेव भवग्गहणेणं सिज्झित्तए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जाव अंतं करेत्तए ?, से नूनं भंते ! से खीणभोगी सेसं जहा छउमत्थस्स ३ ।*

*केवली णं भंते ! मणुस्से जे भविए तेणेव भवग्गहणेणं एवं जहा परमाहोहिए जाव महापज्ञवसाणे भवइ ४ ॥*

**वृ.** 'छउमत्थे ण'मित्यादि सूत्रचतुष्कं, तत्र च 'से नूनं भंते ! से खीणभोगि'त्ति 'से'त्ति 'असौ' मनुष्यः 'नूनं' निश्चितं भदन्त ! 'से'त्ति कथमर्थः कथंशब्दश्च परिप्रश्नार्थः 'खीणभोगि'त्ति भोगो जीवस्य यत्रास्ति तद्भोगि-शरीरं तत्क्षीणं तपोरोगादिभिर्यस्य सः क्षीणभोगी क्षीणतनुर्दुर्बल इतियावत्, 'नो पभु'त्ति न समर्थः ।

'उट्ठाणेणं'ति ऊर्द्धीभवनेन 'कम्मेणं'ति गमनादिना 'बलेणं'ति देहप्राणेन 'वीरिएणं'ति जीवबलेन 'पुरिसक्कारपरक्कमेणं'ति पुरुषाभिमानेन तेनैव च साधितस्वप्रयोजनेनेत्यर्थः 'भोगभोगाइं'ति मनोज्ञशब्ददीन् ।

'से नूनं भंते ! एयमट्ठं एवं वयह' अथ निश्चितं भदन्त ! एतम्-अनन्तरोक्तमर्थःमेवम्-अमुनैव प्रकारेण वदथ यूयम् ? इति प्रश्नः, पृच्छतोऽयमभिप्रायः- यद्यसौ न प्रभूस्तदाऽसौ भोगभोजनासमर्थःत्वान्न भोगी अत एव न भोगत्यागीत्यतः कथं निर्जरावान् ? कथं वा देवलोकगमनपर्यवसानोऽस्तु ?, उत्तरं तु 'नो इणट्ठे समट्ठे'त्ति, कस्माद् ?, यतः 'पभू णं से'त्ति स क्षीणभोगी मनुष्यः 'अन्नतराइं'ति एकतरान् कांश्चिक्षीणशरीरसाधूचितान्, एवं चोचितभोगमुक्तिसमर्थःत्वाद्भोगित्वं तत्प्रत्याख्यानाच्च तत्त्यागित्वं ततो निर्जरा ततोऽपि च देवलोकगतिरिति

'आहोहिए णं'ति ''आधोऽवधिकः नियतक्षेत्रविषयावधिज्ञानि 'परमाहोहिए णं'ति परमाधोऽवधिकज्ञानी, अयं च चरमशरीर एव भवतीत्यत आह-'तेणेव भवग्गहणेणं सिज्झित्तए'-इत्यादि ॥ अनन्तरं छद्मस्थादिज्ञानवक्तव्यतोक्ता, अथ पृथिव्याद्यज्ञानिवक्तव्यतोच्यते-

***मू. (३६४)*** *जे इमे भंते ! असन्निणो पाणा, तंजहा- पुढविकाइया जाव वणस्सइकाइया छट्ठा य एगतिया सा, एए णं अंधा मूढा तमंपविट्ठा तमपडलमोहजालपडिच्छन्ना अकामनुकरणं वेदणं वेदंतीति वत्तव्वं सिया ?, हंता गोयमा ! जे इमे असन्नणो पाणा जाव पुढविकाइया जाव वणस्सइकाइया छट्ठा य जाव वेदणं वेदेंतीति वत्तव्वं सिया ।*

*अत्थि णं भंते ! पभूवि अकामनिकरणं वेदणं वेदंति ?, हंता गोयमा ! अत्थि, कहन्नं भंते पभूवि अकामनिकरणं वेदणं वेदेंति ?, गोयमा ! जे णं नो पभू विना दीवेणं अंधकारंसि रूवाइं पासित्तए जे णं नो पभू पुरओ रूवाइं अनिज्झाइत्ता णं पासित्तए जे णं नो पभू मग्गओ रूवाइं अणवयक्खित्ता णं पासित्तए ।*

*जे णं नो पभू पासओ रूवाइं अनालोइत्ता णं पासित्तए जे णं नो पभू उड्ढं रूवाइं अनालोएत्ताणा पासित्तए जे णं नो पभू अहे रूवाइं अनालोयएत्ता णं पासित्तए एस णं गोयमा ! पभूवि अकामनिकरणं वेदणं वेदेंति ।*

*अत्थि णं भंते ! पभूवि पकामनिकरणं वेदणं वेदेंति ?, हंता अत्थि, कहन्नं भंते ! पभूवि पकामनिकरणं वेदणं वेदंति ?, गोयमा ! जे णं नो पभू समुद्दस्स पारं गमित्तए जे णं नो पभू समुद्दस्स पारगयाइं रूवाइं पासित्तए जे णं नो पभू देवलोगं गमित्तए जे णं नो पभू देवलोगगयाइं रूवाइं पासित्तए एस णं गोयमा ! पभूवि पकामनिकरणं वेदणं वेदेंति । सेवं भंते ! सेवं भंते ! त्ति ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'जे इमे'इत्यादि, 'एगइया तस'त्ति 'एके' केचन न सर्वे संमूर्च्छिमा इत्यर्थः 'अंध'त्ति अंधा इवान्धा-अज्ञानाः 'मूढ'त्ति मूढाः तत्त्वश्रद्धानं प्रति एत एवोपमयोच्यन्ते 'तमंपविट्ठ'त्ति तमः प्रविष्टा इव तमःप्रविष्टाः 'तमपडलमोहजालपडिच्छन्न'त्ति तमःपटलमिव तमःपटलं-ज्ञानावरणं मोहो-मोहनीयं तदेव जालं मोहजालं ताभ्यां प्रतिच्छन्ना। आच्छादिता ये ते तथा।

'अकामनिकरणं'ति अकामो-वेदनानुभावेऽनिच्छाऽमनस्कत्वात् स एव निकरणं-कारणं यत्र तदकामनिकरणम् अज्ञानप्रत्ययमिति भावस्तद्यथा भवतीत्येवं 'वेदनां' सुखदुःखरूपां वेदनं वा-संवेदनं 'वेदयन्ति' अनुभवन्तीति।

अथासञ्ज्ञिविपक्षमाश्रित्याह-'अत्थी'त्यादि, अस्त्ययं पक्षो यदुत 'पभूवि'त्ति प्रभुरपि सञ्ज्ञित्वेन यथावद्रूपादिज्ञाने समर्थोऽप्यास्तामसञ्ज्ञित्वेनाप्रभुरित्यपिशब्दार्थः 'अकामनिकरणम्' अनिच्छाप्रत्ययमनाभोगात्, अन्ये त्वाहुः- अकामेन-अनिच्छया 'निकरणं' क्रियाया-इष्टार्थःप्राप्तिलक्षणाया अभावो यत्र वेदने तत्तथा तद्यथा भवतीत्येवं वेदनां वेदयन्तीति प्रश्नः, उत्तरं तु 'जे णं'ति यः प्राणी सञ्ज्ञित्वेनोपायसद्भावेन च हेयादीनां हानादौ समर्थोऽपि 'नो पहु'त्ति न समर्थो विना प्रदीपेनान्धकारे रूपानि 'पासित्तए'त्ति द्रष्टुम्, एषोऽकामप्रत्ययं वेदनां वेदयतीति सम्बन्धः, 'पुरओ'त्ति अग्रतः 'अनिज्झाएत्ता णं'ति 'अनिद्धर्याय' चक्षुरव्यापार्य 'मग्गओ'त्ति पृष्ठतः 'अनवयक्खित्ता णं'ति 'अनवेक्ष्य' पश्चाद्भागमनवलोक्येति।

अकामनिकरणं वेदनां वेदयतीत्युक्तम्, अथ तद्विपर्ययमाह-'अत्थि ण'मित्यादि, 'प्रभुरपि' सञ्ज्ञित्वेन रूपदर्शनसमर्थोऽपि 'पकामनिकरणं'ति प्रकामः-ईप्सितार्थाप्राप्तितः प्रवर्द्धमानतया प्रकृष्टोऽभिलाषः स एव निकरणं-कारणं यत्र वेदने तत्तथा, अन्ये त्वाहुः-प्रकामे-तीव्राभिलाषे सति प्रकामं वा अत्यर्थः निकरणम्-इष्टार्थःसाधकक्रियाणामभावो यत्र तत् प्रकामनिकरणं तद्यथा भवतीत्येवं वेदनां वेदयतति प्रश्नः, उत्तरं तु 'जे ण'मित्यादि, यो न प्रभुः समुद्रस्य पारं गन्तु तद्गतद्रव्यप्राप्त्यर्थे सत्यपि तथाविधशक्तिवैकल्यात्, अत एव च यो न प्रभुः समुद्रस्य पारगतानि रूपानि द्रष्टुं, स तद्गताभिलाषातिरेकात् प्रकामनिकरणं वेदनां वेदयतीति॥

शतकं-७ उद्देशकः-७ समाप्तः

## –: शतकं-७ उद्देशकः-८ :–

**वृ.** सप्तमोद्देशकस्यान्ते छाद्मस्थिकं वेदनमुक्तमष्टमे त्वादावेव छद्मस्थवक्तव्यतोच्यते, तत्र चेदं सूत्रम्–

**मू. (३६५)** *छउमत्थे णं भंते! मणूसे तीयमनंतं सासयं समयं केवलेणं संजमेणं एवं जहा पढमसए चउत्थे उद्देसए तहा भानियव्वं जाव अलमत्थु॥*

**वृ.** 'छउमत्थे ण'मित्यादि, एतच्च यथा प्राग् व्याख्यातं तथा द्रष्टव्यम्॥ अथ जीवाधिकारादिदमाह–

**मू. (३६६)** *से नूनं भंते! हत्थिस्स य कुंथुस्स य समे चेव जीवे?, हंता गोयमा! हत्थिस्स कुंथुस्स य, एवं जहा रायप्पसेणइज्जे जाव खुड्डियं वा महालियं वा से तेणट्ठेणं गोयमा! जाव समे चेव जीवे॥*

**वृ.** 'से नूण'मित्यादि, 'एवं जहा रायप्पसेणइज्जे'त्ति, तत्र चैतत्सूत्रमेवं-समे चेव जीवे, से

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नूनं भंते ! हत्थीओ कुंथू अप्पकम्मतराए चेव अप्पकिरियतराए चेव अप्पासवतराए चेव कुंथुओ हत्थी महाकम्मतराए चेव ३ ?, हंता गोयमा !

कम्हा णं भंते ! हत्थिस्स य कुंथुस्स य समे चेव जीवे ?, गोयमा ! से जहानामए-कूडागारसाला सिया दुहओ लित्ता गुत्ता गुत्तदुवारा निवाया निवायगंभीरा अहे णं केई पुरिसे पईवं च जोइं च गहाय तं कूडागारसालं अंतो २ अनुपविसेइ २ तीसे कूडागारसालाए सव्वओ समंता घण-निचियनिरन्तरनिच्छिड्डाइं दुवारवयणाइं पिहेति तीसे य बहुमज्झदेसभाए तं पईवं पलीवेज्ञा, से य पईवे कूडागारसालं अंतो २ ओभासति उज्जोएइ तवइ पभासेइ नो चेव णं कूडागारसालाए बाहिं, तए णं से पुरिसे तं पईवं इड्डरेणं पिहेइ, तए णं से पईवे इड्डरस्स अंतो २ ओभासेइ नो चेव णं इड्डरस बाहिं, एवं गोकिलं जएणं गंडवाणियाए पच्छिपिडएणं आढएणं अद्धाढएणं पत्थएणं अद्धपत्थएणं कुलवेणं अद्धकुलवेणं चउब्भाइयाए अट्ठभाइयाए सोलसियाए बत्तीसियाए चउसट्ठियाए ।

तए णं से पुरिसे तं पईवं दीवगचंपणएणं पिहेइ, तए णं से पईवे तं दीवगचंपणयं अंतो २ ओभासइ नो चेव णं दीवगचंपणयस्स बाहिं नो चेव णं चउसट्ठियाए बाहिं जाव नो चेव णं कूडागारसालाए बाहिं, एवामेव गोयमा ! जीवेवि जारिसियं पुव्वकम्मनिबद्धं बोंदिं निव्वत्तेइ तं असंखेज्ञेहिं जीवपएसेहिं सचित्तीकरेइ' शेषं तु लिखितमेवास्ति ।

अस्य चायमर्थः-कूटाकारेण-शिखराकृत्या युक्ता शाला कूटाकारशाला 'दुहओ लित्ता' बहिरन्तश्च गोमयादिना लिप्ता 'गुत्ता' प्राकाराद्यावृता 'गुत्तदुवारा' कपाटादियुक्तद्वारा 'निवाया' वायुप्रवेशरहिता, किल महद्‌गृहं प्रायो निवातं न भवतीत्यत आह-'निवायगंभीरा' निवातविशाले-त्यर्थः 'पईवं' तैलदशाभाजनं 'जोइं'ति अग्निं 'घणनिचयनिरन्तरं निच्छिड्डाइं दुवारवयणाइं पिहेति' द्वाराण्येव वदनानि-मुखानि द्वारवदनानि पिधत्ते, कीदृशानि कृत्वा ? इत्याह ।

धननिचितानि कपाटादिद्वारपिधानानां द्वारशाखादिषु गाढनियोजनेन तानि च तानि निरन्तरं कपाटादीनामन्तराभावेन निश्छिद्रानि च-नीरन्ध्रानि धननिचितनिरन्तरनिश्छिद्रानि 'इड्डरेणं' ति गन्त्रीढश्चनकेन 'गोकिलंजएणं' ति गोचरणार्थं महावंशमयभाजनविशेषेण डल्लयेत्यर्थः 'गंडवानियाए' त्ति 'गण्डपानिका' वंशमयभाजनविशेष एव यो गण्डेन-हस्तेन गृह्यते डल्लातो लघुतरः 'पच्छिपिडएणं' ति पच्छिकालक्षणपिटकेन आढकादीनि प्रतीतानि नवरं 'चउब्भाइय' त्ति घटकस्य-रसमानविशेषस्य चतुर्थःभागमात्रो मानविशेषः 'अट्ठभाइया' तस्यैवाष्टमभागमात्रो मानविशेषः एवं 'सोलसिया' षोडशभागमाना 'बत्तीसिया' तस्यैव द्वात्रिंशद्‌भागमात्रा 'चतुष्षष्टिका' तस्यैव चतुःषष्टितमांशस्वभावा पलमिति तात्पर्यं 'दीवगचंपएणं' ति दीपकचम्पकेन दीपाच्छादनेन कोशिकेनेत्यर्थः, एतच्च सर्वमपि वाचनान्तरे साक्षाल्लिखितमेव दृश्यत इति ।

जीवाधिकारादिदमाह–

***मू. (३६७)*** *नेरइयाणं भंते ! पावे कम्मे जे य कडे जे य कज्जइ जे य कज्जिस्सइ सव्वे से दुक्खे जे निज्जिन्ने से सुहे ?, हंता गोयमा ! नेरइयाणं पावे कम्मे जाव सुहे, एवं जाव वेमानियाणं*

**वृ.** 'नेरइयाण' मित्यदि, 'सव्वे से दुक्खे' त्ति दुःखहेतुसंसारनिब्धनत्वाद् दुःखं 'जे निज्जिन्ने से सुहे' त्ति सुखस्वरूपमोक्षहेतुत्वादयन्निर्जीर्णं कर्म तत्सुखमुच्यते ॥ नारकादयश्च सञ्ज्ञिन इति सञ्ज्ञा आह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (३६८)** *कति णं भंते ! सन्नाओ पन्नत्ताओ ?, गोयमा ! दस सन्नाओ पन्नत्ताओ, तंजहा-आहारसन्ना १ भयसन्ना २ मेहुणसन्ना ३ परिग्गहसन्ना ४ कोहसन्ना ५ माणसन्ना ६ मायासन्ना ७ लोभसन्ना ८ लोगसन्ना ९ ओहसन्ना १०, एवं जाव वेमानियाणं ॥ नेरइया दसविहं वेयनिज्जं पच्चनुभवमाणा विहरंति, तंजहा-सीयं उसिणं खुहं पिवासं कंडुं परज्झं जरं दाहं भयं सोगं ॥*

**वृ.** 'कति ण' मित्यादि, तत्र सञ्ज्ञानं सञ्ज्ञा-आभोग इत्यर्थः मनोविज्ञानमित्यन्ते संज्ञायते वाऽनयेति सञ्ज्ञा वेदनीयमोहनीयोदयाश्रया ज्ञानदर्शनावरणक्षयोपशमाश्रया च विचित्राहारादिप्राप्तये क्रियैवेत्यर्थः, सा चोपाधिभेदाद्भिद्यमाना दशप्रकारा भवति, तद्यथा-

'आहारसन्ने'त्यादि, तत्र क्षुद्वेदनीयोदयात् कावलिकाद्याहारार्थं पुद्गलोपादानक्रियैव संज्ञायतेऽनया तद्वानित्याहारसञ्ज्ञा, तथा भयमोहनीयोदयाद्भयोद्भ्रान्तदृष्टिवदनविकाररोमाञ्चोद्भेदादिक्रियैव सञ्ज्ञायतेऽनयेति भयसञ्ज्ञा, तथा पुंवेदाद्युदयान्मैथुनाय स्त्र्याद्यङ्गालोकनप्रसन्नवदनसंस्तम्भितोरुवेपथुप्रभृतिलक्षणा क्रियैव सञ्ज्ञायतेऽनयेति मैथुनसञ्ज्ञा

तथा क्रोधोदयादावेशगर्भा प्ररूक्षनयनदन्तच्छदस्फुरणादिचेष्टैव सञ्ज्ञायतेऽनयेति क्रोधसञ्ज्ञा, तथा मानोदयादहङ्कारात्मिकोत्सेकक्रियैव सञ्ज्ञायतेऽनयेति मानसञ्ज्ञा, तथा मायोदयेनाशुभसहक्लेशादनृतसंभाषणादिक्रियैव सञ्ज्ञायतेऽनयेति मायासञ्ज्ञा, तथा लोभोदयाल्लालसान्वितासचित्तेतरद्रव्यप्रार्थःनैव सञ्ज्ञायतेऽनयेति लोभसञ्ज्ञा ।

तथा मतिज्ञानावरणक्षयोपशमाच्छब्दाद्यर्थःगोचरा सामान्यावबोधक्रियैव सञ्ज्ञायते वस्त्वनयेति ओधसञ्ज्ञा, एवं शब्दाद्यर्थःगोचरा विशेषावबोधक्रियैव सञ्ज्ञायतेऽनयेति लोकसञ्ज्ञा, ततश्चौधसञ्ज्ञा दर्शनोपयोगो लोकसञ्ज्ञा तु ज्ञानोपयोग इति, व्यत्ययं त्वन्ये, अन्ये पुनरित्थमभिदधति-सामान्यप्रवृत्तिरोधसञ्ज्ञा लोकदृष्टिस्तु लोसञ्ज्ञा, एताश्च सुखप्रतिपत्तये स्पष्टरूपाः पञ्चेन्द्रियानधिकृत्योक्ताः, एकेन्द्रियादीनां तु प्रायो यतोक्तक्रियानिबन्धनकर्मोदयादिरूपा एवावगन्तव्या इति ।

जीवाधिकारात्-'नेरइये'त्यादि, 'परज्झ'त्ति पारवश्यम् ।

प्राग् वेदनोक्ता सा च कर्म्मवशात् तच्च क्रियाविशेषात् सा च महतामितरेषां च समैवेति दर्शयितुमाह–

**मू. (३६९)** *से नूनं भंते ! हत्थिस्स य कुंथुस्स य समा चेव अपच्चक्खाणकिरिया कज्जति हंता गोयमा ! हत्थिस्स य कुंथुस्स य जाव कज्जति । से केणट्ठेणं भंते ! एवं वुच्चइ जाव कज्जइ ?, गोयमा ! अविरतिं पडुच्च, से तेणट्ठेणं जाव कज्जइ ।*

**वृ.** 'से नूनं भंते ! हत्थिस्से'त्यादि, अनन्तरमविरतिरुक्ता सा च संयतानामप्याधाकर्म्मभोजिनां कथञ्चिदस्तीत्यतः पृच्छति ।

**मू. (३७०)** *आहाकम्मन्नं भंते ! भुंजमाणे किं बंधइ ? किं पकरेइ ? किं चिणाइ ? किं उवचिणाइ ? एवं जहा पढमे सए नवमे उद्देसए तहा भानियव्वं जाव सासए पंडिए पंडियत्तं असासयं, सेवं भंते ! सेवं भंते त्ति ॥*

**वृ.** 'अहे'त्यादि, 'सासए पंडिए पंडियत्तं असासयं' ति अयमर्थः-जीवः शाश्वतः पण्डितत्वमशाश्वतं चारित्रस्य भ्रंशादिति ॥

शतकं-७ उद्देशकः-८ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं-७ उद्देशकः-९ :–

**वृ.** पूर्वमाधाकर्मभोक्तृत्वेनासंवृतवक्तव्यतोक्ता, नवमोद्देशकोऽपि तद्वक्तव्यतोच्यते, तत्र चादिसूत्रम्–

***मू. (३७१)*** *असंवुडे णं भंते! अनगारे बाहिरए पोग्गले अपरियाइत्ता पभू एगवन्नं एगरूवं विउव्वित्तए ?, नो तिणट्ठे समट्ठे। असंवुडे णं भंते ! अनगारे बाहिरए पोग्गले परियाइत्ता पभू एगवन्नं एगरूवं जाव हंता पभू।*

*से भंते ! किं इहगए पोग्गले परियाइत्ता विउव्वइ तत्थगए पोग्गले परियाइत्ता विउव्वति अन्नत्थगए पोग्गले परियाइत्ता विकुव्वइ ?, गोयमा ! इहगए पोग्गले परियाइत्ता विकुव्वइ नो तत्थगए पोग्गले परियाइत्ता विकुव्वइ नो अन्नत्थगए पोग्गले जाव विकुव्वति।*

*एवं एगवन्नं अनेगरूवं चउभंगो जहा छट्ठसए नवमे उद्देसए तहा इहावि भानियव्वं, नवरं अनगारे इहगयं इहगए चेव पोग्गले परियाइत्ता विकुव्वइ, सेसं तं चेव जाव लुक्खपोग्गलं निद्धपोग्गलत्ताए परिणामेत्तए ?, हंता पभू, से भंते ! किं इहगए पोग्गले परियाइत्ता जाव नो अन्नत्थगए पोग्गले परियाइत्ता विकुव्वइ ॥*

**वृ.** 'असंवुडे ण'मित्यादि, 'असंवृतः' प्रमत्तः 'इहगए'त्ति इह प्रच्छको गौतमस्तदपेक्षया इहशब्दवाच्यो मनुष्यलोकस्ततश्च 'इहगतान्' नरलोकव्यवस्थितान् 'तत्थगए'त्ति वैक्रियं कृत्वा यत्र यास्यति तत्र व्यवस्थितानित्यर्थः।

अन्नत्थगए'त्ति उक्तस्थानद्वयव्यतिरिक्तस्थानाश्रितानित्यर्थः 'नवरं'ति अयं विशेषः- 'इहगए'इति इहगतः अनगार इति इहगतान् पुद्गलानिति च वाच्यं, तत्र तु देव इति तत्रगतानिति चोक्तमिति।

अनन्तरं पुद्गलपरिणामविशेष उक्तः, स सङ्ग्रामे सविशेषो भवतीति सङ्ग्रामविशेषवक्तव्यताभणनाय प्रस्तावयन्नाह–

***मू. (३७२)*** *नायमेयं अरहया सुयमेयं अरहया विन्नायमेवं अरहया महासिलाकंटए संगामे २।*

*महासिलाकंटए णं भंते ! संगामे वट्टमाणे के जइत्था के पराजइत्था ?, गोयमा ! वज्जी विदेहपुत्ते जइत्था, नवमल्लई नवलेच्छई कासीकोसलगा अट्ठारसवि गणरायाणो पराजइत्था।*

*तए णं से कोनिए राया महासिलाकंटकं संगामं उवट्ठियं जानित्ता कोडुंबियपुरिसे सद्दावेइ २ एवं वयासी-खिप्पामेव भो देवाणुप्पिया। उदाइं हत्थिरायं पडिकप्पेह हयगयरहजोहकलियं चाउरंगिणिं सेणिं सन्नाहेह २ त्ता मम एयमाणत्तियं खिप्पामेव पच्चपपिणह। तए णं ते कोडुंबियपुरिसा कोणिएणं रन्ना एवं वुत्ता समाणा हट्ठतुट्ठ जाव अंजलिं कट्टु एवं सामी ! तहत्ति आणाए विनएणं वयणं पडिसुणंति २ खिप्पामेव छेयायरियोवएसमतिकप्पणाविकप्पोहिं सुनिउणेहिं एवं जहा उववाइए जाव भीमं संगामियं अउज्झं उदाइं हत्थिरायं पडिकप्पेंति हयगय जाव सन्नाहेंति २ जेणेव कूणिए राया तेणेव उवागच्छइ तेणेव उवागच्छइत्ता करयल० कूणियस्स रन्नो तमाणत्तियं पच्चप्पिणंति।*

*तए णं से कूणिए राया जेणेव मज्जणघरे तेणेव उवागच्छइ तेणेव उवागच्छित्ता मज्जणघरं अनुपविसइ मज्जणघरं अनुपविसित्ता ण्हाए कयबलिकम्मे कयकोउयमंगलपायच्छित्ते सव्वालंका-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*रविभूसिए सन्नद्धबद्धवम्मियकवए उप्पालियसरासणपट्टिए पिणद्धगेवेज्जे विमलवरबद्धचिंधपट्टे गहियाउहप्पहरणे सकोरिंटमल्लदामेणं छत्तेणं धरिज्जमाणेणं चउचामरवालवीतियंगे मंगलजयसद्दकयालोए एवं जहा उववाइए जाव उवागच्छित्ता उदाइं हत्थिरायं दुरूढे।*

*तए णं से कूणिए राया हरोत्थयसुकयरइयवच्छे जहा उववाइए जाव सेयवरचामराहिं उद्धुव्वमाणीहिं उद्धुव्वमाणीहिं हयगयरहपवरजोहकलियाए चाउरंगिणीए सेनाए सद्धिं संपरिवुडे महया भडचडगरविंदपरिक्खित्ते जेणेव महासिलाए कंटए संगामे तेणेव उवागच्छइ तेणेव उवागच्छित्ता महासिलाकंटयं संगामं ओयाए, पुरओ य से सक्के देविंदे देवराया एगं महं अभेज्जकवयं वइरपडिरूवगं विउव्वित्ताणं चिट्ठति, एवं खलु दो इंदा संगामं संगामेंति, तंजहा-देविंदे य मणुइंदे य, एगहत्थिणावि णं पभू कूणिए राया पराजिनित्तए, तए णं से कूणिए राया महासिलाकंटकं संगामं संगामेमाणे नवमल्लइ नवलेच्छइ कासीकोसलगा अट्ठारसवि गणरायाणो हयमहियपवरवीरघाइयवियडियचिंधद्धयपडागे किच्छपाणगए दिसो दिसिं पडिसेहित्था।*

*से केणट्ठेणं भंते ! एवं वुच्चइ महासिलाकंटए संगामे ?, गोयमा ! महासिलाकंटए णं संगामे वट्टमाणे जे तत्थ आसे वा हत्थी वा जोहे वा सारही वा तणेण वा पत्तेण वा कट्ठेण वा सक्कराए वा अभिहम्मति सव्वे से जाणइ महासिलाए अहं अभिहए म० २, से तेणट्ठेणं गोयमा ! महासिलाकंटए संगामे। महासिलाकंटए णं भंते ! संगामे वट्टमाणे कति जणसयसाहस्सीओ वहियाओ ?, गोयमा ! चउरासीइं जणसयसाहस्सीओ वहियाओ।*

*ते णं भंते ! मणुया निस्सीला जाव निप्पच्चक्खाणपोसहोववासा सा रुट्ठा परिकुविया समरवहिया अनुवसंता कालमासे कालं किच्चा कहिं गया कहिं उववन्ना ?, गोयमा ! ओसन्नं नरगतिरिक्खजोनिएसु उववन्ना ॥*

**वृ.** 'नायमेय'मित्यादि, ज्ञातं सामान्यतः 'एतत्' वक्ष्यमाणं वस्तु 'अर्हता' भगवता महावीरेण सर्वज्ञत्वात्, तथा 'सुयं'ति स्मृतमिव स्मृतं स्पष्टप्रतिभासभावात्, विज्ञातं विशेषतः, किं तत् ? इत्याह– 'महासिलाकंटए संगामे'त्ति महाशिलेव कण्टको जीवितभेदकत्वात् महाशिलाकण्टकस्ततश्च यत्र तृणशलाकादिनाऽप्यभिहतस्याश्वहस्त्यादेर्महाशिलाकण्टकेनेवाभ्याहतस्य वेदना जायते स सङ्ग्रामो महाशिलाकण्टक एवोच्यते, द्विर्वचनं चोल्लेखस्यानुकरणे, एवं च किलायं सङ्ग्रामः सञ्जातः–

चम्पायां कूणिको राजा बभूव, तस्य चानुजौ हल्लविहल्लाभिधानो भ्रातरौ सेचनकाभिधानगन्धहस्तिनि समारूढौ दिव्यकुण्डलदिव्यवसनदिव्यहारविभूषितौ विलसन्तौ दृष्ट्वा पद्मावत्यभिधाना कूणिकराजस्य भार्या मत्सराद्धन्तिनोऽपहाराय तं प्रेरितवती, तेन तौ तं याचितौ, तौ च तद्भयाद्वैशाल्यां नगर्यां स्वकीयमातामहस्य चेटकाभिधानस्य राज्ञोऽन्तिकं सहस्तिकौ सान्तःपुरपरिवारौ गतवन्तौ, कूणिकेन च दूतप्रेषणतो मार्गितौ, न च तेन प्रेषितौ, ततः कूणिकेन भाणितं-यति न प्रेषयसि तौ ! तदा युद्धसज्जो भव, तेनापि भानितम्-एष सज्जोऽस्मि।

ततः कूणिकेन कालादयो दश स्वकीया भिन्नमातृका भ्रातरो राजानश्चेटकेन सह सङ्ग्रामायाहूताः, तत्रैकैकस्य त्रीनि २ हस्तिनां सहस्रानि, एवं रथानामश्वानां च, मनुष्याणां तु प्रत्येकं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिस्रः २ कोटयः, कूणिकस्याप्येवमेव।

एनं च व्यतिकरं ज्ञात्वा चेटकेनाप्यष्टादश गणराजा मिलिताः, तेषां चेटकस्य च प्रत्येकमेवमेव हस्त्यादिपरिमाणं, ततो युद्धं संप्रलग्नं, चेटकराजश्च प्रतिपन्नव्रतत्वेन दिनमध्ये एकमेव शरं मुञ्चति, अमोधबाणश्च सः, तत्र च कूनिकसैन्ये गरुडव्यूहः, चेटकसैन्ये च सागरव्यूहो विरचितः, ततश्च कूणिकस्य कालोदण्डनायको युद्धयमानस्तावद्गतो यावच्चेटकः, ततस्तेनैकशरनिपातेनासौ निपातितो, भग्नं च कूणिकबलं, गते च द्वे अपि बले निजं निजमावासस्थानम् एवं च दशसु दिवसेसु चेटकेन विनाशिता दशापि कालादयः, एकादशे तु दिवसे चेटकजयार्थं देवताराधनाय कूणिकोऽष्टमभक्तं प्रजग्राह।

ततः शक्रचमरावागतौ, ततः शक्रो बभाण-चेटकः श्रावक इत्यहं न तं प्रति प्रहरामि नवरं भवन्तं संरक्षामि, ततोऽसौ तद्रक्षार्थं वज्रप्रतिरूपकमभेद्यकवचं कृतवान्, चमरस्तु द्वौ सङ्ग्रामौ विकुर्वितवान्-महाशिलाकण्डकं रथमुशलं चेति॥

'जइत्थ'त्ति जितवान् 'पराजइत्थ'त्ति पराजितवान् हारितवानित्यर्थः 'वज्जि'त्ति 'वज्री' इन्द्रः 'विदेहपुत्ते'त्ति कोनिकः, एतावेव तत्र जेतारौ नान्यः कश्चिदिति 'नव मल्लइ'त्ति मल्लकिनामानो राजविशेषाः 'नव लेच्छइ'त्ति लेच्छकिनामानो राजविशेषा एव 'कासीकोसलग'त्ति काशी-वाणारसी तज्जनपदोऽपि काशी तत्सम्बन्धिन आद्या नव कोशला-अयोध्या तज्जनपदोऽपि कोशला तत्सम्बन्धिनो नव द्वितीयाः, 'गणरायाणो'त्ति समुत्पन्ने प्रयोजने ये गणं कुर्वन्ति ते गणप्रधाना राजानो गणराजाः सामन्ता इत्यर्थः:, ते च तदानीं चेटकराजत्य वैशालीनगरीनायकस्य साहाय्याय गणं कृतवन्त इति।

अथ महाशिलाकण्टके सङ्ग्रामे चमरेण विकुर्विते सति कूणिको यदकरोत्तद्दर्शनार्थः-मिदमाह-'तए ण'मित्यादि, ततो महाशिलाकण्टकसङ्ग्रामविकुर्व्वणानन्तरमुदायिनामानं 'हत्थिरायं'ति हस्तिप्रधानं 'पडिकप्पेह'त्ति सन्नद्धं कुरुत 'पच्चप्पिणह'त्ति प्रत्यर्प्पयत निवेदयतेत्यर्थः, 'हट्ठतुट्ठ' इह यावत्करणादेवं दृश्यम्-'हट्ठतुट्ठचित्तमाणंदिया नंदिया पीइमणा'इत्यादि, तत्र हृष्टतुष्टं-अत्यर्थं तुष्टं हृष्टं वा-विस्मितं तुष्टं च-तोषवच्चित्तं-मनो यत्र तत्तथा तद् हृष्टतुष्टचित्तं यथा भवति इत्येवमानन्दिता-ईषन्मुखसौम्यतादिभावैः समृद्धिमुपगताः, ततश्च नन्दिताः-समृद्धितरतामुपगताः प्रीति-प्रीणनं-आप्यायनं मनसि येषां ते प्रीतिमनसः 'अंजलिं कट्टु'त्ति।

इदं त्वेवं दृश्यम्-'करयलपरिग्गहियं दसणहं सिरसावत्तं मत्थए अंजलिं कट्टु' तत्र शिरसाऽप्राप्तं-असंस्पृष्टं मस्तकेऽञ्जलिं कृत्वेत्यर्थः 'एवं सामी! तहत्ति आणाए विनएणं वयणं पडिसुणेंति'त्ति एवं स्वामिन्! तथेति आज्ञया इत्येवंविधशब्दभणनरूपो यो विनयः स तथा तेन वचनं राज्ञः सम्बन्धि 'प्रतिश्रृण्वन्ति' अभ्युपगच्छन्ति 'छेयायरिओएसमइकप्पणाविगप्पेहिं'ति छेको-निपुणो य आचार्य-शिल्पोपदेशदाता तस्योपदेशाद् या मति-बुद्धिस्तस्या ये कल्पनाविकल्पाः-कृतिभेदास्ते तथा तैः प्रतिकल्पयन्तीति योगः 'सुनिउणेहिं'ति कल्पनाविकल्पानां विशेषणं नरैर्वा सुनिपुणैः।

'एवं जहा उववाइए'त्ति तत्र चेदं सूत्र मेवम्-'उज्जलनेवत्थहव्वपरिवच्छियं' उज्ज्वलनेपथ्येन-निर्मलवेषेण 'हव्वं'ति शीघ्र परिपक्षितः-परिगृहीतः परिवृतो यः स तथा तं, सुसज्जं 'वम्मियसन्नद्ध-बद्धकवइयउप्पीलियवच्छकच्छगेवेज्जगबद्धगलगवरभूसणविराइयं' वर्म्मनि नियुक्तावार्म्मिकास्तैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्नद्धः-कृतसन्नाहोवार्म्मिकसंनद्धः बद्धा कवचिका-सन्नाहविशेषो यस्य स बद्धकवचिकः उत्पीडिता-गाढीकृता वक्षसि कक्षा-हृदयरज्जुर्यस्य स तथा ग्रैवेयकं बद्धं गलके यस्य स तथा वरभूषणैर्विराजितो यः स तथा ततः कर्म्मधारयोऽतस्तम् 'अहियतेयजुत्तं विरइयवरकण्णपूरसललियपलंबावचूल-चामरोयरकयंधयारं' विरचते वरकर्णपूरे-प्रधानकर्णाभरणविशेषौ यस्य स तथा सललितानि प्रलम्बानि अवचूलानि यस्य स तथा चामरोत्करेण कृतमन्धकारं यत्र स तथा ततः कर्मधारयोऽतस्तं

'चित्तपरिच्छोयपच्छयं' चित्तपरिच्छोको-लघुः प्रच्छदो-वस्त्रविशेषो यस्य स तथाऽतस्तं 'कणगघडियसुत्तगसुबद्धकच्छं' कनकघटितसूत्रकेण सुष्ठु बद्धा कक्षा-उरोबन्धनं यस्य स तथा तं 'बहुपहरणावरणाभरियजुज्झसज्झं' बहूनां प्रहरणाना(मस्यादीना)मावरणानां च-स्फुरकंकट-कादीनां भृतो युद्धसज्ज्ञश्च यः स तथाऽतस्तं 'सछत्तं सज्झयं सघंटं' 'पंचामेलियपरिमंडि-याभिरामं' पञ्चभिरापीडिकाभः-चूडाभिः परिमण्डितोऽभिरामश्च-रम्यो यः स तथाऽतस्तम् 'ओसारियजमल-जुलयघंटं' अवसारितं-अवलम्वितं यमलं-समंयुगलं-द्वयं घण्टयोर्यत्र स तथाऽतस्तं 'विज्जुपिणद्धं व कालमेहं' भास्वरप्रहरणाभरणादीनां विद्युत्कल्पता कालत्वाच्च गलस्य मेघसमतेति 'उप्पाइयपव्वयं व सक्खं' औत्पादिकपर्वतमिव साक्षादित्यर्थः 'मत्तं मेहमिव गुलुगुलंतं मनपवणज- इणवेगं' मनःपवनजयी वेगो यस्य स तथाऽतस्तं, शेषं तु लिखितमेवास्ति, वाचनान्तरे त्विदं साक्षाल्लिखितमेव दृश्यत इति।

*जइ पओगपरिणया किं मप्पयोगपरिणया वइप्पयोग० कायप्पयोगपरिणया ?, गोयमा मणप्पयो० वइप्पयोगप० कायप्पयोगपरिणया वा अहवेगे मणप्पयोगप० एगे वयप्पयोगप०, अहवेगे मणप्पयोगपरिणए कायप०, अहवेगे वयप्पयोगप० एगे कायप्पओगपरि०, जइ मणप्पयोगप० किं सच्चमणप्पयोगप० ४ ।*

*गोयमा ! सच्चमणप्पयोगपरिणया वा जाव असच्चामोसमणप्पयोगप० १ अहवा एगे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सच्चम णप्पयोगपरिणए एगे मोसमणप्पओगपरिणए १ अहवा एगे सच्चमणप्पओगप० एगे सच्चमोसणप्पओगपरिणए २ अहवा एगे सच्चमणप्पयोगपरिणया एगे असच्चामोसमणप्पओगपरिणए ३ अहवा एगे मोसमणप्पयोगप० एगे सच्चामोसमणप्पयोगप० ४ अहवा एगे मोसमणप्पयोगप० एगे असच्चामोसमणप्पयोगप० ५ अहवा एगे सच्चामोसमणप्पओगप० एगे असच्चामोसमणप्पओगप० ६ ।

जइ सच्चमणप्पओगप० किं आरंभसच्चमणप्पयोगपरिणए जाव असमारंभसच्चमणप्पयोगप० ?, गोयमा! आरंभसच्चमणप्पयोगपरिणया वा जाव असमारंभसच्चमणप्पयोगपरिणया वा, अहवा एगे आरंभसच्चमणप्पयोगप० एगे णारंभसच्चमणप्पयोगप० एवं एएणं गमएणं दुयसंजोएणं नेयव्वं, सव्वे संयोगा जत्थ जत्तिया उट्ठेंति ते भानियव्वा जाव सव्वट्ठसिद्धगत्ति । जइ मीसाप० किं मणमीसापरि० एवं मीसापरि० वि० ।

जइ वीससापरिणया किं वन्नपरिणया गंधप० एवं वीससापरिणयादि जाव अहवा एगे चउरंससंठाणपरि० एगे आययसंठाणपरिणए वा ।

तिन्नि भंते! दव्वा किं पयोपरिणया मीसाप० वीससाप० ?, गोयमा! पयोगपरिणया वा मीसा परिणया वा वीससापरिणया वा १ अहवा एगे पयोगपरिणए दो मीसाप० १ अहवेगे पयोगपरिणए दो वीससाप० २ अहवा दो पयोगपरिणया एगे मीससापरिणए ३ अहवा दो पयोगप० एगे वीससाप० ४ अहवा एगे मीसापरिणए दो वीससाप० ५ अहवा४ दो मीससाप० एगे वीससाप० ६ अहवा एगे पयोगप० एगे मीसापरि० एगे वीससाप० ७ ।

जइ पयोगप० किं मणप्पयोगपरिणया वइप्पयोगप० कायप्पयोगप० ?, गोयमा ! मणप्पयोगपरिणया वा एवं एक्कगसंयोगो दुयासंयोगो तियासंयोगो भानियव्वो, जइ मणप्पयोगपरि० किं सच्चमणप्पयोगपरिणए ४ ?, गोयमा ! सच्चमणप्पयोगपरिणया वा जाव असच्चामोसमणप्पयोगपरिणए वा ४, अहवा एगे सच्चमणप्पयोगपरिणए दो मोसमणप्पयोगपरिणया वा, एवं दुयासंयोगो तियासंयोगो भानियव्वो, एत्थवि तहेव जाव अहवा एगे तंससंठाणपरिणए वा एगे चउरंससंठाणरिणए वा एगे आययसंठाणपरिणए वा ।

चत्तारि भंते! दव्वा किं पओगपरिणया ३ ?, गोयमा! पयोगपरिणया वा मीसापरिणया वा वीससापरिणया वा, अहवा एगे पओगपरिणए तिन्नि मीसापरिणया १ अहवा एगे पओगपरिणए तिन्नि वीससापरिणया २ अहवा दो पयोगपरिणया दो मीसापरिणया ३ अहवा दो पयोगपरिणया दो वीससापरिणया ४ अहवा तिन्नि पओगपरिणया एगे मीससापरिणया ५ अहवा तिन्नि पओगपरिणया एगे वीससापरिणए ६ अहवा एगे मीससापरिणए तिन्नि वीससापरिणया ७ अहवा दो मीसापरिणया दो वीससापरिणया ८ अहवा तिन्नि मीसापरिणया एगे वीससापरिणए ९ अहवा एगे पओगपरिणए दो वीससापरिणया (एगे मीसापरिणए) १ अहवा एगे पयोगपरिणए दो मीसापरिणया एगे वीससापरिणए २ अहवा दो पयोगपरिणया एगे मीसापरिणए एगे वीससापरिणए ३ । जइ पयोगपरिणया किं मणप्पयोगपरिणया ३ ।

एवं एएणं कमेणं पंच छ सत्त जाव दस संखेज्ञा असंखेज्ञा अनंता य दव्वा भानियव्वा (एक्कगसंजोगेण) दुयासंजोएणं तियासंजोएणं जाव दससंजोएणं बारससंजोएणं उवजुंजिऊणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जत्थ जत्तिया संजोगा उट्ठेति ते सव्वे भानियव्वा, एए पुण जहा नवमसए पवेसणए भनिहामि तहा उवजुज्जिऊण भानियव्वा जाव असंखेज्ञा अनंता एवं चेव, नवरं एकं पदं अब्भहियं, जाव अहवा अनंता परिमंडलसंठाणपरिणया जाव अनंता आययसंठाणपरिणया ॥*

**वृ.** 'दो भंते !' इत्यादि, इह प्रयोगपरिणतादिपदत्रये एकत्वे त्रयो विकल्पाः, द्विकयोगेऽपि त्रय एवेत्येवं षट्, एवं मनः-प्रयोगादित्रयेऽपि, सत्यमनःप्रयोगपरिणतादीनि तु चत्वारि पदानि तेष्वेकत्वे चत्वारि द्विकयोगे तु षट् एवं सर्वेऽपि दश, आरम्भसत्यमनःप्रयोगपरिणतादीनि च षट् पदानि, तेष्वेकत्वे षड् द्विकयोगे तु पञ्चदश सर्वेऽप्येकविंशति ६ ।

सूत्रे च 'अहवा एगे आरंभसच्चमणप्पओगपरिणए' इत्यादिनेहद्विकयोगे प्रथम एव भङ्को दर्शितः, शेषांस्तदन्यपदसम्भवांश्चातिदेशेन पुनर्दर्शयतोक्तम्-'एवं एएणं गमेणं' इत्यादि एवमेतेन गमेनारम्भसत्यमनःप्रयोगादिपदप्रदर्शितेन द्विकसंयोगेन नेतव्यं समस्तं द्रव्यद्वयसूत्रं, द्विकसंयोगस्य चैकत्वविकल्पाभिधानपूर्वकत्वादेकत्वविकल्पैश्चेति दृश्यं, तत्र च यत्रारम्भसत्यमनः प्रयोगा-दिपदसमूहे यावन्तो द्विकसंयोगा उत्तिष्ठन्ते सर्वे ते तत्र भनितव्याः, तत्र चारम्भसत्यमनः प्रयोगा दर्शिता एव, आरम्भादिपदषट्कविशेषितेषु पुनरित्थमेव त्रिषु मृषामनःप्रयोगादिषु, चतुर्षु च सत्यवाक्प्रयोगादिषु तु प्रत्येकमेकत्वे षड् विकल्पाः ।

द्विकसंयोगे तु पञ्चदशेत्येवं प्रत्येकमेवमेव सर्वेष्वप्येकविंशति, औदारिकशरीरकाय-प्रयोगादिषु तु सप्तसु पदेष्वेकत्वे सप्त द्विकयोगे त्वेकविंशतिरित्येवमष्टाविंशतिरिति एवमेकेन्द्रिया-दिपृथिव्यादिपदप्रभृतिभि पूर्वोक्तक्रमेणौदारिकादिकायप्रयोगपरिणतद्रव्यद्वयं प्रपञ्चनीयं, कियद्दूरं यावत् ? इत्याह-'जाव सव्वट्ठसिद्धग' त्ति, एतच्चैवं- 'जाव सव्वट्ठसिद्ध अनुत्तरोववाइय कप्पातीत-गवेमानियदेवपंचेंदियकम्मासरीरकायप्प ओगपरिणया किं पज्ञत्तसव्वट्ठसिद्धजाव परिणया अपज्ञत्त सव्वट्ठसिद्ध जाव परिणया वा ?, गोयमा ! पज्ञत्त सव्वट्ठसिद्ध जाव परिणया वा अपज्ञत्त सव्वट्ठसिद्ध जावपरिणया वा ?, अहवा एगे पज्ञत्त सव्वट्ठसिद्ध जाव परिणए एगे अपज्ञत्त सव्वट्ठसिद्ध जाव परिणए' त्ति ।

'एवं वीससापरिणयावि' त्ति एवमिति-प्रयोगपरिणतद्रव्यद्वयवत्प्रत्येकविकल्पैर्द्विकसंयोगैश्च विश्रसापरिणते अपि द्रव्ये वर्णगन्धरसस्पर्शसंस्थानेषु पञ्चादिभेदेषु वाच्ये, कियद्दूरं यावत् ? इत्याह-'जाव अहवेगे' इत्यादि, अयं च पञ्चभेदसंस्थानस्य दशानां द्विकसंयोगानां दशम इति ।

अथ द्रव्यत्रयं चिन्तयन्नाह-'तिन्नी' त्यादि, इह प्रयोगपरिणतादिपदत्रये एकत्वे विकल्पाः द्विकसंयोगे तु षट्, कथम् ?, आद्यस्यैकत्वे शेषयोः क्रमेण द्वित्वे द्वौ तथाऽऽद्यस्य द्वित्वे शेषयोः क्रमेणैकत्वेऽन्यौ द्वौ ४ तथा द्वितीयस्यैकत्वे तृतीयस्य च द्वित्वेऽन्यः ५ तथा द्वितीयस्य द्वित्वे तृतीयस्य चैकत्वेऽन्यः ६ इत्येवं षट्, त्रिकयोगे त्वेक एवेत्येवं सर्वे दश, एवं मनः प्रयोगादिपदत्रयेऽपि, अत एवाह–

'एवमेक्कगसंजोगो' इत्यादि, सत्यमनःप्रयोगादिनि तु चत्वारि पदानीत्यत एकत्वे चत्वारो द्विकसंयोगे तु द्वादश, कथम् ?, आद्यस्यैकत्वेन शेषाणां त्रयाणां क्रमेणानेकत्वेन त्रयो लब्धाः, पुनरन्ये त्रय आद्यस्यानेकत्वेन शेषाणां त्रयाणां क्रमेणैकत्वेन ६, तथा द्वितीयस्यैकत्वेन शेषयोः क्रमेणानेकत्वेन द्वौ, पुनर्द्वितीयस्यानेकत्वेन शेषयोः क्रमेणैवैकत्वेन द्वावेव तृतीय चतुर्थःयोरेकत्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नकेत्वाभ्यामेकः पुनर्विपर्ययेणैक इत्येवं द्वादश त्रिकयोगे तु चत्वार इत्येवं सर्वेऽपि विंशतिरिति

सूत्रे तु कांश्चिदुपदर्श्य शेषानतिदेशत आह- 'एवं दुयासंजोगो'इत्यादि, 'एत्थवि तहेव'त्ति अत्रापि द्रव्यत्रयाधिकारे तथैव वाच्यं सूत्रं यथा द्रव्यद्वयाधिरे उक्तं, तत्र च मनोवाक्कायप्रभेदतो यः प्रयोगपरिणामो मिश्रतापरिणामो वर्णादिभेदतश्च विश्रसापरिणाम उक्तः स इहापि वाच्य इति भावः, किमन्तं तत्सूत्रं वाच्यम् ? इत्याह-'जावे'त्यादि, इह च परिमण्डलादीनि पञ्च पदानि तेषु चैकत्वे पञ्च विकल्पाः द्विकसंयोगे तु विंशति, कथम् ?, आद्यस्यैकत्वे शेषाणां च क्रमेणानेकत्वे तथाऽऽद्यस्यानेकत्वे शेषाणां तु क्रमेणैवैकत्वे एवं द्वितीयस्यैकत्वेऽनेकत्वे च शेषत्रयस्य चानेकत्वे एकत्वे च षट् तथा तृतीयस्यैकत्वे च द्वयोश्चानेकत्वे एकत्वे च चत्वारः तथा चतुर्थःस्यैकत्वेऽनेकत्वे च पञ्चमस्य चानेकत्वे एकत्वे च द्वावित्येवं सर्वेऽपि विंशति :।

त्रिकयोगे तु दश अत्र च 'अहवा एगे तंससंठाणे'इत्यादिना त्रिकयोगानां दशमो दर्शित इति।

अथ द्रव्यचतुष्कमाश्रित्याह-'चत्तारि भंते !' इत्यादि, इह प्रयोगपरिणतादित्रये एकत्वे त्रयो द्विकसंयोगे तु नव, कथम् ?, आद्यस्यैकत्वे द्वयोश्च क्रमेण त्रित्वे द्वौ, तथाऽऽद्यस्य द्वित्वे द्वयोरपि क्रमेणैव द्वित्वेऽन्यौ द्वौ, तथाऽऽद्यस्य त्रित्वे द्वयोश्च क्रमेणैवैकत्वेऽन्यौ द्वौ, तथा द्वितीयस्यैकत्वेऽन्यस्य त्रित्वे तथा द्वयोरपि द्वित्वे तथा द्वितीयस्य त्रित्वेऽन्यस्य चैकत्वे त्रयोऽन्ये इत्येवं सर्वेऽपि नव त्रययोगे तु त्रय एव भवन्तीत्येवं सर्वेऽपि पञ्चदश इति।

'जइ पओगपरिणया किं मणप्पओगे'त्यादिना चोक्तशेषं द्रव्यचतुष्कप्रकरणमुपलक्षितं, तच्च पूर्वोक्तानुसारेण संस्थानसूत्रान्तमुचितभङ्गकोपेतं समस्तमध्येयमिति। अथ पञ्चादिद्रव्यप्रकरणान्यतिदेशतो दर्शयन्नाह-'एवं एएण'मित्यादि, एवं चाभिलापः-'पंचभंते ! दव्वा किं पओगपरिणया ३ ?, गोयमा ! पओगपरिणया ३ अहवा एगे पओगपरिणए चत्तारि मीसापरिणया' इत्यादि, इह च द्विकसंयोगे विकल्पा द्वादश, कथम् ?, एकं चत्वारि च १ द्वे त्रीनि च २ त्रीनि द्वे च ३ चत्वार्येकं च ३ इत्येवं चत्वारो विकल्पा द्रव्यपञ्चकमाश्रित्यैकत्र द्विकसंयोगे पदत्रयस्य त्रयो द्विकसंयोगास्ते च चतुर्भिर्गुनिता द्वादशेति, त्रिकयोगे तु षट्, कथम् ?, त्रीण्येकमेकं च १ एकं त्रीण्येकं च २ एकमेकं त्रीनि च ३ द्वे द्वे एकं च ४ द्वे एकं द्वे च ५ एकं द्वे द्वे च ६ इत्येवं षट्, 'जाव दससंजोएणं'ति इह यावत्करणाच्चतुष्कादिसंयोगाः सूचिताः, तत्र च द्रव्यपञ्चकापेक्षया सत्यमन-:प्रयोगादिषु चतुर्षु पदेषु द्विकत्रिकचतुष्कसंयोगा भवन्ति।

तत्र च द्विकसंयोगाश्चतुर्विंशति २४, कथम् ?, चतुर्णां पदानां षट् द्विकसंयोगाः, तत्र चैकैकस्मिन् पूर्वोक्तक्रमेण चत्वारो विकल्पाः षन्नां च चतुर्भिगुणने (च) चतुर्विंशतिरिति, त्रिकसंयोगा अपि चतुर्विंशति, कंथम् ?, चतुर्णां पदानां त्रिकसंयोगाश्चत्वारः, एकैकस्मिन् पूर्वोक्तक्रमेण षड् विकल्पाः, चतुर्णां च षड्भिर्गुणने चतुर्विंशतिरिति, चतुष्कसंयोगे तु चत्वारः, कथम् ?, आदौ, द्वे त्रिषु चैकैकं १ तथा द्वितीयस्थाने द्वे शेषेषु चैकैकं २ तथा तृतीये स्थाने द्वे शेषेषु चैकैकं ३ तथा चतुर्थे द्वे शेषेषु चैकैकम् ४ इत्येवं चत्वार इति, एकेन्द्रियादिषु तु पञ्चसु पदेषु द्विकचतुष्कपञ्चकसंयोगा भवन्ति, तत्र च द्विकसंयोगाश्चत्वारिंशत्।

कथम् ?, पञ्चानां पदानां दश द्विकसंयोगा एकैकस्मिंश्च द्विकसंयोगे पूर्वोक्तक्रमेण चत्वारो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकल्पा दशानां च चतुर्भिर्गुणने चत्वारिंशदिति, त्रिकसंयोगे तु षष्टिः।

कथम् ?, पञ्चानां पदानां दश त्रिकसंयोगाः एकैकस्मिंश्च त्रिकसंयोगे पूर्वोक्तक्रमेण षड् विकल्पाः दशानां च षड्भिर्गुणने षष्टिरिति।

चतुष्कसंयोगास्तु विंशतिः, कथम् ?, पञ्चानां पदानां तु चतुष्कसंयोगे पञ्च विकल्पा एकैकस्मिंश्च पूर्वोक्तक्रमेण चत्वारो भङ्गाः पञ्चानां चतुर्भिर्गुणने विंशतिरिति, पञ्चकसंयोगे त्वेक एवेति, एव षट्कादिसंयोगा अपि वाच्याः।

नवरं षट्कसंयोग आरम्भसत्यमनःप्रयोगादिपदान्याश्रित्य सप्तकसंयोगस्त्वौदारिकादिकायप्रयोगमाश्रित्य अष्टकसंयोगस्तु व्यन्तरभेदान् नवकसंयोगस्तु ग्रैवेयकभेदान् दशकसंयोगस्तु भवनपतिभेदानाश्रित्य वैक्रियशरीरकायप्रयोगापेक्षया व्यन्तरभेदान् नवकसंयोगस्तु ग्रैवेयकभेदान् दशकसंयोगस्तु भवनपतिभेदानाश्रित्य वैक्रियशरीरकायप्रयोगापेक्षया समवसेयः, एकादशसंयोगस्तु सूत्रेनोक्तः, पूर्वोक्तपदेषु तस्यासम्भवात्, द्वादशसंयोगस्तु कल्पोपपन्नदेवभेदानाश्रित्य वैक्रियशरीर- कायप्रयोगापेक्षया वेति।

'पवेसण' त्ति नवमशतकसत्कतृतीयोद्देशके गाङ्गेयाभिधानानगारकृतनरकादिगतप्रवेशनविचारे, कियन्ति तदनुसारेण द्रव्यानि वाच्यानि ? इत्याह-'जाव असंखेज्जे' ति असङ्ख्यातान्तनारकादिवक्तव्यताश्रयं हि तत्सूत्रम्, इह तु यो विशेषस्तमाह-'अनंता' इत्यादि, एतेदेवाभिलापतो दर्शयन्नाह-'जाव अनंते' इत्यादि।

अथैतेषामेवाल्पबहुत्वं चिन्तयन्नाह—

**मू. (३८८)** *एएसि णं भंते ! पोग्गलाणं पयोगपरिणयाणं मीसापरिणयाणं वीससापरिणयाण य कयरे २ हिंतो जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पोग्गला पयोगपरिणया मीसापरिणया अनंतगुणा वीससापरिणया अणन्तगुणा। सेवं भंते ! सेवं भंते ! त्ति ॥*

**वृ.** 'एएसि ण' मित्यादि, 'सव्वत्थोव पुग्गला पओगपरिणय' त्ति कायादिरूतया, जीवपुद्गलसम्बन्धकालस्य स्तोकत्वात्, 'मीसापरिणया अनंतगुण' त्ति कायादिप्रयोगपरिणतेभ्यः सकाशान्मिश्रकपरिणता अनन्तगुणाः, यतः प्रयोगकृतमाकारमपरित्यजन्तो विश्रसया ये परिणामान्तरमुपागता मुक्तकडेवराद्यवयवरूपास्तेऽनन्तानन्ताः, विश्रसापरिणतास्तु तेभ्योऽप्यनन्तगुणाः, परमाण्वादीनां जीवाग्रहणप्रायोग्याणामप्यनन्तत्वादिति ॥

शतकं-८ उद्देशकः-१ समाप्तः

## —: शतकं-८ उद्देशकः-२ :—

**वृ.** प्रथमे पुद्गलपरिणाम उक्तो, द्वितीये तु स एवाशीविषद्वारेणोच्यते इत्येवंसम्बन्धस्यास्यादिसूत्रम्—

**मू. (३८९)** *कतिविहा णं भंते ! आसीविसा पन्नत्ता ?, गोयमा ! दुविहा आसीविसा पन्नत्ता, तंजहा-जातिआसीविसा य कम्मआसीविसा य, जाइआसीविसा णं भंते ! कतिविहा पन्नत्ता ? गोयमा ! चउव्विहा पन्नत्ता, तंजहा-विच्छुयजातिआसीविसे मंडुक्कजातिआसीविसे उरगजातिआसीविसे मणुस्सजातिआसीविसे,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विच्छुयजातिआसीविसस्स णं भंते! केवतिए विसए पन्नत्ते। गोयमा! पभू णं विच्छुयजाति-आसीविसे अद्धभरहप्पमाणमेत्तं बोंदिं विसेणं विसपरिगयं विसट्टमाणं पकरेत्तए, विसए से विसट्टयाए नो चेव णं संपत्तीए करेंसु वा करेंति वा करिस्संति वा १, मंडुक्कजातिआसीविसपुच्छा, गोयमा! पभू णं मंडुक्कजातिआसीविसे भरहप्पमाणमेत्तं बोंदिं विसेणं विसपरिगयं सेसं तं चेव जाव करेस्संति वा २, एवं उरगजातिआसीविसस्सवि नवरं जंबुद्दीवप्पमाणमेत्तं बोंदिं विसेणं विसपरिगयं सेसं तं चेव जाव करेस्संति वा ३, मणुस्सजाति- आसीविसस्सवि एवं चेव नवरं समयखेत्तप्पमाणमेत्तं बोंदिं विसेण विसपरिगयं सेसं तं चेव जाव करेस्संति वा ४।

जइ कम्मआसीविसे किं नेरइयकम्मआसीविसे तिरिक्खजोनियकम्मआसीविसे मणुस्सकम्मआसीविसे देवकम्मासीविसे?, गोयमा! नो नेरइयकम्मासीविसे तिरिक्खजोनिय-कम्मासीविसेवि मणुस्सकम्मा० देवकम्मासी०, जइ तिरिक्खजोनियकम्मासीविसे किं एगिंदिय-तिरिक्खजोनियकम्मसीविसे जावं नो चउरिंदियतिरिक्खजोनियकम्मासीविसे पंचिंदियतिरि-क्खजोनियकम्मासीविसे, जइ पंचिंदियतिरिक्खजोनियजावकम्मासीविसे किं संमुच्छिम पंचेंदियतिरिक्खजोनियजावकम्मासीविसे गब्भवक्कंतिपंचिंदियतिरिक्खजोनियक्मासीविसे?, एवं जहा वेउव्वियसरीरस्स भेदो जाव पज्ञत्तासंखेज्ञवासाउयगब्भवक्कंतियपंचिंदियतिरिक्ख-जोनियकम्मासीविसे नो अपज्ञत्तासंखेज्ञवासाउयजावकम्मसीविसे।

जइ मणुस्सकम्मासीविसे किं संमुच्छि मणुस्सकम्मासीविसे गब्भवक्कंतियमणुस्सकम्मा-सीविसे?, गोयमा! नो संमुच्छिममणुस्सकम्मासीविसे गब्भवक्कंतियमणुस्सकम्मासीविसे एवं जहा वेउव्वियसरीरं जाव पज्ञत्तासंखेज्ञवासाउयकम्मभूमगगब्भवक्कंतियमनूसकम्मासीविसे नो अपज्ञत्ता जाव कम्मसीविसे।

जइ देवकम्मासीविसे किं भवणवासीदेवकम्मासीविसे जाव वेमानियदेवकम्मासीविसे गोयमा! भवणवासीदेवकम्मासीविसे वाणमंतर० जोतिसिय० वेमानियदेवकम्मासीविसे, जइ भवणवासिदेवकम्मासीविसे से किं असुरकुमारभवणवासिदेवकम्मासीविसे जाव थनियकुमार जाव कम्मासीविसे?, गोयमा! असुरकुमारभवणवासिदेवकम्मासीविसेवि जाव थनियकुमार-आसीविसेवि, जइ असुरकुमार जाव कम्मासीविसे किं पज्ञत्त असुरकुमार जाव कम्मासीविसे अपज्ञत्त असुरकुमारभवणवासिकम्मासीविसे? गोयमा! नो पज्ञत्त असुरकुमार जाव कम्मासीविसे अपज्ञत्त असुरकुमार भवणवासिकम्मासीविसे एवं थनियकुमाराणं, जइ वाणमंतरदेवकम्मासीविसे किं पिसायवाणमंतर० एवं सव्वेसिंपि अपजत्तगाणं, जोइसियाणं सव्वेसिं अपज्ञत्तगाणं।

जइ वेमानियदेवकम्मासीविसे किं कप्पोवगवेमानियदेवकम्मसीविसे कप्पातीयेमानिय-देवकम्मासीविसे?, गोयमा! कप्पोवगवेमानियदेवकम्मासीविसे नो कप्पातीयवेमानियदेव जाव कम्मासीविसे, जइ कप्पोवगवेमानियदेवकम्मासीविसे किं सोहम्मकप्पोव० जाव कम्मासीविसे अच्चुयकप्पो वा जाव कम्मासीविसे?, गोयमा! सोहम्मकप्पोवगवेमानियदेवकम्मासीविसेवि जाव सहस्सारकप्पोवगवेमानियदेवकम्मासीविसे, नो आणयकप्पोवग जाव नो अच्चुयकप्पोवग-वेमानियदेव०।

जइ सोहम्मकप्पोवग जाव कम्मासीविसे किं पज्ञत्तसोहम्मकप्पोवगवेमानिय० अप्पज्ञत्तग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सोहम्मग० ?, गोयमा! नो पज्जत्त सोहम्मकप्पोवगवेमानिय० अपज्जत्त सोहम्ववगवेमानियदेव-कम्मासीविसे, एवं जाव नो पज्जत्तासहस्सारकप्पोवगवेमानिय जाव कम्मासीविसे, अपज्जत्त सहस्सार- कप्पोवगजावकम्मासीविसे ॥*

**वृ.** 'कइविहे'त्यादि, 'आसिवस'त्ति आशीविषाः दंष्ट्राविषाः 'जाइआसीविस'त्ति जात्या-जन्मनाऽऽशीविषाजात्याशीविषाः 'कम्मआसीव्वि'त्ति कर्म्मणा-क्रियया शापादिनोपघात-करणेनाशीविषाः कर्माशीविषाः, तत्र पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च कर्माशीविष पर्याप्तका एव, एते हि तपश्चरणानुष्ठानतोऽन्यतो चा गुणतः खल्वाशीविषा भवन्ति, शापप्रदानेनैव व्यापाद-यन्तीत्यथ एते चाशीविषलब्धिस्वभावात् सहस्रारान्तदेवेष्वेवोत्पद्यन्ते, देवास्त्वेत एव ये देवत्वेनोत्प-न्नास्तेऽपर्याप्तकावस्थायामनुस्तभवतया कर्म्माशीविषा इति, उक्तञ्च शब्दार्थःभेदसम्भवादि भाष्यकारेण–

॥ १ ॥ "आसीदाढा तग्गयमहाविसाऽऽसीवित्त दुविहभेया ।
ते कम्मजाइभेएण नेगहा चउविहविगप्पा ॥"

'केवइए'त्ति कियान् 'विसए'त्ति गोचरो विषयस्तेति गम्यम् 'अद्धभरहप्पमाणमेत्तं'ति अर्द्धभरतस्य यत् प्रमाणं-सातिरेकत्रिषष्ट्यधिकयोजनशतद्वयलक्षणं तदेव मात्रा-प्रमाणं यस्याः सा तथा तां 'बोंदिं'त तनुं 'विसेणं'ति विषेण स्वकीयाशीप्रभवेण करणभूतेन 'विसपरिगयं'ति विषं भावप्रधानत्वान्निर्देशस्य विषतां परिगता-प्राप्ता विषपरिगताऽतस्ताम्, अत एव 'विसट्टमाणिं'ति विकसन्तीं-विदलन्ती 'करेत्तए'त्ति कर्त्तुं 'विसए से'त्ति गोचरोऽसौ, अथवा 'से' तस्य वृश्चिकस्य 'विसट्ठयाए'त्ति विषमेवार्थो विषाष्टनसद्भावस्तत्ता तस्या विषार्थःतायाः-विषत्वस्य तस्यां वा 'नो नैवेत्यर्थः 'संपत्तीए''त्ति संपत्त्या एवंविधबोन्दिसंप्राप्तिद्वारेण 'करिंसु'त्ति अकार्षुर्वृश्चिका इति गम्यते, इह चैकवचनप्रक्रमेऽपि बहुवचननिर्देशो वृश्चिकाशीविषाणां बहुत्वज्ञापनर्थम्, एवं कुर्व्वन्ति करिष्यन्तीत्यपि, त्रिकालनिर्देशश्चामीषां त्रैकालिकत्वज्ञापनार्थः, 'समयक्खेत्त'त्ति 'समयक्षेत्रं' मनुष्यक्षेत्रम् ।

'एवं जहावेउव्वियसरीरस्स भेउ'त्ति यथा वैक्रियं भणता जीवभेदो भनितस्तथेहापि वाच्योऽसावित्यर्थः, स-'गोयमा! नो संमुच्छिमपंचिंदियतिरिक्खजोनियकम्मासी विसे गब्भवक्कंति-यपंचिंदियतिरिक्खजोनियकम्मासीविसे, गब्भवक्कंतियपंचिंदियतिरिक्ख जोनियकम्मासीविसे किं संखेज्जवासाउयगब्भवक्कंतिय पंचिंदियतिरिक्खजोनियकम्मासविसे असंखेज्जवासाउय जाव कम्मासीविसे ?, गोयमा! संखेज्जवासाउय जाव कम्मासीविसे नो असंखेज्जवासाउय जाव कम्मा-सीविसे, जइ संखेज्ज जाव कम्मासीविसे किं पज्जत्तसंखेज्ज जाव कम्मासीविसे अपज्जत्तसंखेज्ज जाव कम्मासीविसे ?, गोयमा!' शेषं लिखितमेवास्ति ॥

एतच्चोक्तं वस्तु अज्ञानो न जानाति, ज्ञान्यपि कश्चिद्दश वस्तूनि कथञ्चिन्न जानातीति दर्शयन्नाह–

***मू. (३९०)** दस ठाणाइं छउमत्थे सव्वभावेणं न जाणइ न पासइ, तंजहा-धम्मत्थिकायं १ अधम्मत्थिकायं २ आगासत्थिकायं जीवं असरीरपडिबद्धं ४ परमाणुपोग्गलं ५ सद्दं ६ गंधं ७ वातं ८ अयं जिणे भविस्सइ वान वा भविस्सइ ९ अयं सव्वदुक्खाण अंतं करेस्सति वा न वा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*करेस्सइ १० ।*

*एयानि चेव उप्पन्ननाणदंसणधरे अरहा जिणे केवली सव्वभावेणं जाणइ पासइ, तंजहा-धम्मत्थिकायं जाव करेस्संति वा न वा करेस्संति ।*

**वृ.** 'दसे'त्यादि, 'स्थानानि' वस्तूनि गुणपर्यायाश्रितत्वात, छद्मस्थ इहावध्याद्यतिशयविकलो गृह्यते, अन्यथाऽमूर्त्तत्वेन धर्मास्तिकायादीनजानन्नपि परमाण्वादि जानात्येवासौ, मूर्त्तत्वात्तस्य, समस्तमूर्त्तविषयत्वाच्चावधिविशेषस्य ।

अथ सर्वभावेनेत्युक्तं ततश्च तत् कथञ्चिज्ञानन्नप्यनन्तपर्यायितया न जानातीति, सत्यं, केवलमेवं दशेति सङ्ख्यानियमो व्यर्थः स्यात्, घटादीनां सुबहूनामर्थानामकेवलिना सर्वपर्यायतया ज्ञातुमशक्यत्वात्, सर्वभावेन च साक्षात्कारेण-चक्षुप्रत्यक्षेणेति हृदयं, श्रुतज्ञानादिना त्वसाक्षात्कारेण जानात्यपि ।

'जीवं असरीरपडिबद्धं'ति देहविमुक्तं सिद्धमित्यर्थः, 'परमाणुपुग्गलं'ति परमाणुश्चासौ पुद्गलश्चेति, उपलक्षणमेतत्तेन द्व्यणुकादिकमपि कश्चिन्न जानातीति, अयमिति-प्रत्यक्षः कोऽपि प्राणी जिनो-वीतरागो भविष्यति न वा भविष्यतीति नवमम् ९ 'अय'मित्यादि च दशमम् ।

उक्तव्यतिरेकमाह-'एयाणी'त्यादि, 'सव्वभावेणं जाणइ'त्ति सर्वभावेन साक्षात्कारेण जानाति केवलज्ञानेनेति हृदयम् ॥ जानातीत्युक्तमतो ज्ञानसूत्रम्—

**मू. (३९१)** *कतिविहे णं भंते ! नाणे पन्नत्ते ?, गोयमा ! पंचविहे नाणे पन्नत्ते, तंजहा-आभिनिबोहियनाणे सुयनाणे ओहिनाणे मणपज्जवनाणे केवलनाणे ।*

*से किं तं आभिनिबोहियनाणे ?, आभिनिबोहियनाणे चउव्विहे पन्नत्ते, तंजहा-उग्गहो ईहा अवाओ धारणा, एवं जहा रायप्पसेणइए नाणाणं भेदो तहेव इहवि भानियव्वो जाव सेत्तं केवलनाणे ।*

*अन्नाणे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! तिविहे पन्नत्ते, तंजहा मइअन्नाणे सुयअन्नाणे विभंगन्नाणे ।*

*से किं तं मइअन्नाणे ?, २ चउव्विहे पन्नत्ते, तंजहा-उग्गहो जाव धारणा । से किं तं उग्गहे १ दुविहे पन्नत्ते तंजहा-अत्थोग्गहे य वंजणोग्गहे य, एवं जहेव आभिनिबोहियनाणं तहेव, नवरं एगट्ठियवज्जं जाव नोइंदियधारणा, सेत्तं धारणा, सेत्तं मइअन्नाणे ।*

*से किं तं सुयअन्नाणे ?, २ जं इमं अन्नानिएहिं मिच्छद्दिट्ठिएहिं जहा नंदीए जाव चत्तारि वेदा संवोवंगा, सेत्तं सुयअन्नाणे ।*

*से किं तं विभंगनाणे ?, २ अनेगविहे पन्नत्ते तंजहा-गामसंठिए नगरसंठिए जाव संनिवेससंठिए दीवसंठिए समुद्दसंठिए वाससंठिए वासहरसंठिए पव्वयसंठिए रुक्खसंठिए थूभसंठए हयसंठिए गयसंठिए नरसंठिए किंनरसंठिए किंपुरिसंठिए महारगगंधव्वसंठिए उसभसंठिए पसुपसयविहगवानरणाणासंठाणसंठिए पन्नत्ते ।*

*जीवा णं भंते ! किं नाणी अन्नाणी ?, गोयमा ! जीवा नाणीवि अन्नाणीवि, जे नाणी ते अत्थेगतिया दुन्नाणी अत्थेगतिया तिन्नाणी अत्थेगतिया चउनाणी अत्थेगतिया एगनाणी जे दुन्नाणी ते आभिनिबोहियनाणी य सुयनाणी य जे तिन्नाणी ते आभिनिबोहियनाणी सुयनाणी ओहिनाणी*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अहवा आभिनिबोहियनाणी सुयनाणी मणपज्जवनाणी जे चउनाणी ते आभिनिबोहियनाणी सुयनाणी ओहिनाणी मणपज्जवनाणी जे एगनाणी नियणा केवलनाणी, जे अन्नाणी ते अत्थेगतिया दुअन्नाणी अत्थेगतिया तिअन्नाणी जे दुअन्नाणी ते मइअन्नाणी य सुयअन्नाणी य जे तियअन्नाणी ते मइअन्नाणी सुयअन्नाणी विभंगनाणी।*

*नेरइया णं भंते! किं नाणी अन्नाणी?, गोयमा! नानिवि अन्नाणीवि, जे नाणी ते नियमा तिन्नाणी, तंजहा-आभिनिबोहि० सुयना० ओहिना० जे अन्नाणी ते अत्थेगतिया दुअन्नाणी अत्थेगतिया तिअन्नाणी, एवं तिन्नि अन्नाणानि भयणाए।*

*असुरकुमारा णं भंते! किं नाणी अन्नाणी?, जहेव नेरइया तहेव तिन्नि नाणानि नियमा, तिन्नि अन्नाणानि भयणाए, एवं जाव थनियकु०। पुढविक्काइया णं भंते! किं नाणी अन्नाणी?, गोयमा! नो नाणी अन्नाणी, जे अन्नाणी ते नियमा दुअन्नाणी-मइअन्नाणी य सुयअन्ना०, एवं जाव वणस्सइका०।*

*बेइंदियाणं पुच्छा, गोयमा! नाणीवि अन्नाणीवि, जे नाणी ते नियमा दुन्नाणी, तंजहा-आभिनिबोहियनाणी य सुयनाणी य, जे अन्नाणी ते नियमा दुअन्नाणी आभिनिबोहियअन्नाणी सुयअन्नाणी, एवं तेइंदियचउरिंदियावि, पंचिंदियतिरिक्खजो० पुच्छा, गोयमा! नाणीवि अन्नाणीवि, जे नाणी ते अत्थे० दुन्नाणी अत्थे० तिन्ना० एवं तिन्नि नाणानि तिन्नि अन्नाणानि य भयणाए।*

*मणुस्सा जहा जीवा तहेव पंच नाणानि तिन्नि अन्नाणानि भयणाए। वाणमंत० जहा ने० जोइसियवेमानियणं तिन्नि नाणा तिन्नि अन्नाणा नियमा। सिद्धा णं भंते! पुच्छा, गोयमा! नाणी नो अन्नाणी, नियमा एगनाणी केवलनाणी।*

**वृ.** तत्र च 'आभिनिबोहियनाणे' त्ति अर्थाभिमुखोऽविपर्ययरूपत्वात् नियतोऽसंशयरूपत्वाद्बोधः-संवेदनमभिनिबोधः स एव स्वार्थिःकेकप्रत्ययोपादानादाभिनिबोधिकं, ज्ञातिर्ज्ञायते वाऽनेनेति ज्ञानम्, आभिनिबोधिकं च तज्ज्ञानं चेति आभिनिबोधिकज्ञानम्-इन्द्रियानिन्द्रियनिमित्तो बोध इति।

'सुयनाणे' त्ति श्रूयते तदिति श्रुतं-शब्दः स एव ज्ञानं भावश्रुतकारणत्वात् कारणे कार्योपचारात् श्रुतज्ञानं, श्रुताद्वा-शब्दात् ज्ञानं श्रुतज्ञानम्-इन्द्रियमनोनिमित्तः श्रुतग्रन्थानुसारी बोध इति।

'ओहिनाणे' त्ति अवधीयते-अधोऽधो विस्तृतं वस्तु परिच्छिद्यतेऽनेनेत्यवधि स एव ज्ञानम् अवधिना वा-मर्यादया मूर्त्तद्रव्याण्येव जानाति नेतराणीति व्यवस्थया ज्ञानमवधिज्ञानं।

'मनपज्जवणाणे' त्ति मनसोमन्यमानमनोद्रव्याणां पर्यवः-परिच्छेदो मनःपर्ययः स एव ज्ञानं मनःपर्यवज्ञानं मनःपर्यायाणां वा-तदवस्थाविशेषाणां ज्ञानं मनःपर्यायज्ञानम्।

'केवलनाणे' त्ति केवलमेकं मत्यादिज्ञाननिरपेक्षत्वात् शुद्धं वा आवरणमलकलङ्करहितत्वात् सकलं वा-तत्प्रथमतयैवाशेषतदावरणाभावतः सम्पूर्णोत्पत्तेः असाधारणं वाऽनन्यसदृशत्वात् अनन्तं वा ज्ञेयानन्तत्वात् यथाथऽवस्थिताशेषभूतभवद्भाविभावस्वभावावभासीति भावना तच्च तत् ज्ञानं चेति केवलज्ञानम्।

'उग्गहो' त्ति सामान्यार्थःस्य-अशेषविशेषनिरपेक्षस्यानिरदेश्यस्य रूपादे-अव इति-प्रथमतो ग्रहणं-परिच्छेदनमवग्रहः 'ईह' त्ति सदर्थःविशेषालोचनमीहा 'अवाओ' त्ति प्रक्रान्तार्थःविनिश्चयोऽवायः 'धारणे' ति अवगतार्थःविशेषधरणं धारणा 'एवं जहे' त्यादि, 'एवम्' उक्तक्रमेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा राजप्रश्नकृते द्वितीयोपाङ्गे ज्ञानानां भेदो भनितस्तथैवेहापि भनितव्यः, स चैवम्

'से किं तं उग्गहे ?, उग्गहे दुविहे पन्नत्ते, तंजहा-अत्थोग्गहे य वंजणोग्गहे य' इत्यादिरिति, यच्च वाचनान्तरे श्रुतज्ञानाधिकारे यथा नन्द्यामङ्गप्ररूपणेत्यभिधाय 'जाव भवियअभविया तत्तो सिद्धा असिद्धा ये' त्युक्तं तस्यायमर्थः-श्रुतज्ञानसूत्रावसाने किल नन्द्यां श्रुतविषयं दर्शयतेदमभिहितम्-'इच्चेयंमि दुवालसंगे गनिपिड अनंता भावा अनंता अभावा जाव अनंता भवसिद्धिया अनंता अभवसिद्धिया अनंता सिद्धा अनंता असिद्धा पन्नत्ते' ति, अस्य च सूत्रस्य या सङ्ग्रहगाथा-

॥ १ ॥ "भावमभावा हेऊमहेउ कारणमकारणा जीवा ।
अज्जीव भविया ऽभविया तत्तो सिद्धा असिद्धा य ॥"

इत्येवंरूपा तस्याः खण्डमिदमेतदन्तं श्रुतज्ञानसूत्रमिहाध्येयमिति ॥ ज्ञानविपर्ययस्त्वज्ञानमिति तत्सूत्रम्-तत्रच 'अन्नाणे' त्ति नञः कुत्सार्थःत्वात् कुत्सितं ज्ञानमज्ञानं, कुत्सितत्वं च मिथ्यात्वसंवलितत्वात्, उक्तश्च-

॥ १ ॥ "अविसेसिया मइच्चिय सम्मद्दिट्ठिस्स सा मइन्नाणं ।
मइअन्नाणं मिच्छद्दिट्ठिस्स सुयंपि एमेव ॥"

'विभंगनाणे' त्ति विरुद्धा भङ्गा-वस्तुविकल्पा यस्मिंस्तद्विभङ्ग तच्च तज्ज्ञानं च अथवा विरूपो भङ्गः-अवधिभेदो विभङ्गः स चासौ ज्ञानं चेति विभङ्गज्ञानम्, इह च कुत्सा विभङ्गशब्देनैव गमितेति न ज्ञानशब्दो नञा विशेषितः ।

'अत्थोग्गहे य' त्ति अर्थ्यत इत्यर्थःस्तस्यावग्रहः अर्थावग्रहः-सकलविशेषनिरपेक्षानिर्देश्यार्थःग्रहणमेकसामयिकमिति भावार्थः, 'वंजणोग्गहे य' त्ति व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं तच्चोपकरणेन्द्रियं शब्दादिपरणतद्रव्यसङ्घातो वा, ततश्च व्यञ्जनेन-उपकरणेन्द्रियेण व्यञ्जनानांवा-शब्दादिपरिणतद्रव्याणाभवग्रहो व्यञ्जनावग्रहः, अत्रार्थावग्रहस्य सुलक्ष्यत्वात् सकलेन्द्रियारथव्यापकत्वाच्च प्रथममुपन्यासः, 'एवं जेहेव' त्यादि, यथैवाभिनिबोधिकज्ञानमधीतं तथैव मत्यज्ञानमप्यध्येयं, तच्चैवम्- ।

'से किं तं वंजणोग्गहे ?, २ चउव्विहे पन्नत्ते, तंजहा-सोइंदियवंजणोग्गहे धाणिंदियवंजणोग्गहे जिब्भिंदियवंजणोग्गहे फासिंदियवंजणोग्गहे' इत्यादि, यश्चेह विशेषस्तमाह-'नवरं एगट्ठियवज्जं ति इहाभिनिबोधिकज्ञाने' 'उग्गिण्हणया अवधारणया सवणया अवलंबणया मेहे' त्यादीनि पञ्च पञ्चैकार्थिःकान्यवग्रहादीनामधीतानि, मत्यज्ञाने तु न तान्यध्येयानीति भावः, 'जाव नोइंदियधारण' त्ति इदमन्त्यपदं यावदित्यर्थः ।

'जं इमं अन्नानिएहिं' ति यदिदम् 'अज्ञानिकैः' निर्ज्ञानिः, तत्राल्पज्ञानभावादधनवदशीलवद्वा सम्यग्दृष्टयोऽप्यज्ञानिकाः प्रोच्यन्तेऽत एवाह-मिथ्यादृष्टिभिः, 'जहा नंदीए' त्ति, तत्रैवमेतत्सूत्रम्-'सच्छंदबुद्धिमइविगप्पियं तंजहा-भारहं रामायण' मित्यादि, तत्रावग्रहेहे बुद्धिः अवायधारणे च मतिः, स्वच्छन्देन-स्वाभिप्रायेण तत्त्वतः सर्वज्ञप्रणीतार्थानुसारमन्तरेण बुद्धिमतिभ्यां विकल्पितं स्वच्छन्दबुद्धिमतिविकल्पितं-स्वबुद्धिकल्पनाशिल्पनिर्मितमित्यर्थः 'चत्तारि य वेय' त्ति नाम ऋक् यजुः अथर्वा चेति 'संगोवंग' त्ति इहाङ्गानि-शिक्षादीनि षट् उपाङ्गानि च-तद्व्याख्यानरूपानि 'गामसंठिए' त्ति ग्रामालम्बनत्वाद् ग्रामाकारम्, एवमन्यान्यपि, नवरं 'वाससंठिए' त्ति भरतादिवर्षा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारं 'वासहरसंठिए' त्ति हिमवदादिवर्षधरपर्वताकारं 'हयसंठिए' अश्वाकारं, 'पसय' त्ति पसय-संठिए, तत्र पसयः-आटव्यो द्विखुरश्चतुष्पदविशेषः, एवं च नानाविधसंस्थानसंस्थितमिति ।

अनन्तरं ज्ञानान्यज्ञानानि चोक्तानि, अथ ज्ञानिनोऽज्ञानिनश्च निरूपयन्नाह- 'जीवा णं भंते' इत्यादि, इह च नारकाधिकारे 'जे नाणी ते नियमा तिन्नाणी' त्ति सम्यग्दृष्टिनारकाणां भवप्रत्ययमवधिज्ञानमस्तीतिकृत्वा ते नियमात्रिज्ञानिनः, 'जे अन्नाणे अत्थेगतिया दुअन्नाणी अत्थेगतिया तिअन्नाणी' ति, कथम् ?, उच्यते, असञ्ज्ञिनः सन्तो ये नारकेषूत्पद्यन्ते तेषामपर्याप्तकावस्थायां विभङ्गाभावाद्यमेवाज्ञानद्वयमिति ते द्वयज्ञानिनः ये तु मिथ्यादृष्टिसञ्ज्ञिभ्य उत्पद्यन्त तेषां भवप्रत्ययो भवप्रत्ययो विभङ्गो भवतीति ते त्र्यज्ञानिनः ।

एतदेव निगमनयन्नाह 'एवं तिन्नि अन्नाणानि भयणाए' त्ति । 'बेइंदियाण' मित्यादि, द्वीन्द्रियाः केचित् ज्ञानिनोऽपि सास्वादनसम्यगदर्शनभावेनापर्याप्तकावस्थायां भवन्तीत्यत उच्यते 'नाणीवि अन्नाणीवि' त्ति ।

अनन्तरं जीवादिषु षड्विंशतिपदेषु ज्ञान्यज्ञानिनश्चिन्तिताः, अथ तान्येव गतीन्द्रिय-कायादिद्वारेष चिन्तयन्नाह–

**मू. (३९२)** *निरयगइया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि, तिन्नि नाणाइं नियमा तिन्नि अन्नाणाइं भयणाए । तिरियगइया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! दो नाणा दो अन्नाणा नियमा । मणुस्सगइया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! तिन्नि नाणाइं भयणाए दो अन्नाणाइं नियमा, देवगतिया जहा निरयगतिय सद्धगतिया णं भंते ! जहा सिद्धा ।*

*सइंदियाणं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! चत्तारि नाणाइं तिन्नि अन्नाणाइं भयणाए । एगिंदिया णं भंते ! जीवा किं नाणी० ?, जहा पुढविकाइया बेइंदियतेइंदिचउरिंदियाणं दो नाणा दो अन्नाणा वा नियमा । पंचिंदिया जहा सइंदिया । अनिंदिया णं भंते ! जीवा किं नाणी० ?, जहा सिद्धा ।*

*सकाइया णं भंते ! जीवा किं नाणी अन्नाणी?, गोयमा ! पंच नाणाणी तिन्नि अन्नाणाइं भयणाए । पुढविकाइया जाव वणस्सइकाइया नो नाणी अन्नाणी नियमा दुअन्नाणी, तंजहा-मतिन्नाणी य सुयअन्नाणी य, तसकाइया जहा सकाइया । अकाइया णं भंते ! जीवा किं नाणी० जहा सिद्धा ३ ।। सुहुमा णं भंते ! जीवा किं नाणी० ? जहा पुढविकाइया । बादरा णं भंते ! जीवा किं नाणी० ? जहा सकद्धवा । नोसुहुमानोबादरा णं भंते ! जीवा० जहा सिद्धा ४ ।।*

*पज्जत्ता णं भंते ! जीवा किं नाणी० ?, जहा सकाइया । पज्जत्ता णं भंते ! नेरइया किं नाणी० ?, तिन्नि नाणा तिन्नि अन्नाणा नियमा जहा नेरइए एवं जाव थनियकुमारा । पुढविकाइया जहा एगिंदिया, एवं जाव चउरिंदिया । पज्जत्ता णं भंते ! पंचिंदियतिरेक्खजोनिया किं नाणी अन्नाणी ?, तिन्नि नाणा तिन्नि अन्नाणा भयणाए । मणुस्सा जहा सकाइया । वाणमंतरा जोइसिया वेमानिया जहा नेरइया ।*

*अपज्जत्ता णं भंते ! जीवा किं नाणी० २ ?, तिन्नि नाणा तिन्नि अन्नाणा भयणाए । अपज्जत्ता णं भंते ! नेरतिया किं नाणी अन्नाणी ?, तिन्नि नाणा नियमा तिन्नि अन्नणा भयणाए, एवं जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*थणियकुमारा। पुढविक्काइया जाव वणस्सइकाइया जहा एगिंदिया। बेंदियाण पुच्छा, दो नाणा दो अन्नाणा नियमा, एवं जाव पंचिंदियतिरिक्खजोनियाणं । अपज्जत्तगा णं भंते ! मणुस्सा किं नाणी अन्नाणी ?, तिन्नि नाणाइं भयणाए दो अन्नाणाइं नियमा, वाणमंतरा जहा नेरइया, अप्पजत्तगा जोइसियवेमानिया णं तिन्नि नाणा तिन्नि अन्नाणा नियमा। नो पज्जत्तगा नो अपज्जत्तगा णं भंते ! जीवा किं नाणी० ?, जहा सिद्धा ५।*

*निरयभवत्था णं भंते ! जीवा किं नाणी अन्नाणी ?, जहा निरयगतिंया। तिरियभवत्था णं भंते ! जीवा किं नाणी अन्नाणी ?, तिन्नि नाणा तिन्नि अन्नाणा भयणाए। मणुस्सभवत्या णं० जहा सकाइया। देवभवत्था णं भंते ! जहा निरयभवत्था। अभवत्था जहा सिद्धा।*

*भवसिद्धिया णं भंते ! जीवा किं नाणी० ?, जहा सकाइया, अभवसिद्धियाणं पुच्छा, गोयमा ! नो नाणी अन्नाणी तिन्नि अन्नाणाइं भयणाए। नोभवसिद्धियानो अभवसिद्धिया णं भंते जीवा० जहा सिद्धाधा ७।*

*सन्नीणं पुच्छा जहा सइंदिया, असन्नी जहा बेइंदिया, नोसन्नीनोअसन्नी जहा सिद्धा ८ ॥*

**वृ.** 'निरयगइया णं'मित्यादि, गत्यादिद्वारानि चैतानि—

॥१॥ "गइइंदिए य काए सुहमे पज्जत्तए भवत्थे य।
भवसिद्धिए य सन्नी लद्धी उवओग जोगे य ॥
॥२॥ लेसा कसाय वेए आहारे नाणगोयरे काले।
अंतर अप्पबहुयं च पज्जवा चेह दाराइं ॥"

तत्र च निरये गति-गमनं येषां ते निरयगतिकास्तेषाम्, इह च सम्यग्दृष्टयो मिथ्यादृष्टो वा ज्ञानिनोऽज्ञानिनो वा ये पञ्चेन्द्रियतिर्यग्मनुष्येभ्यो नरके उत्पत्तुकामा अन्तरगती वर्त्तन्ते ते निरयगतिका विवक्षिताः, एतत्प्रयोजनत्वाद्गतिग्रहणस्येति, 'तिन्नि नाणाइं नियम' त्ति अवधेर्भवप्रत्ययत्वेनान्तरगतावपि भावात् 'तिन्नि अन्नाणाइं भयणाए' त्ति असञ्ज्ञिनां नरके गच्छतां द्वे अज्ञाने अपर्याप्तकत्वे विभङ्गस्याभावात् सञ्ज्ञिनां तु मिथ्यादृष्टीनां त्रीण्यज्ञानानि भवप्रत्ययविभङ्गस्य सद्भावाद् अतस्त्रीण्यज्ञानानि भजनयेत्युच्यत इति।

'तिरियगइया णं'ति तिर्यक्षु गतिः-गमनं येषां ते तिर्यग्गतिकास्तेषां तदपान्तरालवर्त्तिनां 'दो नाण'त्ति सम्यग्दृष्टयो ह्यवधिज्ञाने प्रपतिते एव तिर्यक्षु गच्छन्ति तेन तेषां द्वे एव ज्ञाने 'दो अन्नाणे'त्ति मिथ्यादृष्टयोऽपि हि विभङ्गज्ञाने प्रतिपतिते एव तिर्यक्षु गच्छन्ति तेन तेषां द्वे अज्ञाने इति।

'मणुस्सगइया ण'मित्यादौ, 'तिन्नि नाणाइं भयणाए' त्ति मनुष्यगतौ हि गच्छन्तः केचिज्ज्ञानिनोऽवधिना सहैव गच्छन्ति तीर्थङ्करवत् केचिच्च तद्विमुच्य तेषां त्रीनि वा द्वे वा ज्ञाने स्यातामिति, ये पुनरज्ञानिनो मनुष्यगतावुत्पत्तुकामास्तेषां प्रतिपतित एव विभङ्गे तत्रोत्पत्ति स्यादित्यत उक्तं 'दो अन्नाणाइं नियम' त्ति।

'देवगइया जहा निरयगइय'त्ति देवगतौ ये ज्ञानिनो यातुकामास्तेषामवधिर्भवप्रत्ययो देवायुःप्रथमसमय एवोत्पद्यतेऽतस्तेषां नारकाणामिवोच्यते, 'तिन्नि नाणाइं नियम'त्ति, ये त्वज्ञानिनस्तेऽसञ्ज्ञिभ्य उत्पद्यमाना द्व्यज्ञानिनः, अपर्याप्तकत्वे विभङ्गस्याभावात् सञ्ज्ञिभ्य


Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्पद्यमानास्त्वज्ञानिनो भवप्रत्ययविभङ्गस्य सद्भावाद् अतस्तेषां नारकाणाविमोच्यते-'तिन्न अन्नाणाइं भयणाए' त्ति। 'सिद्धिगइया ण' मित्यादि, यथा सिद्धाः केवलज्ञानिन एव एवं सिद्धिगतिका अपि वाच्या इति भावः, यद्यपि च सिद्धाना सिद्धिगतिकानां चान्तरगत्यभावान्न विशेषोऽस्ति तथाऽपीह गतिद्वारबलायातत्वात्त दर्शिताः, एवं द्वारान्तरेष्वपि परस्परान्तर्भावेऽपि तत्तद्विशेषा-पेक्षयाऽपौनरुक्त्यं भावनीयमिति।

अथेन्द्रियद्वारे 'सइंदिये'त्यादि, 'सेन्द्रियाः' इन्द्रियोपयोगवन्तस्ते च ज्ञानिनोऽज्ञानिनश्च, तत्र ज्ञानिनां चत्वारि ज्ञानानि भजनया स्यात् द्वे स्यात् त्रीणी स्याच्चत्वारि, केवलज्ञानं तु नास्ति तेषाम्, अतीन्द्रियज्ञानत्वात्तस्य, द्वयादिभावश्च ज्ञानानां लब्ध्यपेक्षया, उपयोगापेक्षया तु सर्वेषामेक-दैकमेव ज्ञानम्, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैव-स्यात् द्वे स्यात्त्रीणीति, 'जहा पुढविकाइय' त्ति एकेन्द्रिया मिथ्यादृष्टित्वादज्ञानिनस्ते च द्वयज्ञाना एवेत्यर्थः।

'बेइंदिये'त्यादि, एषां द्वे ज्ञाने, सासादनस्तेषूत्पद्यत इतिकृत्वा, सासादनश्चोत्कृष्टतः षडावलिकामानोऽतो द्वे ज्ञाने तेषु लभ्येत इति। 'अनिंदिय' त्ति केवलिनः।

कायद्वारे-'सकाइया ण' मित्यादि, सह कायेन-औदारिकादिना शरीरेण पृथिव्यादिषट्काया-न्यतरेण वा कायेन ये ते सकायास्त एव सकायिकाः, ते च केवलिनोऽपि स्युरिति सकायिकानां सम्यग्दृशां पञ्च ज्ञानानि मिथ्यादृशां तु त्रीण्यज्ञानानि भजनया स्युरिति। 'अकाइया णं' ति नास्ति कायः-उक्तलक्षणो येषां तेऽकायास्त एवाकायिकाः सिद्धाः।

सूक्ष्मद्वारे-'जहा पुढविकाइय' त्ति द्वयज्ञानिनः सूक्ष्मा मिथ्यादृष्टित्वादित्यर्थः 'जहा सकाइय' त्ति बादराः केवलिनोऽपि भवन्तीतिकृत्वा ते सकायिकवद्भजनया पञ्चज्ञानिनस्त्रयज्ञानि-नश्च वाच्या इति।

पर्याप्तकद्वारे-'जहा सकाइय' त्ति पर्याप्तकाः केवलिनोऽपि स्युरिति ते सकायिकवत्पूर्वोक्त-प्रकारेण वाच्याः। पर्याप्तकद्वार एव चतुर्विंशतिदण्डके पर्याप्तनारकाणां 'तिन्नि अन्नाणा नियम' त्ति अपर्याप्तकानामेवासञ्ज्ञिनारकाणां विभङ्गाभाव इति पर्याप्तकावस्थायां तेषामज्ञानत्रयमेवेति। 'एवं जाव चउरिंदिय' त्ति द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाः पर्याप्तका द्वयज्ञानिन एवेत्यर्थः।

'पज्जत्ता णं भंते ! पंचिंदियतिरिक्खे'त्यादि, पर्याप्तकपञ्चेन्द्रियतिरश्चामवधिर्विभङ्गो वा केषाञ्चित्स्यात्केषाञ्चित्पुनर्नेति त्रीनि ज्ञानान्यज्ञानानि वा द्वे वा ज्ञाने अज्ञाने वा तेषां स्यातामिति। 'बेइंदियाणं दो नाणे'त्यादि, अपर्याप्तकद्वीन्द्रियादीनां केषाञ्चित्सासादनसम्यग्दर्शनस्य सद्भावाद् द्वे ज्ञाने केषाञ्चित्पुनस्तस्यासद्भावाद्द्वे एवाज्ञाने। अपर्याप्तकमनुष्याणां पुनः सम्यग्दृशामवधिभावे त्रीनि ज्ञानानि यथा तीर्थंकराणां, तदभावे तु द्वे ज्ञाने, मिथ्यादृशां तु द्वे एवाज्ञाने, विभङ्गस्यापर्याप्तकत्वे तेषामभावात्, अत एवोक्तं 'तिन्नि नाणाइं भयणाए दो अन्नाणाइं नियम' त्ति।

'वाणमंतरे'त्यादि, व्यन्तरा अपर्याप्तका नारका इव त्रिज्ञाना द्वयज्ञानास्त्र्यज्ञाना वा वाच्याः, तेष्वप्यसञ्ज्ञिभ्य उत्पद्यमानानामपर्याप्तकानां विभङ्गाभावात् शेषाणां चावधेर्विभङ्गस्य वा भावात्

'जोइसिए'त्यादि, एतेषु हि सञ्ज्ञिभ्य एवोत्पद्यन्ते, तेषां चापर्याप्तकत्वेऽपि भवप्रत्यय-स्यावधेर्विभङ्गस्य चावश्यम्भावात् त्रीनि ज्ञानान्यज्ञानानि वा स्युरिति। 'नोपज्जत्तगनोअपज्जत्तग' त्ति सिद्धाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवस्थद्वारे-'निरयभवत्था ण'मित्यादि, निरयभवे तिष्ठन्तीति निरयभवस्थाःप्राप्तोत्पत्तिस्थानाः, ते च यथा निरयगतिकास्त्रिज्ञाना द्वयज्ञानास्त्र्यज्ञानाश्चोक्तास्तथा वाच्या इति।

भवसिद्धिकद्वारे-'जहा सकाइय'त्ति भवसिद्धिकाः केवलिनोऽपीति ते सकायिकद्भजनया पञ्चज्ञानाः तथा यावत्सम्यक्त्वं न प्रतिपन्नास्तावद्भजनयैव त्र्यज्ञानाश्च वाच्या इति। अभवसिद्धिकानां त्वज्ञानत्रयं भजनया स्यात् सदा मिथ्यादृष्टित्वात्तेषामत उक्तं 'नो नाणी अन्नाणी'त्यादीति

सञ्ज्ञिद्वारे-'जहा सइंदिय'त्ति ज्ञानानि चत्वारि भजनया अज्ञानानि च त्रीनि तथैवेत्यर्थः 'असन्नी जहा बेइंदिय'त्ति अपर्याप्तकावस्थायां ज्ञानद्वयमपि सासादनतया स्यात्, पर्याप्तकावस्थायां त्वज्ञानद्वयमेवेत्यर्थः। लब्धिद्वारे लब्धिभेदान् दर्शयन्नाह–

**मू. (३९३)** *कइविहा णं भंते! लद्धी पन्नत्ता?, गोयमा! दसविहा लद्धी पन्नत्ता, तंजहा-नाणलद्धी १ दंसणलद्धी २ चरित्तलद्धी ३ चरित्ताचरित्तलद्धी ४ दानलद्धी ५ लाभलद्धी ६ भोगलद्धी ७ उवभोगलद्धी ८ वीरियलद्धी ९ इंदियलद्धी १०।*

*नाणलद्धी णं भंते! कइविहा पन्नत्ता?, गोयमा! पंचविहा पन्नत्ता, तंजहा-आभिनिबोहियनाणलद्धी जाव केवलनाणलद्धी।*

*अन्नाणलद्धी णं भंते! कतिविहा पन्नत्ता?, गोयमा! तिविहा पन्नत्ता, तंजहा-मइअन्नाणलद्धी सुयअन्नाणलद्धी विभंगनाणलद्धी।*

*दंसणलद्धी णं भंते! कतिविहा पन्नत्ता?, गोयमा! तिविहा पन्नत्ता, तंजहा-सम्मद्दंसणलद्धी मिच्छादंसणलद्धी सम्मामिच्छादंसणलद्धी।*

*चरित्तलद्धी णं भंते! कतिविहा पन्नत्ता?, गोयमा! पंचविहा पन्नत्ता, तंजहा-सामाइयचरित्तलद्धी छेदोवट्ठावनियलद्धी परिहारविसुद्धलद्धी सुहुमसंपरागलद्धी अहक्खायचरित्तलद्धी चरित्ताचरित्तलद्धी णं भंते! कतिविहा पन्नत्ता?, गोयमा! एगागारा पन्नत्ता, एवं जाव उवभोगलद्दी एगागारा पन्नत्ता।*

*वीरीयलद्धी णं भंते! कतिविहा पन्नत्ता?, गोयमा! तिविहा पन्नत्ता, तंजहा-बालवीरियलद्धी पंडियवीरियलद्धी बालपंडियवीरियलद्धी। इंदियलद्धी णं भंते! कतिविहा पन्नत्ता?, गोयमा! पंचविहा पन्नत्ता, तंजहा सोइंदियलद्धी जाव फासिंदियलद्धी।*

*नाणलद्धिया णं भंते! जीवा किं नाणी अन्नाणी?, गोयमा! नाणी नो अन्नाणी, अत्थेगतिया दुन्नाणी, एवं पंच नाणाइं भयणाए। तस्स अलद्धीया णं भंते! जीवा किं नाणी अन्नाणी?, गोयमा नो नाणी अन्नाणी, अत्थेगतिया दुअन्नाणी तिन्नि अन्नाणानि भयणाए। आभिनिबोहियनाणलद्धिया णं भंते! जीवा किं नाणी अन्नाणी?, गोयमा! नाणी नो अन्नाणी, अत्थेगतिया दुन्नाणी चत्तारि नाणाइं भयणाए।*

*तस्स अलद्धिया णं भंते! जीवा किं नाणी अन्नाणी?, गोयमा! नाणीवि अन्नाणीवि, जे नाणी ते नियमा एगनाणी केवलनाणी, जे अन्नाणी ते अत्थेगइया दुअन्नाणी तिन्नि अन्नाणाइं भयणाए। एवं सुयनाणलद्धीयावि, तस्स अलद्धीयावि जहा आभिनिबोहियनाणस्स लद्धीया। ओहिनाणलद्धीया णं पुच्छा, गोयमा! नाणी नो अन्नाणी, अत्थेगतिया तिन्नाणी अत्थेगतिया चउनाणी, जे तिन्नानि ते आभिनिबोहियनाणी सुयनाणी ओहिनाणी, जे चउनाणी ते*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आभिनिबोहियनाणी सुय० ओहि० मणपज्ञवनाणी ।

तस्स अलद्धीया णं भंते ! जीवा किं नाणी०, गोयमा ! नाणीवि अन्नाणीवि । एवं ओहिनाणवज्ञाइं चत्तारि नाणाइं तिन्नि अन्नाणाइं भयणाए । मणपज्ञवनाणलद्धिया णं पुच्छा, गोयमा ! नाणी नो अन्नाणी ।

अत्थेगतिया तिन्नाणी अत्थेगतिया चउनाणी, जे तिन्नाणी ते आभिनिबोहियनाणी सुयनाणी मणपज्ञवणाणी, जे चउनाणी ते आइनिबोहियनाणी सुयनाणी ओहिनाणी मणपज्ञवनाणी, तस्स अलद्धीया णं पुच्छा, गोयमा ! नाणीवि अन्नाणीवि, मणपज्ञवनाणवज्ञाइं चत्तारि णनमाइं, तिन्नि अन्नाणाइं भयणाए । केवलनाणलद्धिया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणी नो अन्नाणी, नियमा एगनाणी केवलनाणी, तस्स अलद्धियाणं पुच्छा, गोयमा ! नाणीवि अन्नानिवि, केवलनाणवज्ञाइं चत्तारि नाणाइं तिन्नि अन्नाणाइं भयणाए ।

अन्नाणलद्धिया णं पुच्छा, गोयमा ! नो नाणी अन्नाणी, तिन्नि अन्नाणाइं भयणाए, तस्स अलद्धियाणं पुच्छा, गोयमा ! नाणी नो अन्नाणी, पंच नाणाइं भयणाए जहा अन्नाणस्स लद्धिया अलद्धिया य भनिया एवं मइअन्नाणस्स सुयअन्नाणस्स य लद्धिया अलद्धिया य भानियव्वा । विभंगनाणलद्धियाणां तिन्नि अन्नाणाइं नियमा, तस्स अलद्धियाणां पंच नाणाइं भयणाए दो अन्नाणाइं नियमा ॥

दंसणलद्धिया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणीवि अन्नाणीवि, पंच नाणाइं तिन्नि अन्नाणाइं भयणाए, तस्स अलद्धिया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा तस्स अलद्धिया नत्थि ।

सम्मद्दंसणलद्धियाणं पंच नाणाइं भयणाए, तस्स अलद्धियाणं तिन्नि अन्नाणाइं भयणाए, मिच्छादंसणलद्धिया णं भंते ! पुच्छा, तिन्नि अन्नाणाइं भयणाए, तस्स अलद्धियाणं पंच नाणाइं तिन्नि य अन्नाणाइं भयणाए, सम्मामिच्छादंसणलद्धिया य अलद्धिया जहा मिच्छादंसणलद्धी अलद्धी तहेव भानियव्वं ॥

चरित्तलद्धिया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! पंचन नाणाइं भयणाए, तस्स अलद्धियाणं मणपज्ञवनाणवज्ञाइं चत्तार नाणाइं तिन्नि य अन्नाणाइं भयणाए, सामाइ-यचरित्तलद्धिया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणी केवलवज्ञाइं चत्तारि नाणाइं भयणाए, तस्स अलद्धियाणं पंच नाणाइं तिन्नि य अन्नाणाइं भयणाए, एवं जहा सामाइय-चरित्तलद्धिया य भनिया एवं जहा जाव अहक्खायचरित्तलद्धिया अलद्धिया य भानियव्वा, नवरं अहक्खायचरित्तलद्धिया पंच नाणाइं भ०, चरित्ताचरित्तलद्धिया णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नाणी नो अन्नाणी, अत्थेगइया दुन्नाणी अत्थेगतिया तिन्नाणी, जे दुन्नाणी ते आभिनिबोहियनाणी य सुयनाणी य, जे तिन्नाणी ते आभि० सुयना० ओहिना०, तस्स अल० पंच नाणाइं तिन्नि अन्नाणाइं भयणाए ४ ।

दानलद्धियणं पंच नाणाइं तिन्नि अन्नाणाइं भयणाए, तस्स अ० पुच्छा, गोयमा ! नाणी नो अन्नाणी, नियमा एगनाणी केवलनाणी । एवं जाव वीरियस्स लद्धी अलद्धी य भानियव्वा ।

बालवीरियलद्धियाणं तिन्नि नाणाइं तिन्नि अन्नाणाइं भयणाए, तस्स अलद्धियाणं पंच

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नाणाइं पंडियवीरियलद्धियाणं पंच नाणाइं भयणाए, तस्स अलद्धियाणं मणपज्जवनाणवज्जाइं नाणाइं अन्नाणानि तिन्नि य भयणाए। बालपंडियवीरियलद्धियाणं भंते! जीवा० तिन्नि नाणाइं भयणाए, तस्स अलद्धियाणं पंच नाणाइं तिन्नि अन्नायाइं भयणाए।*

*इंदियलद्धियाणं भंते! जीवा किं नाणी अन्नाणी?, गोयमा! चत्तारि नाणाइं तिन्नि य अन्नाणाइं भयणाए, तस्स अलद्धियाणं पुच्छा, गोयमा! नाणी नो अन्नाणी नियमा एगनाणी केवलनाणी, सोइंदियलद्धियाणं जहा इंदियलद्धिया, तस्स अलद्धियाणं पुच्छा, गोयमा! नाणीवि अन्नाणीवि, जे नाणी ते अत्थेगतिया दुन्नाणी अत्थेगतिया एगन्नाणी जे दुन्नाणी ते आभिनिबोहियनाणी सुयनाणी जे एगनाणी ते केवलनाणी, जे अन्नाणी ते नियमा दुअन्नाणी, तंजहा-मइअन्नाणी य सुयअन्नाणी य, चक्खिदियघाणिंदियाणं लद्धियाणं अलद्धियाण य जहेव सोइंदियस्स, जिब्भिंदियलद्धियाणं चत्तारि नाणाइं तिन्नि य अन्नाणानि भयणाए।*

*तस्स अलद्धियाणं पुच्छा, गोयमा! नाणीवि अन्नाणीवि जे नाणी ते नियमा एगनाणी केवलनाणी, जे अन्नाणी ते नियमा दुअन्नाणी, तंजहा-मइअन्नाणी य सुयअन्नाणी य, फासिंदियलद्धियाणं अलद्धियाणं जहा इंदियलद्धिया य अलद्धिया य॥*

**वृ.** 'कतिविहा ण'मित्यादि, तत्र लब्धिः-आत्मनो ज्ञानादिगुणानां तत्तत्कर्मक्षयादितो लाभः, सा च दशविधा, तत्र ज्ञानस्य-विशेषबोधस्य पञ्चप्रकारस्य तथाविधज्ञानानावरणक्षयक्षयोपशमाभ्यां लब्धिर्ज्ञानलब्धि, एवमन्यत्रापि, नवरं च दर्शनं-रुचिरूप आत्मनः परिणामः, चारित्रं-चारित्रमोहनीयक्षयक्षयोपशमोपशमजो जीवपरिणामः, तथा चरित्रं च तदचरित्रं चेति चरित्राचरित्रं-संयमासंयमः, तच्चाप्रत्याख्यानकषायक्षयोपशमजो जीवपरिणामः।

दानादिलब्धयस्तु पञ्चप्रकारान्तरायक्षयक्षयोपशमसम्भवाः, इह च सकृद्भोजनमशनादीनां भोगः, पौनःपुन्येन चोपभोजनमुपभोगः, स च वस्त्रभवनादेः, दानादीनि तु प्रसिद्धानीति।

तथा इन्द्रियाणां-स्पर्शनादीनां मतिज्ञानावरणक्षयोपशमसम्भूतानामेकेन्द्रियादिजातिनामकर्मोदयनियमितक्रमाणां पर्याप्तकनामकर्मादिसामर्थ्यसिद्धानां द्रव्यभावरूपाणां लब्धिरात्मनीतीन्द्रियलब्धिः॥ अथ ज्ञानलब्धेर्विपर्यभूताऽज्ञानलब्धिरित्यज्ञानलब्धिनिरूपणायाह-'अन्नाणलद्धी'त्यादि।

'सम्मद्दंसणे'त्यादि, इह सम्यग्दर्शनं मिथ्यात्वमोहनीयकर्माणुवेदनोपशम २ क्षय २ क्षयोपशम ३ समुत्थ आत्मपरिणामः, मिथ्यादर्शनमशुद्धमिथ्यात्वदलिकोदयसमुत्थो जीवपरिणामः, सम्यग्मिथ्यादर्शनं त्वर्द्धविशुद्धमिथ्यात्वदलिकोदयसमुत्थ आत्मपरिणाम एव॥

'सामाइयचरित्तलद्धि'त्ति सामायिकं-सावद्ययोगविरतिरूपं एतदेव चरित्रं सामायिकचरित्रं तस्य लब्धि सामायिकचरित्रलब्धि, सामायिकचरित्रं च द्विधा-इत्वरं यावत्कथिकं च, तत्राल्पकालमित्वरं, तच्च भरतैरावतेषु प्रथमपश्चिमतीर्थःकरतीर्थेष्वनारोपितव्रतस्य शिक्षकस्य भवति, यावत्कथिकं तु यावज्जीविकं, तच्च मध्यमवैदेहिकतीर्थःङ्करतीर्थान्तर्गतसाधूनामवसेयं, तेषामुपस्थापनाया अभावात्, नन्वितरस्यापि यावज्जीवितया प्रतिज्ञानात् तस्यैव चोपस्थापनायां परित्यागात् कथं न प्रतिज्ञालोपः?, अत्रोच्यते, अतिचाराभावात्, तस्यैव सामान्यतः सावद्ययोगनिवृत्तिरूपेणावस्थितस्य शुद्धयन्तरापादनेन सञ्ज्ञामात्रविशेषादिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'छेओवट्ठावनियचरित्तलद्धि'त्ति छेदे-प्राक्तनसंयमस्य व्यवच्छेदे सति यदुपस्थापनीयं-साधावारोपणीयं तच्छेदोपस्थापनीयं, पूर्वपर्यायच्छेदेन महाव्रतानामारोपणमित्यर्थः, तच्च सातिचारमनतिचारं च, तत्रानतिचारमित्वरसामायिकस्य शिक्षकस्यारोप्यते, तीर्थान्तरसङ्क्रान्तौ वा, यथा पार्श्वनाथतीर्थाद्वर्द्धमानस्वामित्यर्थं सङ्क्रमतः पञ्चयामधर्मप्राप्तौ, सातिचारं तु मूलगुण-घातिनो यद्व्रतारोपणं, तच्च तच्चरित्रं च छेदोपस्थापनीयचरित्रं तस्य लब्धिश्छेदोपस्थापनी-यचरित्रलब्धिः

'परिहारविसुद्धियचरित्तलद्धि'त्ति परिहारः-तपोविशेषस्तेन विशुद्धिर्यस्मिंस्तत्प-रिहारविशुद्धिकं, शेषं तथैव, एतच्च द्विविधं-निर्विशमानकं निर्विष्टकायिकं च, तत्र निर्विशमान-कास्तदासेवकास्तदव्यतिरेकात्तदपि निर्विशमानकम्, आसेवितविवक्षितचारित्रकायास्तु निर्विष्टका-यास्त एव निर्विष्टकायिकास्तदव्यतिरेकात्तदपि निर्विष्टकायिकमिति, इह च नवको गणो भवति, तत्र चत्वारः परिहारिका भवन्ति, अपरे तु तद्वैयावृत्त्यकराश्चत्वार एवानुपरिहारिकाः, एकस्तु कल्पस्थितो वाचनाचार्यो गुरुभूत इत्यर्थः, एतेषां च निर्विशमानकानामयं परिहारः-

॥१॥ ''परिहारियाण उ तवोजहन्न मज्झो तहेव उक्कोसो।
सीउण्हवासकाले भनिओ धीरेहिं पत्तेयं॥

॥२॥ तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ।
अट्ठममिह उक्कोसो एत्तो सिसिरे पवक्खामि॥

॥३॥ सिसिरे उ जहन्नाई छट्ठाई दसमचरिमगा होंति।
वासासु अट्ठमाई बारसपज्जन्तओ नेइ॥

॥४॥ पारणगे आयामं पंचसु गह दोसऽभिग्गहो भिक्खे।
कप्पट्ठिया य पइदिण करेंति एमेव आयामं॥

इह सप्तस्वेषणासु मध्ये आद्ययोरग्रह एव, पञ्चसु पुनर्ग्रहः, तत्राप्येकतरया भक्तमेकतरया च पानकमित्येवं द्वयोरभिग्रहोऽवगन्तव्य इति।

॥५॥ 'एवं छम्मासतवं चरिउं परिहारिगाअनुचरंत।
अनुचरगे परिहारियपयट्ठिए जाव छम्मासा॥

॥६॥ कप्पट्ठिओवि एवं छम्मासतवं करेइ सेसा उ।
अनुपरिहारिगभावं वयंति कप्पट्ठियत्तं च॥

॥७॥ एवेसो अट्ठारसमासपमाणो उ वन्निओ कप्पो।
संखेवओ विसेसो सुत्ता एयस्स नायव्वो॥

॥८॥ कप्पसमत्तीइ तयं जिणकप्पं वा उवेंति गच्छं वा।
पडिवज्जमाणगा पुण जिणस्सगासे पवज्जंति॥

॥९॥ तित्थयरसमीवासेवगस्स पासे व नो य अन्नस्स।
एएसिं जं चरणं परिहारविसुद्धियं तं तु॥

अन्यैस्तु व्याख्यातं-परिहारतो मासिकं चतुर्लघ्वादि तपश्चरति यस्तस्य परिहारिकच-रित्रलब्धिर्भवतीति, इदं च परिहारतपो यथा स्यात्तथोच्यते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "नवमस्स तइयवत्थउं जहन्न उक्कोस ऊणगा दस उ।
सुत्तत्थभिग्गहा पुण दव्वाइ तवो रयणमाती ॥"

अयमर्थः यस्य जघन्यतो नवमपूर्वं तृतीयं वस्तु यावद्भति उत्कर्षतस्तु दश पूर्वाणि न्यूनानि सूत्रतोऽर्थःतो भवन्ति, द्रव्यादयश्चाभिग्रहा रत्नावल्यादिना च तपस्तस्य परिहारतपो दीयते, तद्दाने न निरुपसर्गार्थं कायोत्सर्गो विधीयते, शुभे च नक्षत्रादौ तत्प्रतिपत्ति, तथा गुरुस्तं ब्रूते-यथाऽहं तव वाचनाचार्य अयं च गीतार्थः साधुः सहायस्ते, शेषसाधवोऽपि वाच्याः, यथा।

॥१॥ "एस एवं पडिवज्जइ न किंचि आलवइ मा य आलवह।
अत्तट्ठचिंतगस्स उ वाघाओ भे न कायव्वो ॥"

तथा कथमहमालापादिरहितः संस्तपः करिष्यामीत्येवं बिभ्यतस्तस्य भयापहारः कार्यः, कल्पस्थितश्च तस्यैतत्करोति–

॥१॥ "किइकम्मं च पडिच्छइ परिन्न पडिपुच्छयंपि से देइ।
सोवि य गुरुमुवचिट्ठइ उदंतमवि पुच्छओ कहइ ॥"

इह परिज्ञा-प्रत्याख्यानं प्रतिपृच्छा त्वालापकः, ततोऽसौ यदा ग्लानीभूतः सन्नुत्थानादि स्वयं कर्त्तु न शक्नोति तदा भणति-उत्थानादि कर्त्तुमिच्छामि, ततोऽनुपरिहारकस्तूष्णीक एव तदभिप्रेतं समस्तमपि करोति, आह च–

॥१॥ "उट्ठेज्ज निसीएज्जा भिक्खं हिंडेज्ज भंडगं पेहे।
कुवियपियबंधवस्स व करेइ इयरोवि तुसिणीओ ॥"

तपश्च तस्य ग्रीष्मशिशिरवर्षासु जघन्यादिभेदेन चतुर्थादिद्वादशान्तं पूर्वोक्तमेवेति।

'सुहुमसंपरायचरित्तलद्धि'त्ति संपरैति-पर्यटति संसारमेभिरिति सम्परायाः-कषायाः सूक्ष्मा-लोभांशावशेषरूपाः सम्परायाः यत्र तत् सूक्ष्मसम्परायं शेषं तथैव, एतदपि द्विधा-विशुद्ध्यमानकं सङ्क्लिश्यमानकं च, तत्र विशुद्ध्यमानकं क्षपकोपशमकश्रेनिद्वयमारोहतो भवति १ सङ्क्लिश्य-मानकं तूपशमश्रेणीतः प्रच्यवमानस्येति २।

'अहक्खायचरित्तलद्धी'ति यथा-येन प्रकारेण आख्यातं-अभिहितमकषायतयेत्यर्थः तथैव यत्तद्यथाख्यातं, तदपि द्विविधम्-उपशमकक्षपकश्रेनिभेदात्, सेषं तथैवेति।

एवं 'चरित्ताचरित्ते'त्यादौ, 'एगागार'त्ति मूलगुणोत्तरगुणादीनां तद्भेदानामविवक्षणात् द्वितीयकषायक्षयोपशमलभ्यपरिणाममात्रस्यैव च विवक्षणाच्चरित्राचरित्रलब्धेरेकाकारत्वमवसेयम् एवं दानलब्ध्यादीनामप्येकाकारत्वं, भेदानामविवक्षणात्।

'बालवीरियलद्धी'त्यादि, बालस्य-असंयतस्य यद्वीर्यं-असंयमयोगेषु प्रवृत्तिनिबन्धनभूतं तस्य या लब्धिश्चारित्रमोहोदयाद्वीर्यान्तरायक्षयोपशमाच्च सा तथा, एवमितरे अपि यथायोगं वाच्ये, नवरं पण्डितः-संयतो, बालपण्डितस्तु संयतासंयत इति।

'तस्स अलद्धिया णं'ति तस्य ज्ञानस्य अलब्धिकाः-अलब्धिमन्तः ज्ञानलब्धिरहिता इत्यर्थः

'आभिनिबोहियनाणे'त्यादि, आभिनिबोधिकज्ञानलब्धिकानां चत्वारि ज्ञानानि भजनया, केवलिनो नास्त्याभिनिबोधिकज्ञानमिति, मतिज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्ते केवलिनस्ते चैकज्ञानिन एव, ये त्वज्ञानिनस्तेऽज्ञानद्वयवन्तोऽज्ञानत्रयवन्तो वा, एवं श्रुतेऽपि। 'ओहिना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णलद्धी'त्यादि अवधिज्ञानलब्धिकास्त्रिज्ञानाः केवलमनःपर्यायासद्भावे चतुर्ज्ञाना वा केवला-भावात्, अवधिज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्ते द्विज्ञाना मतिश्रुतभावात्, त्रिज्ञाना वा मतुश्रुतमनः पर्यायभावात्, एकज्ञाना वा केवलभावात्, ये त्वज्ञानिनस्ते द्वयज्ञाना मत्यज्ञानश्रुताज्ञानभावात्, त्र्यज्ञाना वाऽज्ञानत्रयस्यापि भावात्।

'मनपज्जवे'त्यादि, मनःपर्यवज्ञानलब्धिकास्त्रिज्ञाना अवधिकेवलाभावात्, चतुर्ज्ञाना वा केवलस्यैवाभावात्, मनः-पर्यवज्ञानस्यालब्धिकास्तु ये ज्ञानिनस्ते द्वि ज्ञाना आद्यद्वयभावात्, त्रिज्ञाना वाऽऽद्यत्रयभावात्, एकज्ञाना वा केवलस्यैव भावात्, ये त्वज्ञानिनस्ते द्वयज्ञाना आद्याज्ञानद्वयभावात्, त्र्यज्ञाना वाऽज्ञानत्रयस्यापि भावात्।

'केवलनाणे'त्यादि, केवलज्ञानलब्धिका एकज्ञानिनस्ते च केवलज्ञानिन एव, केवलज्ञान-स्यालब्धिकास्तु ये ज्ञानिनस्तेषामाद्यं ज्ञानद्वयं तत्त्रयं मतिश्रुतावधिज्ञानानि मति श्रुतमनःपर्याय-ज्ञानानि वा केवलज्ञानवर्जानि चत्वारि वा ज्ञानानि भवन्ति, ये त्वज्ञानिनस्तेषामाद्यज्ञानद्वयं तत्त्रयं वा भवतीत्येवं भजनाऽवसेयेति।

'अन्नाणलद्धियाण' मित्यादि, अज्ञानलब्धिका अज्ञानिनस्तेषां च त्रीण्यज्ञानानि भजनया, द्वे अज्ञाने त्रीनि वाऽज्ञानानीत्यर्थः, अज्ञानालब्धिकास्तु ज्ञानिनस्तेषां च पञ्च ज्ञानानि भजनया पूर्वोपदर्शितया वाच्यानि, 'जहा अन्नाणे'त्यादि, अज्ञानलब्धिकानां त्रीण्यज्ञानानि भजनयोक्तानि मत्यज्ञानश्रुताज्ञानलब्धिकानामपि तानि तथैव, तथाऽज्ञानालब्धिकानां पञ्च ज्ञानानि भजनयोक्तानि, मत्यज्ञानश्रुताज्ञानालब्धिकानामपि पञ्च ज्ञानानि भजनयैव वाच्यानीति।

'विभंगे'त्यादि, विभङ्गज्ञानलब्धिकानां तु त्रीण्यज्ञानानि नियमात्, तदलब्धिकानां तु ज्ञानिनां पञ्च ज्ञानानि भजनया, अज्ञानिनां च द्वे अज्ञाने नियमादिति ॥ 'दंसणलद्धी'त्यादि, 'दर्शनलब्धिकः' श्रद्धानमात्रलब्धिकाःइत्यर्थः ते च सम्यकश्रद्धानवन्तो ज्ञाननस्तदितरे त्वज्ञानिनः, तत्र ज्ञानिनां पञ्च ज्ञानानि भजनया, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैवेति। 'तस्स अलद्धिया नत्थि'त्ति तस्य दर्शनस्य येषामलब्धिस्ते न सन्त्येव, सर्वजीवानां रुचिमात्रस्यास्तित्वादिति।

'सम्मद्दंसणलद्धियाणं'ति सम्यग्दृष्टीनां, 'तस्स अलद्धियाण'मित्यादि, 'तस्यालब्धिकानां' सम्यग्दर्शनस्यालब्धिमतां मिथ्यादृष्टीनां च त्रीण्यज्ञानानि भजनया, यतो मिश्रदृष्टीनामप्यज्ञानमेव, तात्त्विकसद्बोधहेतुत्वाभावान्मिश्रस्येति।

'मिच्छादंसणलद्धियाणं'ति मिथ्यादृष्टीनां, 'तस्स अलद्धियाण'मित्यादि, 'तस्यालब्धिकानां' मिथ्यादर्शनस्यालब्धिमतां सम्यग्दृष्टीनां च क्रमेण पञ्च ज्ञानानि त्रीण्यज्ञानानि च भजनयेति।

'चरित्तलद्धी'त्यादि चरित्रलब्धिका ज्ञानिन एव, तेषां च पञ्च ज्ञानानि भजनया, यतः केवल्यपि चारित्री। चारित्रालब्धिकास्तु ये ज्ञानिनस्तेषां मनःपर्यववर्जानि चत्वारि ज्ञानानि भजनया भवन्ति, कथम्?, असंयतत्वे आद्यं ज्ञानद्वयं तत्त्रयं वा, सिद्धत्वे च केवलज्ञानं, सिद्धानामपि चरित्रलब्धिशून्यत्वाद्, यतस्ते नोचारित्रिणो नोअचारित्रिण इति, ये त्वज्ञानिनस्तेषां त्रीण्यज्ञानानि भजनया।

'सामाइए'त्यादि, सामायिकचरित्रलब्धिका ज्ञानिन एव, तेषां च केवलज्ञानवर्जानि चत्वारि ज्ञानानि भजनया, सामायिकचरित्राब्धिकास्तु ये ज्ञानिनस्तेषां पञ्च ज्ञानानि भजना, छेदोपस्थापनी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यादिभावेन सिद्धभावेन वा, ये त्वज्ञानिनस्तेषां त्रीण्यज्ञानानि भजनया।

एवं छेदोपस्थापनीयादिष्वपि वाच्यम्, एतदेवाह-'एव'मित्यादि, तत्र छेदोपस्थापनीयादिचरित्रत्रयलब्धयो ज्ञानिन एव, तेषां चाद्यानि चत्वारि ज्ञानानि भजनया, तदलब्धयो यथाख्यातचारित्रलब्धयश्च ये ज्ञानिनस्तेषां पञ्च ज्ञानानि भजनया, ये त्वज्ञानिनस्तेषामज्ञानत्रयं भजनयैव, यथाख्यातचारित्रलब्धिकानां तु विशेषोऽस्ति अतस्तद्दर्शनायाह–

'नवरं अहक्खाये'त्यादि, सामायिकादिचारित्रचतुष्टयलब्धिमतां छद्मस्थत्वेन चत्वार्येव ज्ञानानि भजनया, यथाख्यातचारित्रलब्धिमतां छद्मस्थेतरभावेन पञ्चापि भजनया भवन्तीति तेषां तथैव तान्युक्तानीति।

'चरित्ताचरित्ते'त्यादौ, 'तस्स अलद्धिय'त्ति चरित्राचरित्रस्यालब्धिकाः श्रावकादन्ये, ते च ये ज्ञानिनस्ते षां पञ्च ज्ञानानि भजनया, ये त्वज्ञानिनस्तेषां त्रीण्यज्ञानानि भजनयैव ॥ 'दानलद्धी'त्यादि, दानान्तरायक्षयक्षयोपशमाद्दाने दातव्ये लब्धिर्येषां ते दानलब्धयः, ते च ज्ञानिनोऽज्ञानिनश्च, तत्र ये ज्ञानिनस्तेषां पञ्च ज्ञानानि भजनया, केवलज्ञानिनामपि दानलब्धियुक्तत्वात्, ये त्वज्ञानिनस्तेषां त्रीण्यज्ञानानि भजनयैव, दानस्यालब्धिकास्तु सिद्धास्ते च दानान्तरायक्षयेऽपि दातव्याभावात् सम्प्रदानासत्त्वाद्दानप्रयोजनाभावाच्च दानालब्धय उक्तास्ते च नियमात्केवलज्ञानिन इति।

लाभभोगोपभोगवीर्यलब्धीः सेतरा अतिदिशन्नाह-'एव'मित्यादि, इह चालब्धयः सिद्धानामेवोक्तन्यायादवसेयाः, ननु दानाद्यन्तरायक्षयात्केवलिनां दानादयः सर्वप्रकारेण कस्मान्न भवन्ति ? इति, उच्यते, प्रयोजनाभावात्, कृतकृत्याहि ते भगवन्त इति ॥

'बालवीरियलद्धियाण'मित्यादि, बालवीर्यलब्धयः-असंयताः तेषां च ज्ञानिनां त्रीनि ज्ञानानि अज्ञानिनां च त्रीण्यज्ञानानि भजनया भवन्ति, तदलब्धिकास्तु संयताः संयतासंयताश्च ते च ज्ञानिन एव, एतेषां च पञ्च ज्ञानानि भजनया। 'पंडियवीरिये'त्यादौ, 'तस्स अलद्धियाणं'ति असंयतानां संयतासंयतानां सिद्धानां चेत्यर्थः, तत्रासंयतानामाद्यं ज्ञानत्रयमज्ञानत्रयं च भजनया, संयतासंयतानां तु ज्ञानत्रयं भजनयैव भवति, सिद्धानां तु केवलज्ञानमेव, मनःपर्यायज्ञानं तु पण्डितवीर्यलब्धिमतामेव भवति तान्येषामत उक्तं 'मणपज्ञवे'त्यादि, सिद्धानां च पण्डितवीर्यालब्धिकत्वं पण्डितवीर्यवाच्ये प्रत्युपेक्षणाद्यनुष्ठाने प्रवृत्त्यभावात्, 'बालपंडिए'इत्यादौ, तस्स अलद्धियाणं'ति अश्रावकाणामित्यर्थः।

'इंदियलद्धियाण'मित्यादि, इन्द्रियलब्धिका ये ज्ञानिनस्तेषां चत्वारि ज्ञानानि भजनया, केवलं तु नास्ति, तेषां केवलिन एवेत्येकमेव तेषां ज्ञानमिति। 'सोइंदिय'इत्यादि, श्रोत्रेन्द्रियलब्धय इन्द्रियलब्धि पुनः केवलिन एवेत्येकमेव तेषां ज्ञानमिति। 'सोइंदिय'इत्यादि, श्रोत्रेन्द्रियलब्धय इन्द्रियलब्धिका इव वाच्याः, ते च ये ज्ञानिनस्तेऽकेवलित्वादाद्यज्ञानचतुष्टयवन्तो भजनया भवन्ति, अज्ञानिनस्तु भजनया त्र्यज्ञानाः, श्रोत्रेन्द्रियालब्धिकास्तु ये ज्ञानिनस्ते आद्यद्विज्ञानिनः, तेऽपर्याप्तकाःसासादन सम्यग्दर्शिनो विकलेन्द्रियाः एकज्ञानिनो वा केवल ज्ञानिनः, ते हि श्रोत्रेन्द्रियालब्धिका इन्द्रियोपयोगाभावात्, ये त्वज्ञानितस्ते पुनराद्याज्ञानद्वयवन्त इति।

'चकिखंदिए'इत्यादि, अयमर्थः-यथा श्रोत्रेन्द्रियलब्धिमतां चत्वारि ज्ञानानि भजनय त्रीणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाज्ञानानि भजनवैय तदलब्धिकानांचद्वे ज्ञाने द्वे चाज्ञाने एकंच ज्ञानमुक्तमेवं चक्षुरिन्द्रियलब्धिकानां घ्राणेन्द्रियलब्धिकानां च तदलब्धिकानां च वाच्यं, तत्र चक्षु रिन्द्रिय लब्धिका घ्राणेन्द्रिय लब्धिकाश्च ये पञ्चेन्द्रियास्तेषां केवलवर्जानि चत्वारि ज्ञानानि त्रीणि चाज्ञानानि भजनयैव, ये तु विकलेन्द्रियाश्चक्षुरिन्द्रियघ्राणे न्द्रियलब्धिकास्तेषां सासादन सम्यग्दर्शन भावे आद्यंज्ञानरूपं तदभावे त्वाद्यमेवाज्ञान द्वयं, चक्षुरिन्द्रियघ्राणेन्द्रियालब्धिकास्तु यथायोगं त्रिदूव्येकेन्द्रियाः केवलिनश्च, तत्र द्वीन्द्रियादनां सासादन भावे आद्यज्ञानद्वय सम्भवः, तदभावे त्वाद्याज्ञानद्वय सम्भवः, केवलिनां त्वेकं केवलज्ञानमिति।

जिब्भिंदिय इत्यादौ, 'तस्स अलद्धिय'त्ति जिह्वा लब्धिवर्जिताः, ते च केवलिन एकेन्द्रियाश्चेत्यत आहे- "नाणीवीत्यादि, ये ज्ञानिनस्ते नियमात्केवलज्ञानिनः येऽज्ञानिनस्ते नियमाद् द्व्यज्ञानिनः एकेन्द्रियाणां सासादनभावतोऽपि सम्यग्दर्शनस्याभावाद् विभङ्गाभावाच्चेति सासादनभावतोऽपि सम्यग्दर्शनस्याभावाद् विभङ्गाभावाच्चेति।

'फासिंदिय'इत्यादि, स्पर्शेनेन्द्रियलब्धिकाः केवलवर्जज्ञानचतुष्कवन्तो भजनया तथैवाज्ञानत्रयवन्तो वा, स्पर्शेन्द्रियालब्धिकास्तु केवलिन एव, इन्द्रियलब्ध्यलब्धिमन्तोऽप्येवंविधा एवेत्यत उक्तं 'जहा इंदिए'इत्यादि ॥ उपयोगद्वारे–

**मू. (३९४)** *सागारोवउत्ता णं भंते ! जीवा किं नाणी अन्नाणी ?, पंच नाणाइं तिन्नि अन्नाणाइं भयणाए। आभिनिबोहियनाणसाकारोवउत्ता णं भंते ! चत्तारि नाणाइं भयणाए। एवं सुयनाण- सागरोवउत्तावि।*

*ओहिनाणसागारोवउत्ता जहा ओहिनाणलद्धिया, मणपज्जवनाणसागारोवउत्ता जहा मनपज्ञवनाणलद्धिया, केवलनाणसागारोवउत्ता जहा केवलनाणलद्धिया, मइअन्नाणसागारोव-उत्ताणं तिन्नि अन्नाणाइं भयणाए, एवं सुयअन्नाणसागारोवउत्तावि, विभंगनाणसागारोवउत्ताणं तिन्नि अन्नाणाइं नियमा।*

*अनागारोवउत्ता णं भंते ! जीवा किं नाणी अन्नाणी ?, पंच नाणाइं तिन्नि अन्नाणाइं भय-णाए। एवं चक्खुदंसणअचक्खुदंसणअनागारोवउत्तावि, नवरं चत्तारि नाणाइं तिन्नि अन्नाणाइं भयणाए, ओहिदंसणअनगारोवउत्ताणं पुच्छा, गोयमा ! नाणीवि अन्नाणीवि, जे नाणी ते अत्थेगतिया तिन्नाणी अत्थेगतिया चउनाणी, जे तिन्नाणी ते आभिनिबोहिय० सुयनाणी ओहिनाणी, जे चउनाणी ते आभिनिबोहियनाणी जाव मनपज्ञवनाणी, जे अन्नाणी ते नियमा तिअन्नाणी, तंजहा-मइअन्नाणी सुयअन्नाणी विभंगनाणी, केवलदंसणअनागारोवउत्ता जहा केवलनाणलद्धिया*

*सजोगी णं भंते ! जीवा किं नाणी जहा सकाइया, एवं मणजोगी वइजोगी कायजोगीवि, जोगीवि, अजोगी जहा सिद्धा ॥ सलेस्सा णं भंते ! जहा सकाइया, कण्हलेस्सा णं भंते ! जहा सइंदिया, एवं जाव पम्हलेसा, सुक्कलेस्सा जहा सलेस्सा जहा सिद्धा।*

*सकसाई णं भंते ! जहा सइंदिया एवं जाव लोहकसाई, अकसाई णं भंते ! नाणाइं भयणाए*

*सवेदगा णं भंते ! जहा सइंदिया, एवं इत्थिवेदगावि, एवं पुरिसवेयगा एवं नपुंसकवे०, अवेदगा जहा अकसाई।*

*आहारगाणं भंते ! जीवा जहा सकसाई नवरं केवलनाणंपि, अनाहारगा णं भंते ! जीवा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*किं नाणी अन्नाणी ?, मणपज्जवनाणवज्जाइं नामाइं अन्नाणापि य तिन्नि भयणाए ॥*

**वृ.** 'सागारोवउत्ते'त्यादि, आकारो-विशेषस्तेन सह यो बोधः स साकारः, विशेषग्राहको बोध इत्यर्थः, तस्मिन्नुपयुक्ताः-तत्संवेदका ये ते साकारोपयुक्ताः, ते च ज्ञानिनोऽज्ञानिनश्च, तत्र ज्ञानिनां पञ्च ज्ञानानि भजनया-स्याद् द्वे स्यात्त्रीणि स्याच्चत्वारि स्यादेकं, यच्च स्यादेकं यच्च स्याद्द्वे इत्याद्युच्यते तल्लब्धिमात्रङ्गीकृत्य, उपयोगापेक्षया त्वेकदा एकमेव ज्ञानमज्ञानं चेति, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैवेति ।

अथ साकारोपयोगभेदापेक्षमाह-'आभिणी'त्यादि, 'ओहिनाणसागारे'त्यादि, अवधिज्ञानसाकारोपयुक्ता यथाऽवधिज्ञानलब्धिकाः प्रागुक्ताः स्यात् त्रिज्ञानिनो मतिश्रुतावधियोगात् स्याच्चतुर्ज्ञानिनो मति श्रुतावधिमनःपर्यवयोगात्तथा वाच्याः ।

'मनपज्जवे'त्यादि, मनःपर्यवज्ञानसाकारोपयुक्ता यथा मनःपर्यवज्ञानलब्धिकाः प्रागुक्ताः स्यात्त्रिज्ञानिनो मतिश्रुतमनःपर्यवयोगात् स्याच्चतुर्ज्ञानिनः केवलवर्जज्ञानयोगात्तथा वाच्या इति

'अनगारोवउत्ता ण'मित्यादि, अविद्यमान आकारो यत्र तदनाकारं-दर्शनं तत्रपयुक्ताः-तत्संवेदनका ये ते तथा, ते च ज्ञानिनोऽज्ञानिनश्च, तत्र ज्ञानिनां लब्ध्यपेक्षया पञ्च ज्ञानानि भजनया, अज्ञानिनां तु त्रीण्यज्ञानानि भजनयैव । 'एव'मित्यादि, यथाऽनाकारोपयुक्ता ज्ञानिनोऽज्ञानिनश्चोक्ताः एवं चक्षुर्दर्शनाद्यपयुक्ता अपि, 'नवरं'ति विशेषः पुनरयं-चक्षुर्दर्शनेतरोपयुक्ताः केवलिनो न भवन्तीति तेषां चत्वारि ज्ञानानि भजनयेति ।

योगद्वारे-'सजोगी ण'मित्यादि, 'जहा सकाइय'त्ति प्रागुक्ते कायद्वारे यथा सकायिका भजनया पञ्चज्ञानास्त्र्यज्ञानाश्चोक्तास्तथा सयोगा अपि वाच्याः एवं मनोयोग्यादयोऽपि, केवलिनोऽपि मनोयोगादीनां भावात्, तथा मिथ्यादृशां मनोयोगादिमतामज्ञानत्रयभावाच्च, 'अजोगी जहा सिद्ध'त्ति अयोगिनः केवललक्षणैकज्ञानिन इत्यर्थः ।

लेश्याद्वारे-'जहा सकाइय'त्ति सलेश्याः सकायिकवद्भजनया पञ्चज्ञानास्त्रयज्ञानाश्च वाच्याः, केवलिनोऽपि शुक्ललेश्यासम्भवेन सलेश्यत्वात्, 'कण्हलेसे'त्यादि, 'जहासइंदिय'त्ति कृष्णलेश्याश्चतुर्ज्ञानिनस्त्रयज्ञानिनश्च भजनयेत्यर्थः, 'सुक्कलेसा जहा सलेस'त्ति पञ्चज्ञानिनो भजनया त्र्यज्ञानिनश्चेत्यर्थः । 'अलेस्सा जहा सिद्ध'त्ति एकज्ञानिन इत्यर्थः ।

कषायद्वारे-'सकसाई जहा सइंदिय'त्ति भजनया केवलवर्जचतुर्ज्ञानिनस्त्रयज्ञानिनश्चेत्यर्थः, 'अकसाईण'मित्यादि, अकषायिणां पञ्च ज्ञानानि भजनया, कथम् ?, उच्यते, छद्मस्थो वीतरागः केवली चाकषायः, तत्र च छद्मस्थवीतरागस्याद्यं ज्ञानचतुष्कं भजनया भवति, केवलिनस्तु पञ्चममिति । वेदद्वारे-'जहा सइंदिय'त्ति सवेदकाः सेन्द्रियवद्भजनया केवलवर्जचतुर्ज्ञानिनस्त्रयज्ञानिनश्च वाच्याः, 'अवेदगा जहा अकसाइ'त्ति अवेदका अकषायिवद्भजनया पञ्चज्ञाना वाच्याः, यतोऽनिवृत्तिबादरादयोऽवेदका भवन्ति, तेषु च छद्मस्थानां चत्वारि ज्ञानानि भजनया केवलिनां तु पञ्चममिति ।

आहारकद्वारे-'आहारगे'त्यादि, सकषाया भजनया चतुर्ज्ञानास्त्रयज्ञानाश्चोक्ताः आहारका अप्येवमेव, नवरमाहारकाणां केवलमप्यस्ति, केवलिन आहारकत्वादपीति, 'अनाहारगा ण'मित्यादि, मनःपर्यवज्ञानमाहारकाणामेव, आद्यं पुनर्ज्ञानत्रयमज्ञानत्रयं च विग्रहे भवति, केवलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च केवलिसमुद्घातशैलेशीसिद्धावस्थावस्वनाहारकाणामपि स्यादत उक्तं 'मनपज्जवे'त्यादि ।

अथ ज्ञानगोचरद्वारे–

**मू. (३९५)** *आभिनिबोहियनाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावओ, दव्वओ णं आभिनिबोहियनाणी आएसेणं सव्वदव्वाइं जाणइ पासइ, खेत्तओ आभिनिबोहियनाणी आएसेणं सव्वखेत्तं जानिइ पासइ, एवं कालओवि, एवं भावओवि ।*

*सुयनाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ ४, दव्वओ णं सुयनाणी उवउत्ते सव्वदव्वाइं जाणति पासति, एवं खेत्तओवि कालओवि, भावओ णं सुयनाणी उवउत्ते सव्वभावे जाणति पासति ।*

*ओहिनाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ ४, दव्वओ णं ओहिनाणी रूविदव्वाइं जाणइ पासइ जहा नंदीए जाव भावओ ।*

*मनपज्जवनाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ ४, दव्वओ णं उज्जुमती अनंते अनंतपदेसिए जहा नंदीए जाव भावओ*

*केवलनाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावो, दव्वओ णं केवलनाणी सव्वदव्वाइं जाणइ पासइ एवं जाव भावओ ।*

*मइअन्नाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ खेत्तओ कालओ भावओ, दव्वओ णं मइअन्नाणी मइअन्नाणपरिगयाइं दव्वाइं जाणइ, एवं जाव भावओ मइअन्नाणी मइअन्नाणपरिगए भावे जाणइ पासइ ।*

*सुयअन्नाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ ४, दव्वओ णं सुयअन्नाणी सुयअन्नाणपरिगयाइं दव्वाइं आघवेति पन्नवेति परूवेइ, एवं खेत्तओ कालओ, भावओ णं सुयअन्नाणी सुयअन्नाणपरिगए भावे आघवेति तं चेव*

*विभंगनाणस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गोयमा ! से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ ४, दव्वओ णं विभंगनाणी विभंगनाणपरिगयाइं दव्वाइं जाणइ पासइ, एवं जाव भावओ णं विभंगनाणी विभंगनाणपरिगए भावे जाणइ पासइ ।*

**वृ.** 'केवइए' त्ति किंपरिमाणः 'विसए' त्ति गोचर ग्राह्योऽर्थः इतियावत्, तं च भेदपरिमाणतस्तावदाह-'से' इत्यादि, 'सः' आभिनिबोधिकज्ञानविषयस्तद्वाऽऽभिनिबोधिकज्ञानं 'समासतः' सङ्क्षेपेण प्रभेदानां भेदेष्वन्तर्भावेनेत्यर्थः चतुर्विधश्चतुर्विधं वा, द्रव्यतोःद्रव्याणि धर्मास्तिकायादीन्याश्रित्य क्षेत्रतो-द्रव्याधारमाकाशमात्रं वा क्षेत्रमाश्रित्य कालतः-अद्धां द्रव्यपर्यायावस्थितिं वा समाश्रित्य भावतः-औदयिकादिभावान् द्रव्याणां वा पर्यायान् समाश्रित्य 'दव्वओ णं' ति द्रव्यमाश्रित्याभिनिबोधिकज्ञानविषयद्रव्यं वाऽऽश्रित्य यदामिनिबोधिकज्ञानं तत्र 'आएसेणं' ति आदेशः-प्रकारः सामान्यविशेषरूपस्तत्र चादेशेन-ओघतो द्रव्यमात्रतया न तु तद्गतसर्वविशेषापेक्षयेति भावः, अथवा 'आदेशेन' श्रुतपरिकर्म्मिततया 'सर्वद्रव्यानि' धर्मास्तिकायादीनि 'जानाति' अवायधारणापेक्षयाऽवबुध्यते, ज्ञानास्यावायधारणारूपत्वात्, 'पासइ' त्ति पश्यति अवग्रहेहा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पेक्षयाऽवबुध्यते, अवग्रहेहयोर्दर्शनत्वात्, आह च भाष्यकारः–

॥ १ ॥ "नाणमवायधिईओ दंसणमिट्टं जहो ग्गहेहाओ।
तह तत्तरुई सम्मं रोइज्जइ जेण तं नाणं ॥"

तथा-"जंसामन्नग्गहणं दंसणमेयं विसेसियं नाणं"

अवग्रहेहे च सामान्यार्थःग्रहणरूपे अवायधारणे च विशेषग्रहणस्वभावे इति, नन्वष्टाविंशतिभेदमानमाभिनिबोधिकज्ञानमुच्यते ।

यदाह-"आभिनिबोहियनाणे अट्ठावीसं हवंति पयडीओ"त्ति

इह च व्याख्याने श्रोत्रादिभेदेन षड्भेदतयाऽवायधारणयोर्द्वादशविदं मतिज्ञानं प्राप्तं, तथा श्रोत्रादिभेदेनैव षड्भेदतयाऽर्थावग्रहईहयो र्व्यञ्जनावग्रहस्य च चतुर्विधतया षोड्शविधं चक्षुरादिदर्शनमिति प्रप्तमिति कथं न विरोधः ?, सत्यमेतत्, किन्त्वविक्षयित्वा मतिज्ञानचक्षुरादिदर्शनयोर्भेद मतिज्ञानमष्टाविंशतिधोच्यते इति पूज्या व्याचक्षत इति, 'खेत्तओ'त्ति क्षेत्रमाश्रित्याभिनिबोधिकज्ञानविषयक्षेत्रं वाऽऽश्रित्य यदाभिनिबोधिकज्ञानं तत्र 'आदेसेणं'ति ओघतः श्रुतपरिकर्मिततया वा 'सव्वं खेत्तं'ति लोकालोकरूपम्, एवं कालतो भावतश्चेति, आह च भाष्यकारः-

॥ १ ॥ "आएसोत्ति पगारो ओघादेसेण सव्वदव्वाइं।
धम्मत्थिकाइयाइं जाणइ न उ सव्वभावेणं ॥

॥ २ ॥ खेत्तं लोगालोगं कालं सव्वद्धमहव तिविहंपि।
पंचोदइयाईए भावे जन्नेयमेवइयं ॥

॥ ३ ॥ आएसोत्ति व सुत्तं सुओवलद्धेसु तस्स मइनाणं।
पसरइ तब्भावणया विणावि सुत्ताणुसारेणं ॥ इति

इदं च सूत्रं नन्द्यामिहैव वाचनान्तरे 'न पासइ'त्ति पाठान्तरेणाधीतम्, एवं च नन्दिटीकाकृता व्याख्यातम्-"आदेशः-प्रकारः, स च सामान्यतो विशेषतश्च, तत्र द्रव्यजातिसामान्यादेशेन सर्वद्रव्यानि धर्मास्तिकायादीनि जानाति, विशेषतोऽपि यथा धर्मास्तिकायो धर्मास्तिकायस्य देश इत्यादि, न पश्यति सर्वान् धर्मास्तिकायादीन्, शब्दादींस्तु योग्यदेशावस्थितान् पश्यत्यपीति," 'उवउत्ते'त्ति" भावश्रुतोपयुक्तो नानुपयुक्तः, स हि नाभिधानादभिधेयप्रतिपत्तिसमर्थो भवतीति विशेषणमुपात्तं, 'सर्वद्रव्यानि' धर्मास्तिकायादीनि 'जानाति' विशेषतोऽवगच्छति, श्रुतज्ञानस्य तत्स्वरूपत्वात्, पश्यति च श्रुतानुवर्त्तिना मानसेन अचक्षुर्दर्शनेन, सर्वद्रव्याणि चाभिलाप्यान्येव जानाति।

पश्यति चाभिन्नदशपूर्वधरादिः श्रुतकेवली, तदारतस्तु भजना, सा पुनर्मतिविशेषतो ज्ञातव्येति, वृद्धैः पुनः पश्यतीत्यत्रेदमुक्तंननु पश्यतीति कथं ?, कथंच न, सकलोगचरदर्शनायोगात् अत्रोच्यते, प्रज्ञापनायां श्रुतज्ञानश्यत्तायाः प्रतिपादितत्वादनुत्तरविमानादीनां चालेख्यकरणात् सर्वथा चाऽदृष्टस्यालेख्यकरणानुपपत्तेः, एवं क्षेत्रादिष्वपि भावनीयमिति, अन्ये तु 'न पासइ'त्ति पठन्तीति, ननु 'वओ णं सुयनाणी उवउत्ते सव्वभावे जाणइ' इति यदुक्तमिह तत् "सुए चरित्ते न पज्जवा सव्वे"त्ति । अनेन च सह कथं न विरुध्यते –

उच्यते, इह सूत्रे सर्वग्रहणेन पञ्चौदयिकादयो भावा गृह्यन्ते, तांश्च सर्वान् जातितो जानाति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा यद्यप्यभिलाप्यानां भावानामनन्तभाग एव श्रुतनिबद्धस्तथापि प्रसङ्गानुप्रसङ्गतः सर्वेऽप्यभिलाप्याः श्रुतविषया उच्यन्ते अतस्तदपेक्षया सर्वभावानजानातीत्युक्तम्, अनभिलाप्यभावापेक्षया तु ''सुए चरित्ते न पज्जवा सव्वे'' इत्युक्तमिति न विरोधः । 'दव्वओ ण'मित्यादि, अवधिज्ञानी रूपिद्रव्याणि पुद्गलद्रव्याणीत्यर्थः, तानि च जघन्येनानन्तानि तैजसभाषाद्रव्याणामपान्तरालवर्त्तीनि, यत उक्तं-''तेयाभासादव्वण अंतरा एत्थ लभति पट्ठवओ''त्ति, उत्कृष्टतस्तु सर्वबादरसूक्ष्मभेदभिन्नानि जानाति विशेषाकारेण, ज्ञानत्वात्तस्य ।

पश्यति सामान्याकारेणावधिज्ञानिनोऽवधिदर्शनस्यावश्यम्भावात्, नन्वादौ दर्शनं ततो ज्ञानमिति क्रमस्तत्किमर्थःमेनं परित्यज्य प्रथमं जानातीत्युक्तम् ?, अत्रोच्यते, इहावधिज्ञानाधिकारात्, प्रधान्यख्यापनार्थःमादौ जानातीत्युक्तम्, अवधिदर्शनस्य त्ववधिविभङ्गसाधारणत्वेनाप्रधानत्वात् पश्चात्पश्यतीति, अथवा सर्वा एव लब्धयः साकारोपयोगोपयुक्तस्योत्पद्यन्ते लब्धिश्चावधिज्ञानमिति साकारोपयोगोपयुक्तस्यावधिज्ञानलब्धिर्जायते इत्येतस्यार्थःस्य ज्ञापनार्थं साकारोपयोगाभिधायकं जानातीति प्रथममुक्तं ततः क्रमेणोपयोगप्रवृत्तेः पश्यतीति ।

'जहा नंदीए'त्ति, एवं च तत्रेदं सूत्रं-'खेत्तओ णं ओहिनाणी जहन्नेणं अंगलस्स असंखेज्जइभागं जाणइ पासइ' इत्यादि, व्याख्या पुनरेवं-क्षेत्रतोऽवधिज्ञानी जघन्येनाङ्गुलस्यासङ्ख्येयभागमुत्कृष्टतोऽसङ्ख्येयान्यलोके शक्तिमपेक्ष्य लोकप्रमाणानि खण्डानि जानाति पश्यति, कालतोऽवधिज्ञानी जघन्येनावलिकाया असङ्ख्येयं भागमुत्कृष्टतोऽसङ्ख्येया उत्सर्पिण्यवसर्पिणीरतीता अनागताश्च जानाति पश्यति, तद्गतरूपिद्रव्यावगमात्, अथ कियद्दूरं यावदिह नन्दीसूत्रं वाच्यम् इत्याह –

'जाव भावओ'त्ति भावाधिकारं यावदित्यर्थः, स चैवं-भावतोऽवधिज्ञानी जघन्येनान्तान् भावानाधारद्रव्यानन्तत्वाज्ञानाति पश्यति, न तु प्रतिद्रव्यमिति, उत्कृष्टतोऽप्यनन्तान् भावान् जानाति पश्यति च, तेऽपि चोत्कृष्टपदिनः सर्वपर्यायाणामनन्तभाग इति, 'उज्जुमइ'त्ति मननं मतिः संवेदनमित्यर्थः ऋज्वी-सामान्यग्राहिणी मति ऋजुमति-घटोऽनेन चिन्तित इत्यध्यवसायनिबन्धना मनोद्रव्यपरिच्छित्तिरित्यर्थः, अथवा ऋज्वी मतिर्यस्यासावृजुमतिस्तद्वानेव गृह्यते, 'अनंते'त्ति 'अनन्तान्' अपरिमितान् 'अनंतपएसिए'त्ति अनन्तपरमाण्वात्मकान् ।

'जहा नंदीए'त्ति, तत्र चेदं सूत्रमेवं-'खंदे जाणइ पासइ'त्ति तत्र 'स्कन्धान्' विशिष्टैकपरिणामपरिणतान् सञ्ज्ञिभिः पर्याप्तकैः प्रानिभिरर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्तिभिर्मनस्त्वेन परिणामितानित्यर्थः, 'जाणइ'ति मनःपर्यायज्ञानावरणक्षयोपशमस्य पटुत्वात्साक्षात्कारेण विशेषभूयिष्ठपरिच्छेदात् जानातीत्युच्यते, तदालोचितं पुनरर्थं घटादिलक्षणं मनःपर्यायज्ञानं स्वरूपाध्यक्षतो न जानाति किन्तु तत्परिणामान्यथाऽनुपपत्याऽतः पश्यतीत्युच्यते, उक्तश्च भाष्यकारेण-''जाणइ बज्झेऽनुमाणाओ''त्ति, इत्थं चैतदङ्गीकर्त्तव्यं, यतो मूर्त्तद्रव्यालम्बनमेवेदं, मन्तारश्चामूर्त्तमपि धर्मास्तिकायादिकं मन्येरन्, न च तदनेन साक्षात् कर्त्तुं शक्यते, तथा चतुर्विधं च चक्षुर्दर्शनादि दर्शनमुक्तमतो भिन्नालम्बनमेवेदमवसेयं, तत्र च दर्शनसम्भवात्पश्यतीत्यपि न दुष्टम्, एकप्रमात्रपेक्षया तदनन्तरभावित्वाच्चोपन्यस्तमित्यलमतिविस्तरेण ।

'ते चेव उ विउलमई अब्भहियतराए वितिमिरतराए विसुद्धतराए जाणइ पासइ' तानेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्कन्धान् विपुलाविशेषग्राहिणी मति र्विपुलमति-घटोऽनेन चिन्तितः स च सौवर्ण पाटलिपुत्रकोऽ-द्यतनो महानित्याद्यध्यवसायहेतुभूता मनोद्रव्यविज्ञप्तिः, अथवा विपुला मतिर्यस्यासौ विपुलमति-स्तद्वानेव, 'अभ्यधिकतरकान्' ऋजुमतिदृष्टस्कन्धापेक्षया बहुतरान् द्रव्यार्थःतया वर्णादिभिश्च वितिमिरतरा इव-अतिशयेन विगतान्धकारा इव ये ते वितिमिरतरास्त एव वितिमिरतरका अतस्तान्, अत एव 'विशुद्धतरकान्' विस्पष्टतरकान् जानाति पश्यति च।

तथा 'खेत्तओ णं उज्जुमई अहे जाव इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्ले खुड्डागपयरे उड्ढं जाव जोइसस्स उवरिमतले तिरियं जाव अंतोमणुस्सखेत्ते अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु छप्पन्नाए अंतरदीवगेसु सन्नीणं पंचिंदियाणं पज्जत्तगाणं मनोगए भावे जाणइ पासइ' तत्र क्षेत्रत ऋजुमतिरधः-अधस्ताद् यावदमुष्या रत्नप्रभायाः पृथिव्या उपरिमाधस्त्यान् क्षुल्लकप्रतरान् तावत्, किं? -मनोगतान् भावान् जानाति पश्यतीति योगः, तत्र रुचकाभिधानात्तिर्यग्लोकमध्यादधो यावन्नव योजनशतानि तावदमुष्या रत्नप्रभाया उपरिमाः क्षुल्लकप्रतराः, क्षुल्लकत्वं च तेषामधोलो-कप्रतरापेक्षया, तेभ्योऽपि येऽधस्तादधोलोकग्रामान् यावत्तेऽधस्तनाः क्षुल्लकप्रतरा ऊर्ध्वं यावज्ज्योतिषश्च-ज्योतिश्चकस्योपरितलं।

—'तिरियं जाव अंतोमणुस्सखेत्ते'त्ति तिर्यङ् यावदन्दर्मनुष्यक्षेत्रं मनुष्यक्षेत्रस्यान्तं यावदित्यर्थः, तदेव विभागत आह-'अड्ढाइज्जेसु'इत्यादि, तथा 'तं चेव विउलमई अड्ढाइज्जेहिं अंगुलेहिं अब्भहियतरागं विउलतरागं विसुद्धतरागं वितिमिरतरागं जाणइ पासइ'त्ति तत्र 'तं चेव'त्ति इह क्षेत्राधिकारस्य प्रधान्यात्तदेव मनोलब्धिसमन्वितजीवाधारं क्षेत्रभिगृह्यते, तत्राभ्यधिकतरकमायाम- विष्कम्भावाश्रित्य विपुलतरकं बाहल्यमाश्रित्य 'विशुद्धतरकं' निर्मलतरकं वितिमिरतरकं तु तिमिरकल्पतदावरणस्य विशिष्टतरक्षयोपशमसद्भावादिति, तथा-'कालओ णं उज्जुमई जहन्नेणं पलिओवमस्स असंखेज्जइभागं उक्कोसेणवि पलिओवमस्स असंखेज्जइभागं जाणइ पासइ अईयं अनागयं च, तं चेव विपुलमई विसुद्धतरागं वितिमिरतरागं जाणइ पासइ'।

कियन्नन्दीसूत्रमिहाध्येयम्? इत्याह-'जाव भावओ'त्ति भावसूत्रं यावदित्यर्थः, तच्चैवं-'भावओ णं उज्जुमई अनंते भावे जाणइ पासइ सव्वभावाणं अनंतभागं जाणइ पासइं, तं चेव विपुलमई विसुद्धरागं वितिमिरतरागं जाणइ पासइ'त्ति। 'केवलनाणस्से' त्यादि, 'एवं जाव भावओ'त्ति 'एवम्' उक्तन्यायेन यावद्भावत् इत्यादि तावत्केवलविषयाभिदायिनन्दी-सूत्रमिहाध्येयमित्यर्थः, तच्चैवं-'खेत्तओ णं केवलनाणी सव्वखेत्तं जाणइ पासइ' इह च धर्मास्तिका-यादिसर्वद्रव्यग्रहणेनाकाशद्रव्यस्य ग्रहणेऽपि यत्पुनरुपादानं तत्तस्य क्षेत्रत्वेन रूढत्वादिति, 'कालओ णं केवलनाणी सव्वं कालं जाणइ पासइ, भावओ णं केवली सव्वभावे जाणइ पासइ'॥

'मइअन्नाणस्से'त्यादि, 'मइअन्नाणपरिगयाइं'ति मत्यज्ञानेनमिथ्यादर्शनसंवलितेनावग्र-हादिनौत्पत्तिक्यादिना च परिगतानि-विषयीकृतानि यानि तानि तथा, जानात्यपायादिना पश्यत्य-वग्रहादिना, यवात्करणादिदं दृश्यं-'खेत्तओ णं मइअन्नाणी मइअन्नाणपरिगयं खेत्तं जाणइ पासइ, कालओ णं मइअन्नानि मइअन्नाणपरिगयं कालं जाणइ पासइ'त्ति।

'सुयअन्नाणे'त्यादि, 'सुयअन्नाणपरिगयाइं'ति श्रुताज्ञानेन-मिथ्यादृष्टिपरिगृहीतेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्श्रुतेन लौकिकश्रुतेन कुप्रावचनिकश्रुतेन वा यानि परिगतानि-विषयीकृतानि तानि तथा 'आघवेइ'त्ति आग्राहयति अर्थापयति वा आख्यापयति वा प्रत्याययतीत्यर्थः 'प्रज्ञापयति' भेदतः कथयति 'प्ररूपयति' उपपत्तितः कथयतीति, वाचनान्तरे पुनरिदमधिकमवलोक्यते-'दंसेति निदंसेति उवदंसेति'त्ति तत्र च दर्शयति उपमामात्रतस्तद्य यथा गौस्तथा गवय इत्यादि, निदर्शयति हेतुदृष्टान्तोपन्यासेन उपदर्शयति उपनयनिगमनाभ्यां मतान्तरदरर्शनेन वेति।

'दव्वओ मं विभंगनानि'त्यादौ 'जाणइ'त्ति विभङ्गज्ञानेन 'पासइ'त्ति अवधिदर्शनेनेति।

**मू. (३९६)** *नाणी णं भंते ! णनणीति कालओ केवच्चिरं होइ ?, गोयमा ! नाणी दुविहे पन्नत्ते, तंजहा-साइए वा अपज्जवसिए साइए वा सपज्जवसिए, तत्थ णं सं जे साइए सपज्जवसिए से जहन्नेणं अंतोमुहुत्तं उक्कोसेणं छावट्ठिं सागरोवमाइं सातिरेगाइं। आभिनिबोहियणाणी णं भंते ! आभिनिबोहिय० एवं नाणी आभिनिबोहियनामी जाव केवलनाणी। अन्नाणी मइअन्नाणी सुयअन्नाणी विभंगनाणी, एएसिं दसण्हवि संचिट्ठणा जहा कायठिईए ॥*

*अंतरं सव्वं जहा जीवाभिगमे ॥ अप्पाबहुगानि तिन्नि जहा बहुवत्तव्वयाए।*

*केवतिया णं भंते ! आभिनिबोहियनाणपज्जवा पन्नत्ता ?, गोयमा ! अनंता आभिनिबोहियनाणपज्जवा पन्नत्ता। केवतिया णं भंते ! सुयनाणपज्जवा पन्नत्ता ?, एवं चेव एवं जाव केवलनाणस्स। एवं मइअन्नाणस्स सुयअन्नाणस्स, केवतिया णं भंते ! विभंगनाणपज्जवा पन्नत्ता गोयमा ! अनंता विभंगनाणपज्जवा पन्नत्ता।*

*एएसि णं भंते ! आभिनिबोहियनाणपज्जवाणं सुयनाण० ओहिनाण० मणपज्जवनाण० केवलनाणपज्जवाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा मनपज्जवनाणपज्जवा ओहिनाणपज्जवा अनंतगुणा सुयनाणपज्जवा अनंतगुणा आभिनिबोहियनाणपज्जवा अनंतगुणा केवलनाणपज्जवा अनंतगुणा।*

*एएसि णं भंते ! मइअन्नाणपज्जवाणं सुयअन्नाण० विभंगनाणपज्जवाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा विभंगनाणपज्जवा सुयअन्नाणपज्जवा अनंतगुणा मइअन्नाणपज्जवा अनंतगुणा।*

*एएसि णं भंते ! आभिनिबोहियनाणपज्जवाणं जाव केवलनाणप० मइअन्नाणप० सुयअन्नाणप० विभंगनाणप० कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा मणपज्जवनाणपज्जवा विभंगनाणपज्जवा अनंतगुणा ओहिनाणपज्जवा अनंतगुणा सुयअन्नाणपज्जवा अनंतगुणा सुयनाणपज्जवा विसेसाहिया मइअन्नाणपज्जवा अनंतगुणा आभिनिबोहियनाणपज्जवा विसेसाहिया केवलनाणपज्जवा अनंतगुणा। सेवं भंते ! सेवं भंते ! त्ति ॥*

**वृ.** अथ कालद्वारे 'साइए'इत्यादि, इहाद्यः केवली द्वितीयस्तु मत्यादिमान्, तत्राद्यस्य साद्यपर्य्यवसितेति शब्दत एव कालः प्रतीयत इति ॥

द्वितीयस्यैव तं जघन्येतरं भेदमुपदर्शयितुमिदमाह-'तत्त णं जे से साइए' इत्यादि, तत्र च 'जहन्नेणं अंतोमुहुत्तं'ति आद्यं ज्ञानद्वयमाश्रित्योक्तं, तस्यैव जघन्यतोऽन्तर्मुहूर्त्तमात्रत्वात्, तथा 'उक्कोसेणं छावट्ठिं सागरोवमाइं साइरेगाइं'ति यदुक्तं तदाद्यं ज्ञानत्रयमाश्रित्य, तस्य हि उत्कर्षेणैतावत्येव स्थिति, सा चैवं भवति–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ १ ॥ "दो वारे विजयाइसु गयस्स तिन्नच्चुए अहव ताइं ।
अइरेगं नरभवियं नानाजीवाण सव्वद्धं ॥"

'आभिनिबोहिये'त्यादि सूचामात्रम्, एवं चैतद्दष्टव्यम्-'आभिनिबोहियनाणी णं भंते ! आभिनिबोहियनाणित्ति कालओ केवच्चिरं होइ ?' त्ति 'एवं नाणी आभिनिबोहियनाणी'त्यादि, अयमर्थः-'एव'मित्यनन्तरोक्तेन 'आभिनिबोहिए'त्यादिना सूत्रक्रमेण ज्ञान्याभिनिबोधिकज्ञानिश्रुत-ज्ञान्यवधिज्ञानिमनःपर्यवज्ञानिकेवलज्ञान्यज्ञानिमत्यज्ञानिश्रुताज्ञानविभङ्गज्ञानिनां 'संचिट्ठणे'ति अवस्थितिकालो यथा कायस्थितौ प्रज्ञापनाया अष्टादशे पदेऽभिहितस्तथा वाच्यः, तत्र ज्ञानिनां पूर्वमुक्त एवावस्थितिकालः, यच्च पूर्वमुक्तस्याप्यतिदेशतः पुनर्भणनं तदेकप्रकरणपतितत्वादित्यव-सेयम्, आभिनिबोधिकज्ञानादिद्वयस्य तु जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टतस्तु सातिरेकानि षट्पष्टिः सागरोपमानि, अवधिज्ञानिनामप्येव, नवरं जघन्यतो विशेषः, स चायम्-'ओहिनाणी जहन्नेणं एक्कं समयं' कथं ?, यदा विभङ्गज्ञानी सम्यक्त्वं प्रिपद्यते ततप्रथमसमय एव विभङ्गमवधिज्ञानं भवति तदनन्तरमेव च तत् प्रतिपतति तदा एकं समयमवधिर्भवतीत्युच्यते ।

'मनपज्ञवनाणी णं भंते ! पुच्छा, गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं देसुना पूर्वकोटी कथं ? संयतम्याप्रमत्ताद्धायां वर्त्तमानस्य मनःपर्यवज्ञानमुत्पन्नं तत उत्पत्तिसमयसमयनन्तरमेव विनष्टं चेत्येवमेकं समयं, तथा चरणकाल उत्कृष्टो देशोना पूर्वकोटी, तत्प्रतिपत्तिसमनन्तरमेव च यदा मनःपर्यवज्ञानमुत्पन्नमाजन्म चानुवृत्तं तदा भवति मनःपर्यवस्योत्कर्षतो देशोना पूर्वकोटीति केवलनाणी णं पुच्छा, गोयमा ! साइए अपज्ञवसिए, अन्नाणी मइअन्नाणी सुयअन्नाणी णं पुच्छा, गोयमा ! अन्नाणी मइअन्नाणी सुयअन्नाणी य तिविहे **पन्नत्ते**, तंजहा अनाइए वा अपज्ञवसिए अभव्यानां १ अनाइए वा सपज्ञवसिए भव्यानां २ साइए वा सपज्ञवसिए प्रतिपति- तसम्यग्दर्शनानां ३, 'तत्थ णं जे से साइए सपज्ञवसिए से जहन्नेणं अंतोमुहुत्तं" सम्यक्त्वप्रतिपति-तस्यान्तर्मुहूर्त्तोपरि सम्यक्त्वप्रतिपत्तौ, 'उक्कोसेणं अनंतं कालं अनंता उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अवड्ढं पोग्गलपरियट्टं देसूणं' सम्यक्त्वाद्भ्रष्टस्य वनस्पत्यादिष्वनन्ता उत्सर्प्पिण्य-वसर्प्पिणीरतिवाह्य पुनः प्राप्तसम्यग्दर्शनस्येति । 'विभंगनाणी णं भंते ! पुच्छा, गोयमा ! जहन्नेणं एक्कं समयं' उत्पत्तिसम-यानन्तरमव प्रतिपाते 'उक्कोसेणं तेत्तीसं सागरोवमाइं देसूनपुव्वकोडिअब्भ- हियाइं' देशोनां पूर्वकोटिं विभङ्गितया मनुष्येषु जीवित्वाऽप्तिष्ठानादावुत्पन्नस्येति ।

अन्तरद्वारे-'अंतरं सव्वं जहा जीवाभिगमे'त्ति पञ्चानां ज्ञानानां त्रयाणां चाज्ञानानामन्तरं सर्वं यथा जीवाभिगमे तथा वाच्यं, तच्चैवम्-आभिनिबोहियनाणस्स णं भंते ! अंतरं कालओ केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टिं देसूणं, सुयनानिओहिनामीमणपज्ञवनाणीणं एवं चेव, केवलनानिस्स पुच्छा, गोयमा ! नत्थि अंतरं, मइअन्नानिस्स सुयअन्नानिस्स य पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं छावट्ठिं सागरोवमाइं साइरेगाइं । विभंगनानिस्स पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं वणस्सइ-कालो'त्ति ।

अल्पबहुत्वद्वारे-'अप्पाबहुगानि तिन्नि जहा बहुवत्तव्वयाए'त्ति अल्पबहुत्वानि त्रीनि ज्ञानिनां



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परेणाज्ञानिनांच ज्ञान्यज्ञानिनांच यथाऽल्पबहुत्ववक्तव्यतायां प्रज्ञापनासम्बन्धिन्यामभिहितानि तथा वाच्यानीति, तानि चैवम्-'एएसि णं भंते ! जीवाणं आभिनिबोहियनाणीणं ५ कयरे २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा मणपज्ञवनाणी ओहिनाणी असंखेज्ञगुणा आभिनिबोहियनाणी सुयनाणी दोवि तुल्ला विसेसाहिया केवलनाणी अनंतगुणा' इत्येकम् १ ।

'एएसि णं भंते ! जीवाणं मइअन्नाणीणं ३ कयरे २ हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ? गोयमा ! सव्वत्थोवा जीवा विभंगनाणी मइअन्नाणी सुयअन्नाणी दोवि तुल्ला अनंतगुणा' इति द्वितीयम् २ । 'एएसि णं भंते ! जीवाणं आभिनिबोहियनाणीणं ५ मइअन्नाणीणं ३ कयरे २ हिंतो जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा मणपज्ञवणाणी ओहिनाणी असंखेज्ञगुणा आभिनिबोहियनाणी सुयनाणी य दोवि तुल्ला विसेसाहिया विभंगनाणी असंखेज्ञगुणा केवलनाणी अनंतगुणा मइअन्नाणी सुयअन्नाणी दोवि तुल्ला अनंतगुण' त्ति, तत्र ज्ञानिसूत्रे स्तोका मनःपर्यायज्ञानिनो यस्मादृद्धिप्राप्तादिसंयतस्यैव तद्भवति, अवधिज्ञानिनस्तु चतसृष्वपि गतिषु सन्तीति तेभ्योऽसङ्ख्येयगुणाः, आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्चान्योऽन्यं तुल्याः, अवधिज्ञानिभ्यस्तु विशेषाधिकाः, यतस्तेऽवधिज्ञानिनोऽपि मनःपर्यायज्ञानिनोऽपि अवधिमनःपर्यायज्ञानिनोऽपि अवध्यादिरहिता अपि पञ्चेन्द्रिया भवन्ति सास्वादनसम्यग्दर्शनसद्भावे विकलेन्द्रिया अपिच मतिश्रुतज्ञानिनो लभ्यन्त इति, केवलज्ञानिनस्त्वनन्तगुणाः, सिद्धानां सर्वज्ञानिभ्योऽनन्तगुणत्वात् ।

अज्ञानिसूत्रे तु विभङ्गज्ञानिनः स्तोकाः, यस्मात् पञ्चेन्द्रिया एव ते भवन्ति, तेभ्योऽनन्तगुणा मत्यज्ञानिनः श्रुताज्ञानिनः, यतो मत्यज्ञानिनः श्रुताज्ञानिनश्चैकेन्द्रिया अपीति न तेभ्यस्तेऽनन्तगुणाः, परस्परतश्च तुल्याः । तथा मिश्रसूत्रे स्तोका मनःपर्यायज्ञानिनः, अवधिज्ञानिनस्तु तेभ्योऽसङ्ख्येयगुणाः, आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्चान्योऽन्यं तुल्याः प्राक्तनेभ्यश्च विशेषाधिकाः, इह युक्ति पूर्वोक्तेव, आभिनिबोधिकज्ञानिश्रुतज्ञानिभ्यो विभङ्गज्ञानिनोऽसङ्ख्येयगुणाः, कथम् उच्यते, यतः सम्यग्दृष्टिभ्यः सुरनारकेभ्यो मिथ्यादृष्टयस्तेऽसङ्ख्येयगुणा उक्तास्तेन विभङ्गज्ञानिन आभिनिबोधिकज्ञानिःश्रुतज्ञानिभ्योऽसङ्ख्येयगुणाः, केवलज्ञानिनस्तु विभङ्गज्ञानिभ्योऽनन्तगुणाः, सिद्धानामेकेन्द्रियवर्जसर्वजीवेभ्योऽनन्तगुणत्वात्, मत्यज्ञानिनः श्रुताज्ञानिनश्चान्योऽन्यं तुल्याः, केवलज्ञानिभ्यस्त्वनन्तगुणाः, वनस्पतिष्वपि तेषां भावात्, तेषां च सिद्धेभ्योऽप्यनन्तगुणत्वादिति

अथ पर्यायद्वारे-'केवइया' इत्यादि, आभिनिबोधिकज्ञानस्य पर्यवाः--विशेषधर्म्मा आभिनिबोधिकज्ञानपर्यवाः, ते च द्विविधाः स्वपरपर्यायभेदात्, तत्र येऽवग्रहादयो मतिविशेषाः क्षयोपशमवैचित्र्यात्ते स्वपर्यायास्ते चानन्तगुणाः, कथम् ?, एकस्मादवग्रहादेरन्योऽवग्रहादिरनन्तभागवृद्धया विशुद्धः १ अन्यस्त्वसङ्ख्येयभागवृद्धया २ अपरः सङ्ख्येयभागवृद्धया ३ अन्यतरः सङ्ख्येयगुणवृद्धया ४ तदन्योऽसङ्ख्येयगुणवृद्धया ५ अपरस्त्वनन्तगुणवृद्धया ६ इति, एवं च सङ्ख्यातस्य सङ्ख्यातभेदत्वादसंख्यातस्य चासङ्ख्यातभेदत्वादनन्तस्य चानन्तभेदत्वादनन्ता विशेषा भवन्ति, अथवा तज्ज्ञेयस्यानन्तत्वात् प्रतिज्ञेयं च तस्य भिद्यमानत्वात् अथवा मतिज्ञानमविभागपरिच्छेदैर्बुद्धया छिद्यमानमनन्तखण्डं भवतीत्येवमनन्तास्तत्पर्यवाः, तथा ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदार्थानन्तपर्यायास्ते तस्य परपर्यायास्ते च स्वपर्यायेभ्योऽनन्तगुणाः, परेषामनन्तगुणत्वादिति, ननु यदि ते परपर्यायास्तदा तस्येति न व्यपदेष्टुं युक्तं, परसम्बन्धित्वात्, अथ तस्य ते तदा न परपर्यायास्ते व्यपदेष्टव्याः, स्वसम्बन्धित्वादिति, अत्रोच्यते, यस्मात्तत्रासम्बद्धास्ते तस्मात्तेषां परपर्यायव्यपदेशः, यस्माच्च ते परित्यज्यमानत्वेन तथा स्वपर्यायाणां स्वपर्याया एते इत्येवं विशेषण-हेतुत्वेन च तस्मिन्नुपयुज्यन्ते तस्मात्तस्य पर्यवा इति व्यपदिश्यन्ते, यथाऽसम्बद्धमपि धनं स्वधनं उपयुज्यमानत्वादिति, आह च–

॥१॥ "जइ ते परपज्जाया न तस्स अह तस्स न परपज्जाया।
जं तंमि असंबद्धा तो परपज्जायववएसो ॥

॥२॥ चायसपज्जायविसेसणाइणा तस्स जमुवजुज्जंति।
सधणमिवासंबद्धं हवंति तो पज्जवा तस्स ॥ त्ति।

'केवइया णं भंते! सुयनाणे'त्यादौ, 'एवं चेव'त्ति अनन्ताः श्रुतज्ञानपर्यायाः प्रज्ञप्ता इत्यर्थः, ते च स्वपर्यायाः परपर्यायाश्च, तत्र स्वपर्याया ये श्रुतज्ञानस्य स्वतोऽक्षर श्रुतादयो भेदास्ते चानन्ताः क्षयोपशमवैचित्र्यविषयानन्त्याभ्यां श्रुतनुसारिणां बोधानामनन्तत्वात् अविभाग-पलिच्छेदानन्त्याच्च, परपर्यायास्त्वनन्ताः सर्वभावानां प्रतीता एव, अथवा श्रुतं-ग्रन्थनुसारि ज्ञानं श्रुतज्ञानं, श्रुतग्रन्थश्चा-क्षरात्मकः, अक्षराणि चाकारादीनि, तेषां चैकैकमक्षरं यथायोगमुदात्तानुदात्तस्वरितभेदात् सानुना-सिकनिरनुनासिकभेदात् अल्पप्रयत्नमहाप्रयत्नभेदादिमिश्च संयुक्तसंयोगा-संयुक्तसंयोगभेदात् द्वयादिसंयोगभेदादभिधेयानन्त्याच्च भिद्यमानमनन्तभेदं भवति, ते च तस्य स्वपर्यायाः, परपर्या-याश्चान्येऽनन्ता एव, एवं चानन्तपर्यायं तत्, आह च–

॥१॥ "एक्केक्कमक्खरं पुण सपरपज्जायभेयओ भिन्नं।
तं सव्वदव्वपज्जायरासिमाणं मुणेयव्वं ॥

॥२॥ जे लब्भइ केवलो से सवन्नसहिओ य पज्जवेऽगारो।
ते तस्स सपज्जाया सेसा परपज्जवा तस्स" त्ति

एवं चाक्षरात्मकत्वेनाक्षरपर्यायोपेतत्वादनन्ताः श्रुतज्ञानस्य पर्याया इति, 'एवं जाव'त्तिकरणादिदं दृश्यं-'केवइया णं भंते! ओहिनाणपज्जवा पन्नत्ता?, गोयमा! अनंता ओहिनाण-पज्जवा पन्नत्ता। केवइया णं भंते! मणपज्जवनाणपज्जवा पन्नत्ता?, गोयमा! अनता मणज्ज्वनाण-पज्जवा पन्नत्ता। केवइया णं भंते! केवलनाणपज्जवा पन्नत्ता?, गोयमा! अनंता केवलनाणपज्जवा पन्नत्ता' इति, तत्रावधिज्ञानस्य स्वपर्याया येऽवधिज्ञानभेदाः सभवप्रत्ययक्षायोपशमिकभेदात् नारकतिर्यगमनुष्यदेवरूपतत्स्वामिभेदाद् असङ्ख्यातभेदतद्विषयभूतक्षेत्रकालभेदाद् अनन्तभेदत-द्विषयद्रव्यपर्यायभेदादविभागपलिच्छेदाच्च ते चैवमनन्ता इति, मनःपर्यायज्ञानस्य केवलज्ञानस्य च स्वपर्याया ये स्वाम्यादिभेदेन स्वगता विशेष्यास्ते चानन्ता अनन्तद्रव्यपर्यायपरिच्छेदा-पेक्षयाऽविभागपलिच्छेदापेक्षया वेति, एवं मत्यज्ञानादित्रयेऽप्यनन्तपर्यायत्वमूह्यमिति। अथ पर्यवाणामेवाल्पबहुत्वनिरूपणायाह–

'एएसि ण'मित्यादि, इह च स्वपर्यायापेक्षयैवैषामल्पबहुत्वमवसेयं, स्वपर्यायापेक्षया तु सर्वेषां तुल्यपर्यायत्वादिति, तत्र सर्वस्तोका मनःपर्यायज्ञानपर्यायास्तस्य मनोमात्रविषयत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेभ्योऽवधिज्ञानपर्याय अनन्तगुणाः, मनःपर्यायज्ञानापेक्षयाऽवधिज्ञानस्य द्रव्यपर्यायतोऽनन्तगुणविषयत्वात्, तेभ्यः श्रुतज्ञानपर्याया अनन्तगुणाः, ततस्तस्य रूप्यरूपिद्रव्यविषयत्वेनान्तगुणविषयत्वात्, ततोऽप्याभिनिबोधिकज्ञानपर्याया अनन्तगुणाः, ततस्तस्याभिलाप्यानभिलाप्यद्रव्यादिविषयत्वेनानन्तगुणविषयत्वात्, ततःकेवलज्ञानपर्याया अनन्तगुणाः, सर्वद्रव्यपर्यायाविषयत्वात्तस्येति।

एवमज्ञाननसूत्रेऽप्यल्पबहुत्वकारणं सूत्रानुसारेणोहनीयं, मिश्रसूत्रे तु स्तोका मनपर्यायज्ञानपर्यवाः, इहोपपत्ति प्राग्वत्, तेभ्यो विभङ्गज्ञानपर्यवा अनन्तगुणाः, मनःपर्यायज्ञानापेक्षया विभङ्गस्य बहुतमविषयत्वात्, तथाहि-विभङ्गज्ञानमूर्ध्वाध उपरिमग्रैवेयकादारभ्य सप्तमपृथिव्यन्ते क्षेत्रे तिर्यक् चासङ्ख्यातद्वीपसमुद्ररूपे क्षेत्रे यानि रूपिद्रव्यानि तानि कानिचिज्ञ्जानाति कांश्चित्तत्पर्यायांश्च, तानि च मनः-पर्यायज्ञानविषयापेक्षयाऽनन्तगुणानीति, तेभ्योऽवधिज्ञानपर्यवा अनन्तगुणाः, अवधेः सकलरूपिद्रव्यप्रतिद्रव्यासङ्ख्यातपर्यायविषयत्वेन विभङ्गापेक्षया अनन्तगुणविषयत्वात्, तेभ्योऽपि श्रुताज्ञानपर्यवा अनन्तगुणाः, श्रुताज्ञानस्य श्रुतज्ञानवदोघादेशेन समस्तमूर्त्तामूर्त्तद्रव्यसर्वपर्यायविषयत्वेनावधिज्ञानापेक्षयाऽनन्तगुणविषयत्वात्, तेभ्यः तेभ्योऽपि मत्यज्ञानपर्यवा अनन्तगुणाः, यतः श्रुतज्ञानमभिलाप्यवस्तुविषयमेव, मत्यज्ञानं तु तदनन्तगुणानभिलाप्यवस्तुविषयमपीति, ततोऽपि मतिज्ञानपर्यवा विशेषधिकाः, केषाञ्चिदपि मत्यज्ञानाविषयीकृतभावानां विषयीकरणात्, तद्धि मत्यज्ञानापेक्षया स्फुटतरमिति, ततोऽपि केवलज्ञानपर्यवा अनन्तगुणाः, सर्वाद्धाभाविनां समस्तद्रव्यपर्यायाणामनन्यसाधारणावभासनादिति ॥

शतकं-८ उद्देशकः-२ समाप्तः

## —: शतकं-८ उद्देशकः-३ :—

**वृ.** अनन्तरमाभिनिबोधिकादिकं ज्ञानं पर्यवतः प्ररूपितं, तेन च वृक्षादयोऽर्था ज्ञायन्तेऽतस्तृतीयोद्देशके वृक्षविशेषानाह—

**मू. (३९७)** *कइविहा णं भंते! रुक्खा पन्नत्ता?, गोयमा! तिविहा रुक्खा पन्नत्ता, तंजहा-संखेज्जजीविया असंखेज्जजीविया अनंतजीविया।*

*से किं तं संखेज्जजीविया?, संखे० अनेगविहा पन्नत्ता, तंजहा-ताले तमाले तक्कलि तेतलि जहा पन्नवणाए जाव नालिएरी, जे यावन्ने तहप्पगारा, सेत्तं संखेज्जजीविया।*

*से किं तं असंखेज्जजीविया?, असंखेज्जजीविया दुविहा पन्नत्ता, तंजहा-एगट्ठिया य बहुबीयगा य।*

*से किं तं एगट्ठिया?, २ अनेगविहा पन्नत्ता, तंजहा-निंबंधजंबू० एवं जहा पन्नवणापए जाव फला बहुबीयगा, सेत्तं बहुबीयगा, सेत्तं असंखेज्जजीविया।*

*से किं तं अनंतजीविया?, अंतजीविया अनेगविहा पन्नत्ता, तंजहा-आलुए मूलए सिंगबेरे, एवं जहा सत्तमसए जाव सीउण्हे सिउंढी, जे यावन्ने त० सेत्तं अनंतजीविया॥*

**वृ.** 'कई'त्यादि, 'संखेज्जजीविय'त्ति सङ्ख्याता जीवा येषु सन्ति ते सङ्ख्यातजीविकाः, एवमन्यदपि पदद्वयं, 'जहा पन्नवणाए'त्ति यथा प्रज्ञापनायां तथाऽत्रेदं सूत्रमध्येयं, तत्र चैवमेतत्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ ताले तमाले तक्कलि तेतलि साले य सालकल्लाणे ।
सरले जायइ केयइ कंदलि तह चम्मरुक्खे य ॥
॥२॥ भुयरुक्खे हिंगुरुक्खे लवंगरुक्खे य होइ बोद्धव्वे ।
पूयफली खज्जूरी बोद्धव्वा नालिएरी य ॥

'जे यावन्ने तहप्पगारे'ति ये चाप्यन्ये तथाप्रकारा वृक्षविशेषास्ते सङ्ख्यातजीविका इति प्रक्रमः । 'एगट्ठिया य'त्ति एकमस्थिकं-फलमध्ये बीजं येषां ते एकास्थिकाः 'बहुबीयगा य'त्ति बहूनि बीजानि फलमध्ये येषां ते बहुबीजकाः-अनेकास्थिकाः 'जहा पन्नवणापए'त्ति यथा प्रज्ञापनाख्ये प्रज्ञापनाप्रथमपदे तथाऽत्रेदं सूत्रमध्येयं, तच्चैवं–

॥१॥ "निंबंबजंबुकोसंबसालअंकोल्लपीलुसल्लूया ।
सल्लइमोयइमालुय बउलपलासे करंजे य ॥" इत्यादि ।

–तथा "से किं तं बहुबीयगा ?, बहुवीयगा अनेगविहा पन्नत्ता, तंजहा–
॥१॥ अत्थियतेंदुकविट्ठे अंबाडमगाउलुंगबिल्ले य ।
आमलगफणसदाडिम आसोट्ठे उंबरवडे य ॥" इत्यादि ।

अन्तिमं पुनरिदं सूत्रमत्र-"एएसिं मूलिवा असंखेज्जजीविया कंदावि खंधावि तयावि सालावि पवालावि, पत्ता पत्तेयजीविया पुप्फा अनेगजीविया फला बहुबीयग"त्ति, एतदन्तं चेदं वाच्यमिति दर्शयन्नाह-'जावे'त्यादि । अथ जीवाधिकारादिदमाह–

**मू. (३९८)** *अह भंते ! कुम्मे कुम्मावलिया गोहे गोहावलिया गोणे गोणावलिया मणुस्से मणुस्सावलिया महिसे महिसावलिया एएसि णं दुहा वा तिहा वा संखेज्जहावि छिन्नाणं जे अंतरा तेवि णं तेहिं जीवपएसेहिं फुडा ?, हंता फुडा ।*

*पुरिसे णं भंते ! (जं अंतरं) ते अंतरे हत्थेण वा पादेण वा अंगुलियाए वा सलागाए वा कट्ठेण वा कलिंचेण वा आमुसमाणे वा संमुसमाणे वा आलिहमाणे वा विलिहमाणे वा अन्नयरेण वा तिक्खेणं सत्थजाएणं आच्छिंदमाणे वा विच्छिंदमाणे वा अगनिकाएणं वा समोडहमाणे तेसिं जीवपएसाणं किंचि आबाहं वा विबाहं वा उप्पायइ छविच्छेदं वा करेइ ?, नो तिणट्ठे समट्ठे, नो खलु तत्थ सत्थं संकमइ ॥*

**वृ.** 'अहे'त्यादि, 'कुम्मे'त्ति 'कूर्म' कच्छपः 'कुम्मावलिय'त्ति 'कूर्मावलिका' कच्छपपङ्क्तिः 'गोहे'त्ति गोधा सरीसृपविशेषः 'जं अंतर'न्ति यान्यन्तरालनि 'ते अंतरे'त्ति तान्यन्तरानि 'कलिचेण व'त्ति क्षुद्रकाष्ठरूपेण 'आमुसमाणे व'त्ति आमृशन् ईषत् स्पृशन्नित्यर्थः 'संमुसमाणे य'त्ति संमृशन् सामस्त्येन स्पृशन्नित्यर्थः 'आलिहमाणे व'त्ति आलिखन् ईषत् सकृद्वाऽऽकर्षन् 'विलिहमाणे व'त्ति विलिखन् नितरामनेकशो वा कर्षन् ।

आच्छिंदमाणे व'त्ति ईषत् सकृद्वा छिन्दन् 'विच्छिंदमाणे व'त्ति नितरामसकृद्वा छिन्दन् 'समोडहमाणे'त्ति समुपदहन् 'आबाहं व'त्ति ईषद्बाधां 'वाबाहं व'त्ति व्याबाधां-प्रकृष्टपीडाम् ।

कूर्म्मादिजीवाधिकारात्तदुत्पत्तिक्षेत्रस्य रत्नप्रभादेश्चरमाचरमविभागदर्शनायाह–

**मू. (३९९)** *कति णं भंते ! पुढवी ओ पन्नत्ता ओ ?, गोयमा ! अट्ठपुढवीओ पन्नत्ताओ, तंजहा-रयणप्पभा जाव अहे सत्तमा पुढवि ईसिपब्भारा । इमा णं भंते ! रयणप्पभापुढवी किं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*चरिमा अचरिमा ?, चरिमपदं निरवसेसं भानियव्वं जाव वेमानिया णं भंते ! फासचरिमेणं किं चरिमा अचरिमा ?, गोयमा ! चरिभावि अचरिमावि । सेवं भंते ! २ ॥*

**वृ.** 'कइ ण'मित्यादि, तत्र 'इमा णं भंते ! रयणप्पभापुढवी किं चरिमा अचरिमा ?' इति, अथ केयं चमाचरमपरिभाषा ? इति, अत्रोच्यते, चरमं नाम प्रान्तं पर्यन्तवर्ति, आपेक्षिकं च चरमत्वं, यदुक्तम्-''अन्यद्रव्यापेक्षयेदं चरमं द्रव्यमिति, यथा पूर्वशरीरापेक्षया चरमं शरीर''मिति, तथा अचरमं ना अप्रान्तं मध्यवर्त्ति, आपेक्षिकं चचरमत्वं, यदुक्तम्-''अन्यद्रव्यापेक्षयेदंचरमं द्रव्यं, यथाऽन्यशरीरापेक्षया मध्यशरीरमिति, इह स्थाने प्रज्ञापनादशमं पदं वाच्यं, एतदेवाह-

'चरिमे'त्यादि, तत्र पदद्वयं दर्शितमेव, शेषु तु दर्श्यते-'चरिमाइं अचरिमाइं चरिमंतपएसा अचरिमंतपएसा ?, गोयमा ! इमा णं रयणप्पभापुढवी नो चरिमा नो अचरिमा नो चरिमाइं नो अचरिमाइं नोच रिमंतपएसा नो अचरिमंतपएसा नियमा अचरिमं चरमानि न य चरिमंतपएसा य अचरिमंतपएसा य' इत्यादि, तत्र किं चरिमा अचरिमा ? इत्येकवचनान्तः प्रश्नः 'चरिमाइं अचरिमाइं' इति बहुवचनान्तः प्रश्नः, 'चरिमंतपएसा अचरिमंतपएस'त्ति चरिमाण्येवान्तवर्तित्वादन्ताश्चरिमान्तास्तेषां प्रदेशा इति समासः, तथाऽचरममेवान्तो-विभागोऽचरमान्तस्तस्य प्रदेशा अचरमान्तप्रदेशाः, गोयमा ! नो चरिमा नो अचरिमा चरमत्वं ह्येतदापेक्षिकम्, अपेक्षणीयस्याभावाच्च कथं चरिमा भविष्यति ?, अचरमत्वमप्यपेक्षयैव भवति ततः कथमन्यस्यापेक्षणीयस्याभावेऽचरमत्वं भवति ?, यदि हि रत्नप्रभाया मध्येऽन्या पृथिवी स्यात्तदा तस्याश्चरमत्वं युज्यते, न चास्ति सा, तस्मान्न चरमासौ, तथा यदि तस्या बाह्यतोऽन्या पृथिवी स्यात्तदा तस्या अचरमत्वं युज्यते न चास्ति सा तस्मान्नाचरमाऽसाविति, अयं च वाक्यार्थोऽत्र-किमियं रत्नप्रभा पश्चिमा उत मध्यमा ? इति, तदेतद्द्वितयमपि यथा न संभवति तथोक्तम् ।

अथ 'नो चरिमाइं नो अचरिमाइं'ति कथं ?, यदा तस्याश्चरमव्यपदेशोऽपि नास्ति तदा चरमाणीति कथं भविष्यति ?, एवमचरमाण्यपि, तथा 'नो चरिमंतपएसा नो अचरिमंतपएस'त्ति, अत्रापि चरमत्वस्याचरमत्वस्य चाभावात्तत्प्रदेशकल्पनाया अप्यभाव एवेत्यत उक्तं-नो चरिमान्तप्रदेशा नोअचरिमान्तप्रदेशा रत्नप्रभा इति, किं तर्हि 'नियमात्' नियमेनाचरमं च चरमानि च, एतदुक्तं भवति-अवश्यंतयेयं केवलभङ्गवाच्या न भवति, अवयवावयविरूपत्वादसङ्ख्येयप्रदेशावगाढत्वाद्यथोक्तनिर्वचनविषयैवेति ।

तथाहि रत्नप्रभा तावदनेन प्रकारेण व्यवस्थितेति विनयेजनानुग्रहाय लिख्यते, एवमनवस्थितायां यानि प्रान्तेषु व्यवस्थितानि तदध्यासितक्षेत्रखण्डानि तानि तथाविधविशिष्टैकपरिणामयुक्तत्वाच्चरमानि, यत्पुनर्मध्ये महद् रत्नप्रभाक्रान्तं क्षेत्रखण्डं तदपि तथा विधपरिणामयुक्तत्वाद्चरमं तदुभयसमुदायरूपा चेयमन्यथा तदभावप्रसङ्गात्, पदेशपरिकल्पनायां तु चरमान्तप्रदेशाश्चाचरमान्तप्रदेशाश्च, कथं ?, ये बाह्यखण्डप्रदेशास्ते चरमान्तप्रदेशाः ये च मद्यखण्डप्रदेशास्तेऽचरमान्तप्रदेशा इति, अनेन चैकान्तदुर्णयनिरासप्रधानेन निर्वचनसूत्रेणावयवावयविरूपं वस्त्वित्याह, तयोश्च भेदाभेद इति । एवं शर्करादिष्वपि, अथ कियद्दूरं तद्वाच्यम् ? इत्याह-

'जावे'त्यादि, ये वैमानिकभवसम्भवं स्पर्शं लप्स्यन्ते पुनस्तत्रानुत्पादेन मुक्तिगमनात्ते वैमानिकाः स्पर्शचरमेण चरमाः, ये तु तं पुनर्लप्स्यन्ते ते त्वचरमा इति ॥

शतकं-८ उद्देशकः-३ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## -: शतकं-८ उद्देशकः-४ :-

**वृ.** अनन्तरोद्देशके वैमानिका उक्तास्ते च क्रियावन्त इति चतुर्थोद्देशके ता उच्यन्ते, तत्र च 'रायगिहे'इत्यादिसूत्रम्-

**मू. (४००)** *रायगिहे जाव एवं वयासी-कति णं भंते ! किरियाओ पन्नत्ताओ ? गोयमा ! पंच किरियाओ पन्नत्ताओ, तंजहा-काइया अहिगरनिया ।*

*एवं किरियापदं निरवसेसं भानियव्वं जाव मायावत्तियाओ किरियाओ विसेसाहियाओ, सेवं भंते ! २ त्ति भगवं गोयमे० ॥*

**वृ.** 'एवं किरियापयं'ति, 'एवम्' एतेन क्रमेण क्रियापदं प्रज्ञापनाया द्वाविंशतितमं, तच्चैवं-'काइया अहिगरनिया पाओसिया पारियावनिया पाणाइवायकिरिया'इत्यादि, अन्तिमं पुनरिदं सूत्रमत्र 'एयासि णं भंते ! आरंभियाणं परिग्गहियाणं अप्पच्चक्खानियाणं मायावत्तियाणं मिच्छादंसण वत्तियाण च कयरेरहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?

गोयमा ! सव्वत्थोवा मिच्छादंसणवत्तियाओ किरियाओ' मिथ्याद्दशामेव तद्भावात्, 'अप्पच्चक्खाणकिरियाओ विसेसाहियाओ' मिथ्याद्दशामविरतसम्यग्द्दशां च तासां भावात्, 'परिग्गहियाओ विसेसाहियाओ' पूर्वोक्तानां देशविरतानां च तासां भावात्, 'आरंभियाओ किरियाओ विसेसाहियाओ' पूर्वोक्तानां प्रमत्तसंयतानां च तासां भावात्, 'मायावत्तियाओ विसेसाहियाओ' पूर्वोक्तानामप्रमत्तसंयतानां च तद्भावादिति, एतदन्तं चेदं वाच्यमिति दर्शयन्नाह-'जावे'त्यादि, इह गाथे-

॥ १ ॥ "मिच्छापच्चक्खाणे परिग्गहारंभमायकिरियाओ ।
कमसो मिच्छा अविरयदेसपमत्तप्पमत्ताणं ॥"

॥ २ ॥ मिच्छित्तवत्तियाओ मिच्छद्दिट्ठीण चेव तो थोवा ।
सेसाणं एक्केक्को वड्ढइ रासी तओ अहिया ॥ इति

शतकं-८ उद्देशकः-४ समाप्तः

## -: शतकं-८ उद्देशकः-५ :-

**वृ.** क्रियाधिकारात्पञ्चमोद्देशके परिग्रहादिक्रियाविषयं विचारं दर्शयन्नाह-

**मू. (४०१)** *रायगिहे जाव एवं वयासी-आजीविया णं बंते ! थेरे भगवंते एवं वयासी-समणोवासगस्स णं भंते ? सामाइयकडस्स समणोवस्सए अच्छमाणस्स केइ भंडे अवहरेज्ञा से णं भंते ! तं भंडं अनुगवेसमाणे किं सयं भंडं अनुगवेसइ परायगं भंडं अनुगवेसइ ?, गोयमा ! सयं भंडं अनुगवेसति नो परिगयं भंडं अनुगवेसेइ, तस्स णं भंते ! तेहिं सीलव्वयगुणवेरमणपच्चक्खाण-पोसहोववासेहिं से भंडे अभंडे भवति ?, हंता भवति ।*

*से केणं खाइ णं अट्ठेणं भंते ! एवं वुच्चइ सयं भंडं अनणुगवेसइ नो परायगं भंडं अनुगवेसइ गोयमा ! तस्स णं एवं भवति-नो मे हिरन्ने नो मे सुवन्ने नो मे कंसे नो मे दूसे नो मे विउलधणकणगर-यणमनिमोत्तियसंखसिलप्पवालरत्तरयणमादीए संतसारसावदेज्ञे, ममत्तभावे पुण से अपरिन्नाए भवति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-सयं भंडं अनुगवेसइ नो परायगं भंडं अनुगवेसइ ।*

*समणोवासगस्स णं भंते ! सामाइयकडस्स समणोवस्सए अच्छमाणस्स केति जायं चरेज्ञा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से णं भंते ! किं जायं चरइ अजायं चरइ ?, गोयमा ! जायं चरइ नो अजायं चरइ, तस्स णं भंते ! तेहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं सा जाया अजाया भवइ ?, हंता भवइ, से केणं खाइ णं अट्ठेणं भंते ! एवं वुच्चइ-जायं चरइ नो अजायं चरइ ।*

*गोयमा ! तस्स णं एवं भवइ-नो मे माता नो मे पिता नो मे भाया नो मे भगिनी नो मे भज्ञा नो मे पुत्ता नो मे धूया नो मे सुण्हा, पेज्ञबंधणे पुण से अवोच्छिन्ने भवइ, से तेणट्ठेणं गोयमा ! जाव नो अजायं चरइ ।।*

**वृ.** 'रायगिहे' इत्यादि, गौतमो भगवन्तमेवमवादीत्-'आजीविकाः' गोशालकशिष्या भदन्त 'स्थविरान्' निर्ग्रन्थान् भगवतः 'एवं' वक्ष्यमाणप्रकारमवादिषुः, यच्च ते तान् प्रत्यवादिषुस्तद्गौतमः स्वयमेव पृच्छन्नाह 'समणोवासगस्स ण' मित्यादि, 'सामाइयकडस्स' त्ति कृतसामायिकस्य-प्रतिपन्नाद्यशिक्षाव्रतस्य, श्रमणोपाश्रये हि श्रावकः सामायिकं प्रायः प्रतिपद्ये इत्यत उक्तं श्रमणोपाश्रये आसीनस्येति, 'केइ' त्ति कश्चित्पुरुषः 'भंडं' ति वस्त्रादिकं वस्तु गृहवर्त्ति साधूपाश्रय वर्त्ति वा 'अवहरेज्ञ' त्ति अपहरेत् 'से' त्ति स श्रमणोपासकः 'तं भंडं' ति द्-अपहृतं भाण्डम् 'अनुगवेसमाणे' त्ति सामायिकपरिसमाप्त्यनन्तरं गवेषयन् 'सभंडं' ति स्वकीयं भाण्डं 'परागयं' ति परकीयं वा ?, पृच्छतोऽयमभिप्रायः- स्वसम्बन्धित्वात्तत्स्कीयं सामायिकप्रतिपत्तौ च परिग्रहस्य प्रत्याख्यातत्वादस्वकीयमतः प्रश्नः, अत्रोत्तरं-'सभंडं' ति स्वभाण्डं, 'तेहिं' ति वैर्विवक्षितैर्यथाक्षयोपशमं गृहीतैरित्यर्थः, 'सीले' त्यादि, तत्र शीलव्रतानि-अणुव्रतानि गुणा-गुणव्रतानि विरमणानि-रागादिविरतयः प्रत्याख्यानं-नमस्कारसहितादि पौषधोपवासः-पर्वदिनोपवसनं तत एषां द्वन्द्वोऽतस्तैः, इह च शीलव्रतादीनां ग्रहणेऽपि सावद्ययोगविरत्या विरमणशब्दोपात्तया प्रयोजनं तस्या एव परिग्रहस्यापरिग्रहतानिमित्तत्वेन भाण्डस्याभाण्डताभवनहेतुत्वादिति 'से भंडे अभंडे भवइ' त्ति 'तत्' अपहृतं भाण्डमभाण्डं भवत्यसंव्यवहार्यत्वात् ।।

'से केणं' ति अथ केन 'खाइ णं' ति पुनः 'अट्ठेणं' ति अर्थेन हेतुना 'एवं भवइ' त्ति एवंभूतो मनःपरिणामो भवति 'नो मे हिरन्ने' इत्यादि, हिरण्यादिपरिग्रहस्य द्विविधं त्रिविधेन प्रत्याख्यातत्वात्, उक्तानुक्तार्थानुसङ्ग्रहेणाह-'नो मे' इत्यादि धनं-गनिमादि गवादि वा कनकं-प्रतीतं रत्नानि-कर्केतनादीनि मणयः-चन्द्रकान्तादयः मौक्तिकानि शङ्खाश्च प्रतीताः शिलाप्रवालानि-विद्रुमाणि, अथवा शिला-मुक्ताशिलाद्याः प्रवालानि-विद्रुमानि रक्तरत्नानि-पद्मरागादीनि तत एषां द्वन्द्वस्ततो विपुलानि-धनादिन्यादिर्यस्य स तत्तथा 'संत' त्ति विद्यमान "सार" त्ति प्रधानं 'सावएज्ज' त्ति स्वापतेयं द्रव्यम्, एतस्य च पदत्रयस्य कर्मधारयः, अथ यदि तद्भाण्डमभाण्ड, भवति तदा कथं स्वकीयं तद् गवेषयति ? इत्याशङ्क्याह-'ममत्ते' त्यादि, परिग्रहादिविषये मनोवाक्कायानां करणकारणे तेन प्रत्याख्याते ममत्वभावः पुनः-हिरण्यादिविषये ममतापरिणामः पुनः 'अपरिज्ञातः' अप्रत्याख्यातो भवति, अनुमतेरप्रत्याख्यातत्वात्, ममत्वभावस्य चानुमतिरूपत्वादिति ।

'केइ जायं चरेज्ञ' त्ति कश्चिद् उपपतिरित्यर्थः 'जायां' भार्यां 'चरेत्' सेवेत, 'सुण्ह' त्ति स्नुषापुत्रभार्या 'पेज्ञबंधणे' त्ति प्रेमैव-प्रीतिरेव बन्धनं प्रेमबन्धनं तत्पुनः 'से' तस्य श्राद्धस्याव्यवच्छिन्नं भवति, अनुमतेरप्रत्याख्यातत्वात् प्रेमानुबन्धस्य चानुमतिरूपत्वादिति ।।

**मू. (४०२)** *समणोवासगस्स णं भंते ! पुव्वामेव थूलए पाणाइवाए अपच्चक्खाए भवइ से*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं भंते ! पच्छा पच्चाइक्खमाणे किं करेति ?, गोयमा ! तीयं पडिक्कमइ पडुप्पन्नं संवरेइ अनागयं पच्चक्खाति ॥ तीयं पडिक्कममाणे किं तिविहं तिविहेणं पडिक्कमति १ तिविहं दुविहेणं पडिक्कमति २ तिविहं एगविहेणं पडिक्कमति ३ दुविहं तिविहेणं पडिक्कमति ४ दुविहं दुविहेणं पडिक्कमति ५ दुविहं एगविहेणं पडिक्कमति ६ एक्कविहं तिविहेणं पडिक्कमति ७ एक्कविहं दुविहेणं पडिक्कमति ८ एक्कविहं एगविहेणं पडिक्कमति ९ ।

गोयमा ! तिविहं तिविहेणं पडिक्कमति तिविहं दुविहेण वा पडिक्कमति तं चेव जाव एक्कविहं वा एक्कविहेणं पडिक्कमति, तिविहं वा तिविहेणं पडिक्कममाणे न करेति न कारवेति करेंतं नानुजाणइ मणसा वयसा कायसा १, तिविहं दुविहेणं पडि० न क० न का० करेंतं नानुजाणइ मणसा वयसा २, अहवा न करेइ न का० करेंतं नानुजा० मणसा कायसा ३, अह न करेइ ३ वयसा कायसा ४

तिविहं एगविहेणं पडि० न करेति ३ मणसा ५, अहवा न करेइ ३ वयसा ६, अहवा न करेइ ३ कायसा ७, दुविहं ति० प० न करेइ न का० मणसा वयसा कायसा ८, अहवा न करेइ करेंतं नानुजाणइ मण० वय० काय० ९, अहवा न कारवेइ करेंतं नानुजा० मणसा वयसा कायसा १०, दु० दु० प० न क० नका० म० व० ११, अहवा न क० नका० म० कायसा १२, अहवा न क० न का० वयसा कायसा १३, अहवा न करेइ करेंतं नानुजाणइ मणसा वयसा १४

अहवा न करे० करेंतं नानुजाणइ मणसा कायसा १५, अहवा न करेति करेंतं नानुजाणति वयसा कायसा १६, अहवा न कारवेति करेंतं नानुजाणति मणसा वयसा १७, अहवा न कारवेइ करेंतं नानुजाणइ मणसा कायसा १८, अहवा न कारवेति करेंतं नानुजाणइ वयसा कायसा १९, दुविहं एक्कविहेणं पडिक्कममाणे न करेति न कारवेति मणसा २०, अहवा न करेति न कारवेति वयसा २१, अहवा न करेति न कारवेति कायसा २२, अहवा न करेति करेंतं नानुजाणइ मणसा २३, अहवा न करेइ करेंतं नानुजाणइ वयसा २४, अहवा न करेइ करेंतं नानुजाणइ कायसा २५, अहवा न कारवेइ कारवेइ करेंतं नानुजाणइ मणसा २६ ।

अहवा न कारवेइ करेंतं नानुजाणइ वयसा २७ अहवा न कारवेइनु करेंतं नानुजाणइ कायसा २८, एगविहं तिविहेणं पडि० न करेति मणसा वयसा कायसा २९, अहवा न कारवेइ मण० वय० कायसा ३०, अहवा करेंत नानुजा० मणसा ०३१, एक्कविहं दुविहेणं पडिक्कममाणे न करेति मणसा वयसा ३२, अहवा न करेति मणसा कायसा ३३, अहवा न करेइ वयसा कायसा ३४, अहवा न अहवा करेंतं नानुजा० मणसा वयसा ३८ ।

अहवा करेंतं नानुजा० मणसा कायसा ३९, अहवा करेंतं नानु जाणइ वयसा कायसा ४०, एक्कविहं एगविहेणं पडिक्कममाणे न करेति मणसा ४१, अहवा न करेति वयसा ४२, अहवा न करेति कायसा ४३, अहवा न कारवेति मणसा ४४, अहवा न कारवेति वयसा ४५, अहवा न कारवेइ कायसा ४६, अहवा करेंतं नाणुजाणइ मणसा ४७ अहवा करेंतं नानुजा० वयसा ४८ अहवा करेंतं नानुजाणइ कायसा ४९ ।

पडुप्पन्नं संवरेमाणे किं तिविहं तिविहेणं संवरेइ ?, एवं जहा पडिक्कममाणेणं एगूणपन्नं भंगा भनिया एवं संवरमाणेणवि एगुणपन्नं भंगा भानियव्वा ।

अनागयं पच्चक्खमाणे किं किं तिविहं तिविहेणं पच्चक्खाइ ? एवं ते चेव भंगा एगूणपन्ना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भानियव्वा जाव अहवा करेंतं नानुजाणइ कायसा ।। समणोवासगस्स णं भंते ! पुव्वामेव थूलमुसावाए अपच्चक्खाए भवइ से णं भंते ! पच्छा पच्चाइक्खमाणे एवं जहा पाणाइवायस्स सीयालं भंगसयं भनियं तहा मुसावायस्सवि भानियव्वं । एवं अदिन्नादाणस्सवि, एवं थूलगस्स मेहुणस्सवि थूलगस्स परिग्गहस्सवि जाव अहवा करेंतं नाणुजाणइ कायसा ।*

*एए खलु एरिसगा समणोवासगा भवंति, नो खलु एरिसगा आजीवियोवासगा भवंति ।*

**वृ.** 'समणोवासयस्स णं'ति तृतीयार्थःत्वात्, षष्ठयाः श्रमणोपासकेनेत्यर्थः सम्बन्धमात्र-विवक्षया वा षष्ठीयं, 'पुव्वामेव'त्ति प्राक्कालमेव सम्यक्त्वप्रतिपत्तिसमनन्तरमेवेत्यर्थः 'अपच्च-क्खाए'त्ति न प्रत्याख्यातो भवति, तदा देशविरतिपरिणाम्याजातत्वात्, ततश्च 'से णं'ति श्रमणो-पासकः 'पश्चात्' प्राणातिपातविरतिकावले 'पच्चाइक्खमाणे'त्ति प्रत्याचक्षाणः प्राणातिपातमिति गम्यते किं करोति ? इति प्रश्नः ।

वाचनान्तरे तु 'अपच्चक्खाए' इत्यस्य स्थाने 'पच्चक्खाए'त्ति दृश्यते 'पच्चाइक्खमाणे' इत्यस्य च स्थाने 'पच्चक्खावेमाणे'त्ति दृश्यते, तत्र च प्रत्याख्याता स्वयमेव प्रत्याख्यापयंश्च गुरुणा हेतुकर्त्रा प्राणातिपातप्रत्याख्यानं गुरुणाऽऽत्मानं ग्राहयन्नित्यर्थः इति, 'तीत'मित्यादि, 'तीतम्' अतीतकालकृतं प्राणातिपातं 'प्रतिक्रामति' ततो निन्दाद्वारेण निवर्त्तत इत्यर्थः पडुप्पन्नं'ति प्रत्युत्पन्नं-वर्त्तमानकालीनं प्राणातिपातं 'संवृणोति' न करोतीत्यर्थः 'अनागतं' भविष्यत्कालविषयं 'प्रत्याख्याति' न करिष्यामीत्यादि प्रतिजानीते । 'तिविहं तिविहेण'मित्यादि, इह च नव विकल्पास्तत्र गाथा–

॥ १ ॥ "तिन्नि तिया तिन्नि दुया तिन्नि य एक्का हवंति जोगेसु ।
तिदुएक्कं तिदुएक्कं तिदुएक्कं चेव करणाइं ॥"

–एतेषु च विकल्पेष्वेकादयो विकल्पा लभ्यन्ते, आह च–

॥ १ ॥ "एगो तिन्नि य तियगा दो नवगा तह य तिन्नि नव नव य ।
भंगनवगस्स एवं भंगा एगूणपन्नासं ॥

तत्र 'तिविहं तिविहेणं'ति 'त्रिविधं' त्रिप्रकारं करणकारणानुमतिभेदात् प्राणातिपात-योगमिति गम्यते, 'त्रिविधेन' मनोवचनकायलक्षणेन करणेन प्रतिक्रामति, ततो निन्दनेन विरमति, 'तिविहं दुविहेणं'ति त्रिविधं वधकरणादिभेदात् 'द्विविधेन' करणेन मनःप्रभृतीना-मेकतरवर्जिततद्वयेन, 'तिविहं एगविहेणं'ति त्रिविधं तथैव 'एकविधेन' मनःप्रभृतीनामेकतमेन करणेनेति 'दुविहं तिविहेणं' द्विविधं कृतादीनामन्यतमद्वयरूपं योगं 'त्रिविधेन' मनःप्रभृतिकरणेन, एवमन्येऽपि, 'तिविहं तिविहेणं पडिक्कममाणे' इत्यादि, 'न करोति' न स्वयं विदधाति अतीतकाले प्राणातिपातं ।

मनसा हा हतोऽहं येन मया तदाऽसी न हत इत्येवमनुध्यानात्, तथा 'न' नैव कारयति मनसैव यथा हा न युक्तं कृतं यदसौ परेण न घातित इति चिन्तनात्, तथा 'कुर्वन्तं' विदधान-मुपलक्षणत्वात् कारयन्तं वा समनुजानन्तं वा परमात्मानं प्राणातिपातं 'नानुजानाति' नानुमोदयति, मनसैव वधानुस्मरणेन तदनुमोदनात्, एवं न करोति न कारयति कुर्व्वन्तं नानुजानाति वचसा, तथाविधवचनप्रवर्त्तनात्, एवं न करोति न कारयति कुर्वन्तं नानुजानाति कायेन तथाविधाङ्गवि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारकरणादिति, न चेह यथासङ्ख्यन्यायो न करोति मनसा न कारयति वचसा नानुजानाति कायेनेत्येवंलक्षणोऽनुसरणीयो, वक्तृविवक्षाऽधीनत्वात् सर्वन्यायानां वक्ष्यमाणविकल्पायोगाच्चेति, एवं त्रिविधं त्रिविधेनेत्यत्र विकल्पे एक एव विकल्पः तदन्येषु पुनर्द्वितीयतृतीयचतुर्थेषु त्रयः २ पञ्चमषष्ठ्योर्नव नवसप्तमे त्रयः अष्टमनवमयोर्नव नवेति ।

एवं सर्वेऽप्येकोनपञ्चाशत्, एवमियमतीतकालमाश्रित्य कृता करणकारणादियोजना, अथवैवमेषाऽतीतकाले मनःप्रभृतीनां कृतं कारितमनुज्ञातं वा वधं क्रमेण न करोति न कारयति न चानुजानाति तन्निन्देन तदनुमोदननिषेधतस्ततो निवर्त्तत इत्यर्थः, तन्निन्दनस्याभावे हि तदनुमोदनानिवृत्तेः कृतादिरसौ क्रियमाणादिरिव स्यादिति, वर्त्तमानकालं त्वाश्रित्य सुगमैव, भविष्यत्कालापेक्षया त्वेवमसौ-न करोति मनसां तं हनिष्यामीत्यस्य चिन्तनात्, न कारयति मनसैव तमहं घातयिष्यामीत्यस्य चिन्तनात्, नानुजानाति मनसा भाविनं मनसा भाविनं वधमनुश्रुत्य हर्षकरणात्, एवं वाचा कायेन च तयोस्तथाविधयोः करणादिति, अथचैवमेव भविष्यत्काले मनःप्रभृतिना करिष्यमाणं कारिष्यमाणमनुमंस्यमानं वा वधं क्रमेण न करोति न कारयति न चानुजानाति ततो निवृत्तिमभ्युपगच्छतीत्यर्थः, सर्वेषां चैषां मीलने सप्तचत्वारिंशदधिकं भङ्गकशतं भवति । इह च त्रिविधं त्रिविधेनेति विकल्पमाश्रित्याक्षेपपरिहारौ वृद्धावक्तावेवम्–

॥१॥ "न करेइच्चाइतियं गिहिणो कह होइ देसविरयस्स ? ।
भन्नइ विसयस्स बहिं पडिसेहो अनुमईएवि ।।

॥२॥ केई भणंति गिहिणो तिविहं तिविहेण नत्थि संवरणं ।
तं न जओ निद्दिट्ठं इहेव सुत्ते विसेसेउं ॥

॥३॥ तो कह निज्जुत्तीए ऽनुमइनिसेहोत्ति ? सो सविसयंमि ।
सामनन्ने वऽन्नत्थ उ तिविहं तिविहेण को दोसो ॥

इह च 'सविसयंमि'त्ति स्वविषये यथानुमतिरस्ति 'सामन्ने व'त्ति सामान्ये वाऽविशेषे प्रत्याख्याने सति 'अन्नत्थ उ'त्ति विशेषे स्वयंभूरमणजलधिमत्स्यादौ ।

॥१॥ "पुत्ताइसंतइनिमित्तमेत्तमेगारसिं पवन्नस्स ।
जंपंति केइ गिहिणो दिक्खाभिमुहस्स तिविहंपि ।।"

यथा च त्रिविधं त्रिविधेनेत्यत्राक्षेपपरिहारौ कृतौ तथाऽन्यत्रापि कार्यौ यत्रानुमतेरनुप्रवेशोऽस्तीति । अथ कथं मनसा करणादि ?, उच्यते, यथा वाक्काययोरिति, आह च–

॥१॥ "आह कहं पुण मणसा करणं कारावणं अनुमई य ।
जइ वइतणुजोगेहिं करणाई तह भवे मणसा ।।

॥२॥ तयहीणत्ता वइतणुकरणाईणं च अहव मणकरणं ।
सावज्जजोगमणणं पन्नत्तं वीयरागेहिं ॥

॥३॥ कारावण पुण मणसा चिंतेइ करेउ एस सावज्जं ।
चिंतेई य कए उण सुट्ठु कयं अनुमई होइ ।। इति

इह च पञ्चस्वणुव्रतेषु प्रत्येकं सप्तचत्वारिंशदधिकस्य भङ्गशतस्य भावाद् भङ्गकानां सप्त शतानि पञ्चत्रिंशदधिकानि भवन्तीति ।। यत् स्थविरा आजीविकैः श्रमणोपासकगतं वस्तु पृष्टाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौतमेन च भगवांस्तत्तावदुक्तम्, अथानन्तरोक्तशीलाः श्रमणोपासका एव भवन्ति न पुनराजीविकोपासकाः आजीविकानां गुनित्वेनाभिमत्ता अपीति दर्शयन्नाह-'एए खलु' इत्यादि, 'एते खलु' एत एव परिदृश्यमाना निर्ग्रन्थसत्का इत्यर्थः 'एरिसग' त्ति ईदृशकाः प्राणातिपातादिष्वतीतप्रतिक्रमणादिमन्तः, 'नो खलु' त्ति नैव 'एरिसग' त्ति उक्तरूपा उक्तार्थानापरिज्ञानात् 'आजीविओवासय' त्ति गोशालकशिष्यश्रावकाः ।

अथैतस्यैवार्थःस्य विशेषतः समर्थःनार्थःमाजीविकसमयार्थःस्य तदुपासकविशेषस्वरूपस्य चाभिधानपूर्वकमाजीविकोपासकापेक्षया श्रमणोपासकानुत्कर्षयितुमाह–

**मू. (४०३)** *आजीवियसमयस्स णं अयमट्ठे पन्नत्ते अक्खीणपडिभोइणो सव्वे सत्ता से हंता छेत्ता भेत्ता लुंपित्ता विलुंपित्ता उद्दवइत्ता आहारमाहारेंति, तत्थ खलु इमे दुवालस आजिवीयोवासगा भवंति, तंजहा-ताले १ तालपलंबे २ उव्विहे ३ संविहे ४ अवविहे ५ उदए ६ नामुदए ७ नमुदए ८ अनुवालए ९ संखवालए १० अयंवुले ११ कायरए १२ ।*

*इच्चेते दुवालसमाजीवियोवासगा अरिहंतदेवतागा अम्मापिउसुस्सूसगा पंचफलपडिक्कंता, तंजहा-उंबरेहिं वडेहिं बोरेहिं सतरेहिं पिलंखूहिं, पलंडुल्हसणकंदमूलविवज्जगा अनिल्लंछिएहिं अणक्कभिन्नेहिं गोणेहिं तसपाणविवज्जिएहिं चित्तेहिं वित्तिं कप्पेमाणे विहरंति, एएवि ताव एवं इच्छंति, किमंग पुण जे इमे समणोवासगा भवंति जेसिं नो कप्पंति इमाइं पन्नरस कम्मादानाइं सयं करेत्तए वा कारवेत्तए वा करेंतं वा अन्नं न समनुजाणेत्तए ।*

*तंजहा-इंगालकम्मे वणकम्मे साडीकम्मे भाडीकम्मे फोडीकम्मे दंतवानिज्जे लक्खवानिज्जे केसवानिज्जे रसवानिज्जे विसवानिज्जे जंतपीलणकम्मे निल्लंछणकम्मे दवग्गिदावणया सरदहतलायपरिसोसणया असतीपोसणया, इच्चेते समणोवासगा सुक्का सुक्काभिजातीया भविया भवित्ता कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवंति ॥*

**वृ.** 'आजीविए'त्यादि, आजीविकसमयः-गोशालकसिद्धान्तः तस्य 'अयमट्ठे'त्ति इदमभिधेयम्-'अक्खीणपरिभोइणो सव्वे सत्त'त्ति अक्षीणं-अक्षीणायुष्कमप्रासुकं परिभुञ्जत इत्येवंशीला अक्षीणपरिभोगिनः, अथवा इनूप्रत्ययस्य स्वार्थिःकत्वादक्षीणपरिभोगा-अनपगताहारभोगासक्तय इत्यर्थः 'सर्वे सत्त्वाः' असंयताः सर्वे प्रानिनः, यद्येवं ततः किम् ? इत्याह-'से हंते'त्यादि, 'से'त्ति ततः 'हंत'त्ति हत्वा लगुडादिना अभ्यवहार्यं प्रानिजातं 'छित्त्वा' असिपुत्रिकादिना द्विधा कृत्वा 'भित्त्वा' शूलादिना भिन्नं कृत्वा 'लुप्त्वा' पक्षादिलोपनेन 'विलुप्य' त्वचो विलोपनेन 'अपद्राव्य' विनाश्याहारमाहारयन्ति, 'तत्थ'त्ति 'तत्र' एवं स्थितेऽसंयतसत्त्वर्गे हननादिदोषपरायणे इत्यर्थः आजीविकसमये वाऽधिकरणभूते द्वादशेति विशेषानुष्ठानत्वात् परिगनिता आनन्दादिश्रमणोपासकवदन्यथा बहवस्ते, 'ताले'त्ति तालाभिधान एकः, एवं तालप्रलम्बादयोऽपि, 'अरिहंतदेवयाग'त्ति गोशालकस्य तत्कल्पनयाऽर्हत्वात्, 'पंचफलपडिक्कंत'त्ति फलपञ्चकान्निवृत्ताः, उदुम्बरादीनि च पञ्च पदानि पञ्चमीबहुवचनान्तानि प्रतिकान्तशब्दानुस्मरणादिति, 'अनिल्लंछिएहिं'ति अवर्द्धितकैः 'अनक्कभिन्नेहिं'ति अनस्तितैः ।

'एतेवि ताव एवं इच्छंति' एतेऽपि तावद्विशिष्टयोग्यताविकला इत्यर्थः एवमिच्छन्ति-अमुना प्रकारेण वाञ्छन्ति धर्म्ममिति गम्यम्, 'किमंग पुणे'त्यादि, किं पुनर्ये इमे श्रमणोपासका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति ते नेच्छन्तीति गम्यम् ?, इच्छन्त्येवेति, विशिष्टतरदेवगुरुप्रवचनसमाश्रितत्वात्तेषां, 'कम्मादाणाइं'ति कर्मानि-ज्ञानावरमादीन्यादीयन्ते यैस्तानि कर्मादानानि, अथवा कर्मानि च तान्यादानानि च-कर्मादानानि कर्महेतव इति विग्रहः ।

'इंगाले'त्यादि, अङ्गारविषयं कर्म अङ्गारकर्म-अङ्गाराणां करणविक्रयस्वरूपम्, एवमग्निव्यापाररूपं यदन्यदपीष्टकापादाकादिकं कर्म तदङ्गारकर्मोच्यते, अङ्गारशब्दस्य तदन्योपलक्षणत्वात्, 'वणकम्मे'त्ति वनविषयं कर्म्म वनकर्म्म-वनच्छेदनविक्रयरूपम्, एवं बीजपेषणाद्यपि, 'साडीकम्मे'त्ति शकटाना वाहनघटनविक्रयादि 'भाडीकम्मे'त्ति भाट्या-भाटकेन कर्म अन्यदीयद्रव्याणां शकटादिभिर्देशान्तरनयनं गोगृहादिसमर्प्पणं भाटीकर्म्म 'फोडीकम्मे'त्ति स्फोटि-भूमेः स्फोटनं हलकुद्दालादिभिः सैव कर्म्म स्फोटीकर्म्म ।

'दंतवाणिज्जे'त्ति दन्तानां-हस्तिविषाणानाम् उपलक्षणत्वादेषां चर्मचामरपूतिकेशादीनां वाणिज्यं-क्रयविक्रयो दन्तवाणिज्यं 'लक्खवाणिज्जं'ति लाक्षाया आकरे ग्रहणतो विक्रयः, एतच्च त्रससंसक्तिनिमित्तस्यान्यस्यापि तिलादेर्द्रव्यस्य यद्वानिज्यं तस्योपलक्षणं, 'केसवाणिज्जे'त्ति केशवज्जीवानां गोमहिषीस्त्रीप्रभृतिकानां विक्रयः 'रसवाणिज्जे'त्ति मद्यादिरसविक्रयः 'विसवानिज्जे'त्ति विषस्योपलक्षणत्वाच्छस्त्रवाणिज्यस्याप्यनेनावरोधः ।

'जंतपीलनकम्मे'त्ति यन्त्रेण तिलेक्ष्वादीनां यत्पीडनं तदेव कर्म्म यन्त्रपीडनकर्म्म 'निल्लंछणकम्मे'त्ति निर्लाञ्छनमेव-वर्ध्दितककरणमेव कर्म निर्लाञ्छनकर्म्म 'दवग्गिदावमय'त्ति दवाग्नेः-दवस्य दापनं-दाने प्रयोजकत्वमुपलक्षणत्वाद्दानं च दवाग्निदापनं तदेव प्राकृतत्वाद् 'दवग्गिदावणया' 'सरदहतलाशयविशेषस्य परिशोषणं यत्तत्तथा, तदेव प्राकृतत्वात्त स्वार्थिःकताप्रत्यये 'सरदहतलायपरिसोसणया'' 'असईपोसणय'त्ति दास्याः पोषणं तद्भाटीग्रहमणय, अनेन च कुर्कुटमार्जारादिक्षुद्रजीवपोषणमप्याक्षिप्तं द्दश्यमिति ।

'इच्चेते'त्ति 'इति' एवंप्रकाराः 'एते' निर्ग्रन्थसत्काः 'सुक्क'त्ति शुक्ला अभिन्नवृत्ता अमत्सरिणः कृतज्ञाः सदारम्भिणो हितानुबन्धाश्च 'सुक्काभिजाइ य'त्ति 'शुक्लाभिजात्याः' शुक्लप्रधानाः ।

**मू. (४०४)** *कतिविहा णं भंते (देवा) देवलोगा पन्नत्ता ?, गोयमा ! चउव्विहा देवत्ताए उववत्तारो तंजहा-भवणवासिवाणमंतरजोइसवेमानिया, सेवं भंते २ ॥*

**वृ.** अनन्तरं देवतयोपपत्तारो भवन्तीत्युक्तमथ देवानेव भेदत आह- 'कतिविहा ण'मित्यादि

शतकं-८ उद्देशकः-५ समाप्तः

## —: शतकं-८ उद्देशकः-६ :—

**वृ.** पञ्चमे श्रमणोपासकाधिकार उक्तः, षष्ठेऽप्यसावेवोच्यते, इत्येवंसम्बन्धस्यास्येदं सूत्रम्-

**मू. (४०५)** *समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा फासुएसनिज्ञेणं असनपानखाइमसाइमेणं पडिलाभेमाणस्स किं कज्जति ?, गोयमा ! एगंतसो निज्जरा कज्जइ नत्थि य से पावे कम्मे कज्जति ।*

*समणोवासगस्स णं भंते ! तहारूवं समणं वा माहणं वा अफासुएणं अनेसनिज्ञेणं असनपानजावपडिलाभेमाणस्स किं कज्जइ ?, गोयमा ! बहुतरिया से निज्जरा कज्जइ अप्पतराए से पावे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कम्मे कज्जइ।*

*समणोवासगस्स णं भंते! तहारूवं अस्संजयअविरयपडिहयपच्चक्खायपावकम्मं फासुएण वा अफासुएण वा एसनिज्जेण वा अनेसनिज्जेव वा असनपान जाव किं कज्जइ?, गोयमा! एगंतसो से पावे कम्मे कज्जइ नत्थि से काइ निज्जरा कज्जइ॥*

**वृ.** 'समणे'त्यादि, 'किं कज्जइ'त्ति किं फलं भवतीत्यर्थः, 'एगंतसो'त्ति एकान्तेन तस्य श्रमणोपासकस्य, 'नत्थि य से'त्ति नास्ति चैतद् यत् 'से' तस्य पापंकर्म 'क्रियते' भवति अप्रासुकदाने इवेति, 'बहुतरिय'त्ति पापकर्म्मापेक्षया 'अप्पतराए'त्ति अल्पतरं निर्जरापेक्षया, अयमर्थः-गुणवते पात्रायाप्रासुकादिद्रव्यदाने चारित्रकायोपष्टम्भो जीवघातो व्यवहारतस्तच्चारित्रबाधा च भवति, ततश्च-चारित्रकायोपष्टम्भान्निर्जरा जीवघातादेश्च पापं कर्म्म, तत्र च स्वहेतुसामर्थ्यात्पापापेक्षया बहुतरा निर्जरा निर्जरापेक्षया चाल्पतरं पापं भवति, इह च विवेचका मन्यन्ते-असंस्तरणादिकारणत एवाप्रासुकादिदाने बहुतरा निर्जरा भवति नाकारणे, यत् उक्तम्-

॥१॥ "संथरणंमि असुद्धं दोण्हवि गेण्हंतदिंतयाणऽहियं।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे॥" इति,

अन्ये त्वाहुः-अकारणेऽपि गुणवत्पात्रायाप्रासुकादिदाने परिणामवशादबहुतरा निर्जरा भवत्यल्पतरं च पापं कर्म्मेति, निर्विशेषणत्वात् सूत्रस्य परिणामस्य च प्रमाणत्वात्, आह च-

॥१॥ "परमरहस्समिसीणं समत्तगनिपिडगझरियसाराणं।
परिणामियं पमाणं निच्छयमवलंबमाणाणं॥

यच्चोच्यते 'संथरणंमि असुद्ध'मित्यादिनाऽशुद्धं द्वयोरपि दातृगृहीत्रोरहितायेति तद्ग्राहकस्य व्यवहारतः संयमविराधनात् दायकस्य च लुब्धकदृष्टान्तभावितत्वेनाव्युत्पन्नत्वेन वा ददतः शुभाल्पायुष्कतानिमित्तत्वात्, शुभमपि चायुरल्पमहितं विवक्षया, शुभाल्पायुष्कतानिमित्तत्वं चाप्रासुकादिदानस्याल्पायुष्कताफलप्रतिपादकसूत्रे प्राक् चर्चितं, यत्पुनरिह तत्त्वं तत्केवलिगम्यमिति

तृतीयसूत्रे 'अस्संजयअविरये' त्यादिनाऽगुणवान् पात्रविशेष उक्तः, 'फासुएण वा अफासुएण वा'इत्यादिना तु प्रासुकाप्रासुकादेर्दानस्य पापकर्मफलता निर्जराया अभावश्चोक्तः, असंयमोपष्टम्भस्योभयत्रापि तुल्यत्वात्, यश्च प्रासुकादौ जीवघाताभावेन अप्रासुकादौ च जीवघातसद्भावेन विशेषः सोऽत्र न विवक्षितः, पापकर्म्मणो निर्जराया अभावस्यैव च विवक्षितत्वादिति, सूत्रत्रयेणापि चानेन मोक्षार्थःमेव यद्दानं तच्चिन्तिनं, यत्पुनरनुकम्पादानमौचित्यदानं वा तन्न चिन्तितं, निर्जरायास्तत्रानपेक्षणीयत्वाद्, अनुकम्पौचित्ययोरेव चापेक्षणीयत्वादिति, उक्तञ्च-

॥१॥ "मोक्खत्थं जं दाणं तं पइ एसो विही समक्खाओ।
अनुकंपादाणं पुण जिणेहिं न कयाइ पडिसिद्धं॥" इति

दानाधिकारादेवदमाह-

***मू. (४०६)** निग्गंथं च णं गाहावइकुलं पिंडवायपडियाए अनुप्पविट्ठं केई दोहिं पिंडेहिं उवनिमंतेज्जा-एगं आउसो! अप्पणा भुंजाहि एगं थेराणं दलयाहि, से य तं पिण्डं पडिग्गहेज्जा, थेरा य से अनुगवेसियव्वा सिया जत्थेव अनुगेवसमाणे थेरे पासिज्जा तत्थेवाणुप्पदायव्वे सिया नो चेव णं अनुगवेसमाणे थेरे पासिज्जा तं नो अप्पणा भुंजेज्जा नो अन्नेसिं दावए एगंते अनावाए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अचित्ते बहुफासुए थंडिल्ले पडिलेहेत्ता पमज्जित्ता परिट्ठावेयव्वे सिया।*

*निग्गंथं च णं गाहावइकुलं पिंडवायपडियाए अनुप्पविट्ठं केति तिहिं पिंडेहिं उवनिमंतेज्ञा-एगं आउसो ! अप्पणा भुंजाहि दो थेराणं दलयाहि, से य ते पडिग्गहेज्ञा, थेरा य से अनुगवेसेयव्वा सेसं तं चेव जाव परिट्ठावेयव्वे सिया, एवं जाव दसहिं पिंडेहिं उवनिमंतेज्ञा नवरं एग आउसो ! अप्पणा भुंजाहि नव थेराणं दलयाह सेसं तं चेव जा परिट्ठावेयव्वे सिया।*

*निग्गंथं च णं गाहावइ जाव केइ दोहिं पडिग्गहेहिं उवनिमंतेज्जा एगं आउसो ! अप्पणा पडिभुंजाहि एगं थेराणं दलयाहि, से य तं पडिग्गहेज्ञा, तहेव जाव तं नो अप्पणा पडिभुंजेज्ञा नो अन्नेसिं दावए सेसं तं चेव जाव परिट्ठवेयव्वे सिया, एवं जाव दसहिं पडिग्गहेहिं, एवं जहा पडिग्गहवत्तव्वया भनिया एवं गोच्छगरयहरणचोलपट्टगकंबललट्ठीसंथारगवत्तव्वया य भानियव्वा जाव दसहिं संथारएहिं उवनिमंतेज्ञा जाव परिट्ठावेयव्वे सिया ॥*

**वृ.** 'निग्गंथं चे'त्यादि, इह चशब्दः पुनरर्थःस्तस्य चैवं घटना-निर्ग्रन्थाय संयतादिविशेषणाय प्रासुकादिदाने गृहपतेरेकान्तेन निर्जरा भवति, निर्ग्रन्थः पुनः 'गृहपतिकुलं' गृहिगृहं 'पिंडवाय-पडियाए' त्ति पिण्डस्य पातो-भोजनस्य पात्रे गृहस्थान्निपतनं तत्र प्रतिज्ञा-ज्ञानं बुद्धि पिण्डपातप्रतिज्ञा तया, पिण्डस्य पातो मम पात्रे भवत्विितिबुद्धयेत्यर्थः, 'उवनिमंतेज्ञ' त्ति भिक्षो ! गृहाणेदं पिण्डद्वयमित्य- भिदध्यादित्यर्थः।

तत्र च 'एग' मित्यादि, 'से य' त्ति स पुनर्निर्ग्रन्थः 'तं' ति स्थविरपिण्डं 'थेरा य से' त्ति स्थविराः पुनः 'तस्य' निर्ग्रन्थस्य 'सिय' त्ति स्युर्भवन्तीत्यर्थः, 'दावए' त्ति दद्यात् दापयेद्वा अदत्तादानप्रसङ्गात्, गृहपतिना हि पिण्डोऽसौ विवक्षितस्थविरेभ्य एव दत्तो नान्यस्मै इति, 'एगंते' त्ति जनालोकवर्जिते 'अनावाए' त्ति जनसंपातवर्जिते 'अचित्ते' त्ति अचेतने, नाचेतनमात्रेणैवेत्यत आह-

'बहुफासुए' त्ति बहुधा प्रासुकं बहुप्रासुकं तत्र, अनेन चाचिरकालकृते विकृते विस्तीर्णे दूरावगाढे त्रसप्राणवीजरहिते चेति सङ्गृहीतं द्रष्टव्यमिति, 'से य ते' त्ति स च निर्ग्रन्थः 'तौ' स्थविरा-पिण्डौ 'पडिग्गाहेज्ञ' त्ति प्रतिगृहीयादिति। निर्ग्रन्थप्रस्तावादिदमाह-

**मू.** *(४०७) निग्गंथेण य गाहावइकुलं पिडवायपडियाए पविट्ठेणं अन्नयरे अकिच्चठाणे पडिसेविए, तस्स णं एवं भवति-इहेव ताव अहं एयस्स ठाणस्स आलोएमि पडिक्कमामि निंदामि पच्छा थेराणं अंतियं विसोहेमि अकरणयाए अब्भुट्ठेमि अहारिहं पायच्छित्तं तवोकम्मं पडिवज्ञामि, तओ पच्छा थेराणं अंतियं आलोएस्सामि जाव तवोकम्मं पडिवज्ञिस्सामि, से य संपट्ठिओ असंपत्ते थेरा य पुव्वामेव अमुहा सिया से णं भंते ! किं आराहए विराहए ?, गोयमा ! आराहए नो विराहए १।*

*से य संपट्ठिए असंपत्ते अप्पणा य पुव्वामेव अमुहा सिया से णं भंते ! किं आराहए विराहए ?, गोयमा ! आराहए नो विराहए ?, गोयमा ! आराहए नो विराहए २, सेय संपट्ठिए असंपत्ते अप्पणा य पुव्वामेव थेरा य कालं करेज्ञा से णं भंते ! किं आराहए विराहए ?, गोयमा ! आराहए नो विराहए ३, से य संपट्ठिए असंपत्ते अप्पणा य पुव्वामेव कालं करेज्ञा से णं भंते ! किं आराहए विराहए ?, गोयमा ! आराहए नो विराहए ४, सेय संपट्ठिए संपत्ते थेराय समुहा सिया सेणं भंते ! किं आराहए विराहए ?, गोयमा ! आराहए नो विराहए, से य संपट्ठिए संपत्ते अप्पणा य, एवं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संपत्तेणवि चत्तारि आलावगा भानियव्वा जहेव असंपत्तेणं ।*

*निग्गंथेण य बहिया वियारभूमिं विहारभूमिं वा निक्खंतेणं अन्नयरे अकिच्चट्ठाणे पडिसेविए तस्स णं एवं भवति-इहेव ताव अहं एवं एत्थवि एते चेव अट्ठ आलावगा भानियव्वा जाव नो विराहए । निग्गंथेण य गामानुगामं दूइज्जमाणेणं अन्नयरे अकिच्चट्ठाणे पडिसेविए तस्स णं एवं भवति इहेव ताव अहं एत्थवि ते चेव अट्ठ आलावगा भानियव्वा जाव नो विराहए ।*

*निग्गंथीए य गाहावइकुलं पिंडवायपडियाए अनुपविट्ठाए अन्यरे अकिच्चट्ठाणे पडिसेविए तीसे णं अंतियं आलोएस्सामि जाव पडिवज्जिस्सामि, साय संपट्ठिया असंपत्ता पवत्तिणी य अमुहा जहा निग्गंथस्स तिन्निगमा भनिया एवं निग्गंथीएवि तिन्नि आलावगा भानियव्वा जाव आराहिया नो विराहिया ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ-आराहए नो विराहए ?, गोयमा ! से जहा नामए-केइ पुरिसे एगं महं उन्नालोमं वा गयलोमं वा सणलोमं वा कप्पासलोमं वा तणसूयं वा दुहा वा तिहा वा संखेज्जहा वा छिंदित्ता अगनिकायंसि पक्खिवेज्जा से नूनं गोयमा ! छिज्जमाणे छिन्ने पक्खिप्पमाणे पक्खित्ते दज्झमाणे दड्ढेति वत्तव्वं सिया ?, हंता भगवं ! छिज्जमाणे छिन्ने जाव दड्ढेत्ति वत्तव्वं सिया, से जहा वा केइ पुरिसे वत्थं अहतं वा धोतं वा तंतुग्गयं वा मंजिट्ठादोणीए पक्खिवेज्जा से नूनं गोयमा ! उक्खिप्पमाणे उक्खित्ते पक्खिप्पमाणे पक्खित्ते रज्जमाणे रत्तेति वत्तव्वं सिया ? ।*

*हंता भगवं ! उक्खिप्पमाणे उक्खित्ते जाव रत्तेत्ति वत्तव्वं सिया, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-आराहए नो विराहए ॥*

**वृ.** 'निग्गंथेण ये'त्यादि, इह चशब्दः पुनरर्थःस्तास्य घटना चैवं-निर्ग्रन्थं कश्चित् पिण्डपातप्रतिज्ञया प्रविष्टं पिण्डादिनोपनिमन्त्रयेत् तेन च निर्ग्रन्थेन पुनः 'अकिच्चट्ठाणे'त्ति कृत्यस्य-करणस्य स्थानं-आयः कृत्यस्थानं तन्निषेधः अकृत्यस्थानं-मूलगुणादिप्रतिसेवारूपोऽ-कार्यविशेषः 'तस्स णं'ति तस्य निर्ग्रन्थस्य सञ्जातानुतापस्य 'एवं भवति' एवंप्रकारं मनोभवति 'एयस्स ठाणस्स'त्ति विभक्तिपरिणामाद् 'एतत्स्थानम्' अनन्तरासेवितम् 'आलोचयामि' स्थापना- चार्यनिवेदनेन 'प्रतिक्रमामि'मिथ्यादुष्कृतदानेन 'निन्दामि' स्वसमक्षं स्वस्याकृत्यस्थानस्य वा कुत्सनेन 'गर्हे' गुरुसमक्षं कुत्सनेन 'विउट्टमि'त्ति वित्रोटयामि-तदनुबन्धं छिनद्मि 'विशोधयामि' प्रायश्चित्तपङ्कं प्रायश्चित्ताभ्युपगमेन 'अकरणतया' अकरणेन 'अभ्युत्तिष्ठामि' अभ्युत्थितो भवामीति 'अहारिहं'ति 'यथार्हं' यथोचितम्, एतच्च गीतार्थःतायामेव भवति नान्यथा, 'अंतियं'ति समीपं गत इति शेषः 'थेरा अमुहा सिय'त्ति स्थविराः पुनः 'अमुखाः'निर्वाचः स्युर्वातादिदोषात्, ततश्च तस्यालोचनादिपरिणामे सत्यपि नालोचनादि संपद्यत इत्यतः प्रश्नयति-

'से ण'मित्यादि, 'आराहए'त्ति मोक्षमार्गस्याराधकः शुद्ध इत्यर्थः भावस्य शुद्धत्वात्, संभवति चालोचनापरिणतौ सत्यां कथञ्चित्तदप्राप्तावप्याराधकत्वं, यत उक्तं मरममाश्रित्य-

॥१॥ "आलोयणापरिणओ सम्मं संपट्ठिओ गुरुसगासे ।
जइ मरइ अंतरे च्चिय तहावि सुद्धोत्ति भावाओ ॥"

स्थविरात्मभेदेन चेह द्वे अमुखसूत्रे, द्वे कालगतसूत्रे, इत्येवं चत्वारि असंप्राप्तसूत्रानि ४, संप्राप्तसूत्राण्यप्येवं चत्वार्येव ४, एवमेतान्यष्टौ पिण्डपातार्थं गृहपतिकुले प्रविष्टस्य, एवं विचारभूम्या-

Jain Education International        For Private & Personal Use Only        www.jainelibrary.org

दावष्ट ८, एवं ग्रामगमनेऽष्टौ, एवमेतानि चतुर्विंशतिः सूत्रानि एवं निर्ग्रन्थिकाया अपि चतुर्विंशति सूत्राणीति।

अथनालोचित एव कथमाराधकः ? इत्याशङ्कामुत्तरं चाह-'से केणट्ठेण' मित्यादि, 'तणसूयं व'त्ति तृणाग्रं वा 'छिज्जमाणे छिन्ने'त्ति क्रियाकालनिष्ठाकालयोरभेदेन प्रतिक्षणं कार्यस्य निष्पत्तेः छिद्यमानं छिन्नमित्युच्यते, एवमसावालोचनापरिणतौ सत्यामाराधनाप्रवृत्त आराधक एवेति। 'अहयं च'त्ति 'अहतं' नवं 'घोयं'ति तृणाग्रं वा 'छिज्जमाणे छिन्ने'त्ति क्रियाकाल निष्ठाकालयोरभेदेन प्रतिक्षणं कार्यस्य निष्पत्तेः छिद्यमानं छिन्नमित्युच्यते, एवमसावालोचनापरिणतौ सत्यामाराधनाप्रवृत्त आराधक एवेति। 'अहयं च'त्ति 'अहतं' नवं 'घोयं'ति प्रक्षालितं 'तंतुग्गयं'ति तन्त्रोद्गतं तूरिवेमादेरुत्तीर्णमात्रं 'मंजीट्ठादोणीए'त्ति मञ्जिष्ठारागभाजने।

आराधकश्च दीपवद्दीप्यत इति दीपस्वरूपं निरपयन्नाह–

**मू. (४०८)** *पईवस्स णं भंते ! झियायमाणस्स किं पदीवे झियाति लट्ठी झियाइ वत्ती झियाइ तेल्ले झियाइ दीवचंपए झियाइ जोति झियाइ ? गोयमा ! नो पदीवे झियाइ जाव नो पदीवचंपए झियाइ जोइ झियाइ।*

*अगारस्स णं भंते ! झियायमाणस्स किं आगारे झियाइ कुड्डा झियाइ कडणा झि० धारणा झि० बलहरणे झि० वंसा० मल्ल झि० वग्गा झियाइ छित्तरा झियाइ छाणे झियाति जोति झियाति गोयमा ! नो अगारे झियाति नो कुड्डा झियाति जाव नो छाणे झियाति जोति झियाति॥*

**मू. (४०९)** *जीवे णं भंते ! ओरालियसरीराओ कति किरिए ?, गोयमा ! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए सिय अकिरिए।*

*नेरइए णं भंते ! ओरालियसरीराओ कतिकिरिया (ए) ?, गोयमा ! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए। असुरकुमारे णं भंते ! ओरालियसरीराओ कतिकिरिए ? एवं चेव, एवं जाव वेमानिए, नवरं मणुस्से जहा जीवे।*

*जीवे णं भंते ! ओरालियसरीरेहिंतो कतिकिरिए ?, गोयमा ! सिय तिकिरिए जाव सिय अकिरिए। नेरइए णं भंते ! ओरालियसरीरेहिंतो कतिकिरिए ?, एवं एसो जहा पढमो दंडओ तहा इमोवि अपरिसेसो भानियव्वो जाव वेमानिए, नवरं मणुस्से जहा जीवे।*

*जीवा णं भंते ! ओरालियसरीराओ कतिकिरिया ?, गोयमा ! सिय तिकिरिया जाव सिय अकिरिया, नेरइया णं भंते ! ओरालियसरीराओ कतिकिरिया ?, एवं एसोवि जहा पढमो दंडओ तहा भानियव्वो, जाव वेमानिया, नवरं मणुस्सा जहा जीवा।*

*जीवा णं भंते ! ओरालियसरीरेहिंतो कतिकिरिया ?, गोयमा ! तिकिरियावि चउकिरियावि पंचकिरियावि अकिरियावि, नेरइया णं भंते ! ओरालियसरीरेहिंतो कइकिरिया ?, गोयमा ! तिकिरियावि चउकिरियावि पंचकिरियावि एवं जाव वेमानिया, नवरं मणुस्सा जहा जीवा।*

*जीवे णं भंते ! वेउव्वियसरीराओ कतिकिरिए ?, गोयमा ? सिय तिकिरिए सिय चउकिरिए सिय अकिरिए, नेरइए णं भंते ! वेउव्वियसरीराओ कतिकिरिए ?, गोयमा ! सिय तिकिरिए सिय चउकिरिए एवं जाव वेमानिए, नवरं मणुस्से जहा जीवे, एवं जहा ओरालियसरीराणं*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*चत्तारि दंडका तहा वेउव्वियसरीरेणवि चत्तारि दंडगा भानियव्वा, नवरं पंचमकिरिया न भन्नइ, सेसं तं चेव, एवं जहा वेउव्वियं तहा आहारगंपि तेयगंपि कम्मगंपि भानियव्वं, एक्के चत्तारि दंडगा भानियव्वा जाव वेमानिया णं भंते! कम्मगसरीरेहिंतो कइकिरिया?, गोयमा! तिकिरियावि चउकिरियावि सेवं भंते! सेवं भंते! ॥*

**वृ.** 'पदीवस्से'त्यादि, 'झियायमाणस्स'त्ति ध्मायतो ध्मायमानस्य वा ज्वलत इत्यर्थः: 'पदीवे'त्ति प्रदीपो दीपयष्ट्यादिसमुदायः 'झियाइ'त्ति ध्मायति ध्मायते वा ज्वलति 'लट्ठि'त्ति दीपयष्टि 'वत्ति'त्ति दशा 'दीवचंपए'त्ति दीपस्थगनंक 'जोइ'त्ति अग्निः।

ज्वलनप्रस्तावादिदमाह-अग्गारस्स ण'मित्यादि, इह चागारं-कुटीग्रहं 'कुड्ड'त्ति भित्तयः 'कडम'त्ति त्रट्टिकाः 'धारण'त्ति बलहरणाधारभूते स्थूणे 'बलहरणे'त्ति धारणयोरुपरिवर्त्ति तिर्यगायतकाष्ठं 'मोभ'इति यत्प्रसिद्धं 'वंस'त्ति वंशाश्छित्त्वराधारभूताः 'मल्ल'त्ति मल्लाः-कुड्यावष्टम्भनस्थाणवः वलहरणा धारणाश्रितानि वा छित्त्वराधारभूतानि उदर्ध्वाधयतानि काष्ठानि 'वाग'त्ति वल्का-वंशादिबन्धनभूता वटादित्वचः 'छित्तर'त्ति छित्वरानि-वंशादिमयानि छादनाधारभूतानि किलिञ्जानि 'छाणे'ति छादनं दर्भादिमयं पटलमिति।

इत्थं च तेजसां ज्वलनक्रिया परशरीराश्रयेति परशरीरमौदारिकाद्याश्रित्य जीवस्य नारकादेश्च क्रिया अभिधातुमाह–'जीवे ण'मित्यादि, 'ओरालियसरीराओ'त्ति औदारिकशरीरात्-परकीयमौदारिकशरीरमाश्रित्य कतिक्रियो जीवः ? इति प्रश्नः, उत्तरं तु 'सिय तिकिरिए'त्ति यदैको जीवोऽन्यपृथिव्यादेः सम्बन्ध्यौदारिकशरीर- माश्रित्य कायं व्यापारयति तदा त्रिक्रियः, कायिक्यधिकरनिकीप्राद्वेषिकीनां भावात्, एतासां च परस्परेणाविनाभूतत्वात्, स्यात्त्रिक्रिय इत्युक्तं न पुनः स्यादेकक्रियः स्याद्द्विक्रिय इति, अविनाभावश्च तासामेवम्-अधिकृतक्रिया ह्यवीतरागस्यैव नैतरस्य, तथाविधकर्मबन्धहेतुत्वात्।

अवीतरागकायस्य चाधिकरणत्वेन प्रद्वेषान्वितत्वेन च कायक्रियासद्भावे इतरयोरवश्यंभावः, इतरभावे च कायिकीसद्भावः, उक्तञ्च प्रज्ञापनायामिहार्थे-"जस्स णं जीवस्स काइया किरिया कज्जइ तस्स अहिगरनिया किरिया नियमा कज्जइ, जस्स अहिगरनिया किरिया कज्जइ तस्सवि काइया किरिया नियमा कज्जइ" इत्यादि, तथाऽऽधक्रियात्रयसद्भावे उत्तरक्रियाद्वयं भजनया भवति,यदाह-"जस्स णं जीवस्स काइया किरिया कज्जइ तस्स पारियावनिया सिय कज्जइ सिय नो कज्जइ" इत्यादि, ततश्च यदा कायव्यापारद्वारेणाद्यक्रियात्रय एव वर्त्तते न तु परिता-पयति न चातिपातयति तदा त्रिक्रिय एवत्यतोऽपि स्यात्त्रिक्रिय इत्युक्तं, यदा तु परितापयति तदा चतुष्क्रियः, आद्यक्रियात्रयस्य तत्रावश्यंभावात्, यदा त्वतिपातयति तदा पञ्चक्रियः, आद्य-क्रियाचतुष्कस्य तत्रावश्यंभावात्, उक्तञ्च-"जस्स पारियावनिया किरिया कज्जइ तस्स काइया नियमा कज्जई"त्यादीति, अत एवाह-'सिय चउकिरिए सिय पंचकिरिए'त्ति, तथा 'सिय अकिरिय'त्ति वीतरागावस्थामाश्रित्य, तस्या हि वीतरागत्वादेव न सन्त्यधिकृतक्रिया इति।

'नेरइए ण'मित्यादि, नारको यस्मादौदारिकशरीरवन्तं पृथिव्यादिकं स्पृशति परितापयति विनाशयति च तस्मादौदारिकात् स्यात्त्रिक्रिय इत्यादि, अक्रियस्त्वयं न भवति, अवीतरागत्वेन क्रियाणावश्यंभावित्वादिति, 'एवं चेव'त्ति स्यात्त्रिक्रिय इत्यादि सर्वेष्वसुरादिपदेषु वाच्यमित्यर्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मणुस्से जहा जीवे'त्ति जीवपदे इव मनुष्यपदेऽक्रियत्वमपि वाच्यमित्यर्थः, जीवपदे मनुष्य-सिद्धापेक्षयैवाक्रियत्वस्याधीतत्वादिति, 'ओरालियसरीरेहिंतो'त्ति औदारिकशरीरेभ्य इत्येवं बहुत्वापेक्षोऽयमपरो दण्डकः, एवमेतौ जीवस्यैकत्वेन द्वौ दण्डकौ, एवमेव च जीवस्य बहुत्वेनापरौ द्वौ, एवमौदारिकशरीरापेक्षया चत्वारो दण्डका इति।

'जीवे ण'मित्यादि, जीवः परकीयं वैक्रियशरीरमाश्रित्य कतिक्रियः?, उच्यते, स्यात्त्रिक्रिय इत्यादि, पञ्चक्रियश्चेह नोच्यते, प्राणातिपातस्य वैक्रियशरीरिणः कर्त्तुमशक्यत्वाद्, अविरतिमात्रस्य चेहाविवक्षितत्वाद्, अत एवोक्तं-'पंचमकिरिया न भन्नइ'त्ति, 'एवं जहा वेउव्वियं तहा आहारयंपि तेयगंपि कम्मगंपि भानियव्वं'ति, अनेनाहारकादिशरीरत्रयमप्याश्रित्य दण्डकचतुष्टयेन नैरयिकादिजीवानां त्रिक्रियत्वं चतुष्क्रियत्वं चोक्तं, पञ्चक्रियत्वं तु निवारितं, मारयितुमशक्यत्वात्तस्येति, अथ नारकस्याधोलोकवर्त्तित्वादाहारकशरीरस्य च मनुष्यलोकवर्त्तित्वेन तत्क्रियाणामविषयत्वात् कथमाहारकशरीरमाश्रित्य नारकः स्यात्त्रिक्रियः स्याच्चतुष्क्रिय इति ०

अत्रोच्यते, यावत्पूर्वशरीरमव्युत्सृष्टं जीवनिर्वर्त्तितपरिणामं न त्यजति तावत्पूर्वभाव-प्रज्ञापनानयमतेन निर्वर्त्तकजीवस्यैवेति व्यपदिश्यते घृतघटन्यायेनेत्यतो नारकपूर्वभवदेहो नारकस्यैव तद्देशेन च मनुष्यलोकवर्त्तिनाऽस्थ्यादिरूपेण यदाहारकशरीरं स्पृश्यते परिताप्यते वा तदाहारकदेहान्नारकस्त्रिक्रियश्चतुष्क्रियो वा भवति, कायिकीभावे इतरयोरवश्यंभावात्, पारितापनिकीभावे चाद्यत्रयस्यावश्यंभावादिति। एवमिहान्यदपि वि (तद्वि) षयमवगन्तव्यं, यच्च तैजसकार्म्मणशरीरापेक्षया जीवानां परितापकत्वं तदौदारिकाद्याश्रितत्वेन तयोरवसेयं, स्वरूपेण तयोः परितापयितुमशक्यत्वादिति ॥

शतकं-८ उद्देशकः-६ समाप्तः

## —: शतकं-८ उद्देशकः-७ :—

**वृ.** षष्ठोद्देशके क्रियाव्यतिकर उक्त इति क्रियाप्रस्तावात् सप्तमोद्देशके प्रद्वेषक्रियानि-मित्तकोऽन्ययूथिकविवादव्यतिकर उच्यते, इत्येवं सम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (४१०)** *तेणं कालेणं २ रायगिहे नगरे वन्नओ, गुणसिलए चेइए वन्नओ, जाव पुढविसिलावट्टओ, तस्स णं गुणसिलस्स चेइयस्स अदूरसामंते बहवे अन्नउत्थिया परिवसंति, तेणं कालेणं २ समणे भगवं महावीरे आदिगरे जाव समोसढे जाव परिसा पडिगया, तेणं कालेणं २ समणस्स भगवओ महावीरस्स बहवे अंतेवासी थेरा भगवंतो जातिसंपन्ना कुलसंपन्ना जहा बितियसए जाव जीवियासामरणभयविप्पमुक्का समणस्स भगवओ महावीरस्स अदूरसामंते उड्ढंजाणू अहोसिरा झाणकोट्ठोवगया संजमेणं तवसा अप्पाणं भावेमाणा जाव विहरंति।*

*तए णं ते अन्नउत्थिया जेणेव थेरा भगवंतो तेणेव उवागच्छंति २ त्ता ते थेरे भगवंते एवं वयासीतुब्भे णं अज्जो! तिविहं तिविहेणं अस्संजयअविरयअप्पडिहय जहा सत्तमसए बितिए उद्देसए जाव एगंतबाले यावि भवह, तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-केण कारणेणं अज्झो! अम्हे तिविहं तिविहेणं अस्संजयअविरय जाव एगंतबाला यावि भवामो।*

*तए णं ते अन्नउत्थिया ते थेरे भगवंते एवं वयासी-तुब्भे णं अज्जो! अदिन्नं गेण्हह अदिन्नं भुंजह अदिन्नं सातिज्जह, तए णं ते तुब्भे अदिन्नं गेण्हमाणा अदिन्नं भुंजमाणा अदिन्नं सातिज्जमाणा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिविहं तिविहेणं अस्संजयअविरय जाव एगंतबाला यावि भवह,

तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-केण कारणेणं अज्ञो ! अम्हे अदिन्नं गेण्हामो अदिन्नं भुंजामो अदिन्नं सातिज्ञामो ?, जए णं अम्हे अदिन्नं गेण्हमाणा जाव अदिन्नं सातिज्ञमाणा तिविहं तिविहेणं अस्संजय जाव एगंतबाला यावि भवामो ?

तए णं ते अन्नउत्थिया ते थेरे भगवंते एवं वयासी-तुम्हा णं अज्ञो ! दिज्ञमाणे अदिन्ने पडिग्गहेज्ञमाणे अपडिग्गहिए निस्सरिज्ञमाणे अनिसट्ठे, तुब्भे णं अज्ञो ! दिज्ञमाणं पडिग्गहगं असंपत्तं एत्थ णं अंतरा केइ अवहरिज्ञा, गाहावउइस्स णं तं भंते ! नो खलु तं तुब्भं, तए ण तुज्झे अदिन्नं गेण्हह जाव अदिन्नं सातिज्ञह, तए णं तुज्झे अदिन्नं गेण्हमाणा जाव एगंतबाला यावि भवह ।

तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-नो खलु अज्ञो ! अम्हे अदिन्नं गिण्हामो अदिन्नं भुंजामो अदिन्नं सातिज्ञामो अम्हे णं अज्ञो ! दिन्नं गेण्हामो दिन्नं भुंजामो दिन्नं सातिज्ञामो, तए णं अम्हे दिन्नं गेण्हमाणा दिन्नं भुंजमाणा दिन्नं सातिज्ञमाणा तिविहं तिविहेणं संजयविरयपडिहय जहा सत्तमसए जाव एगंतपंडिया यावि भवामो, तए णं ते अन्नउत्थिया ते थेरे भगवंते एवं वयासी-केण कारणेणं अज्ञो ! तुम्हे दिन्नं गेण्हह जाव दिन्नं सातिज्ञह, जए णं तुज्झे दिन्नं गेण्हमाणा जाव एगंतपंडिया यावि भवह ।

तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-अम्हे णं अज्ञो ! दिज्ञमाणे दिन्ने पडिग्गहेज्ञमाणे पडिग्गहिए निसिरिज्ञमाणे निसट्ठे जेणं अम्हे णं अज्ञो ! दिज्ञमाणं पडिग्गहगं असंपत्तं एत्थ णं अंतरा केइ अवहरेज्ञा अम्हाणं तं णो खलु तं गाहावइस्स, जए णं अम्हे दिन्नं गेण्हामो दिन्नं भुंजामो दिन्नं सातिज्ञामो तए णं अम्हे दिन्नं गेण्हमाणा जाव दिन्नं सातिज्ञमाणा तिविहं तिविहेणं संजय जाव एगंतपंडिया यावि भवामो, तुज्झे णं अज्ञो ! अप्पणा चेव तिविहं तिविहेणं अस्संजय जाव एगंतबाला यावि भवह ।

तए णं ते अन्नउत्थिया ते थेरे भगवंते एवं वयासी-केण कारणेणं अज्ञो ! अम्हे तिविहं जाव एगंतबाला यावि भवामो ! तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-तुज्झे णं अज्ञो अदिन्नं गेण्हह ३, तए णं तु अज्झो तुब्भे अदिन्नं गे० जाव एगंत०, तए णं ते अन्नउत्थिया ते तेरे भगवंते एवं वयास-केण कारणेणं अज्ञो ! अम्हे अदिन्नं गेण्हामो जाव एगंतबा० ?

तए णं ते थेरे भगवंते ते अन्नउत्थिए एवं वयासी-तुज्झे णं अज्ञो ! दिज्ञमाणे अदिन्ने तं चेव जाव गाहावइस्स णं नो खलु तं तुज्झे, तए णं तुज्झे अदिन्नं गेण्हह, तं चेव जाव एगंतबाला यावि भवह, तए णं ते अन्नउ० ते थेरे भ० एवं व०-तुज्झे णं अज्ञो ! तिविहं तिविहेणं अस्संजय जाव एगंतबा० भवह, तए णं ते थेरा भ० ते अन्नउत्थिए एवं वयासी-केण कारणेणं अम्हे तिविहं तिविहेणं जाव एयंतबाला यावि भवामो ?

तए णं ते अन्नउत्थिया ते थेरे भगवंते एवं वयासी-तुज्झे णं अज्ञो ! रीयं रीयमाणा पुढविं पेच्चेह अभिहणह वत्तेह लेसेह संघाएह संघट्टेह परितावेह किलामेह उद्दवेह तए णं तुज्झे पुढविं पेच्चेमाणे जाव उवद्दवेमाणा तिविहं तिविहेणं असंजयअविरय जाव एगंतबाला यावि भवह,

तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-नो खलु अज्ञो ! अम्हे रीयं रीयमाणा पुढविं पेच्चेमो अभिहणामो जाव उवद्दवेमो अम्हे णं अज्ञो ! रीयं रीयमाणा कायं वा जोयं वा रियं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वा पडुच्च देसं देसेणं वयामो पएसं पएसेणं वयामो ते णं अम्हे देसं देसेणं वयमाणा पएसं पएसेणं वयमाणा नो पुढविं पेच्चेमो अभिहणामो जाव उवद्दवेमो।*

*तए णं अम्हे पुढवि अपेच्चेमाणा अणभिहणेमाणा जाव अनुवद्दवेमाणा तिविहं तिविहेणं संजय जाव एगंतपंडिया यावि भवामो, तुज्झे णं अज्जो! अप्पणा चेव तिविहं तिविहेणं अस्संजय जाव बाला यावि भवह।*

*तए णं ते अन्नउत्थिया थेरे भगवंते एवं वयासी-केण कारणेणं अज्जो! अम्हे तिविहं तिविहेणं जाव एगंतबाला यावि भवामो?, तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-तुज्झे णं अज्जो! रीयं रीयमाणा पुढविं पे० जाव उद्दवेह, तए णं तुज्झे पुढविं पेच्चेमाणा जाव उवद्दवेमाणा तिविहं तिविहेणं जाव एगंतबाला यावि भवह।*

*तए णं ते अन्नउत्थिया ते थेरे भगवंते एवं वयासी-तुज्झे णं अज्जो! गममाणे अगते वीतिक्कमिज्जमाणे अवीतिक्कंते रायगिहं नगरं संपाविउकामे असंपत्ते, तए णं ते थेरा भगवंतो ते अन्नउत्थिए एवं वयासी-नो खलु अज्जो! अम्हं गममाणे अगए वीइक्कमिज्जमाणे अवीतिक्कंते रायगिहं नगरं जाव असंपत्ते, अम्हा णं अज्जो! गममाणे गए वीतिक्कमिज्जमाणे वीतिक्कंते रायगिहं गरं संपाविउकामे संपत्ते तुज्झे णं अप्पणा चेव गममाणे अगए वीतिक्कमिज्जमाणे अवीतिक्कंते रायगिहं नगरं जाव असंपत्ते।*

*तए णं ते थेरा भगवंतो अन्नउत्थिए एवं पडिहणेन्ति पडिहनित्ता गइप्पवायं नाम अज्झयणं पन्नवंइसु।*

**वृ.** 'तेण' मित्यादि, तत्र 'अज्जो' त्ति हे आर्य्याः! 'तिविहं तिविहेणं' ति त्रिविधं करणादिकं योगमाश्रित्य त्रिविधेन मनः-प्रभृतिकरणेन 'अदिन्नं साइज्जह' त्ति अदत्तं स्वदध्वे अनुमन्यध्व इत्यर्थः 'दिज्जमाणे अदिन्ने' इत्यादि दीयमानमदत्तं, दीयमानस्य वर्त्तमानकालत्वाद् दत्तस्य चातीतकालवर्त्तित्वाद् वर्त्तमानतीतयोश्चात्यन्तभिन्नत्वाद्दीयमानं दत्तं न भवति दत्तमेव दत्तमिति व्यपदिश्यते, एवं प्रतिगृह्यमाणादावपि, तत्र दीयमानं दायकापेक्षया प्रतिगृह्यमाणं ग्राहकापेक्षया 'निसृज्यमानं' क्षिप्यमाणं पात्रापेक्षयेति 'अंतरे' त्ति अवसरे, अयमभिप्रायः-यदि दीयमानं पात्रेऽपतितं सद्दत्तं भवति तदा तस्य दत्तस्य सतः पात्रपतनलक्षणं ग्रहणं कृतं भवति, यदा तु तद्दीयमानमदत्तं तदा पात्रपतनलक्षणं ग्रहणमदत्तस्येति प्राप्तमिति, निर्ग्रन्थोत्तरवाक्ये तु 'अम्हे णं अज्जो! दिज्जमाणे दिन्ने' इत्यदि यदुक्तं तत्र क्रियाकालनिष्ठाकालयोरभेदाद्दीयमानत्वादेर्दत्तत्वादि समयसेयमिति।

अथ दीयमानमदत्तमित्यादेर्भवन्मतत्वाद् यूयमेवासंयतत्वादिगुणा इत्यावेदनायान्ययूथिकान् प्रति स्थविराः प्राहुः-'तुज्झे णं अज्जो! अप्पणा चेवे' त्यादि, 'रीयं रीयमाण' त्ति 'रीतं' गमनं 'रीयमाणाः' गच्छन्तो गमनं कुर्वाणा इत्यर्थः 'पुढविं पेच्चेह' पृथिवीमाक्रमथेत्यर्थः 'अभिहणह' त्ति पादाभ्या- माभिमुख्येन हथ 'वत्तेह' त्ति पादाभिधातेनैव 'वर्त्तयथ' श्लक्ष्णतां नयथ 'लेसेह' त्ति 'श्लेषयथ' भूम्यां श्लिष्टां कुरुथ 'संघाएह' त्ति 'सङ्घातयथ' संहतां कुरुथ 'संघट्टेह' त्ति 'सङ्घट्टयथ'' स्पृशथ 'परितावेह' त्ति 'परितापयथ' समन्ताज्जातसन्तापां कुरुथ 'किलामेह' त्ति क्लमयथ-मारणान्तिक-समुद्घातं गमयथेत्यर्थः 'उवद्दवेह' त्ति उपद्रवयथ मारयथेत्यर्थः 'कायं व' त्ति 'कायं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरं प्रतीत्यो- च्चारादिकायकार्यमित्यर्थः 'जोगं व'त्ति 'योगं' ग्लानवैयावृत्यादिव्यापारं प्रतीत्य 'रियं वा पडुच्च'त्ति 'ऋतं' सत्यं प्रतीत्य-अप्कायादिजीवसंरक्षणं संयममाश्रित्यथः 'देस देसेणं वयामी'त्ति प्रभूतायाः पृथिव्या ये विवक्षिता देशास्तैर्वजामो नाविशेषेण, ईर्यासमितिपरायणत्वेन सचेतनदेशपरिहारतोऽ-चेतनदेशैर्व्रजाम इत्यर्थः, एवं 'पएसं पएसेणं वयामो'इत्यपि नवरं देशो-भूमेर्महत्खण्डं प्रदेशस्तु-लघुतरमिति ।

अथोक्तगुणयोगेन नास्माकमिवैषां गमनमस्तीत्यभिप्रायतः स्थविराः यूयमेव पृथिव्या-क्रमणादितोऽसंयतत्वादिगुणा इति प्रतिपादनायान्ययूथिकान् प्रत्याहुः-'तुज्झे णं अज्जो'इत्यादि 'गइप्पवायं'ति गति प्रोद्यते-प्ररूप्यते यत्र तद्गतिप्रवादं गतेर्वा-प्रवृत्तेः क्रियायाः प्रपातः-प्रपतनसम्भव-प्रयोगादिष्वर्थेषु वर्त्तनं गतिप्रपातस्तत्प्रतिपादकमध्ययनं गतिप्रपातं तत् प्रज्ञापितवन्तो, गतिविचारप्रस्तावादिति ॥

**मू. (४११)** *कइविहे णं भंते ! गइप्पवाए पन्नत्ते ?, गोयमा ! पंचविहे गइप्पवाए पन्नत्ते, तंजहा-पयोगगती ततगती बंधणछेयणगती उववायगती विहायगती, एत्तो आरब्भ पयोगपयं निरवसेसं भानियव्वं, जाव सेत्तं विहायगई । सेवं भंते ! सेवं भंते ! ति ।*

**वृ.** अथ गतिप्रपातमेव बेदतोऽभिधातुमाह-'कइविहे ण'मित्यादि, 'पओगगति'त्ति इह गतिप्रपातभेदप्रक्रमे यद्गतिभेदभणनं तद्गतिधर्मत्वात् प्रपातस्य गतिभेदभणने गतिप्रपातभेदा एव भनिया भवन्तीति न्यायादवसेयं, तत्र प्रयोगस्य सत्यमनःप्रभृतिकस्य पञ्चदशविधस्य गतिः-प्रवृत्ति प्रयोगगतिः, 'ततगइ'त्ति ततस्य-ग्रामनगरादिकं गन्तुं प्रवृत्तत्वेन तच्चाप्राप्तत्वेन तदनन्तरालपथे वर्त्तमानतया प्रसारितक्रमतया च विस्तारं गतस्य गतिस्ततगति, ततो वाऽवधिभूतग्रामादेर्नगरादौ गति प्राकृतत्वेन ततगई ।

अस्मिंश्च स्थाने इतः सूत्रादारभ्य प्रज्ञापनायां षोडसं प्रयोगपदं 'सेत्तं विहायगई' एतत्सूत्रं यावद्वाच्यमेतदेवाह-'एत्तो'इत्यादि, तच्चैवं-'बंधणछेयणगई उववायगई विहायगई'इत्यादि, तत्र बन्धनच्छेदनगति-बन्धनस्य कर्मणः सम्बन्धस्य वा छेदने-अभावे गतिर्जीवस्य शरीरात् शरीरस्य वा जीवाद्बन्धनच्छेदनगति, उपपातगतिस्तु त्रिविधा-क्षेत्रभवनोभवभेदात्, तत्र नारकतिर्यगनर-देवसिद्धानां यत् क्षेत्रे उपपाताय-उत्पादाय गमनं सा क्षेत्रोपपातगति, या च नारकादनामेव स्वभवे उपपातरूपा गति सा भवोपपातगति, यच्च सिद्धपुद्गलयोर्गमनमात्रं सा नोभवोपपातगति, विहायोगतिस्तु स्पृशद्गत्यादिकाऽनेकविधेति ।

शतकं-८ उद्देशकः-७ समाप्तः

## —: शतकं-८ उद्देशकः-८ :—

**वृ.** अनन्तरोद्देशके स्थविरान् प्रत्यन्ययूथिकाः प्रत्यनीका उक्ताः, अष्टमे तु गुर्वादिप्रत्यनीका उच्यन्ते, इत्येवंसम्बन्धस्यास्येदं सूत्रम्—

**मू. (४१२)** *रायगिहे नयरे जाव एवं वयासी-गुरू णं भंते ! पडुच्च कति पडिणीया प० गोयमा ! तओ पडिनीया प०, तंजहा आयरियपडिणीए उवज्झायपडिणीए थेरपडिणीए।*

*गइं णं भंते ! पडुच्च कति पडिणीया पन्नत्ता ?, गोयमा ! तओ पडिणीया प०, इहलोगपडिणीए परलोगपडिणीए दुहओलोगपडिणीए ॥ समूहन्नं भंते ! पडुच्च कति पडिणीया पन्नत्ता ?, गोयमा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तओ पडिणीया प०, तंजहा कुलपडिणीए गणपडिणीए संघपडिणीए।*

*अनुकंपं पडुच्च पुच्छा, गोयमा ! तओ पडिणीया पन्नत्ता, तंजहा-तवस्सिपडिणीए गिलाणपडिणीए सेहपडिणीए।*

*सुयन्नं भंते ! पडुच्च पुच्छा, गोयमा ! तओ पडिणीया पन्नत्ता, तंजहा-सुत्तपडिणीए अत्थपडिणीए तदुभयपडिणीए ।*

*भावं णं भंते ! पडुच्च पुच्छा, गोयमा ! तओ पडिणीया पन्नत्ता, तंजहा-नाणपडिणीए दंसणपडिणीए चरित्तपडिणीए ॥*

**वृ.** 'रायगिहे'इत्यादि, तत्र 'गुरूणं'ति 'गुरून्' तत्त्वोपदेशकान् प्रतीत्य-आश्रित्य प्रत्यनीकमिव-प्रतिसैन्यमिव प्रतिकूलतया य त प्रत्यनीकाः, तत्राचार्यः-अर्थव्याख्याता उपाध्यायः-सूत्रदाता स्थविरस्तु जातिश्रुतपर्यायः, तत्र जात्या षष्टिवर्षजातः श्रुतस्थविरः-समवायधरः पर्यायस्थविरो-विंशतिवर्षपर्यायः, एतत्प्रत्यनीकता चैवम्-

॥१॥ "जच्चाईहि अवन्नं भासइ वट्टइ न यावि उववाए।
अहिओ छिद्दप्पेही पगासवाई अणणुलोमो ॥
॥२॥ अहवावि वए एवं उवएस परस्स देंति एवं तु।
दसविहवेयावच्चे कायव्व सयं न कुव्वंति ॥

'गइंण'मित्यादि, 'गतिं' मानुष्यत्वादिकां प्रतीत्य तत्रेहलोकस्य-प्रत्यक्षस्य मानुषत्वलक्षणपर्यायस्य प्रत्यनीक इन्द्रियार्थःप्रतिकूलकारित्वात् पञ्चाग्नितपस्विवद् इहलोकप्रत्यनीकः, परलोको-जन्मान्तरं तत्प्रत्यनीकः-इन्द्रियार्थःतत्परः, द्विधालोकप्रत्यनीकश्च चौर्यादिभिरिन्द्रियार्थःसाधनपरः

'समूहन्नं भंते !' इत्यादि, 'समूहं' साधुसमुदायं प्रतीत्य तत्र कुलं-चान्द्रादिकं तत्समूहो गणः-कोटिकादिस्तत्समूहः सङ्घः, प्रत्यनीकता चैतेषामवर्णवादादिभिरिति, कुलादिलक्षणं चेदम्-

॥१॥ "एत्थ कुलं विन्नेयं एगायरियस्स संतई जा उ।
तिण्ह कुलाण मिहो पुण सावेक्खाणं गणो होइ ॥
॥२॥ सव्वोवि नाणदंसणचरणगुणविहूसियाण समणाणं।
समुदाओ पुण संघो गणसमुदाओत्तिकाऊणं ॥

'अनुकंप'मित्यादि, अनुकम्पा-भक्तपानादिभिरुपष्टम्भस्तां प्रतीत्य, तत्र तपस्वी-क्षपकः ग्लानो-रोगादिभिरसमर्थःशैक्षः-अभिनवप्रव्रजितः, एते ह्यनुकम्पनीया भवन्ति, तदकरणाकारणाभ्यां च प्रत्यनीकतेति।

'सुयन्न'मित्यादि, 'श्रुतं' सूत्रादि तत्र सूत्रं-व्याख्येयम् अर्थः-तद्व्याख्यानं निर्युक्त्यादि तदुभयं-एतद्द्वितयं, तत्प्रत्यनीकता च–

॥१॥ "काया वया य ते च्चिय ते चेव पमाय अप्पमाया य।
मोक्खाहिगारियाणं जोइसजोणीहिं किं कज्जं ॥"
–इत्यादि दूषणोद्भावनं।–

'भाव'मित्यादि, भावः-पर्यायः, स च जीवाजीवगतः, तत्र जीवस्य प्रशस्तोऽप्रशस्तश्च, तत्र प्रशस्तः-क्षायिकादिरप्रशस्तो विवक्षयौदयिकः, क्षायिकादि पुनर्ज्ञानादिरूपोऽतो भावान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानादीन् प्रति प्रत्यनीकः तेषां वितथप्ररूपणतो दूषणतो वा, यथा–

॥ १ ॥ "पाययसुत्तनिबद्धं को वा जाणइ पणीय केणेयं।
किं वा चरणेणं तु दाणेण विणा उ हवइत्ति ॥"

एते च प्रत्यनीका अपुनःकरणेनाभ्युत्थिताः शुद्धिमर्हन्ति शुद्धिश्च व्यवहारादिति व्यवहार-प्ररूपणायाह–

*मू. (४१३) कइविहे णं भंते ! ववहारे पन्नत्ते ?, गोयमा ! पंचविहे ववहारे पन्नत्ते तंजहा- आगमे सुत्तं आणा धारणा जीए, जहा से तत्थ आगमे सिया आगमेणं ववहारं पट्ठवेज्ञा, नो य से तत्थ आगमे सिया जहा से तत्थ सुते सिया सुएणं ववहारं पट्ठवेज्ञा, नो वा से तत्थ सुए सिया जहा से तत्थ आणा सिया आणाए ववहारं पट्ठवेज्ञा, नो य से तत्थ आणा सिया जहा से तत्थ धारणा सिया धारणाए णं ववहारं पट्ठवेज्ञा, नो य से तत्थ धारणा सिया जहा से तत्थ जीए सिया जीएणं ववहारं पट्ठवेज्ञा, इच्चेएहिं पंचहिं ववहारं पट्ठवेज्ञा, तंजहा-*

*आगमेणं सुएणं आणाए धारणाए जीएणं, जहा २ से आगमे सुए आणा धारणा जीए तहा २ ववहारं पट्ठवेज्ञा।*

*से किमाहु भंते !, आगमबलिया समणा निग्गंथा इच्चेतं पंचविहं ववहारं जया २ जहिं २ तहा २ तहिं २ अनिस्सिओवसितं सम्मं ववहरमाणे समणे निग्गंथे आणाए आराहए भवइ।*

वृ. 'कइविहे ण' मित्यादि, व्यवहरणं व्यवहारो-मुमुक्षुप्रवृत्तिनिवृत्तिरूपः इह तु तन्निबन्धनत्वात् ज्ञानविशेषोऽपि व्यवहारः, तत्रागम्यन्ते-परिच्छिद्यन्ते अर्था अनेनेत्यागमः-केवलमनःपर्यायावधिपूर्वचतुर्दशकदशकनवकरूपः, तथा श्रुतं शेषमाचारप्रकल्पादि, नवादिपूर्वाणां च श्रुतत्वेऽप्यतीन्द्रियार्थेषु विशिष्टज्ञानहेतुत्वेन सातिशयत्वादागमव्यपदेशः केवलवदिति, तथा-ऽऽज्ञा-यदगीतार्थःस्य पुरतो गूढार्थःपदैर्देशान्तरस्थगीतार्थःनिवेदनायातीचारालोचनं इतरस्यापि तथैव शुद्धिदानं, तथा धारणा-गीतार्थःसंविग्नेन द्रव्याद्यपेक्षया यत्रापराधे यथा या विशुद्धि कृता तामवधारय यदगुप्तमेवालोचनदानतस्तत्रैव तथैव तामेव प्रयुङ्क्ते इति वैयावृत्यकरादेर्वा गच्छोपग्रहकारिणोऽशेषानुचितस्य प्रायश्चित्तपदानां प्रदर्शितानां धरणमिति, तथा जीतं द्रव्यक्षेत्र-कालभावपुरुषप्रतिसेवानुवृत्या संहननधृत्यादिपरिहानिमवेक्ष्य यत् प्रायश्चित्तदानं यो वा यत्र गच्छे सूत्रातिरिक्तः कारणतः प्रायश्चित्तव्यवहारः प्रवर्त्तितो बहुभिरन्यैश्चानुवर्त्तित इति।

आगमादीनां व्यापारणे उत्सर्गापवादावाह-'जहे'त्यादि, यथेति यथाप्रकारः केवलादीनामन्यतमः 'से' तस्य व्यवहर्त्तु स चोक्तलक्षणो व्यवहारः 'तत्र' तेषु पञ्चसु व्यवहारेषु मध्ये तस्मिन् वा प्रयाश्चित्तदानादिव्यवहारकाले व्यवहर्त्तव्ये वा वस्तुनि विषये 'आगमः'केवलादि 'स्यात्' भवेत् तादृशेनेति शेषः आगमेन 'व्यवहारं' प्रायश्तित्तदानादिकं 'प्रस्थापयेत्' प्रवर्त्तयेत् न शेषैः आगमेऽपि षड्विधे केवलेनावन्ध्यबोधतिवात्तस्य, तदभावे मनःपर्यायेण, एवं प्रधानतराभावे इतरेणेति।

अथ 'नो' नैव चशब्दो यदिशब्दार्थः 'से' तस्य स वा तत्र व्यवहर्त्तव्यादावागमः स्यात्, 'यथा' यत्प्रकारं 'से' तस्य तत्र व्यवहर्त्तव्यादौ श्रुतं स्यात् तादृशेन श्रुतेन व्यवहारं प्रस्थापयेदिति, 'इच्चेएहिं'इत्यादि निगमनं सामान्येन, 'जहा जहा से' इत्यादि तु विशेषनिगमनमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतैर्व्यवहर्त्तु फलं प्रश्नद्वारेणाह-'से किं'मित्यादि, अथ किं हे भदन्त !-भट्टारक 'आहुः' प्रतिपादयन्ति ? ये 'आगमबलिकाः' उक्तज्ञानविशेषबलवन्तः श्रमणा निर्ग्रन्थाः केवलिप्रभृतयः 'इच्चेयं'ति इत्येतद्वक्ष्यमाणं, अथवा इत्येवमिति-एवं प्रत्यक्षं पञ्चविधं व्यवहारं प्रायश्चित्तदानादिरूपं 'सम्मं ववहरमाणे'त्ति संबध्यते, व्यवहरन् प्रवर्त्तयन्नित्यर्थः, कथं ?-'सम्मं'ति सम्यक्, तदेव कथम् ? इत्याह-'यदा २' यस्मिन् २ अवसरे 'यत्र २' प्रयोजने वा क्षेत्रे वा यो व उचितस्तं तमिति शेषः तदा २ काले तस्मिन् २ प्रयोजनादौ, कथम्भूतम् ? इत्याह-अनिश्रितैः-सर्वाशंसारहितै-रुपाश्रितः-अङ्गीकृतोऽनिश्रितोपाश्रितस्तम्, अथवा निश्रितश्च-शिष्यत्वादि प्रतिपन्नः उपाश्रितश्चस एव वैयावृत्यकरत्वादिना प्रत्यासन्नतरस्तौ, अथवा निश्चितं-रागः उपाश्रितं च-द्वेषस्ते, अथवा निश्रितं च-आहारादिलिप्सा उपाश्रितं च-शिष्यप्रतीच्छककुलाद्यपेक्षा ते न स्तो यत्र तत्तथेति क्रियाविशेषणं, सर्वथा पक्षपातरहितत्वेन यथावदित्यर्थः, इह पूज्यव्याख्या-

॥ १ ॥ "रागो य होइ निस्सा उवस्सिओ दोसअंजुत्तो,
अहवण आहाराई दाही मज्झं तु एस निस्सा उ ।
सीसो पडिच्छओ वा होइ उवस्सा कलादीया ॥" इति

आज्ञायाजिनोपदेशस्याराधको भवतीति, हन्त ! आहुरेवेति गुरुवचनं गम्यमिति, अन्ये तु 'से किमाहु भंते !' इत्याद्येवं व्याख्यान्ति-अथ किमाहुर्भदन्त ! आगमबलिकाः श्रमणा निर्ग्रन्थाः पञ्चविधव्यवहारस्य फलमिति शेषः, अत्रोत्तरमाह- 'इच्चेय'मित्यादि ।

**मू. (४१४)** *कइविहे णं भंते ! बंधे पन्नत्ते ?, गोयमा ! दुविहे बंधे पन्नत्ते, तंजहा-ईरियावहियाबंधे य संपराइयबंधे य । ईरियावहियन्नं भंते ! कम्मं किं नेरइओ बंधइ तिरिक्खजोनिओ बंधइ तिरिक्खजोनिणी बंधइ मणुस्सो बंधइ मणुस्सी बं० देवो बं० देवी बं० ?, गोयमा ! नो नेरइओ बंधइ नो तिरिक्खजोणीओ बंधइ नो तिरिक्खजोनिणी बंध नो देवो बंधइ नो देवी बंधइ पुव्वपडिवन्नए पडुच्च मणुस्सा य मणुस्सीओ य बं० पडिवज्जमाणए पडुच्च मणुस्सो वा बंधइ १ मणुस्सी वा बंधइ २ मणुस्सा वा बंधंति ३ मणुस्सीओ वा बंधंति ४ अहवा मणुस्सो य मणुस्सी य बंधइ ५ अहवा मणुस्सो य मणुस्सीओ य बंधन्ति ६ अहवा मणुस्सा य मणुस्सी य बंधंति ७ अहवा मणुस्सा य मणुस्सीओ य बं० ।*

*तं भंते ! किं इत्थी बंधइ पुरिसो बंधइ नपुंसगो बंधति इत्थीओ बंधन्ति पुरिसा बं० नपुंसगा बंधन्ति नोइत्थीनोपुरिसोनोनपुंसओ बंधइ ?, गोयमा ! नो इत्थी बंधइ नो पुरिसो बं० जाव नो नपुंसगा बंधन्ति पुव्वपडिवन्नए पडुच्च अवगयवेदा बंधंति, पडिवज्जमाणए य पडुच्च अवगयवेदो वा बंधति अवगयवेदा वा बंधंति ।*

*जइ भंते ! अवगयवेदो वा बंधइ अवगयवेदा वा बंधंति ते भंते ! किं इत्थीपच्छाकडो बं० पुरिसपच्छाकडो बं० २ नपुंसकपच्छाकडो बं० ३ इत्थीपच्छाकडा बंधंति ४ पुरिसपच्छाकडावि बंधंति ५ नपुंसगपच्छाकडावि बं० ६ उदाहु इत्थिपच्छाकडो य पुरिसपच्छाकडो य बंधति ४ उदाहु इत्थीपच्छाकडो य नपुंसगपच्छाकडो य बंधइ ४ उदाहु पुरिसपच्छाकडो य नपुंसगपच्छाकडो य बंधइ ४ उदाहु इत्थिपच्छाकडो य पुरिसपच्छाकडो य नपुंसगपच्छाकडो य भानियव्वं ८, एवं एते छव्वीसं भंगा २६ जाव उदाहु इत्थीपच्छाकडा य पुरिसप० नपुंसकप० बंधंति ?*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गोयमा ! इत्थिपच्छाकडोवि बंधइ १ पुरिसपच्छाकडोवि बं० २ नपुंसगपच्छाकडोवि बं० ३ इत्थीपच्छाकडावि बं० ४ पुरिसपच्छाकडावि बं० ५ नपुंसकपच्छाकडावि बं० ६ अहवा इत्थीप- च्छाकडा पुरिसपच्छाकडो य बंधइ ७ एवं एए चेव छव्वीसं भंगा भानियव्वा, जाव अहवा इत्थि- पच्छाकडा य पुरिसपच्छाकडा य नपुंसगपच्छाकडा य बंधंति।*

*तं भंते ! किं बंधी बंधइ बंधिस्सइ १ बंधी बंधइ न बंधिस्सइ २ बंधी न बंधइ बंधिस्सइ ३ बंधी न बंधइ न बंधिस्सइ ४ न बंधी बंधइ बंधिस्सइ ५ न बंधी बंधइ न बंधिस्सइ ६ न बंधी न बंधइ बंधिस्सइ ७ न बंधी न बंधइ न बंधिस्सइ ८ ?*

*गोयमा ! भवागरिसं पडुच्च अत्थेगतिए बंधी बंधइ बंधिस्सइ अत्थेगतिए बंधी बंधइ न बंधिस्सइ, एवं तं चेव सव्वं जाव अत्थेगतिए न बंधी न बंधइ न बंधिस्सइ, गहमागरिसं पडुच्च अत्थेगतिए बंधी बंधइ बंधिस्सइ एवं जाव अत्थेगतिए न बंधी बंधइ बंधिस्सइ, नो चेव णं न बंधी बंधइ न बंधिस्सइ, अत्थेगतिए न बंधी न बंधइ बंधिस्सइ अत्थेगतिए न बंधी न बंधह न बंधिस्सह*

*तं भंते ! किं साइयं सपज्जवसियं बंधइ साइयं अपज्जवसियं बंधइ अनाइयं सपज्जवसियं बंधइ अनाइयं अपज्जवसियं बंधइ ?, गोयमा ! साइयं सपज्जवसियं बंधइ नो साइयं अपज्जवसियं बंधइ नो अनाइयं सपज्जवसियं बंधइ नो अनाइयं अपज्जवसियं बंधइ।*

*तं भंते ! किं देसेणं देसं बंधइ देसेणं सव्वं बंधइ सव्वेणं देसं बंधइ सव्वेणं सव्वं बंधइ ?, गोयमा ! नो देसेणं देसं बंधइ नो देसेणं सव्वं बंधइ नो सव्वेणं देसं बंधइ सव्वेणं सव्वं बंधइ ॥*

**वृ.** आज्ञाराधकश्च कर्म्म क्षपयति शुभं वा तद् बध्नातीति बन्दं निरूपयन्नाह-'कई'त्यादि, 'बंधे'त्ति द्रव्यतो निगडादिबन्धो भावतः कर्मबन्धः, इह च प्रक्रमात् कर्मबन्धोऽधिकृतः 'ईरियावहियाबंधे य'त्ति ईर्या-गमनं तत्प्रधान- पन्था-मार्ग ईर्यापथस्तत्र भवमैर्यापथिकं-केवलयोगप्रत्ययं कर्म्म तस्य यो बन्धः स तथा, स चैकस्य वेदनीयस्य, 'संपराइयबंधे य'ति संपरैति-संसारं पर्यटति एभिरिति सम्परायाः-कषायास्तेषु भवं साम्परायिकं कर्म तस्य यो बन्धः स साम्परायिकबन्धः कषायप्रत्यय इत्यर्थः, स चावीतरागगुणस्थानकेषु सर्वेष्विति।

'नो नेरइओ'इत्यादि, मनुष्यस्यैव तद्बन्धो, यस्मादुपशान्तमोहक्षीणमोहसयोगकेवलिनामेव तद्बन्धनमिति, 'पुव्वपडिवन्नए'इत्यादि, पूर्वं-प्राक्काले प्रतिपन्नमैर्यापथिकबन्धकत्वं यैस्ते पूर्वप्रतिपन्नकास्तान्, तद्बन्धकत्वद्वितीयादिसमयवर्त्तिन इत्यर्थः, ते च सदैव बहवः पुरुषाः स्त्रियश्च सन्ति उभयेषां केवलिनां सदैव भावादत उक्तं 'मणुस्सा य मणुस्सीओ य बंधंति'त्ति, 'पडिवज्जमाणए'त्ति प्रतिपद्य-मानकान् एर्यापथिककर्म्मबन्दनप्रथमसमयवर्त्तिन इत्यर्थः, एषां च विरहसम्भवाद् एकदा मनुष्यस्य स्त्रियाश्चैकैकयोगे एकत्वबहुत्वाभ्यां चत्वारो विकल्पाः, द्विकसंयोगे तथैव चत्वारः, एवमेते सर्वेऽप्यष्टौ, स्थापना चेयमेषाम्-पु० १ स्त्री १ पुं ३० स्त्री ३।

एतदेवाह–'मणुस्से वा'इत्यादि, एषां च पुंस्त्वादि तत्तल्लिङ्गापेक्षया न तु वेदापेक्षया, क्षीणोपशान्तवेदत्वात्। अथ वेदापेक्षं स्त्रीत्वाद्यधिकृत्याह–

'तं भंते ! किं'मित्यादि, 'नो इत्थी'इत्यादि च पदत्रयनिषेधेनावेदकः प्रश्नितः, उत्तरे तु षन्नां पदानां निषेधः सप्तमपदोक्तस्तु व्यपगतवेदः, तत्र च पूर्वप्रतिपन्नाः प्रतिपद्यमानकाश्च भवन्ति, तत्र पूर्वप्रतिपन्नकानां विगतवेदानां सदा बहुत्वभावात् आह- 'पुव्वपडिवन्ने'त्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपद्यमानकानां तु सामयिकत्वाद् विरहभावेनैकादिसम्भवाद्विकल्पद्वयमत एवाह- 'पडिवज्जमाणे'त्यादि।

अपगतवेदमैर्यापथिकबन्धमाश्रित्य स्त्रीत्वादि भूतभावापेक्षया विकल्पयन्नाह-'जई'त्यादि, 'तं भंते!'तदा भदन्त! तद्वा कर्म्म 'इत्थीपच्छाकडे'त्ति भावप्रधानत्वान्निर्देशस्य स्त्रीत्वं पश्चात्कृतं-भूततां नीतं येनावेदकेनासौ स्त्रीपश्चात्कृतः, एवमन्यान्यपि, इहैककयोगे एकत्वबहुत्वाभ्यां षड् विकल्पाः द्विकयोगे तु तथैव द्वादश त्रिकयोगे पुनस्तथैवाष्टौ, एते च सर्वे षडविंशति, इयं चैषां स्थापना-स्त्री १ पु० १ न० १ स्त्री ३ पु० ३ न० ३।

सूत्रे न चतुर्भङ्ग्यष्टभङ्गीनां प्रथमविकल्पा दर्शिताः सर्वान्तिमश्चेति अथैर्यापथिकर्मबन्धनमेव-कालत्रयेण विकल्पयन्नाह-'तं भंते!' इत्यादि, 'तद्' एर्यापथिकं कर्म 'बंधी' ति बद्धवान् बध्नाति भन्त्स्यति चेत्येको विकल्पः, एवमन्येऽपि सप्त, एषां च स्थापना। उत्तरं तु 'भवे' त्यादि, भवे अनेकत्रोपशमादिश्रेनिप्राप्तया आकर्ष-एर्यापथिक कर्माणुग्रहणं भवाकर्षस्तं प्रतीत्य 'अस्त्यैकः' भवत्येकः कश्चिज्जीवः प्रथमवैकल्पिकः, तथा हि –

पूर्वभवे उपशान्तमोहत्वे सत्यैर्यापथिकं कर्म्म बद्धवान् वर्त्तमानभवे चोपाशान्तमोहत्वे बध्नाति अनागते चोपशान्तमोहावस्थायां भन्त्स्यतीति १ द्वितीयस्तु यः पूर्वस्मिन् भवे उपशान्तमोहत्वं लब्धवान् वर्त्तमाने च क्षीणमोहत्वं प्राप्तः स पूर्वं बद्धवान् वर्त्तमाने च बध्नाति शैलेश्यवस्थायां पुनर्न भन्त्स्यतीति २, तृतीयः पूर्वजन्मनि उपशान्तमोहत्वे बद्धवान् तत्प्रतिपतितो न बध्नाति अनागते चोपशान्तमोहत्वं प्रतिपत्स्यते तदा भन्स्यतीति ३, चतुर्थःस्तु शैलेशीपूर्वकाले बद्धवान् शैलेश्यां च न बध्नाति न च पुनर्भन्त्स्यतीति ४, पञ्चमस्तु पूर्वजन्मनि नोपशान्तमोहत्वं लब्धवानिति न बद्धवान् अधुना लब्धमिति बध्नाति पुनरप्येष्यत्काले उपशान्तमोहाद्यवस्थायां भन्त्स्यतीति पञ्चमः ५, षष्ठः पुनः क्षीणमोहत्वादि न लब्धवानिति न पूर्वं बद्धवान् अधुना तु क्षीणमोहत्वं लब्धमिति बध्नाति शैलेश्यवस्थायां पुनर्न भन्त्स्यतीति षष्ठः ६, स्तमः पुनर्भव्यस्य, स ह्यनादौ काले न बद्धवान् अधुनाऽपि कश्चिन्न बध्नाति कालान्तरे तु भनत्स्यतीति ७, अष्टमस्त्वभव्यस्य ८, स च प्रतीत एव।

'गहणागरिस'मित्यादि, एकस्मिन्नेव भवे एर्यापथिककर्मपुद्गलानां ग्रहणरूपो य आकर्षोऽसौ ग्रहणाकर्षस्तं प्रतीत्यास्त्येकः कश्चिज्जीवः प्रथमवैकल्पिकः, तथाहि-उपशान्तमोहा-दिर्यदा एर्यापथिकं कर्म बध्ध्वा बध्नाति तदाऽतीतसमयापेक्षया बद्धवान् वर्त्तमानसमयापेक्षया च बध्नाति अनागत-समयापेक्षया २, तृतीयस्तूपशान्तमोहत्वे बद्धवान् तत्प्रतिपतितस्तु न बध्नाति पुनस्तत्रैव भवे उपशमश्रेणीं प्रतिपन्नो भन्त्स्यतीति, एकभवे चोपशमश्रेणी द्विर्वारं प्राप्यत एवेति ३, चतुर्थः पुनः सयोगित्वे बद्धवन् शैलेश्यवस्थायां न बध्नाति न च भन्त्स्यतीति ४, पञ्चमः पुनरायुषः पूर्वभागे उपशान्तमोहत्वादि न लब्धमिति न बद्धवान् अधुना तु लब्धमिति बध्नाति तदद्धाया एव चैष्यत्समयेषु पुनर्भन्त्स्यतीति ५।

षष्ठस्तु नास्त्येव, तत्र बद्धवान् बध्नातीत्यनयोरुपपद्यमानत्वेऽपि न भन्त्स्यतीति इत्यस्यानुपपद्यमानत्वात्, तथाहि-आयुषः पूर्वभागे उपशान्तमोहत्वादि न लब्धिमिति न बद्धवान् तल्लाभसमये च बध्नाति ततोऽनन्तरसमयेषु च भन्त्स्यत्येव न तु न भन्त्स्यति, समयमात्रस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्धस्येहाभावात्, यस्तु मोहोपशमनिर्ग्रन्थस्य समयानन्तरमरणेनैर्यापथिककर्मबन्धः समयमात्रो भवति नासौ षष्ठविकल्पहेतुः, तदनन्तरैर्यापथिककर्मबन्धाभावस्य भावान्तरवर्त्तित्वाद्गृहणाकर्षस्य चेह प्रक्रान्तत्वात्, यदि पुनः सयोगिचरमसमये बध्नाति ततोऽनन्तरं न भनत्स्यतीति विवक्ष्येत तदा यत्सयोगिचरमसमये बध्नातीति तद्बन्धपूर्वकमेव स्यान्नाबन्धपूर्वकं, तत्पूर्वसमये तस्य बन्धकत्वात्, एवं च द्वितीय एव भङ्गः स्यान्न पुनः षष्ठ इति ६, सप्तमः पुनर्भव्यविशेषस्य ७, अष्टमस्त्वभव्यस्येति ८।

इह च भवाकर्षापेक्षेष्वष्टसु भङ्गकेषु 'बंधी बंधइ बंधिस्सइ' इत्यत्र प्रथमे भङ्गे उपशान्तमोहः, 'बंधी बंधइ न बंधिस्सइ' इत्यत्र चतुर्थे शैलेशीगतः, 'न बंधी न बंधइ बंधिस्सइ' इत्यत्र सप्तमे भव्यः, 'न बंधी न बंधइ न बंधिस्सइ' इत्यत्राष्टमेऽभव्यः, ग्रहणाकर्षापेक्षेषु पुनरेतेष्वेव प्रथमे उपशान्तमोहः क्षीणमोहो वा, द्वितीये तु केवली, तृतीये तूपशान्तमोहः, चतुर्थे शैलेशीगतः पञ्चमे उपशान्तमोहः क्षीणमोहो वा, षष्ठः शून्यः, सप्तमे भव्यो भाविमोहोपशमो भाविमोहक्षयो वा, अष्टमे त्वभव्य इति।

अथैर्यापथिकबन्धमेव निरूपयन्नाह-'त'मित्यादि, 'तत' एर्यापथिकं कर्म्म 'साइयं सपज्ज-वसियं मित्यादि चतुर्भङ्गी तत्र चैर्यापथिककर्मणः प्रथम भङ्गे बन्धोऽन्येष तदसम्भवादिति' 'त' मित्यादि, 'तत्' एर्यापथिकं कर्म्म 'देसेणं देसं'ति 'दशेन' जीवदेशेन 'देशं' कर्म्मदेशं बध्नातीत्यादि चतुर्भङ्गी, तत्र च देशेन कर्म्मणो देशः सर्वं वा कर्म्म सर्वात्मना वा कर्म्मणो देशो न बध्यते, किं तर्हि सर्वात्मना सर्वमेव बध्यते, तथास्वभावत्वाज्जीवस्येति।

अथ साम्परायिकबन्धनिरूपणायाह–

**मू. (४१५)** *संपराइयन्नं भंते! कम्मं किं नेरइयो बंधइ तिरिक्खजोणीओ बंधइ जाव देवी बंधइ?, गोयमा! नेरइओवि बंधइ तिरिक्खजोणीओवि बंधइ तिरिक्खजोनिणीवि बंधइ मणुस्सोवि बंधइ मणुस्सीवि बंधइ देवोवि बंधइ देवीवि बंधइ।*

*तं भंते! किं इत्थी बंधइ पुरिसो बं० तहेव जाव नोइत्थीनोपुरिसोनोनपुंसओ बंधइ?, गोयमा! इत्थीवि बं० पुरिसोवि बंधइ जाव नपुंसगोवि बंधइ अहवेए य अवगयवेदो य बंधइ अहवेए य अवगयवेया य बंधइ।*

*जइ भंते! अवगयवेदो य बंधइ अवगयवेदा य बंधन्ति तं भंते! किं इत्थीपच्छाकडो बंधइ पुरिसपच्छाकडो बंधइ? एवं जहेव अवगयवेदो य बंधइ अवगयवेदाय बंधन्ति तं भंते! किं इत्थीपच्छाकडो बंधइ पुरिसपच्छाकडो बंधइ? एवं जहेव ईरियावहियाबंधगस्स तहेव निरवसेसं जाव अहवा इत्थीपच्छाकडा य पुरिसपच्छाकडा य (बंधइ) नपुंसगपच्छाकडा य बंधंति।*

*तं भंते! किं बंधी बंधइ बंधिस्सइ १ बंधी बंधइ न बंधिस्सइ २ बंधी न बंधइ बंधिस्सइ ३ बंधी न बंधइ न बंधिस्सइ ४?, गोयमा! अत्थेगतिए बंधी बंधइ बंधिस्सइ १ अत्थेगतिए बंधी बंधइ न बंधिस्सइ २ अत्थेगतिए बंधी न बंधइ बंधिस्सइ ३ अत्थेगतिए बंधी न बंधइ न बंधिस्सइ*

*तं भंते! किं साइयं सपज्जवसियं बंधइ? पुच्छा तहेव, गोयमा! साइयं वा सपज्जवसियं बंधइ अणाइयं वा सपज्जवसियं बंधइ अणाइयं वा अपज्जवसियं बंधइ णो चेव णं साइयं अपज्जवसियं बंधइ। तं भंते! किं देसेणं देसं बंधइ एवं जहेव ईरियावहियाबंधगस्स जाव सव्वेणं सव्वं बंधि।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'संपराइयं ण'मित्यादि, 'किं नेरइओ' इत्यादयः सप्त प्रश्नाः, उत्तरानि च सप्तैव, एतेषु च मनुष्यमनुषिवर्जाः पञ्च साम्परायिकबन्धका एव सकषायत्वात्, मनुष्यमनुष्यौ तु सकषायित्वे सति साम्परायिकं बध्नीतो न पुनरन्यदेति ॥

साम्परायिकबन्धमेव स्त्र्याद्यपेक्षया निरूपयन्नाह-'तं भंते! किं इत्थी'त्यादि, इह यास्त्र्यादयो विवक्षितैकत्वबहुत्वाः षट् सर्वदा साम्परायिकं बध्नन्ति, अपगतवेदश्च कदाचिदेव, तस्य कादाचित्कत्वात्, ततश्च स्त्र्यादयः केवला बध्नन्ति अपगतवेदसहिताश्च, ततश्च यदाऽपगतवेदसहितास्तदोच्यते अथवैते स्त्र्यादय बध्नन्ति अपगतवेदश्च, तस्यैकस्यापि सम्भवात्, अथवैते स्त्र्यादयो बध्नन्ति अपगतवेदाश्च, तेषां बहूनामपि सम्भवात्, अपगतवेदश्च साम्परायिकबन्धको वेदत्रये उपशान्ते क्षीणे वा यावद्यथाख्यातं न प्राप्नोति तावल्लभ्यत इति, इह च पूर्वप्रतिपन्नप्रतिपद्यमानकविवक्षा न कृता, द्वयोरप्येकत्वबहुत्वयोर्भावेन निर्विशेषत्वात्, तथाहि-अपगतवेदत्वे साम्परायिकबन्धोऽल्पकालीन एव, तत्र च योऽपगतवेदत्वं प्रतिपन्नपूर्व साम्परायिकं बध्नात्यसावेकोऽनेको वा स्यात्, एवं प्रतिपद्यमानकोऽपीति ।

अथ साम्परायिककर्म्मबन्धमेव कालत्रयेण विकल्पयन्नाह-'तं भंते! कि'मित्यादि, इह च पूर्वोक्तेष्वष्टासु विकल्पेष्वाद्याश्चत्वार एव संभवन्ति नेतरे, जीवानां साम्परायिककर्मबन्धस्यानादित्वेन 'न बंधी'त्यस्यानुपपद्यमानत्वात्, तत्र प्रथमः सर्व एव संसारी यथाख्यातासंप्राप्तोपशमकक्षापकावसानः, स हि पूर्वं बद्धवान् वर्त्तमानकाले तु बध्नाति अनागतकालापेक्षया तु भन्त्स्यति १, द्वितीयस्तु मोहक्षयात्पूर्वमतीतकालापेक्षया बद्धवान् वर्त्तमानकाले तु बध्नाति भाविमोहक्ष-यापेक्षया तु न भन्त्स्यति २, तृतीयः पुनरुपशान्तमोहत्वात् पूर्वं बद्धवान् उपशान्तमोहत्वे न बध्नाति तस्माच्च्युतः पुनर्भन्तस्यतीति ३, चतुर्थःस्तु मोहक्षयात्पूर्वं साम्परायिकं कर्म बद्धवान् उपशान्त मोहत्वे न बध्नाति तस्माच्च्युतः पुनर्भन्त्स्यतीति ३, चतुर्थःस्तु मोहक्षयात्पूर्वं साम्परायिकं कर्म बद्धवान् मोहक्षे न बध्नाति न च भन्त्स्यतीति ।

साम्परायिककर्मबन्धमेळाश्रित्याह 'तं'मित्यादि, 'साइयं वा सपज्जवसियं बंधइ' त्ति उपशान्तमोहतायाश्च्युतः पुनरुपशान्तमोहतां क्षीणमोहतां वा प्रतिपत्स्यमानः, 'अणाइयं वा सप्पज्जवसयं बंधइ' त्ति आदितः क्षपकापेक्षमिदम्, 'अणाइयं वा अपज्जवसियं बंधइ' त्ति एतच्चाभव्यापेक्षं, 'नो चेव णं साइयं अपज्जवसियं बंधइ' त्ति, सादिसाम्परायिकबन्धो हि मोहोपशमाच्च्युतस्यैव भवति, तस्य चावश्यं मोक्षयायित्वात्साम्परायिकबन्धस्य व्यवच्छेदसम्भवः, ततश्च न सादिरपर्यवसानः साम्परायिकबन्धोऽस्तीति ।

अनन्तरं कर्मवक्तव्यतोक्ता, अथ कर्म्मस्वेव यथायोगं परीषहावतारं निरूपयितुमिच्छुः कर्म्मप्रकृतीः परीषहांश्च तावदाह–

**मू. (४१६)** *कइ णं भंते! कम्मपयडीओ पन्नत्ताओ ?, गोयमा! अट्ठ कम्मपयडीओ पन्नत्ताओ, तंजहा-नाणावरनिज्जं जाव अंतराइयं ।*

*कइ णं भंते! परीसहा पन्नत्ता ?, गोयमा! बावीसं परीसहा पन्नत्ता, तंजहा-दिगिंछापरीसहे पिवासापरीसहे जाव दंसणपरीसहे ।*

*एए णं भंते! बावीसं परीसहा कतिसु कम्मपगडीसु समयोरंति ?, गोयमा! चउसु*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कम्मपयडीसु समोयरंति, तंजहा-नाणावरनिज्ञे वेयनिज्ञे मोहनिज्ञे अंतराइए।*

*नाणावरनिज्ञे णं भंते! कम्मे कति परीसहा समोयरंति?, गोयमा! दो परीसहा समोयरंति, तंजहा पन्नापरीसहे नाणपरीसहे य।*

*वेयनिज्ञे णं भंते! कम्मे कति परीसहा समोयरंति?, गोयमा! एक्कारस परीसहा समोयरंति, तंजहा-*

**वृ.** 'कति ण'मित्यादि, 'परीसह'त्ति परीति-समन्तात् स्वहेतुभिरुदीरिता मार्गाच्यवननिर्जरार्थं साध्वादिभिः सह्यन्त इति परीषहास्ते च द्वाविंशतिरिति 'दिगिंछ'त्ति बुभुक्षा सैव परीषहः-तपोऽर्थःमनेषणीयभक्तपरिहारार्थं वा मुमुक्षुणा परिषह्यमाणत्वात् दिगिंछापरीसहेत्ति, एवं पिपासापरीसहोऽपि, यावच्छब्दलब्धं सव्याख्यानमेवं दृश्यं-'सीयपरीसहे उसिणपरीसहे' शीतोष्णे परीषहौ आतापनार्थं शीतोष्णबाधायामप्यग्निसेवास्नानाद्यकृत्यपरिवर्जनार्थं वा मुमुक्षुणा तयोः परिषह्यमाणत्वात्, एवमुत्तरत्रापि, 'दंसमसगपरीसहे' दंश मशकाश्च-चतुरिन्द्रियविशेषाः, उपलक्षणत्वाच्चैषां युकामत्कुणमक्षिकादिपरिग्रहः, परीषहता चैतेषां देहव्यथामुत्पादयत्स्वपि तेष्वनिवारणभयद्वेषाभावतः।

'अचेलपरीसहे'चेलानां-वाससामभावोऽचेलं तच्च परीषहोऽचेलतायां जीर्णापूर्णमलिनादिचेलत्वे च लज्जादैन्याकाङ्क्षाद्यकरणेन परिषह्यमाणत्वादिति, 'अरइपरीसहे' अरति-मोहनीयजो मनोविकारः सा च परीषहस्तन्निषेधनेन सहनादिति 'इत्थियापरीसहे' स्त्रियाः परीषहः २ तत् परीषहणं च तन्निरपेक्षत्वं ब्रह्मचर्यमित्यर्थः 'चरियापरीसहे' चर्या-ग्रामनगरादिषु संचरणं ततपरिषहणं चाप्रतिबद्धतया तत्करणं 'निसीहियापरीसहे' नैषेधिकी-स्वाध्यायभूमि सून्यागारादिरूपा तत्परिषहणं च तत्रोपसर्गेष्वत्रासः 'सेज्ञापरीहे' शय्या-वतिस्तत्परिषहणं च तज्जन्यदुःखादेरुपेक्षा।

'अक्कोसपरीसहे' आक्रोशो-दुर्वचनं 'वहपरीसहे' व्यधो वधे वा-यष्ट्यादिताडनं तत्परीषहणं च क्षान्त्यवलम्बनं 'जायणापरीसहे' याञ्चा-भिक्षणं तत्परिषहणं च तत्र मानवर्जनम् 'अलाभपरीसहे' अलाभः-प्रतीतस्तत्परिषहणं च तत्र दैन्याभावः 'रोगपरीसहे' रोगो-रुक् तत्परिषहणं च-तत्पीडासहनं चिकित्सावर्जनं च 'तणफासपरीसहे' तृणस्पर्श-कुशादिस्पर्शस्तत्परिषहणं च कादाचित्कतृणग्रहणे तत्संस्पर्शजन्यदुःखाधिसहनं 'जल्लपरीसहे' जल्लो-मलस्तत्परिषहणं च देशतः सर्वतो वा स्नानोद्वर्त्तनादिवर्जनं 'सक्कारपुरक्कारपरीसहे' सत्कारो-वस्त्रादिपूजा पुरस्कारो-राजादिकृताभ्युत्थानादिस्तत्परिषहणं च तत्सद्भावे आत्मोत्कर्षवर्जनं तदभावे दैन्यवर्जनं तदनाकाङ्क्ष चेति।

'पन्नापरीसहे' प्रज्ञा-मतिज्ञानविशेषस्तत्परिषहणं च प्रज्ञाया अभावे उद्वेगाकरणं तद्भावे च मदाकरणं 'नाणपरीसहे' ज्ञानं-मत्यादि तत्परिषहणं च तस्य विशिष्टस्य सद्भावे मदवर्जनमभावे च दैन्यपरिवर्जनं, ग्रन्थान्तरे त्वज्ञानपरीषह इति पठ्यते, 'दंसणपरीसहे' दर्शनं-तत्त्वश्रद्धानं तत्परिषहणं च जिनानां जिनोक्तसूक्ष्मभावानां चाश्रद्धानवर्जनमिति।

'कइसु कम्मपयडीसु समोयरंति'त्ति कतिषु कर्म्मप्रकृतिषु विषये परीषहाः समवतारं व्रजन्तीत्यर्थः 'पण्णापरीसहे'त्यादि प्रज्ञापरीषहे ज्ञानावरणेमतिज्ञानावरणरूपे समवतरति, प्रज्ञाया अभावमाश्रित्य, तदभावस्य ज्ञानवरणोदयसम्भवत्वात्, यत्तु, तदभावे दैन्यपरिवर्जनं तत्सद्भावे च मानवर्जनं तच्चारित्रमोहनीयक्षयोपशमादेरिति, एवं ज्ञानपरीषहोऽपि नवरं मत्यादिज्ञानावरणेऽवतरति, 'पंचे'त्यादिगाथा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४१७) *पंचेव आनुपुव्वी चरिया सेज्ञा वहे य रोगे य।*
*तणफास जल्लमेव य एक्कारस वेदनिज्ञंमि॥*

वृ. 'पंचेव आनुपुव्वी'ति क्षुत्पिपासाशीतोष्णदंशमशकपरीषहा इत्यर्थः, एतेषु च पीडैव वेदनीयोत्था तदधिसहनं तु चारित्रमोहनीयक्षयोपशमादिसम्भवं, अधिसहनस्य चारित्ररूपत्वादिति

मू. (४१८) *दंसणमोहणिज्ञे णं भंते! कम्मे कति परीसहा समोयरंति, गोयमा! एगे दंसणपरीसहे समोयरइ, चरित्तमोहणिज्ञे णं भंते! कम्मे कति परीसहा समोयरंति?, गोयमा! एगे दंसणपरीसहे समोयरइ, चरित्तमोहणिज्ञे णं भंते! कम्मे कति परीसहा समोयरंति?, गोयमा सत्त परीसहा समोयरंति, तंजहा–*

वृ. 'एगे दंसणपरीसहे समोयरति'त्ति यतो दर्शनं तत्त्वश्रद्धानरूपं दर्शनमोहनीयस्य क्षयोपशमादौ भवति उदये तु न भवतीत्यतस्तत्र दर्शनपरीषहः समवतरतीति।

मू. (४१९) *अरती अचेल इत्थी निसीहिया जायणा य अक्कोसे।*
*सक्कारपुरक्कारे चरित्तमोहंमि सत्तेते॥*

वृ. 'अरई' त्यादि गाथा, तत्र चारतिपरिषहोऽरतिमोहनीये तज्जन्यत्वात्, अचेलपरीषहो जुगुप्सामोहनीये लज्ञापेक्षया, स्त्रीपरीषहः पुरुषवेदमोहे स्त्र्यपेक्षया तु पुरुषपरीषह- स्त्रीवेदमोहे, तत्त्वतः स्त्र्याद्यभिलाषरूपत्वात्तस्य, नैषेधिकीपरीषहो भयमोहे उपसर्गभयापेक्षया, याच्ञापरीषहो मानमोहे तद्दुष्करत्वापेक्षया, आक्रोशपरीषहः क्रोधमोहे क्रोधोत्पत्त्यपेक्षया, सत्कारपुरस्कारपरीषहो मानमोहे मदोत्पत्त्यपेक्षया समवतरति, सामान्यतस्तु सर्वेऽप्येते चारित्रमोहनीये समवतरन्तीति।

मू. (४२०) *अंतराइए णं भंते! कम्मे कति परीसहा समोयरंति?, गोयमा! एगे अलाभपरीसहे समोयरइ।*

*सत्तविहबंधगस्स णं भंते! कति परीसहा पन्नत्ता?, गोयमा! बावीसं परीसहा पण्मत्ता, वीसं पुण वेदेइ, जं समयं सीयपरीसहं वेदेति नो तं समयं उसिणपरीसहं वेदेइ जं समयं उसिणपरीसहं वेदेइ नो तं समयं सीयपरीसहं वेदेइ, जं समयं परियापरीसह वेदेति नो तं समयं निसीहियापरीसहं वेदेति जं समयं निसीहियापरीसहं वेदेइ नो तं समयं चरियापरीसहं वेदेइ।*

*अट्ठविहबंधगस्स णं भंते! कति परीसहा पन्नत्ता?, गोयमा! बावीसं परीसहा पन्नत्ता, तंजहा-छुहापरीसहे पिवासापरीसहे सीयप० दंसप० मसगप० जाव अलाभप०, एवं अट्ठविहबंधगस्स वि सत्तविहबंधगस्स वि।*

*छव्विहबंधगस्स णं भंते! सरागछउमत्थस्स कति परीसहा पन्नत्ता?, गोयमा! चोद्दस परीसहा पन्नत्ता बारस पुण वेदेइ, जं समयं सीयपरीसहं वेदेइ ण तं समयं उसिणपरीसहं वेदेइ जं समयं उसिणपरीसहं वेदेइ नो तं समयं सीयपरीसहं वेदेइ, जं समयं चरियापरीसहं वेदेति नो तं समयं सेज्ञापरीसहं वेदेइ जं समयं सेज्ञापरीसहं वेदेति नो तं समयं चरियापरीसहं वेदेइ।*

*एगविहबंधगस्स णं भंते! वीयराछउमत्थस्स कति परीसहा पन्नत्ता?, गोयमा! एवं चेव जहेव छव्विहबंधगस्स णं।*

*एगविहबंधगस्स णं भंते! सजोगिभवत्थकेवलिस्स कति परिसहा पन्नत्ता?, गोयमा! एक्कारस परीसहा पन्नत्ता, नव पुण वेदेइ, सेसं जहा छव्विहबंधगस्स।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अबंधगस्स णं भंते! अजोगिभवत्थकेवलिस्स कति परीसहा पन्नत्ता?, गोयमा! एक्कारस परीसहा पन्नत्ता, नव पुण वेदेइ, जं समयं सीयपरीसहं वेदेति नो तं समयं उसिणपरीसहं वेदेइ जं समयं उसिणपरीसहं वेदेति नो तं समयं सीयपरीसहं वेदेइ, जं समयं चरियपरीसहं वेदेइ नो तं समयं सेज्ञापरीसहं वेदेति जं समयं सेज्ञापरिसहं वेदेइ नो तं समयं चरियापरीसहं वेदेइ ॥*

वृ. 'एगे अलाभपरीसहे समोयरति'त्ति अलाभपरीषह एवान्तराये समवतरति, अन्तयारं चेह लाभान्तरायं, तदुदय एव लाभाभावात्, तदधिसहनं च चारित्रमोहनीयक्षयोपशम इति ॥ अथ बन्धस्थानान्याश्रित्यपरीषहान् विचारयन्नाह- 'सत्तविहे'त्यादि, सप्तविधबन्धकः-आयुर्व-र्जशेषकर्म्मबन्धकः 'जं समयं सीयपरीसह'मित्यादि, यत्र समये शीतपरीषहं वेदयते न तत्रोष्णप-रीसहं, शीतोष्णयोः परस्पकमत्यन्तविरोधेनैकदैकत्रासम्भवात्, अथ यद्यपि शीतोष्णयोरेकदैक-त्रासम्भवस्तथाऽप्यात्यन्तिके शीते तताविधाग्निसन्निधौ युगपदेवैकस्य पुंस एकस्यां दिशि शीतमन्यस्यां चोष्णमित्येवं द्वयोरपि शीतोष्णपरीषहयोरस्ति सम्भवः, नैतदेवं, कालकृतशीतोष्णा-श्रयत्वादधिकृतसूत्रस्यैवंविधव्यतिकरस्य वा प्रायेण तपस्विनामभावादिति ।

तथा 'जं समयं चरियापरीसह'मित्यादि तत्र चर्या-ग्रामादिषु संचरणं नैषेधिकी च-ग्रामादिषु प्रतिपन्नमासकल्पादेः स्वाध्यायादिनिमित्तं शय्यातो विविक्त तरोपाश्रये गत्वा निषदनम्, एवं चानयोर्विहारावस्थानरूपत्वेन परस्परविरोधान्नैकदा सम्भवः, अथ नैषेधिकीवच्छय्याऽपि चर्यया सह विरुद्धेति न तयोरेकदा सम्भवस्ततैश्चकोनविंशतेरेव परीषहाणामुत्कर्षेणैकदा वेदनं प्राप्तमिति, नैवं, यतो ग्रामादिगमनप्रवृत्तौ यदा कश्चिदौत्सुक्यादनिवृत्ततत्परिणाम एव विश्रामभोजनाद्यर्थःमि-त्वरशय्यायां वर्त्तते तदोभयमप्यविरुद्धमेव, तत्त्वतश्चर्याया असमाप्तत्वाद् आश्रयस्य चाश्रयणादिति, यद्येवं तर्हि कथं षड्विधबन्धकमाश्रित्य वक्ष्यति-

'जं समयं चरियापरीसहं वेएति नो तं समयं सेज्ञापरिसहं वेएइ' इत्यादीति?, अत्रोच्यते, षड्विधबन्धको मोहनीयस्या विद्यमानकल्पत्वात् सर्वत्रौत्सुक्याभावेन शय्याकाले शय्यायामेव वर्त्तते न तु बादररागवदौत्सुक्येन विहारपरिणामाविच्छेदाच्चर्यामपि, अतस्तदपेक्षया तयोः परस्परविरोधाद्युगपदसम्भवः, ततश्च साध्वेव 'जं समयं चरिए'त्यादीति ।

'छव्विहबंधे'त्यादि, षड्विधबन्धकस्यायुर्मोहवर्जानां बन्धकस्य सूक्ष्मसम्परायस्येत्यर्थः, एतदेवाह-'सरागछउमत्थस्से'त्यादि, सूक्ष्मलोभाणूनां वेदनात्सरागोऽनुत्पन्नकेवलत्वाच्छद्मस्थस्ततः कर्म्मधारयोऽतस्तस्य 'चोद्दस परीसह'त्ति अष्टानां मोहनीयसम्भवानां तस्य मोहाभावेनाभावात्-द्वाविंशतेः शेषाश्चतुर्दशपरीषहा इति, ननु सूक्ष्मसम्परायस्य चतुर्दशानामेवाभिधानान्मोहनीय-सम्भवानामष्टानासम्भवा इत्युक्तं, ततश्च सामर्थ्यादनिवृत्तिबादरसंपरायस्य मोहनीयसम्भवा-नामष्टानामपि सम्भवः प्राप्तः, कथं चैतद् युज्यते?

यतो दर्शनसप्तकोपशमे बादरकषायस्य दर्शनमोहनीयोदयाभावेन दर्शनपरीषहाभावा-त्सप्तानामेव सम्भवो नाष्टनां, अथ दर्शनमोहनीयसत्तापेक्षयाऽसावपीष्यत इत्य,ष्टावेव तर्हि उपशमकत्वे सूक्ष्मसम्परायस्यापि मोहनीयसत्तासद्भावात्कथं तदुत्थाः सर्वेऽपि परीषहा न भवन्ति इति, न्यायस्य समानत्वादिति, अत्रोच्यते, यस्माद्दर्शनसप्तकोपशमस्योपर्येव नपुंसकवेदाद्युपश-मकालेऽनिवृत्तिबादरसम्परायो भवति, न चावश्यकादिव्यतिरिक्तग्रन्थान्तरमतेन दर्शनत्रयस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बृहति भागे उपशान्ते शेषे चानुपशान्ते एव स्यात्, नपुंसकवेदं चासौ तेन सहोपशमयितुमुपक्रमते, ततश्च नपुंसकवेदोपशमावसरेऽनिवृत्तिबादरसम्परायस्य सतो दर्शनमोहस्य प्रदेशत उदयोऽस्ति न तु सत्तैव, ततस्तत्प्रत्ययो दर्शनपरीषहस्तस्यास्तीति, ततश्चाष्टावपि भवन्तीति, सूक्ष्मसम्परायस्य तु मोहसत्तायामपि न परीषहहेतुभूतः सूक्ष्मोऽपि मोहनीयोदयोऽस्तीति न मोहजन्यपरीषहसम्भवः, आह च–

॥ १ ॥ "मोहनिमित्ता अट्ठवि बायररागे परीसहा किह नु ।
किह वा सुहुमसरागे न होंति उवसामए सव्वे ॥

–आचार्य आह–

॥ २ ॥ सत्तगपरओ च्चियजेण बायरो जं च सावसेसंमि ।
मग्गिल्लंभि पुरिल्ले लग्गइ तो दंसणस्सावि ॥

॥ ३ ॥ लब्भइ पएसकम्मं पडुच्च सुहुमोदओ तओ अट्ठ ।
तस्स भनिया न सुहुमे न तस्स सुहुमोदओऽवि जओ ॥

यच्च सूक्ष्मसम्परायस्य सूक्ष्मलोभकिट्टिकानामुदयो नासौ परीषहहेतुर्लोभहेतुकस्य परीषहस्यानभिधानात्, यदि च कोऽपि कथञ्चिदसौ स्यात्तदा तस्येहात्यन्ताल्पत्वेनाविवक्षेति

'एगविहबंधगस्स' त्ति वेदनीयबन्धकस्येत्यर्थः, कस्य तस्य ? इत्यत आह-'वीयरागछउमत्थस्स' त्ति उपशान्तमोहस्य क्षीणमोहस्य चेत्यर्थः 'एवं चेवे' त्यादि चतुर्दश प्रज्ञप्ता द्वादश पुनर्वेदयतीत्यर्थः, शीतोष्णयोश्चर्याशय्ययोश्च पर्यायेण वेदनादिति ।

अनन्तरं परीषहा उक्तास्तेषु चोष्णपरीषहस्तद्धेतवश्च सूर्या इत्यतः सूर्यवक्तव्यतायां निरूपयन्नाह–

**मू. (४२१)** *जंबुद्दीवे णं भंते ! दीवे सूरिया उग्गमणमुहुत्तंसि दूरे य मूले य दीसंति मज्झंतियमुहुत्तंसि मूले य दूरे य दीसंति अत्थमणमुहुत्तंसि दूरे य मूले य दीसंति ?, हंता गोयमा जंबुद्दीवे णं दीवे सूरिया उग्गमणमुहुत्तंसि दूरे य तं चेव जाव अत्थमणमुहुत्तंसि दूरे य भूले य दीसंति ।*

*जंबूद्दीवे णं भंते ! दीवे सूरिया उग्गमण मुहुत्तंसि मज्झंसिय मुहुत्तंसिय अत्थमण मुहुत्तंसिय सव्वत्थ समा उच्चत्तेणं ? हंता गोयमा ! जंबुद्दीवे णं दीवे सूरिया उग्गमण जाव उच्चत्तेणं*

*जइणं भंते ! जंबुद्दीवे२ सूरिया उग्गमण मुहुत्तंसि य मज्झंतिय अत्थमणमुहुत्तंसि मूले जाव उच्चत्तेणं से केणं खाइ अट्ठेणं भंते ! एवं वुच्चइ जंबुद्दीवे णं दीवे सुरिया उग्गमणमुहुत्तंसि दूरे य मूले य दीसंति जाव अत्थमणमुहुत्तंसि दूरे य मूले य दीसंति ?, गोयमा लेसापडिधाएणं उग्गमणमुहुत्तंसि दूरे य मूले य दीसंति लेसाभितावेणं मज्झंतियमुहुत्तंसि मूले य दूरे य दीसंति लेस्सापिडघाएणं अत्थमणमुहुत्तंसि दूरे य मूले य दीसंति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-जंबुद्दीवे णं दीवे सूरिया उगगमणमुहुत्तंसि दूरे य मूले य दीसन्ति जाव अत्थमण जाव दीसंति ।*

*जंबुद्दीवे णं भंते ! दीवे सूरिया किं तीयं खेत्तं गच्छंति पडुप्पन्नं खेत्तं गच्छंति अनागयं खेत्तं गच्छंति ?, गोयमा ! नो तीयं खेत्तं गच्छंति पडुप्पन्नं खेत्तं गच्छंति नो अनागयं खेत्तं गच्छंति,*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जंबुद्दीवे णं दीवे सूरिया किं तीयं खेत्तं ओभासंति पडुप्पन्नं खेत्तं ओभासंति अनागयं खेत्तं ओभासंति, तं भंते ! किं पुट्ठं ओभासंति अपुट्ठं ओभासंति ?, गोयमा ! पुट्ठं ओभासंति नो अपुट्ठं ओभासंति जाव नियमा छद्दिसिं । जंबूद्दीवे णं भंते ! दीवे सूरिया किं तीयं खेत्तं उज्जोवेंति एवं चेव जाव नियमा छद्दिसिं, एवं तवेंति एवं भासंति जाव नियमा छद्दिसिं ।*

*जंबुद्दीवे णं भंते ! दीवे सूरियाणं किं तीए खेत्ते किरिया कज्जइ पडुप्पन्ने खेत्ते किरिया कज्जइ अनागए खेत्ते किरिया कज्जइ ?, गोयमा ! नो तीए खेत्ते किरिया कज्जइ पडुप्पन्ने खेत्ते किरिया कज्जइ नो अनागए खेत्ते किरिया कज्जइ, सा भंते ! किं पुट्ठा कज्जति अपुट्ठा कज्जइ ?, गोयमा ! पुट्ठा कज्जइ नो अपुट्ठा कज्जति जाव नियमा छद्दिसिं ।*

*जंबुदीवे णं भंते ! दीवे सूरिया केवतियं खेत्तं उड्ढं तवंति केवतियं खेत्तं अहे तवंति केवतियं खेत्तं तिरियं तवंति ?, गोयमा ! एगं जोयणसयं उड्ढं तवंति अट्ठारस जोयणसयाइं अहे तवंति सीयालीस जोयणसहस्साइं दोन्नि तेवट्ठे जोयणसए एक्कवीसं च सट्ठियाए जोयणस्स तिरियं तवंति ।*

*अंतो णं भंते ! माणुसुत्तरस्स पव्वयस्स जे चंदिमसूरियगहगणनक्खत्ततारारूवा ते णं भंते देवा किं उड्ढोववन्नगा जहा जीवाभिगमे तहेव निरवसेसं जाव उक्कोसेणं छम्मासा । बहिया णं भंते माणुसुत्तरस्स जहा जीवाभिगमे जाव इंदट्ठाणे णं भंते ! केवतियं कालं उववाएणं विरहिए पन्नत्ते गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं छम्मासा । सेवं भंते ! सेवं भंते ! ॥*

**वृ.** 'जंबुद्दीवे' इत्यादि, 'दूरे य मूले य दीसंति' त्ति 'दूरे च' द्रष्टस्थानापेक्षया व्यवहिते देशे 'मूले च' आसन्ने द्रष्टृप्रतीत्यपेक्षया सूर्यौ दृश्येते, द्रष्टा हि स्वरूपतो बहुभिर्योजनसहस्रैर्व्यवहित-मुद्गमास्तमय योः सूर्यं पश्यति, आसन्नं पुनर्मन्यते, सद्‌भूतं तु विप्र कर्षं सन्तमपि न प्रतिपद्यत इति । 'मज्झंतियमुहुत्तंसि मूले य दूरे य दीसंति' त्ति मध्यो-मध्यमोऽन्तोविभागो गगनस्य दिवसस्य वा मध्यान्तः स यस्य मुहूर्त्तस्यास्ति स मध्यान्तिकः स चासौ मुहूर्त्तश्चेति मध्यान्तिकमुहूर्त्तस्तत्र 'मूले च' आसन्ने देशे द्रष्टस्थानपेक्षया 'दूरे च' व्यवहिते देशे द्रष्टृप्रतीत्यपेक्षया सूर्यौ दृश्येते, द्रष्टा हि मध्याह्ने उदयास्तमनदर्शनापेक्षयाऽऽसन्नं रविं पश्यति योजनशताष्टकेनैव तदातस्य व्यवहितत्त्वात्, मन्यते पुनरुदयास्तमयप्रतीत्यपेक्षया व्यवहितमिति ।

'सव्वत्थ समा उच्चत्तेणं' ति समभूतलापेक्षया सर्वत्रोच्चत्वमष्टौ योजनशतानीतिकृत्वा, 'लेसापडिघाएणं' तेजसः प्रतिघातेन दूरतरत्वात् तद्देशस्य तदप्रसरणेनेत्यर्थः, लेश्याप्रतिघाते हि सुखदृश्यत्वेन दूरस्थोऽपि स्वरूपपेण सूर्य आसन्नप्रततिं जनयति, 'लेसाभितावेणं' ति तेजसोऽ-भितापेन, मध्याह्ने हि आसन्नतरत्वात्सूर्यस्तेजसा प्रतपति, तेजःप्रतापे च दुर्दृश्यत्वेन प्रत्यासन्नोऽप्यसौ दूरप्रतीतिं जनयतीति ।

'नो तीयं खेत्तं गच्छंति' त्ति अतीतक्षेत्रस्यातिक्रान्तत्वात्, 'पडुप्पन्नं' ति वर्त्तमानं गम्य-मानमित्यर्थः, 'नो अनागयं' ति गमिष्यमाणमित्यर्थः, इह च यदाकाशखण्डमादित्यः स्वतेजसा व्याप्नोति तत् क्षेत्रमुच्यते, 'ओभासंति' त्ति 'अवभासयतः' ईषदुदद्योमित्यर्थः, इह च यदाकाश-खण्डमादित्यः स्वतेजसा व्याप्नोति तत् क्षेत्रमुच्यते, 'ओभासंति' त्ति 'अवभासयतः' ईषदुद्द्योतयतः 'पुट्ठं' ति तेजसा स्पृष्ट 'जाव नियमा छद्दिसिं' ति इह यावत्करणादिदं दृश्यं-'तं भंते ! किं ओगाढं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओभासइ अनोगाढं ओभासइ ?, गोयमा ! ओगाढं ओभासइ नो अनोगाढ'मित्यादि 'तं भंते ! कतिदिसिं ओभासेइ ?, गोयमा !' इत्येतदन्तमिति। 'उज्जोवेंति' त्ति 'उद्द्योतयतः' अत्यर्थं द्योतयतः 'तवंति' त्ति तापयतः उष्णरश्मित्वात्तयोः 'भासंति' त्ति भासयतः शोभयत इत्यर्थः ।

उक्तमेवार्थं शिष्यहिताय प्रकारान्तरेणाह- 'जंबू' इत्यादि, 'किरिया कज्जइ' त्ति अवभासनादिका क्रिया भवतीत्यर्थः 'पुट्ठ' त्ति तेजसा स्पृष्टात्-स्पर्शनाद् या सा स्पृष्टा 'एगं जोयणसयं उड्ढं तवंति' त्ति स्वस्वविमानस्योपरि योजनशतप्रमाणस्यैव तापक्षेत्रस्य भावात् 'अट्ठारस जोयणसयाइं अहे तवंति' त्ति, कथं ?, सूर्यादष्टासु योजनशतेषु भूतलं भूतलाच्च योजनसहेऽ- धोलोकग्रामा भवन्ति तांश्च यावदुदद्योतनादिति, 'सीयालीस' मित्यादि, एतच्च सर्वोत्कृष्टदिवसे चक्षुस्पर्शापेक्षयाऽवसेयमिति ।

अनन्तरं सूर्यवक्तव्यतोक्ता, अथ सामान्येन ज्योतिष्कवक्तव्यामाह- 'अंतो णं भंते' इत्यादि, 'जहा जीवाभिगमे तहेव निरवसेसं' ति तत्र चेदं सूत्रमेवं-'कप्पोववन्नगा विमाणोववन्नगा चारोवव्वनगा चारट्ठिइया गइरइया गइसमावन्नगा ?, गोयमा ! ते णं देवा नो उड्ढोववन्नगा नो कप्पोववन्नगा विमाणोववन्नगा चारोववन्नगा' ज्योतिश्चक्रचरणोपलक्षितक्षेत्रोपपन्ना इत्यर्थः 'नो चारट्ठिइया' इह चारो-ज्योतिषामवस्थानक्षेत्रं 'नो' नैव चारे स्थितिर्येषां ते तथा अत एव 'गइरइया' अत एव 'गइसमावन्नगा' इत्यादि, कियद्दूरमिदं वाच्यम् ? इत्याह-

'जाव उक्कोसेणं छम्मास' त्ति इदं चैवं द्रष्टव्यम्-'इंदट्ठाणे णं भंते ! केवइयं कालं विरहिए उवावएणं' गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं छम्मास' त्ति, 'जही जीवाभिगमे' त्ति, इदमप्येवं तत्र-'जं चंदिमसूरियगहगण नक्खत्ततारातारारूवा ते णं भंते ! देवा किं उड्ढोववन्नगा ?' इत्यादि प्रश्नसूत्रम्, उत्तरं तु 'गोयमा ! ते णं देवा नो उड्ढोववन्नगा नो कप्पोववन्नगा विमाणोववन्नगा नो चारोववन्नगा चारट्ठिइया नो गइरइया नो गइसमावन्नगे' त्यादीति ।

शतकं-८ उद्देशकः-८ समाप्तः

## —: शतकं-८ उद्देशकः-९ :—

**वृ.** अष्टमोद्देशके ज्योतिषां वक्तव्यतोक्ता, सा च वैश्रसिकीति वैश्रसिकं प्रयोगिकं च बन्धं प्रतिपिपादयिषुर्नवमोद्देशकमाह, तस्य चेदमादिसूत्रम्—

***मू. (४२२)*** *कइविहे णं भंते ! बंधे पन्नत्ते ?, गोयमा ! दुविहे बंधे पन्नत्ते, तंजहा- पयोगबंधे य वीससाबंधे य ॥*

**वृ.** 'कइविहे ण' मित्यादि 'बंधे' त्ति बन्धः-पुद्गलादिविषयः सम्बन्धः 'पओगबंधे य' त्ति जीवप्रयोगकृतः 'वीससाबंधे य' त्ति स्वभावसंपन्नः ।

***मू. (४२३)*** *वीससाबंधे णं भंते ! कितिविहे पन्नत्ते ?, गोयमा ! दुविहे पन्नत्ते, तंजहा - साइयवीससाबंधे अनाइवीससाबंधे य । अनाइयवीससाबंधे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा तिविहे पन्नत्ते, तंजहा-धम्मत्थिकायअन्नमन्नअनादीयवीससाबंधे अधम्मत्थिकायअन्नमन्नअनादीयवीससाबंधे आगासत्थिकायअन्नमन्नअनादीयवीससाबंधे ।*

*धम्मत्थिकायअन्नमन्नअनादीयवीससाबंधे णं भंते ! किं देसबंधे सव्वबंधे ?, गोयमा ! देसबंधे नो सव्वबंधे, एवं चेव अधम्मत्थिकायअन्नमन्नअनादीयवीससाबंधेवि, एवमागासत्थिकाय-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अन्नमन्न- अनादीयवीससाबंधे।*

*धम्मत्थिकायअन्नमन्नअनाइयवीससाबंधे णं भंते! कालओ केवच्चिरं होइ?, गोयमा! सव्वद्धं, एवं अधम्मत्थिकाए, एवं आगासत्थिकाये।*

*सादीयवीससाबंधे णं भंते! कतिविहे पन्नत्ते?, गोयमा! तिविहे पन्नत्ते, तंजहा-बंधणपच्चइए भायणपच्चइए परिणामपच्चइए।*

*से किं तं बधणपच्चइए?, २ जन्नं परमाणुपुग्गला दुपएसिया तिपएसिया जाव दसपएसिया संखेज्जपएसिया असंखेज्जपएसिया, अनंतपएसियाणं भंते! खंधाणं वेमायनिद्धयाए वेमालुक्खयाए वेमायनिद्धलुक्खयाए बंधणपच्चए णं बंधे समुप्पज्जइ जहन्नेणं एक्कं समयं उक्कोसेणं असंखेज्जं कालं, सेत्तं बंधणपच्चइए।*

*से किं तं भायणपच्चइए?, भा० २ जन्नं जुन्नसुराजुन्नगुलजुन्नतंदुलाणं भायणपच्चइएणं बंधे समुप्पज्जइ जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं, सेत्तं भायणपच्चइए।*

*से किं तं परिणामपच्चइए?, परिणामपच्चइए जन्नं अब्भाणं अब्भरुक्खाणं जहा ततियसए जाव अमोहाणं परिणामपच्चइए णं बंधे समुप्पज्जइ जहन्नेणं एक्कं समयं उक्कोसेणं छम्मासा, सेत्तं परिणामपच्चइए, सेत्तं सादीयवीससाबंधे, सेत्तं वीससाबंधे॥*

**वृ.** यथासत्तिन्यायमाश्रित्याह-'वीससे'त्यादि, 'धम्मत्थिकायअन्नमन्नअनाईयवीससाबंधे य'त्ति धर्मास्तिकायस्यान्योऽन्यं-प्रदेशानां परस्परेण योऽनादिको विश्रसाबन्धः स तथा एवमुत्तरत्रापि

'देसबंधे'त्ति देशतोदेशापेक्षया बन्धो देशबन्धो यथा सङ्कलिकाकटिकानां, 'सव्वबंधे'त्ति सर्वतः सर्वात्मना बन्धः सर्वबन्धो यथा क्षीरनीरयोः 'देसबन्धे नो सव्वबंधे'त्ति धर्मास्तिकायस्य प्रदेशानां परस्परसंस्पर्शेन व्यवस्थितत्वाद्देशबन्ध एव न पुनः सर्वबन्धः, तत्र हि एकस्य प्रदेशस्य प्रदेशान्तरैः सर्वथा बन्धेऽन्योऽन्यान्तर्भावेनैकप्रदेशत्वमेव स्यात् नासङ्ख्येयप्रदेशत्वमिति॥

'सव्वद्धं'ति सर्वाद्धां-सर्वकालं 'साइयवीससाबंधे य'त्ति सादिको यो विश्रसाबन्धः स तथा, 'बंधणपच्चइए'त्ति बध्यतेऽनेनेति बन्धनं-विवक्षितस्निग्धतादिको गुणः स एव प्रत्ययो-हेतुर्यत्र स तथा एवं भाजनप्रत्ययः परिणामप्रत्ययश्च, नवरं भाजनं-आधारः परिणामो-रूपान्तरगमनं 'जन्नं परमाणुपुग्गले'त्यादौ परमाणुपुद्गलः परमाणुरेव 'वेमायनिद्धयाए'त्ति विषमा मात्रा यस्यां सा विमात्रा सा चासौ स्निग्धता चेति विमात्रस्निग्धता तया, एवमन्यदपि पदद्वयम्, इदमुक्तं भवति-

॥१॥ "समनिद्धयाए बन्धो न होइ समलुक्खयाएवि न होइ।
वेमायनिद्धलुक्खत्तणेण बंधो उ खंधाणं॥"

अयमर्थः-समगुणस्निग्धस्य समगुणस्निग्धेन परमामुद्व्यणुकादिना बन्धो न भवति, समगुणरूक्षस्यापि समगुणरूक्षेण, यदा पुनर्विमा मात्रा तदा भवति बन्धः, विषममात्रानिरूपणार्थं चोच्यते-

॥१॥ "निद्धस्स निद्धेण दुयाहिएणं, लुक्खस्स लुक्खेण दुयाहिएणं।
निद्धस्स लुक्खेण उवेइ बंधो, जहन्नवज्जो विसमो समो वा॥" इति

बंधणपच्चइएणं'ति बन्धनस्यबन्धस्य प्रत्ययो-हेतुरुक्तरूपविमात्रस्निग्धतादिलक्षणो बन्धनमेव वा विवक्षितस्नेहादि प्रत्ययो बन्धनप्रत्ययस्तेन, इह च बन्धनप्रत्ययनेति सामान्यं विमात्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्निग्धतयेत्यादयस्तु तद्भेदा इति। 'असंखेज्जं कालं'ति असङ्ख्येयोत्सर्पिण्यवसर्पिणीरूपं 'जुन्न-सुरे'त्यादि तत्र जीर्णसुरायाः स्त्यानीभवलक्षणो बन्धः, जीर्णगुडस्य जीर्णतन्दुलानां च पिण्डी-भवनलक्षणः

**मू. (४२४)** *से किं तं पयोगबंधे?, पयोगबंधे तिविहे पन्नत्ते, तंजहा-अनाइए वा अपज्जवसिए साइए वा अपज्जवसिए साइए वा सपज्जवसिए, तत्थ णं जे से अनाइए अपज्जवसिए से णं अट्ठण्हं जीवमज्झपएसाणं॥ तत्थवि णं तिण्हं २ अनाइए अपज्जविए सेसाणं साइए, तत्थ णं जे से सादीए अपज्जवसिए से णं सिद्धाणं तत्थ णं जे से साइए सपज्जवसिए से णं चउव्विहे पन्नत्ते, तंजहा-आलावणबंधे अल्लियावणबंदे सरीरबंधे सरीरप्पयोगबंधे।*

*से किं तं आलावणबंधे?, आलावणबंधे जन्नं तणभाराण वा कट्ठभाराण वा पत्तभाराण वा पलालभाराण वा वेल्लभाराण वा वेत्तलयावागवरत्तरज्जुवल्लिकुसदब्भमादिएहिं आलावणबंधं समुप्पज्जइ जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं, सेत्तं आलावणबंधे।*

*से किं तं अल्लियावणबंधे?, अल्लियावणबंधे चउव्विहे पन्नत्ते, तंजहा-लेसणाबंधे उच्चयबंधे समुच्चयबंधे साहणणाबंधे, से किं तं लेसणाबंधे?, लेसणाबंधे जन्नं कुट्टाणं कोट्टिमाणं खंभाणं पासायाणं कट्ठाणं चम्माणं घडाणं पडाणं कडाणं छुहाचिक्खिल्लसिलेसलक्खमहुसित्थमाइएहिं लेसणएहिं बंधे समुप्पज्जइ जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं, सेत्तं लेसणाबंधे।*

*से किं ते उच्चयबंधे?, उच्चयबंधे जन्नं तणरासीण वा कट्ठरासीण वा पत्तरासीण वा तुसरासीण वा भुसरासीण वा गोमयरासीण वा अवगररासण वा उच्चत्तेणं बंधे समुप्पज्जइ जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं, सेत्तं उच्चयबंधे।*

*से किं तं समुच्चयबंधे?, समुच्चयबंधे जन्नं अगडतडागनदीदहवावीपुक्खरिणीदीहियाणं गुंजालियाणं सराणं सरपंतिआणं सरसरपंतियाणं बिलपंतियाणं देवकुलसभापव्वथूभखाइयाणं फरिहाणं पागारट्टालगचरियदारगोपुरतोरणाणं पासायघरसरणलेणआवणाणं सिंघाडगतियच-उक्कचच्चर चउम्मुहमहापहमादीणं छुहाचिक्खिल्लसिलेससमुच्चएणं बंधं समुच्चए णं बंधे समुप्पज्जइ जहन्नेणं अंतोमुहुत्तं उक्कोसेमं संखेज्जं कालं, सेत्तं समुच्चयबंधे।*

*से किं तं साहणणाबंधे?, साहणणाबंधे दुविहे पन्नत्ते, तंजहा-देससाहणणाबंधे य सव्वसाह-णणाबंधे य, से किं तं देससाहणणाबंधे?, देससाहणणाबंधे जन्नं सगडरहजाणजुग्गगिल्लिथिल्लिसी-यसंदमानियालोहीलोहकडाहकडुच्छुआसणसयणखंभभंडमत्तोवगरणमाईणं देससाहणणाबंधे समुप्पज्जइ जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं, सेत्तं देससाहणणाबंधे, से किं तं सव्वसाह-णणाबंधे?, सव्वसाहणणाबंधे से णं खीरोदगमाईणं, सेत्तं सव्वसाहणणाबंदे, सेत्तं साहणणाबंधे, सेत्तं अल्लियावणबंधे।*

*से किं तं सरीरबंधे?, सरीरबंधे दुविहे पन्नत्ते, तंजहा-पुव्वप्पओगपच्चइए य पडुप्पन्नप-ओगपच्चइए य, से किं तं पुव्वप्पयोगपच्चइए?, पुव्वपओगपच्चइए जन्नं नेरइयाणं संसारवत्थाणं सव्वजीवाणं तत्थ २ तेसु २ कारणेसु समोहणमाणाणं जीवप्पदेसाणं बंधे समुप्पज्जइ सेत्तं पुव्वप्प-योगपच्चइए, से किं तं पडुप्पन्नप्पयोगपच्चइए?, २ जन्नं केवलनाणस्स अनगारस्स केवलिसमुग्घाएणं समोहयस्स ताओ समुग्घायाओ पडिनियत्तेमाणस्स अंतरा मंथे वट्टमामस्स तेयाकम्माणं बंधे समुप्पज्जइ, किं कारणं?, ताहे से पएसा एगत्तीगया य भवंतित्ति, सेत्तं पडुप्पन्नप्पयोगपच्चइए, सेत्तं सरीरबंधे।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं सरीरप्पयोगबंधे ?, सरीरप्पयोगबंधे पंचविहे पन्नत्ते, तंजहा-ओरालियसरीरप्पओगबंधे वेउव्वियसरीरप्पओगबंधे आहारगसरीरप्पओगबंदे तेयासरीरप्पयोगबंधे कम्मासरीरप्पयोगबंधे। ओरालियसरीरप्पयोगबंधे णं भंते! कतिविहे पन्नत्ते ?, गोयमा! पंचविहे पन्नत्ते, तंजहा-एगिंदियओरालियसरीरप्पयोगबंधे बेंदियओ० जाव पंचिंदियओरालियसरीरप्पयोगबंधे । एगिंदियओरालियसरीरप्पयोगबंधे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! पंचविहे पन्नत्ते, तंजहा-पुढविक्काइयएगिंदिय० एवं एएणं अभिलावेण भेदो जहा ओगाहणसंठाणे ओरालियसरीरस्स तहा भानियव्वो जाव पञ्जत्तगब्भवक्कंतियमणुस्सपंचिंदियओरालियसरीरप्पयोगबंधे य अपज्ञत्तगब्भवक्कंतियमणूस० जाव बंधे य ।

ओरालियसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! वीरियसजोगसद्दव्वयाए पमादपच्चया कम्मं च जोगं च भवं च आउयं च पडुच्च ओरालियसरीरप्पयोगनामकम्मस्स उदएणं ओरालियसरीरप्पयोगबंधे ।। एगिंदियओरालियसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, एवं चेव, पुढविक्काइयए- गिंदियओरालियसरीरप्पयोगबंधे एवं चेव, जाव वणस्सइकाइया, एवं बेइंदिया एवं तेइंदिया एवं चउरिंदियतिरिक्खजोनिय०, पंचिंदियओरालियसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, एवं चेव, मणुस्सपंचिंदियओरालियसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! वीरियसजोगसद्दव्वयाए पमादपच्चया जाव आउयं च पडुच्च मणुस्सपंचिंदिय- ओरालियसरीरप्पयोगनामाए कम्मस्स उदएणं ।

ओरालियसरीरप्पयोगबंदे णं भंते ! किं देसबंदे सव्वबंधे ?, गोयमा ! देसबंधेवि सव्वबंधेवि, एगंदियओरालियसरीरप्पयोगबंधे णं भंते ! किं देसबंधे सव्वबंधे ?, एवं चेव, एवं पुढविकाइया, एवं जाव मणुस्सपंचिंदियओरालियसरीरप्पयोगबंदे णं भंते ! किं देसबंधे सव्वबंधे ?, गोयमा ! देसबंधेवि सव्वबंधेवि ।

ओरालियसरीरप्पयोगबंधे णं भंते ! कालओ केवच्चिरं होइ ?, गोयमा ! सव्वबंधे एक्कं समयं, देसबंधे जहन्नेणं एक्कं समयं उक्कोसेणं तिन्नि पलिओवमाइं समयऊणाइं, एगिंदियओरालियसरीरप्पयोगबंधे णं भंते ! कालओ केवच्चिरं होइ ?, गोयमा ! सव्वबंधे एक्कं समयं देसबंधे जहन्नेणं एक्कं समयं उक्कोसेणं बावीसं वाससहस्साइं समऊणाइं, पुढविकाइयएगिंदियपुच्छा, गोयमा ! सव्वबंधे एक्कं समयं देसबंधे जहन्नेणं खुड्डागभवग्गहणं तिसमयऊणं उक्कोसेणं बावीसं वाससहस्साइं समऊणाइं, एवं सव्वेसिं सव्वबंदो एक्कं समयं देसबंदो जेसिं नत्थि वेउव्वियसरीरं तेसिं जहन्नेणं खुड्डागं भवग्गहणं तिसमयऊणं उक्कोसेणं जा जस्स ठिती सा समऊणा कायव्वा, जेसिं पुण अत्थि वेउव्वियसरीरं तेसिं देसबंधो जहन्नेणं एक्कं समयं उक्कोसेणं जा जस्स ठिती सा समऊणा कायव्वा जाव मणुस्साणं देसबंधे जहन्नेणं एक्कं समयं उक्कोसेणं तिन्नि पलिओवमाइं समयूणाइं ।

ओरालियसरीरबंधंतरे णं भंते ! कालओ केवच्चिरं होइ ?, गोयमा ! सव्वबंधंतरं जहन्नेणं खुड्डागं भवग्गहणं तिसमयऊणं उक्कोसेणं तेत्तीसं सागरोवमाइं पुव्वकोडिसमयाहियाइं, देसबंधंतरं जहन्नेणं एक्कं समयं उक्कोसेणं तेत्तीसं सागरोवमाइं तिसमयाहियाइं एगिंदियओरालियपुच्छा गोयमा सव्वबंधंतरं जहन्नेणं खुड्डागं भवग्गहणं तिसमयऊणं उक्कोसेणं बावीसं वाससहस्साइं समयाहियाइं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*देसबंधंतरं जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं, पुढविक्काइयएगिंदियपुच्छा गो० ! सव्वबंधंतरं जहेव एगिंदियस्स तहेव भानियव्वं, देसबंधंतरं जहन्नेणं एक्कं समयं उक्कोसेणं तिन्नि समया जहा पुढविक्काइयाणं, एवं जाव चउरिंदियाणं वाउक्काइयवज्जाणं, नवरं सव्वबंधंतरं उक्कोसेणं जा जस्स ठिती सा समयाहिया कायव्वा, वाउक्काइयाणं सव्वबंधंतरं जहन्नेणं खुड्डागभवग्गहणं तिसमयऊणं उक्कोसेणं तिन्नि वाससहस्साइं समयाहियाइं, देसबंधंतरं जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं, पंचिंदियतिरिक्खजोनियओरालियपुच्छा, सव्वबंधंतरं जहन्नेणं खुड्डागभवग्गहणं तिसमयऊणं उक्कोसेणं पुव्वकोडी समयाहिया, देसबंधंतरं जहा एगिंदियाणं तहा पंचिंदियतिरिक्खजो०, एवं मणुस्साणवि निरवसेसं भानियव्वं जाव उक्कोसेणं अंतोमुहुत्तं ।*

*जीवस्स णं भंते ! एगिंदियत्ते नोएगिंदियत्ते पुनरवि एगिंदियत्ते एगिंदियओरालियसरीरप्पओगबंधंतरं कालओ केवच्चिरं होइ ?, गोयमा ! सव्वबंधंतरं जहन्नेणं दो खुड्डागभवग्गहणाइं तिसमयऊणाइं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं, देसबंधंतरं जहन्नेणं खुड्डागं भवग्गहणं समयाहियं उक्कोसेणं दो सागरोवमसहस्साइं संखज्जवासमब्भहियाइं, जीवस्स णं भंते ! पुढविकाइयत्ते नोपुढविकाइयत्ते पुनरवि पुढविकाइयत्ते पुढविकाइयएगिंदियओरालियसरीरप्पयोगबंधंतरं कालओ केवच्चिरं होइ ?, गोयमा ! सव्वबंधंतरं जहन्नेणं दो खुड्डाइं भवग्गहणाइं तिसमयऊणाइं उक्कोसेणं अनंतं कालं अनंता उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अनंता लोगा असंखेज्जा पोग्गलपरियट्टा ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो, देसबंधंतरं जहन्नेणं खुड्डागभवग्गहणं समयाहियं उक्कोसेणं अनंतं कालं जाव आवलियाए असंखेज्जइभागो।*

*जहा पुढविकाइयाणं एवं वणस्सइकाइयवज्जाणं जावमणुस्साणं, वणस्सइकाइयाणं दोन्नि खुड्डाइं, एवं चेव उक्कोसेणं असंखिज्जं कालं असंखिज्जाओ उस्सप्पिनिओसप्पिणीओ सकालओ खेत्तओ असंखेज्जा लोगा, एवं देसबंधंतरंपि उक्कोसेणं पुढवीकालो ।*

*एएसि णं भंते ! जीवाणं ओरालियसरीरस्स देसबंधगाणं सव्वबंधगाणं अबंधगाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा ओरालियसरीरस्स सव्वबंधगा अबंधगा विसेसाहिया देसबंधगा असंखेज्जगुणा ।*

**वृ.** 'पओगबंधे'त्ति जीवव्यापारबन्धः स च जीवप्रदेशानामौदारिकादिपुद्गलानां वा 'अनाइए वा' इत्यादयो द्वितीयवर्जास्त्रयो भङ्गाः, तत्र प्रथमभङ्गोदाहरणायाह- 'तत्थ णं जे से' इत्यादि, अस्य किल जीवस्यासङ्ख्येयप्रदेशिकस्याष्टौ ये मध्यप्रदेशास्तेषामनादिरपर्यवसितो बन्धो, यदाऽपि लोकं व्याप्य तिष्ठति जीवस्तदाऽप्यसौ तथैवेति, अन्येषां पुनर्जीवप्रदेशानां विपरिवर्त्तमानत्वाभ्रास्त्यनादिरपर्यवसितो बन्धः, एतेषामुपर्यन्ते चत्वारः, एवमेतेऽष्टौ ।

एवं तावत्समुदायतोऽष्टानां बन्ध उक्तः, अथ तेष्वेकैकेनात्मप्रदेशेन सह यावतां परस्परेण सम्बन्धो भवति तद्दर्शनायाह- 'तत्थवि ण' मित्यादि, 'तत्रापि' तेष्वष्टासु जीवप्रदेशेषु मध्ये त्रयाणां त्रयाणामेकैकेन सहानादिरपर्यवसितो बन्धः, तथाहि-पूर्वोक्तप्रकारेणावस्थितानामष्टानामुपरितनप्रतरस्य यः कश्चिद्विवक्षितस्तस्य द्वौ पार्श्ववर्त्तिनावेकश्चाधोवर्त्तीत्येते त्रयः संम्बध्यन्ते शेषस्त्वेक उपरितनस्त्रयश्चाधस्तना न संबध्यन्ते व्यवहितत्वात्, एवमधस्तनप्रतरापेक्षयाऽपीति चूर्निकारव्याख्या, टीकाकारव्याख्या तु दुरवगमत्वात्परिहृतेति, 'सेसाणं साइए'त्ति शेषाणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मध्यामाद्याभ्योऽन्येषां सादिर्विपरिवर्त्तमानत्वात्, एतेन प्रथमभङ्ग उदाहृतः, अनादिसपर्यवसित इत्ययं तु द्वितीयो भङ्ग इह न संभवति, अनादिसंबद्धानामष्टानां जीवप्रदेशानामपरिवर्त्तमानत्वेन बन्धस्य सपर्यवसितत्वानुपपत्तेरिति ।

अथ तृतीयो भङ्ग उदाह्रियते-'तत्थ णं जे से साइए'इत्यादि, सिद्धानां सादिरपर्यवसितो जीवप्रदेशबन्धः, शैलेश्यवस्थायां संस्थापितप्रदेशानां सिद्धत्वेऽपि चलनाभावादिति । अथ चतुर्थःभङ्ग भेदत आह-'तत्थ णं जे से साइए'इत्यादि, 'आलावणबंधे'त्ति आलाप्यते-आलीनं क्रिय तएभिरि-त्यालापनानिरज्ज्वादीनि तैर्बन्धस्तृणादीनामालापनबन्धः 'अल्लियावणबंधे'त्ति अल्लियावणं-द्रव्यस्य द्रव्यान्तरेण श्लेषादिनाऽऽलीनस्य यत्करणं तद्रूपो यो बन्धः स तथा –

'सरीरबंधे'त्ति समुद्घाते सति यो विस्तारितसङ्कोचितजीवप्रदेशसम्बन्धविशेषवशात्तैज-सादिशरीरप्रदेशानां सम्बन्धविशेषः स शरीरबन्धः, शरीरिबन्ध इत्यन्ये, तत्र शरीरिणः समुद्घाते विक्षिप्तजीवप्रदेशानां सङ्कोचने यो बन्धः स शरीरिबन्ध इति, 'सरीरप्पओगबंधे'त्ति शरीरस्य-औदारिकादेर्यः प्रयोगेण-वीर्यान्तरायक्षयोपशमादिजनिव्यापारेण बन्धः-तत्पुदलोपादानं शरीररूपस्य वा प्रयोगस्य यो बन्धः स शरीरप्रयोगबन्धः ।

'तणभाराण व'त्ति तृणभारास्तृणभारकास्तेषां 'वेत्ते'त्यादि वेत्रलता-जलवंशकम्बा'वाग'त्ति वल्कः वरत्रा-चर्म्ममयी रज्जुः-सनादिमयी वल्ली-त्रपुष्यादिका कुशा-निर्मूलदर्भा दर्भास्तु समूलाः, आदिशब्दाच्चीवरादिग्रहः, 'लेसणाबंधे'त्ति श्लेषणा-श्लथद्रव्येण द्रव्ययोः सम्बन्धनं तद्रूपो यो बन्धः स तथा, 'उच्चयबंधे'त्ति उच्चयः-ऊर्द्ध चयनं-राशीकरणं तद्रूपो बन्ध उच्चयबन्धः, 'समुच्च-यबंधे'त्ति सङ्गतः-उच्चयापेक्षया विशिष्टतर उच्चयः समुच्चयः स एव बन्धः समुच्चयबन्धः, 'साहण-णाबंधे'त्ति संहननं-अवयवानां सङ्घातनं तद्रूपो यो बन्धः स संहननबन्धः, दीर्घत्वादि चेह प्राकृतशैलीप्रभवमिति, 'कुट्टिमाणं'ति मनिभूमिकानां 'छुहाचिक्खिल्ल'त्यादौ 'सिलेस'त्ति श्लेषोवज्रलेपः 'लक्ख'त्ति जतु 'महुसित्थ'त्ति मदनम्, आदिशब्दाद् गुग्गुलरालाखल्यादिग्रहः 'अवगररासीण व'त्ति कचवरराशीनाम् 'उच्चएणं'ति ऊर्ध्व चयनेन 'अगडतलागनई'इत्यादि प्रायः प्राग् व्याख्यातमेव ।

'देससाहणणाबंधे य'त्ति देशेन देशस्य संहननलक्षणो बन्धः-सम्बन्धः शकटाङ्गादीनामिवेति देशसंहनन बन्धः, 'सव्वसाहणणा बंधेय'त्ति सर्वेण संहनन लक्षणो बन्धः- सम्बन्धः क्षीरनीरादीना-मिवेति सर्वहननबन्धः 'जन्नं सगडरहे'त्यादि, शकटादीनि च पदानि प्राग् व्याख्यातान्यपि शिष्यहि-ताय पुनर्व्याखयायन्ते-तत्र च'सगड'त्ति गन्त्री 'रह'त्ति स्यन्दनः 'जाण'त्ति यानं-लघुगन्त्री 'जुग्ग'त्ति युग्यं गोल्लविषयप्रसिद्धं द्विहस्तप्रमाणं वेदिकोपशोभितं जम्पानं 'गिल्लि'त्ति हस्तिन उपरिकोल्लरं यन्मानुषं गिलतीव 'थिल्लि'त्ति अड्डपल्लाणं 'सीय'त्ति शिबिका-कूटाकारेणाच्छादितो जम्पानविशेषः 'संदमानिय'त्ति पुरुषप्रमाणो जम्पान विशेषः 'लोहि'त्ति मण्डकादिपचनभाजनं 'लोहकडाहे'ति भाजनविशेष एव 'कडुच्छयु'त्ति परिवेषणभाजनम् आसनशयनस्तम्भाः प्रतीताः 'भंड'त्ति मृन्मयभाजनं 'मत्त'त्ति अमत्रं भाजनविशेषः 'उवगरण'त्ति नानाप्रकारं तदन्योपकरणमिति ।

'पुव्वप्पओगपच्चइए य'त्ति पूर्वः-प्राक्कालासेवितः प्रयोगो-जीवव्यापारो वेदनाकषा-यादिसमुद्घातरूपः प्रत्ययः-कारणं यत्र शरीरबन्धे स तथा स एव पूर्वप्रयोगप्रत्ययिकः, पच्चुप्पन्नप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओगपच्चइए य' त्ति प्रत्युत्पन्नः-अप्राप्तपूर्वो वर्त्तमान इत्यर्थः प्रयोगः-केवलिसमुद्घातलक्षणव्यापारः प्रत्ययो यत्र स तथा स एव प्रत्युत्पन्नप्रयोगप्रत्ययिकः ।

'नेरइयाईण' मित्यादि, 'तत्थ तत्थ' त्ति अनेन समुद्घातकरणक्षेत्राणां बाहुल्यमाह, 'तेसु तेसु' त्ति अनेन समुद्घातकारणानां वेदनादीनां बाहुल्यमुक्तं 'समोहणमाणाणं' ति समुध्धन्यमानानां समुद्घातं शरीराद्बहिर्जीवप्रदेशप्रक्षेपलक्षणं गच्छतां 'जीवपएसाणं' ति इह जीवप्रदेशानामित्युक्तावपि शरीरबन्धाधिकारात्तात्स्थायत्तद्व्यपदेश इति न्यायेन जीवप्रदेशाश्रिततैजसकार्म्मणशरीरप्रदेशानामिति द्रष्टव्यं, शरीरिबन्ध इत्यत्र तु पक्षे समुद्घातेन विक्षिप्य सङ्कोचितानामुपसर्जनीकृततैजसादिशरीरप्रदेशानां जीवप्रदेशानामेवेति 'बंधे' त्ति रचनादिविशेषः, 'जन्नं केवले' त्यादि, केवलिसमुद्घातेन दण्ड १ कपाट २ मथिकरणा ३ न्तरपूरण ४ लक्षणेन 'समुपहतस्य' विस्तारितजीवप्रदेशस्य 'ततः' समुद्घातात् 'प्रतिनिवर्त्तमानस्य' प्रदेशान् संहरतः, समुद्घातप्रतिनिवर्त्तमानत्वं च पञ्चमादिष्वनेकेषु समयेषु स्यादित्यतो विशेषमाह-'अंतरामंथे वट्टमाणस्स' त्ति निवर्त्तनक्रियाया अन्तरे-मध्येऽवस्थितस्य पञ्चमसमय इत्यर्थः, यद्यपि च षष्ठादिसमयेषु तैजसादिशरीरसङ्घातः समुत्पद्यते तथाऽप्यभूतपूर्वतया पञ्चमसमय एवासौ भवति शेषेषु तु भूतपूर्वतयैवेतिकृत्वा 'अंतरामंथे वट्टमाणस्से' त्युक्तमिति, 'तेयाकम्माणं बंदे समुप्पज्जइ' त्ति तैजसकार्मणयोः शरीरयोः 'बन्धः' सङ्घातः समुत्पद्यते 'किं कारणं' कुतो हेतोः ?, उच्यते-

'ताहे' त्ति तदा समुद्घातनिवृत्तिकाले 'से' त्ति तस्य केवलिनः 'प्रदेशाः' जीवप्रदेशाः 'एगत्तीगय' त्ति एकत्वं गताः-संघातमापन्ना भवन्ति, तदनुवृत्या च तैजसादिशरीरप्रदेशानां बन्धः समुत्पद्यत इति प्रकृतम्, शरीरिबन्ध इत्यत्र तु पक्षे 'तेयाकम्माणं बंधे समुप्पज्जइ' त्ति तैजसकार्मणाश्रयभूतत्वात्तैजसकार्मणाः शरीरिप्रदेशास्तेषां बन्धः समुत्पद्यत इति व्याख्येयम्, 'वीरियसजोगसद्दव्वयाए' त्ति वीर्य-वीर्यान्तरायक्षयादिकृता शक्ति योगाः-मनःप्रभृतयः सह योगैर्वर्त्तत इति सयोगः सन्ति-विद्यमानानि द्रव्यानि-तथाविधपुद्गल यस्य जीवस्यासौ सद्रव्यः वीर्यप्रधानः सयोगो वीर्यसयोगः स चासौ सद्रव्यश्चेति विग्रहस्तद्भावस्तत्ता तया वीर्यसयोगसद्रव्यतया, सवीर्यतया सयोगतया सद्रव्यतया जीवस्य, तथा 'पमायपच्चय' त्ति 'प्रमादप्रत्ययात्' प्रमादलक्षणकारणात् तथा 'कम्मं च' त्ति कर्म्म च एकेन्द्रियजात्यादिकमुदयवर्ति 'जोगं च' त्ति 'योगं च' काययोगादिकं 'भवं च' त्ति 'भवं च' तिर्यग्भवादिकमनुभूयमानम् 'आउयं च' त्ति 'आयुष्कं च' तिर्यगायुष्काद्युदयवर्त्ति 'पडुच्च' त्ति 'प्रतीत्य' आश्रित्य ।

'ओरालिए' त्यादि औदारिकशरीरप्रयोगसम्पादकं यन्नाम तदौदारिकशरीरप्रयोगनाम तस्य कर्म्मण उदयेनौदारिकशरीरप्रयोगबन्धो भवतीति शेषः, एतानि च वीर्यसयोगसद्रव्यतादीनि पदान्यौदारिकशरीरप्रयोगनामकर्मोदयस्य विशेषणतया व्याख्येयानि, वीर्यसयोगसद्रव्यतया हेतुभूतया यो विवक्षितकर्मोदयस्तेनेत्यादिना प्रकारेण, स्वतन्त्राणि वैतान्यौदारिकशरीरप्रयगबन्धस्य कारणानि, तत्र च पक्षे यदौदारिकशरीरप्रयोगबन्धः कस्य कर्म्मण उदयेन ? इति पृष्टे यदन्यान्यपि कारणान्यभिधीयन्ते तद्विवक्षितकर्मोदयोऽभिहितान्येव सहकारिकारणान्यपेक्ष्येह कारणतयाऽवसेय इत्यस्यार्थःस्य ज्ञापनार्थःमिति ॥ 'एगिंदिए' त्यादौ 'एवं चेव' त्ति अनेनाधिकृतसूत्रस्य पूर्वसूत्रस-मताभिधानेऽपि 'ओरालियसरीरप्पओगनामाए' इत्यत्र पदे 'एगिंदियओरालियसरीर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्पओगनामाए' इत्ययं विशेषो दृश्यः, एकेन्द्रियौदारिकशरीरप्रयोबन्धस्येहाधिकृतत्वात्, एवमुत्तरत्रापि वाच्यमिति ।

'देसबंधेऽवि सव्वबंधेऽवि' त्ति तत्र यथाऽपूपः स्नेहभृततप्ततापिकायां प्रक्षिप्तः प्रथमसमये घृतादि गृह्णत्येव शेषेषु तु समयेषु गृह्णाति विसृजति च एवमयं जीवो यदा प्राक्तनं शरीरकं विहायान्यद्गृह्णति तदा प्रथमसमये उत्पत्तिस्थानगतान् शरीरप्रायोग्यपुद्गलान् गृह्णात्येवेत्ययं सर्वबन्धः, ततो द्वितीयादिषु समयेषु तान् गृह्णाति विसृजति चेत्येवं देशबन्धः, ततश्चैवमौदारिकस्य देशबन्धोऽप्यस्तीति सर्वबन्धोऽप्यस्तीति ।

'सव्वबंधं एक्कं समयं' ति अपूपदृष्टान्तेनैव तत्सर्वबन्धकस्यैकसमयत्वादिति, 'देसबंधे'-इत्यादि, तत्र यदा वायुर्मनुष्यादिर्वा वैक्रियं कृत्वा विहाय च पुनरौदारिकस्य समयमेकं सर्वबन्धं कृत्वा पुनस्तस्य देशबन्धं कुर्वन्नेकसमयानन्तरं म्रियते तदा जघन्यत एकं समयं देशबन्धोऽस्य भवतीति, 'उक्कोसेणं तिन्नि पलिओवमाइं समयऊणाइं' ति, कथं ?, यस्मादौदारिकशरीरिणां त्रीनि पल्योपमान्युत्कर्षतः स्थितिः तेषु च प्रथमसमये सर्वबन्धक इति समयन्यूनानि त्रीनि पल्योपमान्युत्कर्षत औदारिकशरीरिणां देशबन्धकालो भवति ।

'एगिंदियओरालिए' त्यादि, 'देसबंधे जहन्नेणं एक्कं समयं' ति, कथं ?, वायुरौदारिकशरीरी वैक्रियं गतः पुनरौदारिकप्रतिपत्तौ सर्वबन्धको भूत्वा देशबन्धकश्चैकं समयं भूत्वा मृतः इत्येवमिति, 'उक्कोसेणं बावीस' मित्यादि, एकेन्द्रियाणामुत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि स्थितिस्तत्रासौ प्रथमसमये सर्वबन्धकः शेषकालं देशबन्ध इत्येवं समयोनानि द्वाविंशतिर्वर्षसहस्राण्येकेन्द्रियाणामुत्कर्षतो देशबन्धकाल इति ।

'पुढविक्काइए' त्यादि, 'देसबंधे जहन्नेणं खुड्डागं भवग्गहणं तिसमयऊणं' ति, कथम् ?, औदारिकशरीरिणां क्षुल्लकभवग्रहणं जघन्यतो जीवितं, तच्च गाथाभिर्निरूप्यते-

॥ १ ॥ "दोन्नि सयाइं नियमा छप्पन्नाइं पमाणओ होंति ।
आवलियपमाणेणं खुड्डागभवग्गहणमेयं ॥

॥ २ ॥ पणसट्ठि सहस्साइं पंचेव सयाइं तह य छत्तीसा ।
खुड्डागभवग्गहणा हवंति अंतोमुहुत्तेणं ॥

॥ ३ ॥ सत्तरस भवग्गहणा खुड्डागा हुंति आणुपाणंमि ।
तेरस चेव सयाइं पंचानउयाइं अंसाणं ॥

इहोक्तलक्षणस्य ६५५३६ मुहूर्त्तगतक्षुल्लकभवग्रहणराशेः सहस्रत्रयशतसप्तकत्रिसप्तिलक्षणेन ३७७३ मुहूर्त्तगतोच्छ्सराशिना भागे हृते यल्लभ्यते तदेकत्रोच्छ्से क्षुल्लकभवग्रहणपरिमाणं भवति, तच्च सप्तदश, अवशिष्टस्तूक्तलक्षणोऽशराशिर्भवतिति, अयमभिप्रायः-येषामंशानां त्रिभिः सहस्रैः सप्तभिश्च त्रिसप्तत्यधिकशतैः क्षुल्लकभवग्रहणं भवति तेषामंशानां पञ्चनवत्यधिकानि त्रयोदश शतानि अष्टादशस्यापि क्षुल्लकभवग्रहणस्य तत्र भवन्तीति, तत्र यः पृथिवीकायिकसिमयेन विग्रहेणागतः स तृतीयसमये सर्वबन्धकः शेषेषु देशबन्धको भूत्वा आक्षुल्लकभवग्रहणं मृतः, मृतश्च सन्नविग्रेहनागतो यदा तदा सर्वबन्धक एव भवतीति, एवं च ये ते विग्रहसमयायस्तैरूनं क्षुल्लकमित्युच्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उक्कोसेणं बावीस'मित्यादि भावितमेवेति, 'देसबंधो जेसिं नत्थी'त्यादि, अयमर्थः- अप्तेजोवनस्पतिद्वित्रिचतुरिन्द्रियाणां क्षुल्लकभवग्रहणं त्रिसमयोनं जघन्यतो देशबन्धो यतस्तेषां वैक्रियशरीरं नास्ति, वैक्रियशरीरे हि सत्येकसमयो जघन्यत औदारिकदेशबन्धः पूर्वोक्तयुक्त्या स्यादिति, 'उक्कोसेणं जा जस्से' त्यादि तत्रापां वर्षसहस्राणि सप्तोत्कर्षतः स्थिति, तेजसामहोरात्राणि त्रीणि, वनस्पतीनां वर्षसहस्राणि दश द्वीन्द्रियाणां द्वादश वर्षाणि त्रीन्द्रियाणामेकोनपञ्चाशद-होरात्राणि चतुरिन्द्रियाणां षण्मासाः, तत एषां सर्बन्धसमयोना उत्कृष्टतो देशबन्धस्थितिर्भवतीति

'जेसिं पुणे'त्यादि, ते च वायवः पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च, एषां जघन्येन देशबन्ध एकं समयं, भावना च प्रागिव, 'उक्कोसेण'मित्यादि तत्र वायूनां त्रीनि वर्षसहानि उत्कर्षतः स्थिति, पञ्चेन्द्रियतिरश्चां मनुष्याणां च पल्योपमत्रयम्, इयं च स्थिति सर्वबन्धसमयोना उत्कृष्टतो देशबन्ध-स्थितिरेषां भवतीत्यतिदेशतो मनुष्याणां देशबन्धस्थितौ लब्धायामप्यन्तिमसूत्रत्वेन साक्षादेव तेषां तामाह-'जाव मणुस्साण'मित्यादि ।

उक्त औदारिकशरीरप्रयोगबन्धस्य कालोऽथ तस्यैवान्तरं निरूपयन्नाह- 'ओरालिए'त्यादिस सर्वबन्धान्तरं जघन्यत) क्षुल्लकभवग्रहणं त्रिसमयोनं, कथं ?, त्रिसमयविग्रहेणौदारिकशरीर-रिष्वागतस्तत्र द्वौ समयावनाहारकस्तृतीयसमये सर्वबन्धकः क्षुल्लकभवं च स्थित्वा मृत ओदारिक-शरीररिष्वेवोत्पन्नस्तत्र च प्रथमसमये सर्वबन्धकः, एवं च सर्वबन्थस्य सर्वबन्धकः क्षुल्लकभवं च स्थित्वा मृत ओदारिकशरीरिष्वेवोत्पन्नस्तत्र च प्रथमसमये सर्वबन्धकः, एवं च सर्वबन्धस्य सर्वबन्धस्य चान्तरं क्षुल्लकभवो विग्रहगतसमयत्रयोनः, 'उक्कोसेण'मित्यादि, उत्कृष्टतस्त्रयस्त्रिंशत्सागरोपमानि पूर्वकोटेः समयाभ्यधिकानि सर्वबन्धान्तरं भवतीति, कथं ?, मनुष्यादिष्वविग्रहेणागतस्तत्र च प्रथमसमय एव सर्वबन्धको भूत्वा पूर्वकोटिं च स्थित्वा त्रयशिंत्सागरोपमस्थितिर्नारकः सर्वार्थःसि-द्धको वा भूत्वा त्रिसमयेन विग्रहेणौदारिकशरीरी संपन्नस्तत्र च विग्रहस्य द्वौ समया-वनाहारकस्तृतीये च समये सर्वबन्धकः, औदारिकशरीरस्यैव च यौ तौ द्वावनाहारसमयौ तयोरेकः पूर्वकोटीसर्वबन्ध-समयस्थाने क्षिप्तस्ततश्च पूर्णा पूर्वकोटी जाता एकश्च समयोऽतिरिक्तः, एवं च सर्वबन्धस्य सर्वबन्धस्य चोत्कृष्टमन्तरं यथोक्तमानं भवतीति ।

'देसबंधंतर'मित्यादि, देशबन्धान्तरं जघन्येनैकं समयं, कथं ?, देशबन्धको मृतः सन्नवि-ग्रहेणैवोत्पन्नस्तत्र च प्रथम एव समये सर्बन्धको द्वितीयादिषु च समयेषु देशबन्धकः संपन्नः, तदेवं देशबन्धस्य देशबन्धस्य चान्तरं जघन्यत एकः समयः सर्वबन्धसम्बन्धीति । 'उक्कोसेण'मित्यादि, उत्कृष्टस्त्रतयस्त्रिंशत्सागरोपमानि त्रिसमयाधिकानि देशबन्धस्य देशबन्धस्यान्तरं भवतीति, कथं देशबन्धको मृत उत्पन्नश्च त्रयस्त्रिंशत्सागरोपमायुः सर्वार्थःसिद्धादौ, ततश्च च्युत्वा त्रिसमयेन विग्रहेणौदारिकशरीरी संपन्नस्तत्र च विग्रहस्य समयद्वयेऽनाहारकस्तृतीये च समये सर्वबन्धकस्ततो देशबन्धकोऽजनि, एवं चोत्कृष्टमन्तरालं देशबन्धस्य देशबन्धस्य च यथोक्तं भवतीति ।

औदारिकबन्धस्य सामान्यतोऽन्तरमुक्तमथ विशेषतस्तस्य तदाह-'एगिंदिए'त्यादि, एकेन्द्रियस्यौदारिकसर्वबन्धान्तरं जघन्यतः क्षुल्लकभवग्रहणं त्रिसमयोनं, कथं ?, त्रिसमयेन विग्रहेण पृथिव्यादिष्वागतस्तत्र च विग्रहस्य समयद्वयमनाहारकस्तृतीये च समये सर्वबन्धकस्ततः क्षुल्लकं भवग्रहणं त्रिसमयोनं स्थित्वा मृतः अविग्रहेण च यदोत्पद्य सर्वबन्धक एव भवति तदा सर्वबन्धयोर्यथोक्तमन्तरं भवतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उक्कोसेण'मित्यादि, उत्कृष्टः सर्वबन्धान्तरं द्वार्विसतिर्वर्षसहस्राणि समयाधिकानि भवन्ति, कथम् ?, अविग्रहेण पृथवीकायिकेष्वागतः प्रथम एव च समये सर्वबन्धकस्ततो द्वाविंशतिर्वर्षसहास्राणि स्थित्वा समयोनानि विग्रहगत्या त्रिसमययाऽन्येषु पृथिव्यादिषूत्पन्नस्तत्र च समयद्वयमनाहारको भूत्वा तृतीयसमये सर्वबन्धकः संपन्नः, अनाहारकसमययोश्चैकौ, द्वविंशतिवर्षसहस्रेषु समयोनेषु क्षिप्तस्तत्पूरणार्थं, ततस्च द्वाविंशतिर्वर्षसहस्राणि समयश्चैकेन्द्रियाणां सर्वबन्धयोरुत्कृष्टमन्तरं भवतीति । 'देसबंधंतर'मित्यादि तत्रैकेन्द्रियौदारिकदेशबन्धान्तरं जघन्येनैकं समयं, कथं ?, देशबन्धको मृतः सन्नविग्रहेण सर्वबन्धको भूत्वा एकस्मिन् समये पुनर्देशबन्धक एव जातः, एवं च देशबन्धयोर्जघन्यत एकः समयोऽन्तरं भवतीति।

'उक्कोसेणं अंतोमुहुत्तं'ति, कथं ?, वायुरौदारिकशरीरस्य देशबन्धकः सन् वैक्रियं गतस्तत्र चान्तर्मुहूर्त्तं स्थित्वा पुनरौदारिकशरीरस्य सर्वबन्धको भूत्वा देशबन्धक एव जातः, एवं च देशबन्धयोरुत्कर्षतोऽन्तर्मुहूर्तमन्तरमिति ।

'पुढविकाइए'त्यादि, 'देसबंधंतरं जहन्नेणं एक्कं समयं उक्कोसेणं तिन्नि समय'त्ति, कथं ?, पृथिवीकायिको देशबन्धको मृतः सन्नविग्रहगत्या पृथिवीकायिकेष्वेवोत्पन्नः एकं समयं च सर्वबन्धको भूत्वा पुनर्देशबन्धको जातः एवमेकसमयो देसबन्धयोर्जघन्योनान्तरं, तथा पृथिवीकायिको देशबन्धको मृतः सन् त्रिसमयविग्रहेण तेष्वेवोत्पन्नस्तत्र च समयद्वयमनाहारकः तृतीयसमये च सर्वबन्धक भूत्वा पुनर्देशबन्धको जातः, एवं च त्रयः समया उत्कर्षतो देशबन्धयोरन्तरमिति। अथाप्कायिकादीनां बन्धान्तरमतिदेशत आह-'जहा पुढविकाइयाण'मित्यादि, अत्रैव च सर्वथा समतापरिहारार्थःमाह-

'नवर'मित्यादि, एवं चातिदेशतो यल्लब्धं तद्दर्श्यते-अप्कायिकानां जघन्यं सर्वबन्धान्तरं क्षुल्लकभवग्रहणं त्रिसमयोनं उत्कृष्टं तु सप्त वर्षसहस्राणि समयाधिकानि, देशबधान्तरं जघन्यमेकः समय उत्कृष्टं तु त्रयः समयाः, एवं वायुवर्जानां तेजः-प्रभृतीनामपि, नवरमुत्कृष्टं सर्वबन्धान्तरं स्वकीया स्वकीया स्थिति समयाधिका वाच्या ।

अथादिदेशे वायुकायिकवर्जानामित्यनेनातिदिष्टबन्धान्तरेभ्यो वायुबन्धान्तरस्य विलक्षणता सूचितेति वायुबन्धान्तरं भेदेनाह-'वाउक्काइयाण'मित्यादि, तत्र च वायुकायिकानामुत्कर्षेण देशबन्धान्तरमन्तर्मुहूर्ततं, कथं ?, वायुरौदारिकशरीरस्य देशबन्धकः सन् वैक्रियबन्धमन्तर्मुहूर्त्तं कृत्वा पुनरौदारिकसर्वबन्धसमयानन्तरमौदारिकदेशबन्धं यदा करोति तदा यथोक्तमन्तरं भवतीति

'पंचिंदिये'त्यादि, तत्र सर्वबन्धान्तरं जघन्यं भावितमेव उत्कृष्टं तु भाव्यते-पञ्चेन्द्रियतिर्यङ अविग्रहेणोत्पन्नः प्रथम एव च समये सर्वबन्धकस्ततः समयोनां पूर्वकोटिं जीवित्वा विग्रहगत्या त्रिसमयया तेष्वेवोत्पन्नस्तत्र च द्वावनाहारकसमयौ तृतीये च समये सर्वबन्धकः संपन्नः, अनाहारकसमययोश्चैकः समयोनायां पूर्वकोट्यां क्षिप्तस्तत्पूरणार्थःमेकस्त्वधिक इत्येवं यथोक्तमन्तरं भवतीति, देशबन्धान्तरं तु यथैकेन्द्रियाणां, तच्चैवं-जघन्यमेकः समयः, कथं ?, देशबन्धको मृतः सर्वबन्धसमयानन्तरं देशबन्धको जात इत्येवं, उत्कर्षेण त्वन्तर्मुहूर्त्तं ?, कथं ?, औदारिकशरीरि देसबन्धकः सन् वैक्रियं प्रतिपन्नस्तत्रान्तर्मुहूर्त्तमन्तरमिति, एवं मनुष्याणामपीति, एतदेवाह-'जहा पंचिंदिए'त्यादि ।

औदारिकबन्धानन्तरं प्रकारान्तरेणाह-'जीवे'त्यादि, एकेन्द्रियत्वे 'नोएगिंदियत्ते'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीन्द्रियत्वादौ पुनरेकेन्द्रियत्वे सति यत्सर्वबन्धान्तरं तज्जघन्येन द्वे क्षुल्लकभवग्रहणे त्रिसमयोने, कथम् ?, एकेन्द्रियसिमयया विग्रहगत्योत्पन्नस्तत्र च समयद्वयमनाहारको भूत्वा तृतीयसमये सर्वबन्धको जातः, एवं च सर्वबन्धयोरुक्तमन्तरं जातमिति।

'उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं'ति, कथम् ?, अविग्रहेणैकेन्द्रियः समुत्पन्नस्तत्र च प्रथमसमये सर्वबन्धको भूत्वा द्वाविंशतिं वर्षसहस्राणि जीवित्वा मृतसकायिकेषु चोत्पन्नः, तत्र स सङ्ख्यातवर्षाभ्यधिकसागरोपमसहस्रद्वयरूपामुत्कृष्टसकायिककायस्थितिमतिवाह्य एकेन्द्रियेष्वेवोत्पद्य सर्वबन्धको जात इत्येवं सर्वबन्धयोर्यथोक्तमन्तरं भवति, सर्वबन्धसमयहीन-एकेन्द्रियोत्कृष्टभवस्थितेसकायस्थितौ प्रक्षेपणेऽपि सङ्ख्यातस्थानानां सङ्ख्यातभेदत्वेन सङ्ख्यातवर्षाभ्यधिकत्वस्याव्याहतत्वादिति।

'देसबंधंतरं जहन्नेणं खुड्डागं भवग्गहणं समयाहियं'ति, कथम् ?, एकेन्द्रियो देशबन्धकः सन् मृत्वा द्वीन्द्रियादषु क्षुल्लकभवग्रहणमनुभूयाविग्रहेण चागत्य प्रथमसये सर्वबन्धको भूत्वा द्वितीये देशबन्धको भवति, एवं च देशबन्धान्तरं क्षुल्लकभवः सर्वबन्धसमयातिरिक्तः, 'उक्कोसेण'-मित्यादि सर्वबन्धान्तरभावनोक्तप्रकारेण भावनीयमिति।

अथ पृथिवीकायिकबन्धान्तरं चिन्तयन्नाह-'जीवस्से'त्यादि, 'एवं चेव'त्ति करणात् 'तिस-मयऊणाइं'ति दृश्यम्, 'उक्कोसेणं अनंतं कालं'ति, इह कालानन्तत्वं वनस्पतिकायस्थितिकालापेक्ष-याऽनन्तकालमित्युक्तं तद्विभजनार्थःमाह-'अनंताओ'इत्यादि, अयमभिप्रायः-तस्यानन्तस्य कालस्य समयेषु अवसर्प्पिण्युत्सर्प्पिणीसमयैरपह्रियमाणेष्वनन्ता अवसर्प्पिण्युत्स-र्प्पिण्यो भवन्तीति, 'कालओ'त्ति इदं कालापेक्षया मानं, 'खेत्तओ'त्ति क्षेत्रापेक्षया पुनरिदम्- 'अनंता लोग'त्ति, अयमर्थः-तस्यानन्तकालस्य समयेषु लोकाकाशप्रदेशैरपह्रियमाणेष्वनन्ता लोका भवन्ति, अथ तत्र कियन्तः पुद्गलपरावर्त्ता भवन्ति ? इत्यत आह—

'असंखेज्जे'त्यादि पुद्गलपरावर्त्तलक्षणं सामान्येन पुनरिदं-दशभिः कोटीकोटीभिरद्धा-पल्योपमा- नामेकं सागरोपमं दशभिः सागरोपमकोटीकोटीभिरवसर्प्पिणी, उत्सर्प्पिण्यप्येवमेव, ता अवसर्प्पिण्युत्सर्प्पिण्योऽनन्ताः पुद्गलपरावर्तः, एतद्विशेषलक्षणं तु इहैव वक्ष्यतीति, पुद्गलप-रावर्तानामेवास-ङ्ख्यातत्वनियमनायाह-'आवलिए'त्यादि, असङ्ख्यातसमयसमुदायश्चावलिकेति

'देसबंधंतरं' जहन्नेण'मित्यादि, भावना त्वेवं-पृथिवीकायिको देशबन्धकः सन्मृतः पृथिवीकायिकेषु क्षुल्लकभवग्रहणं जीवित्वा मृतः सन् पुनरविग्रहेण पृथिवीकायिकेष्वेवोत्पन्नः, तत्र च सर्वबन्धसमयानन्तरं देशबन्धको जातः, एवं च सर्वबन्धसमयेनाधिकमेकं क्षुल्लकभवग्रहणं देशबन्धयोरन्तरमिति।

'वणस्सइकाइयाणं दोन्नि खुड्डाइं'ति वनस्पतिकायिकानां जघन्यतः सर्वबन्धान्तरं द्वे क्षुल्लके भवग्रहणे 'एवं चेव'त्तिकरणात्त्रिसमयोने इति दृश्यम्, एतद्भावना च वनस्पतिकायिकस्त्रिसमयेन विग्रहेणोत्पन्नः तत्र च विग्रहस्य समयद्वयमनाहारकस्तृतीये समये च सर्वबन्धको भूत्वा क्षुल्लकभवं च जीवित्वा पुनः पृथिव्यादिषु क्षुल्लकभवमेव स्थित्वा पुनरविग्रहेण वनस्पतिकायिकेष्वेवोत्पन्नः प्रथमसमये च सर्वबन्धकोऽसाविति सर्वबन्धयोस्त्रिसमयोने द्वे क्षुल्लकभवग्रहणे अन्तरं भवति इति

'उक्कोसेण'मित्यादि, अयं च पृथिव्यादिषु कायस्थितिकालः 'एवं देसबंधंतरंपि'त्ति यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथिव्यादीनां देशबन्धान्तरं जघन्यमेवं वनस्पतेरपि, तच्च क्षुल्लकभवग्रहणं समयाधिकं, भावना चास्य पूर्ववत्, 'उक्कोसेणं पुढविकालो' त्ति उत्कर्षेण वनस्पतेर्देशबन्धान्तरं 'पृथिवीकालः' पृथिवीकायस्थितिकालोऽसङ्ख्यातावसर्प्पिण्युत्सर्प्पिण्यादिरूप इति।

अथौदारिकदेशबन्धकादीनामल्पत्वादिनिरूपणायाह-'एएसी' त्यादि, तत्र सर्वस्तोकाः सर्बन्धकास्तेषामुत्पत्तिसमय एव भावात्, अबन्धका विशेषाधिकाः, यतो विग्रहगतौ सिद्धत्वादौ च ते भवन्ति, ते च सर्वबन्धकापेक्षया विशेषाधिकाः, देशबन्धका असङ्ख्यातगुणाः, देशबन्धकालस्यासङ्ख्यातगुणत्वात्, एतस्य च सूत्रस्य भावनां विशेषतोऽग्रे वक्ष्याम इति।

अथ वैक्रियशरीरप्रयोबन्धनिरूपणायाह--

*मू. (४२५) वेउव्वियसरीरप्पयोगबंधे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! दुविहे पन्नत्ते, तंजहा-एगिंदियवेउव्वियसरीरप्पयोगबंधे य पंचिंदियवेउव्वियसरीरप्पयोगबंधे य।*

*जइ एगिंदियवेउव्वियसरीरप्पयोगबंधे किं वाउक्काइयएगिंदियसरीरप्पयोगबंधे य अवाउक्काइयएगिंदिय० एवं एएणं अभिलावेणं जहा ओगाहणसंठाणे वेउव्वियसरीरभेदो तहा भानियव्वो जाव पज्जत्तसव्वट्ठसिद्धअनुत्तरोववाइयकप्पातीयवेमानियदेवपंचिंदियवेउव्वियसरीरप्पयोगबंधे य अपज्जत्तसव्वट्ठसिद्धअनुत्तरोववाइय जाव पयोगबंधे य।*

*वेउव्वियसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! वीरियसजोगसद्दव्वयाए जाव आउयं वा लद्धिं वा पडुच्च वेउव्वियसरीरप्पयोगनामाए कम्मस्स उदएणं वेउव्वियसरीरप्पयोगबंधे।*

*वाउक्काइयएगिंदियवेउव्वियसरीरप्पयोग० पुच्छा, गोयमा ! वीरियसजोगसद्दव्वयाए चेव जाव लद्धिं च पडुच्च वाउक्काइयएगिंदियवेउव्विय जाव बंधो। रयणप्पभापुढविनेरइयपंचिंदियवेउव्वियसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! वीरियसयोगसद्दव्वयाए जाव आउयं वा पडुच्च रयणप्पभापुढवि० जाव बंधे, एवं जाव अहेसत्तमाए।*

*तिरिक्खजोनियपंचिंदियवेउव्वियसरीरपुच्छा, गोयमा ! वीरिय० जहा वाउक्काइयाणं, मणुस्सपंचिंदियवेउव्विय० एवं चेव, असुरकुमारभवणवासिदेवपंचिंदियवेउव्विय० जहा रयणप्पभापुढविनेरइया एवं जाव थनियकुमारा, एवं वाणमंतरा एवं जोइसिया एवं सोहम्मकप्पोवगया वेमानिया एवं जाव अच्चुयगेवेज्जकप्पातीया वेमानिया, एवं चेव अनुत्तरोववाइयकप्पातीया वेमाणीया एवं चेव।*

*वेउव्वियसरीरप्पयोगबंधे णं भंते ! किं देसबंधे सव्वबंधे ?, गोयमा ! देसबंधेवि सव्वबंधेवि, वाउक्काइयएगिंदिय एवं चेव रयणप्पभापुढविनरइया एवं चेव, एवं जाव अनुत्तरोववाइया॥ वेउव्वियसरीरप्पयोगबंधे णं भंते ! कालओ केवच्चिरं होइ ?, गोयमा ! सव्वबंधे जहन्नेणं एक्कं समयं उक्कोसेणं दो समया, देसबंधे जहन्नेणं एक्कं समयं उक्कोसेणं तेत्तीसं सागरोवमाइं समयूणाइं*

*वाउक्काइएगिंदियवेउव्वियपुच्छा, गोयमा ! सव्वबंधे एक्कं समयं देसबंधे जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं।*

*रयणप्पभापुढविनेरइय पुच्छा, गोयमा ! सव्वबंधे एक्कं समयं देसबंधे जहन्नेणं दसवाससहस्साइं तिसमयऊणाइं उक्कोसेणं सागरोवमं समऊणं, एवं जाव अहेसत्तमा, नवरं देसबंधे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जस्स जा जहन्निया ठिती सा समऊणा कायव्वा जस्स जाव उक्कोसा सा समयूणा।

पंचिंदियतिरिक्खजोनियाण मणुस्साण य जहा वाउक्काइया णं। असुरकुमारनागकुमार० जाव अनुत्तरोववाइयाणं जहा नेरइयाणं नवरं जस्स जा ठिई सा भानियव्वा जाव अनुत्तरोववाइयाणं सव्वबंधे एक्कं समयं देसबंधे जहन्नेणं एक्कतीसं सागरोवमां तिसमऊणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं समऊणाइं।

वेउव्वियसरीरप्पयोगबंधंतरं णं भंते! कालओ केवच्चिरं होइ?, गोयमा! सव्वबंधंतरं जहन्नेणं एक्कं समयं उक्कोसेणं अनंतं कालं अनंताओ जाव आवलियाए असंखेज्जइभागो, एवं देसबंधंतरंपि।। वाउक्काइयवेउव्वियसरीरपुच्छा, गोयमा! सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पलिओवमस्स असंखेज्जइभागं, एवं देसबंधंतरंपि।

तिरिक्खजोनियपंचिंदियवेउव्वियसरीरप्पयोगबंधंतरं पुच्छा, गोयमा! सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडीपुहुत्तं, एवं देसबंधंतरंपि, मणूसस्सवि।

जीवस्स णं भंते! वाउकाइयत्ते नोवाउकाइयत्ते पुनरवि वाउकाइयत्ते वाउकाइयएगिंदिय० वेउव्वियपुच्छा गोयमा! सव्वबंधतरं जहन्नेनं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं वणस्सइकालो, एवं देसबंधंतरंपि।

जीवस्स णं भंते! रयणप्पभापुढविनेरइयत्ते नोरयणप्पभापुढवि० पुच्छा, गोयमा! सव्वबंधंतरं जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्कोसेणं वणस्सइकालो, देसबंधंतरं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं वणस्सइकालो, एवं जाव अहेसत्तमाए, नवरं जा जस्स ठिती जहन्निया सा सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तमब्भहिया कायव्वा, सेसं तं चेव, पंचिंदियतिरिक्खजोनियमणुस्साण य जहा वाउक्काइयाणं। असुरकुमारनागकुमार जाव सहस्सारदेवाणं एएसिं जहा रयणप्पभापुढविनेरइयाणं नवरं सव्वबंधंतरे जस्स जा ठिती जहन्निया सा अंतोमुहुत्तमब्भहिया कायव्वा, सेसं तं चेव।

जीवस्स णं भंते! आणयदेवत्ते नोआणयपुच्छा, गोयमा! सव्वबंधंतरं जहन्नेणं अट्ठारस सागरोवमाइं वासपुहुत्तमब्भहियाइं उक्कोसेनं अनंतं कालं वणस्सइकालो, देसबंधंतरं जहन्नेणं वासपुहुत्तं उक्कोसेणं अणंतं कालं वणस्सइकालो, एवं जाव अच्चुए नवरं जस्स जा ठिती सा सव्वबंधंतरं जह० वासपुहुत्तमब्भहिया कायव्वा सेसं तं चेव। गेवेज्जकप्पातीयपुच्छा, गोयमा! सव्वबंधंतरं जहन्नेणं बावीसं सागरोवमाइं वासपुहुत्तमब्भहियाइं उक्कोसेणं अनंतं कालं वणस्सइकालो, देसबंधंतरं जहन्नेणं वासपुहुत्तं उक्कोसेणं वणस्सइकालो।

जीवस्स णं भंते! अनुत्तरोववातियपुच्छा, गोयमा! सव्वबंधंतरं जहन्नेणं एक्कतीसं सागरोवमाइं वासपुहुत्तमब्भहियाइं उक्कोसेणं संखेज्जाइं सागरोवमाइं, देसबंधंतरं जहन्नेणं वासपुहुत्तं उक्कोसेणं संखेज्जाइं सागरोवमाइं।

एएसि णं भंते! जीवाणं वेउव्वियसरीरस्स देसबंधगाणं सव्वबंधगाणं अबंधगाण य कयरे२ हितो जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा जीवा वेउव्वियसरीरस्स सव्वबंधगा देसबंधगा असंखेज्जगुणा अबंधगा अनंतगुणा।

आहारगसरीरप्पयोगबंधे णं भंते! कतिविहे पन्नत्ते?, गोयमा! एगागारे पन्नत्ते। जइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एगागारे पन्नत्ते किं मणुस्साहारगसरीरप्पयोगबंधे किं अमणुस्साहारगसरीरप्पयोगबंधे ?, गोयमा मणुस्साहारगसरीरप्पयोगबंधे नो अमणुस्साहारगसरीरप्पयोगबंधे, एवं एएणं अभिलावेणं जहा ओगाहणसंठाणे जाव इड्डिपत्तमत्तसंजयसम्मदिट्ठिपज्जत्तसंखेज्जवासाउयकम्मभूमिग-गब्भवक्कंतियमणुस्साहारगसरीरप्पयोगबंधे णो अनिड्डिपत्तपमत्त जाव आहारगसरीरप्पयोगबंधे*

*आहारगसरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! वीरियसयोग-सद्दव्वयाए जाव लद्धिं पडुच्च आहारगसरीरप्पयोगनामाए कम्मस्स उदएणं आहारगसरीरप्पयोगबंधे आहारगसरीरप्पयोगबंधे णं भंते ! किं देसबंधे सव्वबंधे ?, गोयमा ! देसबंधेवि सव्वबंधेवि। आहारगसरीरप्पयोगबंधे णं भंते ! कालओ केवचिरं होइ ?, गोयमा ! सव्वबंधे एक्कं समयं देसबंधे जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं।*

*आहारगसरीरप्पयोगबंधंतरे णं भंते ! कालो केवचिरं होइ ?, गोयमा ! सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ ओसप्पिनिउस्सप्पिणीओ कालओ खेत्तओ अनंता लोया अवड्ढपोग्गलपरियट्टं देसूणं, एवं देसबंधंतरंपि।*

*एएसि णं भंते ! जीवाणं आहारगसरीरस्स देसबधगाणं सव्वबंधगाण अबंधगाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा आहारगसरीरस्स सव्वबंधगा देसबंधगा संखेज्जगुणा अबंधगा अनंतगुणा ३ ॥*

**वृ.** तत्र 'एगिंदियवेउव्विए'त्यादि वायुकायिकापेक्षमुक्तं, 'पंचिंदिए'त्यादि तु पञ्चेन्द्रिय-तिर्यङ्मनुष्यदेवनारकापेक्षमिति, । 'वीरिये'त्यादौ यावत्करणात् 'पमायपच्चया कम्मं च जोगं च भवं चे'ति द्रष्टव्यं 'लद्धिं व'त्ति वैक्रियकरणलब्धिं वा प्रतीत्य, एतच्च वायुपञ्चेन्द्रियति- र्यङ्मनुष्यान-पेक्ष्योक्तं, तेन वायुकायादिसूत्रेषु लब्धिं वैक्रियशरीरबन्धस्य प्रत्ययतया वक्ष्यति, नारकदेवसूत्रेषु पुनस्तां विहाय वीर्यसयोगसद्रव्यतादीन् प्रत्ययतया वक्ष्यतीति ॥

'सव्वबंधे जहन्नेणं एक्कं समयं'ति, कथं ?, वैक्रियशरीरिषूत्पद्यमानो लब्धितो वा तत् कुर्वन् समयमेकं सर्वबन्धको भवतीत्येवमेकं समयं सर्वबन्ध इति, 'उक्कोसेणं दो समय'त्ति, कथं ?, औदारिकशरीरि वैक्रियतां प्रतिपद्यमानः सर्वबन्धकोभूत्वा मृतः पुनर्नारकत्वं देवत्वं वा यदा प्राप्नोति तदा प्रथमसमये वैक्रियस्य सर्वबन्धक एवेतिकृत्वा वैक्रियशरीरस्य सर्वबन्धको भूत्वा मृतः पुनर्नारकत्व देवत्वं वा यदा प्राप्नोति तदा प्रथमसमये वैक्रियस्य सर्वबन्धक एवेतिकृत्वा वैक्रियशरीरस्य सर्वबन्धक उत्कृष्टतः समयद्वयमिति, 'देसबंधे जहन्नेणं एक्कं समयं'ति, कथं ?, औदारिकशरीरी वैक्रियतां प्रतिपद्यमानः प्रथमसमये सर्वबन्धको भवति द्वितीयसमये देशबन्धको भूत्वा मृत इत्येवं देशबन्धो जघन्यत एकं समयमिति, 'उक्कोसेणं तेत्तीसं सागरोवमाइं समयऊणाइं'ति, कथं ?, देवेषु नारकेषु चोत्कृष्टस्थितिषूत्पद्यमानः प्रथमस्ये सर्वबन्धको वैक्रियशरीरस्य ततः परं देशबन्धकस्तेन सर्वबन्धक- समयेनोनानि त्रयस्त्रिंशत्सागरोपमाण्युत्कर्षतो देशबन्ध इति ॥

'वाउक्काइए'त्यादि, 'देसबंधे जहन्नेणं एक्कं समयं'ति, कथं ?, वायुरौदारिकशरीरि सन् वैक्रियं गतस्ततः प्रथमसमये सर्वबन्धको द्वितीयसमये देशबन्धको भूत्वा मृत इत्येवं जघन्येनैको देशबन्धसमयः 'उक्कोसेणं अंतोमुहुत्तं'ति वैक्रियशरीरिण स एव यदाऽन्तर्मुहूर्त्तमात्रमास्ते तदोत्कर्षतो देशबन्धोऽन्तर्मुहूर्त्त, लब्धिवैक्रियशरीरिणो जीवतोऽन्तर्मुहूर्त्तात्परतो न वैक्रियशरीरावस्थानमस्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरौदारिकशरीरस्यावश्यं प्रतिपत्तेरिति ॥

'रयणप्पभे'त्यादि, 'देसबंधे जहन्नेणं दस वाससहस्साइं ति० समयऊणाइं'ति, कथं?, त्रिसमय-विग्रहेण रत्नप्रभायां जघन्यस्थितिर्नारकः समुत्पन्नः तत्र च समयद्वयमनाहारकस्तृतीये च समये सर्वबन्धकस्ततो देशबन्धको वैक्रियस्यतदेवमाद्यसमयत्रयन्यूनं वर्षसहस्रदशकं जघन्यतो देशबन्धः, 'उक्कोसेणं सागरोवमं समयऊणं'ति, कथं?, अविग्रहेण रत्नप्रभायामुत्कृष्टस्थितिर्नारकः समुत्पन्नः, तत्र च प्रथमसमये सर्वबन्धको वैक्रियशरीरस्य ततः परं देशबन्धकस्तेन सर्वबन्धसमयेनोनं सागरोपममुत्कर्षतो देशबन्ध इति, एवं सर्वत्र सर्वबन्धः समयं देशबन्धश्च जघन्यो विग्रहसमयत्रय-न्यूनोनिजनिजजघन्यस्थितिप्रमाणो वाच्यः, सर्वबन्धसमयन्यूनोत्कृष्टस्थितिप्रमाणश्चोत्कृष्टदेशबन्ध इति, एतदेवाह—

'एवं जावे'त्यादि, पञ्चेन्द्रियतिर्यङ्मनुष्याणां वैक्रियसर्वबन्ध एकं समयं देशबन्धस्तु जघन्यत एकं समयमुत्कर्षेण त्वन्तर्मुहूर्त्तम् —

एतदेवातिदेशेनाह-'पंचिंदिये'त्यादि, यच्च ।

॥ १ ॥ "अंतमुहुत्तं निरएसु होइ चत्तारि तिरियमणुएसु ।
देवेसु अद्धमासो उक्कोस विउव्वणाकालो ॥"

इति वचनसामर्थ्यादन्तर्मुहूर्त्तचतुष्टयं तेषां देसबन्ध इत्युच्यते तन्मतान्तरमित्यवसेयमिति

उक्तो वैक्रियशरीरप्रयोगबन्धस्य कालः, अथ तस्यैवान्तरं निरूपयन्नाह-'वेउव्विये'त्यादि, 'सव्वबंधंतरं जहन्नेणं एक्कं समयं'ति, कथं?, औदारिकशरीरी वैक्रियं गतः प्रथमसमये सर्वबन्धको द्वितीये, देशबन्धको भूत्वा मृतो देवेषु नारकेषु वा वैक्रियशरीरिष्वविग्रहेणोत्पद्यमानः प्रथमसमये सर्वबन्धको द्वितीये देशबन्धको भूत्वा मृतो देवेषु नारकेषु वा वैक्रियशरीरिष्वविग्रहेणोत्पद्यमानः प्रथमसमये सर्वबन्धक इत्येवमेकः समयः सर्वबन्धान्तरमिति, 'उक्कोसेणं अनंतं कालं'ति, कथं?, औदारिकशरीरी वैक्रियं गतो वैक्रियशरीरिषु वा देवादिषु समुत्पन्नः स च प्रथमसमये सर्वबन्धको भूत्वा देशबन्धं च कृत्वा मृतः ततः परमनन्तं कालमौदारिकशरीरिषु वनस्पत्यादिषु स्थित्वा वैक्रियशरीर-वत्सूत्पन्नः, तत्र च प्रथमसमये सर्वबन्धको जातः, एवं च सर्वबन्धयोर्यथोक्तमन्तरं भवतीति, 'एवं देसबंधंतरंपि'त्ति, जघन्येनैकं समयमुत्कृष्टतोऽनन्तं कालमित्यर्थः, भावना चास्य पूर्वोक्ता-नुसारेणेति ।

'वाउक्काइए'त्यादि 'सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं'ति, कथं?, वायुरौदारिकशरीरी वैक्रियमापन्नः, तत्र च प्रथमसमये सर्वबन्धको भूत्वा मृतः पुनर्वायुरेव जातः, तस्य चापर्याप्तकस्य वैक्रियशक्तिर्नाविर्भवतीत्यन्तर्मुहूर्त्तमात्रेणासौ पर्याप्तको भूत्वा वैक्रियशरीरमारभते, तत्र चासौ प्रथमसमये सर्वबन्धको जात इत्येवं सर्वबन्धान्तरमन्तर्मुहूर्त्तमिति, 'उक्कोसेणं पलिओवमस्स असंखेज्जइभागं'ति, कथं?, वायुरौदारिकशरीरी वैक्रियं गतः, तत्प्रथमसमये च सर्वबन्धकस्ततो देशबन्धको भूत्वा मृतस्ततः परमौदारिकशरीरिषु वायुषु पल्योपमासङ्ख्येयभागमतिवाह्यावश्यं वैक्रियं करोति, तत्र च प्रथमसमये सर्वबन्धकः, एवं च सर्वबन्धयोर्यथोक्तमन्तरं भवतीति, 'एवं देसबंधंतरंपि'त्ति, अस्य भावना प्रागिवेति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तिरिक्खे'त्यादि, 'सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं'ति, कथं ?, पञ्चेन्द्रियतिर्यग्‌योनिको वैक्रियं गतः तत्र च प्रथमसयमे सर्वबन्धकस्ततः परं देशबन्धकोऽन्तर्मूहूर्त्तमात्रं तत औदारिकस्यसर्वबन्धकोभूत्वा समयं देशबन्धको जातः पुनरपि श्रद्धेयमुत्पन्न वैक्रियं करोमीतिपुनर्वैक्रियं कुर्वतः प्रथमसमये सर्वबन्धः,एवं च सर्वबन्धयोर्यथोक्तमन्तरं भवतीति, 'उक्कोसेणं पुव्वकोडिपुहुत्तं'ति, कथं ?, पूर्वकोट्यायुः पञ्चेन्द्रियतिर्यग्योनिको वैक्रियं गतः, तत्र च प्रथमसमये सर्वबन्धकस्ततो देशबन्धको भूत्वा कालान्तरे मृतस्तत्र पूर्वकोट्यायुः पञ्चेन्द्रियतिर्यक्ष्वेवोत्पन्नः पूर्वजन्मना सह सप्ताष्टौ वा वारान्, ततः सप्तमेऽष्टमे वा भवे वैक्रियं गतः, तत्र च प्रथमसमये सर्वबन्धं कृत्वा देशबन्धं करोतीति, एवं च सर्वबन्धयोरुत्कृष्टं यथोक्तमन्तरं भवतीति, 'एवं देसबंधंतंपि'त्ति, भावना चास्य सर्वबन्धान्तरोक्तभावनानुसारेण कर्त्तव्येति।

वैक्रियशरीरबन्धान्तरमेव प्रकारान्तरेण चिन्तयन्नाह-'जीवस्से'त्यादि, 'सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं'ति, कथं ?, वायुर्वैक्रियशरीरं प्रतिपन्नः, तत्र च प्रथमसमये सर्वबन्धको भूत्वा मृतस्ततः पृथिवीकायिकेषूत्पन्नः तत्रापि क्षुल्लकभवग्रहणमात्रं स्थित्वा पुनर्वायुर्जातः, तत्रापि कतिपयान् क्षुल्लकभवान् स्थित्वा वैक्रियं गतः, तत्र च प्रथमसमये सर्वबन्धको जातस्ततश्च वैक्रियस्य सर्वबन्धयोरन्तरं बहवः क्षुल्लकभवास्ते च बहवोऽप्यन्तर्मुहूर्त्त, अन्तर्मुहूर्त्ते बहूनां क्षुल्लकभवानां प्रतिपादितत्वात्, ततश्च सर्वबन्धान्तरं यथोक्तं भवतीति, 'उक्कोसेणं अनंतं कालं वणस्सइकालो'त्ति, कथं ?, वायुर्वैक्रियशरीरीभवन् मृतो वनस्पत्यादिष्वनन्तं कालं स्थित्वा वैक्रियशरीरं पुनर्यदा लप्स्यते तदा यथोक्तमन्तरं भविष्यतीति, 'एवं देसबंधंतरंपि'त्ति, भावना चास्य प्रागुक्तानुसारेणेति ॥

रत्नप्रभासूत्रे 'सव्वबंधंतर'मित्यादि, एतद्‌भाव्यते-रत्नप्रभानारको दशवर्षसहस्रस्थितिक उत्पत्तौ सर्वबन्धकः तत उद्धृ तस्तु गर्भजपञ्चेन्द्रियेष्वन्तर्मुहूर्त्तं स्थित्वा रत्नप्रभायां पुनरप्युत्पन्नः तत्र च प्रथमसमये सर्वबन्धक इत्येवं सूत्रोक्तं जघन्यमन्तरं सर्वबन्धयोरिति, अयं च यदाऽपि प्रथमोत्पत्तौ त्रिसमयविग्रहेणोत्पद्यते तदापि न दश वर्षसहस्राणि त्रिसमयन्यूनानि भवन्ति, अन्तर्मुहूर्त्तस्य मध्यात्समयत्रयस्य तत्र प्रक्षेपात्, न च तत्प्रक्षेपेऽप्यन्तर्मुहूर्त्तस्यान्तर्मुहूर्त्तत्वव्याघातस्तस्यानेकभेदत्वादिति, 'उक्कोसेणं वणस्सइकालो'त्ति, कथं ?, रत्नप्रभानारक उत्पत्तौ सर्वबन्धकः तत उद्धृ तश्चानन्तं कालं वनस्पत्यादिषु स्थित्वा पुनस्तत्रैवोत्पद्यमानः सर्वबन्धक इत्येवमुत्कृष्टमन्तरमिति, 'देसबंधंतरं जहन्नेणं अंतोमुहुत्तं'ति, कथं ?, रत्नप्रभानारको देशबन्धकः सन् मृतोऽन्तर्मुहूर्त्तायुः पञ्चेन्द्रियतिर्यकतयोत्पद्य मृत्वा रत्नप्रभानारकतयोत्पन्नः, तत्र च द्वितीयसमये देशबन्धक इत्येवं जघन्यं देशबन्धान्तरमिति, 'उक्कोसेण'मित्यादि, भावना प्रागुक्तानुसारेणेति।

शर्कराप्रभादिनारकाणां वैक्रियशरीरबन्धान्तरमतिदेशतः सङ्क्षेपार्थःमाह-'एवं जावे'त्यादि, द्वितीयादिपृथिवीषु च जघन्या स्थिति क्रमेणैकं त्रीनि सप्त दश सप्तदश द्वाविंशतिश्च सागरोपमाणीति

'पंचिंदिए'त्यादी 'जहा वाउकाइयाणं'ति जघन्येनान्तर्मुहूर्त्तमुत्कृष्टतः पुनरनन्तं कालमित्यर्थः असुरकुमारदयस्तु सहस्रारान्ता देवा उत्पत्तिसमये सर्वबन्धं कृत्वा स्वकीयां च जघन्यस्तितिमनुपाल्य पञ्चेन्द्रियतिर्यक्षु जघन्येनान्तर्मुहूर्त्तायुष्कत्वेन समुत्पद्य मृत्वा च तेष्वेव सर्वबन्धका जाताः, एवं च तेषां वैक्रियस्य जघन्यं सर्वबन्धान्तरं जघन्या तत्स्थितिरन्तर्मुहूर्त्ताधिका वक्तव्या, उत्कृष्टं त्वनन्तं कालं, यथा रत्नप्रभानारकाणामिति, एतद्दर्शनायाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'असुरकुमारे'त्यादि, तत्र जघन्या स्थितिरसुरकुमारादीनां व्यन्तराणां च दश वर्षसहस्राणि ज्योतिष्काणां पल्योपमाष्टभागः सौधर्मादिषु तु 'पलियमहियं दो सार साहिया सत्तदस य चोद्दस य वर्षसहस्राणि ज्योतिष्काणां पल्योपमाष्टभागः सौधर्मादिषु तु 'पलियमहियं दो सार साहिया सत्तदस च चोद्दस य सतरस य' इत्यादि।

आनतसूत्रे 'सव्वबंधंतर'मित्यादि, एतस्य भावना आनतकल्पीयो देव उत्पत्तौ सर्वबन्धकः, स चाष्टादशसागरोपमानि तत्र स्थित्वा ततश्च्युतो वर्षपृथक्त्वं मनुष्येषु स्थित्वा पुनस्तत्रैवोत्पन्नः प्रथमसमये चासौ सर्वबन्धक इत्येवं सर्वबन्धान्तरं जघन्यमष्टादश सागरोपमानि वर्षपृथक्त्वं मनुष्येषु स्थित्वा पुनस्तत्रैवोत्पन्नः प्रथमसमये चासौ सर्वबन्धक इत्येवं सर्वबन्धान्तरं जघन्यमष्टादश सागरोपमानि वर्षपृथक्त्वाधिकानीति, उत्कृष्टं त्वनन्तं कालं, कथं?, स एव सतस्माच्च्युतोऽनन्तं कालं वनस्पत्यादिषु स्थित्वा पुनस्तत्रैवोत्पन्नः प्रथमसमये चासौ सर्वबन्धक इत्येवमिति, 'देसबंधंतरं जहन्नेणं वासुपुहुत्तं'ति, कथं?, स एव देशबन्धकः संश्चयतो वर्षपृथक्त्वं मनुष्यत्वमनुभूय पुनस्तत्रैव गतस्तस्य च सर्वबन्धानन्तरं देशबन्ध इत्येवं सूत्रोक्तमन्तरं भवति, इह च यद्यपि सर्वबन्धसमयाधिकं वर्षपृथक्त्वं भवति तथाऽप तस्य वर्षपृथक्त्वादनर्थान्तरत्वविवक्षया न भेदेन गणनमिति। एवं प्राणतारणाच्युतग्रैवेयकसूतराण्यपि ज्ञेयानि।

अथ सनत्कुमारादिसहस्रारान्ता देवा जघन्यतो नवदिनायुष्केभ्यः आनताद्यच्युतान्तास्तु नवमासायुष्केभ्यः समुत्पद्यन्त इति जीवसमासेऽभिधीयते, ततश्च जघन्यं तत्सर्वबन्धान्तरं तत्तदधिकतज्जघन्यस्थितिरूपं प्राप्नोतीति, सत्यमेतत्, केवलं मतान्तरमेवेदमिति॥ अनुत्तरविमानसूत्रेतु 'उक्कोसेण'मित्यादि, उत्कृष्टं सर्वबन्धान्तरं देशबन्धान्तरं च सङ्ख्यातानि सागरोपमानि, यतो नान्तकालमनुत्तरविमानच्युतः 'संसरति, तानि च जीवसमासमतेन द्विसङ्ख्यानीति।

अथ वैक्रियशरीरदेशबन्धकादीनामल्पत्वादिनिरूपणायाह-'एएसी'त्यादि, तत्र सर्वस्तोका वैक्रियसर्वबन्धकास्तत्कालस्याल्पत्वात्, देशबन्धका असङ्ख्यातगुणास्तत्कालस्य तदपेक्षयाऽसङ्ख्येयगुणत्वात्, अबन्धकास्त्वनन्तगुणाः सिद्धानां वनस्पत्यादीनां च तदपेक्षयाऽनन्तगुणत्वादिति

अथाहारक शरीरप्रयोग बन्धमधिकृत्याह – 'आहारे' त्यादि, 'एगागारे' त्ति एकः प्रकारो नौदारियादिबन्धवदेकेन्द्रियाद्यनेकप्रकार इत्यर्थः, 'सव्वबंदे एक्कं समयं'ति आद्यसमय एव सर्वबन्धभावात्, 'देसबंधे जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं'ति, कथं?, जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तमात्रमेवाहारकशरीरी भवति, परत औदारिकशरीरस्यावश्य ग्रहणात्, तत्र चान्तर्मुहूर्ते आद्यसमये सर्वबन्धः उत्तरकालं च देशबन्ध इति।

अथाहारकशरीरप्रयोगबन्धस्यैवान्तरनिरूपणायाह-'आहारे'त्यादि, 'सव्वबंधंतरं जहन्नेणं अंतोमुहुत्तं'ति, कथं?, मनुष्य आहारकशरीरं प्रतिपन्नस्तत्प्रथमसमये च सर्वबन्धकस्ततोऽन्तर्मुहूर्त्तमात्रं स्थित्वौदारिकशरीरं गतस्तत्राप्यन्तर्मूहूर्त्तं स्थितः, पुनरपि च तस्य संशयादि आहारकशरीरकरणकारणमुत्पन्नं ततः पुनरप्याहारकशरीरं गृह्णाति, तत्र च प्रथमसमये सर्वबन्धक एवेति, एवं च सर्वबन्धान्तरमन्तर्मुहूर्त्तं, द्वयोरप्यन्तर्मुहूर्त्तयोरेकत्वविक्षणादिति, 'उक्कोसेणं अनंतं कालं'ति, कथं?, यतोऽनन्तकालादाहारकशरीरं पुनर्लभत इति, कालानन्त्यमेव विशेषेणाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अनंताओ उस्सप्पिणीओ ओसप्पिणीओ कालओ खेत्तओ अनंता लोग' त्ति, एतद्वयाख्यानं च प्राग्वत् । अथ तत्र पुद्गलपरावर्त्तपरिमाणं किं भवति ? इत्याह–

'अवड्ढं पोग्गलपरियट्टं देसूणं' ति, 'अपार्धम्' अपगतार्द्धमर्द्धमात्रमित्यर्थः 'पुद्गलपरावर्त्त' प्रागुक्तस्वरूपम्, अपार्द्धमप्यर्द्धतः पूर्णं स्यादत आह-देशोनमिति । 'एवं देसबंधंतरंपि' त्ति जघन्येनान्तर्मुहूर्त्तमत्कर्षतः पुनरपार्द्ध पुद्गल- परावर्त्त देशोनं, भावना तु पूर्वोक्तानुसारेणेति ।

अथाहारकशरीरदेशबन्धकादीनामल्पत्वादिनिरूपणायाह- 'एएसि णं' मित्यादि, तत्र सर्वस्तोका आहारकस्य सर्वबन्धकास्तत्सर्वबन्धकालस्याल्पत्वात्, देशबन्धकाः सङ्घयातगुणा स्तद्देशबन्धकालस्य बहुत्वात्, असङ्घयातगुणास्तु ते न भवन्ति, यतो मनुष्या अपि सङ्घयाताः किं पुनराहारकशरीरदेशबन्धकाः ?, अबन्धकास्त्वनन्तगुणाः, आहारकशरीरं हि मनुष्याणां तत्रापि संयतानां तेषामपि केषाञ्चिदेव कदाचिदेव च भवतीत, शेषकाले ते शेषसत्त्वाश्चाबन्धकाः, ततश्च सिद्धवनस्पत्यादिनामन्तगुणत्वादनन्तगुणास्त इति ।

अथ तैजसशरीरप्रयोगबन्धमधिकृत्याह–

**मू. (४२६)** *तेयासरीरप्पयोगबंधे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा पंचविहे पन्नत्ते, तंजहा-एगिंदियतेयासरीरप्पयोगबंधे बेइंदिय० तेइंदिय० जाव पंचिंदियतेयासरीरप्पयोगबंधे ।*

*एगिंदियतेयासरीरप्पयोगबंधे णं भंते ! कइविहे पन्नत्ते ? एवं एएणं अभिलावेणं भेदो जहा ओगाहणसंठाणे जाव पज्जत्तसव्वट्ठसिद्धअनुत्तरोववाइयकप्पातीयवेमानियदेव-पंचिंदियतेयासरीरप्पयोगबंधे य अपज्जत्तसव्वट्ठसिद्धअनुत्तरोववाइयजावबंधे य ।*

*तेयासरीरप्पयोगबंदे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! वीरियसजोगसद्दव्वयाए जाव आउयं च पडुच्च तेयासरीरप्पयोगनामाए कम्मस्स उदएणं तेयासरीरप्पयोगबंधे ।*

*तेयासरीरप्पयोगबंधे णं भंते ! किं देसबंधे सव्वबंधे ?, गोयमा ! देसबंधे नो सव्वबंधे ।*

*तेयासरीरप्पयोगबंधे णं भंते ! कालओ केवचिरं होइ ?, गोयमा ! दुविहे पन्नत्ते, तंजहा- अनाइए वा अपज्जवसिए अनाइए वा सपज्जवसिए ।*

*तेयासरीरप्पयोगबंधंतरे णं भंते ! कालओ केवचिरं होइ ?, गोयमा ! अनाइयस्स अपज्जवसियस्स नत्थि अंतरं, अनाइयस्स सपज्जवसियस्स नत्थि अंतरं ।*

*एएसि णं भंते ! जीवाणं तेयासरीरस्स देसबंधगाणं अबंधगाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा तेयासरीरस्स अबंधगा देसबंधगा अनंतगुणा ४ ।*

**वृ.** 'तेये' त्यादि, 'नो सव्वबंधे' त्ति तैजसरीरस्यानादित्वान्न सर्वबन्धोऽस्ति, तस्य प्रथमतः पुद्गलोपादानरूपत्वादिति । 'अनाइए वा अपज्जवसिए' इत्यादि, तत्रायं तैजसशरीबन्धोऽनादिरपर्यवसितोऽभव्यानां अनादि सपर्यवसितस्तु भव्यानामिति ।

अथ तैजसशरीरप्रयोगबन्धस्यैवान्तरनिरूपणायाह-'तेये' त्यादि, 'अनाइयस्से' त्यादि, यस्मात्संसारस्थो जीवस्तैजसशरीरबन्धेन द्वयरूपेणापि सदाऽविनिर्मुक्त एव भवति तस्माद्-यरूपस्याप्यस्य नास्त्यन्तरमिति । अथ तैजसशरीरदेशबन्धकाबन्धकानामल्पत्वादिनिरूपणाया- 'एएसी' त्यादि, तत्र सर्वस्तोकास्तैजसशरीरस्याबन्धकाः सिद्धानामेव तदबन्धकत्वात्, देशबन्धकास्त्वनन्तगुणास्तद्देश- बन्धकानां सकलसंसारिणां सिद्धेभ्योऽनन्तगुणत्वादिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ कार्म्मणशरीरप्रयोगबन्धमधिकृत्याह—

**मू. (४२७)** *कम्मासरीरप्पयोगबंधे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! अट्ठविहे पन्नत्ते तंजहा-नाणावरनिज्ञकम्मासरीरप्पयोगबंधे जाव अंतराइयकम्मासरीरप्पयोगबंधे।*

*नाणावरनिज्ञकम्मासरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! नाण-पडिणीययाए नाणनिण्हवणयाए नाणंतराएणं नाणप्पदोसेणं नाणच्चासादणाए नाणविसंवादणा-जोगेणं नाणावरनिज्ञकम्मासरीरप्पयोगनामाए कम्मस्स उदएणं नाणावर-निज्ञकम्मासरीरप्पयोगबंधे*

*दरिसणावरनिज्ञकम्मासरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! दंसणपडिणीययाए एवं जहा नाणावरनिज्ञं नवरं दंसणनाम घेत्तव्वं जाव दंसणविसंवादणाजोगेणं दरिसणावरनिज्ञकम्मासरीरप्पयोगनामाए कम्मस्स उदएणं जावप्पओगबंधे।*

*सायावेयनिज्ञकम्मासरीरप्पयोगबंधे णं भंते ! कस्स कम्मस्स उदएणं ?, गोयमा ! पाणाणु-कंपयाए भूयाणुकंपयाए एवं जहा सत्तमसए दसमोद्देसए जाव अपरियावणयाए सायावेयनिज्ञक-म्मासरीरप्पयोगनामाए कम्मस्स उदएणं सायावेयनिकम्मा जाव बंधे।*

*अस्सायावेयनिज्ञपुच्छा, गोयमा ! परदुक्खणयाए परसोयणयाए जहा सत्तमसए दसमोद्दे-सए जाव परियावणयाए अस्सायावेयनिज्ञकम्मा जाव पयोगबंधे।*

*मोहनिज्ञकम्मासरीरप्पयोगपुच्छा, गोयमा ! तिव्वकोहयाए तिव्वमाणयाए तिव्वमायाए तिव्वलोभाए तिव्वदंसणमोहनिज्ञयाए तिव्वचरित्तमोहनिज्ञयाए मोहनिज्ञकम्मासरीरजाव-पयोगबंधे।*

*नेरइयाउयकम्मासरीरप्पयोगबंधे णं भंते ! पुच्छा, गोयमा ! महारंभयाए महापरिग्गहयाए कुणिमाहारेणं पंचिंदियवहेणं नेरइयाउयकम्मासरीरप्पयोगनामाए कम्मस्स उदएणं नेरइया-उयकम्मासरीर जाव पयोगबंधे।*

*तिरिक्खजोनियाउयकम्मासरीरप्पओगपुच्छा, गोयमा ! माइल्लियाए नियडिल्लयाए अलियवयणेणं कूडलकूडमाणेणं तिरिक्खजोनियकम्मासरीरजावपयोगबंधे । मणुस्सा-उयकम्मासरीरपुच्छा, गोयमा ! पगइभद्दयाए पगइविणीययाए साणुक्कोसयाए अमच्छरियाए मणुस्साउयकम्मा जावपयोगबंधे।*

*देवाउयकम्मासरीरपुच्छा, गोयमा ! सरागसंमेणं संजमासंजमेणं बालतवोकम्मेणं अकामनिज्ञराए देवाउयकम्मासरीर जावपयोगबंधे।*

*सुभनाकम्मासरीरपुच्छा, गोयमा ! कायउज्जुययाए भावुज्जुययाए भासुज्जुययाए अविसंवाद-णजोगेणं सुभनामकम्मासरी रजावप्पयोगबंधे ॥*

*असुभनामकम्मासरीरपुच्छा, गोयमा ! कायअणुज्जुययाए भवअणुज्जुययाए भासअणु-ज्जुययाए विसंवायणायोगेणं असुभनामकम्माजाव पयोगबंधे।*

*उच्चागोयकम्मासरीरपुच्छा, गोयमा ! जातिअमदेणं कुलअमदेणं बलअमदेणं रूवअमदेणं तवअमदेणं सुयअमदेणं लाभअमदेणं इस्सरियअमदेणं उच्चागोयकम्मासरीरजाव पयोगबंधे, नीयागोयकम्मासरीरपुच्छा, गोयमा ! जातिमदेणं कुलमदेणं बलमदेणं जाव इस्सरियमदेणं नीयागोयकम्मासरीरजावपयोगबंधे।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अंतराइयकम्मासरीरपुच्छा, गोयमा! दानंतराएणं लाभंतराएणं भोगंतराएणं उवभोगंतराएणं वीरियंतराएणं अंतराइयकम्मासरीरप्पयोगनामाए कम्मस्स उदएणं अंतराइयकम्मासरीरप्पयोगबंधे।*

*नाणावरनिज्ञकम्मासरीरप्पयोगबंधे णं भंते! किं देसबंधे?, गोयमा! देसबंधेनो सव्वबंधे, एवं जाव अंतराइयकम्मा०। नाणावरनिज्ञकम्मासरीरप्पयोगबंधे णं भंते! कालओ केवच्चिरं होइ?, गोयमा! नाणा० दुविहे पन्नत्ते, तंजहा-अनाइए सपज्जवसिए अनाइए अपज्जवसिए वा एवं जहा तेयगस्स सचिट्ठणा तहेव एवं जाव अंतराइयकम्मस्स। नाणावरनिज्ञ- कम्मासरीरप्पयोगबंधंतरे णं भंते! कालओ केवच्चिरं होइ?, गोयमा! अनाइयस्स एवं जहा तेयगसरीरस्स अंतरं तहेव एवं जाव अंतराइयस्स।*

*एएसि णं भंते! जीवाणं नाणावरनिज्ञस्स कम्मस्स देसबंधगाणं अबंधगाण य कयरे २ जाव अप्पाबहुगं जहा तेयगस्स, एवं आउयवज्जं जाव अंतराइयस्स। आउयस्स पुच्छा, गोयमा! सव्वत्थोवा जीवा आउयस्स कम्मस्स देसबंधगा अबंधगा संखेज्जगुणा ५।*

**वृ.** 'कम्मासरीरे'त्यादि, 'नाणपडिणीययाए'त्ति ज्ञानस्य-श्रुतादेस्तदभेदात् ज्ञानवतां वा या प्रत्यनीकता-सामान्येन प्रतिकूलता सा तथा तया, 'माणनिण्हवणयाए'त्ति ज्ञानस्य-श्रुतस्य श्रुतगुरूणां वा या निह्नवता-अपलपनं सा तथा तया।

'नाणंतराएणं'ति ज्ञानस्य-श्रुतस्यान्तरायः-तद्ग्रहणादौ विघ्नो यः स तथा तेन, 'नाणपओसेणं'ति ज्ञाने-श्रुतादौ ज्ञानवस्तु वा यः प्रद्वेषः-अप्रीति-तद्ग्रहणादौ विघ्नो यः स तथा तेन, 'नाणपओसेणं'ति ज्ञाने-श्रुतादौ ज्ञानवस्तु वा यः प्रद्वेषः-अप्रीति स तथा तेन, 'नाणऽच्चासायणाए'त्ति ज्ञानस्य ज्ञानिनां वा याऽत्याशातना-हीलना सा तथा तया।

'नाणविसंवायणाजोगेणं'ति ज्ञानस्य ज्ञानिनां वा विसंवादनयोगो-व्यभिचारदर्शनाय व्यापारो यः स तथा तेन, एतानि च बाह्यानि कारणानि ज्ञानावरणीयकार्म्मणशरीरबन्धे, अथाऽऽन्तरं कारणमाह– 'नाणावरनिज्ञ'मित्यादि, ज्ञानावरणीयहेतुत्वेन ज्ञानावरणीयलक्षणं यत्कार्म्मणशरीरप्रयोगनाम तत्तथा तस्य कर्म्मण उदयेनेति।

'दंसणपडिणीययाए'त्ति इह दर्शनं-चक्षुर्दर्शनादि, 'तिव्वदंसणमोहनिज्ञयाए'त्ति तीव्रमिथ्यातत्वयेत्यर्थः।

'तिव्वचरित्तमोहनिज्ञयाए'त्ति कषायव्यतिरिक्तं नोकषायलक्षणमिह चारित्रमोहनीयं ग्राह्यं, तीव्रक्रोधतयेत्यादिना कषायचारित्रमोहनीयस्य प्रागुक्तत्वादिति।

'महारंभयाए'त्ति अपरिमितमकृष्याद्यारम्भतयेत्यर्थः, 'महारंभपरिग्गहयाए'त्ति अपरिमाणपरिग्रहतया 'कुणिमाहारेणं'ति मांसंभोजनेनेति 'माइल्लायए'त्ति परवञ्चनबुद्धिवत्तया 'नियडिल्लायए'निकृति-वञ्चनार्थं चेष्टा मायाप्रच्छादनार्थं मायान्तरमित्येके अत्यादरकरणेन परवञ्चनमित्ये तद्वत्तया, 'पगइभद्दयाए'त्ति स्वभावतः परानुतापितया 'साणक्कोसयाए'त्ति सानुकम्पतया 'अमच्छरियाए'त्ति मत्सरिकः-परगुणानामसोढा तद्भावनिषेधोऽमत्सरिकता तया।

'सुभनामकम्मे'त्यादि, इह शुभनाम देवगत्यादिकं 'कायउज्जुययाए'त्ति कायर्जुकतया परावञ्चनपरकायचेष्टया 'भावुज्जुययाए'त्ति भावर्जुकतया परावञ्चनपरमनःप्रवृत्येत्यर्थः, 'भासुज्जु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ययाए'त्ति भाषर्जुकतया भाषाऽऽर्जवेनेत्यर्थः 'अविसंवायणाजोगेणं'ति विसंवादनं-अन्यथा-प्रतिपन्नस्यान्यथाकरणं तद्रूपो योगो-व्यापारस्तेन वा योगः-सम्बन्धो विसंवादनयोगस्तन्निषेधादविसंवादनयोगस्तेन, इह च कायर्जुकतादित्रयं वर्त्तमानकालाश्रयं, अविसंवादनयोगस्त्वतीतवर्त्मानलक्षणकालद्वयाश्रय इति ।

'असुभनामकम्मे'त्यादि, इह चाशुभनाम नरकगत्यादिकम् ।

'कम्मासरीरप्पयगबंधे णं'मित्यादि, कार्म्मणशरीरप्रयोगवन्धप्रकरणं तैजसशरीरप्रयोगबन्धप्रकरणवन्नेयं, यस्तु विशेषोऽसावुच्यते-'सव्वत्थोवा आउयस्स कम्मस्स देसबंधग'त्ति, सर्वस्तोकत्वमेषामायुर्वन्धद्धायाः स्तोकत्वादवन्ध्धायास्तु बहुगणत्वात्, तदवन्धकाः सङ्ख्यातगुणाः, नन्वसङ्ख्यातगुणास्तदवन्धकाः कस्मान्नोक्ताः ? तदवन्धाद्धाया असङ्ख्यातजीवितानाश्रित्यासङ्ख्यातगुणत्वात्, उच्यते, इदमनन्तकायिकानाश्रित्य सूत्रं, तत्र चानन्तकायिकाः सङ्ख्यात-जीविता एव, ते चायुष्कस्यावन्धकास्तद्देशबन्धकेभ्यः सङ्ख्यातगुणा एव भवन्ति ।

यद्यवन्धकाः सिद्धादयस्तन्मध्ये क्षिप्यन्ते तथाऽपि तेभ्य- सङ्ख्यातगुणा एव ते, सिद्धाद्यवन्धकानामनन्तानामप्यननन्तकायिकायुर्वन्धकापेक्षयाऽनन्तभागत्वादिति ।

ननु यदायुषोऽवन्धकाः सन्तो बन्धका भवन्ति तदा कथं न सर्वबन्धसम्भवस्तेषाम् ?, उच्यते, न हि आयुःप्रकृतिरसती सर्वातैर्निबध्यते औदारिकादिशरीरवदिति न सर्वबन्धसाम्भव इति । प्रकारान्तरेणौदारिकादि चिन्तयन्नाह–

**मू. (४२८)** *जस्स णं भंते ! ओरालियसरीरस्स सव्वबंधे से णं भंते ! वेउव्वियसरीरस्स किं वंधए अबंधए ?, गोयमा ! नो बंधए अबंधए, आहारगसरीरस्स किं बंधए अबंधए ?, गोयमा ! नो बंधए अबंधए, तेयासरीरस्स किं बंधए अबंधए ?, गोयमा ! बंधए नो अबंधए,*

*जइ बंधइ किं देसबंधए सव्वबंधए ?, गोयमा ! देसबंधए नो सव्वबंधए, कम्मासरीरस्स किं वंधए अबंधए ?, जहेव तेयगस्स जाव देसबंधए नो सव्वबंधए ।*

*जस्स णं भंते ! ओरालियसररस्स देसबंधे से णं भंते ! वेउव्वियसरीरस्स किं वंधए अबंधए गोयमा ! नो बंधए अबंधए, एवं जहेव सव्वबंधेणं भनियं तहेव देसबंधेणवि भानियव्वं जाव कम्मगस्स णं ।*

*जस्स णं भंते ! वेउव्वियसरीरस्स सव्वबंधए से णं भंते ! ओरालियसरीरस्स किं बंधए अबंधए ?, गोयमा ! नो बंधए अबंधए, आहारगसरीरस्स एवं चेव, तेयगस्स कम्मगस्स य जहेव ओरालिएणं समं भनियं तहेव भानियव्वं जाव देसबंधए नो सव्वबंधए ।*

*जस्स णं भंते ! वेउव्वियसरीरस्स देसबंधे से णं भंते ! ओरालियसरीरस्स किं बंधए अबंधए ?, गोयमा ! नो बंधए अबंधए, एवं जहा सव्वबंधेणं भनियं तहेव देसबंधेणवि भानियव्वं जाव कम्मगस्स ।*

*जस्स णं भंते ! आहारगसरीरस्स सव्वबंधे से णं भंते ! ओरालियसरीरस्स किं बंधए अबंधए ?, गोयमा ! नो बंधए अबंधए, एवं वेउव्वियस्सवि, तेयाकम्माणं जहेव ओरालिएणं समं भनियं तहेव भानियव्वं ।*

*जस्स णं भंते ! आहारगसरीरस्स देसबंधे से णं भंते ! ओरालियसरीर० एवं जहा आहार-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गसरीरस्स सव्वबंधेणं भनियं तहा देसबंधेणवि भानियव्वं जाव कम्मगस्स।*

*जस्स णं भंते! तेयासरीरस्स देसबंधे से णं भंते! ओरालियसरीरस्स किं बंधइ अबंधए गोयमा! बंधए वा अबंधए वा, जइ बंधए किं देसबंधए सव्वबंधए?, गोयमा! देसबंधए वा सव्वबंधए वा, वेउव्वियसरीरस्स किं बंधए अबंधए? एवं चेव, एवं आहारगसरीरस्सवि, कम्मगसरीरस्स किं बंधए अबंधए?, गोयमा! बंधए नो अबंधए, जइ बंधए किं देसबंधए सव्वबंधए?, गोयमा! देसबंधए नो सव्वबंधए।*

*जस्स णं भंते! कम्मगसरीरस्स देसबंधे से णं भंते! ओरालियसरीरस्स जहा तेयगस्स वत्तव्वया भनिया तहा कम्मगस्सवि भानियव्वा जाव तेयासरीरस्स जाव देसबंधए नो सव्वबंधए*

**वृ.** 'जस्से' त्यादि, 'नो बंधए' त्ति, न ह्येकसमये औदारिकवैक्रियबोर्बन्धो विद्यत इतिकृत्वा नो बन्धक इति। एवमाहारकस्यापि। तैजसस्य पुनः सदैवाविरहितत्वाद्बन्धको देशबन्धकेन, सर्वबन्धस्तु नास्त्येव तस्येति। एवं कार्म्मणशरीरस्यापि वाच्यमिति। एवमौदारिकसर्वबन्धमाश्रित्य शेषाणां बन्धचिन्तार्थः अनन्तरं दण्डक उक्तोऽथौदारिकस्यैव देशबन्धकमाश्रित्यान्यमाह-

'जस्स ण' मित्यादि, अथ वैक्रियस्य सर्वबन्धमाश्रित्य शेषाणां बन्धचिन्तार्थोऽन्यो दण्डकः, तत्र च 'तेयगस्स कम्मगस्स जहेवे' त्यादि, यथौदारिकशरीरसर्वबन्धकस्य तैजसकार्म्मणयोर्देशबन्धकत्वमुक्तमेवं वैक्रियशरीरसर्वबन्धकस्यापि तयोर्देशन्धकत्वं वाच्यमिति भावः।

वैक्रियदेशबन्धदण्डक आहारकस्य सर्वबन्धदण्डको देशबन्धदण्डकश्च सुगम एव। तैजसदेशबन्धकदण्डके तु 'बंधए वा अबंधए व' त्ति तैजसदेशबन्धक औदारिकशरीरस्य बन्धको वा स्यादबन्धको वा, तत्र विग्रहे वर्त्तमानोऽबन्धकोऽविग्रहस्थः पुनर्बन्धकः स एवोत्पत्तिक्षेत्र-प्राप्तिप्रथमसमये सर्वबन्धक द्वितीयादौ तु देशबन्धक इति, एवं कार्म्मणशरीरदेशबन्धकदण्डकेऽपि वाच्यमिति।

अथौदारिकादिशरीरदेशबन्धकादीनामल्पत्वादिनिरूपणायाह-

**मू. (४२९)** *एएसि णं भंते! सव्वजीवाणं ओरालियवेउव्वियआहारगतेयाकम्मासरीरगाणं देसबंधगाणं सव्वबंधगाणं अबंधगाण य कयरे २ जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा जीवा आहारगसरीरस्स सव्वबंधगा १ तस्स चेव देसबंधगा संखेज्ज़गुणा २ वेउव्वियसरीरस्स सव्वबंधगा असंखेज्जगुणा ३ तस्स चेव देसबंधगा असंखेज्ज़गुणा ४ तेयाकम्मगाणं दुण्हवि तुल्ला अबंधगा अनंतगुणा ५।*

*—ओरालियसरीरस्स सव्वबंधगा अनंतगुणा ६ तस्स चेव अबंधगा विसेसाहिया ७ तस्स चेव देसबंधगा असंखेज्ज़गुणा ८ तेयाकम्मगाणं देसबंधगा विसेसाहिया ९ वेउव्वियसरीरस्स अबंधगा विसेसाहिया १० आहारगसरीरस्स अबंधगा विसेसाहिया ११। सेवं भंते! २।*

**वृ.** 'एएसी' त्यादि, तत्र सर्वस्तोका आहारकशरीरस्य सर्वबन्धकाः यस्मात्ते चतुर्दश-पूर्वधरास्तथाविधप्रयोजनवन्त एव भवन्ति, सर्वबन्धकालश्च समयमेवेति, तस्यैव च देशबन्धकाः सङ्ख्येयगुणाः, देशबन्धकालस्य बहुत्वात्, वैक्रियशरीरस्य सर्वबन्धका असङ्ख्येयगुणा-, तेषां तेभ्योऽ सङ्ख्यातगुणत्वात्, तस्यैव च देशबन्धका असङ्ख्येयगुणाः, सर्वबन्धाद्धापेक्षया देशबन्धा-द्धाया असङ्ख्यातगुणत्वात्, अथवा सर्वबन्धकाः प्रतिपद्यमानकाः देशबन्धकास्तु पूर्वप्रतिपन्नाः, प्रतिपद्यमानकेभ्यश्च पूर्वप्रतिपन्नानां बहुत्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैक्रियसर्वबन्धकेभ्यो देशबन्धका असङ्ख्येयगुणाः, तैजसकार्म्मणयोरबन्धका अनन्तगुणाः, यस्मात्ते सिद्धास्ते च वैक्रियदेशबन्धकेभ्योऽनन्तगुणा एव, वनस्पतिवर्जसर्वजीवेभ्यः सिद्धानामनन्तगुणत्वादिति, औदारिकशरीरस्य सर्वबन्धका अनन्तगुणास्ते च वनस्पतिप्रभृतीन् प्रतीत्य प्रत्येतव्याः, तस्यैव चाबन्धका विशेषाधिकाः, एते हि विग्रहगतिकाः सिद्धादयश्च भवन्ति, तत्र च सिद्धादीनामत्यन्ताल्पत्वेनेहाविवक्षा, विग्रहगतिकाश्च वक्ष्यमाणन्यायेन सर्वबन्धकेभ्यो बहुतरा इति तेभ्यस्तदबन्धका विशेषाधिका इति ।

तस्यैव चौदारिकस्य देशबन्धका असङ्ख्यातगुणाः, विग्रहाद्धापेक्षया देशबन्धाद्धाया असङ्ख्यातगुणत्वात्, तेजसकार्म्मणयोर्देशबन्धका विशेषाधिकाः, यस्मात्सर्वेऽपि संसारिणस्तैजसकार्म्मणयोर्देशबन्धका भवन्ति, तत्र च ये विग्रहगतिका औदारिकसर्वबन्धका वैक्रियादिबन्धकाश्च ते औदारिकदेशबन्धकेभ्योऽतिरिच्यन्त इति ते विशेषाधिका इति, वैक्रियशरीरस्याबन्धका विशेषाधिकाः, यस्माद्वैक्रियस्य बन्धकाः प्रायो देवनारका एव शेषास्तु तदबन्धकाः सिद्धाश्च, तत्र च सिद्धास्तैजसादिदेशबन्धकेभ्योऽतिरिच्यन्ते इति ते विशेषाधिका उक्ताः ।

आहारकशरीरस्याबन्धका विशेषाधिका यस्मान्मनुष्याणामेवाहारकशरीरं वैक्रियं तु तदन्येषामपि, तोत वैक्रियबन्धकेभ्य आहारकबन्धकानां स्तोकत्वेन वैक्रियाबन्धकेभ्य आहारकाबन्धका विशेषाधिका इति ।

–इहाल्पबहुत्वाधिकारे वृद्धा गाथा एवं प्रपञ्चितवन्तः–

॥ १ ॥ ओरालसव्वबंधा थोवा अब्बंधया विसेसहिया ।
तत्तो य देसबंधा असंखगुनिया कहं नेया ॥

॥ २ ॥ पढमंमि सव्वबंधो समए सेसेसु देसबंधो उ ।
सिद्धाईण अबंधो विग्गहगइयाण य जियाणं ॥

॥ ३ ॥ इह पुण विग्गहिए च्चिय पडुच्च भनिया अबंधगा अहिया ।
सिद्धा अनंतभागंमि सव्वबन्धाणवि भवन्ति ॥

॥ ४ ॥ उजुयाय एगवंका एगवंका दुहओवंका गई भवे तिविहा ।
पढमाइ सव्वबंधा सव्वे बीयाइ अद्धं तु ॥

॥ ५ ॥ तइयाइ तइयभंगो लब्भइ जीवाण सव्वबंधाणं ।
इति तिन्नि सव्वबंधा रासी तिन्नेव य अबंधा ॥

॥ ६ ॥ रासिप्पमाणओ ते तुल्लाऽबंधा य सव्वबंधा य ।
संखापमाणओ पुण अबंधगा पुण जहब्भहिया ॥

॥ ७ ॥ जे एगसमइया ते एगनिगोदंभि छद्दिसिं एंति ।
दुसमइया तिपयरिया तिसमईया सेसलोगाओ ॥

॥ ८ ॥ तिरियाययं चउद्दिसि पयरमसंखप्पएसबाहल्लं ।
उड्ढं पुव्वावरदाहिणुत्तरायया य दो पयरा ॥

॥ ९ ॥ जे तिपयरिया ते छद्दिसिएहिंतो भवंतऽसंखगुणा ।
सेसावि असंखगुणा खेत्तासंखेज्जगुनियत्ता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१०॥ एवं विसेसअहिया अबंधया सव्वबंधएहिं तो।
तिसमइयविग्गहं पुण पडुच्च सुत्तं इमं होइ॥
॥११॥ चउसमयविग्गहं पुण संखेज्जगुणा अबंधगा होंति।
एएसिं निदरिसणं ठवणारासीहिं वोच्छामि॥
॥१२॥ पढमो होइ सहस्सं दुसमइया दोवि लक्खमेक्केक्कं।
तिसमइया पुण तिन्निवि रासी कोडी भवेक्केक्का॥
॥१३॥ एएसिं जहसंभवमत्थोवणयं करेज्ज रासीणं।
एत्तो असंखगुनिया वोच्छं जह देसबंधा से॥
॥१४॥ एगो असंखभागो वट्टइ उववट्टणोववायम्मि।
एगनिगोए निच्चं एवं सेसेसुवि स एव॥
॥१५॥ अंतोमुहुत्तमेत्ता ठिई निगोयाण जं विनिद्दिट्ठा।
पल्लट्टंति निगोया तम्हा अंतोमुहुत्तेणं॥
॥१६॥ तेसिं ठितिसमयाणं विग्गहसमया हवंति जइभागे।
एवतिभागे सव्वे विग्गहिया सेसजीवाणं॥
॥१७॥ सव्वेवि य विग्गहिया सेसाणं जं असंखभागंमि।
तेणासंखगुणा देसबंधयाऽबंधएहिंतो॥
॥१८॥ वेउव्वियआहारगतेयाकम्माइं पढियसिद्धाइं।
तहवि विसेसो जो जत्थ तत्थ तं तं भणीहामि॥
॥१९॥ वेउव्वियसव्वबंधा थोवा जे पढमसमयदेवाई।
तस्सेव देसबंधा असंखगुनिया कहं के वा॥
॥२०॥ तेसिं चिय जे सेसा ते सव्वे सव्वबंधए मोत्तुं।
होंति अबंधाणंता तव्वज्जा सेसजीवा जे॥
॥२१॥ आहारसव्वबंधा थोवा दो तिन्नि पंच वा दस वा।
संखेज्जगुणा देसे ते उ पुहुत्तं सहस्साणं॥
॥२२॥ तव्वज्जा सव्वजिया अबंधया ते हवंतऽनंतगुणा।
थोवा अबन्धया तेयगस्स संसारमुक्का जे॥
॥२३॥ सेसा य देसबंधा तव्वज्जा ते हवतऽणंतगुणा।
एवं कम्मगभेयावि नवरि नाणत्तमाउम्मि॥
॥२४॥ थोवा आउयबंधा संखेज्जगुणा अबंधया होंति।
तेयाकम्माणं सव्वबंधगा नत्थऽणाइत्ता॥
॥२५॥ अस्संखेज्जगुणा आउगस्स किमबंधगा न भन्नंति।
जम्हा असंखभागो उव्वट्टइ एगसमएणं॥
॥२६॥ भन्नइ एगसमइओ कालो उव्वट्टणाइ जीवाणं।
बंधणकालो पुण आउगस्स अंतोमुहुत्तो उ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२७॥ जीवा ठिईकाले आउयबंधद्धमाइए लद्धं ।
एयइभागे आउस्स बंधया सेसजीवाणं ॥
॥२८॥ जं संखेज्ञतिभागो ठिइकालस्साउबंधकालो उ ।
तम्हाऽसंखगुणा से अबंधया बंधएहिंतो ॥
॥२९॥ संजोगप्पबहुयं आहारगसव्वबंधगा थोवा ।
तस्सेव देसबंधा संखगुणा ते य पुव्वुत्ता ॥
॥३०॥ तत्तो वेउव्वियसव्वबंधगा दरिसिया असंखगुणा ।
जमसंखा देवाई उववज्ञंतेगसमएणं ॥
॥३१॥ तस्सेव देसबंधा असंखगुनिया हवंति पुव्वुत्ता ।
तेयगकम्माबंधा अनंतगुनिया य ते सिद्धा ॥
॥३२॥ तत्तो उ अनंतगुणा ओरालियसव्वबंधगा होंति ।
तस्सेव ततोऽबंधा य देसबंधा य पुव्वुत्ता ॥
॥३३॥ तत्तो तेयगकम्माणं देसबंधा भवे विसेसहिया ।
ते चेवोरालियदेसबंधगा होंतिमे वऽन्ने ॥
॥३४॥ जे तस्स सव्वंबंधा अबंधग जे य नेरइयदेवा ।
एएहिं साहिया ते पुणाइ के सव्वसंसारी ॥
॥३५॥ वेउव्वियस्स तत्तो अबंधगा साहिय विसेसेणं ।
ते चेव य नेरइयाइविरहिया सिद्धसंजुत्ता ॥
॥३६॥ आहारगस्स तत्तो अबंधगा साहिया विसेसेणं ।
ते पुण के ? सव्वजीवा आहारगलद्धिए मोत्तुं ॥

इहौदारिकसर्वबन्धादीनामल्पत्वादिभावनार्थं सर्वबन्धादिस्वरूपं तावदुच्यते-इह ऋजुगत्या विग्रहगत्या चोत्पद्यमानानां जीवानामुत्पत्तिक्षेत्रप्राप्तिप्रथमसमये सर्वबन्धो भवति, द्वितीयादिषु तु देशबन्धः, सिद्धादीनामित्यत्रादिशब्दाद्वैक्रियादिबन्धकानां च जीवानामौदारिकस्याबन्धः, इह च सिद्धादीनामबन्धकत्वेऽप्यत्यन्ताल्पत्वेनाविवक्षणाद्वैग्रहिकानेव प्रतीत्य सर्वबन्धकेभ्योऽबन्धका विशेषाधिका उक्ता इति ॥ १-२ ॥

एतदेवाह-साधारणेष्वपि सर्वबन्धभावात्सर्वबन्धकाः सिद्धेभ्योऽनन्तगुणाः, यत एवं ततः सिद्धास्तेषामनन्तभागे वर्त्तन्ते, यदि च सिद्धा अपि तेषामनन्तभागे वर्त्तन्ते तदा सुतरां वैक्रियबन्धकादय इति प्रतीयन्त, एव ततश्च तान् विहायैव सिद्धपदमेवाधीतमिति ॥ ३ ॥

अथ सर्वबन्धकानामबन्धकानां च समताभिधानपूर्वकमबन्धकानां विशेषाधिकत्वमुपदर्शयितुमाह-ऋज्वायतायां गतौ सर्वबन्धका एवाद्यसमये भवन्त्येवमेकस्तेषां राशिः, एकवक्रया ये उत्पद्यन्ते तेषां ये प्रथमे समये तेऽबन्धका द्वितीये तु सर्वबन्धका इत्येवं तेषां द्वितीयो राशि, स चैकवक्राभिधानद्वितीयगत्योत्पद्यमानानामर्द्धभूतो भवतीति, द्विवक्रया गत्या ये पुनरुत्पद्यन्ते ते आद्ये समयद्वयेऽबन्धकास्तृतीये तु सर्वबन्धकाः, अयं च सर्वबन्धकानां तृतीयो राशिः, स च द्विवक्राभिधानतृतीयगत्योत्पद्यमानानां त्रिभागभूतो भवति, तृतीयसमयभावित्वात्तस्य,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च त्रयः सर्वबन्धकानां राशयः त्रय एव चाबन्धकानां, समयभेदेन राशिभेदादिति, एवं च ते राशिप्रमाण- तस्तुल्य यद्यपि भवन्ति तथाऽपि सङ्ख्यातप्रमाणतोऽधिका अबन्धका भवन्ति ॥ ४-५-६ ॥

ते चैवम्-ये एकसमयिका ऋजुगत्योत्पद्यमानका इत्यर्थः ते एकस्मिन्निगोदे-साधारणशरीरे लोकमध्यस्थिते षड्भ्यो दिग्भ्योऽनुश्रेण्याऽऽगच्छन्ति, ये पनुर्द्विसमयिका एकवक्रगत्योत्पद्यमाना इत्यर्थः ते त्रिप्रतरिकाः-प्रतर त्रयादागच्छन्ति, विदिशो वक्रेणाऽऽगमनात्, प्रतरश्च वक्ष्यमाणस्वरूप, ये पुनस्त्रिसमयिकाः-समयत्रयेण वक्रद्वयेन चोत्पद्यमानकस्ते शेषलोकात् प्रतरत्रयातिरिक्तलोका-दागच्छन्तीति ॥ ७ ॥

प्रतरप्ररूपणायाह-लोकमध्यगतैकनिगोदमधिकृत्य तिर्यगायतश्चतसृषु दिक्षु प्रतरः कल्प्यते, असङ्ख्येयप्रदेशबाहल्यो-विवक्षितनिगोदोत्पादकालोचितावगाहनाबाहल्य इत्यर्थः तन्मात्रबाहल्यावेव 'उड्ढे'ति ऊर्द्धाधोलोकान्तगतौ पूर्वापरायतो दक्षिणोत्तरायतश्चेति द्वौ प्रतराविति ॥ ८ ॥

अथाधिकृतमल्पबहुत्वमुच्यते-ये जीवास्त्रिप्रतरिका एकवक्रया गत्योत्पत्तिमन्तस्ते षड्दिग्भ्यः-ऋजुगत्या षड्भ्यो दिग्भ्यः सकाशाद् भवन्त्यसङ्ख्येयगुणाः, शेषा अपि ते त्रिसमयिकाः शेषोलाकादागतास्तेऽप्यसख्येयगुणा भवन्ति, कुतः ?, क्षेत्रामङ्ख्यगनितत्वाद्, यतः षडदिक्-क्षेत्रात्त्रिप्रतरमसङ्ख्येयगुणं ततोऽपि शेषलोक इति ॥ ९ ॥

ततः किम् ? इत्याह-वक्रद्वयमाश्रित्येदं सूत्रमित्यर्थः ॥ १० ॥

प्रथम ऋजुगत्युत्पन्नसर्वबन्धकराशि सहं परिकल्पितं, क्षेत्रस्याल्पत्वात्, द्विसमयोत्पन्नानां द्वौ राशी, एकोऽबन्धकानामन्यः सर्वबन्धकानां, तौ च प्रत्येकं लक्षमानौ, तत्क्षेत्रस्य बहुतरत्वात्, ये पुनस्त्रिभिःसमयैरुत्पद्यन्ते तेषां त्रयो राशयः, तत्र चाद्ययोः समययोरबन्धकौ द्वौ राशी तृतीयस्तु सर्वबन्धको राशिः, ते च त्रयोऽपि प्रत्येकं कोटीमानास्तत्क्षेत्रस्य बहुतमत्वादिति, तदेवं राशित्रयेऽपि सर्वबन्धकाः सहस्रं लक्षं कोटी चेत्येवं सर्वस्तोकाः, अबन्धकास्तु लक्षंकोटीद्वयं चेत्येवं विशेषाधिकास्त इति ॥ १२ ॥

अनेन च गाथाद्वयेनोद्वर्त्तनाभणनाद्विग्रह समय सम्भवः, अन्तर्मुहूर्त्तान्ते परिवर्त्तना-भणनाच्चनिगोद- स्थितिसमयमानमुक्तं, ततश्च अयमर्थः-॥ १३-१४ ॥

तेषामेव वैक्रियबन्धकानां सर्वबन्धकान् मुक्त्वा ये शेषास्ते सर्वे वैक्रियस्य देशबन्धका भवन्ति, तत्र च सर्वबन्धकान् मुक्त्वेलेन कथमित्यस्य निर्वचनमुक्तं, ये शेषा इत्यनेन तु के वेत्यस्येति, अबन्धकास्तु तस्यानन्ता भवन्ति, ते च के ?, ते तद्वर्जा-वैक्रियसर्वदेशबन्धकवर्जाः शेषजीवास्ते चौदारिकादिबन्धकाः देवादयश्च वैग्रहिका इति ॥ २१ ॥

'तद्वर्जा' आहारकबन्धवर्जा सर्वजीवा अबन्धका इत्याहारकाबन्धस्वरूपमुक्तं, ते च पूर्वेभ्योऽनन्तगुणा भवन्ति ॥ २२-२४ ॥

सङ्ख्यातगुणा आयुष्काबन्धका इति यदुक्तं तत्र प्रश्नयन्नाह-एकोऽसङ्ख्यभागो निगोदजीवानां सर्वदोद्वर्त्तते, स च बद्धायुषामेव, तदन्येषामुद्वर्त्तनाऽभावात्, तेभ्यश्च ये शेषास्तेऽब-द्धायुषः, ते च तदपेक्षयाऽसङ्ख्यातगुणा एवेत्येवमसङ्ख्यगुणा आयुष्काबन्धकाः स्युरिति ॥ २५

अत्रोच्यते, निगोदजीवभवकालपेक्षया तेषामायुर्बन्धकालः सङ्ख्यातभागवृत्तिरित्यबन्धकाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ख्यातगुणा एव। एतदेव भाव्यते-निगोदजीवानां स्थितिकालोऽन्तर्मुहूर्त्तमानः, स च कल्पनया समयलक्षं, तत्र 'आयुर्बन्धाद्धया' आयुर्बन्धकालेनान्तर्मुहूर्त्तमानेनैव कल्पनया समयसहस्रलक्षणेन भाजिते सति यल्लब्धं कल्पनया शतरूपं एतावति भागे वर्त्तन्ते आयुर्बन्धकाः 'सेसजीवाणं'ति शेषजीवानं तदबन्धकानामित्यर्थः, तत्र किल लक्षापेक्षया शतं सङ्ख्येयतमो भागोऽतो बन्धकेभ्योऽन्धकाः सङ्ख्येयगुणा भवन्तीति ॥ २६-२७ ॥

एतदेव भाव्यते ॥ २८ ॥ समासोऽयं बन्धः ॥

शतकं-८ उद्देशकः-९ समाप्त

## —: शतकं-८ उद्देशकः-१० :—

**वृ.** अनन्तरोद्देशके बन्धादयोऽर्था उक्ताः, तांश्च श्रुतशीलसंपन्नाः पुरुषा विचारयन्तीति श्रुतादिसंपन्नपुरुषप्रभृतिपदार्थःविचारणार्थो दशम उद्देशकः, तस्य चेदमादिसूत्रम्-

**मू. (४३०)** *रायगिहे नगरे जाव एवं वयासी-अन्नउत्थिया णं भंते! एव माइक्खंति जाव एवं परूवेंति-एवं खलु सीलं सेयं १ सुयं सेयं २ सुयं सेयं ३ सीलं सेयं ४, से कहमेयं भंते! एवं?, गोयमा! जन्नं ते अन्नउत्थिया एवमाइक्खंति जाव जे ते एवमाहंसु मिच्छा ते एवमाहंसु, अहं पुण गोयमा! एवमाइक्खामि जाव परुवेमि।*

*एवं खलु मए चत्तारि पुरिसजाया पन्नत्ता, तंजहा-सीलसंपन्ने नामं एगे नो सुयसंपन्ने १ सुयसंपन्ने नामं एगे नो सीलसंपन्ने २ एगे सीलसंपन्नेवि सुयसंपन्नेवि ३ एगे नो सीलसंपन्ने नो सुयसंपन्ने ४।*

*तत्थ णं जे से पढमे पुरिसजाए से णं पुरिसे सीलवं असुयवं, उवरए अविन्नायधम्मे, एस णं गोयमा! मए पुरिसे देसाराहए पन्नत्ते।*

*तत्थ णं जे से दोच्चे पुरिसजाए से णं पुरिसे असीलवं सुयवं, अनुवरए विन्नायधम्मे, एस णं गोयमा! मए पुरिसे देसविराहए पन्नत्ते।*

*तत्थ णं जे से तच्चे पुरिसजाए से णं पुरिसे सीलवं सुयवं, उवरए विन्नायधम्मे, एस णं गोयमा! मए पुरिसे सव्वाराहए पन्नत्ते।*

*तत्थ णं जे से चउत्थे पुरिसजाए से णं पुरिसे असीलवं असुतवं, अनुवरए अविन्नायधम्मे, एस णं गोयमा? मए पुरिसे सव्वविराहए पन्नत्ते॥*

**वृ.** 'रायगिहे'इत्यादि, तत्र च 'एवं खलु सीलं सेयं १ सुयं सेयं २ सुयं सेयं ३ सीलं सेयं ४' इत्येतस्य चूर्ण्यनुसारेणव्याख्या-'एवं' लोकसिद्धन्यायेन 'खलु' निश्चयेन इहान्ययूथिकाः केचित् क्रियामात्रादेवामीष्टार्थःसिद्धिमिच्छन्ति न च किञ्चिदपि ज्ञानेन प्रयोजनं, निश्चेष्टत्वात्, घटादिकरणप्रवृत्तावाकाशादिपदार्थःवत्, पठ्यते च—

॥ १ ॥ "क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम्।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत्॥"

॥ १ ॥ तथा-"जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स।
एवं खु नाणी चरणेण हीणो, नाणस्स भागी नहु सोगईए॥"

अतस्ते प्ररूपयन्ति-शीलं श्रेयः प्राणातिपातादिविरमणध्यानाध्ययनादिरूपा क्रियैव श्रेयः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतिशयेन प्रशस्यं श्लाध्यं पुरुषार्थःसाधकत्वात्, श्रेयं वा-समाश्रयणीयं पुरुषार्थःविशेषार्थिःना, अन्ये तु ज्ञानादेवेष्टार्थःसिद्धिमिच्छन्ति न क्रियातः, ज्ञानविकलस्य क्रियावतोऽपि फलसिद्ध्यदर्शनात्, अधीयते च-

॥१॥ "विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता।
मिथ्याज्ञानात्प्रवृत्तस्य, फलासंवाददर्शनात् ॥"

॥१॥ तथा-पढमं नाणं तओ दया, एवं चिट्ठइ सव्वसंजए।
अन्नाणी किं काही किं वा नाही छेयपावयं ॥"

अतस्ते प्ररूपयन्ति-श्रुतं श्रेयः, श्रुतं-श्रुतज्ञानं तदेव श्रेयः-अतिप्रशस्यमाश्रयणीयं वा पुरुषार्थःसिद्धिहेतुत्वात् न तु शीलमिति, अन्ये तु ज्ञानक्रियाभ्यामन्योऽन्यनिरपेक्षाभ्यां फलमिच्छन्ति, ज्ञानं क्रियाविकलमेवोपसर्जनीभूतक्रियं वा फलदं क्रियाऽपि ज्ञानविकला उपसर्जनीभूतज्ञाना वा फलदेति भावः, भणन्ति च-

॥१॥ "किञ्चिद्वेदमयं पात्रं, किञ्चित्पात्रं तपोमयम्।
आगमिष्यति तत्पात्रं, यत्पात्रं तारयिष्यति ॥"

अतस्ते प्ररूपयन्ति-श्रुतं श्रेयः तथा शीलं श्रेयः ३, द्वयोरपि प्रत्येकं पुरुषस्य पवित्रतानिबन्धनत्वादिति, अन्ये तु व्याचक्षते-शीलं श्रेयस्तावन्मुख्यवृत्त्या तथा श्रुतं श्रेयः-श्रुतमपि श्रेयो गौणवृत्त्या तदुपकारित्वादित्यर्थः इत्येकीयं मतं, अन्यदीयमतं तु श्रुतं श्रेयस्तावत्तथा शीलमपि श्रेयो गौणवृत्त्या तदुपकारित्वादित्यर्थः, अयं चार्थः इह सूत्रे काकुपाठाल्लभ्यते, एतस्य च प्रथमव्याख्यानेऽन्ययूथिकमतस्य मिथ्यात्वं, पूर्वोक्तपक्षत्रयस्यापि फलसिद्धावनङ्गत्वात् समुदायपक्षस्यैव च फलसिद्धिकरणत्वात्, आह च-

॥१॥ "नाणं पयासयं सोहओ तवो संजमो य गुत्तिकरो।
तिण्हंपि समाओगे मोक्खो जिनसासणे भनिओ ॥"

-तपःसंयमौ च शीलमेव, तथा-

॥१॥ "संजोगसिद्धीइ फलं वयंति, न हु एगचक्केण रहो पयाइ।
अंधो य पंगू य वणे समिच्चा, ते संपउत्ता नगरं पविट्ठा ॥" इति,

द्वितीयव्याख्यानपक्षेऽपि मिथ्यात्वं, संयोगतः फलसिद्धेर्द्दष्टत्वाद्, एकैकस्य प्रधानेतरविवक्षयाऽसङ्गतत्वादिति, अहं पुनर्गौतम ! एवमाख्यामि यावत्प्ररूपयामीत्यत्र श्रुतयुक्तं शीलं श्रेयः इत्येतावान् वाक्यशेषो दृश्यः, अथ कस्मादेवं ?, अत्रोच्यते-

'एवं'मित्यादि, एवं वक्ष्यमाणन्यायेन-'पुरिसजाय'त्ति पुरुषप्रकाराः 'सीलवं असुयवं'ति कोऽर्थः ?, 'उवरए अविन्नायधम्मे'त्ति 'उपरतः' निवृत्तः स्वबुद्धया पापात् 'अविज्ञातधर्मा' भावतोऽ- नधिगतश्रुतज्ञानो बालतपस्वीत्यर्थः, गीतार्थानिश्रिततपश्चरणनिरतोऽगीतार्थः इत्यन्ये, 'देसारा- हए'त्ति देशं-स्तोकमंशं मोक्षमार्गस्याराधयतीत्यर्थः सम्यग्बोधरहितत्वात् क्रियापरत्वाच्चेति, 'असीलवं सुयवं'ति, कोऽर्थः ?-'अणुवरए विन्नायधम्मे'त्ति पापादनिवृत्तो विज्ञातधर्मा चाविरतिसम्य- ग्दृष्टिरितिभावः।

'देसविराहए'त्ति देशं-स्तोकमंशं ज्ञानादित्रयरूपस्य मोक्षमार्गस्य तृतीयभागरूपं चारित्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विराधयतीत्यर्थः, प्राप्तस्य तस्यापालनादप्राप्तेर्वा, 'सव्वाराहए'त्ति सर्व्व-त्रिप्रकारमपि मोक्षमार्गमाराधयतीत्यर्थः, श्रुतशब्देन ज्ञानदर्शनयोः सङ्गृहीतत्वात्, न हि मिथ्यादृष्टिर्विज्ञातधर्मा तत्त्वतो भवतीति, एतेन समुदितयोः शीलश्रुतयोः श्रेयस्त्वमुक्तमिति 'सव्वाराहए'त्युक्तम्।

अथाराधनामेव भेदत आह–

**मू. (४३१)** *कतिविहा णं भंते ! आराहणा पन्नत्ता ?, गोयमा ! तिविहा आराहणा पन्नत्ता, तंजहा-नाणाराहणा दंसणाराहणा चरित्ताराहणा।*

*नाणाराहणा णं भंते ! कतिविहा पन्नत्ता ?, गोयमा ! तिविहा पन्नत्ता, तंजहा-उक्कोसिया मज्झिमा जहन्ना। दंसणाराहणा णं भंते !०, एवं चेव तिविहावि। एवं चरित्ताराहणावि।।*

*जस्स णं भंते ! उक्कोसिया नाणाराहणा तस्स उक्कोसिया दंसणाराहणा जस्स उक्कोसिया दंसणाराहणा तस्स उक्कोसिया नाणाराहणा ?, गोयमा ! जस्स उक्कोसिया नाणाराहणा तस्स दंसणाराहणा उक्कोसिया वा अजहन्नउक्कोसिया वा, जस्स पुण उक्कोसिया दंसणाराहणा तस्स नाणाराहणा उक्कोसा वा जहन्ना वा अजहन्नमनुक्कोसा वा।*

*जस्स णं भंते ! उक्कोसिया नाणाराहणा तस्स उक्कोसिया चरित्ताराहणा जस्सुक्कोसिया चरित्ताराहणा तस्सुक्कोसिया नाणाराहणा, जहा उक्कोसिया नाणाराहणा य दंसणाराहणा य भनिया तहा उक्कोसिया नाणाराहणा य चरित्ताराहणा य भानियव्वा।*

*जस्स णं भंते ! उक्कोसिया दंसणाराहणा तस्सुक्कोसिया चरित्ताराहणा जस्सुक्कोसिया चरित्ताराहणा तस्सुक्कोसिया दंसणाराहणा ?, गोयमा ! जस्स उक्कोसिया दंसणाराहणा तस्स चरित्ताराहणा उक्कोसा वा जहन्ना वा अजहन्नमणुक्कोसा वा जस्स पुण उक्कोसिया चरित्ताराहणा तस्स दंसणाराहणा नियमा उक्कोसा।*

*उक्कोसियं णं भंते ! नाणाराहणं आराहेत्ता कतिहिं भवग्गहणेहिं सिज्झंति जाव अंतं करेंति ?, गोयमा ! अत्थेगइए तेणेव भवग्गहणेणं सिज्झंति जाव अंतं करेंति अत्थेगतिए दोच्चेणं भवग्गहणेणं सिज्झंति जाव अंतं करेंति. अत्थेगतिए कप्पोवएसु वा कप्पातीएसु वा उववज्जंति, उक्कोसियं णं भंते ! दंसणाराहणं आराहेत्ता कतिहिं भवग्गहणेहिं एवं चेव, उक्कोसियन्नं भंते ! चरित्ताराहणं आराहेत्ता, एवं चेव, नवरं अत्थेगतिए कप्पातीयएसु उववज्जंति।*

*मज्झिमियं णं भंते ! नाणाराहणं आराहेत्ता कतिहिं भवग्गहणेहिं सिज्झंति जाव अंतं करेंति ?, गोयमा ! अत्थेगतिए दोच्चेणं भवग्गहणेणं सिज्झइ जाव अंतं करेंति तच्चं पुण भवग्गहणं नाइक्कमइ, मज्झमियं णं भंते ! दंसणाराहणं आराहेत्ता एवं चेव, एवं मज्झिमियं चरित्ताराहणंपि।*

*जहन्नियन्नंभंते ! नाणाराहणं आराहेत्ता कतिहिं भवग्गहणेहिं सिज्झंति जाव अंतं करेंति गोयमा ! अत्थेगतिए तच्चेणं भवग्गहणेणं सिज्झइ जाव अंतं करेइ सत्तट्ठ भवग्गहणाइं पुण नाइक्कमइ।। एवं दंसणाराहणंपि, एवं चरित्ताराहणंपि।*

**वृ.** 'कतिविहा ण'मित्यादि, 'आराहण'त्ति आराधना-निरतिचारतयाऽनुपालना, तत्र ज्ञानं पञ्चप्रकारं श्रुतं वा तस्याराधना-कालाद्युपचारकरणं दर्शनं-सम्यक्त्वं तस्याराधना-निरशङ्कितत्वाद्याचारानुपालनं चारित्रं-सामायिकादि तदाराधना-निरतिचारता, 'उक्कोसिय'त्ति उत्कर्षा ज्ञानाराधना ज्ञानकृत्यानुष्ठानेषु प्रकृष्टप्रयत्नता 'मज्झिम'त्ति तेष्वेव मध्यमप्रयत्नता 'जहन्न'त्ति तेष्वेवाल्पतमप्रयत्नता।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

एवं दर्शनाराधना चारित्राराधना चेति ।

अथोक्ताऽऽराधनाभेदानामेव परस्परोपनिबन्धमभिधातुमाह-'जस्स ण'मित्यादि, 'अजहन्नुक्कोसा व'त्ति जघन्या चासौ उत्रक्षा च-उत्कृष्ठा जघन्योत्कर्षा तन्निषेधादजघन्योत्कर्षा मध्यमेत्यर्थः, उत्कृष्टज्ञानाराधनावतो हि आद्ये द्वे दर्शनाराधने भवतो न पुनस्तृतीया, तथास्वभावत्वात्तस्येति।

'जस्स पुणे'त्यादि उत्कृष्टदर्शनाराधनावतो हि ज्ञानं प्रति त्रिप्रकारस्यापि प्रयत्नस्य सम्भवोऽस्तीति त्रिप्रकाराऽपि तदाराधना भजनया भवतीति। उत्कृष्टज्ञानचारित्राराधनासंयोगसूत्रे तूत्तरं-यस्योत्कृष्ठा ज्ञानाराधना तस्य चारित्राराधना उत्कृष्ठा मध्यमा वा स्यात्, उत्कृष्टज्ञानाराधनावतो हि चारित्रं प्रति नाल्पतमप्रयत्नता स्यात्तत्स्वभावात्तस्येति, उत्कृष्टदर्शनचारित्राराधनासंयोगसूत्रे तूत्तरं-'जस्स उक्कोसिया दंसणाराहणा'इत्यादि, यस्योत्कृष्ठा दर्शनाराधना तस्य चारित्राधना त्रिविधाऽपि भजनया स्यात्, उत्कृष्टदर्शनाराधनावतो हि चारित्रं प्रति प्रयत्नस्य त्रिविधस्याप्यविरुद्धत्वादिति।

उत्कृष्ठायां तु चारित्राराधनायामुत्कृष्टैव दर्शनाराधना, प्रकृष्टचारित्रस्य प्रकृष्टदर्शनानुगतत्वादिति ॥ अथाराधनाभेदानां फलप्रदर्शनायाह—'उक्कोसियं ण'मित्यादि, 'तेणेव भवग्ग- हणेणं सिज्झइ'त्ति उत्कृष्ठां ज्ञानाराधनामाराध्य तेनैव भवग्रहणेन सिद्ध्यति, उत्कृष्टचारित्राराधनायाः सद्भावे, 'कप्पोवएसु व'त्ति 'कल्पोपगेषु' सौधर्मादिदेवलोकोपगेषु देवेषु मध्ये उपपद्यते, मध्यमचारित्राराधनासद्भावे, 'कप्पातीएसु व'त्ति ग्रैवेयकादिदेवेषूत्पद्यते, मध्यमोत्कृष्टचारित्राराधनासद्भावे इति, तथा—

'उक्कोसियं णं भंते ! दंसणाराहण'मित्यादि, 'एवं चेव'त्ति करणात् 'तेणेव भवग्गहणेणं सिज्झइ'इत्यादिदृश्यं, तद्भवसिद्ध्यादि च तस्यां स्यात्, चारित्राराधनायास्तत्रोत्कृष्ठाया मध्यमायाश्चोक्तत्वादिति, तथा—

'उक्कोसियंणं भंते ! चारित्ताराहण'मित्यादौ 'एवं चेव'त्ति करणात् 'तेणेव भवग्गहणेण'मित्यादि दृश्यं, केवलं तत्र 'अत्थेगइएकप्पोवगेसु वे'त्यभिहितमिह तु तन्न वाच्यं उत्कृष्ट चारित्राराधनावतःसौधर्मादि कल्पेष्वगमनाद्वाच्यं पुनः अत्थेगइए कप्पातीएसु उववज्जइ'त्ति सिद्धिगमनाभावे तस्यानुत्तरसुरेषु गमनात्, एतदेव दर्शयतोक्तं 'नवर'मित्यादि।

मध्यमज्ञानाराधनासूत्रे मध्यमत्वं ज्ञानाराधनाया अधिकृतभव एव निर्वाणाभावात्, भावे पुनरुत्कृष्टत्वमवश्यम्भावीत्यवसेयं, निर्वाणान्यथाऽनुपपत्तेरिति, 'दोच्चेणं'ति अधिकृतमनुष्यभवापेक्षया द्वितीयेन मनुष्यभवेन 'तच्चं पुण भवग्गहणं'ति अधिकृतमनुष्यभवग्रहणापेक्षया तृतीयं मनुष्यभवग्रहणं, एताश्च चारित्राराधनासंवलिता ज्ञानाद्याराधना इह विवक्षिताः।

कथमन्यथा जघन्यज्ञानाराधनामाश्रित्य वक्ष्यति 'सत्तट्ठभवग्गहणाइं पुण नाइक्कमइ'त्ति, यतश्चारित्राराधनाया एवेदं फलमुक्तं, यदाह—"अट्ठभवा उ चरित्तेत्ति श्रुतसम्यक्त्वदेश—विरतिभवास्त्वसङ्ख्येया उक्ताः, ततश्चरणाराधनारहिता ज्ञानदर्शनाराधना असङ्ख्येयभविका अपि भवन्ति नत्वष्टभविका एवेति ॥

अनन्तरं जीवपरिणाम उक्तोऽथ पुद्गलपरिणामाभिधानायाह—

***मू. (४३२)** कतिविहे णं भंते ! पोग्गलपरिणामे पन्नत्ते ?, गोयमा ! पंचविहे पोग्गल-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*परिणामे पन्नत्ते, तंजहा—वन्नपरिणामे १ गंधप० २ रसप० ३ फासप० ४ संठाणप० ५।*

*वन्नपरिणामे णं कइविहे पन्नत्ते ?, गोयमा ! पंचविहे पन्नत्ते, तंजहा—कालवन्नरिणामे जाव सुक्किल्लवन्नपरिणामे।*

*एएणं अभिलावेणं गंधपरिणामे दुविहे रसपणामे पंचविहे फासपरिणामे अट्ठविहे, संठाणप० भंते ! कइविहे पन्नत्ते ?, गोयमा ! पंचविहे पन्नत्ते, तंजहा—परिमंडलसंठाणपरिणामे जाव आययसंठाणपरिणामे॥*

**वृ-** 'कइविहे ण' मित्यादि, 'वन्नपरिणामे' त्ति यत्पुद्गलो वर्णान्तरत्यागाद्वर्णान्तरं यात्यसौ वर्णपरिणाम इति, एवमन्यत्रापि, 'परिमंडलसंठाणपरिणामे' त्ति इह परिमण्डलसंस्थानं वलयाकारं, यावत्करणाच्च 'वट्टसंठाणपरिणामे तंससंठाणपरिणामे चउरंससंठाणपरिणामे' त्ति दृश्यम्।

पुद्गलाधिकारादिदमाह—

**मू.** *(४३३) एगे भंते ! पोग्गलत्थिकायपएसे किं दव्वं १ दव्वदेसे २ दव्वाइ ३ दव्वदेसा ४ उदाहु दव्वं च दव्वदेसे य ५ उदाहु दव्वं च दव्वदेसा य ६ उदाहु दव्वाइ च दव्वदेसे य ७ उदाहु दव्वाइं च दव्वदेसा य ८ ?, गोयमा ! सिय दव्वं सिय दव्वदेसे नो दव्वाइं नो दव्वदेसा नो दव्वं च दव्वदेसे य जाव नो दव्वाइं च दव्वदेसा य।*

*दो भंते ! पोग्गलत्थिकायपएसा किं दव्वं दव्वदेसे पुच्छा तहेव, गोयमा ! सिय दव्वं १ सिय दव्वदेसे २ सिय दव्वाइं ३ सिय दव्वदेसा ४ सिय दव्वं च दव्वदेसे य ५ नो दव्वं च दव्वदेसा य ६ सेसा पडिसेहेयव्वा।*

*तिन्नि भंते ! पोग्गलत्थिकायपएसा किं दव्वं दव्वदेसे० ? पुच्छा, गोयमा ! सिय दव्वं १ सिय दव्वदेसे २ एवं सत्त भंगा भाणियव्वा, जाव सिय दव्वाइं च दव्वदेसे य नो दव्वदेसा य।*

*चत्तारि भंते ! पोग्गलत्थिकायपएसा किं दव्वं ? पुच्छा, गोयमा ! सिय दव्वं १ सिय दव्वदेसे २ अट्ठवि भंगा भाणियव्वा जाव सिय दव्वाइं च दव्वदेसा य ८।*

*जहि चत्तारि भणिया एवं पंच छ सत्त जाव असंखेज्जा। अनंता भंते ! पोग्गलत्थिकायपएसा किं दव्वं० ?, एवं चेव जाव सिय दव्वाइं च दव्वदेसा य॥*

**वृ.** 'एगे भंते पोग्गलत्थिकाये' इत्यादि, पुद्गलास्तिकायस्य—एकागुणाकादिपुद्गलराशेः प्रदेशो—निरंशोऽशः पुद्गलास्तिकायप्रदेशः—परमाणुः द्रव्यं—गुणपर्याययोगि द्रव्यदेशो—द्रव्यावयवः, एवमेकत्वबहुत्वाभ्यां प्रत्येक विकल्पाश्चत्वारः, द्विकसंयोगा अपि चत्वार एवेति प्रश्नः उत्तरं तु स्याद्द्रव्यं द्रव्यान्तरा- सम्बन्धे सति, स्याद्रव्यदेशो द्रव्यान्तरसम्बन्धे सति, शेषविकल्पानां तु प्रतिषेधः, परमाणोरेकत्वेन बहुत्वस्य द्विकसंयोगस्य चाभावादिति।

'दो भंते !' इत्यादि, इहाष्टासु भङ्गकेषु मध्ये आद्याः पञ्च भवन्ति, न शेषाः, तत्र द्वौ प्रदेशौ स्याद्द्रव्यं, कथं ?, यदा तौ द्विप्रदेशिकस्कन्धतया परिणतौ तदा द्रव्यं १, यदा तु द्वयणुकस्कन्धभावगतावेव तौ द्रव्यान्तरसम्बन्धमुपगतौ तदा द्रव्यदेशः २, यदा तु तौ द्वावपि भेदेन व्यवस्थितौ तदा द्रव्ये ३, यदा तु तावेव द्वयणुकस्कन्धतामनापद्य द्रव्यान्तरेण सम्बन्धमुपगतौ तदा द्रव्यदेशाः



Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

यदा पुनस्तयोरेकः केवलतया स्थितो द्वितीयश्च द्रव्यान्तरेण सम्बद्धस्तदा द्रव्यं च द्रव्यदेशश्चेति पञ्चमः, शेषविकल्पानां तु प्रतिषेधोऽसम्भवादिति।

'तिन्नि भंते!'इत्यादि, त्रिषु प्रदेशेष्वष्टमविकल्पवर्जाः सप्त विकल्पाः संभवन्ति, तथाहि यदा त्रयोऽपि त्रिप्रदेशिकस्कन्धतया परिणतास्तदा द्रव्यं १, यदा तु त्रिप्रदेशिकस्कन्धतापरिणता एव द्रव्यान्तरसम्बन्धमुपगतास्तदा द्रव्यदेशः २, यदा पुनस्त त्रयोऽपि भेदेन व्यवस्थिता द्वौ वा द्वयणुकीभूतावेकस्तु केवल एव स्थितस्तदा 'दव्वाइं'ति ३, यदा तु ते त्रयोऽपि स्कन्धतामनागता एव द्वौ वा द्वयणुकीभूतावेकस्तु केवल एवेत्येवं द्रव्यान्तरेण संबद्धास्तदा 'दव्वदेसा'इति ४, यदा तु तेषां द्वौ द्वयणुकतया परिणतावेकश्च द्रव्यान्तरेण संबद्धः अथवैकः केवल एव स्थितो द्वौ तु द्वयणुकतया परिणम्य द्रव्यान्तरेण संबद्धौ तदा 'दव्वं च दव्वदेसे य'त्ति ५, यदा तु तेषामेकः केवल एव स्थितो द्वौ च भेदेन द्रव्यान्तरेण संबद्धौ तदा 'दव्वं च दव्वदेसा य'त्ति ६, यदा पुनस्तेषां द्वौ भेदेन स्थितावेकश्च द्रव्यान्तरेण संबद्धास्तदा 'दव्वाइं च दव्वदेसे य'त्ति ७, अष्टमविकल्पस्तु न संभवति, उभयत्र त्रिषु प्रदेशेषु बहुवचनाभावात्, प्रदेशचतुष्टयादौ त्वष्टमोऽपि संभवति, उभयत्रापि बहुवचनसद्भावादिति

**मू. (४३४)** *केवतिया णं भंते! लोयागासपएसा पन्नत्ता?, गोयमा! असंखेज्जा लोयागासपएसा पन्नत्ता॥ एगमेगस्स णं भंते! जीवस्स केवइया जीवपएसा पन्नत्ता?, गोयमा! जावतिया लोगागासपएसा एगमेगस्स णं जीवस्स एवतिया जीवपएसा पन्नत्ता॥*

**वृ.** अनन्तरं परमाण्वादिवक्तव्यतोक्ता, परमाण्वादयश्च लोकाकाशप्रदेशावगाहिनो भवन्तीति तद्वक्तव्यतामाह-'केवइया ण'मित्यादि, 'असंखेज्ज'त्ति यस्मादसङ्ख्येयप्रदेशिको लोकास्तस्मात्तस्य प्रदेशा असङ्ख्येया इति। प्रदेशाधिकारादेवेदमाह-'एगमेगस्से'त्यादि, एकैकस्य जीवस्य तावन्तः प्रदेशा यावन्तो लोकाकाशस्य, कथं?, यस्माज्जीवः केवलिसमुद्घातकाले सर्वं लोकाकाशं व्याप्यावतिष्ठति तस्माल्लोकाकाशप्रदेशप्रमाणास्त इति।

जीवप्रदेशाश्च प्रायः कर्म्मप्रकृतिभिरनुगता इति तद्वक्तव्यतामभिधातुमाह-

**मू. (४३५)** *कति णं भंते! कम्मपगडीओ पन्नत्ताओ?, गोयमा! अट्ठ कम्मपगडीओ पन्नत्ताओ, तंजहा-नाणावरणिज्जं जाव अंतराइयं।*

*नेरइयाणं भंते! कइ कम्मपगडीओ पन्नत्ताओ?, गोयमा! अट्ठ, एवं सव्वजीवाणं अट्ठकम्मपगडीओ ठावेयव्वाओ जाव वेमाणियाणं।*

*नाणावरणिज्जस्स णं भंते! कम्मस्स केवतिया अविभागपलिच्छेदा पन्नत्ता?, गोयमा! अनंता अविभागपलिच्छेदा पन्नत्ता, नेरइयाणं भंते! नाणावरणिज्जस्स कम्मस्स केवतिया अविभागपलिच्छेया पन्नत्ता?, गोयमा! अनंता अविभागपलिच्छेदा पन्नत्ता, एवं सव्वजीवाणं जाव वेमाणियाणं पुच्छा, गोयमा! अनंता अविभागपलिच्छेदा पन्नत्ता, एवं जहा नाणावरणिज्जस्स अविभागपलिच्छेदा भणिया तहा अट्ठण्हवि कम्मपगडीणं भाणियव्वा जाव वेमाणियाणं।*

*अंतराइयस्स। एगमेगस्स णं भंते! जीवस्स एगमेगे जीवपएसे नाणावरणिज्जस्स कम्मस्स केवइएहिं अविभागपलिच्छदेहिं आवेढिए परिवेढिए सिया?, गोयमा! सिया आवेढियपरिवेढिए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सिय नो आवेढियपरिवेढिए, जइ आवेढियपरिवेढिए नियमा अनंतेहिं, एगमेगस्स णं भंते ! नेरइयस्स एगमेगे जीवपएसे नाणावरणिज्ञस्स कम्मस्स केवइएहिं अविभागपलिच्छेदेहिं आवेढिए परिवेढिते ?, गोयमा ! नियमा अनंतेहिं, जहा नेरइयस्स एवं जाव वेमाणियस्स, नवरं मणूसस्स जहा जीवस्स ।*

*एगमेगस्स णं भंते ! जीवस्स एगमेगे जीवपएसे दरिसणावरणिज्ञस्स कम्मस्स केवतिएहिं एवं जहेव नाणावरणिज्ञस्स तहेव दंडगो भाणियव्वो जाव वेमाणियस्स, एवं जाव अंतराइयस्स भाणियव्वं ।*

*नवरं वेयणिज्ञस्स आउयस्स नामस्स गोयस्स एएसिं चउण्हवि कम्माणं मणूसस्स जहा नेरइयस्स तहा भाणियव्वं सेसं तं चेव ॥*

**वृ.** 'कइ ण'मित्यादि, 'अविभागपलिच्छेद'त्ति परिच्छिद्यन्त इति परिच्छेदा-अंशास्ते च सविभागा अपि भवन्त्यतो विशेष्यन्ते-अवभागाश्च ते परिच्छेदाश्चेत्यविभागपरिच्छेदाः, निरंशा अंशा इत्यर्थः, ते च ज्ञानावरणीयस्य कर्म्मणोऽनन्ताः, कथं ?, ज्ञानावरणीयं यावतो ज्ञानस्यावि-भागान् भेदान् आवृणोति तावन्त एव तस्याविभागपरिच्छेदाः, दलिकापेक्षया वाऽनन्ततत्पर-माणुरूपाः

'अविभागपलिच्छेदेहिं'ति तत्परमाणुभि 'आवेढिए परिवेढिए'त्ति आवेष्टितपरि-वेष्टितोऽत्यन्तं परिवेष्टित इत्यर्थः आवेष्ट्य परिवेष्टित इति वा 'सिय नो आवेढियपरिवेढिए'त्ति केवलिनं प्रतीत्य तस्य क्षीणज्ञानावरणत्वेन तत्प्रदेशस्य ज्ञानावरणीयाविभागपलिच्छेदैरावेष्ट-नपरिवेष्टनाभावादिति ।

'मणूसस्स जहा जीवस्स'त्ति 'सिय आवेढिये'त्यादि वाच्यमित्यर्थः, मनुष्यापेक्षयाऽऽवेष्टित-परिवेष्टितत्वस्य तदितरस्य च सम्भवात् । एवं दर्शनावरणीयमोहनीयान्तरायेष्वपि वाच्यं, वेदनी-यायुष्कनामगोत्रेषु पुनर्जीवपद एव भजना वाच्या सिद्धापेक्षया, मनुष्यपदे तु नासौ, तत्र वेदनीयादीनां भावादित्येतदेवाह-'नवरं वेयणिज्ञस्से'त्यादि ।

अथ ज्ञानावरणं शेषैः सह चिन्त्यते-

**मू. (४३६)** *जस्स णं भंते ! नाणावरणिज्ञं तस्स दरिसणावरणिज्ञं जस्स दंसणावरणिज्ञं तस्स नाणावरणिज्ञं ?, गोयमा ! जस्स णं नाणावरणिज्ञं तस्स दंसणावरणिज्ञं नियमा अत्थि जस्स णं दरिसणावरणिज्ञं तस्सवि नाणावरणिज्ञं नियमा अत्थि ।*

*जस्स णं भंते ! नाणावरणिज्ञं तस्स वेयणिज्ञं जस्स वेयणिज्ञं तस्स नाणावरणिज्ञं ?, गोयमा ! जस्स नाणावरणिज्ञं तस्स वेयणिज्ञं नियमा अत्थि जस्स पुण वेयणिज्ञं तस्स नाणावरणिज्ञं सिय अत्थि सिय नत्थि ।*

*जस्स णं भंते ! नाणावरणिज्ञं तस्स मोहणिज्ञं जस्स मोहणिज्ञं तस्स नाणावरणिज्ञं ?, गोयमा ! जस्स नाणावरणिज्ञं तस्स मोहणिज्ञं सिय अत्थि सिय नत्थि, जस्स पुण मोहणिज्ञं तस्स नाणावरणिज्ञं नियमा अत्थि ।*

*जस्स णं भंते ! णाणावरणिज्ञं तस्स आउयं एवं जहा वेयणिज्ञेण समं भणियं तहा आउएणवि समं भाणियव्वं, एवं नामेणवि एवं गोएणि समं, अंतराइएण समं जहा दरिसणावरणिज्ञेणं समं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तहेव नियमा परोप्परं भाणियव्वाणि १ ।*

*जस्स णं भंते ! दरिसणावरणिज्जं तस्स वेयणिज्जं जस्स वेयणिज्जं तस्स दरिसणावरणिज्जं जहा नाणावरणिज्जं उवरिमेहिं सत्तहिं कम्मेहिं समं भणियं तहा दरिसणावरणिज्जंपि उवरिमेहिं छहिं कम्मेहिं समं भाणियव्वं जाव अंतराइएणं २ ।*

*जस्स णं भंते ! वेयणिज्जं तस्स मोहणिज्जं जस्स मोहणिज्जं तस्स वेयणिज्जं ?, गोयमा ! जस्स वेयणिज्जं तस्स मोहणिज्जं सिय अत्थि सिय नत्थि, जस्स पुण मोहणिज्जं तस्स वेयणिज्जं नियमा अत्थि ।*

*जस्स णं भंते ! वेयणिज्जं तस्स आउयं ?, एवं एयाणि परोप्परं नियमा, जहा आउएण समं एवं नामेणवि गोएणवि समं भाणियव्वं ।*

*जस्स णं भंते ! वेयणिज्जं तस्स अंतराइयं ? पुच्छा, गोयमा ! जस्स वेयणिज्जं तस्स अंतराइयं सिय अत्थि सिय नत्थि, जस्स पुण अंतराइयं तस्स वेयणिज्जं नियमा अत्थि ३ ।*

*जस्स णं भंते ! मोहणिज्जं तस्स आउयं जस्स आउयं तस्स मोहणिज्जं ?, गोयमा ! जस्स मोहणिज्जं तस्स आउयं नियमा अत्थि जस्स पुण आउयं तस्स पुण मोहणिज्जं सिय अत्थि सिय नत्थि, एवं नामं गोयं अंतराइयं च भाणियव्वं ४ ।*

*जस्स णं भंते ! आउयं तस्स नामं० ? पुच्छा, गोयमा ! दोवि परोप्परं नियमं, एवं गोत्तेणवि समं भाणियव्वं ।*

*जस्स णं भंते ! आउयं तस्स अंतराइं० ?, गोयमा ! जस्स आउयं तस्स अंतराइयं सिय अत्थि सिय नत्थि, जस्स पुण अंतराइयं तस्स आउयं नियमा ५ ।*

*जस्स णं भंते ! नामं तस्स गोयं जस्स णं गोयं तस्स णं नामं ?, पुच्छा, गोयमा ! जस्स णं नामं तस्स णं नियमा गोयं जस्स णं गोयं तस्स नियमा नामं, गोयमा ! दोवि एए परोप्परं नियमा, जस्स णं भंते ! नामं तस्स अंतराइयं० ? पुच्छा, गोयमा ! जस्स नामं तस्स अंतराइयं सिय अत्थि सिय नत्थि, जस्स पुण अंतराइयं तस्स नामं नियमा अत्थि ६ ।*

*जस्स णं भंते ! गोयं तस्स अंतराइयं० ? पुच्छा, गोयमा ! जस्स णं गोयं तस्स अंतराइयं सिय अत्थि सिय नत्थि, जस्स पुण अंतराइयं तस्स गोयं नियमा अत्थि ७ ॥*

**वृ.** 'जस्स ण'मित्यादि, 'जस्स पुण वेयणिज्जं तस्स नाणावरणिज्जं सिय अत्थि सिय नत्थि' त्ति अकेवलिनं केवलिनं च प्रतीत्य, अकेवलिनो हि वेदनीयं ज्ञानावरणीयं चास्ति, केवलिनस्तु वेदनीयमस्ति न तु ज्ञानावरणीयमिति ।

'जस्स नाणावरणिज्जं तस्स मोहणिज्जं सिय अत्थि सिय नत्थि' त्ति अक्षपकं क्षपकं च प्रतीत्य, अक्षपकस्य हि ज्ञानावरणीयं मोहनीयं चास्ति, क्षपकस्य तु मोहक्षये यावत् केवलज्ञानं नोत्पद्यते तावज्ज्ञानावरणीयमस्ति न तु मोहनीयमिति ।

एवं च यथा ज्ञानावरणीयं वेदनीयेन सममधीतं तथाऽऽयुषा नाम्ना गोत्रेण च सहाध्येयं, उक्तप्रकारेण भजनायाः सर्वेषु तेषु भावात्, 'अंतराएणं च समं' ज्ञानावरणीयं तथा वाच्य यथा दर्शनावरणं, निर्भजनमित्यर्थः, एतेवाह– 'एवं जहा वेयणिज्जेण सम'मित्यादि, 'नियमा परोप्परं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाणियव्वाणि'त्ति कोऽर्थः ?–'जस्स नाणावरणिज्जं तस्स नियमा अंतराइयं जस्स अंतराइयं तस्स नियमा नाणावरणिज्ज'मित्येवमनयोः परस्परं नियमो वाच्य इत्यर्थः।

अथ दर्शनावरणं शेषैः षड्भिः सह चिन्तयन्नाह– 'जस्से त्यादि, अयं च गमो ज्ञानावरणीय-गमसम एवेति। 'जस्स णं भंते ! वेयणिज्ज''मित्यादिना तु वेदनीयं शेषैः पञ्चभिः सह चिन्त्यते, तत्र च 'जस्स वेयणिज्जं तस्स मोहणिज्जं सिय अत्थि सिय नत्थि'त्ति अक्षीणमोहं क्षीणमोहं च प्रतीत्य, अक्षीणमोहस्य हि वेदनीयं मोहनीयं चास्ति, क्षीणमोहस्य तु वेदनीयमस्ति नतु मोहनीयमिति

'एवं एयाणि परोप्परं नियम'त्ति कोऽर्थः ?–यस्य वेदनीयं तस्य नियमादायुर्यस्यायुस्तस्य नियमाद्वेदनीयमित्येवमेते वाच्ये इत्यर्थः, एवं नामगोत्राभ्यामपि वाच्यं, एतदेवाह– 'जहा आउएणे'त्यादि, अन्तरायेण तु भजनया यतो वेदनीयं अन्तरायं चाकेवलिनामस्ति केवलिनां तु वेदनीयमस्ति न त्वन्तरायं, एतदेव दर्शयतोक्तं 'जस्स वेयणिज्जं तस्य अंतराइयं सिय अत्थि सिय नत्थि'त्ति।

अथ मोहनीयमन्यैश्चतुर्भि सह चिन्त्यते, तत्र यस्य मोहनीयं तस्यायुर्नियमादकेवलिन इव, यस्य पुनरायुस्तस्य मोहनीयं भजनया, यतोऽक्षीणमोहस्यायुर्मोहनीयं चास्ति क्षीणमोहस्य त्वायुरेवेति, 'एवं नामं गोयं अंतराइयं च भाणियव्वं'ति, अयमर्थः–यस्य मोहनीयं तस्य नाम गोत्रमन्तरायं च नियमादस्ति, यस्य पुनर्नामादित्रयं तस्य मोहनीयं स्यादस्त्यक्षीणमोहस्येव, स्यान्नास्ति क्षीणमोहस्येवेति।

अथायुरन्यैस्त्रिभिः सह चिन्त्यते–'जस्स णं भंते ! आउय'मित्यादि, 'दोवि परोप्परं नियम'त्ति कोऽर्थः ?–'जस्स आउयं तस्स नियमा नामं जस्स नामं तस्स नियमा आउयं'इत्यर्थः, एवं गोत्रेणापि, 'जस्स आउयं तस्स अंतराइयं सिय अत्थि सिय नत्थि''त्ति यस्यायुस्तस्यान्तरायं स्यादस्ति अकेवलिवत् स्यान्नास्ति केवलिवदिति।

'जस्स णं भंते ! नामं'इत्यादिना नामान्येन द्वयेन सह चिन्त्यते, तत्र यस्य नाम तस्य नियमाद्गोत्रं यस्य गोत्रं तस्य नियमान्नाम, तथा यस्य नाम तस्यान्तरायं स्यादस्त्यकेवलिवत् स्यान्नास्ति केवलिवदिति। एवं गोत्रान्तराययोरपि भजना भावनीयेति।

**मू.** *(४३७) जीवे णं भंते ! किं पोग्गली पोग्गले ?, गोयमा ! जीवे पोग्गलीवि पोग्गलेवि, से केणट्ठेणं भंते ! एवं वुच्चइ जीवे पोग्गलीवि पोग्गलेवि ?, गोयमा ! से जहानामए छत्तेणं छत्ती दंडेणं दंडी घडेणं घडी पडेणं पडी करेणं करी एवामेव गोयमा ! जीवेवि सोइंदियचक्खिंदि-यघाणिंदियजिब्भिंदियफासिंदियाइं पडुच्च पोग्गली, जीवं पडुच्च पोग्गले, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जीवे पोग्गलीवि पोग्गलेवि।*

*नेरइए णं भंते ! किं पोग्गली० ?, एवं चेव, एवं जाव वेमाणिए नवरं जस्स जइ इंदियाइं तस्स तइवि भाणियव्वाइं। सिद्धे णं भंते ! किं पोग्गली पोग्गले ?, गोयमा ! नो पोग्गली पोग्गले, से केणट्ठेणं भंते ! एवं वुच्चइ जाव पोग्गले ?, गोयमा ! जीवं पडुच्च, से तेणट्ठेणं गोयमा ! एवं वुच्चइ सिद्धे नो पोग्गली पोग्गले। सेवं भंते ! सेवं भंतेत्ति ॥*

**वृ.** अनन्तरं कर्मोक्तं तच्च पुद्गलात्मकमतस्तदधिकारादिदमाह–'जीवे ण'मित्यादि, 'पोग्गलीवि'त्ति पुद्गलाः–श्रोत्रादिरूपा विद्यन्ते यस्यासौ पुद्गली, 'पुग्गलेवि'त्ति 'पुद्गल इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सञ्ज्ञा जीवस्य ततस्तद्योगात् पुद्गल इति । एतदेव दर्शयन्नाह–'से केणट्ठेण' 'मित्यादि ॥

शतकं–८ उद्देशकः–१० समाप्तः

सद्भक्त्याहुतिना विवृद्धमहसा पार्श्वप्रसादाग्निना,
तन्नामाक्षरमन्त्रजप्तिविधिना विघ्नेन्धनप्लोषितः ।
सम्पन्नेऽनधशान्तिकर्म्मकरणे क्षेमादहं नीतवान्,
सिद्धिं शिल्पिवदेतदष्टमशत- व्याख्यानसन्मन्दिरम् ॥

**शतकं–८ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभय देवसूरिविरचिता भगवती अङ्गसूत्रे अष्टमशतकस्य टीका परीसमाप्ता ।**

## शतकं-९

**वृ.** व्याख्यातमष्टमशतमथ नवरममारभ्यते, अस्य चायमभिसम्बन्धः–अष्टमशते विविधाः पदार्था उक्ताः, नवमेऽपि त एव भङ्गयन्तरेणोच्यन्ते, इत्येवंसम्बन्धस्योद्देशकार्थसंसूचिकेयं गाथा–

**मू. (४३८)** *जंबुद्दीवे १ जोइस २ अंतरदीवा ३० असोच्च १ गंगेय ३२ ।*
*कुंडग्गामे ३३ पुरिसे ३४ नवमंमि सए चउत्तीसा ॥*

**वृ.** 'जंबुद्दीवे'इत्यादि, तत्र 'जंबुद्दीवे'त्ति तत्र जम्बूद्वीपवक्तव्यताविषयः प्रथमोद्देशकः १, 'जोइस'त्ति ज्योतिष्कविषय द्वितीयः २, 'अंतरदीव'त्ति अन्तरद्वीपविषया अष्टाविंशतिरुद्देशकः ३०, 'असोच्च'त्ति अश्रुत्वा धर्म लभेतेत्याद्यर्थःप्रतिपादनार्थः एकत्रिंशत्तमः ३१, 'गंगेय'त्ति गाङ्गेयाभिधानगारवक्तव्यतार्थो द्वात्रिंशत्तमः ३२, 'कुंडग्गामे'त्ति ब्राह्मणकुण्डग्रामविषयस्त्रिंशत्तमः ३३, 'पुरिसे'त्ति पुरुषः पुरुषं घ्नन्नित्यादिवक्तव्यतार्थःश्चतुस्त्रिंशत्तम ३४ इति ॥

**–: शतकं–९ उद्देशकः–१ :–**

**मू. (४३९)** *तेणं कालेणं तेणं समएणं महिलानामं नगरी होत्था वन्नओ, माणभद्दे चेइए वन्नओ, सामी समोसढे परिसा निग्गया जाव भगवं गोयमे पज्जुवासमाणे एवं वयासी–कहि णं भंते ! जंबुद्दीवे दीवे ? किंसंठिए णं भंते ! जंबुद्दीवे दीवे ।*

*एवं जंबुद्दीव पन्नत्ती भाणियव्वा जाव एवामेव सपुव्वावरेणं जंबुद्दीवे २ चोद्दस सलिला सयसहस्सा छप्पन्नं च सहस्सा भवंतीतिमक्खाया । सेवं भंते ! सेवं भंतेत्ति ॥*

**वृ.** 'कहि णं भंते'इत्यादि, कस्मिन् देशे इत्यर्थः 'एवं जंबुद्दीवपन्नत्ती भाणियव्व'त्ति, सा चेयम्–'केमहालए णं भंते ! जंबुद्दीवे दीवे किमागारभावपडोयारे णं भंते ! जंबुद्दीवे दीवे पन्नत्ते कस्मिन्नाकारभावे प्रत्यवतारो यस्य स तथा 'गोयमा ! अयन्नं जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतरए सव्वखुड्डाए वट्टे तिल्लपूयसंठाणसंठिए वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकन्नियासंठाणसंठिए वट्टे पडिपुन्नचंदसंठाणसंठिए पन्नत्ते एगं जोयणसयसहस्सं आयामविक्खंभेण'मित्यादि, किमन्तेयं व्याख्या ? इत्याह–'जावे'त्यादि ।

'एवामेव'त्ति उक्तेनैव न्यायेन पूर्वापरसमुद्रगमनादिना 'सपुव्वावरेणं'ति सह पूर्वेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नदीवृन्देनापरं सपूर्वापरं तेन 'चोद्दस सलिला सहयसहस्सा छप्पन्नं च सहस्सा भवंतीति मक्खाय'त्ति इह 'सलिलाशतसहस्राणि' नदीलक्षाणि, एतत्सङ्ख्या चैवं—भरतैरावतयोर्गङ्गासिन्धुरक्तारक्तवत्यः प्रत्येकं चतुर्दशभिर्नदीनां सहस्रैर्युक्ताः, तथा हैमवतैरण्यवतयोः रोहिद्रोहितांशा सुवर्णकूला रूप्यकूलाः प्रत्येकमष्टाविंशत्या हस्रैर्युक्ताः, तथा हरिवर्षरम्यकवर्षयोर्हरिहरिकान्तानरकान्ता-नारीकान्ताः प्रत्येकं षट्पञ्चाशता हस्रैर्युक्ताः समुद्रमुपयान्ति, तथा महविदेहे शीताशीतोदे प्रत्येकं पञ्चभिर्लक्षैर्द्वात्रिंशता च सहस्रैर्युक्ते समुद्रमुपयात इति, सर्वासां च मीलने सूत्रोक्तं प्रमाणं भवति

वाचनान्तरे पुनरिदं दृश्यते—'जहा जंबूदीवपन्नत्तीए तहा नेयव्वं जोइसविहूणं जाव—

॥१॥ खंडा जोयण वासा पव्वय कूडा य तित्थ सेढीओ।
विजयद्दहसलिलाउ य पिंडए होति संगहणी ॥ ति।

तत्र 'जोइसविहूणं'ति जंबूद्वीपप्रज्ञप्त्यां ज्योतिष्कवक्तव्यताऽस्तिं तद्विहीनं समस्तं जम्बूद्वीपप्रज्ञप्तिसूत्रमस्योद्देशकस्य सूत्रं ज्ञेयं, किंपर्यवसानं पुनस्तद्? इत्याह— 'जाव खंडे'त्यादि, तत्र 'खंडे'त्ति जम्बूद्वीपो भरतक्षेत्रप्रमाणानि खण्डानि कियन्ति स्यात्?, उच्यते, नवत्यधिकं खण्डशतं, 'जोयण'त्ति जम्बूद्वीपः कियन्ति योजनप्रमाणानि खण्डानि स्यात्?, उच्यते –

॥१॥ 'सत्तेव य कोडिसया णउया छप्पन्नसयसहस्साइं।
चउनउइं च सहस्सा सयं दिवड्ढं च साहीयं ॥ इति,

॥२॥ गाउयमेगं पन्नरस धनुस्सया तह धनूणि पन्नरसा।
सट्ठिं च अंगुलाइं जंबु दीवस्स गणियपयं ॥

गणितपदमित्येवंप्रकारस्य गणितस्य सञ्ज्ञा 'वास'त्ति जम्बूद्वीपे भरतहेमवतादीनि सप्त वर्षाणि क्षेत्राणीत्यर्थः, 'पव्वय'त्ति जम्बूद्वीपे कियन्तः पर्वताः?, उच्यन्ते, षड् वर्षधरपर्वता हिमवदादयः एको मन्दरः एकश्चित्रकूटः एक एव विचित्रकूटः, एतौ च देवकुरुषु, द्वौ यमकपर्वतौ, एतौ चोत्तरकुरुषु, द्वे शते काञ्चनकानाम्, एते च शीताशीतोदयोः पार्श्वतो, विंशति वक्षस्काराः, चतुस्त्रिंशद्दीर्घविजयार्द्धपर्वताश्चत्वारो वर्त्तुलविजयार्द्धाः, एवं द्वे शते एकोनसप्तत्यधिके पर्वतानां भवत। 'कूड'त्ति कियन्ति पर्वकूटानि?, उच्यते, षट्पञ्चाशद्वर्षधरकूटानि पन्नवतिर्वक्षस्कारकूटा-नि त्रीणि षडुत्तराणि विजयार्द्धकूटानां शतानि नव च मन्दरकूटानि, एवं चत्वारि सप्तषष्ट्यधिकानि कूटशतानि भवन्ति।

'तित्थ'त्ति जम्बूद्वीपे कियन्ति तीर्थानि?, उच्यते, भरतादिषु चतुस्त्रिंशति खण्डेषु मागधवर-दामप्रभासाख्यानि त्रीणि त्रीणि तीर्थानि भवन्ति, एवं चैकं द्वयुत्तरं तीर्थःशतं भवतीति।

'सेढीओ'त्ति विद्याधरश्रेणयः आभियोगिकश्रेणयश्च कियन्त्यः?, उच्यते, अष्टषष्टि प्रत्येकमासां भवन्ति, विजयार्द्धपर्वतेषु प्रत्येकं द्वयोर्द्वयोर्भावात्, एवं च षट्त्रिंशदधिकं श्रेणिशतं भवतीति।

विजय'त्ति कियन्ति चक्रवर्त्तिविजेतव्यानि भूखण्डानि?, उच्यते, चतस्त्रिंशत्, एतावन्त एव राजधान्यादयोऽर्था इति ।

दह'त्ति क्रियन्तो महाह्रदाः?, उच्यते, पद्मादयः षड् दश च नीलवदादय उत्तरकुरुदेव-कुरुमध्यवर्त्तिन इत्येवं षोडश। 'सलिल'त्ति नद्यस्तत्प्रमाणं च दर्शितमेव, 'पिंडए होति संगहणि'त्ति उद्देशकार्थानां पिण्डके— मीलके विषयभूते इयं सङ्ग्रहणीगाथा भवतीति।

शतकं—९ उद्देशकः—१ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं–९ उद्देशकः–२ :–

**वृ.** अनन्तरोद्देशके जम्बूद्वीपवक्तव्यतोक्ता द्वितीये तु जम्बूद्वीपादिषु ज्योतिष्कवक्तव्यताऽभिधीयते, तस्य चेदमादिसूत्रम्–

**मू. (४४०)** *रायगिहे जाव एवं वयासी–जम्बुद्दीवे णं भंते! दीवे केवइया चंदा पभासिंसु वा पभासेंति वा पभासिस्संति वा?, एवं जहा जीवाभिगमे जाव–*

**वृ.** 'रायगिहे'इत्यादि, 'एवं जहा जीवाभिगमे'त्ति तत्र चैतत्सूत्रमेवम्–'केवतिया चंदा पभासिंसु वा पभासिंति वा पभासिस्संति वा ३ ? केवतिया सूरिया तविंसु वा तवंति वा तविस्संति वा ? केवइया नक्खत्ता जोयं जोइंसु वा ३ ? केवइया महग्गहा चारं चरिंसु वा ३ ? केवइयाओ तारागणकोडाकोडीओ सोहिंसु वा ३ ?' शोभां कृ०तवत्य इत्यर्थः ।

'गोयमा! जंबुद्दीवे दीवे दो चंदा पभासिंसु वा ३ दो सूरिया तविंसु वा ३ छप्पन्नं नक्खत्ता जोगं जोइंसु वा ३ छावत्तरं गहसयं चारं चरिंसु वा ३' बहुवचनमिह छान्दसत्वादिति ।

**मू. (४४१)** *'एगं च सयसहस्सं तेत्तीसं खलु भवे सहस्साइं ।*
*नव य सया पन्नासा तारागणकोडिकोडीणं ॥'*

**मू. (४४२)** *सोभं सोभिंसु सोभिंति सोभिस्संति ॥*

**वृ.** 'एगं च सयसहस्सं तेत्तीसं खलु भवे सहस्साइं' शेषं तु सूत्रपुस्तके लिखितमेवास्ते ।

**मू. (४४३)** *लवणे णं भंते! समुद्दे केवतिया चंदा पभासिंसु वा पभासिंति वा पभासिस्संति वा ३ एवं जहा जीवाभिगमे जाव ताराओ ॥ धायइसंडे कालोदे पुक्खरवरे अब्भितरपुक्खरद्धे मणुस्सखेत्ते, एएसु सव्वेसु जहा जीवाभिगमे जाव–'एगससीपरिवारे तारागणकोडाकोडीणं' ।*

*पुक्खरद्धे णं भंते! समुद्दे केवइया चंदा पभासिंसु वा?, एवं सव्वेसु दीवसमुद्देसु जोतिसियाणं भाणियव्वं जाव सयंभूरमणे जाव सोभं सोभिंसु वा सोभंति वा सोभिस्संति वा ।*

*सेवं भंते! सेवं भंतेत्ति ॥*

**वृ.** 'लवणे णं भंते!'इत्यादौ 'एवं जहा जीवाभिगमे'त्ति तत्र चेदं सूत्रमेवं–'केवइया चंदा पभासिंसु वा ३ केवतिया सूरिया तविंसु वा ३'इत्यादि प्रश्नसूत्रं पूर्ववत्, उत्तरं तु 'गोयमा! लवणे णं समुद्दे चत्तारि चंदा पभासिंसु वा ३ चत्तारि सूरिया तविंसु वा ३ बारसोत्तरं नक्खत्तसयं जोगं जोइंसु वा ३ तिन्नि बावन्ना महग्गहसया चारं चरिंसु वा ३ दोन्नि सयसहस्सा सत्तट्ठिं च सहस्सा नवसया तारागणकोडिकोणीणं सोहं सोहिंसु वा ३' सूत्रपर्यन्तमाह–'जाव ताराओ'त्ति तारकासूत्रं यावत्तच्च दर्शितमेवेति ।

'धायइसंडे'इत्यादौ यदुक्तं 'जहा जीवाभिगमे' तदेवं भावनीयं–'धायइसंडे णं भंते! दीवे–केवतिया चंदा पभासिंसु वा ३ केवतिया सूरिया तविंसु वा ३ ?' इत्यादिप्रश्नाः पूर्ववत्, उत्तरं तु 'गोयमा! बारस चंदा पभासिंसु वा ३ बारस सूरिया तविंसु वा ३, एवं–

॥ १ ॥ 'चउवीसंससिरविणो नक्खत्तसया य तिन्नि छत्तीसा ।
एगं च गहसहस्सं छप्पन्नं धायईसंड ॥'

॥ २ ॥ अट्ठेव सयसहस्सा तिन्नि सहस्साइं सत्त य सयाइं ।
धायइसंडे दीवे तारागणकोडिकोडीणं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोहं सोहिंसु वा ३' । 'कालोए णं भंते ! समुद्दे केवतिया चंदा' इत्यादि प्रश्नः, उत्तरं तु 'गोयमा !–

॥१॥ 'बायालीसं चंदा बायालीसं च दिनयरा दित्ता ।
कालोदहिंमि एए चरंति संबद्धलेसागा ॥

॥२॥ नक्खत्तसहस्स एगं एगं छावत्तरं च सयमन्नं ।
छच्च सया छन्नउया महागहा तिन्नि य सहस्सा ॥

॥३॥ अट्ठावीसं कालोदहिंमि बारस य तह सहस्साइं ।
नव य सया पन्नासा तारागणकोडिकोडीणं ॥
सोहं सोहिंसु वा ३ ।

तथा 'पुक्खरवरदीवे णं भंते ! दीवे केवइया चंदा'इत्यादि प्रश्नः, उत्तरं त्वेतद्गाथाऽनुसारेणावसेयं–

॥१॥ 'चोयालं चंदसयं चोयालं चेव सूरियाण सयं ।
पुक्खरवरंमि दीवे भमंति एए पयासिंता ॥'

इह च यद्भ्रमणमुक्तं न तत्सर्वांश्चन्द्रादित्यानपेक्ष्य, किं तर्हि ? पुष्करद्वीपाभ्यन्तरार्द्धवर्त्तिनी द्विसप्ततिमेवेति

॥१॥ चत्तारि सहस्साइं बत्तीसं चेव होंति नक्खत्ता ।
छच्च सया बावत्तरि महागहा बारससहस्सा ॥

॥२॥ छन्नउइ सयसहस्सा चोयालीसं भवे सहस्साइं ।
चत्तारि सया पुक्खरि तारागणकोडिकोडीणं ॥
सोहं सोहिंस वा ।

तथा–'अब्भिंतरपुक्खरद्धे णं भंते ! केवतिया चंदा ?'इत्यादि प्रश्नः, उत्तरं तु–

॥१॥ 'बावत्तरिं च चंदा बावत्तरिमेव दिनयरा दित्ता।
पुक्खरवरदीवड्ढे चरंति एए पभासिंता ॥

॥२॥ तिन्नि सया छत्तीसा छच्च सहस्सा महग्गहाणं तु ।
नक्खत्ताणं तु भवे सोलाइं दुवे सहस्साइं ॥

॥३॥ अडयाल सयसहस्सा बावीसं खलु भवे सहस्साइं ।
दो य सय पुक्खरद्धे तारागणकोडिकोडीणं ॥
सोभं सोभिंसु वा ३ ।

तथा–'मणुस्सखेत्ते णं भंते ! केवइया चंदा ?'इत्यादि प्रश्नः, उत्तरं तु–

॥१॥ 'बत्तीसं चंदसयं बत्तीसं चेव सूरियाणसयं ।
सयलं मणुस्सलोयं चरंति एए पयासिंता ॥

॥२॥ एक्कारस य सहस्सा छप्पिय सोला महागहाणं तु ।
छच्च सया छन्नउया णक्खत्ता तिन्नि य सहस्सा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ३ ॥ अडसीइ सयसहस्सा चालीस सहस्स मणुयलोगंमि ।
सत्त य सया अणूणा तारागणकोडिकोडीणं ॥
—इत्यादि, किमन्तमिदं वाच्यम्? इत्याह—'जावे'त्यादि, अस्य च सूत्रांशस्यायं पूर्वोऽशः—
॥ १ ॥ 'अट्ठासीइं च गहा अट्ठावीसं च होइ नक्खत्ता ।
एगससीपरिवारो एत्तो ताराण वोच्छामि ॥
छावट्ठि सहस्साइं नव चेव सयाइं पंच सयराइं ति ।

'पुक्खरोदे णं भंते ! समुद्दे केवइया चंदा' इत्यादौ प्रश्ने इदमुत्तरं द्दश्यं—'संखेज्ञा चंदा पभासिंसु वा ३' इत्यादि, 'एवं सव्वेसु दीवसमुद्देसु' त्ति पूर्वोक्तेन प्रश्नेन यथासम्भवं सङ्ख्याता असङ्ख्याताश्च चन्द्रादय इत्यादिना चोत्तरेणेत्यर्थः, द्वीपसमुद्रनामानि चैवं—पुष्करोदसमुद्रादनन्तरो वरुणवरो द्वीपस्ततो वरुणोदः समुद्रः, एवं क्षीरवरक्षीरोदौ घृतवरघृतोदौ क्षोदवरक्षोदोदौ नन्दीश्वर-वरनन्दीश्वरोदौ अरुणारुणोदौ अरुणवरारुणवरोदौ अरुणवरावभासारुणवरावभासोदौ कुण्डलकुण्डलोदौ कुण्डलवरकुण्डलवरोदौ कुण्डलवरावभासकुण्डलवरावभासोदौ रुचकरुचकोदौ रुचकवररुचकवरोदौ रुचकवरावभासरुचकवरावभासोदौ इत्यादीन्यसङ्ख्यातानि, यतोऽसङ्ख्याता द्वीपसमुद्रा इति ॥

शतकं-९—उद्देशकः २-समाप्तः

## —: शतकं-९ उद्देशकः ३-३० :—

**वृ.** द्वितीयोद्देशके द्वीपवरवक्तव्यतोक्ता, तृतीयेऽपि प्रकारामन्तरेण सैवोच्यते, इत्येवंसम्ब-न्धस्यास्येदमादिसूत्रम्—

**मू. (४४४)** *रायगिहे जाव एवं वयासी—, कहि णं भंते ! दाहिणिल्लाणं एगोरुयमणुस्साणं एगोरुयदीवे नामं दीवे पन्नत्ते ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं चुल्लहिमवंतस्स वासहरपव्वयस्स पुरच्छिमिल्लाओ चरिमंताओ लवणसमुद्दं उत्तरपुरच्छिमे णं तिन्नि जोयणसयाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं एगोरुयमणुस्साणं एगोरुयदीवे नामं दीवे पन्नत्ते, तं गोयमा ! तिन्नि जोयणसयाइं आयामविक्खंभेणं नवएक्कोनवन्ने जोयणसए किंचिविसेसूणं परिक्खेवेणं पन्नत्ते ।*

*से णं एगाए पउमवरवेइयाए एगेण य वनसंडेणं सव्वओ समंता संपरिक्खित्ते दोण्हवि पमाणं वन्नओ य, एवं एएणं कमेणं जहा जीवाभिगमे जाव सुद्धदंतदीवे जाव देवलोगपरिग्गहिया णं ते मणुया पन्नत्ता समणासो ! ।*

*एवं अट्ठावीसं अंतरदीवा सएणं २ आयामविक्खंभेणं भाणियव्वा, नवरं दीवे २ उद्देसओ एवं सव्वेवि अट्ठावीसं उद्देसगा भाणियव्वा । सेवं भंते ! सेवं भंते ! त्ति ॥*

**वृ.** 'रायगिहे' इत्यादि, 'दाहिणिल्लाणं' ति उत्तरान्तरद्वीपव्यवच्छेदार्थःम् 'एवं जहा जीवाभि-गमे' त्ति, तत्र चेदमेवं सूत्रं 'चुल्लहिमवंतस्स वासहरपव्वयस्स उत्तरपुरच्छिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणयसाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं एगोरुयमणुस्साणं एगोरुयनामं दीवे पन्नत्ते, तिन्नि जोयणसयाइं आयामविक्खंभेणं नवएगूणपन्ने जोयणसए किंचिविसेसूणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिक्खेवेणं। से णं एगाए पउमवरवेइयाए एगेण य वनसंडेणं सव्वओ समंता संपरिक्खित्ते' इत्यादि, इह च वेदिकावनखण्डकल्पवृक्षमनुष्यमनुष्यीवर्णकोऽभिधीयते, तथा तन्मनुष्याणां चतुर्थःभक्तादाहार्थः उत्पद्यते, ते च पृथिवीरसपुष्पफलाहाराः, तत्पृथिवी च रसतः खण्डादितुल्या, ते च मनुष्या वृक्षगेहाः, तत्र च गेहाद्यभावः, तन्मनुष्याणां च स्थिति पल्योपमासङ्ख्येयभागप्रमाणा, षण्मासावशेषा-युषश्च ते मिथुनकानि प्रसुवते, एकाशीतं च दिनानि तेऽपत्यमिथुनकानि पालयन्ति, उच्छ्वसितादिना च ते मृत्वा देवेषूपद्यन्ते, इत्यादयश्चार्था अभिधीयन्ते इति।

—वाचनान्तरे त्विदं दृश्यते—'एवं जहा जीवाभिगमे उत्तरकुरुवत्तव्वयाए नेयव्वो, नाणत्तं अट्ठधणुसया उस्सेहो चउसट्ठी पिट्ठकरंडया अणुसज्जणा नत्थि'त्ति, तत्रायमर्थः—उत्तरकुरुषु मनुष्याणां त्रीणि गव्यूतान्युत्सेध उक्त इह त्वष्टौ धनुःशतानि, तथा तेषु मनुष्याणां द्वे शते षट्पञ्चाशदधिके पृष्ठकरण्डकानामुक्ते इह तु चतुःषष्ठिरिति, तथा— 'उत्तरकुराए णं भंते ! कुराए कइविहा मणुस्सा अनुसज्जंति ?, गोयमा ! छव्विहा मनुस्सा अनुसज्जंति, तंजहा—पम्हगंधा मियगंधा अममा तेयली सहा सनिंचारी' इत्येवं मनुष्याणामनुषञ्जना तत्रोक्ता इह तु सा नास्ति, तथाविधमनुष्याणां तत्राभावात्, एवं चेह त्रीणि नानात्वस्थानान्युक्तानि, सन्ति पुनरन्यान्यपि स्थित्यादीनि, किन्तु तान्यभियुक्तेन भवानीयानीति, अयं चेहैकोरुकद्वी- पोद्देशकस्तृतीयः।

अथ प्रकृतवाचनामनुसृत्योच्यते—किमन्तमिदं जीवाभिगमसूत्रमिह वाच्यम् ? इत्याह— 'जावे'त्यादि 'यावत् शुद्धदन्दद्वीपः' शुद्धदन्ताभिधानाष्टाविंशतितमान्तरद्वीपवक्तव्यतां यावत्, साऽपि कियद्दूरं यावद्वाच्या ? इत्याह—

'देवलोकपरिग्गहे'त्यादि, देवलोकः परिग्रहो येषां ते देवलोकपरिग्रहाः देवगतिगामिनः इत्यर्थः, इह चैकैकस्मिन्नन्तरद्वीपे एकैक उद्देशकः, तत्र चैकोरुकद्वीपोद्देशकानन्तरमाभासिकद्वीपोद्देशकः, तत्र चैवं सूत्रं—

'कहि णं भंते ! दाहिणिल्लाणं आभासियमणूसाणं आभासिए नामं दीवे पन्नत्ते ?, गोयमा जंबुद्दीवे दीवे चुल्लहिमवंतस्स वासहरपव्वयस्स दाहिणपुरच्छिमिल्लाओ चरिमंताओ लवणसमुद्दं तिन्नि जोयणसयाइं ओगाहित्ता एत्थ णं दाहिणिल्लाणं आभासियनामं दीवे पन्नत्ते' शेषमेकोरुकद्वीपवदिति चतुर्थः। एवं वैषाणिकद्वीपोद्देशकोऽपि नवरं दक्षिणापराच्चरमान्तादिति पञ्चमः ५। एवं लाङ्गूलिकद्वीपोद्देशकोऽपि, नवरमुत्तरापराच्चरमान्तादिति षष्ठः ६। एवं हयकर्णद्वीपोद्देशको नवरमेकोरुकस्योत्तरपौरस्त्याच्चरमान्ताल्लवणसमुद्रं चत्वारि योजनशतान्यवगाह्य चतुर्योजनशतायामविष्कम्भो हयकर्णद्वीपो भवतीति सप्तमः ७। एवं गजकर्णद्वीपोद्देशकोऽपि, नवरं गजकर्णद्वीप आभासिकद्वीपस्य दक्षिणपौरस्त्याच्चरमान्ताल्लवणसमुद्रमवगाह्य चत्वारि योजनशतानि हयकर्णद्वीपसमो भवतीत्यष्टमः ८। एवं गोकर्णद्वीपोद्देशकोऽपि, नवरमसौ वैषाणिकद्वीपस्य दक्षिणापराच्चरमान्तादित नवमः ९। एवं शष्कुलीकर्णद्वीपोद्देशकोऽपि, नवरमसौ लाङ्गूलिकद्वीपस्योत्तरापराच्चरमान्तादिति दशमः १०।

—एवमादर्शमुखद्वीपमेण्ढमुखद्वीपायोमुखद्वीपगोमुखद्वीपा हयकर्णादीनां चतुर्णां क्रमेण पूर्वोत्तरपूर्वदक्षिणदक्षिणापरापरोत्तरेभ्यश्चरमान्तेभ्यः पञ्च योजनशतानि लवणोदधिमवगाह्य

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पञ्चयोजनशतायामविष्कम्भा भवन्ति, तत्प्रतिपादकाश्चान्ये चत्वार उद्देशका भवन्तीति १४। एतेषामेवादर्शमुखादीनां पूर्वोत्तरादिभ्यश्चरमान्तेभ्यः षड् योजनशतानि लवणसमुद्रमवगाह्य षड्योजनशतायामविष्कम्भाः क्र०मेणाश्वमुखद्वीपहस्तिमुखद्वीपसिंहमुखद्वीपव्याघ्रमुखद्वीपा भवन्ति, तत्प्रतिपादकाश्चान्ये चत्वार उद्देशका भवन्तीति १८ एतेषामेवाश्वमुखादीनां तथैव सप्त योजनशतानि लवणसमुद्रगाह्य सप्तयोजनशतायामविष्कम्भा अश्वकर्णद्वीपहस्तिकर्णद्वीप-कर्णद्वीपकर्णप्रावरणद्वीपाः प्रावरणद्वीपा भवन्ति, तत्प्रतिपादकाश्चापरे चत्वार एवोद्देशका इति २२ एतेषामेवाश्वकर्णादीनां तथैवाष्टयोजनशतानि लवणसमुद्रमवगाह्याष्टयोजनशतायामविष्कम्भा उल्कामुखद्वीपमेघमुखद्वीपविद्युन्मुखद्वीपविद्युद्दन्तद्वीपा भवन्ति, तत्प्रतिपादकाश्चान्ये चत्वार एवोद्देशका इति २६।

एतेषामेवोल्कामुखद्वीपादीनां तथैव नव योजनशतानि लवणसमुद्रमवगाह्य नवयोजन-शतायाविष्कम्भाः घनदन्तद्वीपलष्टदन्तद्वीपगूढदन्तद्वीपशुद्धदन्तद्वीपा भवन्ति, तत्प्रतिपादकाश्चान्ये चत्वार एवोद्देशका इति, एवमादितोऽत्र त्रिंशत्तमः शुद्धदन्तोद्देशकः ३० इति ॥

<u>शतकं–९ उद्देशकाः–३-३० समाप्ताः</u>

## शतकं–९ उद्देशकः–३१

**वृ.** उक्तरूपाश्चार्था केवलिधर्माद् ज्ञायन्ते तं चाश्रुत्वाऽपि कोऽपि लाभत इत्याद्यर्थःप्रति-पादनपरमेकत्रिंशत्तममुद्देशकमप्याह, तस्य चेदमादिसूत्रम्–

*मू. (४४५) रायगिहे जाव एवं वयासी–असोच्चा णं भंते ! केवलिस्स वा केवलिसावगस्स वा केवलिसावियाए वा केवलिउवासगस्स वा केवलिउवासियाए वा तप्पक्खियस्स वा तप्पतिक्खय-सावगस्स वा तप्पक्खियसावियाए वा तप्पक्खियउवासगस्स वा तप्पक्खियउवासियाए वा केवलि-पन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! असोच्चा णं केवलिस्स वा जाव तप्पक्खियउवासियाए वा अत्थेगतिए केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए अत्थेगतिए केवलिपन्नत्तं धम्मं नो लभेज्जा सवणयाए।*

*से केणट्ठेणं भंते ! एवं वुच्चइ–असोच्चा णं जाव नो लभेज्जा सवणयाए ?, गोयमा ! जस्स णं नाणावरणिज्जाणं कम्माणं खओवसमे कडे भवइ से णं असोच्चाकेवलिस्स वा जाव तप्प-क्खियउवासियाए वा केवलिपन्नत्तं धम्मं लभेज्ज सवणयाए, जस्स णं नाणावरणिज्जाणंकम्माणं खओवसमे नोकडे भवइ से णं असोच्चा णं केवलिस्स वा जाव तप्पक्खियउवासियाए केवलिपन्नत्तं धम्मं नो लभेज्जा सवणयाए, से तेणट्ठेणं गोयमा ! एवं वुच्चइ–तं चेव जाव नो लभेज्ज सवणयाए।*

*असोच्चा णं भंते ! केवलिस्स वा जाव तप्पक्खियउवासियाए वा केवलं बोहिं बुज्झेज्जा ?, गोयमा ! असोच्चा णं केवलिस्स वा जाव अत्थेगतिए केवलं बोहिं बुज्झेज्जा अत्थेगतिए केवलं बोहिं नो बुज्झेज्जा।*

*से केणट्ठेणं भंते ! जाव नो बुज्झेज्जा ? गोयमा ! जस्स णं दरिसणावरणिज्जाणं कम्माणं खओवसमे कडे भवइ से णं असोच्चाकेवलिस्स वा जाव केवलं बोहिं बुज्झेज्जा, जस्स णं दरिसणाव-रणिज्जाणं कम्माणं खओवसमे नो कडे भवइ से णं असोच्चाकेवलिस्स वा जाव केवलं बोहिं नो*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुज्झेज्जा, से तेणट्ठेणं जाव नो बुज्झेज्जा ।

असोच्चा णं भंते ! केवलिस्स वा जाव तप्पक्खियउवासियाए वा केवलं मुंडे भवित्ता आगाराओ अनगारियं पव्वएज्जा ?, गोयमा ! असोच्चा णं केवलिस्स वा जाव उवासियाए वा अत्थेगतिए केवलं मुंडे भवित्ता आगाराओ अनगारियं पव्वइज्जा अत्थेगतिए केवलं मुंडे भवित्ता अगाराओ अनगारियं नो पव्वएज्जा ।

से केणट्ठेणं जाव नो पव्वएज्जा ?, गोयमा ! जस्स णं धम्मंतराइयाणं कम्माणं खओवसे कडे भवति से णं असोच्चाकेवलिस्स वा जाव केवलं मुंडे भवित्ता अगाराओ अनगारियं पव्वएज्जा, जस्स णं धम्मंतराइयाणं कम्माणं खओवसमे नो कडे भवति से णं असोच्चाकेवलिस्स वा जाव मुंडे भवित्ता जाव नो पव्वएज्जा, से तेणट्ठेणं गोयमा ! जाव नो पव्वएज्जा ।

असोच्चा णं भंते ! केवलिस्स वा जाव उवासियाए वा केवलं बंभचेरवासं आवसेज्जा ?, गोयमा ! असोच्चा णं केवलिस्स वा जाव उवासियाए वा अत्थेगतिए केवलं बंभचेरवासं आवसेज्जा अत्थेगतिए केवलं बंभचेरवासं नो आवसेज्जा, से केणट्ठेणं भंते ! एवं वुच्चइ जाव नो आवसेज्जा ?, गोयमा ! जस्स णं चरित्तावरणिज्जाणं कम्माणं खओवसमे कडे भवइ से णं असोच्चाकेवलिस्स वा जाव केवलं बंभचेरवासं आवसेज्जा, जस्स णं चरित्तावरणिज्जाणं कम्माणं खओवसमे नो कडे भवइ से णं असोच्चाकेवलिस्स वा जाव नो आवसेज्जा, से तेणट्ठेणं जाव नो आवसेज्जा ।

असोच्चा णं भंते ! केवलिस्स वा जाव केवलेणं संजमेणं संजमेज्जा ?, गोयमा ! असोच्चा णं केवलिस्स जाव उवासियाए वा जाव अत्थेगतिए केवलेणं संजमेणं संजमेज्जा अत्थेगतिए केवलेणं संजमेणं नो संजमेज्जा, से केणट्ठेणं जाव नो संजमेज्जा ?, गोयमा ! जस्स णं जयणावरणिज्जाणं कम्माणं खओवसमे कडे भवइ से णं असोच्चा णं केवलिस्स वा जाव केवलेण संजमेणं संजमेज्जा जस्स णं जयणावरणिज्जणं कम्माणं खओवसमे नो कडे भवइ से णं असोच्चाकेवलिस्स वा जाव नो संजमेज्जा, से तेणट्ठेणं गोयमा ! जाव अत्थेगतिए नो संजमेज्जा ।

असोच्चा णं भंते ! केवलिस्स वा जाव उवासियाए वा केवलेणं संवरेणं संवरेज्जा ?, गोयमा असोच्चाणं केवलिस्स जाव अत्थेगतिए केवलेणं संवरेणं संवरेज्जा अत्थेगतिए केवलेणं जाव नो संवरेज्जा, से केणट्ठेणं जाव नो संवरेज्जा ?, गोयमा ! जस्स णं अज्झवसाणावरणिज्जाणं कम्माणं खओवसमे कडे भवइ से णं असोच्चाकेवलिस्स वा जाव केवलेणं संवरेणं संवरेज्जा, जस्स णं अज्झवसाणावरणिज्जाणं कम्माणं खओवसमे नो कडे भवइ से णं असोच्चाकेवलिस्स वा जाव नो संवरेज्जा, से तेणट्ठेणं जाव नो संवरेज्जा ।

असोच्चा णं भंते ! केवलिस्स जाव केवलं आभिनिबोहियनाणं उप्पाडेज्जा ?, गोयमा ! असोच्चाणं केवलिस्स वा जाव उवासियाए वा अत्थेगतिए केवलं आभिनिबोहियनाणं उप्पाडेज्जा अत्थेगइए केवलं आभिनिबोहियनाणं नो उप्पाडेज्जा, से केणट्ठेणं जाव नो उप्पाडेज्जा ?, गोयमा जस्स णं आभिनिबोहियनाणावरणिज्जा णं कम्माणं खओवसमे कडे भवइ से णं असोच्चाकेवलिस्स वा जाव केवलं आभिनोबोहियनाणं उप्पाडेज्जा, जस्स णं आभिनिबोहियनाणं नो उप्पाडेज्जा से तेणट्ठेणं जाव नो उप्पाडेज्जा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*असोच्चा णं भंते! केवलि० जाव केवलं सुयनाणं उप्पाडेज्ञा एवं जहा आभिनिबोहियनाणस्स वत्तव्वया भणिया तहा सुयनाणस्सवि भाणियव्वा, नवरं सुयनाणावरणिज्ञाणं कम्माणं खओवसमे भाणियव्वे। एवं चेव केवलं ओहिनाणं भाणियव्वं, नवरं ओहिनाणावरणिज्ञाणं कम्माणं खओवसमे भाणियव्वे, एवं केवलं मणपज्ञनाणं उप्पाडेज्ञा, नवरं मणपज्ञवणनणावरणिज्ञाणं कम्माणं खओवसमे भाणियव्वे।*

*असोच्चा णं भंते! केवलिस्स वा जाव तप्पक्खियउवासियाए वा केवलनाणं उप्पाडेज्ञा, एवं चेव नवरं केवलनाणावरणिज्ञाणं कम्माणं खए भाणियव्वे, सेसं तं चेव, से तेणट्ठेणं गोयमा एवं वुच्चइ जाव केवलनाणं उप्पाडेज्ञा।*

*असोच्चा णं भंते! केवलिस्स वा जाव तप्पक्खियउवासियाए वा केवलिपन्नत्तं धम्मं लभेज्ञा सवणयाए केवलं बोहिं बुज्झेज्ञा केवलं मुंडे भवित्ता आगाराओ अनगारियं पव्वएज्ञा केवलं बंभचेरवासं आवसेज्ञा केवलेणं संजमेणं संजमेज्ञा केवलेणं संवरेणं संवरेज्ञा केवलं आभिनिबोहियनाणं उप्पाडेज्ञा जाव केवलं मणपज्ञवनाणं उप्पाडेज्ञा केवलनाणं उप्पाडेज्ञा?, गोयमा! असोच्चाणं केवलिस्स वा जाव उवासियाए वा अत्थेगतिए केवलिपन्नत्तं धम्मं लभेज्ञा सवणयाए अत्थेगतिए केवलिपन्नत्तं धम्मं नो लभेज्ञा सवणयाए अत्थेगतिए केवलं बोहिं बुज्झेज्ञा अत्थेगतिए केवलं बोहिं नो बुज्झेज्ञा अत्थेगतिए केवलं मुंडे भवित्ता आगाराओ अनगारियं पव्वएज्ञा अत्थेगतिए जाव नो पव्वएज्ञा अत्थेगतिए केवलं बंभचेरवासं आवसेज्ञा अत्थेगतिए केवलं बंभचेरवासं नो आवसेज्ञा अत्थेगतिए केवलेणं संजमेणं संजमेज्ञा अत्थेगतिए केवलेणं संजमेणं नो संजमेज्ञा एवं संवरेणवि, अत्थेगतिए केवलं आभिनिबोहियनाणं उप्पाडेज्ञा अत्थेगतिए जाव नो उप्पाडेज्ञा, एवं जाव मणपज्ञवनाणं, अत्थेगतिए केवलनाणं उप्पाडेज्ञा अत्थेगतिए केवलनाणं नो उप्पाडेज्ञा।*

*से केणट्ठेणं भंते! एवं वुच्चइ असोच्चाणं तं चेव जाव अत्थेगतिए केवलनाणं नो उप्पाडेज्ञा?, गोयमा! जस्स णं नाणावरणिज्ञाणं कम्माणं खओवसमे नो कडे भवइ १ जस्स णं दरिसणावरणिज्ञाणं कम्माणं खओवसमे नो कडे भवइ २ जस्स णं धम्मंतराइयाणं कम्माणं खओवसमे नो कडे भवइ ३ एवं चरित्तावरणिज्ञाणं ४ जयणावरणिज्ञाणं ५ अज्झवसाणावरणिज्ञाणं ६ आभिनिबोहियनाणावरणिज्ञाणं ७ जाव मणपज्ञवनाणावरणिज्ञाणं कम्माणं खओवसमे नो कडे भवइ १० जस्स णं केवलनाणावरणिज्ञाणं जाव खए नो कडे भवइ ११।*

*—से णं असोच्चाकेवलिस्स वा जाव केवलिपन्नत्तं धम्मं नो लभेज्ञा सवणयाए केवलं बोहिं नो बुज्झेज्ञा जाव केवलनाणं नो उप्पाडेज्ञा, जस्स णं नाणावरणिज्ञाणं कम्माणं खओवसमे भवति जस्स णं दरिसणावणिज्ञाणं कम्माणं खओवसमे कडे भवइ जस्स णं धम्मंतराइयाणं एवं जाव जस्स णं केवलनाणावरणिज्ञाणं कम्माणं खए कडे भवइ से णं असोच्चाकेवलिस्स वा जाव केवलिपन्नत्तं धम्मं लभेज्ञा सवणयाए केवलं बोहिं बुज्झेज्ञा जाव केवलनाणं उप्पाडेज्ञा॥*

**वृ.** 'रायगिहे' इत्यादि, तत्र च 'असोच्च'त्ति अश्रुत्वा—धर्म्मफलादिप्रतिपादकवचनमनाकर्ण्य प्राक्कृतधर्म्मानुरागादेवेत्यर्थः 'केवलिस्स व'त्ति 'केवलिनः' जिनस्य 'केवलिसावगस्स व'त्ति केवली येन स्वयमेव पृष्टः श्रुतं वा येन तद्वचनमसौ केवलिश्रावकस्तस्य 'केवलिउवासगस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व'त्ति केवलिन उपासनां विदधानेन केवलिनैवान्यस्य कथ्यमानं श्रुतं येनासौ केवल्युपासकः 'तप्पक्खियस्स'त्ति केवलिनः पाक्षिकस्य स्वयंबुद्धस्य 'धम्मं'ति श्रुत्रचारित्ररूपं 'लभेज्ज'त्ति प्राप्नुयात् 'सवणयाए'त्ति श्रवणतया श्रवणरूपतया श्रोतुमित्यर्थः।

'नाणावरणिज्जाणं'ति बहुवचनं ज्ञानावरणीयस्य मतिज्ञानावरणादिभेदेनावग्रहमत्यावरणादिभेदेन च बहुत्वात्, इह च क्षयोपशमग्रहणात् मत्यावरणाद्येव तद् ग्राह्यं न तु केवलावरणं तत्र क्षयस्यैव भावात्, ज्ञानावरणीयस्य क्षयोपशमश्च गिरिसरिदुपलघोलनान्यायेनापि कस्यचित्स्यात्, तत्सद्भावे चाश्रुत्वाऽपि धर्म्म लभते श्रोतुं, क्षयोपशमस्यैव तल्लाभेऽन्तरङ्गकारणत्वादिति।

'केवलं बोहिं'ति शुद्धं सम्यग्दर्शनं 'बुज्झेज्ज'त्ति बुद्धयेतानुभवेदित्यर्थः यथा प्रत्येकबुद्धादि, एवमुत्तरत्राप्युदाहर्त्तव्यं, 'दरिसणावरणिज्जाणं'ति इह दर्शनावरणीयं दर्शमोहनीयमभिगृह्यते, बोधेः सम्यग्दर्शनपर्यायत्वात् तल्लाभस्य च तत्क्षयोपशमजन्यत्वादिति।

'केवलं मुंडे भवित्ता आगाराओ अनगारियं'ति 'केवलां' शुद्धां सम्पूर्णां वाऽनगारितामिति योगः 'धम्मंतराइयाणं'ति अन्तरायो-विघ्नः सोऽस्ति येषु तान्यन्तरायिकाणि धर्म्मस्य-चारित्रप्रतिपत्तिलक्षणस्यान्तरायिकाणि धर्म्मान्तरायिकाणि तेषां वीर्यान्तरायचारित्रमोहनीयभेदानामित्यर्थः, 'चारित्तावरणिज्जाणं'ति, इह वेदलक्षणानि चारित्रावरणीयानि विशेषतो ग्राह्याणि, मैथुनविरतिलक्षणस्य ब्रह्मचर्यवासस्य विशेषतस्तेषामेवावारकत्वात्।

'केवलेणं संजमेण् संजमेज्ज'त्ति इह संयमः प्रतिपन्नचरित्रस्य तदतिचारपरिहाराय यतनाविशेषः, 'जयणावरणिज्जाणं'ति इह तु यतनावरणीयानि चारित्रविशेषविषयीवीर्यान्तरायलक्षणानिमन्तव्यानि 'अज्झवसाणावरणिज्जाणं'ति संवरशब्देन शुभाध्यवसायवृत्तेर्विक्षितत्वात् तस्याश्च भावचारित्ररूपत्वेन तदावरणक्षयोपशमलभ्यत्वात् अध्यवसानावरणीयशब्देनेह भावाचारित्रावरणीयान्युक्तानीति।

पूर्वोक्तानेवार्थान पुनः समुदायनाह-'असोच्चा णं भंते!'इत्यादि॥ अथाश्रुत्वैव केवल्यादिवचनं यथा कश्चित् केवलज्ञानमुत्पादयेत्तथा दर्शयितुमाह-

**मू. (४४६)** *तस्स णं भंते! छट्ठंछट्ठेणं अनिक्खित्तेणं तवोकम्मेणं उड्ढं बाहाओ पगिज्झिय पगिज्झिय सूराभिमुहस्स आयावणभूमीए आयावेमाणस्स पगतिभद्दयाए पगइउवसंतयाए पगतिपयणुकोहमाणमायालोभयाए मिउमद्दवसंपन्नयाए अल्लीवणयाए भद्दयाए विनीययाए अन्नया कयाइ सुभेणं अज्झवसाणेणं सुभेणं परिणामेणं लेस्साहिं विसुज्झमाणीहिं २ तयावरणिज्जाणं कम्माणं खओवसमेणं ईहापोहमग्गणगवेसणं करेमाणस्स विब्भंगे नामं अन्नाणे समुप्पज्जइ।*

*से णं तेणं विब्भंगनाणेणं समुप्पन्नेणं जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं असंखेज्जाइं जोयणसहस्साइं जाणइ पासइ।*

*से णं तेणं विब्भंगनाणेणं समुप्पन्नेणं जीवेवि जाणइ अजीवेवि जाणइ पासंडत्थे सारंभे सपरिग्गहे संकिलिस्समाणेवि जाणइ विसुज्झमाणेवि जाणइ से णं पुव्वामेव सम्मत्तं पडिवज्जइ संमत्तं पडिवज्जित्ता समणधम्मं रोएति समणधम्मं रोएत्ता चरित्तं पडिवज्जइ चरित्तं पडिवज्जित्ता लिंगं पडिवज्जइ, तस्स णं तेहिं मिच्छत्तपज्जवेहिं परिहायमाणेहिं २ सम्मदंसणपज्जवेहिं परिवड्ढमाणेहिं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*२ से विब्भंगे अन्नाणे सम्मत्तपरिग्गहिए खिप्पामेव ओही परावत्तइ ॥*

**वृ.** 'तस्से'त्यादि 'तस्स' त्ति योऽश्रुत्वैव केलज्ञानमुत्पादयेत्तस्य कस्यापि 'छट्ठंछट्ठेण'-मित्यादि च यदुक्तं तत्रायः षष्ठतपश्चरणवतो बालतपस्विनो विभङ्गः–ज्ञानविशेष उत्पद्यत इति ज्ञापनार्थःमिति, 'पगिज्झिय' त्ति प्रगृह्य धृत्वेत्यर्थः 'पगतिभद्दयाए' इत्यादीनि तु प्राग्वनत्, 'तयावरणि- ज्जाणं' ति विभङ्गज्ञानावरणीयानाम् 'ईहापोहमग्गणगवेसणं करेमाणस्स' त्ति इहेहा–सदर्थाभिमुखा ज्ञानचेष्टा अपोहस्तु–विपक्षनिरासः मार्गणं च–अन्वयधर्म्मालोचनं गवेषणं तु–व्यतिरेकधर्मा- लोचनमिति 'से णं' ति असौ बालतपस्वी 'जीवेवि जाणइ' त्ति कथञ्चिदेव न तु साक्षात् मूर्त्तगोचरत्वा- त्तस्य 'पासंडत्थे' त्ति व्रतस्थान् 'सारंभे सपरिग्गहे' त्ति सारम्भान् सपरिग्रहान् सतः, किंविधान् जानाति ? इत्याह–

'संकिलिस्समाणेवि जाणइ' त्ति महत्या सङ्क्लिश्यमानतया सङ्क्लिश्यमानानपि जानाति 'विसुज्झमाणेवि जाणइ' त्ति अल्पीयस्याऽपि विशुद्ध्यमानतया विशुद्ध्यमानानपि जानाति, आरम्भादिमतामेवंस्वरूपत्वात्, 'से णं' ति असौ विभङ्गज्ञानी जीवाजीवस्वरूपपाषण्डस्थसङ्क्लि- श्यमानतादिज्ञायकः सन् 'पुव्वामेव' त्ति चारित्रप्रतिपत्तेः पूर्वमेव 'सम्मत्तं' ति सम्यगभावं 'समण- धम्मं' ति साधुधर्म्मं 'रोएइ' त्ति श्रद्धत्ते चिकीर्षति वा 'ओही परावत्तइ' त्ति अवधिर्भवतीत्यर्थः, इह च यद्यपि चारित्रप्रतिपत्तिमादावभिधाय सम्यक्त्वपरिगृहीतं विभङ्गज्ञानमवधिर्भवतीति पश्चादुक्तं तथाऽपि चारित्रप्रतिपत्तेः पूर्वं सम्यक्त्वप्रतिपत्तिकाल एव विभङ्गज्ञान्यावधिभावो द्रष्टव्यः, सम्यक्त्व- चारित्रभावे विभङ्गज्ञानस्याभावादिति ।

अथैनमेव लेश्यादिभिर्निरूपयन्नाह–

**मू. (४४७)** *से णं भंते ! कतिलेस्सासु होज्जा ?, गोयमा ! तिसु विसुद्धलेस्सासु होज्जा, तंजहा–तेउलेस्साए पम्हलेस्साए सुक्कलेस्साए ।*

*से णं भंते ! कतिसु नाणेसु होज्जा ?, गोयमा ! तिसु आभिनिबोहियनाणसुयनाणओहिनाणेसु होज्जा ।*

*से णं भंते ! किं सजोगी होज्जा अजोगी होज्जा ?, गोयमा ! सजोगी होज्जा नो अजोगी होज्जा, जइ सजोगी होज्जा किं मणजोगी होज्जा वइजोगी होज्जा कायजोगी होज्या ?, गोयमा ! मणजोगी वा होज्जा वइजोगी वा होज्जा कायजोगी वा होज्जा*

*से णं भंते ! किं सागरोवउत्ते होज्जा अनागारोवउत्ते होज्जा ?, गोयमा ! सागारोवउत्ते वा होज्जा अनागारोवउत्ते वा होज्जा ।*

*से णं भंते ! कयरंमि संघयणे होज्जा ?, गोयमा ! वइरोसभनारायसंघयणे होज्जा ।*

*से णं भंते ! कयरंमि संठाणे होज्जा ?, गोयमा ! छण्हं संठाणाणं अन्नयरे संठाणे होज्जा ।*

*से णं भंते ! कयरंमि उच्चत्ते होज्जा ?, गोयमा ! जहन्नेणं सत्त रयणी उक्कोसेणं पंचधनुसतिए होज्जा ।*

*से णं भंते ! कयरंमि आउए होज्जा ?, गोयमा ! जहन्नेणं सातिरेगट्ठवासाउए उक्कोसेणं पुव्वकोडिआउए होज्जा ।*

*से णं भंते ! किं सवेदए होज्जा अवेदए होज्जा ?, गोयमा ! सवेदए होज्जा नो अवेदए होज्जा,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जइ सवेदए होज्ञा किं इत्थीवेयए होज्ञा पुरिसवेदए होज्ञा नपुंसगवेदए होज्ञा पुरिसनपुंसगवेदए होज्ञा ?, गोयमा ! नो इत्थिवेदए होज्ञा पुरिसवेदए वा होज्ञा नो नपुसंगवेदए होज्ञा पुरिसनपुंसगवेदए वा होज्ञा ।*

*से णं भंते ! किं सकसाई होज्ञा अकसाई होज्ञा ?, गोयमा ! सकसाई होज्ञा नो अकसाई होज्ञा, जई सकसाई होज्ञा से णं भंते ! कतिसु कसाएसु होज्ञा ?, गोयमा ! चउसु संजलण-कोहमाणमायालोभेसु होज्ञा ।*

*तस्स णं भंते ! केवतिया अज्झवसाणा पन्नत्ता ?, गोयमा ! असंखेज्ञा अज्झवसाणा पन्नत्ता, ते णं भंते ! पसत्था अप्पसत्था ?, गोयमा ! पसत्था नो अप्पसत्था ।*

*से णं भंते ! तेहिं पसत्थेहिं अज्झवसाणेहिं वट्टमाणेहिं अनंतेहिं नेरइयभवग्गहणेहिंतो अप्पाणं विसंजोइए अणंतेहिं तिरिक्खजोणियजाव विसंजोएइ अणंतेहिं मणुस्सभवग्गहणेहिंतो अप्पाणं विसंजोएइ अणंतेहिं तिरिक्खजोणियजाव विसंजोएइ अणंतेहिं मणुस्सभवग्गहणेहिंतो अप्पाणं विसंजोएइ अणंतेहिं देवभवग्गहणेहिंतो अप्पाणं विसंजोएइ ।*

*जाओवि य से इमाओ नेरइयतिरिक्खजोणियमणुस्सदेवगतिनामाओ चत्तारि उत्तरपयडीओ तासिं च णं उवग्गहिए अणंताणुबंधी कोहमाणायालोभे खवेइ अणं० २ अपच्चक्खाणकसाए कोहमाणमायोलेभ खवेइ अणं० २ अपच्चक्खाणकसाए कोहमाणमायालोभे खवेइ अप्प० २ पच्चक्खाणावरणकोहमाणमायालोभे खवेइ पच्च० २ संजलणकोहमाणमायाभे कवेइ संज० २ पंचविहं नाणाव० नवविवंह दरिसणाव० पंचविहमंतराइयं तालमत्थकडं च णं मोहणिज्जं कट्टु कम्मरयविकरणकरं अपुव्वकरणं अणुपविट्ठस्स अणंते अणुत्तरे निव्वाधाए निरावरणे कसिणे पडिपुन्ने केवलवरनाणदंसणे समुप्पन्ने ।*

**वृ.** 'से णं भंते !'इत्यादि, तत्र 'से णं'ति स यो विभङ्गज्ञानी भूत्वाऽवधिज्ञानं चारित्रं च प्रतिपन्नः 'तिसु विसुद्धलेस्सासु होज्ज'त्ति यतो भावलेश्यासु प्रशस्तास्वेव सम्यक्त्वादि प्रतिपद्यते नाविसुद्धास्विति ।

'तिसु आभिनिबोहिए'त्यादि, सम्यक्त्वमतिश्रुतावधिज्ञानिनां विभङ्गविनिवर्त्तनकाले तस्य युगपद्भावादाद्ये ज्ञानत्रय एवासौ तदा वर्त्तत इति ।

'नो अजोगी होज्ज'त्ति अवधिज्ञानकालेऽयोगित्वस्याभावात्, 'मणजोगी'त्यादि चैकतरयोगप्रधान्यापेक्षयाऽवगन्तव्यं ।

'सागारोवउत्ते वे'त्यादि, तस्य हि विभङ्गज्ञानान्निवर्त्तमानस्योपयोगद्वयेऽपि वर्त्तमानस्य सम्यक्त्वावधिज्ञानप्रतिपत्तिरस्तीति, ननु 'सव्वाओ लद्धीओ सागारोवओगोवउत्तस्स भवंती'-त्यागमादनाकारोपयोगे सम्यक्त्वावधिलब्धिविरोधः ?, नैवं, प्रवर्द्धमानपरिणामजी- वविषयत्वात् तस्यागमस्य, अवस्थितपरिणामापेक्षया चानाकारोपयोगेऽपि लब्धिलाभस्य सम्भवादिति ।

'वइरोसभनारायसंघयणे होज्ज'त्ति प्राप्तव्यकेवलज्ञानत्वात्तस्य, केवलज्ञानप्राप्तिश्च प्रथमसंहनन एव भवतीति, एवमुत्तरत्रापीति ।

5 | 30

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सवेयए होज्ञ' त्ति विभङ्गस्यावधिभावकाले न वेदक्षयोऽस्तीत्यसौ सवेद एव, 'नो इत्थिवेयए होज्ञ' त्ति स्त्रिया एवंविधस्य व्यतिकरस्य स्वभावत् एवाभावात् 'पुरिसनपुंसगवेयए' त्ति वर्द्धितकत्वादित्वे नपुंसकः पुरुषनपुंसकः।

'सकसाई होज्ञ' त्ति विभङ्गावधिकाले कषायक्षयस्याभावादृत 'चउसु संजलणकोहमाण-मायालोभेसु होज्ञ' त्ति स ह्यवधिज्ञानतापरिणतविभङ्गज्ञानश्चरणं प्रतिपन्नः उक्तः, तस्य च तत्काले चरणयुक्तत्वात्सञ्ज्वलना एव क्रोधादयो भवन्तीति।

'पसत्थ' त्ति विभङ्गस्यावधिभावो हि नाप्रशस्ताध्यवसानस्य भवतीत्यत उक्तं–प्रशस्तान्य-ध्यवसायस्थानानीति। 'अनंतेहिं' ति 'अनन्तैः' अनन्तानागतकालभाविभिः 'विसंजोएइ' त्ति विसंयोजयति, तत्प्राप्तियोग्यताया अपनोदादिति।

'जाओऽविय' त्ति यापि च 'नेरइयतिरिक्खजोणियमणुस्सदेवगतिनामाओ' त्ति एतदभि-धानाः 'उत्तरपयडीओ' त्ति नामकर्माभिधानाया मूलप्रकृतेरुत्तरभेदभूताः 'तासिं च णं' ति तासां च नैरयिकगत्याद्युत्तरप्रकृतीनां चशब्दादन्यासां च 'उवग्गहिए' त्ति औपग्रहिकान्–उपष्टम्भ-प्रयोजनान् अनन्तानुबन्धिनः क्रोधमानमायालोभान् क्षपयति, तथाऽप्रत्याख्यानादींश्च तथाविधानेव क्षपयतीति, 'पंचविहं नाणावरणिज्ञं' ति मतिज्ञानावरणादिभेदात् 'नवविहं दंसणावरणिज्ञं' ति चक्षुर्दर्शनाद्या- वरणचतुष्कस्य निद्रापञ्चकस्य च मीलनान्नवविधत्वमस्य 'पंचविहं अंतराइयं' ति दानलाभ- भोगोपभोगवीर्यविशेषितत्वादिति पञ्चविधत्वमन्तरायस्य, तत्र क्षपयतीति सम्बन्धः किं कृत्वा? इत्यत आह–

'तालमत्थकडं च णं मोहणिज्ञं कट्टु' त्ति मस्तकं–मस्तकशूची कृतं–छिन्नं यस्यासौ मस्तक-कृत्तः, तालश्चासौ मस्तककृत्तश्च तालमस्तककृत्तः, छान्दसत्वाच्चैवं निर्देशः, तालमस्तककृत्त इव यत्तत्तालमस्तककृत्तम्, अयमर्थः–छिन्नमस्तकतालकल्पं च मोहनीयं कृत्वा, यथा हि छिन्नमस्त-कस्तालः क्षीणो भवति एवं मोहनीयं च क्षीणं कृत्वेति भावः, इदं चोक्तमोहनीयभेदशेषापेक्षया द्रष्टव्यमिति, अथवाऽथ कस्मादनन्तानुबन्ध्यादिस्वभावे तत्र क्षपिते सति ज्ञानावरणीयादि क्षपयत्येव? इति, अत आह–

'तालमत्थे' त्यादि, तालमस्तकस्येव कृत्वं–क्रिया यस्य तत्तालमस्तककृत्वं तदेवंविधं च मोहनीयं 'कट्टु' त्ति इतिशब्दस्येह गम्यमानत्वादितिकृत्वा–इतिहेतोस्तत्र क्षपिते ज्ञानावरणीयादि क्षपयत्येवेति, तालमस्तमोहनीययोश्च क्रियासाधर्म्यमेव, यथा हि तालमस्तकविनाशक्रियाऽ-वश्यम्भावितालविनाशा एवं मोहनीयकर्मविनाशक्रियाऽप्यवश्यम्भाविशेषकर्म्मविनाशेति, आह च–

॥१॥ "मस्तकसूचिविनाशे तालस्य यथा ध्रुवो भवति नाशः।
तद्वत्कर्मविनासोऽपि मोहनीयक्षये नित्यम्॥"

ततश्च कर्मरजोविकरणकरं–तद्विक्षेपकम् अपूर्वकरणम्–असदृशाध्यवसायविशेषम-नुप्रविष्टस्य, अनन्तं विषयानन्त्यात् अनुत्तरं सर्वोत्तमत्वात् निव्याघातं कटकुट्यादिभिरप्रतिहननात् निरावरणं सर्वथा स्वावरणक्षयात् कृत्स्नं सकलार्थःग्राहकत्वात् प्रतिपूर्णं सकलस्वांशयुक्त-तयोत्पन्नत्वात् केवलवरज्ञानदर्शनं–केवलमभिधानतो वरं ज्ञानान्तरापेक्षया ज्ञानं च दर्शनं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानदर्शनं समाहारद्वन्द्वस्ततः केवलादीनां कर्मधारयः । इह च क्षपणाक्रमः--

॥१॥ अणमिच्छमीससम्मं अट्ठ नपुंसित्थिवेयछक्कं च ।
पुमवेयं च खवेई कोहाईए य संजलणे ॥"

इत्यादिग्रन्थान्तरप्रसिद्धो, न चायमिहाश्रितो यथा कथञ्चित्क्षपणामात्रस्यैव विवक्षितत्वादिति

**मू. (४४८)** *से णं भंते ! केवलिपन्नत्तं धम्मं आधवेज्ज वा पन्नवेज्ज वा परूवेज्ज वा ?, नो तिणट्ठे समट्ठे, णन्नत्थ एगन्नाएण वा एगवागरणेण वा ।*

*से णं भंते ! पव्वावेज्ज वा मुंडावेज्जवा ?, नो तिणट्ठे समट्ठे, उवदेसं पुण करेज्जा, से णं भंते सिज्झति जाव अंतं करेति ?, हंता सिज्झति जाव अंतं करेति ।*

**वृ.** 'आघवेज्ज' त्ति आग्राहयेच्छिष्यान् अर्थापयेद्वा--प्रतिपादनतः पूजां प्रापयेत् 'पन्नवेज्ज' त्ति प्रज्ञापयेद्भेदभणनतो बोधयेद्वा 'परूवेज्ज' त्ति उपपत्तिकथनतः 'नन्नत्थ एगनाएण व' त्ति न इति योऽयं निषेधः सोऽन्यत्रैकज्ञाताद्, एकमुदाहरणं वर्जयित्वेत्यर्थः, तथाविधकल्पत्वादस्येति, 'एगवागरणेण व' त्ति एकव्याकरणादेकोत्तरादित्यर्थः 'पव्वावेज्जा व' त्ति प्रव्राजयेद्रजोहरणादिद्रव्य-लिङ्गदानतः 'मुंडावेज्ज व' त्ति मुण्डयेच्छिरोलुञ्चनतः 'उवएसं पुण करेज्ज' त्ति अमुष्य पार्श्वे प्रव्रजेत्या-दिकमुपदेशं कुर्यात् ।

**मू. (४४९)** *से णं भंते ! किं उड्ढं होज्जा अहे होज्जा तिरियं होज्जा ?, गोयमा ! उड्ढं वा होज्जा अहे वा होज्जा तिरियं वा होज्जा, उड्ढं होज्जमाणे सद्दावइ वियडावइ गंधावइ मालवंतपरियाएसु वट्टवेयड्ढपव्वएसु होज्जा, साहरणं पडुच्च सोमनसवने वा पंडगवने वा होज्जा, अहे होज्जमाणे गड्डाए वा दरीए वा होज्जा, साहरणं पडुच्च पायाले वा भवणे वा होज्जा, तिरियं होज्जमाणे पन्नरससु कम्मभूमीसु होज्दा, साहरणं पडुच्च अड्ढाइज्जे दीवसमुद्दे तदेक्कदेसभाए होज्जा ।*

*ते णं भंते ! एगसमएणं केवतिया होज्जा ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं दस, से तेणट्ठेणं गोयमा ! एवं वुच्चइ असोच्चा णं केवलिस्स वा जाव अत्थेगतिए केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए अत्थेगतिए केवलनाणं नो उप्पाडेज्जा ।*

**वृ.** 'सद्दावई' त्यादि, शब्दापातिप्रभृतयो यथाक्रमं जम्बूद्वीपप्रज्ञप्त्यभिप्रायेण हैमवत-हरिवर्षरम्यकैरण्यवतेषु क्षेत्रसमासाभिप्रायेण तु हैमवतैर्ण्यवतहरिवर्षरम्यकेषु भवन्ति, तेषु च तस्य भाव आकाशगमनलब्धिसम्पन्नस्य तत्र गतस्य केवलज्ञानोत्पादसद्भावे सति, 'साहरणं पडुच्च' त्ति देवेन नयनं प्रतीत्य ।

'सोमनसवने' त्ति सौमनसवनं मेरौ तृतीयं 'पंडगवने' त्ति मेरौ चतुर्थः 'गड्डाए व' त्ति गर्त्ते--निम्ने भूभागेऽधोलोकग्रामादौ 'दरिए व' त्ति तत्रैव निम्नतरप्रदेशे 'पायाले व' त्ति महापातालकलशे वलयामुखादौ 'भवणे व' त्ति भवनवासिदेवनिवासे ।

'पन्नरससु कम्मभूमीसु' त्ति पञ्च भरतानि पञ्च ऐरवतानि पञ्च महाविदेहा इत्येवंलक्षणासु कर्माणिकृषिवाणिज्यादीनि तत्प्रधाना भूमयः कर्म्मभूमयस्तासु 'अड्ढाइज्जे' त्यादि अर्द्ध तृतीयं येषां तेऽर्द्धतृतीयास्ते च ते द्वीपाश्चेति समासः, अर्द्धतृतीयद्वीपाश्च समुद्रौ च तत्परिमितावर्द्धतृतीयद्वीप-समुद्रास्तेषां स चासौ विवक्षितो देशरूपो भागः--अंशोऽर्द्धतृतीयद्वीप- समुद्रतदेकदेशभागस्तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तरं केवल्यादिवचनाश्रवणे यत्स्यात्तदुक्तमथ तच्छ्रवणे यत्स्यात्तदाह--

**मू. (४५०)** *सोच्चाणं भंते ! केवलिस्स वा जाव तप्पक्खियउवासियाए वा केवलिपन्नत्तं धम्मं लभेज्ञा सवणयाए ?, गोयमा ! सोच्चाणं केवलिस्स वा जाव अत्थेगतिए केवलिपन्नत्तं धम्मं एवं जाव चेव असोच्चाए वत्तव्वया सा चेव सोच्चाएवि भाणियव्वा, नवरं अभिलावो सोच्चेति, सेसं तं चेव निरवसेसं जाव जस्स णं मणपज्ञवनाणवरणिज्ञाणं कम्माणं खओवसमे कडे भवइ जस्स णं केवलनाणावरणिज्ञाणं कम्माणं खए कडे भवइ ।*

*से णं सोच्चाकेवलिस्स वा जाव उवासियाए वा केवलिपन्नत्तं धम्मं लब्भइ सवणयाए केवलं बोहिं बुज्झेज्ञा जाव केवलनाणं उप्पाडेज्ञा, तस्स णं अट्ठमंअट्ठमेणं अनिक्खित्तेणं तवोकम्मेणं अप्पाणं भावेमाणस्स पगइभद्दयाए तहेव जाव गवेसणं करेमाणस्स ओहिणाणे समुप्पज्ञइ, से णं तेणं ओहिनाणेणं समुप्पन्नेणं जहन्नेणं अंगुलस्स असंखेज्ञइभागं उक्कोसेणं असंखेज्ञाइं अलोए लोयप्पमाणमेत्ताइं खण्डाइं जाणइ पासइ ।*

*से णं भंते ! कतिसु लेस्सासु होज्ञा ?, गोयमा ! छसु लेस्सासु होज्जा, तंजहा--कण्हलेसाए जाव सुक्कलेसाए ।*

*से णं भंते ! कतिसु नाणेसु होज्ञा ?, गोयमा ! तिसु वा चउसु वा होज्ञा, तिसु होज्ञमाणे तिसु आभिनिबोहियनाणसुयनाणओहिनाणेसु होज्ञा, चउसु होज्ञा माणे आभि० सुय० ओहि० मणप० होज्ञा ।*

*से णं भंते ! किं सयोगी होज्ञा अयोगी होज्ञा ?, एवं जोगोवओगो संघयणं संठाणं उच्चत्तं आउयं च, एयाणि सव्वाणि जहा असोच्चाए तहेव भाणियव्वाणि ।*

*से णं भंते ! किं सवेदए० ? पुच्छा, गोयमा ! सवेदए वा होज्ञा अवेदए वा, जइ अवेदए होज्ञा किं उवसंतवेयए होज्ञा खीणवेयए होज्ञा ?, गोयमा ! नो उवसंतवेदए होज्ञा खीणवेदए होज्ञा, जइ सवेदए होज्ञा किं इत्थीवेदए होज्ञा पुरिसवेइए होज्ञा नपुंसगवेदए वा होज्ञा पुरिसनपुंसगवेदए होज्ञा ?, पुच्छा, गोयमा ! इत्थीवेदए वा होज्ञा पुरिसवेदए वा होज्ञा पुरिसनपुंसगवेदए होज्ञा ।*

*से णं भंते ! किं सकसाई होज्ञा अकसाई वा होज्ञा ?, गोयमा ! सकसाई वा होज्ञा अकसाई वा होज्ञा, जई अकसाई होज्ञा किं उवसंतकसाई होज्ञा खीणकसाई होज्ञा ?, गोयमा नो उवसंतकसाई होज्ञा खीणकसाई होज्ञा,*

*जई सकसाई होज्ञा । से णं भंते ! कतिसु कसाएसु होज्ञा ?, गोयमा ! चउसु वा दोसु वा एक्कंमि वा होज्ञा, चउसु होज्ञमाणे चउसु संजलणकोहमाणमायालोभेसु होज्ञा, तिसु होज्ञमाणे तिसु संजलणमाणमायालोभेसु होज्ञा, दोसु होज्ञमाणे दोसु संजलणमायालोभेसु होज्ञा, एगंमि होज्ञमाणे एगंमि संजलणे लोभे होज्ञा ।*

*तस्स णं भंते ! केवतिया अज्झवसाणा पन्नत्ता ?, गोयमा ! असंखेज्ञा, एवं जहा असोच्चाए तहेव जाव केवलवरनाणदंसणे समुप्पज्ञइ, से णं भंते ! केवलिपन्नत्ते धम्मं आघवेज्ञ वा पन्नवेज्ञ वा परूवेज्ञ वा ?, हंता आघवेज्ञ वा पन्नवेज्ञ वा परूवेज्ञ वा ।*

*से णं भंते ! पव्वावेज्ञ वा मुंडावेज्ञ वा ?, हंता गोयमा ! पव्वावेज्ञ वा मुंडावेज्ञ वा, तस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*णं भंते ! सिस्सावि पव्वावेज्ज वा मुंडावेज्ज वा ?, हंता पव्वावेज्ज वा मुण्डावेज्ज वा, तस्स णं भंते ! पसिस्सावि पव्वावेज्ज वा मुंडावेज्ज वा ?, हंता पव्वावेज्ज वा मुंडावेज्ज वा ।*

*से णं भंते ! सिज्झति बुज्झति जावं अंतं करेइ ?, हंता सिज्झइ वा जाव अंतं करेइ तस्स णं भंते ! सिस्सावि सिज्झंति जाव अंतं करेन्ति ?, हंता सिज्झंति जाव अंतं करेन्ति, तस्स णं भंते ! पसिस्वावि सिज्झंति जाव अंतं करन्ति, एवं चेव जाव अंतं करेन्ति ।*

*से णं भंते ! किं उड्ढं होज्जा जहेव असोच्चाए जाव तदेक्कदेसभाए होज्जा । ते णं भंते ! एगसमएणं केवतिया होज्जा ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं अट्ठसयं १०८, से तेणट्ठेणं गोयमा ! एवं वुच्चइ–सोच्चाणं केवलिस्स वा जाव केवलिउवासियाए वा जाव अत्थेगतिए केवलनाणं उप्पाडेज्जा अत्थेगतिए नो केवलनाणं उप्पाडेज्जा । सेवंभंते ! २ त्ति ॥*

**वृ.** 'सोच्चाण'मित्यादि, अथ यथैव केवल्यादिवचनाश्रवणावाप्तबोध्यादेः केवलज्ञानमुत्पद्यते न तथैव तच्छ्रवणावाप्तबोध्यादेः किन्तु प्रकारान्तरेणेति दर्शयितुमाह–

'तस्स ण'मित्यादि, 'तस्स'त्ति यः श्रुत्वा केवलज्ञानमुत्पादयेत्तस्य कस्याप्यर्थात् प्रतिपन्न-सम्यग्दर्शनचारित्रलिङ्गस्य 'अट्ठमंअट्ठमेण'मित्यादि च यदुक्तं तत्प्रायो विकृष्टतपश्चरणवतः साधोरवधिज्ञानमुत्पद्यत इति ज्ञापनार्थःमिति, 'लोयप्पमाणमेत्ताइं'ति लोकस्यय यतप्रमाणं तदेव मात्रा–परिमाणं येषां तानि तथा । अथैनमेव लेश्यादिभिर्निरूपयन्नाह–

'से णं भंते !' इत्यादि, तत्र 'से णं'ति सोऽनन्तरोक्तविशेषणोऽधिज्ञानि 'छसुलेसासु होज्ज'त्ति यद्यपि भावेलेश्यासु प्रशस्तास्वेव तिसृष्वपि ज्ञानं लभते तथाऽपि द्रव्यलेश्याः प्रतीत्य षट्स्वपि लेश्यासु लभते सम्यक्त्वश्रुतवत्, यदाह–'सम्मत्तसुयं सव्वासु लब्भइ'त्ति तल्लाभे चासौ षट्स्वपि भवतीत्युच्यत इति, 'तिसु व'त्ति अवधिज्ञानस्याद्यज्ञानद्वयाविनाभूतत्वादधिकृतावधिज्ञानी त्रिषु ज्ञानेषु भवेदिति, 'चउसु वा होज्ज'त्ति मतिश्रुतमनःपर्यायज्ञानिनोऽवधिज्ञानोत्पत्तौ ज्ञानचतुष्य-भावाच्चतुर्षु ज्ञानेष्वधिकृतावधिज्ञानी भवेदिति ।

'सवेयएवा'इत्यादि, अक्षीणवेदस्याधिज्ञानोत्पत्तौ सवेदकः सन्नवधिज्ञानी भवेत्, क्षीणवेदसय चावधिज्ञानोत्पत्तावेदकः सन्नयं स्यात, 'नो उवसंतवेयए होज्ज'त्ति उपशान्तवेदोऽ-यमवधिज्ञानी न भवति, प्राप्तव्यकेवलज्ञानस्यास्य विवक्षितत्वादिति । 'सकसाई वा'इत्यादि, यः कषायाक्षये सत्यवधिं लभते स सकषायी सन्नवधिज्ञानी भवेत्, यस्तु कषायक्षयेऽसावकषायीति

'चउसु वे'त्यादि, यद्यक्षीणकषायः सन्नविधं लभते तदाऽयं चारित्रयुक्तत्वाच्चतुर्षु सज्ञ्वल-नकषायेषु भवति, यदा तु क्षपकश्रेणिवर्त्तित्वेन सञ्ज्वलनक्रोधे क्षीणेऽवधिं लभते तदा त्रिषु सञ्ज्वलनमानादिपु, यदा तु तथैव सञ्ज्वलनक्रोधमानयोः क्षीणयोस्तदा द्वयोः, एवमेकत्रेति ।

शतकं–९ उद्देशकः–३१ समाप्तः

## –: शतकं–९ उद्देशकः–३२ :–

**वृ.** अनन्तरोद्देशके केवल्यादिवचनं श्रुत्वा केवलज्ञानमुत्पादयेदित्युक्तम्, इह तु येन केवलिवचनं श्रुत्वा तदुत्पादितं स दर्श्यते, इत्येवंसंबद्धस्य द्वात्रिंशत्तमोद्देशकस्येदमादिसूत्रम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (४५१)** *तेणं कालेणं तेणं समएणं वाणियगामे नगरे होत्था वन्नओ, दूतिपलासे चेइए, सामी समोसढे, परिसा निग्गया, धम्मो कहिओ, परिसा पडिगया।*

*तेणं कालेणं तेणं समएणं पासावच्चिज्ञे गंगेए नामं अनगारे जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ तेणेव उवागच्छइत्ता समणस्स भगवओ महावीरस्स अदूरसामंते ठिच्चा समणं भगवं महावीरं एवं वयासी-*

*संतरं भंते! नेरइया उववज्जंति निरंतरं नेरइया उववज्जंति?, गंगेया! संतरंपि नेरइया उववज्जंति निरंतरंपि नेरइया उववज्जंति, संतरं भंते! असुरकुमारा उववज्जंति निरंतरं असुरकुमारा उववज्जंति?, गंगेया! संतरंपि असुरकुमारा उववज्जंति निरंतरंपि असुरुकमारा उववज्जंति एवं जाव थणियकुमारा।*

*संतरं भंते! पुढविकाइया उववज्जंति निरंतरं पुढविकाइया उववज्जंति?, गंगेया! नो संतरं पुढविकाइया उववज्जंति निरंतरं पुढविकाइया उववज्जंति, एवं जाव वणस्सइकाइया, बेइंदिया जाव वेमाणिया एते जहा नेरइया।*

**वृ.** 'तेण' मित्यादि, 'संतरं' ति समयादिकालापेक्षया सविच्छेदं, तत्र चैकेन्द्रियाणामनुसमय-मुत्पादात् निरन्तरत्वमन्येषां तूत्पादे विरहस्यापि भावात् सान्तरत्वं निरन्तरत्वं साविच्छेदं, तत्र चैकेन्द्रियाणामनुसमयमुत्पादात् निरन्तरत्वमन्येषां तूत्पादे विरहस्यापि भावात् सान्तरत्वं निरन्तरत्वं च वाच्यमिति।

**मू. (४५२)** *संतरं भंते! नेरइया उववट्टंति निरंतरं नेरइया उववट्टंति?, गंगेया! संतरंपि नेरइया उववट्टंति निरंतरंपि नेरइया उववट्टंति, एवं जाव थणियकुमारा।*

*संतरं भंते! पुढविक्काइया उववट्टंति? पुच्छा, गंगेया! नो संतरं पुढविक्काइया उव्वट्टंति निरंतरं पुढविक्काइया उव्वट्टंति, एव जाव वणस्सइकाइया नो संतरं निरंतरं उव्वट्टंति।*

*संतरं भंते! बेइंदिया उव्वट्टंति निरंतरं बेइंदिया उव्वट्टंति?, गंगेया! संतरंपि बेइंदिया उव्वट्टंति निरंतरंपि बेइंदिया उव्वट्टंति, एवं जाव वाणमंतरा।*

*संतरं भंते! जोइसिया चयंति? पुच्छा, गंगेया! संतरंपि जोइसिया चयंति निरंतरंपि जोइसिया चयंति, एवं जाव वेमाणियावि।*

**वृ.** उत्पन्नानां च सतामुद्वर्त्तना भवतीत्यतस्यां निरूपयन्नाह-'संतरं भंते! नेरइया उववट्टंती'-त्यादि ॥ उद्वृत्तानां च केषाञ्चिद्गत्यन्तरे प्रवेशनं भवतीत्यतस्तन्निरूपणायाह-

**मू. (४५३)** *कइविहे णं भंते! पवेसणए पन्नत्ते?, गंगेया! चउव्विहे पवेसणए पन्नत्ते तंजहा-नेरइयपवेसणए तिरियजोणियपवेसणए मणुस्सपवेसणए देवपवेसणए।*

*नेरइयपवेसणए णं भंते! कइविहे पन्नत्ते?, गंगेया! सत्तविहे पन्नत्ते, तंजहा-रयणप्पभापुढविनेरइयपवेसणए जाव अहेसत्तमापुढविनेरइयपवेसणए।*

*एगे णं भंते! नेरइए नेरइयपवेसणएणं पविसणमाणे किं रयणप्पभाए होज्ञा सक्करप्पभाए होज्ञा जाव अहोसत्तमाए होज्ञा?, गंगेया! रयणप्पभाए वा होज्ञा जाव अहेसत्तमाए वा होज्ञा।*

*दो भंते! नेरइया नेरइयपवेसणएणं पविसमाणा किं रयणप्पभाए होज्ञा जाव अहेसत्तमाए*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

होज्ञा ?, गंगेया ! रयणप्पभाए वा होज्ञा जाव अहेसत्तमाए वा होज्ञा, अहवा एगे रयणप्पभाए एगे सक्करप्पभाए होज्ञा अहवा एगे रयणप्भाए एगे वालुयप्पभाए होज्ञा जाव एगे रयणप्पभाए एगे अहेसत्तमाए होज्ञा, अहवा एगे सक्करप्पभाए एगे वालुयप्पभाए होज्ञा जाव अहवा एगे सक्करप्पभाए एगे अहेसत्तभाए होज्ञा, अहवा एगे वालुयप्पभाए एगे पंकप्पभाए होज्ञा एवं जाव अहवा एगे वालुयप्पभाए एगे अहेसत्तमाए होज्ञा, एवं एक्केक्का पुढवी छड्डेयव्वा जाव अहवा एगे तमाए एगे अहेसत्तमाए होज्ञा।

तिन्नि भंते! नेरइया नेरइयपवेसणएणं पविसमाणा किं रयणप्पभाए होज्ञा जाव अहेसत्तभाए होज्ञा ?, गंगेया! रयणप्पभाए वा होज्ञा जाव अहेसत्तमाए वा होज्ञा, अहवा एगे रयणप्पभाए दो सक्करप्पभाए होज्ञा जाव अहवा एगे रयणप्पभाए दो अहेसत्तमाए होज्ञा ६ अहवा दो रयणप्पभाए एगे सक्करप्पभाए होज्ञा जाव अहवा दो रयणप्पभाए एगे अहेसत्तमाए होज्ञा १२ अहवा एगे सक्करप्पभाए दो वालुयप्पभाए होज्ञा जाव अहवा एगे सक्करप्पभाए एगे अहेसत्तमाए होज्ञा १७ अहवा दो सक्करप्पभाए एगे वालुयप्पभाए होज्ञा जाव अहवा दो सक्करप्पभाए एगे अहेसत्तमाए होज्ञा २२ एवं जहा सक्करप्पभाए वत्तव्वया भणिया तहा सव्वपुढवीणं भाणियव्वा जाव अहवा दो तमाए एगे अहेसत्तमाए होज्ञा, ४–४–३–३–२–२–१–१ (४२)।

अहवा एगे रयणप्पभाए एगे सक्करप्पभाए एगे वालुयप्पभाए होज्ञा १ अहवा एगे रयणप्पभाए एगे सक्करप्पभाए एगे पंकप्पभाए होज्ञा २ जाव अहवा एगे रयणप्पभाए एगे सक्करप्पभाए एगे अहेसत्तमाए होज्ञा ५ अहवा एगे रयणप्पभाए एगे वालुयप्पभाए एगे पंकप्पभाए होज्ञा ६ अहवा एगे रयणप्पभाए एगे वालुयप्पभाए एगे धूमप्पभाए होज्ञा ७ एवं जाव अहवा एगे रयणप्पभाए एगे वालुय प्पभाए एगे अहेसत्तमाए होज्ञा ९।

अहवा एगे रयणप्पभाए एगे पंकप्पभाए एगे धूमप्पभाए होज्ञा १० जाव अहवा एगे रयणप्पभाए एगे पंकप्पभाए एगे अहेसत्तमाए होज्ञा १२ अहवा एगे रयणप्पभाए एगे धूमप्पभाए एगे तमाए होज्ञा १३ अहवा एगे रयणप्पभाए एगे धूमप्पभाए एगे अहेसत्तमाए होज्ञा १४ अहवा एगे रयणप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा १५ अहवा एगे सक्करप्पभाए एगे वालुयप्पभाए एगे पंकप्पभाए होज्ञा १६ अहवा एगे सक्करप्पभाए एगे वालुयपभाए एगे धूमप्पभाए होज्ञा १७ जाव अहवा एगे सक्करप्पभाए एगे वालुयप्पभाए एगे अहेसत्तमाए होज्ञा १९।

अहवा एगे सक्करप्पभाए एगे पंकप्पभाए एगे धूमप्पभाए होज्ञा २० जाव अहवा एगे सक्कर० एगे पंक० एगे अहेसत्तमाए होज्ञा २२ अहवा एगे सक्करप्पभाए एगे धूमप्पभाए एगे तमाए होज्ञा २३ अहवा एगे सक्करप्पभाए एगे धूमप्प० एगे अहेसत्तमाए होज्ञा २४ अहवा एग सक्करप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा २५ अहवा एगे वालुयप्पमाए एगे पंकप्पभाए एगे धूमप्पभाए होज्ञा २६ अहवा एगे वालुयप्पभाए एगे पंकप्पभाए एगे तमाए होज्ञा २७।

अहवा एगे वालुयप्पभाए एगे पंकप्पभाए एगे अहेसत्तमाए होज्ञा २७ अहवा एगे वालुयप्पभाए एगे धूमप्पभाए एगे तमाए होज्ञा २९ अहवा एगे वालुयप्पभाए एगे धूमप्पभाए एगे अहेसत्तमाए होज्ञा ३० अहवा एगे वालुयप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा ३१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा एगे पंकप्पभाए एगे घूमप्पभाए एगे तमाए होज्ञा ३२ अहवा एगे पंकप्पभाए एगे घूमप्पभाए एगे अहेसत्तमाए होज्ञा ३३ अहवा एगे पंकप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा ३४ अहवा एगे घूमप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा ३५ ।

चत्तारि भंते ! नेरइया नेरइयपवेसणएणं पविसमाणा किं रयणप्पभाए होज्ञा ? पुच्छा, गंगेया ! रयणप्पभाए वा होज्ञा जाव अहेसत्तमाए वा होज्ञा ७, अहवा एगे रयणप्पभाए तिन्नि सक्करप्पभाए होज्ञा अहवा एगे रयणप्पभाए तिन्नि वालुयप्पभाए होज्ञा एवं जाव अहवा एगे रयणप्पभाए तिन्नि अहेसत्तमाए होज्ञा ६ अहवा दो रयणप्पभाए दो सक्करप्पभाए होज्ञा एवं जाव अहवा दो रयणप्पभाए दो अहेसत्तमाए होज्ञा १२, अहवा तिन्नि रयणप्पभाए एगे सक्करप्पभाए होज्ञा, एवं जाव अहवा तिन्नि रयणप्पभाए एगे अहेसत्तमाए होज्ञा १८, अहवा एगे सक्करप्पभाए तिन्नि वालुयप्पभाए होज्ञा, एवं जहेव रयणप्पभाए उवरिमाहिं समं चारियं तहा सक्करप्पभाएवि उवरिमाहिं समं चारेयव्वं ५, एवं एक्केकाए समं चारियव्वं जाव अहवा तिन्नि तमाए एगे अहेसत्तमाए होज्ञा १२-६-३-(६३) ।

अहवा एगे रयणप्पभाए एगे सक्करप्पभाए दो वालुयप्पभाए होज्ञा अहवा एगे रयणप्पभाए एगे सक्कर० दो पंक० होज्ञा एवं जाव एगे रयणप्पभाए एगे सक्क० दो अहेसत्तमाए होज्ञा ५ अहवा एगे रयण० दो सक्कर० एगे वालुयप्पभाए होज्ञा एवं जाव अहवा एगे रयण० दो सक्कर० एगे अहेसत्तमाए होज्ञा १० अहवा दो रयण० एगे सक्कर० एगे वालुयप्पभाए होज्ञा, एवं जाव अहवा दो रयण० एगे सक्कर० एगे अहेसत्तमाए होज्ञा १५ अहवा एगे रयण० एगे वालुय० दो पंकप्पभाए होज्ञा एवं जाव अहवा एगे रयणप्पभाए एगे वालुय० दो अहेसत्तमाए होज्ञा ४ एवं एएणं गमएणं जहा तिण्हं तियजोगो तहा भाणियव्वो जाव अहवा दो घूमप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा १०५ ।

अहवा एगे रयणप्पभाए एगे सक्करप्पभाए एगे वालुयप्पभाए एगे पंकप्पभाए होज्ञा १ अहवा एगे रयणप्पभाए एगे सक्कर० एगे वालुय० एगे घूमप्पभाए होज्ञा २ अहवा एगे रयण० एगे सक्कर० एगे वालुय० एगे तमाए होज्ञा ३ अहवा एगे रयणप्पभाए एगे सक्करप्पभाए एगे वालुयप्पभाए एगे अहेसत्तमाए होज्ञा ४ अहवा एगे रयण० एगे सक्कर० एगे पंक० एगे घूमप्पभाए ५ अहवा एगे रयण० एगे सक्कर० एगे पंकप्पभा० एगे तमाए होज्ञा ६ अहवा एगे रयण० एगे सक्कर० एगे पंक० एगे अहेसत्तमाए होज्ञा ७ अहवा एगे रयणप्पभाए एगे सक्कर० एगे घूम० एगे तमाए होज्ञा ८ अहवा एगे रयण० एगे सक्कर० एगे घूम० एगे अहेसत्तमाए होज्ञा ९ ।

अहवा एगे रयण० एगे सक्करप्पभाए एगे तमाए एगे अहेसत्तमाए होज्ञा १० अहवा एगे रयण० एगे वालुय० एगे पंक० एगे घूमप्पभाए होज्ञा ११ अहवा एगे रयण० एगे वालुय० एगे पंक० एगे तमाए होज्ञा १२ अहवा एगे रयण० एगे वालुय० एगे पंक० एगे अहेसत्तमाए होज्ञा १३ अहवा एगे रयण० एगे वालुय० एगे घूम० एगे तमाए होज्ञा १४ अहवा एगे रयणप्पभाए एगे वालुय० एगे घूम० एगे अहेसत्तमाए होज्ञा १५ अहवा एगे रयण० एगे वालुय० एगे तमाए एगे अहेसत्तमाए होज्ञा १६ अहवा एगे रयण० एगे पंक० एगे घूम० एगे तमाए होज्ञा १७

एगावलिं पिणद्धंति एवं मुत्तावलिं कणगावलिं रयणावलिं अंगयाइं केऊराइं कडगाइं तुडियाइं कडिसुत्तयं दसमुद्दयाणंतयं वच्छसुत्तं मुरविं कंटमुरविं पालंबं कुंडलाइं चूडामणिं'ति तत्रैकावली–विचित्रमणिकमयी मुक्तावली–केवलमुक्ताफलमयीकनकावली–सौवर्णमणिकमयी रत्नावली–रत्नमयी अङ्गदं केयूरं च बाह्वाभरणविशेषः, एतयोश्च यद्यपि नामकोशे एकार्थःतोक्ता तथाऽपीहाऽऽकारविशेषाद् भेदोऽवगन्तव्यः, कटकं–कलाचिकाभरणविशेषः त्रुटिकं–बाहुरक्षिका दशमुद्रिकानन्तकं–हस्ताङ्गुलीमुद्रिकादशकं वक्षःसूत्रं–हृदयाभरणभूतसुवर्णसङ्कलकं 'वेच्छासुत्तं'ति पाठान्तरं तत्र वैकक्षिकासूत्रम्–उत्तरासङ्गपरिधानीयं सङ्कलकं मुरवीमुरजाकारमाभरणं कण्ठमुखी–तदेव कण्ठासन्नतरावस्थानं प्रालम्बं–झुम्बनकं, वाचनान्तरे त्वयमलङ्कारवर्णकः साक्षाल्लिखित एव दृश्यत इति, 'रयणसंकडुक्कडं'ति रत्नसङ्कटं च तदुत्कटं च–उत्कृष्टं रत्नसङ्कटोत्कटं 'गंथिमवेढिमपूरिमसंघाइमेणं'ति इह ग्रन्थिमं–ग्रन्थननिर्वृत्तं सूत्रग्रथितमालादि वेष्टिमं–वेष्टितनिष्पन्नं पुष्पलम्बूसकादि पूरिमं–येन वंशशलाकामयपञ्जरकादि कूर्चादि वा पूर्यते सङ्घातिमं तु यत्परस्परतो नालसङ्घातनेन सङ्घात्यते 'अलंकियविभूसियं'ति अलङ्कृतश्चासौ कृतालङ्कारोऽत एव विभूषितश्च–सञ्जातविभूषश्चेत्यलङ्कृतविभूषितस्तं।

वाचनान्तरे पुनरिदमधिकं 'दद्दरमलयसुगंधिगंधिएहिं गायाइं भुंकुंडेंति'त्ति दृश्यते, तत्र च दर्द्दरमलयाभिधापर्वतयोः सम्बन्धिस्तदुम्दूतचन्दनादिद्रव्यजत्वेन ये सुगन्धयो गन्धिका–गन्धावासास्ते तथा, अन्ये त्वाहुः–दर्द्दरः–चीवरावनद्धं कुण्डिकादिभाजनमुखं तेन गालितास्तत्र पक्वा वा ये 'मलय'त्ति मलयोद्भवत्वेन मलयजस्य–श्रीखण्डस्य सम्बन्धिनः सुगन्धयो गन्धिका–गन्धास्ते तथा तैर्गात्राणि 'भुकुंडेंति'त्ति उद्धूलयन्ति।

'अनेगखंभसयसन्निविट्ठं'ति अनेकेषु स्तम्भशतेषु सन्निविष्टा या सा तथा अनेकानि वा स्तम्भशतानि संनिविष्टानि यस्यां सा तथा तां 'लीलट्ठियसालिभंजियागं'ति लीलास्थिताः शालिभञ्जिकाः–पुत्रिकाविशेषा यत्र सा तथा तां, वाचनान्तरे पुनरिदमेवं दृश्यते–'अब्भुग्गयसुक-यवइरवेइ-यतोरणवररइयलीलट्ठियसालिभंजियागं'ति तत्र चाभ्युद्गते–उच्छ्रिते सुकृतव- ज्रवेदिकायाः सम्बन्धिनि तोरणवरे रचिता लीलास्थिता शालभञ्जिका यस्यां सा तथा तां 'जहा रायप्पसेणइज्जे विमाणवन्नओ'त्ति एवमस्या अपि वाच्य इत्यर्थः स चायम्–'ईहामियउसभतुरगनरमगरविहगवालकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्तं' ईहामृगादिभिभक्तिभि– विच्छित्तिभिश्चित्रा–चित्रवती या सा तथा तां, तत्र ईहामृगा–वृकाः ऋषभाः वृषभाः व्यालकाः–श्वापदा भुजङ्गा वा किन्नरा–देवविशेषाः रुरवो–मृगविशेषाः सरभाः–परासराः वनलता–चम्पकलतादिकाः पद्मलता–मृणालिकाः शेषपदानि प्रतीतान्येव 'संभुग्गयवइरवेइ- यापरिगयाभिरामं'स्तम्भेषु उद्गता–निविष्टा या वज्रवेदिका तया परिगता–परिकरिता अत एवाभिरामा च–रम्या या सा तथा तां 'विज्जाहरजमलजुयलजंतजुत्तंपिव' विद्याधरयोर्यद् यमलं–समश्रेणीकं युगलं–द्वयं तेनेव यन्त्रेण–सञ्चरिष्णुपुरुषप्रतिमाद्वयरूपेण युक्ता या सा था ताम्, आर्षत्वाच्चैवंविधः समासः।

'अच्चीसहस्समालिणीयं' अर्चिसहमालाः–दीप्तिसहस्राणामावल्यः सन्ति यस्यां सा तथा, स्वार्थिःककप्रत्यये च अर्चिःसहस्रमालिनीका तां, 'रूवगसहस्सकलियं' 'भिसमाणं' दीप्यमानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भिब्भिसमाणां' अत्यर्थं दीप्यमानां 'चक्खुलोयणलेसं' चक्षु कर्तृलोकने–अवलोकने सति लिशतीव–दर्शनीयत्वातिशयात् श्लिष्यतीव यस्यां सा तथा तां 'सुहफासं सस्सिरीयरूवं' सशोभरूपकां 'घंटावलिचलियमहुरमणहरसरं' घण्टावल्याश्चलिते–चलने मधुरो मनोहरश्च स्वरो यस्यां सा तथा तां 'सुहं कंतं दरिसणिज्जं निउणोवियमिसिमिसंतमणिरयणधंटियाजालपरिक्खित्तं' निपुणेन–शिल्पिना ओपितं–परिकर्म्मितं 'मिसिमिसंतं' चिकचिकायमानं मणिरत्नानां सम्बन्धि यद् घण्टिकाजालं–किङ्किणीवृन्दं तेन परिक्षिप्ता परिकरिता या सा तथा तां, वाचनान्तरे पुनरयं वर्णकः साक्षाद् दृश्यत एवेति ।

'केसालंकारेणं' ति केशा एवालङ्कारः केशालङ्कारस्तेन, यद्यपि तस्य तदानीं केशाः कल्पिता इति केशालङ्कारो न सम्यक् तथाऽपि कियतामपि सद्भावात्तद्भाव इति, अथवा केशानामलङ्कारः पुष्पादि केशालङ्कारस्तेन, 'वत्थालंकारेणं' ति वस्त्रलक्षणालङ्कारेण 'सिंगारागारचारुवेस' त्ति शृङ्गारस्य–रसविशेषस्यागारमिव यश्चारुश्च वेषो–नेपथ्यं यस्याः सा तथा, अथवा शृङ्गारप्रधान आकारश्चारुश्च वेषो यस्याः सा तथा 'संगते' त्यादौ यावत्करणादेवं दृश्यं–'संगयगयहणिय-भणियचिट्ठियविलाससंलाससंलावुल्लावनिउणजुत्तोवयारकुसल' त्ति तत्र च सङ्गतेषु गतादिषु निपुणा युक्तेषूपचारेषु कुशला च या सा तथा, इह च विलासो नेत्रविकारो, यदाह–

"हावो मुखविकारः स्याद्भावश्चित्तसमुद्भवः ।
विलासो नेत्रजो ज्ञेयो, विभ्रमो भ्रूसमुद्भवः ॥ १ ॥" इति

–तथा संलापो–मिथोभाषा उल्लापस्तु काकुवर्णनं, यदाह–

॥ १ ॥ "अनुलापो मुहुर्भाषा, प्रलापोऽनर्थःकं वचः ।
काक्वा वर्णनमुल्लापः, संलापो भाषणं मिथः ॥ १ ॥" इति

'सुन्दरथण' इत्यनेन 'सुंदरथणजहणवयणकरचरणणयणलावन्नरूवजोव्वणगुणोव-वेय' त्ति सूचितं, तत्र च सुन्दरा ये स्तनादयोऽर्थास्तैरुपेता या सा तथा, लावण्यं चेह स्पृहणीयता रूपं–आकृतिर्यौवनं–तारुण्यं गुणा–मृतुस्वरत्वादयः 'हिमरययकुमुयकुंदेंदुप्पगासं' ति हिमं च रजतं च कुमुदं च कुन्दश्चेन्दुश्चेति द्वन्द्वस्तेषामिव प्रकाशो यस्य तत्तथा 'सकोरेंटमल्लदामं' ति सकोरेण्ट-कानि–कोरण्टपुष्पगुच्छयुक्तानि माल्यदामानि–पुष्पमाला यत्र तत्तथा 'णाणामणिकणगरय-णविमलमहरिहतवणिज्जउज्जलविचित्तदंडाओ' ति नानामणिकनकरत्नानां विमलस्य महार्हस्य महार्घस्य वा तपनीयस्य च सत्कावुज्ज्वलौ विचित्रौ दण्डकौ ययोस्ते तथा, अथात्र कनकतपनीययोः को विशेषः ?

उच्यते, कनकं पीतं तपनीयं रक्तमिति, 'चिल्लियाओ' त्ति दीप्यमाने लीने इत्येके 'संखंक-कुंददगरयअमयमहियफेणपुंजसंनिगासाओ' त्ति शङ्खाङ्ककुन्ददकरजसाममृतस्य मथितस्य सतो यः फेनपुञ्जस्तस्य च संनिकाशे–सदृशे ये ते तथा, इह चाङ्को रत्नविशेष इति, 'चामराओ' त्ति यद्यपि चामरशब्दो नपुंसकलिङ्गो रूढस्तथाऽपीह स्त्रीलिङ्गतया निर्दिष्टस्तथैव कचिद्रूढत्वादिति

'मत्तगयमहामुहाकिइसमाणं' ति मत्तगजस्य यन्महामुखं तस्य याऽऽकृति–आकारस्तया समानं यत्तत्तथा 'एगाभरणवसणगहियणिज्जोय' त्ति एकः–एकादृश आभरणवसनलक्षणो गृहीतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्योगः—परिकरो यैस्ते तथा।

'तप्पढमयाए'त्ति तेषां विवक्षितानां मध्ये प्रथमता तत्प्रथमता तया 'अट्ठट्ठमंगलग'त्ति अष्टावष्टाविति वीप्सायां द्विर्वचनं मङ्गलकानि—माङ्गल्यवस्तूनि, अन्ये त्वाहुः— अष्टसङ्ख्यानि अष्टमङ्गलकज्ञानि वस्तूनि 'जाव दप्पणं'ति इह यावत्करणादिदं दृश्यं—'नंदियावत्तवद्धमाण-गभद्दासणकलसमच्छ'त्ति तत्र वर्द्धमानकं—शरावं (वसंपुटं पुरुषारूढपुरुष इत्यन्ये स्वस्तिक-पञ्चकमित्यन्ये प्रासादविशेषमित्यन्ये 'जहा उववाइए'त्ति, अनेन च यदुपात्तं तद्वाचनान्तरे साक्षादेवास्ति, तच्चेदं।

'दिव्वा य छत्तपडागा'दिव्येव दिव्याप्रधाना छत्रसहिता तथा 'सचामरादरसरइयआ-लोयदरिसण्ज्ञा वाउद्धुयविजयवेजयंती य ऊसिय'त्ति सह चामराभ्यां या सा सचामरा आदर्शो रचितो यस्यां साऽऽदर्शरचिता आलोकं—दृष्टिगोचरं यावद्दृश्यतेऽत्युच्चत्वेन या साऽऽलोकदर्शनीया, ततः कर्म्मधारयः, 'सचामरा दंसणरइयआलोयदरिसणिज्ञ'त्ति पाठान्तरे तु सचामरेति भिन्नपदं, तथा दर्शने—जमालेर्दृष्टिपथे रचिता—विहिता दर्शनरचिता दर्शने वा सति रतिदा—सखप्रदा दर्शन-रतिदा सा चासावालोकदर्शनीया चेति कर्म्मधारयः, काऽसौ ? इत्याह—वातोद्धूता विजयसूचिका वैजयन्ती—पार्श्वतो लघुपताकिकाद्वययुक्ता पताकाविशेषा वातोद्धूतविजयवैजयन्ती 'उच्छ्रिता' उच्चा, कथमिव ?

गगणतलमणुलिहंतीति गगनतलं आकाशतलमनुलिख्न्तीवानुलिखन्ती अत्युच्चतयेति 'जहा उववाइए'त्ति अनेन यत्सूचितं तदिदं—'तयानंतर च णं वेरुलियभिसंतविमलदंडं' 'भिसंत'त्ति दीप्यमानं 'पलंबकोरंटमल्लदामोवसोहियं चंदमंडलनिभं समूसियं विमलमायवत्तं पवरं सीहासणं च मणिरयणपायपीढं' 'सपाउयाजुगसमाउत्तं' स्वकीयपादुकायुगसमायुक्तं 'बहुकिंकरकम्मगर-पुरिसपायत्तपरिक्खित्तं' बहवो ये किङ्कराः—प्रतिकर्म्म प्रभोः पृच्छाकिरणः कर्म्मकराश्च तदन्यथा-विधास्ते च ते पुरुषाश्चेति समासः पादातं च—त्तितसमूहः बहुकिङ्करादिभिः परिक्षिप्तं यत्तत्तथा 'पुरओ अहानुपुव्वीए संपट्ठियं, तयानंतरं च णं बहवे लट्ठिग्गाहा कुंतग्गाहा चामरग्गाहा पासग्गाहा चावग्गाहा पोत्थयग्गाहा फलगग्गाहा पीढयग्गाहा वीणग्गाहा कूवयग्गाहा' कुतपः—तैलादिभाज-नविशेषः 'हडप्पगाहा' हडप्पो—द्रम्मादिभाजनं ताम्बूलार्थं पूगफलादिभाजनं वा 'पुरओ अहानु-पुव्वीए संपट्ठिया'।

तयानंतरं च णं बहवे दंडिणो मुंडिणो सिहंडिणो—शिखाधारिणः जटिणो—जटाधराः पिच्छिणो—मयूरादिपिच्छवाहिनः हासकरा ये हसन्ति डमरकरा—विडवरकारिणः दवकराः—परिहासकारिणः चाटुकराः—प्रियवादिनः कंदप्पिया कामप्रधानकेलिकारिणः कुकुइया—भाण्डाः भाण्डप्राया वा 'वायंता गायंता य नच्चंता य हासंता य भासंता य सासिंता य शिक्षयन्तः 'साविंता य' इदं चेदं भविष्यतीत्येवंभूतवचांसि श्रावयन्तः 'रुक्खंता य' अन्यायं रक्षन्तः 'आलोकं च करेमाणे'त्यादि तु लिखितमेवास्ति इति, एतच्च वाचनान्तरे प्रायः साक्षाद्दृश्यत एव, तथेदमपरं तत्रैवाधिकं।

'तयानंतरं च णं जच्चाणं वरमल्लिहाणाणं चंचुच्चियललियपुलयविक्कमविलासियगईणं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

हरिमेलामउलमल्लियच्छाणं थासगअमिलाणचमरगंडपरिमंडियकडीणं अट्ठसयं वरतुरगाणं पुरओ अहानुपुव्वीए संपट्ठियं, तयानंतरं च णं ईसिं दंताणं ईसिं मत्ताणं ईसिं उन्नयविसालधवलदंताणं कंचणकोसीपविट्ठदंतोवसोहियाणं अट्ठसयं गयकलहाणं पुरओ अहानुपुव्वीए संपट्ठियं।

तयानंतरं च णं सच्छत्ताणं सज्झयाणं सघंटाणं सपडागाणं सतोरणवराणं सखिंखिणीहेमजालपेरंतपरिक्खित्ताणं सनन्दिघोसाणं हेमवयवित्ततिणिसकणगनिजुत्तदारुगाणं सुसंविद्धचक्कमंडलधुराणं कालायससुकयनेमिजंतकम्माणं आइन्नवरतुरगसुसंपउत्ताणं कुसलनरच्छेयसारहिसुसंपग्गहियाणं सरसबत्तीसतोणपरिमंडियाणं सकंकडवडेसगाणं सचावसरपहरणावरणभरियजुद्धसज्जाणं अट्ठसंय रहाणं पुरओ अहानुपुव्वीए संपट्ठियं, तयानंतरं च णं असिसत्तिकोंततोमरसूललउडाभिंडिमालधणुबाणसज्जं पायत्ताणीयं पुरओ अहानुपुव्वीए संपट्ठियं।

तयानंतरं च णं बहवे राईसरतलवरकोडुंबियमाडंबियइब्भसेट्ठिसेणावइसत्थवाहपभिइओ अप्पेगइया हयगया अप्पेगया गयगया अप्पेगइया रहगया पुरओ अहानुपुव्वीए संपट्ठिय' त्ति तत्र च 'वरमल्लिहाणाणं' ति वरं माल्याधानं–पुष्पबन्धनस्थानं शिरःकेशकलापो येषां ते वरमाल्याधानास्तेषाम्, इकारः प्राकृतप्रभवो 'वालिहाग' मित्यादाविवेति, अथवा वरमल्लिकावद् शुक्लत्वेन प्रवरविचकिलकुसुमवद् ध्राणं–नासिका येषां ते तथा तेषां क्वचित् 'तरमल्लिहायणाणं' ति दृश्यते तत्र च तरो–वेगो बलं, तथा 'मल मल्ल धारणे' ततश्च तरोमल्ली–तरोधारको वेगादिधारको हायनः–संवत्सरो वर्त्तते येषां ते तरोमल्लिहायनाः–यौवनवन्त इत्यर्थः अतस्तेषां वरतुरगाणामितियोगः 'वरमल्लिभासणाणं' ति क्वचिद्दृश्यते।

तत्र तु प्रधानमाल्यवतामत एव दीप्तिमतां चेत्यर्थः 'चंचुच्चियललियपुलियविक्कमविलासियगईणं' ति 'चंचुच्चियं' ति प्राकृतत्वेन चञ्चुरितं–कुटिलगमनम्, अथवा चञ्चु–शुकचञ्चुस्तद्वद्वक्रतया उच्चितम्–उच्चता करणं पदस्योत्पाटनं वा (शुक) पादस्येवेति चञ्चुच्चितं तच्च ललितं–क्रीडितं पुलितं च–गतिविशेषः प्रसिद्ध एव विक्रमश्च–विशिष्टं क्रमणं क्षेत्रलङ्घनमिति द्वंद्वस्तदेतत्प्रधाना विलासिता–विशेषेणोल्लासिता गतिर्यैस्ते तथा तेषां कचिदिदं विशेषणेवं दृश्यते–'चंचुच्चिय-ललियपुलियचलचवलचंचलगईणं' ति तत्र च चञ्चुरितललितपुलितरूप चलानां–अस्थिराणां सतां चञ्चलेभ्यः सकाशाच्चञ्चला–अतीवचटुला गतिर्येषां ते तथा तेषां 'हरिमेलमउलमल्लियच्छाणं' ति हरिमेलको–वनस्पतिविशेषस्तस्य मुकुलं–कुड्मलं मल्लिका च–विचकिलस्तद्वदक्षिणी येषां, शुक्लाक्षाणामित्यर्थः, 'थासगअमिलाणचामरगंडपरिमंडिय- करीणं' ति स्थासका–दर्प्पणाकारा अस्वालङ्कारविशेषास्तैरम्लानचामरैर्गण्डैश्च–अमलिनचामरदण्डैः परिमण्डिता कटिर्येषां ते तथा तेषां कचित्पुनरेवमिदं विशेषणमेवदृश्यते–

'मुहभंडगओचूलगथासगमिलाणचामरगण्डपरिमंडियकडीणं' ति तत्र मुखभाण्डकं–मुखाभरणम् अवचूलाश्च–प्रलम्बमानपुच्छाः स्थासकाः–प्रतीताः 'मिलाण' त्ति पर्याणानि च येषां सन्ति ते तथा मत्वर्थीयलोपदर्शनात्, चमरी (चामर) गण्डपरिमण्डितकटय इति पूर्ववत्, ततश्च कर्म्मधारयोऽतस्तेषां क्वचित्पुनरेवमिदं दृश्यते–'थासगअहिलाणचामरगंडपरिमंडियकडीणं' ति तत्र तु अहिलाणं–मुखसंयमनं ततश्च 'थासगअहिलाण' इत्यत्र मत्वर्थीयलोपेनोत्तरपदेन सह कर्म्मधारयः कार्य, तथा 'ईसिं दंताणं' ति 'ईषद्दान्तानां' मनागग्राहितशिक्षाणां गजकलभानामिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगः 'ईसिंउच्छंगउन्नयविसालधवलदंताणं' ति उत्सङ्गः–पृष्ठदेशः ईषदुत्सङ्गे उन्नता विशालाश्च ये यौवनारम्भवर्त्तित्वात्ते तथा ते च ते धवलदन्ताश्चेति समासोऽतस्तेषां 'कंचणकोसीपविट्ठदंतोवसोहियाणं' ति इह काञ्चनकोशी–सुवरणमयी खोला, रथवर्णकेतु 'सज्झयाणं सपडागाणं' इत्यत्र गरुडादिरूपयुक्तो ध्वजः तदितरा तु पताका 'सखिंखिणीहेमजालपेरंतपरिक्खित्ताणं' ति सकिङ्किणीकं–क्षुद्रघण्टिकोपेतं यद् हेमजालं–सुवर्णमयस्तदाभरणविशेषस्तेन पर्यन्तेषु परिक्षिप्ता ये ते तथा, तेषां 'सनंदिघोसाणं' ति इह नन्दी–द्वादशतूर्यसमुदायः, तानि चेमानि–

॥१॥ "भंभा १ मउंद २ मद्दल ३ कडंब ४ झल्लरि ५ हुडुक्क ६ कंसाला ७।
काहल ८ तलिमा ९ वंसो १० संखो ११ पणवो १२ य बारसमो ॥"

इति 'हेमवयचित्ततिणिसकणगनिजुत्तदारुगाणं' ति हैमवतानि–हिमवद्गिरिसम्भवानि चित्राणि–विविधानि तैनिशानि–तिनिशाभिधानतरुसम्बन्धीनि कनकनियुक्तानि– सुवर्णखचितानि दारुकाणि–काष्ठानि येषु ते तथा तेषां, 'सुसंविद्धचक्कमंडलधाराणं' ति सुष्ठुसंविद्धानि चक्राणि मण्डलाश्च वृत्ता धारा येषां ते तथा तेषां 'सुसिलिट्ठचित्तमंडलधुराणं' ति क्वचिद् दृश्यते तत्र सुष्ठु संश्लिष्टाः चित्रवत्कुर्वत्यो मण्डलाश्च–वृत्ता धारा येषां ते तथा तेषां 'सुसिलिट्ठचित्तमंडलधुराणं' ति क्वचिद् दृश्यते तत्र सुष्ठु संश्लिष्टाः चित्रवत्कुर्वत्यो मण्डलाश्च–वृत्ता धुरो येषां ते तथा तेषां 'कालायससुकयनेमिजंतकम्माणं' ति कालायसेन–लोहविशेषेण सुष्ठु कृतं नेमेः–चक्रमण्डनधाराया यन्त्रकर्म–बन्धनक्रिया येषां ते तथा तेषाम् 'आइन्नवरतुरगसुसंपउत्ताणं' ति आकीर्णै–जात्यैर्वरतुरगैः सुष्ठु संप्रयुक्ता ये ते तता तेषां 'कुसलनरच्छेयसारहिसुसंपग्गहियाणं' ति कुशलनरैः–विज्ञपुरुषैश्छेकसारथिमिश्च–दक्षप्राजितृभि सुष्ठु संप्रगृहीता ये ते तथा तेषां 'सरसयबत्तीसतोणपरिमंडियाणं' ति शरशतप्रधाना ये द्वात्रिंशत्तोणा–भस्त्रकास्तैः परिमण्डिता ये ते तथा तेषां 'सकंकडवडेंसगाणं' ति सह कङ्कटैः–कवचैरवतंसकैश्च–शेखरकैः शिरस्त्राणैर्वा ये ते तथा तेषां 'सचावसरपहरावरणभरियजुद्धसज्जाणं' ति सह चापैः शरैश्च यानि प्रहरणानि–कुन्तादीनि आवरणानि च–स्फुरकादीनि तेषां भरिता युद्धसज्जाश्च–युद्धप्रगुणा ये ते तथा तेषां, शेषं तु प्रतीतार्थःमेवेति।

अथाधिकृतवाचनाऽनुश्रियते–'तयानंतरं च णं बहवे उग्गा' इत्यादि, तत्र 'उग्राः' आदिदेवेनारक्षकत्वे नियुक्तास्तद्वंश्याश्च भोगास्तेनैव व्यवहृतास्तद्वंश्याश्च 'जहा उववाइए' त्ति करणादिदं दृश्यं–'राइन्ना खत्तिया इक्खागा नाया कोरव्वा' इत्यादि, तत्र 'राजन्याः' आदिदेवेनैव वयस्यतया व्यवहृतास्तद्वंश्याश्च क्षत्रियाश्च प्रतीताः 'इक्ष्वाकवः' नाभेयवंशजाः 'ज्ञाताः' इक्ष्वाकुवंशविशेषभूताः 'कोरव्व' त्ति कुरवः–कुरुवंशजाः, अथ कियदन्तमिदं सूत्रमिहाध्येयम्? इत्याह–'जाव महापुरिसवग्गुरापरिक्खित्ते' त्ति वागुरा–मृगबन्धनं वागुरेव वागुरा सर्वतः परिवारणसाधर्म्यात् पुरुषाश्च ते वागुरा च पुरुषवागुरा महती चासौ पुरुषवागुरा च महापुरुषवागुरा तया परिक्षिप्ता ये ते तथा 'महंआस' त्ति महाश्वाः, किम्भूताः? इत्याह–

'आसवरा' अश्वानां मध्ये वराः 'आसवार' त्ति पाठान्तरं तत्र 'अश्ववाराः' अश्वारूढपुरुषाः 'उभओ पासिं' ति उभयोः पार्श्वयोः 'नाग' त्ति नागाहस्तिनः नागवरा–हस्तिनां प्रधानाः 'रहसंगेल्लि' त्ति रथसमुदायः 'अब्भुग्गयभिंगारे' त्ति अभ्युद्गतः–अभिमुखमुत्पाटितो भृङ्गारो यस्य स तथा 'पग्गहियतालियंटे' प्रगृहीतं तालवृन्तं यं प्रति स तथा 'ऊसवियसेयच्छत्ते' उच्छ्रितश्वेतच्छत्रः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'पवीइयसेयचामरवालवीयणीए' प्रवीजिता श्वेतचामरवालानां सत्का व्यजनिका यं अथवा प्रवीजिते श्वेतचामरे वालव्यजनिके च यं स तथा –

'जहा उववाइए' त्ति करणादिदं दृश्यं–'कामत्थिया भोगत्थिया' कामौ–शुभशब्दरूपे भोगाः–शुभगन्धादयः 'लाभत्थिया' धनादिलाभार्थिनः 'इड्डिसिय' त्ति रूढिगम्याः 'किट्टिसिय' त्ति किल्बिषिका भाण्डादय इत्यर्थः क्वचित् किट्टिसिकस्थाने 'किव्विसिय' त्ति पठ्यते 'कारोडिया' कापालिकाः 'कारवाहिया' कारंराजदेयं द्रव्यं वहन्तीत्येवंशीलाः सकारवाहिनस्त एव कारवाहिकाः करबाधिता वा 'संखिया' चन्दनगर्भशङ्खहस्ता माङ्गल्यकारिणः शङ्खवादका वा 'चक्किया' चाक्रिकाः–चक्रप्रहरणाः कुम्भकारादयो वा 'नंगलिया' गलावलम्बितसुवर्णादिमयलाङ्गलप्रतिकृतिधारिणो भट्टविशेषाः कर्षका वा 'मुहमंगलिया' मुखे मङ्गलं येषामस्ति ते मुखमङ्गलिकाः–चाटुकारिणः 'वद्धमाणा' स्कन्धारोपितपुरुषाः 'पूसमाणवा' मागधाः 'इज्झिसिया पिंडिसिया घंटिय' त्ति क्वचिद् दृश्यते, तत्र च इज्यां–पूजामिच्छन्त्येषयन्ति वा ये ते इज्यैषास्त एव स्वार्थिःकेकप्रत्ययविधानाद् इज्यैषिकाः, एवं पिण्डैषिका अपि, नवरंपिण्डो–भोजनं, घण्टिकास्तु ये घण्टया चरन्ति तां वा वादयन्तीति, 'ताहिं' ति ताभिर्विवक्षिताभिरित्यर्थः, विवक्षित्वमेवाह–

'इट्ठाहिं' इष्यन्ते स्मेतीष्टस्ताभि, प्रयोजनवशादिष्टमपि किञ्चित्स्वरूपतः कान्तं स्यादकान्तं चेत्यत आह 'कंताहिं' कमनीयशब्दाभिरित्यर्थः 'पियाहिं' प्रियार्थाभिः 'मणुन्नाहिं' मनसा ज्ञायन्ते सुन्दरतया यास्ता मनोज्ञा भावतः सुन्दरा इत्यर्थः ताभिः 'मणामाहिं' मनसाऽम्यन्ते–गम्यन्ते पुनः पुनर्या सुन्दरत्वातिशयात्ता मनोऽमास्ताभिः 'ओरालाहिं' उदाराभिः शब्दतोऽर्थतश्च 'कल्लाणाहिं' कल्याणप्राप्तिसूचिकाभिः 'सिवाहिं' उपद्रवरहिताभि शब्दार्थदूषणरहिताभिरित्यर्थः 'धन्नाहिं' धनलम्भिकाभिः 'मंगल्लाहिं' मङ्गले–अनर्थःप्रतिघाते साध्वीभिः 'सस्सिरीयाहिं' शोभायुक्ताभि 'हिययगमणिज्जाहिं' गम्भीरार्थःतः सुबोधाभिःरित्यर्थः 'हिययपल्हायणिज्जाहिं' हृदयगतकोपशोकादि- ग्रन्थिविलयनकरीभिरित्यर्थः 'मियमहुरगंभीरगाहियाहिं' मिताः–परिमिताक्षरा मधुराः–कोमलशब्दाः गम्भीरामहाध्वनयो दुरवधार्यमप्यर्थं श्रोतृन् ग्राहयन्ति यास्ता ग्राहिकास्ततः पदचतुष्टयस्य कर्म्मधारयोऽतस्ताभि 'मियमहुरगंभीरसस्सिरीयाहिं' ति क्वचिद् दृश्यते ।

तत्र च मिताः अक्षरतो मधुराः शब्दतो गम्भीरा–अर्थःतो ध्वनितश्च स्वश्रीः–आत्मसम्पद यासां तास्तथा ताभि 'अट्ठसइयाहिं' अर्थःशतानि यासु सन्ति ना अर्थःशतिकास्ताभिः अथवा सह– बहुफलत्वं अर्थःतः सइयाओ अट्ठसइयाओ 'ताहिं अपुणरुत्ताहिं वग्गूहिं' वाग्भिर्गीर्भिरिकार्थिःकानि वा प्राय इष्टादीनि वाग्विशेषणानीति 'अनवरयं' सन्ततम् 'अभिनंदंता ये' त्यादि तु लिखितमेवास्ते, तत्र चाभिनन्दयन्तो–जय जीवेत्यादि भणन्तोऽभिवृद्धिमाचक्षाणाः 'जय जये' त्याशीर्वचनं भक्तिसम्भ्रमे च द्विर्वचनं 'नंदा धम्मेणं' ति 'नन्द' वर्द्धस्व धर्मेण एवं तपसाऽपि, अथवा जय जय विपक्षं, केन ?

धर्मेण हे नन्द ! इत्येवमक्षरघटनेति 'जय २ नंदा ! भद्दं ते' जय त्वं हे जगन्नन्दिकर ! भद्रं ते भवतादिति गमयं 'जियविग्घोऽविय' त्ति जितविघ्नश्च 'वसाहि तं देव ! सिद्धमज्झे' त्ति वस त्वं हे देव ! सिद्धिमध्ये देवसिद्धिमध्ये वा 'निहणाहि ये' त्यादि निर्घातय च रागद्वेषमल्लौ तपसा, कथम्भूतः न् ? इत्याह–धृतिरेव धनिकं अत्यर्थं बद्धा कक्षा (कच्छोटा) येन स तथा, मल्लो हि मल्लान्तरजयसमर्थो भवति गाढबद्धकक्षः सन्निति कृत्वोक्तं 'धिइधणिये' त्यादि, तथ 'अप्पमत्तो'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, 'हराहि'त्ति गृहाण आराधना-ज्ञानादिसम्यकपालना सैव पताका जयप्राप्तनटग्राह्या आराधनापताका तां त्रैलोक्यमेव रङ्गमध्यं-मल्लयुद्धद्रष्टृमहाजनमध्यं तत्र, "हंता परीसहचमूं ति हत्वा परीषहसैन्यं, अथवा 'हन्ता' घातकः परीषहचम्वा इति विभक्तिपरिणामात् शीलार्थःकतृन्नन्तत्वाद्वा हन्ता परीषहचमूमिति 'अभिभविय'त्ति अभिभूय-जित्वा 'गामकंटकोवसग्गाणं'ति इन्द्रियग्रामप्रतिकूलोपसर्गानित्यर्थः णं वाक्यालङ्कारे अथवा 'अभिभविता' जेता ग्रामकण्टकोपसर्गाणामिति, किं बहुना ? -'धम्मे ते' इत्यादि।

'नयणमालासहस्सेहिं'ति नयनमालाः- श्रेणीभूतजननेत्रपङ्क्तयः 'एवं जहा उववाइए'त्ति अनेन यत्सूचितं तदिदं-'वयणमासहस्सेहिं अभिथुव्वमाणे २ हिययमालासहस्सेहिं अभिनंदिज्जमाणे २' जनमनःसमूहैः समृद्धिमुपनीयमानो जय जीव नन्देत्यादिपर्यालोचनादिति भावः 'मणोरहमालासहस्सेहिं विच्छिप्पमाणे २' एतस्य पादमूले वत्स्याम इत्यादिभिर्जनविकल्पैर्विशेषण स्पृश्यमान इत्यर्थः 'कंतिरूवसोहग्गजोव्वणगुणेहिं पत्थिज्जमाणे २' कान्त्यादिभिर्गुणैर्हेतुभूतैः प्रार्थ्यमानो भर्तृतया स्वामितया वा जनैरिति 'अंगुलिमासहस्सेहिं दाइज्जमाणे २' 'दाहिणहत्थेणं बहूणं नरनारिसहस्साणं अंजलिमालासहस्साइं पडिच्छेमाणे २ भवणभित्ती (पन्ती) सहस्साइं' 'समइच्छिमाणे २' समतिक्रा-मन्नित्यर्थः 'तंतीलतालगीयवाइयरवेणं' तन्त्री-वीणा तलाः-हस्ताः तालाः-कांसिकाः तलताला वा-हस्ततालाः गीतवादिते-प्रतीते एषां यो रवः स तथा तेन 'महुरेणं मणहरेणं' 'जय २ सद्दुग्घोस-मीसएणं' जयेतिशब्दस्य यद् उद्घोषणं तेन मिश्रो यः स तथा तेन तथा 'मंजुमंजुणा घोसेणं' अतिकोमलेन ध्वनिना स्तावकलोकसम्बन्धिना नूपुरादिभूषणसम्बन्धिना वा 'अप्पडिबुज्झमाणे'त्ति अप्रतिबुद्ध्यमानः-शब्दान्तराण्यनवधारयन् अप्रत्युह्यमानो वा-अनपहियमाणमानसो वैराग्यगतमानसत्वादिति।

'कंदरगिरिविवरकुहरगिरिवरपासादुद्धधणभवणदेवकुलसिंघाडगतिगचउक्कचच्चर आरामुज्जाणकाणणसभप्पवप्पदेसदेसभागे'त्ति कन्दराणि-भूमिविवराणि गिरीणां विवरकुहराणि-गुहाः पर्वतान्तराणि वा गिरिवराः-प्रधानपर्वताः प्रासादाः-सप्तभूमिकादयः ऊर्द्धधनभवनानि-उच्चाविरलगेहानि देवकुलानि-प्रतीतानि शृङ्गाटकत्रिकचतुष्कचत्वराणि प्राग्वत् आरामाः-पुष्पजातिप्रधाना वनखण्डाः उद्यानानि-पुष्पादिमद्वृक्षयुक्तानि काननानि-नगराद् दूरवर्त्तीनि सभा-आस्थायिकाः प्रपा-जलदानस्थानि एतेषां ये प्रदेशदेशरूपा भागास्ते तथा तान्, प्रदेशा-लघुतरा भागाः देशास्तु महत्तराः, अयं पुनर्दण्डकः क्वचिदन्यथा दृश्यते-'कंदरदरिकुहरविवरगिरिपायारट्टालचरियदारगोउरपा सायदुवारभवणदेवकुलआरामुज्जाकाणणसभपएस'त्ति प्रतीतार्थःश्चायं, 'पडिसुयाससहस्ससंकुले करेमाणे'त्ति प्रतिश्रुच्छतसहस्रसङ्कुलान् प्रतिशब्दलक्षसङ्कुलानित्यर्थः कुर्वन् २ निर्गच्छतीति सम्बन्धः 'हयहेसियहत्थिगुलुगुलाइयरहघणघणाइयसद्दमीसएणं महया कलकलरवेण य जणस्स सुमहुरेणं पूरेंतोऽवरं समंता सुयंधवरकुसुमचुन्नउविद्धवासरेणुमइलं णभं करेंते' सुगन्धीनां-वरकुसुमानां चूर्णानां च 'उव्विद्ध' ऊर्द्धगतो यो वासरेणुः-वासकं रजस्तेन मलिनं यत्तत्तथा।

'कालागुरुपवरकुंदुरुक्कतुरुक्कधूवनिववहेण जीवलोगमिव वासयंते' कालागुरु-गन्धद्रव्यविशेषःप्रवरकुन्दुरुक्कं-वरचीडा तुरुक्कंसिल्हकं धूपः-तदन्यः एतल्लक्षणो वा एषामेतस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा यो निवहः स तथा तेन जीवलोकं वासयन्निवेति 'समंतओ खुम्भियचक्कवालं' क्षुभितानि चक्रवालानि–जनमण्डलानि यत्र गमने तत्तथा तद्यता भवत्येवं निर्गच्छतीति सम्बन्धः 'पउरजणबालवुड्ढपमुइयतुरियपहावियविउलाउलबोलबहुलं नभं करेंते' पौरजनाश्च अथवा प्रचुरजनाश्च बाला वृद्धाश्च ये प्रमुदिताः त्वरितप्रधाविताश्च–शीघ्रं गच्छन्तस्तेषां नगरस्स मज्झंमज्झेणंति, शेषं तु लिखितमेवास्त इति।

'पउमेइ व'त्ति इह यावत्करणादिदं दृश्यं–'कुमुदेइ वा नलिणेइ वा सुभगेइ वा सोगंधिएइ वा' इत्यादि, एषां च भेदोरूढिगम्यः, 'कामेहिं जाए'त्ति कामेषु–शब्दादिरूपेषु जातः 'भोगेहिं संवुड्ढे'त्ति भोगा–गन्धरसस्पर्शास्तेषु मध्ये संवृद्धो–वृद्धिमुपगतः 'नोवलिप्पइ कामरएण'त्ति कामलक्षणं रजः कामरजस्तेनकामरजसा कामरतेन वा–कामानुरागेण 'मित्तनाई' इत्यादि, मित्राणि–प्रतीतानि ज्ञातयः–स्वजातीयाः निजका–मातुलादयः स्वजनाः–पितृपितृ- व्यादयः सम्बन्धिनः–श्वशुरादयः परिजनो–दासादि, इह समाहारद्वन्द्वस्ततस्तेन नोपलिप्यते– स्नेहतः सम्बद्धो न भवतीत्यर्थः 'हारवारि' इह यावत्करणादिदं दृश्यं–'धारासिंदुवारच्छिन्नमुत्ता-वलिपयासाइं अंसूणि'त्ति।

'जइयव्वं'ति प्राप्तेषु संयमयोगेषु प्रयत्नः कार्य 'जाया!' हे पुत्र! 'घडियव्वं'ति अप्राप्तानां संयमयोगानां प्राप्तये घटना कार्या 'परिक्कमियव्वं'ति पराक्रमः कार्य पुरुषत्वाभिमानः सिद्धफलः कर्त्तव्य इति भावः, किमुक्तं भवति ?–'अस्सिं चे'त्यादि, अस्मिंश्चार्थे–प्रव्रज्यानुपालनलक्षणे न प्रमादयितव्यमिति, 'एवं जहा उसभदत्तो' इत्यनेन यत्सूचितं तदिदं–'तेणामेव उवागच्छइ उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणं पयाहिणं पकरेइ २ वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी–आलित्ते णं भंते! लोए' इत्यादि, व्याख्यातं चेदं प्रागिति।

**मू. (४६६)** *तएणं से जमाली अनगारे अन्नया कयाइं जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ तेणेव उवागच्छइत्ता समणं भगवं महावीरं वंदति नमंसति वंदित्ता २ एवं वयासी–इच्छामि णं भंते! तुज्झेहिं अब्भुन्नाए समाणे पंचहिं अनगारसएहिं सद्धिं बहिया जणवयविहारं विहरित्तए, तएणंसे समणेभगवंमहावीरे जमालिस्स अनगारस्सएयमट्ठं नोआढाइ नो परिजाणाइ तुसिणीए संचिट्ठइ*

*तए णं सेजमाली अनगारे समणं भगवं महावीरं दोच्चंपि तच्चंपि एवंवयासी–इच्छामि णं भंते! तुज्झेहिंअब्भणुन्नाए समाणे पंचहिं अनगारसएहिं सद्धिं जाव विहरित्तए, तए णं समणे भगवं महावीरे जमालिस्स अनगारस्स दोच्चंपि तच्चंपि एयमट्ठं णो आढाइ जाव तुसिणीए संचिट्ठइ*

*तए णं से जमाली अनगारे समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता समणस्स भगवओ महावीरस्स अंतियाओ बहुसालाओ चेइयाओ पडिनिक्खमइ पडिनिक्खमित्ता पंचहिं अनगारसएहिं सद्धिं बहिया जणवयविहारं विहरइ, तेणं कालेणं तेणं समएणं सावत्थीनामं नयरी होत्था वन्नओ, कोट्ठए चेइए वन्नओ, जाव वनसंडस्स, तेणं कालेणं तेणं समएणंचंपा नाम नयरी होत्था वन्नओ पुन्नभद्दे चेइएवन्नओ, जाव पुढविसिलावट्टओ।*

*तए णं से जमाली अनगारे अन्नया कयाइ पंचहिं अनगारसएहिं सद्धिं संपरिवुडे पुव्वानुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव सावत्थी नयरी जेणेव कोट्ठए चेइए तेणेव उवागच्छइ तेणेव उवागच्छित्ता अहापडिरूवं उग्गहं उग्गिण्हति अहापडिरूवं उग्गहं उग्गिण्हित्ता संजमेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तवसा अप्पाणं भावेमाणे विहरइ।

तए णं समणे भगवं महावीरे अन्नया कयावि पुव्वाणुपुव्विं चरमाणे जाव सुहं सुहेणं विहरमाणे जेमेव चंपानगरी जेणेव पुन्नभद्दे चेइए तेणेव उवागच्छइ तेणेव उवागच्छित्ता अहापडिरूवं उग्गहं उग्गिण्हति अहा० २ संजमेणं तवसा अप्पाणं भावेमाणे विहरइ।

तए णं तस्स जमालिस्स अनगारस्सतेहिं अरसेहि य विरसेहि य अंतेहि य पंतेहि य लूहेहि य तुच्छेहि य कालाइक्कंतेहि य पमाणाइक्कंतेहि य सीतएहि य पाणभोयणेहिं अन्नया कयावि सरीरगंसि विउले रोगातंके पाउब्भूए उज्जले विउले पगाढे कक्कसे कडुए चंडे दुक्खे दुग्गे तिव्वे दुरहियासे पित्तज्जरपरिगतसरीरे दाहवक्कंतिए यावि विहरइ।

तए णं से जमाली अनगारे वेयणाए अभिभूए समाणे समणे निग्गंथे सद्दावेइ सद्दावेत्ता एवं वयासी–तुज्झे णं देवाणुप्पिया! मम सेज्जासंथारगं संथरेह।

तए णं ते समणा निग्गंथा जमालिस्स अनगारस्स एयमट्ठं विनएणं पडिसुणेंति पडिसुणेत्ता जमालिस्स अनगारस्स सेज्जासंथारगं संथरेंति।

तए णं से जमाली अनगारे बलियतरं वेदनाए अभिभूए समाणे दोच्चंपि समणे निग्गंथे सद्दावेइ २ त्ता दोच्चंपि एवं वयासी–ममन्नं देवाणुप्पिया! सेज्जासंथारए किं कडे कज्जइ?, एवं वुत्ते समाणे समणा निग्गंथा बिंति–भो सामी! कीरइ, तए णं ते समणा निग्गंथा जमालिं अनगारं एवं वयासीणो खलु देवाणुप्पियाणं सेज्जासंथारए कडे कज्जति।

तए णं तस्स जमालिस्स अनगारस्स अयमेयारूवे अज्झत्थिए जाव समुप्पज्जित्था–जन्नं समणे भगवं महावीरे एवं आइक्खइ जाव एवं परूवेइ–एवं खलु चलमाणे चलिए उदीरिज्जमाणे उदीरिए जाव निज्जरिज्जमाणे निज्जिन्ने तं णं मिच्छा इमं च णं पच्चक्खमेव दीसइ सेज्जासंथारए कज्जमाणे अकडे संथरिज्जमाणे असंथरिए जम्हा णं सेज्जासंथारए कज्जमाणे अकडे संथरिज्जमाणे असंथरिए तम्हा चलमाणेवि अचलिए जाव निज्जरिज्जमाणेवि अनिज्जिन्ने, एवं संपेहेइ एवं संपेहेत्ता समणे निग्गंथे सद्दावेइ समणे निग्गंथे सद्दावेत्ता एवं वयासी–जन्नं देवाणुप्पिया! समणे भगवं महावीरे एवं आइक्खइ जाव परूवेइ–एवं खलु चलमाणे चलिए तं चेव सव्वं जाव निज्जरिज्जमाणे अनिज्जिन्ने।

तए णं जमालिस्स अनगारस्स एवं आइक्खमाणस्स जाव परूवेमाणस्स अत्थेगइया समणा निग्गंथा एयमट्ठं सद्दहंति पत्तियंति रोयंति अत्थेगइया समणा निग्गंथा एयमट्ठं नो सद्दहंति ३, तत्थ णं जे ते समणा निग्गंथा जमालिस्स अनगारस्स एयमट्ठं सद्दहंति ३ ते णं जमालिं चेव अनगारं उवसंपज्जित्ताणं विहरंति।

तत्थ णं जे ते समणा निग्गंथा जमालिस्स अनगारस्स एयमट्ठं नो सद्दहंति नो पत्तियंति नो रोयंति ते णं जमालिस्स अनगारस्स अंतियाओ कोट्ठयाओ चेइयाओ पडिनिक्खमंति २ पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइ० जेणेव चंपानयरी जेणेव पुन्नभद्दे चेइए जेणेव समणं भगवं महावीरे तेणेव उवागच्छइ २ त्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणं पयाहिणं करेंति २ त्ता वंदइ नमंसइ २ समणं भगवं महावीरं उवसंपज्जित्ता णं विहरंति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'नो आढाइ' त्ति नाद्रियते तत्रार्थे नादरवान् भवति 'नो परिजाणइ' त्ति न परिजानातीत्यर्थः भाविदोषत्वेनोपेक्षणीयत्वात्तस्येति ॥ 'अरसेहि य' त्ति हिङ्ग्वादिभिरसंस्कृतत्वादविद्यमानरसैः 'विरसेहि य' त्ति पुराणत्वाद्विगतरसैः 'अंतेहि य' त्ति अरसतया सर्वधान्यान्तवर्तितभिर्वल्लचणकादिभिः 'पंतेहि य' त्ति तैरेव भुक्तावशेषत्वेन पर्युषितत्वेन वा प्रकर्षेणान्तवर्तित्वात्प्रान्तैः 'लूहेहि य' त्ति रूक्षैः 'तुच्छेहि य' त्ति अल्पैः 'कालाइक्कंतेहि य' त्ति तृष्णाबुभुक्षाकालाप्राप्तैः 'पमाणाइक्कंतेहि य' त्ति बुभुक्षापिपासामात्रानुचितैः 'रोगायंके' त्ति रोगो–व्याधि स चासावातङ्कश्च–कृच्छ्रजीवितकारीति रोगातङ्कः 'उज्जले' त्ति उज्ज्वलो–विपक्षलेशेनाप्यलङ्कितत्वात् 'तिउले' त्ति त्रीनपि मनःप्रभृतिकानार्थान् तुलयति–जयतीति त्रितुलः, कचिद्विपुल इत्युच्यते, तत्र विपुलः सकलकायव्यापकत्वात्

'पगाढे' त्ति प्रकर्षवृत्ति 'कक्कसे' त्ति कर्कशद्रव्यमिव कर्कशोऽनिष्ट इत्यर्थः– 'कडुए' त्ति कटुकं नागरादि तदिव यः स कटुकोऽनिष्ट एवेति 'चंडे' त्ति रौद्रः 'दुक्खे' त्ति दुःखहेतुः 'दुग्गे' त्ति कष्टसाध्य इत्यर्थः 'तिव्वे' त्ति तीव्रं–तिक्तं निम्बादिद्रव्यं तदिव तीव्रः, किमुक्तं भवति 'दुरहियासे' त्ति दुरधिसह्यः 'दाहवक्कंतिए' त्ति दाहो व्युत्क्रान्तः–उत्पन्नो यस्यासौ दाहव्युत्क्रान्तः स एव दाहव्युत्क्रान्तिकः 'सेज्जासंथारगं' ति शय्यायै–शयनाय संस्तारकः शय्यासंस्तारकः।

'बलियतरं' ति गाढतरं 'किं कडे कज्जइ' त्ति किं निष्पन्न उत निष्पाद्यते?, अनेनातीतकालनिर्देशेन वर्त्तमानकालनिर्देशेन च कृतक्रियमाणयोर्भेद उक्तः, उत्तरेऽप्येवमेव, तदेवं संस्तारककर्तृसाधुभिरपि क्रियमाणस्याकृतत्तोक्ता, ततश्चासौ स्वकीयवचनसंस्तारककर्तृसाधुवचनयोर्विमर्शात् प्ररूपितवान्–क्रियमाणं कृतं यदभ्युपगम्यते तन्न सङ्गच्छते, यतो येन क्रियमाणं कृतमित्यभ्युपगतं तेन विद्यमानस्य करणक्रिया प्रतिपन्ना, तथा च बहवो दोषाः, तथाहि–यत्कृतं तत्क्रियमाणं न भवति, विद्यमानत्वाच्चिरन्तनघटवत्।

अथ कृतमपि क्रियते ततः क्रियतां नित्यं कृतत्वात् प्रथमसमय इवेति, न च क्रियासमाप्तिर्भवति सर्वदा क्रियमाणत्वादादिसमयवदिति, तथा यदि क्रियमाणं कृतं स्यात्तदा क्रियावैफल्यं स्याद् अकृतविषय एव तस्याः सफलत्वात्, तथा पूर्वमसदेव भवद्दृश्यते इत्यध्यक्षविरोधश्च, तथा घटादिकार्यनिष्पत्तौ दीर्घ क्रियाकलो दृश्यते, यतो नारम्भकाल एव घटादिकार्यं दृश्यते नापि स्थासकादिकाले, किं तर्हि, तत्क्रियाऽवसाने, यतश्चैवं ततो न क्रियाकालेषु युक्तं कार्यं किन्तु क्रियाऽवसाने एवेति, आह च भाष्यकारः–

॥१॥ "जस्सेह कज्जमाणं कयंति तेणेह विज्जमाणस्स।
करणकिरिया पवन्ना तहा य बहुदोसपडिवत्ती॥

॥२॥ कयमिह न कज्जमाणं तब्भावाओ चिरंतनघडोव्व।
अहवा कयंपि कीरइ कीरउ निच्च न य समत्ती॥

॥३॥ किरियावेफल्लंपि य पुव्वमभूयं च दीसए हुंतं।
दीसइ दीहो य जओ किरियाकालो घडाईणं॥

॥४॥ नारंभे च्चियदीसइ न सिवादद्धाइ दीसइ तदंते।
तो नहि किरियाकाले जुत्तं कज्जं तदंतंमि॥ इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अत्थेगइया समणा निग्गंथा एयमट्ठं नो सद्दहंति'त्ति ये च न श्रद्धधति तेषां मतमिदं—नाकृतं अभूतमविद्यमानमित्यर्थः क्रियते अभावात् खपुष्पवत् यदि पुनरकृतमपि असदपीत्यर्थः क्रियते तदा खरविषाणमपि क्रियतामसत्त्वा विशेषात्, अपि च कृतकरण पक्षे नित्यक्रियादयो दोषा भणितास्ते च असत्करणपक्षेऽपि तुल्या वर्त्तन्ते, तथाहि—नात्यन्तमसत् क्रियतेऽसद्‌भावात् खरविषाणमिव, अथात्यन्तासदपि क्रियते तदा नित्यं तत्करणप्रसङ्गः, न चात्यन्तासतः करणे क्रियासमाप्तिर्भवति, तथाऽत्यन्तासतः करणे क्रियावैफल्यं च स्यादसत्वादेव खरविषाणवत्, अथ च अविद्यमानस्य करणाभ्युपगमे नित्यक्रियादयो दोषाः कष्टतरका भवन्ति, अत्यन्ताभावरूपत्वात् खरविषाण इवेति, विद्यमानपक्षे तु पर्यायविशेषणापर्ययणात् स्यादपि क्रियाव्यपदेशो यथाऽऽकाशं कुरु, तथा च नित्यक्रियादयो दोषा न भवन्ति, न पुनरयं न्यायोऽत्यन्तासति खरविषाणादावस्तीति, यच्चोक्तं—

पूर्वमसदेवोत्पद्यमानं दृश्यत इति प्रत्यक्षविरोधः', तत्रोच्यते, यदि पूर्वमभूतं सद्‌भवदृश्यते तदा पूर्वमभूतं सद्‌भवत् कस्त्वया खरविषाणमपि न दृश्यते, यच्चोक्तं—'दीर्घ क्रियाकालो दृश्यते, तत्रोच्यते', प्रतिसमयमुत्पन्नानां परस्परेणेषद्विलक्षणानां सुबह्वीनां स्थासकोसादीनामारम्भसमयेष्वेव निष्ठानुयायिनीनां कार्यकोटीनां दीर्घ क्रियाकालो यदि दृश्यते तदा किमत्र घटस्यायातं ? येनोच्यते—दृश्यते दीर्घश्च क्रियाकालो घटादीनामिति, यच्चोक्तं—'नारम्भएव दृश्यते' इत्यादि, तत्रोच्यते, कार्यान्तरारम्भे कार्यान्तरं कथं दृश्यतां पटारम्भे घटवत् ?, शिवकस्थासकादयश्च कार्यविशेषा घटस्वरूपा न भवन्ति, ततः शिवकादिकाले कतं घटो दृश्यतामिति।

किंच—अन्त्यसमय एव घटः समारब्धः ?, तत्रैव च यद्यसौ दृश्यते तदा को दोषः ?, एवं च क्रियमाण एव कृतो भवति, क्रियमाणसमयस्य निरंशत्वात्, यदि च संप्रतिसमये क्रियाकालेऽप्यकृतं वस्तु तदाऽतिक्रान्ते कथं क्रियतां कथं स्यति ?, क्रियाया उभयोरपि विनष्टत्वानुत्पन्नत्वेनासत्त्वादसम्बध्यमानत्वात्, तस्मात् क्रियाकाल एव क्रियमाणं कृतमिति, आह च—

॥१॥ "थेराण मयं नाकयमभावओ कीरए खपुप्फंव।
अहव अकयंपि कीरइ कीरउ तो खरविसाणंपि॥

॥२॥ निच्चकिरियाइ दोसा नणु तुल्ला असइ कट्ठतरया वा।
पुव्वमभूयं न ते दीसइ किं खरविसाणंपि॥

॥३॥ पइसमउप्पन्नाणं परोप्परविलक्खणाण सुबहूणं।
दीहो किरियाकालो जइ दीसइ किं च कुंभस्स॥

॥४॥ अन्नारंभे अन्नं किह दीसउ ? जह घडो पडारंभे।
सिवगादओ न कुंभो किह दीसउ तदद्धाए॥

॥५॥ अंते च्चिय आरद्धो जइ दीसइ तंमि चेव को दोसो ?।
अकयं च संपइ गए किहु कीरउ किह व एसंमि ?॥

—इत्यादि बहु वक्तव्यं तच्च विशेषावश्यकादवगन्तव्यमिति।—

***मू. (४६७) तए णं से जमाली अनगारे अन्नया कयावि ताओ रोगायंकाओ विप्पमुक्के हट्ठे तुट्ठे जाए अरोए बलियसरीरे सावत्थीओ नयरीओ कोट्ठयाओ चेइयाओ पडिनिक्खमइ २***

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव चंपा नयरी जेणेव पुन्नभद्दे चेइए जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणस्स भगवओ महावीरस्स अदूरसामंते ठिच्चा समणं भगवं महावीरं एवं वयासी –*

*जहा णं देवाणुप्पियाणं बहवे अंतेवासी समणा निग्गंथा छउमत्था भवेत्ता छउमत्थावक्कमणेणं अवक्कंता नो खलु अहं तहा छउमत्थे भवित्ता छउमत्थावक्कमणेणं अवक्कमिए, अहन्नं उप्पन्नणाण-दंसणधरे अरहा जिणे केवली भवित्ता केवलिअवक्कमणेणं अवक्कमिए।*

*तए णं भगवं गोयमे जमालिं अनगारं एवं वयासी–नो खलु जमाली! केवलिस्स नाणे वा दंसणे वा सेलंसि वा थंभंसि वा थूभंसि वा आवरिज्जइ वा निवारिज्जइ वा, जइ णं तुमं जमाली! उप्पन्ननाणदंसणधरे अरहा जिणे केवली भवित्ता केवलिअवक्कमणेणं अवक्कंते तो णं इमाइं दो वागरणाइं वागरेहि–सासए लोए जमाली! असासए लोए जमाली?, सासए जीवे जमाली! असासए जीवे जमाली?*

*तए णं से जमाली अनगारे भगवया गोयमेणं एवं वुत्ते समाणे संकिए कंखिए जाव कलुससमावन्ने जाए यावि होत्था, नो संचाएति भगवओ गोयमस्स किंचिवि पमोक्खमाइक्खित्तए तुसिणीए संचिट्ठइ, जमालीति समणे भगवं महावीरे जमालिं अणगारं एवं वयासी –*

*अत्थि णं जमाली ममं बहवे अंतेवासी समणा निग्गंथा छउमत्था जे णं एयं वागरणं वागरित्तए जहा णं अहं नो चेव णं एयप्पगारं भासं भासित्तए जहा णं तुणं, सासए लोए जमाली जन्न कयावि नासि न कयावि न भवति न कदावि न भविस्सइ भुविं च भवइ य भविस्सइ य धुवे नतिए सासए अक्खए अव्वए अवट्ठिए निच्चे, असासए लोए जमाली! जओ ओसप्पिणी भवित्ता उस्सप्पिणी भवइ उस्सप्पिणी भवित्ता ओसप्पिणी भवइ, सासए जीवे जमाली! जं न कयाइ नासि जाव निच्चे असासए जीवे जमाली जन्नं नेरइए भवित्ता तिरिक्खजोणिए भवइ तिरिक्खजोणिए भवित्ता मणुस्से भवइ मणुस्से भवित्ता देवे भवइ।*

*तए णं से जमाली अनगारे समणस्स भगवओ महावीरस्स एवमाइक्खमणस्स जाव एवं परूवेमाणस्स एयमट्ठं नो सद्दहइ नो पत्तिएइ नो रोएइ एयमट्ठं असद्दहमाणे अपत्तियमाणे अरोएमाणे दोच्चंपि समणस्स भगवओ महावीरस्स अंतियाओ आयाए अवक्कमइ दोच्चंपि आयाए अवक्कमित्त बहूहिं असब्भावुब्भावणाहिं मिच्छत्ताभिनिवेसेहि य अप्पाणं च परं च तदुभयं च वुग्गाहेमाणे वुप्पाएमाणे बहूयाइं वासाइं सामन्नपरियागं पाउणइ २ अद्धमासियाए संलेहणाए अत्ताणं झूसेइ अ० २ तीसं भत्ताइं अनसणाए छेदेति २ तस्स ठाणस्स अनालोइयपडिक्कंते कालमासे कालं किच्चा लंतए कप्पे तेरससागरोवमठितिएसु देवकिव्विसिएसु देवेसु देवकिव्विसियत्ताए उववन्ने।*

**वृ.** 'छउमत्थावक्कमणेणं' ति छद्मस्थानां सतामपक्रमणं–गुरुकुलान्निर्गमनं छद्मस्थापक्रमणं तेन, 'आवरिज्जइ' त्ति ईषदव्रियते 'निवारिज्जइ' त्ति नितरां वार्यते प्रतिहन्यत इत्यर्थः 'न कयाइ नासी' त्यादि तत्र न कदाचिन्नासीदनादित्वात् न कदाचिन्न भवति सदैव भावात् न कदाचिन्न भविष्यति अपर्यवसितत्वात्, किं तर्हि?

'भुविं चे' त्यादि ततश्चायं त्रिकालभावित्वेनाचलत्वाद् ध्रुवो मेर्वादिवत् ध्रुवत्वादेव 'नियतः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियताकारो नियतत्वादेव शाश्वतः प्रतिक्षणमप्यसत्त्वस्याभावत् शाश्वतत्वादेव 'अक्षयः' निर्विनाशः, अक्षयत्वादेवाव्ययः प्रदेशापेक्षया, अवस्थितो द्रव्यापेक्षया, नित्यस्तदुभयापेक्षया, एकार्था चैते शब्दाः ।

**मू. (४६८)** *तए णं से भगवं गोयमे जमालिं अनगारं कालगयं जाणित्ता जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ ते० २ समणं भगवं महावीरं वंदति नमंसति २ एवं वयासी–एवं खलु देवाणुप्पियाणं अंतेवासी कुसिस्से जमालिनामं अनगारे से णं भंते! जमाली अनगारे कालमासे कालं किच्चा कहिं गए कहिं उववन्ने ।*

*गोयमादि समणे भगवं महावीरे भगवं गोयमं एवं वयासी–एवं खलु गोयमा! ममं अंतेवासी कुसिस्से जमाली नामं से णं तदा मम एवं आइक्खमाणस्स ४ एयमट्ठं णो सद्दहइ ३ एयमट्ठं असद्दहमाणे ३ दोच्चंपि ममं अंतियाओ आयाए अवक्कमइ २ बहूहिं असब्भावुब्भावणाहिं तं चेव जाव देवकिब्बिसियत्ताए उववन्ने ।*

**वृ.** 'आयाए'त्ति आत्मना 'असब्भावुब्भावणाहिं'ति असद्भावानां–वितथार्थानुद्भावना–उत्प्रेक्षणानि असद्भावोद्भावनास्ताभिः 'मिच्छत्ताभिनिवेसेहि य'त्ति मिथ्यात्वात्–मिथ्यादर्शनोदयाद् येऽभिनिवेशा–आग्रहास्ते तथा तैः 'वुग्गाहेमाणे'त्ति व्युद्ग्राहयन् विरुद्धग्रहवन्तं कुर्वन्नित्यर्थः 'वुप्पाएमाणे'त्ति व्युत्पादयन् दुर्विदग्धीकुर्वन्नित्यर्थः ।

**मू. (४६९)** *कतिविहा णं भंते! देवकिब्बिसिया पन्नत्ता?, गोयमा! तिविहा देवकिब्बिसिया पन्नत्ता, तंजहा–तिपलिओवमट्ठिइया तिसागरोवमट्ठिइया तेरससागरोवमट्ठिइया, कहि णं भंते! तिपलिओवमट्ठितीया देवकिब्बिसिया परिवसंति? गोयमा! उप्पिं जोइसियाणं हिट्ठिं सोहम्मीसाणेसु कप्पेसु एत्थ णं तिपिलिओवमट्ठिइया देवकिब्बिसिया परिवसंति ।*

*कहि णं भंते! तिसागरोवमट्ठिइया देवकिब्बिसिया परिवसंति?, गोयमा! उप्पिं सोहम्मीसाणाणं कप्पाणं हिट्ठिं सणंकुमारमाहिंदेसु कप्पेसु एत्थ णं तिसागरोवमट्ठिइया देवकिब्बिसिया परिवसंति, कहि णं भंते! तेरससागरोवमट्ठिइया देवकिब्बिसिया देवा परिवसंति?, गोयमा! उप्पिं बंभलोगस्स कप्पस्स हिट्ठ लंतए कप्पे एत्थ णं तेरससागरोवमट्ठिइया देवकिब्बिसिया देवा परिवसंति। देवकिब्बिसिया णं भंते! केसु कम्मादानेसु देवकिब्बिसियत्ताए उववत्तारो भवंति?*

*गोयमा! जे इमे जीवा आयरियपडिणीया उवज्झायपडिणीया कुलपडिणीया गणपडिणीया संघपडिणीया आयरियउवज्झायाणं अयसकरा अवन्नकरा अकित्तिकरा बहूहिं असब्भावुब्भावणाहिं मिच्छत्ताभिनिवेसेहि य अप्पाणं च ३ वुग्गाहेमाणा वुप्पाएमाणा बहूइं वासाइं सामन्नपरियागं पाउणंति पा० २ तस्स ठाणस्स अनालोइयपडिक्कंते कालमासे कालं किच्चा अन्नयरेसु देवकिब्बिसिएसु देवकिब्बिसियत्ताए उववत्तारो भवतं, तं०–तिपलिओवमट्ठितीएसु वा तिसागरोवमट्ठितीएसु वा*

*देवकिब्बिसियाणं भंते! ताओ देवलोगाओ आउक्खएणं भवक्खएणं ठिइक्खएणं अनंतरं चयं चइत्ता कहिं गच्छंति कहिं उववज्जंति?, गोयमा! जाव चत्तारि पंच नेरइयतिरिक्खजोणियमणुस्सदेवभवग्गहणाइं संसारं अनुपरियट्टित्ता तओ पच्छ सिज्झंति बुज्झंति जाव अंतं करेंति, अत्थेगइया अनादीयं अनवदग्गं दीहमद्धं चाउरंतसंसारकंतारं अनुपरियट्टंति ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जमाली णं भंते ! अनगारे अरसाहारे विरसाहारे अंताहारे लूहाहारे तुच्छाहारे अरसजीवी विरसजीवी जाव तुच्छजीवी उवसंतजीवी पसंतजीवी विवित्तजीवी ?, हंता गोयमा ! जमाली णं अनगारेअरसाहारे विरसाहारे जाव विवित्तजीवी ।*

*जति णं भंते ! जमाली अनगारे अरसाहारे विरसाहारे जाव विवित्तजीवी कम्हा णं भंते ! जमाली अनगारे कालमासे कालं किच्चा लंतए कप्पे तेरससागरोवमट्ठितिएसु देवकिव्विसिएसु देवेसु देवकिव्विसियत्ताए उववन्ने ?, गोयमा ! जमाली णं अनगारे आयरियपडिणीए उवज्झाय-पडिणीए आयरियउवज्झायाणं अयसकारए जाव वुप्पाएमाणे जाव बहूइं वासाइं सामन्नपरियागं पाउणित्ता अद्धमासियाए संलेहणाए तीसं भत्ताइं अनसणाए छेदेति तीसं० २ तस्स ठाणस्स अनालोइयपडिक्कंते कालमासे कालं किच्चा लंतए कप्पे जाव उववन्ने ।*

**वृ.** 'केसु कम्मादानेसु' त्ति केषु कर्महेतुषु सत्स्वित्यर्थः 'अजसकारगे' त्यादौ सर्वदिग्गामिनी प्रसिद्धिर्यशस्तत्प्रतिषेधादयशः, अवर्णस्त्वप्रसिद्धिमात्रम्, अकीर्त्ति पुनरेकदिग्गामिन्यप्रसिद्धिरिति 'अरसाहारे' त्यादि, इह च 'अरसाहारे' इत्याद्यपेक्षया 'अरसजीवी' त्यादि न पुनरुक्तं शीलादिप्रत्य-यार्थेन भिन्नार्थःत्वादिति, 'उवसंतजीवि' त्ति उपशान्तोऽन्तर्वृत्या जीवतीत्येवंशील उपशान्तजीवी, एवं प्रशान्तजीवी नवरं प्रशान्तो बहिर्वृत्या, 'विवित्तजीवि' त्ति इह विविक्तः स्त्र्यादिसंसक्ता-सनादिवर्जनत इति । अथ भगवता श्रीमन्महावीरेण सर्वज्ञत्वादमुं तद्व्यतिकरं जानताऽपि किमिति प्रव्राजितोऽसौ ? इति, उच्यते अवश्यम्भाविभावानां महानुभावैरपि सर्वज्ञत्वादमुं तद्व्यतिकरं जानताऽपि किमित प्रव्राजितोऽसौ ? इति, उच्यते, अवश्यम्भाविभावानां महानुभावैरपि प्रायो लङ्घयितुमशक्यत्वाद् इत्थमेव वा गुणविशेषदर्शनाद्, अमूढलक्षा हि भगवन्तोऽर्हन्तो न निष्प्रयोजनं क्रियासु प्रवर्त्तन्त इति ॥

***मू. (४७०)*** *जमाली णं भंते ! देवे ताओ देवलोयाओ आउक्खएणं जाव कहिं उवव - ज्जइ ?, गोयमा ! चत्तारि पंच तिरिक्खजोणियमणुस्सदेवभवग्गहणाइं संसारं अनुपरियट्टित्ता तओ पच्छा सिज्झिहिति जाव अंतं काहेति । सेवं भंते २ त्ति ॥*

शतकं–९ उद्देशकः–३३ समाप्तः

## –: शतकं–९ उद्देशकः–३४ :–

**वृ.** अनन्तरोद्देशके गुरुप्रत्यनीकतया स्वगुणव्याघात उक्तश्चतुस्त्रिंशत्तमे तु पुरुषव्याघातेन तदन्यजीवव्याघात उच्यत इत्येवंसंबद्धस्यास्येदमादिसूत्रम्–

***मू. (४७१)*** *तेणं कालेणं तेणं समएणं रायगिहे जाव एवं वयासी–पुरिसे णं भंते ! पुरिसं हणमाणे किं पुरिसं हणइ नोपुरिसं हणइ ?, गोयमा ! पुरिसंपि हणइ नोपुरिसेवि हणति, से केणट्ठेणं भंते ! एवं वुच्चइ पुरिसंपि हणइ नोपुरिसेवि हणइ ?, गोयमा ! तस्स णं एवं भवइ एवं खलु अहं एगं पुरिसं हणामि से णं एगं पुरिसं हणमाणे अनेगजीवा हणइ, से तेणट्ठेणं गोयमा ! एवं वुच्चइ पुरिसंपि हणइ नोपुरिसेवि हणति ।*

*पुरिसे णं भंते ! आसं हणमाणे किं आसं हणइ नोआसेवि हणइ ?, गोयमा ! आसंपि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*हणइ नोआसेवि हणइ, से केणट्ठेणं अट्ठोतहेव, एवं हत्थिं सीहं वग्घं जाव चिल्ल लगं।*

*पुरिसे णं भंते ! अन्नयरं तसपाणं हणमाणे किं अन्नयरं तसपाणं हणइ नो अन्नयरे तसपाणे हणइ ? गोयमा ! अन्नयरंपि तसपाणं हणइ नो अन्नयरेवि तसेपाणे हणइ, से केणट्ठेणं भंते एवं वुच्चइ अन्नयरंवि तसंपाणं नो अन्नयरेवि तसेपाणे हणइं ? गोयमा ! तस्सणं एवं भवइ एवं खलु अहं एगं अन्नयरं तसं पाणं हणामि सेणं एगं अन्नयरं तसं पाणं हणेमाणे अनेगे जीवे हणइ, से तेणट्ठेणं गोयमा ! तं चेव सव्वेवि एक्क गमा।*

*पुरिसे णं भंते ! इसिं हणमाणे किं इसिं हणइ नोइसिं हणइ ? गोयमा इसिंपि हणइ नो इसिंपि हणइ से केणट्ठेणं भंते ! एवं वुच्चइ जाव नोइसिंपि हणइ ?, गोयमा ! तस्स णं एवं भवइ एवं खलु अहं एगं इसिं हणामि, से णं एगं इसिं हणमाणे अनंते जीवे हणइ से तेणट्ठेणं निक्खेवओ*

*पुरिसे णं भंते ! पुरिसं हणमाणे किं पुरिसवेरेणं पुट्ठे नोपुरिसवेरेणं पुट्ठे ?, गोयमा ! नियमा ताव पुरिसवेरेणं पुट्ठे अहवा पुरिसवेरेण य नोपुसवेरेण य पुट्ठे अहवा पुरिसवेरेण य नोपुरिसवेरेहि पुट्ठे, एवं आसं एवं जाव चिल्ललगं जाव अहवा चिल्ललगवेरेण य नो चिल्ललगवेरेहि य पुट्ठे, पुरिसे णं भंते ! इसिं हणमाणे किं इसिवेरेणं पुट्ठे नोइसिवेरणं ?, गोयमा ! नियमा इसिवेरेण य नोइसिवेरेहि य पुट्ठे*

**वृ.** 'तेण'मित्यादि, 'नोपुरिसं हणइ'त्ति पुरुषव्यतिरिक्तं जीवान्तरं हन्ति 'अनेगे जीवे हणइ'त्ति 'अनेकान् जीवान्' यूकाशतपदिकाकृमिगण्डोलकादीन् तदाश्रितान् तच्छरीरा-वष्टब्धांस्तद्रुधिरप्लावितादींश्च हन्ति, अथवा स्वकायस्याकुञ्चनप्रसरणादिनेति, 'छणइ'त्तिक्वचित्पा-ठस्तत्रापि स एवार्थः, क्षणघातोहिंसार्थःत्वात्, बाहुल्याश्रयं चेदं सूत्रं, तेन पुरुषं घ्नन् तथाविधसाम-ग्रीवशात् कश्चित्तमेव हन्ति कश्चिदेकमपि जीवान्तरं हन्तीत्यपि द्रष्टव्यं, वक्ष्यमाणभङ्गकत्र-यान्यथाऽनुपपत्तेरिति, 'एते सव्वे एक्कगमा' 'एते' हस्त्यादयः 'एकगमाः' सदृशाभिलापाः 'इसिं'ति ऋषिम् 'अनंते जीवे हणइ'त्ति ऋषिं घ्नन्ननन्तान् जीवान् हन्ति, यतस्तद्घातेऽनन्तानां घातो भवति, मृतस्य तस्य विरतेरभावेनानन्तजीवघातकत्वभावात्, अथवा ऋषिर्जीवान् बहून् प्राणिनः प्रतिबोधयति, ते च प्रतिबुद्धाः क्रमेण मोक्षमासादयन्ति, मुक्तश्चानन्तानामपि संसारिणामघातका भवन्ति, तद्वधे चैतत्सर्वं न भवत्यतस्तद्वधेऽनन्तजीववधो भगवतीति, 'निक्खेवओ'त्ति नगमनं

'नियमा पुरिसवेरेणे'त्यादि, पुरुषस्य हतत्वान्नियमात्पुरुषवधपापेन स्पृष्ट इत्येको भङ्गः, तत्र च यदि प्राण्यन्तरमपि हतं तदा पुरुषवैरेण नोपुरुषवैरेण चेति द्वितीयः, यदि तु बहवः प्राणिनो हतास्तत्र तदा पुरुषवैरेण नोपुरुषवैरैश्चेति तृतीयः, एवं सर्वत्र त्रयम्, ऋषिपक्षे तु ऋषिवैरेण नोऋषिवैरैश्चेत्यमेक एव, ननु यो मृतो मोक्षं चास्यत्यविरतो न भविष्यति तस्यर्षेर्वधे ऋ,षिवैरमेव भवत्यतः प्रथमविकल्पसम्भवः, अथ चरमशरीरस्य निरुपक्रमायुष्कत्वान्न हननसम्भवस्ततोऽ-चरमशरीरापेक्षया यथोक्तभङ्गसम्भवो, नैवं, यतो यद्यपि चरमशरीरो निरुपक्रमायुष्कस्तथाऽपि तद्वधाय प्रवृत्तस्य यमुनराजस्येव वैरमस्त्येवेति प्रथमभङ्गकसम्भव इति, सत्यं, किन्तु यस्य ऋषेः सोपक्रमायुष्कत्वात् पुरुषकृतो वधो भवति तमाश्रित्येदं सूत्रं प्रवृत्तं, तस्यैव हननस्य मुख्यवृत्त्या पुरुषकृतत्वादिति।

प्राग् हननमुक्तं, हननं चोच्छ्सादिवियोगोऽतउच्छ्वासादिवक्तव्यतामाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (४७२) पुढविकाइया णं भंते! पुढविकायं चेव आणमंति वा पाणमंति वा ऊससंति वा नीससंति वा?, हंता गोयमा! पुढविक्काइए पुढविक्काइयं चेव आणमंति वा जाव नीससंति वा*

*पुढवीक्काइए णं भंते! आउक्काइयं आणमंति वा जाव नीससंति?, हंता गोयमा! पुढविक्काइए आउक्काइयं आणमंति वा जाव नीससंति वा, एवं तेउक्काइयं वाउक्काइयं एवं वणस्सइयं।*

*आउक्काइए णं भंते! पुढवीक्काइयं आणमंति वा पाणमंति वा?, एवं चेव, आउक्काइए णं भंते! आउक्काइयं चेव आणमंति वा?, एवं चेव, एवं तेउवाऊवणस्सइकाइयं।*

*तेऊक्काइ णं भंते! पुढविक्काइयं आणमंति वा?, एवं जाव वणस्सइकाइए णं भंते! वणस्सइकाइयं चेव आणमंति वा तहेव।*

*पुढविक्काइए णं भंते! पुढविकाइयं चेव आणममाणे वा पाणममाणे वा ऊससमाणे वा नीससमाणे वा कइकिरिए?, गोयमा! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए।*

*पुढविक्काइए णं भंते! आउक्काइयं आणममाणे वा० ? एवं चेव एवं जाव वणस्सइकाइयं, एवं आउकाइएणवि सव्वेवि भाणियव्वा, एवं तेउक्काइएणवि, एवं वाउक्काइएणवि, जाव वणस्सइकाइए णं भंते! वणस्सइकाइयं चेव आणममाणे वा? पुच्छा, गोयमा! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए॥*

**वृ.** 'पुढविक्काइए णं भंते' इत्यादि, इह पूज्यव्याख्या यथा वनस्पतिरन्यस्योपर्यन्यः स्थितस्तत्तेजोग्रहणं करोति एवं पृथिवीकायिकादयोऽप्यन्योऽन्यसंबद्धत्वात्तद्रूपं प्राणापानादि कुर्वन्तीति, तत्रैक–: पृथिवीकायिकोऽन्यं स्वसंबद्धं पृथिवीकायिकम् अनिति–तद्रूपमुच्छसं करोति, यथोदरस्थितकर्पूरः पुरुषः कर्पूरस्वभावमुच्छसं करोति, एवमप्कायादिकानिति, एवं पृथिवीकायिकसूत्राणि पञ्च, एवमेवाप्कायादयः प्रत्येकं पञ्च सूत्राणि लभन्त इति पञ्चविंशति सूत्राण्येतानीति।

क्रियासूत्राण्यपि पञ्चविंशतिस्तत्र 'सिय तिकिरिए' त्ति यदा पृथिवीकायिकादि पृथिवीकायिकादिरूपमुच्छसं कुर्वन्नपि न तस्य पीडामुत्पादयति स्वभावविशेषात्तदाऽसौ कायिक्यादित्रिक्रियः स्यात्, यदा तु तस्य पीडामुत्पादयति तदा पारितापनिकीक्रियाभावाच्चतुष्क्रियः, प्राणातिपातसद्भावे तु पञ्चक्रिय इति।

*मू. (४७३) वाउक्काइए णं भंते! रुक्खस्स मूलं पचालेमाणे वा पवाडेमाणे वा कतिकिरिए गोयमा! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए।*

*एवं कंदं एवं जाव मूलं बीयं पचालेमाणे वा पुच्छा, गोयमा! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए। सेवं भंते! सेवं भंतेत्ति।*

**वृ.** क्रियाधिकारादेवेदमाह–'वाउक्काइए ण' मित्यादि, इह च वायुना वृक्षमूलस्य प्रचलनं प्रपातनं वा तदा संभवति यथा नदीभित्यादिषु पृतिव्या अनावृत्तं तत्स्यादिति। अथ कथं प्रपातेन त्रिक्रियत्वं परितापादेः सम्भवात्?, उच्यते, अचेतनमूलापेक्षयेति।

शतकं–९ उद्देशकः–३४ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ असम्मनोव्योमतलप्रचारिणा, श्रीपार्श्वसूर्यस्य विसर्प्पितेजसा ।
दुर्धृष्यसंमोहतमोऽ- पसारणाद्, विभक्तमेवं नवमं शतं मया ।

**शतकं-९ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता अभयदेवसूरि विरचिता भगवतीअङ्गसूत्रे नवमशतकस्य टीका परिसमाप्ता ।**

## शतकं-१०

**वृ.** व्याख्यातं नवमं शतम्, अथ दशमं व्याख्यायते, अस्य चायमभिसम्बन्धः—अनन्तरशते जीवादयोऽर्था प्रतिपादिताः इहापि त एव प्रकारान्तरेण प्रतिपाद्यन्ते, इत्येवंसम्बन्धस्यास्योद्देशकार्थःसङ्ग्रहगाथेयम्—

**मू. (४७४)** *' दिसि १ संवुडअनगारे २ आयड्ढी ३ सामहत्थि ४ देवे ५ सभा ६ ।*
*उत्तर अंतरदीवा २८ दसमंमिसयंमि चोत्तीसा ॥*

**वृ.** 'दिसे'त्यादि, 'दिस'त्ति दिशमाश्रित्य प्रथम उद्देशकः १ 'संवुडअनगारे'त्ति संवृतानगारविषयो द्वितीयः २ 'आइड्ढि'त्ति आत्मर्द्ध्या देवो देवी वा वासान्तराणि व्यतिक्रामेदित्याद्यर्थाभिधायकस्तृतीयः ३ 'सामहत्थि'त्ति श्यामहस्तयमिदानश्रीमन्महावीरशिष्टप्रश्नप्रतिबद्ध- श्चतुर्थः ४ ।

'देवि'त्ति चमराद्यग्रमहिषीप्ररूणार्थः पञ्चमः ५ 'सभ'त्ति सुधर्म्मसभाप्रतिपादनार्थः षष्ठः ६ 'उत्तरअंतरदीवि'त्ति उत्तरस्यां दिशि येऽन्तरद्वीपास्तत्प्रतिपादनार्था अष्टाविंशततिरुद्देशकाः, एवं चादितो दशमे शते चतुस्त्रिंशदुद्देशका भवन्तीति ॥

### —: शतकं—१० उद्देशकः—१ :—

**मू. (४७५)** *रायगिहे जाव एवं वयासी—किमियं भंते ! पाईणत्ति पवुच्चई ?, गोयमा ! जीवा चेव अजीवा चेव, किमियं भंते ! पडीणाति पवुच्चई ?, गोयमा ! एवं चेव एवं दाहिणा एवं उदीणा एवं उड्ढा एवं अहोवि ।*

*कति णं भंते ! दिसाओ पन्नत्ताओ ?, गोयमा ! दस दिसाओ पन्नत्ताओ, तंजहा—पुरच्छिमा १ पुरच्छिमदाहिणा २ दाहिणा ३ दाहिणपच्चत्थिमा ४ पच्चत्थिमा ५ पच्चत्थिमुत्तरा ६ उत्तरा ७ उत्तरपुरच्छिमा ८ उड्ढा ९ अहो १० ।*

*एयासि णं भंते ! दसण्हं दिसाणं कति नामधेज्ञा पन्नत्ता ?, गोयमा ! दस नामधेज्ञा पन्नत्ता, तंजहा—*

*इंदा १ अग्गेयी २ जमा य ३ नेरती ४ वारुणी ५ वायव्वा ६*
*सोमा ७ ईसाणीय ८ विमला य ९ तमा य १० बोद्धव्वा ।*

*इंदा णं भंते ! दिसा किं जीवा जीवदेसा जीवपएसा अजीवा अजीवपदेसा अजीवपएसा गोयमा ! जीवावि ३ तं चेव जाव अजीवपएसावि, जे जीवा ते नियमा एगिंदिया बेइंदिया जाव पंचिंदिया अनिंदिया, जे जीवदेसा ते नियमा एगिंदियदेसा जाव अनिंदियदेसा, जे जीवपएसा ते एगिंदियपएसा बेइंदियपएसा जाव अनिंदियपएसा ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जे अजीवा ते दुविहा पन्नत्ता, तंजहारूवी अजीवा य अरूवी अजीवा य, जे रूवी अजीवा ते चउव्विहा पन्नत्ता, तंजहा—खंधा १ खंधदेसा २ खंधपएसा ३ परमाणुपोग्गला ४।*

*जे अरूवी अजीवा ते सत्तविहा पन्नत्ता, तंजहा—नोधम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पएसा नोअधम्मत्थिकाए अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पएसा नोआगसत्थिकाए आगासत्थिकायस्स देसे आकासत्थिकायस्स पएसा अद्धासमए।*

*अग्गेई णं भंते! दिसा किं जीवा जीवदेसा जीवपएसा? पुच्छा, गोयमा! नो जीवा जीवदेसावि १ जीवपएसावि २ अजीवावि १ अजीवदेसावि २ अजीवपएसावि ३।*

*जे जीवदेसा ते नियमा एगिंदियदेसा अहवा एगिंदियदेसा य बेइंदियस्स देसे १ अहवा एगिंदियदेसा य बेइंदियस्स देसा २ अहवा एगिंदियदेसा य बेइंदियाण य देसा ३ अहवा एगिंदियदेसा तेइंदियस्स देसे एवं चेव तियभंगो भाणियव्वो एवं जाव अनिंदियाणं तिय भंगो, जे जीवपएसा ते नियमा एगिंदियपएसा अहवा एगिंदियपएसा य बेइंदियस्स पएसा अहवा एगिंदियपदेसा य बेइंदियाण य पएसा एवं आइल्लविरहिओ जाव अनिंदियाणं।*

*जे अजीवा ते दुविहा पन्नत्ता, तंजहा—रूविअजीवाय अरूवीअजीवा य जे रूवी अजीवा ते चउव्विहा पन्नत्ता, तंजहा—खंधा जाव परमाणुपोग्गला ४, जे अरूवी अजीवा ते सत्तविहा पन्नत्ता, तंजहा—नो धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पएसा एवं अधम्मत्थिकायस्सवि जाव आगासत्थिकायस्स पएसा अद्धासमए।*

*विदिसासु नत्थि जीवा देसे भंगो य होइ सव्वत्थ। जमा णं भंते! दिसा किं जीवा जहा इंदा तहेव निरवसेसा नेरई य जहा अग्गेयी वारुणीजहा इंदा वायव्वा जहा अग्गेयी सोमा जहा इंदा ईसाणी जहा अग्गेयी, विमलाए जीवा जहा अग्गेयी, अजीवा जहा इंदा, एवं तमाएवि, नवरं अरूवी छव्विहा अद्धासमयो न भन्नति॥*

**वृ.** 'किमियं भंते! पाईणत्ति पवुच्चइ'त्ति किमेतद्वस्तु यत् प्रागेव प्राचीनं दिग्विवक्षायां 'प्राची वा' प्राची पूर्वेति प्रोच्यते, उत्तरं तु जीवाश्चैव भवति—प्राच्यां दिशि जीवा अजीवाश्च सन्तीति।

'इंदे'त्यादि, इन्द्रो देवता यस्याः सैन्द्री 'अग्निर्देवता यस्याः साऽऽग्नेयी, एवं यमो देवता, याम्या निर्ऋतिर्देवता नैर्ऋती वरुणो देवता वारुणी वायुर्देवता वायव्या सोमदेवता सौम्या ईशानदेवता ऐशानी विमलतया विमला तमा—रात्रिस्तदाकारत्वात्तमाऽन्धकारेत्यर्थः, अत्र ऐन्द्री पूर्वा शेषाः क्रमेण, विमला तूर्ध्र्वा तमा पुनरधोदिगिति, इह च दिशः शकटोद्धिसंस्थिताः विदिशस्तु मुक्तावल्याकाराः ऊर्ध्वाधोदिशौ च रुचकाकारे, आह च—

"सगडुद्धिसंठियाओ महादिसाओ हवंति चत्तारि।
मुत्तावलीव चउरो दो चेव य होंति रुयगनिभे॥" इति

'जीवावी'त्यादि, ऐन्द्री दिग् जीवा तस्यांजीवानामस्तित्वात्, एवंजीवदेशा जीवप्रदेशाश्चेति, तताऽजीवानां पुद्गलादीनामस्तित्वादजीवाः धर्मास्तिकायादिदेशानां पुनरस्तित्वादजीवदेशाः एवमजीवप्रदेशा अपीति, तत्र ये जीवास्त एकेन्द्रियादयोऽनिन्द्रियाश्च केवलिनः, ये तु जीवदेशास्त एकेन्द्रियादीनाम् ६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं जीवप्रदेशा अपि, 'जे अरूवी अजीवा ते सत्तविह'त्ति, कथं ?, नोधम्मत्थिकाए, अयमर्थः–धर्मास्तिकायः समस्त एवोच्यते, स च प्राचीदिग् न भवति, तदेकदेशभूतत्वात्तस्याः, किन्तु धर्मास्तिकायस्य देशः, सा तदेकदेशभागरूपेति १, तथा तस्यैव प्रदेशाः सा भवति, असङ्ख्येय-प्रदेशात्मकत्वात्तस्याः २, एवमधर्म्मास्तिकायस्य देशः प्रदेशाश्च ३–४, एवामाकाशास्तिकायस्यापि देशः प्रदेशाश्च ५–६, अद्धासमयश्चेति ७, तदेवं सप्तप्रकारारूप्यजीवरूपा ऐन्द्री दिगिति।

'अग्गेयी ण'मित्यादप्रश्नः, उत्तरे तु जीवा निषेधनीयः, विदिशामेकप्रदेशे च जीवानाम-वगाहाभावात्, असङ्ख्यातप्रदेशावगाहित्वात्तेषां, तत्र 'जे जीवदेसा ते नियमा एगेंदियदेस'त्ति एकेन्द्रियाणां सकललोकव्यापकत्वादाग्नेय्यां नियमादेकेन्द्रियदेशाः सन्तीति, 'अहवे'त्यादि, एकेन्द्रियाणां सकललोकव्यापकत्वादेव द्वीन्द्रियाणां चाल्पत्वेन कचिदेकस्यापि तत्र सम्भवादुच्यते एकेन्द्रियाणां देशाश्च द्वीन्द्रियस्य देशश्चेति द्विकयोगे प्रथमः, अथवैकेन्द्रियपदं तथैव द्वीन्द्रियपदे त्वेकवचनं देशपदे पुनर्बहुवचनमिति द्वितीयः, अयं च यदा द्वीन्द्रियो द्वयादिभिर्देशैस्तां स्पृशति तदा स्यादिति, अथवैकेन्द्रियपदं तथैव द्वीन्द्रियपदं देशपदं च बहुवचनान्तमिति तृतीयः, स्थापना–'एगिं० देसा ३ बेइं १ देसे एगिं० देसा ३ बेइं १ देसा ३ एगिं० देसा ३ बेइं० ३ देसा ३

एवं त्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियानिन्द्रियैः सह प्रत्येकं भङ्गकत्रयं दृश्यम्, एवं प्रदेशपक्षोऽपि वाच्यो, नवरमिह द्वीन्द्रियादिषु प्रदेशपदं बहुवचनान्तमेव, यतो लोकव्यापकावस्थानि-न्द्रियवर्जजीवानां यत्रैकः प्रदेशस्तत्रासङ्ख्यातास्ते भवन्ति, लोकव्यापकावस्थानिन्द्रियस्य पुनर्यद्य-प्येकत्र क्षेत्रप्रदेशे एक एव प्रदेशस्तथाऽपि तत्प्रदेशपदे बहुवचनमेवाग्नेय्यां तत्प्रदेशानामसङ्ख्या-तानामवगाढत्वाद्, अतः सर्वेषु द्विकयोगेष्वाद्यविरहितं भङ्गकद्वयमेव भवतीत्येतदेवाह–' आइल्लविरिहओ'त्ति द्विकभङ्ग इति शेषः।

'विमलाए जीवा जहा अग्गेईए'त्ति विमलायामपि जीवानामनवगाहात् 'अजीवा जहा इंदाए'त्ति समानवक्तव्यत्वात्, 'एवं तमावि'त्ति विमलावत्तमाऽपि वाच्येत्यर्थः, अथ विमलायाम-निन्द्रियसम्भवात्तद्देशादयो युक्तास्तमायां तु तस्यासम्भवात्कथं ते ? इति, उच्यते, दण्डाद्यवस्थं तमाश्रित्य तस्य देशो देशाः प्रदेशाश्च विवक्षायां तत्रापि युक्ता एवेति।

अथ तमायां विशेषमाह–'नवर'मित्यादि, 'अद्धासमयो न भन्नइ'त्ति समयव्यवहारो हि सञ्चरिष्णुसूर्यादिप्रकाशकृतः, स च तमाया नास्तीति तत्राद्धासमयो न भण्यत इत्यर्थः।

अथ विमलायामपि नास्त्यसाविति कथं तत्र समयव्यवहारः ? इति, उच्यते, मन्दरावयवभूतस्फटिककाण्डे सूर्यादिप्रभासङ्क्रान्तिद्वारेण तत्र सञ्चरिष्णुसूर्यादिप्रकाशभावादिति

अनन्तरं जीवादिरूपा दिशः प्ररूपिताः, जीवाश्च शरीरिणोऽपि भवन्तीति शरीरप्ररूप-णायाह–

**मू. (४७६)** *कति णं भंते! सरीरा पन्नत्ता?, गोयमा! पंच सरीरा पन्नत्ता, तंजहा–ओरालिए जाव कम्मए। ओरालियसरीरे णं भंते! कतिविहे पन्नत्ते ?, एवं ओगाहणसंठाणं निरवसेसं भाणियव्वं जाव अप्पाबहुगंति। सेवं भंते! सेवं भंतेत्ति।*

**वृ.** 'कइ णं भंते !'इत्यादि, 'ओगाहणसंठाणं'ति प्रज्ञापनायामेकविंशतितमं पदं,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्चैवं–'पंचविहे पन्नत्ते, तंजहा–एगिंदियओरालियसरीरे जाव पंचिंदियओरालियसरीरे' इत्यादि, पुस्तकान्तरे त्वस्य सङ्ग्रहगाथोपलभ्यते, सा चेयम्–

'दिसाचक्कवालएणं तवोकम्मेणं' ति एकत्र पारणके पूर्वस्यां दिशि यानि फलादीनि तान्याहृत्य भुङ्क्ते द्वितीये तु दक्षिणस्यामित्येवं दिक्चक्रवालेन यत्र तपः–कर्मणि पारणककरणं तत्तपः कर्म्म दिकचक्रवालमुच्यते तेन तपःकर्म्मणेति 'ताहिं इट्ठाहिं कंताहिं पियाहिं' इत्यत्र 'एवं जहा उववाइए' इत्येतत्करणादिदं दृश्यं–'मणुन्नाहिं मणामाहिं जाव वग्गूहिं अनवरयं अभिनंदंता य अभिथुणंता य एवं वयासी–जय २ नंदा जय जय भद्दा ! जय २ नंदा ! भद्दं ते अजियं जिणाहि जियं पालियाहि जियमज्झे वसाहि अजियं च जिणाहि सत्तुपुक्खं जियं च पालेहि मित्तपक्खं जियविग्घोऽविय वसाहि तं देव ! सयणमज्झ दंदो इव देवाणं चंदो इव ताराणं धरणो इव नागाणं भरहो इव मणुयाणं बहूइं वासाइं बहूइं वाससयाइं वहूइ' वाससहस्साइं अणहसमग्गे य हट्ठतुट्ठोत्ति, एतच्च व्यक्तमेवेति ।

'वागलवत्थनियत्थे' त्ति वल्कलं–वल्कस्तस्येदं वाल्कलं तद्वं निवसितं येन स वाल्कलवनिवसितः 'उडए' त्ति उटजः–तापसगृहं 'किढिणसंकाइयगं' ति 'किढिण' त्ति वंशमयस्तापसभाजनविशेषस्ततश्च तयोः साङ्कायिकं–भारोद्वहनयन्त्रं किढिणसाङ्कायिकं 'महाराय' त्ति लोकपालः 'पत्थाणे पत्थियं' ति 'प्रस्थाने' परलोकसाधनमार्गे 'प्रस्थितं' प्रवृत्तं फलाद्याहरणार्थं गमने वा प्रवृत्तं शिवराजर्षि 'दब्भे य' त्ति समूलान् 'कुसे य' त्ति दर्भानेव निर्मूलान् 'समिहाओ य' त्ति समिधः–काष्ठिकाः 'पत्तामोडं च' तरुशाखामोटितपत्राणि 'वेदिंवड्ढेइ' त्ति वेदिकां–देवार्चनस्थानं वर्द्धनी–बहुकरिका तां प्रयुङ्क्ते इति वर्द्धयति–प्रमार्जयतीत्यर्थः 'उवलेवणसंमज्जणं करेइ' त्ति इहोपलेपनं गोमयादिना संमर्ज्जनं तु जलेन संमार्जनं वा सोधनं 'दब्भफलसाहत्थगए' त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्भाश्च कलशश्च हस्ते गता यस्य स तथा 'दब्भसगब्भकलसगहत्थगए'त्ति कचित् तत्र दर्भेण सगर्भो यः कलशकः स हस्ते गतो यस्य स तथा 'जलमज्जणं'ति जलेन देहशुद्धिमात्रं 'जलकीडं'ति देहशुद्धावपि जलेनाभिरतं 'जलाभिसेयं'ति जलक्षरणन् 'आयंते'त्ति जलस्पर्शात् 'चोक्खे'त्ति अशुचिद्रव्यापगमात्, किमुक्तं भवति ? –

'परमसुइभूए'त्ति, 'देवयपिइकयकज्जे'त्ति देवतानां पितृणां च कृतं कार्यं–जलाञ्जलि-दानादिकं येन स तथा, 'सरएणं अरणिं महेइ'त्ति 'शरकेन' निर्मन्थनकाष्ठेन 'अरणिं' निर्मन्थनीयकाष्ठं 'मथ्नाति' गर्षयति, 'अग्गिस्स दाहिणे'इत्यादि सार्द्धः श्लोकस्तद्यथाशब्दवर्जः ।

**मू. (५०७)** *सकहं वक्कलं ठाणं, सिज्जा भंडं कमंडलुं ॥*
*दंडदारुं तहा पाणं अहे ताइं समादहे ।*

*महुणा य घएण य तंदुलेहि य अग्गिं हुणइ, अग्गिं हुणित्ता चरुं साहेइ, चरुं साहेत्ता बलिं वइस्सदेवं करेइ बलिं वइस्सदेवं करेत्ता अतिहिपूयं करेइ अतिहिपूयं करेत्ता तओ पच्छा अप्पणा आहारमाहारेति ।*

**वृ.** तत्र च 'सत्तंगाइं' ससाङ्गानि 'समादधाति' संनिधापयति सकथां १ वल्कलं २ स्थानं ३ शय्याभाण्डं ४ कमण्डलुं ५ दंडदारु ६ तथाऽऽत्मान ७ मिति, तत्र सकथा–तत्समयप्रसिद्ध उपकरणविशेषः स्थानं–ज्योतिस्थानं पात्रस्थानं वा शय्याभाण्डंशय्योपकरणं दण्डदारु–दण्डकः आत्मा–प्रतीत इति । 'चरुं साहेति'त्ति चरु–भाजनविशेषस्तत्र पच्यमानद्रव्यमपि चरुरेव तं चरुं बलिमित्यर्थः: 'साधयति' रन्धयति 'बलिवइस्सदेवं करेइ'त्ति बलिना वैश्वानरं पूजयतीत्यर्थः, 'अतिहिपूयं करेइ'त्ति अतिथेः–आगन्तुकस्य पूजां करोतीति ।

**मू. (५०८)** *तए णं से सिवे रायरिसी दोच्चं छट्ठक्खमणं उवसंपज्जित्ताणं विहरइ, तए णं से सिवे रायरिसी दोच्चे छट्ठक्खमणपारणगंसि आयावणभूमीओ पच्चोरुहइ आयावण० २ एवं जहा पढमपारणगं नवरं दाहिणगं दिसं पोक्खेति २ दाहिणाए दिसाए जमे महाराया पत्थाणे पत्थियं सेसं तं चेव आहारमाहारेइ ।*

*तए णं से सिवरायरिसी तच्चं छट्ठक्खमणं उवसंपज्जित्ताणं विहरति, तए णं से सिवे रायरिसी सेसं तं चेव नवरं पच्चच्छिमाए दिसाए वरुणे महाराया पत्थाणे पत्थियं सेसं तं चेव जाव आहारमाहारेइ, तए णं से सिवे रायरिसी चउत्थं छट्ठक्खमणं उवसंपज्जित्ताणं विहरइ । तए णं से सिवे रायरिसी चउत्थं छट्ठक्खमणं एवं तं चेव नवरं उत्तरदिसं पोक्खेइ उत्तराए दिसाए वेसमणे महाराया पत्थाणे पत्थियं अभिरक्खउ सिवं, सेसं तं चेव जाव तओ पच्छा अप्पणा आहारमाहारेइ ।*

*तए णं तस्स सिवस्स रायरिसिस्स छट्ठंछट्ठेणं अनिक्खित्तेणं दिसाचक्कवालेणं जाव आयावेमाणस्स पगइभद्दयाए जाव विणीययाए अन्नया कयावि तयावरणिज्जाणं कम्माणं खओव-समेणं ईहापोहमग्गणगवेसणं करेमाणस्स विब्भंगे नामं अन्नाणे समुप्पन्ने, से णं तेणं विब्भंगनाणेणं समुप्पन्नेणं पासइ अस्सिं लोए सत्त दीवे सत्त समुद्दे तेण परं न जाणति न पासति, तए णं तस्स सिवस्स रायरिसिस्स अयमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था–अत्थि णं ममं अइसेसे नाणदंसणे समुप्पन्ने एवं खलु अस्सिं लोए सत्त दीवा सत्त समुद्दा तेण परं वोच्छिन्ना दीवा य समुद्दा य, एवं संपेहेइ एवं० २ आयावणभूमीओ पच्चोरुहइ आ० २ वागलवत्थनियत्थे जेणेव सए उडए तेणेव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवागच्छइ २ सुबहुं लोहीलोहकडाहकडुच्छुयं जाव भंडगं किढिणसंकाइयं च गेण्हइ २ ।

जेणेव हत्थिणापुरे नगरे जेणेव तावसावसहे तेणेव उवागच्छइ उवा० २ भंडनिक्खेवं करेइ २ हत्थिणापुरे नगरे सिंघाडगतिगजावपहेसु बहुजणस्स एवमाइक्खइ जाव एवं परूवेइ-अत्थि णं देवाणुप्पिया ! ममं अतिसेसे नाणदंसणे समुप्पन्ने, एवं खलु अस्सिं लोए जाव दीवा य समुद्दा य, तए णं तस्स सिवस्स रायरिसिस्स अंतियं एयमट्ठं सोच्चा निसम्म हत्थिणापुरे नगरे सिंघाडग-तिगजाव पहेसु बहुजणो अन्नमन्नस्स एवमाइक्खइ जाव परूवेइ ।

एवं खलु देवाणुप्पिया ! सिवे रायरिसी एवं आइक्खइ जाव परूवेइ-अत्थि णं देवाणुप्पिया ममं अतिसेसे नाणदंसणे जाव तेण परं वोच्छिन्ना दीवा य समुद्दा य, से कहमेयं मन्ने एवं ? । तेणं कालेणं तेणं समएणं सामी समोसढे परिसा जाव पडिगया ।

तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी जहा बितियसए नियंठुद्देसए जाव अडमाणे बहुजणसद्दं निसासेइ बहुजणो अन्नमन्नस्स एवं आइक्खइ एवं जाव परूवेइ-एवं खलु देवाणुप्पिया ! सिवे रायरिसी एवं आइक्खइ जाव परूवेइ-अत्थि णं देवाणुप्पिया तं चेव जाव वोच्छिन्ना दीवा समुद्दा य, से कहमेयं मन्ने एवं ?

तए णं भगवं गोयमे बहुजणस्स अंतियं एयमट्ठं सोच्चा निसम्म जाव सड्ढे जहा नियंठुद्देसए जाव तेण परं वोच्छिन्ना दीवा य समुद्दा य, से कहमेयं भंते ! एवं ? गोयमादि समणे भगवं महावीरे भगवं गोयमं एवं वयासी-जन्नं गोयमा ! से बहुजणे अन्नमन्नस्स एवमातिक्खइ तं चेव सव्वं भाणियव्वं जाव भंडनिक्खेवं करेति हत्थिणापुरे नगरे सिंघाडग० तं चेव जाव वोच्छिन्ना दीवा य समुद्दा य, तए णं तस्स सिवस्स रायरिसिस्स अंतिए एयमट्ठं सोच्चा निसम्म तं चेव सव्वं भाणियव्वं जाव तेण परं वोच्छिन्ना दीवा य समुद्दा य तण्णं मिच्छा, अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि । एवं खलु जंबुद्दीवादीया दीवा लवणादीया समुद्दा संठाणओ एगविहिविहाणा वित्थारओ अनेगविहिविहिणा एवं जहा जीवाभिगमे जाव सयंभूरमणपज्जवसाणा अस्सिं तिरियलोए असंखेज्जे दीवसमुद्दे पन्नत्ते समणाउसो ! ।

अत्थि णं भंते ! जंबुद्दीवे दीवे दव्वाइं सवन्नाइंपि० अवन्नाइंपि सगंधाइंपि अगंधाइंपि सरसाइंपि अरसाइंपि सफासाइंपि अफासाइंपि अन्नमन्नबद्धाइं अन्नमन्नपुट्ठाइं जाव घडत्ताए चिट्ठंति ?, हंता अत्थि । अत्थि णं भंते ! लवणसमुद्दे दव्वाइं सवन्नाइंपि अवन्नाइंपि सगंधाइं अगंधाइंपि सरसाइंपि अरसाइंपि सफासाइंपि अफासाइंपि अन्नमन्नबद्धाइं अन्नमन्नपुट्ठाइं जाव घडत्ताए चिट्ठंति ?, हंता अत्थि । अस्थि णं भंते ! घायइसंडे दीवे दव्वाइं सवन्नाइंपि० एवंचेव एवं जाव सयंभूरमणसमुद्दे ? जाव हंता अत्थि । तए णं सा महतिमहालिया महच्चपरिसा समणस्स भगवओ महावीरस्स अंतियं एयमट्ठं सोच्चा निसम्म हट्ठतुट्ठा समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता जामेव दिसं पाउब्भूया तामेव दिसं पडिगया ।

तए णं हत्थिणापुरे नगरे सिंघाडगजावपहेसु बहुजणो अन्नमन्नस्स एवमाइक्खइ जाव परूवेइ-जन्नं देवाणुप्पिया ! सिवे रायरिसी एवमाइक्खइ जाव परूवेइ-अत्थि णं देवाणुप्पिया ! ममं अतिसेसे नाणे जाव समुद्दा य तं नो इणट्ठे समट्ठे, समणे भगवं महावीरे एवमाइक्खइ जाव परूवेइ-एवं खलु एयस्स सिवस्स रायरिसिस्स छट्ठंछट्ठेणं तं चेव जाव भंडनिक्खेवं करेइ भंडनिक्खेवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*करेत्ता हत्थिणापुरे नगरे सिंघाडग जाव समुद्दा य। तए णं तस्स सिवस्स रायरिसिस्स अंतियं एयमट्ठं सोच्चा निसम्म जाव समुद्दा य तण्णं मिच्छा, समणे भगवं महावीरे एवमाइक्खइ०-एवं खलु जंबुद्दीवादीया दीवा लवणादीया समुद्दा तं चेव जाव असंखेज्जा दीवसमुद्दा पन्नत्ता समणाउसो तए णं से सिवे रायरिसी बहुजणस्स अंतियं एयमट्ठं सोच्चा निसम्म संकिए कंखिए वितिगिच्छिए भेदसमावन्ने कलुससमावन्ने जाए यावि होत्ता।*

*तए णं तस्स सिवस्स रायरिसिस्स संखियस्स कंखियस्स जाव कलुससमावन्नस्स से विभंगे अन्नाणे खिप्पामेव परिवडिए, तए णं तस्स सिवस्स रायरिसिस्स अयमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था-एवं खलु समणे भगवं महावीरे आदिगरे तित्थगरे जाव सव्वन्नू सव्वदरिसी आगासगएणं चक्केणं जाव सहसंबवने उज्जाणे अहापडिरूवं जाव विहरइ, तं महाफलं खलु तहारूवाणं अरहंताणं भगवंताणं नामगोयस्स जहा उववाइए जाव गहणयाए, तं गच्छामि णं समणं महावीरं वंदामि जाव पज्जुवासामि।*

*एयं णे इहभवे य परभवे य जाव भविस्सइत्तिकट्टु एवं संपेहेति एवं २ त्ता जेणेव तावसावसहे तेणेव उवागच्छइ तेणेव उवागच्छित्ता तावसवसहं अनुप्पविसति २ त्ता सुबहुं लोहीलोहकडाह जाव किढिणसंकातिगं च गेण्हइ गेण्हित्ता तावसावसहाओ पडिनिक्खमति ताव० २ परिवडियविब्भंगे हत्थिनागपुरं नगरं मज्झंमज्झेणं निग्गच्छइ निग्गच्छित्ता जेणेव सहसंबवने उज्जाणे जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ तेणेव उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ वंदति नमंसति वंदित्ता नमंसित्ता नच्चासन्ने नाइदूरे जाव पंजलिउडे पज्जुवासइ। तए णं समणे भगवं महावीरे सिवस्स रायरिसिस्स तीसे य महतिमहालियाए जाव आणाए आराहए भवइ, तए णं से सिवे रायरिसी समणस्स भगवओ महावीरस्स अंतियं धम्मं सोच्चा निसम्म जहा खंदओ जाव उत्तरपुरच्छिमं दिसीभागं अवक्कमइ २ सुबहुं लोहीलोहकडाह जाव किढिणसंकातिगं एगंते एडेइ ए० २ सयमेव पंचमुट्ठियं लोयं करेति सयमे० २ समणं भगवं महावीरं एवं जहेव उसभदत्ते तहेव पव्वइओ तहेव इक्कारस अंगाइं अहिज्जति तहेव सव्वं जाव सव्वदुक्खप्पहीणे॥*

**वृ.** 'से कहमेयं मन्ने एवं'ति अत्र मन्येशब्दो वितर्कार्थः 'बितियसए नियंठुद्देसए'त्ति द्वितीयशते पञ्चमोद्देशक इत्यर्थः 'एगविहिविहाण'त्ति एकेन विधिना-प्रकारेण विधानं-व्यवस्थानं येषां ते तथा, सर्वेषां वृत्तत्वात्, 'वित्थारओ अनेगविहिविहाण'त्ति द्विगुण २ विस्तारत्वात्तेषामिति 'एवं जहाजीवाभिगमे'इत्यनेन यदिह सूचितं तदिदं-

'दुगुणादुगुणं पडुप्पाएमाणा पवित्थरमाणा ओभासमाणवीइया' अवभासमानवीचयः-शोभमानतरङ्गाः, समुद्रापेक्षमिदं विशेषणं, 'बहुप्पलकुमुदनलिणसुभगसोगंधियपुंडरीयमहापुंडरीय-सयपत्तसहस्सपत्तसयसहस्सपत्तपफुल्लकेसरोववेया' बहूनामुत्पलादीनां प्रपुल्लानां-विकसितानां यानि केशराणि तैरुपचिताः-संयुक्ता ये ते तथा, तत्रोत्पलानि-नीलोत्पलादीनि कुमुदानि-चन्द्रबोध्यानि पुण्डरीकाणि-सितानि शेषपदानि तु रूढिगम्यानि 'पत्तेयं पत्तेयं पउमवरवेइया परिक्खित्ता पत्तेयं २ वनसंडपरिक्खित्त'त्ति।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सवन्नाइंपि' त्ति पुद्‌गलद्रव्याणि 'अवन्नाइंपि' त्ति धर्मास्तिकायादीनि 'अन्नमन्नबद्धाइं' ति परस्परेण गाढाश्लेषाणि 'अन्नमन्नपुट्ठाइं' ति परस्परेण गाढाश्लेषाणि, इह यावत्करणादिदमेवं दृश्यम्—'अन्नमन्नबद्धपुट्ठाइं अन्नमन्नघडत्ताए चिट्ठंति' तत्र चान्योऽन्यबद्धस्पृष्टान्यनन्तरोक्तुण-द्वययोगात्, किमुक्तं भवति? —अन्योऽन्यघटतया—परस्परसम्बद्धतया तिष्ठन्ति 'तावसावसहे' त्ति तापसावसथः—तापसमठ इति।

अनन्तरं शिवराजर्षे सिद्धिरुक्ता, तां च संहननादिभिर्निरुपयन्निदमाह—

**मू. (५०९)** *भंतेत्तिभगवं गोयमे समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी—जीवा णं भंते! सिज्झमाणा कयरंमि संघयणे सिज्झंति?, गोयमा! वयरोसभणा-रायसंघयणे सिज्झंति एवं जहेव उववाइए तहेव संघयणं संठाणं उच्चत्तं आउयं च परिवसणा।*

*एवं सिद्धिगंडिया निरवसेसा भाणियव्वा जाव अव्वाबाहं सोक्खं अणुहवंति सासयासिद्धा सेवं भंते! २ त्ति ॥*

**वृ.** 'भंते ति' इत्यादि, अथ लाघवार्थःमतिदेशमाह—'एवं जहेवे' त्यादि, 'एवम्' अनन्तरदर्शितेनाभिलापेन यथौपपातिके सिद्धानधिकृत्य संहननाद्युक्तं तथैवेहापि वाच्यं, तत्र च संहननादिद्वाराणां सङ्ग्रहाया गाथापूर्वार्द्धं—'संघयणं संठाणं उच्चत्तं आउयं च परिवसण' त्ति तत्र संहननमुक्तमेव, संस्थानादि त्वेवं—तत्र संस्थाने षण्णां संस्थानानामन्यतरस्मिन् सिद्धयन्ति।

उच्चत्वे तु जघन्यतः सप्तरत्निप्रमाणे उत्कृष्टतस्तु पञ्चधनुःशतके, आयुषि पुनर्जघन्यतः सातिरेकाष्टवर्षप्रमाणे उत्कृष्टतस्तु पूर्वकोटीमाने, परिवसना पुनरेवं—रत्नप्रभादिपृथिवीनां सौधर्मादीनां चेषत्प्राग्भारान्तानां क्षेत्रविशेषाणामधो न परिवसन्ति सिद्धाः किन्तु सर्वार्थःसिद्धम-हाविमानस्योपरितनात्स्तूपिकाग्रादूर्ध्वं द्वादश योजनानि व्यतिक्रम्येषत्प्राग्भारा नाम पृथिवी पञ्चचत्वारिंशद्योजनलक्षप्रमाणाऽऽयामविष्कम्भाभ्यां वर्णतः श्वेताऽत्यन्तरम्याऽस्ति तस्याश्चोपरि योने लोकान्तो भवति, तस्य च योजनस्योपरितनगव्यूतोपरितनषड्भागे सिद्धाः परिवसन्तीति।

'एवं सिद्धिगंडिया निरवसेसा भाणियव्व' त्ति एवमिति—पूर्वोक्तसंहननादिद्वार-निरूपणक्रमेण 'सिद्धिगण्डिका' सिद्धिस्वरूपप्रतिपादनपरा वाक्यपद्धतिरौपपातिकप्रसि-द्धाऽध्येया, इयं च परिवसनद्वारं यावदर्थःलेशतो दर्शिता, तत्परतस्त्वेवं—'कहिं पडिहया सिद्धा कहिं सिद्धा पइट्ठिया?' इत्यादिका, अथ किमन्तेयम्? इत्याह—'जावे' त्यादि। 'अव्वाबाहं सोक्ख' मित्यादि चेह गाथोत्तरार्द्धमधीतं, समग्रगाथा पुनरियं—

॥१॥ "निच्छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का।
अव्वाबाहं सोक्खं अणुहुंती सासयं सिद्धा ॥" इति ॥

शतकं—११ उद्देशकः—९ समाप्तः

---

## —: शतकं—११ उद्देशकः—१० :—

**वृ.** नवमोद्देशकस्यान्ते लोकान्ते सिद्धपरिवसनोक्तेत्यतो लोकस्वरूपमेव दशमे प्राह, तस्य चेदमादिसूत्रम्—

**मू. (५१०)** *रायगिहे जाव एवं वयासी—कतिविहे णं भंते! लोए पन्नत्ते?, गोयमा! चउव्विहे लोए पन्नत्ते, तंजहा—दव्वलोए खेत्तलोए काललोए भावलोए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खेत्तलोए णं भंते! कतिविहे पन्नत्ते?, गोयमा! तिविहे पन्नत्ते, तंजहा-अहोलोयखेत्तलोए तिरियलोयखेत्तलोए २ उड्ढलोयखेत्तलोए ३।

अहोलोयखेत्तलोए णं भंते! कतिविहे पन्नत्ते?, गोयमा! सत्तविहे पन्नत्ते, तंजहा-रयणप्पभापुढविअहेलोयखेत्तलोए जाव अहेसत्तमापुढविअहोलोयखेत्तलए। तिरियलोयखेत्तलोए णं भंते! कतिविहे पन्नत्ते?, गोयमा! असंखेज्जविहे पन्नत्ते, तंजहा-जंबुद्दीवे तिरियखेत्तलोए जाव सयंभूरमणसमुद्दे तिरियलोयखेत्तलोए। उड्ढलोगखेत्तलोए णं भंते! कतिविहे पन्नत्ते?, गोयमा! पन्नरसविहे पन्नत्ते, तंजहा-सोहम्मकप्पउड्ढलोगखेत्तलोए जाव अच्चुयउड्ढलोए गेवेज्जविमाणउड्ढलोए अनुत्तरविमाण० ईसिंपब्भारपुढविउड्ढलोगखेत्तलोए।

अहोलोगखेत्तलोए णं भंते! किंसंठिए पन्नत्ते?, गोयमा! तप्पागारसंठिए पन्नत्ते। तिरियलोयखेत्तलोए णं भंते! किंसंठिए पन्नत्ते?, गोयमा! झल्लरिसंठिए पन्नत्ते। उड्ढलोयखेत्तलोय-पुच्छा उड्ढमुइंगाकारसंठिए पन्नत्ते। लोए णं भंते! किंसंठिए पन्नत्ते?, गोयमा सुपइट्ठगसंठिए लोए पन्नत्ते, तंजहा-हेट्ठा विच्छिन्ने मज्झे संखित्ते जहा सत्तमसए पढमुद्देसए जाव अंतं करेंति। अलोए णं भंते! किंसंठिए पन्नत्ते?, गोयमा! झुसिरगोलसंठिए पन्नत्ते।

अहेलोगखेत्तलोए णं भंते! किं जीवा जीवदेसा जीवपएसा? एवं जह इंदा दिसा तहेव निरवसेसं भाणियव्वं जाव अद्धासमए। तिरियलोयखेत्तलोए णं भंते! किं जीवा०?, एवं चेव, एवं उड्ढलोयखेत्तलोएवि, नवरं अरूवी छव्विहा अद्धासमओ नत्थि॥ लोए णं भंते! किं जीवा जहा बितियसए अत्थिउद्देसए लोयागासे, नवरं अरूवी सत्तवि जाव अहम्मत्थिकायस्स पएसा नो आगासत्थिकाये आगासत्थिकायस्स देसे आगासत्थिकायपएसा अद्धासमए सेसं तं चेव॥ अलोए णं भंते! किं जीवा०? एवं जहा अत्थिकायउद्देसए अलोयागासे तहेव निरवसेसं जाव अनंतभागूणे।

अहेलोगखेत्तलोगस्स णं भंते! एगंमि आगासपएसे किं जीवा जीवदेसा जीवप्पएसा अजीवा अजीवदेसा अजीवपएसा?, गोयमा! नो जीवा जीवदेसावि जीवपएसा वि अजीवावि अजीवदेसावि अजीवपएसा वि, जे जीवदेसा ते नियमा एगिंदियदेसा १ अहवा एगिंदियदेसा य बेइंदियस्स देसे २ अहवा एगिंदियदेसा य बेइंदियाण य देसा ३ एवं मज्झिल्लविरहिओ जाव अनिंदिएसु जाव अहवा एगिंदियदेसा य अनिंदियदेसा य, जे जीवपएसा ते नियमा एगिंदियपएसा १ अहवा एगिंदियपएसा य बेंदियस्स पएसा २ अहवा एगिंदियपएसा य बेइंदियाण य पसा ३ एवं आइल्लविरहिओ जाव पंचिंदिएसु अणिंदिएसु तियभंगो, जे अजीवा ते दुविहा पन्नत्ता, तंजहा-रूवी अजीवा य अरूवी अजीवा य, रूवी तहेव, जे अरूवी अजीवा ते पंचविहा पन्नत्ता, तंजहा-नो धम्मत्थिकाए धम्मत्थिकायस्स देसे १ धम्मत्थिकायस्स पएसे २ एवं अहम्थिकायस्सवि ४ अद्धासमए ५।

तिरियलोगखेत्तलोगस्स णं भंते! एगंभि आगासपएसे किं जीवा०?, एवं जहा अहोलोगखेत्तलोगस्स तहेव, एवं उड्ढलोगखेत्तलोगस्सवि, नवरं अद्धासमओ नत्थि, अरूवी चउव्विहा। लोगस्स जहा अहेलोगखेत्तलोगस्स एगंमि आगासपएसे॥ अलोगस्स णं भंते! एगंमि आगासपएसे पुच्छा, गोयमा! नो जीवा नो जीवदेसा तं चेव जाव अनंतेहिं अगुरुयलहुयगुणेहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संजुत्ते सव्वागासस्स अनंतभागूणे ।*

*दव्वओ णं अहेलोगखेत्तलोए अनंताइं जीवदव्वाइं अनंताइं अजीवदव्वाइं अनंता जीवाजीवदव्वा एव तिरियलोयखेत्तलोएवि, एवं ऊड्ढलोयखेत्तलोएवि, दव्वओ णं अलोए नेवत्थि जीवदव्वा नेवत्थि अजीवदव्वा नेवत्थि जीवाजीवदव्वा एगे अजीवदव्वदेसे जाव सव्वागासअनंतभागूणे ।*

*कालओ णं अहेलोयखेत्तलोए न कयाइ नासि जाव निच्चे एवं जाव अहोलोगे ।*

*भावओ णं अहेलोगखेत्तलोए अनंता वन्नपज्जवा जहा खंदए जाव अनंता अगुरुयलहुयपज्जवा एवं जाव लोए, भावओ णं अलोए नेवत्थि वन्नपज्जवा जाव नेवत्थि अगुरुयलहुयपज्जवा एगे अजीवदव्वदेसे जाव अनंतभागूणे ॥*

**वृ.** 'रायगिहे'इत्यादि, 'दव्वलोए'त्ति द्रव्यलोक आगमतो नोआगमतश्च, तत्रागमतो द्रव्यलोको लोकशब्दार्थःज्ञस्तत्रानुपयुक्तः 'अनुपयोगो द्रव्य'मिति वचनात्, आह च मङ्गलं प्रतीत्य द्रव्यलक्षणम्—

॥१॥ "आगमओऽनुवउत्तो मंगलसद्दाणुवासिओ वत्ता ।
तन्नाणलद्धिजुत्तो उ नोवउत्तोत्ति दव्वं ॥"ति

नोआगमतस्तु ज्ञशरीरभव्यशरीरतद्वयतिरिक्तभेदात्त्रिविधः, तत्र लोकशब्दार्थःज्ञस्य शरीरं मृतावस्थं ज्ञानापेक्षया भूतलोकपर्यायतया घृतकुम्भवल्लोकः स च ज्ञशरीररूपो द्रव्यभूतो लोको ज्ञशरीरद्रव्यलोकः, नोशब्दश्चेह सर्वनिषेधे, तथा लोकशब्दार्थं ज्ञास्यति यस्तस्य शरीरं सचेतनं भाविलोकभावत्वेन मदुघटवद् भव्यशरीरद्रव्यलोकः, नोशब्दश्चेह सर्वनिषेधे, तथा लोकशब्दार्थं ज्ञास्यति यस्तस्य शरीरं सचेतनं भाविलोकभावत्वेन मधुघटवद् भव्यशरीरद्रव्यलोकः, नोशब्द इहापि सर्वनिषेध एव, ज्ञशरीरभव्यशरीरव्यतिरिक्तश्च द्रव्यलोको द्रव्याण्येव धर्मास्तिकायादीनि, आह च—

॥१॥ "जीवमजीवे रूविमरूवि सपएस अप्पएसे य ।
जाणाहि दव्वलोयं निच्चमणिच्चं च जं दव्वं ॥"

इहापि नोशब्दः सर्वनिषेधे आगमशब्दवाच्यस्य ज्ञानस्य सर्वथा निषेधात्, 'खेत्तलोए'त्ति क्षेत्ररूपो लोकः स क्षेत्रलोकः, आह च—

॥१॥ "आगासस्स पएसा उड्ढं च अहे य तिरियलोए य ।
जाणाहि खेत्तलोयं अनंतजिणदेसियं सम्मं ॥"

'काललोए'त्ति कालः—समयादि— तद्रूपो लोकः काललोकः, आह च—

॥१॥ "समयावली मुहुत्ता दिवसअहोत्तपक्खमासा य ।
संवच्छरजुगपलिया सागरउस्सप्पिपरियट्टा ॥"

'भावलोए'त्ति भावलोको द्वेधा—आगमतो नोआगमतश्च, तत्रागमतो लोकशब्दार्थःज्ञस्तत्र चोपयुक्तः भावरूपो लोको भावलोक इति नो आगमस्तु भावा—औदायिकादयस्तद्रूपो लोको भावलोकः, आह च—

॥१॥ "ओदइए उवसमिए खइए य तहा खओवसमिए य ।
परिणामसन्निवाए य छव्विहो भालोगो उ ॥" इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह नोशब्दः सर्वनिषेधे मिश्रवचनो वा, आगमस्य ज्ञानत्वात् क्षायिकक्षायोपशमिकज्ञानस्वरूपभावविशेषेण च मिश्रत्वादौदयिकादिभावलोकस्येति ।

'अहेलोयखेत्तलोए'त्ति अधोलोकरूपः क्षेत्रलोकोऽधो लोकक्षेत्रलोकः, इह किलाष्टप्रदेशो रुचकस्तस्य चाधस्तनप्रतरस्याधो नव योजनशतानि यावत्तिर्यगलोकस्ततः परेणाधः–स्थितत्वादधोलोकः साधिकसप्तरज्जुप्रमाणः, 'तिरियलोयखेत्तलोए'त्ति रुचकापेक्षयाऽध उपरि च नव २ योजनशतमानस्तिर्यगूरपत्वात्तिर्यगलोकस्तद्रूपः क्षेत्रलोकस्तिर्यगलोकक्षेत्रलोकः, 'उड्ढलोयखेत्तलोए'त्ति तिर्यगलोकस्योपरि देशोनसप्त रज्जुप्रमाण ऊर्द्धभागवर्त्तित्वादूर्द्धलोकस्त द्रूपः क्षेत्रलोक ऊर्द्धलोकक्षेत्रलोकः । अथडाऽधः–अशुभः परिणामो बाहुल्येन क्षेत्रानुभावाद् यत्र लोके द्रव्याणामसावधोलोकः, तथा तिर्यङ्–मध्यमानुभावं क्षेत्रं नातिशुभं नात्यशुभं तद्रूपो लोकस्तिर्यगलोकः, तथा ऊध्वर्व–शुभः परिणामो बाहुल्येन द्रव्याणां यत्रासावूर्ध्वलोकः, आह च–

॥१॥ "अहव अहोपरिणामो खेत्तणुभावेण जेण ओसन्नं ।
असुहो अहोत्ति भणिओ दव्वाणं तेणऽहोलोगोः ॥

इत्यादि, 'तप्पागारसंठिए'त्ति तप्रः–उडुपकः, अधोलोकक्षेत्रलोकोऽधोमुखशरावाकारसंस्थान इत्यर्थः, 'झल्लरिसंठिए'त्ति अल्पोच्छ्रायत्वा न्महाविस्तारत्वाच्च तिर्यगूलोकक्षेत्रलोको झल्लरीसंस्थितः, 'उड्ढमुइंगागारसंठिए'त्ति ऊध्र्वः–ऊर्ध्वमुखो यो मृदङ्गस्तदाकारेण संस्थितो यः स तथा शरावसंपुटाकार इत्यर्थः, 'सुपइट्ठगसं, ठिए'त्ति सुप्रतिष्ठकं–स्थापनकं तच्चेहारोपितवारकादि गृह्यते, तथाविधेनैव लोकसादृश्योपपत्तेरिति, 'जहा सत्तमसए'इत्यादौ यावत्करणादिदं दृश्यम्–'उप्पिं विसाले अहे पलियंकसंठाणसंठिए मज्झे वरवइरविग्गहिए उप्पिं उड्ढमुइंगागरसंठिए तेसिं च णं सासयंसि लोगंसि हेट्ठा विच्छिन्नंसि जाव उप्पिं उड्ढमुइंगागारसंठियंसि उप्पन्नाणदंसणधरे अरहा जिणे केवली जीवेवि जाणइ अजीवेवि जाणइ तओ पच्छा सिज्झइ बुज्झइ 'इत्यादीति, 'झुसिरगोलसंठिए'त्ति अन्तःशुपिरगोलकाकारो यतोऽलोकस्य लोकः शुषिरमिवाभाति, ।

'अहेलोयखेत्तलोए णं भंते !'इत्यादि, 'एवं जहा इंदा दिसा तहेव निरवसेसं भाणियव्वं'ति दशमशते प्रथमोद्देशके यथा ऐन्द्री दिगुक्ता तथैव निरवशेषमधोलोकस्वरूपं भणितव्यं, तच्चैवम्–'अहोलोयखेत्तलोए णं भंते ! किं जीवा जीवदेसा जीवपएसा अजीवा अजीवदेसा अजीवपएसा ?, गोयमा ! जीवावि जीवदेसावि जीवपएसावि अजीवावि अजीदेसावि अजीवपएसावि'इत्यादि, नवरमित्यादि, अधोलोकतिर्यगूलोकयोररूपिणः सप्तविधाः प्रागुक्ताः धर्म्माधर्माकाशास्तिकायानां देशाः ३ प्रदेशाः ३ कालश्चेत्येवम्, ऊध्र्वलोके तु रविप्रकाशाभिव्यङ्ग्यः कालो नास्ति, तिर्यगधोलोकयोरेव रविप्रकाशस्य भावाद्, अतः षडेव त इति ।

'लोए ण'मित्यादि, 'जहा बीयसए अत्थिउद्देसए'त्ति यता द्वितीयशते दशमोद्देशक इत्यर्थः 'लोयागासे'त्ति लोकाकाशे विषयभूते जीवादय उक्ता एवमिहापीत्यर्थः, 'नवर'मिति केवलमयं विशेषः–तत्रारूपिणः पञ्चविधा उक्ता इह तु सप्तविधा वाच्याः, तत्र हि लोकाकाशमाधारतया विवक्षितमत आकाशभेदास्तत्र नोच्यन्ते, इह तु लोकोऽस्तिकायसमुदायरूप आधारतया विवक्षितोऽत आकाशभेदा अप्याधेया भवन्तीति सप्त, ते चैवं–धर्मास्तिकायः, लोके परिपूर्णस्य तस्य विद्यमानत्वात्, धर्म्मास्तिकायदेशस्तु न भवति धर्मास्तिकायस्यैव तत्र भावात्, धर्मास्तिकाय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशाश्च सन्ति, तद्रूपत्वाद्धर्मास्तिकायस्येति द्वयं, एवमधर्मास्तिकायेऽपि द्वयं ४, तथा नो आकाशास्तिकायो, लोकस्य तस्यैतद्देशत्वात्, आकाशदेशस्तु भवति, तदंशत्वात् लोकस्य, तत्प्रदेशाश्च सन्ति ६, कालश्चे ७ ति सप्त ॥

'अलोए णं भंते !' इत्यादि, इदं च 'एवं जहे'त्याद्यतिदेशादेवश्यम्--'अलोए णं भंते ! किं जीवा जीवदेस जीवपएसा अजीवा अजीवदेसा अजीवपएसा ?, गोयमा ! नो जीवदेसा नो जीवपएसा नो अजीवदेसा नो अजीवपएसा एगे अजीचदव्वदेसे अनंतेहिं अगुरुलहुयगुणेहिं संजुत्ते सव्वागासे अनंतभागूणे'त्ति तत्र सर्वाकाशमनन्तभागोनमित्यस्यायमर्थः--लोकलक्षणेन समस्ताकाशस्यानन्तभागेन न्यूनं सर्वाकाशमलोक इति ।

'अहोलोगखेत्तलोगस्स णं भंते ! एगंमि आगासपएसे' इत्यादि, नो जीवा एकप्रदेसे तेषामनवगाहनात्, बहूनां पुनर्जीवानां देशस्य प्रदेशस्य चावगाहनात् उच्यते 'जीवदेसावि जीवपएसावि'त्ति, यद्यपि धर्मास्तिकायाद्यजीवद्रव्यं नैकत्राकाशप्रदेशेऽवगाहते तथाऽपि परमाणुकादिद्रव्याणां कालद्रव्यस्य चावगाहनादुच्यते--'अजीवावि'त्ति द्वयणुकादिस्कन्धदेशानां त्ववगाहनादुक्तम्--'अजीवदेसावि'त्ति, धर्माधर्मास्तिकायप्रदेशयोः पुद्गलप्रव्यप्रदेसानां चावगाहनादुच्यते--'अजीवपएसावि'त्ति, 'एवं मज्झिल्लविरहिओ'त्ति दशमशतप्रदर्शितत्रिकभङ्गे 'अहवा एगिंदियदेसाय बेइंदियदेसाय' इत्येवंरूपो यो मध्यमभङ्गस्तद्विरहितोऽसौ त्रिकभङ्गः, 'एव'मिति सूत्रप्रदर्शितभङ्गद्वयरूपोऽध्येतव्यो, मध्यमभङ्गस्येहासम्भवात्, तथाहि--द्वीन्द्रियस्यैकस्यैकत्राकाशप्रदेशे बहवो देशा न सन्ति, देशस्यैव भावात्, 'एवं आइल्लविरहिओ'त्ति 'अहवा एगिंदियस्स पएसा य बेंदियस्स पएसा य' इत्येवंरूपाद्यभङ्गकविरहितस्त्रिभङ्गः, 'एव'मिति सूत्रप्रदर्शितभङ्गद्ववयरूपोऽध्येतव्यः, आद्यभङ्गकस्येहासम्भवात्, तथाहि--नास्त्येवैकत्राकाशप्रदेशे केवलिसमुदघातं विनैकस्य जीवस्यैकप्रदेशसम्भवोऽसङ्खयातामेव भावादिति, 'अणिंदिएसु तियभंगो'त्ति अनिन्द्रियेषूक्तभङ्गकत्यमपि सम्भवतीतिकृत्वा तेषु तद्वाच्यमिति ।

'रूवी तहेव'त्ति स्कन्धाः देशाः प्रदेशा अणवश्चेत्यर्थः 'नो धम्मत्थिकाये'त्ति नो धर्मास्तिकाय एकत्राकाशप्रदेशे संभवत्यसङ्ख्यातप्रदेशावगाहित्वात्तस्येति, 'धम्मत्थिकायस्स देसे'त्ति यद्यपि धर्मास्तिकायस्यैकत्राकाशप्रदेशे प्रदेश एवास्ति तथाऽपि देशोऽवयव इत्यनर्थान्तरत्वेना- वयवमात्रस्यैव विवक्षितत्वात् निरंशतायाश्च तत्र सत्या अपि अविवक्षितत्वाद्धर्मास्तिकायस्य देश इत्युक्तं, प्रदेशस्तु निरुपचरित एवास्तीत्यत उच्यते--'धम्मत्थिकायस्स पएसे'त्ति, 'एवमहम्मत्थिकायस्सवि'त्ति 'नो अधम्मत्थिकाए अहम्मत्थिकायस्स देसे अहम्मत्थिकायस्स पएसे' इत्येवमधर्मास्तिकायसूत्रं वाच्यमित्यर्थः, 'अद्धासमओ नत्थि, अरूवी चउव्विह'त्ति ऊर्द्धलोकेऽद्धा-समयो नास्तीति अरूपिणश्चतुर्विधाः--धर्मास्तिकायदेशादयः ऊर्द्धलोक एकत्राकाशप्रदेशे सम्भ- वन्तीति 'लोगस्स जहा अहोलोगखेत्तलोगस्स एगंमि आगासपएसे'त्ति अधोलोकक्षेत्रलोक- स्यैकत्राकाशप्रदेशे यद्वक्तव्यमुक्तं तल्लोकस्याप्येकत्रा काशप्रदेशे वाच्यमित्यर्थः, तच्चैदं--लोगस्स णं भंते ! एगंमि आगासपएसे किं जीवा० ? पुच्छा गोयमा ! 'नो जीवे'त्यादि प्राग्वत् ।

'अहेलोयखेत्तलोए अनंता वन्नपज्जव'त्ति अधोलोकक्षेत्रलोकेऽनन्ता वर्णपर्यवाः एकगुणकालकादीनामनन्तगुणकालाद्यवसानानां पुद्गलानां तत्र भावात् । अलोकसूत्रे 'नेवत्थि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगुरूलहुयपज्जव'त्ति अगुरुलघुपर्यवोपेतद्रव्याणां पुद्गलादीनां तत्राभावात् ॥

**मू. (५११)** *लोए णं भंते ! केमहालए पन्नत्ते ?, गोयमा ! अयन्नं जंबुद्दीवे २ सव्वद्दी० जाव परिखेवेणं, तेणं कालेणं तेणं समएणं छ देवा महिड्ढीया जाव महेसक्खा जंबुद्दीवे २ मंदरे पव्वए मंदरचूलियं सव्वओ समंता संपरिक्खित्ताणं चिट्ठेज्ञा, अहे णं चत्तारि दिसाकुमारीओ महत्तरियाओ चत्तारि बलिपिंडे गहाय जंबुद्दीवस्स २ चउसुवि दिसासु बहियाभिमुहीओ ठिच्चा ते चत्तारि बलिपिंडे जमगसमगं बहिगाभिमुहे पक्खिवेज्ञा, पभू णं गोयमा ! ताओ एगमेगे देवे ते चत्तारि बलिपिंडे धरणितलमसंपत्ते खिप्पामेव पडिसाहरित्तए ।*

*ते णं गोयमा ! देवा ताए उक्किट्ठाए जाव देवगइए एगे देवे पुरच्छाभिमुहे पयाते एवं दाहिणाभिमुहे एवं पच्चत्थाभिमुहे एवं उत्तराभिमुहे एवं उड्ढाभि० एगे देवे अहोभिमुहे पयाए, तेणं कालेणं तेणं समएणं वाससहस्साउए दारए पयाए ।*

*तए णं तस्स दारगस्स अम्मापियरो पहीणा भवंति नो चेव णं ते देवा लोगंतं संपाउणंति, तए णं तस्स दारगस्स आउए पहीणे भवति, नो चेव णं जाव संपाउणंति, तए णं तस्स दारगस्स अट्ठिमिंजा पहीणा भवंति नो चेव णं ते देवा लोगंतं संपाउणंति, तए णं तस्स दारगस्स आसत्तमेवि कुलवंसे पहीणे भवति नो चेव णं ते देवा लोगंतं संपाउणंति, तए णं तस्स दारगस्स नामगोएवि पहीणे भवति नो चेव णं ते देवा लोगंतं संपाउणंति ।*

*तेसि णं भंते ! देवाणं किं गए बहुए अगए बहुए ?, गोयमा ! गए बहुए नो अगए बहुए, गयाउ से अगए असंखेज्ञइभागे अगयाउ से गए असंखेज्ञगुणे, लोए णं गोयमा ! एमहालए पन्नत्ते । अलोए णं भंते ! केमहालए पन्नत्ते ?, गोयमा ! अयन्नं समयखेत्ते पणयालीसं जोयणसयसहस्साइं आयामविक्खंभेणं जहा खंदए जाव परिक्खेवेणं, तेणं कालेणं तेणं समएणं दस देव महिड्ढिया तहेव जाव संपरिक्खित्ताणं संचिट्ठेज्ञा ।*

*अहे णं अट्ठ दिसाकुमारीओ महत्तरियाओ अट्ठ बलिपिंडे गहाय माणुसुत्तरस्स पव्वयस्स चउसुवि दिसासु चउसुवि विदिसासु बहियाभिमुहीओ ठिच्चा अट्ठ बलिपिंडे गहाय माणुसुत्तरस्स पव्वयस्स जमगसमगं बहियाभिमुहीओ पक्खिवेज्ञा, पभू णं गोयमा ! तओ एगमेगे देवे ते अट्ठ बलिपिंडे धरणितलमसंपत्ते खिप्पामेव पडिसाहरित्तए ।*

*ते णं गोयमा ! देवा ताए उक्किट्ठाए जाव देवगईए लोगंसि ठिच्चा असब्भावपट्ठवणाए एगे देवे पुरच्छाभिमुहे पयाए एगे देवे दाहिणपुरच्छाभिमुहे पयाए एवं जाव उत्तरपुरच्छाभिमुहे एगे देवे उड्ढाभिमुहे एगे देवे अहोभिमुहे पयाए ।*

*तेणं कालेणं तेणं समएणं वाससयसहस्साउए दारए पयाए, तए णं तस्स दारगस्स अम्मापियरो पहीणा भवंति नो चेव णं ते देवा अलोयंतं संपाउणंति, तं चेव०, तेसि णं देवाणं किं गए बहुए अगए बहुए ?, गोयमा ! नो गए बहुए अगए बहुए गयाउ से अगए अनंतगुणे अगयाउ से गए अनंतभागे, अलोए णं गोयमा ! एमहालए पन्नत्ते ॥*

**वृ.** 'सव्वदीव'त्ति इह यावत्करणादिदं दृश्यं-'समुद्दाणं अब्भंतरए सव्वखुड्डाए वट्टे तेल्लापूपसंठाणसंठिए वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकन्नियासंठाणसंठिए वट्टे पडिपुन्नचंदसंठाणसंठिए एक्कं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं सोलस य सहस्साइं

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

दोन्नि य सत्तावीसे जोयणसए तिन्नि य कोसे अट्ठावीसं च धनुसयं तेरस अंगुलाइं अद्धंगुलं च किंचि विसेसाहियं' ति।

'ताए उक्किट्ठाए' त्ति इह यावत्करणादिदं दृश्यं–'तुरियाए चवलाए चंडाए सिहाए उद्धुयाए जयणाए छेयाए दिव्वाए' त्ति तत्र 'त्वरितया' आकुलया 'चपलया' कायचापल्येन 'चण्डयारौद्रया गत्युत्कर्षयोगात् 'सिंहया' दार्ढ्यस्थिरतया 'उद्धुतया' दर्पातिशयेन 'जयिन्या' विपक्षजेतृत्वेन 'छेकया' निपुणया 'देव्यया' दिव भवयेति, 'पुरच्छाभिमुहे' त्ति मेर्वपेक्षया, 'आसत्तमे कुलवंसे पहीणे' त्ति कुलरूपो वंशः प्रहीणो भवति आसप्तमादपि वंश्यात्, सप्तममपि वंश्यं यावदित्यर्थः।

'गयाउ से अगए असंखेज्जिभागे अगयाउ से गए असंखेज्जगुणे' त्ति, ननु पूर्वादिषु प्रत्येकमर्द्धरज्जुप्रमाणत्वाल्लोकस्योर्द्धाधश्च किञ्चिन्न्यूनाधिकसप्तरज्जुप्रमाणत्वात्तुल्यया गत्या गच्छतां देवानां कथं षट्स्वपि दिक्षु गतादगतं क्षेत्रमसङ्ख्यातभागमात्रं अगताच्च गतमसङ्ख्यातगुणमिति?, क्षेत्रवैषम्यादिति भावः, अत्रोच्यते, धनचतुरीकृतस्य लोकस्यैव कल्पितत्वान्न दोषः, ननु यद्युक्तस्वरूपयाऽपि गत्या गच्छन्तो देवा लोकान्तं बहुनापि कालेन न लभन्ते तदा कथमच्युताज्जिनजन्मादिषु द्रागवतरन्ति? बहुत्वात्क्षेत्रस्याल्पत्वादवतरणकालस्येति, सत्यं, किन्तु मन्देयं गति जिनजन्माद्यवतरणगतिस्तु शीघ्रतमेति 'असब्भावपट्ठवणाए' त्ति असद्भूतार्थःकल्पनयेत्यर्थः।

**मू. (५१२)** *लोगस्स णं भंते! एगंमि आगासपएसे जे एगिंदियपएसा जाव पंचिंदियपएसा अनिंदियपदेसा अन्नमन्नबद्धा अन्नमन्नपुट्ठा जाव अन्नमन्नसमभरघडत्ताए चिट्ठंति।*

*अत्थि णं भंते! अन्नमन्नस्स किंचि आबाहं वा वाबाहं वा उप्पायंति छविच्छेदं वा करेंति?, नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ लोगस्स णं एगंमि आगासपएसे जे एगिंदियपएसा जाव चिट्ठंति नत्थि णं भंते! अन्नमन्नस्स किंचि आवाहं वा जाव करेंति?, गोयमा से जहानामए नट्टिया सिया सिंगारगारचारुवेसा जाव कलिया रंगट्ठाणंसि जणसयाउलंसि जणसयसहस्साउलंसि बत्तीसइविहस्स नट्टस्स अन्नयरं नट्टविहिं उवदंसेज्जा।*

*से नूणं गोयमा! ते पेच्छगा तं नट्टियं अनिमिसाए दिट्ठीए सव्वओ समंता समभिलोएंति?, हंता समभिलोएंति, ताओ णं गोयमा! दिट्ठीओ तंसि नट्टियंसि सव्वओ समंता संनिपडियाओ?, हंता सन्निपडियाओ, अत्थि णं गोयमा! ताओ दिट्ठीओ तीसे नट्टिए किंचिवि आबाहं वा वाबाहं वा उप्पाएंति छविच्छेदं वा करेंति। नो तिणट्ठे समट्ठे, अहवा सा नट्टिया तासिं दिट्ठीणं किंचि आबाहं वा वाबाहं वा उप्पाएंति छविच्छेदं वा करेइ?, नो तिणट्ठे समट्ठे, ताओ वा दिट्ठीओ अन्नमन्नाए दिट्ठीए किंचि आबाहं वा वाबाहं वा उप्पाएंति छविच्छेदं वा करेन्ति?, नो तिणट्ठे समट्ठे, से तेणट्ठेणं गोयमा! एवं वुच्चइ तं चेव जाव छविच्छेदं वा करेंति॥*

**वृ.** पूर्वं लोकालोकवक्तव्यतोक्ता, अथ लोकैकप्रदेशगतं वक्तव्यविशेषं दर्शयन्नाह–'लोगस्स ण' मित्यादि, 'अत्थि णं भंते' त्ति अस्त्ययं भदन्त! पक्षः, इह च त इति शेषो दृश्यः, 'जाव कलिय' त्ति इह यावत्करणादेवं दृश्यं 'संगयगयहसियमणियचिट्ठियविलाससललियसंलावनिउणजुत्तोवयारकलिय' त्ति, 'बत्तीसइविहस्स नट्टस्स' त्ति द्वात्रिंशद् विधा–भेदा यस्य तत्तथा तस्य नाट्यस्य, तत्र ईहामृगऋषभतुरगनरमकरविहगव्यालककिन्नरादिभक्ति चित्रो नामैको नाट्यविधि, एतच्चरिताभिनयनमिति संभाव्यते, एवमन्येऽप्येकत्रिंशद्विधयो राजप्रश्नकृतानुसारतोवाच्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (५१३) लोगस्स णं भंते ! एगंमि आगासपएसे जहन्नपए जीवपएसाणं उक्कोसपए जीवपएसाणं सव्वजीवाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा लोगस्स एगंमि आगासपएसे जहन्नपए जीवपएसा । सव्वजीवा असंखेज्जगुणा, उक्कोसपए जीवपएसा विसेसाहिया । सेवं भंते ! सेवं भंतेत्ति ॥*

वृ. लोकैकप्रदेशाधिकारादेवेदमाह–'लोगस्स ण'मित्यादि, अस्य व्याख्या–यथा किलैतेषु त्रयोदशसु प्रदेशेषु त्रयोदशप्रदेशकानि दिग्दशकस्पर्शानि त्रयोदश द्रव्याणि स्थितानि तेषां च प्रत्याकाशप्रदेशं त्रयोदश त्रयोदश प्रदेशा भवन्ति, एवं लोकाकाशप्रदेशेऽनन्तजीवावगाहेनैकैकस्मिन्नाकाशप्रदेशेऽनन्ता जीवप्रदेशा भवन्ति, लोके च सूक्ष्मा अनन्तजीवात्मका निगोदाः पृथिव्यादिसर्वजीवासङ्ख्येयकतुल्याः सन्ति, तेषां चैकैकस्मिन्नाकाशप्रदेशे जीवप्रदेशा अनन्ता भवन्ति, तेषां च जघन्यपदे एकत्राकाशप्रदेशे सर्वस्तोका जीवप्रदेशाः, तेभ्यश्च सर्वजीवा असङ्ख्येयगुणाः, उत्कृष्टपदे पुनस्तेभ्यो विशेषाधिका जीवप्रदेशा इति ।

वृ. (५११–५१३)अयं च सूत्रार्थोऽमूभिर्वृद्धोक्तगाथाभिर्भावनीयः–

॥ १ ॥ लोगस्सेगपएसे जहन्नयपयंमि जियपएसाणं ।
उक्कोसपए य तहा सव्वजियाणं च के बहुया ? ॥ (इति प्रश्नः)

॥ २ ॥ (उत्तरं पुनरत्र)–थोवा जहण्णयपए जियप्पएसा जिया असंखगुणा ।
उक्कोसपयपएसा तओ विसेसाहिया भणिया ॥

अथ जघन्यपदमुत्कृष्टपदं चोच्यते–

॥ ३ ॥ तत्थ पुण जहन्नपयं लोगंतो जत्थ फासणा तिदिसिं ।
छद्दिसिमुक्कोसपयं समत्तगोलंमि नन्नत्थ ॥

तत्र–तयोर्जघन्येतपरदयोर्जघन्यपदं लोकान्ते भवति 'जत्थ'त्ति यत्र गोलके स्पर्शना निगोददेशैस्तिसृष्वेव दिक्षु भवति, शेषदिशामलोकेनावृतत्वात्, सा च खण्डगोल एव भवतीति भावः, 'छद्दिसिं'ति यत्र पुनर्गोलके षट्स्वपि दिक्षु निगोददेशैः स्पर्शना भवति तत्रोत्कृष्टपदं भवति, तच्च समस्तगोलेः परिपूर्णगोलके भवति, नान्यत्र, खण्डगोलके न भवतीत्यर्थः, सम्पूर्णगोलकश्च लोकमध्य एव स्यादिति ॥ अथ परिवचनमाशङ्कमान आह–

॥ ४ ॥ उक्कोसमसंखगुणं जहन्नयाओ पयं हवइ किं तु ।
ननु तिदिसिंफुसणाओ छद्दिसिफुसणा भवे दुगुणा ॥

उत्कर्षउत्कृष्टपदमसङ्ख्यातगुणं जीवप्रदेशापेक्षया जघन्यकात्पदादिति गम्यं, भवति 'किन्तु' कथं तु, न भवतीत्यर्थः, कस्मादेवम् ? इत्याह–'ननु'निश्चितम्, अक्षमायां वा ननुशब्दः, त्रिदिकस्पर्शनायाः काशात् षडदिकस्पर्शना भवेद्विगुणेति, इहच काकुपाठाद्धेतुत्वं प्रतीयत इति, अतो द्विगुणमेवोत्कृष्टं पदं स्यादसङ्ख्यातगुणं च तदिष्यते, जघन्यपदाश्रितजीवप्रदेशापेक्षयाऽसङ्ख्यातगुणसर्वजीवेभ्यो विशेषाधिकजीवप्रदेशोपेतत्वात्तस्येति । इहोत्तरम्–

॥ ५ ॥ थोवा जहन्नयपए निगोयमित्तावगाहणाफुसणा ।
फुसणासंखगुणत्ता उक्कोसपए असंखगुणा ॥

स्तोका जीवप्रदेशा जघन्यपदे, कस्मात् ? इत्याह–निगोदमात्रे क्षेत्रेऽवगाहना येषां ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा एकावगाहना इत्यर्थः, तैरेव यत्स्पर्शनं–अवगाहनं जघन्यपदस्य तन्निगोदमात्रावगाहनस्पर्शनं तस्मात्, खण्डगोलकनिष्पादकनिगोदैस्तस्यासंस्पर्शनादित्यर्थः, भूम्यासन्नापवरककोणान्तिमप्रदेशसदृशो हि जघन्यपदाख्यः प्रदेशः, तं चालोकसम्बन्धादेकावगाहना एव निगोदाः स्पृशन्ति, न तु खण्डगोलनिष्पादकाः, तत्र किल जघन्यपदं कल्पनया जीवशतं स्पृशति, तस्य च प्रत्येकं कल्पनयैव प्रदेशलक्षं तत्रावगाढमित्येवं जघन्यपदा कोटी जीवप्रदेशानामवगाढेत्येवं स्तोकास्तत्र जीवप्रदेशा इति । अथोत्कृष्टपदजीवप्रदेशपरिमाणमुच्यते–'फुसणासंखगुणत्त'त्ति स्पर्शनायाः–उत्कृष्टपदस्य पूर्णगोलकनिष्पादकनिगोदैः संस्पर्शनाया यदसङ्ख्यातगुणत्वं जघन्यपदापेक्षया तत्तथा तस्माद्धेतोरुत्कृष्टदेऽसङ्ख्यातगुणा जीवप्रदेशा जघन्यपदेपेक्षया भवन्ति, उत्कृष्टपदं हि सम्पूर्णगोलकनिष्पादकनिगोदैरेकावगाहनैरसङ्ख्येयैः तथोत्कृष्टपदाविमोचनेनैकेकप्रदेशपरिहानिभि प्रत्येकमसङ्ख्येयैरेव स्पृष्टं, तच्च किल कल्पनया कोटी सहस्रेण जीवानां स्पृश्यते, तत्र च प्रत्येकं जीवप्रदेशलक्षस्यावगाहनाज्जीवप्रदेशानां दशकोटीकोट्योऽवगाढाः स्युरित्येवमुत्कृष्टपदे तेऽसङ्ख्येयगुणा भावनीया इति । अथ गोलकप्ररूपणायाह–

॥ ६ ॥ उक्कोसपयममोत्तुं निगोयओगाहणाए सव्वत्तो ।
निप्फाइज्जइ गोलो पएसपरिवुड्ढिहाणीहिं ॥

'उत्कृष्टपदं' विवक्षितप्रदेशम् अमुञ्चद्भिः निगोदावगाहनाया एकस्याः 'सर्वतः' सर्वासु दिक्षु निगोदान्तराणि स्थापयद्भिर्निष्पाद्यते गोलः, कथं ?, प्रदेशपरिवृद्धिहानिभ्यां–कांश्चित् प्रदेशान् विवक्षितावगाहनाया आक्रमद्भिः कांश्चिद्विमुञ्चद्भिरित्यर्थः, एवमेकगोलकनिष्पत्ति, गोलकान्तरकल्पनायाह–

॥ ७ ॥ तत्तोच्चिय गोलाओ उक्कोसपयंमुइत्तु जो अन्नो ।
होइ निगोओ तंमिवि अन्नो निप्फज्जती गोलो ॥

तमेवोक्तलक्षणं गोलकमाश्रित्यान्यो गोलको निष्पद्यते, कथम् ?, उत्कृष्टपदं प्राक्तनगोलकसम्बन्धि विमुच्य योऽन्यो भवति निगोदस्तस्मिन्नुत्कृष्टपदकल्पनेनेति । तथा च यत्स्यात्तदाह–

॥ ८ ॥ एवं निगोयमेत्ते खेत्ते गोलस्स होइ निप्फत्ती ।
एवं निप्पज्जंते लोगे गोला असंखिज्जा ॥

'एवम्' उक्तक्रमेण निगोदमात्रे क्षेत्रे गोलकस्य भवति निष्पत्ति, विवक्षितनिगोदावगाहातिरिक्तनिगोददेशानां गोलकान्तरानुप्रवेशात्, एवं च निष्पद्यन्ते लोके गोलका असङ्ख्येयाः, असङ्ख्येयत्वात् निगोदावगाहनानां, प्रतिनिगोदावगाहनं च गोलकनिष्पत्तेरिति ॥ अथ किमिदमेव प्रतिगोलकं यदुक्तमुत्कृष्टपदं तदेवेह ग्राह्यमुतान्यत् ? इत्यस्यामाशङ्कायामाह–

॥ ९ ॥ ववहारनएण इमं उक्कोसपयावि एत्तिया चेव ।
जं पुण उक्कसपयं नेच्छइयं होइ तं वोच्छं ॥

'व्यवहारनयेन' सामान्येन 'इदम्' अनन्तरोक्तमुत्कृष्टपदमुक्तं, काक्वाचेदमध्येयं, तेन नेहेदं ग्राह्यमित्यर्थः स्यात्, अथ कस्मादेवम् ? इत्याह–'उक्कोसपयावि एत्तिया चेव'त्ति न केवलं गोलका असङ्ख्येयाः उत्कर्षपदान्यपि परिपूर्णगोलकप्ररूपितानि एतावन्त्येव–असङ्ख्येयान्येव भवन्ति यस्मात्ततो न नियतमुत्कृष्टपदं किञ्चन स्यादिति भावः, यत्पुनरुष्कृष्टपदं नैश्चयिकं भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वोत्कर्षयोगाद् यदिहग्राह्यमित्यर्थः तद्वक्ष्ये । तदेवाह –

॥ १० ॥ बायरनिगोयविग्गहगइयाइ जत्थ समहिया अन्ने ।
गोला हुज्ञ सुबहुला नेच्छइयपयं तदुक्कोसं ॥

बादरनिगोदानां–कन्दादीनां विग्रहगतिकादयो बादरनिगोदविग्रहगतिकादयः, आदिशब्दश्चेहाविग्रहगतिकावरोधार्थः, यत्रोत्कृष्टपदे समधिका अन्ये–सूक्ष्मनिगोदगोलकेभ्योऽपरे गोलका भवेयुः सुबहवो नैश्चयिकपदं तदुत्कर्षं बादरनिगोदा हि पृथिव्यादिषु पृथ्व्यादयश्च स्वस्थानेषु स्वरूपतो भवन्ति न सूक्ष्मनिगोदवत्सर्वत्रेत्यतो यत्र क्वचित्ते भवन्ति तदुत्कृष्टपदं तात्विकमिति भावः । एतदेव दर्शयन्नाह–

॥ ११ ॥ इहरा पडुच्च सुहुमा बहुतुल्ला पायसो सगलगोला ।
तो बायराइगहणं कीरइ उक्कोसयपयंमि ॥

'इहर' त्ति बादरनिगोदाश्रयणं विना सूक्ष्मनिगोदान् प्रतीत्य बहुतुल्याः–निगोदसङ्ख्यया समानाः प्रायशः, प्रायोग्रहणमेकादिना न्यूनाधिकत्वे व्यभिचारपरिहारार्थं, क एते ? इत्याह– सकलगोलाः, न तु खण्डगोलाः, अतो न नियतं किञ्चिदुत्कृष्टपदं लभ्यते, यत एवं तो बादरनिगोदादिग्रहणं क्रियते उत्कृष्टपदे ॥ अथ गोलकादीनां प्रमाणमाह–

॥ १२ ॥ गोला य असंखेज्ञा होंति निओया असंखया गोले ।
एक्कोक्कोउ निगोओ अनंतजीवो मुणेयव्वो ॥

अथ जीवप्रदेशपरिमाणप्ररूपणापूर्वकं निगोदादीनामवगाहनामानमभिधित्सुराह–

॥ १३ ॥ लोगस्स य जीवस्स य होन्ति पएसा असंखया तुल्ला ।
अंगुलअसंखभागो निगोयजियगलगोगाहो ॥

लोकजीवयोः प्रत्येसमसङ्ख्येयाः प्रदेशा भवन्ति ते च परस्परेण तुल्या एव, एषां च सङ्कोचविशेषाद् अङ्गुलासङ्ख्येयभागो निगोदस्य तज्जीवस्य गोलकस्य चावगाह इति निगोदादिसमावगाहना तामेव समर्थःयन्नाह–

॥ १४ ॥ जंमि जिओ तंमेव उ निगोअ तो तम्मि चेव गोलोवि ।
निप्फज्जइ जं खेत्ते तो ते तुल्लावगाहणया ॥

यस्मिन् क्षेत्रे जीवोऽवगाहते तस्मिन्नेव निगोदो, निगोदव्याप्तया जीवस्यावस्थानात्, 'तो' त्ति ततः–तदनन्तरं निगोदमात्रत्वाद् गोलकावगाहनाया इति, यद्–यस्मात्क्षेत्रे–आकाशे ततस्ते– जीवनिगोदगोलाः 'तुल्यावगाहनाकाः' समानावगाहनाका इति । अथ जीवाद्यवगाहनासमतासामर्थ्येन यदेकत्र प्रदेशे जीवप्रदेशमानं भवति तद्विभणिषुस्तत्प्रस्तावनार्थं प्रश्नं कारयन्नाह–

॥ १५ ॥ उक्कोसपयपएसे किमेगजीवप्पएसरासिस्स ।
होज्जेगनिगोयस्स व गोलस्स व किं समोगाढं ॥

–तत्र जीवमाश्रित्योत्तरम्–

॥ १६ ॥ जीवस्स लोगमेत्तस्स सुहुमओगाहणावगाढस्स ।
एक्केक्कंमि पएसे होंति पएसा असंखेज्ञा ॥

ते च किल कल्पनया कोटीशतसङ्ख्यस्य जीवप्रदेशराशेः प्रदेशदशसहस्रीस्वरूपजीवा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वगाहनया भागे हृते लक्षमाना भवन्तीति ॥ अथ निगोदमाश्रित्याह–

॥१७॥ लोगस्स हिए भागे निगोयओगाहणाए जं लद्धं ।
उक्कोसपएऽतिगयं एत्तियमेक्केजीवाओ ॥

'लोकस्य' कल्पनया प्रदेशकोटीशतमानस्य हृते भागे निगोदावगाहनया कल्पनातः प्रदेशदशसहस्रीमानया यल्लब्धं तच्च किल लक्षपरिमाणमुत्कृष्टपदेऽतिगतं–अवगाढमेतावदेकैकजीवात्, अनन्तजीवात्, अनन्तजीवात्मकनिगोदसम्बन्धिन एकैकजीवसत्कमित्यर्थः । अनेन नीगोदसत्कमुत्कृष्टपदे यदवगाढं तद्दर्शितमथ गोलकसत्कं यत्तत्रावगाढं तद्दर्शयति–

॥१८॥ एवं दव्वट्ठाओ सव्वेसिं एक्कगोलजीवाणं ।
उक्कोसपयमइगया होंति पएसा असंखगुणा ॥

यथा निगोदजीवेभ्योऽसङ्ख्येयगुणास्तत्प्रदेशा उत्कृष्टपदेऽतिगता एवं 'द्रव्यार्थात्' द्रव्यार्थःतया न तु प्रदेशार्थःतया 'सव्वेसिं'ति सर्वेभ्य एकगोलगतजीवद्रव्येभ्यः सकाशादुत्कृष्टपदमगतिगता भवन्ति प्रदेशा असङ्ख्यातगुणाः । इह किलानन्तजीवोऽपि निगोदः कल्पनया लक्षजीवः, गोलकश्चासङ्ख्यातनिगोदोऽपि कल्पनया लक्षनिगोदः, ततश्च लक्षस्य लक्षगुणने कोटीसहस्रसङ्ख्याः कल्पनया गोलके जीवा भवन्ति, तत्प्रदेशानां च लक्षं लक्षमुत्कृष्टपदेऽतिगतं, अतश्चैकगोलकजीवसङ्ख्यया लक्षगुणने कोटीकोटीदशकसङ्ख्या एकत्र प्रदेशे कल्पनया जीवप्रदेशा भवन्तीति । गोलकजीवेभ्य सकाशादेकत्र प्रदेशेऽसङ्ख्येयगुणा जीवप्रदेशा भवन्तीत्युक्तमथ तत्र गुणकारराशेः परिमाणनिर्णयार्थःमुच्यते–

॥१९॥ तं पुण केवइएणं गुणियमसंखेज्जयं भवेज्जा हि ।
भन्नइ दव्वट्ठाइ जावइया सव्व गोलत्ति ।

तत्पुनरनन्तरोक्तमुत्कृष्टपदातिगतजीवप्रदेशराशिसम्बन्धि 'कियता' किंपरिमाणेनासङ्ख्येयराशिना गुणितं सत् 'असंखेज्जयं'ति असङ्ख्येयकम्–असङ्ख्यातगुणनाद्वारायातं 'भवेत्' स्यादिति ?, भण्यते अत्रोत्तरं, द्रव्यार्थःतया न तु प्रदेशार्थः तया यावन्तः 'सर्वगोलकाः' सकलगोलकास्तावन्त इति गम्यं, स चोत्कृष्टपदगतैकजीवप्रदेशराशिर्मन्तव्यः, सकलगोलकानां तत्तुल्यत्वादिति

॥२०॥ किं कारणमोगाहणतुल्लत्ता जियमिगोयगोलाणं ।
गोला उक्कोसपएक्कजियपएसेहं तो तुल्ला ॥

'किं कारणं'ति कस्मात्कारणाद् यावन्तः सर्वगोलास्तावन्त एवोत्कृष्टपदगतैकजीवप्रदेशाः ? इति प्रश्नः, अत्रोत्तरम्–अवगाहनातुल्यत्वात्, केषामियमित्याह–जीवनिगोदगोलानाम्, अवगाहनातुल्यत्वं चैषामङ्गुलासङ्ख्येयभागमात्रावगाहित्वादिति प्रश्नः, यस्मादेवं 'तो'त्ति तस्माद्गोलाः सकललोकसम्बन्धिनः उत्कृष्टपदे ये एकस्य जीवस्य प्रदेशास्ते तथा तैरुत्कृष्टपदेकजीवप्रदेशैस्तुल्या भवन्ति एतस्यैव भावनार्थःमुच्यते–

॥२१॥ गोलेहि हिए लोगे आगच्छइ जं तमेगजीवस्स ।
उक्कोसपयगयपएसरासितुल्लं वहइ जम्हा ॥

'गोलैः' गोलावगाहनाप्रदेशैः कल्पनया दशसहस्रसङ्ख्यैः 'हृते' विभक्ते हृतभाग इत्यर्थः 'लोके' लोकप्रदेशराशौ कल्पनया एककोटीशतप्रमाणे 'आगच्छति' लभ्यते 'यत्' सर्वगोलसङ्ख्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानं कल्पनया लक्षमित्यर्थः तदेकजीवस्य सम्बन्धिना पूर्वोक्तप्रकारतः कल्पनया लक्षप्रमाणेनैवोत्कृष्टपदगतप्रदेशराशिना तुल्यं भवति यस्मात्तस्माद्गोला उत्कृष्टपदैकजीवप्देशैस्तुल्या भवन्तीति प्रकृतमेवेति । एवं गोलकानामुत्कृष्टपदगतैकजीवप्रदेशानां च तुल्यत्वं समर्थितं, पुनस्तदेव प्रकारान्तरेण समर्थयति–

॥२२॥ अहवा लोगपएसे एक्केक्केउठविय गोलमेएक्केक्कं ।
एवं उक्कोसपएक्कजियपेसेसु मायंति ॥

अथवा लोकस्यैव प्रदेशे एकैकस्मिन् 'स्थापय'निधेहि विवक्षितसमत्वबुभुत्सो ! गोलकमेकैकं, ततश्च 'एवम्' उक्तक्रमस्थापने उत्कृष्टपदे ये एकजीवप्रदेशास्ते तथा तेषु तत्परिमाणेष्वाकाशप्रदेशेष्वित्यर्थः मान्ति गोला इति गम्यं, यावन्त उत्कृष्टपदे एकजीवप्रदेशास्तावन्तो गोलका अपि भवन्तीत्यर्थः, ते च कल्पनया किल लक्षप्रमाणा उभयेऽपीति । अथ सर्वजीवेभ्य उत्कृष्टपदजीवप्रदेशा विशेषाधिका इति बिभणिषुस्तेषां सर्वजीवानां च तावत्समतामाह–

॥२३॥ गोलो जीवो य समा पएसओ जं च सव्जीवावि ।
होंति समोगाहणया मज्झिमओगाहणं पप्प ॥

गोलको जीवश्च समौ प्रदेशतः–अवगाहनाप्रदेशानाश्रित्य, कल्पनया द्वयोरपि प्रदेशदशसहस्रामवगाढत्वात्, 'जं च'त्ति यस्माच्च सर्वजीवा अपि सूक्ष्मा भवन्ति समावगाहनका मद्यमावगाहनामाश्रित्य, कल्पनया हि जघन्यावगाहना पञ्चप्रदेशसहस्राणि उत्कृष्टा तु पञ्चदशेति द्वयोश्च मीलनेनार्द्धीकरणेन च दशसहस्राणि मध्यमा भवतीति ।

॥२४॥ तेण फुडं चिय सिद्धं एगपएसंमि जे जियपएसा ।
ते सव्वजीवतुल्ला सुणसु पुणो जह विसेसहिया ॥

इह किलासद्भावस्थापनया कोटीशतसङ्ख्यप्रदेशस्य जीवस्याकाशप्रदेशदशसहस्रामवगाढस्य जीवस्य प्रतिप्रदेशं प्रदेशलक्षं भवति, तच्च पूर्वोक्तप्रकारतो निगोदवर्त्तिना जीवलक्षेण गुणितं कोटीसहस्रं भवति, पुनरपि च तदेकगोलवर्त्तिना निगोदलक्षेण गुणितं कोटीकोटीदशकप्रमाणं भवति, जीवप्रमाणमप्येतदेव, तथाहि–कोटीशतसंख्यप्रदेशे लोके दशसहस्रावगाहिनां गोलानां लक्षं भवति, प्रतिगोलकं च निगोदलक्षकल्पनात् निगोदानां कोटीसहस्रं भवति, प्रतिनिगोदं च जीवलक्षकल्पनात् सर्वजीवानां कोटीकोटीदशकं भवतीति । अथ सर्वजीवेभ्य उत्कृष्टपदगतजीवप्रदेशा विशेषाधिका इति दर्श्यते–

॥२५॥ जं संति केइ खंडा गोला लोगंतवत्तिणो अन्ने ।
बायरविग्गहिएहि य उक्कसपयं जमब्भहियं ।

यस्माद्विद्यन्ते केचित्खण्डा गोला लोकान्तवर्त्तिनः 'अन्ने'त्ति पूर्णगोलकेभ्योऽपरेऽतो जीवराशिः कल्पनया कोटीकोटीदशकरूप ऊनो भवति पूर्णगोलकतायामेव तस्य यथोक्तस्य भावात्, ततश्च येन जीवराशिना खण्डगोलका पूर्णीभूताः स सर्वजीवराशेरपनीयते असद्भूतत्वात्तस्य, स च किल कल्पनया कोटीमानः, तत्र चापनीते सर्वजीवराशि स्तोकतरो भवति, उत्कृष्टपदं तु यथोक्तप्रमाणमवेति तत्वतो विशेषाधिकं भवति, समता पुनः खण्डगोलानां पूर्णताविवक्षणाक्तेति, तथा बादरविग्रहिकैश्च–बादरनिगोदादिजीवप्रदेशैश्चोत्कृष्टपदं यद्–यस्मात्सर्वजीवराशेर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्यधिकं ततः सर्वजीवेभ्य उत्कृष्टपदे जीवप्रदेशा विशेषाधिका भवन्तीति, इयमत्र भावना–बादरविग्रहगतिकादीनमनन्तानां जीवानां सूक्ष्मजीवासङ्ख्येययभागवर्त्तिनां कल्पनया कोटीप्रायसङ्ख्यानां पूर्वोक्तजीवराशिप्रमाणे प्रक्षेपणेन समताप्राप्तावपि तस्य बादरादिजीवराशेः कोटीप्रायसङ्ख्यस्य मध्यादुत्कर्षतोऽसख्येयभागस्य कल्पनया शतसङ्ख्यस्य विवक्षितसूक्ष्मोगोलकावगाहनायामवगाहनात् एकैकस्मिंश्च प्रदेशे प्रत्येकं जीवप्रदेशलक्षस्यावगाढत्वात् लक्षस्य च शतगुणत्वेन कोटीप्रमाणत्वात् तस्याश्चोत्कृष्टपदे प्रक्षेपात्पूर्वोक्तमुत्कृष्टपदजीवप्रदेशमानं कोट्याऽधिकं भवतीति। यस्मादेवं–

॥२६॥ तम्हा सव्वेहिंतो जीवेहिंतो फुडं गहेयव्वं।
उक्कोसपयपएसा होंति विसेसाहिया नियमा॥

–इदमेव प्रकारान्तरेण भाव्यते–

॥२७॥ अहवा जेण बहुसमा सुहुमा लोएऽवगाहणाए य।
तेणेएक्केक्कं जीवं बुद्धीए विरल्ल एलोए॥

यतो बहुसमाः– प्रायेण समाना जीवसङ्ख्यया कल्पनया एकैकावगाहनायां जीवकोटीसहस्रस्यावस्थानात्, खण्डगोलकैर्व्यभिचारपरिहारार्थं चेह बहुग्रहणं, 'सूक्ष्माः' सूक्ष्मनिगोदगोलकाः कल्पनया लक्षकल्पाः 'लोके' चतुर्दशरज्ज्वात्मके, तथाऽवगाहनया च समाः, कल्पनया दशसु दशसु प्रदेशसहस्रेष्ववगाढत्वात्, तस्मादेकप्रदेशावगाढजीवप्रदेशानां सर्वजीवानां च समतापरिज्ञानार्थःमेकैकं जीवं बुद्ध्या 'विरल्लए' त्ति केवलियसमुद्घातगत्या विस्तारयेल्लोके, अयमत्र भावार्थः– यावन्तो कोलकस्यैकत्र प्रदेशे जीवप्रदेशा भवन्ति कल्पनया कोटीरदशकप्रमाणास्तावन्त एवं विस्तारेतेषु जीवेषु लोकस्यैकत्र प्रदेशे ते भवन्ति, सर्वजीवा अप्येतत्समाना एवेति, अत एवाह–

॥२८॥ एवंपि समा जीवा एगपएसगयजियपएसेहिं।
बायरबाहुल्ला पुण होंति पएसा विसेसहिया॥

एवमपि न केवलं 'गोल जीवो य समा' इत्यादिना पूर्वोक्तन्यायेन समा जीवा एकप्रदेशगतैर्जीवप्रदेशैरिति, उत्तरार्द्धस्य तु भावना प्राग्वदवसेयेति। अथ पूर्वोक्तराशीनां निदर्शनान्यभिधित्सुः प्रस्तावयन्नाह–

॥२९॥ तेसिं पुण रासीणं निदरिसणमिणं भणामि पच्चक्खं।
सुहगहणगाहणत्थं ठवणारासिप्पमाणेहिं॥

॥३०॥ गोलाण लक्खमेक्क गोले २ निगोयलक्खं तु।
एक्केक्केय निगोए जीवाणं लक्खमएक्केक्कं॥

॥३१॥ कोडिसयमेगजीवप्पएसभाणं तमेव लोगस्स।
गोलनिगोयजियाणं दस उ सहस्सा समोगाहो॥

॥३२॥ जीवस्सेएक्केक्केस्स य दससाहस्सावगाहिणो लोगे।
एक्केक्केमि पएसे पएसलक्खं समोगाढं॥

॥३३॥ जीवसयस्स जहन्ने पयंमि कोडी जियप्पएसाणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओगाढा उक्कोसे पयंमि वोच्छं पएसग्गं ॥

॥ ३४ ॥ कोडिसहस्सजियाणं कोडाकोडीदसप्पएसाणं ।

उक्कोसे ओगाढा सव्वजियाऽवेत्तिया चेव ॥

॥ ३५ ॥ कोडी उक्कोसपयंमि बायरजियप्पएसप्खेवो ।

सोहणयमेत्तियं चिय कायव्वं खंडगोलाणं ॥

उत्कृष्टपदे सूक्ष्मजीवप्रदेशराशेरूपरि कोटीप्रमाणो बादरजीवप्रदेशानां प्रक्षेपः कार्य, शतकल्पत्वाद्विवक्षितसूक्ष्मगोलकावगाढबादरजीवानां, तेषां च प्रत्येकं प्रदेशलक्षस्योत्कृष्ट-पदेऽवस्थितत्वात्, तन्मीलने च कोटी सद्भावादिति, तथा सर्वजीवराशेर्मध्याच्छोधनकं-अपनयनम् 'एत्तियं चिय'त्ति एतावतामेव-कोटीसङ्ख्यानामेव कर्त्तव्यं, 'खण्डगोलानां' खण्डगोलकपूर्णताकरणे नियुक्तजीवानां तेषामसद्भाविकत्वादिति ।

॥ ३६ ॥ एएसि जहासंभवमत्थोवणयं करेज्ज रासीणं ।

सब्भावओ य जाणिज्ज ते अनंता असंखा वा ॥

इहार्थोपनयो यथास्थानं प्रायः प्राग् दर्शित एव, 'अनंत'त्ति निगोदे जीवा यद्यपि लक्षमाना उक्तास्तथाऽप्यनन्ताः, एवं सर्वजीवा अपि, तथा निगोदादयो ये लक्षमाना उक्तास्तेऽप्यसङ्ख्येया अवसेया इति ।

शतकं-११ उद्देशकः-१० समाप्तः

## -: शतकं-११ उद्देशकः-११ :-

**वृ.** अनन्तरोद्देशके लोकवक्तव्यतोक्ता, इह तु लोकवर्त्तिकालद्रव्यवक्तव्यतोच्यते, इत्येवंसम्बद्धस्यास्यैकादशोद्देशकस्येदमादिसूत्रम्-

**मू. (५१४)** *तेणं कालेणं तेणं समएणं वाणियगामे नामं नगरे होत्था वन्नओ, दूतिपलासे चेइए वन्नओ जाव पुढविसिलापट्टओ, तत्थ णं वाणियगामे नगरे सुदंसणे नामं सेट्ठी परिवसइ अड्ढे जाव अपरिभूइ समणोवासए अभिगयजीवाजीवे जाव विहरइ, सामी समोसढे जाव परिसा पज्जुवासइ ।*

*तए णं से सुदंसणे सेट्ठी इमीसे कहाए लद्धट्ठे समाणे हट्ठतुट्ठे ण्हाए कय जाव पायच्छित्ते सव्वालंकारविभूसिए साओ गिहाओ पडिनिक्खमइ साओ गिहाओ पडिनिक्खमित्ता सकोरेंटमल्लदामेणं छत्तेणं धरिज्जमाणेणं पायविहारचारेणं महया पुरिसवग्गुरापरिक्खित्ते वाणियगामं नगरं मज्झंमज्झेणं निग्गच्छइ निग्गच्छित्ता जेणेव दूतिपलासे चेइए जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ तेणेव उवागच्छित्ता समणं भगवं महावीरं पंचविहेणं अभिगमेणं अभिगच्छति, तं०-सच्चित्ताणं दव्वाणं जहा उसभदत्तो जाव तिविहाए पज्जुवासणाए पज्जुवासइ ।*

*तए णं समणे भगवं महावीरे सुदंसणस्स सेट्ठिस्स तीसे य महतिमहालयाए जाव आराहए भवइ । तए णं से सुदंसणे सेट्ठी समणस्स भगवओ महावीरस्स अंतियं धम्मं सोच्चा निसम्म हट्ठतुट्ठ० उट्ठाए उट्ठेइ २त्ता समणं भगवं महावीरं तिक्खुत्तो जाव निमंसित्ता एवं वयासी ।*

*कइविहे णं भंते ! काले पन्नत्ते ?, सुदंसणा ! चउव्विहे काले पन्नत्ते, तं०-पमाणकाले १ अहाउनिव्वत्तिकाले २ मरणकाले ३ अद्धाकाले ४, से किं तं पमाणकाले ?, २ दुविहे प०तं०*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*–दिवसप्पमाणकाले १ राइप्पमाणकाले य २, चउपोरिसिए दिवसे चउपोरिसिया राई भवइ ।*

**वृ.** 'तेण'मित्यादि, 'पमाणकाले'त्ति प्रमीयते–परिच्छिद्यते येन वर्षशतादि तत् प्रमाणं स चासौ कालश्चेति प्रमाणकालः प्रमाणं वा–परिच्छेदनं वर्षादिस्तत्प्रधानस्तदर्थो वा कालः प्रमाणकालः–अद्धाकालस्य विशेषो दिवसादिलक्षणः, आह च–

॥१॥ "दुविहो पमाणकालो दिवसपमाणं च होइ राईय ।
चउपोरिसिओ दिवसो राई चउपोरिसी चेव ॥"

अहाउनिव्वत्तिकाले त्ति यथा–येन प्रकारेणायुषो निर्वृत्ति–बन्धनं तथा य– कालः–अवस्थितिरसौ यथायुर्निर्वृत्तिकालो–नारकाद्यायुष्कलक्षणः, अयं चाद्धाकाल एवायुःकर्मानुभव-विशिष्टः सर्वेषामेव संसारिजीवानां स्यात्, आह च–

॥१॥ "नेरइयतिरियमणुया देवाण अहाउयं तु जं जेणं ।
निव्वत्तियमन्नभवे पालेंति अहाउकालो सो ॥"

'मरणकाले'त्ति मरणेन विअद्धा–शिष्टः कालः मरणकालः–अद्धाकालः एव, मरणमेव वा कालो मरणस्य कालपर्यायत्वान्मरणकालः, 'अद्धाकाले'त्ति समयादयो विशेषास्तद्रूपः कालोऽद्धाकालः–चन्द्रसूर्यादिक्रियाविशिष्टोऽर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्ती समयादि, आह च–

॥१॥ "समयावलियमुहुत्ता दिवसअहोरत्तपक्खमासा य ।
संवच्छरजुगपलिया सागरओस्सप्पिपरियट्टा ॥" इति

अनन्तरं चतुष्पौरुषीको दिवसश्चतुष्पौरुषीका च रात्रिर्भवतीत्युक्तमय पौरुषीमेव प्ररूपयन्नाह–

**मू.** *(५१५) उक्कोसया अद्धपंचममुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ, जदा णं भंते ! उक्कोसिया अद्धपंचमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति तदा णं कतिभागमुहुत्तभागेणं परिहायमाणी परि० २ जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति ?, जदा णं जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति तदा णं कतिभागमुहुत्तभागेणं परिवड्ढमाणी २ उक्कोसिया अद्धपंच मुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ । सुदंसणा ! जदा णं उक्कोसिया अद्धपंचममुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ तदा णं बावीससयभागमुहुत्तभागेणं परिहायमाणी परि० २ जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ ।*

*जदा णं जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ तया णं बावीससय-भागमुहुत्तभागेणं परिवड्ढमाणी परि० २ उक्कोसिया अद्धपंचममुहुत्ता दिवसस्स वा राईए वा पोरिसी भवति । कदा णं भंते ! उक्कोसिया अद्धपंचममुहुत्ता दिवस्स राईए वा पोरिसी भवइ ? कदा वा जहन्निया तिमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ ?*

*सुदंसणा ! जदा णं उक्कोसिए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ तदा णं उक्कोसिया अद्धपंचममुहुत्ता दिवसस्स पोरिसी भवइ जहन्निया तिमुहुत्ता राईए पोरिसी भवइ, जया णं उक्कोसिया अट्ठारसमुहुत्तिआ राई भवति जहन्निए दुवालसमुहुत्ते दिवसे भवइ तदा णं उक्कोसिया अद्धपंचममुहुत्ता राईए पोरिसी भवइ जहन्निया तिमुहुत्ता दिवसस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पोरिसी भवइ। कदा णं भंते! उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ? कदा वा उक्कोसिया अट्ठारसमुहुत्ता राई भवति जहन्नए दुवालसमुहुत्ते दिवसे भवइ?*

*सुदंसणा! आसाढपुन्निमाए उक्कोसए अट्ठारसमुहुत्ते दिवसे भवइ जहन्निया दुवालसमुहुत्ता राई भवइ, पोससस पुन्निमाए णं उक्कोसिया अट्ठारसमुहुत्ता राई भवइ जहन्नए दुवालसमुहुत्ते दिवसे भवइ। अत्थि णं भंते! दिवसा य राईओ य समा चेव भवन्ति?, हंता! अत्थि।*

*कदा णं भंते! दिवसा य राईओ य समा चेव भवन्ति?, सुदंसणा! चित्तासोयपुन्निमासु णं, एत्थ णं दिवसा य राईओ य समा चेव भवन्ति, पन्नरसमुहुत्ते दिवसे पन्नरसमुहुत्ता राई भवइ चउभागमुहुत्तभागूणा चउमुहुत्ता दिवसस्स वा राईए वा पोरिसी भवइ, सेत्तं पमाणकाले।*

**वृ.** 'उक्कोसिये'त्यादि, 'अद्धपंचमुहुत्त'त्ति अष्टादशमुहुत्तस्य दिवसस्य रात्रेर्वा चतुर्थो भागो यस्मादर्द्धपञ्चममुहूर्त्ता नवघटिका इत्यर्थः ततोऽर्द्धपञ्चमा मुहूर्त्ता यस्यां सा तथा, 'तिमुहुत्त'त्ति द्वादशमुहूर्त्तस्य दिवसादेश्चतुर्थो भागस्त्रिमुहूर्त्तो भवति अतस्त्र्यो मुहूर्त्ताः—षट् घटिका यस्यां सा तथा, 'कइ भागमुहुत्तभागेणं'ति कतिभागः—कतिखभागस्तद्रूपो मुहूर्त्तभागः कतिभाग-मुहूर्त्तभागस्तेन, कतिथेन मुहूर्त्तांशेनेत्यर्थः 'बावीससयभागमुहुत्तभागेणं'ति इहार्द्धपञ्चमानां त्रयाणां च मुहूर्त्तानां विशेषः सार्द्धो मुहूर्त्तः, स च त्र्यशीत्याधिकेन दिवसशतेन वर्द्धते हीयते च, स च सार्द्धो मुहूर्त्तस्त्रयशीत्यधिकशतभागतया व्यवस्थाप्यते, तत्र च मुहूर्त्ते द्वाविंशत्यधिकं भागशतं भवत्यतोऽभिधीयते—'बावीसे'त्यादि, द्वाविंशत्यधिकशततमभागरूपेण मुहूर्त्तभागेनेत्यर्थः।

'आसाढपुन्निमाए'इत्यादि, इह 'आषढपौर्णमास्या'मिति यदुक्तं तत् पञ्चसंवत्स-रिकयुगस्यान्तिमवर्षापेक्षयाऽवसेयं, यतस्तत्रैवाषाढपौर्णमास्यामष्टादशमुहूर्त्तो दिवसो भवति, अर्द्धपञ्चममुहूर्त्ता च तत्पौरुषी भवति, वर्षान्तरे तु यत्र दिवसे कर्क०सङ्क्र०न्तिर्जायते तत्रैवासौ भवतीति समवसेयमिति, एवं पौषपौर्णमास्यामप्यौचित्येन वाच्यमिति।

अनन्तरं रात्रिदिवसयोर्वैषम्यमभिहितं, अथ तयोरेव समतां दर्शयन्नाह—'अत्थि ण'मित्यादि, इह च 'चत्तासोयपुन्निमाएसु ण'मित्यादि यदुच्यते तद्व्यवहारनयापेक्षं, निश्चयतस्तु कर्क०म-करसङ्क्रान्तिदिनादारभ्य यद् द्विनवतितममहोरात्रं तस्यार्द्धे समा दिवरात्रिप्रमाणतेति, तत्र च पञ्चदशमुहूर्त्ते दिने रात्रौ वा पौरुषीप्रमाणं त्रयो मुहूर्त्तायश्च मुहूर्त्तचतुर्भागा भवन्ति, दिनचतुर्भाग-रूपत्वात्तस्याः, एतदेवाह— 'चउभागे'त्यादि, चतुर्भागरूपो यो मुहूर्त्तभागस्तेनोना चतुर्भाग मुहूर्त्तभागोना चत्वारो मुहूर्त्ता यस्यां पौरुष्यां सा तथेति ॥

***मू. (५१६)*** *से किं तं अहाउनिव्वत्तिकाले?, अहा० २ जन्नं जेणं नेरइएण वा तिरिक्खजोणिएण वा मणुस्सेण वा देवेण वा अहाउयं निव्वत्तियं सेत्तं पालेमाणे अहाउनिव्वत्तिकाले*

*से किं तं मरणकाले?, २ जीवो वा सरीराओ सरीरं वा जीवाओ, सेत्तं मरणकाले।*

*से किं तं अद्धाकाले?, अद्धा० २ अनेगविहे पन्नत्ते, से णं समयट्ठयाए आवलियट्ठयाए जाव उस्सप्पिणीट्ठयाए।*

*एस णं सुदंसणा! अद्धा दोहारच्छेदेणं छिज्जमाणी जाहे विभागं नो हव्वमागच्छइ सेत्तं समए, समयट्ठयाए असंखेज्जाणं समयाणं समुदयसमिइसमागमेणं सा एगा आवलियत्ति पवुच्चइ,*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संखेज्जाओ आवलियाओ जहा सालिउद्देसए जाव सागरोवमस्स उ एगस्स भवे परिमाणं ।*

*एएहिं णं भंते ! पलिओवमसागरोवमेहिं किं पयोयणं ?, सुदंसणा ! एएहिं पलिओवमसागरोवमेहिं नेरइयतिरिक्खजोणियमणुस्सदेवाणं आउयाइं मविज्जंति ।*

'कोहे' त्ति क्रोधपरिणामजनकं कर्म्म, तत्र क्रोध इति सामान्यं नाम कोपादयस्तु तद्विशेषाः, तत्र कोपः क्रोधोदयात्स्वभावाच्चलनमात्रं, रोषः-क्रधस्यैवानुबन्ध, दोषः आत्मनः परस्य वा दूषणं, एतच्च क्रधकार्यं, द्वेषो वाऽप्रीतिमात्रम्, अक्षमा-परकृतापराधस्यासहनं, सञ्ज्वलनो-मुहुर्मुहुः क्रोधाग्निना ज्वलनं, कलहो-महता शब्देनान्योऽन्यमसमञ्जसभाषणं, एतच्च क्रोधकार्यं, चाण्डिक्यं रौद्राकारकरणं, एतदपि क्रोधकार्यमेव, भण्डनं-दण्डादिभिर्युद्धं, एतदपि क्रोधकार्यमेव, विवादो-विप्रतिपत्तिसमुत्थवचनानि, इदमपि तत्कारयमेवेति, क्रोधैकार्था चैते शब्दाः।

'माने' त्ति मानपरिणामजनकं कर्म्म, तत्र मान इति सामान्यं नाम, मदादयस्तु तद्विशेषाः, तत्र मदो-हर्षमात्रं दर्पो-दृप्तता स्तम्भः-अनम्रता गर्व-शौण्डीर्यं।

'अत्तुक्कोसे' त्ति आत्मनः परेभ्यः सकाशाद्गुणैरुत्कर्षणम्-उत्कृष्टताऽभिदानं परपरिवादः-परेषामपवदनं परिपातो वा गुणेभ्यः परिपातनमिति, 'उक्कोसे' त्ति उत्कर्षणं आत्मनः परस्य वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनाक् क्रिययोत्कृष्टताकरणं उत्काशनं वा-प्रकाशनमभिमानत्स्वकीयसमृद्धयादेः 'अवक्क,ोसे' त्ति अपकर्षणमवकर्षणं वा अभिमानादात्मनः परस्य वा क्रियारम्भात् कुतोऽपि व्यावर्त्तनमिति अप्रकाशो वाऽभिमानादेवेति। 'उण्णए' त्ति उच्छिन्नं नतं-पूर्वप्रवृत्तं नमनमभिमानादुन्नतम्, उच्छिन्नो वा नयो-नीतिरभि- मानादेवोन्नयो नयाभाव इत्यर्थः, 'उन्नामे' त्ति प्रनतस्य मदानुप्रवेशादुन्नमनं 'दुन्नामे' त्ति मदाद्दुष्टं नमनं दुर्नाम इति, इह च स्तम्भादीनि मानकार्यांणि मानवाचका वैते ध्वनय इति।

'माय' त्ति सामान्यं उपध्यादयस्तद्भेदाः, तत्र 'उवहि' त्ति उपधीयते येनासावुपधिः -वञ्चनीय- समीपगमनहेतुर्भावः 'नियडि' त्ति नितरां करणं निकृति- आदरकरणेन परवञ्चनं पूर्वकृतमाया- प्रच्छादनार्थं वा मायान्तरकरणं 'वलए' त्ति येन भावेन वलयमिव वक्र वचनं चेष्टा वा प्रवर्त्तते स भावो वलयं 'गहणे' त्ति परव्यामोहनाय यद्वचनजालं तद्गहनमिव गहनं 'णूमे' त्ति परवञ्चनाय निम्नताया निम्नस्थानस्य वाऽश्रहयणं तन्नूमंति 'कक्के' त्ति कल्कं हंसादिरूपं पापं तन्निमित्तो यो वञ्चनाभिप्रायः स कल्कमेवोच्यते 'कुरूए' त्ति कुत्सितं यथा भवत्येवं रूपयति-विमोहयति यत्तत्कुरूपं भाण्डादिकरम्म मायाविशेष एव।

'जिम्हे' त्ति येन परवञ्चनाभिप्रायेण जैह्मं-क्रियासु मान्द्यमालम्बते स भावो जैहयमेवेति 'किव्विसे' त्ति यतो मायाविशेषाज्जन्मान्तरेऽत्रैव वा भवे किल्बिषः-किल्बिषिको भवति स किल्बिष एवेति, 'आयरणय' त्ति यतो मायाविशेषादादरणं-अब्युपगमं कस्यापि वस्तुनः करोत्यसावादरणं, ताप्रत्ययस्य च स्वार्थिःकत्वाद् आयरणया, आचरणं वा-परप्रतारणाय विविधक्रियाणामाचरणं, 'गूढनया' गूहनं गोपायनं स्वरूपस्य 'वंचणया' वञ्चनं-परस्य प्रतारणं 'पलिउंचणया' प्रतिकुञ्चनं सरलतया प्रवृत्तस्य वचनसय् खण्डनं 'साइजोगे' त्ति अविश्रम्भसम्बन्धः सातिशयेन वा द्रव्येण निरतिशयस्य योगस्तत्प्रतिरूपकरणमित्यर्थः, मायैकार्था वैते ध्वनय इति।

'लोभे' त्ति सामान्यं इच्छादयस्तद्विशेषाः, तत्रेच्छा-अभिलाषमात्रं 'मुच्छा कंखा गेही' त्ति मूर्च्छा-संरक्षणानुबन्धः काङ्क्षा-अप्राप्तार्थाशंसा 'गेहि' त्ति गृद्धि-प्राप्तार्थेष्वासक्ति 'तण्ह' त्ति तृष्णा- प्राप्तार्थानामव्ययेच्छा 'भिज्ज' त्ति अभि-व्याप्तया विषयाणां ध्यानं-तदेकाग्रत्वमभिध्या- पिधानादिवदकारलोपाद्भिध्या 'अभिज्झ' त्ति न भिध्या अभिध्या भिध्यासदृशं भावान्तरं, तत्र दृढाभिनिवेशो भिध्या ध्यानलक्षणत्वात्तस्याः, अदृढाभिनिवेशस्त्वभिध्या चित्तलक्षणत्वात्तस्याः

ध्यानचित्तयोस्त्वयं विशेषः-''जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं'' ति 'आसासणय' त्ति आशंसनं-मम पुत्रस्य शिष्यस्य वा इदमिदं च भूयादित्यादिरूपा आशीः 'पत्थणय' त्ति प्रार्थःनं-परं प्रतीष्टार्थःयाञ्चा 'लालप्पणय' त्ति प्रार्थःनमेव भृसं लपनतः 'कामास' त्ति शब्दरूपप्राप्तिसम्भावना 'भोगास' त्ति गन्धादिप्राप्तिसम्भावना 'जीवितास' त्ति जीवितव्यप्राप्ति- सम्भावना, 'मरणास' त्ति कस्याञ्चिदवस्थायां मरणप्राप्तिसम्भावना, इदं च क्वचिन्न दृश्यते, 'नंदिरागे' त्ति समृद्धौ सत्यां रागो-हर्षो नन्दिरागः, 'पेज्जे' त्ति प्रेम-पुत्रादिविषयः स्नेहः 'दोसे' त्ति अप्रीति कलहः-इह प्रेमहासादिप्रभवं युद्धं, यावत्करणात् 'अब्भक्खाणे पेसुन्ने अरइरई परपरिवाए मायामो से' त्ति दृश्यम्।

अथोक्तानामेवाष्टादशानां प्राणातिपातादिकानां पापस्थानानां ये विपर्यास्तेषां स्वरूपाभिधानायाह- 'अहे' त्यादि, 'अवन्ने' त्ति वधादिविरमणानि जीवोपयोगस्वरूपाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवोपयोगश्चामूर्त्तोऽमूर्त्तत्वाच्च तस्य वधादिविरमणानाममूर्त्तत्वं तस्माच्चावर्णादित्वमिति।

जीवस्वरूपविशेषमेवाधिकृत्याह–'उप्पत्तिय' त्ति उत्पत्तिरेव प्रयोजनं यस्याः सा औत्पत्तिकी, ननु क्षयोपशमः प्रयोजनमस्याः ? सत्यं, स खल्वन्तरङ्गत्वात्सर्वबुद्धिसाधारण इति न विवक्ष्यते, न चान्यच्छस्त्रकर्माभ्यासादिकमपेक्षत इति, 'वेणइय' त्ति विनयो–गुरुशुश्रूषा स कारणमस्यास्तत्प्रधाना वा वैनयिकी, 'कम्मय' त्त अनाचार्यकं कर्म्म साचार्यकं शिल्पं कादाचित्कं वा कर्म शिल्पं तु नित्य- व्यापारः, ततश्च कर्म्मणो जाता कर्म्मजा, 'पारिणामिय' त्ति परि–समन्तान्नमनं परिणामः–सुदीर्घकालपूर्वापरार्थावलोकनादिजन्म आत्मधर्म स कारणं यस्याः सा पारिणामिकी बुद्धिरिति वाक्यशेषः, इयमपि वर्णादिरहिता जीवधर्म्मत्वेनामूर्त्तत्वात्।

जीवधर्माधिकारादवग्रहादिसूत्रं कर्म्मादिसूत्रं च, अमूर्त्ताधिकारादवकाशान्तर सूत्रं अमूर्त्तत्वविपर्ययात्तनुवातादिसूत्राणि चाह–तत्र च 'सत्तमे णं भंते ! उवासंतरे' त्ति प्रथमद्वितीयपृथिव्योर्यदन्तराले आकाशखण्डं तत्प्रथमं तदपेक्षया सप्तमं सप्तम्या अधस्तात्तस्योपरिष्टात्सप्तमस्तनुवातस्तस्योपरि सप्तमो धनवातस्तस्याप्युपरि सप्तमो धनोदधिस्तस्याप्युपरि सप्तमी पृथिवी, तनुवातादीनां च पञ्चवर्णादित्वं पौद्गलिकत्वेन मूर्त्तत्वात्, अष्टस्पर्शत्वं च बादरपरिणामत्वात्, अष्टौ च स्पर्शा शीतोष्णस्निग्ध- रूक्षमृदुकठिनलघुगुरूभेदादिति।

जम्बूद्वीपे इत्यत्र यावत्करणाल्लवणसमुद्रादीनि पदानि वाच्यानि 'जाव वेमाणियावासा' इह यावत्करणादसुरकुमारावासादिपरिग्रहः, ते च भवनानि नगराणि विमानानि तिर्यगलोके तन्नगर्यश्चेति। 'वेउव्वियतेयाइं पडुच्च' त्ति वैक्रियतैजसशरीरे हि बादरपरिणामपुद्गलरूपे ततो बादरत्वात्तयोर्नारकाणामष्टस्पर्शत्वं, 'कम्मगं पडुच्च' त्ति कार्म्मणं हि सूक्ष्मपरिणामपुद्गलरूपमतश्चतुःस्पर्शं, ते च शीतोष्णस्निग्धरूक्षाः।

'धम्मत्थिकाए' इह यावत्करणादेवं दृश्यम्–'अधम्मत्थिकाए आगासत्थकाए पोग्गलत्थिकाए अद्धासमए आवलिया मुहुत्ते' इत्यादि, 'दव्वलेसं पडुच्च' त्ति इह द्रव्यलेश्यावर्णः 'भावलेसं पडुच्च' त्ति भावलेश्या–आन्तरः परिणामः, इहच कृष्णलेश्यादीनि परिग्रहसञ्ज्ञाऽवसानानि अवर्णादीनि जीवपरिणामत्वात्, औदारिकादीनि चत्वारि शरीराणि पञ्चवर्णादिविशेषणानि अष्टस्पर्शानि च बादरपरिणामपुद्गलरूपत्वात्, सर्वत्र च चतुःस्पर्शत्वे सूक्ष्मपरिणामः कारणं अष्टस्पर्शत्वे च बादरपरिणामः कारणं वाच्यमिति, 'सव्वदव्व' त्ति सर्वद्रव्याणि धर्मास्तिकायादीनि 'अत्थेगइया सव्वदव्वा पंचवन्ने' त्यादि बादरपुद्गलद्रव्याणि प्रतीत्योक्तं सर्वद्रव्याणां मध्ये कानिचिधर्मास्तिकायादीनि 'अत्थेगइया सव्वदव्वा पंचवन्ने' त्यादि बादरपुद्गलद्रव्याणि प्रतीत्योक्तं सर्वद्रव्याणां मध्ये कानिचित्पञ्चवर्णादीनीति भावार्थः 'चउफासा' इत्येतच्च पुद्गलद्रव्याण्येव सूक्ष्माणि प्रतीत्योक्तं।

'एगगंधे' त्यादि च परमाण्वादिद्रव्याणि प्रतीत्योक्तं, यदाह परमा- णुद्रव्यमाश्रित्य–

॥१॥ "कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।
एकरस वर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च ॥" इति,

स्पर्शद्वयं च सूक्ष्मसम्बन्धिनां चतुर्णा स्पर्शानामन्यतरदविरुद्धं भवति, तथाहि–स्निग्धोष्णलक्षणं स्निग्धशीतलक्षणं वा रूक्षशीतलक्षणं रूक्षोष्णलक्षणं वेति, 'अवण्णे' त्यादि च धर्मास्तिकायादिद्रव्याण्याश्रित्योक्तं, द्रव्याश्रितत्वात्प्रदेशपर्यवाणां द्रव्यसूत्रानन्तरं तत्सूत्रं, तत्र च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशा–द्रव्यस्य निर्विभागा अंशाः पर्यवास्तु धर्मा, ते चैवंकरणादेवं वाच्याः–

'सव्वपएसा णं भंते ! कइवण्णा ? पुच्छा, गोयमा ! अत्थेगइया सव्वपएसा पंचवन्ना जाव अट्ठफासा'इत्यादि । एवं च पर्यवसूत्रमपि, इह च मूर्त्तद्रव्याणां प्रदेशाः पर्यवाश्च मूर्त्तद्रव्यवत्पञ्चवर्णादयः, अमूर्त्तद्रव्याणां चामूर्त्तद्रव्यवदवर्णदय इति । अतीताद्धादित्रयं चामूर्त्तत्वादवर्णादिकम् । वर्णाद्यधिकारादेवेदवाह–

*मू. (५४४) जीवे णं भंते ! गब्भं वक्कममाणे कतिवन्नं कतिगंधं कतिरसं कतिफासं परिणामं परिणमइ ?, गोयमा ! पंचवन्नं पंचरसं दुगंधं अट्ठफासं परिणामं परिणमइ ।*

**वृ.** 'जीवे ण'मित्यादि, 'परिणामं परिणमइ'त्ति स्वरूपं गच्छति कतिवर्णादिना रूपेण परिणमतीत्यर्थः 'पंचवन्नं'ति गर्भव्युत्क्रमकाले जीवशरीरस्य पञ्चवर्णादित्वात् गर्भव्युत्क्रमणकाले जीवपरिणामस्य पञ्चवर्णादित्वमवसेयमिति ।

अनन्तरं गर्भं व्युत्क्रामन् जीवो वर्णादिभिर्विचित्रं परिणामं परिणमतीत्युक्तम्, अथ विचित्रपरिणाम एव जीवस्य यो भवति तद्दर्शयितुमाह–

*मू. (५४५) कम्मओ णं भंते ! जीवे नो अकम्मओ विभत्तिभावं परिणमइ कम्मओ णं जए नो अकम्मओ विभत्तिभावं परिणमइ ?, हंता गोयमा ! कम्मओ णं तं चेव जाव परिणमइ नो अकम्मओ विभत्तिभावं परिणमइ, सेवं भंते ! सेवं भंतेत्ति ॥*

**वृ.** 'कम्मओ ण'मित्यादि, कर्म्मतः सकाशान्नो अकर्म्मतः–न कर्म्माणि विना जीवो 'विभक्तिभावं' विभागरूपं भावं नारकतिर्यगमनुष्यामरभवेषु नानारूपं परिणाममित्यर्थः 'परिणमति' गच्छति तथा । 'कम्मओ णं जए'त्ति गच्छति तांस्तान्नारकादिभावानिति 'जगत्' जीवसमूहो जीवद्रव्यस्यैव वा विशेषो जङ्गमाभिधानो 'जगन्ति' जङ्गमान्याहु'रिति वचनादिति ।

शतकं–१२ उद्देशकः–५ समाप्तः

## –ः शतकं–१२ उद्देशकः–६ ः–

**वृ.** जगतो विभक्तिभावः कर्म्मत इति पञ्चमोद्देशकान्ते, उक्तं, स च राहुग्रसने चन्द्रस्यापि स्यादिति शङ्कानिरासाय षष्ठोद्देशकमाह, तस्य चेदमादिसूत्रम्–

*मू. (५४६) रायगिहे जाव एवं वयासी–बहुजणे णं भंते ! अन्नमन्नस्स एवमाइक्खति जाव एवं परूवेइ–एवं खलु राहू चंदं गेण्हति एवं० २, से कहमेयं भंते ! एवं ?, गोयमा ! जन्नं से बहुजणे णं अन्नमन्नस्स जाव मिच्छं ते एव माहंसु ।*

*अहं पुण गोयमा ! एवमाइक्खामि जव एवं परूवेमि–एवं खलु राहू देवे महिड्ढिए जाव महेसक्खे वरवत्थधरे वरमल्लधरे वरगंधधरे वराभरणधारी, राहुस्स णं देवस्स नव नामधेज्जा पन्नत्ता, तंजहा–सिंघाडए १ जडिलए २ खंभए ३ खरए ४ दद्दुरे ५ मगरे ६ मच्छे ७ कच्छमे ८ कण्हसप्पे ९ ।*

*राहुस्स णं देवस्स विमाणा पंचवन्ना पन्नत्ता, तंजहा–किण्हा नीला लोहिया हालिद्दा सुक्कला, अत्थि कालए राहुविमाणे खंजणवन्नाभे पन्नत्ते अत्थि नीलए राहुविमाणे लाउयवन्नाभे प० अत्थि लोहिए राहुविमामे मंजिट्ठवन्नाभे पं० अत्थि पीतए राहुविमाणे हालिद्दवन्नाभे पन्नत्ते अत्थि सुक्किलए राहुविमाणे भासरासि वन्नाभे पन्नत्ते । जया णं राहू आगच्छमाणे वा गच्छमाणे वा विउव्वमाणे वा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*परियारेमाणे वा चंदलेस्सं पुरिच्छमेणं आवरेत्ता णं पच्चच्छिमेणं वीतीवयइ तदा णं पुरच्छिमेणं चंदे उवदंसेति पच्चच्छिमेणं आवरेत्ताणं पुरच्छिमेणं वीतीवयति तदा णं पच्चच्छिमेणं चंदे उवदंसेति वा परियारेमाणे चंदलेस्सं पच्चच्छिमेणं आवरेत्ताणं पुरच्छिमेणं वीतीवयति तदा णं पच्चच्छिमेणं चंदे उवदंसेति पुरच्छिमेणं राहू।*

*एवं जहा पुरच्छिमेणं पच्चच्छिमेणं दो आलावगा भणिया एवं दाहिणेणं उत्तरेण य दो आलावगा भा०। एवं उत्तरपुरच्छिमेण दाहिणपच्छच्छिमेण य दो आलावगा भा० दाहिणपुरच्छिमेणं उत्तरपुरच्छिमेणं दो आलावगा भा० एवं चेव जाव तदा णं उत्तरपच्चच्छिमे णं चंदे उवदंसेति दाहिणपुरच्छिमेणं राहू।*

*जदा णं राहू आगच्छमाणे वा गच्छमाणे विउव्व० परियारेमाणे चंदलेस्सं आवरेमाणे २ चिट्ठति तदा णं मणुस्सलोए मणुस्सा वदंति–एवं खलु राहू चंदं गे० एवं०, जदा णं राहू आगच्छमाणे ४ चंदस्स लेस्सं आवरेत्ताणं पासेणं वीइवयइ तदा णं मणुस्सलोए मणुस्सा वदंति–एवं खलु चंदेणं राहुस्स कुच्छी भिन्ना एवं०, जदा णं राहू आगच्छमाणे वा ४। चंदस्स लेस्सं आवरेत्ताणं पच्चोसक्कइ तदा णं मणुस्सलोए मणुस्सा वदंति–एवं खलु राहुणा चंदे वंते, एवं०, जदा णं राहू आगच्छमाणे वा ४ जाव परियारेमाणे वा चंदलेस्सं अहे सपक्खि सपडिदिसिं आवरेत्ताणं चिट्ठति तदा णं मणुस्सलोए मणुस्सा वदंति–एवं खलु राहुणा चंदे घत्थे एवं०।*

*कतिविहे णं भंते! राहू पन्नत्ते? गोयमा! दुविहे राहू पन्नत्ते?, तंजहा–धुवराहू पव्वराहू य, तत्थ णं जे से धुवराहू से णं बहुलपक्खस्स पाडिवए पन्नरसतिभागेणं पन्नरसइभागं चंदस्स लेस्सं आवरेमाणे २ चिट्ठति, तंजहा–पढमाए पढमं भागं बितियाए बितियं भागं जाव पन्नरसेसु पन्नरसमं भागं, चरिमसमये चंदे रत्ते भवति अवसेसे समये चंदे रत्ते य विरत्ते य भवति। तमेव सुक्कपक्खस्स उवदंसेमाणे उव० २ चिट्ठति पढमाए पढमं भागं जाव पन्नरसेसु पन्नरसमं भागं, चरिमसमये चंदे विरत्ते भवइ अवसेसे समये चंदे रत्ते य विरत्ते य भवइ, तत्थ णं जे से पव्वराहू से जहन्नेणं छण्हं मासाणं उक्कोसेणं बायालीसाए मासाणं चंदस्स अडयालीसाए संवच्छराणं सूरस्स।*

**वृ.** 'रायगिहे'इत्यादि, 'मिच्छंते एवमाहसु'त्ति, इह तद्वचनमिथ्यात्वमप्रमाणकत्वात् कुप्रवचन-संस्कारोपनीतत्वाच्च, ग्रहणं हि राहुचन्द्रयोर्विमानापेक्षं, न च विमानयोर्ग्रासकग्रसनीय-सम्भवोऽस्ति आश्रयमात्रत्वान्नरभवनानामिव, अथेदं गृहमनेन ग्रस्तमिति दृष्टस्तद्व्यवहारः?, सत्यं, स खल्वाच्छाद्याच्छादकभावे सति नान्यथा, आच्छादनभावेन च ग्रासविवक्षायामिहापि न विरोध इति। अथ यदत्र सम्यक् तद्दर्शयितुमाह–'अहं पणे'त्यादि ॥ 'खंजणवन्नाभे'त्ति खञ्जनं दीपमलि- कामलस्तस्य यो वर्णस्तद्वदाभा यस्य तत्तथा 'लाउयवन्नाभे'त्ति 'लाउयं'ति तुम्बिका तच्चेहाप्कावस्थं ग्राह्यमिति 'भासरासिवण्णाभे'त्ति भस्मराशिवर्णाभं, ततश्च किमित्याह –

'जया ण'मित्यादि, 'आगच्छमाणे व'त्ति गत्वाऽतिचारेण तत प्रतिनिवर्त्तमानः कृष्णव-र्णादिना विमानेनेति शेषः 'गच्छमाणे व'त्ति स्वभावचारेण चरन्, एतेन च पदद्वयेन स्वाभाविकी गतिरुक्ता, 'विउव्वमाणे व'त्ति विकुर्वणां कुवन् 'परियारेमाणे व'त्ति परिचारयन् कामक्रडां कुर्वन्, एतस्मिन् द्वयेऽतित्वरया प्रवर्त्तमानो विसंस्थुलचेष्टया स्वविमानमसमञ्जसं वलयति, एतच्च द्वयमस्वाभाविकविमानगतिग्रहणायोक्तमिति, 'चंदलेसं पुरच्छिमेणं आवरेत्ताणं'ति स्वविमानेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रविमानावरणे चन्द्रदीप्तेरावृत्तत्वाच्चन्द्रलेश्यां पुरस्तादावृत्य 'पच्चच्छिमेणं वीइवयइ' त्ति चन्द्रापेक्षया परेण यातीत्यर्थः 'पुरच्छिमेणं चंदे उवदंसेइ पच्चच्छिमेणं राहु' त्ति राह्वपेक्षया पूर्वस्यां दिशि चन्द्र आत्मानमुपदर्शयति चन्द्रापेक्षया च पश्चिमायां राहुरात्मानमुपदर्शयीत्यर्थः।

एवंविधस्वभावत्यां च राहोश्चन्द्रस्य यद्भवति तदाह–'जया ण' मित्यादि, 'आवरेमाणे' इत्यत्र द्विर्वचनं तिष्ठतीति क्रियाविशेषणत्वात् 'चंदेण राहुस्स कुच्छी भिन्न' त्ति राहोरंशस्य मध्येन चन्द्रो गत इति वाच्यं, चन्द्रेण राहोः कुक्षिर्भिन्न इति व्यपदिशन्तीति, 'पच्चोसक्कइ' त्ति 'प्रत्यवसप्रपति' व्यावर्त्तते 'वंते' त्ति 'वान्तः परित्यक्तः, 'संपक्खि सपडिदिसं'' ति सपक्षं–समानदिग् यथा भवति सप्रतिदिक्–समानविदिक् च यथा भवतीत्येवं चन्द्रलेश्यां 'आवृत्य' अवष्टभ्य तिष्ठतीत्येवं योगः, अत आवरणमात्रमेवेदं वैस्रसिकं चन्द्रस्य राहुणा ग्रसनं न तु कार्मणमिति।

अथ राहोर्भेदमाह–'कइविहे ण' मित्यादि, यश्चन्द्रस्य सदैव संनिहितः संचरति स ध्रुवराहुः, आह च–

॥१॥ किण्हं राहुविमाणं निच्चं चंदेण होइ अविरहियं।
चउरंगुलमप्पत्तं हेट्ठा चंदस्स तं चरइ ॥ इति

यस्तु पर्व्वणि–पौर्णमास्यामावास्ययोश्चन्द्रादित्ययोरुपरागं करोति स पर्वराहुरिति।

'तत्थ मं जे से धुवराहू' इत्यादि 'पाडिवए' त्ति प्रतिपद आरभ्येति शेषः पञ्चदशभागेन स्वकीयेन करणभूतेन पञ्चदशभागं 'चंदस्स लेस्सं' ति विभक्तिव्यत्ययाच्चन्द्रस्य लेश्यायाः चन्द्रबिम्ब-सम्बन्धिनमित्यर्थः आवृण्वन् २ प्रत्यहं तिष्ठति, 'पढमाए' त्ति प्रथमतिथौ, 'पन्नरसेसु' त्ति पञ्चदशसु दिनेषु अमावास्यायामित्यर्थः 'पन्नरसमं भागं' 'आवरित्ताणं चिट्ठइ' त्ति वाक्यशेषः, एवं च यद्भवति तदाह–'चरिमे' त्यादि, चरमसमये पञ्चदशभागोपेतस्य कृष्णपक्षस्यान्तिमे काले कालविशेषे वा चन्द्रो रक्तो भवति–राहुणोपरक्तो भवति सर्वथाऽप्याच्छादित इत्यर्थः, अवशेषे समये प्रतिप-दादिकाले चन्द्रो रक्तो वा विरक्तो वा भवति, अंशेन राहुणोपरक्तोऽशान्तरेण चानुपरक्तः आच्छादिता- नाच्छादित इत्यर्थः।

'तमेव' त्ति तमेव चन्द्रलेश्यापञ्चदशभागं शुक्लपक्षस्य प्रतिपदादिष्विति गम्यते 'उपदर्शयन् २' पञ्चदशभागेन स्वयमपसरणतः प्रकटयन् प्रकटयंस्तिष्ठति, 'चरिमसमये' त्ति पौर्णमास्यां चन्द्रो विरक्तो भवति सर्वथैव शुक्लीभवतीत्यर्थः सर्वथाऽनाच्छादितत्वादिति, इह चायं भावार्थः– षोडशभागीकृतस्य चन्द्रस्य षोडशो भागोऽवस्थित एवास्ते, ये चान्ये भागास्तान् राहुः प्रतितिथ्येकैकं भागं कृष्णपक्षे आवृणोति शुक्ले तु विमुञ्चतीति, उक्तञ्च ज्योतिष्करण्डके–

॥१॥ "सोलसभागे काऊण उडुवई हायएत्थ पन्नरसं।
तत्तियमेत्ते भागे पुणोवि परिवड्ढई जोण्हा ॥"

इति, इह तु षोडशभाकल्पना न कृता व्यवहारिणां षोडशभागस्यावस्थितस्यानुपलक्षणादिति सम्भावयाम इति, ननु चन्द्रविमानस्य पञ्चैकषष्टिभागन्यूनयोजनप्रमाणत्वाद् राहुविमानस्य च ग्रहविमानत्वेनार्द्धयोजनप्रमाणत्वात्कथं पञ्चदशे दिने चन्द्रविमानस्य महत्त्वेनेतरस्य च लघुत्वेन सर्वावरणं स्यात्? इति, अत्रोच्यते, यदिदं ग्रहविमानानामर्द्धयोजनमिति प्रमाणं तत्प्रायिकं, ततश्च राहोर्ग्रहस्योक्ताधिकप्रमाणमपि विमानं संभाव्यते, अन्ये पुनराहुः–लघीयसोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राहुविमानस्य महता तमिस्नरश्मिजालेन तदाव्रियत इति, ननु कतिपयान् दिवसान् यावद् ध्रुवराहुविमानं वृत्तमुपलभ्यते ग्रहण इव कतिपयांश्च न तथेति किमत्र कारणम् ?

अत्रोच्यते, येषु दिवसेष्वत्यर्थं तमसाऽभिभूयते शशी तेषु तद्विमानं वृत्तमाभाति येषु पुनर्नाभिभूयतेऽसौ विशुद्धयमानत्वात् तेषु न वृत्तमाभाति, तथा चोक्तम्–

॥१॥ "वट्टच्छेओ कइवइदिवसे धुवराहुणो विमाणस्स ।
दीसइ परं न दीसइ जह गहणे पव्वराहुस्स ॥"

॥१॥ आचार्य आह–"अच्चत्थं नहि तमसाऽभिभूयते जं ससी विसुज्झंतो ।
तेण न वट्टच्छेओ गहणे उ तमो तमोबहुलो ॥" इति

'तत्थ णं जे से पव्वे'त्यादि, 'बायालीसाए मासाणं' सार्द्धस्य वर्षत्रयस्योपरि चन्द्रस्य लेश्यामावृत्य तिष्ठतीति गम्यं, सूरस्याप्येवं नवरमुत्कृष्टतयाऽष्टचत्वारिंशता संवत्सराणामिति ।

अथ चन्द्रस्य 'ससि'त्ति यदभिधानं तस्यान्वर्थाभिधानायाह–

**मू. (५४७)** *से केणट्ठेणं भंते ! एवं वुच्चइ–चंदे ससी २ ?, गोयमा ! चंदस्स णं जोइसिंदस्स जोइसरन्नो मियंके विमाणे कंता देवी कंताओ देवीओ कंताइं आसणसयणखंभभंडमत्तोवगरणाइं अप्पणोवि य णं चंदे जोइसिंदे जोइसराया सोमे कंते सुभए पियदंसणे सुरूवे से तेणट्ठेणं०*

**वृ.** 'से केण'मित्यादि, 'मियंके'त्ति मृगचिह्नत्वात् मृगाङ्के विमानेऽधिकरणभूते 'सोमे'त्ति 'सौम्यः' अरौद्राकारो नीरोगो वा 'कंते'त्ति कान्तियोगात् 'सुभए'त्ति सुभगः–सौभाग्ययुक्तत्वाद्वल्लभो जनस्य 'पियदंसणे'त्ति प्रेमकारिदर्शनः, कस्मादेवम् ? अत आह–सुरूपः 'से तेण'मित्यादि अथ तेन कारणेनोच्यते 'ससी'ति सह श्रिया वर्त्तत इति सश्रीः तदीयदेवादीनां स्वस्य च कान्त्यादियुक्तत्वादिति, प्राकृतभाषापेक्षया च ससीति सिद्धम् ।

अथादित्यशब्दस्यान्वर्थभिधानायाह–

**मू. (५४८)** *से केणट्ठेणं भंते ! एवं वुच्चइ–सूरे आइच्चे सूरे० २ ?, गोयमा ! सूरादिया णं समयाइ वा आवलियाइ वा जाव उस्सप्पिणी वा अवसप्पिणीइ वा से तेणट्ठेणं जाव आइच्चे० २*

**वृ.** 'से केण'मित्यादि, 'सूराईय'त्ति सूरः आदि–प्रथमो येषां ते सूरादिकाः, के ? इत्याह– 'समयाइ व'त्ति समयाः–अहोरात्रादिकालभेदानां निर्विभागा अंशाः, तथाहि–सूर्योदयमवधिं कृत्वाऽहोरात्रारम्भकः समयो गण्यते आवलिका मुहूर्त्तादयश्चेति 'से तेण'मित्यादि अथ तेनार्थेन सूर आदित्य इत्युच्यते, आदौ अहोरात्रसमयादीनां भव आदित्य इति व्युत्तेः, त्यप्रत्ययश्चेहार्षत्वादिति

अथ तयोरेवाग्रमहिष्यादिदर्शनायाह–

**मू. (५४९)** *चंदस्स णं भंते ! जोइसिंदस्स जोइसरन्नो कति अग्गमहिसीओ पन्नत्ताओ जहा दसमसए जाव नो चेव णं मेहुणवत्तियं । सूरस्सवि तहेव । चंदमसूरिया णं भंते ! जोइसरायाणो केरिसए कामभोगे पच्चणुब्भवमाणा विहरंति ?*

*गोयमा ! से जहानामाए केइ पुरिसे पढमजोव्वणुट्ठाणबलत्ते पढमजोव्वणुट्ठाणबलट्ठाए भारियाए सद्धिं अचिरवत्तविवाहकज्जे अत्थगवेसणयाए सोलवसासविप्पवासिए से णं तओ लद्धट्ठे कयकज्जे अणहसमग्गे पुनरवि नियगगिहं हव्वमागए कयबलिकम्मे कयकोउयमंगलपायच्छित्ते सव्वालंकारविभूसिए मणुन्नं थालिपागसुद्धं अट्ठारसवंजणाकुल भोयणं भुत्ते समाणे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तंसि तारिसगंसि वासधरंसि वन्नओ महब्बले कुमारे जाव सयणोवयारकलिए ताए तारिसियाए भारियाए सिंगारागारचारुवेसाए जाव कलियाए अनुरत्ताए अविरत्ताए मनानुकूलाए सद्धिं इट्ठे सद्दे फरिसे जाव पंचविहे माणुस्सए कामभोगे पच्चणुब्भवमाणे विहरति।*

*से णं गोयमा! पुरिसे विउसमणकालसमयंसि केरिसयं यासोक्खं पच्चणुब्भवमाणो विहरति ओरालं समणाउसो!, तस्स णं गोयमा! पुरिसस्स कामभोगेहिंतो असुरिंदवज्जियाणं भवणवासीणं देवाणं एत्तो अनंतगुणविसिट्ठतराए चेव कामभोगा, असुरिंदवज्जियाणं भवणवासियाणं देवाणं कामभोगेहिंतो असुरकुमाराणं देवाणं एत्तो अनंतगुणविसिट्ठतराए चेव कामभोगा।*

*असुरकुमाराणं देवाणं कामभोगेहिंतो गहगणनक्खत्ततारारूवाणं जोतिसियाणं देवाणं एत्तो अनंतगुणविसिट्ठतराए चेव कामभोगा, गहगणनक्खत्तजाव कामभोगेहिंतो चंदिमसूरियाणं जोतिसियाणं जोतिसराईणं एत्तो अनंतगुणविसिट्ठयरा चेव कामभोगा, चंदिमसूरियाणं गोयमा जोतिसिंदा जोतिसरायाणो एरिसे कामभोगे पच्चणुब्भवमाणा विरहंति।*

*सेवं भंते! सेवं भंतेत्ति भगवं गोयमे समणं भगवं महावीरं जाव विहरइ॥*

**वृ.** 'चंदस्से'त्यादि, 'पढमजोव्वणुट्ठाणबलत्थे' त्ति 'प्रथमयौवनोत्थाने' प्रथमयौवनोद्गमे यद्बलं–प्राणस्तत्र यस्तिष्ठति स तथा 'अचिरवृत्तविवाहकज्जे' अचिरवृत्तविवाहकार्य 'वन्नओ महाबले' त्ति महाबलोद्देशके वासगृहवर्णको दृश्य इत्यर्थः 'अनुरत्ताए' त्ति अनुरागवत्या 'अविरत्ताए' त्ति विप्रियकरणेऽप्यविरक्तया 'मनानुकूलाए' त्ति पतिमनसोऽनुकूलवृत्तिकया 'विउसमणकालसमयंसि' त्ति व्यवशमनं–पुंवेदविकारोपशमस्तस्य यः कालसमयः स तथा तत्र रतावसान इत्यर्थः। इति भगवता पृष्टो गौतम आह–'ओरालं समणाउसो' त्ति, 'तस्स णं गोयमा पुरिसस्स कामभोगेहिंतो' इहाग्रेतनः 'एत्तो' त्ति शब्दो योज्यते ततश्चैतेभ्य उक्तस्वरूपेभ्यो व्यन्तराणां देवानाम-नन्तगुणविशिष्टतया चैव कामभोगा भवन्तीति, क्वचित्तु एत्तोशब्दो नाभिधीयते

शतकं–१२ उद्देशकः–६ समाप्तः

## –: शतकं–१२ उद्देशकः–७ :–

**वृ.** अनन्तरोद्देशक चन्द्रादीनामतिशयसौख्यमुक्तं, ते च लोकस्यांशे भवन्तति लोकांशे जीवस्य जन्ममरणवक्तव्यताप्ररूपणार्थः सप्तमोद्देशक उच्यते, तस्य चेदमादिसूत्रम्–

**मू. (५५०)** *तेणं कालेणं २ जाव एवं वयासी–केमहालए णं भंते! लोए पन्नत्ते?, गोयमा महतिमहालए लोए पन्नत्ते, पुरच्छिमेणं असंखेज्जाओ जोयणकोडाकोडीओ दाहिणेणं असंखिज्जाओ एवं चेव एवं पच्चच्छिमेणवि एवं उत्तरेणवि एवं उड्ढंपि अहे असंखेज्जाओ जोयणकोडाकोडीओ आयामविक्खंभेणं।*

*एयंसि णं भंते! एमहालगंसि लोगंसि अत्थि केइ परमाणुपोग्गलमेत्तेवि पएसे जत्थ णं अयं जीवे न जाए वा न मए वावि?, गोयमा! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ एयंसि णं एमहालगंसि लोगंसि नत्थि केइ परमाणुपोग्गलमेतेतवि पएसे जत्थ णं अयं जीवे न जाए वा न मए वावि? गोयमा! से जहानामए–केइ पुरिसे अयासयस्स एगं महं अयावयं करेज्जा, से णं तत्थ जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं अयासहस्सं पक्खिवेज्जा ताओ णं तत्थ पउरगोयराओ पुरपाणियाओ जहन्नेणं एगाहं वा बियाहं वा तियाहं वा उक्कोसेणं छम्मासे परिवसेज्जा।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अत्थि णं गोयमा ! तस्स अयावयस्स केई परमाणुपोग्गलमेत्तेवि पएसे जे णं तासिं अयाणं उच्चारेण वा पासवणेण वा खेलेण वा सिंघाणएण वा वंतेण वा पित्तेण वा पूएण वा सुक्केण वा सोणिएण वा चम्मेहिं वा रोमेहिं वा सिंगेहिं वा खुरेहिं वा नहेहिं वा अनाकंतपुव्वे भवइ ?*

*भगवं ! नो तिणट्ठे समट्ठे, होज्जावि णं गोयमा ! तस्स अयावयस्स केई परमाणुपोग्गलमेत्तेवि पएसे जे णं तासिं अयाणं उच्चारेण वा जाव नहेहिं वा अणक्कंतपुव्वे नो चेव णं एयंसि एमहालगंसि लोगंसि लोगस्स य सासयं भावं संसारस्स य अनादिभावं जीवस्स य निच्चभावं कम्मबहुत्तं जम्मणमरणबाहुल्लं च पडुच्च नत्थि केइ परमाणुपोग्गलमेत्तेवि पएसे जत्थ णं अयं जीवे न जाए वा न मए वावि, से तेणट्ठेणं तं चेव जाव न मए वावि ।*

**वृ.** 'तेण'मित्यादि, 'परमाणुपोग्गलमेत्तेवि'त्ति इहापि सम्भावनायां 'अयासयस्स'त्ति षष्ठयाश्चतुर्थ्यःत्वाद् अजाशताय 'अयावयं'ति अजाव्रजम् अजावाटकमित्यर्थः 'उक्कोसेणं अयासहस्सं पक्खिवेज्ज'त्ति यदिहाजाशतप्रायोग्ये वाटके उत्कर्षेणाजासहस्रप्रक्षेपणमभिहितं तत्तासामति- सङ्कीर्णतयाऽवस्थानख्यानार्थःमिति, 'पउमरगोयराओ पउरपाणीयाओ'त्ति प्रचुरचरणभूमयः प्रचुरपानीयाश्च, अनेन च तासां प्रचुरमूत्रपुरीषसम्भवो बुभुक्षापिपासाविरहेण सुस्थतया चिरंजीवित्वं चोक्तं 'नहेहि व'त्ति नखाः—खउराग्रभागास्तैः 'नो चेव णं एयंसि एमहालयंसि लोगंसि' इत्यस्य 'अत्थिकेइ परमाणुपोग्गलमेत्तेवि पएसे' इत्यादिना पूर्वोक्ताभिलापेन सम्बन्धः महत्वाल्लोकस्य, कथमिदमिति चेदत आह—

'लोगस्से'त्यादि क्षयिणो ह्येवं न संभवतीत्यत उक्तं लोकस्य शाश्वतभावं प्रतीत्येति योगः, शाश्वतत्वेऽपि लोकस्य संसारस्य सादित्वे नैवं स्यादित्यनादित्वं तस्योक्तं, नानाजीवापेक्षया संसारस्यानादित्वेऽपि विवक्षितजीवस्यानित्यत्वे नोक्तोऽर्थः स्यादतो जीवस्य नित्यत्वमुक्तं, नित्यत्वेऽपि जीवस्य कर्माल्पत्वे तथाविधसंसरणाभावन्नोक्तं वस्तु स्यादतः कर्म्मबाहुल्यमुक्तं, कर्म्मबाहुल्येऽपि जन्मादेरल्पत्वे नोक्तोऽर्थः स्यादिति जन्मादिबाहुल्यमुक्तमिति ।

एतदेव प्रपञ्चयन्नाह—

**मू. (५५१)** *कति णं भंते ! पुढवीओ पन्नत्ताओ ?, गोयमा ! सत्त पुढवीओ पन्नत्ताओ जहा पढमसए पंचमउद्देसए तहेव आवासा ठावेयव्वा जाव अनुत्तरविमाणेत्ति जाव अपराजिए सव्वट्ठसिद्धे । अयन्नं भंते ! जीवे इमीसे रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु एगमेगंसि निरयावासंसि पुढविकाइयत्ताए जाव वणस्सइकाइयत्ताए नरगत्ताए नेरइयत्ताए उववन्नपुव्वे ?, हंता गोयमा ! असइं गोयमा ! अदुवा अनंतखुत्तो, अयन्नं भंते ! जीवे सक्करप्पभाए पुढवीए पणवीसा एवं जहा रयणप्पभाए तहेव दो आलावगा भाणियव्वा, एवं जाव धूम्प्पभाए ।*

*अयन्नं भंते ! जीवे तमाए पुढवीए पंचूणे निरयावाससयसहस्से एगमेगंसि सेसं तं चेव, अयन्नं भंते ! जीवे अहेसत्तमाए पुढवीए पंचसु अनुत्तरेसु महतिमहालएसु महानिरएसु एगमेगंसि निरयावासंसि सेसं जहा रयणप्पभाए, अयन्नं भंते ! जीवे चोसट्ठीए असुरकुमारावाससयसहस्सेसु एगमेगंसि असुरकुमारावासंसि पुढविकाइयत्ताए जाव वणस्सइकाइयत्ताए देवत्ताए देवीत्ताए आसणसयणभंडमत्तोवगरणत्ताए उववन्नपुव्वे ?, हंता गोयमा ! जाव अनंत खुत्तो ।*

*सव्वजीवावि णं भंते ! एवं चेव, एवं थणियकुमारेसु, नाणत्तं आवासेसु, आवासा पुव्वभ-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णिया, अयन्नं भंते! जीवे असंखेज्जेसु पुढविक्काइयावाससयसहस्सेसु एगमेगंसि पुढविकाइयावासंसि पुढविकाइयत्ताए जाव वण० उववन्नपुव्वे ?, हंता गोयमा ! जाव अनंत खुत्तो एवं सव्वजीवावि एवं जाव वणस्सइकाइएसु । अयन्नं भंते ! जीवे असंखेज्जेसु बेंदियावाससयसहस्सेसु एगमेगंसि बेंदियावासंसि पुढविकाइयत्ताए जाव वणस्सइकाइयत्ताए बेइंदियत्ताए उववन्नपुव्वे ?, हंता गोयमा ! जाव खुत्तो, सव्वजिवावि णं एवं चेव एवं जाव मणुस्सेसु, नवरं तांदियएसु जाव वणस्सइकाइयत्ताए तेंदियत्ताए चउरिंदिएसु चउरिंदियत्ताए पंचिंदियतिरिक्खजोणिएसु पंचिंदियतिरिक्खजोणिएसु पंचिंदियतिरिक्खजोणियत्ताए मणुस्सेसु मणुस्सत्ताए सेसं जहा बेंदियाणं

वाणमंतरजोइसियसोहम्मीसाणेसु य जहा असुरकुमाराणं, अयन्नं भंते ! जीवे सणंकुमारे कप्पे बारससु विमाणावाससयसहस्सेसु एगमेगंसि विमाणियावासंसि पुढविकाइयत्ताए सेसं जहा असुरकुमाराणं जाव अनंतखुत्तो, नो चेव णं देवीत्ताए, एवं सव्वजीवावि ।

एवं जाव आणयपाणएसु, एवं आरणच्चुएसुवि, अयन्नं भंते ! जीवे तिसुवि अट्ठारसुत्तरेसु गेविज्जविमाणावाससयेसु एवं चेव, अयन्नं भंते ! जीवे पंचसु अनुत्तरविमाणेसु एगमेगंसि अनुत्तरविमाणंसि पुढवि तहेव जाव अनंतखुत्तो नो चेव णं देवत्ताए वा देवीत्ताए वा एवं सव्वजीवावि

अयन्नं भंते ! जीवे सव्वजीवाणं माइत्ताए पियत्ताए भाइत्ताए भगिनित्ताए भज्जत्ताए पुत्तत्ताए धूयत्ताए सुण्हत्ताए उववन्नपुव्वे ?, हंता गोयमा ! असइं अदुवा अनंतखुत्तो, सव्वजीवावि णं भंते ! इमस्स जीवस्स माइत्ताए जाव उववन्नपुव्वे ?, हंता गोयमा ! जाव अनंतखुत्तो, अयन्नं भंते ! जीवे सव्वजीवाणं अरित्ताए वेरियत्ताए घायकत्ता वहगत्ताए पडिनीयत्ताए पच्चामित्तत्ताए उववन्नपुव्वे ?, हंता गोयमा ! जीवा अनंतखुत्तो, सव्वजीवावि णं भंते ! एवं चेव ।

अयन्नं भंते ! जीवे सव्वजीवाणं रायत्ताए जुवरायत्ताए जाव सत्थवाहत्ताए उववन्नपुव्वे हंता गोयमा ! असतिं जाव अनंतखुत्तो, सव्वजीवाणं एवं चेव ।

अयन्नं भंते ! जीवे सव्वजीवाणं दासत्ताए पेसत्ताए भयगत्ताए भाइल्लगत्ताए भोगपुरिसत्ताए सीसत्ताए वेसत्ताए उववन्नपुव्वे ?, हंता गोयमा ! जाव अनंतखुत्तो, एवं सव्वजीवावि अनंतखुत्तो

सेवं भंते ! सेवं भंतेत्ति जाव विहरइ ।

**वृ.** 'कइ ण'मित्यादि, 'नरगत्ताए'त्ति नरकावासपृथिवीकायिकतयेत्यर्थः 'असइं'ति असकृद्—अनेकशः 'अदुव'त्ति अथवा 'अनंतखुत्तो'त्ति अनन्तकृत्वः—अनन्तवारान् 'असंखेज्जेसु पुढविकाइयावाससयसहस्सेसु'त्ति इहासङ्ख्यातेषु पृथिवीकायिकावासेषु एतावतैव सिद्धेर्यच्छतसहस्रग्रहणं तत्तेषामतिबहुत्वख्यापनार्थं, नवरं 'तेइंदिएसु'इत्यादि त्रीन्द्रियादिसूत्रेषु द्वीन्द्रियसूत्रात् त्रीन्द्रियचतुरिन्द्रियेत्यादिनैव विशेष इत्यर्थः । 'नो चेच णं देवीत्ताए'त्ति ईशानान्तेष्वेव देवस्थानेषु देव्य उत्पद्यन्ते सनत्कुमारादिषु पुनर्नेतिकृत्वा 'नो चेव णं देवीत्ताए' इत्युक्तं 'नो चेव णं देवत्ताए देवीत्ताए व'त्ति अनुत्तरविमानेष्वनन्तकृत्वो देवा नोत्पद्यन्ते देव्यश्च सर्वथैवेति 'नो चेव ण'मित्याद्युक्तमिति, 'अरित्ताए'त्ति सामान्यतः शत्रुभावेन 'वेरियत्ताए'ति वैरिकः—शत्रुभावानुबन्धयुक्तस्तत्तया 'घायगत्ताए'त्ति मारकतया 'वहगत्ताए'त्ति व्यधकतया ताडकतयेत्यर्थः 'पडिनीयत्ताए'त्ति प्रत्यनीकतया—कार्योपघातकतया 'पच्चामित्तत्ताए'त्ति अमित्रसहायतया ।

'दासत्ताए'त्ति गृहदासीपुत्रतया 'पेसत्ताए'त्ति प्रेष्यतया—आदेश्यतया 'भयगत्ताए'त्ति

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भृतकतया दुष्कालादौ पोषिततया 'भाइल्लगत्ताए'त्ति कृष्यादिलाभस्य भागग्राहकत्वेन 'भोगपुरिसत्ताए'त्ति अन्यैरुपार्जितार्थानां भोगकारिनरतया 'सीसत्ताए'त्ति शिक्षणीयतया 'वेसत्ताए'त्ति द्वेष्यतयेति ।

शतकं-१२ उद्देशकः-७ समाप्तः

## -: शतकं-१२ उद्देशकः-८ :-

**वृ.** सप्तमे जीवानामुत्पत्तिश्चिन्तिता, अष्टमेऽपि सैव भङ्ग्यन्तरेण चिन्त्यते, इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (५५२)** *तेणं कालेणं तेणं समएणं जाव एवं वयासी-देवे णं भंते ! महड्ढीए जाव महेसक्खे अनंतरं चयं चइत्ता बिसरीरेसु नागेसु उववज्ञेज्ञा हंता गोयमा ! उववज्ञेज्ञा ।*

*से णं तत्थ अच्चियवंदियपूइयसक्कारियसम्माणिए दिव्वे सच्चे सच्चोवाए संनिहियपाडिहेरे यावि भवेज्ञा ?, हंता भवेज्ञा । से णं भंते ! तओहिंतो अनंतरं उव्वट्टित्ता सिज्झेज्ञा बुज्झेज्ञा जाव अंतं करेज्ञा ?, हंता सिज्झिज्ञा जाव अंतं करेज्ञा ।*

*देवे णं भंते ! महड्ढीए एवं चेव जाव बिसरीरेसु मणीसु उववज्ञेज्ञा, एवं चेव जहा नागाणं देवे णं भंते ! महड्ढीए जाव बिसरीरेसु रुक्खेसु उववज्ञेज्ञा ?, हंता उववज्ञेज्ञा एवं चेव, नवरं इमं नाणत्तं जाव सन्निहियपाडिहेरे लाउल्लोइयमहित्ते यावि भवेज्ञा ?, हंता भवेज्ञा सेसं तं चेव जाव अंतं करेज्ञा ।*

**वृ.** 'तेण'मित्यादि, 'बिसरीरेसु'त्ति द्वे शरीरे येषां ते द्विशरीरास्तेषु, ये हि नागशरीरं त्यक्त्वा मनुष्यशरीरमवाप्य सेत्स्यन्ति ते द्विशरीरा इति, 'नागेसु'त्ति सर्पेषु हस्तिषु वा 'तत्थ'त्ति नागजन्मनि यत्र वा क्षेत्रे जातः 'अच्चिए'त्यादि, इहार्चितादिपदानां पञ्चानां कर्म्मधारयः तत्र चार्चितश्चन्दनादिना वन्दितः स्तुत्या पूजितः पुष्पादिना सत्कारितो-वस्त्रादिना सन्मानितः प्रतिपत्तिविशेषेण 'दिव्वे'त्ति प्रधानः 'सच्चे'त्ति स्वप्नादिप्रकारेण तदुपदिष्टस्यावितथत्वात् 'सच्चोवाए'त्ति सत्यावपातः सफलसेव इत्यर्थः, कुत एतत् ? इत्याह-

'सन्निहियपाडिहेरे'त्ति सन्निहितं-अदूरवर्त्ति प्रातिहार्यं पूर्वसङ्गतिकादिदेवताकृतं प्रतिहारकर्म यस्य स तथा 'मणीसु'त्ति पृथिवीवाकायविकारेषु 'लाउल्लोइयमहिए'त्ति 'लाइयं'ति छगणादिना भूमिकायाः संमृष्टीकरणं 'उल्लोइयं'ति सेटिकादिना कुड्यानां धवलनं एतेनैव द्वयेन महितो यः स तथा, एतच्च विशेषणं वृक्षस्य पीठापेक्षया, विशिष्टवृक्षा हि बद्धपीठा भवन्तीति ।

**मू. (५५३)** *अह भंते ! गोलंगूलवसभे कुक्कडवसभे मंडुक्कवसभे एएणं निस्सीला निव्वया निग्गुणा निम्मेरा निप्पच्चक्खाणपोसहोववासा कालमासे कालं किच्चा इमीसे रयणप्पभाए पुढवीए उक्कोसेणं सागरोवमट्ठितीयंसि नरगंसि नेरइयत्ताए उववज्ञेज्ञा ।*

*समणे भगवं महावीरे वागरेइ-उववज्ञमाणे उववन्नेत्ति वत्तव्वं सिया ।*

*अह भंते ! सीहे वग्घे जहा उस्सप्पिणीउद्देसए जाव परस्सरे एए णं निस्सीला एवं चेव जाव वत्तव्वं सिया, अह भंते ! ढंके कंके विलए मग्गुए सिखीए, एए णं निस्सीला०, सेसं तं चेव जाव वत्तव्वं सिया । सेवं भंते ! सेवं भंते ! जाव विहरइ ।*

5 6

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'गोलंगूलवसभे' त्ति गोलाङ्गूलानां–वानराणां मध्ये महान् स एव वा विदग्धो विदग्धपर्यायत्वाद्वृषभशब्दस्य, एवं कुर्कुटवृषभोऽपि, एवं मण्डूकवृषभोऽपि, 'निस्सील' त्ति समाधानरहिताः 'निव्वय' त्ति अणुव्रतरहिताः 'निग्गुण' त्ति गुणव्रतैः क्षमादिभिर्वा रहिताः 'नेरइयत्ताए उववज्जेज्ञा' इति प्रश्नः, इह च 'उववज्जेज्ञा' इत्येतदुत्तरं, तस्य चासम्भवमाशङ्कमानस्तत्परिहारमाह–

'समणे' इत्यादि, असम्भवश्चैवं–यत्र समये गोलाङ्गूलादयो न तत्र समये नारकास्ते अतः कथं ते नारकतयोत्पद्यन्ते इति वक्तव्यं स्याद् ?, अत्रोच्यते–श्रमणो भगवान् महावीरो न तु जमाल्यादि एवं व्याकरोति–यदुत उत्पद्यमानमुत्पन्नमिति वक्तव्यं स्यात्, क्रियाकालनिष्ठाकालयोरभेदाद्, अतस्ते गोलाङ्गूलप्रभृतयो नारकतयोत्पत्तुकामा नारका एवेतिकृत्वा सुष्ठूच्यते 'नेरइयत्ताए उववज्जेज्ज' त्ति, 'उस्सप्पिणिउद्देसए' त्ति सप्तमशतस्य षष्ठ इति ॥

शतकं–१२, उद्देशकः–८ समाप्तः

## –: शतकं–१२ उद्देशकः–९ :–

**वृ.** अष्टमोद्देशके देवस्य नागादिषूत्पत्तिरुक्ता नवमे तु देवा एव प्ररूप्यन्त इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

**मू. (५५४)** *कइविहा णं भंते ! देवा पन्नत्ता ?, गोयमा ! पंचविहा देवा पन्नत्ता, तंजहा–भवियदव्वदेवा १ नेरदेवा २ धम्मदेवा ३ देवाहिदेवा ४ भावदेवा ५, से केणट्ठेणं भंते ! एवं वुच्चइ भवियदव्वदेवा भवियदव्वदेवा ?, गोयमा ! जे भविए पंचिंदियतिरिक्खजणिए वा मणुस्से वा देवेसु उववज्जित्तए से तेणट्ठेणं गोयमा ! एवं वुच्चइ भवियदव्वदेवा २ ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ नरदेवा नरदेवा ?, गोयमा ! जे इमे रायाणो चाउरंतचक्कवट्टी उप्पन्नसमत्तचक्करयणप्पहाणा नवनीहीपइणो समिद्धकोसा बत्तीसं रायवरसहस्सुजायमग्गा सागरवरमेहलाहिवणो मणुस्सिंदा से तेणट्ठेणं जाव नरदेवा २ ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ धम्मदेवा धम्मदेवा ?, गोयमा ! जे इमे अनगारा भगवंतो ईरियासमिया जाव गुत्तबंभयारी से तेणट्ठेणं जाव धम्मदेवा २ ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ देवाधिदेवा देवाधिदेवा ?, गोयमा ! जे इमे अरिहंता भगवंतो उप्पन्ननाणदंसणधरा जाव सव्वदरिसी से तेणट्ठेणं जाव देवाधिदेवा २ ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ–भावदेवा भावदेवा ?, गोयमा ! जे इमे भवणवइवाणमंतरजोइसवेमाणिया देवा देवगतिनामगोयाइं कम्माइं वेदेंति से तेणट्ठेणं जाव भावदेवा ।*

**वृ.** 'कइविहा ण' मित्यादि, दीव्यन्ति–क्रीडां कुर्वन्ति दीव्यन्ते वा–स्तूयन्ते वाऽऽराध्यतयेति देवाः 'भवियदव्वदेव' त्ति द्रव्यभूता देवा द्रव्यदेवाः, द्रव्यता चाप्राधान्याद्भूतभावित्वाद्भाविभावत्वाद्वा, तत्राप्राधान्याद्देवगुणशून्या देवा द्रव्यदेवा यथा साध्वाभासा द्रव्यसाधवः, भूतभावपक्षे तु भूतस्य देवत्वपर्यायस्य प्रतिपन्नकारणा भावदेवत्वाच्च्युता द्रव्यदेवाः, भाविभावपक्षे तु भाविनो देवत्वपर्यायस्य योग्या देवतयोत्पत्स्यमाना द्रव्यदेवाः, तत्र भाविभावपक्षपरिग्रहार्थमाह–भव्याश्च ते द्रव्यदेवाश्चेति भव्यद्रव्यदेवाः । 'नरदेव' त्ति नराणां मध्ये देवा–आराधयाः क्रिडाकान्त्यादियुक्ता वा नराश्च ते देवाश्चेति वा नरदेवाः, 'धम्मदेव' त्ति धर्मेण–श्रुतादिना देवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मप्रधाना वा देवा धर्मदेवाः, 'देवाइदेव'त्ति देवान् शेषानतिक्रान्ताः पारमार्थिःकदेवत्वयोगाद्देवा देवातिदेवाः, 'देवाहिदेव'त्ति क्वचिद्दृश्यते तत्र च देवानामधिकाः पारमार्थिःकदेवत्वयोगाद् देवा देवाधिदेवाः, 'भावदेव'त्ति भावेन– देवगत्यादिकर्मोदयजातपर्यायेण देवा भावदेवाः ।

'जे भविए' इत्यादि, इह जातौ एकवचनमतो बहुवचनार्थे व्याख्येयं, ततश्च ये भव्याः–योग्याः पञ्चेन्द्रियतिर्यग्योनिका वा मनुष्या वा देवेषूत्पत्तुं ते यस्माद्भाविदेवभावा इति गम्यं अथ 'तेनार्थेन' तेन कारणेन हे गौम ! तान् प्रत्येवमुच्यते–भव्यद्रव्यदेवा इति ।

'जे इमे' इत्यादि, 'चाउरंतचक्कवट्टि'त्ति चतुरन्ताया भरतादिपृथिव्या एते स्वामिन इति चातुरन्ताः चक्रण वर्त्तनशीलत्वाच्चक्रवर्त्तिनस्ततः कर्म्मधारयः, चतुरन्तग्रहणेन च वासुदेवादीनां व्युदासः, त यस्मादिति वाक्यशेषः 'उप्पन्नसमत्तचक्करयणप्पहाण'त्ति आर्षत्वान्निर्देशस्योत्पन्नं समस्तरत्नप्रधानं चक्र येषां ते तथा 'सागरवरमेहलाविहइणो'त्ति सागर एव वरा मेखला–काञ्ची यस्याः सा सागरवरमेखला–पृथ्वी तस्या अधिपतयो ये ते तथा, सागरमेखलान्तपृथिव्यधिपतय इति भावः, 'से तेणट्ठेणं'ति अथ 'तेनार्थेन' तेन कारणेन गौतम ! तान प्रत्येवमुच्यते–नरदेवा इति ।

'जे इमे' इत्यादि, ये इमेऽनगारा भगवन्तस्ते यस्मादिति वाक्यशेषः ईर्यासमिति इत्यादि 'से तेणट्ठेणं'ति अथ तेनार्थेन गौतम ! तान् प्रत्येवमुच्यते धर्मदेवा इति । 'जे इमे' इत्यादि, ये इमेऽर्हन्तो भगवन्तस्ते यस्मादुत्पन्नज्ञानदर्शनधरा इत्यादि 'से तेणट्ठेणं'ति अथ तेनार्थेन तान् प्रति गौतम एवमुच्यते–देवातिदेवा इति । 'जे इमे'इत्यादि, ये इमे भवनपतयस्ते यस्माद्देवगतिनागोत्रे कर्मणी वेदयन्ति अनेनार्थेन तान् प्रत्येवमुच्यते–भावदेवा इति । एवं देवान् प्ररूप्य तेषामेवोत्पादं प्ररूपयन्नाह–

*मू. (५५५) भवियदव्वदेवा णं भंते ! कओहिंतो उववज्जंति ? किं नेरइएहिंतो उववज्जंति तिरिक्ख० मणुस्स० देवेहिंतो उववज्जंति ?, गोयमा ! नेरइएहिंतो उववज्जंति तिरि० मणु० देवेहिंतोवि उववज्जंति भेदो जहा वक्कतीए सव्वेसु उववाएयव्वा जाव अणुत्तरोववाइयत्ति । नवरं असंखेज्जवासाउय अकम्मभूमगअंतर दीवसव्वट्ठीसिद्धवज्ज जाव अपराजियदेवे-हिंतोवि उववज्जंति, नो सव्वट्ठसिद्धदेवेहिंतो उववज्जंति । नरदेवा णं भंते ! कओहिंतो उववज्जं–ति ? किं नेरतिए० पुच्छा, गोयमा ! नेरतिएहिंतो वि उववज्जंति नो तिरि० नो मणु० देवेहिंतोवि उववज्जंति ।*

*जइ नेरइएहिंतो उववज्जंति किं रयणप्पभापुढविनेरइएहिंतो उववज्जंति जाव अहे सत्तमापुढविनेरइएहिंत उववज्जंति ?, गोयमा ! रयणप्पभापुढविनेरइएहिंतो उववज्जंति नो सक्कर-जाव नो अहेसत्तमापुढविनेरइएहिंतो उववज्जंति । जइ देवेहिंतो उववज्जंति किं भवणवासिदेवेहिंतो उववज्जंति वाणमंतर० जोइसिय० वेमाणियदेवेहिंतो उववज्जंति ?, गोयमा ! भवणवासिदेवेहिंतोवि उववज्जंति वाणमंतर एवं सव्वदेवेसु अववाएयव्वा वक्कतीभेदेणं जाव सव्वट्ठसिद्धत्ति ।*

*धम्मदेवा णं भंते ! कओहिंतो उववज्जंति वाणमंतर एवं सव्वदेवेसु उववाएयव्वा वक्कतीभेदेणं जाव सव्वट्ठसिद्धत्ति, नवरं तमा अहेसत्तमाए नो उववाओ असंखिज्जवासाउयअकम्मभूमग-अंतरदीवगवज्जेसु ।। देवानुधिदेवाणं भंते ! कत्तोहिंतो उवज्जंति किं नेरइएहिंतो उववज्जंति ? पुच्छा, गोयमा ! नेरइएहिंतो उववज्जंति नो तिरि० नो मणु० देवेहिंतोवि उववज्जंति ।*

*जइ नेरइएहिंतो एवं तिसु पुढवीसु उववज्जंति संसाओ खोडेयव्वाओ, जइ देवेहिंतो,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वेमाणिएसु सव्वेसु उववज्जंति जाव सव्वट्ठसिद्धत्ति, सेसा खोडेयव्वा ।*

*भावदेवा णं भंते ! कओहिंतो उववज्जंति ?, एवं जहा वक्कतीए भवणवासीणं उववाओ तहा भाणियव्वो ।*

**वृ.** 'भवियदव्वदेवा णं भंते !' इत्यादि, 'भेदो'त्ति 'जइ नेरइएहिंतो उववज्जंति किं रयणप्पभापुढविनेरइएहिंतो' इत्यादि भेदो वाच्यः, 'जहा वक्कंतीए'त्ति यथा प्रज्ञापनाषष्ठपदे, नवरमित्यादि, 'असंखेज्जवासाउय'त्ति असङ्ख्यातवर्षायुष्काः कर्म्मभूमिजाः पञ्चेन्द्रियतिर्यग्मनुष्या असङ्ख्यातवर्षायुषामकर्म्मभूमिजादीनां साक्षादेव गृहीतत्वात् एतेभ्यश्चोद्‌वृत्ता भव्यद्रव्यदेवा न भवन्ति, भावदेवेष्वेव तेषामुत्पादात्, सर्वार्थःसिद्धिकास्तु भव्यद्रव्यसिद्ध एव भवन्तीत्यत एतेभ्योऽन्यो ऽर्वे भव्यद्रव्यदेवतयोत्पादनीया इति, धर्म्मदेवसूत्रे 'नवर'मित्यादि, 'तम'त्ति षष्ठपृथिवी तत उद्‌वृत्तानां चारित्रं नास्ति, तथाऽधःसप्तम्यास्तेजसो वायोरसङ्ख्येयवर्षायुष्ककर्मभूमि-जेभ्योऽकर्मभूमिजेभ्योऽन्तरद्वीपजेभ्यश्चोद्‌वृत्तानां मानुषत्वाभावान्न चारित्रं, ततश्च न धर्म्मदेवत्वमिति

देवाधिदेवसूत्रे 'तिसु पुढवीसु उववज्जंति'त्ति तिसृभ्यः पृथिवीभ्य उद्‌वृत्ता देवातिदेवा उत्पद्यन्ते 'सेसाओ खोडेयव्वाओ'त्ति शेषाः पृथिव्यो निषेधयितव्या इत्यर्थः ताभ्य उद्‌वृत्तानां देवाधिदेव-त्वस्याभावादिति । 'भावदेवा ण'मित्यादि, इह च बहुतरस्थानेभ्य उद्‌वृत्ता भवनवासितयोत्पद्यन्ते असञ्ज्ञिनामपि तेषूत्पादाद् अत उक्तं 'जहा वक्कंतीए भवणवासीणं उववाओ'इत्यादि ॥ अथ तेषामेव स्थितिं प्ररूपयन्नाह–

**मू. (५५६)** *भवियदव्वदेवाणं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं ।*

*नरदेवाणं पृच्छा गोयमा ! जहन्नेणं सत्त वाससयाइं उक्कोसेणं चउरासीई पुव्वसयसहस्साइं*

*धम्मदेवाणं भंते ! पुच्छा, गोयमा ! जहन्नेणं अतोमुहुत्तं उक्कोसेणं देसूणा पुव्वकोडी, देवाधिदेवाणं पुच्छा गोयमा ! जहन्नेणं बावत्तरिं वासाइं उक्कोसेणं चउरासीइं पुव्वसयसहस्साइं ।*

*भावदेवाणं पुच्छा गोयमा ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं ।*

**वृ.** 'भवियदव्वदेवाण'मित्यादि, 'जहन्नेणं अंतोमुहुत्तं' ति अन्तर्मुहूर्त्तायुषः पञ्चेन्द्रियतिरश्चो देवेषूत्पादाद्भव्यद्रव्यदेवस्य जघन्याऽन्तर्मुहूर्त्तस्थिति, 'उक्कोसेणं तिन्नि पलिओवमाइं'ति उत्तरकुर्वादिमनुजादीनां देवेष्वेवोत्पादात् ते च भव्यद्रव्यदेवाः तेषां चोत्कर्षतो यथोक्ता स्थितिरिति । 'सत्त वाससयाइं'ति यथा ब्रह्मदत्तस्य 'चउरासीपुव्वसयसहस्साइं'ति यथा भरतस्य ।

धर्मदेवानां 'जहन्नेणं अंतोमुहुत्तं' ति योऽन्तर्मुहूर्त्तविशेषायुश्चारित्रं प्रतिपद्यते तदपेक्षमिदं, 'उक्कोसेणं देसूणा पुव्वकोडी' ति तु यो देशोनपूर्वकोट्यायुश्चारित्रं प्रतिपद्यते तदपेक्षमिति, ऊनता च पूर्वकोट्या अष्टाभिर्वर्षैः अष्टवर्षस्यैव प्रव्रज्यार्हत्वात्, यच्च षड्वर्षस्त्रिवर्षो वा प्रव्रजितोऽतिमुक्तको वैरस्वामी वा तत्कादाचित्कमिति न सूत्रावतारीति ।

देवाधिदेवानां 'जहन्नेणं बावत्तरिं वासाइं'ति श्रीमन्महावीरस्येव 'उक्कोसेणं छउरा सीइ पुव्वसयसहस्साइं'ति ऋषभस्वामिनो यथा –

भावदेवानां 'जहन्नेणं दस वाससहस्साइं'ति यथा व्यन्तराणां 'उक्कोसेणं तेत्तीसं सागरोवमाइं'ति यथा सर्वार्थःसिद्धदेवानां ॥ अथ तेषामेव विकुर्वणां प्ररूपयन्नाह ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (५५७)** *भवियदव्वदेवा णं भंते ! किं एगत्तं पभू विउव्वित्तए पुहुत्तं पभू विउव्वित्तए गोयमा ! एगत्तंपि पभू विउव्वित्तए पुहुत्तंपि पभू विउव्वित्तए, एगत्तं विउव्वमाणे एगिंदियरूवं वा जाव पंचिंदियरूवं वा पुहुत्तं विउव्वमाणे एगिंदियरूवाणि वा जाव पंचिंदियरूवाणि वा ताइं संखेज्जाणि वा असंखेज्जाणि वा संबद्धाणि वा असंबद्धाणि वा सरिसाणि वा असरिसाणि वा विउव्वंति विउव्वित्ता तओ पच्छा अप्पणो जहिच्छियाइं कज्जाइं करेंति एवं नरदेवावि, एवं धम्मदेवावि*

*देवाधिदेवाणं पुच्छा, गोयमा ! एगत्तंपि पभू विउव्वित्तए पुहुत्तंपि पभू विउव्वित्तए नो चेव णं संपत्तीए विउव्विंसु वा विउव्विंति वा वा विउव्विस्संति वा । भावादेवाणं पुच्छा जहा भवियदव्वदेवा ।*

**वृ.** 'भवियव्वदव्वदेवा ण'मित्यादि 'एगत्तं पभू विउव्वित्तए'त्ति भव्यद्रव्यदेवो मनुष्यः पञ्चेन्द्रियतिर्यग्वा वैक्रियलब्धिसम्पन्नः 'एकत्वम्' एकरूपं 'प्रभुः' समर्थो विकुर्वयितुं 'पुहुत्तं'ति नानारूपाणि, देवाधिदेवास्तु सर्वथा औत्सुक्यवर्जितत्वान्न विकुर्वते शक्तिसद्भावेऽपीत्यत उच्यते-'नो चेव ण'मित्यादि, 'संपत्तीए'त्ति वैक्रियरूपसम्पादनेन, विकुर्वणशक्तिस्तु विद्यते, तल्लब्धिमात्रस्य विद्यमानत्वात् ।

**मू. (५५८)** *भवियदव्वदेणं भंते १ अनंतरं उव्वट्टित्ता कहिं गच्छंति ? कहिं उववज्जंति ? किं नेरइएसु उववज्जंति ? जाव देवेसु उववज्जंति ?, गोयमा ! नो नेरइएसु उववज्जंति नो तिरि० नो मणु० देवेसु उववज्जंति, जइ देवेसु उववज्जंति सव्वदेवेसु उववज्जंति जाव सव्वट्ठसिद्धत्ति ।*

*नरदेवा णं भंते ! अनंतरं उवट्टित्ता पुच्छा, गोयमा ! नेरइएसु उववज्जंति नो तिरि० नो मणु० नो देवेसु उववज्जंति, जइ नेरइएसु उववज्जंति०, सत्तसुवि पुढवीसु उववज्जंति ।*

*धम्मदेवा णं भंते ! अनंतरं पुच्छा, गोयमा ! नो नेरइएसु उववज्जेज्जा नो तिरि० नो मणु० देवेसु उववज्जंति, जइ देवेसु उववज्जंति किं भवणवासि पुच्छा, गोयमा ! नो भवणवासिदेवेसु उववज्जंति नो वाणमंतर० नो जोइसिय० वेमाणियदेवेसु उववज्जंति, सव्वेसु वेमाणिएसु उववज्जंति जाव सव्वट्ठसिद्धअनुत्तरोववाइएसु जाव उववज्जंति, अत्थेगइया सिज्झंति जाव अंतं करेंति ।*

*देवाधिदेवा अनंतंर उववट्टित्ता कहिं गच्छंति कहिं उववज्जंति ?, गोयमा ! सिज्झंति जाव अंतं करेंति । भावदेवा णं भंते ! अनंतरं उव्वट्टित्ता पुच्छ जहा वक्कंतीए असुरकुमाराणं उव्वट्टणा तहा भाणियव्वा ।*

*भवियदव्वदेवे णं भंते ! भवियदव्वदेवेत्ति कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं, एवं जहेव ठिई सच्चेव संचिट्ठणावि जाव भावदेवस्स, नवरं धम्मदेवस्स जह० एक्कं समयं उक्कोसेणं देसूणा पुव्वकोडी ।*

*भवियदव्वदेवस्स णं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जह० दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्कोसेणं अनंतं कालं वणस्सइकालो ।*

*नेरदेवाणं पुच्छा, गोयमा ! जहन्नेणं सातिरेगं सागरोवमं उक्कोसेणं अनंतं कालं अवड्ढं पोग्गलपरियट्टं देसूणं । धम्म देवस्स णं पुच्छा, गोयमा ! जहन्नेणं पलिओवमपुहुत्तं उक्कोसेणं अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं ।*

*देवाधिदेवाणं पुच्छा, गोयमा ! नत्थि अंतरं । भावदेवस्स णं पुच्छा, गोयमा ! जहन्नेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अंतोमुहुत्तं उक्कोसेणं अनंतं कालं वणस्सइकालो। एएसि णं भंते! भवियदव्वदेवाणं नरदेवाणं जाव भावदेवाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा! सव्वत्थोवा नरदेवा देवाधिदेवा संखेज्जगुणा धम्मदेवा संखेज्जगुणा भवियदव्वदेवा असंखेज्जगुणा भावदेवा असंखेज्जगुणा भावदेवा असंखेज्जगुणा।*

**वृ.** अथ तेषामेवोद्वर्त्तनां प्ररूपयन्नाह–'भवियदव्वे'त्यादि, इह च भविकद्रव्यदेवानां भाविदेव भवस्वभावनत्वान्नारकादिभवत्रयनिषेधः।नरदेवसूत्रे तु 'नेरइएसु उववज्जंति'त्ति अत्यक्तकामभोगा नरदेवा नैरयिकेषूत्पद्यन्ते शेषत्रये तु तन्निषेधः, तत्र च यद्यपि केचिच्चक्रवर्त्तिनो देवेषूत्पद्यन्ते तथाऽपि ते नरदेवत्वत्यागेन धर्म्मदेवत्व- प्राप्ताविति न दोषः, 'जहा वक्कंतीए असुरकुमाराणं उव्वट्टणा तहा भाणियव्व'त्ति असुरकुमारा बहुषु जीवास्थानेषु गच्छन्तीतिकृत्वा तैरतिदेशः कृतः, असुरादयो हीशानान्ताः पृथिव्यादिष्वपि गच्छन्तीति ॥ अथ तेषामेवानुबन्धं प्ररूपयन्नाह।

'भवियदव्वदेवे ण'मित्यादि, 'भवियदव्वदेवेइ'त्ति भव्यद्रव्यदेव इत्यमुं पर्यायमत्यजन्नित्यर्थः 'जहन्नेणमंतोमुहुत्त'मित्यादि पूर्ववदिति। 'एवं जहेव ठिई सच्चेव संचिट्ठाणवि'त्ति 'एवम्' अनेन न्यायेन यैव 'स्थिति' भवस्थिति प्राग् वर्णिता सैवैषां संस्थितिरपि तत्पर्यायानुबन्धोऽपीत्यर्थः, विशेषं त्वाह–'नवर'मित्यादि, धर्ममदेवस्य, जघन्येनैकं समयं स्थिति अशुभभावं गत्वा ततो निवृत्तस्य सुभभावप्रतिपत्तिसमयानन्तरमेव मरणादिति ॥ अथैतेषामेवान्तरं प्ररूपयन्नाह।

'भवियदव्वदेवस्स णं भंते!' इत्यादि, 'जहन्नेणं दसवाससहस्साइं अंतोमुहुत्तमब्भहियाइं'ति भव्यद्रव्यदेवस्यान्तरं जघन्येन दशवर्षसहस्राण्यन्तर्मुहूर्त्ताभ्यधिकानि, कथं ?, भव्यद्रव्यदेवो भूत्वा दशवर्षसहस्रस्थितिषु व्यन्तरादिषूत्पद्य च्युत्वा शुभपृथिव्यादौ गत्वाऽन्तर्मुहूर्त्तं स्थित्वा पुनर्भव्य-द्रव्यदेव एवोपजायत इत्येवं, एतच्च टीकामुपजीव्य व्याख्यातं, इह कश्चिदाह–ननु देवत्वाच्च्युत-स्यानन्तरमेव भव्यद्रव्यदेवतयोत्पत्तिसम्भवाद्दशवर्षसहस्राण्येव जघन्यतस्यस्यान्तरं भवत्यतः कथमन्तर्मुहू-र्त्ताभ्यधिकानि तान्युक्तानि इति, अत्रोच्यते–सर्वजघन्यायुर्देवश्च्युतः सन् शुभपृथिव्या-दिषूत्पद्य भव्यद्रव्यदेवेषूत्पद्यत इति टीकाकारमतभवसीयते, तथा च यथोक्तमन्तरं भवतीति, अन्ये पुनराहुः–इह बद्धायुरेव भव्यद्रव्यदेवोऽभिप्रेतस्तेन जघन्यस्थितिकाद्देवत्वाच्युत्वाऽन्त-र्मुहूर्त्तस्थितिकभव्यद्रव्यदेवत्वेनोत्पन्नस्यान्तर्मुहूर्त्तोपर देवायुषो बन्धनाद् यथोक्तमन्तरं भवतीति, अथवा भव्यद्रव्यदेवस्य जन्मनोर्मरणयोर्वाऽन्तरस्य ग्रहणाद् यथोक्तमन्तरमिति।

'नरदेवाण'मित्यादि, 'जहन्नेणं साइरेगं सागरोवमं'ति, कथम् ?, अपरित्यक्तसङ्गा-श्चक्रवर्त्तिनो नरकपृथिवीषूत्पद्यन्ते, तासु च यथास्वमुत्कृष्टस्थितयो भवन्ति, सातिरेकत्वं च नरदेवभवे चक्ररत्नोत्पत्तेरर्वाचीनकालेन द्रष्टव्यं, उत्कृष्टतस्तु देशोनं पुद्गलपरावर्त्तार्द्धं कथं ?, चक्रवर्त्तित्वं हि सम्यग्दृष्टय एव निर्वर्त्तयन्ति, तेषां च देशोनापार्द्धपुद्गलपरावर्त्त एव संसारो भवति, तदन्त्यभवे च कश्चिन्नरदेवत्वं लभत इत्येवमिति।

'धम्मदेवस्स ण' मित्यादि, 'जहन्नेणं पलिओवमपुहत्तं'ति, कथं ?, चारित्रवान् कश्चित् सौधर्मे पल्योपमपृथक्त्वायुष्केषूत्पद्य ततश्च्युतो धर्म्मदेवत्वं लभत इत्येवमिति, यच्च मनुजत्वे उत्पन्नश्चारित्रं विनाऽऽस्ते तदधिकमपि सत् पल्योपमपृथक्त्वेऽन्तर्भावितमिति। 'भावदेवस्स ण'मित्यादि, 'जहन्नेणं अंतोमुहुत्तं'ति, कथं ?, भावदेवश्च्युयतोऽन्तर्मुहूर्त्तमन्यत्र स्थित्वा पुनरपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावदेवो जात इत्येवं जघन्येनान्तर्मुहूर्त्तमन्तरमिति ॥ अथैतेषामेवाल्पबहुत्वं प्ररूपयन्नाह-

**मू. (५५९)** *एएसि णं भंते! भावेदेवाणं भवनवासीणं वाणमंतराणं जोइसियाणं वेमामियाणं सोहम्मगाणं जाव अच्चुयगामं गेवेज्जगाणं अनुत्तरोववाइयाण य कयरे २ जाव विसेसाहिया वा गोयमा! सव्वत्थोवा अनुत्तरोववाइया भावदेवा उवरिमगेवेज्ञा भावदेवा संखेज्जगुणा मज्झिमगेवेज्ञा संखेज्जगुणा हेट्ठिमगेवेज्ञा संखेज्जगुणा अच्चुए कप्प देवा संखेज्जगुणा जाव आणयकप्पे देवा संखेज्जगुणा एवं जहा जीवाभिगमे तिविहे देवपुरिसे अप्पाबहुयं जाव जोतिसिया भावदेवा असंखेज्जगुणा। सेवं भंते! २।*

**वृ.** 'एएसि ण'मित्यादि, 'सव्वत्थोवा नरदेव'त्ति भरतैरवतेशु प्रत्येकं द्वादशानामेव तेषामुत्पत्तेर्विजयेषु च वासुदेवसम्भवात् सर्वेष्वेकदाऽनुत्पत्तेरति। 'देवाइदेवा संखेज्जगुण'त्ति भरतादिषु प्रत्येकं तेषां चक्रवर्त्तिभ्यो द्विगुणतयोत्पत्तेर्विजयेषु च वासुदेवोपेतेष्वप्युत्पत्तेरिति। 'धम्मदेवा संखेज्जगुण'त्ति साधूनामेकदाऽपि कोटीसहस्रपृथक्त्वसद्भावादिति, 'भवियदव्वदेवा असंखेज्जगुण'त्ति देशविरतादीनां देवगतिगामिनामसङ्ख्यातत्वात्, 'भावदेवा असंखेज्जगुण'त्ति स्वरूपेणैव तेषामतिबहुत्वादिति।

अथ भावदेवविशेषाणां भवनपत्यादीनामल्पबहुत्वप्ररूपणायाह-'एएसि ण'मित्यादि, 'जहा जीवाभिगमे तिविहे'इत्यादि, इह च 'तिविहे'त्ति त्रिविधजीवाधिकार इत्यर्थः देवपुरुषाणामल्पबहुत्वमुक्तं तथेहापि वाच्यं, तच्चैवं-'सहस्सारे कप्पे देवा असंखेज्जगुणा महासुक्के असंखेज्जगुणा लंतए असंखेज्जगुणा बंभलोए देवा असंखेज्जगुणा माहिंदे देवा असंखेज्जगुणा सणंकुमारे कप्पे देवा असंखेज्जगुणा ईसाणे देवा असंखेज्जगुणा सोहम्मे देवा संखेज्जगुणा भवणवासिदेवा असंखेज्जगुणा वाणमंतरा देवा असंखेज्जगुण'त्ति।

शतकं-१२ उद्देशकः-९ समाप्तः

## -: शतकं-१२ उद्देशकः-१० :-

**वृ.** नवमोद्देशके देवा उक्तास्ते चात्मन इत्यात्मस्वरूपस्य भेदतो निरूपणाय दशमोद्देशकमाह, तस्य चेदमादिसूत्रम्-

**मू. (५६०)** *कइविहा णं भंते! आया पन्नत्ता?, गोयमा! अट्ठविहा आया पन्नत्ता, तंजहा-दवियाया कसायाया योगाया उवओगाया नाणाया दंसणाया चरित्ताया वीरियाया।*

*जस्स णं भंते! दवियाया तस्स कसायाया जस्स कसायाया तस्स दवियाया?, गोयमा! जस्स दवियाया तस्स कसायाया सिय अत्थि सिय नत्थि जस्स पुण कसायाया तस्स दवियाया नियमं अत्थि। जस्स णं भंते! दवियाया तस्स जोगाया? एवं जहा दवियाया कसायाया भणिया तहा दवियाया जोगाया भाणियव्वा।*

*जस्स णं भंते! दवियाया तस्स उवओगाया एवं सव्वत्थ पुच्छा भाणियव्वा, गोयमा! जस्स दवियाया तस्स उवओगाया नियमं अत्थि, जस्सवि उवओगाया तस्सवि दवियाया नियमं अत्थि। जस्स दवियाया तस्स णाणाया भयणाए जस्स पुण नाणाया तस्स दवियाया नियमं अत्थि, जस्स दवियाया तस्स दंसणाया नियमं अत्थि जस्सवि दंसणाया तस्स दवियाया नियमं अत्थि, जस्स दवियाया तस्स चरित्ताया भयणाए जस्स पुण चरित्ताया तस्स दवियाया नियमं अत्थि, एवं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वीरियायाएवि समं।*

*जस्स णं भंते! कसायाया तस्स जोगाया पुच्छा, गोयमा! जस्स कसायाया तस्स जोगाया नियमं अत्थि, जस्स पुण जोगाया तस्स कसायाया सिय अत्थि सिय नत्थि, एवं उवओगायाएवि समं कसायाया नेयव्वा, कसायाया य नाणाया य परोप्परं दोवि भइयव्वाओ, जहा कसायाया य उवओगाया य तहा कसायाया य दंसणाया य कसायाया य चरित्ताया य दोवि परोप्परं भइयव्वाओ, जहा कसायाया य जोगाया य तहा कसायाया य वीरियाया य भाणियव्वाओ, एवं जहा कसायायाए वत्तव्वया भणिया तहा जोगायाएवि उवरिमाहिं समं भाणियव्वाओ। जहा दवियायाए वत्तव्वयाभणिया तहा उवयोगायाएवि उवरिल्लाहिं समं भाणियव्वा।*

*जस्स चरित्ता या सिय अत्थि सिय नत्थि जस्स पुण चरित्ताया तस्स नाणाया नियमं अत्थि, नाणाया वीरियाया दोवि परोप्परं भयणाए। जस्स दंसणाया तस्स उवरिमाओ दोवि भयणाए, जस्स पुण ताओ तस्स दंसणाया नियमं अत्थि। जस्स चरित्ताया तस्स वीरियाया नियमं अत्थि जस्स पुण वीरियाया तस्स चरित्ताया सिय अत्थि सिय नत्थि।*

*एयासि णं भंते! दवियायाणं कसायायाणं जाव वीरियायाण य कयरे २ जाव विसेसा० गोयमा! सव्वत्थोवाओ चरित्तायाओ नाणायाओ अनतगुणाओ कसायाओ अनंत० जोगायाओ वि० वीरियायाओवि उवोगदवियदंसणायाओ तिन्निवि तुल्लाओ वि०।*

**वृ.** 'कइविहा ण'मिति, 'आय'त्ति अतति-सन्ततं गच्छति अपरापरान् स्वपरपर्यायानित्यात्मा, अथवा अतधातोर्गमनार्थःत्वेन ज्ञानार्थःत्वादतति-सन्ततमवगच्छति उपयोगलक्षणत्वादित्यात्मा, प्राकृतत्वाच्च सूत्रे स्त्रीलिङ्गनिर्देशः, तस्य चोपयोगलक्षणत्वात्सामान्येनैकविधत्वेऽप्युपाधिभेदादष्टघात्वं।

तत्र 'दवियाय'त्ति द्रव्यं-त्रिकालानुगाम्युपपसर्जनीकृतकषायादिपर्यायं तद्रूप आत्मा द्रव्यात्मा सर्वेषां जीवानां, 'कसायाय'त्ति द्रव्यं-त्रिकालानुगाम्युपसर्जनीकृतकषायादिपर्यायं तद्रूप आत्मा द्रव्यात्मा सर्वेषां जीवानां, 'कसायाय'त्ति क्रोधादिकषायविशिष्ट आत्मा कषायात्मा अक्षीणानुपशान्तकषायाणां, 'जोगाय'त्ति योगा-मनःप्रभृतिव्यापारास्तत्प्रधान आत्मा योगात्मा योगवतामेव, 'उवओगाया'त्ति उपयोगः-साकारानाकारभेदस्तत्प्रधान आत्मा उपयोगात्मा सिद्धसंसारिस्वरूपः सर्वजीवानां, अथवा विवक्षितवस्तूपयोगापेक्षयोपयोगात्मा, 'नाणाय'त्ति ज्ञानविशेषित उपसर्जनीकृतदर्शनादिरात्मा ज्ञानात्मा सम्यग्दृष्टेः, एवं दर्शनात्मादयोऽपि नवरं दर्शनात्मा सर्वजीवानां, चारित्रात्मा विरतानां, वीर्यं-उत्थानादि तदात्मा सर्वसंसारिणामिति, उक्तश्च-

॥१॥ "जीवानां द्रव्यात्मा ज्ञेयः सकषायिणां कषायात्मा।
योगः सयोगिनां पुनरुपयोगः सर्वजीवानाम्॥

॥२॥ ज्ञानं सम्यग्दृष्टेर्दर्शनमथ भवति सर्वजीवानाम्।
चारित्रं विरतानां तु सर्वसंसारिणां वीर्यम्॥ इति॥

एवमष्टधाऽऽत्मानं प्ररूप्याथ यस्मात्मभेदस्य यदन्यदात्मभेदान्तरं युज्यते च न युज्यते च तस्य तद्दर्शयितुमाह-'जस्स ण'मित्यादि, इहाष्टौ पदानि स्थाप्यन्ते, तत्र प्रथमपदं शेषैः सप्तभिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सह चिन्त्यते, तत्र यस्य जीवस्य 'द्रव्यात्मा' द्रव्यात्मत्वं जीवत्वमित्यर्थः तस्य कषायात्मा 'स्यादस्ति' कदाचिदस्ति सकषायावस्थायां 'स्यान्नास्ति' कदाचिन्नास्ति क्षीणोपशान्तकषायावस्थायां, यस्य पुनः कषायात्माऽस्ति तस्य द्रव्यात्मा द्रव्यात्मत्वं-जीवत्वं नियमादस्ति, जीवत्वं विना कषायाणामभावादिति। तथा यस्य द्रव्यात्मा तस्य योगात्माऽस्ति, योगवतामिव, नास्ति चायोगि-सिद्धानामिव, तथा यस्य योगात्मा तस्य द्रव्यात्मा नियमादस्ति, जीवत्वं विना योगानामभावात्, एतदेव पूर्वसूत्रोपमानेन दर्शयन्नाह-'एवं जहा दवियाये'त्यादि। तथा यस्य जीवस्य द्रव्यात्मा तस्य नियमादुपयोगात्मा, यस्याप्युपयोगात्मा तस्य नियमाद्द्रव्यात्मा, एतयोः परस्परेणाविनाभूतत्वाद् यथा सिद्धस्य, तदन्यस्य च द्रव्यात्माऽस्त्युपयोगात्मा चोपयोगलक्षणत्वाज्जीवानां, एतदेवाह-'जस्स दवियाये'त्यादि।

तथा 'जस्स दवियाया तस्स नाणाया भयणाए जस्स पुण नाणाया तस्स दवियाया नियमं अत्थि'त्ति यस्य जीवस्य द्रव्यात्मा तस्य ज्ञानात्मा स्यादस्ति यथा सम्यग्दृष्टीनां स्यान्नास्ति यथा मिथ्यादृष्टीनामित्येवं भजना, यस्य तु ज्ञानात्मा तस्य द्रव्यात्मा नियमादस्ति, यथा सिद्धस्येति। 'जस्स दवियाया तस्स दंसणाया नियमं अत्थि'त्ति यथा सिद्धस्य केवलदर्शनं 'जस्सवि दंसणाया तस्स दवियाया नियमं अत्थि'त्ति यथा चक्षुर्दर्शनादिदर्शनवतां जीवत्वमिति, तथा 'जस्स दवियाया तस्स चरित्ताया भयणाए'त्ति यतः सिद्धस्याविरतस्य वा द्रव्यात्मत्वे सत्यपि चारित्रात्मा नास्ति विरतानां चास्तीति भजनेति, 'एवं वीरियातेवि समं'ति यथा द्रव्यात्मनश्चारित्रात्मना सह भजनोक्ता नियमश्चैवं वीर्यात्मनाऽपि सहेति, तथाहि-यस्य द्रव्यात्मा तस्य वीर्यात्मा नास्ति, यथा सकरण-वीर्यापेक्षया सिद्धस्य तदन्यस्य त्वस्तीति भजना, वीर्यात्मनस्तु द्रव्यात्माऽस्त्येव यथा संसारिणामिति

अथ कषायात्मना सहान्यानि षट् पदानि चिन्त्यन्ते-'जस्स ण'मित्यादि, यस्य कषायात्मा तस्य योगात्माऽस्त्येव, नहि सकषायोऽयोगी भवति, यस्य तु योगात्मा तस्य कषायात्मा स्याद्वा न वा, सयोगानां सकषायाणामकषायाणां च भावादिति, 'एवं उवओगाया, एवी'त्यादि, अयमर्थः-यस्य कषायात्मा तस्योपयोगात्माऽवश्यं भवति, उपयोगरहितस्य कषायाणामभावात्, यस्य पुनरुपयोगात्मा तस्य कषायात्मा भजनया, उपयोगात्मतायां सत्यामपि कषायिणामेव कषायात्मा भवति निष्कषायाणां तु नासाविति भजनेति।

तथा 'कसायाया य नाणाया य परोप्परं दोवि भइयव्वाओ'त्ति, कथम्?, यस्य कषायात्मा तस्य ज्ञानात्मा स्यादस्ति, यतः कषायिणः सम्यग्दृष्टेर्ज्ञानात्माऽस्ति मिथ्यादृष्टेस्तु तस्य नास्त्यसाविति भजना, तथा यस्य ज्ञानात्मास्ति तस्य कषायात्मा स्यादस्ति स्यान्नास्ति, ज्ञानिनां कषायभावात् तदभावाच्चेति भजनेति, 'जहा कसायाया उवओगाया य तहा कसायाया य दंसणाया य'त्ति अतिदेशः, तस्माच्चेदं लब्धं-'जस्स कसायाया तस्स दंसणाया नियमं अत्थि' दर्शनरहितस्य घटादेः कषायात्मनोऽभावात् 'जस्स पुण दंसणाया तस्स कसायाया सिय अत्थि सिय नत्थि' दर्शनवतां कषायसद्भावात्तदभावाच्चेति, दृष्टान्तार्थःस्तु प्राक् प्रसिद्ध एवेति।

'कसायाया य चरित्ताया य दोवि परोप्परं भइयव्वाओ'त्ति, भजना चैवं-यस्य कषायात्मा तस्य चारित्रात्मा स्यादस्ति स्यान्नास्ति, कथं?, कषायिणां चारित्रस्य सद्भावात् प्रमत्तयतीनामिव तदभावाच्चासंयतानामिवेति, तथा यस्य चारित्रात्मा तस्य कषायात्मा स्यादस्ति स्यान्नास्ति, कथं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामायिकादिचारित्रिणां कषायाणां भावाद् यथाख्यातचारित्रिणां च तदभावादिति, 'जहा कसायाया य जोगाया य तहा कसायाया वीरियाया य भाणियव्वाओ'त्ति दृष्टान्तः प्राक्– प्रसिद्धः, दार्ष्टान्तिकस्त्वेवंयस्य कषायात्मा तस्य वीर्यात्मा नियमादस्ति, न हि कषायवान् वीर्यविकलोऽस्ति, यस्य पुनर्वीर्यात्मा स्य कषायात्मा भजनया, यतो वीर्यवान् नियमादस्ति, न हि कषायवान् वीर्यविकलोऽस्ति, यस्य पुनर्वीर्यात्मा तस्य कषायात्मा भजनया, यतो वीर्यवान् सकषायोऽपि स्याद् यथा संयतः अकषायोऽपि स्याद् यथा केवलीति ६ ।

अथ योगात्माऽग्रेतनपदैः पञ्चभिः सह चिन्तनीयस्तत्र च लाघवार्थःमतिदिशन्नाह–'एवं जहा कसायायाए वत्तव्वया भणिया तहा जोगायाएविउवरिमाहिं समं भाणियव्व'त्ति, सा चैवम्– यस्य योगात्मा तस्योपयोगात्मा नियमाद् यथा सयोगानां, यस्य पुनरुपयोगात्मा तस्य योगात्मा स्यादस्ति यथा सयोगानां स्यान्नास्ति यथाऽयोगिनां सिद्धानां चेति, तथा यस्य योगात्मा तस्य ज्ञानात्मा स्यादस्ति सम्यग्दृष्टीनामिव स्यान्नास्ति मिथ्यादृष्टीनामिव, यस्य ज्ञानात्मा तस्यापि योगात्मा स्यादस्ति सयोगिनामिव स्यान्नास्त्ययोगिना मिवेति, तथा यस्य योगात्मा तस्य दर्शनात्माऽस्त्येव योगिनामिव यस्य च दर्शनात्मा तस्य योगात्मा स्यादस्ति योगवतामिव स्यान्नास्ययोगिनामिव, तथा यस्य योगात्मा तस्य चारित्रात्मा स्यादस्ति विरतानामिव स्यान्नास्त्यविरतानामिव, यस्यापि चारित्रात्मा तस्य योगात्मा स्यादस्ति सयोगचारित्रवतामिव स्यान्नास्त्ययोगिनामिवेति ।

वाचनान्तरे पुनरिदमेवं दृश्यते–'जस्स चरित्ताया तस्स जोगाया नियम'त्ति तत्र च चारित्रस्य प्रत्युपेक्षणादिव्यापाररूपस्य विवक्षितत्वात्तस्य च योगाविनाभावित्वात् यस्य चारित्रात्मा तस्य योगात्मा नियमादित्युच्यत इति, तथा यस्य योगात्मा तस्य वीर्यात्माऽस्त्येव योगसद्भावे वीर्यस्यावश्यम्भावात्, यस्य तु वीर्यात्मा तस्य योगात्मा भजनया यतो वीर्यविशेषवान् सयोग्यपि स्याद् यथा सयोगकेवल्यादि अयोग्यपि स्याद् यथाऽयोगिकेवलीति ५ ।

अथोपयोगात्मना सहान्यानि चत्वारि यथा सम्यग्दृशां स्यान्नास्ति यथा मिथ्यादृशां, यस्य च ज्ञानात्मा तस्यावश्यमुपयोगात्मा सिद्धानामिवेति १, तता यस्योपयोगात्मा तस्य दर्शनात्माऽस्त्येव यस्यापि दर्शनात्मा तस्योपयोगात्माऽस्त्येव यथा सिद्धादीनामिवेति २, तथा यस्योपयोगात्मा तस्य चारित्रात्मा स्यादस्ति स्यान्नास्ति यथा संयतानामसंयतानां च, यस्य तु चारित्रात्मा तस्योपयोगात्माऽस्त्येवेति यथा संयतानां ३, तथा यस्योपयोगात्मा तस्य वीर्यात्मा स्यादस्ति संसारिणामिव स्यान्नास्ति सिद्धानामिव यस्य पुनर्वीर्यात्मा तस्योपयोगात्माऽस्त्येव संसारिणामिवेति ४।

अथ ज्ञानात्मना सहान्यानि त्रीणि चिन्त्यन्ते–'जस्स णाणे'त्यादि, तत्र यस्य ज्ञानात्मा तस्य दर्शनात्माऽस्त्येव सम्यग्दृशामिव, यस्य च दर्शनात्मा तस्य ज्ञानात्मा स्यादस्ति यता सम्यग्दृशां स्यान्नास्ति यथा मिथ्यादृशामत एवोक्तं 'भयणाए'त्ति १ । तथा 'जस्सनाणाया तस्स चरित्ताया सिय अत्थि'त्ति संयतानामिव 'सिय नत्थि'त्त असंयतानामिव 'जस्स पुण चरित्ताया तस्स नाणाया नियमं अत्थि'त्ति ज्ञानं विना चारित्रस्या- भावादिति २, तथा 'नाणाये'त्यादि अस्यार्थः–यस्य ज्ञानात्मा तस्य वीर्यात्मा स्यादस्ति केवल्यादी- नामिव स्यान्नास्ति सिद्धानामिव, यस्यापि वीर्यात्मा तस्य ज्ञानात्मा स्यादस्ति सम्यग्दृष्टेरिव स्यान्नास्ति मिथ्यादृशय इवेति ३ ।

अथ दर्शनात्मना सह द्वे चिन्त्येते–'जस्स दंसणाये'त्यादि, भावना चास्य–यस्य दर्शनात्मा

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

तस्य चारित्रात्मा स्यादस्ति संयतानामिव स्यान्नास्त्यसंयतानामिव, यस्य च चारित्रात्मा तस्य दर्शनात्माऽस्त्येव साधूनामिवेति ?, तथा यस्य दर्शनात्मा तस्य वीर्यात्मा स्यादस्ति संसारिणामिव स्यान्नास्ति सिद्धानामिव, यस्य च वीर्यात्मा तस्य दर्शनात्माऽस्त्वेव संसारिणामिवेति २ ।

अथान्तिमपदयोर्योजना-'जस्स चरित्ते'त्यादि, यस्य चारित्रात्मा तस्य वीर्यात्माऽस्त्येव, वीर्यं विना चारित्रस्याभावात्, यस्य पुनर्वीर्यात्मा तस्य चारित्रात्मा स्यादस्ति साधूनामिव स्यान्नास्त्यसंयतानामिवेति ।

अधुनैषामेवात्मनामल्पबहुत्वमुच्यते-'सव्वत्थोवाओ चरित्तायाओ'त्ति चारित्रिणां सङ्ख्यातत्वात् 'नाणायाओ अनंतगुणाओ'त्ति सिद्धादीनां सम्यग्दृशां चारित्रेभ्योऽनन्तगुणत्वात् 'कसायाओ अनंतगुणाओ'त्ति सिद्धेभ्यः कषायोदयवतामनन्तगुणत्वात् 'जोगायाओ विसेसाहियाओ'त्ति अपगतकषायोदयैर्योगवद्भिरधिका इत्यर्थः 'वीरियायाओ विसेसाहियाओ'त्ति अयोगिभिरधिका इत्यर्थः, अयोगिनां वीर्यवत्त्वादिति, 'उवओगदवियदंसणायाओ तिन्निवि तुल्लाओ विसेसाहियाओ'त्ति परस्परापेक्षया तुल्याः, सर्वेषां सामान्यजीवरूपत्वात्, वीर्यात्मभ्यः सकाशादुपयोगद्रव्यदर्शनात्मानो विशेषाधिका यतो वीर्यात्मानः सिद्धाश्च मीलिता उपयोगाद्यात्मानो भवन्ति, ते च वीर्यात्मभ्यः सिद्धराशिनाऽधिका भवन्तीति, भवन्ति चात्र गाथाः-

॥१॥ "कोडीसहस्सपुहुत्तं जईण तो थोवियाओ चरणाया ।
नाणायाऽनंतगुणा पडुच्च सिद्धे य सिद्धाओ ॥

॥२॥ होंति कसायायाओऽनंतगुणा जेण ते सरागाणं ।
जोगाया भणियाओ अयोगिवज्जाण तो अहिया ॥

॥३॥ जं सेलेसिगयाणवि लद्धी विरियं तओ समहियाओ ।
उवओगदवियदंसण सव्वजिया णं ततो अहिया ॥ इति ।

**मू. (५६१)** *आया भंते ! नाणे अन्नाणे ?, गोयमा ! आया सिय नाणे सिय अन्नाणे नाणे पुण नियमं आया । आया भंते ! नेरइयाणं नाणे अन्ने नेरइयाणं नाणे ? गोयमा ! आया नेरइयाणं सिय नाणे सिय अन्नाणे नाणे पुण से नियमं आया एवं जाव थणियकुमाराणं ।*

*आया भंते ! पुढवि० अन्नाणे अन्ने पुढविकाइयाणं अन्नाणे ? गोयमा ! आया पुढविकाइयाणं नियमं अन्नाणे अन्नाणेवि नियमं आया, एवं जाव वणस्सइका० बेइंदियतेइंदिय जाव वेमाणियाणं जहा नेरइयाणं ।*

*आया भंते ! दंसणे अन्ने दंसणे ? गोयमा !, आया नियमं दंसणे दंसणेवि नियमं आया ।*

*आया भंते ! नेर० दंसणे अन्ने नेरइयाणं दंसणे ?, गोयमा ! आया नेरइयाणं नियमा दंसणे दंसणेवि से नियमं आया एवं जाव वेमा० निरंतरं दंडओ ।*

**वृ.** अथात्मन एव स्वरूपनिरूपणायाह-'आया भंते ! नाणे'इत्यादि, आत्मा ज्ञानं योऽयमात्माऽसौ ज्ञानं न तयोर्भेदः अथात्मनोऽन्यज्ज्ञानमिति प्रश्नः, उत्तरं तु-आत्मा स्याज्ज्ञानं सम्यक्त्वे सति मत्यादिज्ञानस्वभावत्वात्तस्य, स्यादज्ञानं मिथ्यात्वे सति तस्य मत्यज्ञानादिस्वभावत्वात्, ज्ञानं पुनर्नियमादात्मा आत्मधर्मत्वाज्ज्ञास्य, न च सर्वथा धर्मो धर्मिणो भिद्यते, सर्वथा भेदे हि विप्रकृष्टगुणिनो गुणमात्रोपलब्धौ प्रतिनियतगुणिविषय एव संशयो न स्यात्, तदन्येभ्योऽपि तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदाविशेषात्, दृश्यते च यदा कश्चिद्धरिततरुतरुणशाखाविसररन्ध्रोदरान्त रतः किमपि शुक्लं पश्यति तदा किमियं पताका किमियं बलाका –

इत्येवं प्रतिनियतगुणिविषयोऽसौ, नापि धर्मिणो धर्म सर्वथैवाभिन्नः, सर्वथैवाभेदे हि संशयानुत्पत्तिरेव, गुणग्रहणत एव गुणिनोऽपि गृहीतत्वादतः कथञ्चिदभेदपक्षमाश्रित्य ज्ञानं पुनर्नियमादात्मेत्युच्यत इति, इह चात्मा ज्ञानं व्यभिचरति ज्ञानं त्वात्मानं न व्यभिचरति खदिरवनस्पतिवदिति सूत्रगर्भार्थः इति ।। अमुमेवार्थं दण्डके निरूपयन्नाह !

'आये'त्यादि, नारकाणां 'आत्मा' आत्मस्वरूपं ज्ञानं उतान्यन्नारकाणां ज्ञानं ? तेभ्यो व्यतिरिक्तमित्यर्थः इति प्रश्नः, उत्तरं तु आत्मा नारकाणां स्याज्ज्ञानं सम्यग्दर्शनभावात् स्यादज्ञानं मिथ्यादर्शनभावात्, ज्ञानं पुनः 'से'त्ति तन्नारकसम्बन्धि आत्मा न तद्व्यतिरिक्तमित्यर्थः ।

'आया भंते ! पुढविक्काइयाण'मित्यादि, 'आत्मा' आत्मस्वरूपमज्ञानमुतान्यत्तत्तेषां ?, उत्तरं तु–आत्मा तेषामज्ञानरूपो नान्यत्तत्तेभ्य इति भावार्थः । एवं दर्शनसूत्राण्यपि, नवरं सम्यग्दृष्टि-मिथ्यादृष्ट्योर्दर्शनस्याविशिष्टत्वादात्मा दर्शनं दर्शनमप्यात्मैवेति वाच्यं, यत्र हि धर्मे विपर्ययो नास्ति तत्र नियम एवोपनीयते न व्यभिचारो, यथैहैव दर्शने, यत्र तु विपर्ययोऽस्ति तत्र व्यभिचारो नियमश्चयथा ज्ञाने, आत्मा ज्ञानरूपोऽज्ञानरूपश्चेति व्यभिचारः, ज्ञानं त्वात्मैवेति नियम इति ।

**मू. (५६२)** *आया भंते ! रयणप्पभापु० अन्ना रयणप्पभा पुढवी !, गोयमा ! रयणप्पभा सिय आया सिय नो आया सिय अवत्तव्वं आयाति य नो आयाइ य, से केणट्ठेणं भंते ! एवं वुच्चइ रयणप्पभा पुढवी सिय आया सिय नो आया सिय अवत्तव्वं आतातिय नो आतातिय ?, गोयमा अप्पणो आदिट्ठे आया परस्स आदिट्ठे नो आया तदुभयस्स आदिट्ठे अवत्तव्वं रयणप्पभा पुढवी आयातिय नो आयाति य से तेणट्ठेणं तं चेव जाव नो आयातिय ।*

*आया भंते ! सक्करप्पभा पुढवी जहा रयणप्पभा पुढवी तहा सक्करप्पभाएवि एवं जाव अहे सत्तमा । आया भंते ! सोहम्मकप्पे पुच्छा, गोयमा ! सोहम्मे कप्पे सिय आया सिय नो आया जाव नो आयाति य, से केणट्ठेणं भंते ! जाव नो आयातिय ?, गोयमा ! अप्पणो आइट्ठे आया परस्स आइट्ठे नो आया तदुभयस्स अवत्तव्वं आताति य नो आताति य, से तेणट्ठेणं तं चेव जाव नो आयाति य, एवं जाव अच्चुए कप्पे आया भंते ! गेविज्जविमाणे अन्ने गेविज्जविमाणे एवं जहा रयणप्पभा तहेव, एवं अनुत्तरविमाणावि, एवं ईसिपब्भारावि ।*

*आया भंते ! परमाणुपोग्गले अन्ने परमाणुपोग्गले ? एवं जहा सोहम्मे कप्पे तहा परमाणुपोग्गलेवि भाणियव्वे ।। आया भंते ! दुपएसिए खंधे अन्ने दुपएसिए खंधे ?, गोयमा ! दुपएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाइ य नो आयातिय ३ सिय आया य नो आया य ४ सिय आया य अवत्तव्वं आयाति य नो आयाति य ५ सिय नो आया य अवत्तव्वं आयाति य नो आयाति य ६ । से केणट्ठेणं भंते ! एवं तं चेव जाव नो आयाति य अवत्तव्वं आयाति य नो आयाति य गोयमा ! अप्पणो आदिट्ठे आया १ परस्स आदिट्ठे नो आया २ तदुभयस्स आदिट्ठे अवतत्व्वं दुपएसिए खंधे आयाति य नो आयाति य ३ देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे दुपएसिए खंधे आया य नो आया य ४ देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे तदुभयपज्जवे दुपएसिए खंधे आया य अवत्तव्वं आयाइ य नो आयाइ य ५ देसे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदिट्ठे असब्भावपज्ञवे देसे आदिट्ठे तदुभयपज्ञवे दुपएसिए खंधे नो आया य अवत्तव्वं आयाति य नो आयाति य ६ से तेणट्ठेणं तं चेव जाव नो आयाति य।

आया भंते! तिपएसिए खंधे अन्ने तिपएसिए कंधे ?, गोयमा! तिपएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाति य नो आयाति य ३ सिय आया य नो आया य ४ सिय आया य नो आयाओ य ५ सिय आयाउ य नो आया य ६ सिय आया य अवतव्वं आयाति य नो आयाति य ७ सिय आयाइय अवत्तव्वाइं आयाओ य नो आयाओ य ८ सिय आयाओ य अवत्तव्वं आयाति य नो आयाति य ९ सिय नो आया य अवत्तव्वं आयाति य नो आयाति य १० सिय आया य अवत्तव्वाइं आयाओ य नो आयाओ य ११ सिय नो आयाओ य अवत्तव्वं आयाइ य नो आयाइ य १२ सिय आया य नो आया य अवत्तव्वं आयाइ य नो आयाइ य १३। से केणट्ठेणं भंते! एवं वुच्चइ तिपएसिए खंधे सिय आया एवं चेव उच्चारेयव्वं जाव सिय आया य नो आया य अवत्तव्वं आयाति य नो आयाति य ?, गोयमा! अप्पणो आइट्ठे आय १ परस्स आइट्ठे नो आया २ तदुभयस्स आइट्ठे अवत्तव्वं आयाति य नो आयाति य ३ देसे आइट्ठे सब्भावपज्ञवे देसे आदिट्ठे असब्भावपज्ञवे तिपएसिए खंधे आयाय नो आया य ४ देसे आदिट्ठे सब्भावपज्ञवे देसा आइट्ठा असब्भावपज्ञवे तिपएसिए खंधे आया य नो आयाओ य ५ देसाआदिट्ठा सब्भावपज्ञवे देसे आदिट्ठे असब्भावपज्ञवे तिपएसिए खंधे आयाओ य नो आया य ६ देसे आदिट्ठे सब्भावपज्ञवे देसे आदिट्ठे तदुभयपज्ञवे तिपएसिए खंधे आया य अवत्तव्वं आयाइ य नो आयाइ य ७ देसे आदिट्ठे सब्भावपज्ञवे देसा आदिट्ठा तदुभयपज्ञवा तिपएसिए खंदे आया य अवत्तव्वाइं आयाउ य नो आयाउ य ८ –

–देसा आदिट्ठा सब्भावपज्ञवा देसे आदिट्ठे तदुभयपज्ञवे तिपएसिए खंधे आयाउ य अवत्तव्वं आयाति य नो आयाति य ९ एए तिन्नि भंगा, देसे आदिट्ठे असब्भावपज्ञवे देसे आदिट्ठे तदुभयपज्ञवे तिपएसिए खंधे नो आया य अवत्तव्वं आयाइ य नो आयाति य १० देसे आदिट्ठे असब्भावपज्ञवे देसा आदिट्ठा तदुभयपज्ञवा तिपएसिए खंधे नो आया य अवत्तव्वाइं आयाउ य नो आयाउ य ११ देसा आदिट्ठा असब्भावपज्ञवा देसे आदिट्ठे तदुभयपज्ञवे तिपएसिए खंधे नो आयाउ य अवत्तव्वं आयाति य नो आयाति य १२ देसे आदिट्ठे सब्भावपज्ञवे देसे आदिट्ठे असब्भावपज्ञवे देसे आदिट्ठे तदुभयपज्ञवे तिपएसिए खंधे आया य नो आया य अवत्तव्वं आयाति य नो आया इ य १३ से तेणट्ठेणं गोयमा! एवं वुच्चइ तिपएसिए कंधे सिय आया तं चेव जाव नो आयाति य

आया भंते! चउप्पएसिए खंधे अन्ने० पुच्छा, गोयमा! चउप्पएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाति य नो आयाति य ३ सिय आया य नो आया य ४ सिय आया य अवत्तव्वं ४ सिय नो आया य अवत्तव्वं ४ सिय आया य नो आया य अवत्तव्वं आयाति य नो आयाओ य अचत्तव्वं आयाति य नो आयाति य १८ सिय आयाओ य नो आया य अवत्तव्वं आयाति य नो आयाति य १९। से केणट्ठणं भंते! एवं वुच्चइ चउप्पएसिए खंधे सिय आया य नो आया य अवत्तव्वं तं चेव अट्ठे पडिउच्चारेयव्वं ? गोयमा! अप्पणो आदिट्ठे आया १ परस्स आदिट्ठे नो आया २ तदुभयस्स आदिट्ठे अवत्तव्वं आयाति य नो आयाति य ३ देसे आदिट्ठे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे चउभंगो, सब्भावपज्जवेणं तदुभयेण य चउभंगो असब्भावेणं तदुभयेण य चउभंगो, देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे देसे आदिट् तदुभयपज्जवे चउप्पएसिए खंधे आया य नो आया य अवत्तव्वं आयाति य नो आयाति य, देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे देसा आदिट्ठा तदुभयपज्जवा चउप्पएसिए खंधे भवइ आया य नो आया य अवत्तव्वाइं आयाओ य नो आयाओ य १७ –*

*–देसे आदिट्ठे सब्भावपज्जवे देसा आदिट्ठा असब्भावपज्जवा देसे आदिट्ठे तदुभयपज्जवे चउप्पएसिए खंधे आया य नो आयाओ य अवत्तव्वं आयाति य नोआयाति य १७ देसा आइट्ठा सब्भावपज्जवा देसे आइट्ठे असब्भावप० देसे आइट्ठे तदुभयपज्जवे चउप्पएसिए खंधे आयाओ य नोआया य अवत्तव्वं आयाति य नो आयाति य १९ से तेणट्ठेणं० एवं वुच्चइ चउप्पएसिए खंधे सिय आया सिय नो आया सिय अवत्तव्वं निक्खेवे ते चेव भंगा उच्चारेयव्वा जाव नो आयाति य*

*आया भंते! पंचपएसिए खंधे अने पंचपएसिए खंधे?, गोयमा! पंचपएसिए खंधे सिय आया १ सिय नो आया २ सिय अवत्तव्वं आयाति य नो आयाति य ३ सिय आया य नो आया य सिय अवत्तव्वं ४ नो आया य अवत्तव्वेण य ४ तियगसंजोगे एक्कोन पडइ, से केणट्ठेणं भंते! तं चेव पडिउच्चारेयव्वं?, गोयमा! अप्पणो आदिट्ठे आया १ परस्स आदिट्ठे नो आया २ तदुभयस्स आदिट्ठे अवत्तव्वं ३ देसे आदिट्ठे सब्भावपज्जवे देसे आदिट्ठे असब्भावपज्जवे एवं दुयगसंजोगे सव्वे पडंति तियगसंजोगे एक्को न पडइ। छप्पएसियस्स सव्वे पडंति जहा छप्पएसिए एवं जाव अनंतपएसिए। सेवं भंते! सेवं भंतेत्ति जाव विहरति।*

**वृ.** आत्माधिकाराद्रत्नप्रबादिभावानात्मत्वादिभावेन चिन्तयन्नाह–'आया भंते!' इत्यादि, अतति–सततं गच्छति तांस्तान् पर्यायानित्यात्मा ततश्चात्मा–सद्रूपा रत्नप्रभा पृथिवी 'अन्न'त्ति अनात्मा असद्रूपेत्यर्थः 'सिय आया सिय नोआय'त्ति स्यात्सती स्यादसती 'सिय अवत्तव्वं'ति आत्मत्वेनानात्मत्वेन च व्यपदेष्टुमशक्यं वस्त्विति भावः, कथमवक्तव्यम्? इत्याह–आत्मेति च नोआत्मेति च वक्तुमशक्यमित्यर्थः, 'अप्पणो आइट्ठे'त्ति आत्मनः–स्वस्य रत्नप्रभाया एव वर्णादिपर्यायैः 'आदिष्टे' आदेशे सति तैर्व्यपदिष्टा सतीत्यर्थः आत्मा भवति, स्वपर्यायापेक्षया सतीत्यर्थः, 'परस्स आइट्ठे नोआय'त्ति परस्य शर्करादिपृथिव्यन्तरस्य पर्यायैरादिष्टे–आदेशे सति तैर्व्यपदिष्टा सतीत्यर्थः नोआत्मा–अनात्मा भवति, पररूपापेक्षयाऽसतीत्यर्थः।

'तदुभयस्स आइट्ठे अवत्तव्वं'ति तयोः–स्वपरयोरुभयं तदेव वोभयं तदुभयं तस्य पर्यायैरादिष्टे–आदेशे सति तदुभयपर्यायैर्व्यपदिष्टेत्यर्थः 'अवक्तव्यम्' अवाच्यं वस्तु स्यात्, तथाहि–न ह्यसौ आत्मेति वक्तुं शक्या, परपर्यायापेक्षयाऽनात्मत्वात्तस्याः, नाप्यनात्मेति वक्तुं शक्या,-स्वपर्यायापेक्षया तस्या आत्मत्वादिति, अवक्तव्यत्वं चात्मानात्मशब्दापेक्षयैव न तु सर्वथा, अवक्तव्यशब्देनैव तस्या उच्यमानत्वाद्, अनभिलाप्यभावामपि भावपदार्थःवस्तुप्रभृतिशब्दैरनभिलाप्यशब्देन वाऽभिलाप्यत्वादिति। एवं परमाणुसूत्रमपि।

द्विप्रदेशिकसूत्रे षड् भङ्गाः, तत्राद्यायः सकलस्कन्धापेक्षाः पूर्वोक्ता एव तदन्ये तु त्रयो देशापेक्षाः, तत्र च 'गोयमे'त्यत आरभ्य व्याख्यायते–'अप्पणो'त्ति स्वस्य पर्यायैः 'आदिट्ठे'त्ति आदिष्टे–आदेशे सति आदिष्ट इत्यर्थः द्विप्रदेशिकस्कन्ध आत्मा भवति १ एवं परस्य पर्यायैरा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिष्टोऽनात्मा २ तदुभयस्य–द्विप्रदेशिकस्कन्धतदन्यस्कन्धलक्षणस्य पर्यायैरादिष्टोऽसाववक्तव्यं वस्तु स्यात्, कथम् ?, आत्मेति चानात्मेति चेति २। तथा द्विप्रदेशत्वात्तस्य देश एक आदिष्टः, सद्भावप्रधानाः–सत्तानुगताः पर्यवा यस्मिन् स सद्भावपर्यवः, अथवा तृतीयाबहुवचनमिदं स्वपर्यवैरित्यर्थः, द्वितीयस्तु देश आदिष्टः असद्भावपर्यवः परपर्यायैरित्यर्थः, परपर्यवाश्च तदीयद्वितीयदेशसम्बन्धिनो वस्त्वन्तरसम्बन्धिनो वेति, ततश्चासौ द्विप्रदेशिकः स्कन्धः क्रमेणात्मा चेति नोआत्मा चेति ४, तथा तस्य देश आदिष्टः सद्भावपर्यवो देशश्चोभयपर्यवस्ततोऽसावात्मा चावक्तव्यं चेति ५, तथा तस्यैव देश आदि-ष्टोऽसद्भावपर्यवो देशस्तूभयपर्यवस्ततोऽसौ नोआत्मा चावक्तव्यं च स्यादिति ६, सप्तमः पुनरात्मा च नोआत्मा चावक्तव्यं चेत्येवंरूपो न भवति द्विप्रदेशिके द्व्यंशत्वादस्य त्रिप्रदेशिकादौ तु स्यादिति सप्तभङ्गी।

त्रिप्रदेशिकस्कन्धे तु त्रयोदश भङ्गास्तत्र पूर्वोक्तेषु सप्तस्वाद्याः सकलादेशायस्तथैव, तदन्येषु तु त्रिषु त्रयस्त्रय एकवचनबहुवचनभेदात्, सप्तमस्त्वेकविधि एव, यच्चेह प्रदेशद्वयेऽप्येकवचनं क्वचित्तत्तस्य प्रदेशद्वयस्यैकप्रदेशावगाढत्वाहेतुनैकत्वविवक्षणात्, भेदविवक्षायां च बहुवचनमिति चतुष्प्रदेशिकेऽप्येवं नवरमेकोनविंशतिर्भङ्गाः, तत्र त्रयः सकलादेशाः तथैव शेषेषु चतुर्षु प्रत्येकं चत्वारो विकल्पाः, ते चैवं चतुर्थादिषु त्रिषु– सप्तमस्त्वेवम्–। पञ्चप्रदेशिके तु द्वाविंशति-स्तत्राद्यास्त्र-यस्तथैव, तदुत्तरेषु च त्रिषु प्रत्येकं चत्वारो विकल्पास्तथैव, सप्तमे तु सप्त, तत्र त्रिकसंयोगे किलाष्टौ भङ्गका भवन्ति, तेषु च सप्तैवेह ग्राह्या एकस्तु तेषु च सप्तैवेह ग्राह्या एकस्तु तेषु न पतत्यसम्भवात्।

इदमेवाह–'तिगसंजोगे' त्यादि, षट्प्रदेशिके त्रयोविंशतिरिति।

शतकं–१२ उद्देशकः–१० समाप्तः

गम्भीररूपस्य महोदधेर्य्योतः परं पारमुपैति मङ्क्षु।
गतावशक्तोऽपि निजप्रकृत्या, कस्याप्यष्टस्य विजृम्भितं तत्।

**शतकं–१२ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवती अङ्गसूत्रे**
**अभयदेवसूरि विरचिता द्वादशशतकस्य टीका परिसमाप्ता।**

## शतकं–१३

**वृ.** व्याख्यातं द्वादशं शतं, तत्रचानेकधा जीवादयः पदार्था उक्ताः, त्रयोदशशतेऽपि त एव भङ्ग्यन्तरेणोच्यन्त इत्येवं सम्बन्धमिदं व्याख्यायते, तत्र पुनरियमुद्देशकसङ्ग्रहगाथा–

**मू.** *(५६३) पुढवी १ देव २ मनंतर ३ पुढवी ४ आहारमेव ५ उववाए ६।*
*भासा ७ कम ८ अनगारे केयाघडिया ९ समुग्घाए १०।*

**वृ.** पुढवी' त्यादि, 'पुढवी' ति नरकपृथिवीविषयः प्रथमः १, 'देव' त्ति देवप्ररूपणार्थो द्वितीयः २ 'अनंतर' त्ति अनन्तराहारा नारका इत्याद्यर्थः प्रतिपादनपरस्तृतीयः ३, 'पुढवि' त्ति पृथिवीगतव-क्तव्यताप्रतिबद्धश्चतुर्थः ४, 'आहारे' त्ति नारकाद्याहारप्ररूपणार्थः पञ्चमः ५, 'उववाए' त्ति नारका-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

द्युपपातार्थः षष्ठः ६, 'भास'त्ति भाषार्थः सप्तमः ७ 'कम्म'त्ति कर्म्मप्रकृतिप्ररूपणार्थोऽष्टमः ८, 'अनगारे केयाघडिय'त्ति अनगारो-भावितात्मा लब्धिसामर्थ्यात 'केयाघडिय'त्ति रज्जुबद्धघटिकाहस्तः सन् विहायसि व्रजेदित्याद्यर्थःप्रतिपादनार्थो नवमः ९, 'समुग्घाए'त्ति समुद्घातप्रतिपादनार्थो दशम इति।

## -: शतकं-१३ उद्देशकः-१ :-

*मू. (५६४) रायगिहे जाव एवं वयासी-कति णं भंते! पुढवीओ पन्नत्ताओ?, गोयमा! सत्त पुढवीओ पन्नत्ताओ, तंजहा-रयणप्पभा जाव अहेसत्तमा।*

*इमीसे णं भंते! रयणप्पभाए पढवीए केवतिया निरयावाससयसहस्सा पण्णत्ता?, गोयमा तीसं निरयावाससयसहस्सा पन्नत्ता, ते णं भंते! किं संखेज्ञवित्थडा असंखेज्ञवित्थडा?, गोयमा संखेज्ञवित्थडावि असंखेज्ञवित्थडावि।*

*इमीसे णं भंते! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्ञवित्थडेसु नरएसु एगसमएणं केवतिया नेरइया उववज्ञंति १? केवतिया काउलेस्सा उववज्ञंति २? केवइया कण्हपक्खिया उववज्ञंति ३? केवतिया सुक्कपक्खिया उववज्ञंति ४? केवतिया सन्नी उववज्ञंति ५? केवतिया असन्नी उववज्ञंति ६? केवतिया भवसिद्धया उव० ७? केवतिया अभवसिद्धीया उवव० ८? केवतिया आभिनिबोहियनाणी उव० ९?*

*-केवइया सुयनाणी उव० १०? केवइया ओहिनाणी उवव ११? केवइया मइअन्नाण उवव० १२? केवइया सुयअन्नाणी उव० १३? केवइया विब्भंगनाणी उवव० १४? केवइया चक्खुदंसणी उवव० १५? केवइया अचक्खुदंसणी उवव० १६? केवइया ओहिदंसणी उवव० १७? केवइया आहारसन्नोवउत्ता उवव० १८? केवइया भयसन्नोवउत्ता उव० १९।*

*-केवइया मेहुणसन्नोवउत्ता उवव २०? केवइया परिग्गहसन्नोवउत्ता उवव० २१? केवइया इत्थिवेयगा उवव० २२? केवइया पुरिसवेदगा उवव० २३? केवइया नपुंसगवेदगा उवव० २४? केवइया कोहकसाई उवव० २५? जाव केवइया लोभकसायी उवव० २८? केवइया सोइंदियउवउत्ता उव० २९।*

*-जाव केवइया फासिंदियोवउत्ता उव० ३३? केवइया नोइंदियोवउत्ता उव० ३४? केवतिया मणजोगी उवव० ३५? केवतिया वइजोगी उवव० ३६? केवतिया कायजोगी उवव० ३७? केवतिया सागारोवउत्ता उवव० ३८? केवतिया अणनगारोवउत्ता उवव० ३९*

*गोयमा! इमीसे णं रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्ञवित्थडेसु नरएसु जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा नेरइया उवव०, जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्ञा काउलेस्सा उव०, जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कसेणं संखेज्ञा कण्हपक्खिया उव०, एवं सुक्कपक्खियावि, एवं सन्नी एवं असन्नोवि एवं भवसिद्धीया एवं अभवसिद्धिया आभिनिबोहियना० सुयना० ओहिना० मइअन्नाणी सुयअन्नाणी विभंगना० चक्खुदंसणी ण उवव० जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसे० संखे० अचक्खुसणी उवव० एवं ओहिदंसणीवि*

*आहारसन्नोवउत्तावि जाव परिग्गहसन्नोवउ० इत्थीवेयगा न उव० पुरिसवेयगावि न उव० जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा नपुंसगवेदगा उवव० एवं कोहकसाई*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाव लोभ० सोइंदियउवउत्ता न उवव० एवं जाव फासिंदिओवउत्ता न उवव० जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा नोइंदिओवउत्ता उववज्ञंति मणजोगी ण उववज्ञंति एवं वइजोगिवी जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा कायजोगी उववज्ञंति एवं सागरोवउत्तावि एवं अनागारोवउत्तावि ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्ञवित्थडेसु नरएसु एगसमएणं केवइया नेरइया उववट्टंति ? केवतिया काउलेस्सा उववट्टंति ? जाव केवतिया अनागारोवउत्ता उव्वट्टंति ?, गोयमा ! इमीसे णं रयणप्पभाए पुढवीए तीसाए निरयावास-सयसहस्सेसु संखेज्ञवित्थडेसु नरएसु एगसमएणं जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा नेरइया उववट्टंति, एवं जाव सन्नी, असन्नी न उव्वट्टंति, जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा भवसिद्धीया उव्वट्टंति एवं जाव सुयअन्नाणी विभंगनाणी न उववट्टंति ।

चक्खुदंसणी न उव्वट्टंति, जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा अचक्खुदंसणी उव्वट्टंति, एवं जाव लोभकसायी, सोइंदियउवउत्ता न उव्वट्टंति एवं जाव फासिंदियोवउत्ता न उव्वट्टंति, जहन्नेणं एक्को व दो वा तिन्नि वा उक्कासेणं संखेज्ञा नोइंदियोवउत्ता उव्वट्टंति मणजोगी न उव्वट्टंति एवं वइजोगीवि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा कायजोगी उव्वट्टंति वं सागारोवउत्ता अनागारोवउत्ता ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखज्ञवित्थडेसु नरएसु केवइया नेरइया पन्नत्ता ? केवइया काउलेस्सा जाव केवतिया अनागारोवउत्ता पन्नत्ता ? केवतिया अनंतरोववन्नगा पन्नत्ता १ ? केवइया परंपरोववन्नगा पन्नत्ता २ ? केवइया अनंतरोगाढा पन्नत्ता ३ ? केवइया परंपरोगाढा प० ४ ? केवइया अनंतराहारा पं० ५ ? केवतिया परंपराहारा ६ ? केवतिया अनंतरपज्ञत्ता प० ७ ? केवतिया परंपरपज्ञत्ता पन्नत्ता ८ ? केवतिया चरिमा प० ९ ? केवतिया अचरिमा पं० १० ?

गोयमा ! इमीसे रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्ञवित्थडेसु नरएसु संखेज्ञा नेरतिया प० संखेज्ञा काउलेसा प० एवं जाव संखेज्ञा सन्नी प०, असन्नी सिय अत्थि सिय नत्थि जइ अत्थि जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा प०, संखेज्ञा भवसिद्धी प० एवं जाव संखेज्ञा परिग्गहसन्नोवउत्ता प० इत्थिवेदगा नत्थि पुरिसवेदगा नत्थि संखेज्ञा नपुंसगवेदगा प०, एवं कोहकसायीवि मानकसाई जहा असन्नी एवं जाव लोभक० संखेज्ञा सोइंदियोवउत्ता प० एवं जाव फासिंदियोवउत्ता नोइंदियोवउत्ता जहा असन्नी संखेज्ञा मणजोगी प० एवं जाव अणागा- रोवउत्ता, अणंतरोववन्नगा सिय अत्थि सिय नत्थि जइ अत्थि जहा असन्नी, संखेज्ञा परंपरोववन्न० प०, एवं जहा अनंतरोववन्नगा तहा अनंतरोगाढगा अनंतरा-हारगा अनंतरपज्ञत्तगा परंपरोगाढगा जाव अचरिमा जहा परंपरोववन्नगा ।

इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु असंखेज्ञवित्थडेसु एगसमएणं केवतिया नेरइया उववज्ञंति जाव केवतिया अनागारोवउत्ता उववज्ञंति ?, गोयमा इमीसे रयणप्पभाए पढवीए तीसाए निरयावाससयसहस्सेसु असंखेज्ञवित्थडेसु नरएसु एगसमएणं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जह० एक्कं वा दो वा तिन्नि वा उक्को० असंखेज्ञा नेरइया उववo, एवं जहेव संखेज्ञवित्थडेसु तिन्नि गमगा तहा असंखेज्ञवित्थडेसुवि तिन्नि गमगा, नवरं असंखेज्ञा भा० सेसं तं चेव जाव असंखेज्ञा अचरिमा प०, नाणत्तं लेस्सासु, लेसाओ जहा पढमसए नवरं संखेज्ञवित्थडेसुवि असंखेज्ञवित्थडेसुवि ओहिनाणी ओहिदंसणी य संखेज्ञा उव्वट्टावेयव्वा, सेसं तं चेव।*

*सक्करप्पभाए णं भंते! पुढवीए केवतिया निरयावास० पुच्छा, गोयमा! पणवीसं निरयावास-सयसहस्सा पन्नत्ता, ते णं भंते! किं संखेज्ञवित्थडा असंखेज्ञवित्थडा एवं जहा रयणप्पभाए तहा सक्करप्पभाएवि, नवरं असन्नी तिसुवि गमएसु न भन्नति, सेसं तं चेव।*

*वालुयप्पभाए णं पुच्छा, गोयमा! पन्नरस निरया वाससयसहस्सा प० सेसं जहा सक्करप्पभाए नाणत्तं लेसासु लेसाओ जहा पढमसए। पंकप्पभाए पुच्छा, गोयमा! दस निरयावास०, एवं जहा सक्करप्पभाए नवरं ओहिनाणी ओहिदंसणी य न उव्वट्टंति, सेसं तं चेव।*

*धूमप्पभाए णं पुच्छा, गोयमा! तिन्नि निरयावाससयसहस्सा एवं जहा पंकप्पभाए।*

*तमाए णं भंते! पुढवीए केवतिया निरयावास० पुच्छा, गोयमा! एगे पंचूणे निरयावाससयसहस्से पण्णत्ते, सेसं जहा पंकप्पभाए।*

*अहेसत्तमाए णं भंते! पुढवीए कति अनुत्तरा महतिमहालया महानिरया प० गो० ?, पंच अनुत्तरा जाव अपइट्ठाणे।*

*ते णं भंते! किं संखेज्ञवित्थडा असंखेज्ञवित्थडा ?, गोयमा! संखेज्ञवित्थडे य असंखेज्ञवित्थडा य, अहेसत्तमाए णं भंते! पुढवीए पंचसु अनुत्तरेसु महतिमहालया जाव महानिरएसु संखेज्ञवित्थडे नरए एगसमएणं केवतिया उव० ?, एवं जहा पंकप्पभाए नवरं तिसु नाणेसु न उवव० न उवट्टं०, पन्नत्त एसु तहेव अत्थि, एवं असंखेज्ञवित्थडेसुवि नवरं असंखेज्ञा भाणियव्वो*

**वृ.** तत्र प्रथमोद्देशके किञ्चिल्लिख्यते-'केवइ काउलेसा उववज्जंति' त्ति रत्नप्रभापृथिव्यां कापोतलेश्या एवोत्पद्यन्ते न कृष्णलेश्यादय इति कापोतलेश्यानेवाश्रित्य प्रश्नः कृत इति। 'केवइया कण्हपक्खिए' इत्यादि, एषां च लक्षणमिदं-

॥१॥ "जेसिमवड्ढो पोग्गलपरियट्टो सेसओ उ संसारो।
ते सुक्कपक्खिया खलु अहिगे पुण कण्हपक्खीया॥"

चक्खुदंसणी न उववज्जंति' त्ति इन्द्रियत्यागेन तत्रोत्पत्तेरिति, तर्हि अचक्षुर्दर्शनिनः कथमुत्पद्यन्ते?, उच्यते, इन्द्रियानाश्रितस्य सामान्योपयोगमात्रस्याचक्षुर्दर्शनशब्दाभिधेयतस्योत्पाद-समयेऽपि भावादचक्षुर्दर्शनिन उत्पद्यन्त इत्युच्यत इति, 'इत्थीवेयगे' त्यादि, स्त्रीपुरुषवेदा नोत्पद्यन्ते भवप्रत्ययान्नपुंसकवेदत्वात्तेषां, 'सोइंदिओवउत्ता' इत्यादि श्रोत्राद्युपयुक्ता नोत्पद्यन्ते इन्द्रियाणां तदानीमभावात् 'नोइंदिओवउत्ता उववज्जंति' त्ति नोइन्द्रियं-मनस्तत्र च यद्यपि मनःपर्याप्त्यभावे द्रव्यमनो नास्ति तथाऽपि भावमनसश्चैतन्यरूपस्य सदा भावात्तेनोपयुक्तानामुत्पत्तेर्नोइन्द्रियोपयुक्ता उत्पद्यन्त इत्युच्यत इति, 'मनजोगी' त्यादि मनोयोगिनो वाग्योगिनश्च नोत्पद्यन्ते, उत्पत्तिसमयेऽ-पर्याप्तकत्वेन मनोवाचोरभावादिति, 'कायजोगी उववज्जंति' त्ति सर्वसंसारिणां काययोगस्य सदैव भावादिति।

अथ रत्नप्रभानारकाणामेवोद्वर्त्तनामभिधातुमाह-'इमीसे ण' मित्यादि, 'असन्नी न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उववज्रंति'त्ति उद्धर्तना हि परभवप्रथमसमये स्यात् न च नारका असञ्ज्ञिषूत्पद्यन्तेऽ-तस्तेऽसञ्ज्ञिनः सन्तो नोद्वर्त्तन्त इत्युच्यते, एवं 'विभंगनाणी न उववट्टंती'त्यपि भावनीयं, शेषाणि तु पदान्युत्पादवद्वयाख्येयानि, उक्तञ्च चूर्ण्याम्–

॥१॥ "असन्निणो य विब्भंगिणो य उव्वट्टणाइ वज्रेज्रा।
दोसुवि य चक्खुदंसणी मणवइ तह इंदियाइं वा॥" इति॥

अनन्तरं रत्नप्रभनारकाणामुत्पादे उद्वर्त्तनायां च परिमाणमुक्तमथ तेषामेव सत्तायां तदाह–'इमीसे ण'मित्यादि, 'केवइया अनंतरोववन्नग'त्ति कियन्तः प्रथमसमयोत्पन्नाः? इत्यर्थः 'परंपरोववन्नग'त्ति उत्पत्तिसमयापेक्षया द्वयादिसमयेषु वर्त्तमानाः 'अनंतरावगाढ'त्ति विवक्षितक्षेत्रे प्रथमसमयावगाढाः 'परंपरोगाढ'त्ति विवक्षितक्षेत्रे द्वितीयादिकः समयोऽवगाढे येषां ते परम्परावगाढाः 'केवइया चरिम'त्ति चरमो नारकभवेषु स एव भवो येषां ते चरमाः, नारकभवस्य वा चरमसमये वर्त्तमानाश्चरमाः, अचरमास्त्वितरे, 'असन्नी सिय अत्थि सिय नत्थि'त्ति असञ्ज्ञिभ्य उद्वृत्य ये नारकत्वेनोत्पन्नास्तेऽपर्याप्तकावस्थायामसञ्ज्ञिनो भूतभावत्वात्ते चाल्पा इति कृत्वा 'सिय अत्थी'त्याद्युक्तं, मानमायालोभकषायोपयुक्तानां नोइन्द्रियोपयुक्तानमनन्तरोपपन्नानामनन्तरावगाढानामनन्तराहारकाणामनन्तरपर्याप्तकानां च कादाचित्कत्वात् 'सिय अत्थि' इत्यादि वाच्यं, शेषाणां तु बहुत्वात्सङ्ख्याता इति वार्च्यमिति।

अनन्तरं सङ्ख्यातविस्तृतनरकावासनारकवक्तव्यतोक्ता, अथ तद्विपर्यवक्तव्यतामभिधातुमाह– 'इमीसे ण'मित्यादि, 'तिन्नि गमग'त्ति 'उववज्रंति उव्वट्टंति पन्नत्त'त्ति एते त्रयो गमाः, 'ओहिनाणी ओहिदंसणी य संखेज्रा उव्वट्टावेयव्व'त्ति कथं?, ते हि तीर्थःङ्करादय एव भवन्ति, ते च स्तोकाः स्तोकत्वाच्च सङ्ख्याता एवेति, 'नवरं असन्नीतिसुवि गमएसु न भन्नति' कस्मात्?, उच्यते–असञ्ज्ञिनः प्रथमायामेवोत्पद्यन्ते 'असन्नी खलु पढमं' इति वचनादिति, 'नाणत्तं लेसासु लेसाओ जहा पढमसए'त्ति, इहाद्यपृथिवीद्वयापेक्षया तृतीयादिपृथिवीषु नानात्वं लेश्यासु भवति, ताश्च यथा प्रथमशते तथाऽध्येयाः, तत्र च सङ्ग्रहगाथेयं–

॥१॥ "काऊ दोसु तइयाइ मीसिया नीलिया चउत्थीए।
पंचमिए मीसा कण्हा तत्तो परमकण्हा॥" इति।

'नवरं ओहिनाणी ओहिदंसणी य न उववज्रंति'त्ति, कस्मात्?, उच्यते, ते हि प्रायस्तीर्थःकरा एव, ते च चतुर्थ्या उद्वृत्ता नोत्पद्यत इति, 'जाव अपइट्ठाणे'त्ति इह यावत्करणात् 'काले महाकाले रोरुए महारोरुए'त्ति दृश्यम् इह च मध्यम एव सङ्ख्येयविस्तृत इति, 'नवरं तिसु नाणेसु न उववज्रंति न उव्वट्टंति'त्ति सम्यक्त्वभ्रष्टानामेव तत्रोत्पादात् तत उद्वर्त्तनाच्चाद्येषु त्रिषु ज्ञानेषु नोत्पद्यन्ते नापि चोद्वर्त्तन्त इति 'पन्नत्ताएसु तहेव अत्थि'त्ति एतेषु पञ्चसु नरकावासेषु कियन्त आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनोऽवधिज्ञानिनश्च प्रज्ञप्ताः? इत्यत्र तृतीयगमे तथैव– प्रथमादिपृथिवीष्विव सन्ति, तत्रोत्पन्नानां सम्यग्दर्शनलाभे आभिनिबोधिकादिज्ञानत्रयभावादिति

*मू. (५६५) इमीसे णं भंते! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्रवि० नरएसु किं सम्मद्दीट्ठी नेरतिया उवव० मिच्छदिट्ठी ने० उव० सम्मामिच्छदिट्ठी नेर० उव०?, गोयमा! सम्मदिट्ठीवि नेरइया उव० मिच्छादिट्ठीवि नेरइया उव० नो सम्मामिच्छदिट्ठी उव०।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्जवित्थडेसु नरएसु किं सम्मदिट्ठी नेर० उव्वट्टंति एवं चेव ।*

*इमीसे णं भंते ! रयणप्पभाए पुढवीए तीसाए निरयावाससयसहस्सेसु संखेज्जवित्थडा नरगा किं सम्मद्दिट्ठीहिं नेरइएहिं अविरहिया मिच्छादिट्ठीहिं नेरइएहिं अविरहिया सम्मामिच्छदिट्ठीहिं नेरइएहिं अविरहिया वा ?, गोयमा ! सम्मद्दिट्ठीहिंवि नेरइएहिं अविरहिया मिच्छादिट्ठीहिंवि अविरहिया सम्मामिच्छादिट्ठीहिं अविरहिया विरहिया वा, एवं असंखेज्जवित्थडेसुवि तिन्नि गमगा भाणियव्वा, एवं सक्करप्पभाएवि, एवं जाव तमाएवि ।*

*अहेसत्तमाए णं भंते! पुढवीए पंचसु अनुत्तरेसु जाव संखेज्जवित्थडे नरए किं सम्मद्दिट्ठी नेरइया पुच्छा, गोयमा! सम्मद्दिट्ठी नेरइया न उवव० मिच्छादिट्ठी नेरइया उवव० सम्मामिच्छदिट्ठी नेरइया न उवव० एवं उववट्टंतिवि अविरहिए जहेव रयणप्पभाए, एवं असंखेज्जवित्थडेसुवि तिन्नि गमगा*

**वृ.** अथ रत्नप्रभादिनारकवक्तव्यतामेव सम्यग्दृष्ट्यादीनाश्रित्याह–'इमीसे ण' मित्यादि, 'नो सम्मामिच्छादिट्ठी उववज्जंति' त्ति "न सम्ममिच्छो कुणइ काल" मिति वचनात् मिश्रदृष्टयो न म्रियन्ते नापि तद्भवप्रत्ययं तेषामवधिज्ञानं स्यात् येन मिश्रदृष्ट्यः सन्तस्ते उत्पद्येरन्, 'सम्मामिच्छदिट्ठीहिं नेरइएहिं अविरहिया विरहिया व' त्ति कादाचित्कत्वेन तेषां विरहसंम्भवादिति अथ नारकवक्तव्यताव भङ्ग्यन्तरेणाह–

**मू. (५६६)** *से नूनं भंते ! कण्हलेस्से नीललेस्से जाव सुक्कलेस्से भवित्ता कण्हलेस्सेसु नेरइएसु उवव० ?, हंता गोयमा ! कण्हलेस्से जाव उववज्जंति, से केणट्ठेणं भंते ! एवं वुच्चइ कण्ह- लेस्से जाव उववज्जंति ?, गोयमा ! लेस्सट्ठाणेसु संकिलिस्समाणेसु संकि० २ कण्हलेसं परिणमइ कण्ह० २ कण्हलेसेसु नेरइएसु उववज्जंति से तेणट्ठेणं जाव उववज्जंति ।*

*से नूनं भंते ! कण्हलेस्स जाव सुक्कले स्से भवित्ता नीललेस्सेसु नेरइएसु उववज्जंति ?, हंता गोयमा ! जाव उववज्जंति, से केणट्ठेणं जाव उववज्जंति ?, गोयमा ! लेस्सट्ठाणेसु संकिलिस्समाणेसु वा विसुज्झमाणेसु नीललेस्सं परिणमंति नील० २ नीललेस्सेसु उवव से तेणट्ठेणं गोयमा जाव उवव० । से नूणं भंते ! कण्हलेस्से नील जाव भवित्ता काउलेस्सेसु नेरइएसु उवव० एवं जहा नीललेस्सा तहा काउलेस्सावि भाणियव्वा जाव से तेणट्ठेणं जाव उववज्जंति । सेवं भंते ! सेवं भंत*

**वृ.** 'से नून' मित्यादि, 'लेसट्ठाणेसु' त्ति लेश्याभेदेषु 'संकिलिस्समाणेसु' त्ति अविशुद्धिं गच्छत्सु 'कण्हलेसं परिणमइ' त्ति कृष्णलेश्यां याति ततश्च 'कण्हलेसे' त्यादि ।

'संकिलिस्समाणेसु वा विसुद्धमाणेसु च' त्ति प्रशस्तलेश्यास्थानेषु अविशुद्धिं गच्छत्सु अप्रशस्तलेश्यास्थानेषु च विशुद्धिं गच्छत्सु, नीललेश्यां परिणमतीति भावः ।

शतकं–१३ उद्देशकः–१ समाप्तः

---

**–: शतकं–१३ उद्देशकः–२ :–**

**वृ.** प्रथमोद्देशके नारका उक्ताः द्वितीये त्वौपपातिकत्वसाधर्म्याद्देवा उच्यन्ते इत्येवंसम्बन्धस्यास्येदं सूत्रम्–

**मू. (५६७)** *कइविहा णं भंते ! देवा पन्नत्ता ?, गोयमा ! चउव्विहा देवा पन्नत्ता, तंजहा–भवणवासी वाणमंतरा जो० वेमा० । भवणवासी णं भंते ! देवा कतिविहा पन्नत्ता ?,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा ! दसविहा पन्नत्ता, तंजहा–असुरकुमारा एवं भेओ जहा बितियसए देवुद्देसए जाव अपराजिया सव्वट्ठसिद्धगा ।

केवइया णं भंते ! असुरकुमारावाससयसहस्सा पन्नत्ता ?, गोयमा ! चोसट्ठिं असुरकुमारावाससयसहस्सा पन्नत्ता, ते णं भंते ! किं संखेज्जवित्थडा असंखेज्जवि० ?, गोयमा ! संखेज्जवित्थडावि असंखेज्जवि० चोसट्ठी णं भंते ! असुरकुमारावाससयसहस्सेसु संखेज्जवित्थडेसु असुरकुमारावासेसु एगसमएणं केवतिया असुरकुमारा उवव० जाव केवतिया तेउलेसा उवव० केवतिया कण्हपक्खिया उववज्जंति एवं जहा रयणप्पभाए तहेव पुच्छा तहेव वागरणं नवरं दोहिं वेदेहिं उववज्जंति, नपुंसगवेयगा न उवव०, सेसं तं० उव्वट्टंतगावि तहेव नवरं असन्नी उव्वट्टंति, ओहिनाणी ओहिदंसणी य न उव्वट्टंति, सेसं तं चेव, पन्नत्तएसु तहेव नवरं संखेज्जगा इत्थिवेदगा पन्नत्ता एवं पुरिसवेदगावि, नपुंसगवेदगा नत्थि, कोहकसाई सिय अत्थि सिय नत्थि जइ अत्थि जह० एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा पन्नत्ता एवं माण माया संखेज्जा लोभकसाई पन्नत्ता सेसं तं चेव तिसुवि गमएसु संखेज्जेसु चत्तारि लेस्साओ भाणियव्वाओ, एवं असंखेज्जवित्थडेसुवि नवरं तिसुवि गमएसु असंखेज्जा भाणियव्वा जाव असंखेज्जा अचरिमा पन्नत्ता । केवतिया णं भंते ! नागकुमारावास० ? एवं जाव थणियकुमारा नवरं जत्थ जत्तिया भवणा ।

केवतिया णं भंते ! वाणमंतरावाससयसहस्सा पन्नत्ता ?, गोयमा ! असंखेज्जा वाणमंतरावाससयसहस्सा पन्नत्ता, ते णं भंते ! किं संखेज्जवित्थडा असंखेज्जवित्थडा ?, गोयमा ! संखेज्जवित्थडा नो असंखेज्जवित्थडा, संखेज्जेसु णं भंते ! वाणंतरावाससयसहस्सेसु एगसमएणं केवतिया वाणमंतरा उवव० ?, एवं जहा असुरकुमाराणं संखेज्जवित्थडेसु तिन्नि गमगा तहेव भाणियव्वा वाणमंतराणवि तिन्नि गमगा । केवतिया णं भंते ! जोतिसियविमाणावाससयसहस्सा पन्नत्ता ?, गोयमा ! असंखेज्जा जोइसियविमाणावाससयसहस्सा पण्णत्ता, ते णं भंते ! किं संखेज्जवित्थडा० ?, एवं जहा वाणमंतराणं तहा जोइसियाणवि तिन्नि गमगा भाणियव्वा नवरं एगा तेउलेस्सा, उववज्जंतेसु पन्नत्तेसु य असन्नी नत्थि, सेसं तं चेव ।

सोहम्मे णं भंते ! कप्पे केवतिया विमाणावाससयसहस्सा पन्नत्ता ?, गोयमा ! बत्तीसं विमाणावाससयसहस्सा पन्नत्ता, ते णं भंते ! किं संखेज्जवित्थडा असंखेज्जवित्थडा ?, गोयमा ! संखेज्जवित्थडावि असंखेज्जवित्थडावि, सोहम्मे णं भंते ! कप्पे बत्तीसाए विमाणावाससयसहस्सेसु संखेज्जवित्थडेसु विमाणेसु एगसमएणं केवतिया सोहम्मा देवा उववज्जंति ? केवतिया तेउलेसा उववज्जंति ? एवं जहा जोइसियाणं तिन्नि गमगा तहेव तिन्नि गमगा भाणियव्वा नवरं तिसुवि संखेज्जा भाणियव्वा, ओहिनाणी ओहिदंसणी य चयावेयव्वा, सेसं तं चेव ।

असंखेज्जवित्थडेसु एवं चेव तिन्नि गमगा नवरं तिसुवि गमएसु असंखेज्जा भाणियव्वा, ओहिनाणी य ओहिदंसणी य संखेज्जा चयंति, सेसं तं चेव, एवं जहा सोहम्मे वत्तव्वया भणिया तहा ईसाणेवि छ गमगा भाणियव्वा, सणंकुमारे एवं चेव नवरं इत्थीवेयगा न उववज्जंति पन्नत्तेसु य न भण्णंति, असन्नी तिसुवि गमएसु न भण्णंति, सेसं तं चेव, एवं जाव सहस्सारे, नाणत्तं विमाणेसु लेस्सासु य, सेसं तं चेव ।

आणयपाणयेसु णं भंते ! कप्पेसु केवतिया विमाणावाससया पन्नत्ता ?, गोयमा ! चत्तारि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विमाणावाससया पन्नत्ता, ते णं भंते! किं संखेज्ज० असंखे० गोयमा! संखेज्ज वित्थ० असंखेज्जवि० एवं संखेज्जवित्थडेसु तिन्नि गमगा जहा सहस्सारे असंखेज्जवित्थडे० उववज्जंतेसु य चयंतेसु य एवं चेव संखेज्जा भाणियव्वा पन्नत्तेसु असंखेज्जा नवरं नोइंदियोउत्ता अनंतरोववन्नगा अनंतरोगाढगा अनंतराहारगा अणंतरपज्जत्तगा य एएसिं जहन्नेणं एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा प०॥ सेसा असंखेज्जा भाणियव्वा।*

*आरणच्चुएसु एवं चेव जहा आणयपाणएसु नाणत्तं विमाणेसु, एवं गेवेज्जगावि।*

*कति णं भंते! अनुत्तरविमाणा पन्नत्ता?, गोयमा! पंच अनुत्तरविमाणा पन्नत्ता, ते णं भंते! किं संखेज्जवित्थडा असंखेज्जवित्थडा?, गोयमा! संखेज्जवित्थडे य असंखेज्जवित्थडा य।*

*पंचसु णं भंते! अनुत्तरविमाणेसु संखेज्जवित्थडे विमाणे एगसमएणं केवतिया अनुत्तरोववाइया देवा उवव०?, केवतिया सुक्कलेस्सा उवव०? पुच्छा, तहेव गोयमा! पंचसु णं अनुत्तरविमाणेसु संखेज्जवित्थडे अनुत्तरविमाणे एगसमएणं जह० एक्कं वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा अनुत्तरोववाइया देवा उववज्जंति एवं जहा गेवेज्जविमाणेसु संखेज्जवित्थडेसु नवरं किण्हपक्खिया अभवसिद्धिया तिसु अन्नाणेसु एए न उववज्जंति न चयंति न पन्नत्तएसु भाणियव्वा अचरिमावि खोडिज्जंति जाव संखेज्जा चरिमा पं० सेसं तं०, असंखेज्जवित्थडेसुवि एए न भन्नंति नवरं अचरिमा अत्थि, सेसं जहा गेवेज्जएसु असंखेज्जवित्थडेसु जाव असंखेज्जा अचरिमा प०।*

*चोसट्ठीए णं भंते! असुरकुमारावाससयसहस्सेसु संखेज्जवित्थडेसु असुरकुमारावासेसु किं सम्मद्दिट्ठी असुरकुमारा उवव० मिच्छादिट्ठी एवं जहा रयणप्पभाए तिन्नि आलावगा भणिया तहा भाणियव्वा, एवं असंखेज्जवित्थडेसुवि तिन्नि गमगा, वं जाव गेवेज्जवि० अनुत्तरवि० एवं चेव, नवरं तिसुवि आलावएसु मिच्छादिट्ठी सम्मामिच्छादिट्ठी य न भन्नंति, सेसं तं चेव।*

*से नूनं भंते! कण्हलेस्सा नीलजाव सुक्कलेस्से भवित्ता कण्हलेस्सेसु देवेसु उवव०?, हंता गोयमा! एवं जहेव नेरइएसु पढमे उद्देसए तहेव भाणियव्वं, नीललेसाएवि जहेव नेरइयाणं जहा नीललेस्साए, एवं जाव पम्हलेस्सेसु सुक्कलेस्सेसु एवं चेव, नवरं लेस्सट्ठाणेसु विसुज्झमाणेसु वि० २ सुक्कलेस्सं परणमति सु० २ सुक्कलेस्सेसु देवेसु उववज्जंति, से तेणट्ठेणं जाव उववज्जंति। सेवं भंते! सेवं भंते!।*

**वृ.** 'कइविहे'त्यादि, 'संखेज्जवित्थडावि असंखेज्जवित्थडावि'त्ति इह गाथा—

॥१॥ "जंबुद्दीवसमा खलु भवणा जे हुंति सव्वखुड्डागा।
संखेज्जवित्थडा मज्झिमा उ सेसा असंखेज्जा॥ इति

'दोहिवि वेदेहिं उववज्जंति'त्ति द्वयोरपि स्त्रीपुंवेदयोरुत्पद्यन्ते, तयोरेव तेषु भावात्, 'असन्नी उव्वट्टंति'त्ति असुरादीशानान्तदेवानामसञ्ज्ञिष्वपि पृथिव्यादिषूत्पादात्, 'ओहिनाणी ओहिदंसणी य न उव्वट्टंति'त्ति असुराद्युद्वृत्तानां तीर्थःकरादित्वालाभात् तीर्थःकरादीनामेवावधिमतामुद्वृत्तेः, 'पन्नत्तएसु तहेव'त्ति 'प्रज्ञप्तकेषु' प्रज्ञप्तदोपलक्षितगमाधीतेष्वसुरकुमारेषु तथैव यथा प्रथमोद्देशके 'कोहकसाई'इत्यादि, क्रोधमानमायाकषायोदयवन्तो देवेषु कादाचित्का अत उक्तं 'सिय अत्थी'त्यादि, लोभकषायोदयवन्तस्तु सार्वदिका अत उक्तं 'संखेज्जा लोभकसाई पन्नत्त'त्ति, 'तिसुवि गमएसु चत्तारि लेसाओ भाणियव्वाओ'त्ति 'उववज्जंति उव्वट्टंति पन्नत्ता' इत्येवंलक्षणेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिष्वपि गमेषु चतो लेश्यास्तेजोलेश्यान्ता भणितवयाः, एता एव हि असुरकुमारादीनां भवन्तीति, 'जत्थ जत्तिया भवण'त्ति यत्र निकाये यावन्ति भवनलक्षाणि तत्र तावन्त्युच्चारणीयानि, यथा–

॥१॥ "चउसट्ठी असुराणं नागकुमाराण होइ चुलसीई।
बावत्तरि कणगाणं वाउकुमाराण छन्नउई॥

॥२॥ दीवदिसाउदहीणं विज्जुकमारिंदथणियमग्गीणं।
जुयलाणं पत्तेयं छावत्तरिमो सयहस्सा॥

–व्यन्तरसूत्रे 'संखेज्जवित्थड'त्ति, इह गाथा–

॥१॥ "जंबुद्दीवसमा खलु उक्कोसेणं हवंति ते नगरा।
खुड्डा खेत्तसमा खलु विदेहसमगा उ मज्झिमगा॥"

ज्योतिष्कसूत्रे सङ्ख्यातविस्तृता विमानावासाः 'एगसट्ठिभागं काऊण जोयण' मित्यादिना ग्रन्थेन प्रमातव्याः 'नवरं एगा तेउलेस्स'त्ति व्यन्तरेषु लेश्याचतुष्टयमुक्तमेतेषु तु तेजोलेश्यैवैका वाच्या, तथा 'उववज्जंतेसु पन्नत्तेसु य असन्नी नत्थि'त्ति व्यन्तरेष्वसञ्ज्ञिन उत्पद्यन्त इत्युक्तमिह तु तन्निषेधः, प्रज्ञप्तेष्वपीह तन्निषेध उत्पादाभावादिति। सौधर्म्मसूत्रे 'ओहिनाणी' ततश्च्युता यतस्तीर्थःकरादयो भवन्त्यतोऽवधिज्ञाना-दयश्चयावयितव्याः 'ओहिनाणी ओहिदंसणी य संखेज्जा चयति'त्ति सङ्ख्यातानामेव तीर्थःक- रादित्वेनोत्पादादिति।

'छ गमग'त्ति उत्पादादयः सङ्ख्यातविस्तृतानाश्रित्य अत एव च त्रयोऽसङ्ख्यात-विस्तृतानाश्रित्य एवं षड् गमाः, 'नवरं इत्थिवेयगे'त्यादि, स्त्रियः सनत्कुमारादिषु नोत्पद्यनेत न च सन्ति उद्वृत्तौ तु स्यु 'असन्नी तिसुवि गमएसु न भन्नइ'त्ति सनत्कुमारादिदेवानां सञ्ज्ञिभ्य एवोत्पादेन च्युतानां च सञ्ज्ञिष्वेव गमनेन गमत्रयेष्वसञ्ज्ञित्वस्याभावादिति।

'एवं जाव सहस्सारे'त्ति सहस्रारान्तेषु तिरश्चामुत्पादेनासङ्ख्यातानां त्रिष्वपि गमेषु भावादिति 'नाणत्तं विमाणेसु लेसासु य'त्ति तत्र विमानेषु नानात्वं 'बत्तीसअट्ठवीसे'त्यादिना ग्रन्थेन समवसेयं, लेश्यासु पुनरिदं–

॥१॥ तेउ १ तेऊ २ तहा तेउ पम्ह ३ तम्हा ४ य पम्हसुक्का य ५।
सुक्का य ६ परमसुक्का ७ सुक्काइविमाणवासीणं॥ इति,

इह च सर्वेष्वपि शुक्रादिदेवस्तानेषु परमशुक्लेति॥ आनतादिसूत्रे 'संखेज्जवित्थ-डेसु'इत्यादि, उत्पादेऽवस्थाने च्यवने च सङ्ख्यातविस्तृतत्वाद्विमानानां सङ्ख्याता एव भवन्तीति भावः, असङ्ख्यातविस्तृतेषु पुनरुत्पादच्यवनयोः सङ्ख्याता एव, यतो गर्भजमनुष्येभ्य एवान-तादिषूत्पद्यन्ते ते च सङ्ख्याता एव, तथाऽऽनतादिभ्यश्च्युता गर्भजमनुष्येष्वेवोत्पद्यन्तेऽतः समयेन सङ्ख्यातानामेवोत्पादच्यवनसम्भवः, अवस्थितिस्त्वसङ्ख्यातानामपि स्यादसङ्ख्यातजीवितत्वेनैकदैव जीवितकालेऽसङ्ख्यातानामुत्पादादिति। 'पन्नत्तेसु असंखेज्जा नवरं नोइंदिओवउत्ते'त्यादि प्रज्ञप्तक-गमेऽसङ्ख्येया वाच्याः केवलं नोइंद्रियोपयुक्तादिषु पञ्चसु पदेषु सङ्ख्याता एव, तेषामुत्पादावसर एव भावाद्, उत्पत्तिश्च सङ्ख्यातानामेवेति दर्शितं प्रागिति, 'पंच अनुत्तरोववाइय'त्ति तत्र मध्यमं सङ्ख्यातविस्तृतं योजनलक्षप्रमाणत्वादिति।

'नवरं कण्हपक्खिए'त्यादि, इह सम्यग्दृष्टीनामेत्पादात् कृष्णपाक्षिकादिपदानां गमत्रयेऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निषेधः, 'अचरिमावि खोडिज्जंति'त्ति येषां चरमोऽनुत्तरदेवभवः स एव ते चरमास्तदितरेत्वचरमास्ते च निषेधनीयाः, यतश्चरमा एव मध्यमे विमाने उत्पद्यन्त इति । 'असंखेज्जवित्थडेसुवि एए न भन्नंति'ति इहैते कृष्णपाक्षिकादयः 'नवरं अचरिमा अत्थि'त्ति यतो बाह्यविमानेषु पुनरुत्पद्यन्त इति । 'तिन्नि आलावग'त्ति सम्यग्दृष्टिमिथ्यादृष्टिसम्यग्मिथ्यादृष्टिविषया इति ।

'नवरं तिसुवि आलावगेसु' इत्यादि, उप्पत्तीए चवणे पन्नत्तालावए य मिथ्यादृष्टि सम्यग्मिथ्यादृष्टिश्च न वाच्यः, अनुत्तरसुरेषु तस्यासम्भवादिति । त्रयोदशशते द्वितीयः ।

शतकं-१३ उद्देशकः-२ समाप्तः

## -: शतकं-१३ उद्देशकः-३ :-

**वृ.** अनन्तरोद्देशके देववक्तव्यतोक्ता, देवाश्च प्रायः परिचारणावन्त इति परिचारणा-निरूपणार्थं तृतीयोद्देशकमाह, तस्य चेदमादि सूत्रम्-

**मू. (५६८)** *नेरइया णं भंते ! अनंतराहारा ततो निव्वत्तणया एवं परियारणापदं निरवसेसं भाणियव्वं । सेवं भंते ! सेवं भंते ! ।*

**वृ.** 'नेरइया ण'मित्यादि, 'अनंतराहार'त्ति उपपातक्षेत्रप्राप्तिसमय एवाहारयन्तीत्यर्थः, 'तओ निव्वत्तणय'त्ति ततः शरीरनिर्वृत्ति, 'एवं परियारणे'त्यादि, परिचारणापदं-प्रज्ञापनायां चतुर्स्त्रिंशत्तमं, तच्चैव- 'तओ परियाइयणया तओ परिणामणया तओ परियारणया तओ पच्छा विउव्वणया हंता गोयमा' इत्यादि ।

'तओ परियाइयणय'त्त ततः पर्यापानम्-अङ्गप्रत्यङ्गैः समन्तादापानमित्यर्थः 'तओ परिणाम-णय'त्ति तत आपीतस्य-उपात्तस्य परिणतिरिन्द्रियादिविभागेन 'तओ परियारणय'त्ति ततः शब्दादिविषयोपभोग इत्यर्थः 'तओ पच्छा विउव्वणय'त्ति ततो विक्रया नानारूपा इत्यर्थः इति ॥

शतकं-१३ उद्देशकः-३ समाप्तः

## -: शतकं-१३ उद्देशकः-४ :-

**वृ.** अनन्तरोद्देशके परिचारणोक्ता, सा च नारकादीनां भवतीति नारकाद्यर्थःप्रतिपादनार्थं चतुर्थोद्देशकमाह, तस्य चेदमादिसूत्रम् ।

**मू. (५६९)** *'कति णं भंते ! पुढवीओ पन्नत्ताओ ?, गोयमा ! सत्त पुढवीओ पन्नत्ताओ, तंजहा- रयणप्पभा जाव अहे सत्तमा ।*

*अहेसत्तमाए णं भंते ! पुढवीए पंच अनुत्तरा महतिमहालया जाव अपइट्ठाणे ।*

*ते णं नरगा छट्ठीए तमाए पुढवीए नरएहिंतो महंततरा चेव १ महाविच्छिन्नतरा चेव २ महावासतरा चेव ३ महापइरिक्कतरा चेव ४, नो तहा महापवेसणतरा चेव १ नो आइन्नतरा चेव २ नो आउलतरा चेव ३ अनोयणतरा चेव ४ ।*

*तेसु णं नरएसु नेरतिया छट्ठीए तमाए पुढवीए नेरइएहिंतो महाकम्मतरा चेव १ महाकिरियतरा चेव २ महासवतरा चेव ३ महावेयणतरा चेव ४ नो तहा अप्पकम्मतरा चेव १ नो अप्पकिरियतरा चेव २ नो अप्पासवरा चेव ३ नो अप्पवेदणतरा चेव ४ अप्पड्ढियतरा चेव १*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अप्पजुत्तियतरा चेव २ नो तहा महड्ढियता चेव १ नो महजुइयतरा चेव २ ।*

*छट्ठीए णं तमाए पुढवीए एगे पंचूणे निरयावाससयसहस्से पन्नत्ते, ते णं नरगा अहेसत्तमाए पुढवीए नेरइएहिंतो नो तहा महत्तरा चेव महाविच्छिन्न० ४ महप्पवेसणतरा चेव आइन्न० ४ तेसु णं नरएसु णं नेरतिया अहेसत्तमाए पुढवीए नेरइएहिंतो अप्पकम्मतरा चेव अप्पकिरि० ४ नो तहा महाकम्मतरा चेव महाकिरिय ४ महड्ढियतरा चेव महाजुइयतरा चेव नो तहा अप्पड्ढियतरा चेव अप्पजुइयतरा चेव ।*

*छट्ठीए णं तमाए पुढवीए नरगा पंचमाए धूमप्पभाप पु० नरएहिंतो महत्तरा चेव ४ नो तहा महप्पवेसणतरा चेव ४, तेसु णं नरएसु नेरतिया पंचमाए धूमप्पभाए पुढवीएहिंतो महाकम्मतरा चेव ४ नो तहा अप्पकम्मतरा चेव ४ अप्पड्ढियतरा चेव २ नो तहा महड्ढियतरा चेव २ ।*

*पंचमाए णं धूमप्पभाए पुढवीए तिन्नि निरयावाससयसहस्सा पन्नत्ता एवं जहा छट्ठीए भणिया एवं सत्तवि पुढवीओ परोप्परं भण्णंति जाव रयणप्पभंति जाव नो तहा महड्ढियतरा चेव अप्पजुत्तियतरा चेव ।*

**वृ.** 'कइ ण'मित्यादि, इह च द्वारगाथे क्वचिद् दृश्येते, तद्यथा–

॥१॥ "नेरइय १ फास २ पणिहो ३ निरयंते ४ चेव लोयमज्झे य ५ ।
दिसिविदिसाण य पवहा ६ पवत्तणं अत्थिकाएहिं ७ ॥

॥२॥ अत्थी पएसफुसणा ८ ओगाहणया य जीवमोगाढा ।
अत्थि पएसनिसीयण बहुस्समे लोगसंठाणे ॥ इति

अनयोश्चार्थः उद्देशकार्थाधिगमावगम्य एवेति, 'महंततरा चेव'त्ति आयामतः 'विच्छिन्नतरा चेव'त्ति विष्कम्भतः 'महावासतरा चेव'त्ति अवकाशो–बहूनां विवक्षितद्रव्याणामवस्थानयोग्यं क्षेत्रं महानवकाशो येषु ते महावकाशाः अतिशयेन महावकाशा महावकाशतराः, ते च महाजनसङ्कीर्णा अपि भवन्तीत्यत उच्यते 'महापइरिक्कतरा चेव'त्ति महत्प्रतिरिक्तं–विजनमतिशयेन येषु ते तथा 'नो तहा महापवेसणतरा चेव'त्ति 'नो' नैव 'तथा' तेन प्रकारेण यथा षष्ठपृथिवीनरका अतिशयेन महत्प्रवेशनं–गत्यन्तरान्नरकगतौ जीवानां प्रवेशो येषु ते तथा, षष्ठपृथिव्यपेक्षयाऽसङ्ख्यगुणहीनत्वात्तन्नारकाणामिति, नोशब्द उत्तरपदद्वयेऽपि सम्बन्धनीयः, यत एव नो महाप्रवेशनतरा अत एवं 'नो आइन्नतरा चेव'त्ति नात्यन्तमाकीर्णा–सङ्कीर्णा नारकैः 'नो आउलतरा चेव'त्ति इतिकर्तव्यतया ये आकुला नारकलोकास्तेषामतिशयेन योगादाकुलतरास्ततो नोशब्दयोगः, किमुक्तं भवति ।

'अनोमानतरा चेव'त्ति अतिशयेनासङ्कीर्णा इत्यर्थः– क्वचित्पुनरिदमेवं दृश्यते– 'अनोयणता चेव'त्ति तत्र चानोदनतराः व्याकुलजनाभावातिशयेन परस्परं नोदनवर्जिता इत्यर्थः 'महाकम्मतर'त्ति आयुष्कवेदनीयादिकर्म्मणां महत्त्वात् 'महाकिरियतर'त्ति कायिक्यादिक्रियाणां महत्वात् तत्काले कायमहत्वात्पूर्वकाले च महारंभादित्वाद् अत एव महाश्रवतरा इति 'महावेयणतर'त्ति महाकर्मत्वात्, 'नो तहे'त्यादिना निषेधतस्तदेवोक्तं, विधिप्रतिषेधतो वाक्यप्रवृत्तेः, नोशब्दश्चेह प्रत्येकं सम्बन्धनीयः पदचतुष्टय इति, तथा 'अप्पड्ढियतर'त्ति अवध्यादिऋद्धेरल्पत्वात् 'अप्पज्जुइयतर'त्ति दीप्तेरभावात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव व्यतिरेकेणोच्यते–'नो तहामहड्ढिए' इत्यादि, नोशब्दः पदद्वयेऽपि सम्बन्धनीयः

**मू. (५७०)** *रयणप्पभापुढविनेरइया णं भंते! केरिसयं पुढविफासं पच्चणुब्भवमाणा विहरंति ?, गोयमा! अनिट्ठं जाव अमणामं एवं जाव अहेसत्तमपुढविनेरइया एवं आउफासं एवं जाव वणस्सइफासं।*

**वृ.** स्पर्शद्वारे 'एवं जाव वणस्सइफासं'ति इह यावत्करणात्तेजस्कायिकस्पर्शसूत्रं वायुकायिकस्पर्शसूत्रं च सूचितं, तत्र च कश्चिदाह–ननु सप्तस्वपि पृथिवीषु तेजस्कायिकवर्जपृथिवीकायिकादिस्पर्शो नारकाणां युक्तः येषां तासु विद्यमानत्वात् बादरतेजसां तु समयक्षेत्र एव सद्भावात् सूक्ष्मतेजसां पुनस्तत्र सद्भावेऽपि स्पर्शनेन्द्रियविषयत्वादिति।

अत्रोच्यते, इह तेजस्कायिकस्येव परमाधार्मिकविनिर्मितज्वलनसद्दशवस्तुनः स्पर्श तेजस्कायिकस्पर्श इति व्याख्येयं न तु साक्षात्तेजस्कायिकस्यैव असंभवात् अथवा भवान्तरानुभूततेजस्कयिकपर्यायपृथखिवीकायिकादिजीवस्पर्शापेक्षयेदं व्याख्येयमिति ॥

**मू. (५७१)** *इमा णं भंते! रयणप्पभापुढवी दोच्चं सक्करप्पभं पुढविं पणिहाय सव्वमहंतिया बाहल्लेणं सव्वखुड्डिया सव्वंतेसु एवं जहा जीवाभिगमे बितिए नेरइयउद्देसए।*

**वृ.** प्रणिधिद्वारे 'पणिहाय'त्ति प्रणिधाय–प्रतीत्य 'सव्वमहंतय'त्ति, सर्व्वथा महती अशीतिसहस्राधिकयोजनलक्षप्रमाणत्वाद्रत्नप्रभाबाहल्यस्य शर्क०राप्रभाबाहल्यस्य च द्वात्रिंशत्सहस्राधिकयोजनलक्षमानत्वात् 'सव्वखुड्डिया सव्वंतेसु'त्ति सर्वथा लध्वी 'सर्व्वान्तेषु' पूर्वापरदक्षिणोत्तरविभागेषु, आयामविष्कम्भाभ्यां रज्जुप्रमाणत्वाद्रत्नप्रभायासततो महत्तरत्वात् शर्कराप्रभायाः, 'एवं जहा जीवाभिगमे' इत्यादि। अनेन च यत्सूचितं तदिदं–'हंता गोयमा! इमा णं रयणप्पभा पुढवी दोच्चं पुढविं पणिहाय जाव सव्वखुड्डिया सव्वंतेसु। दोच्चा णं भंते! पुढवी तच्चं पुढविं पणिहाय सव्वखुड्डिया जाव सव्वंतेसु, एवं एएणं अभिलावेणं जाव छट्ठिया पुढवी अहे सत्तमं पुढविं पणिहाय जाव सव्वखुड्डिया सव्वंतेसु'त्ति ॥

**मू. (५७२)** *इमीसे णं भंते! रयणप्पभाए पुढवीए निरयपरिसामंतेसु जे पुढविक्काइया एवं जहा नेरइयउद्देसए जाव अहेसत्तमाए।*

**वृ.** निरयान्तद्वारे 'निरयपरिसामंतेसु'त्ति निरयावासानां पार्श्वत इत्यर्थः 'जहा नेरइयउद्देसए'त्ति जीवा भिगमसम्बन्धिनि, तत्र चैवमिदं सूत्रम्–'आउक्काइया तेउक्काइया वाउक्काइया वणस्सइकाइया, ते णं जीवा महाकम्मतरा चेव जाव महावेयणतरा चेव ?, हंता गोयमा!'

**मू. (५७३)** *कहि णं भंते! लोगस्स आयाममज्झे पन्नत्ते ?, गोयमा! इमीसे णं रयणप्पभाए उवासंतरस्स असंखेज्जतिभागं ओगाहेत्ता एत्थ णं लोगस्स आयाममज्झे पन्नत्ते।*

*कहि णं भंते! अहेलोगस्स आयाममज्झे पन्नत्ते ?, गोयमा! चउत्थीए पंकप्पभाए पुढवीए उवासंतरस्स सातिरेगं अद्धं ओगाहित्ता एत्थ णं अहेलोगस्स आयाममज्झे पन्नत्ते।*

*कहि णं भंते! उड्ढलोगस्स आयाममज्झे पन्नत्ते ?, गोयमा! उप्पिं सणंकुमारमाहिंदाणं कप्पाणं हेट्ठिं बंभलोए कप्पे रिट्ठविमाणे पत्थडे एत्थ णं उड्ढलोगस्स आयाममज्झे पन्नत्ते।*

*कहिन्नं भंते! तिरियलोगस्स आयाममज्झे पन्नत्ते ?, गोयमा! जंबूद्दीवे २ मंदरस्स पव्वयस्स बहुमज्झदेसभाए इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्लेसु खुड्डागपयरेसु एत्थ णं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तिरियलोगस्समज्झे अट्ठपएसिए रुयए पन्नत्ते, जओ णं इमाओ दस दिसाओ पवहंति, तंजहा–पुरच्छिमा पुरच्छिमदाहिणा एवं जहा दसमसए नामधेज्जंति।*

**वृ.** लोकमध्यद्वारे 'चउत्थीए पंकप्पभाए' इत्यादि, रुचकस्याधो नवयोजनशतान्यतिक्रम्याधोलोको भवति लोकान्तं यावत्, स च सातिरेकाः सप्त रज्जवस्तन्मध्यभागः चतुर्थ्याः पञ्चम्याश्च पृथिव्या यदवकाशान्तरं तस्य सातरेकमर्द्धमतिवाह्य भवतीति। तथा रुचकस्योपरि नवयोजनशतान्यतिक्रम्योर्द्धलोको व्यपदिश्यते लोकान्तमेव यावत्, स च सप्त रज्जवः किञ्चिन्न्यूनास्तस्य च मध्यभागप्रतिपादनायाह–'उप्पिं सणंकुमारमाहिंदाणं कप्पाण' मित्यादि।

तथा 'उवरिमहिट्ठिल्लेसु खुड्डागपयरेसु' त्ति लोकस्य वज्रमध्यत्वाद्रत्नप्रभाया रत्नकाण्डे सर्वक्षुल्लकं प्रतरद्वयमस्ति, तयोश्चोपरिमो यत आरभ्य लोकस्योपरिमुखा वृद्धि 'हेट्ठिल्ले' त्ति अधस्तनो यत आरभ्य लोकस्याधोमुखा वृद्धि तयोरुपरिमाधस्तनयोः 'खुड्डागपयरेसु' त्ति क्षुल्लकप्रतरयोः सर्वलघुप्रदेशप्रतरयोः। 'एत्थ णं' ति प्रज्ञापकेनोपायतः प्रदर्श्यमाने तिर्यग्लोकमध्येऽष्टप्रदेशको रुचकः प्रज्ञप्तः, यश्च तिर्यग्लोकमध्ये प्रज्ञप्तः स सामर्थ्यात्तिर्यग्लोकायाममध्यं भवत्येवेति, किम्भूतोऽसावष्ट-प्रदेशिको रुचकः? इत्याह–'जओ णं इमाओ' इत्यादि –

**मू. (५७४)** *इंदा णं भंते! दिसा किमादीया किंपवहा कतिपदेसादीया कतिपदेसुत्तरा कतिपदेसीया किंपज्जवसिया किंसंठिया पन्नत्ता?, गोयमा! इंदा णं दिसा रुयगादीया रुयगप्पवहा दुपएसादीया दुपएसुत्तरा लोगं पडुच्च असंखेज्जपएसिया अलोगं पडुच्च अनंतपएसिया लोगं पडुच्च साईया सपज्जवसिया अलोगं पडुच्च साईया अपज्जवसिया लोगं पडुच्च मुरजसंठिया अलोगं पडुच्च सगडुद्धिसंठिया पन्नत्ता।*

*अग्गेयी णं भंते! दिसी किमादीया किंपवहा कतिपएसादीया कतिपएसविच्छिन्ना कतिपएसीया किंपज्जवसिया किंसंठिया पन्नत्ता?, गोयमा! अग्गेयी णं दिसा रुयगादीया रुयगप्पवहा एगपएसादीया एगपएसविच्छिन्ना अनुत्तरा लोगं पडुच्च असंखेज्जपएसीया अलोगं पडुच्च अनंतपएसीया लोगं पडुच्च साइया सपज्जव० अलोगं पडुच्च साइया अपज्जवसिया छिन्नमुत्तावलिसंठिया पन्नत्ता।*

*जमा जहा इंदा, नेरइया जहा अग्गेयी, एवं जहा इंदा तहा दिसाओ चत्तारि जहा अग्गेई तहा चत्तारिवि विदिसाओ।*

*विमला णं भंते! दिसा किमादीया० ?, पुच्छा जहा अग्गेयीए, गोयमा! विमला णं दिसा रुयगादीया रुयगप्पवहा चउप्पएसादीया दुपएसविच्छिन्ना अनुत्तरा लोगं पडुच्च सेसं जहा अग्गेयीए नवरं रुयगसंठिया पन्नत्ता एवं तमावि।*

**वृ.** दिगविदिक्प्रवहद्वारे 'किमाइय' त्ति क आदिः–प्रथमो यस्याः सा किमादिका आदिश्च विवक्षया विपर्ययेणापि स्यादित्यत आह–'किंपवह' त्ति प्रवहति–प्रवर्त्तते अस्मादिति प्रवहः कः प्रवहो यस्याः सा तथा 'कतिपएसाइय' त्ति कति प्रदेशा आदिर्यस्याः सा कतिप्रदेशादिका 'कतिपएसुत्तर' त्ति कतिप्रदेशा उत्तरे–वृद्धौ यस्याः सा।

तथा 'लोकं पडुच्च मुरजसंठिय' त्ति लोकान्तस्य परिमण्डलाकारत्वेन मुरजसंस्थानता दिशः स्यात्ततश्च लोकान्तं प्रतीत्य मुरजसंस्थितेत्युक्तं, एतस्य च पूर्वां दिशमाश्रित्य चूर्णिकारकृतेयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावना–'पुव्वुत्तराए पएसहाणीए तहा दाहिणपुव्वाए रुयगदेसे मुरजहेट्ठं दिसि अंते चउप्पएसा दट्ठव्वा मज्झे य तुंडं हवइ'त्ति। 'अलोगं पडुच्च सगडुद्धिसंठिय'त्ति रुचके तु तुण्डं कल्पनीयं आदौ संकीर्णत्वात् तत उत्तरोत्तरं विस्तीर्णत्वादिति, 'एगपएसविच्छिन्न'त्ति, कथम् ? अत आह– 'अनुत्तर'त्ति वृद्धिवर्जिता यत इति ॥

**मू. (५७५)** *किमियं भंते ! लोएत्ति पवुच्चइ ?, गोयमा ! पंचत्थिकाया, एस णं एवतिए लोएत्ति पवुच्चइ, तंजहा–धम्मत्थिकाए अहम्मत्थिकाए जाव पोग्गलत्थिकाए।*

*धम्मत्थिकाए णं भंते ! जीवाणं किं पवत्तति ?, गोयमा ! धम्मत्थिकाएणं जीवाणं आगमणगमण भासुम्मेसमणजोगा वइजोगा कायजोगा जे यावन्ने तहप्पगारा चला भावा सव्वे ते धम्मत्थिकाए पवत्तंति, गइलक्खणे णं धम्मत्थिकाए।*

*अहम्मत्थिकाएणं जीवाणं किं पवत्तति ?, गोयमा ! अहम्मत्थिकाएणं जीवाणं ठाणनिसीयणतुयट्टण मणस्स य एगत्तीभावकरणता जे यावन्ने० थिरा भावा सव्वे ते अहम्मत्थिकाये पवत्तंति, ठाणलक्खणे णं अहम्मत्थिकाए। आगासत्थिकाए णं भंते ! जीवाणं अजीवाण य किं पवत्तति ?, गोयमा ! आगासत्थिकाएणं जीवदव्वाण य अजीवदव्वाण य भायणभूए–*

**वृ.** प्रवर्त्तनद्वारे 'आगमणगमणे' इत्यादि, आगमनगमने प्रतीते भाषा–व्यक्तवचनं 'भाष व्यक्तायां वाचि' इति वचनात् उन्मेषः–अक्षिव्यापारविशेषः मनोयोगवाग्योगकाययोगाः प्रतीता एव तेषां च द्वन्द्वस्ततस्ते, इह च मनोयोगादयः सामान्यरूपाः आगामनादयस्तु तद्विशेषा इति भेदेनोपात्ताः, भवति च सामान्यग्रहणेऽपि विशेषग्रहणं तत्स्वरूपोपदर्शनार्थःमिति।

'जे यावन्ने तहप्पगार'त्ति 'ये चाप्यन्ये' आगमनादिभ्योऽपरे 'तथाप्रकाराः' आगमनादिसदृशाः भ्रमणचलनादयः 'जला भाव'त्ति चलस्वभावाः पर्यायाः सर्वे ते धर्मास्तिकाये सति प्रवर्त्तन्ते, कुत ? इत्याह–

'गइलक्खणे णं धम्मस्थिकाए'त्ति। 'ठाण निसीयण०'' 'कायोत्सर्गासनशयनानि प्रथमा-बहुवचनलोपदर्शनात्, तथा मनसश्चानेकत्वस्यैकत्वस्य भवनमेकत्वीभावस्तस्य यत्करणं तत्तथा

'आगासत्थिकाएण'मित्यादि, जीवद्रव्याणां चाजीवद्रव्याणां च भेदेन भाजनभूतः, अनेन चेदमुक्तं भवति–एतस्मिन् सति जीवादीनामवगाहः प्रवर्त्तते एतस्यैव प्रश्नितत्वादिति, भाजन-भावमेवास्य दर्शयन्नाह–

**मू. (५७६)** *एगेणवि से पुन्ने दोहिवि पुन्ने सयंपि माएज्जा।*
*कोडिसएणवि पुन्ने कोडिसहस्संपि माएज्जा ॥*
*अवगाहणालक्खणे णं आगासत्थिकाए।*

**वृ.** 'एगेणवी'त्यादि, एकेन–परमाण्वादिना 'से'त्ति असौ आकाशास्तिकायप्रदेश इति गम्यते 'पूर्ण' भृतस्तथा द्वाभ्यामपि ताभ्यामसौ पूर्णः, कथमेतत् ?, परिणामभेदात् यताऽपवर-काकाशमेकप्रदीपप्रभाटलेनापि पूर्यते द्वितीयमपि तत्तत्र माति यावच्छतमपि तेषां तत्र माति।

तथौषधिविशेषापादितपरिणामादेकत्र पारदकर्षे सुवर्णकर्षशतं प्रविशति, पारदकर्षीभूतं च सदौषधिसामर्थ्यात पुनः पारदस्य कर्ष सुवर्णस्य च कर्षशतं भवति विचित्रत्वात्पुद्गपरि-णामस्येति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

***मू. (५७७)** जीवत्थिकाएणं भंते ! जीवाणं किं पवत्तति ?, गोयमा ! जीवत्थिकाएणं जीवे अनंताणं आभिनिबोहियनाणपज्जवाणं अनंताणं सुयनाणपज्जवाणं एवं जहा बितियसए अत्थिकायउद्देसए जाव उवओगं गच्छति, उवओगलक्खणे णं जीवे ।*

*पोग्गलत्थिकाए णं पुच्छा, गोयमा ! पोग्गलत्थिकाएणं जीवाणं ओरालियवेउव्वियआहारए तेयाकम्मए सोइंदियचक्खिंदियघाणिंदियजिब्भिंदियफासिंदयमणजोगवयजोगकाजोगआणापाणूणं च गहणं पवत्तति, गहणलक्खणे णं पोग्गलत्थिकाए ॥*

**वृ.** 'अवगाहणालक्खणे णं' ति इहावगाहना-आश्रयभावः ॥ 'जीवत्थिकाएण'मित्यादि, जीवास्तिकायेनेति अन्तर्भूतभावप्रत्ययत्वाज्जीवास्तिकायत्वेन जीवतयेत्यर्थः भदन्त ! जीवानां किं प्रवर्त्तते ? इति प्रश्नः, उत्तरं तु प्रतीतार्थःमेवेति ।

'पोग्गलत्थिकाएण' मित्यादि, इहौदारिकादिशरीराणां श्रोत्रेन्द्रियादीनां मनोयोगान्तानामानप्राणानां च ग्रहणं प्रवर्त्तते इति वाक्यार्थः, पुद्गलमयत्वादौदारिकादीनामिति ।

अस्तिकायप्रदेशस्पर्शद्वारे-

***मू. (५७८)** 'एगे भंते ! धम्मत्थिकायपदेसे केवतिएहिं धम्मत्थिकायपएसेहिं पुट्ठे ?, गोयमा ! जहन्नपदे तिहिं उक्कोसपदे छहिं ।' केवतिएहिं अहम्मत्थिकायपएसेहिं पुट्ठे ?, गोयमा ! जहन्नपए चउहिं उक्कोसपए सत्तहिं । केवतिएहिं आगासत्थिकायपएसेहिं पुट्ठे ?, गोयमा ! सत्तहिं*

*केवतिएहिं जीवत्थिकायपएसेहिं पुट्ठे ?, गोयमा ! अनंतेहिं । केवतिएहिं पोग्गलत्थिकायपएसेहिं पुट्ठे ?, गोयमा ! अनंतेहिं । केवतिएहिं अद्धासमएहिं पुट्ठे ?, सिय पुट्ठे सिय नो पुट्ठे जइ पुट्ठे नियमं अनंतेहिं ।*

*एगे भंते ! अहम्मत्थिकायपएसे केवतिएहिं पुट्ठे ? जहन्नपए तिहिं उक्कसपए छहिं सेसं जहा धम्मत्थिकायस्स । एगे भंते ! आगासत्थिकायपएसे केतविएहिं धम्मत्थिकायपएसेहिं पुट्ठे गोयमा ! सिय पुट्ठे सिय नो पुट्ठे, जइ पुट्ठे जहन्नपदे एक्केण वा दोहिं वा तीहिं वा चउहिं वा उक्कोसपए सत्तहिं, एवं अहम्मत्थिकायप्पएसेहिवि ।*

*केवतिएहिं आगासत्थिकाय० ? कहिं, केवतिएहिं जीवत्थिकायपएसेहिं पुट्ठे ?, सिय पुट्ठे सिय नो पुट्ठे, जइ पुट्ठे नियमं अनंतेहिं । एवं पोग्गलत्थिकायपएसेहिवि अद्धासमएहिवि ।*

**वृ.** 'एगे भंते ! धम्मत्थिकायप्पएसे'इत्यादि, 'जहन्नपए तिहिं'ति जघन्यपदं लोकान्तनिष्कुटरूपं यत्रैकस्य धर्मास्तिकायादिप्रदेशस्यातिस्तौकैरन्यैः स्पर्शना भवति तच्च भूम्यासन्नापवरककोणदेशप्रायं, इहोपरितनेनैकेन द्वाभ्यां च पार्श्वत एको विवक्षितः प्रदेशः स्पृष्टः, एवं जघन्येन त्रिभिरिति ।

'उक्कोसपए छहिं' ति विवक्षितस्यैक उपर्येकोऽधस्तनश्चत्वारो दिक्षु इत्येवं षड्भिःरिदं च प्रतरमध्ये, । 'जहन्नपदे चउहिं'ति धर्मास्तिकायप्रदेशो जघन्यपदेऽधर्मास्तिकायप्रदेशैश्चतुर्भिः स्पृष्ट इति, कथं ?, तथैव त्रयः, चतुर्थःस्तु धर्मास्तिकायप्रदेशस्थानस्थित एवेति, उत्कृष्टपदे सप्तभिरिति, कथं ?, षड् दिक्षट्के, सप्तमस्तु धर्मास्तिकायप्रदेशस्थ एवेति २ ।

आकाशप्रदेशैः सप्तभिरेव, लोकान्तेऽप्यलोकाकाशप्रदेशानां विद्यमानत्वात् ३ ।

'केवतिएहिं जीवत्थिकाए'इत्यादि 'अनंतेहिं'ति अनन्तैरनन्तजीवसम्बन्धिनामनन्तानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशानां तत्रैकधर्मास्तिकायप्रदेशे पार्श्वतश्च दिकत्रयादौ विद्यमानत्वादिति ४ एवं पुद्गलास्तिकायप्रदेशैरपि ५। 'केवतिएहिं अद्धासमएहिं' इत्यादि, अद्धासमयः समयक्षेत्र एव न परतोऽतः स्यात्स्पृष्टः स्यान्नेति, 'जइ पुट्ठे नियमं अनंतेहिं' ति अनादित्वादद्धासमयानां अथवा वर्त्तमानसमयालिङ्गिता- न्यनन्तानि धर्मास्तिकायप्रदेशस्पर्शनाऽनुसारेणावसेया ६ ॥

'एगे भंते ! आगासत्थिकायपएसे' इत्यादि, 'सिय पुट्ठे' त्ति लोकमाश्रित्य 'सिय नो पुट्ठे' त्ति अलोकमाश्रित्य 'जइ पुट्ठे' इत्यादि यदि स्पृष्टस्तदा जघन्यपदे एकेन धर्मास्तिकायप्रदेशेन स्पृष्टः, कथम् ?, एवंविधलोकान्तवर्त्तिना धर्मास्तिकाययैकप्रदेशेन शेषधर्मास्तिकायप्रदेशेभ्यो निर्गतेनैकोऽग्रभागवर्त्यलोकाकाशप्रदेशः स्पृष्टो वक्रगतस्त्वसौ द्वाभ्यं यस्य चालोकाकाशप्रदेशस्याग्रतोऽधस्तादुपरि च धर्मास्तिकाय्रदेशाः सन्ति स त्रिभिर्धर्मास्तिकायप्रदेशैः स्पृष्टः, स चैवम्– यस्त्वेवं– लोकान्ते कोणगतो व्योमप्रदेशोऽसावेकेन धर्मास्तिकायप्रदेशेन तदवगाढेनान्येन चोपरिवर्त्ति नाऽधोवर्तिना वा द्वाभ्यां च दिगूद्वयावस्थिताभ्यां स्पृष्ट इत्येवं चतुर्भि यश्चाध उपरि च तथा दिग्द्वये तत्रैव वर्त्तमानेन धर्मास्तिकायप्रदेशेन स्पृष्टः स पञ्चभिः य पुनरध उपरि च तथा दिक्त्रये तत्रैव च प्रवर्त्तमानेन धर्मास्तिकायप्रदेशेन स्पृष्टः स षड्भिः, यश्चाध उपरि च तथा दिक्चतुष्टये तत्रैव च वर्त्तमानेन धर्मास्तिकायप्रदेशेन स्पृष्टः स सप्तभिर्धर्म्मास्तिकायप्रदेशैः स्पृष्टो भवतीति १, एवमधर्मास्तिकायप्रदशैरपि २।

'केवइएहिं आगासत्थिकायपएसेहिं ?, 'छहिं' ति एकस्य लोकाकाशप्रदेशस्यालोकाकाशप्रदेशस्य वा षडदिग्व्यवस्थितैरेव स्पर्शनात् षड्भिरित्युक्तम् ३ जीवास्तिकायसूत्रे 'सिय पुट्ठे' त्ति यद्यसौ लोकाकाशप्रदेशो विवक्षितस्ततः स्पृष्टः 'सिय नो पुट्ठे' त्ति यद्यसावलोकाकाशप्रदेशविशेषस्तदा न स्पष्टो जीवानां तत्राभावादिति ४–५ एवं पुद्गलाद्धाप्रदेशैः ६ ॥

**मू. (५७९)** *एगं भंते ! जीवत्थिकायपएसे केवतिएहिं धम्मत्थि० पुच्छा जहन्नपदे चउहिं उक्कसपए सत्तहिं, एवं अहम्मत्थिकायपएसेहिवि ।*

*केवतिएहिं आगासत्थि० ?, सत्तहिं । केवतिएहिं जीवत्थि० ?, सेसं जहा धम्मत्थिकायस्स*

*एगे भंते ! पोग्गलत्थिकायपएसे केवतिएहिं धम्मत्थिकायपए० ? एवं जहेव जीवत्थिकायस्स*

*दो भंते ! पोग्गलत्थिकायप्पएसा केवतिएहिं धम्मत्थिकायपएसेहिं पुट्ठा ?, जहन्नपए छहिं उक्कोसपए बारसहिं, एवं अहम्मत्थिकायप्पएसेहिवि । केवतिएहिं आगासत्थिकाय० ?, बारसहिं, सेसं जहा धम्मत्थिकायस्स ।*

*तिन्नि भंते ! पोग्गलत्थिकायपएसा केवतिएहिं धम्मत्थि० ?, जहन्नपए अट्ठहिं उक्कोसपए सत्तरसहिं । एवं अहम्मत्थिकायपएसेहिवि । केवतिएहिं आगासत्थि० ?, सत्तरसहिं, सेसं जहा धम्मत्थिकायस्स । एवं एएणं गमेणं भाणियव्वं जाव दस, नवरं जहन्नपदे दोन्नि पक्खिवियव्वा उक्कोसपए पंच ।*

*चत्तारि पोग्गलत्थिकायस्स०, जहन्नपए दसहिं उक्को० बावीसाए, पंच पुग्गल० जह० बारसहिं उक्कोस० सत्तावीसाए, छ पोग्गल० जह० चोद्दसहिं उक्को० बत्तीसाए, सत्त पो० जहन्नेणं सोलसहिं उक्कोस सत्ततीसाए, अट्ठ पो० जहन्न० अट्ठारसहिं उक्कोसे णं बायालीसाए, नव पो० जहन्न० वीसाए उक्को० सीयालीसाए, दस जह० बावीसाए उक्को० बावन्नाए ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आगासत्थिकायस्स सव्वत्थ उक्कोसगं भाणियव्वं ॥ संखेज्जा भंते! पोग्गलत्थिकायपएसा केवतिएहिं धम्मत्थिकायपएसेहिं पुट्ठा ?, जहन्नपदे तेणेव संखेज्जएणं दुगुणेणं दुरूवाहिएणं उक्कोसपए तेणेव संखेज्जएणं पंचगुणेणं दुरूवाहिएणं, केवतिएहिं अधम्मत्थिकायएहिं एवं चेव, केवतिएहिं आगासत्थिकाय तेणेव संखेज्जएणं पंचगुणेणं दुरूवाहिएणं, केवइएहिं जीवत्थिकाय० ?, अनंतेहिं, केवइएहिं पोग्गलत्थिकाय० ?, अनंतेहिं, केवइएहिं अद्धासमएहिं ?, सिय पुट्ठे सिय नो पुट्ठे जाव अनंतेहिं।*

*असंखेज्जा भंते ! पोग्गलत्थिकायप्पएसा केवतिएहिं धम्मत्थि० ?, जहन्नपए तेणेव असंखेज्जएणं दुगुणेणं दुरूवाहिएणं उक्को० तेणेव असंखेज्जएणं चंपगुणेणं दुरूवाहिएणं, सेसं जहा संखेज्जाणं जाव नियमं अनंतेहिं। अनंता भंते! पोग्गलत्थिकायपएसा केवतिएहिं धम्मत्थि-काय०, एवं जहा असंखेज्जा तहा अनंतावि निरवसेसं।*

*एगे भंते ! अद्धासमए केवतिएहिं धम्मत्थिकायपएसेहिं पुट्ठे ?, सत्तहिं, केवतिएहिं अहम्मत्थि० ?, एवं चेव एवं आगासत्थिकाएहिवि, केवतिएहिं जीव० ?, अणंतेहिं, एवं जाव अद्धासमएहिं ॥ धम्मत्थिकाए णं भंते! केवतिएहिं धम्मत्थिकायप्पएसेहिं पुट्ठे ?, नत्थि एक्केणवि, केवतिएहिं अधम्मत्थिकायप्पएसेहिं ?, असंखेज्जेहिं, केवतिएहिं आगासत्थि० प० ?, असंखेज्जेहिं, केवतिएहिं जीवत्थिकायपए० ?, अनंतेहिं, केवतिएहिं पोग्गलत्थिकायपएसेहिं ?, अनंतेहिं, केवतिएहिं अद्धासमएहिं ?, सिय पुट्ठे सिय नो पुट्ठे, जइ पुट्ठे नियमा अनंतेहिं।*

*अहम्मत्थिकाए णं भंते! केव० धम्मत्थिकाय० ?, असंखेज्जेहिं, केवतिएहिं अहम्मत्थि० नत्थि एक्केनवि, सेसं जहा धम्मत्थिकायस्स, एवं एएणं गमएणं सव्वेवि सट्ठाणए नत्थि एक्केणवि पुट्ठा, परट्ठाणए आदिल्लएहिं तिहिं असंखेज्जेहिं भाणियव्वं, पच्छिल्लएसु अनंता भाणियव्वा, जाव अद्धासमयोत्ति, जाव केवतिएहिं अद्धासमएहिं पुट्ठे ?, नत्थि एक्केणवि ॥*

**वृ.** 'एगे भंते! जीवत्थिकायप्पएसे' इत्यादि, जघन्यपदे लोकान्तकोणलक्षणे सर्वाल्पत्वात्तत्र स्पर्शकप्रदेशानां चतुर्भिरिति, कथम् ?, अध उपरि वा एको द्वौ च दिशोरेकस्तु यत्र जीवप्रदेश एवावगाढ इत्येवं, एकश्च जीवास्तिकायप्रदेश एकत्राकाशप्रदेशादौ केवलिसमुद्घात एव लभ्यत इति, 'उक्कोसपए सत्तहिं' ति पूर्ववत्, 'एवं अहम्मे'त्यादि पूर्वोक्तानुसारेण भावनीयम् ६ ॥

धर्मास्तिकायादीनां ४ पुद्गलास्तिकायस्य चैकैकप्रदेशस्य स्पर्शनोक्ता, अथ तस्यैव द्विप्रदेशादिस्कन्धानां तां दर्शयन्नाह–

'दो भंते !' इत्यादि, चूर्णिकारव्याख्यानमिदं–लोकान्ते द्विप्रदेशिकः स्कन्ध एकप्रदेश-समवगाढः स च प्रतिद्रव्यावगाहं प्रदेश इति नयमताश्रयणेनावगाहप्रदेशस्यैकस्यापि भिन्नत्वाद् द्वाभ्यां स्पृष्टः, तथा यस्यस्योपर्यधस्ताद्वा प्रदेशस्तस्यापि पुद्गलद्वयस्पर्शनेन नयमतादेव भेदाद् द्वाभ्यां, तथा पार्श्वप्रदेशावेकैकमणुं स्पृशतः परस्परव्यवहितत्वाद् इत्येवं जघन्यपदे षड्भिःधर्मास्तिकाय-प्रदेशैर्द्व्यणुकस्कन्धः स्पृश्यते, नयमतानङ्गीकारणे तु चतुर्भिरेव द्व्यणुकस्य जघन्यतः स्पर्शना स्यादिति"।

वृत्तिकृता त्वेवमुक्तम्– "इह यद्बिन्दुद्वयं तत्परमाणुद्वयमिति मन्तव्यं तत्र चार्वाचीनः परमाणुर्धर्मास्तिकायप्रदेशेनार्वाक्स्थितेन स्पृष्टः, परभागवर्त्ती च परतः स्थितेन एवं द्वौ, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ययोः प्रदेशयोर्मध्ये परमाणू स्थाप्येते तयोरग्रेतनाभ्यां प्रदेशाभ्या तौ स्पृष्टौ एकेनैको द्वितीयेन च द्वितीय इति चत्वारो द्वौ चावगाढत्वादेव स्पृष्टावित्येवं षट्। 'उक्कोसपए बारसहिं'ति, कथं ?, परमाणुद्वयेन द्वौ द्विप्रदेशावगाढत्वात्स्पृष्टौ द्वौ चाधस्तनौ उपरितनौ उपरितनौ च द्वौ पूर्वापरपार्श्वयोश्च द्वौ २ दक्षिणोत्तरपार्श्वयोश्चैकैक इत्येवमेते द्वाशेति १। एवमधर्मास्तिकायप्रदेशैरपि २।

'केवतिएहिं आगासत्थिकायप्पएसेहिं ?, 'बारसहिं''ति इह जघन्यपदं नास्ति लोकान्तेऽप्याकाशप्रदेशानां विद्यमानत्वादिति द्वादशभिरित्युक्तं ३, 'सेसं जहा धम्मत्थिकायस्स'त्ति, अयमर्थः– 'दो भंते ! पोग्गलत्थिकायप्पएसा केवतिएहिं जीवत्थिकायप्पएसेहिं पुट्ठा ?, गो० अणंतेहिं ४। एवं पुद्गलास्तिकायप्रदेशैरपि ५, अद्धासमयैः स्यात् स्पृष्टौ स्यान्न, यदि स्पृष्टौ तदा नियमादनन्तैरिति ६।

'तिन्नि भंते !'इत्यादि, 'जहन्नपए अट्ठहिं'ति, कथं ?, पूर्वोक्तनयमतनावगाढप्रदेशस्त्रिधा अधस्तनोऽप्युरितनोऽपि वा त्रिधा द्वौ पार्श्वत इत्येवमष्टौ, 'उक्कोसपए सत्तरसहिं'ति प्राग्वद्भावनीयं, इह च सर्वत्र जघन्यपदे विवक्षितपरमाणुभ्यो द्विगुणा द्विरूपाधिकाश्च स्पर्शकाः प्रदेशा भवन्ति, उत्कृष्टपदे त विवक्षितपरमाणुभ्यः पञ्चगुणा द्विरूपाधिकाश्च ते भवन्ति, तत्र चैकाणोद्विगुणत्वे द्वौ द्वयसहित्वे च चत्वारो जघन्यपदे स्पर्शकाः प्रदेशाः, उत्कृष्टपदे त्वेकाणोः पञ्चगुणत्वे द्विकसहित्वे च सप्त स्पर्शकाः प्रदेशा भवन्ति, एवं द्वयणुकत्र्यणुकादिष्वपि।

एतदेवाह–'एवं एएणं गमएण'मित्यादि, 'आगासत्थिकायस्स सव्वत्थ उक्कोसपयं भाणियव्वं'ति 'सर्वत्र' एकप्रदेशिकाद्यनन्तप्रदेशिकान्ते सूत्रगणे उत्कृष्टपदमेव न जघन्यकमित्यर्थः आकाशस्य सर्वत्र विद्यमानत्वादिति।

'संखेज्जा भंते !'इत्यादि, 'तेणेव'त्ति यत् सङ्ख्येयकमयः स्कन्धस्तेनैव प्रदेशसङ्ख्येयकेन द्विगुणेन द्विरूपाधिकेन स्पृष्टः, इह भावा–विंशतिप्रदेशिकः स्कन्धो लोकान् एकप्रदेशे स्थितः स च नयमतेन विंसत्याऽवगाढप्रदेशैः विंशत्यैव च नयमतेनैवाधस्तनैरुपरितनैर्वा प्रदेशैः द्वाभ्यां च पार्श्वप्रदेशाभ्यां स्पृश्यत इति, उत्कृष्टपदे तु विंशत्या निरुपचरितैरवगाढप्रदेशैः, एवमधस्तनै २० रुपरितनैः २० पूर्वापरपार्श्वयोश्च विंशत्या २० द्वाभ्यां च दक्षिणोत्तरपार्श्वस्थिताभ्यां स्पृष्टस्ततश्च विंशतिरूपः सङ्ख्याताणुकः स्कन्धः पञ्चगुणया विंशत्या प्रदेशानां प्रदेशद्वयेन च स्पृष्ट इति, अत एव चोक्तम् 'उक्कोसपए तेणेव संखेज्जएणं पंचगुणेणं दुरूवाहिएणं'ति।

'असंखेज्जा'इत्यादौ षटसूत्री तथैव। 'अनंता भंते !' इत्यादिरपि षटसूत्री तथैव, नवरमिह यथा जघन्यपदे औपचारिका अवगा- हप्रदेशा अधस्तना उपरितना वा तथोत्कृष्टपदेऽपि, न हि निरुपचरिता अनन्ता आकाशप्रदेशा अवगाहतः सन्ति, लोकस्याप्यसङ्ख्यातप्रदेशात्मकत्वादिति इह च प्रकरणे इमे वृद्धोक्तगाथे भवतः–

॥ १ ॥ "धम्माइपएसेहिं दुपएसाई जहन्नयपयम्मि।
दुगुणदुरूवहिएणं तेणेव कहं नु हु फुसेज्जा॥

'एगे भंते ! अद्धासमए'इत्यदि, इह वर्त्तमानसमयविशिष्टः समयक्षेत्रमध्यवर्त्ती परमाणुरद्धासमयो ग्राह्यः, अन्यथा तस्य धर्मास्तिकायादिप्रदेशैः सप्तभिः स्पर्शना न स्यात्, इह च जघन्यपदं नास्ति, मनुष्यक्षेत्रमध्यवर्त्तित्वादद्धासयमस्य, जघन्यपदस्य च लोकान्त एव सम्भवादिति, तत्र सप्तभिरिति, कथम् ?, अद्धासमयविशिष्टं परमाणुद्रव्यमेकत्रधर्मास्तिकायप्रदेशेऽवगाढमन्ये च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य षट्सु दिक्ष्विति सप्तेति, जीवास्तिकायप्रदेशैश्चानन्तैरेकप्रदेशेऽपि तेशामनन्तत्वात्, 'एवं जाव अद्धासमएहिं' ति।

इह यावत्करणादिदं सूचितम्-एकोऽद्धासमयोऽनन्तैः पुद्गलास्तिकायप्रदेशैरद्धासमयैश्च स्पृष्ट इति, भावना चास्यैवम्-अद्धासमयविशिष्टमणुद्रव्यमद्धासमयः, स चैकः पुद्गलास्तिकाय-प्रदेशैरनन्तैः स्पृश्यते, एकद्रव्यस्य स्थाने पार्श्वतश्चानन्तानां पुद्गलानां सद्भावात्, तथाऽद्धासमयैरनन्तैरसौ स्पृश्यते अद्धासमयविशिष्टनमनन्तानामप्यणुद्रव्याणामद्धासमयत्वेन विवक्षितत्वात् तेषां च तस्य स्थाने तत्पार्श्वतश्च सद्भावादिति।

धर्मास्तिकायादीनां प्रदेशतः स्पर्शनोक्ताऽथ द्रव्यतस्तामाह-'धम्मत्थिकाएण' मित्यादि, 'नत्थि एगेणवि' त्ति सकलस्य धर्मास्तिकायद्रव्यस्य प्रश्नितत्वात् तद्व्यतिरिक्तस्य च धर्मास्तिकाय-प्रदेशस्याभावादुक्तं नास्ति-न विद्यतेऽयं पक्षो यदुत एकेनापि धर्मास्तिकायप्रदेशेनासौ धर्मास्ति-कायः स्पृष्ट इति, तथा धर्मास्तिकायोऽधर्मास्तिकायप्रदेशैरसङ्ख्येयैः स्पृष्टो, धर्मास्तिकायप्रदेशानन्तर एव व्यवस्थितत्वादधर्मास्तिकायसम्बन्धिनामसङ्ख्यातानामपि प्रदेशानामिति, आकाशास्तिकाय-प्रदेशैरप्यसङ्ख्येयैः, असङ्ख्येयप्रदेशस्वरूपलोकाकाशप्रमाणत्वाद्धर्मास्तिकायस्य, जीवपुद्ग-लप्रदेशैस्तु धर्मास्तिकायोऽनन्तैः स्पृष्टः, तद्व्याप्तया धर्मास्तिकायस्यावस्थितत्वात्तेषां चानन्तत्वात्, अद्धासमयैः पुनरसौ स्पृष्टश्चास्पृष्टश्च, तत्र यः स्पृष्टः सोऽनन्तैरिति।

एवमधर्मास्तिकायस्य ६ आकाशास्तिकायस्य ६ जीवास्तिकायस्य ६ पुद्लास्तिकायस्य ६ अद्धासमयस्य च ६ सूत्राणि वाच्यानि, केवलं यत्र धर्मास्तिकायादिस्तत्प्रदेशैरेव चिन्त्यते तत्स्वस्थानमितरच्च परस्थानं, तत्र स्वस्थाने 'नत्थि एगेणवि पुट्ठे' इति निर्वचनं वाच्यं, परस्थाने च धर्मास्तिकायादित्रयसूत्रेषु ३ असङ्ख्येयैः स्पृष्ट इति वाच्यं, असङ्ख्यातप्रदेशत्वाद्धर्माधर्मास्तिकाय-योस्तत्संस्पृष्टाकाशस्य च, जीवादित्रयसूत्रेषु चानन्तैः प्रदेशैः स्पृष्ट इति वाच्यं, अनन्तप्रदेशत्वात्तेषा-मिति, एतदेव दर्शयन्नाह-

'एवं एएणं गमएण' मित्यादि, इह चाकाशसूत्रेऽयिं विशेषो द्रष्टव्यः-आकाशास्तिकायो धर्मास्तिकायादिप्रदेशैः स्पृष्टश्चास्पृष्टश्च, तत्र यः स्पृष्ट सोऽसङ्ख्येयैर्धर्माधर्मास्तिकाययोः प्रदेशैर्जी-वास्तिकायादीनां त्वनन्तैरिति, 'जाव अद्धासमओ' त्ति अद्धासमयसूत्रं यावत् सूत्राणी वाच्या-नीत्यर्थः, 'जाव केवइएहिं' इत्यादौ यावत्करणादद्धासमयसूत्रे आद्यं पदपञ्चं सूचितं षष्ठं तु लिखितमेवास्ते, तत्र तु 'नत्थि एक्केणवि' त्ति निरुपचरितस्याद्धासमयस्यैकस्यैव भावात्, अतीता-नागतसमययोश्च विनष्टानुत्पन्नत्वेनासत्त्वान्न समयान्तरेण स्पृष्टताऽस्तीति। अथावगाहद्वारं, तत्र-

*मू. (५८०) जत्थ णं भंते! एगे धम्मत्थिकायपएसे ओगाढे तत्थ केवतिया धम्मत्थिकाय-प्पएसा ओगाढा?, नत्थि एक्कोवि, केवतिया अहम्मत्थिकायप्पएसा ओगाढा?, एक्को, केवतिया आगासत्थिकाय०?, एक्को, केवतिया जीवत्थि०? अनंता, केवतिया पोग्गलत्थि०?, अनंता, केवतिया अद्धासमया?, सिय ओगाढा सिय नो ओगाढा जइ ओगाढा अनंता।*

*जत्थ णं भंते! एगे अहम्मत्थिकायपएसे ओगाढे तत्थ केवतिया धम्मत्थि०?, एक्को, केवतिया अहम्मत्थि०?, नत्थि एक्कवि, सेसं जहा धम्मत्थिकायस्स*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जत्थ णं भंते! एगे आगसत्थिकायपएसे ओगाढे तत्थ केवतिया धम्मत्थिकाय० ?, सिय ओगाढा सिय नो ओगाढा, जइ ओगाढा एक्को, एवं अहम्मत्थिकायपएसावि, केवइया आगासत्थिकाय० ?, नत्थि एक्कोवि, केवतिया जीवत्थि० ?, सिय ओगाढा सिय नो ओगाढा, जइ ओगाढा अनंता, एवं जाव अद्धासमया।

जत्थ णं भंते ! एगे जीवत्थिकायपएसे ओगाढे तत्थ केवतिया धम्मत्थि० ?, एक्को, एवं अहम्मत्थिकाय० एवं आगासत्थिकायपएसावि, केवतिया जीवत्थि० ?, अनंता, सेसं जहा धम्मत्थि-कायस्स। जत्थ णं भंते! एगे पोग्गलत्थिकायपएसे ओगाढे तत्थ केवतिया धम्मत्थिकाय० एवं जहा जीवत्थिकायपएसे तहेव निरवसेसं। जत्थ णं भंते! दो पोग्गलत्थिकायपदेसा ओगाढा तत्थ केवतिया धम्मत्थिकाय० ?, सिय एक्कोसिय दोन्नि, एवं अहम्मत्थिकायस्सि, एवं आगासत्थिकाय- स्सवि, सेसं जहा धम्मत्थिकायस्स।

जत्थ णं भंते! तिन्नि पोग्गलत्थि० तत्थ केवइया धम्मत्थिकाय० ?, सिय एक्कोसिय दोन्नि सिय तिन्नि, एवं अहमत्थिकायस्सवि, एवं आगासत्थिकायस्सवि, सेसं जहेव दोण्हं, एवं एक्केक्को वड्ढियव्वो पएसो आइल्लएहिं तिहिं अत्थिकाएहिं, सेसं जहेव दोण्हं जाव दसण्ह सिय एक्कोससय दोन्नि सिय तिन्नि जाव सिय दस, संखेज्ञाणं सिय एक्कोसय दोन्नि जाव सिय दस सिय संखेज्ञा, असंखेज्ञाणं सिय एक्क जाव सिय संखेज्ञा सिय असंखेज्ञा, जहा असंखेज्ञा एवं अनंतावि।

जत्थ णं भंते ! एगे अद्धासमए ओगाढे तत्थ केवतिया धम्मत्थि० ?, एक्को, केवतिया अहम्मत्थि० ?, एक्को, केवतिया आगासत्थि० ?, एक्को, केवइया जीवत्थि० ?, अनंता, एवं जाव अद्धासमया। जत्थ णं भंते! धम्मत्थिकाए ओगाढे तत्थ केवतिया धम्मत्थिकायप० ओगाढा नत्थि एक्कोवि, केवतिया अहम्मत्थिकाय० ?, असंखेज्ञा, केवतिया आगास० ?, असंखेज्ञा, केवतिया जीवत्थिकाय० ?, अनंता, एवं जाव अद्धासमया।

जत्थ णं भंते ! अहम्मत्थिकाए ओगाढे तत्थ केवतिया धम्मत्थिकाय० ?, असंखेज्ञा, केवतिया अहम्मत्थि० ?, नत्थि एक्कोवि, सेसं जहा धम्मत्थिकायस्स, एवं सव्वे, सट्ठाणे नत्थि एक्कोवि भाणियव्वं, परट्ठाणे आदिल्लगा तिन्नि असंखेज्ञा भाणियव्वा, पच्छिल्लगा तिन्नि अनंता भाणियव्वा जाव अद्धासमओत्ति जाव केवतिया अद्धासमया ओगाढा नत्थि एक्कोवि।

जत्थ णं भंते ! एगे पुढविकाइए ओगाढे तत्थ णं केवतिया पुढविक्काइया ओगाढा ?, असंखेज्ञा, केवतिया आउक्काइया ओगाढा ?, असंखेज्ञा, केवइया तेउकाइया ओगाढा ?, असंखेज्ञा, केवइया वाउ० ओगाढा ?, असंखेज्जा, केवतिया वणस्सइकाइया ओगाढा ?, अनंता।

जत्थ णं भंते! एगे आउकाइए ओगाढे तत्थ णं केवतिया पुढवि० असंखेज्ञा, केवतिया आउ० असंखेज्ञा, एवं जहेव पुढविकाइयाणं वत्तव्वता तहेव सव्वेसिं निरवसेसं भाणियव्वं जाव वणस्सइकाइयाणं जाव केवतिया वणस्सइकाइया ओगाढा ?, अनंता॥

**वृ.** 'जत्थ णं भंते!' इत्यादि, यत्र प्रदेशे एके धर्मास्तिकायस्य प्रदेशोऽवगाढस्तत्रान्यस्तत्प्रदेशो नास्तीतिकृत्वाऽऽह– 'नत्थि एक्कोवि' त्ति, धर्मास्तिकायप्रदेशस्थानेऽधर्मास्तिकायप्रदेशस्य विद्यमानत्वादाह– 'एक्को' त्ति, एवमाकाशास्तिकायस्याप्येक एव, जीवास्तिकायपुद्गलास्तिकाययोः पुनरनन्ताः प्रदेशा एकैकस्य धर्मास्तिकायप्रदेशस्य स्थाने सन्ति तैः प्रत्येकमनन्तैर्व्याप्तोऽसावत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तम्–'अनंत'त्ति, अद्धासमयास्तु मनुष्यलोक एव सन्ति न परतोऽतो धर्मास्तिकायप्रदेशे तेषामवगाहोऽस्ति नास्ति च, यत्रास्ति तत्रानन्तानां भावना तु प्राग्वत्, एतदेवाह–'अद्धासमये'त्यादि

'जत्थण'मित्यादीन्यधर्मास्तिकायसूत्राणि षड् धर्मास्तिकायसूत्राणीव वाच्यानि, आकाशास्तिकायसूत्रेषु 'सिय ओगाढा सिय नो ओगाढ'त्ति लोकालोकरूपत्वादाकाशस्य लोकाकाशेऽवगाढा अलोकाकाशे तु न तदभावात् ।। जत्थणं भंते ! पोग्गलत्थिकायपएसे' त्यादि, सियो एक्को सिय दोन्नि त्ति यदैकत्राकाशप्रदेशे द्व्यणुकः स्कन्धोऽवगाढः स्यात्तदा तत्र धर्मास्तिकायप्रदेश एक एव, यदा तु द्वयोराकाशप्रदेशयोरसाववगाढः स्यात्तदा तत्र द्वा धर्मप्रदेशाववगाढौ स्यातामिति, एवमवगाहनानुसारेणाधर्मास्तिकायाकाशास्तिकाययोरपि स्यादेकः स्याद्वाविति भावनीयं, 'सेसं जहा धम्मत्थिकायस्स'त्ति शेषमित्युक्तापेक्षया जीवास्तिकायपुद्गलास्तिकायाद्धासमयलक्षणं त्रयं यथा धर्मास्तिकायप्रदेशवक्तव्यतायामुक्तं तथा पुद्गल-प्रदेशद्वयवक्तव्यतायामपि, पुद्गलप्रदेशद्वयस्थाने तदीया अनन्ताः प्रदेशा अवगाढा इत्यर्थः । पुद्गलप्रदेशत्रयसूत्रेषु 'सिय इक्क'इत्यादि, यदा त्रयोऽप्यणव एकत्रावगाढास्तदा तत्रैक धर्मास्ति-कायप्रदेशोऽवगाढः, यदा तु द्वयो १ । २ स्तदा द्वाववगाढौ, यदा तु त्रिषु । १ । १ । १ । तदा त्रय इति, एवमधर्मास्तिकायस्याकाशास्तिकायस्य च वाच्यं ।

'सेसं जहेव दोण्हं'ति 'शेषं' जीवपुद्गलाद्धासमयाश्रितं सूत्रत्रयं यथैव द्वयोः पुद्गलप्रदेशयोरवगाहचिन्तायामधीतं तथैव पुद्गलप्रदेशत्रयतिन्तायामप्यध्येयं, पुद्गलप्रदेशत्रयस्थानेऽनन्ता जीवप्रदेशा अवगाढा इत्येवमध्येयमित्यर्थः ।

'एवं एक्केक्कोवड्ढेयव्वो पएसो आइल्लेहिं तिहिं २ अत्थिकाएहिं'ति यथा पुद्गलप्रदेशत्रयावगाहचिन्तायां धर्मास्तिकायादिसूत्रत्रये एकैकः प्रदेशो वृद्धिं नीतः एवं पुद्गलप्रदेशचतुष्याद्यवगाहचिन्तायामप्येकैकस्तत्र वर्द्धनीयः, तथाहि–

'जत्थ णं भंते ! चत्तारि पुग्गलत्थिकायप्पएसा ओगाढा तत्थ केवइया धम्मत्थिकायप्पएसा ओगाढा ?, सिय एक्को सिय दोन्नि सिय तिन्नि सिय चत्तारि'इत्यादि, भावना चास्य प्रागिव, 'सेसेहिं जहेव दोण्हं'ति शेषेषु जीवास्तिकायादिषु त्रिषु सूत्रेषु पुद्गलप्रदेशचतुष्टयचिन्तायां तथा वाच्यं यथा तेष्वेव पुद्गलप्रदेशद्वावगाहचिन्तायामुक्तं, तच्चैवं–

'जत्थ णं भंते ! चत्तारि पोग्गलत्थिकायप्पएसा ओगाढा तत्थ केवतिया जीवत्थिकायप्पएसा ओगाढा ?, अनंता'इत्यादि, 'जहा असंखेज्जा एवं अनंतावि'त्ति, अस्यायं भावार्थः–

'जत्थ णं भंते ! अनता पोग्गलत्थिकायप्पएसा ओगाढा तत्थ केवतिया धम्मत्थिकायप्पएसा ओगाढा ?, सिय एक्को सिय दोन्नि जाव सिय असंखेज्जा'एतदेवाध्येयं न तु 'सिय अनंत'त्ति, धर्मास्तिकायाधर्मास्तिकायलोकाकाशप्रदेशानामनन्तानामभावादिति ।

अथ प्रकारान्तरेणावगाहद्वारमेवाह–'जत्थ ण'मित्यादि, धर्मास्तिकायशब्देन समस्ततत्प्रदेशसङ्ग्रहात् प्रदेशान्तराणां चाभावादुच्यते–यत्र धर्मास्तिकायोऽवगाढस्तत्र नास्त्येकोऽपि तत्प्रदेशोऽवगाढ इति, अधर्मास्तिकायाकाशास्तिकाययोरसङ्ख्येयाः प्रदेशा अवगाढा असङ्ख्येयप्रदेशत्वादधर्मास्तिकायलोकाकाशयोः, जीवास्तिकायसूत्रे चानन्तास्तत्प्रदेशाः, अनन्तप्रदेशत्वाज्जीवास्तिकायस्य, पुद्गलास्तिकायसूत्राद्धासूत्रयोरप्येवं, एतदेवाह–'एवं जाव अद्धासमय'त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैकस्य पृथिव्यादीजीवस्य स्थाने कियन्तः पृथिव्यादिजीवा अवगाढाः ? इत्येवमर्थं 'जीवमोगाढ'त्ति द्वारं प्रतिपादयितुमाह—'जत्थ णं भंते ! एगे पुढविक्काइए'इत्यादि, एकपृथिवीकायिकावगाहेऽसङ्ख्येयाः प्रत्येकं पृथिवीकायिकादयश्चत्वारः सूक्ष्मा अवगाढाः, यदाह—'जत्थ एगो तत्थ नियमा असंखेज्ज'त्ति, वनस्पतयस्त्वनन्ता इति ॥

अथास्तिकायप्रदेशनिषदनद्वारं, तत्र च—

**मू. (५८१)** *एयंसि णं भंते ! धम्मत्थिकाय० अधम्मत्थिकाय० आगासत्थिकायंसि चक्किया केई आसइत्तए वा चिट्ठित्तए वा निसीइत्तए वा तुयट्टित्तए वा ?, नो इणट्ठे समट्ठे, अनंता पुण तत्थ जीवा ओगाढा, से केणट्ठेणं भंते ! एवं वुच्चइ एतंसि णं धम्मत्थि० जाव आगासत्थिकायंसि नो चक्किया केई आसइत्तए वा जाव ओगाढा ? गोयमा ! से जहा नामए—कूडागारसाला सिया दुहओ लित्ता गुत्ता गुत्तदुवारा जहा रायप्प- सेणइज्जे जाव दुवारवयणाइं पिहेइ दु० २ तीसे कूडागारसालाए बहुमज्झदेसभाए जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं पदीवसहस्सं पलीवेज्जा*

*से नूणं गोयमा ! ताओ पदीवलेस्साओ अन्नमन्नंबद्धाओ अन्नमन्नपुट्ठाओ जाव अन्नमन्नघडत्ताए चिट्ठंति ?, हंता चिट्ठंति, चक्किया णं गोयमा ! केई तासु पदीवलेस्सासु आसइत्तए वा जाव तुयट्टित्तए वा ?, भगवं ! नो तिणट्ठे समट्ठे, अनंता पुण तत्थ जीवा ओगाढा, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जाव ओगाढा ॥*

**वृ.** 'एयंसि ण'मित्यादि, एतस्मिन् णमित्यलङ्कारे 'चक्किय'त्ति शक्नुयात्कश्चित् पुरुषः ॥ अथ बहुसमेति द्वारं, तत्र—

**मू. (५८२)** *कहि णं भंते ! लोए बहुसमे ? कहि णं भंते ! लोए सव्वविग्गहिए प० ? गोयमा ! इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्लेसु खुड्डागपयरेसु एत्थ णं लोए बहुसमे एत्थ णं लोए सव्वविग्गहिए पन्नत्ते ।*

*कहि णं भंते ! विग्गहविग्गहिए लोए पन्नत्ते ?, गोयमा ! विग्गहकंडए एत्थ णं विग्गहविग्गहिए लोए पन्नत्ते ॥*

**वृ.** 'कहि ण'मित्यादि, 'बहुसमे'त्ति अत्यन्तं समः, लोको हि क्वचिद्वर्द्धमानः क्वचिद्धीयमानोऽतस्तन्निषेधाद्बहुसमो वृद्धिहानिवर्जित इत्यर्थः 'सव्वविग्गहिए'त्ति विग्रहो वक्र लघुमित्यर्थः तदस्यास्तीति विग्रहिकः सर्वथा विग्रहिकः सर्वविग्रहिकः सर्वसङ्क्षिप्त इत्यर्थः ।

'उवरिमहेट्ठिल्लेसु खुड्डागपयरेसु'त्ति उपरिमोयमवधीकृत्योर्द्ध प्रतरवृद्धि प्रवृत्ता, अधस्तनश्च यमवधीकृत्याधः प्रतरप्रवृद्धि प्रवृत्ता, ततस्तयोरुपरितनाधस्तनयोः क्षुल्लकप्रतरयोः शेषापेक्षया लघुतरयो रज्जुप्रमाणायामविष्कम्भयोस्तिर्यग्लोकमध्यभागवर्त्तिनोः ।

'एत्थ णं'ति एतयोः—प्रज्ञापकेनोपदर्श्यमानतया प्रत्यक्षयोः 'विग्गहविग्गहिए'त्ति विग्रहो—वक्र यदयुक्तो विग्रहः—शरीरं यस्यास्ति स विग्रहविग्रहिकः ।

'विग्गहकंडए'त्ति विग्रहो—वक्रं कण्डकं—अवयवो विग्रहरूपं कण्डकं—विग्रहकण्डकं तत्र ब्रह्मलोककूर्पर इत्यर्थः यत्र वा प्रदेशवृद्धया हान्या वा वक्र भवति तद्विग्रहकण्डकं, तच्च प्रायो लोकान्तेष्वस्तीति । अथ लोकसंस्थानद्वारं, तत्र च—

**मू. (५८३)** *किंसंठिए णं भंते ! लोए पन्नत्ते ?, गोयमा ! सुपइट्ठियसंठिए लोए पन्नत्ते,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*हेट्ठा विच्छिन्ने मज्झे जहा सत्तमसए पढमुद्देसे जाव अंतं करेति ॥*

*एयस्स णं भंते! अहेलोगस्स तिरियलोगस्स उड्ढलोगस्स य कयरे २हिंतो जाव विसेसाहिया वा ?, गोयमा! सव्वत्थोवे तिरियलोए उड्ढलोए असंखेज्जगुमे अहेलोए विसेसाहिए। सेवं भंते सेवं भंतेत्ति ॥*

**वृ.** 'सव्वत्थोवे तिरियलोए' त्ति अष्टादशयोजनशतायामत्वात्, 'उड्ढलोए असंखेज्जगुणे' त्ति किञ्चिन्न्यूनसप्तरज्जूच्छ्रितत्वात् 'अहे लोए विसेसाहिए' त्ति किञ्चित्समधिकसप्तरज्जूच्छ्रितत्वादिति

शतकं-१३ उद्देशकः-४ समाप्त

## -: शतकं-१३ उद्देशकः-५ :-

**वृ.** अनन्तरोद्देशके लोकस्वरूपमुक्तं, तत्र च नारकादयो भवन्तीति नारकादिवक्तव्यतां पञ्चमोद्देशकेनाह, तस्य चेदमादिसूत्रम्-

**मू. (५८४)** *नेरइया णं भंते! किं सचित्ताहारा अचित्ताहारा मीसाहारा ?, गोयमा! नो सचित्ताहारा अचित्ताहारा नो मीसाहारा, एवं असुरकुमारा पढमो नेरइयउद्देसओ निरवसेसो भाणियव्वो ॥ सेवं भंते! सेवं भंतेत्ति ॥*

**वृ.** 'नेरइया णं भंते!' इत्यादि, 'पढमो नेरइयउद्देसओ' इत्यादि, अयं च प्रज्ञापनायामष्टाविंशतितमस्याहारपदस्य प्रथमः, स चैवं दृश्यः-'नेरइया णं भंते! किं सचित्ताहारा अचित्ताहारा मीसाहारा ?, गोयमा! सचित्ताहारा अचित्ताहारा नो मीसाहारा।' 'एवं असुरकुमारे' त्यादीति ॥

शतकं-१३ उद्देशकः-५ समाप्तः

## -: शतकं-१३ उद्देशकः-६ :-

**वृ.** अनन्तरोद्देशके नारगादिवक्तव्यतोक्ता षष्ठेऽपि सैवोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (५८५)** *रायगिहे जाव एवं वयासी-संतरं भंते! नेरतिया उववज्जंति निरतरं नेरइया उववज्जंति ?, गोयमा! संतरंपि नेरइया उवव० निरतरंपि नेरइया उववज्जंति।*

*एवं असुरकुमारावि, एवं जहा गंगेये तहेव दो दंडगा जाव संतरंपि वेमाणिया चयंति निरंतरंपि वेमाणिया चयंति।*

**वृ.** 'रायगिहे' इत्यादि, 'गंगेए' त्ति नवमशतद्वात्रिंशत्तमोद्देशकाभिहिते 'दो दंडग' त्ति उत्पत्तिदण्डक उद्वर्त्तनादण्डकश्चेति ॥ अनन्तरं वैमानिकानां च्यवनमुक्तं, ते च देवा इति देवाधिकाराच्चमराभिधानस्य देवविशेषस्यावासविशेषप्ररूपणायाह-

**मू. (५८६)** *कहन्नं भंते! चमरस्स असुरिंदस्स असुररन्नो चमरचंचा नामं आवासे पन्नत्ते गोयमा! जंबुद्दीवे २ मंदरस्स पव्वयस्स दाहिणेणं तिरियमसंखेज्जे दीवसमुद्दे एवं जहा बितियए सभाए उद्देसए वत्तव्वया सच्चेव अपरिसेसा नेयव्वा नवरं इमं नाणत्तं जाव तिगिच्छकूडस्स उप्पायपव्वयस्स चमरचंचाए रायहाणीए चमरचंचस्स आवासपव्वयस्स अन्नेसिं च बहूणं सेसं तं चेव जाव तेरस य अंगुलाइं अद्धंगुलं च किंचिविसेसा० परिक्खेवेणं।*

*तीसे णं चमरचंचाए रायहाणीए दाहिणपच्चच्छिमेणं छक्कोडिसए पणपन्नं च कोडीओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पणतीसं च सयसहस्साइं पन्नासं च सहस्साइं अरुणोदगसमुद्दं तिरियं वीइवइत्ता एत्थ णं चमरस्स असुरिंदस्स असुरकुमाररन्नो चमरचंचे नामं आवासे पन्नत्ते, चउरासीइं जोयणसहस्साइं आयामविक्खंभेणं दो जोयणसयसहस्सा पन्नट्ठिं च सहस्साइं छच्चबत्तीसे जोयणसए किंचिविसेसाहिए परिक्खेवेणं*

*से णं एगेणं पागारेणं सव्वओ समंता संपरिक्खित्ते, से णं पागारे दिवड्ढं जोयणसयं उड्ढं उच्चत्तेणं एवं चमरचंचाए रायहाणीए वत्तव्वया भाणियव्वा सभाविहूणा जाव चत्तारि पासायपंतीओ*

*चमरे णं भंते ! असुरिंदे असुरकुमारराया चमरचंचे आवासे वसहिं उवेति ?, नो तिणट्ठे समट्ठे, से केणं खाइ अट्ठेणं भंते ! एवं वुच्चइ चमरचंचे आवासे च० २ ?, गोयमा ! से जहानामए–इहं मणुस्सलोगंसि उवगारियलेणाइ वा उज्जाणियलेणाइ वा निज्जाणियलेणाइ वा धारिवारियलेणाइ वा तत्थ णं बहवे मणुस्सा य मणुस्साओ य आसयंति सयंति जहा रायप्पसेणइज्जे जाव कल्लाणफलवित्तिविसेसं पच्चणुब्भवमाणा विहरंति अन्नत्थ पुण वसहिं उवेंति । एवामेव गोयमा ! चमरस्स असुरिंदस्स असुरकुमाररन्नो चमरचंचे आवासे केवलं किड्डारतिपत्तियं अन्नत्थ पुण वसहिं उवेंति से तेण० जाव आवासे, सेवं भंते ! सेवं भंतेत्ति जाव विहरइ ॥*

**वृ.** 'कहिन्नं भंते !' इत्यादि, 'सभाविहूणं' ति सुधर्माद्याः पञ्चेह सभा न वाच्याः, कियद्दूरं यावदियमिह चमरचंचाराजधानीवक्तव्यता भणितव्या ? इत्याह–'जाव चत्तारि पासायपंतीओ' त्ति ताश्च प्राक् प्रदर्शिता एवेति । 'उवगारियलेणाइ व' त्ति 'औपकारिकलयनानि' प्रासादादिपीठकल्पि 'उज्जाणियलेणाइ व' त्ति उद्यानगतजनानामुपकारिकगृहाणि नगरप्रदेशगृहाणि वा 'निज्जाणियलेणाइ व' त्ति नगर-निर्गमगृहाणि 'धारिवारियलेणाइ व' त्ति धाराप्रधानं वारिजलं येषु तानि धारावारिकाणि तानि च तानि लयनानि चेति वाक्यम् 'आसयंति' त्ति 'आश्रयन्ते' ईषद्भजन्ते 'सयंति' त्ति 'श्रयन्ते' अनीषद्भजन्ते ।

–अथवा 'आसयंति' ईषत्स्वपन्ति 'सयंति' अनीषत्स्वपन्ति 'जहा रायप्पसेणइज्जे' त्ति अनेन यत्सूचितं तदिदं–'चिट्ठंति' ऊर्ध्वस्थानेन तेषु तिष्ठन्ति 'निसीयंति' उपविशन्ति 'तुयट्टंति' निषण्णा आसते 'हसंति' परिहासं कुर्वन्ति 'रमन्ते' अक्षादिना रतिं कुर्वन्ति 'ललन्ति' ईप्सितक्रियाविशेषान् कुर्वन्ति 'कीलंति' कामक्रिडां कुर्वन्ति 'किड्डंति' अन्तर्भूतकारितार्थःत्वादन्यान् क्रिडयन्ति 'मोहयन्ति' मोहनं–निधुवनं विदधति ।

'पुरापोराणाणं सुचिन्नाणं सुपरिक्कंताणं सुभाणं कडाणं कम्माणं' ति व्याख्या चास्य प्राग्वदिति, 'वसहिं उवेंति' त्ति वासमुपयान्ति, 'एवामेवे' त्यादि, 'एवमेव' मनुष्याणामौपकारिकादिलयनवच्चमरस्य ३ चमरचञ्च आवासो न निवासस्थानं केवलं किन्तु 'किड्डारइपत्तियं' ति क्रडायां रति–आनन्दः क्रीडारति अथवा क्रीडा च रतिश्च क्रडिरती सा ते वा प्रत्ययोनिमितं यत्र तत् क्रीडारतिप्रत्ययं तत्रागच्छतीति शेषः ।

अनन्तरमसुरकुमारविशेषावासवक्तव्यतोक्ता, असुरकुमारेषु च विराधितदेशसर्वसंयमा उत्पद्यन्ते ततश्च तेषु योऽत्र तीर्थे उत्पन्नस्तद्दर्शनायोपक्रमते–

**मू. (५८७)** *तए णं समणे भगवं महावीरे अन्नया कयाइ रायगिहाओ नगराओ गुणसिलाओ जाव विहरइ । तेणं कालेणं तेणं समएणं चंपा नामं नयरी होत्था वन्नओ पुन्नभद्दे चेइए वन्नओ, तए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णं समणे भगवं महावीरे अन्नया कदाइ पुव्वाणुपुव्विं चरमाणे जाव विहरमाणे जेणेव चंपा नगरी जेणेव पुन्नभद्दे चेतिए तेणेव उवाग० २ जाव विहरइ।

तेणं कालेणं २ सिंधुसोवीरेसु जणवएसु वीतीभए नामं नगरे होत्था वन्नओ, तस्स णं वीतीभयस्स नगरस्स बहिया उत्तरपुरच्छिमे दिसीभाए एत्थ णं मियवणे नामं उज्जाणे होत्था सव्वोउय० वन्नओ, तत्थ णं वीतीभए नगरे उदायणे नामं राया होत्था महया वन्नओ, तस्स णं उदायणस्स रन्नो पभावती नामं देवी होत्था सुकुमाल० वन्नओ।

तस्स णं उदानमस्स रन्नो पुत्ते पभावतीए देवीए अत्तए अभीतिनामं कुमारे होत्था सुकुमाल जहा सिवभद्दे जाव पच्चुवेक्खमाणे विहरति, तस्स णं उदायणस्स रन्नो नियए भायणेज्जे केसीनामं कुमारे होत्था सुकुमाल जाव सुरूवे, से णं उदायने राया सिंधुसोवीरप्पामोक्खाणं सोलसण्हं जणवयाणं वीतीभयप्पामोक्खाणं तिण्हं तेसट्ठीणं नगरागरसयाणं महसेनप्पामोक्खाणं दसण्हं राईणं बद्धमउडाणं विदिन्नछत्तचामरवालवीयणाणं अन्नेसिं च बहूणं राईसरतलवरजाव सत्थवाहप्पभिईणं आहेवच्चं जाव कारेमाणे पालेमाणे समणोवासए अभिगयजीवाजीवे जाव विहरइ। तए णं से उदयणे राया अन्नया कयाइ जेणेव पोसहसाला तेणेव उवागच्छइ जहा संखे जाव विहरइ।

तए णं तस्स उदायणस्स रन्नो पुव्वरत्तावरत्तकालसमयंसि धम्मजागरियं जागरमाणस्स अयमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था–धन्ना णं ते गामागरनगरखेडकब्बडमडंबदोण-मुहपट्टणासमसंबाहसन्निवेसा जत्थ णं समणे भगवं महावीरे विहरइ, धन्ना णं ते राईसरतल-वरजावसत्थवाहप्पभिईओ जे णं समणं भगवं महावीरं वंदंति नमंसंति जाव पज्जुवासंति।

जइ णं समणे भगवं महावीरे पुव्वाणुपुव्विं चरमाणे गामाणुगामं जाव विहरमाणे इहमा-गच्छेज्जा इह समोसरेज्जा इहेव वीतीभयस्स नगरस्स बहिया मियवणे उज्जाणे अहापडिरूवं उग्गहं उग्गिण्हित्ता संजमेणं तवसा जाव विहरेज्जा तो णं अहं समणं भगवं महावीरं वंदेज्जा नमंसेज्जा जाव पज्जुवासेज्जा, तए णं समणे भगवं महावीरे उदायणस्स रन्नो अयमेयारूवं अब्भत्थियं जाव समुप्पन्नं वियाणित्ता चंपाओ नगरीओ पुन्नभद्दाओ चेइयाओ पडिनिक्खमति पडिनि० २ पुव्वाणुपुव्विं चरमाणे गामाणु० जाव विहरमाणे जेणेव सिंधुसोवीरे जणवए जेणेव वीतीभये नगरे जेणेव मियवणे उज्जाणे तेणेव उवा० २ जाव विहरति।

तए णं वीतीभये नगरे सिंघाडगजाव परिसा पज्जुवासइ। तए णं से उदायणे राया इमीसे कहाए लद्धट्ठे समाणे हट्ठतुट्ठ० कोडुंबियपुरिसे सद्दावेति को० २ एवं वयासी–खिप्पामेव भो देवाणुप्पिया! वीयीभयं नगरं सब्भिंतरबाहिरियं जहा कूणिओ उववाइए जाव पज्जुवासति, पभावतीपामोक्खाओ देवीओ तहेव जाव पज्जुवासंति, धम्मकहा। तए णं से उदायने राया समणस्स भगवओ महावीरस्स अंतियं धम्मं सोच्चा निसम्म हट्ठतुट्ठे उट्ठाए उट्ठेइ २ समणं भगवं महावीरं तिक्खुत्तो जाव नमंसित्ता एवं वयासी–एवमेयं भंते! तहमेयं भंते! जाव से जहेयं तुज्झे वदहत्तिकट्टु जं नवरं देवाणुप्पिया! अभीयिकुमारं रज्जे ठावेमि, तए णं अहं देवाणुप्पियाणं अंतिए मुंडे भवित्ता जाव पव्वयामि, अहासुहं देवाणुप्पिया! मा पडिबंधं।

तए णं से उदायणे राया समणेणं भगवया महावीरेणं एवं वुत्ते समाणे हट्ठतुट्ठे समणं भगवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महावीरं वंदति नमंसति २ तमेव आभिसेक्कं हत्थिं दुरूहइ २ त्ता समणस्स भगवओ महावीरस्स अंतियाओ मियवणाओ उज्जाणाओ पडिनिक्खमति प० २ जेणेव वीतीभये नगरे तेणेव पहारेत्थ गमणाए। तए णं तस्स उदायणस्स रन्नो अयमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था—एवं खलु अभीयीकुमारे ममं एगे पुत्ते इट्ठे कंते जाव किमंग पुण पासणयाए?, तं जति णं अहं अभीयीकुमारं रज्जे ठावेत्ता समणस्स भगवओ महावीरस्स अंतियं मुंडे भवित्ता जाव पव्वयामि तो णं अभीयीकुमारे रज्जे य रट्ठे य जाव जणवए माणुस्सएसु य कामभोगेसु मुच्छिए गिद्धे गढिए अज्झोववन्ने अनादीयं अनवदग्गं दीहमद्धं चाउरंतसंसारकंतारं अनुपरियट्टिस्सइ, तं नो खलु मे सेयं अभीयीकुमारं रज्जे ठावेत्ता समणस्स भगवओ महावीरस्स जाव पव्वइत्तए, सेयं खलु मे नियगं भाइणेज्जं केसिं कुमारं रज्जे ठावेत्ता समणस्स भगवओ जाव पव्वइत्तए, एवं संपेहेइ एवं संपे० २ जेणेव वीतीभये नगरे तेणेव उवागच्छइ २ वीतीभयं नगरं मज्झंमज्झेणं जेणेव सए गेहे जेणेव बाहिरिया उवट्ठाणसाला तेणेव उवाग० २ आभिसेक्कं हत्थिं ठवेति आभि० २ आभिसेक्काओ हत्थीओ पच्चोरुभइ आ० २ जेणेव सीहासणे तेणेव उवागच्छति २ सीहासनवरंसि पुरत्थाभिमुहे निसीति नि० २ कोडुंबियपुरिसे सद्दावेति को० २ एवं वयासी।

खिप्पामेव भो देवाणुप्पिया! वीतीभयं नगरं सब्भिंतरबाहिरियं जाव पच्चप्पिणंति, तए णं से उदायने राया दोच्चंपि कोडुंबियपुरिसे सद्दावेति स० २ एवं वयासी—खिप्पामेव भो देवाणुप्पिया केसिस्स कुमारस्स महत्थं ३ एवं रायाभिसेओ जहा सिवभद्दस्स कुमारस्स तहेव भाणियव्वो जाव परमाउं पालयाहि इट्ठजणसंपरिवुडे सिंधुसोवीरपामोक्खाणं सोलसण्हं जणवयाणं वीतीभयपामोक्खाणं० महसेण० राया अन्नेसिं चबहूणं राईसर जाव करेमाणे पालेमाणे विहराहित्तिकट्टु जयजयसद्दं पउंजंति। तए णं से केसीकुमारे राया जाए महया जाव विहरति।

तए णं से उदायणे राया केसिं रायाणं आपुच्छइ, तए णं से केसीराया कोडुंबियपुरिसे सद्दावेति एवं जहा जमालिस्स तहेव सब्भिंतरबाहिरियं तहेव जाव निक्खमणाभिसेयं उवट्ठवेति, तए णं से केसीराया अनेगगणणायग जाव संपरिवुडे उदायनं रायं सीहसणवरंसि पुरत्थाभिमुहे निसीयावेति २ अट्ठसएणं सोवन्नियाणं एवं जहा जमालिस्स जाव एवं वयासी—भण सामी! किं देमो? किं पयच्छामो? किंणा वाते अट्ठो?

तए णं से उदायणे राया केसिं रायं एवं वयासी—इच्छामि णं देवाणुप्पिया! कुत्तियावणाओ एवं जहा जमालिस्स नवरं पउमावती अग्गकेसे पडिच्छइ पियविप्पयोगदूसणा, तए णं से केसी राया दोच्चंपि उत्तरावक्कमणं सीहासणं रयावेति दो० २ उदायनं रायं सेयापीतएहिं कलसेहिं सेसं जहा जमालिस्स जाव सन्निसन्ने तहेव अम्मधाती नवरं पउमावती हंसलक्खणं पडसाडगं गहाय सेसं तं चेव जाव सीयाओ पच्चोरुभति सी० २ जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं महावीरं तिक्खुत्तो वंदति नमंसति वं० नमं० उत्तरपुरच्छिमं दिसीभागं अवक्कमति उ० २ सयमेव आभरणमल्लालंकारं तं चेव पउमावती पडिच्छति जाव घडियव्वं सामी! जाव नो पमादेयव्वंतिकट्टु, केसी राया पउमावती य समणं भगवं महावीरं वंदंति नमंसंति २ जाव पडिगया

तए णं से उदायने राया सयमेव पंचमुट्ठियं लोयं सेसं जहा उसभदत्तस्स जाव सव्वदुक्खप्पहीणे

**मू. (५८८)** तए णं तस्स अभीयिस्स कुमारस्स अन्नदा कयाइ पुव्वरत्तावरत्तकालसमयंसि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कुडुंबजागरियं जागरमाणस्स अयमेयारूवे अब्भत्थिए जाव समुप्पज्जित्था—एवं खलु अहं उदायनस्स पुत्ते पभावतीए देवीए अत्तए—तए णं से उदायणे राया ममं अवहाय नियगं भायणिज्जं केसिकुमारं रज्जे ठावेत्ता समणस्स भगवओ जाव पव्वइए, इमेणं एयारूवेणं महया अप्पत्तिएणं मणोमाणसिएणं दुक्खेणं अभिभूए समाणे अंतेपुरपरियालसंपरिवुडे सभंडमत्तोवगरणमायाए वीतीभयाओ नयराओ पडिनिग्गच्छंति पडिनि० २ पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव चंपा नयरी जेणेव कूणिए राया तेणेव उवा० २ कूणियं रायं उवसंपज्जित्ताणं विह० तत्थवि णं से विउलभोगसमितिसमन्नागए यावि होत्था।*

*तए णं से अभीयीकुमारे समणोवासए यावि होत्था, अभिगय जाव विहरइ, उदायनंमि रायरिसिंमि समनुबद्धवेरे यावि होत्था, तेणं कालेणं २ इमीसे रयणप्पभाए पुढवीए निरयपरिसामंतेसु चोसट्ठिं असुरकुमारावाससयसहस्सा पन्नत्ता, तए णं से अभीयी कुमारे बहूइं वासाइं समणोवासग-परियागं पाउणति पा० २ अद्धमासियाए संलेहणाए तीसं भत्ताइं अणसणाए छेएइ २ तस्स ठाणस्स अनालोइयपडिक्कंते कालमासे कालं किच्चा इमीसे रयणप्पभाए पुढवीए तीसाए निरय-परिसामंतेसु चोयट्ठीए आयावा जाव सहस्सेसु अन्नयरंसि आयावा असुरकुमारावासंसि असुरकुमारदेवत्ताए उव०।*

*तत्थ णं अत्थेग० आयावगाणं असुरकुमाराणं देवाणं एगं पलि० ठिई प० तत्थ णं अभीयिस्सवि देवस्स कहिं ग० ? कहिं उव० ?, गोयमा ! महाविदेहे वासे सिज्झिहिति जाव अंतं काहिति, सेवं भंते ! सेवं भंतेत्ति ॥*

**वृ.** 'तए ण'मित्यादि, 'सिंधुसोवीरेसु'त्ति सिन्धुनद्या आसन्नाः सौवीरा—जनपदविशेषाः सिन्धुसौवीरास्तेषु 'वीईभए'त्ति विगता ईतयो भयानि च यतस्यद्वीतिभयं विदर्भेति केचित् 'सव्वोउयवन्नओ'त्ति अनेनेदं सूचितं—'सव्वोउयपुप्फफलसमिद्धे रम्मे नंदनवनप्पगासे' इत्यादीति

'नगरागरसयाणं'ति करादायकानि नगराणि सुवर्णाद्युत्पत्तिस्थानान्याकरा नगराणि चाकराश्चेति नगराकरास्तेषां शतानि नगराकरशतानि तेषां 'नगरसयाणं'ति क्वचित्पाठः, 'विदिन्नछत्तचामरवालवीयणाणं'ति वितीर्णानि छत्राणि चामररूपवालव्यजनिकाश्च येषां ते तथा तेषाम्। 'अप्पत्तिएणं मणोमाणसिएणं दुक्खेणं'ति 'अप्रीतिकेन' अप्रीतिस्वभावेन मनसो विकारो मानसिकं मनसि मानसिं न बहिरुपलक्ष्यमाणविकारं यत्तन्मनोमानसिकं तेन,

—केनैवंविधेन ? इत्याह—दुःखेन, 'सभंडमत्तोवगरणमायाय'त्ति स्वां—स्वकीयां भाण्डमात्रां भाजनरूपं परिच्छदं उपकरणं च—शय्यादि गृहीत्वेत्यर्थः, अथवा सह भाण्डमात्रया यदुपकरणं तत्तथा तदादाय, 'समनुबद्धवेरि'त्ति अव्यवच्छिन्नवैरिभावः 'निरयपरिसामंतेसु'त्ति नरकपरिपार्श्वतः 'चोयट्ठीए आयावा असुरकुमारावासेसु'त्ति इह 'आयाव'त्ति असुरकुमारविशेषाः, विशेषतस्तु नावगम्यत इति ॥

शतकं—१३ उद्देशकः—६ समाप्तः

## —: शतकं—१३ उद्देशकः—७ :—

**वृ.** य एतेऽनन्तरोद्देशकेऽर्था उक्तास्ते भाषयाऽतो भाषाया एव निरूपणाय सप्तम उच्यते, तस्य चेदमादिसूत्रम्—

***मू. (५८९)*** *रायगिहे जाव एवं वयासी—आया भंते ! भासा अन्ना भासा ?, गोयमा ! नो*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आया भासा अन्ना भासा, रूविं भंते ! भासा अरूविं भासा ?, गोयमा ! रूविं भासा नो अरूविं भासा, सचित्ता भंते ! भासा अचित्ता भासा ?, गोयमा ! नो सचित्ता भासा अचित्ता भासा ।*

*जीवा भंते ! भासा अजीवा भासा ?, गोयमा ! नो जीवा भासा अजीवा भासा । जीवाणं भंते ! भासा अजीवाणं भासा ?, गोयमा ! जीवाणं भासा नो अजीवाणं भासा ।*

*पुव्विं भंते ! भासा भासिज्जमाणी भासा भासासमयवीतिक्कंता भासा ?, गोयमा ! नो पुव्विं भासा भासिज्जमाणी भासा नो भासासमयवीतिक्कंता भासा ।*

*पुव्विं भंते ! भासा भिज्जति भासिज्जमाणी भासा भिज्जति भासासमयवीतिक्कंता भासा भिज्जति ?, गोयमा ! नो पुव्विं भासा भिज्जति भासिज्जमाणी भासा भिज्जइ नो भासासमयवीतिक्कंता भासा भिज्जति ।*

*कतिविहा णं भंते ! भासा पन्नत्ता ?, गोयमा ! चउव्विहा भासा पन्नत्ता, तंजहा–सच्चा मोसा सच्चामोसा असच्चामोसा ॥*

**वृ.** 'रायगिहे' इत्यादि, 'आया भंते ! भास'त्ति काकाऽध्येयं आत्मा–जीवो भाषा जीवस्वभावा भाषेत्यर्थः यतो जीवेन व्यापार्यते जीवस्य च बन्धमोक्षार्था भवति ततो जीवधर्मत्वाज्जीव इति व्यपदेशार्हा ज्ञानवदिति, अथान्या भाषा–न जीवस्वरूपा श्रोत्रेन्द्रिग्राह्यत्वेन मूर्त्ततयाऽऽत्मना च निसृज्यमानत्वात्तथाविधलोष्ठादिवत् अचेतनत्वाच्चाकाशवत्, यच्चोक्तं–जीवेन व्यापार्यमाणत्वाज्जीवः स्याज्ज्ञानवत्तदनैकान्तिकं, जीवव्यापारस्य जीवादत्यन्तं भिन्नस्वरूपेऽपि दात्रादौ दर्शनादिति । 'रूविं भंते ! भास'त्ति रूपिणी भदन्त ! भाषा श्रोत्रस्यानुग्रहोपघातकारित्वात्तथाविधकर्णाभरणादिवत्, अथारूपिणी भाषा चक्षुषाऽनुपलभ्यत्वाद्धर्मास्तिकायादिवदिति शङ्का अतः प्रश्नः, उत्तरं तु रूपिणी भाषा, यच्च चक्षुरग्राह्यत्वमरूपित्वसाधनायोक्तं तदनैकान्तिकं, परमाणुवायुपिशाचादीनां रूपवतामपि चक्षुरग्राह्यत्वेनाभिमतत्वादिति ।

अनात्मरूपाऽपि सचित्तासौ भविष्यति जीवच्छरीरवदिति पृच्छन्नाह–'सचित्ते' त्यादि, उत्तरं तु नो सचित्ता जीवनिसृष्टपुद्‌गलसंहतिरूपत्वात्तथाविधलेष्टुवत्, तथा 'जीवा भंते !' इत्यादि, जीवतीति जीवा–प्राणधारणस्वरूपा भाषा उतैतद्विलक्षणेति प्रश्नः, अत्रोत्तरं नो जीवा, उच्छ्वासादिप्राणानां तस्या अभावादिति । इह कैश्चिदभ्युपगम्यते अपौरुषेयी वेदभाषा, तन्मतं मनस्याधायाह–'जीवाण' मित्यादि, उत्तरं तु जीवानां भाषा, वर्णानां ताल्वादिव्यापारजन्यत्वात् ताल्वादिव्यापरस्य च जीवाश्रितत्वात्, यद्यपि चाजीवेभ्यः शब्द उत्पद्यते तथाऽपि नासौ भाषा, भाषापर्याप्तिजन्यस्यैव शब्दस्य भाषात्वेनाभिमतत्वादिति ।

तथा 'पुव्विं' मित्यादि, अत्रोत्तरं–नो पूर्वं भाषणाद् भाषा भवति मृत्पिण्डावस्थायां घट इव, भाष्यमाणा–निसर्गावस्थायां वर्त्तमाना भाषा घटावस्थायां घटस्वरूपमिव, 'नो' नैव भाषासम्यव्यतिक्रान्ता–भाषासमयो–निसृज्यमानावस्थातो यावद्‌भाषापरिणामसमयस्तं व्यतिक्रान्ता या सा तथा भाषा भवति, घटसमयातिक्रान्तघटवत् कपालावस्थ इत्यर्थः ।

'पुव्विं भंते !' इत्यादि, अत्रोत्तरं–'नो' नैव पूर्वं निसर्गसमयाद्‌भाषाद्रव्यभेदेन भाषा भिद्यते, भाष्यमाणा भिद्यते, अयमत्राभिप्रायः–इह कश्चिन्मन्दप्रयत्नो वक्ता भवति स चाभिन्नान्येव शब्दद्रव्याणि निसृजति, तानि च निसृष्टान्यसङ्ख्येयात्मकत्वात् परिस्थूरत्वाच्च विभिद्यन्ते, विभिद्यमानानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सङ्ख्येयानि योजनानि गत्वा शब्दपरिणामत्यागमेव कुर्वन्ति, कश्चित्तु महाप्रयत्नो भवति स खल्वादानविसर्गप्रयत्नाभ्यां भित्वैव विसृजति, तानि च सूक्ष्मत्वाद्बहुत्वाच्चानन्तगुणवृद्धया वर्द्धमानानि षट्सु दिक्षु लोकान्तमाप्नुवन्ति, अत्र च यस्यामवस्थायां शब्दपरिणामस्तस्यां भाष्यमाणताऽवसेयेति, 'नो भासासमयवीइक्कंते'ति परित्यक्तभाषापरिणामेत्यर्थः उत्कृष्टप्रयत्नस्य तदानीं निवृत्तत्वादितिभावः।

अनन्तरं भाषा निरूपिता, सा च प्रायो मनःपूर्विका भवतीति मनोनिरूपणायाह–

**मू. (५९०)** *आया भंते! मणे अन्ने मणे?, गोयमा! नो आया मणे अन्ने मणे जहा भासा तहा मणेवि जाव नो अजीवाणं मणे, पुव्विं भंते! मणे मणिज्जमाणे मणे? एवं जहेव भासा, पुव्विं भंते! मणे भिज्जति मणिज्जमाणे मणे भिज्जति मणसमयवीतिक्कंते मणे भिज्जति?, एवं जहेव भासा।*

*कतिविहे णं भंते! मणे पन्नत्ते?, गोयमा! चउव्विहे मणे पन्नत्ते, तंजहा–सच्चे जाव असच्चामोसे।*

**वृ.** 'आया भंते! मणे'इत्यादि, एतत्सूत्राणि च भाषासूत्रवन्नेयानि, केवलमिह मनोद्रव्यसमुदयो मननोपकारी मनः–पर्याप्तिनामकर्मोदयसम्पाद्यो, भेदश्च तेषां विदलनमात्रमिति

अनन्तरं मनो निरूपितं तच्च काये सत्येव भवतीति काय निरूपणायाह–

**मू. (५९१)** *आया भंते! काये अन्ने काये?, गोयमा! आयावि काये अन्नेवि काये, रूविं भंते! काये अरूविकाये?, पुच्छा, गोयमा! रूविंपि काये अरूविंपि काए, एवं एक्कक्के पुच्छा, गोयमा! सच्चित्तेवि काये अच्चित्तेवि काए, जीवेवि काएं अजीवेवि काए, जीवाणवि काए अजीवाणवि काए।*

*पुव्विं भंते! काये पुच्छा, गोयमा! पुव्विंपि काए कायिज्जमाणेवि काए कायसमयवीतिक्कंतेवि काये, पुव्विं भंते! काये भिज्जति पुच्छा, गोयमा! पुव्विंपि काए कायिज्जमाणेवि काए कायसमयवीतिक्कंतेवि काये, पुव्विं भंते! काये पन्नत्ते?, गोयमा! सत्तविहे काये पन्नत्ते, तंजहा–ओराले ओरालियमीसए वेउव्विए वेउव्वियमीसए आहारए आहारगमीसए कम्मए॥*

**वृ.** 'आया भंते! काये'इत्यादि, आत्मा कायः कायेन कृतस्यानुभवनात्, न ह्यन्येन कृतमन्योऽनुभवति अकृतागमप्रसङ्गात्, अथान्य आत्मनः कायः कायैकदेशच्छेऽपि संवेदनस्य सम्पूर्णत्वेनाभ्युपगमादिति प्रश्नः, उत्तरं त्वात्माऽपि कायः कथञ्चित्तदव्यतिरेकात् क्षीरनीरवत् अग्न्ययस्पिण्डवत् काञ्चनोपलवद्वा, अत एव कायस्पर्शे सत्यात्मनः संवेदनं भवति, अत एव च कायेन कृतमात्मना भवान्तरे वेद्यते, अत्यन्तभेदे चाकृतगमप्रसङ्ग इति।

'अन्नेवि काये'त्ति अत्यन्ताभेदे हि शरीरांशच्छेदे जीवांशच्छेदप्रसङ्गः, तता च संवेदनासम्पूर्णता स्यात्, तथा शरीरस्य दाहे आत्मनोऽपि दाहप्रसङ्गेन परलोकाभावप्रसङ्ग इत्यतः कथञ्चिदात्मनोऽन्योऽपि काय इति, अन्यैस्तु कार्म्मणकायमाश्रित्यात्मा काय इति व्याख्यातं, कार्मणकायस्य संसार्यात्मनश्च परस्पराव्यभिचरितत्वेनैकस्वरूपत्वात्, 'अन्नेवि काए'त्ति औदारिकादिकायापेक्षया जीवादन्यः कायस्तद्विमोचनेन तद्भेदसिद्धिरिति, 'रूविंपि काए'त्ति रूप्यपि कायः औदारिकादिकायस्थूलरूपापेक्षया, अरूप्यपि कायः कार्म्मणकायस्यातिसूक्ष्मरूपित्वेनारूपित्व-विवक्षणात्

'एवं एक्केक्के पुच्छ'त्ति पूर्वोक्तप्रकारेणैकैकसूत्रे पृच्छा विधेया, तद्यथा–'सचित्ते भंते!

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काये अचित्ते काये ?' इत्यादि, अत्रोत्तरं–'सचित्तेवि काए' जीवदवस्थायां चैतन्यसमन्वितत्वात्, 'अचित्तेवि काए' मृतावस्थायां चैतन्यस्याभावात्, 'जीवेवि काये'त्ति जीवोऽपि विवक्षितोच्छ्वासादिप्राणयुक्तोऽपि भवति कायः औदारिकादिशरीरमपेक्ष्य, 'अजीवेवि काये'त्ति अजीवोऽपि उच्छ्वासादिरहितोऽपि भवति कायः कार्म्मणशरीरमपेक्ष्य, 'जीवाणवि काये'त्ति जीवानां सम्बन्धी 'कायः' शरीरं भवति, 'अजीवाणवि काये'त्ति अजीवानामपि स्थापनार्हदादीनां 'कायः' शरीरं भवति शरीराकार इत्यर्थः।

'पुव्विंपि काए'त्ति जीवसम्बन्धकालात्पूर्वमपि कायो भवति यथा भविष्यज्जीवसम्बन्धं मृतदर्दुरशरीरं 'काइज्जमाणेवि काए'त्ति जीवेन चीयमानोऽपि कायो भवति यथा जीवच्छरीरं, 'कायसमयवीतिक्कंतेवि काए'त्ति कायसमयो–जीवेन कायस्य कायताकरणलक्षणस्तं व्यतिक्रान्तो यः स तथा सोऽपि काय एव मृतकडेवरवत्, 'पुव्विंपि काए भिज्जइ'त्ति जीवेन कायतया ग्रहणसमयात्पूर्वमपि कायो मधुघटादिन्यायेन द्रव्यकायो भिद्यते प्रतिक्षणं पुद्‌गलचयापचयभावात्, 'काइज्जमाणेवि काए भिज्जइ'त्ति जीवेन कायीक्रियमाणोऽपि कायो भिद्यते, सिकताकणकलापमुष्टिग्रहणवत् पुद्‌गलानामनुक्षणं परिशाटनभावात्, 'कायसमयवीतिक्कंतेऽवि काये भिज्जइ'त्ति कायसमयव्यतिक्रान्तस्य च कायता भूतभावतया घृतकुम्भादिन्यायेन, भेदश्च पुद्‌गलानां तत्स्वभावतयेति, चूर्णिकारेण पुनः कायसूत्राणि कायशब्दस्य केवलशरीरार्थःत्यागेन चयमात्रवाचकत्वमङ्गीकृत्य व्याख्यातानि, यदाह–

'कायसद्दो सव्वभावसामन्नसरीरवाई' कायशब्दः सर्वभावानां सामान्यं यच्छरीरं चयमात्रं तद्वाचक इत्यर्थः, एवं च 'आयावि काए सेसदव्वाणिविकाये'त्ति, इदमुक्तं भवति–आत्माऽपि कायः प्रदेशसञ्चय इत्यर्थः तदन्योऽप्यर्थः कायप्रदेशसञ्चयरूपत्वादिति, रूपी कायः पुद्‌गलस्कन्धापेक्षया, अरूपी कायो जीवधर्मास्तिकायाद्यपेक्षया, सचित्तः कायो जीवच्छरीरापेक्षया, अचित्तः कायोऽचेतनसञ्चयापेक्षया, जीवः कायः–उच्छ्वासादियुक्तावयवसञ्चयरूपः, अजीवः कायः तद्विलक्षणः, जीवानां कायो–जीवराशि, अजीवानां कायः–परमाण्वादिराशिरिति, एवं शेषाण्यपि

अथ कायस्यैव भेदानाह–'कइविहे ण'मित्यादि, अयं च सप्तविधोऽपि प्राग् विस्तरेण व्याख्यातः इह तु स्थानाशून्यार्थं लेशतो व्याख्यायते, तत्र च 'ओरालिए'त्ति औदारिकशरीरमेव पुद्‌गलस्कन्धरूपत्वादुपचीयमानत्वात्काय औदारिककायः, अयं च पर्याप्तकस्यैवेति, 'ओरालियमीसए'त्ति औदारिकश्चासौ मिश्रश्च कार्मणेनेत्यौदारिकमिश्रः, अयं चापर्याप्तकस्य, 'वेउव्विय'त्ति वैक्रियः पर्याप्तकस्य देवादेः, 'वेउव्वियमीसए'त्ति वैक्रियश्चासौ मिश्रश्च कार्म्मणेनेति वैक्रियमिश्रः, अयं चाप्रतिपूर्णवैक्रियशरीरस्य देवादेः, 'आहारए'त्ति आहारकः आहारकशरीरनिर्वृत्तौ, 'आहारगमीसए'त्ति आहारकपरित्यागेनौदारिकग्रहणायोद्यतस्याहारकमिश्रो भवति मिश्रता पुनरौदारिकेणेति, 'कम्मए'त्ति विग्रहगतौ केवलिसमुद्घाते वा कार्म्मणः स्यादिति।

अनन्तरं काय उक्तस्तत्यागे च मरणं भवतीति तदाह–

**मू. (५९२)** *कतिविहे णं भंते! मरणे पन्नत्ते?, गोयमा! पंचविहे मरणे पन्नत्ते, तंजहा– आवीचियमरणे ओहिमरणे आदितियमरणे बालमरणे पंडियमरणे।*

*आवीचियमरणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! पंचविहे पन्नत्ते, तंजहा– दव्वावी-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*चियमरणे खेत्तावीचियमरणे कालावीचियमरणे भवावीचियमरणे भावावीचियमरणे।*

*दव्वावीचियमरणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! चउव्विहे पन्नत्ते, तंजहा–नेरइयदव्वावीचियमरणे तिरिक्खजोणियदव्वावीचियमरणे मणुस्सदव्वावीचियमरणे देवदव्वावीचियमरणे, से केणट्ठेणं भंते! एवं वुच्चइ नेरइयदव्वावीचियमरणे नेरइयदव्वावीचियमरणे?, गोयमा! जण्णं नेरइया नेरइए दव्वे वट्टमाणा जाइं दव्वाइं नेरइयाउयत्ताए गहियाइं बद्धाइं पुट्ठाइं कडाइं पट्ठवियाइं निविट्ठाइं अभिनिविट्ठाइं अभिसमन्नागयाइं भवंति ताइं दव्वाइं आवीची अनुसमयं निरंतरं मरंतित्तिकट्टु से तेणट्ठेणं गोयमा! एवं वुच्चइ नेरइयदव्वावीचियमरणे, एवं जाव देवदव्वावीचियमरणे।*

*खेत्तावीचियमरणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! चउव्विहे पण्णत्ते, तंजहा–नेरइयखेत्तावीचियमरणे जाव देव०, से केणट्ठेणं भंते! एवं० नेरइयखेत्तावीचियमरणे नेर०? जण्णं नेरइया नेरइयखेत्ते वट्टमाणा जाइं दव्वाइं नेरइयाउयत्ताए एवं जहेव दव्वावीचियमरणे तहेव खेत्तावीचियमरणेवि, एवं जाव भावावीचियमरणे।*

*ओहिमरणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! पंचविहे पन्नत्ते, तंजहा–दव्वोहिमरणे खेत्तोहिमरणे जाव भावोहिमरणे। दव्वोहिमरणे णं भंते! कतिविहे पन्नत्ते?, गोयमा! चउव्विहे पन्नत्ते, तंजहा–नेरइयदव्वोहिमरणे जाव देवदव्वोहिमरणे, से केणट्ठेणं भंते! एवं वु० नेरइयदव्वोहिमरणे २?, गोयमा! जण्णं नेरइया नेरइयदव्वे वट्टमाणा जाइं दव्वाइं संपयं मरंति जण्णं नेरइयाताइं दव्वाइं अनागए काले पुणोवि मरिस्संति से तेण० गोयमा! जाव दव्वोहिमरणे, एवं तिरिक्खजोणिय० मणुस्स० देवोहिमरणेवि, एवं एएणं गमेणं खेत्तोहिमरणेवि कालोहिमरणेवि भवोहिमरणेवि भावोहिमरणेवि।*

*आइंतियमरणे णं भंते! पुच्छा, गोयमा! पंचविहे पन्नत्ते, तं०–दव्वादिंतियमरणे खेत्तादिंतियमरणे जाव भावादिंतियमरणे, दव्वादिंतियमरणे, से केणट्ठें० एवं वु० नेरइयदव्वादिंतियमरणे नेर० २?, गो०! जण्णं नेरइया नेरइयदव्वे वट्टमाणा जाइं दव्वाइं संपयं मरंति जेणं नेरइया ताइं दव्वाइं अनागए काले नो पुणोवि मरिस्संति से तेणट्ठेणं जावमरणे, एवं तिरिक्ख० मणुस्स० देवाइंतियमरणे, एवं खेत्ताइंतियमरणेवि एवं जाव भावाइंतियमरणेवि।*

*बालमरणे णं भंते! कतिविहे प०?, गो०! दुवालसविहे पं० तं०–वलयमरणं जहा खंदए जाव गद्धपट्ठे। पंडियमरणे णं भंते! कइविहे पण्णत्ते?, गोयमा! दुविहे पण्णत्ते, तंजहा–पाओवगमणे य भत्तपच्चक्खाणे य। पाओवगमणे णं भंते! कतिविहे प०?, गोयमा! दुविहे प०, तं०–नीहारिमे य अनीहारिमे य जाव नियमं अपडिकम्मे।*

*भत्तपच्चक्खाणे णं भंते! कतिविहे प०?, एवं तं चेव नवरं नियमं सपडिकम्मे। सेवं भंते*

**वृ.** 'कतिविहे णं भंते! मरणे' इत्यादि, 'आवीइयमरणे'त्ति आ–समन्ताद्वीचयः–प्रतिसमयमनुभूयमानायुषोऽपरापरायुर्दलिकोदयात्पूर्वपूर्वायुर्दलिकविच्युतिलक्षणाऽवस्था यस्मिन् तदावीचिकं अथवाऽविद्यमाना वीचि–विच्छेदो यत्र तदवीचिकं अवीचिकमेवावीचिकं तच्च तन्मरणं चेत्यावीचिकमरणं।

'ओहिमरणे'त्ति अवधि–मर्यादा ततश्चावधिना मरणमवधिमरणं, यानि हि नारका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिभवनिबन्धनतयाऽऽयुःकर्मदलिकान्यनुभूय म्रियते, यदि पुनस्तान्येवानुभूय मरिष्यते तदा तदवधिमरणमुच्यते, तदद्रव्यापेक्षया पुनस्तद्ग्रहणावधिं यावज्जीवस्य मृतत्वात्, संभवति च गृहीतोज्झितानां कर्म्मदलिकानां पुनर्ग्रहणं परिणाम वैचित्र्यादिति

'आइंतियमरणे' त्त अत्यन्तं भवमान्यन्तिकं तच्च तन्मरणं चेति वाक्यं, यानि हि नरकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतश्च न पुनस्तान्यनुभूय पुनर्मरिष्यत इत्येवं यन्मरणं, तच्च तद्रव्यापेक्षयाऽत्यन्तभावित्वादात्यन्तिकमिति

'बालमरणे' त्ति अविरतमरणं 'पंडियमरणे' त्ति सर्वविरतमरणं, तत्रावीचिकमरणं पञ्चधा द्रव्यादिभेदन, द्रव्यावीचिकमरणं च चतुर्द्धा नारकादिभेदात्, तत्र नारकदन्यावीचिकमरण-प्रतिपादनायाह–

'जण्ण' मित्यादि, 'यत्' यस्माद्धेतोर्नैरयिका नारकत्वे द्रव्ये नारकजीवत्वेन वर्त्तमाना मरन्तीति योगः, 'नेरइयाउयत्ताए' त्ति नैरयिकायुष्कतया 'गहियाइं' ति स्पर्शनतः 'बद्धाइं' ति बन्धनतः 'पुट्ठाइं' ति पोषितानि प्रदेसप्रक्षेपतः 'कडाइं' ति विशिष्टानुभागतः 'पट्ठवियाइं' ति स्थितिसम्पादनेन 'निविट्ठाइं' ति जीवप्रदेशेषु 'अभिनिविट्ठाइं' ति जीवप्रदेशेष्वभिव्याप्तया निविष्टानि अतिगाढतां गतानीत्यर्थः, ततश्च 'अभिसमन्नागयाइं' ति अभिसमन्वागतानि–उदयावलिकायामा-गतानि तानि द्रव्याणि 'आविइ' त्ति, किमुक्तं भवति 'अनुसमयं' ति अनुसमयं–प्रतिक्षणम्।

एतच्च कतिपयसमयसमाश्रयणतोऽपि स्यादत् आह–'निरंतरं मरंति' त्ति 'निरन्तरम्' अव्यवच्छेदेन सकलसमयेष्वित्यर्थः म्रियन्ते विमुञ्चन्तीत्यर्थः 'इतिकट्टु' त्ति इतिहेतोर्नैरयिकद्रव्या-वीचिकमरणमुच्यत इति शेषः, एतस्यैव निगमनार्थःमाह–'से तेणट्ठेण' मित्यादि।

'एवं जाव भावावीचियमरणे' त्ति इह यावत्करणात् कालवीचिकमरणं भवावीचिकमरणं च द्रष्टव्यं, तत्र चैवं पाठः–'कालावीइयमरणे णं भंते! कइविहे पन्नत्ते?, गोयमा! चउव्विहे पन्नत्ते, तंजहा–नेरइयकालावीइयमरणे ४, से केणट्ठेणं नेरइयकालावीचियमरणे २?, गोयमा जन्नं नेरइया नेरइयकाले वट्टमाणा' इत्यादि, एवं भवावीचिकमरणमप्यध्येयम्।

नैरयिकद्रव्यावधिमरणसूत्रे 'जण्ण' मित्यादि, एवं चेहाक्षरघटना–नैरयिकद्रव्ये वर्त्तमाना ये नैरयिका यानि द्रव्याणि साम्प्रतं म्रियन्ते–त्यजन्ति तानि द्रव्याण्यनागतकाले पुनस्त इति गम्यं मरिष्यन्ते–त्यक्ष्यन्तीति यत्तन्नैरयिकद्रव्यावधिमरणमुच्यत इति शेषः 'से तेणट्ठेण' मित्यादि निगमनम्

पण्डितमरणसूत्रे 'नीहारिमे अनीहारिमे' त्ति यत्पादपोपगमनमाश्रयस्यैकदेशे विधीयते तन्निर्हारिमं, कडेवरस्य। निर्हरणीयत्वात्, यच्च गिरिकन्दरादौ विधीयते तदनिर्हारिमं, कडेवरस्या-निर्हरणीयत्वात्, 'निमं अप्पडिकम्मे' त्ति शरीरप्रतिकर्मवर्जितमेव, चतुर्विधाहारप्रत्याख्याननिष्पन्नं चेदं भवतीति, 'तं चेव' त्ति करणान्निर्हारिममनिर्हारिमं चेति द्वयं, सप्रतिकर्म्मैव चेदं भवतीति॥

शतकं–१३ उद्देशकः–७ समाप्तः

## –: शतकं–१३ उद्देशक–८ :–

**वृ.** अनन्तरोद्देशके मरणमुक्तं, तच्चायुष्कर्मस्थितिक्षयरूपमिति कर्म्मणां स्थितिप्रतिपाद-नार्थोऽष्टम उद्देशकस्तस्य चेदमादिसूत्रम्–

**मू. (५९३)** *कति णं भंते! कम्मपगडीओ पन्नत्ताओ?, गोयमा! अट्ठ कम्पगडीओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पन्नत्ताओ एवं बंधट्ठिइउद्देसो भाणियव्वो निरवसेसो जहा पन्नवणाए। सेवं भंते! सेवं भंते!॥*

**वृ.** 'कति ण'मित्यादि, 'एवं बंधठिइउद्देसओ'त्ति 'एवम्' अनेन प्रश्नोत्तरक्रमेण बन्धस्य-कर्म्मबन्धस्य स्थितिर्बन्धस्थितिः कर्म्मस्थितिरित्यर्थः तदर्थः उद्देशको बन्धस्थित्युद्देशको भणितव्यः, स च प्रज्ञापनायास्त्रयोविंशतितमपदस्य द्वितीयः, इह वाचनान्तरे सङ्ग्रहणीगाथाऽस्ति, सा चेयं-

॥१॥ 'पयडीणं भेयठिई बंधोवि य इंदियाणुवाएणं।
केरिसय जहन्नठिइं बंधइ उक्कोसियं वावि॥'

अस्याश्चायमर्थः-कर्म्मप्रकृतीनां भेदो वाच्यः, स चैवं-'कइ णं भंते! कम्मपयडीओ प० गोयमा! अट्ठ कम्मपगडीओ प०, तं०-नाणावरणिज्जं दंसणावरणिज्ज'मित्यादि, तथा।

'नाणावरणिज्जे णं भंते! कम्मे कतिविहे पन्नत्ते?, गोयमा! पंचविहे पन्नत्ते, तंजहा-आभिनिबोहियनाणावरणिज्जे सुयनाणावरणिज्जे'इत्यादि। तथा प्रकृतीनां स्थितिर्वाच्या।

सा चैवं-नाणावरणिज्जस्स णं भंते! कम्मस्स केवइयं कालं ठिती पन्नत्ता?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तीसं सागरोवमकोडाकोडीओ'इत्यादि, तथा बन्धो ज्ञानावरणीयादिकर्म्मणामिन्द्रियानुपातेन वाच्यः, एकेन्द्रियादिर्जीवः कः कियतीं कर्म्मस्थितिं बध्नाति? इति वाच्यमित्यर्थः, स चैवम्-'एगिंदिया णं भंते! जीवा नाणावरणिज्जस्स कम्मस्स किं बंधंति गोयमा! जहन्नेणं सागरोवमस्स तिन्नि सत्तभागे पलिओवमस्स असंखेज्जेणं भागेणं ऊणए उक्कोसेणं ते चेव पडिपुन्ने बंधति'इत्यादि।

तथा कीदृशो जीवो जघन्यां स्थितिं कर्मणामुत्कृष्टां वा बघ्नातीति वाच्यं, तच्चेदं- 'नाणावरणिज्जस्स णं भंते! कम्मस्स जहन्नट्ठिइबंधए क०?, गोयमा! अन्नयरे सुहुमसंपरा उवसामए वा खवए वा एस णं गो०! नाणावरणिज्जस्स कम्मस्स जहन्नट्ठिइबंधए तव्वइरित्ते अजहन्ने'इत्यादि

शतकं-१३ उद्देशकः-८ समाप्तः

## -: शतकं-१३ उद्देशकः-९ :-

**वृ.** अनन्तरोद्देशके कर्म्मस्थितिरुक्ता, कर्म्मवशाच्च वैक्रिय करणशक्तिर्भवतीति तद्वर्णनार्थो नवम उद्देशकस्तस्य चेदमादिसूत्रम्-

**मू. (५९४)** *रायगिहे जाव एवं वयासी-से जहानामए-केइ पुरिसे केयाघडियं गहाय गच्छेज्जा, एवामेव अनगारेवि भावियप्पा केयाघडियाकिच्चहत्थगएणं अप्पाणेणं उड्ढं वेहासं उप्पाएज्जा गोयमा! हंता उप्पाएज्जा।*

*अनगारे णं भंते! भावियप्पा केवतियाइं पभू केयाघडियाहत्थकिच्चगयाइं रूवाइं विउव्वित्तए गोयमा! से जहानामए-जुवतिं जुवाणे हत्थेणं हत्थे एवं जहा तइयसए पंचमुद्देसए जाव नो चेव णं संपत्तीए विउव्विंसु वा विउव्विंति वा विउव्विस्संति वा।*

*से जहानामए-केइ पुरिसे हिरन्नपेलं गहाय गच्छेज्जा एवामेव अनगारेविं भावियप्पा हिरण्णपेलहत्थकिच्चगएणं अप्पाणेणं सेसं तं चेव, एवं सुवन्नपेलं एवं रयणपेलं वइरपेलं वत्थपेलं आभरणपेलं, एवं वियलकिड्डं सुबकिड्डं चम्मकिड्डं कंबलकिड्डं, एवं अयभारं तंबभारं तउयभारं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सीसगभारं हिरन्नभारं सुवन्नभारं वइरभारं ।*

*से जहानामए–वग्गुली सिया दोवि पाए उल्लंबिया २ उद्वंपादाअहोसिरा चिट्ठेज्जा एवामेव अनगारेवि भावियप्पा वग्गुलीकिच्चगएणं अप्पाणेणं उद्धं वेहासं, एवं जन्नोवइयवत्तव्वया भ० जाव विउव्विस्संति वा । से जहानामए–जलोया सिया उदगंसि कायं उव्विहिया २ गच्छेज्जा एवा -समेव सेसं जहा वग्गुलीए से जहानामए–बीयंबीयगसउणे सिया दोवि पाए समतुरंगेमाणे स० २ गच्छेज्जा एवाव अनगारे सेसं तं चेव ।*

*से जहानामए–पक्खिविरालिए सिया रुक्खाओ रुक्खं डेवेमाणे गच्छेज्जा एवामेव अनगारे सेसं तं चेव । से जहानामए–जीवंजीवगसउणे सिया दोवि पाए समतुरंगेमाणे स० २ गच्छेज्जा एवामेव अनगारे सेसं तं चेव । से जहानामए–हंसेसियातीराओ तीरं अभिरममाणे २ गच्छेज्जा एवामेव अनगारे हंसकिच्चगएणं अप्पाणेणं सेसं तं चेव, से जहानामए समुद्दवायसए सिया वीईओ वीइं डेवेमाणे गच्छेज्जा एवामेव तहेव ।*

*से जहानामए–केइ पुरिसे चक्कं गहाय गच्छेज्जा एवामेव अनगारेवि भावियप्पा चक्कह-त्थकिच्चगएणं अप्पाणेणं सेसं जहा केयाघडियाए, एवं छत्तं एवं चामरं से जहानामए–केइ पुरिसे रयणं गहाय गच्छेज्जा एवं चेव, एवं वइरं वेरुलियं जाव रिट्ठं, एवं उप्पलहत्थगं एवं पउमहत्थगं एवं कुमुदहत्थगं एवं जाव से जहानामए–केइ पुरिसे सहस्सपत्तगं गहाय गच्छेज्जा एवं चेव ।*

*से जहानामए–केइ पुरिसे भिसं अवद्दालिय २ गच्छेज्जा एवामेव अनगारेवि भिसकिच्चगएणं अप्पाणेणं तं चेव, से जहानामए–मुणालिया सिया उदगंसि कायं उम्मज्जिय २ चिट्ठिज्जा एवामेव सेसं जहा वग्गुलीए ।*

*से जहानामए–वनसंडे सिया किण्हे किण्होभासे जाव निकुरुंबभूए पासादीए ४ एवामेव अनगारेवि भावियप्पा वणंडकिच्चगएणं अप्पाणेणं उड्डं वेहासं उप्पाएज्जा सेसं तं चेव ।*

*से जहानामए–पुक्खरणी सिया चउक्कोणा समतीरा अनुपुव्वसुजायजावसद्दुन्नइ-यमहुरसरणादिया पासादीया ४ एवामेव अनगारेवि भावियप्पा पोक्खरणीकिच्चगएणं अप्पाणेणं उड्डं वेहासं उप्पएज्जा ?, हंता उप्पएज्जा, अनगारे णं भंते ! भावियप्पा केवतियाइं पभू पोक्खर-णीकिच्चगयाइं रूवाइं विउव्वित्तए ?, सेसं तं चेव जाव विउव्विस्संति वा ।*

*से भंते ! किं मायी विउव्वति अमायी विउव्वति ?, गोयमा ! मायी विउव्वइ नो अमायी विउव्वइ, मायी णं तस्स ठाणस्स अनालोइय० एवं जहा तइयसए चउत्थुद्देसए जाव अत्थि तस्स आराहणा । सेवं भंते ! सेवं भंते ! जाव विहरइत्ति ।।*

**वृ.** 'रायगिहे' इत्यादि, 'केयाघडियं' ति रज्जुप्रान्तबद्धघटिकां 'केयाघडियाकिच्चहत्थगएणं' ति केयाघटिकालक्षणं यत्कृत्यं–कार्यं तत् हस्ते गतं यस्य स तथा तेनात्मना 'वेहासं' ति विभक्ति-परिणामात् 'विहायसि' आकाशे 'केयाधडियाकिच्चहत्थगयाइं' ति केयाघटिकालक्षणं कृत्यं हस्ते गतं येषां तानि तथा, 'हिरन्नपेडं' ति हिरण्यस्य मञ्जूषां 'वियलकिलं' ति विदलानां वंशार्द्धानां यः कटः स तथा तं 'सुंबकिड्डुं' ति वीरणकटं 'चम्मकिड्डुं' ति चर्म्मव्यूतं खट्वादिकं 'कंबलकिड्डुं' ति ऊर्णामयं कम्बलं–जीनादि, 'वग्गुली' ति चर्म्मपक्षः पक्षिविशेषः 'वग्गुलिकिच्चगएणं' ति वग्गुलीलक्षणं कृत्यं–कार्यं गतं–प्राप्तं येन स तथा तद्रूपतां गत इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एवं जन्नोवइयवत्तव्वया भाणियव्वा' इत्यनेनेदं सूचितं—'हंता उप्पएज्जा, अनगारे णं भंते! भावियप्पा केवइयाइं पभू वग्गुलिरूवाइं विउव्वित्तए ?, गोयमा ! से जहानामएजुवतिं जुवाणे हत्थेणं हत्थे गिण्हेज्जा' इत्यादि, 'जलोय' त्ति जलौका द्वीन्द्रियजीवविशेषः 'उव्विहिय' त्ति उद्‌ह्य २ उत्प्रेर्य्य २ इत्यर्थः 'बीयंबीयगसउणे' त्ति बीजंबीजकाभिधानः शकुनि स्यात् 'दोवि पाए' त्ति द्वावपि पादौ 'समतुरंगेमाणे' त्ति समौ—तुल्यौ तुरङ्गस्य—अश्वस्य समोत्क्षेपणं कुर्वन् सम तुरंगयमाणः समकमुत्पाटयन्नित्यर्थः 'पक्खिविरालए' त्ति जीवविशेषः 'डेवेमाणे' त्ति अतिक्रामन्नित्यर्थः, 'वीईओ वीइं' ति कल्लोलात् कल्लोलं, 'वेरुलियं' ।

इह यावत्करणादिदं दृश्यं—'लोहियक्खं मसारगल्लं हंसगब्भं पुलगं सोगंधियं जोईरसं अंकं अंजणं रयणं जायरूवं अंजणपुलगं फलिहं' ति, 'कुमुदहत्थगं' इत्यत्र त्वेवं यावत्करणादिदं दृश्यं—

'नलिनहत्थगं सुभगहत्थगं सोगंधियहत्थगं पुंडरीयहत्थगं महापुंडरीयहत्थगं सयवत्त-हत्थगं' ति, 'विसं' ति विसं—मृणालम् 'अवदालिय' त्ति अवदार्य—दारयितवा 'मुणालिय' त्ति नलिनी कायम् 'उम्मज्जिय' त्ति कायमुन्मज्जय—उन्मग्नं कृत्वा, 'किण्हे किण्होभासे' त्ति 'कृष्णः' कृष्णवर्णोऽ-अनवत्स्वरूपेण कृष्ण एवावभासते—द्रष्टृणां प्रतिभातीति कृष्णावभासः ।

इह यावत्कारणादिदं दृश्यं— 'नीले नीलोभासे हरिए हरिओभासे सीए सीओभासे निद्धे निद्धोभासे तिंव्वे तिव्वोभासे किण्हे किण्हच्छाए नीले नीलच्छाए हरिए हरियच्छाए सीए सीयच्छाए तिव्वे तिव्वच्छाए घणकडियकडिच्छाए रम्मे महामेहनिउरंबभूए' त्ति तत्र च 'नीले नीलोभासे' त्ति प्रदेशान्तरे 'हरिए हरिओभासे' त्ति प्रदेशान्तर एव मीलश्च मयूरगलवत् हरितस्तु शुकपिच्छवत्-हरितालाभ इति च वृद्धाः ।

'सीए सीओभास' त्ती शीतः स्पर्शापेक्षया वल्लयाद्याक्रान्तत्वादिति च वृद्धाः 'निद्धे निद्धोभासे' त्ति स्निग्धो रूक्षत्ववर्जितः 'तिव्वे तिव्वोभासे' त्ति 'तीव्रः' वर्णादिगुणप्रकर्षवान् 'किण्हे-किण्हच्छाए' त्ति इह कृष्णशब्दः कृष्णच्छाय इत्यस्य विशेषणमिति न पुनरुक्तता, तथाह—कृष्णः सन् कृष्णच्छायः, छाया चादित्यावरणजन्यो वस्तुविशेषः, एवमुत्तरपदेष्वपि ।

'घणकडियकडिच्छाए' त्ति अन्योऽन्यं शाखानुप्रवेशाद्बहलं निरन्तरच्छा इत्यर्थः, 'अनुपुव्वसुजाय' इत्यत्र यावत्करणादेवं दृश्यम्—'अनुपुव्वसुजायवप्पगंभीरसीयलजला' अनुपूर्वेण सुजाता वप्रा यत्र गम्भीरं शीतलं च जलं यत्र सा तथेत्यादि, 'सहुन्नइयमहुरसरनाइय' त्ति इदमेवं दृश्यं— 'सुयबरहिणमयणसालकोंचकोइलकोज्जकभिंकारककोंडलकजीवंजीवकनंदीमुह-कविलपिंग-लखगकारंडगचक्कवायकलहंससार अनेगसउणगणमिहुणविरइयसद्दुन्नइयमहुरसरह-नाइय' त्ति तत्र शुकादीनां सारसान्तानामनेकेषां शकुनिगणानां मिथुनैर्विरचितं शब्दोन्नतिकं च—उन्नतशब्दकं मधुरस्वरं च नादितंलपितं यस्यां सा तथेति ॥

शतकं—१३ उद्देशकः—९ समाप्तः

## —: शतकं—१३ उद्देशकः—१० :—

वृ. अनन्तरोद्देशके वैक्रयकरणमुक्तं, तच्च समुद्‌घाते सति छद्मस्थस्य भवतीति छाद्मस्थिकसमुद्‌घाताभिधानार्थो दशम उद्देशकस्तस्य चेदमादिसूत्रम्—

**मू. (५९५)** *कति णं भंते ! छाउमत्थियसमुग्घाया पन्नत्ता ?, गोयमा ! छ छाउमत्थिया*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समुग्घाया पन्नत्ता, तंजहा–वेयणासमुग्घाए एवं छाउमत्थियसमुग्घाया नेयव्वा जहा पन्नवणाए जाव आहारगसमुग्धायेत्ति । सेवं भंते ! सेवं भंतेत्ति ।*

**वृ.** 'कइ ण'मित्यादि, 'छाउमत्थिय'त्ति छद्मस्थः–अकेवली तत्र भवाश्छाद्मस्थिकाः 'समुग्घा- ये'ति 'हन हिंसागत्योः' हननं घातः सम्–एकीभावे उत्–प्राबल्ये ततश्चैकीभावेन प्राबल्येन च घातः समुद्घातः, अथ केन सहैकीभावगमनम् ?, उच्यते, यदाऽऽत्मा वेदनादिसमुद्घातं गतस्तदा वेदनाद्यनुभवज्ञानपरिणत एव भवतीति वेदनाद्यनुभवज्ञानेन सहैकीभावः, प्राबल्येन घातः कथम् ? उच्यते, यस्माद्वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मप्रदेशान् कालान्तरानुभ- वयोग्यानुदीराकरणेनाकृष्योदये प्रक्षिप्यानुभूय निर्जरयति–आत्मप्रदेशैः सह संश्लिष्टान् सातयतीत्यर्थः अतः प्राबल्येन घात इति, अयं चेह षड्विध इति बहुवचनं ।

तत्र 'वेयणासमुग्घाए'त्ति एकः, 'एवं छाउमत्थिए' इत्यादिअतिदेशः, 'जहा पन्नवणाए'त्ति इह षट्त्रिंशत्तमपद इति शेषः, ते च शेषाः पञ्चैवं–'कसायसमुग्घाए २ मारणंतियसमुग्घाए ३ वेउव्वियसमुग्घाए ४ तेयगसमुग्घाए ५ आहारगसमुग्घाए ६' त्ति ।

तत्र वेदनासमुद्घातः असद्वेद्यम्र्माश्रयः कषायसमुद्घातः कषायाख्यचारित्रमोहनीयकर्म्माश्रयः मारणान्तिकसमुद्घातः अन्तर्मुहूर्त्तशेषायुष्ककर्माश्रयः वैकुर्विकतैजसाहार-कसमुद्घाताः शरीरनामकर्माश्रयाः, तत्र वेदनासमुद्घातसमुद्धत आत्मा वेदनीयकर्मपुद्गलशातं करोति, कषायसमुद्घातसमुद्धतः कषायपुद्गलशातं, मारणान्तिकसमुद्घातसमुद्धत आयुष्ककर्मपुद्गलशातं वैकुर्विकसमुद्घातसमुद्धतस्तु जीवप्रदेशान् शरीराद्बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमात्रमायामतश्च सङ्ख्येयानि योजनानि दण्डं निसृजति निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्म्मपुद्गलान् प्राग्बद्धान् सातयति सूक्ष्मांश्चादत्ते, यथोक्तं ।

'वेउव्वियसमुग्धाएणं समोहणइ समोहणित्ता संखेज्जाइं जोयणाइं दंडं निसिरइ २ अहाबायरे पोग्गले परिसाडेइ २ अहासुहुमे पोग्गले आइयइ'त्ति । एवं तैजसाहारकसमुद्घातावपि व्याख्येयाविति ॥

शतकं–१३ उद्देशकः–१० समाप्तः

त्रयोदशस्यास्य शतस्य वृत्तिः, कृता मया पूज्यपदप्रसादात् ।
न ह्यन्धकारे विहितोद्यमोऽपि, दीपं विना पश्यति वस्तुजातम् ॥

**शतकं–१३ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवती अङ्गसूत्रे त्रयोदश शतस्य अभयदेवसूरि विरचिता टीका परिसमाप्ता ।**

## शतकं–१४

**वृ.** व्याख्यातं विचित्रार्थं त्रयोदशं शतम्, अथ विचित्रार्थमेव क्रमायातं चतुर्दशमारभ्यते, तत्र च दशोद्देशकास्तत्सङ्ग्रहगाथा चेयम्–

**मू. (५९६)** *चर १ उम्माद २ सरीरे ३ पोग्गल ४ अगणी ५ तहा किमाहारे ६ ।*
*संसिट्ठ ७ मंतरे खलु ८ अणगारे ९ केवली चेव १० ।*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

**वृ.** 'चरउम्माद सरीरे'इत्यादि, तत्र 'चर'त्ति सूचामात्रत्वादस्य चरमशब्दोपलक्षितोऽपि चरमः प्रथम उद्देशकः, 'उम्माय'त्ति उन्मादार्थाभिधायकत्वादुन्मादो द्वितीयः, 'सरीरे'त्ति शरीरशब्दोपलक्षित्वाच्छरीरस्तृतीयः, 'पुग्गल'त्ति पुद्गलार्थाभिधायकत्वात्पुद्गलश्चतुर्थः ।

'अगणी'ति अग्निशब्दोपलक्षितत्वादग्नि पञ्चमः, किमाहारे'त्ति किमाहार इत्येवंविधप्रश्नोपलक्षितत्वात्किमाहारः षष्ठः, 'संसिट्ठ'त्ति 'चिरसंसिट्ठोऽसि गोयम'त्ति इत्यत्र पदे यः संश्लिष्टशब्दस्तदुपलक्षितत्वात् संश्लिष्टोद्देशकः सप्तमः, 'अंतरे'त्ति पृथिवीनामन्तराभिधायकत्वादन्तरोद्देशकोऽष्टमः, 'अनगारे'त्ति अनगारेति पूर्वदत्वादनगारोद्देशको नवमः, 'केवलि'त्ति केवलीति प्रथमपदत्वात्केवली दशमोद्देशक इति ।

## –: शतकं १४ उद्देशकः -१ :–

**मू. (५९७)** *रायगिहे जाव एवं वयासी–अणगारे णं भंते ! भावियप्पा चरमं देवावासं वीतिक्कंते परमं देवावासमसंपत्ते एत्थ णं अंतरा कालं करेज्ञा तस्स णं भंते ! कहिं गती कहिं उववाए पन्नत्ते ?, गोयमा ! जे से तत्थ परियस्सओ तल्लेसा देवावासा तहिं तस्स उववाए पन्नत्ते ।*

*से य तत्थ गए विराहेज्ञा कम्मलेस्सामेव पडिमडइ, से य तत्थ गए नो विराहेज्ञा एयामेव लेस्सं उवसंपज्जित्ताणं विहरति ।*

*अनगारे णं भंते ! भावियप्पा चरमं असुरकुमारावासं वीतिक्कंते परमअसुरकुमारा० एवं चेव एवं जाव थणियकुमारावासं जोइसियावासं एवं वेमाणियावासं जाव विहरइ ॥*

**वृ.** तत्र प्रथमोद्देशके किञ्चिल्लिख्यते–'चरमं देवावासं वीतिक्कंते परमं देवावासं असंपत्ते'त्ति, 'चरमम्' अर्वाग्भागवर्त्तिनं स्थित्यादिभि 'देवावासं' सौधर्मादिदेवलोकं 'व्यतिक्रान्तः' लङ्घितस्तदुपपातहेतुभूतलेश्यापरिणामापेक्षया 'परमं' परभागवर्त्तिनं स्थित्यादिभिरेव 'देवावासं' सनत्कुमारादिदेवलोकं 'असम्प्राप्तः' तदुपपातहेतुभूतलेश्यापरिणामापेक्षयैव ।

इदमुक्तं भवति–प्रशस्तेष्वध्यवसायस्थानेषूत्तरोत्तरेषु वर्त्तमान आराद्भागस्थितसौधर्मादिगतदेवस्थित्यादिबन्धयोग्यतामतिक्रन्तः परभागवर्त्तिसनत्कुमारादिगतदेवस्थित्यादिबन्धयोग्यतां चाप्राप्तः 'एत्थ णं अंतर'त्ति इहावसरे 'कालं करेज्ञ'त्ति म्रियते यस्तस्य क्वोत्पादः

इति प्रश्नः, उत्तरं तु 'जे से तत्थ'त्ति अथ ये तत्रेति–तयोः चरमदेवावासपरमदेवावासयोः 'परिपार्श्वतः' समीपे सौधर्मादिरासन्नाः सनत्कुमारादेर्वाऽऽसन्नास्तयोर्मध्यभागे ईशानादावित्यर्थः 'तल्लेसा देवावास'त्ति यस्यां लेश्यायां वर्त्तमानः साधुर्मृतः सा लेश्या येषु ते तल्लेश्या देवावासाः 'तहिं'ति तेषु देवावासेषु तस्यानगारस्य गतिर्भवतीति ।

यत उच्यते– "जल्लेसे मरइ जीवे तल्लेसे चेव उववज्जइ"त्ति 'से य'त्ति स पुनरनगारस्तत्र मध्यमभागवर्त्तिनि देवावासे गतः 'विराहिज्ज'त्ति येन लेश्यापरिणामेन तत्रोत्पन्नस्तं परिणामं यदि विराधयेत्तदा । 'कम्मलेस्सामेव'त्ति कर्म्मणः सकाशाद्या लेश्या–जीवपरिणति सा कर्म्मलेश्या भावलेश्येत्यर्थः 'तामेव प्रतिपतति' तस्या एव प्रतिपतति अशुभतरतां याति न तु द्रव्यलेश्यायाः प्रतिपतति, सा हि प्राक्तन्येवास्ते, द्रव्यतोऽवस्थितलेश्यत्वाद्देवानामिति ।

पक्षान्तरमाह–'से य तत्थे'त्यादि, 'सः' अनगारः 'तत्र' मध्यमदेवावासे गतः सन् यदि न विराधयेत्तं परिणामं तदा तामेव च लेश्या ययोत्पन्नः 'उपसम्पद्य' आश्रित्य 'विहरति' आस्त इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं सामान्यं देवावासमाश्रित्योक्तं । अथ विशेषितं तमेवाश्रित्याह– 'अनगारे ण'मित्यादि, ननु यो भावितात्माऽनगारः स कथमसुरकुमारेषूत्पत्स्यते विराधितसंयमानां तत्रोत्पादादिति, उच्यते, पूर्वकालापेक्षया भावितात्मत्वम्, अन्तकाले च संयमविराधनासद्भावादसुरकुमारादितयोपपात इति न दोषः, बालतपस्वी वाऽयं भावितात्मा द्रष्टव्य इति ।

अनन्तरं देवगतिरुक्तेति गत्यधिकारान्नारकगतिमाश्रित्याह–'नेरइयाण' मित्यादि, 'कहं सीहा गइ'त्ति 'कथं' केन प्रकारेण कीदृशीत्यर्थः शीघ्रा गतिः, नारकाणामुत्पद्यमानानां शीघ्रा गतिर्भव- तीति प्रतीतं, यादृशेन च शीघ्रत्वेन शीघ्राऽसाविति च न प्रतीतमित्यतः प्रश्नः कृतः ।

'कहं सीहे गइविसए'त्ति कथमिति कीदृशः 'सीहे'त्ति शीघ्रगतिहेतुत्वाच्छीघ्रो गतिविषयो– गतिगोचरस्तद्धेतुत्वात्काल इत्यर्थः, कीदृशी शीघ्रा गति ? कीदृशश्च तत्कालः ? इति तात्पर्यं, 'तरुणे'त्ति प्रवर्द्धमानवः, स च दुर्बलोऽपि स्यादत आह–'बलवं'ति शारीरप्राणवान्, वलं च कालविशेषाद्विशिष्टं भवतीत्यत आह–

'जुगवं'ति युगं–सुषमदुष्षमादि कालविशेषस्तत् प्रशस्तं विशिष्टबलहेतुभूतं यस्यास्त्यसौ युगवान्, यावत्करणादिदं दृश्यं–'जुवाणे' वयःप्राप्तः 'अप्पायंके' अल्पशब्दस्याभावा- र्थःत्वादनातङ्को–नीरोगः 'थिरग्गहत्थे' स्थिराग्रहस्तः सुलेखकवत् 'दढपाणिपायपासपिट्ठंतरोरुप- रिणए' दृढं पाणिपादं यस्य पार्श्वौ पृष्ठन्तरे च ऊरू च परिणते–परिनिष्ठिततां गते यस्य स तथा उत्तमसंहनन इत्यर्थः, 'तलजमलजुयलपरिधनिभबाहू' तलौ–तालवृक्षौ तयोर्यमलं–समश्रेणीकं यद् युगलं–द्वयं परिघश्च–अर्गला तन्निभौ–तत्सदृशौ दीर्घसरलपीनत्वादिना बाहू यस्य स तथा ।

'चम्मेट्ठदुहणमुट्ठियसमाहयनिचियगायकाए' चर्मेष्ट्या द्रुघणेन मुष्टिकेन च समाहतानि अभ्यासप्रवृत्तस्य निचितानि गात्राणि यत्र स तथाविधः कायो यस्य स तथा, चर्मेष्टादयश्च लोकप्र- तीताः, 'ओरसबलसमन्नागए' आन्तरबलयुक्तः 'लंघणपवणजइणवायामसमत्थे' जविनशब्दः– शीघ्रवचनः 'छेए' प्रयोगज्ञः 'दक्खे' शीघ्रकारी 'पत्तट्ठे' अधिकृतकर्म्मणि निष्ठां गतः 'कुसले' आलोचितकारी 'मेहावी' सकृतश्रुतदृष्टकर्म्मज्ञः 'निउणे' उपायारम्भकः, एवंविधस्य हि पुरुषस्य शीघ्रं गत्यादिकं भवतीत्यतो बहुविशेषणोपादानमिति ।

'आउंटियं'ति सङ्कोचितं 'विक्खिन्नं'ति 'विकीर्णं' प्रसारितां 'साहरेज्ज'त्ति 'साहरेत्' सङ्कोचयेत् 'विक्खिरेज्ज'त्ति विकिरेत्–प्रसारयेत् 'उम्मिसियं'ति 'उन्मिषितम्' उन्मीलितं 'निमिसेज्ज'त्ति निमीलयेत्, 'भवेयारूवे'त्ति काक्वाध्येयं, काकुपाठे चायमर्थः स्यात् यदुतैवं मन्यसे त्वं गौतम ! भवेत्तद्रूपं–भवेत्स स्वभावः शीघ्रतायां नरकगतेस्तद्विषस्य च यदुक्तं विशेषण- पुरुष- बाहुप्रसारणादेरिति, एवं गौतममतमाशङ्क्य भगवानाह–नायमर्थः समर्थं, अथ कस्मा- देवमित्याह

**मू. (५९८)** *'नेरइयाणं भंते ! कहं सीहा गति कहं सीहे गतिविसए पन्नत्ते ?*

*गोयमा ! से जहानामए–केइ पुरिसे तरुणे बलवं जुगवं जाव निउणसिप्पोवगए आउट्टियं बाहं पसारेज्ञा पसारियं वा बाहं आउंटेज्ञा विक्खिण्णं वा मुट्ठिं साहरेज्ञा साहरियं वा मुट्ठिं विक्खिरेज्ञा उन्निमिसियं वा अच्छिं निम्मिसेज्ञा निम्मिसियं वा अच्छिं उम्मिसेज्ञा, भवे एयारूवे ?, नो तिणट्ठे समट्ठे, नेरइया णं एगसमएण वा दुसमएण वा विसमएण वा विग्गहेणं उववज्जंति ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नेरइयाणं गोयमा ! तहा सीहा गती तहा सीहे गतिविसए पन्नत्ते एवं जाव वेमाणियाणं, नवरं एगिंदियाणं चउसमइए विग्गहे भाणियव्वे । सेसं तं चेव ॥*

**वृ.** 'नेरइयाण' मित्यादि, अयमभिप्रायः—नारकाणां गतिरेकद्वित्रिसमया बाहुप्रसारणादिका चासङ्ख्येयसमयेति कथं तादृशी गतिर्भवति नारकाणामिति, तत्र च 'एगसमएण व' त्ति एकेन समयेनोपपद्यन्त इति योगः, ते च ऋजुगतावेव, वाशब्दो विकल्पे, इह च विग्रहशब्दो न सम्बन्धितः, तस्यैकसामायिकस्याभावात्, 'दुसमएण व' त्ति द्वौ समयौ यत्र स द्विसमयस्तेन विग्रहेणेति योगः, एवं त्रिसमयेन वा विग्रहेण—वक्रेण, तत्र द्विसमयो विग्रह एवं—यदा भरतस्य पूर्वस्या दिशो नरके पश्चिमायामुत्पद्यते तदैकेन समयेनाधो याति द्वितीयेन तु तिर्यगुत्पत्तिस्थानमिति, त्रिसमयविग्रहस्त्वेवं

यदा भरतस्य पूर्वदक्षिणाया दिशो नारकेऽपरोत्तरायां दिशि गत्वोत्पद्यते तदैकेन समयेनाधः समश्रेण्या याति द्वितीयेन च तिर्यक् पश्चिमायां तृतीयेन तु तिर्यगेव वायव्यां दिशि उत्पत्तिस्थानमिति, तदनेन गतिकाल उक्तः, एतदभिधानाच्च शीघ्रा गतिर्यादृशी तदुक्तमिति, अथ निगमयन्नाह—

'नेरइयाण' मित्यादि, 'तहा सीहा गइ' त्ति यथोत्कृष्टतः समयत्रये भवति 'तहा सीहे गइविसए' त्ति तथैव, त्रसनाड्या बहिस्तादधोलोके विदिशो दिशं यात्येकेन, जीवानामनुश्रेणिगमनात्, द्वितीयेन तु लोकमध्ये प्रविशति तृतीयेनोर्ध्वं याति चतुर्थेन तु त्रसनाडीतो निर्गत्य दिग्व्यवस्थितमुत्पादस्थानं प्राप्नोतीति, एतच्च बाहुल्यमङ्गीकृत्योच्यते, अन्यथा पञ्चसमयोऽपि विग्रहो भवेदेकेन्द्रियाणां, तथाहि— त्रसनाड्या बहिस्तादधोलोके विदिशो दिशं यात्येकेन द्वितीयेन लोकमध्ये तृतीयेनोर्द्धलोके चतुर्थेन ततस्तिर्यक् पूर्वादिदिशो निर्गच्छति ततः पञ्चमेन विदिग्व्यवस्थितमुत्पत्तिस्थानं यातीति, उक्तञ्च—

॥ १ ॥ "विदिसाउ दिसिं पढमे बीए पइ सरइ नाडिमज्झंमि ।
उड्ढं तइए तुरिए उ नीइ विदिसं तु पंचमए ॥" इति

'सेसं तं चेव' त्ति 'पुढविक्काइयाणं भंते ! कहं सीहा गई ?' इत्यादि सर्वं यथा नारकाणां तथा वाच्यमित्यर्थः ॥ अनन्तरं गतिमाश्रित्य नारकादिदण्डक उक्तः, अथानन्तरोत्पन्नत्वादि प्रतीत्यापरं तमेवाह—

**मू. (५९९)** *'नेरइया णं भंते ! किं अनंतरोववन्नगा परंपरोववन्नगा अनंतरपरंपरअणुववन्नगा ?, गोयमा ! नेर० अनंतरोववन्नगावि परंपरोववन्नगावि अनंतरपरंपरअणुववन्नगावि ।*

*से केण० एवं वु० जाव अनंतरपरंपरअणुववन्नगावि ?, गोयमा ! जे णं नेरइया पढमसमयोववन्नगा ते णं नेरइया अनंतरोववन्नगा, जे णं नेरइया अपढमसमयोववन्नगा ते णं नेरइया परंपरोववन्नगा, जे णं नेर० विग्गहगइसमावन्नगा ते णं नेरइया अनंतरपरंपरअनुववन्नगा, से तेणट्ठेणं जाव अणुववन्नगावि, एवं निरंतरं जाव वेमा० ?*

*अनंतरववन्नगा णं भंते ! नेरइया किं नेरइयाउयं पकरेंति तिरिक्ख० मणुस्स० देवाउयं पकरेंति ?, गोयमा ! नो नेरइयाउयं पकरेंति जाव नो देवाउयं पकरेंति । परंपरोववन्नगा णं भंते नेरइया किं नेरइयाउयं पकरेंति जाव देवाउयं पकरेंति ?, गोयमा ! नो नेरइयाउयं पकरेंति तिरिक्खजोणियाउयंपि पकरेंति तिरिक्खजोणियाउयंपि पकरेंति मणुस्साउयंपि पकरेंति नो देवाउयं पकरेंति । अनंतरपरंपरअणुववन्नगा णं भंते ! नेर० किं नेरइयाउयं प० पुच्छा नो नेरइयाउयं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पकरेंति जाव नो देवाउयं पकरेन्ति, एवं जाव वेमाणिया, नवरं पंचिंदियतिरिक्खजोणिया मणुस्सा य परंपरोववन्नगा चत्तारिवि आउयाइं प०, सेसं तं चेव २ ॥*

*नेरइया णं भंते ! किं अनंतरनिग्गया परंपरनिग्गया अनंतरपरंपरअनिग्गया ?, गोयमा नेरइया णं अनंतरनिग्गयावि जाव अनंतरपरंपरनिग्गयावि, से केणट्ठेणं जाव अनिग्ग यावि ?, गोयमा ! जे णं नेरइया पढमसमयनिग्गया ते णं नेरइया अनंतरनिग्गया जे णं नेरइया अपढमसमयनिग्गया ते णं नेरइया परंपरनिग्गया जे णं नेरइया विग्गहगतिसमावन्नगा ते णं नेरइया अनंतरपरंपरअणिग्गया, से तेणट्ठेणं गो०! जाव अणिग्गयावि, एवं जाव वेमाणिया ३ ॥*

*अनंतरनिग्गया णं भंते ! नेरइया किं नेरइयाउयं पकरेंति जाव देवाउयं पकरेंति ?, गोयमा ! नो नेरइयाउयं पकरेंति जाव नो देवाउयं पकरेंति । परंपरनिग्गया णं भंते ! नेरइया किं नेरइयाउयं० पुच्छा, गोयमा ! नेरइयायंपि पकरेंति जाव देवाउयंपि पकरेंति । अनंतरपरंपरअनिग्गया णं भंते ! नेरइया पुच्छा, गोयमा ! नो नेरइयाउयं पकरेंति जाव नो देवाउयं पकरेंति, एवं निरवसेसं जाव वेमाणिया ४ ।*

*नेरइया णं भंते ! कं अनंतरं खेदोवन्नगा परंपरखेदोववन्नग अनंतरपरंपरखेदाणुववन्नगा ?, गो० नेरइया० एवं एएणं अभिलावेणं तं चेव चत्तारि दंडगा भाणियव्वा । सेवं भंते !*

**वृ.** 'नेरइया ण'मित्यादि, 'अनंतरोववन्नग'त्ति न विद्यते अन्तरं–समयादिव्यवधानं उपपन्ने–उपपाते येषां ते अनन्तरोपपन्नकाः 'परंपरोववन्नग'त्ति परम्परा–द्वित्रादिसमयता उपपन्ने–उपपाते येषां ते परम्परोपपन्नकाः, 'अनंतरपरंपरअणुववन्नग'त्ति अनन्तरं–अव्यधानं परम्परं च–द्वित्रादिसमयरूपमविद्यमानं उत्पन्नं–उत्पादो येषां ते तथा, एते च विग्रहगतिकाः, विग्रहगतौ हि द्विविधस्याप्युत्पादस्याविधमानत्वादिति ॥

अथानन्तरोपपन्नादीनाश्रित्यायुर्बन्धमभिधातुमाह– 'अनंतरे'त्यादि, इह चानन्तरोपपन्नानामनन्तरपरम्परानुपपन्नानां च चतुर्विधस्याप्यायुषः प्रतिषेधोऽध्येतव्यः, तस्यामवस्थायां तथाविधाध्यवसायस्थानाभावेन सर्वजीवानामायुषो बन्धाभावात्, स्वायुषभिागादौ च शेषे बन्धसद्भावात्, परम्परोपपन्नकास्तु स्वायुषः षण्मासे शेषे मतान्तरेणोत्कर्षतः षण्मासे जघन्यतश्चान्तर्मुहूर्त्ते शेषे भवप्रत्ययात्तिर्यग्मनुष्यायुषीएव कुर्वन्ति नेतरे इति, 'एवं जाव वेमाणिय'त्ति अनेनोक्तालापकत्रययुक्तश्चतुर्विंशतिदण्डकोऽध्येतव्य इति सूचितं, यश्चात्र विशेषस्तं दर्शयितुमाह–'नवरं पंचिंदिए'त्यादि ।

अथानन्तरनिर्गतत्वादिनाऽपरं दण्डकमाह– 'नेरइया ण'मित्यादि, तत्र निश्चितं स्थानान्तरप्राप्त्या गतं–गमनं निर्गतं अनन्तरं–समयादिना निर्व्यवधानं निर्गतं येषां तेऽनन्तरनिर्गतास्ते च येषां नरकादुद्वृत्तानां स्थानान्तरं प्राप्तानां प्रथमः समयो वर्त्तते, तथा परम्परेण–समयपरम्परया निर्गतं येषां ते तथा, ते च येषां नरकादुद्वृत्तानामुत्पत्तिस्थानप्राप्तानां द्वयादयः समयाः, अनन्तरपरम्परानिर्गतास्तु ये नरकादुद्वृत्ताः सन्तो विग्रहगतौ वर्त्तन्ते न तावदुत्पादक्षेत्रमासादयन्ति तेषामनन्तरभावेन परम्परभावेन चोत्पादक्षेत्राप्राप्तत्वेन निश्चयेनानिर्गतत्वादिति ।

अथानन्तरनिर्गतादीनाश्रित्यायुर्बन्धमभिधातुमाह–'अनंतरे'त्यादि, इह च परम्परानिर्गता नारकाः सर्वाण्यायूंषि बध्नन्ति, यतस्ते मनुष्याः पञ्चेन्द्रियतिर्यञ्च एव च भवन्ति, ते च सर्वायुर्बन्धका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवेति, एवं सर्वेऽपि परम्परनिर्गता वैक्रियजन्मानः, औदारिकजन्मानोऽप्युद्वृत्ताः केचिन्मनुष्यपञ्चेन्द्रियतिर्यञ्चो भवन्त्यतस्तेऽपि सर्वायुर्बन्धका एवेति।

अनन्तरं निर्गता उक्तास्ते च क्वचिदुत्पद्यमानाः सुखेनोत्पद्यन्ते दुःखेन वेति दुःखोत्पन्नकानाश्रित्याह-'नेरइये'त्यादि, 'अनंतरखेदोववन्नग'त्ति अनन्तरं-समयाद्यव्यवहितं खेदेन-दुःखेनोपपन्नं-उत्पादक्षेत्रप्राप्तिलक्षणं येषां तेऽनन्तरखेदोपपन्नकाः खेदप्रधानोत्पत्तिप्रथमसमयवर्त्तिन इत्यर्थः 'परंपरक्खेओववन्नग'त्ति परम्पराद्वित्र्यादिसमयता खेदेनोपपन्ने उत्पादे-येषां ते परम्पराखेदोपपन्नकाः।

'अनंतरपरंपरखेदाणुववन्नग'त्ति अनन्तरं परम्परं च खेदेन नास्त्युपपन्नकं येषां ते तथा विग्रहगतिवर्त्तिन इत्यर्थः, 'ते चेव चत्तारि दंडगा भाणियव्व'त्ति त एव पूर्वोक्ता उत्पन्नदण्डकादयः खेदशब्दविशेषिताश्चत्वारो दण्डका भणितव्याः, तत्र च प्रथमः खेदोपपन्नदण्डको द्वितीयस्तदायुष्कदण्डकस्तृतीयः खेदनिर्गतदण्डकश्चतुर्थःस्तु तदायुष्कदण्डक इति ॥

शतकं-१४ उद्देशकः-१ समाप्तः

## -: शतकं-१४ उद्देशकः-२ :-

**वृ.** अनन्तरोद्देशकेऽनन्तरोपपन्ननैरयिकादिवक्तव्यतोक्ता, नैरयिकादयश्च मोहवन्तो भवन्ति, मोहश्चोन्माद इत्युन्मादप्ररूपणार्थो द्वितीय उद्देशकः, तस्य चेदमादिसूत्रम्-

**मू. (६००)** *कतिविहे णं भंते ! उम्मादे पन्नत्ते ?, गोयमा ! दुविहे उम्मादे पन्नत्ते, तंजहा-जक्खावेसे य मोहणिज्ञस्स य कम्मस्स उदएणं, तत्थ णं जे से जक्खाएसे से णं सुहवेयणतराए चेव सुहविमोयणतराए चेव, तत्थ णं जे से मोहणिज्ञस्स कम्मस्स उदएणं से णं दुहवेयणतराए चेव दुहविमोयणतराए चेव।*

*नेरइयाणं भंते ! कतिविहे उम्मादे पन्नत्ते ?, गोयमा ! दुविहे उम्मादे पन्नत्ते, तंजहा-जक्खावेसे य मोहणिज्ञस्स य कम्मस्स उदएणं, से केणट्ठेणं भंते ! एवं वुच्चइ नेरइयाणं दुविहे उम्मादे पन्नत्ते, तंजहा-जक्खावेसे य मोहणिज्ञस्स जाव उदएणं ?, गोयमा ! देवे वा से असुभे पोग्गले पक्खिवेज्ञा। से णं तेसिं असुभाणं पोग्गलाणं पक्खिवणयाए जक्खाएसं उम्मादं पाउणेज्ञा, मोहणिज्ञस्स वा कम्मस्स उदएणं मोहणिज्ञं उम्मायं पाउणेज्ञा, से केणट्ठेणं जाव उम्माए।*

*असुरकुमाराणं भंते ! कतिविहे उम्मादे पन्नत्ते ?, एवं जहेव नेरइयाणं नवरं देवे वा से महिड्डीयतराए असुभे पोग्गले पक्खिवेज्ञा से णं तेसिं असुभाणंपोग्गलाणं पक्खिवणयाए जक्खाएसं उम्मादं पाउणेज्ञा मोहणिज्ञस्स वा सेसं तं चेव, से तेणट्ठेणं जाव उदएणं एवं जाव थणियकुमाराणं, पुढविकाइयाणं जाव मणुस्साणं एएसिं जहा नेरइयाणं।*

*वाणमंतरजोइसवेमाणियाणं जहा असुरकुमाराणं ॥*

**वृ.** 'कतिविहे ण'मित्यादि, 'उन्मादः' उन्मत्तता विविक्तचेतनाभ्रंश इत्यर्थः 'जक्खाएसे य'त्ति यक्षो-देवस्तेनावेशः- प्राणिनोऽधिष्ठानं यक्षावेशः।

'मोहणिज्ञस्से'त्यादि तत्र मोहनीयं-मिथ्यात्वमोहनीयं तस्योदयादुन्मादो भवति यतस्तदुदयवर्ती जन्तुरतत्वं तत्वं मन्यते तत्वमपि चातत्वं, चारित्रमोहनीयं वा यतस्तदुदये जानन्नपि विषयादीनां स्वरूपमजानन्निव वर्त्तते, अथवा चारित्रमोहनीयस्यैव विशेषो वेदाख्यो मोहनीयं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतस्यदुदयविशेषेऽप्युन्मत्त एवं भवति, यदाह–

॥ १ ॥ "चिंतेइ १ इट्ठुमिच्छइ २ दीहं नीससइ ३ तहा जरे ४ दाहे ५ ।
भत्तअरोअग ६ मुच्छा ७ उम्माय ८ नयाणई ९ मरणं १० ॥" इति ।

एतयोश्चोन्मादत्वे समानेऽपि विशेषं दर्शयन्नाह–'तत्थ ण'मित्यादि तत्र तयोर्मध्ये 'सुहवेयणतराए चेव'त्ति अतिशयेन सुखेन–मोहजन्योन्मादापेक्षयाऽक्लेशेन वेदनं–अनुभवनं यस्यासी सुखवेदनतरः स एव सुखवेदनतरकः, चैवशब्दः स्वरूपावधारणे, 'सुहविमोयणतराएचेव'त्ति अतिशयेन सुखेन विमोचनं वियोजनं यस्मादसौ सुखविमोचनतरः, कप्रत्ययस्तथैव ।

'तत्थ ण'मित्यादि, मोहजन्योन्माद इतरापेक्षया दुःखवेदनतरो भवत्यनन्तसंसारकारणत्वात्, संसारस्य च दुःखवेदनस्वभावत्वात्, इतरस्तु सुखवेदनतर एव, एकभविकत्वादिति, तथा मोहजोन्माद इतरापेक्षया दुःखविमोचनतरो भवति, विद्यामन्त्रतन्त्रदेवानुग्रहवतामपि वार्त्तिकानां तस्यासाध्यत्वात्, इतरस्तु सुखविमोचनतर एव भवति यन्त्रमात्रेणापि तस्य निग्रहीतुं शक्यत्वादिति, आह च–

॥ १ ॥ "सर्वज्ञमन्त्रवाद्यपि यस्य न सर्वस्य निग्रहे शक्तः ।
मिथ्यामोहोन्मादः स केन किल कथ्यतां तुल्यः ? ॥"

इदं च द्वयमपि चतुर्विंशतिदण्डके योजयन्नाह–'नेरइयाण'मित्यादि, 'पुढविक्काइयाण'-मित्यादौ यदुक्तं 'जहा नेरइयाणं'ति तेन 'देवे वा से असुभे पोग्गले पक्खिवेज्जा'इत्येतद् यक्षावेशे पृथिव्यादिसूत्रेषु अध्यापितं, 'वाणमंतरे'त्यादौ तु यदुक्तं 'जहा असुरकुमाराणं'तेन यक्षावेश एव व्यन्तरादिसूत्रेषु 'देवे वा स महड्डियतराए'इत्येतध्यापितं, मोहोन्मादालापकस्तु सर्वसूत्रेषु समान इति ॥ अनन्तरं वैमानिकदेवानां मोहनीयोन्मादलक्षणः क्रियाविशेष उक्तः, अथ वृष्टिकायकरणरूपं तमेव देवेन्द्रादिदेवानां दर्शयन् प्रस्तावनापूर्वकमाह–

**मू. (६०१)** *अत्थि णं भंते ! पज्जन्ने कालवासे वुट्ठिकायं पकरेंति ?, हंता अत्थि ।*

*जाहे णं भंते ! सक्के देविंदे देवराया वुट्ठिकायं काउकामे भवति से कहमियाणिं पकरेति गोयमा ! ताहे चेव णं से सक्के देविंदे देवराया अब्भंतरपरिसए देवे सद्दावेति, तए णं ते अब्भिंतरपरिसगा देवा सद्दाविया समाणा मज्झिमपरिसए देवे सद्दावेंति ।*

*तए णं ते मज्झिमपरिसगा देवा सद्दाविया समाणा बाहिरपरिसए देवे सद्दावेंति, तए णं ते बाहिरपरिसगा देवा सद्दाविया समाणा बाहिरं बाहिरगा देवा सद्दावेंति ।*

*तए णं ते बाहिरगा देवा सद्दाविया समाणा आभिओगिए देवे सद्दावेंति, तए णं ते जाव सद्दाविया समाणा वुट्ठिकाए देवे सद्दावेंति । तए णं ते वुट्ठिकाइया देवा सद्दाविया समाणा वुट्ठिकायं पकरेंति, एवं खलु गोयमा ! सक्के देविंदे देवराया वुट्ठिकायं पकरेति ।*

*अत्थि णं भंते ! असुरकुमारावि देवा वुट्ठिकायं पकरेंति ?, हंता अत्थि, किं पत्तियन्नं भंते असुरकुमारा देवा वुट्ठिकायं पकरेंति ?, गोयमा ! जे इमे अरहंता भगवंता एएसि णं जम्मणमहिमासु वा निक्खमणमहिमासु वा णाणुप्पायमहिमासु वा परिनिव्वाणमहिमासु वा एवं खलु गोयमा ! असुरकुमारावि देवा वुट्ठिकायं पकरेंति ।*

*एवं नागकुमारावि एवं जाव थणियकुमारा वाणमंतरजोइसियवेमाणिय एवं चेव ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'अत्थि ण'मित्यादि, 'अत्थि'त्ति अस्त्येतत् 'पज्जन्ने'त्ति पर्जन्यः 'कालवासि'त्ति काले-प्रावृषि वर्षतीत्येवंशीलः कालवर्षी, अथवा कालश्चासौ वर्षी चेति कालवर्षी, 'वृष्टिकायं' प्रवर्षणतो जलसमूहं प्रकरोति प्रवर्षतीत्यर्थः, इह स्थाने शक्रोऽपि तं प्रकरोतीति दृश्यं, तत्र च पर्जन्यस्य प्रवर्षणक्रियायां तत्स्वाभाव्यतालक्षणो विधि प्रतीत एव, शक्रप्रवर्षणक्रियाविधिस्त्वप्रतीत इति तं दर्शयन्नाह-

'जाहे'इत्यादि, अथवा पर्जन्य इन्द्र एवोच्यते, स च कालवर्षी काले-जिनजन्मादिमहादौ वर्षतीतिकृत्वा, 'जाहे णं'ति यदा 'से कहमियाणिं पकरेइ'त्ति स शक्रि कथं तदानीं प्रकरोति ?, वृष्टिकायमिति प्रकृतम् ।

असुरकुमारसूत्रे 'किं पत्तियण्णं'ति किं प्रत्ययं-कारणमाश्रित्येत्यर्थः 'जम्मणमहिमासु व'त्ति जन्महिमासु जन्मोत्सवान् निमित्तीकृत्येत्यर्थः । देवक्रियाऽधिकारादिदमपरमाह-

**मू. (६०२)** *जाहे णं भंते ! ईसाणे देविंदे देवराया तमुक्कायं काउकामे भवति से कहमियाणिं पकरेति ?, गोयमा ! ताहे चेव णं से ईसाणे देविंदे देवराया अब्भिंतरपरिसए देवे सद्दावेति ।*

*तए णं ते अब्भिंतरपरिसगा देवा सद्दाविया समाणा एवं जहेव सक्कस्स जाव तए णं ते आभिओगिया देवा सद्दाविया समाणा तमुक्काइए देवे सद्दावेंति ।*

*तए णं ते समुक्काइया देवा सद्दाविया समाणा तमुक्कायं पकरेंति, एवं खलु गोयमा ! ईसाणे देविंदे देवराया तमुक्कायं पकरेति ।*

*अत्थि णं भंते ! असुरकुमारा देवा तमुक्कायं पकरेंति ?, गोयमा ! किड्डारतिपत्तियं वा पडिणीयविमोहणट्ठयाए वा गुत्तीसंरक्खणहेउं वा अप्पणो वा सरीरपच्छायणट्ठयाए ।*

*एवं खलु गोयमा ! असुरकुमारावि देवा तमुक्कायं पकरेंति एवं जाव वेमाणिया । सेवं भंते २ त्ति जाव विहरइ ॥*

वृ. 'जाहे ण'मित्यादि, 'तमुक्काए'त्ति तमस्कायकारिणः 'किड्डारइपत्तियं'ति क्रडारूपा रति क्रीडारति अथवा क्रीडा च-खेलनं रतिश्च-निधुवनं क्रीडारती सैव ते एव वा प्रत्ययः-कारणं यत्र तत् क्रडारतिप्रत्ययं 'गुत्तीसंरक्खणहेउं व'त्ति गोपनीयद्रव्यसंरक्षणहेतोर्वेति ॥

शतकं-१४ उद्देशकः-२ समाप्तः

## -: शतकं-१४ उद्देशकः-३ :-

द्वितीयोद्देशके देवव्यतिकर उक्तः, तृतीयेऽपि स एवोच्ये इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (६०३)** *देवे णं भंते ! महाकाए महासरीरे अनगारस्स भावियप्पणो मज्झंमज्झेणं वीइवएज्ज़ा ?, गोयमा ! अत्थेगइए वीइवएज्ज़ा अत्थेगतिए नो वीइवएज्ज़ा ।*

*से केणट्ठेणं भते ! एवं वुच्चइ अत्थेगतिए वीइवएज्ज़ा अत्थेगतिए नो वीइवएज्ज़ा ?*

*गोयमा ! दुविहा देवा पन्नत्ता, तंजहा-मायीमिच्छादिट्ठीउववन्नगा य अमायीसम्मदिट्ठीउववन्नगा य, तत्थ णं जे से मायी मिच्छद्दिट्ठी उववन्नए देवे से णं अनगारं भावियप्पाणं पासइ २ नो वंदति नो नमंसति नो सक्कारेति नो कल्लाणं मंगलं देवयं चेइयं जाव पज्जुवासति, से णं अनगारस्स भावियप्पणो मज्झंमज्झेणं वीइवएज्ज़ा, तत्थ णं जे से अमायी सम्मद्दिट्ठिउववन्नए देवे से णं अनगारं भावियप्पाणं पासइ पासित्ता वंदति नमंसति जाव पज्जुवासति, से णं अनगारस्स भावियप्पणो मज्झंमज्झेणं नो वीयीवएज्ज़ा, से तेण० गोयमा ! एवं वुच्चइ जाव नो वीइवएज्ज़ा ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*असुरकुमारे णं भंते ! महाकाये महासरीरे एवं चेव एवं देवदंडओ भाणियव्वो जाव वेमाणिए ॥*

**वृ.** 'देवे ण' मित्यादि, इह च क्वचिदियं द्वारगाथा दृश्यते–

॥१॥ "महकाए सक्कारे सत्थेणं वीईवयंति देवाउ ।
वासं चेव य ठाणा नेरइयाणं तु परिणामे ॥" इति ।

अस्याश्चार्थः उद्देशकार्थाधिगमावगम्य एवेति । 'महाकाय' त्ति महान्–बृहन् प्रशस्तो वा कायो–निकायो यस्य स महाकायः, 'महासरीरे' त्ति बृहत्तनुः ।

'एवं देवदंडओ भाणियव्वो' त्ति नारकपृथिवीकायिकादीनामधिकृतव्यतिकरस्यासम्भवाद् देवानामेव च संभवाद्देवदण्डकोऽत्र व्यतिकरे भणितव्य इति ॥ प्राग देवानाश्रित्य मध्यगमनलक्षणो दुर्विनय उक्तः ॥ अथ नैरयिकादीनाश्रित्य विनयविशेषानाह–

**मू. (६०४)** *अत्थि णं भंते ! नेरइयाणं सक्कारेति वा सम्माणेति वा किइकम्मेइ वा अब्भुट्ठाणेइ वा अंजलिपग्गहेति वा आसणाभिग्गहेति वा आसणाणुप्पदाणेति वा इंतस्स पच्चुग्गच्छणया ठियस्स पज्जुवासणया गच्छंतस्स पडिसंसाहणया ?, नो तिणट्ठे समट्ठे ।*

*अत्थि णं भंते ! असुरकुमाराणं सक्कारेति वा सम्माणेति वा जाव पडिसंसाहणया वा ?, हंता अत्थि, एवं जाव थणियकुमाराणं, पुढविकाइयाणं जाव चउरिंदियाणं एएसिं जहा नेरइयाणं*

*अत्थि णं भंते ! पंचिंदियतिरिक्खजोणियाणं सक्कारेइ वा जाव पडिसंसाहणया ?, हंता अत्थि, नो चेव णं आसणाभिग्गहेइ वा आसणाणुप्पयाणेइ वा, मणुस्साणं जाव वेमाणियाणं जहा असुरकुमाराणं ॥*

**वृ.** 'अत्थि ण' मित्यादि, 'सक्कारेइ व' त्ति सत्कारो–विनयार्हेषु वन्दनादिनाऽऽदरकरणं प्रवरवस्त्रादिदानं वा 'सत्कारो पवरवत्थमाईहिं' इति वचनात् 'सम्माणेइ व' त्ति सन्मानः–तथाविधप्रतिपत्तिकरणं 'किइकम्मेइ व' त्ति कृतिकर्म्मवन्दनं कार्यकरणं वा 'अब्भुट्ठाणेइ व' त्ति अभ्युत्थानं–गौरवार्हदर्शने विष्टरत्यागः 'अंजलिपग्गहेइ व' त्ति अञ्जलिप्रग्रहः–अञ्जलिकरणम् ।

'आसणाभिग्गहेइ व' त्ति आसनाभिग्रहः–तिष्ठत एव गौरव्यस्यासनानयनपूर्वक-मुपविशतेति भणनं 'आसणाणुप्पयाणेइ व' त्ति आसनानुप्रदानं–गौरव्यमाश्रित्यासनस्य स्थाना-न्तरसञ्चारणं 'इंतस्स पच्चुग्गच्छणय' त्ति आगच्छतो गौरव्यस्याभिमुखगमनं 'ठियस्स पज्जुवासणय' त्ति तिष्ठतौ गौरव्यस्य सेवेति 'गच्छतस्स पडिसंसाहणय' त्ति गच्छतोऽनुव्रजनमिति, अयं च विनयो नारकाणां नास्ति, सततं दुःस्थत्वादिति ।

**मू. (६०५)** *अप्पड्ढीए णं भंते ! देवे महड्ढियस्स देवस्स मज्झंमज्झेणं वीइवएज्जा ?, नो तिणट्ठे समट्ठे, समिड्ढीए णं भंते ! देवे समड्ढियस्स देवस्स मज्झंमज्झेणं वीइवएज्जा, नो इणमट्ठे समट्ठे, पमत्तं पुण वीइवएज्जा ।*

*से णं भंते ! किं सत्थेणं अवक्कमित्ता पभू अणक्कमित्ता पभू ?, गोयमा ! अवक्कमित्ता पभू नो अणक्कमित्ता पभू, से णं भंते ! किं पुव्विं सत्थेणं अक्कमित्ता पच्छा वीयीवएज्जा पुव्विं वीईव० पच्छा सत्थेणं अक्कमेज्जा ।*

*एवं एएणं अभिलावेणं जहा दसमसए आइड्ढीउद्देसए तहेव निरवसेसं चत्तारि दंडगा भाणियव्वा जाव महड्ढिया वेमाणिणी अप्पड्ढियाए वेमाणिणीए ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** पूर्वं विनय उक्तः, अथ तद्विपर्ययभूताविनयविशेषं देवानां परस्परेण प्रतिपादयन्नाह–'अप्पड्ढिए ण'मित्यादि, 'एवं एएणं अभिलावेण'मित्यादौ 'आइड्ढिउद्देसए'त्ति दशमशतस्य तृतीयोद्देशके 'निरवसेसं'ति समस्तं प्रथमं दण्डकसूत्रं वाच्यं, तत्र चाल्पर्द्धिकमहर्द्धिकालापकः समर्द्धिकालपकश्चेत्यालापकद्वयं साक्षादेव दर्शितं, केवलं समर्द्धिकालापकस्यान्तेऽयं सूत्रशेषो द्दश्यः–

गोयमा ! पुव्विं सत्थेणं अक्कमित्ता पच्छा वीईवएज्ञा नो पुव्विं वईवइत्ता पच्छा सत्थेणं अक्कमिज्ञत्ति, तृतीयस्तु महर्द्धिकालापर्द्धिकालापक एवं–'महड्ढिए णं भंते ! देवे अप्पड्ढियस्स देवस्स मज्झंमज्झेणं वीइवएज्ञा ?, हंता वीइएज्ञा, से णं भंते ! किं सत्थेणं अक्कमित्ता पभू अणक्कमित्ता पभू ?' शस्त्रेण हत्वाऽहत्वा वेत्यर्थः, 'गोयमा ! अक्कमित्तावि पभू अणक्कमित्तावि पभू,से णं भंते ! किं पुव्विं सत्थेणं अक्कमित्ता पच्छा वीइवएज्ञा पुव्विं वीइवएज्ञा पच्छा सत्थेणं अक्कमेज्ञा ?, गोयमा ! पुव्विं वा सत्थेणं अक्कमित्ता पच्छा वीइवएज्ञा पुव्विं वा वीइवइत्ता पच्छा सत्थेणं अक्कमिज्ञ'त्ति, 'चत्तारि दंडगा भाणियव्व'त्ति ।

[तत्र प्रथमदण्डक उक्तालापकत्रयात्मको देवस्य देवस्य च, द्वितीयस्त्वेवंविध एव नवरं देवस्य च देव्याश्च, एवं तृतीयोऽपि नवरं देव्याश्च देवस्य च, चतुर्थोऽप्येवं नवरं देव्याश्च देव्याश्चेति, अत एवाह–'जाव महड्ढिया वेमाणिणी अप्पड्ढियाए वेमाणिणीए'त्ति, 'मज्झंमज्झेण'मित्यादि तु पूर्वोक्तानुसारेणाध्येयमिति । अनन्तरं देववक्तव्यतोक्ता ।]

अथैकान्तदुःखितत्वेन तद्विपर्ययभूता नारका इति तद्गतवक्तव्यतामाह–

**मू. (६०६)** *रयणप्पभापुढविनेरइया णं भंते ! केरिसियं पोग्गलपरिणामं पच्चणुब्भवमाणा विहरंति ?, गोयमा ! अनिट्ठं जाव अमणामं एवं जाव अहेसत्तमापुढविनेरइया ।*

*एवं वेदणापरिणामं एवं जहा जीवाभिगमे बितिए नेरइयउद्देसए जाव अहेसत्तमापुढविनेरइया णं भंते ! केरिसयं परिग्गहसन्नापरिणामं पच्चणुब्भवमाणा विहरंति ?, गोयमा ! अनिट्ठं जाव अमणामं । सेवं भंते ! २ त्ति ॥*

**वृ.** 'रयणे'त्यादि 'एवं वेयणापरिणामं'ति पुद्गलपरिणामवद् वेदनापरिणामं प्रत्यनुभवन्ति नारकाः, तत्र चैवमभिलापः–

'रयणप्पभापुढविनेरइया णं भंते ! केरिसयं वेयणापरिणामं पच्चणुब्भवमाणा विहरंति ?, गोयमा ! अनिट्ठं जाव अमणामं एवं जाव अहेसत्तमापुढविनेरइया' ।

शेषसूत्रातिदेशायाह–'एवं जहा जीवाभिगमे' इत्यादि जीवाभिगमोक्तानि चैतानि विंशति पदानि, तद्यथा–

॥ १ ॥ "पोग्गलपरिणामं १ वेयणाइ २ लेसाइ ३ नामगोए य ४ ।
अरई ५ भए ६ सोगे ७ खुहा ८ पिवासा य ९ वाही य १० ॥
॥ २ ॥ उस्सासे ११ अणुतावे १२ कोहे १३ माणे य १४ माय १५ लोभे य १६ ।
चत्तारि य सन्नाओ २० नेरइयाणं परीणामे ॥

इति, तत्र चाद्यपदद्वयस्याभिलापो दर्शित एव, शेषाणि त्वष्टादशाद्यपदद्वयाभिलापेनाध्येयानीति ॥

शतकं–१४ उद्देशकः–३ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं—१४ उद्देशकः—४ :—

**वृ.** तृतीयोद्देशके नारकाणां पुद्गलपरिणाम उक्त इति, चतुर्थोद्देशकेऽप पुद्गलपरिणामविशेष एवोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्—

**मू. (६०७)** *एस णं भंते ! पोग्गले तीतमनंतं सासयं समयं लुक्खी समयं अलुक्खी समयं लुक्खी वा अलुक्खी वा ? पुव्विं च णं करणेणं अनेगवन्नं अनेगरूवं परिणामं परिणमति ?, अह से परिणामे निज्जिन्ने भवति तओ पच्छा एगवन्ने एगरूवे सिया ?, हंता गोयमा ! एस णं पोग्गले तीते तं चेव जाव एगरूवे सिया ।*

*एस णं भंते ! पोग्गले पडुप्पन्नं सासयं समयं ? एवं चेव, एवं अनागयमनंतंपि ।। एस णं भंते ! खंधे तीतमनंतं ? एवं चेव खंधेवि जहा पोग्गले ।।*

**वृ.** 'एस णं भंते !'इत्यादि, इह पुनरुद्देशकार्थःसङ्ग्रहगाथा क्वचिद् दृश्यते, सा चेयं—

।।१।।　"पोग्गल १ खंधे २ जीवे ३ परमाणू ४ सासए य ५ चरमे य ।
दुविहे खलु परिणामे अज्ञीवाणं च जीवाणं ६ ।।"

अस्याश्चार्थः उद्देशकार्थाधिगमावगम्य एवेति, 'पुग्गले'त्ति पुद्गलः परमाणुः स्कन्धरूपश्च 'तीतमनंतं सासयं समयं'ति विभक्तिपरिणामादतीते अनन्ते अपरिमाणत्वात् शाश्वते अक्षयत्वात् 'समये' काले 'समयं लुक्खी'ति समयमेकं यावद्रूक्षस्पर्शसद्भावाद्रूक्षी ।

तथा 'समयं अलुक्खी'त्ति समयमेकं यावदरूक्षस्पर्शसद्भावाद् 'अरूक्षी' स्निग्धस्पर्शवान् बभूव, इदं च पदद्वयं परमाणौ स्कन्धे च संभवति, तथा 'समयं लुक्खी वा अलुक्खी व'त्ति समयमेव रूक्षश्चारूक्षश्च रूक्षस्निग्धलक्षणस्पर्शद्वयोपेतो बभूव, इदं च स्कन्धापेक्षं यतो द्वयणुकादिस्कन्धे देशो रूक्षो देशश्चारूक्षो भवतीत्येवं युगपद्रूक्षस्निग्धस्पर्शसम्भवः, वाशब्दौ चेह समुच्चयार्थो, एवंरूपश्च सन्नसौ किमनेकवर्णादिपरिणामं परिणमति पुनश्चैकवर्णादिपरिणामः स्यात् ? इति पृच्छन्नाह—

'पुव्विं च णं करणेणं अनेगवन्नं अनेगरूवं परिणामं परिणमइ'इत्यादि, 'पूरूवं च' एकवर्णादिपरिणामात्प्रागेव 'करणेन' प्रयोगकरणेन विश्रसाकरणेन वा 'अनेकवर्णं' कालनीलादिवर्णभेदेनानेकरूपं गन्धरसस्पर्शसंस्थानभेदेन 'परिणामं' पर्यायं परिणमति अतीकालविषयत्वादस्य परिणतवानिति द्रष्टव्यं पुद्गल इति प्रकृतं, स च यदि परमाणुस्तदा समयभेदेनानेकवर्णादित्वं परिणतवान्, यदि च स्कन्धस्तदा यौगपद्येनापीति ।

'अह से'त्ति 'अथ' अनन्तरं सः—एष परमाणोः स्कन्धस्य चानेकवर्णादिपरिणामो 'निर्जीर्णं' क्षीणो भवति परिणामान्तराधायककारणोपनिपातवशात् 'ततः पश्चात्'निर्जरणानन्तरम् 'एकवर्णं' अपेतवर्णान्तरत्वादेकरूपो विवक्षितगन्धादिपर्यायापेक्षयाऽपरपर्यायाणामपेतत्वात् 'सिय'त्ति बभूव अतीतकालविषयत्वादस्येति प्रश्नः, इहोत्तरमेतदेवेति, अनेन च परिणामिता पुद्गलद्रव्यस्य प्रतिपादितेति ।

'एस ण'मित्यादि वर्त्तमानकालसूत्रं, तत्र च 'पडुप्पन्नं'ति विभक्तिपरिणामात् 'प्रत्युत्पन्ने' वर्त्तमाने 'शाश्वते' सदैव तस्य भावात् 'समये' कालमात्रे 'एवं चेव'त्ति करणात्पूर्वसूत्रोक्तमिदं दृश्यं—'समयं लुक्खी समयं अलुक्खी समयं लुक्खी वा अलुक्खी वा'इत्यादि, यच्चेहानन्तमिति नाधीतं तद्वर्त्तमानसमयस्यानन्तत्वासम्भवात्, अतीतानागतसूत्रयोस्त्वनन्तामत्यधीत तयोरनन्त-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

त्वसम्भवादिति ।

अनन्तरं पुद्गलस्वरूपं निरूपितं, पुद्गलश्च स्कन्धोऽपि भवतीति पुद्गलभेदभूतस्य स्कन्धस्य स्वरूपं निरूपयन्नाह– 'एस णं भंते! खंधे' इत्यादि ।। स्कन्धश्च स्वप्रदेशापेक्षया जीवोऽपि स्यादितीत्थमेव जीवस्वरूपं निरूपयन्नाह–

**मू. (६०८)** *एस णं भंते! जीवे तीतमनंतं सासयं समयं दुक्खी समयं अदुक्खी समयं दुक्खी वा अदुक्खी वा ? पुव्विं च करणेणं अनेगभूयं परिणामं परिणमइ अह से वेयणिज्जे निज्जिन्ने भवति तओ पच्छा एगभावे एगभूए सिया ?, हंता गोयमा !* एस णं जीवे जाव एगभूए सिया, एवं पडुप्पन्नं सासयं समयं, एवं अनागयमनंतं सासयं समयं ।।

**वृ.** 'एस णं भंते! जीवे' इतयादि, 'एषः' प्रत्यक्षो जीवोऽतीतेऽनन्ते शाश्वते समये समयमेकं दुःखी दुःखहेतुयोगात् समयं चादुःखी सुखहेतुयोगाद्बभूव समयमेव च दुःखी वाऽदुःखी वा, वाशब्दयोः समुच्चयार्थःत्वाद् दुःखी च सुखी च तद्धेतुयोगात्, न पुनरेकदा सुखदुःखवेदनमस्ति एकोपयोगत्वाज्जीवस्येति, एवंरूपश्च सन्नसौ स्वहेतुतः किमनेकभावं परिणामं परिणमति पुनश्चैकभावपरिणामः स्यात् ? इति पृच्छन्नाह–

'पुव्विं च करणेणं अनेगभावं अनेगभूयं परिणामं परिणमइ' 'पूर्वं च' एकभावपरिणामात्प्रागेव करमेन कालस्वभावादिकारणसंवलिततया शुभाशुभकर्मबन्धहेतुभूतया क्रिययाऽनेको भावः–पर्यायो दुःखित्वादिरूपो यस्मिन् स तथा तमनेकभावं परिणाममिति योगः 'अनेगभूयं' ति अनेकभावत्वादेवानेकरूपं 'परिणामं' स्वभावं 'परिणमइ' त्ति अतीतकालविषयत्वादस्य 'परिणतवान्' प्राप्तवानिति ।

'अह से' त्ति अथ 'तत्' दुःखितत्वाद्यनेकभावहेतुभूतं 'वेयणिज्जे' त्ति वेदनीयं कर्म्म उपलक्षणत्वाच्चास्य ज्ञानावरणीयादि च 'निर्जीर्णं' क्षीणं भवति ततः पश्चात् 'एगभावे' त्ति एको भावः सांसारिकसुखविपर्ययात् स्वाभाविकसुखरूपो यस्यासावेकभावोऽत एव 'एकभूतः' एकत्वं प्राप्तः 'सिय' त्ति बभूव कर्म्मकृतधर्म्मान्तरविरहादिति प्रश्नः, इहोत्तरमेतदेव ।

एवं प्रत्युत्पन्नानागतसूत्रे अपीति ।। पूर्वं स्कन्ध उक्तः, स च स्कन्धरूपत्यागाद्विनाशी भवति, एवं परमाणुरपि स्यान्न वा ? इत्याशङ्कायामाह–

**मू. (६०९)** *परमाणुपोग्गले णं भंते! किं सासए असासए ?, गोयमा! सिय सासए सिय असासए, से केणट्ठेणं भंते! एवं वुच्चइ सिय सासए सिय असासए ?, गोयमा ! दव्वट्ठयाए सासए वन्नपज्जवेहिं जाव फासपज्जवेहिं असासए से तेणट्ठेणं जाव सिय सासए सिय असासए ।*

**वृ.** 'परमाणुपोग्गले णं' ति पुद्गलः स्कन्धोऽपि स्यादतः परमाणुग्रहणं 'सासए' त्ति शश्वद्भवनात् 'शाश्वतः' नित्यः अशाश्वतस्त्वनित्यः 'सिय सासए' त्ति कथञ्चिच्छाश्वतः 'दव्वट्ठयाए' त्ति द्रव्यं–उपेक्षितपर्यायं वस्तु तदेवार्थो द्रव्यार्थःस्तद्भावस्तत्ता तया द्रव्यार्थःतया शाश्वतः स्कन्धान्तर्भावेऽपि परमाणुत्वस्याविनष्टत्वात् प्रदेशलक्षणव्यपदेशान्तरव्यपदेश्यत्वात् ।

'वन्नपज्जवेहिं' ति परि–सामस्त्येनावन्ति–गच्छन्ति ये ते पर्यवा विशेषा धर्म्मा इत्यनर्थान्तरं ते च वर्णादिभेदादनेकध्येत्यतो विशेष्यते–वर्णस्य पर्यवा वर्णपर्यवा अतस्तैः, 'असासए' त्ति विनाशी, पर्यवाणां पर्यवत्वेनैव विनश्वरत्वादिति ।। परमाण्वधिकारादेवेदमाह ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (६१०) परमाणुपोग्गले णं भंते ! किं चरमे अचरमे ?, गोयमा ! दव्वादेसेणं नो चरिमे अचरिमे, खेत्तादेसेणं सिय चरिमे सिय अचरिमे, कालादेसेणं सिय चरमे सिय अचरिमे, भावादेसेणं सिय चरिमे सिय अचरिमे ॥*

वृ. 'परमाणु'इत्यादि, 'चरमे'त्ति यः परमाणुर्यस्माद्विवक्षितभावाच्च्युतः सन् पुनस्तं भावं न प्राप्स्यति स तद्भावापेक्षया चरमः, एतद्विपरीतस्त्वचरम इति, तत्र 'दव्वादेसेणं'ति आदेशः– प्रकारो द्रव्यरूप आदेशो द्रव्यादेशस्तेन नो चरमः, स हि द्रव्यतः परमाणुत्वाच्च्युतः सङ्घातमवाप्यापि ततश्च्युतः परमाणुत्वलक्षणं द्रव्यत्वमवाप्स्यतीति ।

'खेत्तादेसेणं'ति क्षेत्रविशेषितत्वलक्षणप्रकारेण 'स्यात्' कदाचिच्चरमः, कथम् ?, यत्र क्षेत्रे केवली समुद्घातं गतस्तत्र क्षेत्रे यः परमाणुरवगाढोऽसौ तत्र क्षेत्रे तेन केवलिना समुद्घातगतेन विशेषितो न कदाचनाप्यवगाहं लप्स्यते, केवलिनो निर्वाणगमनादित्येवं क्षेत्रतश्चरमोऽसाविति, निर्विशेषणक्षेत्रापेक्षया त्वचरमः, तत्क्षेत्रावगाहस्य तेन लप्सयमानत्वादिति ।

'कालादेसेणं'ति कालविशेषितत्वलक्षणप्रकारेण 'सिय चरमे'त्ति कथञ्चिच्चरमः, कथम् यत्र काले पूर्वाह्णादौ केवलिना समुद्घातः कृतस्तत्रैव यः पमराणुतया संवृत्तः स च तं कालविशेषं केवलिसमुद्घातविशेषितं न कदाचनापि प्राप्स्यति तस्य केवलिनः सिद्धिगमनेन पुनः परमाणुतया संवृत्तः स च तं कालविशेषं केवलिसमुद्घातविशेषितं न कदाचनापि प्राप्स्यति तस्य केवलिनः सिद्धिगमनेन पुनः समुद्घाताभावादिति तदपेक्षया कालतश्चरमोऽसाविति, निर्विशेषणकालापेक्षया त्वचरम इति ।

'भावाएसेणं'ति भावो–वर्णादिविशेषस्तद्विशेषलक्षणप्रकारेण 'स्याच्चरमः' कथञ्चिच्चरमः, कथं ?, विवक्षितकेवलिसमुद्घातवसरे यः पुद्गलो वर्णादिभावविशेषं परिणतः स विवक्षितकेवलिसमुद्घातविशेषितवर्णपरिणामापेक्षया चरमो यस्मात्तत् केवलिनिर्वाणे पुनस्तं परिणाममसौ न प्राप्स्यतीति, इदं च व्याख्यानं चूर्णिकारमतमुपजीव्य कृतमिति । अनन्तरं परमाणोश्चरमत्वाचरमत्वलक्षणः परिणामः प्रतिपादितः, अथ परिणामस्यैव भेदाभिधानायाह–

*मू. (६११) कइविहे णं भंते ! परिणामे पन्नत्ते ?, गोयमा ! दुविहे परिणामे पन्नत्ते, तंजहा–जीवपरिणामे य अजीवपरिणामे य, एवं परिणामपयं निरवसेसं भाणियव्वं । सेवं भंते ! २ जाव विहरति ॥*

वृ. 'कइविहे ण'मित्यादि, तत्र परिणमनं–द्रव्यस्यावस्थान्तरगमनं परिणामः, आह च–

॥ १ ॥ "परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम् ।
न तु सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥" इति ।

'परिणामपयं'ति प्रज्ञापनायां त्रयोदशं परिणामपदं, तच्चैवं–'जीवपरिणामे णं भंते ! कइविहे पन्नत्ते ?, गोयमा ! दसविहे पन्नत्ते, तंजहा गइपरिणामे इंदियपरिणामे एवं कसायलेसा जोगउवओगे नाणदंसणचरित्तवेदपरिणामे 'इत्यादि, तथा–

'अजीवपरिणामे णं भंते ! कइविहे पन्नत्ते ?, गोयमा ! दसविहे पन्नत्ते तंजहा– बंधपरिणामे १ गइपरिणामे २ एवं संठाण ३ भेय ४ वन्न ५ गंध ६ रस ७ फास ८ अगुरुलहुय ९ सद्दपरिणामे १०" इत्यादि ॥

शतकं–१४ उद्देशकः–४ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## -: शतकं-१४ उद्देशकः-५ :-

**वृ.** चतुर्थोद्देशके परिणाम उक्त इति परिणामाधिकाराद्व्यतिव्रजनादिकं विचित्रं परिणाममधिकृत्य पञ्चमोद्देशकमाह, तस्य चेदमादिसूत्रम्-

*'मू. (६१२) नेरइए णं भंते! अगनिकायस्स मज्झंमज्झेणं वीइवएज्ञा ?, गोयमा! अत्थेगतिए वीइवएज्ञा अत्थेगतिए नो वीइवएज्ञा, से केणट्टेणं भंते! एवं वुच्चइ अत्थेगइए वीइवएज्ञा अत्थेगतिए नो वीइवएज्ञा ?, गोयमा! नेरइया दुविहा पन्नत्ता, तंजहा-विग्गहगति-समावन्नगा य अविग्गहगतिसमावन्नगा य, तत्थ णं जे से विग्गहगतिसमावन्नए नेरतिए से णं अगनिकायस्स मज्झंमज्झेणं वीइवएज्ञा, से णं तत्थ झियाएज्ञा ?, नो तिणट्टे समट्टे, नो खलु तत्थ सत्थं कमइ, तत्थ णं जे से अविग्गहगइसमावन्नए नेरइए से णं अगनिकायस्स मज्झंमज्झेणं नो वीइवएज्ञा, से तेणट्टेणं जाव नो वीइवएज्ञा।*

*असुरकुमारे णं भंते! अगनिकायस्स पच्छा, गोयमा! अत्थेगतिए वीइवएज्ञा अत्थेगतिए नो वीइवएज्ञा, से केणट्टेणं जाव नो वीइवएज्ञा ?, गोयमा! असुरकुमारा दुविहा पन्नत्ता, तंजहा-विग्गहगइसमावगन्नगा य अविग्गहगइसमावन्नगा य, तत्थ णं जे से विग्गहगइसमावन्नए असुरकुमारे से णं एवं जहेव नेरतिए जाव वक्कमति, तत्थ णं जे से अविग्गहगइसमावन्नए असुर-कुमारे से णं अत्थेगतिए अगनिकायस्स मज्झंमज्झेणं वीतीवएज्ञा अत्थेगतिए नो वीइव०, जे णं वीतीवएज्ञा से णं तत्थ झियाएज्ञा? नो तिणट्टे समट्टे, नो खलु तत्थ सत्थं कमति, से तेणट्टेणं एवं जाव थणियकुमारे, एगिंदिया जहा नेरइया।*

*बेइंदिया णं भंते! अगनिकायस्स मज्झंमज्झेणं जहा असुरकुमारे तहा बेइंदिएवि, नवरं जे णं वीयीवएज्ञा से णं तत्थ झियाएज्ञा ?, हंता झियाएज्ञा, से णं तं चेव एवं जाव चउरिंदिए॥*

*पंचिंदियतिरिक्खजोणिए णं भंते! अगनिकायपुच्छा, गोयमा! अत्थेगतिए वीइवएज्ञा अत्थेगतिए नो वीइवएज्ञा, से तेणट्टेणं० ?, गोयमा! पंचिंदियतिरिक्खजोणिया दुविहा पन्नत्ता, तंजगा-विग्गहगतिसमावन्नगा य अविग्गहगइमासवन्नगा य, विग्गहगइमासवन्नए जहेव नेरइए जाव नो खलु तत्थ सत्थं कमइ।*

*अविग्गहगइसमावन्नगा पंचिंदियतिरिक्खजोणि दुविहा पन्नत्ता, तंजहा-इड्ढिप्पित्ता य अणिड्ढिप्पित्ता य, तत्थ मं जे से इड्ढिप्पत्ते पंचिंदियतिरिक्खजोणिए से णं अत्थेगइए अगनिकायस्स मज्झंमज्झेणं वीयीवएज्ञा अत्थेगइए नो वीयीवएज्ञा, जे णं वीयीवएज्ञा से णं तत्थ झियाएज्ञा नो तिणट्टे समट्टे, नो खलु तत्थ सत्थं कमइ।*

*तत्थ णं जे से अणिड्ढिप्पत्ते पंचिंदियतिरिक्खजोणिए से णं अत्थेगतिए अगनिकायस्स मज्झंमज्झेणं वीयीवएज्ञा अत्थेगतिए नो वीइवएज्ञा, जे णं वीयीवएज्ञा से णं तत्थ झियाएज्ञा ?, हंता झियाएज्ञा, से तेणट्टेणं जाव नो वीयीवएज्ञा।*

*एवं मणुस्सेवि, वाणमंतरजोइसियवेमाणिए जहा असुरकुमारे॥*

**वृ.** 'नेरइए ण'मित्यादि, इह च क्वचिदुद्देशकार्थःसङ्ग्रहगाथा दृश्यते, सा चेयं-

॥१॥ "नेरइय अगणिमज्झे दस ठाणा तिरिय पोग्गले देवे।
पव्वयभित्ती उल्लंघणा य पल्लंघणा चेव॥" इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थःश्चास्या उद्देशकार्थावगमगम्य इति, 'नो खलु तत्थ सत्थं कमइ' त्ति विग्रहगतिसमापन्नो हि कार्म्मणशरीरत्वेन सूक्ष्मः, सूक्ष्मत्वाच्च तत्र 'शस्त्रम्' अग्न्यादिकं न क्रामति ।

'तत्थ णं जे से' इत्यादि, अविग्रहगतिसमापन्न उत्पत्तिक्षेत्रोपपन्नोऽभिधीयते न तु ऋजुगति-समापन्नः तस्येह प्रकरणेऽनधिकृतत्वात्, स चाग्निकायस्य मध्येन न व्यतिव्रजति, नारकक्षेत्रे बादराग्निकायस्याभावात्, मनुष्यक्षेत्र एव तद्भावात्, यच्चोत्तराध्ययनादिषु श्रूयते–"हुयासणे जलंतंमि दड्ढपुव्वो अनेगसो ।" इत्यादि तदग्निसदृशद्रव्यान्तरापेक्षयाऽवसेयं, संभवन्ति च तथाविधशक्तिमन्ति द्रव्याणि तेजोलेश्याद्रव्यवदिति ।

असुरकुमारसूत्रे विग्रहगतिको नारकवत्, अविग्रहगतिकस्तु कोऽप्यग्नेर्मध्येन व्यतिव्रजेत् यो मनुष्यलोकमागच्छति, यस्तु न तत्रागच्छति असौ न व्यतिव्रजेत्, व्यतिव्रजन्नपि च न ध्यायते ध्यायते वा, यतो न खलु तत्र शस्त्रं क्रमते सूक्ष्मत्वाद्वैक्रयशरीरस्य शीघ्रत्वाच्च तद्गतेरिति ।

'एगिंदिय जहा नेरइय' त्ति, कथम् ?, यतो विग्रहे तेऽप्यग्निमध्येन व्यतिव्रजन्ति सूक्ष्मत्वान्न दह्यन्ते च, अविग्रहगतिसमापन्नकाश्च तेऽपि नाग्नेर्मध्येन व्यतिव्रजन्ति स्थावरत्वात्, तेजोवायूनां गतिसतयाऽग्नेर्मध्येन व्यतिव्रजनं यद् दृश्यते तदिह न विवक्षिमिति सम्भाव्यते, स्थावरत्वमात्रस्यैव विवक्षितत्वात्, स्थावरत्वे हि अस्ति कथञ्चित्तेषां गत्यभावो यदपेक्षया स्थावरास्ते व्यपदिश्यन्ते, अन्यथाऽधिकृतव्यपदेश्य निर्निबन्धनता स्यात्, तथा तद्वाय्वादिपारतन्त्रेण पृथिव्यादीनाम-ग्निमध्येन व्यतिव्रजनं दृश्यते तदिह न विवक्षितं, स्वातन्त्र्यकृतस्यैव तस्य विवक्षणात्, चूर्णिकारः पुनरेवमाह–

'एगिंदियाण गई नत्थि' त्ति ते न गच्छन्ति, एगे वाउक्काइया परपेरणेसु गच्छंति विराहिज्जंति य' त्ति, पञ्चेन्द्रियतिर्यक्सूत्रे 'इड्ढिप्पत्ता य' त्ति वैक्रियलब्धिसम्पन्नाः 'अत्थेगइए अगनिकाय-स्से' त्यादि, अस्त्येककः कश्चित् पञ्चेन्द्रियतिर्यगयोनिको यो मनुष्यलोकवर्त्ती स तत्राग्निकायसम्भ-वात्तन्मध्येन व्यतिव्रजेत्, यस्तु मनुष्यक्षेत्राद्बहिर्नासावग्नेर्मध्येन व्यतिव्रजेत्, अग्नेरेव तत्राभावात्, तदन्यो वा तथाविधसामग्र्यभावात्, 'नो खलु तत्थ सत्थं कमइ' त्ति वैक्रियादिलब्धिमति पञ्चेन्द्रिय-तिरश्चि नाग्न्यादिकं शस्त्रं क्रमत इति ॥ अथ दश स्थानानीति द्वारमभिधातुमाह–

***मू. (६१३)*** *नेरतिया दस ठाणाइं पच्चणुब्भवमाणा विहरंति, तंजहा–अनिट्ठा सद्दा अनिट्ठा रूवा अनिट्ठा गंधा अनिट्ठा रसा अनिट्ठा फासा अनिट्ठा गती अनिट्ठा ठिती अनिट्ठे लावन्ने अनिट्ठे जसे कित्ती अनिट्ठे उट्ठाणकम्मबलवीरियपुरिसक्कारपरक्कमे ।*

*असुरकुमारा दस ठाणाइं पच्चणुब्भवमाणा विहरंति, तंजहा–इट्ठा सद्दा इट्ठा रूवा जाव इट्ठे उट्ठाणकम्मबलवीरियपुरिसक्कारपरक्कमे एवं जाव थणियकुमारा ।*

*पुढविक्काइया छट्ठाणाइं पच्चणुब्भवमाणा वि०, तं०–इट्ठानिट्ठा फासा इट्ठानिट्ठा गती एवं जाव परक्कमे, एवं जाव वणस्सइकाइया ।*

*बेइंदिया सत्तट्ठाणाइं पच्चणुब्भवमाणा विहरंति, तंजहा–इट्ठानिट्ठा रसा सेसं जहा एगिंदियाणं, तेंदिया णं अट्ठट्ठाणाइं पच्चणुब्भवमाणा वि०, तं०–इट्ठानिट्ठा गंधा सेसं जहा बेंदियाणं चउरिंदिया नवट्ठाणाइं पच्चणुब्भवमाणा विहरंति, तं०–इट्ठानिट्ठा रूवा 'सेसं जहा तेंदियाणं ।*

*पंचिंदियतिरिक्खजोणिया दसठाणाइं पच्चणुब्भवमाणा विहरंति, तंजहा–इट्ठानिट्ठा सद्दा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जाव परक्कमे, एवं मणुस्सावि, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा ॥*

**वृ.** 'नेरइया दस ठाणाइं'इत्यादि, तत्र 'अनिट्ठा गइ'त्ति अप्रशस्तविहायोगतिनामोदयसम्पाद्या नरकगतिरूपा वा, 'अनिट्ठा ठिति'त्ति प्राकृतत्वादनिष्टेति द्रष्टव्यं यशसा–सर्वदिग्गामिप्रख्यातिरूपेण पराक्रमकृतेन वा सह कीर्त्ति–एकदिग्गामिनी प्रख्यातिर्दानफलभूता वा यशःकीर्त्ति, अनिष्टत्वं च तस्या दुष्प्रख्यातिरूपत्वात्, अनिट्ठे उट्ठाणे'त्यादि, उत्थानादयो वीर्यान्तरायक्षयोपशमादिजन्यवीर्यविशेषाः, अनिष्टत्वं च तेषां कुत्सितत्वादिति ।

'पुढविक्काइए'त्यादि, 'छट्ठाणाइं'ति पृथिवीकायिकानामेकेन्द्रियत्वेन पूर्वोक्तदशस्थानकमध्ये शब्दरूपगन्धरसा न विषय इति स्पर्शादीन्येव षट् ते प्रत्यनुभवन्ति, 'इट्ठानिट्ठा फास'त्ति सातासा-तोदयसम्भवात् शुभाशुभक्षेत्रोत्पत्तिभावाच्च, 'इट्ठानिट्ठा गइ'त्ति यद्यपि तेषां स्थावरत्वेन गमनरूपा गतिर्नास्ति स्वभावतस्तथाऽपि परप्रत्यया सा भवतीति शुभाशुभत्वेनेष्टानिष्टव्यपदेशार्हा स्यात्, अथवा यद्यपि पापरूपत्वात्तिर्यग्गतिरनिष्टैव स्यात्तथाऽपीषत्प्राग्भाराऽप्रतिष्ठानादिक्षेत्रोत्पत्तिद्वारेणेष्टानिष्टगतिस्तेषां भावनीयेति ।

'एवं जाव परक्कमे'त्ति वचनादिदं दृश्यम्–'इट्ठानिट्ठा ठिई'सा च गतिवद्भावनीया 'इट्ठानिट्ठे लावन्ने' इदं च मण्यन्धपाषाणादिषु भावनीयम् 'इट्ठानिट्ठे जसोकित्ती' इयं सत्प्रख्यात्यसत्प्रख्यातिरूपा मण्यादिष्वेवावसेयेति, 'इट्ठानिट्ठे उट्ठाणजावपरक्कमे' उत्थानादि च यद्यपि तेषां स्थावरत्वान्नास्ति तथाऽपि प्राग्भवानुभूतोत्थानादिसंस्कारवशात्तदिष्टमनिष्टं वाऽवसेयमिति ।

'बेंदिया सत्तट्ठाणाइं'ति शब्दरूपगन्धानां तदविषयत्वात्, रसस्पर्शादिस्थानानि च शेषाण्येकेन्द्रियाणामिवेष्टानिष्टान्यवसेयानि, गतिस्तु तेषां त्रसत्वाद्गमनरूपा द्विधाऽप्यस्ति, भवगतिस्तूत्पत्तिस्थानविशेषेणेष्टानिष्टाऽवसेयेति ।

अथ 'तिरियपोग्गले देवे'इत्यादिद्वारगाथोक्तार्थाभिधानायाह–

**मू. (६१४)** *देवे णं भंते ! महिड्ढीए जाव महेसक्खे बाहिरए पोग्गे अपरियाइत्ता पभू तिरियपव्वयं वा तिरियभित्तिं वा उल्लंघेत्तए वा पल्लंघेत्तए वा ?, गोयमा ! नो तिणट्ठे समट्ठे ।*

*देवे णं भंते ! महिड्ढिए जाव महेसक्खे बाहिरए पोग्गले परियाइत्ता पभू तिरिय जाव पल्लंघेत्तए वा ?, हंता पभू । सेवं भंते भंतेत्ति ॥*

**वृ.** 'देवे ण'मित्यादि, 'बाहिरए'त्ति भवधारणीयशरीरव्यतिरिक्तान् 'अपरियाइत्त'त्ति 'अपर्यादाय' अगृहीत्वा 'तिरियपव्वयं'ति तिरश्चीनं पर्वतं गच्छतो मार्गावरोधकं 'तिरियं भित्तिं व'त्ति तिर्यग्भित्तिं–तिरश्चीनां प्राकारवरण्डिकाडिभित्तिं पर्वतखण्डं वेति 'उल्लंघेत्तए'त्ति सकृदुल्लङ्घने 'पल्लंघेत्तए व'त्ति पुनः पुनर्लङ्घनेनेति ॥

शतकं–१४ उद्देशकः–५ समाप्तः

## –: शतकं–१४ उद्देशकः–६ :–

**वृ.** पञ्चमोद्देशके नारकादिजीववक्तव्यतोक्ता षष्ठेऽपि सैवोच्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

5 | 10

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (६१५) रायगिहे जाव एवं वयासी–नेरइय णं भंते! किमाहारा किं परिमाणा किंजोणीया किंठितीया पन्नत्ता ?, गोयमा ! नेरइया णं पोग्गलाहारा पोग्गलपरिणामा पोग्गल- जोणिया पोग्गलट्ठितीया कम्मोवगा कम्मनियाणा कम्मट्ठितीया कम्मुणामेव विप्परियासमेंति एवं जाव वेमाणिया ।*

वृ. 'रायगिहे' इत्यादि, 'किमाहार' त्ति किमाहारयन्तीति किमाहाराः 'किंपरिणाम' त्ति किमाहारितं सत्परिणामयन्तीति किंपरिणामाः 'किंजोणीय' त्ति का योनि–उत्पत्तिस्थानं येषांते किंयोनिकाः, एवं किंस्थितिकाः, स्थितिश्च अवस्थानहेतुः, अत्रोत्तरं क्रमेणैव दृश्यं व्यक्तं च ।

नवरं 'पुग्गलजोणीय' त्ति पुद्गलाः–शीतादिस्पर्शा योनी येषां ते तथा, नारका हि शीतयोनय उष्णयोनयश्चेति, 'पोग्गलट्ठिइय' त्ति पुद्गला–आयुष्ककर्मपुद्गलाः स्थितिर्येषां नरके स्थितिहेतुत्वात्ते तथा, अथ कस्मात्ते पुद्गलस्थितयो भवन्तीत्यत आह–

'कम्मोवगे' त्यादि कर्म्म–ज्ञानावरणादि पुद्गलरूपमुपगच्छन्ति–बन्धनद्वारेणोपयान्तीति कर्म्मोपगाः, कर्म्मनिदानं–नारकत्वनिमित्तं कर्म्म बन्धनिमित्तं वा येषां ते कर्म्मनिदानाः, तथा कर्म्मणः–कर्म्मपुद्गलेभ्यः सकाशात्स्थितिर्येषां ते कर्म्मस्थितयः, तथा 'कम्मुणामेव विप्परियासमेंति' कर्मणैव हेतुभूतेन मकार आगमिकः विपर्यासं–पर्यायान्तरं पर्याप्तापर्याप्तादिकमायान्ति–प्राप्नुवन्ति अतस्ते पुद्गलस्थितयो भवन्तीति ॥ आहारमेवाश्रित्याह–

*मू. (६१६) नेरइया णं भंते ! किं वीयीदव्वाइं आहारेंति अवीचिदव्वाइं आहारेंति ?, गोयमा ! नेरतिया वीचिदव्वाइंपि आहारेंति अवीचिदव्वाइंपि आहारेंति, से केणट्ठेणं भंते ! एवं वुच्चइ नेरतिया वीचि० तं चेव जाव आहारेंति ?*

*गोयमा ! जे णं नेरइया एगपएसूणाइंपि दव्वाइं आहारेंति ते णं नेरतिया वीचिदव्वाइं आहारेंति, जे णं नेरतिया पडिपुन्नाइं दव्वाइं आहारेंति, ते णं नेरइया अवीचिदव्वाइं आहारेंति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जाव आहारेंति, एवं जाव वेमाणिया आहारेंति ॥*

वृ. 'नेरइया ण' मित्यादि, 'वीइदव्वाइं' ति वीचि–विवक्षितद्रव्याणां तदवयवानां च परस्परेण पृथग्भावः 'वीचिरपृथग्भावे' इति वचनात्, तत्र वीचिप्रधानानि द्रव्याणि वीचिद्रव्याणि एकादिप्रदेश-न्यूनानीत्यर्थः, एतन्निषेधादवीचिद्रव्याणि, अयमत्र भावः–यावता द्रव्यसमुदायेनाहारः पूर्यते स एकादिप्रदेशोनो वीचिद्रव्याण्युच्यन्ते परिपूर्णस्त्ववीचिद्रव्याणीति टीकाकारः ।

चूर्णिकारस्त्वाहारद्रव्यवर्गणामधिकृत्येदं व्याख्यातवान्, तत्र च याः सर्वोत्कृष्टाहार-द्रव्यवर्गणास्ता अवीचिद्रव्याणि, यास्तु ताभ्य एकादिना प्रदेशेन हीनास्ता वीचिद्रव्याणीति, 'एगपएस-ऊणाइंपि दव्वाइं' ति एकप्रदेशोनान्यपि अपिशब्दादनेकप्रदेशोनान्यपीति । अनन्तरं दण्डकस्यान्ते वैमानिकानामाहारभोग उक्तः, अथ वैमानिकविशेषस्य कामभोगोपदर्शनायाह–

*मू. (६१७) जाहे णं भंते ! सक्के देविंदे देवराया दिव्वाइं भोगभोगाइं भुंजिउंकामे भवति से कहमियाणिं पकरेंति ?, गोयमा ! ताहे चेव णं से सक्के देविंदे देवराया एगं महं नेमिपडिरूवगं विउव्वति एगं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं जाव अद्धंगुलं च किंचिविसेसाहियं परिक्खेवेणं ।*

*तस्स णं नेमिपडिरूवस्स उवरिं वहुसमरमणिज्जे भूमिभागे पन्नत्ते जाव मणीणं फासे, तस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*णं नेमिपडिरूवगस्स बहुमज्झदेसभागे तत्थ णं महं एगं पासायवडेंसगं विउव्वति पंच जोयणसयाइं उड्ढं उच्चत्तेणं अड्ढाइज्जाइं जोयणसयाइं विक्खंभेणं अब्भुग्गयमूसियवन्नओ जाव पडिरूवं, तस्स पासायवडिंसगस्य उल्लोए पउमलयभत्तिचित्ते जाव पडिरूवे।*

*तस्स णं पासायवडेंसगस्स अंतो बहुसमरमणिज्ञे भूमिभागे जाव मणीणं फासे मणिपेढिया अट्ठजोयणिया जहा वेमाणियाणं, तीसे णं मणिपेढियाए उवरिं महं एगे देवसयणिज्ञे विउव्वइ सयणिज्ञवन्नओ जाव पडिरूवे, तत्थ णं से सक्के देविंदे देवराया अट्ठहिं अग्गमहिसीहिं सपरिवाराहिं दोहि य अनिएहिं नट्टाणिएण य गंधव्वाणिएण य सद्धिं महयाहयनट्टजाव दिव्वां भोगभोगाइं भुंजमाणे विहरइ॥*

*जाहे ईसाणे देविंदे देवराया दिव्वाइं जहा सक्के हा ईसाणेवि निरवसेसं, एवं सणंकुमारेवि, नवरं पासायवडेंसओ छ जोयणसयाइं उड्ढं उच्चत्तेणं तिन्नि जोयणसयाइं विक्खंभेणं मणिपेढिया तहेव अट्ठजोयणिया।*

*तीसे णं मणिपेढियाए उवरिं एत्थ णं महेगं सीहासणं विउव्वइ सपरिवारं भाणियव्वं, तत्थ णं सणंकुमारे देविंदे देवराया बावत्तरीए सामानियसाहस्सीहिं जाव चउहिं बावत्तरीहिं आयरक्खदेवसाहस्सीहि य बहूहिं सणंकुमारकप्पवासीहिं वेमाणिएहिं देवेहि य देवीहि य सद्धिं संपरिवुडे महया जाव विहरइ।*

*एवं जहा सणंकुमारे तहा जाव पाणओ अच्चुओ नवरं जो जस्स परिवारो सो तस्स भाणियव्वो*

*पासायउच्चत्तं जं सएसु २ कप्पेसु विमाणाणं उच्चत्तं अद्धद्धं वित्थारो जाव अच्चुयस्स नवजोयणसयाइं उड्ढं उच्चत्तेणं अद्धपंचमाइं जोयणसयाइं विक्खंभेणं, तत्थ णं गोयमा! अच्चुए देविंदे देवराया दसहिं सामाणियसाहस्सीहिं जाव विहरइ सेसं तं चेव सेवं भंते! २ त्ति॥*

**वृ.** 'जाहे ण' मित्यादि, 'जाहे' त्ति यदा 'भोगभोगाइं' ति भुज्यन्त इति भोगाः–स्पर्शादयः भोगार्हा भोगा भोगभोगाः मनोज्ञस्पर्शादय इत्यर्थः तान् 'से कहमियाणिं पकरेइ' त्ति अथ 'कथं' केन प्रकारेण तदानीं प्रकरोति?–प्रवर्त्तत इत्यर्थः।

'नेमिपडिरूवगं' ति नेमि–चक्रधारा तद्योगाच्चक्रमपि नेमि–तत्प्रतिरूपकं–वृत्ततया तत्सद्दशं स्थानमिति शेषः, 'तिन्नि जोयणे' त्यादी यावत्करणादिदं द्दश्यं–'सोलस य जोयमसहस्साइं दो य सयाइं सत्तावीसाहियाइं कोसतियं अट्ठावीसाहियं धनुसयं तेरस य अंगुलाइं' ति, 'उवरिं' ति उपरिष्टात् 'बहुसमरमणिज्ञे' त्ति अत्यन्तसमो रम्यश्चेत्यर्थः 'जाव मणीणं फासो' त्ति भूमिभाग- वर्णकस्तावद्वाचयो यावन्मणीनां स्पर्शवर्णक इत्यर्थः।

स चायं–'से जहानामए–आलिंगपोक्खरेइ वा मुइंगपोक्खरेइ वा' इत्यादि, आलिङ्गपुष्करं मुरजमुखपुटं–मर्द्दलमुखपुटं तद्वत्सम इत्यर्थः, तथा 'सच्छाएहिं सप्पभेहिं समरीईहिं सउज्ञोएहिं नाणाविहपंचवन्नेहिं मणीहिं उवसोहिए तंजहा–किण्हेहिं ५' इत्यादि वर्णगन्धसस्पर्शवर्णको मणीनां वाच्य इति।

'अब्भुग्गयमूसियवन्नओ' त्ति अभ्युद्गतोच्छ्रितादि प्रासादवर्णको वाच्य इत्यर्थः, स च पूर्ववत्, 'उल्लोए' त्ति उल्लोकः उल्लोचो वा–उपरितलं 'पउमलयाभत्तिचित्ते' त्ति पद्मानि लताश्च पद्मल- तास्तद्रूपाभिर्भक्तिभि–विच्छित्तिभिश्चित्रो यः स तथा, यावत्करणादिदं द्दश्यं–'पासाइए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दरिसणिज्जे अभिरूवे'त्ति, 'मणिपेढिया अट्ठजोयणिया जहा वेमाणियाणं'ति मणिपीठिका वाच्या, सा चायमविष्कम्भाभ्यामष्टयोजनिका यथा वैमानिकानां सम्बधिनी न तु व्यन्तरादिसत्केव, तस्या अन्यथास्वरूपत्वात्।

सा पुनरेवं–'तस्स णं बहुसमरमणिज्जस्सभूमिभागस्स बहुमज्झदेसभाए एत्थ णं महं एगं मणिपेढियं विउव्वइ, सा णं मणिपेढिया अट्ठ जोयणाइं आयामविक्खंभेणं पन्नत्ता चत्तारि जोयणाइं बाहल्लेणं सव्वरयणामई अच्छा जाव पडिरूव'त्ति, 'सयणिज्जवन्नओ'त्ति शयनीयवर्णको वाच्यः, स चैवं– 'तस्स णं देवसयणिज्जस्स इमेयारूवे वन्नावासे पन्नत्ते' वर्णकव्यासः–वर्णकविस्तरः, 'तंजहा–नानामणिमया पडिपाया सोवन्निया पाया नानामणियाइं पायसीसगाइं'इत्यादिरिति, 'दोहि य अनीएहिं'ति अनीकं–सैन्यं 'नट्टाणीएण य'त्ति नाट्यं–नृत्यं तत्कारकमनीकं–जनसमूहो नाट्यानीकं एवं गन्धर्वानीकं नवरं गन्धर्व्व–गीतं, 'महये'त्यादि यावत्करणादेवं दृश्यं–

'महयाहयनट्टगीयवाइयतंतीतलतालतुडियघणमुइंगपडुप्पवाइयरवेणं'ति व्याख्या चास्य प्राग्वत्, इह च यत् शक्रस्य सुधर्म्मसभालक्षणभोगस्थानसद्भावेऽपि भोगार्थः नेमिप्रतिरूपकादिविकुर्वणं तज्जिनास्थामाशातनापरिहारार्थं, सुधर्म्मसभायां हि माणवके स्तम्भे जिनास्थीनि समुद्रकेषु सन्ति, तत्प्रत्यासत्तौ च भोगानुभवने तदबहुमानः कृतः स्यात स चाशातनेति।

'सिंहासणं विउव्वइ'त्ति सनत्कुमारदेवेन्द्र–सिंहासनं विकुरुते न तु शक्रे शानाविव देवशयनीयं, स्पर्शमात्रेण तस्य परिचारकत्वान्न शयनीयेन प्रयोजनमिति भावः, 'सपरिवारं'ति स्वकीयपरिवारयोग्यासनपरिकरितमित्यर्थः, 'नवरं जो जस्स परिवारो सो तस्स भाणियव्वो'त्ति तत्र सनत्कुमारस्य परिवार उक्तः, एवं माहेन्द्रस्य तु सप्तति सामानिकसहस्राणि चतस्रश्चाङ्गरक्षसहास्रणां सप्ततयः, ब्रह्मणः षष्टि सामानिकसहस्राणां लान्तकस्य पञ्चाशत् शुक्रस्य चत्वारिंशत् सहारस्य त्रिंशत् प्राणतस्य विंशति अच्युतस्य तु दश सामानिकसहस्राणि, सर्वत्रापि च सामानिकचतुर्गुणा आत्मरक्षा इति।

'पासायउच्चत्तं ज'मित्यादि तत्र सनत्कुमारमाहेन्द्रयोः षड् योजनशतानि प्रासादस्योच्चत्वं ब्रह्मलान्तकयोः सप्त शुक्रसहारयोरष्टौ प्राणतेन्द्रस्याच्युतेन्द्रस्य च नवेति, इह च सनत्कुमारादयः सामानिकादिपरिवारसहितास्तत्र नेमिप्रतिरूपके गच्छन्ति, तत्समक्षमपि स्पर्शादिप्रतिचारणाया अविरुद्धत्वात्, शक्रेशानौ तु न तथा, सामानिकादिपरिवारसमक्षं कायप्रतिचारणाया लज्जनीयत्वेन विरुद्धत्वादिति॥

शतकं–१४ उद्देशकः–६ समाप्तः

## –: शतकं–१४ उद्देशकः–७ :–

**वृ.** षष्ठोद्देशकान्ते प्राणताच्युतेन्द्रयोर्भोगानुभूतिरुक्ता, सा च तयोः कथञ्चित्तुल्येति तुल्यताऽभिधानार्थः सप्तमोद्देशकः, तस्य चेदमादिसूत्रम्–

**मू.** *(६१८) रायगिहे जाव एवं वयासी परिसा पडिगया, गोयमादी समे भगवं महावीरे भगवं गोयमं आमंतेत्ता एवं वयासी।*

*चिरसंसिट्ठोऽसि मे गोयमा! चिरसंथुओऽसि मे गोयमा! चिरपरिचिओऽसि मे गोयमा चिरजुसिओऽसि मे गोयमा ! चिराणुगओऽसि मे गोयमा! चिराणुवत्तीसि मे गोयमा! अनंतरं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*देवलोए अनंतरं माणुस्सए भवे।*

*किं परं? मरणा कायस्स भेदा इओ चुता दोवि तुल्ला एगट्ठा अविसेसमणाणत्ता भविस्सामो*

**वृ.** 'रायगिहे'इत्यादि, तत्र किल भगवान् श्रीमन्महावीरः केवलज्ञानाप्राप्तया सखेदस्य गौतमस्वामिनः समाश्वासनायात्मनस्तस्य च भाविनीं तुल्यतां प्रतिपादयितुमिदमाह-'गोयमे'त्यादि

'चिरसंसिट्ठोऽसि'त्ति चिरं बहुकालं यावत् चिरे वा-अतीते प्रभूते काले संश्लिष्टः-स्नेहात्संबद्धश्चिरसंश्लिष्टः 'असि' भवसि 'मे' मया मम वा त्वं हे गौतम!, 'चिरसंथुओ'त्ति चिरं-बहुकालम् अतीतं यावत् संस्तुतः-स्नेहात्प्रशंसितश्चिरसंस्तुतः, एवं 'चिरपरिचिए'त्ति पुनः पुनर्दर्शनतः परिचितश्चिरपरिचितः, 'चिरजुसिए'त्ति चिरसेविताश्चिरप्रीतो वा 'जुषी प्रीतिसेवनयोः' इति वचनात्, 'चिराणुगए'त्ति चिरमनुगतो ममानुगतिकारित्वात्, 'चिराणुवत्तीसि'त्ति चिरमनुवृत्ति-अनुकूलवर्त्तिता यस्यासौ चिरानुवृत्ति, इदं च चिरसंश्लिष्टत्वादिकं कासीत्? इत्याह-

'अनंतरं देवलोए'त्ति अनन्तरं-निर्व्यवधानं यता भवत्येवं देवलोके अनन्तरे देवभवे इत्यर्थः ततोऽपि-अनन्तरं मनुष्यभवे, जात्यर्थःत्वादेकवचनस्य देवभवेषु मनुष्यभवेषु चेति द्रष्टव्यं, तत्र किल त्रिपृष्ठभवे भगवतो गौतमः सारथित्वेन चिरसंश्लिष्टत्वादिधर्म्मयुक्त आसीत्, एवमन्येष्वपि भवेषु संभवतीति, एवं च ग्यि तव गाढत्वेन स्नेहस्य न केवलज्ञानमुत्पद्यते भविष्यति च तवापि स्नेहक्षये तदित्यधृतिं मा कृथा इति गम्यते, 'किं परं?, मरण'त्ति किं बहुना 'परं'ति परतो 'मरणात्' मृत्योः, किमुक्तं भवति?

कायस्य भेदाद्धेतोः 'इओ चुय'त्ति 'इतः' प्रत्यक्षान्मनुष्यभवाच्युतौ 'दोवि'त्ति द्वावप्यावां तुल्यौ भविष्याव इति योगः, तत्र 'तुल्यौ' समानजीवद्रव्यौ 'एकट्ठ'त्ति 'एकार्थौ' एकप्रयोजनावनन्तसुखप्रयोजनत्वात् एकस्थौ वा-एकक्षेत्राश्रितौ सिद्धिक्षेत्रापेक्षयेति 'अविसेसमणाणत्त'त्ति 'अविशेषं' निर्विशेषं यथा भवत्येवम् 'अनानात्वौ' तुल्यज्ञानदर्शनादिपर्यायाविति, इदं च किल यदा भगवता गौतमेन चैत्यवन्दनायाष्टापदं गत्वा प्रत्यागच्छता पञ्चदशतापसशतानि प्रव्राजितानि समुत्पन्नकेवलानि च श्रीमन्महावीरसमवरसरमणमानीतानि तीर्थःप्रणामकरणसमनन्तरं च केवलिपर्षदि समुपविष्टानि, गौतमेन चाविदितत्केवलोत्पादव्यतिकरेणाभिहितानि यथा-आगच्छत भोः साधवः! भगवन्तं वन्दध्वमिति, जिननायकेन च गौतमोऽभिहितो यथा-गौतम! मा केवलिनामाशातनां कार्षी।

ततो गौतमो मिथ्यादुष्कृतमदात्, तथा यानहं प्रव्राजयामि तेषां केवलमुत्पद्यते न पुनर्मम ततः किं तन्नोत्पत्स्यत एवेति विकल्पादधृतिं चकार, ततो जगद्गुरुणा गदितोऽसौ मनःसमाधानाय, यथा गौतम! चत्वारः कटा भवन्ति-सुम्बकटो विदलकटश्चर्मकटः कम्बलकटश्चेति, एवं शिष्या अपि गुरोः प्रतिबन्धसाधर्म्येण सुम्बकटसमादयश्चत्वार एव भवन्ति, तत्र त्वं मयि कम्बलकटसमान इत्येतस्यार्थःस्य समर्थःनाय भगवता तदाऽभिहितमिति।

एवं भाविन्यामात्मतुल्यतायां भगवताऽभिहितायां 'अतिप्रियमश्रद्धेय'मितिकृत्वा यद्यन्योऽप्येनमर्थं जानाति तदा साधुर्भवतीत्यनेनाभिप्रायेण गौतम एवाह-

**मू. (६१९)** *जहा णं भंते! वयं एयमट्ठं जाणामो पासामो तहा णं अनुत्तरोववाइयावि देवा एयमट्ठं जा० पा०?, हंता गोयमा! जहा णं वयं एयमट्ठं जाणामो पासामो तहा अनुत्तरोववाइयावि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवा एयमट्ठं जा० पा० ।

से केणट्ठेणं जाव पासंति ?, गोयमा ! अनुत्तरोववाइया णं अनंताओ मनोदव्ववग्गणाओ लद्धाओ पत्ताओ अभिसमन्नागयाओ भवंति, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जाव पासंति ॥

**वृ.** 'जहा ण मित्यादि, 'एयमट्ठं'ति 'एतमर्थःम्' आवयोर्भावितुल्यतालक्षणं 'वयं जाणामो'त्ति यूयं च वयं चेत्येकशेषाद्वयं तत्र यूयं केवलज्ञानेन जानीथ वयं तु भवदुपदेशात् ।

तताऽनुत्तरोपपातिका अपि देवा एनमर्थं जानन्तीति ? प्रश्नः, अत्रोत्तरं—'हंता गोयमा इत्यादि, 'मणोदव्ववग्गणाओ लद्धाओ'त्ति मनोद्रव्यवर्गणा लब्धास्तद्विषयावधिज्ञान-लब्धिमात्रापेक्षया 'पत्ताओ'त्ति प्राप्तास्दद्रव्यपरिच्छेदतः 'अभिसमन्नागयाओ'त्ति अभिसमन्वागताः तद्गुणपर्यायपरिच्छेदतः ।

अयमत्र गर्भार्थः—अनुत्तरोपपातिका देवा विशिष्टावधिना मनोद्रव्यवर्गणा जानन्ति पश्यन्ति च, तासां चावयोरयोग्यवस्थायामदर्शनेन निर्वाणगमनं निश्चिन्वन्ति, ततश्चावयोर्भावि-तुल्यतालक्षणमर्थं जानन्ति पश्यन्ति चेति व्यपदिश्यत इति ॥ तुल्यताप्रक्रमादेवेदमाह—

**मू. (६२०)** कइविहे णं भंते ! तुल्लए पन्नत्ते ?, गोयमा ! छव्विहे तुल्लए पन्नत्ते, तंजहा—दव्वतुल्लए खेत्ततुल्लए कालतुलए भवतुल्लए संठाणतुल्लए, से केणट्ठेणं भंते ! एवं वुच्चइ दव्व-तुल्लए ?, गोयमा ! परमाणुपोग्गले परमामुपोग्गलस्स दव्वओ तुल्ले परमाणुपोग्गले परमा-णुपोग्गलवइरित्तस्स दव्वओ नो तुल्ले, दुपएसिए खंधे दुपएसियस्स खंधस्स दव्वओ तुल्ले दुपएसिए खंधे दुपएसियवइरित्तस्स खंधस्स दव्वओ नो तुल्ले एवं जाव दसपएसिए, तुल्लसंखेज्जपएसिए खंधे तुल्लसंखेज्जपएसियस्स खंधस्स दव्वओ तुल्ले तुल्लसंखेज्जपएसिए खंधे तुल्लसंखेज्जप-एसियवइरित्तस्स खंधस्स दव्वओ नो तुल्ले, एवं तुल्लअसंखेज्जपएसिएवि एवं तुल्लअणंतपएसिएवि, से तेणट्ठेणं गोयमा ! एवं वुच्चइ दव्वओ तुल्लए ।

से केणट्ठेणं भंते ! एवं वुच्चइ खेत्ततुल्लए २ ?, गोयमा ! एगपएसोगाढे पोग्गले एगपएसोगाढस्स पोग्गलस्स खेत्तओ तुल्ले एगपएसोगाढे पोग्गले एगपएसोगाढवइरित्तस्स पोग्गलस्स खेत्तओ नो तुल्ले, एवं जाव दसपएसोगाढे, तुल्लसंखेज्जपएसोगाढे० तुल्लसंखेज्ज० एवं तुल्लअसंखेज्जपएसोगाढेवि, से तेणट्ठेणं जाव खेत्ततुल्लए ।

से केणट्ठेणं भंते ! एवं वुच्चइ कालतुल्लए २ ?, गोयमा ! एगसमयठितीए पोग्गले एग० २ कालओ तुल्ले एगसमयठितीए पोग्गले एगसमयठितीवइरित्तस्स पोग्गलस्स कालओ नो तुल्ले एवं जाव दससमयट्ठितीए तुल्लसंखेज्जसमयठितीए एवं चेव एवं तुल्लअसंखेज्जसमयट्ठितीएवि, से तेणट्ठेणं जाव कालतुल्लए ।

से केणट्ठेणं भंते ! एवं वुच्चइ भवतुल्लए ?, गोयमा ! नेरइए नेरइयस्स भवट्ठयाए तुल्ले नेरइयवइरित्तस्स भवट्ठयाए नो तुल्ले तिरिक्खजोणिए एवं चेव एवं मणुस्से एवं देवेवि, से तेणट्ठेणं जाव भवतुल्लए ।

से केणट्ठेणं भंते ! एवं वुच्चइ भावतुल्लए भावतुल्लए ?, गोयमा ! एगगुणकालए पोग्गले एगगुणकालस्स पोग्गलस्स भावओ तुल्ले एगगुणकालए पोग्गले एगगुणकालगवइरित्तस्स पोग्गलस्स भावओ णो तुल्ले एवं जाव दसगुणकालए एवं तुल्लसंखेज्जगुणकालए पोग्गले एवं तुलअसंखेज्जगुण-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

*कालएवि एवं तुल्लअनंतगुणकालएवि।*

*जहा कालए एवं नीलए लोहियए हालिद्दे सुक्किल्ले, एवं सुब्भिगंधे एवं दुब्भिगंधे, एवं तित्ते जाव महुरे, एवं कक्खडे जाव लुक्खे, उदइए भावे उदइयस्स भावस्स भावओ तुल्ले उदइए भावे उदइयभाववइरित्तस्स भावस्स भावओ नो तुल्ले, एवं उवसमिए० खइए० खओवसमिए० पारिणामिए० संनिवाइए भावे संनिवाइयस्स भावस्स, से तेणट्ठेणं गो०! एवं वुच्चइ भावतुल्लए २।*

*से केणट्ठेणं भंते! एवं वुच्चइ संठाणतुल्लए २?, गोयमा! परिमंडले संठाणे परिमंडलस्स संठाणसस संठाणओ तुल्ले परिमंडलसंठाणवइरित्तस्स संठाणओ नो तुल्ले एवं वट्टे तंसे चउरंसे आयए, समचउरंससंठाणे समचउरंसस्स संठाणस्स संठाणओ तुल्ले समचउरंसे संठाणे समचउरंससंठाणवइरित्तस्स संठाणस्स संठाणओ नो तुल्ले एवं परिमंडले एवं जाव हुंडे, से तेण० जाव संठाणतुल्लए सं० २॥*

**वृ.** 'कइविहे' इत्यादि, तुल्यं समं तदेव तुल्यकं 'दव्वतुल्लए' त्ति द्रव्यतः-एकाणुकाद्यपेक्षया तुल्यकं द्रव्यतुल्यकम्, अथवा द्रव्यं च तत्तुल्यकं च द्रव्यान्तरेणेति द्रव्यतुल्यकं विशेषणव्यत्ययात्, 'खेत्ततुल्लए' त्ति क्षेत्रतः-एकप्रदेशावगाढत्वादिना तुल्यकं क्षेत्रतुल्यकम्, एवं शेषाण्यपि, नवरं भवो-नारकादिः भावो-वर्णादिरौदयिकादिर्वा संस्थानं-परिमण्डलादि, इह च तुल्यव्यतिरिक्तमतुल्यं भवतीति तदपीह व्याख्यास्यते, 'तुल्लंखेज्जपएसिए' त्ति तुल्या-समानाः सङ्खयेयाः प्रदेशा यत्र स तथा, तुल्यग्रहणमिह सङ्खयातत्वस्य सङ्खयातभेदत्वान्न सङ्खयातमात्रेण तुल्यताऽस्य स्याद् अपि तु समानसङ्खयत्वेनेत्यस्यार्थःस्य प्रतिपादनार्थःम्, एवमन्यत्रापीति, यच्चेहानन्तक्षेत्रप्रदेशावगाढ- त्वमनन्तसमयस्थायित्वं च नोक्तं तदवगाहप्रदेशानां स्थितिसमयानां च पुद्गलानाश्रित्या- नन्तानामभावादिति।

'भवट्ठयाए' त्ति भव एवार्थो भवार्थःस्तद्भावस्तत्ता तया भवार्थःतया, 'उदइए भावे' त्ति उदयः-कर्म्मणां विपाकः स एवौदयिकः-क्रियामात्रं अथवा उदयेन निष्पन्नः औदयिको भावो-नारकत्वादिपर्यायविशेषः औदयिकस्य भावस्य नारकत्वादेर्भावतो-भावसामान्यमाश्रित्य तुल्यः-समः, 'एवं उवसमिए' त्ति औपशमिकोऽप्येवं वाच्यः, तथाहि-'उवसमिए भावे उवसमियस्स भावस्स भावओ तुल्ले उवसमिए भावे उवसमियवइरित्तस्स भावस्स भावओ नो तुल्ले' त्ति, एवं शेषेष्वपि वाच्यं।

तत्रोपशमः-उदीर्णस्य कर्म्मणः क्षयोऽनुदीर्णस्य विष्कम्भितोदयत्वं स एवौपशमिकः-क्रियामात्रं उपशमेन वा निर्वृत्तः औपशमिकः-सम्यग्दर्शनादि, 'खइए' त्ति क्षयः-कर्माभावः स एव क्षायिक क्षयेण वा निर्वृत्तः क्षायिकः-केवलज्ञानादि, 'ओवसमिए' त्ति क्षयेण-उदयप्राप्तकर्मणो विनाशेन सहोपशमो-विष्कम्भितोदयत्वं क्षयोपशमः स एव क्षायोपशमिकः-क्रियामात्रमेव क्षयोपशमेन व निर्वृत्तः क्षायोपशमिकः-मतिज्ञानादिपर्यायविशेषः, नन्वौपशमिकस्य क्षायोपशमिकस्य च कः प्रतिविशेषः, उभयत्राप्युदीर्णस्य क्षयस्यानुदीर्णस्य चोपशमस्य भावात् उच्यते, क्षायोपशमिके विपाकवेदनमेव नास्ति प्रदेशवेदनं पुनरस्त्येव, औपशमिके तु प्रदेशवेदनमपि नास्तीति, 'पारिणामिए' त्ति परिणमनं परिणामः स एव पारिणामिकः, 'सन्निवाइए' त्ति सन्निपातः-औदयिकादिभावानां द्वयादिसंयोगस्तेन निर्वृत्तः सन्निपातिकः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'संठाणतुल्लए'त्ति संस्थानं—आकृतिविशेषः, तच्च द्वेधा—जीवाजीवभेदात्, तत्राजीवसंस्थानं पञ्चधा, तत्र 'परिमंडले संठाणे'त्ति परिमण्डलसंस्थानं बहिस्तादवृत्ताकारं मध्ये शुषिरं यथा वलयस्य, तच्च द्वेधा—घनप्रतरभेदात्, 'वट्टे'त्ति वृत्तं—परिमण्डलमेवान्तःशुषिररहित यथा कुलालचक्रस्य, इदमपि द्वेधा—धनप्रतरभेदात्, पुनरेकैकं द्विधा—समसङ्ख्यविषमसङ्ख्यप्रदेशभेदात्, एवं त्र्यस्रं चतुरं च, नवरस्रं 'त्र्यस्रं' त्रिकोणं शृ ङ्गाटकस्येव चतुरं तु चतुष्कोणं यथा कुम्भिकायाः, आयतदीर्घ यथा दण्डस्य, तच्च त्रेधा—श्रेण्यायतप्रतरायतघनायतभेदात्, पुनरेकैकं द्विधा—समसङ्ख्य-विषमसङ्ख्यप्रदेशभेदात्, इदं च पञ्चविधमपि विश्रसाप्रयोगाभ्यां भवति।

जीवसंस्थानं तु संस्थानाभिधाननामकर्मोत्तरप्रकृत्युदयसम्पाद्यो जीवानामाकारः, तच्च षोढा, तत्राद्यं 'समचउरंसे'त्ति तुल्यारोहपरिणाहं सम्पूर्णाङ्गावयवं स्वाङ्गुलाष्टशतोच्छ्रयं समचतुरस्रं, तुल्यारोहपरिणाहत्वेन समत्वात् पूर्णावयवत्वेन च चतुरत्वात्तस्य, चतुरं सङ्गतमिति पर्यायौ, 'एवं परिमंडलेवि'त्ति यथा समचतुरस्रमुक्तं तथा न्यग्रोधपरिमण्डलमपीत्यर्थः, न्यग्रोधो—वटवृक्षस्त-द्वत्परिमण्डलं नाभीत उपरि चतुरस्रलक्षणयुक्तमधश्च तदनुरूपं न भवति—तस्मात्प्रमाणा-द्धीनतरमिति, 'एवं जाव हुंडे'त्ति इह यावत्करणात् 'साई खुज्जे वामणे'त्ति दृश्यं तत्र 'साइ'त्ति सादि नाभीतोऽ- धश्चतुरलक्षणयुक्तमुपरि च तदनुरूपं न भवति, 'खुज्जौ'त्ति कुजं ग्रीवादौ हस्तपादयोश्चतुर- श्रलक्षणयुक्तं सङ्क्षिप्तविकृतमध्यं, 'वामणे'त्ति वामनं लक्षणयुक्तमध्यं ग्रीवादौ हस्तपादयोरप्या- दिलक्षणन्यूनं, 'हुंडे'त्ति हुण्डं प्रायः सर्वावयवेष्वादिलक्षणविसंवादोपेतमिति।

अनन्तरं संस्थानवक्तव्यतोक्ता, अथ संस्थानवतोऽनगारस्य वक्तव्यताविशेष-मभिधातुकाम आह—

**मू. (६२१)** *भत्तपच्चक्खायए णं भंते! अनगारे मुच्छिए जाव अज्झोववन्ने आहारमाहारेति अहे णं वीससाए कालं करेति तओ पच्छा अमुच्छिए अगिद्धे जाव अणज्झोववन्ने आहारमा-हारेति?, हंता गोयमा! भत्तपच्चक्खायए णं अनगारे तं चेव।*

*से केणट्ठेणं भंते! एवं वु० भत्तपच्चक्खायए णं तं चेव?, गोयमा! भत्तपच्चक्खायए णं अनगारे मुच्छिए जाव अज्झोववन्ने भवइ अहे णं वीससाए कालं करेइ तओ पच्छा अमुच्छिए जाव आहारे भवइ से तेणट्ठेणं गोयमा! जाव आहारमाहारेति॥*

**वृ.** 'भत्ते'त्यादि, तत्र 'भत्तपच्चक्खये णं'ति अनशनी 'मूर्च्छितः' सञ्जातमूर्च्छाः—जाताहारसंरक्षणानुबन्धः तद्दोषविषये वा मूढः 'मूर्च्छा मोहसमुच्छ्राययोः' इति वचनात्, यावत्क-रणादिदं दृश्यं—'गढिए' ग्रथित आहारविषयस्नेहतन्तुभि संदर्भितः ग्रन्थ श्रन्थ संदर्भे इति वचनात् 'गिद्धे' गृद्धः प्राप्ताहारे आसक्तोऽतृप्तत्वेन वातदाकाङ्क्षावान् 'गृध अभिकाङ्क्षायाम' इति वचनात् 'अज्झोववन्ने'त्ति अद्युपपन्नः—अप्राप्ताहार चिन्तामाधिक्येनोपपन्नः।

'आहारं' वायुतैलाभ्यङ्गादिकमोदनादिकं वाऽभ्यवहार्य तीव्रक्षुद्वेदनीयकर्मोदयादसमाधौ सति तदुपशमनाय प्रयुक्तम् 'आहारयति' उपभुङ्क्ते 'अहे णं'ति 'अथ' आहारानन्तरं 'विश्रसया' स्वभावत एव 'कालं'ति कालो—मरणं काल इव कालो मारणान्तिकसमुद्घातस्तं 'करोति' याति 'तओ पच्छ'त्ति ततो—मारणान्तिकसमुद्घातात् पश्चात् तस्मान्निवृत्त इत्यर्थः

अमूर्च्छितादिविशेषणविशेषित आहारमाहारयति प्रशान्तपरिणामसद्भावादिति प्रश्नः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोत्तरं–हंता गोयमा !' इत्यादि, अनेन तु प्रश्नार्थः एवाभ्युपगतः, कस्यापि भक्तप्रत्याख्यातुरेवंभूतभावस्य सद्भावादिति। अनन्तरं भक्तप्रत्याख्यातुरनगारस्य वक्तव्यतोक्ता, स च कश्चिदनुत्तरसुरेषूत्पद्यत इति तद्वक्तव्यतामाह–

**मू. (६२२)** *अत्थि णं भंते ! लवसत्तमा देवा ल० २ ?, हंता अत्थि, से केणट्ठेणं भन्ते ! एवं वुच्चइ लवसत्तमा देवा ल० २ ?*

*गोयमा ! जे जहानामए–केइ पुरिसे तरुणे जाव निउणसिप्पोवगए सालीण वा वीहीण वा गोधूमाण वा जवाण वा जवजवाण वा पक्काणं परियाताणं हरियाणं हरियकंडाणं तिक्खेणं नवपज्जणएणं असिअएणं पडिसाहरिया प० २ पडिसंखिविया २ जाव इणामेव २ त्तिकट्टु सत्तलवए लुएज्ञा ! जति णं गोयमा ! तेसिं देवाणं एवतिलं कालं आउए पहुप्पते तो णं ते देवा तेणं चेव भवग्गहणेणं सिज्झंता जाव अंतं करेंता, से तेणट्ठेणं जाव लवसत्तमा देवा लव सत्तमा देवा*

**वृ.** 'अत्थि ण'मित्यादि, लवाः–शाल्यादिकवलिकालवनक्रयाप्रमिताः कालविभागाः सप्त–सप्तसङ्ख्या मानं–प्रमाणं यस्य कालस्यासौ लवसप्तमस्तं लवसप्तमं कालं यावदायुष्यप्रभवति सति ये शुभाध्यवसायवृत्तयः सन्तः सिद्धिं न गता अपि तु देवेषूत्पन्नास्ते लवसप्तमाः, ते च सर्वार्थःसिद्धाभिधानानुत्तसुरविमाननिवासिनः, 'से जहा नामए' त्ति 'सः' कश्चित् 'यथानामकः' अनिर्दिष्टनामा पुरुषः 'तरुणे' इत्यादेर्व्याख्यानं प्रागिव 'पक्काणं' ति पक्वां 'परियायाणं' ति 'पर्यवगतानां' लवनीयावस्थां प्राप्तानां 'हरियाणं' ति पिङ्गिभूतानां, ते च पत्रापेक्षयाऽपि भवन्तीत्याह–

'हरियकंडाणं' ति पिङ्गीभूतजालानां 'नवपज्जणपएणं' ति नवं–प्रत्यग्रं 'पज्जणयं' ति प्रतापितस्यायोघनकुट्टनेन तीक्ष्णीकृतस्य पायनं–जलनिबोलनं यस्य तन्नवपायनं तेन 'असियएणं' ति दात्रेण 'पडिसाहरिय' त्ति प्रतिसंहृत्य विकीर्णनालान् बाहुना संगृह्य 'पडिसंखि-विय' त्ति मुष्टिग्रहणेन सङ्क्षिप्य 'जाव इणामेवे' त्यादि प्रज्ञापकस्य लवनक्रियाशीघ्रत्वोप- दर्शनपरचप्पुटिकादिहस्त-व्यापारसूचकं वचनं 'सत्तलवे' त्ति लूयन्त इति लवाः शाल्यादिना-लमुष्टयस्तान् लवान् 'लूएज्ज' त्ति लुनीयात्, तत्र च सप्तलवलवने यावान्कालो भवतीति वाक्यशेषो दृश्यः, ततः किमित्याह–'जइ ण' मित्यादि, 'तेसिं देवाणं' ति द्रव्यदेवत्वे साध्ववस्थायामित्यर्थः 'तेणं चेव' त्ति यस्य भवग्रहणस्य सम्बन्धि आयुर्न पूर्णं तेनैव, मनुष्यभवग्रहणेनेत्यर्थः।

**मू. (६२३)** *अत्थि णं भंते ! अनुत्तरोववाइया देवा अ० २ ?, हंता अत्थि, से केणट्ठेणं भंते ! एवं वुच्चइ अ० २ ? गोयमा ! अनुत्तरोववाइयाणं देवाणं अनुत्तरा सद्दा जाव अनुत्तरा फासा, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जाव अणुत्तरोववाइया देवा अ० २।*

*अनुत्तरोववाइया णं भंते ! देवा णं केवतिएणं कम्मावसेसेणं अनुत्तरोववाइयदेवत्ताए उववन्ना ?, गोयमा ! जावतियं छट्ठभत्तिए समणे निग्गंथे कम्मं निज्जरेति एवतिएणं कम्मावसेसेणं अनुत्तरोववाइयदेवत्ताए उववन्ना ?, गोयमा ! जावतियं छट्ठभत्तिए समणे निग्गंथे कम्मं निज्जरेति एवतिएणं कम्मावसेसेणं अनुत्तरोववाइया देवा देवत्ताए उववन्ना। सेवं भंते ! २ त्ति।०*

**वृ.** लवसप्तमा अनुत्तरोपपातिका इत्यनुत्तरोपपातिकदेवप्ररूपणाय सूत्रद्वयमभिधातुमाह–'अत्थि ण' मित्यादि, 'अनुत्तरोववाइय' त्ति अनुत्तरः–सर्वप्रधानोऽनुत्तरशब्दादिविषययोगात् उपपातो–जन्म अनुत्तरोपपातः सोऽस्ति येषां तेऽनुत्तरोपपातिकाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जावइयं छट्ठभत्तिए'इत्यादि किल षष्ठभक्तिकः सुसाधुर्यावत् कर्म क्षपयति एतावता कर्म्मविशेषेण–अनिर्जीर्णेनानुत्तरोपपातिका देवा उत्पन्ना इति ॥

शतकं–१४ उद्देशकः–७ समाप्तः

## –: शतंक–१४ उद्देशकः–८ :–

**वृ.** सप्तमे तुल्यतारूपो वस्तुनो धर्मोऽभिहितः, अष्टमे त्वन्तररूपः स एवाभिधीयते इत्येवंसम्बधस्यास्येदमादिसूत्रम्–

**मू. (६२४)** *इमीसे णं भंते ! रयणप्पभाए पुढवीए सक्करप्पभाए य पुढवीए केवतियं अबाहाए अंतरे पन्नत्ते ?, गोयमा ! असंखेज्जाइं जोयणसहस्साइं अबाहाए अंतरे पन्नत्ते ।*

*सक्करप्पभाए णं भंते ! पुढवीए वालुयप्पभाए य पुढवीए केवतियं एवं चेव एवं जाव तमाए अहेसत्तमाए य । अहेसत्तमाए णं भंते ! पुढवीए अलोगस्स य केवतियं आबाहाए अंतरे पन्नत्ते ?, गोयमा ! असंखेज्जाइं जोयणसहस्साइं आबाहाए अंतरे पन्नत्ते ।*

*इमीसे णं भंते ! रयणप्पभाए पुढवीए जोतिसस्स य केवतियं पुच्छा, गोयमा सत्तनउए जोयणसए आबाहाए अंतरे पन्नत्ते,*

*जोतिसस्स णं भंते ! सोहम्मीसाणाण य कप्पाणं केवतियं पुच्छा, गोयमा ! असंखेज्जाइं जोयण जाव अंतरे पन्नत्ते ।*

*सोहम्मीसाणाणं भंते ! सणंकुमारमाहिंदाण य केवतियं एवं चेव, सणंकुमारमाहिंदाणं भंते ! बंभलोगस्स कप्पस्स य केवतियं एवं चेव, बंभलोगस्स णं भंते ! लंतगस्स य कप्पस्स केवतियं एवं चेव । लंतयस्स णं भंते ! महासुक्कस्स य कप्पस्स केवतियं एवं चेव, एवं महासुक्कस्स कप्पस्स सहस्सारस्स य, एवं सहस्सारस्स आणयपाणयकप्पाणं, एवं आणयपाणयाण य कप्पाणं आरणच्चुयाण य कप्पाणं । एवं आरणच्चुयाणं गेविज्जविमाणाण य,*

*एवं गेविज्जविमाणाणं अनुत्तरविमाणाण य । अनुत्तरविमाणाणं भंते ! ईसिंपब्भाराए य पुढवीए केवतिए पुच्छा । गोयमा ! दुवालसजोयणे अबाहाए अंतरे पण्णत्ते, ईसिंपब्भाराए णं भंते ! पुढवीए अलोगस्स य केवतिए अबाहाए पुच्छा, गोयमा ! देसूणं जोयणं अबाहाए अंतरे पण्णत्ते ॥*

**वृ.** 'इमीसे ण'मित्यादि, 'अवाहाए अंतरे'त्ति बाधा–परस्परसंश्लेषतः पीडनं न बाधाअबाधा तया अबाधया यदन्तरं व्यवधानमित्यर्थः, इहान्तरशब्दो मध्यविशेषादिष्वर्थेषु वर्त्तमानो दृष्टस्ततस्तद्व्यवच्छेदेन व्यवधानार्थःपरिग्रहार्थःमबाधाग्रहणं ।

'असंखेज्जाइं जोयणसहस्साइं'ति इह योजनं प्रायः प्रमाणाङ्गुलनिष्पन्नं ग्राह्यं, "नगपुढविविमाणाइं मिणसु पमाणंगुलेणं तु ।" इत्यत्र नगादिग्रहणस्योपलक्षणत्वादन्यताऽऽदित्यप्रकाशादेरपि प्रमाणयोजनाप्रमेयता स्यात्, तथा चाधोलोकग्रामेषु तत्प्रकाशाप्राप्ति प्राप्नोत्यात्माङ्गुलस्यानियतत्वेनाव्यवहाराङ्गतया रविप्रकाशस्योच्छ्रययोजनप्रमेयत्वात्, तस्य चातिलघुत्वेन प्रमाणयोजनप्रमितक्षेत्राणामव्याप्तिरिति, यच्चेहेषत्प्राग्भारायाः पृथिव्या लोकान्तस्य चान्तरं तदुच्छ्रयाङ्गुलनिष्पन्नयोजनप्रमेयमित्यनुमीयते, यतस्तस्य योजनस्योपरितनक्रोशस्य षड्भागे सिद्धावगाहना धनुस्त्रिभागयुक्तत्रयस्त्रिंशदधिकधनुःशतत्रयमानाभिहिता ।

सा चोच्छ्रययोजनाश्रयणत एव युज्यत इति, उक्तञ्च–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥१॥ "ईसीपब्भाराए उवरिं खलु जोयणस्स जो कोसो।
कोसस्स य छब्भाए सिद्धाणोगाहणा भणिया ॥" इति।

'देसूणं जोयणं' ति इह सिद्धयलोकयोर्देशोनं योजनमन्तरमुक्तं आवश्यके तु योजनमेव, तत्र च किञ्चिन्न्यूनताया अविवक्षणान्न विरोधो मन्तव्य इति। अनन्तरं पृथिव्याद्यन्तरमुक्तं तच्च जीवानां गम्यमिति जीवविशेषगतिमाश्रित्येदं सूत्रत्रयमाह-

**मू. (६२५)** *एस णं भंते! सालरुक्खे उण्हाभिहए तण्हाभिहए दवग्गिजालाभिहए कालमासे कालं किच्चा कहिं गच्छिहिति कहिं उववज्जिहिति?, गोयमा! इहेव रायगिहे नगरे सालरुक्खत्ताए पच्चायाहिति, से णं तत्थ अच्चियवंदियपूइयसक्कारियसम्माणिए दिव्वे सच्चे सच्चोवाए सन्निहियपाडहेरे लाउल्लोइयमहिए यावि भविस्सइ, से णं भंते! तओहिंतो अनंतरं उव्वट्टित्ता कहिं गमिहिति कहिं उववज्जिहिति?, गोयमा! महाविदेहे वासे सिज्झिहितिजाव अंतं काहिति।*

*एस भंते! साललट्ठिया उण्हाभिहया तण्णाभिहया दवग्गिजालाभिहया कालभासे कालं किच्चा जाव कहिं उववज्जिहिति?, गोयमा! इहेव जंबूद्दीवे २ भारहे वासे विज्झिगिरिपायमूले महेसरिए नगरीए सामलिरुक्खत्ताए पच्चायाहिति, सा णं तत्थ अच्चियवंदियपूइय जाव लाउल्लोइय-महिए यावि भविस्सइ, से णं भंते! तओहिंतो अनंतरं उव्वट्टित्ता सेसं जहा सालरुक्खस्स जाव अंतं काहिति।*

*एस णं भंते! उंबरलट्ठिया उण्हाभिहया ३ कालमासे कालं किच्चा जाव कहिं उववज्जि-हिति?, गोयमा! इहेव जंबुद्दीवे २ भारहे वासे पाडलिपुत्ते नामं नगरे पाडलिरुक्खत्ताए पच्चायाहिति, से णं तत्थ अच्चियवंदिय जाव भविस्सति, से णं भंते! अनंतरं उव्वत्तित्ता सेसं तं चेव जाव अंतं काहिति॥*

**वृ.** 'एस ण'मित्यादि, 'दिव्वे'त्ति प्रधानः 'सच्चोवाए'त्ति 'सत्यावपातः' सफलसेवः, कस्मा-देवमित्यत आह-'सन्निहियपाडिहेरे'त्ति संनिहितं-विहितं प्रातिहार्यं-प्रतीहारकर्म्म सांनिध्यं देवेन यस्य स तथा। 'साललट्ठिय'त्ति शालयष्टिका, इह च यद्यपि शालवृक्षादावनेके जीवा भवन्ति तथाऽपि प्रथमजीवापेक्षं सूत्रत्रयमभिनेतव्यं १।

एवंविधप्रश्नाश्च वनस्पतीनां जीवत्वमश्रद्दधानं श्रोतामपेक्ष्य भगवता गौतमेन कृता इत्यवसेयमिति। गतिप्रक्रमादिदमाह-

**मू. (६२६)** *तेणं कालेणं तेणं समएणं अम्मडस्स परिव्वायगस्स सत्त अंतेवासीसया गिम्हकालसमयंसि एवं जहा उवावाइए जाव आराहगा।*

**मू. (६२७)** *बहुजणे णं भंते! अन्नमन्नस्स एवमाइक्खइ एवं खलु अम्मडे परिव्वायए कंपिल्लपुरे नगरे घरसए एवं जहा उववाइए अम्मडस्स वत्तव्वया जाव दड्ढप्पइण्णो अंतं काहिति*

**वृ.** 'तेण'मित्यादि, 'एवं जहा उववाइए जाव आराहग'त्ति इह यावत्करणादिदमर्थःतो लेशेन दृश्यं-ग्रीष्मकालसमये गङ्गाया उभयकूलतः काम्पिल्यपुरात् पुरिमतालपुरं संप्रस्थितानि ततस्तेषामटवीमनुप्रविष्टानां पूर्वगृहीतमुदकं परिभुज्यमानं क्षीणं ततस्ते तृष्णाभिभूता उदकदातारमलभमाना अदत्तं च तदगृह्णन्तोऽर्हन्नमस्कारपूर्वकमनशनप्रतिपत्त्या कालं कृत्वा ब्रह्मलोकं गताः परलोकस्य चाराधका इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'घरसए' इत्यत्र 'एवं जहे'त्यादिना यत्सूचितं तदर्थःतो लेशेनैवं दृश्यं—भुङ्क्ते सति चेति, एतच्च श्रुत्वा गौतम आह—कथमेतद् भदन्त !, ततो भगवानुवाच—गौतम ! सत्यमेतेद्, यतस्तस्य वैक्रियलब्धिरस्ति ततो जनविस्मापनहेतोरेवं कुरुते, ततो गौतम उवाच—प्रव्रजिष्यत्येव भगवतां समीपे ?, भगवानुवाच—चैव, केवलमयमधिगतजीवाजीवत्वादिगुणः कृतानशनो ब्रह्मलोके गमिष्यति, तश्च्युतश्च महाविदेहे दृढप्रतिज्ञाभिधानो महर्द्धिको भूत्वा सेत्स्यतीति। अयमेतच्छिष्याश्च देवतयोत्पन्ना इति देवाधिकारादेववक्तव्यतासूत्राण्युद्देशकसमाप्तिं यावत्—

**मू. (६२८)** *अत्थि णं भंते ! अव्वाबाहा देवा अव्वाबाहा देवा ?, हंता अत्थि, से केणट्ठेणं भंते ! एवं वुच्चइ अव्वाबाहा देवा २ ?, गोयमा ! पभू णं एगमेगे अव्वाबाहे देवे एगमेगस्स पुरिसस्स एगमेगंसि अच्छिपत्तंसि दिव्वं देविड्ढिं दिव्वं देवज्जुतिं दिव्वं देवजुत्तिं दिव्वं देवाणुभागं दिव्वं बत्तीसतिविहं नट्टविहिं उवदंसेत्तए।*

*नो चेव णं तस्स पुरिसस्स किंचि आबाहं वा वाबाहं वा उप्पाएइ छविच्छेय वा करेंति, एसुहुमं च णं उवदंसेज्ञा, से तेणट्ठेणं जाव अव्वाबाहा २ देवा २।*

**वृ.** तत्र च 'अव्वाबाह' त्ति व्याबाधन्ते—परं पीडयन्तीति व्याबाधास्तन्निषेधादव्याबाधाः, ते च लोकान्तिकदेवमध्यगता द्रष्टव्याः, यदाह—

॥१॥ "सारस्सयमाइच्चा वण्ही वरुणा य गद्दतोया य।
तुसिया अव्वाबाहा अग्गिच्चा चेव रिट्ठा य॥" इति।

'अच्छिपत्तंसि' अक्षिपत्रे—अक्षिपक्ष्मणि 'आबाहं व' त्ति ईषद्बाधां 'पबाहं व' त्ति प्रकृष्टबाधां 'वाबाहं' ति क्वचित् तत्र तु 'व्याबाधां' विशिष्टामाबाधां 'छविच्छेयं' ति शरीरच्छेदम् 'एसुहुमं च णं' ति 'इति सूक्ष्मम्' एवं सूक्ष्मं या भवत्येवमुपदर्शयेन्नाट्यविधिमिति प्रकृतं।

**मू. (६२९)** *पभू णं भंते ! सक्के देविंदे देवराया पुरिसस्स सीसं पाणिणा असिणा छिंदित्ता कमंडलुंमि पक्खिवित्तए ?, हंता पभू, से कहमिदाणिं पकरेति ?*

*गोयमा ! छिंदिया २ च णं पक्खिवेज्ञा भिंदिया भिंदिया च णं पक्खिवेज्ञा कोट्टिया कोट्टिया च णं पक्खिवेज्ञा चुन्निया चुन्निया च णं पक्खिवेज्ञा तओ पच्छा खिप्पामेव पडिसंघाएज्ञा नो चेव णं तस्स पुरिसस्स किंचि आबाहं वा वाबाहं वाउ प्पाएज्ञा छविच्छेदं पुण करेति, एसुहुमं च णं पक्खिज्ञा*

**वृ.** 'सपाणिण' त्ति स्वकपाणिना 'से कहमियाणिं पकरेइ' त्ति यदि शक्रःशिरसः कमण्डल्वां प्रक्षेपण प्रभुस्तत्प्रक्षेपणं कथं तदानीं करोति ?, उच्यते, 'छिंदिया छिंदिया व णं' ति छित्वा २ क्षुरप्रादिना कूष्माण्डादिकमिव श्लक्ष्णखण्डीकृत्येत्यर्थः, वाशब्दो विकल्पार्थः प्रक्षिपेत् कमण्डल्वां, 'भिंदिय' त्ति विदार्योर्ध्वपाटनेन शाटकादिकमिव, 'कुट्टिय' त्ति कुट्टयित्वा उदूखलादौ तिलादिकमिव

'चुन्निय' त्ति चूर्णयित्वा शिलायां शिलापुत्रकादिना गन्धद्रव्यादिकमिव 'ततोपच्छ' त्ति कमण्डलुप्रक्षेपणानन्तरमित्यर्थः 'परिसंघाएज्ञ' त्ति मीलयेदित्यर्थः 'एसुहुमं च णं पक्खिवेज्ञ' त्ति कमण्डल्वामिति प्रकृतं।

**मू. (६३०)** *अत्थि णं भंते ! जंभया देवा जंभया देवा ?, हंता अत्थि से केणट्ठेणं भंते ! एवं वुच्चइ जंभया देवा भंजया देवा ? गोयमा ! जंभगा णं देवा निच्चं पमुइयपक्कीलिया कंदप्परतिमोहण-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सीला जत्रं ते देवे कुद्धे पासेज्ञा से णं पुरिसे महंतं अयसं पाउणिज्ञा जे णं ते देवे तुट्ठे पासेज्ञा से णं महंतं जसं पाउणेज्ञा, से तेणट्ठेणं गोयमा ! जंभगा देवा २ ॥*

*कतिविहा णं भंते ! जंभगा देवा पन्नत्ता ?, गोयमा ! दसविहा पन्नत्ता, तंजहा–अन्नजंभगा पाणजंभगा वत्थजंभगा लेसजंभगा सयणजंभगा पुप्फजंभगा फलजंभगा पुप्फफलजंभगा विज्ञाजंभगा अवियत्तजंभगा –*

*जंभगा णं भंते ! देवा कहिं वसहिं उवेंति ?, गोयमा ! सव्वेसु चेव दीहवेयड्ढेसु चित्तविचित्तजमगपव्वएसु कंचणपव्वएसु य एत्थ णं जंभगा देवा वसहिं उवेंति । जंभगाणं भंते ! देवाणं केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! एगं पलिओवमं ठिती फन्नत्ता । सेवं भंते ! सेवं भंतेत्ति जाव विहरति ॥*

**वृ.** 'जंभग'त्ति जृम्भन्तो–विजृम्भन्ते स्वच्छन्दचारितया चेष्टन्ते ये ते जृम्भकाः–तिर्यग्लोकवासिनो व्यन्तरदेवाः, 'पमुइयपक्कलिय'त्ति प्रमुदिताश्च ते–तोषवन्तः प्रक्रीडिताश्च – प्रकृष्टक्रीडाः प्रमुदितप्रकीडिताः, 'कंदप्परइ'त्ति अत्यर्थं केलिरतिकाः 'मोहणसील'त्ति निधुवनशीलाः 'अजसं'ति उपलक्षणत्वादस्यानर्थं प्राप्नुयात् 'जसं'ति उपलक्षणत्वादस्यार्थं–वैक्रीयलब्ध्यादिकं प्राप्नुयात् वैरस्वामिवत् शापानुग्रहकरमसमर्थःत्वात् तच्छीलत्वाच्च तेषामिति

'अन्नजंभये'त्यादि अन्ने–भोजनविषये तदभावसद्भावाल्पत्वबहुत्वसरत्वनीरसत्वादिकरणतो जृम्भन्ते विजृम्भन्ते ये ते तथा, एवं पानादिष्वपि वाच्यं, नवरं 'लेणं'ति लयनं–गृहं 'पुप्फफलजंभग'त्ति उभयजृम्भकाः, एतस्य च स्थाने 'मंतजंभग'त्ति वाचनान्तरे दृश्यते ।

'अवियत्तजंभग'त्ति अव्यक्ता अन्नाद्यविभागेन जृम्भका ये ते तथा, क्वचित्तु 'अहिवइजंभग'त्ति दृश्यते तत्र चाधिपतौ–राजादिनायकविषये जृम्भका ये ते तथा, 'सव्वेसु चेव दीहवेयड्ढेसु'त्ति 'सर्व्वेषु' प्रतिक्षेत्रं तेषां भावात् सप्तत्यधिकशतसङ्ख्येषु 'दीर्घविजयार्द्धेषु' पर्वतविशेषेषु, दीर्घग्रहणं च वर्त्तुलविजयार्द्धव्यवच्छेदार्थं, 'चित्तविचित्तजमगपव्वएसु'त्ति देवकुरुषु शीतोदानद्या उभयपार्श्वतश्चित्रकूटो विचित्रकूटश्च पर्वतः, तथोत्तरकुरुषु शीताभिधाननद्या उभयतो यमकसमकाभिधानौ पर्वतौ स्तास्तेषु ।

'कंचणपव्वएसु'त्ति उत्तरकुरुषु शीतानदीसम्बन्धिनां पञ्चानां नीलवदादिह्रदानां क्रमव्यवस्थितानां प्रत्येकं पूर्वापरतटयोर्दश दश काञ्चनाभिधाना गिरयः सन्ति ते च शतं भवन्ति, एवं देवकुरुष्वपि शीतोदानद्याः सम्बन्धिनां निषदह्रदादीनां पञ्चानां महाह्रदानामिति, तदेवं द्वे शते, एवं धातकीखण्डपूर्वार्धादिष्वप्यतस्तेष्विति ॥

शतकं–१४ उद्देशकः–८ समाप्तः

## –: शतकं–१४ उद्देशकः–९ :–

**वृ.** अनन्तरोद्देशकान्त्यसूत्रेषु देवानां चित्रार्थःविषयं सामर्थ्यमुक्तं, तस्मिंश्च सत्यपि यथा तेषां स्वकर्म्मलेश्यापरिज्ञानसामर्थ्यं कथञ्चिन्नास्ति तथा साधोरपीत्याद्यर्थःनिर्णयार्थो नवमोद्देशकोऽभिधीयते, इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

**मू. (६३१)** *अनगारे णं भंते ! भावियप्पा अप्पणो कम्मलेस्सं न जाणइ न पासइ तं पुण जीवं सरूविं सकम्मलेस्सं जाणइ पासइ ?, हंता गोयमा ! अनगारे णं भाणियप्पा अप्पणो जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पासति। अत्थि णं भंते ! सरूवी सकम्मलेस्सा पोग्गला ओभासंति ४ ?, हंता अत्थि।*

*कयरे णं भंते ! सरूवी सकम्मलेस्सा पोग्गला ओभासंति जाव पभासेंति ?, गोयमा ! जाओ इमाओ चंदिमसूरियाणं देवाणं विमाणेहिंतो लेस्साओ बहिया अभिनिस्सडाओ ताओ ओभासंति पभासेंति एवं एएणं गोयमा ! ते सरूवी सकम्मलेस्सा पोग्गला ओभासेंति ४ ॥*

**वृ.** 'अनगारे ण'मित्यादि, अनगारः 'भावितात्मा' संयमभावन या वासितान्तः करणः सम्बन्धिनीं कर्म्मणो योग्या लेश्या-कृष्णादिका कर्म्मणो वा लेश्या-'लिश श्लेषणे' इति वचनात् सम्बन्धः कर्म्मलेश्या तां न जानाति विशेषतो न पश्यति च सामान्यतः, कृष्णादिलेश्यायाः कर्मद्रव्यश्लेषणस्य चातिसूक्ष्मत्वेन छद्मस्थज्ञानागोचरत्वात्, 'तं पुण जीवं'ति यो जीवः कर्म्मलेश्यावांस्तं पुनः 'जीवम्' आत्मानं 'सरूविं'ति सह रूपेण-रूपरूपवतोरभेदाच्छरीरेण वर्त्तते योऽसौ समासान्तविधेः सरूपी तं सरूपिणं सशरीरमित्यर्थः अत एव 'सकर्म्मलेश्यं' कर्म्मलेश्यया सह वर्त्तमानं जानाति शरीरस्य चक्षुर्ग्राह्यत्वाज्जीवस्य च कथञ्चिच्छरीराव्यतिरेकादिति।

'सरूविं सकम्मलेस्सं'ति प्रागुक्तम्, अथ तदेवाधिकृत्य प्रश्नयन्नाह-'अत्थि ण'मित्यादि, 'सरूविं'ति सह रूपेण-मूर्त्ततया ये ते 'सरूपिणः' वर्णादिमन्तः 'सकम्मलेस्स'त्ति पूर्ववत् 'पुद्गलाः' स्कन्धरूपाः 'ओभासंति'त्ति प्रकाशन्ते 'लेसाओ'त्त तेजांसि 'बहिया अभिनिस्सडाओ'त्ति बहिस्तादभिनिसृता-निर्ग्गताः, इह च यद्यपि चन्द्रादिविमानपुद्गला एव पृथिवीकायिकत्वेन सचेतनत्वात्सकर्म्मलेश्यास्तथाऽपि तन्निर्गतप्रकाशपुद्गलानां तद्धेतुकत्वेनोपचारात्सकर्म्मलेश्यवमवगन्तव्यमिति। पुद्गलाधिकारादिदमाह-

**मू. (६३२)** *नेरइयाणं भंते ! किं अत्ता पोग्गला अणत्ता पोग्गला ?, गोयमा ! नो अत्ता पोग्गला अणत्ता पोग्गला।*

*असुरकुमाराणं भंते ! किं अत्ता पोग्गला अणत्ता पोग्गला ?, गोयमा ! अत्ता पोग्गला नो अणत्ता पोग्गला, एवं जाव थणियकुमाराणं।*

*पुढविकाइयाणं पुच्छा, गोयमा ! अत्तावि पोग्गला अणत्तावि पोग्गला, एवं जाव मणुस्साणं, वाणमंतरजोइसियवेमाणियाणं जहा असुरकुमाराणं।*

*नेरइयाणं भंते ! किं इट्ठा पोग्गला अनिट्ठा पोग्गला ?, गोयमा ! नो इट्ठा पोग्गला अनिट्ठा पोग्गला जहा अत्ता भणिया एवं इट्ठावि कंतावि पियावि मणुन्नावि भाणियव्वा एए पंच दंडगा।*

**वृ.** 'नेरइयाण'मित्यादि, 'अत्त'त्ति आ-अभिविधिना त्रायन्ते-दुःखात् संरक्षन्ति सुखं चोत्पादयन्तीति आत्राः आप्ता वा-एकान्तहिताः, अत एव रमणीया इति वृद्धैर्व्याख्यातं, एते च ये मनोज्ञाः प्राग् व्याख्यातास्ते दृश्याः, तथा 'इट्ठे'त्यादि प्राग्वत्।

**मू. (६३३)** *' देवे णं भंते ! महड्ढिए जाव महेसक्खे रूवसहस्सं विउव्वित्ता पभू भासासहस्सं भासित्तए ?, हंता पभू, सा णं भंते ! किं एगा भासा भासासहस्सं ?, गोयमा ! एगा णं सा भासा नो खलु तं भासासहस्सं ॥*

**वृ.** पुद्गलाधिकारादेवेदमाह-'देवे म'मित्यादि, 'एगा णं सा भासा भास'त्ति एकाऽसौ भाषा, जीवैकत्वेनोपयोगैकत्वात्, एकस्य जीवस्यैकदा एक एवोपयोग इष्यते, ततश्च यदा सत्याद्यन्तरस्यां भाषायां वर्त्तते तदा नान्यस्यामित्येकैव भाषेति। पुद्गलाधिकारादेवेदमाह-

**मू. (६३४)** *तेणं कालेणं २ भगवं गोयमे अचिरुग्गयं बालसूरियं जासुमणाकुसुमपुंजप्पकासं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*लोहितगं पासइ पासित्ता जायसड्ढे जाव समुप्पन्नकोउहल्ले जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ जाव नमंसित्ता जाव एवं वयासी –*

*किमिदं भंते ! सूरिए किमिदं भते ! सूरियस्स अट्ठे ?, गोयमा ! सुभे सूरिए सुभे सूरियस्स अट्ठे । किमिदं भंते ! सूरिए किमिदं भंते ! सूरियस्स पभाए एवं चेव, एवं छाया एवं लेस्सा ।*

**वृ.** 'तेण'मित्यादि, 'अचिरोद्गतम्' उद्गतमात्रमत एव बालसूर्यं 'जासुमणाकुसुमप्पगासं'ति जासुमणा नाम वृक्षस्तत्कुसुमप्रकाशमत एव लोहितकमिति 'किमिदं'ति किंस्वरूपमिदं सूर्यवस्तु, तथा किमिदं भदन्त ! सूर्यस्य–सूर्यशब्दस्यार्थः–अन्वर्थःवस्तु ?

सुभे सूरिए'त्ति शुभस्वरूपं सूर्यवस्तु सूर्यविमानपृथिवीकायिकानामातपाभिधान-पुण्यप्रकृत्युदयवर्त्तित्वात् लोकेऽपि प्रशस्ततया प्रतीतत्वात् ज्योतिष्केन्द्रत्वाच्च, तथा शुभः सूर्यशब्दार्थःस्तथाहि–सूरेभ्यः–क्षमातपोदानसङ्ग्रामादिवीरेभ्यो हितः सूरेषु वा साधुः सूर्यः 'पभ'त्ति दीप्तिः छाया–शोभा प्रतिबिम्बं वा लेश्या–वर्णः । लेश्याप्रक्रमादिदमाह–

**मू. (६३५)** *जे इमे भंते ! अज्जत्ताए समणा निग्गंथा विहरंति एते णं कस्स तेयलेस्सं वीतीवयंति ?, गोयमा ! मासपरियाए समणे निग्गंथे वाणमंतराणं देवाणं तेयलेस्सं वीइवयंति ।*

*दुमासपरियाए समणे निग्गंथे असुरिंदवज्जियाणं भवणवासीणं देवाणं तेयलेस्सं वीयीवयंति*

*एवं एएणं अभिलावेणं तिमासपरियाए समणे नि० असुरकुमाराणं देवाणं तेय० चउम्मासपरियाए सगहनक्खत्ततारारूवाणं जोतिसियाणं देवाणं तेय० पंचमासपरिया एय सचंदिमसूरियाणं जोतिसिंदाणं जोतिसरायाणं तेय० ।*

*छम्मासपरियाए समणे सोहम्मीसाणाणं देवाणं० सत्तमासपरियाए सणंकुमारमाहिंदाणं देवाणं० अट्ठमासपरियाए बंभलोगलंतगाणं देवाणं तेय० नवमासपरियाए समणे महासुक्कसहस्साराणं देवाणं तेय० दसमासपरियाए आणयपाणयआरणच्चुयाणं देवाणं० ।*

*एक्कारसमासपरियाए गेवेज्जगाणं देवाणं० बारसमासपरियाए समणे निग्गंथे अणुत्तरोववाइयाणं देवाणं तेयलेस्सं वीयीवयंति ।*

*तेण परं सुक्के सुक्काभिजाए भवित्ता तओ पच्छा सिज्झति जाव अंतं करेति । सेवं भंते ! सेवं भंतेत्ति जाव विहरति ।*

**वृ.** 'जे इमे'इत्यादि, ये इमे प्रत्यक्षाः 'अज्जत्ताए'त्ति आर्यतया पापकर्म्मबहिर्भूतता अद्यतया वा–अधुनातनतया वर्त्तमानकालतयेत्यर्थः 'तेयलेस्सं'ति तेजोलेश्यां–सुखासिकां तेजोलेश्या हि प्रशस्तलेश्योपलक्षणं सा च सुखासिकाहेतुरिति कारणे कार्योपचारात्तेजोलेश्याशब्देन सुखासिका विवक्षितेति, 'वीइवयंति' व्यतिव्रजन्ति व्यतिक्रमन्ति ।

'असुरिंदवज्याणं'ति चमरबलवर्जितानां 'तेण परं'ति ततः संवत्सरात्परतः 'सुक्के'त्ति शुक्लो नामाभिन्नवृत्तोऽमत्सरी कृतज्ञः सदारम्भी हितानुबन्ध इति, निरतिचारचरण इत्यन्ते, 'सुक्काभिजाइ'त्ति शुक्लाभिजात्यः परमशुक्ल इत्यर्थः, अत एवोक्तम्–

"आकिञ्चन्यं मुख्यं ब्रह्मापि परं सदागमविशुद्धम् ।
सर्वं शुक्लमिदं खलु नियमात्संवत्सरादूर्द्धम् "

एतच्च श्रमणविशेषमेवाश्रित्योच्यते न पुनः सर्व एवैवंविधो भवतीति

शतकं–१४ उद्देशकः–९ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं—१४ उद्देशकः—१० :—

**वृ.** अनन्तरं शुक्ल उक्तः, स च तत्वतः केवलीति केलिप्रभृत्यर्थःप्रतिबद्धो दशम उद्देशकः, तस्य चेदमादिसूत्रम्—

**मू. (६३६)** *केवली णं भंते ! छउमत्थं जाणइ पासइ ?, हंता जाणइ पासइ, जहा णं भंते केवली छउमत्थ जाणइ पासइ तहा णं सिद्धेवि छउमत्थं जाणइ पासइ ?, हंता जाणइ पासइ ।*

*केवली णं भंते ! आहोहियं जाणइ पासइ ?, एवं चेव, एवं परमाहोहियं, एवं केवलिं एवं सिद्धं जाव जहा णं भंते ! केवली सिद्धं जाणइ पासइ तह णं सिद्धेवि सिद्धं जाणइ पासइ ?, हंता जाणइ पासइ ।*

*केवली णं भंते ! भासेज्ञ वा वागरेज्ञ वा ?, हंता भासेज्ञ वा वागरेज्ञ वा, जहा णं भंते ! केवली भासेज्ञ वा वागरेज्ञ वा तहा णं सिद्धेवि भासेज्ञ वा वागरेज्ञ वा ?, नो तिणट्ठे समट्ठे ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ जहा णं केवली णं भासेज्ञ वा वागरेज्ञ वा नो तहा णं सिद्धे भासेज्ञ वा वागरेज्ञ वा ?, गोयमा ! केवली णं सउट्ठाणे सकम्म सबले सवीरिए सपुरिसक्कारपरक्कमे, सिद्धे णं अणुट्ठाणे जाव अपुरिसक्करपरककमे, से तेणट्ठेणं जाव वागरेज्ञ वा, केवली णं भंते ! उम्मिसेज्ञ वा निमिसेज्ञ वा । हंता उम्मिसेज्ञ वा निम्मिसेज्ञ वा.एवं चेव, एवं आउट्टेज्ञ वा पसारेज्ञ वा, एवं ठाणं वा सेज्जं वा निसीहियं वा चएज्ञा,*

*केवली णं भंते ! इमं रयणप्पभं पुढविं रयणप्पभापुढवीति जाणति पासति ?, हंता जाणइ पासइ । जहा णं भंते ! केवली इमं रयणप्पभं पुढविं रयणप्पभापुढवीति जाणइ पासइ तहा णं सिद्धेवि इमं रयणप्पभं पुढविं रयणप्पभपुढवीति जाणइ पासइ ?, हंता जाणइ पासइ ।*

*केवली णं भंते ! सक्करप्पभं पुढविं सक्करपभापुढवीति जाणइ पासइ ? एवं चेव एवं जाव अहेसत्तमा ।*

*केवली णं भंते ! सोहम्मं कप्पं जाणइ पासइ ?, हंता जाणइ पासइ, एवं चेव, एवं ईसाणं एवं जाव अच्चुयं, केवली णं भंते ! गेवेज्ञविमाणे गेवेज्ञविमाणेत्ति जाणइ पासइ ?, एवं चेव, एवं अनुत्तरविमाणेवि, केवली ईसिपब्भारं पुढविं ईसीपब्भारपुढवीति जाणइ पासइ ?, एवं चेव ।*

*केवली णं भंते ! परमाणुपोग्गलं परमाणुपोग्गलेत्ति जाणइ पासइ ?, एवं चेव, एवं दुपएसियं खंधं एवं जाव जहा णं भंते ! केवली अनंतपएसियं खंधं अनंतपएसिए खंधेत्ति जाणइ पासइ तहा णं सिद्धेवि अनंतपएसियं जाव पासइ ?, हंता जाणइ पासइ । सेवं भंते ! सेवं भंते ! त्ति ॥*

**वृ.** 'केवली'त्यादि, इह केवलिशब्देन भवस्थकेवली गृह्यते उत्तरत्र सिद्धग्रहणादिति, 'आहोहियं'ति प्रतिनियतक्षेत्रावधिज्ञानं 'परमाहोहियं'ति परमावधिकं 'भासेज्ञव'त्ति भाषेतापृष्ट एव 'वागरेज्ञ'त्ति प्रष्टः सन् व्याकुर्यादिति 'ठाणं'ति ऊर्ध्वस्थानं निषदनस्थानं त्वग्वर्त्तनस्थनं चेति 'सेज्जं'ति शय्यां—वसतिं 'निसीहियं'ति अल्पतरकालिकां वसतिं 'चएज्ञ'त्ति कुर्यादिति ॥

शतकं—१४ उद्देशकः—१० समाप्तः

## —: शतकं—१४ समाप्तम् :—

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे चतुर्दशशतकस्य अभयदेवसूरि विरचिता टीका परिसमाप्ता ।**

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## शतकं-१५

वृ. व्याख्यातं चतुर्दशशतम्, अथ पञ्चदशमारभ्यते, तस्य चायं पूर्वेण सहाभिसम्बन्धः- अनन्तरशते केवली रत्नप्रभादिकं वस्तु जानातीत्युक्तं तत्परिज्ञानं चात्मसम्बन्धि यथा भगवता श्रीमन्महावीरेण गौतमायाविर्भावितं गोशालकस्य स्वशिष्याभासस्य नरकादिगतिमधिकृत्य तथाऽनेनोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

*मू. (६३७) नमो सुयदेवयाए भगवईए।*

*तेणं कालेणं २ सावत्थी नामं नगरी होत्था वन्नओ, तीसे णं सावत्थीए नगरीए बहिया उत्तरपुरच्छिमे दिसीभाए तत्थ णं कोट्ठए नामं चेइए होत्था वन्नओ।*

*तत्थ णं सावत्थीए नगरीए हालाहला नामं कुंभकारी आजीविओवासिया परिवसति अड्ढा जाव अपरिभूया आजीवियसमयंसि लद्धट्ठा गहियट्ठा पुच्छियट्ठा विणिच्छियट्ठा अट्ठिमिंज-पेम्माणुरागरत्ता अयमाउसो! आजीवियसमये अट्ठे अयं परमट्ठे सेसे अणट्ठेत्ति आजीवियसमएणं अप्पाणं भावेमाणी विहरइ।*

*तेणं कालेणं २ गोसाले मंखलिपुत्ते चउव्वीसवासपरियाए हालाहलाए कुंभकारीए कुंभकारावणंसि आजीवियसंघसंपरिवुडे आजीवियसमएणं अप्पाणं भावेमाणे विहरइ।*

*तए णं तस्स गोसा० मंखलिपु० अन्नदा कदायि इमे छ दिसाचरा अंतियं पाउब्भवित्था, तंजहा-साणे कलंदे कणियारे अच्छिद्दे अग्गिवेसायणे अज्जुन्ने गोमायुपुत्ते, तए णं ते छ दिसाचरा अट्ठविहं पुव्वगयं मग्गदसमं सतेहिं २ मतिदंसणेहिं निज्जुहंति स० २ गोसालं मंखलिपुत्तं उवट्ठाइंसु*

*तए णं से गोसाले मंखलिपुत्ते तेणं अट्ठंगस्स महानिमित्तस्स केणइ उल्लोयमेत्तेणं सव्वेसिं पाणाणं भू० जी० सत्ताणं इमाइं छ अणइक्कमणिज्जाइं वागरणाइं वागरेति, तं०-लाभं अलाभं सुहं दुक्खं जीवियं मरणं तहा।*

*तए णं से गोसाले मंखलिपुत्ते तेणं अट्ठंगस्स महानिमित्तस्स केणइ उल्लोयमेत्तेणं सावत्थीए नगरीए अजिणे जिणप्पलावी अणरहा अरहप्पलावी अकेवली केवलिप्पलावी असवन्नू सव्वन्नुप्पलावी अजिणे जिणसद्दं पगासेमाणे विहरइ॥*

वृ. 'तेण'मित्यादि, मंखलिपुत्ते'त्ति मङ्खल्यभिधानमङ्खस्य पुत्रः 'चउवीसवासपरियाए'त्ति चतुर्विंशतिवर्षप्रमाणप्रव्रज्यापर्यायः 'दिसाचर'त्ति दिशं-मेरां चरन्ति-यान्ति मन्यन्ते भगवतो वयं शिष्या इति दिक्चराः देशाटा वा, दिक्चरा भगवच्छिष्याः पार्श्वस्थीभूता इति टीकाकारः 'पासावच्चिज्ज'त्ति चूर्णिकारः 'अंतियं पाउब्भविज्ज'त्ति समीपमागताः।

'अट्ठविहं पुव्वगयं मग्गदसमं'ति अष्टविधम्-अष्टप्रकारं निमित्तमिति शेषः, तच्चेदं-दिव्यं १ औत्पातं २ आन्तरिक्षं ३ भौमं ४ आङ्गं ५ स्वरं ६ लक्षणं ७ व्यञ्जनं ८ चेति, पूर्वगतं-पूर्वाभिधानश्रुतविशेषमध्यगतं।

तथा मार्गौ-गीतमार्गनृत्यमार्गलक्षण सम्भाव्येते 'दसम'त्ति अत्र नवमशब्दस्य लुप्तस्य दर्शनान्नवमदशमाविति दृश्यं, ततश्च मार्गौ नवमदशमौ यत्र तत्तथा, 'सएहिं' २ ति स्वकैः २



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वकीयैः २ 'मइदंसमेहिं' ति मतेः बुद्धेर्मत्या वा दर्शनानि—प्रमेयस्य परिच्छेदनानि मतिदर्शनानि तैः 'निज्जूहंति' त्ति निर्यूथयन्तन पूर्वलक्षणश्रुतपर्याययूथान्निर्धारयन्ति उद्धरन्तीत्यर्थः 'उवड्डाइंसु' त्ति उपस्थितवन्तः आश्रितन्त इत्यर्थः, 'अड्डगस्स' त्ति अष्टभेदस्य 'केणइ' त्ति केनचित्—तथाविधज-नाविदितस्वरूपेण 'उल्लोयमेत्तेणं' ति उद्देशमात्रेण ।

'इमाइं छ अणइक्कमणिज्जाइं' ति इमानि षड् अनतिक्रमणीयानि—व्यभिचारयितुमशक्यानि 'वागरणाइं' ति पृष्टेन सता यानि व्याक्रियन्ते—अभिधीयन्ते तानि व्याकरणानि पुरुषार्थोपयोगि-त्वाच्चैतानि षडुक्तानि, अन्यथा नष्टमुष्टिचिन्तालूकाप्रभृतीन्यन्यान्यपि बहूनि निमित्तगोचरीभवन्तीति

'अजिणे जिणप्पलावि' त्ति अजीनः—अवीतरागः सन् जिनमात्मानं प्रकर्षेण लपतीत्येवंशीलो जिनप्रलापी, एवमन्यान्यपि पदानि वाच्यानि, नवरम् अर्हन्—पूजार्हः केवली—परिपूर्णज्ञानादि, किमुक्तं भवति ? – 'अजिणे' इत्यादि ।

**मू. (६३८)** *तए णं सावत्थीए नगरीए सिंघाडगजाव पहेसु बहुजणो अन्नमन्नस्स एवमाइक्खइ जाव एवं परूवेति एवं खलु देवाणुप्पिया ! गोसाले मंखलिपुत्ते जिणे जिणप्पलावी जाव पकासेमाणे विहरति, से कहमेयं मन्ने एवं ?, तेणं कालेणं २ सामी समोसढे जाव परिसा पडिगया ।*

*तेणं कालेणं २ समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूतीनामं अनगारे गोयमगोत्तेणं जाव छट्ठंछट्ठेणं एवं जहा बितियसए नियंठुद्देसए जाव अडमाणे बहुजणसद्दं निसामेति, बहुजणो अन्नमन्नस्स एवमाइक्खइ ४—एवं खलु देवाणुप्पिया ! गोसाले मंखलिपुत्ते जिणे जिणप्पलावी जाव पगासेमाणे विहरति, से कहमेयं मन्ने एवं ?*

*तए णं भगवं गोयमे बहुजणस्स अंतियं एयमट्ठं सोच्चा निसम्म जाव जायसड्ढे जाव भत्तपाणं पडिदंसेति जाव पज्जुवासमाणे एवं व०—एवं खलु अहं भंते ! तं चेव जाव जिणसद्दं पगासेमाणे विहरति से कहमेयं भंते ! एवं ?, तं इच्छामि णं भंते ! गोसालस्स मंखलिपुत्तस्स उट्ठाणपरियाणियं परिकहियं, गोयमादी समणे भगवं महावीरे भगवं गोयमं एवं वयासी– 'जण्णं'*

*से बहुजणे अन्नमन्नस्स एवमाइक्खइ ४—एवं खलु गोसाले मंखलिपुत्ते जिणे जिणप्पलावी जाव पगासेमाणे विहरइ तण्णं मिच्छा, अहं पुण गोयमा ! एवमाइक्खामि जाव परुवेमि ।*

*एवं खलु एयस्स गोसालस्स मंखलिपुत्तस्स मंखलिनामं मंखे पिता होत्था, तस्स णं मंखलिस्स मंखस्स भद्दानां भारिया होत्था सुकुमाल जाव पडिरूवा, तए णं सा भद्दा भारिया अन्नदा कदायि गुव्विणी यावि होत्था, तेणं कालेणं २ सरवणे नामं सन्निवेसे होत्था रिद्धत्थिमिए जाव सन्निभप्पगासे पासादीए ४, तत्थ णं सरवणे सन्निवेसे गोबहुले नामं माहणे परिवसति अड्ढे जाव अपरिभूए रिउवेद जाव सुपरिनिट्ठिए यावि होत्था, तस्स णं गोबहुलस्स माहणस्स गोसाला यावि होत्था ।*

*तए णं से मंखलीमंखे नामं अन्नया कयाइ भद्दाए भारियाए गुव्विणीए सद्धिं चित्तफल-गहत्थगए मंखत्तणेणं अप्पाणं भावेमाणे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव सरवणे सन्निवेसे जेणेव गोबहुलस्स माहमस्स गोसाला तेणेव उवा० २ गोबहुलस्स माहणस्स गोसालाए एगदेसंसि भंडनिक्खेवं करेति भंड० २ सरवणे सन्निवेसे उच्चनीयमज्झिमाइं कुलाइं घरसमुदाणस्स भिक्खायरियाए अडमाणे वसहीए सव्वओ समंता मग्गणगवेसणं करेति वसहीए सव्वओ समंता मग्गणवेसणं करेमाणे अन्नत्थ वसहिं अलभमाणे तस्सेव गोबहुलस्स माणहस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोसालाए एगदेसंसि वासावासं उवागए।

तए णं सा भद्दा भारिया नवण्हं मासाणं बहुपडिपुन्नाणं अद्धट्ठमाण राइंदियाणं वीतिक्कंताणं सुसुमालजाव पडिरूवगं दारगं पयाया, तए णं तस्स दारगस्स अम्मापियरे एक्कारसमे दिवसे वीतिक्कंते जाव बारहसाहे दिवसे अयमेयारूवं गुण्णं गुणनिप्फन्नं नामधेज्जं० क०-जम्हा णं अम्हं इमे दारए गोबहुलस्स माहणस्स गोसालाए जाए तं होउ णं अम्हं इमस्स दारगस्स नामधेज्जं गोसाले गोसालेत्ति।

तए णं तस्स दारगस्स अम्मापियरो नामधेज्जं करेंति गोसालेति, तए णं से गोसाले दारए उम्मुक्कबाल भावे विण्णायपरिणयमेत्ते जोव्वणगमणुप्पत्ते सयमेव पाडिएक्कं चित्तफलगं करेति सयमेव चित्तफलगहत्थगए मंखत्तणेणं अप्पाणं भावेमाणे विहरति ॥

**वृ.** 'एवं जहा बितियसए नियंठुद्देसए' त्ति द्वितीयशतस्य पञ्चमोद्देशके 'उट्ठाणपरियाणियं' ति परियानं-विविधव्यतिकरपरिगमनं तदेव पारियानिकं-चरितम् उत्थानात्-जन्मन आरभ्य पारियानिकं उत्थानपारियानिकं तत्परिकथितं भगवद्भिरिति गम्यते।

'मंखे' त्ति मङ्खः-चित्रफलकव्यग्रकरो भिक्षाकविशेषः 'सुकुमाल' इह यावत्करणादेवं दृश्यं-'सुकुमालपाणिपाए लक्खणवंजणगुणोववेए' इत्यादि।

'रिद्धत्थिमिय' इह यावत्करणादेवं दृश्यम्-'ऋद्धत्थिमियसमिद्धे पमुइयजणजाणवए' इत्यादि व्याख्या तु पूर्ववत्, 'चित्तफलगहत्थगए' त्ति चित्रफलकं हस्ते गतं यस्य स तथा, 'पाडिएक्क' ति एकमात्मानं प्रति प्रत्येकं पितुः फलकाद्भिन्नमित्यर्थः।

**मू. (६३९)** तेणं कालेणं २ अहं गोयमा! तीसं वासाइं आगारवासमज्झे वसित्ता अम्मापिईहिं देवत्तगएहिं एवं जहा भावणाए जाव एगं देवदूसमादाय मुंडे भवित्ता आगाराओ अनगारियं पव्वइत्तए।

तए णं अहं गोयमा! पढमं वासावासं अद्धमासंअद्धमासेणं खममामे अट्ठियगामं निस्साए पढमं अंतरावासं वासावासं उवागए, दोच्चं वासं मासंमासेणं खममाणे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे जेणेव रायगिहे नगरे जेणेव नालिंदा बाहिरिया जेणेव तंतुवायसाला तेणेव उवागच्छामि ते० २ अहापडिरूवं उग्गहं ओगिण्हामि अहा० २ तंतुवायसालाए एगदेसंसि वासावासं उवागए, तए णं अहं गोयमा! पढमं मासखमणं उवसंपज्जित्ताणं विहरामि।

तए णं से गोसाले मंखलिपुत्ते चित्तफलगहत्थगए मंखत्तणेणं अप्पाणं भावेमाणे पुव्वाणुपुव्विं चरमाणे जाव दूइज्जमाणे जेणेव रायगिहे नगरे जेणेव नालिंदा बाहिया जेणेव तंतुवायसाला तेणेव उवागच्छइ ते० २ तंतुवायसालाए एगदेसंसि भंडनिक्खेवं करेति भं० २ रायगिहे नगरे उच्चनीय जाव अन्नत्थ कत्थवि वसहिं अलभमाणे तीसे य तंतुवायसालाए एगदेसंसि वासावासं उवागए जत्थेव णं अहं गोयमा!, पढममासक्खमणपारणगंसि तंतुवायसालाओ पडिनिक्खमामि तंतु० २ नालंदाबाहिरियं मज्झंमज्झेणं जेणेव रायगिहे नगरे तेणेव उवा० २ रायगिहे नगरे उच्चनीय जाव अडमाणे विजयस्स गाहावइस्स गिहं अणुपविट्ठे।

तए णं से विजए गाहावती ममं एज्जमाणं पासति २ हट्ठतुट्ठ० खिप्पामेव आसणाओ अब्भुट्ठेइ खि० २ पायपीढाओ पच्चोरुहइ २ ममं तिक्खुत्तो आयाहिणपयाणं करेति २ ममं वंदति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमंसति २ ममं विउलेणं असणपाणखाइसाइमेणं पडिलाभेस्सामित्तिकट्टु तुट्ठे पडिलाभेमाणेवि तुट्ठे पडिलाभितेवि तुट्ठे ।

तए णं तस्स विजयस्स गाहावइस्स तेणं दव्वसुद्धेणं दायगसुद्धेणं (तवस्सिविसुद्धेणं तिकरणसुद्धेणं पडिगाहगसुद्धेणं) तिविहेणं तिकरणसुद्धेणं दाणेणं मए पडिलाभिए समाणे देवाउए निबद्धे संसारे परित्तीकए गिहंसि य से इमाइं पंच दिव्वाइं पाउब्भूयाइं, तंजहा—वसुधारा वुट्ठा १ सदद्धवन्ने कुसुमे निवातिए २ चेलुक्खेवे कए ३ आहयाओ देवदुंदुभीओ ४ अंतरावि य णं आगासे अहो दाणे २ त्ति घुट्ठे ५ ।

तए णं रायगिहे नगरे सिंघाडगजाव पहेसु बहुजणो अन्नमन्नस्स एवमाइक्खइ जाव एवं परूवेइ—धन्ने णं देवाणुप्पिया ! विजए गाहावती कयत्थे णं देवाणुप्पिया ! विजये गाहावई कयपुन्ने णं देवाणुप्पिया ! विजए गाहावई कयलक्खणे णं देवाणुप्पिया ! विजये गाहावई कया णं लोया देवाणुप्पिया ! विजयस्स गाहावइस्स जस्स णं गिहंसि तहारवे साधु साधूरूवे पडिलाभिए समाणे इमाइं पंच दिव्वाइं पाउब्भूयाइं, तंजहा—वसुधारा वुट्ठा जाव अहो दाने २ घुट्ठे, तं धन्ने कयत्थे कयपुन्ने कयलक्खणे कया णं लोया सुलद्धे माणुस्सए जम्मजीवियफले विजयस्स गाहावइस्स विज० २ ।

तए णं से गोसाले मंखलिपुत्ते बहुजणस्स अंतिए एयमट्ठं सोच्चा निसम्म समुप्पन्नसंसए समुप्पन्नकोउहल्ले जेणेव विजयस्स गाहावइस्स गिहे तेणेव उवागच्छइ तेणेव० २ पासइ विजयस्स गाहावइस्स गिहंसि वसुहारं वुट्ठं दसद्धवन्नं कुसुमं निवडियं ममं च णं विजयस्स गाहावइस्स गिहाओ पडिनिक्खममाणं पासति २ हट्ठतुट्ठे जेणेव ममं अंतिए तेणेव उवाग० २ ममं तिक्खुत्तो आयाहिणपयाहिणं करेइ २ ममं वं० नमं० २ ममं एवं वयासी—

तुज्झे णं भंते ! ममं धम्मारिया अहन्नं तुज्झं धम्मंतेवासी तए णं अहं गोयमा ! गोसालस्स मंखलिपुत्तस्स एयमट्ठं नो आढामि नो परिजाणामि तुसिणीए संचिट्ठामि, तए णं अहं गोयमा ! रायगिहाओ नगराओ पडिनिक्खमामि प० २ नालंदं बाहिरियं मज्झंमज्झेणं जेणेव तंतुवायसाला तेणेव उवा० २ दोच्चं मासखमणं उवसंपज्जित्ताणं विहरामि ।

तए णं अहं गोयमा ! दोच्चं मासक्खमणपारणगंसि तंतुवायसालाओ पडिनिक्खमामि तं० २ नालंदं बाहिरियं मज्झंमज्झेणं जेणेव रायगिहे नगरे जाव अडमाणे आनंदस्स गाहावइस्स गिहं अणुप्पविट्ठे, तए णं से आनंदे गाहावती ममं एज्जमाणं पासति एवं जहेव विजयस्स नवरं ममं विउलाए खज्जगविहीए पडिलाभेस्सामीति तुट्ठे सेसं तं चेव जाव तच्चं मासक्खमणं उवसंपज्जित्ताणं विहरामि, तए णं अहं गोयमा ! तच्चमासक्खमणपारणगंसि तंतुवायसालाओ पडिनिक्खमाणि तं० २ तहेव जाव अडमाणे सुणंदस्स गाहावइस्स गिहं अणुपविट्ठे, तए णं से सुनंदे गाहावती एवं जहेव विजयगाहावती नवरं ममं सव्वकामगुणिएणं भोयणेणं पडिलाभेति सेसं तं चेव जाव चउत्थं मासक्खमणं उवसंपज्जित्ताणं विहरामि ।

'अविरइं पडुच्च'त्ति, अत एव संयतानां शरीरादिसद्भावेऽप्यविरतेरभावान्न साधिकरणित्वं, 'निरहिगरणि'त्ति निर्गतमधिकरणमस्मादिति निरधिकरणी समासान्तविधेः अधिकरणदूरवर्त्तीत्यर्थः, स च न भवति, अविरतेरधिकरणभूताया अदूरवर्त्तित्वादिति, अथवा सहाधिकरणिभिः–पुत्रमित्रा-दभिर्वर्त्तत इति साधिकरणी, कस्यापि जीवस्य पुत्रादीनामभावेऽपि तद्विषयविरतेरभावात्साधिकरणित्वमवसेयमत एव नो निरधिकरणीत्यपि मन्तव्यमिति।

अधिकरणाधिकारादेवेदमाह 'जीवे ण'मित्यादि, 'आयाहिगरणि'त्ति अधिकरणी कृष्यादिमान् आत्मनाऽधिकरणी आत्माधिकरणी, ननु यस्य कृष्यादि नास्ति स कथमधिकरणीति ?, अत्रोच्यते, अविरत्यपेक्षयेति, अत एवाविरतिं प्रतीत्येति वक्ष्यति, 'पराहिगरणि'त्ति परतः–परेषामधिकरणे प्रवर्त्तनेनाधिकरणी पराधिकरणी, 'तदुभयाहिगरणि'त्ति तयोः–आत्मपरयोरुभयं तदुभयं ततोऽधिकरणी यः स तथेति।

अथाधिकरणस्यैव हेतुप्ररूपणार्थमाह–'जीवाण'मित्यादि, 'आयप्पओगनिव्वततिए'त्ति आत्मनः प्रयोगेण–मनःप्रभृतिव्यापारेण निर्वर्त्तितं–निष्पादितं यत्तत्तथा, एवमन्यदपि द्वयम्।

ननु यस्य वचनादि परप्रवर्त्तनं वस्तु नास्ति तस्य कथं परप्रयोगनिर्वर्त्तितादि भविष्यतीत्याशङ्कामुपदर्श्य परिहरन्नाह–'से केण'मित्यादि, अविरत्यपेक्षया त्रिविधमप्यस्तीति भावनीयमिति अथ शरीराणामिन्द्रियाणां योगानां च निर्वर्त्तनाया जीवादेरधिकरणित्वादि प्ररूपयन्निदमाह–

**मू. (६६५)** *कइ णं भंते! सरीरगा पन्नत्ता ?, गोयमा! पंच सरीरा पण्णत्ता, तंजहा–ओरालिए जाव कम्मए। कति णं भंते! इंदिया पन्नत्ता ?, गोयम! पंच इंदिया पन्नत्ता, तंजहा–सोइंदिए जाव फासिंदिए, कतिविहे णं भंते! जोए पन्नत्ते ?, गोयमा! तिविहे जोए पन्नत्ते, तंजहा–मणजोए वइजोए कायजोए।*

*जीवे णं भंते! ओरालियसरीरं निव्वत्तेमाणे किं अधिकरणी अधिकरणं ?, गोयमा! अधिकरणीवि अधिकरणंपि, से केणट्ठेणं भंते! एवं वुच्चइ अधिकरणीवि अधिकरणंपि ?, गोयमा! अविरतिं पडुच्च, से तेणट्ठेणं जाव अधिकरणंपि, पुढविकाइए णं भंते! ओरालियसरीरं निव्वत्तेमाणे किं अधिकरणी अधिकरणं ?, एवं चेव, एवं जाव माणुस्से।*

*एवं वेउव्वियसरीरंपि, नवरं जस्स अत्थि। जीवे णं भंते! आहारगसरीरं निव्वत्तेमाणे किं अधिकरणी ? पुच्छा, गोयमा! अधिकरणीवि अधिकरणंपि, से केणट्ठेणं जाव अधिकरणंपि ?,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गोयमा! पमायं पडुच्च, से तेणट्ठेणं जाव अधिकरणंपि, एवं मणुस्सेवि, तेयासरीरं जहा ओरालियं, नवरं सव्वजीवाणं भाणियव्वं, एवं कम्मगसरीरंपि।*

*जीवे णं भंते! सोइंदियं निव्वत्तेमाणे किं अधिकरणी अधिकरणं?, एवं जहेव ओरालियसरीरं तहेव सोइंदियंपि भाणियव्वं, नवरं जस्स अत्थि सोइंदियं, एवं चक्खिदियघाणिंदियजिब्भदिय-फासिंदियाणवि, नवरं जाणियव्वं जस्स जं अत्थि।*

*जीवे णं भंते! मणजोगं निव्वत्तमाणे किं अधिकरणी अधिकरणं, एवं जहेव सोइंदियं तहेव निरवसेसं, वइजोगो एवं चेव, नवरं एगिंदियवज्जाणं, एवं कायजोगोवि, नवरं नव्वजीवाणं जाव वेमाणिए। सेवं भंते! २ त्ति॥*

**वृ.** 'कति णं भंते!'इत्यादि, 'अहिगरणीवि अहिगरणंपि'त्ति पूर्ववत् 'एवं चेव'त्ति अनेन जीवसूत्राभिलापः पृथिवीकायिकसूत्रे समस्तो वाच्य इति दर्शितम्, 'एवं वेउव्वि'इत्यादि व्यक्तं, नवरं 'जस्स अत्थि'त्ति इह तस्य जीवपदस्य वाच्यमिति शेषः।

तत्र नारकदेवानां वायोः पञ्चेन्द्रियतिर्यङ्मनुष्याणां च तदस्तीति ज्ञेयं, 'पमायं पडुच्च'त्ति इहाहारकशरीरं संयमवतामेव भवति तत्र चाविरतेरभावेऽपि प्रमादादधिकरणित्वमवसेयं, दण्डकचिन्तायां चाहारकं मनुष्यस्यैव भवतीत्यत उक्तम्–

'एवं मणुस्सेवि'त्ति, 'नवरं जस्स अत्थि सोइंदियं'ति तस्य वाच्यमिति शेषः तच्चैकेन्द्रियविकलेन्द्रियवर्जानामन्येषां स्यादिति॥

शतकं–१६ उद्देशकः–१ समाप्तः

## –: शतकं–१६ उद्देशकः–२ :–

**वृ.** प्रथमोद्देशके जीवानामधिकरणमुक्तं, द्वितीये तु तेषामेव जराशोकादिको धरम्म उच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (६६६)** *रायगिहे जाव एवं वयासी–जीवाणं भंते! किं जरा सोगे?, गोयमा! जीवाणं जरावि सोगेवि, से केणट्ठेणं भंते! एवं वु० जाव सोगेवि?, गोयमा! जे णं जीवा सारीरं वेदणं वेदेंति तेसि णं जीवाणं जरा जे णं जीवा माणसं वेदणं वेदेंति तेसि णं जीवाणं सोगे से तेणट्ठेणं जाव सोगेवि, एवं नेरइयाणवि, एवं जाव थणियकुमाराणं।*

*पुढविकाइयाणं भंते! किं जरा सोगे?, गोयमा! पुढविकाइयाणं जरा नो सोगे, से केणट्ठेणं जाव नो सोगे?, गोयमा! पुढविकाइयाणं सारीरं वेदणं वेदेंति नो मानसं वेदणं वेदेंति से तेणट्ठेणं जाव नो सोगे, एवं जाव चउरिंदियाणं, सेसाणं जहा जीवाणं जाव वेमाणियाणं, सेवं भंते! २ त्ति जाव पज्जुवासति॥*

**वृ.** 'रायगिहे'इत्यादि, 'जर'त्ति 'जॄ वयोहानौ' इति वचनात् जरणं जरा–वयोहानि शारीरदुःखरूपा चेयमतो यदन्यदपि शारीरं दुःखं तदनयोपलक्षितं, ततश्च जीवानां किं जरा भवति?, 'सोगे'त्ति शोचनं शोको–दैन्यम्, उपलक्षणत्वादेव चास्य सकलमानसदुःखपरिग्रहस्ततश्च उत शोको भवतीति।

चतुर्विंशतिदण्डके च येषां शरीरं तेषां जरा येषां तु मनोऽप्यस्ति तेषामुभयमिति॥ अनन्तरं वैमानिकानां जराशोका वुक्तौ अथ तेषामेव विशेषस्य शक्रस्य वक्तव्यतामभिधातुकाम आह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (६६७) *तेणं कालेणं २ सक्के देविंदे देवराया वज्रपाणी पुरंदरे जाव भुंजमाणे विहरइ, इमं च णं केवलकप्पं जंबुद्दीवं २ विपुलेणं ओहिणा आभोएमाणे २ पासति समणं भगवं महावीरं जंबुद्दीवे २ एवं जहा ईसाणे।*

*तइयसए तहेव सक्कोवि नवरं आभिओगे ण सद्दावेति हरी पायत्ताणियाहिवई सुघोसा घंटा पालओ विमाणकारी पालगं विमाणं उत्तरिल्ले निज्जाणमग्गे दाहिणपुरच्छिमिल्ले रतिकरपव्वए सेसं तं चेव जाव नामगं सावेत्ता पज्जुवासति धम्मकहा जाव परिसा पडिगया।*

*तए णं से सक्के देविंदे देवराया समणस्स भगवओ महावीरस्स अंतियं धम्मं सोच्चा निसम्म हट्ठतुट्ठ० समणं भगवं महावीरं वंदति नमंसति २ एवं वयासी– कतिविहे णं भंते ! उग्गहे पन्नत्ते सक्के ! पंचविहे उग्गहे पन्नत्ते, तंजहा–देविंदोग्गहे रायोग्गहे गाहावइउग्गहे सागारियउग्गहे साहम्मियउग्गहे।*

*जे इमे भंते ! अज्जत्ताए समणा निग्गंथा विहरंति एएसि णं अहं उग्गहं अणुजाणामीतिकट्टु समणं भगवं महावीरं वंदति नमंसति २ तमेव दिव्वं जाणविमाणं दुरूहति २ जामेव दिसं पाउब्भूए तामेव दिसं पडिगए। भंतेत्ति भगवं गोयमे समणं भगवं महा० वंदति न० २ एवं वयासी– जं णं भंते ! सक्के देविंदे देवराया तुज्झे णं एवं वदइ सच्चे णं एसमट्ठे ?, हंता सच्चे ॥*

**वृ.** 'तेणं कालेण' मित्यादि, 'एवं जहा ईसाणो तइयसए तहा सक्कोवि' त्ति यथेशानस्तृतीयशते प्रथमोद्देशके राजप्रश्नीयातिदेशेनाभिहितस्तथा शक्रोऽपीह वाच्यः, सर्वथा साम्यपरिहारार्थं त्वाह–'नवरमाभिओगे ण सद्दावइ' इत्यादि तत्र किलेशानो महावीरमवधिनाऽवलोक्याभियोगिकान् देवान् शब्दयामास शक्रस्तु नैवं, तथा तत्र लघुपराक्रमः पदात्यनीकाधिपतिर्नन्दिघोषाघण्टाताडनाय नियुक्त उक्तः इह तु सुघोषाघण्टाताडनाय हरिणैगमेषी नियुक्त इति वाच्यं।

तथा तत्र पुष्पको विमानकारी उक्त इह तु पालकोऽसौ वाच्य, तथा तत्र पुष्पकं विमान-मुक्तमिह तु पालकं वाच्यं, ततथा तत्र दक्षिणो निर्याणमार्ग उक्त इह तूत्तरो वाच्यः, तथा तत्र नन्दीश्वरद्वीपे उत्तरपूर्वो रतिकरपर्वत ईशानेन्द्रस्यावतारायोक्त इह तु पूर्वदक्षिणोऽसौ वाच्यः 'नामगं सावेत्त' त्ति स्वकीयं नाम श्रावयित्वा यदुताहं भदन्त ! शक्र देवराजो भवन्तं वन्दे नमस्यामि चेत्येवम्।

'उग्गहे' त्ति अवगृह्यते–स्वामिना स्वीक्रियते यः सोऽवग्रहः 'देविंदोग्गहे य' त्ति देवेन्द्रः–शक्र ईशानो वा तस्यावग्रहो–दक्षिणं लोकार्द्धमुत्तरं वेति देवेन्द्रावग्रहः 'राओग्गहे' त्ति राजा–चक्रवर्त्ती तस्यावग्रहः–षटखण्डभरतादिक्षेत्रं राजावग्रहः 'गाहावईउग्गहे' त्ति गृहपति–माण्डलिको राजा तस्यावग्रहः–स्वकीयं मण्डलमिति गृहपत्यवग्रहः 'सागारियउग्गहे' त्ति सहागारेण–गेहेन वर्त्तत इति सागारः स एव सागारिकस्तस्यावग्रहो–गृहमेवेति सागारिकावग्रहः।

'साहम्मियउग्गहे' त्ति समानेन धर्म्मेण चरन्तीति साधर्म्मिकाः साध्वपेक्षया साधव एव तेषामवग्रहः–तदाभाव्यं पञ्चक्रोशपरिमाणं क्षेत्रमृतुबद्धे मासमेकं वर्षासु चतुरो मासान् यावदिति साधर्म्मिकावग्रहः। एवमुपश्रुत्येन्द्रो यदाचख्यौ तदाह–'जे इमे' इत्यादि, 'एवं वयइ' त्ति एवं पूर्वोक्तम् 'अहं उग्गहं अणुजाणामि' इत्येवंरूपं 'वदति' अभिधत्ते सत्य एषोऽर्थ इति।

अथ भवत्वयमर्थ सत्यस्तथाऽप्ययं स्वरूपेण सम्यग्वादी उत न ? इत्याशङ्कयाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (६६८) सक्के णं भंते ! देविंदे देवराया किं सम्मावादी मिच्छावादी ?, गोयमा ! सम्मावादी नो मिच्छावादी ।। सक्के णं भंते ! देविंदे देवराया किं सच्चं भासं भासति मोसं भासं भासति सच्चामोसं भासं भासति असच्चामोसं भासं भासति ? गोयमा सच्चंपि भासं भासति जाव असच्चामोसंपि भासं भासति ।।*

*सक्के णं भंते ! देविंदे देवराया किं सावज्जं भासं भासति अणवज्जं भासं भासति ?, गोयमा सावज्जंपि भासं भासति अणवज्जंपि भासं भासति, से केणट्ठेणं भंते ! एवं वुच्चइ–सावज्जंपि जाव अणवज्जंपि भासं भासति ?, गोयमा ! जाहे णं सक्के देविंदे देवराया सुहुमकायं अणिजूहित्ताणं भासं भासति ताहे णं सक्के सावज्जं भासं भासति जाहे णं सक्के सुहुमकायं निजूहित्ता णं भासं भासति ताहे णं सक्के अणवज्जं भासं भासति, से तेणट्ठेणं जाव भासति ।*

*सक्के णं भंते ! देविंदे देवराया किं भवसिद्धीए अभवसि० सम्मदिट्ठीए एवं जहा मोउद्देसए सणंकुमारो जाव नो अचरिमे ।।*

**वृ.** 'सक्केण'मित्यादि, सम्यग् वदितुं शीलं–स्वभावो यस्य स सम्यग्वादी प्रायेणासौ सम्यगेव वदतीति । सम्यग्वादशीलत्वेऽपि प्रमादादिना किमसौ चतुर्विधां भाषां भाषते न वा ? इति प्रश्नयन्नाह– 'सक्के ण'मित्यादि, सत्याऽपि भाषा कथञ्चिद्भाष्यमाणा सावद्या संभवतीति पुनः पृच्छति– 'सक्के ण'मित्यादि, 'सावज्जं'ति सहावद्येन–गर्हितकर्म्मणेति सावद्या तां 'जाहे णं'ति यदा 'सुहुम- कायं'ति सूक्ष्मकायं हस्तादिकं वस्त्विति वृद्धाः, अन्ये त्वाहुः –

'सुहुमकायं'ति वस्त्रम् 'अनिज्जूहित्त'त 'अपोह्य' अदत्वा, हस्ताद्यावृतमुखस्य हि भाषमाणस्य जीवंरक्षणतोऽनवद्या भाषा भवति अन्या तु सावद्येति ।। शक्रमेवाधिकृत्याह–'सक्केण'मित्यादि, 'मोउद्देसए'त्ति तृतीयशते प्रथमोद्देशके ।।

*मू. (६६९) जीवाणं भंते ! किं चेयकडा कम्मा कज्जंति अचेयकडा कम्मा कज्जंति ?, गोयमा ! जीवाणं चेयकडा कम्मा कज्जंति नो अचेयकडा कम्मा कज्जंति, से केण० भंते ! एवं वुच्चइ जाव कज्जंति ?*

*गोयमा ! जीवाणं आहारोवचिया पोग्गला बोंदिचिया पोग्गला कलेवरचिया पोग्गला तहा २ णं ते पोग्गला परिणमंति नत्थि अचेयकडा कम्मा समणाउसो !, दुट्ठाणेसु दुसेज्जासु दुन्निसीहियासु तहा २ णं ते पोग्गला परिणमंति नत्थि अचेयकडा कम्मा समणाउसो !, आयंके से वहाए होति संकप्पे से वहाए होति मरणंते से वहाए होति तहा २ णं ते पोग्गला परिणमंति नत्थि अचेयकडा कम्मा समणाउसो ! । से तेणट्ठेणं जाव कम्मा कज्जंति,*

*एवं नेरतियाणवि एवं जाव वेमाणियां । सेवं भंते ! जाव विहरंति ।।*

**वृ.** अनन्तरं शक्रस्वरूपमुक्तं, तच्च कर्मतो भवतीति सम्बन्धेन कर्मस्वरूपप्ररूपणायाह– 'जीवाण'मित्यादि, 'चेयकडकम्म'त्ति चेतः–चैतन्यं जीवस्वरूपभूता चेतनेत्यर्थतेन कृतानि–बद्धानि चेतःकृतानि कर्म्माणि 'कज्जंति'त्ति भवन्ति, कथम् ? इति चेदुच्यते–

'जीवाणं'ति जीवानामेव नाजीवानाम् 'आहारोवचिया पोग्गल'त्ति आहाररूपतयोपचिताः–सञ्चिता ये पुद्गलाः 'बोंदिचिया पोग्गल'त्ति इह वोन्दिः–अव्यक्तावयवं शरीरं ततो बोन्दितया चिता ये पुद्गलाः, तथा 'कडेवरचिय'त्ति कडेवरतया चिता ये पुद्गलाः 'तहा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहा ते पुग्गला परिणमंति'त्ति तेन तेन प्रकारेण आहारादितयेत्यर्थः ते पुद्गलाः परिणमन्ति, एवं च कर्मपुद्गला अपि जीवानामेव तथा २ परिणमन्तीतिकृत्वा चैायकृतानि कर्माणि।

अतो निगम्यते-'नत्थि अचेयकडा कम्म'त्ति न भवन्ति 'अचेतःकृतानि' अचैतन्यकृतानि कर्म्माणि हे श्रमण! हे आयुष्मन्! इति, अथवा 'चेयकडा कम्मा कज्जंति'त्ति चेयं-चयनं चय इत्यर्थः भावे प्रत्ययविधानात् तत्कृतानि सञ्चयकृतानि पुद्गलसञ्चयरूपाणि कर्माणि भवन्ति, कथम्?, 'आहारोवचिया पोग्गला'इत्यादि, आहाररूपा उपचिताः सन्तः पुद्गला भवन्ति, तथा बोन्दिरूपाश्चिताः सन्तः पुद्गला भवन्ति।

तथा कडेवररूपाश्चिताः सन्तः पुद्गला भवन्ति, किं बहुना?, तथोच्छ्वासादिरूपतया ते पुद्गलाः परिणमन्ति चयादेवेति शेषः, एवं च न सन्ति 'अचेयकृतानि' असञ्चयकृतानि कर्म्माणि आहारबोन्दिकडेवरपुद्गलवदिति। तथा 'दुट्ठाणेसु'त्ति शीतातपदंशमशकादिक्तेषु-कायोत्सर्गासनाद्याश्रयेषु 'दुसेज्जासु'त्ति दुःखोत्पादकवसतिषु 'दुन्निसीहियासु'त्ति दुःखहेतुस्वाध्यायभूमिषु 'तथा २'तेन २ प्रकारेण बहुविधासातोत्पादकतया 'ते पोग्गल'त्ति ते कार्म्मणपुद्गलाः परिणमन्ति, ततश्च जीवानामेवासातसम्भवात्तैरेवासातहेतुभूतकर्माणि कृतानि अन्यथाऽकृताभ्यागमदोषप्रसङ्गः, जीवकृतत्वे च तेषां चेतः-कृतत्वं सिद्धमतो 'नत्थि अचेयकडा कम्म'त्ति, चेयत्याख्यानं त्वेवं नीयते-यतो दुःस्थानादिष्वसात- हेतुतया पुद्गलाः परिणमन्ति अतो नोऽचेयकृतानि कर्म्माणि-नासञ्चयरूपाणि कर्म्माणि।

असञ्चयरूपाणामतिसूक्ष्मत्वेनासातोत्पादकत्वासम्भवाद् विषलववदिति, तथा 'आयंके'इत्यादि, 'आतङ्कः' कृच्छ्रजीवितकारी ज्वरादि 'से' तस्य जीवस्य 'वधाय' मरणाय भवति, एवं 'सङ्कल्पः' भयादिविकल्पः मरणान्तः-मरणरूपोऽन्तो-विनाशो यस्मात्सः मरणान्तः-दण्डादिघातः, तत्र च 'तथा २' तेन २ प्रकारेण वधजनकत्वेन ते 'पुद्गलाः' आतङ्कादिजनकासातसंवेदनीयसम्बन्धिनः 'परिणमन्ति' वर्त्तन्ते।

एवं च वधस्य जीवानामेव भावाद् वधहेतवोऽसातवेद्पुद्गला जीवकृताः अतश्चेतः कृतानि कर्म्माणि न सन्त्यचेतः- कृतानि, चेयव्याख्यानं तु पूर्वोक्तानुसारेणावगन्तव्यमिति॥

शतकं-१६ उद्देशकः-२ समाप्तः

## -: शतकं-१६ उद्देशकः-३ :-

**वृ.** द्वितीयोद्देशकान्ते कर्म्माभिहितं, तृतीयेऽपि तदेवोच्यते, इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (६७०)** *रायगिहे जाव एवं वयासी-कति णं भंते! कम्मपयडीओ पन्नत्ताओ?, अट्ठ कम्मपयडीओ -नाणावरणिज्जं जाव अंतराइयं, एवं जाव वेमा०।*

*जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेमाणे कति कम्मपगडीओ वेदेति?, गोयमा! अट्ठ कम्मप्पगडीओ, एवं जहा पन्नवणाए वेदावेउद्देसओ सो चेव निरवसेसो भाणियव्वो, वेदाबंधोवि तहेव, बंधावेदोवि तहेव, बंधाबंधोवि तहेव भाणियव्वो जाव वेमाणियाणंति।*

*सेवं भंते! २ जाव विहरति॥*

**वृ.** 'रायगिहे'इत्यादि, 'एवं जहा पन्नवणाए'इत्यादि, 'वेयावेउद्देसओ'त्ति वेदे-वेदने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मप्रकृतेः एकस्याः वेदो–वेदनमन्यासां प्रकृतीनां यत्रोद्देशकेऽभिधीयते स वेदावेदः स एवोद्देशकः–प्रज्ञापनायाः सप्तविंशतितमं पदं वेदावेदोद्देशकः, दीर्घता चेह सञ्ज्ञात्वात् ।

स चैवमर्थतः–गौतम ! अष्ट कर्म्मकृम्म तीर्वेदयति सप्त वा मोहस्य क्षये उपशमे चा एवं मनुष्योऽपि, नारकादिस्तु वैमानिकान्तोऽष्टावेवेत्येवमादिरिति। 'वेदाबंधोवि तहेव'त्ति एकस्याः कर्म्मप्रकृतेर्वेदे–वेदने अन्यासां कियतीनां बन्धो भवतीति प्रतिपाद्यते यत्रासौ वेदाबन्ध उच्यते, सोऽपि तथैव प्रज्ञापनायामिवेत्यर्थः, स च प्रज्ञापनायां षड्विंशतितमपदरूपः, एवं चासौ–

कइ णं भंते ! कम्मप्पगडीओ पन्नत्ताओ ?, गोयमा ! अट्ठ कम्मपगडीओ पन्नत्ताओ, तंजहा–नाणावरणं जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं। जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेमाणे कइ कम्मपगडीओ बंधइ ?, गोयमा! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा एगविहबंधए वा' इत्यादि ।

तत्राष्टविधबन्धकः प्रतीतः, सप्तविधबन्धकस्त्वायुर्बन्धकालादन्यत्र, षड्विधवन्धक आयुर्मोहवर्जानां सूक्ष्मसम्परायः, एकविधबन्धको वेदनीयापेक्षयोपशान्तमोहादिः, 'बंधावेदोवि तहेव'त्ति एकस्याः कर्म्मप्रकृतेर्बन्धे सत्यन्यासां कियतीनां वेदो भवति ? इत्येवमर्थो बन्धावेद उद्देशक उच्यते, सोऽपि तथैव–प्रज्ञापनायामिवेत्यर्थः, स च प्रज्ञापनायां पञ्चविंशतितमपदरूपः एवं चासौ–'कइ णं भंते !' इत्यादि प्रागिव, विशेषस्त्वयं–'जीवे णं भंते ! नाणावरणिज्जं कम्मं बंधेमाणे कइकम्मपगडीओ वेएइ ?, गोयमा ! नियमा अट्ठ कस्मप्पगडीओ वेएइ' इत्यादि, 'बंधाबंधो'त्ति एकस्या बन्धेऽन्यासां कियतीनां बन्धः ? इति यत्रोच्यतेऽसौ बन्धाबन्ध इत्युच्यते, स च प्रज्ञापनायां चतुर्विंशतितम पदं, स चैवं–'कइ ण'त्यादि तथैव, विशेषः ।

पुनरयं–'जीवे णं भंते! नाणावरणिज्जं कम्मं बंधेमाणे कइ कम्मप्पगडीओ बंधइ ?, गोयमा सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा' इत्यादि, इह सङ्ग्रहगाथा क्वचिद् दृश्यते–

॥१॥ "वेयावेओपढमो १ वेयाबंधो य बीयओ होइ २ ।
बंधावेओ तइओ ३ चउत्थओ बंधबंधो उ ४ ॥" इति ॥

अनन्तरं बन्धक्रिया उक्तेति क्रियाविशेषाभिधानाय प्रस्तावनापूर्वकमिदमाह–

**मू. (६७१)** *तए णं समणे भगवं महावीरे अन्नदा कदायि रायगिहाओ नगराओ गुणसिलाओ चेइयाओ पडिनिक्खमति २ बहिया जणवयविहारं विहरति, तेणं कालेणं तेणं समएणं उल्लुयतीरे नामं नगरे होत्था वन्नओ, तस्स णं उल्लुयतीरस्स नगरस्स बहिया उत्तरपुरच्छिमे दिसिभाए एत्थ णं एगजंबूए नामं चेइए होत्था वन्नओ । तए णं समणे भगवं महावीरे अन्नदा कदायि पुव्वाणुपुव्विं चरमाणे जाव एगजंबूए समोसढे जाव परिसा पडिगया, भंतेत्ति भगवं गोयमे समणं भगवं महावीरं वंदइ नमंसइ वंदित्ता नमंसित्ता एवं वयासी –*

*अनगारस्स णं भंते ! भावियप्पणो छट्ठंछट्ठेणं अनिक्खित्तेणं जाव आयावेमाणस्स तस्स णं पुरच्छिमेणं अवड्ढं दिवसं नो कप्पति हत्थं वा पादं वा बाहं वा ऊरुं वा आउट्टावेत्तए वा पसारेत्तए वा । तस्स णं अंसियाओ लंबंति तं च वेज्जे अदक्खु ईसिं पाडेति ईसिं २ अंसियाओ छिंदेज्ञा से नूनं भंते ! जे छिंदति तस्स किरिया कज्ञति जस्स छिज्ञति नो तस्स किरिया कज्ञइ नन्नत्थेगेणं धम्मंतराइएणं हंता गोयमा ! जे छिंदति जाव धम्मंतराएणं । सेवं भंते !*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'तए ण'मित्यादि ॥ 'पुरच्छिमेणं'ति पूर्वभागे—पूर्वाह्ने इत्यर्थः 'अवड्ढं'ति अपगतार्द्धमर्द्धदिवसं यावत् न कल्पते हस्ताद्याकुण्टयितुं कायोत्सर्गव्यवस्थितत्वात् 'पच्चच्छिमेणं'ति पश्चिमभागे 'अवड्ढं दिवसं'ति दिनार्द्धं यावत् कल्पते हस्ताद्याकुण्टयितुं कायोत्सर्गाभावात्, एतच्च चूर्ण्यनुसारितया व्याख्यातं ।

'तस्स य'त्ति तस्य पुनः साधोरेवं कायोत्सर्गाभिग्रहवतः 'अंसियाओ'त्ति अर्शांसि तानि च नासिकासत्कानीति चूर्णिकारः, 'तं च'त्ति तं चानगारं कृतकायोत्सर्गं लम्बमानार्शसम् 'अदक्खु'त्ति अद्राक्षीत्, ततश्चार्शसां छेदार्थं 'ईसिं पाडेइ'त्ति तमनगारं भूम्यां पातयति, नापातितस्यार्शश्छेदः कर्त्तुं शक्यत इति, 'तस्स'त्ति वैद्यस्य 'क्रिया' व्यापाररूपा सा च शुभा धर्मबुद्धया छिन्दानस्य लोभादिना त्वशुभा 'क्रियते' भवति 'जस्स छिज्जइ'त्ति यस्य साधोरर्शांसि छिद्यन्ते नो तस्य क्रिया भवति निर्व्यापारत्वात् ।

किं सर्वथा क्रियाया अभावः ?, नैवमत आह—'नन्नत्थे'त्यादि, नेति योऽयं निषेधः सोऽन्यत्रैकस्माद्धर्म्मान्तरायाद्, धर्मान्तरायलक्षणक्रिया तस्यापि भवतीति भावः, धर्मान्तरायश्च शुभध्यानरायश्च शुभध्यानविच्छेदादर्शश्छेदानुमोदनाद्वेति ॥

शतकं—१६ उद्देशकः—३ समाप्तः

## —: शतकं—१६ उद्देशकः—४ :—

**वृ.** अनन्तरोद्देशकेऽनगारवक्तव्यतोक्ता, चतुर्थेऽप्यसावेवोच्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्—

**मू. (६७२)** *रायगिहे जाव एवं वयासी—जावतियन्नं भंते ! अन्नइलायए समणे निग्गंथे कम्मं निज्जरेति एवतियं कम्मं नरएसु नेरतियाणं वासेण वा वासेहिं वा वाससएहिं वा खवति ?, नो तिणट्ठे समट्ठे । जावतियण्णं भंते ! चउत्थभत्तिए समणे निग्गंथे कम्मं निज्जरेति एवतियं कम्मं नरएसु नेरइया वाससएणं वा वाससएहिं वा वाससहस्सेहिं वा वाससयसहस्सेहिं (न) वा खवियंति नो तिणट्ठे समट्ठे ।*

*जावतियन्नं भंते ! छट्ठभत्तिए समणे निग्गंथे कम्मं निज्जरेति एवतियं कम्मं नरएसु नेरइया वाससहस्सेण वा वाससहस्सेहिं वा वाससयसहस्सेण (हिं) वा खवयंति ?, नो तिणट्ठे समट्ठे ।*

*जावतियन्नं भंते ! अट्ठमभत्तिए समणे निग्गंथे कम्मं निज्जरेति एवतियं कम्मं नरएसु नेरतिया वाससयसहस्सेण वा वाससयसहस्सेहिं वा वासकोडीए वा खवयंति ?, नो तिणट्ठे समट्ठे ।*

*जावतिन्नं भंते ! दसमभत्तिए समणे निग्गंथे कम्मं निज्जरेति एवतियं कम्मं नरएसु नेरतिया वासकोडीए वा वासकोडीहिं वा वासकोडाकोडीए वा खवयंति ? नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते ! एव वुच्चइ जावतियं अन्नइलातए समणे निग्गंथे कम्मं निज्जरेति एवतियं कम्मं नरएसु नेरतिया वासेण वा वासेहिं वा वाससएण वा (जाव) वास (सय) सहस्सेण वा नो खवयंति जावतियं चउत्थभत्तिए ।*

*एवं तं चेव पुव्वभणियं उच्चारेयव्वं जाव वासकोडाकोडीए वा नो खवयंति ?, गोयमा ! से जहानामए—केइ पुरिसे जुन्ने जराजज्जरियदेहे सिढिलतयावलितरंगसंपिणद्धगत्ते पविरलपरिसडियदंतसेढी उण्हाभिहए तण्हाभिहए आउरे झुंझिए पिवासिए दुब्बले किलंते एगं महं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कोसंबगंडियं सुक्कं जडिलं गंठिल्लं चिक्कणं वाइद्धं अपत्तियं मुंडेण परसुणा अवक्कमेज्ञा।*

*तए णं से पुरिसे महंताइं २ सद्दाइं करेइ नो महंताइं २ दलाइं अवद्दालेइ, एवामेव गोयमा नेरइयाणं पावाइं कम्माइं गाढीकयाइं चिक्कणीकयाइं एवं जहा छट्ठसए जाव नो महापज्जवसाणा भवंति, से जहानामए–केई पुरिसे अहिकरणिं आउडेमाणे महया जाव नो महापज्जवसाणा भवंति*

*से जहानामए–केई पुरिसे तरुणे बलवं जाव मेहावी निउणसिप्पोवगए एगं महं सामलिगंडियं उल्लं अजडिलं अगंठिल्लं अचिक्कणं अवाइद्धं सपत्तियं तिक्खेण परसुणा अक्कमेज्ञा।*

*तए णं से णं पुरिसे नो महंताइं २ सद्दाइं करेति महंताइं २ दलाइं अवद्दालेति, एवामेव गोयमा! समणाणं निग्गंथाणं अहाबादराइं कम्माइं सिढिलीकयाइं निट्ठियाइं कयाइं जाव खिप्पामेव परिविद्धत्थाइं भवंति जावतियं तावतियं जाव महापज्जवसाणा भवंति।*

*से जहा वा केइ पुरिसे सुक्कतणहत्थगं जायतेयंसि पक्खिवेज्ञा एवं जहा छट्ठसए तहा अयोकवल्लेवि जाव महाप० भवंति, से तेणट्ठेणं गोयमा! एवं वुच्चइ जावतियं अन्नइलायए समणे निग्गंथे कम्मं नि० चेव जाव वासकोडाकोडीए वा नो खवयंति।*

*सेवं भंते! सेवं भंते! जाव विहरइ॥*

**वृ.** 'रायगिहे' इत्यादि, 'अन्नगिलायते'त्ति अन्नं विना ग्लायति–ग्लानो भवतीत्यन्नग्लायकः प्रत्यग्रकूरादिनिष्पत्तिं यावद् बुभुक्षातुरतया प्रतीक्षितुशकुवन् यः पर्युषितकूरादि प्रांतरेव भुङ्क्ते कूरगडुकप्राय इत्यर्थ, चूर्णिकारेण तु निस्पृहत्वात् 'सीयकूरभोई अंतपंताहारो'त्ति व्याख्यातं, अथ कथमिदं प्रत्याय्यं यदुत नारको महाकष्टापन्नो महताऽपि कालेन तावत्कर्म्म न क्षपयति यावत्साधुरल्पकष्टापन्नोऽल्पकालेनेति?, उच्यते, दृष्टान्ततः, स चायं –

'से जहानामए केइ पुरिसे'त्ति यथेति दृष्टान्ते नाम–सम्भावने ए इत्यलङ्कारे 'से'त्ति स कश्चित्पुरुषः 'जुन्ने'त्ति जीर्ण–हानिगतदेहः, स च कारणवशादवृद्धभावेऽपि स्यादत आह– 'जहारजज्झरियदेहे'त्ति व्यक्तं, अत एव 'सिढिल (त्त) तयालितरंगसंपिणद्धगत्ते'त्ति शिथिलतया त्वचायलीरङ्गैश्च संपिनद्धं–परिगतं गात्रं–देहो यस्य स तथा 'पविरलपरिसडियदंतसेढि'त्ति प्रविरलाः–केचित् क्वचिच्च परिशटिता दंता यस्यां सा तथाविधा श्रेणिर्दन्तानामेव यस्य स तथा

'आउरे'त्ति आतुरः–दुःस्थः 'झुंझिए'त्ति बुभुक्षितः झुरित इति टीकाकारः 'दुब्बले'त्ति बलहीनः 'किलंते'त्ति मनःक्लमं गतः, एवंरूपो हि पुरुषश्छेदनेऽसमर्थो भवतीत्येवं विशेषितः, 'कोसंबगंडियं'ति 'कोसंब'त्ति वृक्षविशेषस्तस्य गण्डिकाःखण्डविशेषस्तां 'जडिलं'ति जटावतीं वलितोद्वलितामिति वृद्धाः 'गंठिल्लं'ति ग्रन्थिमतीं 'चिक्कणं'ति श्लक्ष्णस्कन्धनिष्पन्नां 'वाइद्ध'न्ति व्यादिग्धां–विशिष्टद्रव्योपदिग्धां वक्रमिति वृद्धाः 'अपत्तियं'ति अपात्रिकाम्–अविद्यमानाधाराम्, एवम्भूता च गण्डिका दुश्छेद्या भवतीत्येवं विशेषिता, तथा परशुरपि मुण्डः–अच्छेदको भवतीति मुण्ड इति विशेषितः, शेषं तूद्देशकान्तं यावत् षष्ठशत- वद्व्याख्येयमिति॥

शतकं–१६ उद्देशकः–४ समाप्तः

## –: शतकं–१६ उद्देशकः–५ :–

**वृ.** चतुर्थोद्देशके नारकाणां कर्म्मनिर्जरणशक्तिस्वरूपमुक्तं, पञ्चमे तु देवस्यागमनादिशक्तिस्वरूपमुच्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (६७३) तेणं कालेणं तेणं समएणं उल्लुयतीरे नामं नगरे होत्था वन्नओ, एगजंबूए चेइए वन्नओ, तेणं कालेणं तेणं समएणं सामी समोसढे जाव परिसा पज्जुवासति।*

*तेणं कालेणं २ सक्के देविंदे देवराया वज्जपाणी एवं जहेव बितियउद्देसए तहेव दिव्वेणं जाणविमाणेणं आगओ जाव जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ जाव नमंसित्ता एवं वयासी—देवे णं भंते! महड्डिए जाव महेसक्खे बाहिरए पोग्गले अपरियाइत्ता पभू आगमित्तए? नो तिणट्ठे समट्ठे।*

*देवे णं भंते! महड्डिए जाव महेसक्खे बाहिरए पोग्गले परियाइत्ता पभू आगमित्तए?, हंता पभू, देवे णं भंते! महड्डिए एवं एएणं अभिलावेणं गमित्तए २ एवं भासित्तए वा वागरित्तए वा ३ उम्मिसावेत्तए वा निमिसावेत्तए वा ४ आउट्टावेत्तए वा पसारेत्तए वा ५ ठाणं वा सेज्जं वा निसीहियं वा चेइत्तए वा ६ एवं विउव्वित्तए वा ७ एवं परियारावेत्तए वा ८ जाव हंता पभू।*

*इमाइं अट्ठ उक्खित्तपसिणवागरणाइं पुच्छइ, इमाइं २ संभंतियवंदणएणं वंदति संभंतिय० २ तमेव दिव्वं जाणविमाणं दुरूहति २ जामेव दिसं पाउब्भूए तामेव दिसं पडिगए।*

वृ. 'तेण'मित्यादि, इह सर्वोऽपि संसारी बाह्यान् पुद्गलाननुपादाय न काञ्चित् क्रिया करोतीति सिद्धमेव, किन्तु देवः किल महर्द्धिकः, महर्द्धिकत्वादेव च गमनादिक्रियां मा कदाचित् करिष्यतीति सम्भावनायां शक्रः प्रश्नं चकार।

'देवे णं भंते!' इत्यादि, 'भासित्तए वा वागरित्तए व'त्ति भाषितुं—वक्तुं व्याकर्तुम्—उत्तरं दातुमित्यनयोर्विशेषः, प्रश्नश्चायं तृतीयः, उन्मेषादिश्चतुर्थः, आकुण्टनादि पञ्चमः, स्थानादि षष्ठः, विकुर्वितुमिति सप्तमः, परिचारयितुमष्टमः ८ 'उक्खित्तपसिणवागरणाइं'ति उत्क्षिप्तानी-वोत्क्षिप्तानि—अविस्तारितस्वरूपाणि प्रच्छनीयत्वात्प्रश्नाः व्याक्रियमाणत्वाच्च व्याकरणानि यानि तानि तथा 'संभंतियवंदणएणं' त्ति सम्भ्रान्तिः सम्भ्रमः औत्सुक्यं तया निवृत्तं साम्भ्रान्तिकं यद्वन्दनं तत्तथा तेन।

*मू. (६७४) भंतेत्ति भगवं गोयमे समणं भगवं महावीरं वंदति नमंसति २ एवं वयासी—अन्नदा णं भंते! सक्के देविंदे देवराया देवाणुप्पियं वंदति नमंसति सक्कारेति जाव पज्जुवासति, किण्हं भंते अज्ज सक्के देविंदे देवराया देवाणुप्पियं अट्ठ उक्खित्तपसिणवागरणाइं पुच्छइ २ संभंतियवंदणएणं वंदति नमंसति २ जाव पडिगए?, गोयमादि समणे भगवं म० भगवं गोयमं एवं वयासी— एवं खलु गोयमा! तेणं कालेणं २ महासुक्के कप्पे महासामाणे विमाणे दो देवा महड्डिया जाव महेसक्खा एगविमाणंसि देवत्ताए उववन्ना, तं०—मायिमिच्छदिट्ठिउववन्नए य अमायिसम्मदिट्ठिउववन्नए य।*

*तए णं से मायिमिच्छादिट्ठिउववन्नए देवे तं अमायिसम्मदिट्ठिउववन्नगं देवं एवं वयासी—परिणममाणा पोग्गला नो परिणया अपरिणया परिणमंतीति पोग्गला नो परिणया अपरिणया, तए णं से अमायिसम्मदिट्ठी उववन्नए देवे तं मायिमिच्छदिट्ठीउववन्नगं देवं एवं वयासी— परिणममामा पोग्गला परिणया नो अपरिणया परिणमंतीति पोग्गला परिणया नो अपरिणया, तं मायिमिच्छदिट्ठीउववन्नगं एवं पडिहणइ २ ओहिं पउंजइ ओहिं २ ममं ओहिणा आभोएइ ममं २ अयमेयारूवे जाव समुप्पज्जित्था।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं खलु समणे भगवं महावीरे जंबुद्दीवे २ जेणेव भारहे वासे जेणेव उल्लुयतीरे नगरे जेणेव एगजंबुए चेइए अहापडिरूवं जाव विहरति, तं सेयं खलु मे समणं भगवं महावीरं वंदित्ता जाव पज्जुवासित्ता इमं एयारूवं वागरणं पुच्छित्तएत्तिकट्टु एवं संपेहेइ एवं संपेहित्ता चउहिवि सामानियसाहस्सीहिं परियारो जहा सूरियाभस्स जाव निग्घोसनाइयरवेणं जेणेव जंबुद्दीवे २ जेणेव भारहे वासे जेणेव उल्लुयातीरे नगरे जेणेव एगजंबुए चेइए जेणेव ममं अंतियं तेणेव पहारेत्थ गमणाए।

तए णं से सक्के देविंदे देवराया तस्स देवस्स तं दिव्वं देवड्ढिं दिव्वं देवजुतिं दिव्वं देवाणुभागं दिव्वं तेयलेस्सं असहमाणे ममं अट्ठ उक्खित्तपसिणवागरणाइं पुच्छइ संभंतिय जाव पडिगए।

वृ. 'परिणममाणा पोग्गला नो परिणय'त्ति वर्त्तमानातीतकालयोर्विरोधादत एवाह– 'अपरिणय'त्ति, इहैवोपपत्तमाह परिणमन्तीति कृत्वा नो परिणतास्तेव्यपदिश्यन्त इति मिथ्या-दृष्टिवचनं, सम्यग्दृष्टि पुनराह–

मू. (६७५) जावं च णं समणे भगवं महावीरे भगवओ गोयमस्स एयमट्ठं परिकहेति तावं च णं से देवे तं देसं हव्वमागए, तए णं से देवे समणं भगवं महावीरं तिक्खुत्तो वंदति नमंसति २ एवं वयासी–एवं खलु भंते! महासुक्के पप्पे महासामाणे विमाणे एगे मायिमिच्छदिट्ठिउववन्नए देवे ममं एवं वयासी –

परिणममाणा पोग्गला नो परिणया अपरिणया परिणमंतीति पोग्गला नो परिणया अपरिणया, तए णं अहं तं मायिमिच्छदिट्ठिउववन्नगं देवं एवं वयासी–परिणममाणा पोग्गला परिणया नो अपरिणया परिणमंतीति पोग्गला परिणया नो अपरिणया।

से कहमेयं भंते! एवं?, गंगदत्तादिसमणे भगवं महावीरे गंगदत्तं एवं वयासी–अहंपि णं गंगदत्ता! एवमाइक्खामि ४ परिणममाणा पोग्गला जाव नो अपरिणया सच्चमेसे अट्ठे।

तए णं से गंगदत्ते देवे समणस्स भगवओ महावीरस्स अंतियं एयमट्ठं सोच्चा निसम्म हट्ठतुट्ठे समणं भगवं महावीरं वंदति नमं० २ नच्चासन्ने जाव पज्जुवासति, तए णं समणे भ० महावीरे गंगदत्तस्स देवस्स तीसे य जाव धम्मं परिकहेइ जाव आराहए भवति।

तए णं से गंगदत्ते देवे समणस्स भगवओ० अंतिए धम्मं सोच्चा निसम्म हट्ठतुट्ठे उट्ठाए उट्ठेति उ० २ समणं भगवं महावीरं वंदति नमंसति २ एवं वयासी–अहण्हं भंते! गंगदत्ते देवे किं भवसिद्धिए अभवसिद्धिए? एवं जहा सूरियाभो जाव बत्तीसतिविहं नट्टविहं उवदंसेति उव० २ जाव तामेव दिसं पडिगए॥

वृ. 'परिणममाण पोग्गलापरिणया नो अपरिणय'त्ति, कुतः? इत्याह–परिणमन्तीतिकृत्वा पुद्गलाः परिणता नो अपरिणताः, परिणमन्तीति हि यदुच्यते तत्परिणामसद्भावे नान्यथाऽ-तिप्रसङ्गात्, परिणामसद्भावे तु परिणमन्तीति व्यपदेशे परिणतत्वमवश्यंभावि, यदि हि परिणामे सत्यपि परिणतत्वं न स्यात्तदा सर्वदा तदभावप्रसङ्ग इति।

'परिवारो जहा सूरियाभस्से'त्यनेनेदं सूचितं 'तिहिं परिसाहिं सत्तहिं अनिएहिं सत्तहिं अणियाहिवईहिं सोलसहिं आयरक्खदेवसाहस्सीहिं अन्नेहि य बहूहिं महासामाणविमाणवासीहिं वेमाणिएहिं देवेहिं सद्धिं संपरिवुडे' इत्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (६७६)** भंतेत्ति भगवं गोयमे समणं भगवं महावीरं जाव एवं वयासी–गंगदत्तस्स णं भंते ! देवस्स सा दिव्वा देवड्ढी दिव्वा देवजुती जाव अणुप्पविट्ठा ?, गोयमा ! सरीरं गया सरीरं अणुप्पविट्ठा कूडागारसालादिट्ठंतो जाव सरीरं अणुप्पविट्ठा ।

अहो णं भंते ! गंगदत्ते देवे महड्ढिए जाव महेसक्खे ?, गंगदत्तेणं भंते ! देवेणं सा दिव्वा देवड्ढी दिव्वा देवजुत्ती किण्णा लद्धा जाव गंगदत्तेणं देवेणं सा दिव्वा देवड्ढी जाव अभिसमन्नागया ?, गोयमादी समणे भगवं महावीरे भगवं गोयमं एवं वयासी –

एवं खलु गोयमा ! तेणं कालेणं २ इहेव जंबुद्दीवे २ भारहे वासे हत्थिणापुरे नामं नगरे होत्था वन्नओ, सहसंबवने उज्जाणे वन्नओ, तत्थ णं हत्थिणापुरे नगरे गंगत्ते नामं गाहावती परिवसति अड्ढे जाव अपरिभूए, तेणं कालेणं २ मुणिसुव्वए अरहा आदिगरे जाव सव्वन्नू सव्वदरिसी आगासगएणं चक्कणं जाव पकड्ढिज्जमाणेणं प० सीसगणसंपरिवुडे पुव्वाणुपुव्विं चरमाणे गामाणुगामं जाव जेणेव सहसंबवणे उज्जाणे जाव विहरति परिसा निग्गया जाव पज्जुवासति

तए णं से गंगदत्ते गाहावती इमीसे कहाए लद्धट्ठे समाणे हट्ठतुट्ठ जाव कयबलिजाव सरीरे साओ गिहाओ पडिनिक्खमति २ पायविहारचारेणं हत्थिणागपुरं नगरं मज्झंमज्झेणं निग्गच्छति २ जेणेव सहसंबवने उज्जाणे जेणेव मुणिसुव्वए अरहा तेणेव उवागच्छइ २ मुणिसुव्वयं अरहं तिक्खुत्तो आ० २ जाव तिविहाए पज्जुवासणाए पज्जुवासति ।

तए णं मुनिसुव्वए अरहा गंगदत्तस्स गाहावतिस्स तीसे य महतिजाव परिसा पडिगया, तए णं से गंगदत्ते गाहावती मुनिसुव्वयस्स अरहओ अंतियं धम्मं सोच्चा निसम्म हट्ठतुट्ठ० उट्ठाए उट्ठति २ मुनिसुव्वयं अरहं वंदति नमंसति वंदित्ता नमंसित्ता एवं वयासी–सद्दहामि णं भंते ! निग्गंथं पावयणं जाव से जहेयं तुज्झे वदह, जं नवरं देवाणुप्पिया ! जेट्ठपुत्तं कुडुंबे ठावेमि तए णं अहं देवाणुप्पियाणं अंतियं मुंडे जाव पव्वयामि ।

अहासुहं देवाणुप्पिया ! मा पडिबंधं, तए णं से गंगदत्ते गाहावई मुनिसुव्वएणं अरहया एवं वुत्ते समाणे हट्ठतुट्ठ० मुणिसुव्वयं अरिहं वंदति न० २ मुनिसुव्वयस्स अरहओ अंतियाओ सहसंबवणाओ उज्जाणाओ पडिनिक्खमति प० २ जेणेव हत्थिणापुरे नगरे जेणेव सए गिहे तेणेव उवा० २ विउलं असणं पाणं जाव उवक्खडावेति उ० २ मित्तनातिनियगजाव आमंतेति आमंतेत्ता तओ पच्छा ण्हाए जहा पूरणे जाव जेट्ठपुत्तं कुडुंबे ठावेति तं मित्तणाति जाव जेट्ठपुत्तं च आपुच्छति आ० २ पुरिससहस्सवाहणिं सीयं दुरूहति पुरिससह० २ मित्तनातिनियगजाव परिजणेणं जेट्ठपुत्तेण य समणुगम्ममाणमग्गे सव्विड्ढीए जावणादितरवेणं हत्थिणागपुरं मज्झंमज्झेणं निग्गच्छइ नि० २ जेणेव सहसंबवने उज्जाणे तेणेव उवा० २ छत्तादिते तित्थगरातिसए पासति एवं जहा उदायणो जाव सयमेव आभरणं मुयइ स० २ सयमेव पंचमुट्ठियं लोयं करेति स० २ ।

जेणेव मुनिसुव्वए अरहा एवं जहेव उदायणो तहेव पव्वइए, तहेव एक्कारस अंगाइं अहिज्जइ जाव मासियाए संलेहणाए सट्ठिं भत्ताइं अणसणा जाव छेदेति सट्ठिं भत्ताइं० २ आलोइय-पडिक्कंते समाहिपत्ते कालमासे कालं किच्चा महासुक्के पप्पे महासामाणे विमाणे उववायसभाए देवसयणिज्जंसि जाव गंगदत्तदेवत्ताए उववन्ने ।

तए णं से गंगदत्ते देवे अहुणोववन्नमेत्तए समाणे पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तंजहा–आहारपज्ञत्तीए जाव भासामणपज्ञत्तीए, एवं खलु गोयमा ! गंगदत्तेणं देवेणं सा दिव्वा देवड्ढी जाव अभिसम० । गंगदत्तस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! सत्तरस-सागरोवमाइं ठिती । गंगदत्ते णं भंते ! देवे ताओ देवलोगाओ आउक्खएणं जाव महावि० वासे सिज्झिहिति जाव अंतं काहिति ।। सेवं भंते ! २ त्ति ।।*

**वृ.** 'दिवं तेयलेस्सं असहमाणे' त्ति इह किल शक्रः पूर्वभवे कार्त्तिकाभिधानोऽभिनवश्रेष्ठी बभूव गङ्गदत्तस्तु जीर्ण श्रेष्ठीति, तयोश्च प्रायो मत्सरो भवतीत्यसावसहनकारणं संभाव्यत इति ।

'एवं जहा सूरियाओ' त्ति अनेनेदं सूचितं 'सम्मादिट्ठी मिच्छादिट्ठी परित्तसंसारिए अनतसंसारिए सुलभबोहिए दुल्लभबोहिए आराहए विराहए चरिमे अचरिमे' इत्यादीति ।।

शतकं–१६ उद्देशकः–५ समाप्तः

## –: शतकं–१६ उद्देशकः–६ :–

**वृ.** पञ्चमोद्देशके गङ्गदत्तस्य सिद्धिरुक्ता, सा च भव्यानां केषाञ्चित् स्वप्नेनापि सूचित्ता भवतीति स्वप्नस्वरूपं षष्ठेनोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (६७७)** *कतिविहे णं भंते ! सुविणदंसणे पन्नत्ते ?, गोयमा ! पंचविहे सुविणदंसणे पन्नत्ते, तंजहा–अहातच्चे पयाणे चिंतासुविणे तव्विवरीए अवत्तदंसणे ।*

*सुत्ते णं भंते ! सुविणं पासति जागरे सुविणं पासति सुत्तजागरे सुविणं पासति ?, गोयमा नो सुत्ते सुविणं पासइ नो जागरे सुविणं पासइ सुत्तजागरे सुविणं पासइ ।*

*जीवा णं भंते ! किं सुत्ता जागरा सुत्तजागरा ?, गोयमा ! जीवा सुत्तावि जागरावि सुत्तजा-गरावि, नेरइया णं भंते ! कि सुत्ता० ? पुच्छा, गोयमा ! नेरइया सुत्ता नो जागरा नो सुत्तजागरा, एवं जाव चउरिंदिया ।*

*पंचिंदियतिरिक्खजोणिया णं भंते ! किं सुत्ता० पुच्छा, गोयमा ! सुत्ता नो जागरा सुत्तजागरावि, मणुस्सा जहा जीवा, वाणमंतरजोइसियवेमाणिया जहा नेरइया ।।*

**वृ.** 'कइविहे' इत्यादि, 'सुविणदंसणे' त्ति स्वप्नस्य–स्वापक्रियानुगतार्थविकल्पस्य दर्शनं–अनुभवनं, तच्च स्वप्नभेदात्पञ्चविधमिति, 'अहातच्चे' ति यथा–येन प्रकारेण तथ्यं–सत्यं तत्वं वा तेन यो वर्त्ततेऽसौ यथातथ्यो यथातत्वो वा, स च दृष्टार्थाविसंवादी फलाविसंवादी वा, तत्र दृष्टार्थाविसंवादी स्वप्नः किल कोऽपि स्वप्नं पश्यति यथा मह्यं फलं हस्ते दत्तं जागरितस्तथैव पश्यतीति, फलाविसंवादी तु किल कोऽपि गोवृषकुञ्जराद्यारूढमात्मानं पश्यति बुद्धश्च कालान्तरे सम्पदं लभत इति ।

'पयाणे' त्ति प्रतननं प्रतानो–विस्तारस्तद्रूपः स्वप्नो यथातथ्यः तदन्यो वा प्रतान इत्युच्यते, विशेषणकृत एव चानयोर्भेदः एवमुत्तरत्रापि, 'चिंतासुमिणे' त्ति जाग्रदवस्थस्य या चिन्ता–अर्थचिन्तनं तत्संदर्शनात्मकः स्वप्नश्चिन्तास्वप्नः, 'तव्विवरीय' त्ति यादृशं वस्तु स्वप्ने दृष्टं तद्विपरी-तस्यार्थस्य जागरणे यत्र प्राप्ति स तद्विपरीतस्वप्नो यथा कश्चिदात्मानां मेध्यविलिप्तं स्वप्ने पश्यति जागरितस्तु मेध्यमर्थं कंचन प्राप्नोतीति, अन्ये तु तद्विपरीतमेवमाहुः–

कश्चित् स्वरूपेण मृत्तिकास्थलमारूढः स्वप्ने च पश्यत्यात्मानमश्वारूढमिति, 'अव्वत्तदंसणे' त्ति अव्यक्तं–अस्पष्टं दर्शनं–अनुभवः स्वप्नार्थस्य यत्रासावव्यक्तदर्शनः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वप्नाधिकारादेवेदमभिधातुमाह-'सुत्ते ण' मित्यादि, 'सुत्तजागरे' त्ति नातिसुप्तो नातिजाग्रदित्यर्थः, इह सुप्तो जागरश्च द्रव्यभावाभ्यां स्यात्तत्र द्रव्यतो निद्रापेक्षया भावतश्च विरत्यपेक्षया, तत्र च स्वप्नव्यतिकरो निद्रापेक्ष उक्तः, अथ विरत्यपेक्षया जीवादीनां पञ्चविंशतेः पदानां सुप्तत्वजागरत्वे प्ररूपयन्नाह।

'जीवा ण' मित्यादि, तत्र 'सुत्त' त्ति सर्वविरतिरूपनैश्चयिकप्रबोधभावात् 'जागर' त्ति सर्वविरतिरूपप्रवरजागरसद्भावात् 'सुत्तजागर' त्ति अविरतिरूपसुप्तप्रबुद्धतासद्भावादिति ॥ पूर्वं स्वप्नद्रष्टार उक्ताः, अथ स्वप्नस्यैव तथ्यातथ्यविभागदर्शनार्थं तानेवाह-'संवुडे ण' मित्यादि, 'संवृतः' निरुद्धाश्रवद्वारः सर्वविरत इत्यर्थः, अस्य च जागरस्य च शब्दकृत एव विशेषः, द्वयोरपि सर्वविरताभिधायकत्वात् किन्तु जागरः सर्वविरतियुक्तो बोधापेक्षयोच्यते संवृतस्तु तथाविधबोधोपेतसर्वविरत्यपेक्षयेति।

**मू. (६७८)** *संवुडे णं भंते! सुविणं पासइ असंवुडे सुविणं पासइ संवुडासंवुडे सुविणं पासइ?, गोयमा! संवुडेवि सुविणं पासइ असंवुडेवि सुविणं पासइ संवुडासंवुडेवि सुविणं पासइ, संवुडे सुविणं पासति अहातच्चं पासति, असंवुडे सुविणं पासति तहावि तं होज्ञा अन्नहा वा तं होज्ञा, संवुडासंवुडे सुविणं पासति एवं चेव ॥*

*जीवा णं भंते! किं संवुडा असंवुडा संवुडासंवुडा?, गोयमा! जीवा संवुडावि असंवुडावि संवुडासंवुडावि, एवं जहेव सुत्ताणं दंडओ तहेव भाणियव्वो ॥*

*कति णं भंते! सुविणा पन्नत्ता?, गोयमा! बायालीसं सुविणा पन्नत्ता, कइ णं भंते! महासुविणा पन्नत्ता?, गोयमा! तीसं महासुविणा पन्नत्ता, कति णं भंते! सव्वसुविणा प०?, गोयमा! बावत्तरिं सव्वसुविणा पन्नत्ता।*

*तित्थयरमायरो णं भंते! तित्थगरंसि गब्भंव कममाणंसि कति महासुविणे पासित्ताणं पडिबुज्झंति?, गोयमा! तित्थयरमायरो णं तित्थयरंसि गब्भं वक्कममाणंसि एएसिं तीसाए महासुविणाणं इमे चोद्दस महासुविणे पासित्ताणं पडिबुज्झंति, तं०-गयउसभसीहअभिसेयजाव सिहिं च। चक्कवट्टिमायरो णं भंते! चककवट्टिमायरो चक्कवट्टिंसि गब्भं वक्कममाणंसि कति महासुमिणे पासित्ता णं पडिबुज्झंति?, गोयमा! चक्कवट्टिमायरो चक्कवट्टिंसि जाव वक्कममाणंसि एएसिं तीसाए महासु० एवं जहा तित्थगरमायोर जाव सिहिं च।*

*वासुदेवमायरो णं पुच्छा, गोयमा! वासुदेवमायरो जाव वक्कममाणंसि एएसिं चोद्दसण्हं महासुविणाणं अन्नयरे सत्त महासुविणे पासित्ताणं पडि०। बलदेवमायरो णं पुच्छा, गोयमा! बलदेवमायरो जाव एएसिं चोद्दसण्हं महासुं अन्नयरे चत्तारि महासुविणे पासित्ता णं पडि०।*

*मंडलियमायरो णं भंते! पुच्छा०, गोयमा! मंडलियमायरो जाव एएसिं चोद्दसण्हं महासु० अन्नयरं एगं महं सुविणं जाव पडिबु०।*

**वृ.** 'संवुडे णं सुविणं पासइ अहातच्चं पासइ' त्ति सत्यमित्यर्थः, संवृतश्चेह विशिष्टतरसंवृतत्वयुक्तो ग्राह्यः स च प्रायः क्षीणमलत्वात् देवताऽनुग्रहयुक्तत्वाच्च सत्यं स्वप्नं पश्यतीति।

अनन्तरं संवृतादिः स्वप्नं पश्यतीत्युक्तमथ संवृतत्वाद्येव जीवादिषु दर्शयन्नाह-'जीवा ण' मित्यादि। स्वप्नाधिकारादेवेदमाह-'कइ ण' मित्यादि, 'बायालीसं सुविण' त्ति विशिष्टफलसूच-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्वप्नापेक्षया द्विचत्वारिंशदन्यथाऽसङ्ख्येयास्ते संभवन्तीति, 'महासुविण'त्ति महत्तमफलसूचकाः 'बावत्तरि'त्ति एतेषामेव मीलनात्।

**मू. (६७९)** *समणे भ० महावीरे छउमत्थकालियाए अंतिमराइयंसि इमे दस महासुविणे पासित्ताणं पडिबुद्धे, तं०। एगं च णं महं घोररूवदित्तधरं तालपिसायं सुविणे पराजियं पासित्ताणं पडिबुद्धे १ एगं च णं महं सुक्कलपक्खगं पुंसकोइलं सुविणे पासि० २।*

*एगं च णं महं चित्तविचित्तपक्खगं पुंसकोइलगं सुविणे पासित्ता णं पडिबुद्धे ३ एगं च णं महं दामदुगं सव्वरयणामयं सुविणे पासित्ता० ४। एगं च णं महं सेयगोवग्गं सुविणे पा० ५ एगं च णं महं पउमसरं सव्वओ समंता कुसुमिय० सुविणे० ६।*

*एगं च णं महं सागरं उम्मीवीयीसहस्सकलियं भुयाहिं तिन्नं सुविणे पासित्ता० ७ एगं च णं महं दिनयरं तेयसा जलंतं सुविणे पासइ० ८।*

*एगं च णं महं हरिवेरुलियवन्नाभेणं नियगेणं अंतेणं माणुसुत्तरं पव्वयं सव्वओ समंता आवेढियं परिवेढियं सुविणे पासित्ताणं पडिबुद्धे ९ एगं च णं महं मंदरे पव्वए मंदरचूलियाए उवरिं सीहासणवरगयं अप्पाणं सुविणे पासित्ता णं पडिबुद्धे १०।*

*जण्णं समणं भगवं म० एगं घोररूवदित्तधरं तालपिसां सुविणे पराजियं पा० जाव पडिबुद्धे तण्णं समणेणं भगवया महा० मोहणिज्जे कम्मे मूलाओ उग्घायिए १ जन्नं समणे भ० म० एगं महं सुक्किलजाव पडिबुद्धे तण्णं समणे भ० म० सुक्कज्झाणोवगए विहरति।*

*जण्णं समणे भ० म० एगं महं चित्तविचित्तजाव पडिबुद्धे तण्णं समणे भ० म० विचित्तं ससमयपरसमइयं दुवालसंगं गधिपिडगं आघवेति पन्नवेति परूवेति दंसेति निदंसेति उवदंसेति, तंजहाआयारं सूयगडं जाव दिट्ठिवायं ३, जण्णं समणे भ० म० एगं महं दामदुगं सव्वरयणामयं सुविणे पासित्ताणं पडिबुद्धे तण्णं समणे भ० म० दुविहं धम्मं पन्नवेति, तं०—आगारधम्मं वा अनागारधम्मं वा ४। जण्णं समणे भ० म० एगं महं सेयगोवग्गं जाव पडिबुद्धे तण्णं समणस्स भ० म० चाउव्वण्णाइन्ने समणसंघे, तं०—समणा समणीओ सावया सावियाओ ५,*

*जण्णं समणे भ० म० एगं महं पउमसरं जाव पडिबुद्धे तण्णं समणे जाव वीरे चउव्विहे देवे पन्नवेति, तं०—भवणवासी वाणमंतरे जोतिसिए वेमाणिए ६। जन्नं समणे भग० म० एगं महं सागरं जाव पडिबुद्धे तन्नं समणेणं भगवया महावीरेणं अन्नादीए अनवदग्गे जाव संसारकंतारे तिन्ने ७, जन्नं समणे भगवं म० एगं महं दिनयरं जाव पडिबुद्धे तन्नं समणस्स भ० म० ओराला कित्तिवन्नसद्दसिलोया सदेवमणुयासुरे लोए परिभमंति—इति खलु समणे भगवं महावीरे इति० ९, जन्नं समणे भगवं महावीरे मंदरे पव्वए मंदरचूलियाए जाव पडिबुद्धे तण्णं समणे भगवं महावीरे सदेवमणुआसुराए परिसाए मज्झगए केवली धम्मं आघवेति जाव उवदंसेति॥*

**वृ.** 'अंतिमराइयंसि'त्ति रात्रेरन्तिमे भागे 'घोररूवदित्तधरं'ति घोरं यद्रूपं दीप्तं च दृप्तं वा तद्धारयति यः स तथा तं 'तालपिसायं'ति तालो—वृक्षविशेषः स च स्वभावादीर्घो भवति ततश्च ताल इव पिशाचस्तालपिशाचस्तम्, एषां च पिशाचाद्यर्थानां मोहनीयादिभि स्वप्नफलविषयभूतैः सह साधर्म्यं स्वयमभ्यूह्यं, 'पुंसकोइलगं'ति पुंस्कोकिलं—कोकिलपुरुषमित्यर्थः।

'दामदुगं'ति मालाद्वयम् 'उम्मीवीइसहस्सकलियं'ति इहोर्म्मयो—महाकल्लोलाः वीचयस्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रस्वाः, अथवोर्म्मीणां वीचयोविविक्तव्यानि तत्सहस्रकलितं, 'हरिवेरुलियवण्णाभेणं'ति हरिद्य–तन्नीलं वैडूर्यवर्णाभं चेति समासस्तेन 'आवेढियं'ति अभिविधिना वेष्टितं सर्वत इत्यर्थः 'परिवेढियं'ति पुनः पुनरित्यर्थः 'उवरिं'त्ति उपरि 'गणिपिडगं'ति गणीनां–अर्थपरिच्छेदानां पिटकमिव पिटकं–आश्रयो गणिपिटकं गमिनो वा–आचार्यस्य पिटकमिव–सर्वस्वभाजनमिव गणिपिटकम् 'आघवेइ'त्ति आख्यापयति सामान्यविशेषरूपतः 'पन्नवेति'त्ति सामान्यतः 'परूवेइ'त्ति प्रतिसूत्र-मर्थकथनेन 'दंसेइ'त्ति तदभिदेयप्रतयुपेक्षणादिक्रियादर्शनेन 'निदंसेइ'त्ति कथञ्चिदगृह्णतोऽनुकम्पया निश्चयेन पुनः पुनर्दर्शयति ।

'उवदंसेइ'त्ति सकलययुक्तभिरिति, 'चाउव्वण्णाइन्ने'त्ति चातुर्वर्णश्चासावाकीर्णश्च ज्ञानादिगुणैरिति चातुर्वर्णाकीर्णः 'चउव्विहे देवे पन्नवेइ'त्ति प्रज्ञापयति–प्रतिबोधियति शिष्यीक-रोतीत्यर्थः, 'अनंते'ति विषयानन्तत्वात् 'अनुत्तरे'त्ति सर्वप्रधानत्वात्, यावत्करणादिदं दृश्यं–'निव्वाधाए' कटकुड्यादिनाऽप्रतिहतत्वात् 'निरावरणे' क्षायिकत्वात् 'कसिणे' सकलार्थ-ग्राहकत्वात् 'पडिपुन्ने' अंशेनापि स्वकीयेनान्यूनत्वादिति ।

**मू. (६८०)** *इत्थी वा पुरिसे वा सुविणंते एगं महं हयपंतिं वा गयपंतिं वा जाव वसभपंतिं वा पासमाणे पासति दुरूहमाणे दुरूहति दुरूढमिति अप्पाणं मन्नति तक्खणामेव बुज्झति तेणेव भवग्गहणेणं सिज्झति जाव अंतं करेति ।*

*इत्थी वा पुरिसेवा सुविणंते एगं महं दामिणिं पाईणपडिणायतं दुहओ समुद्दे पुट्ठं पासमाणे पासति संवेल्लेमाणे संवेल्लेइ संवेल्लियमिति अप्पाणं मन्नति तक्खणामेव अप्पाणं बुज्झति तेणेव भवग्गहणेणं जाव अंतं करेति ।*

*इत्थी वा पुरिसे वा एगं महं रज्जुं पाईणपडिणायतं दुहओ लोगंते पुट्ठं पासमाणे पासति छिंदमाणे छिंदति छिन्नमिति अप्पाणं मन्नति तक्खणामेव जाव अंतं करेति ।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं किण्हसुत्तगं वा जाव सुक्कलसुत्तगं वा पासमाणे पासति उग्गोवेमाणे उग्गोवेइ उग्गोवितमिति अप्पाणं मन्नति तक्खणामेव जाव अंतं करेति ।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं अयरासिं वा तंबरासिं तउयरासिं वा सीसगरासिं वा पासमाणे पासति दुरूहमाणे दुरूहति दुरूढमिति अप्पाणं मन्नति तक्खणामेव बुज्झति दोच्चे भवग्गहणे सिज्झति जाव अंतं करेति ।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं हिरन्न रासिं वा सुवन्नरासिं वा रयणरासिं वा वइररासिं वा पासमाणे पासइ दुरूहमाणे दुरूहइ दुरूढमिति अप्पाणं मन्नति तक्खणामेव बुज्झति तेणेव भवग्गहणेणं सिज्झति जाव अंतं करेति ।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं तणरासिं वा जहा तेयनिसग्गे जाव अवकररासिं वा पासमाणे पासति विक्खिरमाणे विक्खिरइ विकिण्णमिति अप्पाणं मन्नति तक्खणामेव बुज्झति तेणेव जाव अंतं करेति ।*

*इत्थी वा पुरिसे वा सुविणंते गं महं सरथंभं वा वीरिणथंभं वा वंसीमूलथंभं वा वल्लीमूलथंभं वा पासमाणे पासइ उम्मूलेमाणे उम्मूलेइ उम्मूलितमिति अप्पाणं मन्नइ तक्खणामेव बुज्झति तेणेव जाव अंतं करेति ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*इत्थी वा पुरिसे वा सुविणंते एगं महं खीरकुंभं वा दधिकुंभं वा घयकुंभं वा मधुकुंभं वा पासमाणे पासति उप्पाडेमाणे उप्पाडेइ उप्पाडितमिति अप्पाणं मन्नति तक्खणामेव बुज्झति तेणेव जाव अंतं करेइ।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं सुरावियडकुंभं वा सोवीरवियडकुंभं वा तेल्लकुंभं वा वसाकुभं वा पासमाणे पासति भिंदमाणे भिंदति भिन्नमिति अप्पाणं मन्नति तक्खणामेव बुज्झति दोच्चेणं भव० जाव अंतं करेति।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं पउमसरं कुसुमियं पासमाणे पासति ओगाहमाणे ओगाहति ओगाढमिति अप्पाणं मन्नति तक्खणामेव० तेणेव जाव अंतं करेति।*

*इत्थी वा जाव सुविणंते एगं महं सागरं उम्मीवीयीजाव कलियं पासमाणे पासति तरमाणे तरति तिन्नमिति अप्पाणं मन्नति तक्खणामेव जाव अंतं करेति।*

*इत्थी वा जाव सुविणंते एगं महं भवमं सव्वरयणामयं पासमाणे पासति (दुरूहमाणे दुरूहति दुरूढमिति०) अणुप्पविसमाणे अणुप्पविसति अमुप्पविट्ठमिति अप्पाणं मन्नति तक्खणामेव बुज्झति तेणेव जाव अंतं करेति।*

*इत्थी वा पुरिसे वा सुविणंते एगं महं विमाणं सव्वरयणामयं पासमाणे पासइ दुरूहमाणे दुरूहति दुरूढमिति अप्पाणं मन्नति तक्खणामेव बुज्झति तेणेव जाव अंतं करेंति॥*

**वृ.** 'सुविणंते'त्ति 'स्वप्नान्ते' स्वप्नस्य विभागे अवसाने वा 'गयपंतिं वा' इह यावत्करणादिदं दृश्यं–'नरपंतिं वा एवं किन्नरकिंपुरिसमहोरगगंधव्व'त्ति 'पासमाणे पासइ'ति पश्यन् पश्यत्तागुणयुक्तः सन् 'पश्यति' अवलोकयति।

'दामिणि'न्ति गवादीनां बन्धनविशेषभूतां रज्जुं 'दुहओ' द्वयोरपि पार्श्वयोरित्यर्थः 'संवेल्लेमाणे'त्ति संवेल्लयन् संवर्त्तयन् 'संवेल्लियमिति अप्पाणं मन्नइ'त्ति संवेल्लितान्तामित्यात्मना मन्यते विभक्ति-परिणामादिति 'उग्गोवेमाणे'त्ति उद्गोपयन् विमोहयन्नित्यर्थ 'जहा तेयनिसग्ग'त्ति यथा गोशालके, अनेन चेदं सूचितं।

'पत्तरासीति वा तयारासीति वा भुसरासीति वा तुसरासीति वा गोमयरासीति व'त्ति 'सुरावियडकुंभं'ति सुरारूपं यद् विकटं–जलं तस्य कुम्भो यः स तथा 'सोवीरगवियडकुंभं व'त्ति इह सौवीरकं–काञ्जिकमिति॥ अनन्तरं स्वप्ना उक्तास्ते चाचक्षुर्विषया इत्यचक्षुर्विषयितासाधर्म्येण गन्धपुद्गलवक्त- व्यतामभिधातुमाह–

**मू. (६८१)** *अह भंते! कोट्ठपुडाण वा जाव केयतीपुडाण वा अणुवायंसि उब्भिज्जमाणाण वा जाव ठाणाओ वा ठाणं संकामिज्जमाणाणं किं कोट्ठे वाति जाव केयई वाइ?*

*गोयमा! नो कोट्ठे वाति जाव नो केयई वाती घाणसहगया पोग्गला वाति। सेवं भंते २ त्ति*

**वृ.** 'अहे'त्यादि, 'कोट्ठपुडाण व'त्ति कोष्ठे यः पच्यते वाससमुदायः स कोष्ठ एव तस्य पुटाः–पुटिकाः कोष्ठपुटास्तेषां, यावत्करणादिदं दृश्यं–'पत्तपुडाण वा चोयपुडाण वा तगरपुडाण वे'त्यादि, तत्र पत्राणि–तमालपत्राणि 'चोय'त्ति त्वत् तगरं च–गन्धद्रव्यविशेषः 'अणुवायंसि' अनुकूलो वातो यत्र देशे सोऽनुवातोऽतस्तत्र यस्माद्देशाद्वायुरागच्छति तत्रेत्यर्थः।

'उब्भिज्जमाणाण व'त्ति प्राबल्येनोर्द्ध्वं वा दीर्यमाणानाम्, इह यावत्करणादिदं दृश्यं–'निब्भिज्जमाणाण वा' प्राबल्याभावेनाधो वा दीर्यमाणानाम् 'उक्करिज्जमाणाण वा विक्करिज्जमाणाण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा'इत्यादि प्रतीतार्थाश्चैते शब्दाः, 'किं कोट्ठे वाइ'त्ति कोष्ठो—वाससमुदायो वाति—दूरादागच्छति, आगत्य घ्राणग्राह्यो भवतीति भावः, 'घाणसहगय'त्ति घ्रायत इति घ्राणो—गन्धो गन्धोपलम्भक्रिया वा तेन सह गताः—प्रवृत्ता ये पुद्गलास्ते घ्राणसहगताः गन्धगुणोपेता इत्यर्थः ॥

शतकं—१६ उद्देशकः—६ समाप्तः

## —: शतकं—१६ उद्देशकः—७ :—

**वृ.** षष्ठोद्देशकान्ते गन्धपुद्गला वान्तीत्युक्तं, ते चोपयोगेनावसीयन्त इत्युपयोगस्तद्विशेषभूता पश्यत्ता च सप्तमे प्ररूप्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्—

**मू. (६८२)** *कतिविहे णं भंते ! उवओगो पन्नत्ते ?, गोयमा ! दुविहे उवओगे पन्नत्ते एवं जहा उवयोगपदं पन्नवणाए तहेव निरवसेसं भाणियव्वं, पासणयापदंच निरवसेसं नेयव्वं। सेवं भंते ! सेवं भंतेत्ति ॥*

**वृ.** 'कइविहे ण'मित्यादि, 'एवं जहे'त्यादि, उपयोगपदं प्रज्ञापनायामेकोनत्रिंशत्तमं, तच्चैवं—'तंजहा—सागारोवओगे य अनागारोवओगे य।

सागारोवओगे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! अट्ठविहे पन्नत्ते, तंजहा—आभिनिबोहियनाणसागारोवओगे. सुयनाणसागारोवओगे एवं ओहिनाण० मणपज्जवनाण० केवलनाण० मतिअन्नाणसागारोवओगे सुयअन्नाणसागारोवओगे विभंगनाणसागारोवओगे।

अनागारावओगे णं भंते ! कतिविहे पन्नत्ते ?, गोयमा ! चउव्विहे पन्नत्ते, तंजहा—चक्खुदंसणअनागारोवओगे अचक्खुदंसणआनागारोवओगे ओहिदंसणअनागारोवओगे केवलदंसणअनागारोवओगे'इत्यादि, एतच्च व्यक्तमेव, 'पासणयापयं च नेयव्वं'ति पश्यत्तापमिह स्थानेऽध्येतव्यमित्यर्थः, तच्च प्रज्ञापनायां त्रिंशत्तमं, तच्चैवं—

'कतविहा णं भंते ! पासणया पन्नत्ता ?, गोयमा ! दुविहा पासणया पन्नत्ता, तंजहा—सागारपासणया अनागारपासणया, सागारपासणया णं भंते ! कतिविहा पन्नत्ता ?, गोयमा ! छव्विहा प०, तं०—सुयनाणसागारपासणया एवं ओहिनाण० मणनाण० केवलनाण० सुयअन्नाण० विभंगनाणसागारपासणया, अनागारपासाणया णं भंते ! । कतिविहा प० ?,

गोयमा ! तिविहा पन्नत्ता, तंजहा—चक्खुदंसणअनागारपासणया ओहिदंसणअणागार-पासणया केवलदंसणअनागारपासणया'इत्यादि, अस्य चायमर्थः—'पास-णय'त्ति पश्यतो भावः पश्यत्ता—बोधपरिणामविशेषः, ननु पश्यत्तोपयोगयोस्तुल्ये साकाराना-कारभेदत्वे कः प्रतिविशेषः उच्यते, यत्र त्रैकालिकोऽवबोधोऽस्ति तत्र पश्यत्ता यत्र पुनर्वर्त्तमान कालस्त्रैकालिकश्च तत्रोपयोग इत्ययं विशेषः।

अत एव मतिज्ञानं मत्यज्ञानं च साकारपश्यत्तायां नोक्तं, तस्योत्पन्नाविनष्टार्थग्राहकत्वेन साम्प्रतकालविषयत्वात्, अथ कस्मादनाकारपश्यत्तायां चक्षुर्दर्शनमधीतं न शेषेन्द्रियदर्शनं, उच्यते, पश्यत्ता प्रकृष्टमीक्षणमुच्यते 'दृशिर प्रेक्षणे' इति वचनात्, प्रेक्षणं च चक्षुर्दर्शनस्यैवास्ति न शेषाणां, चक्षुरिन्द्रियोपयोगस्य शेषेन्द्रियोपयोगापेक्षयाऽल्पकालत्वात्, यत्र चोपयोगोऽल्पकालस्तत्रेक्षणस्य प्रकर्षो झटित्यर्थपरिच्छेदात्, तदेवं चक्षुर्दर्शनस्यैव पश्यत्ता नेतरस्येति, अयं चार्थ प्रज्ञापनातो विशेषेणावगम्य इति ॥

शतकं—१६ उद्देशकः—७ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं—१६ उद्देशकः—८ :—

**वृ.** सप्तमे उपयोग उक्तः, स च लोकविषयोऽपीतिसम्बन्धादष्टमे लोकोऽभिधियते, तस्य चेदमादिसूत्रम्—

**मू. (६८३)** *किंमहालए णं भंते! लोए पन्नत्ते?, गोयमा! महतिमहालए जहा बारसमसए तहेव जाव असंखेज्जाओ जोयणकोडाकोडीओ परिक्खेवेणं, लोयस्स णं भंते! पुरच्छिमिल्ले चरिमंते किंजीवा जीवदेसा जीवपएसा अजीवा अजीवदेसा अजीवपएसा?, गोयमा! नो जीवा जीवदेसावि जीवपएसावि अजीवावि अजीवदेसावि अजीवपएसावि।*

*जे जीवदेसा ते नियमं एगिंदियदेसा य अहवा एगिंदियदेसा य बेइंदियस्स य देसे एवं जहा दसमसए अग्गेयीदिसा तहेव नवरं देसेसु अनिंदियाणं आइल्लविरहिओ।*

*जे अरूवी अजीवा ते छव्विहा, अद्धासमयो नत्थि, सेसं तं चेव सव्वं निरवसेसं।*

*लोगस्स णं भंते! दाहिणिल्ले चरिमंते किं जीवा०?, एवं चेव, एवं पच्चच्छिमिल्लेवि, उत्तरिल्लेवि, लोगस्स णं भंते! उवरिल्ले चरिमंते किं जीवा०?, पुच्छा, गोयमा! नो जीवा जीवदेसावि जाव अजीवपएसावि।*

*जे जीवदेसा ते नियमं एगिंदियदेसा य अनिंदियदेसा य अहवा एगिंदियदेसा य अनिंदिय० बेंदियस्स य देसे, अहवा एगिंदियदेसा य अनिंदियदेसा य बेंदियाण य देसा, एवं मज्झिल्लविरहिओ जाव पंचिंद०, जे जीवप्पएसा ते नियमं एगिंदियप्पएसा य अनिंदयप्पएसा य अहवा एगिंदियप्पएसा य अनिंदियप्पएसा य बेंदियस्सप्पदेसा य अहवा एगिंदियपएसा य अनिंदियप्पएसा य बेइंदियाण य पएसा, एवं आदिल्लविरहिओ जाव पंचिंदियाणं, अजीवा जहा दसमसए तमाए तहेव निरवसेसं*

*लोगस्स णं भंते! हेट्ठिल्ले चरिमंते किं जीवा० पुच्छा?, गोयमा! नो जीवा जीवदेसावि जाव अजीवप्पएसावि, जे जीवदेसा ते नियमं एगिंदियदेसा अहवा एगिंदियदेसा य बेइंदियस्स देसे अहवा एगिंदियदेसा य बेंदियाण य देसा एवं मज्झिल्लविरहिओ जाव अनिंदियाणं पदेसा आइल्लविरहिया सव्वेसिं जहा पुरच्छिमिल्ले चरिमंते तहेव, अजीवा जहेव उवरिल्ले चरिमंते तहेव।*

*इमिसे णं भंते! रयणप्पमाए पुढवीए पुरच्छिमिल्ले चरिमंते किं जीवा०? पुच्छा, गोयमा नो जीवा एवं जहेव लोगस्स तहेव चत्तारिवि चरिमंता जाव उत्तरिल्ले, उवरिल्ले तहेव जहा दसमसए विमला दिसा तहेव निरवसेसं, हेट्ठिल्ले चरिमंते तहेव नवरं देसे पंचिंदिएसु तियभंगोत्ति सेसं तं चेव, एवं जहा रयणप्पभाए चत्तारि चरमंता भणिया एवं सक्करप्पभाएवि उवरि महेट्ठिल्ला जहा रयणप्पभाए हेट्ठिल्ले।*

*एवं जाव अहे सत्तमाए, एवं सोहम्मस्सवि जाव अच्चुयस्स गेविज्जविमाणाणं एवं चेव, नवरं उवरिमहेट्ठिल्लेसु चरमंतेसु देसेसु पंचिंदियाणवि मज्झिल्लविरहिओ चेव एवं जहा गेवेज्जविमाणा तहा अनुत्तरविमाणावि ईसिपब्भारावि ॥*

**वृ.** 'किंमहालए ण'मित्यादि, 'चरमंते'त्ति चरमरूपोऽन्तश्चरमान्तः, तत्र चासङ्ख्यातप्रदेशावगाहित्वाज्जीवस्यासम्भव इत्यत आह— 'नोजीवे'त्ति, जीवदेशादीनां त्वेकप्रदेशेऽप्यवगाहः संभवतीत्युक्तं 'जीवदेसावी'त्यादि 'अजीवावि'त्ति पुद्गलस्कन्धाः 'अजीवदेसावि'त्ति धर्मास्तिकायादिदेशाः स्कन्धदेशाश्च तत्र संभवन्ति, एवमजीवप्रदेशा अपि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ जीवादिदेशादिषु विशेषमाह–'जे जीवे' त्यादि, ये जीवदेशास्ते पृथिव्याद्येकेन्द्रियजीवानां देशास्तेषां लोकान्तेऽवश्यं भावादित्ये विकल्पः, 'अहव'त्ति प्रकारान्तरदर्शनार्थः, एकेन्द्रियाणां बहुत्वाद्वहवस्तत्र तद्देशा भवन्ति, द्वीन्द्रियस्य च कादाचित्कत्वात्कदाचिद्देशः स्यादित्येको द्विकयोगविकल्पः, यद्यपि हि लोकान्ते द्वीन्द्रियो नास्ति तथाऽपि यो द्वीन्द्रिय एकेन्द्रियेषूत्पित्सुर्मारणान्तिकसमुद्घातं गतस्तमाश्रित्यायं विकल्प इति।

'एवं जहे'त्यादि, यथा दशमशते आग्नेयीं दिशमाश्रित्योक्तं तथेह पूर्वचरमान्तमाश्रित्य वाच्यं, तच्चेदम्–'अहवा एगिंदियदेसा य बेइंदियस्स य देसा अहवा एगिंदियदेसा य बेइंदियाण य देसा अहवा एगिंदियदेसा य तेइंदियस्स य देसे' इत्यादि, यः पुनरिह विशेषस्तद्दर्शनायाह–'नवरं अनिंदियाण'मित्यादि, अनिन्द्रियसम्बन्धिनि देशविशेष भङ्गकत्रये 'अहवा एगिंदियदेसा य अनिंदियस्स देसे' इत्येवं रूपः प्रथमभङ्गको दशमशते आग्नेयीप्रकरणेऽभिहितोऽपीह न वाच्यो, यतः केवलिसमुद्घाते कपाटाद्यवस्थायां लोकस्य पूर्वचरमान्ते प्रदेशवृद्धिहानिकृतलोकदन्तकसद्भावेनानिन्द्रियस्य बहूनां देशानां सम्भवो न त्वेकस्येति, तथाऽऽग्नेय्यां दशविधेष्वरूपिद्रव्येषु धर्म्माधर्म्माकाशास्तिकायद्रव्याणां तस्यामभावात्सप्तविधा अरूपिण उक्ताः लोकस्य पूर्वचरमान्तेष्वद्धासमयस्याप्यभावात् षड्विधास्ते वाच्याः, अद्धासमयस्य तु तत्राभावः समयक्षेत्र एव तद्भावात्, अत एवाह–

'जे अरूवी अजीवा ते छव्विहा अद्धासमयो नत्थि'त्ति, 'उवरिल्ले चरिमंते'त्ति, अनेन सिद्धोपलक्षित उपरितनचरिमान्तो विवक्षितस्तत्र चैकेन्द्रियदेशा अनिन्द्रियदेशाश्च सन्तीतिकृत्वाऽऽह–'जे जीवे'त्यादि, इहायमेको द्विकसंयोगः, त्रिकसंयोगेषु च द्वौ द्वौ कार्यौ, तेषु हि मध्यमभङ्ग 'अहवा एगिंदियदेसा य अनिंदियदेसा य बेइंदियस्स य देसा' इत्येवंरूपो नास्ति, द्वीन्द्रियस्य च देशा इत्यस्यासम्भवाद्, यतो द्वीन्द्रियस्योपरितनचरिमान्ते मारणान्तिक- समुद्घातेन गतस्यापि देश एव तत्र संभवति न पुनः प्रदेशवृद्धिहानिकृतलोकदन्तकशादनेकप्रतरात्मकपूर्वचरमान्तवद्देशाः, उपरितनचरिमान्तस्यैकप्रतररूपतया लोकदन्तकाभावेन देशानेकत्वाहेतुत्वादिति, अत एवाह–'एवं मज्झिल्लविरहिओ'त्ति त्रिकभङ्गक इति प्रक्रमः, उपरितनचरिमान्तापेक्षया जीवप्रदेशप्ररूपणायामेवं 'आइल्लविरहिओ'त्ति यदुक्तं तस्यायमर्थः–इह पूर्वोक्ते भङ्गकत्रये प्रदेशापेक्षया 'अहवा एगिंदियपएसा य अनिंदियप्पएसा य बेइंदियस्सप्पएसे' इत्ययं प्रथमभङ्गको न वाच्यो, द्वीन्द्रियस्य च प्रदेश इत्यस्यासम्भवात्, तदसम्भवश्च लोकव्यापकावस्थानिन्द्रियवर्ज्जजीवानां यत्रैकप्रदेशस्तत्रासङ्ख्यातानामेव तेषां भावादिति, 'अजीवा जहा दसमसए तमाए'त्ति अजीवानाश्रित्य यथा दशमशते 'तमाए'त्ति तमाभिधानां दिशमाश्रित्य सूत्रमधीतं तथेहोपरितनचरमान्तमाश्रित्य वाच्यं, तच्चैवं–जे अजीवा ते दुविहा पन्नत्ता, तंजहा–रूवीअजीवा य अरूविअजीवा य, जे रूविअजीवा ते चउव्विहा पन्नत्ता, तंजहा–खंधा ४, जे अरूविअजीवा ते छव्विहा पन्नत्ता, तंजहा–नो धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्सप्पएसा' एवमधर्म्माकाशास्तिकाययोरपीति ॥

'लोगस्स णं भंते ! हिट्ठिल्ले'इत्यादि, इह पूर्वचरमान्तवद्भङ्गाः कार्या, नवरं तदीयस्य भङ्गकत्रयस्य मध्यात् 'अहवा एगिंदियदेसा य बेइंदियस्स य देसा' इत्येवंरूपो मध्यमभङ्गकोऽत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्जनीयः, उपरितनचरिमान्तप्रकरणोक्तयुक्तेस्त-स्यासम्भवाद्, अत एवाह–'एवंमज्झिल्लविरहि-ओ'त्ति, देशभङ्गका दर्शिताः अथ प्रदेशभङ्गक- दर्शनायाह–'पएसा आइल्लविरहिया सव्वेसिं जहा पुरच्छिमिल्ले चरिमंते'त्ति, प्रदेशचिन्ताया- माद्यभङ्गकरहिताः प्रदेशा वाच्या इत्यर्थः आद्यश्च भङ्गक एकवचनान्तप्रदेशशब्दोपेतः स च प्रदेशानामधश्चरमान्तेऽपि बहुत्वान्न संभवति संभवति च 'अहवा एगिंदियपएसा य बेइंदियस्स पएसा अहवा एगिंदियप्पएसा बेइंदियाण य पएसा'इत्येतद्द्वयं, 'सव्वेसिं'ति द्वीन्द्रियादीनामनिन्द्रिया- न्तानाम् 'अजीवे'त्यादि व्यक्तमेव ॥

चरमान्ताधिकारादेवदमाह– 'इमीसे ण'मित्यादि ॥ 'उवरिल्ले जहा दसमसए विमला दिसा तहेव निरवसेसं'ति दशमशते यथा विमला दिगुक्ता तथैव रत्नप्रभोपरितनचरमान्तो वाच्यो निरवशेषं यथा भवतीति, स चैवम्–'इमीसे णं भंते ! रयणप्पभाए पुढवीए उवरिल्ले चरिमन्ते किं जीवा० ६ ?, गोयमा ! नो जीवा' एकप्रदेशप्रतरात्मकत्वेन तत्र तेषामनवस्थानात् 'जीवदेसावि ५, जे जीवदेसा ते नियमा एगिंदियदेसा' सर्वत्र तेषां भावात् 'अहवा एगिंदियदेसा य बेइंदियस्स य देसे १ अहवा एगिंदियदेसा य बेइंदियस्स य देसा २ अहवा एगिंदियदेसा य बेइंदियाण य देसा ३, रत्नप्रभा हि द्वीन्द्रियाणामाश्रयः, ते चैकेन्द्रियापेक्ष-याऽतिस्तोकास्ततश्च तदुपरितनचरिमान्ते तेषां कदाचिद्देशः स्याद्देशा वेति, एवं त्रीन्द्रियादिष्व- प्यनिन्द्रियान्तेषु, तथा 'जे जीवप्पएसा ते नियमा एगिंदियपएसा अहवा एगिंदियपएसावि बेइंदियस्स पएसा १ अहवा एगिंदियपएसा बेइंदियाण य पएसा २' एवं त्रीन्द्रियादिष्वप्यनीन्द्रियान्तेषु, तथा–

'जे अजीवा ते दुविहा पन्नत्ता, तंजहा–रूविअजीवा य अरूविअजीवा य, जे रूविअजीवा ते चउव्विहा पन्नत्ता, तंजहा–खंधा जाव परमाणुपोग्गला, जे अरूवी अजीवा ते सत्तविहा पन्नत्ता, तंजहा–नो धम्मत्थिकाए धम्मत्थिकास्स देसे धम्मत्थिकायस्स पएसा एवमधम्मत्थिकायस्सि आगासत्थिकायस्सवि अद्धासमए'त्ति अद्धासमयो हि मनुष्यक्षेत्रान्तवर्त्तिनि रत्नप्रभोपरितनचरिमा-न्तेऽस्त्येवेति, 'हेट्ठिलेचरिमंते' इति यथाऽधश्चरमान्तो लोकस्योक्तः एवं रत्नप्रभापृथिव्या अप्यसाविति स चान्तरोक्त एव, विशेषस्त्वयं–लोकाधस्तनचरमान्ते द्वीन्द्रियादीनां देशभङ्गकत्रयं मध्यमरहितमुक्तं इह तु रत्नप्रभाऽधस्तनचरमान्ते पञ्चेन्द्रियाणां परिपूर्णमेव तद्वाच्यं, शेषाणां तु द्वीन्द्रियादीनां मध्यमरहितमेव, यतो रत्नप्रभाऽधस्तनचरमान्ते देवपञ्चेन्द्रियाणां गमागमद्वारेण देशो देशाश्च संभवन्त्यतः पञ्चेन्द्रियाणां तत्तत्र परिपूर्णमेवास्ति, द्वीन्द्रियाणां तु रत्नप्रभाऽधस्तन-चरिमान्ते मारणान्तिकसमुद्घातेन गतानामेव तत्र देश एव संभवति न देशाः तस्यैकप्रतररूपत्वेन देशानेकत्वाहेतुत्वादिति तेषां तत्तत्र मध्यमरहितमेवेति, अत एवाह–

'नवरं देसे'इत्यादि, 'चत्तारि चरमंत'त्ति पूर्वपश्चिमदक्षिणोत्तररूपाः 'उवरिमहेट्ठिल्ला जहा रयणप्पभाए हेट्ठिल्ले'त्ति शर्कराप्रभाया उपरितनाधस्तनचरमान्तौ रत्नप्रभाया उपरित-नाधस्तनचरमान्तवद्वाच्यौ, द्वीन्द्रियादिषु पूर्वोक्तयुक्तेर्मध्यमभङ्गरहितं पञ्चेन्द्रियेषु तु परिपूर्णं देशभङ्गकत्रयं, प्रदेशचिन्तायां तु द्वीन्द्रियादिषु सर्वेष्वाद्यभङ्गकरहितत्वेन शेषभङ्गकद्वयं, अजीवचिन्तायां तु रूपिणां चतुष्कमरूपिणां त्वद्धासमयस्य तत्राभावेन षट्कं वाच्यमिति भावः

अथ शर्कराप्रभातिदेशेन शेषपृथिवीनां सौधर्मादिदेवलोकानां ग्रैवेयकविमानानां च प्रस्तुतवक्तव्यतामाह–'एवं जाव अहेसत्तमाए'इत्यादि, ग्रैवेयकविमानेषु तु यो विशेषस्तं

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

दर्शयितुमाह–'नवर'मित्यादि, अच्युतान्तदेवलोकेषु हि देवपञ्चेन्द्रियाणां गमागमसद्भावात् उपरितनाधस्ततचरमान्तयोः पञ्चेन्द्रियेषु देशानाश्रित्य भङ्गकत्रयं संभवति, ग्रैवेयकेषु विमानेषु तु देवपञ्चेन्द्रियगमागमाभावाद् द्वीन्द्रियादिष्विव पञ्चेन्द्रिययेष्वपि मध्यमभङ्गकरहितं शेषभङ्गकद्वयं तयोर्भवतीति।

**मू. (६८४)** *परमाणुपोग्गले णं भंते! लोगस्स पुरच्छिमिल्लाओ चरिमंताओ पच्चच्छिमिल्लं चरिमंतं एगसमएणं गच्छति पच्चच्छिमिल्लाओ चरिमंताओ पुरच्छिमिल्लं चरिमंतं एगसमएणं गच्छति दाहिणिल्लाओ चरिमंताओ उत्तरिल्लं० उत्तरिल्लाओ० दाहिणिल्लं० उवरिल्लाओ चरमंताओ हेट्ठिल्लं चरिमंतं एवं जाव गच्छति हेट्ठिल्लाओ चरिमंताओ उवरिल्लं चरिमंतं एगसमएणं गच्छति? हंता गोयमा! परमाणुपोग्गले णं लोगस्स पुरिच्छमिल्लं तं चेव जाव उवरिल्लं चरिमंतं गच्छति॥*

**वृ.** चरमाधिकारादेवेदमपरमाह–'परमाणु'इत्यादि, इदं च गमनसामर्थ्यं परमाणोस्तथास्वभावत्वादिति मन्तव्यमिति॥

अनन्तरं परमाणोः क्रियाविशेष उक्त इति क्रियाधिकारादिदमाह–

**मू. (६८५)** *पुरिसे णं भंते! वासं वासति नो वासतीति हत्थं वा पायं वा बाहुं वा उरुं वा आउट्टावेमाणे वा पसारेमाणे वा कतिकिरिए?*

*गोयमा! जावं च णं से पुरिसे वासं वासति वासं नो वासतीति हत्थं वा जाव ऊरुं वा आउट्टावेति वा पसारेति वा तावं च णं से पुरिसे काइयाए जाव पंचहिं किरियाहिं पुट्ठे॥*

**वृ.** 'पुरिसे ण'मित्यादि, 'वासं वासइ' वर्षो–मेघो वर्षति नो वा वर्षो वर्षतीति ज्ञापनार्थमिति शेषः, अचक्षुरालोके हि वृष्टिराकाशे हस्तादिप्रसारणादेव गम्यते इतिकृत्वा हस्तादिकं आकुण्टयेदवा प्रसारयेद्वाऽऽदित एवेति॥ आकुण्टनादिप्रस्तावादिदमाह–

**मू. (६८६)** *देवे णं भंते! महड्डिए जाव महेसक्खे लोगंते ठिच्चा पभू अलोगसि हत्थं वा जाव ऊरुं वा आउंटावेत्तए वा पसारेत्तए वा?, नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते! एवं वुच्चइ देवे णं महड्डीए जाव लोगंते ठिच्चा नो पभू अलोगंसि हत्थं वा जाव पसारेत्तए वा?*

*जीवाणं आहारोवचिया पोग्गला बोंदिचिया पोग्गला कलेवरचिया पोग्गला पोग्गलामेव पप्प जीवाण य अजीवाण य गतिपरियाए आहिज्जइ, अलोए णं नेवत्थि जीवा नेवत्थि पोग्गला से तेणट्ठें जाव पसारेत्तए वा। सेवं भंते! २ त्ति॥*

**वृ.** 'देवे ण'मित्यादि, 'जीवाणं आहारोवचिया पोग्गल'त्ति जीवानां जीवानुगता इत्यर्थः आहारोपचिता–आहाररूपतयोपचिताः 'बोंदिचिया पोग्गल'त्ति अव्यक्तावयवशरीररूपतया चिताः 'कडेवरचिया पोग्गल'त्ति शरीररूपतया चिताः, उपलक्षणत्वाच्चास्य उच्छ्वासचिताः पुद्गला इत्याद्यपि द्रष्टव्यं, अनेन चेदमुक्तं–जीवानुगामिस्वभावाः पुद्गला भवन्ति।

ततश्च यत्रैव क्षेत्रे जीवास्तत्रैव पुद्गलानां गति स्यात्, तथा 'पुग्गलामेव पप्प'त्ति पुद्गलानेव 'प्राप्य' आश्रित्य जीवानां च 'अजीवाण य' पुद्गलानां च गतिपर्यायो–गतिधर्म्मः 'आहिज्जइ'त्ति आख्यायते, इदमुक्तं भवति–यत्र क्षेत्रे पुद्गलास्तत्रैव जीवानां पुद्गलानां च गतिर्भवति, एवं चालोके नैव सन्ति जीवा नैव च सन्ति पुद्गला इति तत्र जीवपुद्गलानां गतिर्नास्ति, तदभावाच्चालोके देवो हस्ताद्याकुण्टयितुं प्रसारयितुं वा न प्रभुरिति॥

शतकं–१६ उद्देशकः–८ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## -: शतकं-१६ उद्देशकः-९ :-

**वृ.** अष्टमोद्देशके देववक्तव्यतोक्ता, नवमे तु बलेर्देवविशेषस्य सोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू.** *(६८७) कहिन्नं भंते ! बलिस्स वइरोयणिंदस्स वइरोयणरन्नो सभा सुहम्मा पन्नत्ता ?*

*गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं तिरियमसंखेज्जे जहेव चमरस्स जाव बायालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं बलिस्स वइरोयणिंदस्स वइ० २ रुयगिंदे नामं उप्पायपव्वए पन्नत्ते सत्तरस एक्कवीसे जोयणसए एवं पमाणं जहेव तिगिच्छिकूडस्स पासायवडेंसगस्सवि तं चेव पमाणं सीहासणं सपरिवारं बलिस्स परियारेणं अट्ठो तहेव नवरं रुयगिंदप्पभाइं*

*सेसं तं चेव जाव बलिचंचाए रायहाणीए अन्नेसिं च जाव रुयगिंदस्स णं उप्पायपव्वयस्स उत्तरेणं छक्कोडिसए तहेव जाव चत्तालीसं जोयणसहस्साइं ओगाहित्ता एत्थ णं बस्स वइरोयणिंदस्स वइरोयणरन्नो बलिचंचा नामं रायहाणी पन्नत्ता एगं जोयणसयसहस्सं पमाणं तहेव जाव बलिपेढस्स उववाओ जाव आयरक्खा सव्वं तहेव निरवसेसं नवरं सातिरेगं सागरोवमं ठिती पन्नत्ता सेसं तं चेव जाव बली वइरोयणिंदे बली २ । सेवं भंते २ जाव विहरति ॥*

**वृ.** 'कहि ण'मित्यादि, 'जहेव चमरस्स'त्ति यथा चमरस्य द्वितीयशताष्टमोद्देशकाभिहितस्य सुधर्म्मसभास्वरूपाभिधायकं सूत्रं तथा बलेरपि वाच्यं, तच्च तत एवावसेयम्, 'एवं पमाणं जहेव तिगिच्छिकूडस्स'त्ति यथा चमरसत्कस्य द्वितीयशताष्टमोद्देशकाभिहितस्यैव तिगिच्छिकूटाभिधानस्योत्पातपर्वतस्य प्रमाणमभिहितं तथाऽस्यापि रुचकेन्द्रस्य वाच्यं, एतदपि तत एवावसेयं ।

'पासायवडेंसगस्सवि तं चेव पमाणं'ति यत्प्रमाणं चमरसम्बन्धिनस्तिगिच्छिकूटाभिधानोत्पातपर्वतो परिवर्त्तिनः प्रासादावतंसकस्य तदेव बलिसत्कस्यापि रुचकेन्द्राभिधानोत्पातपर्वतोपरिवर्तिनस्तस्य, तदपि द्वितीयशतादेवावसेयं, 'सिंहासणं सपरिवारं बलिस्स परिवारेणं'ति प्रासादावतंसकमध्यभागे सिंहासनं बलिसत्कं बलिसत्कपरिवारसिंहासपनोपेतं वाच्यमित्यर्थः तदपि द्वितीयशताष्टमोद्देशकविवरणोक्तचमरसिंहासनन्यायेन वाच्यं, केवलं तत्र चमरस्य सामानिकासनानां चतुःषष्टि सहास्रणि आत्मरक्षासनानां तु तान्येव चतुर्गुणान्युक्तानि बलेस्तु सामानिकासनानां षष्टि सहस्राणि आत्मरक्षासनानां तु तान्येव चतुर्गुणानीत्येतावान् विशेषः ।

'अट्ठो तहेव नवरं रुयगिंदप्पभाइं'ति यथा तिगिच्छिकूटस्य नामान्वर्थाभिधायकं वाक्यं तथाऽस्यापि वाच्यं, केवलं तिगिच्छिकूटान्वर्थप्रश्नस्योत्तरे यस्मात्तिगिच्छिप्रभाण्युत्पलादीनि तत्र सन्ति तेन तिगिच्छिकूट इत्युच्यत इत्युक्तं इह तु रुचकेन्द्रप्रमाणि तानि सन्तीति वाच्यं, रुचकेन्द्रस्तु रत्नविशेष इति, तत्पुनरर्थतः सूत्रमेवमध्येयं-'से केणट्ठेणं भंते ! एवं वुच्चइ रुयगिंदे २ उप्पायपव्वए गोयमा ! रुयगिंदे णं बहूणि उप्पलाणि पउमाइं कुमुयाइं जाव रुयगिंदवण्णाइं रुयगिंदलेसाइं रुयगिंदप्पभाइं से तेणट्ठेणं रुयगिंदे २ उप्पायपव्वएत्ति

'तहेव जाव'त्ति यथा चमरचञ्चाव्यतिकरे सूत्रमुक्तमि- हापि तथैव वाच्यं, तच्चेदं-'पणपन्नं कोडीओ पन्नासं च सयसहस्साइं पन्नासं च सहस्साइं वीइवइत्ता इमं च रयणप्पभं पुढविं'ति 'पमाणं तहेव'त्ति यथा चमर चञ्चायाः, तच्चेदम्- 'एगं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं सोलस य सहस्साइं दोन्नि य सत्तावीसे जोयणसए तिन्नि य कोसे अट्ठावीसं च धनुसयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेरस य अंगुलाइं अद्धंगुलयं च किंचिविसेसाहियं परिक्खेवेणं पन्नत्तं' 'जाव वलिपेढस्स'त्ति नगरीप्रमाणाभिधानानन्तरं प्राकारतद्द्वारोपकारिकालयनप्रासादावतंसकसुधर्मसभाचैत्यभवनोपपातसभाह्रदाभिषेकसभाऽलङ्कारिकसभाव्यवायसभादीनां प्रमाणं स्वरूपं च तावद्वाच्यं यावद्बलिपीठस्य, तच्च स्थानान्तरादवसेयं, 'उववाओ'त्ति उपपातसभायां बलेरुपपातवक्तव्यता वाच्या।

सा चैवं-'तेणं कालेणं तेणं समएणं बली वइरोयणिंदे २ अहुणोववन्नमेत्तए समाणे पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ' इत्यादि, 'जाव आयरक्ख'त्ति इह यावत्करणादभिषेकोऽलङ्कारग्रहणं पुस्तकवाचनं सिद्धायतनप्रतिमाद्यर्चनं सुधर्म्मसभागमनं तत्रस्थस्य च तस्य सामानिका अग्रमहिष्यः पर्षदोऽनीकाधिपतयः आत्मरक्षाश्च पार्श्वतो निषीदन्तीति वाच्यं ०

एतद्वक्तव्यताप्रतिबद्धसमस्तसूत्रातिदेशायाह-'सव्वं तहेव निरवसेसं'ति, सर्वथा साम्यपरिहारार्थमाह-'नवरं'मित्यादि, अयमर्थः-चमरस्य सागरोपमं स्थितिः प्रज्ञप्तेत्युक्तं बलेस्तु सातिरेकं सागरोपमं स्थिति प्रज्ञप्तेति वाच्यमिति ॥

शतकं-१६ उद्देशकः-९ समाप्तः

## -: शतकं-१६ उद्देशकः-१० :-

**वृ.** नवमोद्देशके बलेर्वक्तव्यतोक्ता, बलिश्चावधिमानित्यवधेः स्वरूपं दशमे उच्यत इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (६८८)** *कतिविहे णं भंते! ओही पन्नत्ते?, गोयमा! दुविहा ओही प०, ओहीपदं निरवसेसं भाणियव्वं॥ सेवं भंते! सेवं भंते! जाव विहरति॥*

**वृ.** 'कइविहे ण'मित्यादि, 'ओहीपयं'ति प्रज्ञापनायायस्त्रिंशत्तमं, तच्चैवं-'तंजहा-भवपच्चइया खओवसमिया य, दोण्हं भवपच्चइया, तंजहा-देवाण य नेरइयाण य, दोण्हं खओवसमिया, तंजहा-माणुस्साणं पंचिंदियतिरिक्खजोणियाण य, इत्यादीति॥

शतकं-१६ उद्देशकः-१० समाप्तः

## -: शतकं-१६ उद्देशकाः-११-१४ :-

दशमेऽवधिरुक्तः, एकादशे त्ववधिमद्विशेष उच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (६८९)** *दीवकुमारा मं भंते! सव्वे समाहारा सव्वे समुस्सासनिस्सासा?, नो तिणट्ठे समट्ठे, एवं जहा पढमसए बितियउद्देसए दीवकुमाराणं वत्तव्वया तहेव जाव समाउया समुस्सासनिस्सासा।*

*दीवकुमाराणं भंते! कति लेस्साओ पन्नत्ताओ?, गोयमा! चत्तारि लेस्साओ पन्नत्ताओ, तंजहा-ण्हलेस्सा जाव तेउलेस्सा।*

*एएसि णं भंते! दीवकुमाराणं कण्हलेस्साणं जाव तेउलेस्साण य कयरे २ हिंतो जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवा दीवकुमारा तेउलेस्सा काउलेस्सा असंखेज्जगुणा नीललेस्सा विसेसाहिया कण्हलेस्सा विसेसाहिया।*

*एएसि णं भंते! दीवकुमाराणं कण्हलेसाणं जाव तेऊलेस्साण य कयरे ३ हिंतो अप्पड्ढि वा महड्ढिया वा?, गोयमा कण्हलेस्साहिंतो नीललेस्सा महड्ढिया जाव सव्वमहड्ढीया तेउलेस्सा*

*सेवं भंते! सेवं भंते! जाव विहरति॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (६९०) उदहिकुमारा णं भंते ! सव्वे समाहारा० एवं चेव, सेवं० ॥*

*मू. (६९१) एवं दिसाकुमारावि*

*मू. (६९२) एवं थणियकुमाराऽवि, सेवं भंते ! जाव विहरइ ॥*

वृ. 'दीवे'त्यादि ॥ एवमन्यदप्युद्देशकत्रयं पाठयितव्यमिति ॥

शतकं-१६ : उद्देशकाः ११-१२-१३-१४ समाप्तानि

॥१॥ सम्यकश्रुताचारविवर्जितोऽप्यहं, यदप्रकोपात्कृतवान् विचारणाम्।
अविघ्नमेतां प्रति षोडशं शतं, वाग्देवता सा भवताद्वरप्रदा ॥

**शतकं-१६ समाप्तं**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे षोडशकशतस्य अभयदेवसूरि विरचिता टीका समाप्ता ।**

## शतकं-१७

वृ. व्याख्यातं षोडशं शतं अथ क्रमायातं सप्तदशमारभ्यते, तस्य चादावेवोद्देशकसङ्ग्रहाय गाथा-

*मू. (६९३) नमो सुयदेवयाए भगवईए।*

*मू. (६९४) कुंजर संजय सेलेसि किरिय ईसाण पुढवि दग वाउ।*
*एगिंदिय नाग सुवन्न विज्जु वायु ऽग्गि सत्तरसे ॥*

वृ. 'कुंजरे'त्यादि, तत्र 'कुंजर'त्ति श्रेणिकसूनोः कूणिकराजस्य सत्कउदायिनामा हस्तिराजस्तत्प्रमुखार्थाभिधायकत्वात् कुञ्जर एव प्रथमोद्देशक उच्यते, एवं सर्वत्र १।

'संजय'त्ति संयताद्यर्थप्रतिपादको द्वितीयः २ 'सेलेसि'त्ति शैलेश्यादिवक्तव्यतार्थस्तृतीयः ३ 'किरिय'त्ति क्रियाद्यर्थाभिधायकश्चतुर्थः ४। 'ईसाण'त्ति ईशानेन्द्रवक्तव्यतार्थ पञ्चमः ५ 'पुढवि'त्ति पृथिव्यर्थ षष्ठः ६ सप्तमश्च ७ 'दग'त्ति अप्कायार्थोऽष्टमो नवमश्च ९।

'वाउ'त्ति वायुकायार्थो दशम एकादशश्च ११ 'एगिंदिय'त्ति एकेन्द्रियस्वरूपार्थो द्वादशः १२ 'नाग'त्ति नागकुमारवक्तव्यतार्थःयोदशः १३।

'सुवन्न'त्ति सुवर्णकुमारार्थानुगतश्चतुर्दशः १४ 'विज्जु'त्ति विद्युत्कुमाराभिधायकः पञ्चदशः १५ 'वाउ'त्ति वायुकुमारवक्तव्यतार्थ षोडश १६ 'अग्गि'त्ति अग्निकुमारवक्तव्यतार्थ सप्तदशः १७। 'सत्तरसे'त्ति सप्तदशशते एते उद्देशका भवन्ति।

### -: शतकं-१७ उद्देशकः-१ :-

*मू. (६९५) रायगिहे जाव एवं वयासी-उदायी णं भंते ! हत्थिराया कओहिंतो अनंतरं उव्वट्टित्ता उदायिहत्थिरायत्ताए उववन्नो ?, गोयमा ! असुरकुमारेहिंतो देवेहिंतो अनंतरं उव्वट्टित्ता उदायिहत्थिरायत्ताए उववन्ने।*

*उदायी णं भंते ! हत्थिराया कालमासे कालं किच्चा कहिं गच्छिहिति कहिं उववज्जिहिति ? गोयमा ! इमीसेणं रयणपभाए पुढवीए उक्कोससागरोवमट्ठितीयंसि निरयावासंसि नेरइयत्ताए उववज्जिहिति। से णं भंते ! तओहिंतो अनंतरं उव्वट्टित्ता कहिंग० कहिउ० ?, गोयमा ! महाविदेहे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वासे सिज्झिहिति जाव अंतं काहिति ।*

*भूयानंदे णं भंते ! हत्थिराया कओहिंतो अनंतरं उव्वट्टित्ता भूयानंदे हत्थिरायत्ताए एवं जहेव उदायी जाव अंतं काहिति ॥*

**वृ.** तत्र प्रथमोद्देशकार्थप्रतिपाद- नार्थमाह–'रायगिहे'इत्यादि ॥ 'भूयानंदे'त्ति भूतानन्दाभिदानः कूणिककराजस्य प्रधानहस्ती ।

अनन्तरं भूतानन्दस्योद्वर्त्तनादिका क्रियोक्तेति क्रियाऽधिकारादेवेदमाह–

**मू.** *(६९६) पुरिसे णं भंते ! तालमारुहइ ता० २ तालाओ तालफलं पचालेमाणे वा पवाडेमाणे वा कतिकिरिए ?, गोयमा ! जावंच णं से पुरिसे तालमारुहइ तालमा० २ तालाओ तालफलं पयालेइ वा पवाडेइ वा तावं च णं से पुरिसे काइयाए जाव पंचहिं किरियाहिं पुट्ठे, जेसिंपि णं जीवाणं सरीरेहिंतो तले निव्वत्तिए तलफले निव्वत्तिए तेऽवि णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठा ।*

*अहे णं भंते ! से तालप्फले अप्पणो गरुयत्ताए जाव पच्चोवयमाणे जाइं तत्थ पाणाइं जाव जीवियाओ ववरोवेति तए णं भंते ! से पुरिसे कतिकिरिए ?, गोयमा ! जावं च णं से पुरिसे तलप्फले अप्पणो गरुयत्ताए जाव जीवियाओ ववरोवेति तावं च णं से पुरिसे काइयाए जाव चउहिं किरियाहिं पुट्ठे ।*

*जेसिंपि णं जीवाणं सरीरेहिंतो तले निव्वत्तिए तेवि णं जीवा काइयाए जाव चउहिं किरियाहिं पुट्ठा, जेसिंपि णं जीवाणं सरीरेहिंतो तालप्फले निव्वत्तिए तेवि णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठा, जेविय से जीवा अहे वीससाए पच्चोवयमाणस्स उवग्गहे वट्टंति तेऽविय णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठा ।*

*पुरिसे णं भंते ! रुक्खस्स मूलं पचालेमाणे वा पवाडेमाणे वा कति किरिए ?, गोयमा ! जावं च णं से पुरिसे रुक्खस्स मूलं पचालेमाणे वा पवाडेमाणे वा तावं च णं से पुरिसे काइयाए जाव पंचहिं किरियाहिं पुट्ठे, जेसिंपिय णं जीवाणं सरीरेहिंतो मूले निव्वत्तिए जाव बीए निव्वत्तिए तेविय णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठा ।*

*अहे णं भंते ! से मूले अप्पणो गरुयत्ताए जाव जीवियाओ ववरोवेइ तओ णं भंते ! से पुरिसे कतिकिरिए ?, गोयमा ! जावं च णं से मूले अप्पणो जाव ववरोवेइ तावं च णं से पुरिसे काइयाए जाव चउहिं किरियाहिं पुट्ठे, जेसिंपिय णं जीवाणं सरीरेहिंतो कंदे निव्वत्तिए जाव बीए निव्वत्तिए तेवि णं जीवा काइयाए जाव चउहिं पुट्ठा ।*

*जेसिंपिय णं जीवाणं सरीरेहिंतो मूले निव्वत्तिए तेवि णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठा, जेविय णं से जीवा अहे वीससाए पच्चोवयमाणस्स उवग्गहे वट्टंति तेवि णं जीवा काइयाए जाव पंचहिं किरियाहिं पुट्ठा ।*

*पुरिसे णं भंते! रुक्खस्स कंदं पचालेइ०, गो० ! तावं च णं से पुरिसे जाव पंचहिं किरियाहिं पुट्ठे, जेसिंपि णं जीवाणं सरीरेहिंतो मूले निव्वत्तिए जाव बीए निव्वत्तीए तेवि णं जीवा जाव पंचहिं किरियाहिं पुट्ठा ।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अहे णं भंते ! से कंदे अप्पणो जाव चउहिं पुट्ठे, जेसिंपि णं जीवाणं सरीरेहिंतो मूले निव्वत्तिए खंधे नि० जाव चउहिं पुट्ठा।*

*जेसिंपि णं जीवाणं सरीरेहिंतो कंदे निव्वत्तिए तेवि य णं जीवा जाव पंचहिं पुट्ठा, जेवि य से जीवा अहे वीससाए पच्चोवयमाणस्स जाव पंचहिं पुट्ठा जहा खंधो एवं जाव बीयं ॥*

**वृ.** 'पुरिसे ण'मित्यादि, 'तालं'ति तालवृक्षं 'पचालेमाणे व'त्ति प्रचलयन् वा 'पवाडेमाणे व'त्ति अधःप्रपातयन् वा 'पंचहिं किरियाहिं पुट्ठे'त्ति तालफलानां तालफलाश्रितजीवानां च पुरुषः प्राणातिपातक्रियाकारी, यश्च प्राणातिपातक्रियाकारकोऽसावाद्यानामपीतिकृत्वा पञ्चभि क्रियाभिः स्पृष्ट इत्युक्तं १, येऽपि च तालफलनिर्वर्त्तकजीवास्तेऽपि च पञ्चक्रियास्तदन्यजीवान् सङ्घट्टनादिभिरपद्रावयन्तीतिकृत्वा २।

'अहे ण'मित्यादि, अथ पुरुषकृततालफलप्रचलनादेरनन्तरं तत्तालफलमात्मनो गुरुकतया यावत्करणात् सम्भारिकतया गुरुकसम्भारिकतयेति दृश्यं 'पच्चोवयमाणे'त्ति प्रत्यवपतत् यांस्तत्राकाशादौ प्राणादीन् जीविताद् व्यपरोपयति 'तओ णं'ति तेभ्यः सकाशात् कतिक्रियोऽसौ पुरुषः ?, उच्यते, चतुष्क्रियो, वधनिमित्तभावस्याल्पत्वेन तासां चतसृणा- मेव विवक्षणात्, तदल्पत्वं च यथा पुरुषस्य तालफलप्रचलनादौ साक्षाद्वधनिमित्तभावोऽस्ति न तथा तालफलव्यापादितजीवेष्वितिकृत्वा ३।

एवं तालनिर्वर्त्तकजीवा अपि ४, फलनिर्वर्त्तकास्तु पञ्चक्रिया एव, साक्षात्तेषां वधनिमित्तत्वात् ५, ये चाधोनिपततस्तालफलस्योपग्रहे-उपकारे वर्त्तन्ते जीवास्तेऽपि पञ्चक्रियाः, वधे तेषां निमित्तभावस्य बहुतरत्वात् ६।

एतेषां च सूत्राणां विशेषतो व्याख्यानं पञ्चमशतोक्तकाण्डक्षेप्तुपुरुषसूत्रादवसेयम्, एतानि च फलद्वारेण षट् क्रियास्थानान्युक्तानि, मूलादिष्वपि षडेव भावनीयानि, 'एवं जाव बीयं'ति अनेन कन्दसूत्राणीव स्कन्धत्वक्शालप्रवालपत्रपुष्पफलबीजसूत्राण्यध्येयानीति सूचितम्।

क्रियाधिकारादेव शरीरेन्द्रिययोगेषु क्रियाप्ररूपणार्थमिदमाह-

**मू. (६९७)** *कति णं भंते ! सरीरगा पन्नत्ता ?, गोयमा ! पंच सरीरगा पन्नत्ता, तंजहा-ओरालियजावकम्मए।*

*कति णं भंते ! इंदिया पं० ?, गोयमा ! पंच इंदिया पं० तं०-सोइंदिए जाव फासिंदिए।*

*कतिविहे णं भंते ! जोए प० ?, तिविहे जोए प० तं०-मणजोए वयजोए कायजोए*

*जीवे णं भंते ! ओरालियसरीरं निव्वत्तेमाणे कतिकिरिए ?, गोयमा ! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए, एवं पुढविक्काइएवि एवं जाव मणुस्से।*

*जीवा णं भंते ! ओरालियसरीरं निव्वत्तेमाणा कतिकिरिया ?, गोयमा ! तिकिरियावि चउकिरियावि पंचकिरियावि, एवं पुढविकाइया एवं जाव मणुस्सा।*

*एवं वेउव्वियसरीरेणवि दो दंडगा नवरं जस्स अत्थि वेउव्वियं एवं जाव कम्मगसरीरं, एवं सोइंदियं जाव फासिंदियं, एवं मणजोगं वयजोगं कायजोगं जस्स जं अत्थि तं भाणियव्वं, एए एगत्तपुहुत्तेणं छव्वीसं दंडगा ॥*

**वृ.** 'कति णं भंते !' इत्यादि, तत्र 'जीवे णं भंते' इत्यादौ 'सिय तिकिरिए सिय चउकिरिए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिय पंचकिरिए'त्ति यदा औदारिकशरीरं परपरितापाद्यभावेन निर्वर्त्तयति तदा त्रिक्रियः यदा तुपरपरितापं कुर्वस्तन्निर्वर्त्तयति तदा चतुष्क्रियः, यदा तु परमतिपातयंस्तन्निर्वर्त्तयति तदा पञ्चक्रिय इति।

पृथक्त्वदण्डके स्याच्छब्दप्रयोगो नास्ति, एकादऽपि सर्वविकल्पसद्भावादिति। 'छव्वीसं दंडग'त्ति पञ्चशरीराणीन्द्रियाणि च त्रयश्च योगाः एते च मीलितास्त्रयोदश, एते चैकत्वपृथक्त्वाभ्यां गुणिताः षड्विंशतिरिति। अनन्तरं क्रिया उक्तास्ताश्च जीवधर्म्मा इति जीवधर्म्माधिकाराज्जीवधर्म्मरूपान् भावानभिधातुमाह–

**मू. (६९८)** *कतिविहे णं भंते! भावे पन्नत्ते?, गोयमा! छव्विहे भावे प०, तं०–उदइए उवसमिए जाव सन्निवाइए।*

*से किं तं उदइए?, उदइए भावे दुविहे पन्नत्ते, तंजहा–उदइए उदयनिप्पन्ने य, एवं एएणं अभिलावेणं जहा अनुओगदारे छन्नामं तहेव निरवसेसं भाणियव्वं जाव से तं सन्निवाइए भावे। सेवं भंते! सेवं भंतेत्ति॥*

**वृ.** 'कतिविहे णं भंते! भावे'इत्यादि, औदयिकादीनां च स्वरूपं प्राग व्याख्यातमेव, 'एवं एएणं अभिलावेणं जहा अनुओगदारे'इत्यादि, अनेन चेदं सूचितं–

'से किं तं उदइए?, २ अट्ठ कम्मपगडीणं उदएणं, से तं उदइए'इत्यादीति॥

शतकं–१७ उद्देशकः–१ समाप्तः

## –: शतकं–१७ उद्देशकः–२ :–

**वृ.** प्रथमोद्देशकान्ते भावा उक्तास्तद्वन्तश्च संयतादयो भवन्तीति द्वितीये ते उच्यन्त इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

**मू. (६९९)** *से नूनं भंते! संयतविरतपडिहयपच्चक्खायपाकम्मे धम्मे ठिए अस्संजय-अविरयअपडिहयपच्चक्खायपावकम्मे अधम्मे ठिते संजयासंजए धम्माधम्मे ठिते?, हंता गोयमा संजयविरयजाव धम्माधम्मे ठिए।*

*एएसि णं भंते! धम्मंसि वा अहम्मंसि वा धम्माधम्मंसि वा चक्किया केइ आसइत्तए वा जाव तुयट्टित्तए वा?, गोयमा! नो तिणट्ठे समट्ठे।*

*से केणं खाइ अट्ठेणं भंते! एवं वुच्चइ जाव धम्माधम्मे ठिते?, गोयमा! संजयविरयजाव पावकम्मे धम्मे ठिते धम्मं चेव उवसंपज्जित्ताणं विहरति, असंयतजाव पावकम्मे अधम्मे ठिए अधम्मं चेव उवसंपज्जित्ताणं विहरइ, संजयासंजए धम्माधम्मे ठिते धम्माधम्मं उवसंपज्जित्ताणं विहरति, से तेणट्ठेणं जाव ठिए।*

*जीवा णं भंते! किं धम्मे ठिया अधम्मे ठिया धम्माधम्मे ठिया?, गोयमा! जीवा धम्मेवि ठिता अधम्मेवि ठिता धम्माधम्मेवि ठिता, नेरइ० पु०?, गोयमा! नेरइया नो धम्मे ठिता अधम्मे ठिता नो धम्माधम्मे ठिता। एवं जाव चउरिंदियाणं,*

*पंचिंदियतिरिक्खजो० पुच्छा, गोयमा! पंचिंदियतिरिक्ख जोणि० नो धम्मे ठिया अधम्मे ठिया धम्माधम्मेवि ठिया, मणुस्सा जहा जीवा, वाणमंतरजोइ० वेमाणि० जहा नेर०॥*

**वृ.** 'से नूनं भंते!'इत्यादि, 'धम्मे'त्ति संयमे 'चक्किया केइ आसइत्तए व'त्ति धर्म्मादौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्नुयात् कश्चिदासयितुं ?, नायमर्थः समर्थो, धमदिरमूर्तत्वात् मूर्ते एव चासनादिकरणस्य शक्यत्वादिति।

अथ धर्म्मस्थितत्वादिकं दण्डके निरूपयन्नाह–'जीवा ण'मित्यादि व्यक्तं, संयतादयः प्रागुपदर्शितास्ते च पण्डितादयो व्यपदिश्यन्ते, अत्र चार्थेऽन्ययूथिकमतमुपदर्शयन्नाह–

**मू. (७००)** *अन्नउत्थिया णं भंते ! एवमाइक्खंति जाव परूवेंति–एवं खलु समणा पंडिया समणोवासया बालपंडिया जस्स णं एगपाणाएवि दंडे अनिक्खित्ते से णं एगंतबालेत्ति वत्तव्वं सिया।*

*से कहमेयं भंते ! एवं ?, गोयमा ! जण्णं ते अन्नउत्थिया एवमाइक्खंति जाव वत्तव्वं सिया, जे ते एवमाहंसु मिच्छं ते एवमा०, अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि एवं खलु समणा पंडिया समणोवासगा बालपंडिया जस्स णं एगपाणाएवि दंडे निक्खित्ते से णं नो एगंतबालेति वत्तव्वं सिया।*

*जीवा णं भंते ! किं बाला पंडिया बालपंडिया ?, गोयमा ! जीवा बालावि पंडियावि बालपंडियावि, नेरइयाणं पुच्छा, गोयमा ! नेरइया बालानो पंडिया नो बालपंडिया,*

*एवं जाव चउरिंदियाण। पंचिंदियतिरिक्ख० पुच्छा, गोयमा ! पंचिंदियतिरिक्खजोणिया बाला नो पंडिया बालपंडि- यावि, मणुस्सा जहा जीवा, वाणमंतरजोइसियवेमाणिया जहा नेरइया*

**वृ.** 'अन्न'इत्यादि, 'समणा पंडिया समणोवासया बालपंडिय'त्ति एतत् किल पक्षद्वयं जिनाभिमतमेवानुवादपरतयोकत्वा द्वितीयपक्षं दूषयन्तस्ते इदं प्रज्ञापयन्ति–

'जस्स णं एगपाणाएवि दंडे'इत्यादि, 'जस्स'त्त येन देहिना 'एकप्राणिन्यपि' एकत्रापि जीवे सापराधादौ पृथ्वीकायिकादौ वा, किं पुनर्बहुषु ?, दण्डो–वधः 'अनिक्खित्त'त्ति 'अनिक्षिप्तः' अनुज्झितोऽप्रत्याख्यातो भवति स एकान्तबाल इति वक्तव्यः स्यात्, एवं च श्रमोपासका एकान्त-बाला एव न वालपण्डिताः, एकान्तबालव्यपदेशनिबन्धनस्यासर्वप्राणिदण्डत्यागस्य भावादिति परमतं, स्वमतं त्वेकप्राणिन्यपि येन दण्डपरिहारः कृतोऽसौ नैकान्तेन बालः, किं तर्हि ?, बालपण्डितो, विरत्यंशसद्भावेन मिश्रत्वात्तस्य, एतदेवाह–'जस्स ण'मित्यादि ॥

एतदेव बालत्वादि जीवादिषु निरूपन्नाह–'जीवा ण'मित्यादि, प्रागुक्तानां संयतादी-नामिहोक्तानां च पण्डितादीनां यद्यपि शब्दत एव भेदो नार्थतस्तथाऽपि संयतत्वादिव्यपदेशः क्रियाव्यपेक्षः पण्डित्वादिव्यपदेशस्तु बोधविशेषापेक्ष इति ॥ अन्ययूथिकप्रक्रमादेवेदमाह–

**मू. (७०१)** *अन्नउत्थिया णं भंते ! एवमाइक्खंति जाव परूवेंति–एवं खलु पाणातिवाए मुसावाए जाव मिच्छादंसणसल्ले वट्टमाणस्स अन्ने जीवे अन्ने जीवाया पाणाइवायवेरमणे जाव परिग्गहवेरमणे कोहविवेगे जाव मिच्छदंसणसल्लविवेगे वट्टमाणस्स अन्ने जीवे अन्ने जीवाया।*

*उप्पत्तियाए जाव परिणामियाए वट्टमाणस्स अन्नो जीवे अन्ने जीवाया, उप्पत्तियाए उग्गे ईहा अवाए धारणाए वट्टमाणस्स जाव जीवाया, उट्ठाणे जाव परक्कमे वट्टमाणस्स जाव जीवाया।*

*नेरइयत्ते तिरिक्खमणुस्सदेवत्ते वट्टमाणस्स जावजीवाया, नाणावरणिज्जे जाव अंतराइए वट्टमाणस्स जाव जीवाया।*

*एवं कण्हलेस्साए जाव सुक्कलेस्साए सम्मदिट्ठीए ३ एवं चक्खुदंसणे ४ आभिनिबोहियनाणे ५ मतिअन्नाणे ३ आहारसन्नाए ४। एवं ओरालियसरीरे ५ एवं मणजोए ३ सागारोवओगे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनागारोवओगे वट्टमाणस्स अन्ने जीवे अन्ने जीवाया।*

*से कहमेयं भंते ! एवं गोयमा ! जण्णं ते अन्नउत्थिया एवमाइक्खंति जाव मिच्छं ते एवमाहंसु, अहं पुण गोयमा ! एवमाइक्खामि जाव परूवेमि—एवं खलु पाणातिवाए जाव मिच्छादंसणसल्ले वट्टमाणस्स सच्चेव जीवे सच्चेव जीवाया जाव अनागारोवओगे वट्टमाणस्स सच्चेव जीवे सच्चेव जीवाया॥*

**वृ.** 'अन्नउत्थिया ण'मित्यादि, प्राणातिपातादिषु वर्त्तमानस्य देहिनः 'अन्ने जीवे'त्ति जीवति—प्राणान् धारयतीति जीवः— शरीरं प्रकृतिरित्यर्थः स चान्यो—व्यतिरिक्तः अन्यो जीवस्य—देहस्य सम्बन्धी अधिष्ठातृत्वादात्मा—जीवात्मा पुरुष इत्यर्थः, अन्यत्वं च तयोः पुद्‌गलापुद्‌गल-स्वभावत्वात्, ततश्च शरीरस्य प्राणातिपातादिषु वर्त्तमानस्य दृश्यत्वाच्छरीरमेव तत्कर्तृ न पुनरात्मेत्येके

अन्ये त्वाहुः—जीवीतीति जीवो—नारकादिपर्यायः जीवात्मा तु सर्वभेदानुगामि जीवद्रव्यं, द्रव्यपर्याययोश्चान्यत्वं तथाविधप्रतिभासभेदनिबन्धनत्वात् घटपटादिवत्, तथाहि—द्रव्यमनुगताकारां बुद्धिं जनयति पर्यायास्त्वननुगताकारामिति, अन्ये त्वाहुः—अन्यो जीवोऽन्यश्च जीवात्मा—जीवस्यैव स्वरूपमिति, प्राणातिपातादिविचित्रक्रियाभिधानं चेह सर्वावस्थासु जीवजीवात्म-नोर्भेदख्यापनार्थमिति परमतं।

स्वमतं तु 'सच्चेव जीवे सच्चेव जीवाय'त्ति स एव जीवः—शरीरं स एव जीवात्मा जीव इत्यर्थःकथञ्चिदिति गम्यं, न ह्यनयोरत्यन्तं भेदः, अत्यन्तभेदे देहेन स्पृष्टस्यासंवेदनप्रसङ्गो देहकृतस्य च कर्म्मणो जन्मान्तरे वेदनाभावप्रसङ्गः, अन्यकृतस्यान्संवेदने चाकृताभ्यागमप्रसङ्गः, अत्यन्तमभेदे च परलोकाभाव इति, द्रव्यपर्यायव्याख्यानेऽपि न द्रव्यपर्याययोरत्यन्तं भेदस्तथाऽनुपलब्धेः।

यश्च प्रतिभासभेदो नासावात्यन्तिकतद्‌भेदकृतः किन्तु पदार्थानामेव तुल्यातुल्यरूपकृत इति, जीवात्मा—जीवस्वरूपं, इह तु व्याख्याने स्वरूपवतो न स्वरूपमत्यन्तं भिन्नं, भेदे हि निस्वरूपता तस्य प्राप्नोति, न च शब्दभेदे वस्तुनो भेदोऽस्ति, शिलापुत्रकस्य वपुरित्यादाविवेति।

पूर्वं जीवद्रव्यस्य तत्पर्यायस्य वा भेद उक्तः, अथ जीवद्रव्यविशेषस्य पर्यायान्तरापत्ति-वक्तव्यतामभिधातुमिदमाह—'देवे ण'मित्यादि, 'पुव्वामेव रूवी भवत्ति'त्ति पूर्वं—विवक्षितकालात् शरीरादिपुद्‌गलसम्बन्धात् मूर्तो भूत्वा मूर्त्तः सन्नित्यर्थः प्रभुः 'अरूविं'ति अरूपिणं—रूपातीत-ममूर्त्तमात्मानमिति गम्यते, 'गोयमा'इत्यादिना स्वकीयस्य वचनस्याव्यभिचारित्वोपदर्शनाय सद्बोधपूर्वकतां दर्शयन्नुत्तरमाह—

**मू.** *(७०२) देवे णं भंते ! महड्ढीए जाव महेस० पुव्वामेव रूवी भवित्ता पभू अरूविं विउव्वित्ताणं चिट्ठित्तए ?, नो तिणट्ठे समट्ठे।*

*से केणट्ठेणं भंते ! एवं वुच्चइ देवे णं जाव नो पभू अरूविं विउव्वित्ताणं चिट्ठित्तए ?, गोयमा ! अहमेयं जाणामि अहमेयं पासामि अहमेयं बुज्झामि अहमेयं अभिसमन्नागच्छामि।*

*मए एयं नायं मए एयं दिट्ठं मए एयं बुद्धं मए एयं अभिसमन्नागयं जण्णं तहागयस्स जीवस्स सरूविस्स सकम्मस्स सरागस्स सवेदणस्स समोहस्स सलेसस्स ससरीरस्स ताओ सरीराओ अविप्पमुक्कस्स एवं पन्नायति, तंजहा—कालत्ते वा जाव सुक्किल्लत्ते वा सुब्भिगंधत्ते वा दुब्भिगंधत्ते वा तित्ते वा जाव महुर० कक्खडत्ते जाव लुक्खत्ते, से तेणट्ठेणं गोयमा ! जाव चिट्ठित्तए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सच्चेव णं भंते! से जीवे पुव्वामेव अरूवी भवित्ता पभू रूविं विउव्वित्ताणं चिट्ठित्तए?, नो तिणट्ठे० जाव चि०, गो० ! अहमेयं जाणामि जाव जन्नं तहागयस्स जीवस्स अरूवस्स अकम्म० अराग० अवेदस्स अमोहस्स अलेसस्स असरीरस्स ताओ सरीराओ विप्पमुक्किस्स नो एवं पन्नायति, तं०—कालत्ते वा जा लुक्खत्ते वा। से तेणट्ठेणं जाव चिट्ठित्तए वा ॥ सेवं भंते! २ त्ति ॥*

**वृ.** 'अहमेयं जाणामि'त्ति अहम् 'एतत्' वक्ष्यमाणमधिकृतप्रश्ननिर्णयभूतं वस्तु जानामि विशेषपरिच्छेदेनेत्यर्थः 'पासामि'त्ति सामान्यपरिच्छेदतो दर्शनेनेत्यर्थः 'बुज्झामि'त्ति बुद्धये—श्रद्दधे, बोधेः सम्यग्दर्शनपर्यायत्वात्, किमुक्तं भवति? —'अभिसमागच्छामि'त्ति अभिविधिना साङ्गत्येन चावगच्छामि—सर्वैः परिच्छित्तिप्रकारैः परिच्छिनद्मि, अनेनात्मनो वर्त्तमानकालेऽर्थपरिच्छेदकत्वमुक्तमथातीतकाले एभिरेव धातुभिस्तद्दर्शयन्नाह—

'मए'इत्यादि, किं तदभिसमन्वागतम्? इत्याह—'जन्न'मित्यादि, 'तहागयस्स'त्ति तथागतस्य—तं देवत्वादिकं प्रकारमापन्नस्य 'सरूविस्स'त्ति वर्णगन्धादिगुणवतः, अथ स्वरूपेणामूर्त्तस्य सतो जीवस्य कथमेतत्? इत्याह—'सकम्मस्स'त्ति कर्म्मपुद्गलसम्बन्धादिति भावः, एतदेवकथमित्यत आह—'सरागस्स'त्ति रागसम्बन्धात् कर्मबन्ध इत भावः, रागश्चेह मायालोभलक्षणो ग्राह्यः, तथा 'सवेयस्स'त्ति यादिवेदयुक्तस्य, तथा 'समोहस्स'त्ति इह मोहः—कलत्रादिषु स्नेहो मिथ्यात्वं चारित्रमोहो वा 'सलेसस्स ससरीरस्स'त्ति व्यक्तं 'ताओ सरीराओ अविप्पमुक्कस्स'त्ति येन शरीरेण सशरीरस्तस्माच्छरीरादविप्रमुक्तस्य 'एवं'ति वक्ष्यमाणं प्रज्ञायते सामान्यजनेनापि तद्यथा—कालत्वं वेत्यादि, यतस्तस्य कालत्वादि प्रज्ञायतेऽतो नासौ तथागतो जीवो रूपी सन्नरूपमात्मानं विकुर्व्य प्रभुः स्थातुमिति।

एतदेव विपर्ययेण दर्शयन्नाह— 'सच्चेव णं भंते!' इत्यादि, 'सच्चेव णं भंते! से जीवे'त्ति यो देवादिरभूत स एवासौ भदन्त! जीवः 'पूर्वमेव' विवक्षितकालात् 'अरूवि'त्ति अवर्णादि 'रूविं'ति वर्णादिमत्वं 'नो एवं पन्नायति'त्ति नैवं केवलिनाऽपि प्रज्ञायतेऽसत्वात्, असत्वं च मुक्तस्य कर्म्मबन्धहेत्वभावेन कर्म्माभावात्, तदभावे च शरीराभावाद्वर्णाद्यभाव इति नारूपीभूत्वा रूपीभवतीति ॥

शतकं—१७ उद्देशकः—२ समाप्तः

## —: शतकं—१७ उद्देशकः—३ :—

**वृ.** द्वितीयोद्देशकान्ते रूपिताभवनलक्षणो जीवस्य धर्मो निरूपितः, तृतीये त्वेजनादिलक्षणोऽसौ निरूप्यत इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्—

**मू. (७०३)** *सेलेसिं पडिवन्नए णं भंते! अनगारे सया समियं एयति वेयति जाव तं तं भावं परिणमति?, नो तिणट्ठे समट्ठे, नन्नत्थेगेणं परप्पयोगेणं ॥*

*कतिविहा णं भंते! एयणा पन्नत्ता?, गोयमा! पंचविहा एयणा पन्नत्ता, तंजहा—दव्वेयणा खेत्तेयणा कालेयणा भवेयणा भावेयणा, दव्वेयणा णं भंते! कतिविहा प०?, गोयमा! चउव्विहा प०, तंजहा—नेरइयदव्वेयणा तिरिक्ख० मणुस्स० देवदव्वेयणा।*

*से केण० एवं वुच्चइ—नेरइयदव्वेयणा २?, गोयमा! जन्नं नेरइया नेरइयदव्वे वट्टिंसु वा वट्टंति वा वट्टिस्संति वा ते णं तत्थ नेरतिया नेरतियदव्वे वट्टमाणा नेरइयदव्वेयणं एइंसु वा एयंति*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वा एइस्संति वा, से तेणट्ठेणं जाव दव्वेयणा।*

*से केणट्ठेणं भंते! एवं वुच्चइ तिरिक्खजोणियदव्वेयणा एवं चेव, नवरं तिरिक्खजोणियदव्वे० भाणियव्वं, सेसं तं चेव, एवं जाव देवदव्वेयणा।*

*खेत्तेयणा णं भंते! कतिविहा पन्नत्ता?, गोयमा! चउव्विहा प०, तं०-नेरइयखेत्तेयणा जाव देवखेत्तेयणा, से केणट्ठेणं भंते! एवं वुच्चइ नेरइयखेत्तेयणा णे० २?, गोयमा! चउव्विहा प० तं०-नेरइयखेत्तेयणा जाव देवखेत्तेयणा, से केणट्ठेणं भंते! एवं वुच्चइ नेरइयखेत्तेयणा णे० २?, एवं चेव नवरं नेरइयखेत्तेयण भाणियव्वा, एवं जाव देवखेत्तेयणा, एवं कालेयणावि, एवं भवेयणावि, भावेयणावि जाव देवभावेयणा॥*

**वृ.** 'सेलेसि'मित्यादि, 'नन्नत्थेगेणं परप्पओगेणं'ति न इति 'नो इणट्ठे समट्ठे'त्ति योऽयं निषेधः सोऽन्यत्रैकस्मात् परप्रयोगाद्, एजनादिकारणेषु मध्ये परप्रयोगेणैवैकेन शैलेश्यामेजनादि भवति न कारणान्तरेणेति भावः॥

एजनाधिकारादेवेदमाह-'कई'त्यादि, 'दव्वेयण'त्ति द्रव्याणां-नारकादिजीवसंपृक्तपुद्गल द्रव्याणां नारकादिजीवद्रव्याणां वा एजना-चलना द्रव्यैजना 'खेत्तेयण'त्ति क्षेत्रे-नारकादिक्षेत्रे वर्त्तमानानामेजना क्षेत्रैजना 'कालेयण'त्ति काले-नारकादिकाले वर्त्तमानानामेजना कालैजना

'भवेयण'त्ति भवे-नारकादिभवे वर्त्तमानानामेजना भवैजना 'भावेयण'त्ति भावे-औदयिकादिरूपे वर्त्तमानानां नारकादीनां तद्गतपुद्गलद्रव्याणां वैजना भावैजना, 'नेरइयदव्वे वट्टिंसु'त्ति नैरयिकलक्षणं यज्ञीवद्रव्यं द्रव्यपर्याययोः कथञ्चिदभेदान्नारकत्वमेवेत्यर्थ तत्र 'वट्टिंसु'त्ति वृत्तवन्तः। 'नेरइयदव्वेयण'त्ति नैरयिकजीवसंपृक्त पुद्गलद्रव्यामां नैरयिकजीवद्रव्याणां वैजना नैरयिकद्रव्यैजना ताम् 'एइंसु'त्ति ज्ञातवन्तोऽनुभूतवन्तो वेत्यर्थः॥

एजनाया एव विशेषमधिकृत्याह-

***मू. (७०४)*** *कतिविहा णं भंते! चलणा पन्नत्ता?, गोयमा! तिविहा चलणा प०, तं०-सरीरचलणा इंदियचलणा जोगचलणा।*

*सरीरचलणा णं भंते! कतिविहा प०?, गोयमा! पंचविहा प०, तं०-ओरालियसरीरचलणा जाव कम्मगसरीरचलणा।*

*इंदियचलणा णं भंते! कतिविहा प०?, गोयमा! पंचविहा पण्णत्ता, तंजहा-सोइंदियचलणा जाव फासिंदियचलणा।*

*जोगचलणा णं भंते! कतिविहा प०? गो०! तिविहा प०, तं०- मणजोगचलणा वइजोगचलणा कायजोगचलणा।*

*से केणट्ठेणं भंते! एवं वुच्चइ ओरालियसरीरचलणा ओ० २?, गोयमा! जे णं जीवा ओरालियसरीरे वट्टमाणा ओरालियसरीरपयोगाइं दव्वाइं ओरालियसरीरत्ताए परिणामेमाणा ओरालियसरीरचलणं चलिंसु वा चलंति वा चलिस्संति वा से तेणट्ठेणं जाव ओरालियसरीर-परिणामेमाणा ओरालियसरीरचलणं चलिंसु वा चलंति वा चलिस्संति वा से तेणट्ठेणं जाव ओरालियसरीरचलणा० ओ० २।*

*से केणट्ठेणं भंते! एवं वु० वेउव्वियसरीरचलणा वेउ०, एवं चेव नवरं वेउव्वियसरीरे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वट्टमाणा एवं जाव कम्मगसरीरचलणा।*

*से केणट्ठेणं भंते ! एवं वु० सोइंदियचलणा २ ?, गोयमा ! जन्नं जीवा सोइंदिए वट्टमाणा सोइंदियपाओगाइं दव्वाइं सोइंदियत्ताए परिणामेमाणा सोइंदियचलणं चलिंसु वा चलंति वा चलिस्संति वा से तेणट्ठेणं जाव सोतिंदियचलमा सो० २ एवं जाव फासिंदियचलणा।*

*से केणट्ठेणं एवं वुच्चइ मणोजोगचलणा २ ?, गोयमा ! जण्णं जीवा मणजोए वट्टमाणा मणजोगप्पाओगाइं दव्वाइं मणजोगत्ताए परिणामेमाणा मणजोगचलणं चलिंसु वा चलिंति वा चलिस्संति वा से तेणट्ठेणं जाव मणजोगचलणा मण० २, एवं वइजोगचलणावि, एवं कायजोगचलणावि ॥*

**वृ.** 'कई'त्यादि, 'चलण'त्ति एजना एव स्फुटतरस्वभावा 'सरीरचलण'त्ति शरीरस्य-औदारिकादेश्चलना-तत्प्रायोग्यपुद्गलानां तद्रूपतया परिणमने व्यापारः शरीरचलना, एवमिन्द्रिययोगचलने अपि, 'ओरालियसरीरचलणं चलिंसु'त्ति औदारिकशरीरचलनां कृतवन्तः अनन्तरं चलनाधर्मो भेदत उक्तः, अथ संवेगादिधर्मान् फलतोऽभिधित्सुरिदमाह-

**मू. (७०५)** *अह भंते ! संवेगे निव्वेए गुरुसाहम्मियसुस्सूसणया आलोयणया निंदणया गरहणया खमावणया सुयसहायता विउसमणया भावे अप्पडिबद्धया विणिवट्टणया विवित्तसयणासणसेवणया सोइंदियसंवरे जाव फासिंदियसंवरे।*

*जोगपच्चक्खाणे सरीरपच्चक्खाणे कसायपच्चक्खाणे संभोगपच्चक्खाणे उवहिपच्चक्खाणे भत्तपच्चक्खाणे खमा विरागया भावसच्चे जोगसच्चे करणसच्चे मणसमन्नाहरणया वयसमन्नाहरणया कायसमन्नाहरणया कोहविवेगे जावमिच्छादंसणसल्ल विवेगे नाणसंपन्नया दंसणसं० चरित्तसं० वेदणअहियासणया मारणंतियअहियासणया एए णं भन्ते ! पया किंपज्जवसणफला पन्नत्ता ?*

*समणाउसो ! गोयमा ! संवेगे निव्वेगे जाव मारणंतियअहियास० एए णं सिद्धिपज्जवसाणफला पं० समणाउसो ! ॥ सेवं भंते ! २ जाव विहरति ॥*

**वृ.** 'अहे'त्यादि, अथेति परिप्रश्नार्थः 'संवेए'त्ति संवेजनं संवेगो-मोक्षाभिलाषः 'निव्वेए'त्ति निर्वेदः-संसारविरक्तता 'गुरुसाहम्मियसुस्सूसणय'त्ति गुरूणां-दीक्षाद्याचार्याणां साधर्म्मिकाणां च-सामान्यसाधूनां या शुश्रूषणता-सेवा सा तथा 'आलोयण'त्ति आ-अभिविधिना सकलदोषाणां लोचना-गुरुपुरतः प्रकाशना आलोचना सैवालोचनता 'निंदणय'त्ति निन्दनं-आत्मनैवात्मदोषपरिकुत्सनं 'गरहणय'त्ति गर्हणं-परसमक्षमात्मदोषोद्भावनं।

'खमावणय'त्ति परस्यासन्तोषवतः क्षमोत्पादनं 'विउसमणय'त्ति व्यवशमनता-परस्मिन् क्रोधान्निवर्त्तयति सति क्रोधोज्झनं, एतच्च दृश्यते, 'सुयस हायय'त्ति श्रुतमेव सहायो यस्यासौ श्रुतसहायस्तदभावस्तथा।

'भावे अप्पडिबद्धय'त्ति भावे-हासादावप्रतिबद्धता-अनुबन्धवर्जनं 'विणिवट्टणय'त्ति विनिवर्त्तनं-विरणसंयमस्थानेभ्यः 'विवित्तसयणासणसेवणय'त्ति विविक्तानि-स्त्र्याद्यसंसक्तानि यानि शयनासनानि उपलक्षणत्वादुपाश्रयश्च तेषां या सेवना सा तथा श्रोत्रेन्द्रियसंवरादयः प्रतीताः 'जोपच्चक्खाणे'त्ति कृतकारितानुमतिलक्षणानां मनःप्रभृतिव्यापाराणां प्राणातिपातादिषु प्रत्याख्यानं-निरोधप्रतिज्ञानं योगप्रत्याख्यानं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सरीरपच्चक्खाणे'त्ति शरीरस्य प्रत्याख्यानं–अभिष्वङ्गप्रतिवर्जनपरिज्ञानं शरीरप्रत्याख्यानं 'कसायपच्चक्खाणे'त्ति क्रिधादिप्रत्याख्यानं–तान् न करोमीति प्रतिज्ञानं 'संभोगपचचक्खाणे'त्ति समिति–संकरेण स्वपरलाभमीलनात्मकेन भोगः सम्भोगः–एकमण्डलीभोक्तृकृत्वमित्येकोऽर्थः तस्य यत् प्रत्याख्यानं–जिनकल्पादिप्रतिपत्या परिहारस्तत्तथा, 'उवहिपच्चक्खाणे'त्ति उपधेरधिकस्य नियमः भक्तप्रत्याख्यानं व्यक्तं।

'खम'त्ति क्षान्ति 'विरागय'त्ति वीतरागता–रागद्वेषापगमरूपा 'भावसच्चे'त्ति भावसत्यं–शुद्धान्तरात्मतारूपं परमार्थिकावितथत्वमित्यर्थः 'जोगसच्चे'त्ति योगाः–मनोवा-क्कायास्तेषां सत्यं–अवितथत्वं योगसत्यं 'स्वावस्थानुरूपेण आङिति–मर्यादया आगमाभिहित-भावाभिव्याप्तया वा हरणं–सङ्क्षेपणं मनः–समन्वाहरणं तदेव मनःसमन्वाहरणता।

एवमितरे अपि, 'कोहविवेगे'त्ति क्रोधविवेकः–कोपत्यागः तस्य दुरन्ततादिपरिभाव-नेनोदयनिरोधः 'वेयणअहियाणय'त्ति क्षुधादिपीडासहनं 'मारणंतियअहियासणय'त्ति कल्याण-मित्रबुद्ध्या मारणान्तिकोपसर्गसहनमिति।

शतकं–१७ उद्देशकः–३ समाप्तः

## –: शतकं–१७ उद्देशकः–४ :–

**वृ.** तृतीयोद्देशके एजनादिका क्रियोक्ता, चतुर्थेऽपि क्रियैवोच्यते इत्येवंसम्बन्ध-स्यास्येदमादिसूत्रम्–

**मू. (७०६)** *तेणं कालेणं २ रायगिहे नगरे जाव एवं वयासी–अत्थि णं भंते ! जीवाणं पाणाइवाएणं किरिया कज्जइ ?, हंता अत्थि।*

*सा भंते ! किं पुट्ठा कज्जइ अपुट्ठा कज्जइ ?, गोयमा ! पुट्ठा कज्जइ नो अपुट्ठा कज्जइ, एवं जहा पढमसए छट्ठुद्देसए जाव नो अनानुपुव्विकडाति वत्तव्वं सिया, एवं जाव वेमाणियाणं, नवरं जीवाणं एगिंदियाण य निव्वाघाएणं छद्दिसिं वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं सेसाणं नियमं छद्दिसिं।*

*अत्थि णं भंते ! जीवाणं मुसावाएणं किरिया कज्जइ ?, हंता अत्थि, सा भंते ! किं पुट्ठा कज्जइ जहा पाणाइवाएणं दंडओ एवं मुसावाएणवि, एवं अदिन्नादाणेणवि मेहुणेणवि परिग्गहेणवि, एवं एए पंच दंडगा ५।*

*जंसमयन्नं भंते ! जीवाणं पाणाइवाएणं किरिया कज्जइ सा भंते ! किं पुट्ठा कज्जइ अपुट्ठा कज्जइ, एवं तहेव जाव वत्तव्वं सिया जाव वेमाणियाणं, एवं जाव परिग्गहेणं, एवं एतेवि पंच दंडगा १०।*

*जंदेसेणं भंते ! जीवाणं पाणाइवाएणं किरिया कज्जति एवं चेव जाव परिग्गहेणं, एवं एवेति पंच दंडगा १५। जंपएसन्नं भंते ! जीवाणं पाणाइवाएणं किरिया कज्जइ सा भंते ! किं पुट्ठा कज्जति एवं तहेव दण्डओ एवं जाव परिग्गहेणं २०, एवं एए वीसं दंडगा।*

**वृ.** 'तेण'मित्यादि, 'एवं जहा पढमसए छट्ठुद्देसए'त्ति अनेनेदं सूचितं–'सा भंते ! किं ओगाढा कज्जइ अनोगाढा कज्जइ ?, गोयमा ! ओगाढा कज्जइ नो अनोगाढा कज्जइ' इत्यादि, व्याख्या चास्य पूर्ववत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जंसमयं'ति यस्मिन् समये प्राणातिपातेन क्रिया–कर्म्म क्रियते इह स्थाने तस्मिन्निति वाक्यशेषो दृश्यः।

'जंदेसं'ति यस्मिन् देशे–क्षेत्रविभागे प्राणातिपातेन क्रिया क्रियते तस्मिन्निति वाक्यशेषोऽत्रापि दृश्यः। 'जंपएसं'ति तस्मिन् प्रदेशे लघुतमे क्षेत्रविभागे ॥ क्रिया प्रागुक्ता सा च कर्म्म कर्म्म च दुःखहेतुत्वादुखमिति तन्निरूपणायाह।

**मू. (७०७)** *जीवाणं भंते! किं अत्तकडे दुक्खे परकडे दुक्खे तदुभयकडे दुक्खे?, गोयमा अत्तकडे दुक्खे नो परकडे दुक्खे नो तदुभयकडे दुक्खे, एवं जाव वेमाणियाणं।*

*जीवा णं भंते! किं अत्तकडं दुक्खं वेदेंति परकडं दुक्खं वेदेंति तदुभयकडं दुक्खं वेदेंति गोयमा! अत्तकडं दुक्खं वेदेंति नो परकडं दुकूखं वेदेंति नो तदुभयकडं दुक्खं वेदेंति, एवं जाव वेमाणियाणं।*

*जीवाणं भंते! किं अत्तकडा वेयणा परकडा वेयणा तदुभयकडावेयणा पुच्छा, गोयमा! अत्तकडा वेयणा नो परकडा वेयणा नो तदुभयकडावेयणा एवं जाव वेमाणियाणं, जीवा णं भंते किं अत्तकडं वेदणं वेदेंति परक० वे० वे० तदुभयक० वे वे० ?, गोयमा! जीवा अत्तकडं वेय० वे० नो परक० नो तदुभय० एवं जाव वेमाणियाणं। सेवं भंते! सेवं भंतेत्ति ॥*

**वृ.** 'जीवाण'मित्यादि दण्डकद्वयम्। कर्म्मजन्या च वेदना भवतीति तन्निरूपणाय दण्डकद्वयमाह–'जीवाण'मित्यादि ॥

शतकं–१७ उद्देशकः–४ समाप्तः

## –: शतक–१७ उद्देशकः–५ :–

**वृ.** चुतुर्थोद्देशकान्ते वैमानिकानां वक्तव्यतोक्ता, अथ पञ्चमोद्देशके वैमानिकविशेषस्य सोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (७०८)** *कहि णं भंते! इसाणस्स देविंदस्स देवरन्नो सभा सुहम्मा पन्नत्ता?, गोयमा जंबुद्दीवे २ मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्प० पुढ० बहुसमरमणिज्ञाओ भूमिभागाओ उड्ढं चंदिमसूरियजहा ठाणपदे जाव मज्झे ईसाणवडेंसए महाविमाणे।*

*–से णं ईसाणवडेंसए महाविमाणे अद्धतेरस जोयणसयसहस्साइं एवं जहा दसमसए सक्कविमाणवत्तव्वया सा इहवि ईसाणस्स निरवसेसा भाणियव्वा जाव आयरक्खा, ठिती साति रेगाइं दो सागरोवमाइं, सेसं तंचेव जाव ईसाणे देविंदे देवराया ई० २, सेवं भंते! सेवं भंतेत्ति ॥*

**वृ.** 'कहि ण'मित्यादि, 'जहा ठाणपए'त्ति प्रज्ञापनाया द्वितीयपदे, तत्र चेदमेवम्–'उड्ढं चंदिमसूरियगहगणणक्खत्ततारारूवाणं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं जाव उप्पइत्ता एत्थ णं ईसाणे नामं कप्पे पन्नत्ते' इत्यादि।

'एवं जहा दसमसए सक्कविमाणवत्तव्वया' इत्यादि, अनेन च यत्सूचितं तदित्थमवगन्तव्यम्–'अद्धतेरसजोयणसयसहस्साइं आयामविक्खंभेणं ऊयालीसं च सयसहस्साइं बावन्नं च सहस्साइं अट्ठ य अडयाले जोयणसए परिक्खेवेण मित्यादि ॥

शतकं–१७ उद्देशकः–५ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं–१७ उद्देशकः–६ :–

**वृ.** पञ्चमोद्देशके ईशानकल्प उक्तः, षष्ठे तु कल्पादिषु पृथिवीकायिकोत्पत्तिरुच्यत इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (७०९)** *'पुढविकाइए णं भंते! इमीसे रय० पुढ० समोहए २ जे भविए सोहम्मे कप्पे पुढविक्काइयत्ताए उववज्जित्तए से भंते! किं पुव्विं उववज्जित्ता पच्छा संपाउणेज्जा पुव्विं वा संपाउणित्ता पच्छा उवव० ?, गोयमा! पुव्विं वा उववज्जित्ता पच्छा संपाउणेज्जा पुव्विं वा संपाउणित्ता पच्छा उववज्जेज्जा।*

*से केणट्ठेणं जाव पच्छा उववज्जेज्जा ?, गोयमा! पुढविक्काइयाणं तओ समुग्घाया पं० तं०– वेदणासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए, मारणंतियसमुग्घाएणं समोहणमाणे देसेण वा समोहणति सव्वेण वा समोहणति देसेणं समोहन्नमाणे पुव्विं संपाउणित्ता पच्छा उववज्जिज्जा, सव्वेणं समोहणमाणे पुव्विं उववज्जेत्ता पच्छा संपाउणेज्जा, से तेणट्ठेणं जाव उववज्जिज्जा।*

*पुढविक्काइए णं भंते! इमीसे रयणप्पभाए पुढवीए जाव समोहए स० २ जे भविए ईसाणे कप्पे पुढवि एवं चेव ईसाणेवि, एवं जाव अच्चुयगेविज्जविमाणे, अनुत्तरविमाणे ईसिपब्भाराए य एवं चेव।*

*पुढविकाइए णं भंते! सक्करप्पभाए पुढवीएं समोहए २ स० जे भविए सोहम्मे कप्पे पुढवि० एवं जहा रयणप्पभाए पुढविकाइए उववाइओ एवं सक्करप्पभाएवि पुढविकाइओ उववाएयव्वो जाव ईसिपब्भाराए।*

*एवं जहा रयणप्पभाए वत्तव्वया भणिया एवं जाव अहेसत्तमाए समोहए ईसीपब्भाराए उववाएयव्वो। सेवं भंते! २ त्ति॥*

**वृ.** 'पुढविकाइए ण'मित्यादि, 'समोहए'ति समवहतः–कृतमारणान्तिकसमुद्घातः 'उववज्जित्त'त्ति उत्पादक्षेत्रं गत्वा 'संपाउणेज्ज'त्ति पुद्गलग्रहणं कुर्यात् उत व्यत्ययः ? इति प्रश्नः, 'गोयमा! पुव्विं वा उववज्जित्ता पच्छा संपाउणेज्ज'त्ति मारणान्तिकसमुद्घातान्निवृत्य यदा प्राक्तन-शरीरस्य सर्वथात्यागाद् गेन्दुकगत्योत्पत्तिदेशं गच्छति तदोच्यते पूर्वमुत्पद्य पश्चात्संप्रा-प्नुयात्–पुद्गलान् गृहीयात् आहारयेदित्यर्थ।

'पुव्विं वा संपाउणित्ता पच्छा उववज्जेज्ज'त्ति यदा मारणान्तिकसमु घातगत एव म्रियते ईलिकागत्योत्पादस्थानं याति तदोच्यते पूर्वं सम्प्राप्य–पुद्गलान् गृहीत्वा पश्चादुत्पद्येत, प्राक्तन-शरीरस्थजीवप्रदेशसंहरणतः समस्तजीवप्रदेशैरुत्पत्तिक्षेत्रगतो भवेदिति भावः।

'देसेण वा समोहन्नइ सव्वेण वा समोहन्नइ'त्ति यदा मारणान्तिकसमुद्घातगतो म्रियते तदा ईलिकागत्योत्पत्तिदेसं प्राप्नोति तत्र च जीवदेशस्य पूर्वदेह एव स्थितत्वाद् देशस्य चोत्पत्तिदेशे प्राप्तत्वात् देशेन समवहन्तीत्युच्यते, यदा तु मारणान्तिकसमुद्गघातात् प्रतिनिवृत्तः सन् म्रियते तदा सर्वप्रदेशसंहरणतो गेन्दुकगत्योत्पत्तिदेशं प्राप्तौ सर्वेण समवहत इत्युच्यते।

तत्र च देशेन समवहन्यमानः–ईलिकागत्या गच्छन्नित्यर्थ पूर्वं सम्प्राप्य–पुद्गलान् गृहीत्वा पश्चादुत्पदयते–सर्वात्मनोत्पदक्षेत्रे आगच्छति, 'सव्वेणं समोहणमाणे'त्ति गेन्दुकगत्या गच्छन्नित्यर्थ, पूर्वमुत्पद्य–सर्वात्मनोत्पाददेशमासाद्य पश्चात् 'संपाउणेज्ज'त्ति पुद्गलग्रहणं कुर्यादिति॥

**मू. (७१०)** *पुढविकाइए णं भंते! सोहम्मे कप्पे समोहए समोहणित्ता जे भविए इमीसे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रयणप्पभाए पुढवीए पुढवीकाइयत्ताए उववज्जित्तए से णं भंते ! किं पुव्विं सेसं तं चेव जहा रयणप्पभापुढविकाइए सव्वकप्पेसु जाव ईसिपब्भाराए ताव उववाइओ एवं सोहम्मपुढविकाइओवि सत्तसुवि पुढवीसु उववाएयव्वो जाव अहेसत्तमाए।

एवं जहा सोहम्पुढविकाइओ सव्वपुढवीसु उववाइओ एवं जाव ईसिपब्भारापुढविकाइ सव्वपुढवीसु उववाएयव्वो जाव अहेस्सतमाए, सेवं भंते ! २ ॥

## –: शतकं–१७ उद्देशकः–८ :–

मू. (७११) आउक्काइए णं भंते ! इमीसे रयणप्पभाए पुढवीए समोह० २ जे भविए सोहम्मे कप्पे आउकाइयत्ताए उववज्जित्तए।

एवं जहा पुढविकाइओ तहा आउकाइओवि सव्वकप्पेसु जाव ईसिपब्भाराए तहेव उववाएयव्वो एवं जहा रयणप्पभाआउकाइओ उववाइओ तहा जाव अहेसत्तमापुढविआ-उकाइओ उववाएयव्वो जाव ईसिपब्भाराए, सेवं भंते ! २ ॥

## –: शतकं–१७ उद्देशकः–९ :–

मू. (७१२) आउकाइए णं भंते ! सोहम्मे कप्पे समोहए समोह० जे भविए इमीसे रयणप्पभाए पुढवीए घनोदधिवलएसु आउकाइयत्ताए उववज्जित्तए से णं भंते ! सेसं तं चेव एवं जाव अहेसत्तमाए जहा सोहम्मआउक्काइओ एवं जाव ईसिपब्भाराआउक्काइओ जाव अहेसत्तमाए उववाएयव्वो, सेवं भंते ! २ ॥

## –: शतकं–१७ उद्देशकः–१० :–

मू. (७१३) वाउक्काइए णं भंते ! इमीसे रयणप्पभाए जाव जे भविए सोहम्मे कप्पे वाउक्काइयत्ताए उवज्जित्तए से णं जहा पुढविकाइओ तहा वाउकाइओवि नवरं वाउक्काइयाणं चत्तारि समुग्धाया पं०, तं०–वेदणासमुग्घाए जाव वेउव्वियसमुग्घए, मारणं तियसमुग्घाएणं समोहणमाणे देसेण वा समो० सेसं तं चेव जाव अहेसत्तमाए समोहओ इसीपब्भाराए उववाएयव्वो, सेवं भंते ! ॥

## –: शतकं–१७ उद्देशकः–११ :–

मू. (७१४) वाउक्काइए णं भंते ! सोहम्मे कप्पे समोहए स० २ जे भविए इमीसे रयणप्पभाए पुढवीए घनवाए तनुवाए घनवायवलएसु तनुवायवलएसु वाउक्काइयत्तए उववज्जेत्तए से णं भंते सेसं तं चेव एवं जहा सोहम्मे वाउकाइओ सत्तसुवि पुढवीसु उववाइओ एवं जाव ईसिपब्भाराए वाउक्काइओ अहेसत्तमाए जाव उववाएयव्वो, सेवं भंते ! २ ॥

## –: शतकं–१७ उद्देशकः–१२ :–

मू. (७१५) एगिंदियाणं भंते ! सव्वे समाहरा सव्वे समसरीरा एवं जहा पढमसए बितियउद्देसए पुढविक्काइयाणं वत्तव्वया भणिया सा चेव एगिंदियाणं इह भाणियव्वा जाव समाउया समोववन्नगा। एगिंदिया णं भंते ! कति लेस्साओ प० ?, गोयमा ! चत्तारि लेस्साओ पं०, तं–कण्हलेस्सा जाव तेउलेस्सा।

एएसि णं भंते ! एगिंदियाणं कण्हलेस्साणं जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा एगिंदियाणं तेउलेस्सा काउलेस्सा अनंतगुणा नीललेस्सा विसेसाहिया कण्हलेसा विसेसाहिया। एएसि णं भंते ! एगिंदिया णं कण्हलेस्सा इड्डी जहेव दीवकुमाराणं, सेवं भंते ! २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## -: शतकं-१७ उद्देशकः-१३ :-

**मू. (७१६)** *नागकुमारा णं भंते ! सव्वे समाहारा जहा सोलसमसए दीवकुमारुद्देसे तहेव निरवसेसं भाणियव्वं जाव इड्ढीति, सेवं भंते ! सेवं भंते ! जाव विहरति ॥*

## -: शतकं-१७ उद्देशकः-१४ :-

**मू. (७१७)** *सुवन्नकुमारा णं भंते ! सव्वे समाहारा एवं चेव सेवं भंते ! २ ॥*

## -: शतकं-१७ उद्देशकः-१५ :-

**मू (७१८)** *विज्जुकुमारा णं भंते ! सव्वे समाहारा एवं चेव, सेवं भंते ! २ ॥*

## -: शतक-१७ उद्देशकः-१६ :-

**मू. (७१९)** *वायुकुमारा णं भंते ! सव्वे समाहारा एवं चेव, सेवं भंते ! २ ॥*

## -: शतकं-१७ उद्देशकः-१७ :-

**मू. (७२०)** *अग्गिकुमारा णं भंते ! सव्वे समाहारा एवं चेव, सेवं भंते ! २ ॥*

वृ. शेषास्तु सुगमा एव ।

॥ १ ॥ शते सप्तदशे वृत्ति, कृतेयं गुर्व्वनुग्रहात् ।
यदन्धो दि मार्गेण सोऽनुभावोऽनुकर्षिणः ॥

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे सप्तदशशतकस्य अभयदेवसूरि विरचिता टीका समाप्ता ।**

-: शतकं-१७-समाप्तम् :-

# शतकं-१८

**वृ.** व्याख्यातं सप्तदशं शतम्, अथावसरायातमष्टादशं व्याख्यायते, तस्य च तावदादावेव-यमुद्देशकसङ्ग्रहणी गाथा-

**मू. (७२१)** *पढमे १ विसाह २ मायंदिए य ३ पाणाइवाय ४ असुरे य ५ ।*
*गुल ६ केवलि ७ अनगारे ८ भविए ९ तह सोमिलऽट्ठारसे १० ।*

**वृ.** 'पढमे'त्यादि, तत्र 'पढमे'त्ति जीवादीनामर्थानां प्रथमाप्रथमत्वादिविचारपरायण उद्देशकः प्रथम उच्यते, स चास्य प्रथमः १ 'विसाह'त्ति विशाखानगरी तदुपलक्षितो विशाखेति द्वितीयः २ 'मागंदिए'त्ति माकन्दीपुत्राभिधानानगारोपलक्षितो माकन्दिकस्तृतीयः ३ 'पाणाइवाय'त्ति प्राणातिपातादिविषयः प्राणातिपातश्चतुर्थ ४ 'असुरे य'त्ति असुरादिवक्तव्यताप्रधानोऽसुरः पञ्चमः ५ 'गुल'त्ति गुलाद्यर्थविशेषस्वरूपनिरूपणपरो गुलः षष्ठः ६

'केवलि'त्ति केवल्यादिविषयः केवली सप्तमः ७ 'अणगारे'त्ति अनगारादिविषयो-ऽनगारोऽष्टमः ८ 'भविय'त्ति भव्यद्रव्यनार- कादिप्ररूपणार्थो भव्यो नवमः ९ 'सोमिल'त्ति सोमिलाभिधानब्राह्मणवक्तव्यतोपलक्षितः सोमिलो दशमः १० । 'अट्ठारसे'त्ति अष्टादशशते एते उद्देशका इति ॥

## -: शतकं-१८ उद्देशकः-१ :-

**मू. (७२२)** *तेणं कालेणं तेणं समएणं रायगिहे जाव एवं वयासी-जीवे णं भंते ! जीवभावेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं पढमे अपढमे ?, गोयमा ! नो पढमे अपढमे, एवं नेरइए जाव वे० ।

सिद्धे णं भंते ! सिद्धभावेणं किं पढमे अपढमे ?, गोयमा ! पढमे नो अपढमे, जीवा णं भंते ! जीवभावेणं किं पढमा अपढमा ?, गोयमा ! नो पढमा अपढमा, एवं जाव वेमाणिया १ सिद्धा णं पुच्छा, गोयमा ! पढमो नो अपढमा ।

आहारए णं भंते ! जीवे आहारभावेणं किं पढमे अपढमे ?, गोयमा ! नो पढमे अपढमे, एवं जाव वेमाणिए, पोहत्तिए एवं चेव । अनाहारए णं भंते ! जीवे अनाहारभावेणं पुच्छा, गोयमा ! सिय पढमे सिय अपढमे । नेरइए णं भंते ! एवं नेरतिए जाव वेमाणिए नो पढमे अपढमे, सिद्धे पढमे नो अपढमे । अनाहारगा णं भंते ! जीवा अनाहारभावेणं पुच्छा, गोयमा ! पढमावि अपढमावि, नेरइया जाव वेमाणिया णो पढमा अपढमा, सिद्धा पढमा नो अपढमा, एक्केक्केपुच्छा भाणियव्वा २ ।

भवसिद्धीए एगत्तपुहुत्तेणं जहा आहारए, एवं अभवसिद्धीएवि, नोभवसिद्धीयनो अभवसिद्धीए णं भंते ! जीवे नोभव० पुच्छा, गोयमा ! पढमे नो अपढमे, नोभवसिद्धीनोअभवसिद्धीया णं भंते ! सिद्धा नोभ० अभव०, एवं चेव पुहुत्तेणवि दोण्हवि ॥ सन्नी णं भंते ! जीवे सन्नीभावेणं किं पढमे पुच्छा, गोयमा ! नो पढमे अपढमे, एवं विगलिंदियवज्जं जाव वेमाणिए, एवं पुहुत्तेणवि ३ ।

असन्नी एवं चेव एगत्तपुहुत्तेणं नवरं जाव वाणमंतरा, नोसन्नीनो असन्नी जीवे मणुस्से सिद्धे पढमे नो अपढमे, एवं पुहुत्तेणवि ४ ।

सलेले णं भंते ! पुच्छा, गोयमा ! जहा आहारए एवं पुहुत्तेणवि कण्हलेस्सा जाव सुक्कलेस्सा एवं चेव नवरं जस्स जा लेसा अत्थि । अलेसे णं जीवमणुस्ससिद्धे जहा नोसन्नीनोअसन्नी ५ ।

सम्मदिट्ठीए णं भंते ! जीवे सम्मदिट्ठिभावेणं किं पढमे पुच्छा, गोयमा ! सिय पढमे सिय अपढमे, एवं एगिंदियवज्जं जाव वेमाणिए, सिद्धे पढमे नो अपढमे, पुहुत्तिया जीवा पढमावि अपढमावि, एवं जाव वेमाणिया, सिद्धा पढमा नो अपढमा, मिच्छादिट्ठीए एगत्तपुहुत्तेणं जहा आहारगा, सम्मामिच्छादिट्ठी एगत्तपुहुत्तेणं जहा सम्मदिट्ठी, नवरं जस्स अत्थि सम्मामिच्छत्तं ६ ।

संजए जीवे मणुस्से य एगत्तपुहुत्तेणं जहा सम्मदिट्ठी नोसंजएनो अस्संजएनो संजयासंजए जीवे सिद्धे य एगत्तपुहुत्तेणं पढमे नो अपढमे ७ ।

सकसायी कोहकसायी जावलोभकसायी एए एगत्तत्तुपुहुत्तेणं जहा आहारे, अकसा० जीवे सिय पढमे सिय अपढमे, एवं मणुस्सेवि, सिद्धे पढमे नो अपढमे, पुहुत्तेणं जीवा मणुस्सावि पढमावि अपढमावि, सिद्धा पढमा नो अपढमा ८ ।

नाणी एगत्तपुहुत्तेणं जहा सम्मदिट्ठी आभिनिबोहियनाणी जाव मनपज्जवनाणी एगत्तपुहुत्तेणं एवं चेव नवरं जस्स जं अत्थि, केवलनाणी जीवे मणुस्स सिद्धे य एगत्तपुहुत्तेणं पढमा नो अपढमा अन्नाणी मइअन्नाणी सुयअन्नाणी विभंगना० एगत्तपुहुत्तेणं जहा आहारए ९ ॥

सजोगी मणजोगी वयजोगी कायजोगी एगत्तपुहुत्तेणं जहा आहारए नवरं जस्स जो जोगो अत्थि, अजोगी जीव- मणुस्ससिद्धा एगत्तपुहुत्तेणं पढमा नो अपढमा १० ॥

सागारोवउत्ता अनागारोवउ० एगत्तपु० णं जहा अनाहारए ११ ।

सवेदगो जाव नपुंसगवेदगो एगत्तपुहुत्तेणं जहा आहारए नवरं जस्स जो वेदो अत्थि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अवेदओ एगत्तपुहुत्तेणं तिसुवि पदेसु जहा अकसायी १२।*

*ससरीरी जहा आहारए एवं जाव कम्मगसीरी, जस्स जं अत्थि सरीरं, नवरं आहारगसरीरी एगत्तपुहुत्तेणं जहा सम्मदिट्ठी, असरीरी जीवो सिद्धो एगत्तपुहु० पढमा नो अपढमा १३।*

*पंचहिं पज्रत्तीहिं पंचहिं अपज्रत्तीहिं एगत्तपुहुत्तेणं जहा आहारए, नवरं जस्स जा अत्थि जाव वेमाणिया नोपढमा अपढमा १४॥ इमा लक्खणगाहा*

**वृ.** तत्र प्रथमोद्देशकार्थप्रतिपादनार्थमाह– 'तेण' मित्यादि, उद्देशकद्वारसङ्ग्रहणी चेयं गाथा क्वचिद्दृश्यते–

॥१॥ "जीवाहारगभवसन्निलेसादिट्ठी य संजयकसाए।
नाणे जोगुवओगे वेए य सरीरपज्रत्ती॥"

अस्याश्चार्थ उद्देशकार्थाधिगम्यः, तत्र प्रथमद्वाराभिधानायाह–'जीवे णं भंते' इत्यादि, जीवो भदन्त! 'जीवभावेन' जीवत्वेन किं 'प्रथमः' प्रथमताधर्म्मयुक्तः?, अयमर्थ–किं जीवत्व-मसत्प्रथमतया प्राप्तं उत 'अपढमे' त्ति अप्रथमः–अनाद्यवस्थितजीवत्व इत्यर्थः, अत्रोत्तरं–'नो पढमे अपढमे' त्ति।

**मू. (७२३)** *जो जेणपत्तपुव्वो भावो सो तेण अपढमओ होइ।*
*सेसेसु होइ पढमो अपत्तपुव्वेसु भावेसु॥*

**वृ.** इह च प्रथमत्वाप्रथमत्वयोर्लक्षणगाथा–"जो जेण०" इति यो येन प्राप्तपूर्वो भावः स तस्याप्रथमो भवति। यो यमप्राप्तपूर्वं प्राप्नोति स तस्य प्रथमः॥

**मू. (७२४)** *जीवे णं भंते! जीवभावेणं किं चरिमे अचरिमे?, गोयमा! नो चरिमे अचरिमे। नेरइए णं भंते! नेरइयभावेणं पुच्छा, गोयमा! सिय चरिमे सिय अचरिमे, एवं जाव वेमाणिए, सिद्धे जहा जीवे। जीवा णं पुच्छा, गोयमा! नो चरिमा अचरिमा, नेरइया चरिमावि अचरिमावि, एवं जाव वेमाणिया, सिद्धा जहा जीवा १।*

*आहारए सव्वत्थ एगत्तेणं सिय चरिमे सिय अचरिमे पुहुत्तेणं चरिमावि अचरिमावि अनाहारओ जीवे सिद्धो य एगत्तेणवि पुहुत्तेणवि नो चरिमे अचरिमे, सेसट्ठाणेसु एगत्तपुहुत्तेणं जहा आहारओ २॥*

*भवसिद्धीओ जीवपदे एगत्तपुहुत्तेणं चरिमे नो अचरिमे, सेसट्ठाणेसु जहा आहारओ। अभवसिद्धीओ सव्वत्थ एगत्तपुहुत्तेणं नो चरिमे अचरिमे, नोभवसिद्धीयनोअभवसिद्धीय जीवा सिद्धा य एगत्तपुहुत्तेणं जहा अभवसिद्धीओ ३।*

*सन्नी जहा आहारओ, एवं असन्नीवि, नोसन्नीनोअसन्नी जीवपदे सिद्धपदे य अचरिमे, मणुस्सपदे चरमे एगत्तपुहुत्तेणं ४।*

*सलेस्सो जाव सुक्कलेस्सो जहा आहारओ नवरं जस्स जा अत्थि, अलेस्सो जहा नोसन्नीनोअसन्नी ५।*

*सम्मदिट्ठी जहा अणाहारओ, मिच्छादिट्ठी जहा आहारओ, सम्मामिच्छादिट्ठी एगिंदियविगलिंदियवज्रं सिय चरिमे सिय अचरिमे, पुहुत्तेणं चरिमावि अचरिमावि ६।*

*संजओ जीवो मणुस्सो य जहा आहारओ, अस्संजओऽवि, संजयासंजएवि तहेव, नवरं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जस्स जं अत्थि, नोसंजयनोअसंजयनोसंजयासंजय जहा नोभवसिद्धीयनोअभवसिद्धीअ ७।*

*सकसाई जाव लोभकसायी सव्वट्ठाणेसु जहा आहारओ, अकसायी जीवपदे सिद्धे य नो चरिमो अचरिमो, मणुस्सपदे सिय चरिमो सिय अचरिमो ८।*

*नाणी जहा सम्मद्दिट्ठी सव्वत्थ आभिनिबोहियनाणी जाव मणप जहा आहारओ नवरं जस्स जं अत्थि केवलनाणी जहा नोसन्नीनोअसन्नी, अन्नाणी जाव विभंगनाणी जहा आहारओ ९।*

*सजोगी जाव कायजोगी जहा आहारओ जस्स जो जोगो अत्थि अजोगी जहा नोसन्नीनोअसन्नी १०।*

*सागारोवउत्तो अनागारोवउत्तो य जहा अनाहारओ ११।*

*सवेदओ जाव नपुंसगवेदओ जहा आहारओ अवेदओ जहा अकसाई १२।*

*ससरीरी जावकम्मगसरीरी जहा आहारओ नवरं जस्स जं अत्थि, असरीरी जहा नो भवसिद्धीयनोअभवसिद्धीय १३।*

*पंचहिं पज्जत्तीहिं पंचहिं अपज्जत्तीहिं जहा आहारओ सव्वत्थ एगत्तपुहुत्तेणं दंडगा भाणियव्वा १४। इमा लक्खणगाहा–*

**वृ.** 'एवं नेरइए'त्ति नारकोऽप्यप्रथमः अनादिसंसारे नारकत्वस्यानन्तशः प्राप्तपूर्वत्वादिति 'सिद्धे णं भंते !' इत्यादौ 'पढमे'त्ति सिद्धेन सिद्धत्वस्याप्राप्तपूर्वस्य प्राप्तत्वात्तेनासौ प्रथम इति, बहुत्वेऽप्येवमेवेति ॥ आहारकद्वारे–'आहारए ण'मित्यादि, आहारकत्वेन नो प्रथमः अनादिभवेऽनन्तशः प्राप्तपूर्वकत्वादाहारकत्वस्य, एवं नारकादिरपि, सिद्धस्त्वाहारकत्वेन पृच्छ्यते, अनाहारकत्वात्तस्येति।

'अनाहारए ण'मित्यादि, 'सिय पढमे'त्ति स्यादिति–कश्चिज्जीवोऽनाहारकत्वेन प्रथमो यथा सिद्धः कश्चिश्चाप्रथमो यथा संसारी, संसारिणो विग्रहगतावनाहारकत्वस्यानन्तशो भूतपूर्वत्वादिति। 'एक्केक्के पुच्छा भाणियव्व'त्ति यत्र किल पृच्छावाक्यमलिखितं तत्रैकैकस्मिन् पदे पृच्छावाक्यं वाच्यमित्यर्थः।

भव्यद्वारे–'भवसिद्धिए'इत्यादि, भवसिद्धिक एकत्वेन बहुत्वेन च यथाऽऽहारकोऽभिहितः एवं वाच्यः, अप्रथम इत्यर्थः, यतो भव्यस्य भव्यत्वमनादिसिद्धमतोऽसौ भव्यत्वेन न प्रथमः, एवमभवसिद्धिकोऽपि, 'नोभवसिद्धियनोअभवसिद्धिए णं' इह च जीवपदं सिद्धपदं च दण्डकमध्यात्संभवति नतु नारकादीनि, नोभवसिद्धिकनोअभवसिद्धिकपदेन सिद्धस्यैवाभिधानात्, तयोश्चैकत्वे पृथक्त्वे च प्रथमत्वं वाच्यम्।

सञ्ज्ञिद्वारे– 'सन्नी ण'मित्यादि, सञ्ज्ञी जीवः सञ्ज्ञिभावेनाप्रथमोऽनन्तशः सञ्ज्ञित्वलाभात्, 'विगलिंदियवज्जं जाववेमाणिए'त्ति एकद्वित्रिचतुरिन्द्रियान् वर्जयित्वा शेषा नारकादिवैमानिकान्ताः सञ्ज्ञिनोऽप्रथमतया वाच्या इत्यर्थः, एवमसञ्ज्ञ्यपि नवरं 'जाव वाणमंतर'त्ति असञ्ज्ञित्वविशेषितानि जीवनारकादीनि व्यन्तरान्तानि पदान्यप्रथमतया वाच्यानि, तेषु हि सञ्ज्ञिष्वपि भूतपूर्वगत्याऽसञ्ज्ञित्वं लभ्यते असञ्ज्ञिनामुत्पादात्, पृथिव्यादयस्त्वसञ्ज्ञिन एव, तेषां चाप्रथमत्वमनन्तशस्तल्लाभावादिति, उभयनिषेधपदं च जीवमनुष्यसिद्धेषु लभ्यते, तत्र च प्रथमत्वं वाच्यमत एवोक्तं–नोसञ्ज्ञीत्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लेश्याद्वारे–'सलेसे ण'मित्यादि 'जहा आहारए'त्ति अप्रथम इत्यर्थः अनादित्वात्सलेश्यत्वस्येति 'नवरं जस्स जा लेसा अत्थि'त्ति यस्य नारकादेर्या कृष्णादिलेश्याऽस्ति सा तस्य वाच्या, इदं च प्रतीतमेव, अलेश्यपदं तु जीवमनुष्यसिद्धेष्वस्ति, तेषां च प्रथमत्वं वाच्यं, नोसञ्ज्ञिनोअसंज्ञिनामिवेति, एतदेवाह–'अलेसे ण'मित्यादि ।

दृष्टिद्वारे–'सम्मद्दिट्ठिए ण'मित्यादि, 'सिय पढमे सिय अपढमे'त्ति कश्चित्सम्यग्दृष्टिर्जीवः सम्यग्दृष्टितया प्रथमो यस्य तत्प्रथमया सम्यग्दर्शनलाभः कश्चिच्चाप्रथमो येन प्रतिपतितं सत् सम्यग्दर्शनं पुनर्लब्धमिति, 'एवं एगिंदियवज्जं'ति एकेन्द्रियाणां सम्यक्त्वं नास्ति ततो नारकादिदण्डकचिन्तायामेकेन्द्रियान् वर्जयित्वा शेषः स्यात्प्रथमः स्यादप्रथम इत्येवं वाच्यः, प्रथमसम्यक्त्वलाभापेक्षया प्रथमः द्वितीयादिलाभापेक्षया त्वप्रथमः, सिद्धस्तु प्रथम एव सिद्धत्वानुगतस्य सम्यक्त्वस्य तदानीमेव भावात् ।

"मिच्छादिट्ठीत्यादि, 'जहा आहारगा'त्ति एकत्वे पृथकत्वे च मिथ्यादृष्टीनामप्रथमत्वमित्यर्थः, अनादित्वान्मिथ्यादर्शनस्येति ।

'सम्मामिच्छादिट्ठी'त्यादि 'जहा सम्मदिट्ठि'त्ति स्यात्प्रथमः स्यादप्रथमः प्रथमेतरसम्यग्मिथ्यादर्शनलाभापेक्षयेति भावः, 'नवरं जस्स अत्थि सम्मामिच्छत्तं'ति दण्डकचिन्तायां यस्य नारकादेर्मिश्रदर्शनमस्ति स एवेह प्रथमाप्रथमचिन्तायामधिकर्त्तव्यः ॥

संयतद्वारे–'संजए'इत्यादि, इह च जीवपदं मनुष्यपदं चैते द्वे एव स्तः, तयोश्चैकत्वादिना यथा सम्यग्दृष्टिरुक्तस्तथाऽसौ वाच्यः, स्यात्प्रथमः स्यादप्रःथ इत्यर्थः, एतच्च संयमस्य प्रथमेतरलाभा-पेक्षयाऽवसेयमिति 'अस्संजए जहा आहारए'त्ति अप्रथम इत्यर्थः असंयतत्वस्यानादित्वात्

'संजयासंजए'इत्यादि संयातसंयतो जीवपदे पञ्चेन्द्रियतिर्यकपदे मनुष्यपदे च भवतीत्यत एतेष्वेकत्वादिना सम्यग्दृष्टिवद्वाच्यः स्यात्प्रथमः स्यादप्रथम इत्यर्थः, प्रथमाप्रथमत्वं च प्रथमेतरदेशविरतिलाभापेक्षयेति 'नोसंजएनोअस्संजए'इत्यादि, निषिद्धसंयमासंयममिश्रभावो जीवः सिद्धश्च स्यात् स च प्रथम एवेति ॥

कषायद्वारे 'सकसाई'त्यादि, कषायिणः आहारकवदप्रथमा अनादित्वात्कषायित्वस्येति 'अकसाई'त्यादि, अकषायो जीवः स्यात्प्रथमो यथाख्यातचारित्रस्य प्रथमलाभे स्यादप्रथमो द्वितीयादिलाभे, एवं मनुष्योऽपि, सिद्धस्तु प्रथम एव, सिद्धत्वानुगतस्याकषायभावस्य प्रथमत्वादिति

ज्ञानद्वारे–'नाणी'त्यादि, 'जहा सम्मद्दीट्ठी'त्ति स्यात्प्रथमः स्यादप्रथम इत्यर्थः तत्र केवली प्रथमः अकेवली तु प्रथमज्ञानलाभे प्रथमः अन्यथा त्वप्रथम इति, 'नवरं जं जस्स अत्थि'त्ति जीवादिदण्डकचिन्तायां यत् मतिज्ञानादि यस्य जीवनारकादेरस्ति तत्तस्य वाच्यमिति, तच्च प्रतीतमेव, 'केवलनाणी'त्यादि व्यक्तम्, 'अन्नाणी'त्यादि, एतदप्याहारकवदप्रथममित्यर्थः 'जस्स जो जोगो अत्थि'त्ति जीवनारकादिदण्डकचिन्तायां यस्य जीवादेर्यो मनोयोगादिरस्ति स तस्य वाच्यः, स च प्रतीत एवेति, 'अजोगी'त्यादि, जीवो मनुष्यः सिद्धश्चायोगी भवति स च प्रथम एवेति ।

उपयोगद्वारे–'सागारे'त्यादि 'जहा अनाहारए'त्ति साकारोपयुक्ता अनाकारोपयुक्ताश्च



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाऽनाहारकोऽभिहितस्तता वाच्याः, ते च जीवपदे स्यात्प्रथमाः सिद्धापेक्षया स्यादप्रथमाः संसार्यपेक्षया, नारकादिवैमानिकान्तपदेषु तु नो प्रथमा अप्रथमा अनादित्वात्तल्लाभस्य, सिद्धपदे तु प्रथमा नो अप्रथमाः साकारानाकारोपयोगविशेषितस्य सिद्धत्वस्य प्रथमत एव भावादिति।

वेदद्वारे—'सवेयगे'त्यादि, 'जहा आहारए' अप्रथम एवेत्यर्थः 'नवरं जस्स जो वेदो अत्थि'त्ति जीवादिदण्डकचिन्तायां यस्य नारकादेर्यो नपुंसकादिर्वेदोऽस्ति स तस्य वाच्यः स च प्रतीत एवेति, 'अवेयओ'इत्यादि अवेदको यथाऽकषायी तथा वाच्यस्त्रिष्वपि पदेषु—जीवमनुष्यसिद्ध लक्षणेषु, तत्र च जीवमनुष्यपदयोः स्यात्प्रथमः स्यादप्रथमः अवेदकत्वस्य प्रथमेतरलाभापेक्षया, सिद्धस्त्वप्रथम एवेति।

शरीरद्वारे—'ससरीरी'त्यादि, अयमप्याहारकवदप्रथम एवेति 'नवरमाहारगसरीरी'त्यादि 'जहा सम्मदिट्ठि'त्ति स्यात्प्रथमः स्यादप्रथम इत्यर्थः, अयं चैवं प्रथमेतराहारकशरीरस्य लाभापेक्षयेति, अशरीरी जीवः स्यात् सिद्धश्च स च प्रथम एवेति।। पर्याप्तिद्वारे 'पंचही'त्यदि, पञ्चभिः पर्याप्तिभिः पर्याप्तकः तथा पञ्चभिरपर्याप्तिभिरपर्याप्तक आहारकवदप्रथम इति, 'जस्स जा अत्थि'त्ति दण्डकचिन्तायां यस्य याः पर्याप्तयस्तस्य ता वाच्यास्ताश्च प्रतीता एवेति।

अथ प्रथमाप्रथमलक्षणाभिधानायाह—'जो जेण'गाहा, यो—भावो—जीवत्वादिर्येन जीवादिना कर्त्रा 'प्राप्तपूर्वः' अवाप्तपूर्व : 'भावः' पर्यायः 'सः' जीवादिस्तेन—भावेनाप्रथमको भवति, 'सेसेसु'त्ति सप्तम्यास्तृतीयार्थत्वात् 'शेषैः' प्राप्तपूर्वभाव्यतिरिक्तैर्भवति प्रथमः, किंस्वरूपैः शेषैः ? इत्याह—अप्राप्तपूर्वैर्भावैरिति गाथार्थः ।। अथ प्रथमादिविपक्षं चरमादित्वं जीवादिष्वेव द्वारेषुपु निरूपयन्निदमाह—'जीवे ण'मित्यादि, जीवो भदन्त ! 'जीवभावेन'जीवत्वपर्यायेण किं चरमः ?—किं जीवत्वस्य प्राप्तव्यचरमभागः किं जीवत्वं मोक्ष्यतीत्यर्थः 'अचरमे'त्ति अविद्य-मानजीवत्वचरमसमयो, जीवत्वमत्यन्तं न मोक्ष्यतीत्यर्थ, इह प्रश्ने आह—'नो' नैव 'चरमः' प्राप्तव्यजीवत्वावसानो, जीवत्वस्याव्यवच्छेदादिति ।

'नेरइए ण'मित्यादि 'सिय चरिमे सिय अचरिमे'त्ति यो नारको नारकत्वादुद्वृत्तः सन् पुनर्नरकगतिं न यास्यति सिद्धगमनात् स चरमः अन्यतवचरमः, एवं यावद्वैमानिकः । 'सिद्धे जहा जीवे'त्ति अचरम इत्यर्थ, न हि सिद्धः सिद्धतया विनङ्क्षयतीति । 'जीवा णं'मित्यादि, पृथक्त्व- दण्डकस्तथाविध एवेति।

आहारकद्वारे—'आहारए सव्वत्थ'त्ति सर्वेषु जीवादिपदेषु 'सिय चरिमे सिय अचरिमे'त्ति कश्चिच्चरमो यो निर्वास्यति अन्यस्त्वचरम इति। अनाहारकपदेऽनाहारकत्वेन जीवः सिद्धश्चाचरमो वाच्यः, अनाहारकत्वस्य तदीयस्यापर्यवसितत्वात्, जीवश्चेह सिद्धावस्थ एवेति, एतदेवाह—'अनाहारओ'इत्यादि, 'सेसठाणेसु'त्ति नारकादिषु पदेषु 'जहा आहारओ'त्ति स्याच्चरमः स्यादचरम् इत्यर्थः, यो नारकादित्वेनानाहरकत्वं पुनर्न लस्यते स चरमो यस्तु तल्लप्स्यतेऽसौ अचरम इति।

भव्यद्वारे—'भवसिद्धीओ'इत्यादि, भव्यो जीवो भव्यत्वेन चरमः, सिद्धिगमनेन भव्यत्वस्य चरमत्वप्राप्तेः, एतच्च सर्वेऽपि भवसिद्धिका जीवाः सेत्स्यन्तीति वचनप्रामाण्यादभिहितमिति 'अभवसिद्धिओ सव्वत्थ'त्ति सर्वेषु जीवादिपदेषु 'नो चरिमे'त्ति अभव्यस्य भव्यत्वेनाभावात्, 'नोभवे'त्यादि उभयनिषेधवान् जीवपदे सिद्धपदे चाभवसिद्धिकवदचरमः तस्य सिद्धत्वात् सिद्धस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सिद्धत्वपर्यायानपगमादिति।

सञ्ज्ञिद्वारे-'सन्ना जहा आहारओ'त्ति सञ्ज्ञित्वेन स्याच्चरमः स्यादचरम इत्यर्थः, एवमसञ्ज्ञ्यपि उभयनिषेधवांश्च जीवः सिद्धश्चाचरमो, मनुष्यस्तु चरमः उभयनिषेधवतो मनुष्यस्य केवलित्वेन पुनर्मनुष्यत्वस्यालाभादिति।

लेश्याद्वारे-'सलेसा' इत्यादि, 'जहा आहारओ'त्ति स्याच्चरमः स्यादचरम इत्यर्थः, तत्र ये निर्वास्यन्ति ते सलेश्यत्वस्य चरमाः, अन्ये त्वचरमा इति॥

दृष्टिद्वारे-'सम्मद्दिट्ठी जहा अनाहारओ'त्ति जीवः सिद्धश्च सम्यग्दृष्टिरचरमो यतो जीवस्य सम्यक्त्व प्रतिपतितमप्यवश्यंभावि, सिद्धस्य तु तन्न प्रतिपतत्येव, नारकादयस्तु स्याच्चरमाः स्यादचरमाः, ये नारकादयो नारकत्वादिना सह पुनः सम्यक्त्वं न लप्स्यन्ते ते चरमाः ये त्वन्यथा तेऽचरमा इति।

'मिच्छादिट्ठी जहा आहारओ'त्ति स्याच्चरमः स्यादचरम इत्यर्थः यो हि जीवो निर्वास्यति स मिथ्यादृष्टित्वेन चरमो यस्त्वन्यथाऽसावचरमः, नारकादिस्तु यो मिथ्यात्वयुक्तं नारकत्वं पुनर्नलप्स्यते स चरमोऽन्यस्त्वचरमः, 'सम्मामिच्छे'त्यादि, 'एगिंदियविगलिंदियवज्जं'ति एतेषां किल मिश्रं न भवतीति नारकादिदण्डके नैते मिश्रालापके उच्चारयितव्या इत्यर्थः, अस्य चोलक्षणत्वेन सम्यग्दृष्ट्यालापके एकेन्द्रियवर्जमित्यपि द्रष्टव्यं, एवमन्यत्रापि यद्यत्र न संभवति तत्तत्र स्वयं वर्जनीयं, यथा सञ्ज्ञिपदे एकेन्द्रियादयः असञ्ज्ञिपदे ज्योतिष्कादय इति, 'सिय चरिमे सिय अचरिमे' सम्यग्मिथ्यादृष्टि स्याच्चरमो यस्य तत्प्राप्ति पुनर्न भविष्यति, इतरस्त्वचरम इति। संयतद्वारे-'संजओ' इत्यादि, अयमर्थः-संयतो जीवः स्याच्चरमो यस्य पुनः संयमो न भविष्यति अन्यस्त्वचरमः, एवं मनुष्योऽपि, यत एतयोरेव संयतत्वमिति 'अस्संजओऽवि तहेव'त्ति असंयतोऽपि तथैव यथाऽऽहारकः स्याच्चरमः स्यादचरम इत्यर्थः, एवं संयतासंयतोऽपि केवलं जीवपञ्चेन्द्रियतिर्यग्मनुष्यपदेष्वेवायं वाच्यः, अत एवाह-'नवरं जस्स जं अत्थि'त्ति, निषिद्धत्रयस्त्वचरमः सिद्धत्वात्तस्येति।

कषायद्वारे-'सकसाई' त्यादि, अयमर्थः-सकषायः सभेदो जीवादिस्थानेषु स्याच्चरमः स्यादचरमः, तत्र यो जीवो निर्वास्यति स सकषायित्वेन चरमोऽन्यस्त्वचरमः, नारकादिस्तु यः सकषायित्वं नारकाद्युपेतं पुनर्न प्राप्स्यति स चरमोऽन्यस्त्वचरमः 'अकसायी' त्यादि 'अकषायी' उपशान्तमोहादि स च जीवो मनुष्यः सिद्धश्च स्यात्, तत्र जीवः सिद्धश्चारमो यतो जीवस्याकषायित्वं प्रतिपतितम्यवश्यम्भावि, सिद्धस्य तु न प्रतिपतत्येव, मनुष्यस्त्वकषायितोपेतं मनुष्यत्वं यः पुनर्न लप्स्यते स चरमो यस्तु लप्स्यते सोऽचरम इति।

ज्ञानद्वारे-'नाणी जहा सम्मदिट्ठि'त्ति, अयमिह सम्यग्दृष्टिदृष्टान्तलब्धोऽर्थः-जीवः सिद्धश्चारमः जीवो हि ज्ञानस्य सतः प्रतपातेऽप्यवश्यं पुनर्भावेनाचरमः, सिद्धस्त्वक्षीणज्ञानभाव एव भवतीत्यचरमः, शेषास्तु ज्ञानोपेतनारकत्वादीनां पुनर्लाभासम्भवे चरमा अन्यथा त्वचरमा इति, 'सव्वत्थ'त्ति सर्वेषु जीवादिसिद्धान्तेषु पदेषु एकेन्द्रियवर्जितेष्विति गम्यं, ज्ञानभेदापेक्षयाऽऽह

'आभिनिबोहिए' इत्यादि, 'जहा आहारओ'त्तिकरणात् स्याच्चरमः स्यादचरम इति दृश्यं, तत्राभिनिबोधिकादिज्ञानं यः केवलज्ञानप्राप्तया पुनरपि न लप्स्यते स चरमोऽन्यस्त्वचरमः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'जस्स जं अत्थि'त्ति यस्य जीवनारकादेर्यदाभिनिबोधिकाद्यस्ति तस्य तद्वाच्यं, तच्च प्रतीतमेव, 'केवलनाणी'त्यादि, केवलज्ञानी अचरमो वाच्य इति भावः 'अन्नाणी'इत्यादि अज्ञानी सभेदः स्याच्चरमः स्यादचरम इत्यर्थः यो ह्यज्ञानं पुनर्न लप्स्यते स चरमः यस्त्वभव्यो ज्ञानं न लप्स्ये एवासाव- चरम इति एवं यत्र यत्राहारकतिदेशस्तत्र तत्र स्याच्चरमः स्यादचरम इति व्याख्येयं, शेषमप्यनयैव दिशाऽभ्युह्यमिति ॥ अथ चरमाचरमलक्षणाभिधानायाह–

**मू. (७२५)** *जो जं पाविहिति पुणो भावं सो तेण अचरिमो होइ।*
*अच्चंतविओगो जस्स जेण भावेण सो चरिमो*

**वृ.** 'जो जं पाविहिति'गाहा 'यः' जीवो नारकादिः 'यं' जीवत्वं नारकत्वादिकमप्रतिपतितं प्रतिपतितं वा 'प्राप्स्यति' लप्स्यते पुनः पुनरपि 'भावं' धर्म्मं स 'तेन' भावेनतद्‌भावापेक्षयेत्यर्थः अचरमो भवति, तथा 'अत्यन्तवियोगः' सर्वथाविरहः 'यस्य' जीवादेर्येन भावेन स तेनेति शेषः चरमो भवतीति ॥

**मू. (७२६)** *सेवं भंते! २ जाव विहरति ॥*

शतकं–१८ उद्देशकः–१ समाप्तः

## –: शतकं–१८ उद्देशकः–२ :–

**वृ.** प्रथमोद्देशके वैमानिक वैमानिकभावेन स्याच्चरमः स्यादचरम इत्युक्तम्, अथ वैमानिकविशेषो यस्तद्‌भावेन चरमः स द्वितीयोद्देशके दर्श्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (७२७)** *तेणं कालेणं २ विसाहानामं नगरी होत्था वन्नओ, बहुपुत्तिए चेइए वन्नओ, सामी समोसढे जाव पज्जुवासइ, तेणं कालेणं २ सक्के देविंदे देवराया वज्जपाणी पुरंदरे एवं जहा सोलसमसए वितियउद्देसए तहेव दिव्वेणं जाणविमाणेणं आगओ नवरं एत्थ आभियोगादि अत्थि जाव बत्तीसतिविहं नट्टविहिं उवदंसेति उव० २ जाव पडिगए।*

*भंतेत्ति भगवं गोयमे समणं भगवं महावीरं जाव एवं वयासी–जहा तईयसए ईसाणस्स तहेव कूडागारदिट्ठंतो तहेव पुव्वभवपुच्छा जाव अभिसमन्नागया ?, गोयमादि समणे भगवं महावीरे भगवं गोयमं एवं वयासी–एवं खलु गोयमा! तेणं कालेणं तेणं समएणं इहेव जंबुद्दीवे २ भारहे वासे हत्थिणापुरे नामं नगरे होत्था वन्नओ, सहस्संबवने उज्जाणे वन्नओ, तत्थ णं हत्थिनागपुरे नगरे कत्तिए नामं सेट्ठी परिवसति अड्ढे जाव अपरिभूए नेगमपढमासणिए नेगमट्ठसहस्सस्स सयस्स य कुडुंबस्स आहेवच्चं जाव कारेमाणे पालेमाणे य समणोवासए अहिगयजीवाजीवे जाव विहरति ।*

*तेणं कालेणं २ मुनिसुव्वए अरहा आदिगरे जहा सोलसमसए तहेव जाव समोसढे जाव परिसा पज्जुवासति, तए णं से कत्तिए सेट्ठी इमीसे कहाए लद्धट्ठे समाणे हट्ठतुट्ठ एवं जहा एक्कारसमसए सुदंसणे तहेव निग्गओ जाव पज्जुवासति, तए णं मुनिसुव्वए अरहा कत्तियस्स सेट्ठिस्स धम्मकहा जाव परिसा पडिगया।*

*तए णं से कत्तिए सेट्ठी मुणिसुव्वयजाव निसम्म हट्ठतुट्ठ उट्ठाए उट्ठेति उ० २ मुनिसुव्वयं जाव एवं वयासी–एवमेयं भंते ! जाव से जहेयं तुज्झे वदह नवरं देवाणुप्पिया ! नेगमट्ठसहस्सं आपुच्छामि जेट्ठपुत्तं च कुडुंबे ठावेमि, तए णं अहं देवाणुप्पियाणं अंतियं पव्वयामि अहासुहं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाव मा पडिबंधं, तए णं से कत्तिए सेट्ठी जाव पडिनिक्खमति २ जेणेव हत्थिनागपुरे नगरे जेणेव सए गेहे तेणेव उवागच्छइ २ नेगमट्ठसहस्सं सद्दावेति २ एवं वयासी एवं खलु देवाणुप्पिया मए मुनिसुव्वयस्स अरहओ अंतियं धम्मे निसन्ते सेऽविय मे धम्मे इच्छिए पडिच्छिए अभिरुइए

तए णं अहं देवाणुप्पिया! संसारभयुव्विग्गे जाव पव्वयामि तं तुज्झे णं देवाणुप्पिया! किं करेह किं ववसह किं भे हियइच्छिए किं भे सामत्थे?, तए णं तं नेगमट्ठसहस्संपि तं कत्तियं सेट्ठि एवं वयासी–जइ णं देवाणुप्पिया! संसारभयुव्विग्गा जाव पव्वइस्संति अम्हं देवाणुप्पिया! किं अन्ने आलंबणे वा आहारे वा पडिबंधे वा? अम्हेवि णं देवाणुप्पिया! संसारभयुव्विग्गा भीया जम्मणमरणाणं देवाणुप्पिएहिं सद्धिं मुनिसुव्वयस्सअरहओ अंतियं मुंडा भवित्ता आगाराओ जाव पव्वयामो। तए णं से कत्तिए सेट्ठी तं नेगमट्ठसहस्सं एवं वयासी–

जदि णं देवाणुप्पिया! संसारभयुविग्गा भीया जम्मणमरणाणं मए सद्धिं मुणिसुव्वयजाव-पव्वयह तं गच्छह णं तुज्झे देवाणु० सएसु गिहेसु विपुलं असणं जाव उवक्खडावेह मित्तनाइजाव पुरओ जेट्ठपुत्ते कुडुंबे ठावेह जेट्ठ० २ तं मित्तनइजाव जेट्ठपुत्ते आपुच्छह आपु० २ पुरिससहस्स-वाहिणीओ सीयाओ दुरूहह २ त्ता मित्तनाइजावपरिजणेणं जेट्ठपुत्तेहि य समणुगम्ममाणमग्गा सव्वड्ढीए जाव रवेणं अकालपरिहीणं चेव मम अंतियं पाउब्भवह।

तए णं ते नेगमट्ठसहस्संपि कत्तियस्स सेट्ठिस्स एयमट्ठं विणएणं पडिसुणेंति प० २ जेणेव साइं साइं गिहाइं तेणेव उवागच्छइ २ विपुलं असणजाव उवक्खडावेंति २ मित्तनाइजाव तस्सेव मित्तनाइजाव पुरओ जेट्ठपुत्ते कुडुंबे ठावेंति जेट्ठपुत्ते० २ तं मित्तनाइजाव जेट्ठपुत्ते य आपुच्छंति जेट्ठ० २ पुरिससहस्सवाहिणीओ सीयाओ दुरूहंति दु० २ मित्तनातिजाव परिजणेणं जेट्ठपुत्तेहि य समणुगम्ममाणमग्गा सव्वड्ढीए जाव रवेणं अकालपरिहीणं चेव कत्तियस्स सेट्ठिस्स अंतियं पाउब्भवंति।

तए णं से कत्तिए सेट्ठी विपुलं असणं ४ जहा गंगदत्तो व मित्तणातिजावपरिजणेणं जेट्ठपुत्तेणं नेगमट्ठसहस्सेण य समणुगम्ममाणमग्गे सव्वड्ढिए जाव रवेणं हत्थिणापुरं नगरं मज्झंमज्झेणं जेट्ठपुत्तेणं नेगमट्ठसहस्सेण य समणुगम्ममाणमग्गे सव्वड्ढिए जाव रवेणं हत्थिणापुरं नगरं मज्झंमज्झेणं जहा गंगदत्तो जाव आलित्ते णं भंते! लोए पलित्ते णं भंते! लोए आलित्तपलित्ते णं भंते! लोए जाव अनुगामियत्ताए भविस्सति तं इच्छामि णं भंते! नेगमट्ठसहस्सेण सद्धिं सयमेव पव्वावियं जाव धम्ममाइक्खियं।

तए णं मुनिसुव्वए अरहा कत्तियं सेट्ठं नेगमट्ठसहस्सेणं सद्धिं सयमेव पव्वावेति जाव धम्ममाइक्खइ, एवं देवाणुप्पिया! गंतव्वं एवं चिट्ठियव्वं जाव संजमियव्वं, तए णं से कत्तिए सेट्ठी नेगमट्ठसहस्सेण सद्धिं मुनिसुव्वयस्स अरहओ इमं एयारूवं धम्मियं उवदेसं सम्मं पडिवज्जइ तमाणाए तहा गच्छति जाव संजमेति, तए णं से कत्तिए सेट्ठी नेगमट्ठसहस्सेणं सद्धिं अनगारे जाए ईरियासमिए जाव गुत्तबंभयारी।

तए णं से कत्तिए अणगारे मुनिसुव्वयस्स अरहओ तहारूवाणं थेराणं अंतियं सामाइयमाइयाइं चोद्दस पुव्वाइं अहिज्जइ सा० २ बहूहिं चउत्थछट्ठट्ठमजाव अप्पाणं भावेमाणे बहुपडिपुन्नाइं दुवालसवासाइं सामन्नपरियागं पाउणइ पा० २ मासियाए संलेहणाए अत्ताणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*झोसेइ मा० २ सट्ठिं भत्ताइं अणसणाए छेदेति स० २ आलोइयजाव कालं किच्चा सोहम्मे कप्पे सोहम्मवडेंसए विमाणे उवावायसभाए देवसयणिज्जंसि जाव सक्क देविंदत्ताए उववन्ने।*

*तए णं से सक्के देविंदे देवराया अहुणोववन्ने, सेसं जहा गंगदत्तस्स जाव अंतं काहिति नवं ठिती दो सागरोवमाइं सेसं तं चेव। सेवं भंते! २ त्ति॥*

**वृ.** 'तेण'मित्यादि॥ 'नेगमपढमासणिए'त्ति इह नैगमा–वाणिजकाः 'कज्जेसु य'त्ति गृहकरणस्वजनसन्मानादिकृत्येषु 'कारणेसु'त्ति इष्टार्थानां हेतुषु–कृषिपशुपोषणवाणिज्यादिषु 'कुडुंबेसु'त्ति सम्बन्धविशेषवन्मानुषवृन्देषु विषयभूतेषु 'एवं जहारायप्पसेणइज्जे' इत्यादि।

अनेन चेदं सूचितं–'मंतेसु य गुज्झेसु य रहस्सेसु य ववहारेसु य निच्छएसु य आपुच्छणिज्ज मेढी पमाणं आहारो आलंवणं चक्खू मेढिभूए पमाणभूए आहारभूए आलंबणभूए'त्ति तत्र 'मन्त्रेषु' पर्यालोचनेषु 'गुह्येषु' लज्जनीयव्यवहारगोपनेषु 'रहस्येषु' एकान्तयोग्येषु 'निश्चयेषु' इत्थमेवेदं विधेयमित्येवंरूपनिर्णयेषु 'आपृच्छनीयः' प्रष्टव्यः किमिति? यतोऽसौ 'मेढि'त्ति मेढी–खलकमध्यवर्त्तीनी स्थूणा यस्यां नियमिता गोपङ्क्तिर्धान्यं गाहयति तद्वद्यमालम्ब्य सकलनैगममण्डलं करणीयार्थान् धान्यमिव विवेचयति स मेढी, तथा 'प्रमाणं' प्रत्यक्षादि तद्वद्यस्तद्दृष्टार्थानामव्यभिचारित्वेन तथैव प्रवृत्तिनिवृत्तिगोचरत्वात्स प्रमाणं, तथा आधारः आधेयस्येव सर्वकार्येषु लोकानामुपकारित्वात्। तथा 'आलम्बनं' रज्ज्वादि तद्वदापद्गर्त्तादिनिस्तारकत्वादालम्बनं,

तथा चक्षु–लोचनं तद्वल्लोकस्य विविधकार्येषु प्रवृत्तिनिवृत्ति विषयप्रदर्शकत्वाच्चक्षुरिति, एतदेव प्रपञ्चयति–'मेढिभूए'इत्यादि, भूतशब्द उपमार्थ इति, 'जहा गंगदत्तो'त्ति षोडशशतस्य पञ्चमोद्देशके यथा गङ्गदत्तोऽभिहितस्तथाऽयं वाच्य इति॥

शतकं–१८ उद्देशकः–२ समाप्तः

## –: शतक–१८ उद्देशकः–३ :–

**वृ.** द्वितीयोद्देशके कार्त्तिकस्यान्तक्रियोक्ता, तृतीये तु पृथिव्यादेः सोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (७२८)** *तेणं कालेणं २ रायगिहे नगरे होत्था वन्नओ गुणसिलए चेइए वन्नओ जाव परिसा पडिगया, तेणं कालेणं तेणं स० समणस्स भगवओ महावीरस्स जाव अंतेवासी मागंदियपुत्ते नामं अनगारे पगइभद्दए जहा मंडियपुत्ते जाव पज्जुवासमाणे एवं वयासी–से नूनं भंते! काउलेस्से पुढविकाइए काउलेस्सेहिंतो पुढविकाइएहिंतो अनंतरं उव्वट्टित्ता माणुसं विग्गहं लभति मा० २ केवलं बोहिं बुज्झति के० २ तओ पच्छा सिज्झति जाव अंतं करेति?, हंता मागंदियपुत्ता! काउलेस्से पुढविकाइए जाव अंतं करेति।*

*से ननं भंते! काउलेसे आऊकाइए काउलेसेहिंतो आउकाइएहिंतो अनंतरं उव्वट्टित्ता माणुसं विग्गहं लभति मा० २ केवलं बोहिं बुज्झति जाव अंतं करेति?, हंता मागंदियपुत्ता! जाव अंतं करेति।*

*से नूनं भंते! काउलेस्से वणस्सइकाइए एवं चेव जाव अंतं करेति, सेवं भंते २ त्ति मागंदियपुत्ते अनगारे समणं भगवं महावीरं जाव नमंसित्ता जेणेव समणे निग्गंथे तेणेव उवागच्छति उवा० २ समणे निग्गंथे एवं वयासी–एवं खलु अज्जो! काउलेस्से पुढविकाइए तहेव जाव अंतं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करेति, एवं खलु अज्जो! काउलेस्से आउक्काइए जाव अंतं करेति, एवं खलु अज्जो! काउलेस्से वणस्सइकाइए जाव अंतं करेति।

तए णं ते समणा निग्गंथा मागंदियपुत्तस्स अनगारस्स एवमाइक्खमाणस्स जाव एवं परूवेमाणस्स एयमट्ठं नो सद्दहंति ३ एयमट्ठं असद्दहमाणा ३ जेणेव समणे भगवं महावीरे तेणेव उवागच्छंति २ समणं भगवं महावीरं वंदति नमंसति २ एवं वयासी–एवं खलु भंते! मागंदियपुत्ते अनगारे अम्हं एवमाइक्खति जाव परूवेति–एवं खलु अज्जो! काउलेस्से पुढविकाइए जाव अंतं करेति, एवं खलु अज्जो! काउलेस्से आउक्काइए जाव अंते करेति, एवं वणस्सइकाइएवि जाव अंतं करेति।

से कहमेयं भंते! एवं?, अज्जोत्ति समणे भगवं महावीरे ते समणे निग्गंथे आमंतित्ता एवं वयासी–जण्णं अज्जो! मागंदियपुत्ते अनगारे तुज्झे एवं आइक्खति जाव परूवेति–एवं खलु अज्जो! काउलेस्से पुढविकाइए जाव अंतं करेति, एवं खलु अज्जो! काउलेस्से आउकाइए जाव अंतं करेति, एवं खलु अज्जो! काउलेस्से वणस्सइकाइएवि जाव अंतं करेति, सच्चे णं एसमट्ठे, अहंपि णं अज्जो! एवमाइक्खामि ४ एवं खलु अज्जो! कण्हलेसे पुढ० कण्हलेसेहिंतो पुढविकाइएहिंतो जाव अंतं करेति एवं खलु अज्जो! नीललेस्से पुढविका० जाव अंतं करेति एवं काउलेस्सेवि जहा पुढविकाइए एवं आउकाइएवि एवं वणस्सइकाइएवि सच्चे णं एसमट्ठे।

सेवं भंते! सेवं भंते! त्ति समणा निग्गंथा समणं भगवं महा० वं० नमं० २ जेणेव मागंदियपुत्ते अनगारे तेणेव उवाग० २ मागंदियपुत्तं अनगारं वंदति नमं० २ एयमट्ठं सम्मं विणएणं भुज्जो २ खामेंति

**वृ.** 'तेणं कालेण'मित्यादि, 'जहा मंडियपुत्ते'त्ति अनेनेदं सूचितं–'पगइउवसंते पगइपयणुकोहमाणमायलोभे'त्यादि, इह च पृथिव्यबूवनस्पतीनामनन्तरभवे मानुषत्वप्राप्त्याऽन्तक्रिया संभवति न तेजोवायूनां, तेषामानन्तर्येण मानुषत्वाप्राप्तेरतः पृथिव्यादित्रयस्यैवान्तक्रयामाश्रित्य 'से नूण'मित्यादिना प्रश्नः कृतो न तेजोवायूनामिति।

अनन्तरमन्तक्रियोक्ता, अथान्तक्रियायां ये निर्जरापुद्गलास्तद्वक्तव्यतामभिधातुमाह–

**मू.** (७२१) तए णं से मागंदियपुत्ते अनगारे उट्ठाए उट्ठेति जेणेव समणे भगवं महावीरे तेणेव उवागच्छति ते० २ समणं भगवं महा० वं० नमं० २ एवं वयासी–अनगारस्स णं भंते! भावि- यप्पणो सव्वं कम्मं वेदेमाणस्स सव्वं कम्मं निज्जरेमाणस्स चरिमं मारं मरमाणस्स सव्वं मारं मरमाणस्स सव्वं सरीरं विप्पजहमाणस्स चरिमं कम्मं वेदेमाणस्स चरिमं कम्मं निज्जरेमाणस्स चरिमं सरीरं विप्पजहमाणस्स मारणंतियं कम्मं वेदेमाणस्स मारणंतियं कम्मं निज्जरे माणस्स मारं मरमाणस्स मारणंतियं सरीरं विप्पजहमाणस्स जे चरिमा निज्जरापोग्गला सुहुमा णं ते पोग्गला प० समणाउसो! सव्वं लोगंपिणं ते उग्गाहित्ताणं चिट्ठंति?, हंता मागंदियपुत्ता!।

–अनगारस्स णं भंते! भावियप्पणो जाव ओगाहित्ताणं चिट्ठंति छउमत्थे णं भंते! मणुस्से तेसिं निज्जरापोग्गलाणं किंचि आणत्तं वा णाणत्तं वा एवं जहा इंदियउद्देसए पढमे जाव वेमाणिया जाव तत्थ णं जे ते उवउत्ता ते जाणंति पासंति आहारेंति।

से तेणट्ठेणं निक्खेवो भाणियव्वोत्ति न पासंति आहारंति, नेरइया णं भं० निज्जरापुग्गला

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*न जाणंति न पासंति आहारंति, एवं जाव पंचिंदियतिरिक्खजोणियाणं, मणुस्साणं भंते ! निज्ञरापोग्गले किं जाणंति पासंति आहारंति उदाहु न जाणंति न पासंति नाहारंति ?, गोयमा ! अत्थेगइया जाणंति ३ अत्थेग० न जाणंति न पासंति आहारंति ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ अत्थेगइया जाणं० पासं० आहा० अत्थेग० न जाणं० न पासं० आहारं० ?, गोयमा ! मणुस्सा दुविहा पन्नत्ता, तंजहा–सन्नीभूया य असन्नीभूया य, तत्थ णं जे ते असन्निभूया ते न जाणंति न पासंति आहारंति, तत्थ णं जे ते सन्नीभूया ते दुविहा पं०, तं०–उवउत्ता अनुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते न यजणंति न पासंति आहारंति, तत्थ णं जे त उवउत्ता ते जाणंति ३ । से तेणट्ठेणं गोयमा ! एवं वुच्चइ अत्थेगइया न जाणंति २ आहारेंति अत्थेगइया जाणंति ३, वाणमंतरजोइसिया जहा नेरइया ।*

*वेमाणिया णं भंते ! ते निज्ञारापोग्गले किं जाणंति ६ ?, गोयमा ! जहा मणुस्सा नवरं वेमाणिया दुविहा प०, तं०–माइमिच्छदिट्ठीउववन्नगा य अमाइसम्मदिट्ठीउववन्नगा य, तत्थ णं जे ते मायिमिच्छदिट्ठिउच्ववन्नगा ते णं न जा० न पा० आहा० तत्थ णं जे ते अमायिसम्मदिट्ठीउवव० ते दुविहा पं० तं०–अनंतरोववन्नगा य परंपरोववन्नगा य, तत्थ णं जे ते अनंतरोववन्नगा ते णं न जाणंति न पासंति आहारेंति ।*

*–तत्थ णं जे ते परंपरोववन्नगा ते दुविहा पं०, तं०–पज्ञत्तगा य अपज्ञत्तगा य, तत्थ णं जे ते अपज्ञत्तगा ते णं न जाणंति २ आहारंति, तत्थ णं जे ते पज्ञत्तगा ते दुविहा पं०, तं०–उवउत्ता य अनुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते न जाणंति न पासंति न आहारंति ॥*

**वृ.** 'अनगारस्से'त्यादि, भावितात्मा–ज्ञानादिभिर्वासितत्मा, केवली चेह संग्राह्यः, तस्य सर्वं कर्म–भवोपग्राहित्रयरूपमायुषो भेदेनाभिधास्यमानत्वात् 'वेदयत' अनुभवतः प्रदेश-विपाकानुभवाभ्यां अत एव सर्वं कर्म्म भवोपग्राहिरूपमेव 'निर्जरयतः' आत्मप्रदेशेभ्यः शातयतः तथा 'सर्वं' सर्वायुःपुद्गलापेक्षं 'मारं' मरणं अन्तिममित्यर्थः 'म्रियमाणस्य' गच्छतः तथा 'सर्वं' समस्तं 'शरीरम्' औदारिकादि विप्रजहतः, एतदेव विशेषिततरमाह ।

'चरमं कम्म'मित्यादि, 'चरमं कर्म्म' आयुषश्चरमसमयवेद्यं वेदयत एवं निर्जरयतः तथा 'चरमं' चरमायुःपुद्गलक्षयापेक्षं 'मारं' मरणं 'म्रियमाणस्य' गच्छतः, तथा चरमं शरीरं यच्चरमावस्थायामस्ति तत्यजतः, एतदेव स्फुटतरमाह–

'मारणंतियं कम्मं'इत्यादि, मरणस्य–सर्वायुष्कक्षयलक्षणस्यान्तः–समीपं मरणान्तः–आयुष्कचरमसमयस्तत्र भवं मारणान्तिकं 'कर्म्म' भवोपग्राहित्रयरूपं वेदयतः एवं निर्जरयतः तथा 'मारणान्तिकं' मारणान्तिकायुर्दलिकापेक्षं 'मारं' मरणं कुर्वतः, एवं शरीरं त्यजतः, ये 'चरमाः' सर्वान्तिमाः 'निर्जरापुद्गलाः' निर्जीर्णकर्मदलिकानि सूक्ष्मास्ते पुद्गलाः प्रज्ञप्ता भगवद्भिः हे श्रमणायुष्मन् ! इति भगवत आमन्त्रणं, सर्वलोकमपि तेऽवगाह्य–तत्स्वभावत्वेनाभिव्याप्य तिष्ठन्तीति प्रश्नः ।

अत्रोत्तरं–'हंता मागंदियपुत्ते'त्यादि, 'छउमत्थे णं'ति केवली हि जानात्येव तानिति न तद्गतं किञ्चिद्प्रष्टव्यमस्तीतिकृत्वा 'छउमत्थे'त्युक्तं, छद्मस्थश्चेह निरतिशयो ग्राह्यः, 'आणत्तं व'त्ति अन्यत्वम्–अनगारद्वयसम्बन्धिनो ये पुद्गलास्तेषां भेदः 'नाणत्तं व'त्ति वर्णादिकृतं नानात्वम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एवं जहा इंदियउद्देसए पढमे'त्ति एवं यथा प्रज्ञापनायाः पञ्चदशपदस्य प्रथमोद्देशके तथा शेषं वाच्यम्, अर्थातिदेशश्चायं तेन यत्रेह 'गोयमे'ति पदं तत्र 'मागंदियपुत्ते'त्ति द्रष्टव्यं, तस्यैव प्रच्छकत्वात्

तच्चेदम्–'ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणति पासति ?, गोयमा ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ छउमत्थे णं मणूसे तेसिं निज्जरापुग्गलाणं नो किंचि आणत्तं वा ६ जाणति पासति ?, गोयमा ! देवेऽवि य णं अत्थेगइए जे णं तेसिं निज्जरा पोग्गलाणं (नो) किंचि आणत्तं वा ६ न जाणइ न पासइ।

से तेणट्ठेणं गोयमा ! एवं वुच्चइ छउमत्थे णं मणूसे तेसिं निज्जरा पुग्गलाणं (नो) किंचि आणत्तं वा ६ न जाणइ न पासइ, सुहुमा णं ते पुग्गला पन्नत्ता समणाउसो ! सव्वलोगंपि य णं ते ओगाहित्ताणं चिट्ठंति' एतच्च व्यक्तं, नवरम् 'ओमत्तं'त्ति अवमत्वम्–ऊनता 'तुच्छत्तं'ति तुच्छत्वं–निस्सारता, निर्वचनसूत्रे तु 'देवेऽविय णं अत्थेगइए'त्ति मनुष्येभ्यः प्रायेण देवः पटुप्रज्ञो भवतीति देवग्रहणं, ततश्च देवोऽपि चास्त्येककः कश्चिद्विशिष्टावधिज्ञानविकलो यस्तेषां निर्जरापुद्गलानां न किञ्चिदन्यत्वादि जानाति किं पुनर्मनुष्यः ?, एकग्रहणाच्च विशिष्टावधिज्ञानयुक्तो देवो जानातीत्यवसीयते इति, 'जाव वेमाणिए'त्ति अनेनेन्द्रियपदप्रथमोद्देशकाभिहित एव प्रागव्याख्यातसूत्रानन्तरवर्त्ती चतुर्विंशतिदण्डकः सूचितः।

स च कियद्दूरं वाच्यः ? इत्याह–'जाव तत्थ णं जे ते उवउत्ता' इत्यादि, एवं चासौ दण्डकः– 'नेरइया णं भंते ! निज्जरापुग्गले किं जाणंति पासंति आहारिंति उदाहु न जाणंति०' शेषं तु लिखितमेवास्त इति, गतार्थं चैतत् नवरमाहारयन्तीत्यत्र सर्वत्र ओजआहारो गृह्यते, तस्य शरीरविशेषग्राह्यत्वात् तस्य चाहारकत्वे सर्वत्रभावात्, लोमाहारप्रक्षेपाहारयोस्तु त्वग्मुखयोर्भाव एव भावात्, यदाह–

॥१॥ "सरीरेणोयाहारो तयाय फासेण लोमआहारो।
पक्खेवाहारो पुण कावलिओ होइ नायव्वो॥"

मनुष्यसूत्रे तु सञ्ज्ञिभूता विशिष्टावधिज्ञान्यादयो गृह्यन्ते, येषां ते निर्जरापुद्गला ज्ञानविषयाः वैमानिकसूत्रे तु वैमानिका अमायिसम्यग्दृष्टय उपयुक्तास्तान् जानन्ति ये विशिष्टावधयो, मायिमिथ्यादृष्टयस्तु न जानन्ति मिथ्यादृष्टित्वादेवेति।

अनन्तरं निर्जरापुद्गलाश्चिन्तितास्ते च बन्धे सति भवन्तीति बन्धं निरूपयन्नाह–

*मू. (७३०) कतिविहे णं भन्ते ! बंधे प० ?, मागंदियपुत्ता ! दुविहे प० तं०–दव्वबंधे य भावबंधे य, दव्वबंधे णं भंते ! कतिविहे प० ?, मागंदियपुत्ता ! दुविहे प० तं०–पओगबंधे य वीससाबंधे य।*

*वीससाबंधे णं भंते ! कतिविहे पं० ?, मागंदियपुत्ता !दुविहे प०, तं०–साइयवीससाबंधे य अनादीयवीससाबंधे य।*

*पयोगबंधे णं भंते ! कतिविहे पं०, मागं० पुत्ता ! दुविहे पं०, तं०–सिढिलबंधणबन्धे य धणियबंधणबन्धे य।*

*भावबंधे णं भंते ! कतिविहे पं० ?, मागंदियपुत्ता ! दुविहे पं० तं०–मूलपगडिबंधे य उत्तरपगडिबंधे य।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नेरइयाणं भंते ! कतिविहे भावबंधे प० ?, मागंदियपुत्ता ! दुविहे भावबंधे पं० तं०–मूलपगडिबंधे य उत्तरपगडिबंधे य, एवं जाव वेमाणियाणं ।*

*नाणावरणिज्जस्स णं भंते ! कम्मस्स कतिविहे भावबंधे प० ?, मागंदिया ! दुविहे भावबंधे प० तं०–मूलपगडिबंधे य उत्तरपयडिबंधे य ।*

*नेरतियाणं भंते ! नाणावरणिज्जस्स कम्मस्स कतिविहे भावबंधे० प० ?, मागंदियपुत्ता ! दुविहे भावबंधे प० तं०–मूलपगडिबंधे य उत्तरपयडि० एवं जाव वेमाणियाणं, जहा नाणावरणिज्जेणं दंडओ भणिओ एवं जाव अंतराइएणं भाणियव्वो ॥*

**वृ.** 'कइविहे ण'मित्यादि, 'दव्वबंधे य'त्ति द्रव्यबन्ध आगमादिभेदादनेकविधः केवलमिहोभयव्यतिरिक्तो ग्राह्यः, स च द्रव्येण–स्नेहरज्ज्वादिना द्रव्यस्य वा परस्परेण बन्धो द्रव्यबन्धः, 'भावबंधे य'त्ति भावबन्ध आगमादिभेदाद् द्वेधा, स चेह नोआगमतो ग्राह्यः, तत्र भावेन–मिथ्यात्वादिना भावस्य वा–उपयोगभावाव्यतिरेकात् जीवस्य बन्धो भावबन्धः ।

'पओयबंधे य'त्ति धर्मास्तिकायाधर्मास्तिकायादीनां 'सिढिलबंधणबन्धे य'त्ति तृणपूलिकादीनां 'धणियबंधणबन्धे य'त्ति रथचक्रदीनामिति । कर्म्माधिकारादिदमाह–

**मू. (७३१)** *जीवा णं भंते ! पावे कम्मे जे य कडे जाव जे य कज्जिस्सइ अत्थि याइ तस्स केइ नाणत्ते ?, हंता अत्थि, से केणट्ठेणं भंते ! एवं वुच्चइ जीवाणं पावे कम्मे जे य कडे जाव जे य कज्जिस्सति अत्थि याइ तस्स नाणत्ते ?, मागंदियपुत्ता ! से जहानामए–केइ पुरिसे धणुं परामुसइ धणुं २ उसुं परामुसइ उ० २ ठाणं ठा० २ आययकन्नाययं उसुं करेंति आ० २ उड्ढं वेहासं उव्विहइ से नूनं मागंदियपुत्ता ! तस्स उसुस्स उड्ढं वेहासं उव्वीढस्स समाणस्स एयतिवि नाणत्तं जाव तं तं भावं परिणमतिवि नाणत्तं ?, हंता–*

*–भगवं ! एयतिवि नाणत्तं जाव परिणमतिवि नाणत्तं से तेणट्ठेणं मागंदियपुत्ता ! एवं वुच्चइ जाव तं तं भावं परिणमतिवि नाणत्तं, नेरइयाणं पावे कम्मे जे य कडे एवं चेव नवरं जाव वेमाणियाणं ॥*

**वृ.** 'जीवाण'मित्यादि, 'एयइवि नाणत्तं'ति 'एजते' कम्पते यदसाविषुस्तदपि 'नानात्वं' भेदोऽनेजनावस्थापेक्षया, यावत्करणात् 'वेयइवि नाणत्तं'इत्यादि द्रष्टव्यम् ।

अयमभिप्रायः–यथा बाणस्योर्ध्वं क्षिप्तस्यैजनादिकं नानात्वमस्ति एवं कर्म्मणः कृतत्वक्रियमाणत्वकरिष्यमाणत्वरूपं तीव्रमन्दपरिणामभेदात्तदनुरूपकार्यकारित्वरूपं च नानात्वमवसेयमिति ।। अनन्तरं कर्म्म निरूपितं, तच्च पुद्गलरूपमिति पुद्गलानधिकृत्याह–

**मू. (७३२)** *नेरइया णं भंते ! जे पोग्गे आहारत्ताए गेण्हंति तेसि णं भंते ! पोग्गलाणं सेयकालंसि कतिभागं आहारेंति कतिभागं निज्जरेंति ?, मागंदियपुत्ता ! असंखेज्जइभागं आहारेंति अनंतभागं निज्जरेंति ।*

*चक्किया णं भंते ! केइ तेसु निज्जरापोग्गलेसु आसइत्तए वा जाव तुयट्टित्तए वा ? नो तिणट्ठे समट्ठे अणाहरणमेयं बुइयं समणाउसो ! एवं जाव वेमाणियाणं । सेवं भंते ! सेवं भंतेति ॥*

**वृ.** 'नेरइए'त्यादि, 'सेयकालंसि'त्ति एष्यति काले ग्रहणानन्तरमित्यर्थः 'असंखेज्जइ भागं आहारिंति'त्ति गृहीतपुद्गलानामसङ्ख्येयभागमाहारीकुर्वन्ति गृहीतानामेवानन्तभागं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'निर्जरयन्ति' मूत्रादिवत्यजन्ति।

'चक्किय' त्ति शक्नुयात् 'अणाहरणमेयं बुइयं' ति आध्रियतेऽनेनेत्याधरणं—आधारस्तन्निषेधोऽनाधरणं—आधर्त्तुमक्षमं एतन्निर्जरापुद्गलजातमुक्तं जिनैरिति ॥

शतकं—१८ उद्देशकः—३ समाप्तः

## —: शतकं—१८ उद्देशकः—४ :—

**वृ.** तृतीयोद्देशकस्यान्ते निर्जरापुद्गलानामासितुमित्यादिभि पदैरर्थतः परिभोगो विचारितश्चतुर्थे तु प्राणातिपातादीनामसौ विचार्य्यत इतयेवंसम्बन्धस्यास्येदमादिसूत्रम्—

**मू.** *(७३३) तेणं कालेणं २ रायगिहे जाव भगवं गोयमे एवं वयासी—अह भंते! सपाणाइवाए मुसावाए जाव मिच्छादंसणसल्ले पाणाइवायवेरमणे मुसावाय जाव मिच्छादंसणसल्लवेरमणे पुढविक्काइए जाव वणस्सइकाइए धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवा असरीरपडिबद्धे परमाणुपोग्गले सेलेसिं पडिवन्नए अनगारे सव्वे य बायरबोंदिधरा कलेवरा एए णं दुविहा जीवदव्वा य अजीवदव्वा य जीवाणं भंते! परिभोगत्ताए हव्वमागच्छंति?, गोयमा! पाणाइवाए जाव एए णं दुविहा जीवदव्वा य अजीवदव्वा य अत्थेगतिया जीवाणं परिभोगत्ताए हव्वमागच्छंति अत्थेगतिया जीवाणं जाव नो हव्वमागच्छंति।*

*से केणट्ठेणं भंते! एवं वुच्चइ पाणाइवाए जाव नो हव्वमागच्छंति?, गोयमा! पाणाइवाए जाव मिच्छादंसणस्ले पुढविकाइए जाव वणस्सइकाइए सव्वे य बायरेबोंदिधरा कलेवरा एए णं दुविहा जीवदव्वा य अजीवदव्वा य, जीवाणं परिभोगत्ताए हव्वमागच्छंति, पाणाइवायवेरमणे जाव मिच्छादंसणसल्लविवेगे धम्मत्थिकाए अधम्मत्थिकाए जा व परमाणुपोग्गले सेलेसीं पडिवन्नए अनगारे एए णं दुविहा जीवदव्वा य अजीवदव्वा य जीवाणं परिभोगत्ताए नो हव्वमागच्छन्ति से तेणट्ठेणं जाव नो हव्वमागच्छंति ॥*

**वृ.** 'तेण' मित्यदि, 'जीवे असरीरपडिबद्धे' त्ति त्यक्तसर्वशरीरो जीवः 'बायरबोंदिधरा कलेवर' त्ति स्थूलाकारधराणि न सूक्ष्माणि कडेवराणि—निश्चेतना देहाः अथवा 'बादरबोन्दिधराः' बादराकारधारिणः कडेवराव्यतिरेकात् कडेवराद्वीन्द्रियादयो जीवाः।

'एए ण' मित्यादि, एतानि प्राणातिपातादीनि सामान्यतो द्विविधानि न प्रत्येकं, तत्र पृथिवीकायादयो जीवद्रव्याणि, प्राणातिपातादयस्तु न जीवद्रव्याण्यपि तु तद्धर्म्मा इति न जीवद्रव्याण्यजीवद्रव्याणि धर्मास्तिकायदयस्तु अजीवरूपाणि द्रव्याणीतिकृत्वाऽजीवद्रव्याणीति जीवानां परिभोग्यत्वायागच्छन्ति, जीवैः परिभुज्यन्त इत्यर्थः।

तत्र प्राणातिपातादीन् यदा करोति तदा तान् सेवते प्रवृत्तिरूपत्वात्तेषामित्येवं तत्परिभोगः अथवा चारित्रमोहनीयकर्म्मदलिकभोगहेतुत्वात्तेषां चारित्रमोहानुभोगः प्राणातिपातादिपरिभोग उच्यते, पृथिव्यादीनां तु परिभोगो गमनशोचनादिभि प्रतीत एव, प्राणातिपातविरमणादीनां तु न परिभोगोऽस्ति वधादिविरतिरूपत्वेन जीवस्वरूपत्वात्तेषां धर्मास्तिकायादीनां तु चतुर्णाममूर्तत्वेन परमाणोः सूक्ष्मत्वेन शैलेशीप्रतिपन्नानगारस्य च प्रेषणाद्यविषयत्वेनानुपयोगित्वान्न परिभोग इति

परिभोगश्च भावतः कषायवतामेव भवतीति कषायान् प्रज्ञापयितुमाह—

**मू.** *(७३४) कति णं भंते! कसाया पन्नत्ता?, गोयमा! चत्तारि कसाया प०, तं०—कसायपदं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*निरवसेस भाणियव्वं जाव निज्ञरिस्संति लोभेणं ।*

*कति णं भंते! जुम्मा पन्नत्ता ?, गोयमा! चत्तारि जुम्मा पन्नत्ता–कडजुम्मे तेयोगे दावरजुम्मे कलिओगे, से केणट्ठेणं भंते ! एवं वुच्चइ जाव कलियोए ?, गोयमा ! जे णं रासीचउक्कएणं अवहारेणं अवहीरमाणे चउपज्जवसिए सेत्तं कडजुम्मे, जे णं रासी चउक्कएण अवहारेणं अवहीरमाणे तिपज्जवसिए सेत्तं तेयोए, जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे दुपज्जवसिए सेत्तं दावरजुम्मे, जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे एगपज्जवसिए सेत्तं कलिओगे, से तेणट्ठेणं गोयमा एवं वुच्चइ जाव कलिओए ।*

*नेरइया णं भंते ! किं कडजुम्मा तेयोगा दावरजुम्मा कलियोगा ४ ?, गोयमा ! जहन्नपदे कडजुम्मा उक्कोसपदे तेयोगा अजहन्नुक्कोसपदे सिय कडजुम्मा १ जाव सिय कलियोगा ४, एवं जाव थणियकुमारा । वणस्सइकाइयाणं पुच्छा, गोयमा ! जहन्नपदे अपदा उक्कोसपदे य अफदा अजहन्नुक्कोसियपदे सिय कडजुम्मा जाव सिय कलियोगा ।*

*बेइंदिया णं पुच्छा, गोयमा ! जहन्नपदे कडजुम्मा उक्कोसपदे दावरजुम्मा, अजहन्नमणुक्कोसपदे सिय कडजुम्मा जाव सिय कलियोगा, एवं जाव चतुरिंदिया, सेसा एगिंदिया जहा बेंदिया, पंचिंदियतिरिक्खजोणिया जाव वेमाणिया जहा नेरइया, सिद्धा जहा वणस्सइकाइया ।*

*इत्थीओ णं भंते ! किं कडजुम्मा० ? पुच्छा, गोयमा ! जहन्नपदे कडजुम्माओ उक्कोसपदे सिय कडजुम्माओ अजहन्नमणुक्कोसपदे सिय कडजुम्माओ जाव सिय कलियोगाओ, एवं असुरकुमारित्थीओवि जाव थणियकुमारइत्थीओ, एवं तिरिक्खजोणियइत्थीओ एवं मणुसित्थीओ एवं जाव वाणमंतरजोइसियवेमाणियदेवित्थीओ ॥*

**वृ.** 'कइ ण' मियादि, 'कसायपदं' ति प्रज्ञापनायां चतुर्दशं, तच्चैवं–'कोहकसाए मानकसाए मायाकसाए लोभकसाए' इत्यादि 'निज्ञरिस्संति लोभेणं' ति अस्यैवं सम्बन्धः–

'वेमाणिया णं भंते ! कइहिं ठाणेहिं अट्ठ कम्मपयडीओ निज्ञरिस्संति ?, गोयमा ! चउहिं ठाणेहिं, तंजहा–कोहेणं जाव लोभेणं' ति, इह नारकादीनामष्टापि कर्माण्युदये वर्त्तन्ते, उदयवर्त्तिनां च तेषामवश्यं निर्जरणमस्ति, कषायोदयवर्त्तिनश्च ते ततश्च कषायोदये कर्मनिर्जराया भावात् क्रोधादिभिर्वैमानिकानामष्ट कर्मप्रकृतिनिर्जरणमुच्यते इति ॥

अनन्तरं कषाया निरूपिताः, ते च चतुःसङ्ख्यत्वात्कृतयुग्मलक्षणसङ्ख्याविशेषवाच्या इत्यतो युग्मस्वरूपप्रतिपादनायाह–'कइ ण' मित्यादि, 'चत्तारि जुम्म' त्ति इह गणितपरिभाषया समो राशिर्युग्ममुच्यते विषमस्त्वोज इति, तत्र च यद्यपीह द्वौ राशी युग्मशब्दवाच्यौ द्वौ चौजःशब्दवाच्यौ भवतस्तथाऽपीह युग्मशब्देन राशयो विवक्षिताः अतश्चत्वारि युग्मानि राशय इत्यर्थः, तत्र 'कडजुम्मे' त्ति कृतं–सिद्धं पूर्णं ततः परस्य राशिसञ्ज्ञान्तरस्याभावेन न त्वोजःप्रभृतिवदपूर्णं यद् युग्मं– समराशिविशेषस्तत्कृतयुग्मं ।

'तेओए' त्ति त्रिभिरादित एव कृतयुग्माद्वोपरिवर्त्तिभिरोजो–विषमराशिविशेषस्त्योजः, 'दावरजुम्मे' त्ति द्वाभ्यामादित एव कृतयुग्माद्वोपरिवर्त्तिभ्यां यदपरं युग्मं कृतयुग्मादन्यत्तन्निपातनविधेर्द्वापरयुग्मं, 'कलिओए' त्ति कलिना–एकेन आदित एव कृतयुग्माद्वोपरिवर्त्तिना ओजो–विषमराशिविशेषः कल्योज इति । 'जे पां रासी' त्यादि, यो राशिश्चतुष्केनापहारेणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पह्रियमाणश्चतुष्पर्यवसितो भवति स कृतयुग्ममित्यभिधीयते, यत्रापि राशौ चतूरूपत्वेन चतुष्कापहारो नास्ति सोऽपि चतुष्पर्यवसित- त्वसद्भावात्कृतयुग्ममेव, एवमुत्तरपदेष्वपि।

अनन्तरं कृतयुग्मादिराशयः प्ररूपिताः, अथ तैरेव नारकादीन् प्ररूपयन्नाह 'नेरइया ण' मित्यादि 'जहन्नपदे कडजुम्म' त्ति अत्यन्तस्तोकत्वेन 'कृतयुग्माः' कृतयुग्मसञ्ज्ञिताः 'उक्कोसपए' त्ति सर्वोत्कृष्टतायां त्र्योजःसञ्ज्ञिताः मध्यमपदे चतुर्विधा अपि, एतच्चैवमाज्ञाप्रामाण्यादवगन्तव्यम् 'वणस्सइकाइया ण' मित्यादि, वनस्पतिकायिका जघन्यपदे उत्कृष्टपदे चापदाः, जघन्यपदस्योत्कृष्टपदस्य च तेषामभावात्।

तथाहि-जघन्यपदमुत्कृष्टपदं च तदुच्यते यन्नियतरूपं तच्च यथा नारकादीनां कालान्तरेणापि लभ्यते न तथा वनस्पतीनां, तेषां परम्परया सिद्धिगमनेन तद्राशेरनन्तत्वापरित्यागेऽप्यनियतरूपत्वादिति, 'सिद्धा जहा वणस्सइकाइय' त्ति जघन्यपदे उत्कृष्टपदे चापदाः, अजघन्योत्कृष्टपदे च स्यात् कृतयुग्मादय इत्यर्थः, तत्र जघन्योत्कृष्टपदापेक्षयाऽपदत्वं वर्द्धमानतया तेषामनियतपरिमाणत्वाद्भावनीयमिति।

**मू. (७३५)** *जावतियाणं भंते! वरा अंधगवण्हिणो जीवा तावतिया परा अंधगवण्हिणो जीवा ?, हंता गोयमा! जावतिया वरा अंधगवण्हिणो जीवा तावतिया परा अंधगवण्हिणो जीवा। सेवं भंते २ त्ति॥*

**वृ.** जीवपरिमाणाधिकारादिदमाह-'जावइए' त्यादि, यावन्तः 'वर' त्ति अर्वाग्भागवर्त्तिनः आयुष्कापेक्षयाऽल्पायुष्का इत्यर्थः 'अंधगवण्हिणो' त्ति अंह्रिपा-वृक्षास्तेषां वह्नयस्तदाश्रयत्वेनेत्यंह्रिपवह्नयो बादरतेजस्कायिका इत्यर्थः। अन्ये त्वाहुः-अन्धकाः-अप्रकाशकाः सूक्ष्मनामकर्मोदयाद्ये वह्नयस्तेऽन्धकवह्नयो जीवाः 'तावइय' त्ति तत्परिमाणाः 'पर' त्ति पराः प्रकृष्टाः स्थितितो दीर्घायुष इत्यर्थ इति प्रश्नः, 'हंते' त्याद्युत्तरमिति॥

शतकं-१८ उद्देशकः-४ समाप्तः

## -: शतकं-१८ उद्देशकः-५ :-

**वृ.** चतुर्थोद्देशकान्ते तेजस्कायिकवक्तव्यतोक्ता ते च भास्वरजीवा इति पञ्चमे भास्वरजीवविशेषवक्तव्यतोच्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (७३६)** *दो भंते! असुरकुमारा एगंसि असुरकुमारावासंसि असुरकुमारदेवत्ताए उववन्ना तत्थ णं एगे असुरकुमारे देवे पासादीए दरिसणिज्जे अभिरूवे पडिरूवे एगे असुरकुमारे देवे से णं नो पासादीए नो दरिसणिज्जे नो अभिरूवे नो पडिरूवे।*

*से कहमेयं भंते! एवं ?, गोयमा! असुरकुमारा देवा दुविहा प०, तं०-वेउव्वियसरीरा य अवेउव्वियसरीरा य, तत्थ णं जे से वेउव्वियसरीरे असुरकुमारे देवे से णं पासादीए जाव पडिरूवे, तत्थ णं जेसे अवेउव्वियसरीरे असुरकुमारे देवे से णं नो पासादीए जाव नो पडिरूवे।*

*से केणट्ठेणं भंते! एवं वुच्चइ तत्थ णं जे से वेउव्वियसरीरे तं चेव जावपडिरूवे ?, गोयमा से जहानामए-इहं मणुयलोगंसि दुवे पुरिसा भवंति-एगे पुरिसे अलंकियविभूसिए एगे पुरिसे अणलंकियविभूसिए।*

*एएसि णं गोयमा! दोण्हं पुरिसाणं कयरे पुरिसे पासादीए जाव पडिरूवे कयरे पुरिसे नो*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पासादीए जाव नो पडिरूवे जे वा से पुरिसे अलंकियविभूसिए जे वा से पुरिसे अणलंकियविभूसिए भगवं ! तत्थ जे से पुरिसे अलंकियविभूसिए से णं पुरिसे पासादीए जाव पडिरूवे, तत्थ णं जे से पुरिसे अणलंकिय० से णं पुरिसे नो पासादीए जाव नो पडिरूवे से तेणट्ठेणं जाव नो पडिरूवे*

*दो भंते ! नागकुमारा देवा एगंसि नागकुमारावासंसि एवं चेव एवं जाव थणियकुमारा वाणमंतरजोतिसिया वेमाणिया एवं चेव ॥*

**वृ.** 'दो भंते' इत्यादि 'वेउव्वियसरीर'त्ति विभूषितशरीराः ॥ अनन्तरमसुरकुमारादीनां विशेष उक्तः, अथ विशेषाधिकारादिदमाह–

**मू.** *(७३७) दो भंते ! नेरतिया एगंसि नेरतियावासंसि नेरतियत्ताए उववन्ना, तत्थ णं एगे नेरइए महाकम्मतराए चेव जाव महावेयणतराए चेव एगे नेरइए अप्पकम्मतराए चेव जाव अप्पवेयणतराए चेव से कहमेयं भंते ! एवं ?*

*गोयमा ! नेरइया दुविहा प० –मायिमिच्छादिट्ठिउववन्नगा य अमायिसम्मदिट्ठिउववन्नगा य, तत्थ णं जे से मायिमिच्छादिट्ठिउववन्नए नेरइए से णं महाकम्मतराए चेव जाव महावेयणतराए चेव। तत्थ णं जे से अमायिसम्मदिट्ठिउववन्नए नेरइए से णं अप्पकम्मतराए चेव जाव अप्पवेयणतराए चेव, दो भंते ! असुरकुमारा एवं चेव एवं एगिंदियविगलिंदियवज्जं जाव वेमाणिया*

**वृ.** 'दो भंते ! नेरइए'त्यादि, 'महाकम्मतराए चेव'त्ति इह यावत्करणात् 'महाकिरियतराए चेव महासवतराए चेव'त्त दृश्यं, व्याख्या चास्य प्राग्वत् ।

'एगिंदियविगलिंदियवज्जं'ति इहैकेन्द्रियादिवर्जनमेतेषां मायिमिथ्यादृष्टित्वेनामायिसम्यग्दृष्टिविशेषणस्यायुज्यमानत्वादिति ।

प्राग् नारकादिवक्तव्यतोक्ता ते चायुष्कप्रतिसंवेदनावन्त इति तेषां तां निरूपयन्नाह–

**मू.** *(७३८) नेरइए णं भंते ! अनंतरं उव्वट्टित्ता जे भविए पंचिंदियतिरिक्खजोणिएसु उववज्जित्तए से णं भंते ! कयरं आउयं पडिसंवेदेति ?, गोयमा ! नेरइयाउयं पडिसंवेदेति पंचिंदियतिरिक्खजोणियाउए से पुरओ कडे चिट्ठति,*

*एवं मणुस्सेसुवि, नवरं मणुस्साउए से पुरओ कडे चिट्ठइ ।*

*असुरकुमारा णं भंते ! अनंतरं उव्वट्टित्ता जे भविए पुढविकाइएसु उववज्जित्तए पुच्छा, गो० ! असुरकुमाराउयं पडिसंवेदेति पुढविकाइयाउए से पुरओ कडे चिट्ठइ ।*

*एवं जो जहिं भविओ उववज्जित्तए तस्स तं पुरओ कडं चिट्ठति, जत्थ ठिओ तं पडिसंवेदेति जाव वेमाणिए, नवरं पुढविकाइए पुढविकाइएसु उववज्जति पुढविकाइयाउयं पडिसंवेएति अन्ने य से पुढविक्काइयाउए पुरओ कडे चिट्ठति एवं जाव मणुस्सो सट्ठाणे उववाएव्वो परट्ठाणे तहेव ॥*

**मू.** *(७३९) दो भंते ! असुरकुमारा एगंसि असुरकुमारावासंसि असुरकुमारदेवत्ताए उववन्ना तत्थ णं एगे असुरकुमारे देवे उज्जुयं विउव्विस्सामीति उज्जुयं विउव्वइ वंकं विउव्विस्सामीति वंकं विउव्वइ जं जहा इच्छइ तं तहा विउव्वइ एगे असुरकुमारे देवे उज्जुयं विउव्विस्सामीति वंकं विउव्वइ वंकं विउव्विस्सामीति उज्जुयं विउव्वइ जं जहा इच्छति णो तं तहा विउव्वइ ।*

*से कहमेयं भंते ! एवं ?, गोयमा ! असुरकुमारा देवा दुविहा पं०, तं०–मायिमिच्छदिट्ठिउववन्नगा य अमायिसम्मद्दिट्ठीउववन्नगा य, तत्थ णं जे से मायिमिच्छादिट्ठिउववन्नए असुरकुमारे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*देवे से णं उज्जुयं विउव्विस्सामीति वंकं विउव्वति जाव नो तं तहा विउव्वइ, तत्थ णं जे से अमायिसम्मदिट्ठिउववन्नए असुरकुमारे देवे से उज्जुयं विउ० जाव तं तहा विउव्वइ।*

*दो भंते! नागकुमारा एवं चेव एवं जाव थणिय० वाणमं० जोइसि० वेमाणिया एवं चेव सेवं भंते! २ त्ति॥*

**वृ.** 'नेरइए ण'मित्यादि, एतच्च व्यक्तमेव॥ पूर्वमायुःप्रतिसंवेदनोक्ता, अथ तद्विशेषवक्तव्यतामाह-'दो भंते! असुरकुमारा'इत्यादि, यच्चेह मायिमिथ्यादृष्टीनामसुरकुमारादीनामृजुविकुर्वणेच्छायामपि वक्रविकुर्वणं भवति तन्मायामिथ्यात्वप्रत्ययकर्म्मप्रभावात्, अमायिसम्यग्दृष्टीनां तु यथेच्छं विकुर्व्वणा भवति तदार्जवोपेतसम्यक्त्वप्रत्ययकर्म्मवशादिति॥

शतकं-१८ उद्देशकः-५ समाप्तः

## -: शतकं-१८ उद्देशकः-६ :-

**वृ.** पञ्चमोद्देशकेऽसुरादीनां सचेतनानामनेकस्वभावतोक्ता, षष्ठे तु गुडादीनामचेतनाना सचेतनाना च सोच्यते इत्येवसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (७४०)** *फाणियगुले णं भंते! कतिवन्ने कतिगंधे कतिरसे कतिफासे पन्नत्ते?, गोयमा एत्थ णं दो नया भवंति, तं०-निच्छइयनए य वावहारियनए य, वावहारियनयस्स गोड्डे फाणियगुले नेच्छइयनयस्स पंचवन्ने दुगंधे पंचरसे अट्ठफासे प०।*

*भमरे णं भंते! कतिवन्ने? पुच्छा, गोयमा! एत्थ णं दो नया भवंति, तं०- निच्छइयनए य वावहारियनए य, वावहारियनयस्स कालए भमरे नेच्छइयनस्स पंचवन्ने जाव अट्ठफासे पं०।*

*सुयपिच्छे णं भंते! कतिवन्ने एवं चेव, नवरं वावहारियनयस्स नीलए सुयपिच्छे नेच्छइयनयस्स पंचवण्णे सेसं तं चेव, एवं एएणं अभिलावेणं लोहिया मंजिट्ठिया पीतिया हालिद्दा सुक्कलए संखे सुब्भिगंधे कोट्ठे दुब्भिगंधे मयगसरीरे तित्ते निंबे कडुया सुंठी कसाए कविट्ठे अंबा अंबिलिया महुरे खंडे कक्खडे वइरे मउए नवणीए गरुए अए लहुए उलुयपत्ते सीए हिमे उसिणे अगनिकाए निद्धे तेल्ले।*

*छारिया णं भंते! पुच्छा, गोयमा! एत्थ दो नया भवंति, तं०-निच्छइयनए य ववहारियनए य, ववहारियनयस्स लुक्खा छारिया नेच्छइयनयस्स पंचवन्ना जाव अट्ठफासा पन्नत्ता।*

**वृ.** 'फाणए'त्यादि, 'फाणियगुले णं'ति द्रवगुडः 'गोड्डे'त्ति गौल्य-गौल्यरसोपेतं मधुररसोपेतमितियावत्, व्यवहारो हि लोकसंव्यवहारपरत्वात् तदेव तत्राभ्युपगच्छति शेषरसवर्णादींस्तु सतोऽप्युपेक्षत इति, 'निच्छइयनयस्स'त्ति नैश्चयिकनयस्य मतेन पञ्चवर्णादिपरमाणुनां तत्र विद्यमानत्वात् पञ्चवर्णादिरिति॥

**मू. (७४१)** *परमाणुपोग्गले णं भंते! कतिवन्ने जाव कतिफासे पन्नत्ते?, गोयमा! एगवन्ने एगगंधे एगरसे दुफासे पन्नत्ते।*

*दुपएसिए णं भंते! खंधे कतिवन्ने पुच्छा, गोयमा! सिय एगवन्ने सिय दुवन्ने सिय एग गंधे सिय दुगंधे सिय एगरसे सिय दुरसे सिय दुफासे सिय तिफासे सिय चउफासे पन्नत्ते, एवं तिपएसिएवि नवरं सिय एगवन्ने सिय दुवन्ने सिय तिवन्ने, एवं रसेसुवि, सेसं जहा दुपएसियस्स, एवं चउपएसिएवि नवरं सय एगवन्ने जाव सिय चउवन्ने, एवं रसेसुवि सेसं तं चेव, एवं पंचपएसिएवि,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नवरं सिय एगवन्ने जाव सिय पंचवन्ने, एवं रसेसुवि गंधफासा तहेव, जहा पंचपएसिओ एवं जाव असंखेज्जपएसिओ।*

*सुहुमपरिणए णं भंते! अनंतपएसिए खंधे कतिवन्ने जहा पंचपएसिए तहेव निरवसेसं, बादरपरिणए णं भंते! अनंतपएसिए खंधे कतिवन्ने पुच्छा, गोयमा! सिय एगवन्ने जाव सिय पंचवन्ने सिय एगगंधे सिय दुगंधे सिय एगरसे जाव सिय पंचरसे सिय चउफासे जाव सिय अट्ठफासे० ॥ सेवं भंते! २ त्ति ॥*

**वृ.** 'परमाणुपोग्गले ण' मित्यादि, इह च वर्णगन्धरसेषु पञ्च द्वौ पञ्च च विकल्पाः 'दुफासे' त्ति स्निग्धरूक्षशीतोष्णस्पर्शानामन्यतराविरुद्धस्पर्शद्वययुक्त इत्यर्थः, इह च चत्वारो विकल्पाः शीतस्निग्धयोः शीतरूक्षयो उष्णस्निग्धयोः उष्णरूक्षयोश्च सम्बन्धादिति ॥

'दुपएसिए ण' मित्यादि, 'सिय एगवन्ने' त्ति द्वयोरपि प्रदेशयोरेकवर्णत्वात्, इह च पञ्च विकल्पाः, 'सिय दुवन्ने' त्ति प्रतिप्रदेशं वर्णान्तरभावात्, इह च दश विकल्पाः, एवं गन्धादिष्वपि, 'सिय दुफासे' त्ति प्रदेशद्वयस्यापि शीतस्निग्धत्वादिभावात्, इहापि त एव चत्वारो विकल्पाः, 'सिय तिफासे' त्ति इह चत्वारो विकल्पास्तत्र प्रदेशद्वयस्यापि शीतभावात्।

एकस्य च तत्र स्निग्धभावात् द्वितीयस्य च रूक्षभावादेकः, 'एवम्' अनेनैव न्यायेन प्रदेशद्वयस्योष्णभावाद्द्वितीयः, तथा प्रदेशद्वयस्यापि स्निग्धभावात्, तत्र चैकस्य सीतभावादेकस्य चोष्णभावात्तृतीयः, 'एवम्' अनेनैव न्यायेन प्रदेशद्वयस्य रूक्षभावाच्चतुर्थ इति, 'सिय चउफासे' त्ति इह 'देसे सीए देसे उसिणे देस निद्धे देसे लुक्खे' तत्ति वक्ष्यमाणवचनादेकः, एवं त्रिप्रदेशादष्वपि स्वयमभ्यूह्यम्।

'सुहुमपरिणए ण' मित्यादि, अनन्तप्रदेशिको बादरपरिणामोऽपि स्कन्धो भवति द्वयणुकादिस्तु सूक्ष्मपरिणाम एवेत्यनन्तप्रदेशिकस्कन्धः सूक्ष्मपरिणामत्वेन विशेषितस्तत्राद्याश्चत्वारः स्पर्शा सूक्ष्मेषु बादरेषु चानन्तप्रदेशिकस्कन्धेषु भवन्ति, मृदुकठिनगुरुलघुस्पर्सास्तु बादरेष्वेवेति ॥

शतकं-१८ उद्देशकः-६ समाप्तः

## -: शतकं-१८ उद्देशकः-७ :-

**वृ.** षष्ठोद्देशके नयवादिमतमाश्रित्य वस्तु विचारितं, सप्तमे त्वन्ययूथिकमतमाश्रित्य तद्विचार्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्-

**मू. (७४२)** *रायगिहे जाव एवं वयासी-अन्नउत्थिया णं भंते! एवमाइक्खंति जाव परूवेंति-एवं खलु केवली जक्खाएसेणं आतिट्ठे समाणे आहच्च दो भासाओ भासति, तं०-मोसं वा सच्चामोसं वा। से कहमेयं भंते! एवं?, गोयमा! जण्णं ते अन्नउत्थिया जाव जे ते एवमाहंसु मिच्छं ते एवमाहिंसु।*

*अहं पुण गोयमा! एवमाइक्खामि ४-नो खलु केवली जक्खाएसेणं आइस्सति, नो खलु केवली जक्खाएसेणं आतिट्ठे समाणे आहच्च दो भासाओ भासति तं०-मोसं वा सच्चामोसं वा।*

*केवली णं असावज्जाओ अपरोवघाइयाओ आहच्च दो भासाओ भासति, तं०-सच्चं वा असच्चामोसं वा ॥*

**वृ.** 'रायगिहे' इत्यादि, 'जक्खाएसेणं आइस्सइ' त्ति देवावेशेन 'आविश्यते' अधिष्ठीयत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, 'नो खलु'इत्यादि, नो खलु केवली यक्षावेशेनाविश्यते अनन्तवीर्यत्वात्तस्य, 'अन्नातिट्ठे'त्ति अन्याविष्टः-परवशीकृतः ॥ सत्यादिभाषाद्वयं च भाषमाणः केवली उपधिपरिग्रहप्रणिधानादिकं विचित्रं वस्तु भाषत इति तद्दशनार्थमाह-

**मू. (७४३)** *कतिविहे णं भंते! उवही पन्नत्ते?, गोयमा! तिविहे उवही प० तं०-कम्मोवही सरीरोवही बाहिर भंडमत्तोवगरणोवही, नेरइयाणं भंते! पुच्छा, गोयमा! दुविह उवही प० तं०- कम्मोवही य सरीरोवही य, सेसाणं तिविहा उवही एगिंदियवज्ञाणं जाव वेमाणियाणं।*

*एगिंदियाणं दुविहे प० तंजहा-क्मोवही य सरीरोवही य, कतिविहे णं भंते! उवही पं?, गो० तिविहे उवही प० तंजहा-सच्चित्ते अचित्ते मीसए, एवं नेरइयाणवि, एवं निरवसेसं जाव वेमाणियाणं।*

*कतिविहे णं भंते! परिग्गहे प०?, गोयमा! तिविहे परिग्गहे प० तं०-कम्परिग्गहे सरीरपरिग्गहे बाहिरगभंडमत्तोवगरणपरिग्गहे, नेरइयाणं भंते! एवं जहा उवहिणा दो दंडगा भणिया तहा परिग्गहेणवि दो दंडगा भाणियव्वा।*

*कइविहे णं भंते! पणिहाणे प०?, गोयम! तिविहे पणिहाणे प०, तं०-मणपहिहाणे वइपिहाणे कायपणिहाणे, नेरइयाणं भंते! कइविहे पणिहाणे प०, एवं चेव एवंजाव थणियकुमाराणं, पुढविकाइयाणं पुच्छा, गोयमा! एगे कायपणिहाणे प०, एवं जाव वणस्सकाइयाणं, बेइंदियाणं पुच्छा, गोयमा! दुविहे पणिहाणे प० तं-वइपणिहाणे य कायपणिहाणे य, एवं जाव चउरिंदियाणं सेसाणं तिविहेवि जाव वेमाणियाणं।*

*कतिविहे णं भंते! दुप्पणिहाणे प०?, गोयमा! तिविहे दुप्पणिहाणे प० तं०-मणदुप्पणिहाणे जहेव पणिहाणेणं दंडगो भणिओ तहेव दुप्पणिहाणेणवि भाणियव्वो। कतिविहे णं भंते! सुप्पणिहाणे प०?, गोयमा! तिविहे सुप्पणिहाणे०, तंजहा-मणसुप्पणिहाणे वइसुप्पणिहाणे कायसुप्पणिहाणे, मणुस्साणं भंते! कइविहे सुप्पणिहाणे प०? एवं चेव जाव वेमाणियाणं सेवं भंते २ जाव विहरति*

*तए णं समणे भगवं महावीरे जाव बहिया जणवयविहारं विहरइ॥*

**वृ.** 'कतिविहे ण'मित्यादि, तत्र उपधीयते-उपष्टभ्यते येनात्माऽसावुपधि, 'बाहिरभंड-मत्तोवगरणोवही'ति बाह्येकर्म्मशरीरव्यतिरिक्ते य भाण्डमात्रोपकरणे तद्रूपो य उपधि स तथा, तत्र भाण्डमात्रा-भाजनरूपः परिच्छदः उपकरणं च-वस्त्रादीति, 'एगिंदियवज्ञाणं'ति एकेन्द्रियाणां भाण्डमात्रादि नास्तीति तद्वर्जितानामन्येषां त्रिविधोऽप्यस्तीति।

'सच्चित्ते'त्यादि, सच्चित्तादिद्रव्याणि शरीरादीनि, 'एवं नेरइयाणवि'त्ति अनेनेदं सूचितं-' नेरइयाणं भंते! कइविहे उवही प०? गोयमा! तिविहे उवही प० तंजहा-सचित्ते अचित्ते मीस-एत्ति तत्र नारकाणा सचित उपधिः-शरीरम् अच्चित्त-उत्पत्तिस्थानं मिश्रस्तु-शरीरमेवोच्छ्वा-सादिपुद्गलयुक्तं तेषां चेतनत्वेन मिश्रत्वस्य विवक्षणादिति। 'परिग्गहे'त्ति परिगृह्यत इति परिग्रहः, अथैतस्योपधेश्च को भेदं?, उच्यते, उपकारक उपधिः ममत्वबुद्ध्या परिगृह्यमाणस्तु परिग्रह इति। 'पणिहाणे'त्ति प्रकर्षेण नियते आलम्बने धानं-धरणं मनःप्रभृतेरिति प्रणिधानम्॥ एषु च केवलिभाषितेष्वर्थेषु विप्रतिपद्यमानोऽहंमानी मानवो न्यायेन निरसनीय इत्येतत् चरितेन दर्शयन्नाह-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (७४४)** तेणं कालेणं २ रायगिहे नामं नगरे गुणसिलए चेइए वन्नओ जाव पुढविसिलापट्टओ, तस्स णं गुणसिलस्स चेइयस्स अदूरसामंते बहवे अन्नउत्थिया परिवसंति, तं०–कालोदायी सेलोदायी एवं जहा सत्तमसए अन्नउत्थिउद्देसए जाव से कहमेयं मन्ने एवं ?, तत्थ णं रायगिहे नगरे मद्दुए नामं समणोवासेए परिवसति अड्ढे जाव अपरिभूए अभिगयजीवा जाव विहरति, तए णं समणे भगवं म० अन्नया कदायि पुव्वाणुपुव्विं चरमाणे जाव समोसढे परिसा पडिगया जाव पज्जुवासति।

तए णं मद्दुए समणोवासए इमीसे कहाए लद्धट्ठे समाणे हट्ठतुट्ठजाव हियए ण्हाए जाव सरीरे सयाओ गिहाओ पडिनिक्खमति स० २ पादविहारचारेणं रायगिहं नगरं जाव निग्गच्छति नि० २ तेसिं अन्नउत्थियाणं अदूरसामंतेणं वीयीवयति, तए णं ते अन्नउत्थिया मद्दुयं समणोवासयं अदूरसामंतेणं वीयीवयमाणं पासंति २ अन्नमन्नं सद्दावेंति २ त्ता एवं वयासी–

एवं खलु देवाणुप्पिया ! अम्हं इमा कहा अविउप्पकडा इमं च णं मद्दुए समणोवासए अम्हं अदूरसामंतेणं वीइवयइ तं सेयं खलु देवाणुप्पिया ! अम्हं मद्दुयं समणोवासयं एयमट्ठं पुच्छित्तएत्तिकट्टु अन्नमन्नस्स अंतियं एयमट्ठं पडिसुणेंति अन्नमन्नस्स २ त्ता जेणेव मद्दुए समणोवासए तेणेव उवा० २ मद्दुयं समणोवासयं एवं वदासी–एवं खलु मद्दुया ! तव धम्मायरिए धम्मोवदेसए समणे णायपुत्ते पंच अत्थिकाये पन्नवेइ जहा सत्तमे सए अन्नउत्थिउद्देसए जाव कहमेयं मद्दुया ! एवं ?

तए णं से मद्दुए समणोवासए ते अन्नउत्थिए एवं वयासी–जति कज्जं कज्जति जाणामो पासामो अहे कज्जं न कज्जति न जाणामो न पासामो, तए णं ते अन्नउत्थिया मद्दुयं समणोवासयं एवं वयासी–केस णं तुमं मद्दुया ! समणोवासगाणं भवसि जे णं तुमं एयमट्ठं न जाणसि न पाससि

तए णं से मद्दुए समणोवासए ते अन्नउत्थिए एवं वयासी–अत्थि णं आउसो ! वाउयाए वाति ?, हंता अत्थि, तुज्झे णं आउसो ! वाउयायस्स वायमाणस्स रूवं पासह ?, नो तिणट्ठे समट्ठे अत्थि णं आउसो ! घाणसहगया पोग्गला ?, हंता अत्थि, तुज्झे णं आउसो ! घाणसहगयाणं पोग्गलाणं रूवं पासह ?, नो तिणट्ठे० ।

अत्थि णं भंते ! आउसो ! अरणिसहगये अगनिकाये ?, हंता अत्थि, तुज्झे णं आउसो ! अरणिसहगयस्स अगणिकायस्स रूवं पासह ?, नो ति०, अत्थि णं आउसो ! समुद्दस्स पारगयाइं रूवाइं ?, हंता अत्थि, तुज्झे णं आउसो ! समुद्दस्स पारगयाइं रूवाइं पासह ?, नो ति० अत्थि णे आउसो ! देवलोगगयाइं रूवाइं ?, हंता अत्थि ।

तुज्झे णं आउसो ! देवलोगगयाइं रूवाइं पासह ?, नो ति०, एवामेव आउसो ! अहं वा तुज्झे वा अन्नो वा छउमत्थो जइ जो जं न जाणइ न पासइ तं सव्वं न भवति एवं ते सुवहुए लोए न भविस्सतीतिकट्टु ते णं अन्नउत्थिए एवं पडिहणइ एवं प० ३ जेणेव गुणसि० चेइए जेणेव समणे भ० महा० तेणेव उवाग० २ समणं भगवं महावीरं पंचविहेणं अभिगमेणं जाव पज्जुवासति

मद्दुयादी ! समणे भ० महा० मद्दुयं समणोवासगं एवं वयासी–सुट्ठु णं मद्दुया ! तुमं ते अन्नउत्थिए एवं वयासी, साहू णं मद्दुया ! तुमं ते अन्नउ० एवं वयासी, जे णं मद्दुया ! अट्ठं वा हेउं वा पसिणं वावागरणं वा अन्नयं अदिट्ठं अस्सुतं अमयं अविण्णायं वहुजणमज्झे आघवेति पन्नवेति जाव उवदंसेति से णं अरिहंताणं आसायणाए वट्टति अरिहंतपन्नत्तस्स धम्मस्स आसायणाए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वट्टति केवलीणं आसायणाए वट्टति केलिपन्नत्तस्स धम्मस्स आसायणाए वट्टति तं सुट्ठ णं तुमं मद्दुया ! ते अन्नउ० एवं वयासी –*

*–साहू णं तुमं मद्दुया ! जाव एवं वयासी, तए णं मद्दुए समणोवासए समणेणं भग० महा० एवं वु० समाणे हट्ठ तुट्ठे समणं भ० महावीरं वं० न० २ नच्चासन्ने जाव पज्जुवासइ, तए णं सम० भ० म० मद्दुयस्स समणोवासगस्स तीसे य जाव परिसा पडिगया, तए णं मद्दु० समणस्स भ० म० जाव निसम्म हट्ठतुट्ठ पसिणाइं वागरणाइं पुच्छति प० २ अट्ठाइं परियातिइ २ उट्ठा उट्ठे० २ समणं भगवं महा० वं० नमं० २ जाव पडिगए ।*

*भंतेत्ति भगवं गोयमे समणे भगवं महा० वं० नमं० २ एवं वयासी–पभू णं भंते ! मद्दुए समणोवासए देवाणुप्पियाणं अंतियं जाव पव्वइत्तए ?, नो तिणट्ठे समट्ठे, एवं जहेव संखे तहेव अरुणाभे जाव अंतं काहिति ॥*

**वृ.** 'तेण'मित्यादि, 'एवं जहा सत्तमसए'इत्यादिना यत्सूचितं तस्यार्थतो लेशो दर्श्यते–कालोदायिसेलोदायिसेवालोदायिप्रभृतिकानामन्ययूथिकानामेकत्र संहितानां मिथः कथासंलापः समुत्पन्नो यदुत महावीरः पञ्चास्तिकायान् धर्मास्तिकायादीन् प्रज्ञापयति, तत्र च धर्माधर्माकाशपुद्गलास्तिकायानचेतनान् जीवास्तिकायं च सचेतनं तथा धर्म्माधर्म्मा-काशजीवास्तिकायानरूपिणः पुद्गलास्तिकायं च रूपिणं प्रज्ञापयतीति 'से कहमेयं मन्ने एवं'ति अथ कथमेतद्–धर्म्मास्तिकायादि वस्तु मन्ये इति वितर्क्कार्थः 'एवं' सचेतनाचेतनादिरूपेण, अदृश्यमानत्वेनासम्भवात्तस्येति हृदयम् ।

'अविउप्पकडे'त्ति अपिशब्दः संभावनार्थ उद्–प्राबल्येन च प्रकृता–प्रस्तुता प्रकटा वा उत्प्रकृतोऽप्रकटा वा अथवा अविद्वद्भिः–अजानद्भिः प्रकृता–कृता प्रस्तुता वा अविद्वत्प्रकृता, 'जइ कज्जं कज्जइ जाणामो पासामो'त्ति यदि तैर्धर्मास्तिकायादिभि :कार्यं स्वकीयं क्रियते ततदा तेन कार्येण तान् जानीमः पश्यामश्चावगच्छाम इत्यर्थ घूमेनाग्निमिव, अथ कार्यं तैर्न क्रियते तदा न जानीमो न पश्यामश्च, अयमभिप्रायः–कार्यादिलिङ्गद्वारेणैवार्वागदृशामतीन्द्रियपदार्थावगमो भवति, न च धर्मास्तिकायादीनामस्मत्प्रतीतं किञ्चित् कार्यादिलिङ्ग दृश्यत इति तदभावात्तन्न जानीम एव वयमिति ।

अथ मद्रुकं धर्म्मास्तिकायाद्यपरिज्ञानाभ्युपगमवन्तमुपालम्भयितुं यत्ते प्राहुस्तदाह–'केस ण'मित्यादि, क एष त्वं मद्रुक ! श्रमणोपासकानां मध्ये भवसि यत्त्वमेतमर्थं श्रमणोपासकज्ञेयं धर्म्मास्तिकायाद्यस्तित्वलक्षणं न जानासि न पश्यसि ?, न कश्चिदित्यर्थः ॥

अथैवमुपालब्धः सन्नसौ यत्तैरदृश्यमानत्वेन धर्म्मास्तिकायाद्यसम्भव इत्युक्तं तद्विघटनेन तान् प्रतिहन्तुमिदमाह–'अत्थिण'मित्यादि, 'घाणसहगय'त्ति घ्रायत इति घ्राणो–गन्धगुणस्तेन सहगताःतत्सहचरितास्तद्वन्तो घ्राणसहगताः 'अरणिसहगए'त्ति अरणि–अग्न्यर्थं निर्मन्थनीयकाष्ठं तेन सह गतो यः स तथा तं 'सुट्ठुं णं मद्दुया ! तुमं'ति सुष्ठु त्वं हे मद्दुका ! येन त्वयाऽस्तिकायानजानता न जानीम इत्युक्तम्, अन्यथा अजानन्नपि यदि जानीम इत्यभणिष्यस्तदाऽर्हदादीनामत्या-शातनाकारकोऽभविष्यस्त्वमिति ।

पूर्वं मद्दुकश्रमणोपासकोऽरुणाभे विमाने देवत्वेनोत्पत्स्यत इत्युक्तम्, अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवाधिकाराद्देववक्तव्यतामेवोद्देशकान्तं यावदाह–

**मू. (७४५)** *देवे णं भंते ! महड्ढिए जाव महेसक्खे रूवसहस्सं विउव्वित्ता पभू अन्नमन्नेणं सद्धिं संगामं संगामित्तए ?, हंता पभू । ताओ णं भंते ! बोंदीओ किं एगजीवफुडाओ अनेगजीवफुडाओ ?, गोयमा ! एगजीवफुडाओनो अनोगजीवफुडाओ ।*

*तेसि णं भंते ! बोंदीणं अंतरा किं एगजीवफुडा अणेगजीवफुडा ?, गोयमा ! एगजीवफुडा नो अणेगजीवफुडा । पुरिसे णं भंते ! अंतरेणं हत्थेण वा एवं जहा अट्ठमसए तइए उद्देसए जाव नो खलु तत्थ सत्थं कमति ॥*

**वृ.** 'देवे ण' मित्यादि, 'तासिं बोंदीणं अंतर' त्ति तेषां विकुर्व्वितशरीराणामन्तराणि 'एवं जहा अट्ठमसए' इत्यादि अनेन यत्सूचितं तदिदं–'पाएण वा हत्थेण वा अंगुलियाए वा सिलागाए वा कट्ठेण वा कलिंचेण वा आमुसमाणे वा आलिहमाणे वा विलिहमाणे वा अन्नयरेण वा तिक्खेणं सत्थजाएणं आछिंदमाणे वा विच्छिंदमाणे वा अगणिकाएण वा आलिहमाणे वा विलिहमाणे वा अन्नयरेण वा तिक्खेणं सत्थजाएणं आछिंदमाणे वा विच्छिंदमाणे वा अगणिकाएण वा समोडहमाणे वा तेसिं जीवप्पएसाणं आबाहं वा वाबाहं वा करेइ छविच्छेयं वा उप्पाएइ ?, नो इणट्ठे समट्ठे' त्ति व्याख्या चास्य प्राग्वत् ।

**मू. (७४६)** *अत्थि णं भंते ! देवासुराणं संगामे २ ? हंता अत्थि, देवासुरेसु णं भंते ! संगामेसु वट्टमाणेसु किन्नं तेसिं देवाणं पहरणरयणत्ताए परिणमति ।*

*गोयमा ! जन्नं ते देवा तणं वा कट्ठं वा पत्तं वा सक्करं वा परामुसंति तं तं तेसिं देवाणं पहरणरयणत्ताए परिणमति, जहेव देवाणं तहेव असुरकुमाराणं ? नो तिणट्ठे समट्ठे, असुरकुमाराणं देवाणं निच्चं विउव्विया पहरणरयणा प० ।*

**वृ.** 'जन्नं देवा तणं वा कट्ठं वा' इत्यादि इह च यद्देवानां तृणाद्यपि प्रहरणीभवति तदचिन्त्यपुण्यसम्भारवशात् सुभमचक्रवर्त्तिनः स्थालमिव, असुराणां तु यन्नित्यविकुर्वितानि तानि भवन्ति तद्देवापेक्षया तेषां मन्दतरपुण्यत्वात्तथाविधपुरुषाणामिवेत्यवगन्तव्यमिति ।

**मू. (७४७)** *देवे णं भंते ! महड्ढिए जाव महेसक्खे पभू लवणसमुद्दं अनुपरियट्टित्ताणं हव्वमागच्छित्तए ?, हंता पभू ।*

*देवे णं भंते ! महड्ढिए एवं धायइसंडं दीवं जाव हंता पभू, एवं जाव रुयगवरं दीवं जाव हंता पभू, ते णं परं वीतीवएज्जा नो चेव णं अणुपरियट्टेज्जा ।*

**वृ.** 'वीतीवएज्ज' त्ति एकया दिशा व्यतिक्रमेत 'नो चेव णं अणुपरियट्टेज्ज' त्ति नैव सर्वतः परिभ्रमेत्, तथाविधप्रयोजनाभावादिति सम्भाव्यते ।

**मू. (७४८)** *अत्थि णं भंते ! देवा जे अनंते कम्मंसे जहन्नेणं एक्केण वा दोहिं व तीहिं वा उक्कोसेणं पंचहिं वाससएहिं खवयंति ?, हंता अत्थि, अत्थि णं भंते ! देवा जे अनंते कम्मंसे जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचहिं वाससहस्सेहिं खवयंति ?, हंता अत्थि ।*

*अत्थि ण भंते ! ते देवा जे अनंते कम्मंसे जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचहिं वाससयसहस्सेहिं खवयंति ?, हंता अत्थि, कयरेणं भंते ! ते देवा जे अनंते कम्मंसे जहन्नेणं एक्केण वा जाव पंचहिं वाससएहिं खवयंति ?*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कयरे णं भंते! ते देवा जाव पंचहिं वाससहस्सेहिं खवयंति?, कयरे णं भंते! ते देवा जाव पंचहिं वाससयसहस्सेहिं खवयंति?, गोयमा! वाणमंतरा देवा अनंते कम्मंसे एगेणं वाससएणं खवयंति, असुरिंदवज्जिया भवणवासी देवा अनंते कम्मंसे दोहिं वाससएहिं खवयंति।*

*असुरकुमारा णं देवा अनंते कम्मंसे तीहिं वाससएहिं खवयंति, गहनक्खत्ततारारूवा जोइसिया देवा अनंते कम्मंसे चउहिं वास जाव खवयंति चंदिमसूरिया जोइसिंदा जोतिसरायाणो अनंते कम्मंसे पंचहिं वाससएहिं खवयंति सोहम्मीसाणगा देवा अनंते कम्मंसे एगेणं वाससहस्सेणं जाव खवयंति सणंकुमारमाहिंदगा देवा अनंते कम्मंसे दोहिं वाससहस्सेहिं खवयंति।*

*एवं एएणं अभिलावेणं बंभलोगलंतगा देवा अनंते कम्मंसे तीहिं वाससहस्सेहिं खवयंति महासुक्कसहस्सारगा देवा अनंते चउहिं वाससह० आणयपाणयआरणअच्चुयगा देवा अनंते पंचहिं वाससहस्सेहिं खवयंति हिट्ठिमगेविज्जगा देवा अनंते कम्मंसे एगेणं वाससयसहसेणं खवयंति मज्झिमगेवेज्जगा देवा अनंते दोहिं वाससयसहस्सेहिं जाव खवयंति उवरिमगेवेज्जगा देवा अनंते कम्मंसे तिहिं वासजाव खवयंति विजयवेजयंतजयंतअपराजियगा देवा अनंते चउहिं वास जाव खवयंति सव्वट्ठसिद्धगा देवा अनंते कम्मंसे पंचहिं वाससयसहस्सेहिं खवयंति।*

*एएणट्ठेणं गो० ते देवा जे अनंते कम्मंसे जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचहिं वाससएहिं खवयंति एएणं गो० ते देवा जाव पंचहिं वाससहस्सेहिं खवयंति, एएणट्ठेणं गो० ते देवा जाव पंचहिं वाससयसहस्सेहिं खवयति। सेवं भंते! सेवं भंते! ॥*

**वृ.** 'अत्थि णं भंते! इत्यादि, इह देवानां पुण्यकर्म्मपुद्‌गलाः प्रकृष्टप्रकृष्टतरप्रकृष्टतमानुभागा आयुष्ककर्म्मसहचरिततथा वेदनीया अनन्तानन्ता भवन्ति ततश्च सन्ति भदन्त! ते देवा ये तेषामनन्तानन्तकर्मांशानां मध्यादनन्तान् कर्म्मांशान् जघन्येन कालस्याल्पतय एकादिना वर्षशतेन उत्कर्षतस्तु पञ्चभिर्वर्षशतैः क्षपयन्तीत्यादि प्रश्नः।

'गोयमे''त्याद्युत्तरं, तत्र व्यन्तरा अनन्तान् कर्म्मांशान् वर्षशतेनैकेन क्षपयन्ति अनन्तानामपि तदीयपुद्‌गलानामल्पानुभागतया स्तोकेनैव कालेन क्षपयितुं शक्यत्वात् तथाविधाल्पस्नेहाहारवत्, तथा तावत एव कर्म्मांशान् असुरवर्जितभनपततयो द्वाभ्यां वर्षशताभ्यां क्षपयन्ति, तदीयपुद्‌गलानां व्यन्तरपुद्‌गलापेक्षया प्रकृष्टानुभावेन बहुतरकालेन क्षपयितुं शक्यत्वात् स्निग्धतराहारवदिति, एवमुत्तरत्रापि भावना कार्येति ॥

शतकं-१८ उद्देशकः-७ समाप्तः

## -: शतकं-१८ उद्देशकः-८ :-

**वृ.** सप्तमोद्देशकान्ते कर्म्मक्षपणोक्ता, अष्टमे तु तद्बन्धो निरूप्यत इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (७४९)** *रायगिहे जाव एवं वयासी-अनगारस्स णं भंते! भावियप्पणो पुरओ दुहओ जुगमायाए पेहाए रीयं रीयमाणस्स पायस्स अहे कुक्कडपोते वा वट्टापोते वा कुलिंगच्छाए वा परियावज्जेज्जा तस्स णं भंते! किं ईरियावहिया किरिया कज्जइ संपराइया किरिया कज्जइ?*

*गोयमा! अनगारस्सणं भावियप्पणो जाव तस्स णं ईरियावहिया किरिया कज्जइ नो संपराइया किरिया कज्जइ, से केणट्ठेणं भंते! एवं वुच्चइ जहा सत्तमसए संवुडुद्देसए जाव अट्ठो निक्खित्तो।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सेवं भंते सेवं भंते ! जाव विहरति ।। तए णं समणे भगवं महावीरे बहिया जाव विहरति*

**वृ.** 'रायगिहे'इत्यादि, 'पुरओ'त्ति अग्रतः 'दुहओ'त्ति 'द्विधा' अन्तराऽन्तरा पार्श्वतः पृष्ठतश्चेत्यर्थ 'जुगमायाए'त्ति यूपमात्रया दृष्ट्या 'पेहाए'त्ति प्रेक्ष्य २ 'रीयं'ति गतं–गमनं 'रीयमाणस्स'त्ति कुर्वत इत्यर्थः 'कुक्कडपोयए'त्ति कुक्कुटडिम्भः 'वट्टापोयए'त्ति इह वर्त्तका–पक्षिविशेषः 'कुलिंगच्छाए व'त्ति पिपीलिकादिसदृशः 'परियावज्जेज्ज'त्ति 'पर्यापद्येत' म्रियेत 'एवं जहा सत्तमसए'इत्यादि ।

अनेन च यत्सूचितं तस्यार्थलेश एवम्–अथ केनार्थेन भदन्त ! एवमुच्यते, गौतम ! यस्य क्रोधादयो व्यवच्छिन्ना भवन्ति तस्येर्यापथिक्येव क्रिया भवतीत्यादि 'जाव अट्ठो निक्खित्तो'त्त 'से केणट्ठेणं भंते !' इत्यादिवाक्यस्य निगमनं यावदित्यर्थ, तच्च 'से तेणट्ठेणं गोयमा'इत्यादि ।

प्रागमनमाश्रित्य विचारः कृतः, अथ तदेवाश्रित्यान्ययूथिकमतनिषेधतः स एवोच्यते–

**मू. (७५०)** *तेणं कालेणं २ रायगिहे जाव पुढविसिलापट्टए तस्स णं गुणसिलस्स चेइयस्स अदूरसामंते बहवे अन्नउत्थिया पहरिवसंति, तए णं समणे भगवं महा० जाव समोसढे जाव परिसा पडिगया, तेणं कालेणं २ समणस्स भ० म० जेट्ठे अंतेवासी इंदभूतीनामं अनगारे जाव उड्ढंजाणू जाव विहरइ ।*

*तए णं ते अन्नउत्थिया जेणेव भगवं गोयमे तेणेव उवागच्छन्ति उवागच्छित्ता भगवं गोयमं एवं वयासी–तुज्झे णं अज्जो ! तिविहं तिविहेणं अस्संजया जाव एगंतबाला यावि भवह ।*

*तए णं भगवं गोयमे अन्नउत्थिए एवं वयासी–से केणं कारणेणं अज्जो ! अम्हे तिविहं तिविहेणं अस्संजया जाव एगंतबाला यावि भवामो । तए णं ते अन्नउत्थिया भगवं गोयमं एवं वयासी–तुज्झे णं अज्जो ! रीयं रीयमाणा पाणे पेच्चेह अभिहणह जाव उवद्दवेह, तए मं तुज्झे पाणे पेच्चेमाणा जाव उवद्दवेमाणा तिविहं तिविहेणं जाव एगंतबाला यावि भवह ।*

*तएणं भगवं गोयमे ते अन्नउत्थिए एवं वयासी–नो खलु अज्जो ! अम्हे रीयं रीयमाणा पाणे पेच्चेमो जाव उवद्दवेमो अम्हे णं अज्जो ! रीयं रीयमाणा कायं च जोयं च रीयं च पडुच्च दिस्सा २ पदिस्सा २ वयामो तए णं अम्हे दिस्सा दिस्सा वयमाणा पदिस्सा पदिस्सा वयमाणा नो पाणे पेच्चेमो जाव नो उवद्दवेमो ।*

*तए णं अम्हे पाणे अपेच्चेमाणा जाव अनोद्दवेमाणा तिविहं तिविहेणं जाव एगंतपंडिया यावि भवामो, तुज्झे णं अज्जो ! अप्पणा चेव तिविहं तिविहेणं जाव एगंतबाला यावि भवह ।*

*तए णं ते अन्नउत्थिया भगवं गोयमं एवं व०–केणं कारणेणं अज्जो ! अम्हे तिविहं तिविहेणं जाव भवामो, तए णं भगवं गोयमे ते अन्नउत्थिए एवं व०–तुज्झे णं अज्जो ! रीयं रीयमाणा पाणे पेच्चेह जाव उवद्दवेह तए णं तुज्झे पाणे पेच्चेमाणा जाव उवद्दवेमाणा तिविहं जाव एगंतबाला यावि भवह ।*

*तए णं भगवं गोयमे ते अन्नउत्थिए एवं पडिहणइ पडिहणित्ता जेणेव समणे भगवं महा० तेणेव उवाग० २ समणं भगवं महावीरं वंदति नमंसति वंदित्ता नमंसित्ता णच्चासन्ने जाव पज्जुवासति, गोयमादि समणे भगवं महावीरे भगवं गोयमं एवं वयासी–*

*सुट्ठु णं तुमं गो० ! ते अन्नउत्थिए एवं व० साहु णं तुमं गोयमा ! ते अन्नउत्थिए एवं व०*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अत्थि णं गो० ममं बहवे अंतेवासी समणा निग्गंथा छउमत्था जे णं नो पभू एयं वागरणं वागरेत्तए जहा णं तुमं तं सुट्ठु णं तुमं गो० ! ते अन्नउत्थिए एवं वयासी साहू णं तुमं गो० ! ते अन्न एवं वयासी*

**वृ.** 'तए ण'मित्यादि, 'पेच्चेह'त्ति आक्रमथ 'कायं च'त्ति देहं प्रतीत्य व्रजाम इति योगः, देहश्चेद्गमनशक्तो भवति तदा व्रजामो नान्यथा अश्वशकटादिनेत्यर्थः, योगं च-संयमव्यापारं ज्ञानाद्युपष्टम्भकप्रोयजनं भिक्षाटनादि, न तं विनेत्यर्थः, 'रीयं च'त्ति 'गमनं च' अत्वरितादिकं गमनविशेषं 'प्रतीत्य' आश्रित्य, कथम् ? इत्याह ।

'दिस्सा दिस्स'त्ति दृष्ट्वा २ 'पदिस्सा पदिस्स'त्ति प्रकर्षेण दृष्ट्वा २ ॥ प्राक् छद्मस्था एवं व्याकर्त्तु न प्रभइ इत्युक्तम्, अथ छद्मस्थमेवाश्रित्य प्रश्नयन्नाह -

**मू. (७५१)** *तए णं भगवं गोयमे समणेणं भगवया महावीरेण एवं वुत्ते समाणे हट्ठतुट्ठे समणं भ० म० वं० नमं० एवं वयासी-छउमत्थे णं भंते ! मणुसे परमाणुपोग्गलं किं जाणति पासति उदाहु न जाणति न पासति ? गोयमा ! अत्थेगतिए जाणति न पासति अत्थेगतिए न जाणति न पासति ।*

*छउमत्थे णं भंते १ मणूसे दुपएसियं खंधं किं जाणति २ ?, एवं चेव, एवं जाव असंखेज्ज-पदेसियं, छउमत्थे णं भंते ! मणूसे अनंतपएसियं खंधं किं पुच्छा, गोयमा ! अत्थेतिए जाणति पासति १ अत्थेगतिए जाणति न पासति २ अत्थेगतिए न जाणति पासइ ३ अत्थेगतिए न जाणइ न पासति ४ ।*

*अहोहिए णं भंते ! मणुस्से परमाणुपोग्गलं जहा छउमत्थे एवं अहोहिएवि जाव अनंतपदेसियं, परमाहोहिए णं भंते ! मणूसे परमाणुपोग्गलं जं समयं जाणति तं समयं पासति जं समयं पासति तं समयं जाणति ?, नो तिणट्ठे समट्ठे ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ परमाहोहिए णं मणूसे परमाणुपोग्गलं जं समयं जाणति नो तं समयं पासति जं समयं पासति नो तं समयं जाणति ?, गोयमा ! सागारे से नाणे भवइ अनागारे से दंसणे भवइ, से तेणट्ठेणं जाव नो तं समयं जाणति एवं जाव अनंतपदेसियं ।*

*केवली णं भंते ! मणुस्से परमाणुपोग्गलं जहा परमाहोहिए तहा केवलीवि जाव अनंतपएसियं सेवं भंते २ त्ति ॥*

**वृ.** 'छउमत्थे' त्यादि, इह छद्मस्थो निरतिशयो ग्राह्यः 'जाणइ न पासइ'त्ति श्रुतोपयुक्तः श्रुतज्ञानी, श्रुते दर्शनाभावात्, तदन्यस्तु 'ने जाणइ न पासइ'त्ति अनन्तप्रदेशिकसूत्रे चत्वारो भङ्गा भवन्ति, जानाति स्पर्शनादिना पश्यति च चक्षुषेत्येकः १, तथाऽन्यो जानाति स्पर्शादिना न पश्यति चक्षुषा चक्षुषोऽभावादिति द्वितीयः २ । तथाऽन्यो न जानाति स्पर्शाद्यगोचरत्वात् पश्यति चक्षुषेति तृतीयः ३, तथाऽन्यो न जानाति न पश्यति चाविषयत्वादिति चतुर्थ ४ ॥

छद्मस्थाधिकाराच्छद्मस्थविशेषभूताधोऽवधिकपरमाधोऽवधिकसूत्रे । परमावधिकश्चावश्यमन्तर्मूहूर्त्तेन केवली भवतीति केवलिसूत्रं, तत्र च 'सागारे से नाणे भवति'त्ति 'साकारं' विशेषग्रहणस्वरूपं 'से'तस्य परमाधोऽवधिकस्य तद्वा ज्ञानं भवति, तद्धि पर्ययभूतं च दर्शनमतः परस्परविरुद्धयोरेकसमये नास्ति सम्भव इति ॥

शतकं-१८ उद्देशकः-८ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं–१८ उद्देशकः–९ :–

**वृ.** अष्टमोद्देशकान्ते केवली प्ररूपितः, स च भव्यद्रव्यसिद्ध इत्येवं भव्यद्रव्याधिकारान्नवमे भव्यद्रव्यनारकादयोऽभिधीयन्ते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

*'मू. (७५२)' रायगिहे जाव एवं वयासी–अत्थि णं भंते ! भवियदव्वनेरइया भवि० २ हंता अत्थि, से केणट्ठेणं भंते ! एवं वुच्चइ भवियदव्वनेर० भ० ?, जे भविए पंचिंदिए तिरिक्खजोणिए वा मणुस्स वा नेरइएसु उववज्जित्तए से तेण०, एवं जाव थणियकु०, अत्थि णं भंते ! भवियदव्वपुढवि० भ० २ ?, हंता अत्थि । से केण० गो० ! जे भविए तिरिक्खजोणिए वा मणुस्से वा देवे वा पुढविकाइएसु उवव० से तेण० आउक्काइयवणस्सइकाइयाणं एवं चेव उववाओ*

*तेउवाऊबेइंदियतेइंदियचउरिंदियाण य जे भविए तिरिक्खजोणिए मणुस्से वा, पंचिंदियतिरिक्खजोणियाणं जे भविए नेरइ वा तिरिक्खजोणिए वा मणुस्से वा देवे वा पंचिंदियतिरिक्खजोणिए वा, एवं मणुस्सावि, वाणमंरजोइसियवेमाणियाणं जहा नेरइया ।*

*भवियदव्वनेरइयस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा ! जहन्ने अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, भवियदव्वअसुरकुमारस्स णं भंते ! केवतियं कालं ठिती पन्नत्ता ?, गोयमा जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं०, एवं जाव थणियकुमारस्स ।*

*भवियदव्वपुढविकाइयस्स णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सातिरेगाइं दो सागरोवमाइं, एवं आउक्काइयस्सवि, तेउवाऊ जहा नेरइयस्स, वणस्सइकाइयस्स जहा पुढविकाइयस्स, बेइंदियस्स तेइंदियस्स चउरिंदियस्स जहा नेरइयस्स ।*

*पंचिंदियतिरिक्खजोणियस्स जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तेत्तीसं सागरोवमाइं, एवं मणुस्सावि, वाणमंतरजोइसियवेमाणियस्स जहा असुरकुमारस्स ।। सेवं भंते ! सेवं भंतेत्ति ।।*

**वृ.** 'रायगिहे' इत्यादि, 'भवियदव्वनेरइय' त्ति द्रव्यभूता नारका द्रव्यनारकाः, ते च भूतनारकपर्यायतयाऽपि भवन्तीति भव्यशब्देन विशेषिताः, भव्याश्च ते द्रव्यनारकाश्चेति विग्रहः, ते चैकभविकबद्धायुष्काभिमुखनामगोत्रभेदा भवन्ति ।।

'भवियदव्वनेरइयस्से' त्यादि, 'अंतोमुहुत्तं' ति सञ्ज्ञिनमसञ्ज्ञिनं वा नरकगामिनमन्तर्मूहूर्त्तायुषमपेक्ष्यान्तर्मुहूर्त्त स्थितिरुक्ता, 'पुव्वकोडि' त्ति मनुष्यं पञ्चेन्द्रियतिर्यञ्चं चाश्रित्येति भव्यद्रव्यासुरादीनामपि जघन्या स्थितिरित्थमेव, उत्कृष्टा तु 'तिन्नि पलिओवमाइं' ति उत्तरकुर्वादिमिथुनकनरादीनाश्रित्योक्ता, यतस्ते मृता देवेषूत्पद्यन्त इति ।

द्रव्यपृथिवीकायिकस्य 'साइरेगाइं दो सागरोवमाइं' ति ईशानदेवमाश्रित्योक्ता, द्रव्यतेजसो द्रव्यवायोश्च 'जहा नेरइयस्स' त्ति अन्तर्मुहूर्त्तमिकाऽन्या च पूर्वकोटी, देवादीनां मिथुनकानां च तत्रानुत्पादादिति । पञ्चेन्द्रियतिरश्चः 'उक्कोसेणं तेत्तीसं सागरोवमाइं' ति सप्तमपृथिवीनारकापेक्षयोक्तमिति ।।

शतकं–१८ उद्देशकः–९ समाप्तः

## –: शतकं–१८ उद्देशकः–१० :–

**वृ.** नवमोद्देशकान्ते भव्यद्रव्यानारकादिवक्तव्यतोक्ता, अथ भव्यद्रव्याधिकाराद्भव्यद्रव्यदेवस्यानगारस्य वक्तव्यता दशमे उच्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (७५३) रायगिहे जाव एवं वयासी—अनगारे णं भंते! भावियप्पा असिधारं वा खुरधारं वा ओगाहेज्ञा ?, हंता उग्गाहेज्ञा। से णं तत्थ छिज्ञेज्ञ वा भिज्ञेज्ञ वा ?, नतिणट्ठे० स० नो खलु तत्थ सत्थं समइ, एवं जहा पंचमसए परमाणुपोग्गलवत्तव्वया जाव अनगारे णं भंते! भावियप्पा उदावत्तं वा जाव नो खलु तत्थ सत्थं कमइ ॥*

**वृ.** 'रायगिहे' इत्यादि, इह चानगारस्य क्षुरधारादिषु प्रवेशो वैक्रियलब्धिसामर्थ्यादवसेयः, 'एवं जहा पंचमसए' इत्यादि, अनेन च यत्सूचितं तदिदम्—'अणगारे णं भंते! भावियप्पा अगनिकायस्स मज्झंमज्झेणं वीइवएज्ञा ?, हंता वीइवएज्ञा।

से णं तत्थ झियाएज्ञा ?, नो इणट्ठे समट्ठे, नो खलु तत्थ सत्थं कमइ' इत्यादि।

पूर्वमनगारस्याधिकारादिष्ववगाहनोक्ता, अथावगाहनामेव स्पर्शनालक्षणपर्यायान्तरेण परमाण्वादिष्वभिधातुमाह—

*मू. (७५४) 'परमाणुपोग्गले णं भंते! वाउयाएणं फुडे वाउयाए वा परमाणुपोग्गलेणं फुडे ?, गोयमा! परमाणुपोग्गले वाउयाएणं फुडे नो वाउयाए परमाणुपोग्गलेणं फुडे।*

*दुप्पएसिए णं भंते! खं० वाउयाएणं एवं चेव एवं जाव असंखेज्ञपएसिए।*

*अनंतपएसिए णं भंते! खंधे वाउपुच्छा, गोयमा! अनंतपएसिए खंधे वाउयाएणं फुडे वाउयाए अनतपएसिएणं खंधेणं सिय फुडे सिय नो फुडे।*

*वत्थी भंते! वाउयाएणं फुडे वाउयाए वत्थिणा फुडे ?, गोयमा! वत्थी वाउयाएणं फुडे नो वाउयाए वत्थिणा फुडे ॥*

**वृ.** 'परमाणुपोग्गले ण' मित्यादि, 'वाउयाएणं फुडे' त्ति परमाणुपुद्गलो वायुकायेन 'स्पृष्टः' व्याप्तो मध्ये क्षिप्त इत्यर्थः 'नो वाउयाए' इत्यादि नो वायुकायः परमाणुपुद्गलेन 'स्पृष्टः' व्याप्तो मध्ये क्षिप्तो, वायोर्महत्वाद् अणोश्च निष्प्रदेशत्वेनातिसूक्ष्मतया व्यापकत्वाभावादिति।

'अनंतपएसिए ण' मित्यादि, अनन्तप्रदेशिकः स्कन्धो वायुना व्याप्तो भवति सूक्ष्मतरत्वात्तस्य, वायुकायः पुनरनन्तप्रदेशिकस्कन्धेन स्याद् व्याप्तः स्यान्न व्याप्तः, कथम् ?, यदा वायुस्कन्धापेक्षया महानसौ भवित तदा वायुस्तेन व्याप्तो भवत्यन्यदा तु नेति।

'वत्थी' त्यादि, 'वस्ति' र्दतिर्वायुकायेन 'स्पृष्टः' व्याप्तः सामस्त्येन तद्विवरपरिपूरणात् नो वायुकायो वस्तिना स्पृष्टो वस्तेर्वायुकायस्य परित एव भावात्।

अनन्तरं पुद्गलद्रव्याणि स्पृष्टत्वधर्म्मतो निरूपितानि, अथ वर्णादिभिस्तान्येव निरूपयन्नाह—

*मू. (७५५) अत्थि णं भंते! इमीसे रयणप्पभाए पुढ० अहे दव्वाइं वन्नओ कालनीललोहियहालिद्दसुक्किल्लाइं गंधओ सुब्भिगंधाइं दुब्भिगंधाइं रसओ तित्तकडुयक-सायअंबिलमहुराइं फासओ कक्खडमउयगरुयलहुयसीयउसिणनिद्धलुक्खाइं अन्नमन्नबद्धाइं अन्नमन्नपुट्ठाइं जाव अन्नमन्नघडत्ताए चिट्ठंति ?, हंता अत्थि, एवं जाव अहेसत्तमाए।*

*अत्थि णं भंते! सोहम्म० कप्पस्स अहे चेव एवं जाव ईसिपब्भाराए पुढ०। सेवं भंते! २ जाव विहरइ। तए मं समणे भगवं महावीरे जाव बहिया जणवयविहारं विहरति ॥*

**वृ.** 'अत्थी' त्यादि, 'अन्नमन्नबद्धाइं' ति गाढाश्लेषतः 'अन्नमन्नपुट्ठाइं' ति आगाढाश्लेषतः, यावत्करणात् 'अन्नमन्नओगाढाइं' ति एकक्षेत्राश्रितानीत्यादि दृश्यम्, 'अन्नमन्नघडत्ताए' त्ति

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

परस्परसमुदायतया। अनन्तरं पुद्गलद्रव्याणि निरूपितानि, अथात्मद्रव्यधर्म्मविशेषानात्मद्रव्यं च संविधानकद्वारेण निरूपयन्निदमाह--

**मू. (७५६)** *तेणं कालेणं २ वाणियगामे नामं नगरे होत्था वन्नओ, दूपितलासए चेतिए वन्नओ, तत्थ णं वाणियगामे नगरे सोमिले नामं माहणे परिवसति अड्ढे जाव अपरिभूए रिउव्वेदजाव सुपरिनिट्ठिए पंचण्हं खंडियसयाणं सयस्स कुडुंबस्स आहेवच्चं जाव विहरति।*

*तए णं समणे भगवं महावीरे जाव समोसढे जाव परिसा पज्जुवासति, तए णं तस्स सोमिलस्स माहणस्स इमीसे कहाए लद्धट्ठस्स समाणस्स अयमेयारूवे जाव समुप्पज्जित्था–एवं खलु समणे नायपुत्ते पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे सुहंसुहेणं जाव इहमागए जाव दुतिपलासए चेइए अहापडिरूवं जाव विहरइ तं गच्छामि णं समणस्स नायपुत्तस्स अंतियं पाउब्भवामि इमाइं च णं एयारूवाइं अट्ठाइं जाव वागरणाइं पुच्छिस्सामि।*

*तं जइ इमे से इमाइं एयारूवाइं अट्ठाइं जाव वागरणाइं वागरेहिति ततो णं वंदीहामि नमंसीहामि जावपज्जुवासीहामि, अहमेयं से इमाइं अट्ठाइं जाव वागरणाइं नो वागरेहिति तो णं एएहिं चेव अट्ठेहि य जाव वागरणेहि य निप्पट्ठपसिणवागरणं करेस्सामीतिकट्टु एवं संपेहेइ २ ण्हाए जाव सरीरे साओ गिहाओ पडिनिक्खमति पडि० २ पायविहाचारेणं एगेणं खंडियसएणं सद्धिं संपरिवुडे वाणियगामं नगरं मज्झंमज्झेणं निग्गच्छइ २ जेणेव दूतिपलासए चेइए जेणेव समणे भग० म० तेणेव उवा० २ समणस्स ३ अदूरसामंते ठिच्चा समणं भगवं म० एवं वयासी।*

*जत्ता ते भंते! जवणिज्जं० अव्वाबाहं० फासुयविहारं० ?, सोमिला! जत्तावि मे जवणिज्जंपि मे अव्वाबाहंपि मे फासुयविहारंपि मे, किं ते भंते! जत्ता ?, सोमिला! जं ते नवनियमसंजम-सज्झायझाणावस्सयमादीएसु जोगेसु जयणा सेत्तं जत्ता।*

*किं ते भंते! जवणिज्जं ?, सोमिला! जवणिज्जे दुविहे पं० तं०–इंदियजवणिज्ज य नोइंदिय-जवणिज्जे वसे वट्टंति सेत्तं इंदियजवणिज्जे, से किं तं नोइंदियजवणिज्जे ?, २ जं मे कोहमाणमायालोभा वोच्छिन्ना नो उदीरेंति से त्तं नोइंदियजवणिज्जे, सेत्तं जवणिज्जे।*

*किं ते भंते! अव्वाबाहं ?, सोमिला! जं मे वातियपित्तियसिंभियसन्निवाइया विविहा रोगायंका सरीरगया दोसा उवसंता नो उदीरेंति सेत्तं अव्वाबाहं, किं ते भंते! फासुयविहारं ?, सोमिला! जन्नं आरामेसु उज्जाणेसु देवकुलेसु सभासु पवासु इत्थीपसुपंडगविवज्जियासु वसहीसु फासुएसणिज्जं पीढफलगसेज्जासंथारगं उवसंपज्जित्ताणं विहरामि सेत्तं फासुयविहारं॥*

*सरिसवा ते भंते! किं भक्खेया अभक्खेया ?, सोमिला! सरिसवा भक्खेयावि अभक्खेयावि, से केणट्ठे० सरिसवा मे भक्खेयावि अभक्खेयावि ?, से नूणं ते सोमिला! बंभन्नएसु नएसु दुविहा सरिसवा पन्नत्ता, तंजहा–मित्तसरिसवा य धन्नसरिसवा य, तत्थ णं जे ते मित्तसरिसवा ते तिविहा पं०, तं०–सहजायया सहवड्ढियया सहपंसुकीलियया।*

*ते णं समणाणं निग्गंथाणं अभक्खेया, तत्थ णं जे ते धन्नसरिसवा ते दुविहा प० तं०–सत्थपरिणया य असत्थपरिणया य, तत्थ णं जे ते असत्थपरिणया ते णं समणाणं निग्गंथाणं अभक्खेया, तत्थ णं जे से सत्थपरिणया ते दुविहा पं०, तं०–एसणिज्जा य अनेसणिज्जा य, तत्थ णं जे ते अनेसणिज्जा ते समणाणं निग्गंथाणं अभक्खेया।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तत्थ णं जे ते एसणिज्ञा ते दुविहा प० तं०–जाइया य अजाइया य, अत्थ तत्थ णं जे ते अजाइया ते णं समणाणं निग्गंथाणं अभक्खेया, तत्थ णं जे ते जातिया ते दुविहा प० तं०–लद्धा य अलद्धा य, तत्थ णं जे ते अलद्धा ते णं समणाणं निग्गंथाणं अभक्खेया। तत्थ णं जे ते लद्धा ते णं समणाणं निग्गंथाणं भक्खेया, से तेणट्ठेणं सोमिला! एवं वुच्चइ जाव अभक्खेयावि।*

*मासा ते भंते! किं भक्खेया अभक्खेया?, सोमिला! मासा मे भक्खेयावि अभक्खेयावि, से केणट्ठेणं जाव अभक्खेयावि, से नूणं ते सोमिला! बंभन्नएसु नएसु दुविहा मासा प० तं०–दव्वमासा य कालमासा य। तत्थ णं जे ते कालमासा ते णं सावणादीया आसाढपज्जवसाणा दुवालस तं०–सावणे भद्दवए आसोए कत्तिए मग्गसिरे पोसे माहे फागुणे चित्ते वइसाहे जेट्ठामूले आसाढे, ते णं समणाणं निग्गंथाणं अभक्खेया, तत्थ णं जे ते दव्वमासा ते दुविहा प० तं०–अत्थमासा य धन्नमासा य, तत्थ णं जे ते अत्थमासा ते दुविहा प० तं०–सुवन्नमासा य रुप्पमासा य। ते णं समणाणं निग्गंथाणं अभक्खेया, तत्थ णं जे ते धन्नमासा ते दुविहा प० तं०–सत्थपरिणया य असत्थपरिणया य एवं जहा धन्नसरिसवा जाव से तेणट्ठेणं जाव अभक्खेयावि।*

*कुलत्था ते भंते! किं भक्खेया अभक्खेया?, सोमिला! कुलत्था भक्खेयावि अभक्खेयावि, से केणट्ठेणं जाव अभक्खेयावि?, से नूणं सोमिला ते बंभन्नएसु नएसु दुविहा कुलत्था प० तं०–इत्थिकुलत्था य धन्नकुलत्था य।*

*तत्थ णं जे ते इत्थिकुलत्था ते तिविहा प०, तंजहा–कुलकन्नयाइ वा कुलवहूयाति वा कुलमाउयाइ वा, ते णं समणाणं निग्गंथाणं अभक्खेया, तत्थ णं जे ते धन्नकुलत्था एवं जहा धन्नसरिसवा से तेणट्ठेणं जाव अभक्खेयावि॥*

**वृ.** 'तेण'मित्यादि, 'इमाइं च णं'ति इमानि च वक्ष्यमाणानि यात्रायापनीयादीनि 'जत्त'त्ति यानं यात्रा–संयमयोगेषु प्रवृत्ति 'जवणिज्ञं' ति यापनीयं–मोक्षाध्वनि गच्छतां प्रयोजक इन्द्रिया-दिवश्यतारूपो धर्म्मः 'अव्वाबाहं' ति शरीरबाधा नामभावः 'फासुयविहारं' ति प्रासुकविहारो–निर्जीव आश्रय इति, 'तवनियमसंजमसज्झायझाणावस्सयमाइएसु' त्ति।

इह तपःअनशनादि नियमाः–तद्विषया अभिग्रहविशेषाः यथा एतावत्तपःस्वाध्याय-वैयावृत्यादि मयाऽवश्यं रात्रिन्दिवादौ विधेयमित्यादिरूपाः संयमः–प्रत्युपेक्षादि स्वाध्यायो–धर्मकथादि ध्यानं–धर्म्मादि आवश्यकं–षड्विधं, एतेषु च यद्यपि भगवतः किञ्चिन्न तदानीं विशेषतः संभवति तथाऽपि तत्फलसद्भावात्तदस्तीत्यवगन्तव्यं, 'जयण' त्ति प्रवृत्ति 'इंदिय-जवणिज्ञं' ति इन्द्रियविषयं यापनीयं–वश्यत्वमिन्द्रिययापनीयं।

एवं नोइन्द्रिययापनीयं, नवरं नोशब्दस्य मिश्रवचनत्वादिन्द्रियैर्मिश्राः सहार्थत्वाद्वा इन्द्रियाणां सहचरिता नोइन्द्रियाः–कषायाः, एषां च यात्रादिपदानां सामयिकगम्भीरार्थत्वेन भगवतस्त-दर्थपरिज्ञानसम्भावयता तेनापभ्राजनार्थं प्रश्नः कृत इति॥ 'सरिसव' त्ति एकत्र प्राकृतशैल्या सदृशवयसः–समानवयसः अन्यत्र सर्षपाः–सिद्धार्थकाः, 'दव्वमास' त्ति द्रव्यरूपा माषाः 'काल-मास' त्ति कालरूपा मासाः, 'कुलत्थ' त्ति एकत्र कुले तिष्ठन्तीति कुलस्थाः–कुलाङ्गनाः, अन्यत्र कुलत्थाः धान्यविशेषाः, सरिसवादिपदप्रश्नश्च छलग्रहणेनोपहासार्थं कृत इति॥

अथ च सूरिं विमुच्य भगवतो वस्तुतत्वज्ञानजिज्ञासयाऽऽह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (७५७) एगे भवं दुवे भवं अक्खए भवं अव्वए भवं अवट्ठिए भवं अनेगभूयभावभविए भवं ?, सोमिला ! एगेवि अहं जाव अनेगभूयभावभविएवि अहं।*

*से केणट्ठेणं भंते ! एवं वुच्चइ जाव भविएवि अहं ?, सोमिला ! दव्वट्ठयाए एगे अहं नाणदंसणट्ठयाए दुविहे अहं पएसट्ठयाए अक्खएवि अहं अव्वएवि अहं अवट्ठिएवि अहं उवयोगट्ठयाए अनेगभूयभावभविएवि अहं, से तेणट्ठेणं जाव भविएवि अहं अवट्ठिएवि अहं उवयोगट्ठयाए अनेगभूयभावभविएवि अहं, से तेणट्ठेणं जाव भविएवि अहं।*

*एत्थ णं से सोमिले माहणे संबुद्धे समणं भगवं महावीरं जहा खंदओ जाव से जहेयं तुज्झे वदह जहा णं देवाणुप्पियाणं अंतिए बहवे राईसर एवंजहा रायप्पसेणइज्जे चित्तो जाव दुवालसविहं सावगधम्मं पडिवज्जति पडिवज्जित्ता समणं भगवं महावीरं वंदति जाव पडिगए, तए णं से सोमिले माहणे समणोवासए जाए अभिगयजीवा जाव विहरइ।*

*भंतेत्ति भगवं गोयमे समणं भगवं महावीरं वंदित नमं० वं० नमं० पभू णं भंते ! सोमिले माहणे देवाणुप्पियाणं अंतिए मुंडे भवित्ता जहेव संखे तहेव निरवसेसं जाव अंतं काहिति। सेव भंते ! २ त्ति जाव विहरति॥*

**वृ.** 'एगे भव'मित्यादि, एको भवानित्येकत्वाभ्युपगमे भगवताऽऽत्मनः कृते श्रोत्रादिविज्ञानानामवयवानां चात्मनोऽनेकतोपलब्धित एकत्वं दूषयिष्यामीति बुद्धया पर्यनुयोगः सोमिलभट्टेन कृतः, द्वौ भवानिति च द्वित्वाभ्युपगमेऽहमित्येकत्वविशिष्टस्यार्थस्य द्वित्वविरोधेन द्वित्वं दूषयिष्यामीति बुद्धया पर्यनुयोगो विहितः, 'अक्खए भव'मित्यादिना च पदत्रयेण नित्यात्मपक्षः पर्यनुयुक्तः, 'अनेगभूयभावभविए भवं'ति अनेके भूताः अतीताः भावाः–सत्तापरिणामा भव्याश्च-भाविनो यस्य स तथा, अनेन चातीतभविष्यत्सत्ताप्रश्नेनानित्यतापक्षः पर्यनुयुक्तः, एकतरपरिग्रहे तस्यैव दूषणायेति, तत्र च भगवता स्याद्वादस्य निखिलदोषगोचरा- तिक्रान्तत्वात्तमवलम्ब्यो-त्तरमदायि–'एगेवि अहं'मित्यादि, कथमित्येतत् ? इत्यत आह–

'दव्वट्ठयाए एगोऽहं'ति जीवद्रव्यकत्वेनैकोऽहं न तु प्रदेशार्थतया, तथा हि अनेकत्वा-न्ममेत्यवयवादीनामनेकत्वोपलम्भो न बाधकः, तथा कञ्चित्स्वभावमाश्रित्यैकत्वसङ्ख्याविशिष्टस्यापि पदार्थस्य स्वभावान्तर- द्वयापेक्षया द्वित्वमपि न विरुद्धमित्यत उक्तं–'नाणदंसणट्ठयाए दुविहे अहं'ति, न चैकस्य स्वभावभेदो न दृश्यते, एको हि देवदत्तादि पुरुष एकदैव तत्तदपेक्षया पितृत्वपुत्र-त्वभ्रातृत्वभ्रातृ- व्यत्वादीननेकान् स्वभावाल्लभत इति, तथा प्रदेशार्थतयाऽसङ्ख्येयप्रदेश-तामाश्रित्याक्षतोऽप्यहं सर्वथा प्रदेशानां क्षयाभावात्, तथाऽव्ययोऽप्यहं कतिपयानामपि च व्ययाभावात्, किमुक्तं भवति ?–

अवस्थितोऽप्यहं–नित्योऽप्यहम्, असङ्ख्येयप्रदेशिता हि न कदाचनापि व्यपैति अतो नित्यताऽभ्युपगमेऽपि न दोषः, तथा 'उवओगट्ठयाए'त्ति विविदविषयानुपयोगानाश्रित्या-नेकभूतभावभविकोऽप्यहम्, अतीतानागतयोर्हि कालयोरनेकविषयबोधानामात्मनः कथञ्चिद-भिन्नानां भूतत्वाद् भावित्वाच्चेत्यनित्यपक्षोऽपि न दोषायेति।

'एवं जहा रायप्पसेणइज्जे'इत्यादि, अनेन च यत्सूचितं तस्यार्थलेशो दर्श्यते–यथा देवा-नांप्रियाणामन्तिके बहवो राजेश्वरतलवरादयस्त्यक्त्वा हिरण्यसुवर्णादि मुण्डा भूत्वाऽगा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रादनगारितां प्रव्रजन्ति न खलु तथा शक्नोमि प्रव्रजितुमितीच्छाम्यहमणुव्रतादिकं गृहिधर्म्म भगवदन्तिके प्रतिपत्तुं, ततो भगवानाह–यथासुखं देवानांप्रिय! मा प्रतिबन्धोऽस्तु, ततस्तमसौ प्रत्यपद्यत इति ।।

शतकं–१८ उद्देशकः–१० समाप्तः

।। १ ।। अष्टादशशतवृत्तिर्विहिता वृत्तानि वीक्ष्य वृत्तिकृताम् ।
प्राकृतनरो ह्यदृष्टं न कर्म्म कर्त्तुं प्रभुर्भवति ।।

शतकं–१८ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे अष्टादशशतकस्य अभयदेवसूरि विरचिता टीका परिसमाप्ता ।**

## शतकं–१९

**वृ.** व्याख्यातमष्टादशशतम्, अथावसरायातमेकोनविंशतितमं व्याख्यायते, तत्र चादावेवोद्देशकसङ्ग्रहाय गाथा–

**मू. (७५८)** *लेस्सा य १ गब्भ २ पुढवी ३ महासवा ४ चरम ५ दीव ६*
*भवणा ७ य । निव्वत्ति ८ करण ९ वणचरसुरा १० य एगूणवीसइमे ।*

**वृ.** 'लेस्से'त्यादि, तत्र 'लेस्सा य'त्ति लेश्याः प्रथमोद्देशके वाच्या इत्यसौ लेश्योद्देशक एवोच्यते, एवमन्यत्रापि १ चशब्दः समुच्चये, 'गब्भ'त्ति गर्भाभिधायको द्वितीयः २ ।

'पुढवि'त्ति पृथिवीकायिकादिवक्तव्यतार्थस्तृतीयः ३ 'महासव'त्ति नारका महाश्रवा महाक्रिया इत्याद्यर्थपरश्चतुर्थः ४ । 'चरम'त्ति चरमेभ्योऽल्पस्थितिकेभ्यो नारकादिभ्यः परमा–महास्थितयो महाकर्म्मतरा इत्याद्यर्थप्रतिपादनार्थ पञ्चमः ५, 'दीव'त्ति द्वीपाद्यभिधानार्थषष्ठः ६ ।

'भवणा य'त्ति भवनाद्यर्थाभिधानार्थ सप्तमः ७ 'निव्वत्ति'त्ति निर्वृत्ति–निष्पत्ति शरीरादेस्तदर्थोऽष्टमः ८ । 'रण'त्ति करणार्थो नवमः ९ 'वणचरसुरा य'त्ति वनचरसुरा–व्यन्तरा देवास्तद्वक्तव्यतार्थो दशम इति १० ।

### –: शतकं–१९ उद्देशकः–१ :–

**मू. (७५९)** *रायगिहे जाव एवं वयासी–कति णं भंते ! लेस्साओ पन्नत्ताओ ?, गोयमा ! छल्लेसाओ पन्नत्ताओ, तंजहा–एवं जहा पन्नवणाए चउत्थो लेसुद्देसओ भाणियव्वो निरवसेसो । सेवं भंते २ ।।*

**वृ.** तत्र प्रथमोद्देशकस्तावद्वयाख्यायते, तस्य चेदमादिसूत्रम्–'रायगिहे' इत्यादि 'पन्नवणाए चउत्थो लेसुद्देसओ भाणियव्वो'त्ति प्रज्ञापनायाश्चतुर्थो लेश्यापदस्य सप्तदशस्योद्देशको लेश्योद्देशक इह स्थाने भणितव्यः, स च–'कण्हलेसा जाव सुक्कलेसा' इत्यादिरिति

शतकं–१९ उद्देशकः–१ समाप्तः

### –: शतकं–१९ उद्देशकः–२ :–

**वृ.** अथ लेश्याऽधिकारवानेव द्वितीयस्तस्य चेदमादिसूत्रम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (७६०)** *कति णं भंते ! लेस्साओ प० ? एवं जहा पन्नवणाए गब्भुद्देसो सो चेव निरवसेसो भाणियव्वो । सेवं भंते ! सेवं भंते ! ॥*

**वृ.** 'कइ ण' मित्यादि, 'एवं जहा पन्नवणाए' इत्यादि, 'एवम्' अनेन क्रमेण यथा प्रज्ञापनायां गर्भोद्दिशके–गर्भसूत्रोपलक्षितोद्देशके सप्तदशपदस्य षष्ठे सूत्रं तथेह वाच्यं ।

तन्न्यूनाधिकत्वपरिहारार्थमाह–स एव गर्भोद्दिशको निरवशेष भणितव्य इति, अनेन च यत्सूचितं तदिदं–'गोयमा ! छल्लेस्साओ पन्नत्ताओ, तंजहा–कण्हलेस्सा जाव सुक्कलेस्सा, मणुस्साणं भंते ! । कइ लेस्साओ प० , छल्लेस्साओ प०–कण्हलेस्सा जाव सुक्कलेस्सा' इत्यादीति ।

यानि च सूत्राण्याश्रित्य गर्भोद्दिशकोऽयमुक्तस्तानीमानि–कण्हलेस्से णं भंते ! मणुस्से कण्हलेस्सं गब्भं जणेज्जा ?, हंता गोयमा ! जणेज्जा ।

कण्हलेस्से णं भंते ! मणूसे नीललेसं गब्भं जणेज्जा ? हंता गोयमा ! जणेज्जा' इत्यादीति ॥

शतक–१९ उद्देशकः–२ समाप्तः

## –: शतकं–१९ उद्देशकः–३ :–

**वृ.** द्वितीयोद्देशके लेश्या उक्तास्तद्युक्ताश्च पृथिवीकायिकादित्वेनोत्पद्यन्त इति पृथिवीकायिकादयस्तृतीये निरूप्यन्त इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (७६१)** *रायगिहे जाव एवं वयासी सिय भंते ! जाव चत्तारि पंच पुढविकाइया एगयओ साधारणसरीरं बंधंति एग० २ तओ पच्छा आहारेंति वा परिणामेंति वा सरीरं वा बंधंति ?, नो इणट्ठे समट्ठे, पुढविक्काइयाणं पत्तेयाहारा पत्तेयपरिणामा पत्तेयं सरीरं बंधंति प० २ ततो पच्छा आहारेंति वा परिणामेंति वा सरीरं वा बंधंति १ ।*

*तेसि णं भंते ! जीवाणं कति लेस्साओ प० ?, गोयमा ! चत्तारि लेस्साओ० प० तं०–कण्हलेस्सा नील० काउ० तेउ० २ ।*

*ते णं भंते ! जीवा किं सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी ?, गोयमा ! नो सम्मदिट्ठी मिच्छादिट्ठी नो सम्मामिच्छदिट्ठी ३, ते णं भंते ! जीवा किं नाणी अन्नाणी ?, गोयमा ! नो नाणी अन्नाणी, नियमा दुअन्नाणी, तं०–मइअन्नाणी य सुयअन्नाणी य ४ ।*

*ते णं भंते ! जीवा किं मणजोगी वयजोगी कायजोगी ?, गोयमा ! नो मणजोगी नो वयजोगी कायजोगी ५, ते णं भंते ! जीवा किं सागारोवउत्ता अनागारोवउत्ता ?, गोयमा ! सागारोवउत्तावि अनागारोवउत्तावि ६ ।*

*ते णं भंते ! जीवा किमाहारमाहारेंति ?, गोयमा ! दव्वओ णं अनंतपदेसियाइं दव्वाइं एवं जहा पन्नवणाए पढमे आहारुद्देसए जावसव्वप्पणयाए आहारमाहारेंति ७, ते णं भन्ते ! जीवा जमाहारेंति तं चिज्जंति जं नो आहारेंति तं नो चिज्जंति चिन्ने वा से उद्दाइ पलिसप्पति वा ?, हंता गोयमा ! ते णं जीवा जमाहारेंति तं चिज्जंति जं नो चिज्जंति चिन्ने वा से उद्दाइ पलिसप्प ति वा ?, हंता गोयमा ! ते णं जीवा जमाहारेंति तं चिज्जंति जं नो जाव पलिसप्पति वा ८ ।*

*तेसि णं भंते ! जीवाणं एवं सन्नाति वा पन्नाति वा मणोति वा वईइ वा अम्हे णं आहरमाहा रेमो ?, नो तिणट्ठे स० आहरेंति पुण ते तेसिं ९, तेसि णं भंते ! जीवाणं एवं सन्ना० जाव वीयीति*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

*या अम्हे णं इट्ठाणिट्ठे फासेयरे वेदेमो पडिसंवेदेमो ?, नो ति० पडिसंवेदेंति पुण ते १० ।*

*ते णं भंते ! जीवा किं पाणाइवाए उवक्खाइज्जंति मुसावाए अदिन्ना० जाव मिच्छादंसणसल्ले उवक्खाइज्जंति ?, गोयमा ! पाणाइवाएवि उवक्खाइज्जंति जाव मिच्छादंसणसल्लेवि उवक्खाइज्जंति, जेसंपि णं जीवाणं ते जीवा एवमाहिज्जंति तेसिंपि णं जीवाणं नो विन्नाए नाणत्ते ११ । ते णं भंते जीवा कओहिंतो उवव० किं नेरइएहिंतो उववज्जंति ? एवं जहा वक्कंतीए पुढविक्काइयाणं उववाओ तहा भाणियव्वो १२ ।*

*तेसि णं भंते ! जीवाणं कति समुग्घाया प० ?, गोयमा ! तओ समुग्घाया पं०, तं०– वेयणासमुग्घाए कसाय० मारणंतियस० । ते णं भंते ! जीवा मारणंतियसमुग्धाएणं किं समोहया मरंति असमोहया मरंति ?, गोयमा ! समोहया मरंति असमोहयावि मरंति ।। ते णं भंते ! जीवा अनंतरं उव्वट्टित्ता कहिं गच्छंति कहिं उववज्जंति ?, एवं उव्वट्टणा जहा वक्कंतीए १२ ।*

*सिय भंते ! जाव चत्तारि पंच आउक्काइया एगयओ साहाणसरीरं बंधंति एग० २ तओ पच्छा आहारेंति एवं जो पुढविकाइयाणं गमो सो चेव भाणियव्वो जाव उव्वट्टंति नवरं ठिती सत्तवाससहस्साइं उक्कोसेणं सेसं तं चेव ।*

*सिय भंते ! जाव चत्तारि पंच तेउक्काइया एवं चेव नवरं उववाओ ठिती उव्वट्टणा य जहा पन्नवणाए सेसं तं चेव । वाउकाइयआणं एवं चेव नाणत्तं नवरं चत्तारि समुग्घाया ।*

*सिय भंते ! जाव चत्तारि पंच वणस्सइकाइयापुच्छा, गोयमा ! नो तिणट्ठे समट्ठे, अनंता वणस्सइकाइया एगयओ साहारणसरीरं बंधंति एग० २ तओ पच्छा आहारेंति वा परि० २ सेसं जहा तेउकाइयाणं जाव उव्वट्टंति नवरं आहारओ नियमं छद्दिसिं, ठिती जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, सेसं तं चेव ।।*

**वृ.** 'रायगिहे' इत्यादि, इह चेयं द्वारगाथा क्वचिद् दृश्यते–

॥ १ ॥ "सिय लेसदिट्ठिणाणे जोगुवओगे तहा किमाहारो ।
पाणाइवाय उप्पायठिई समुग्घायउव्वट्टी ॥"

अस्याश्चार्थो वनस्पतिदण्डकान्तोद्देशकार्थाधिगमावगम्य एव, तत्र स्याद्द्वारे 'सिय'त्ति स्याद्–भवेदयमर्थः, अथवा प्रायः पृथिवीकायिकाः प्रत्येकं शरीरं बध्नन्तीति सिद्धं, किन्तु 'सिय'त्ति स्यात् कदाचित् 'जाव चत्तारि पंच पुढविक्काइय'त्ति चत्वारः पञ्च वा यावत्करणाद् द्वौ वा त्रयो वा उपलक्षणत्वाच्चास्य बहुतरा वा पृथिवीकायिका जीवाः ।

'एगओ'त्ति एकत एकीभूय संयुज्येत्यर्थः 'साहारणसरीरं बंधंति'त्ति बहूनां सामान्यशरीरं बध्नन्ति, आदितस्तत्प्रायोग्यपुद्गलग्रहणतः, 'आहारेंति व'त्ति विशेषाहारापेक्षया सामान्याहार-स्याविशिष्टशरीरबन्धनसमय एव कृतत्वात् 'सरीरं वा बंधंति'त्ति आहारितपरिणामितपुद्गलैः शरीरस्य पूर्वबनधापेक्षया विशेषतो बन्धं कुर्वन्तीत्यर्थः, नायमर्थ समर्थो, यतः पृथिवीकायिकाः प्रत्येकाहाराः प्रत्येकपरिणामाश्चातः प्रत्येकं शरीरं बध्नन्तीति ततप्रायोग्यपुद्गलग्रहणतः, ततश्चा-हारयन्तीत्यादि एतच्च प्राग्वदिति ।

किमाहारद्वारे–'एवं जहा पन्नवणा पढमे आहारुद्देसए'त्ति एवं यथा प्रज्ञापनायाम-ष्टाविंशतितमपदस्य रथमे आहाराभिधायकोद्देशके सूत्र यथेह वाच्यं, तच्चैवं–'खेत्तओ असंखेज्ज-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पएसोगाढाइं कालतो अन्नयरकालट्ठितीयाइं भावओ वन्नमंताइं गंधमंताइं रसमंताइं फासमंताइं' इत्यादीति 'तं चिज्जइ' त्ति तत्-पुद्गलजातं शरीरेन्द्रियतया परिणमतीत्यर्थः 'चिन्ने वा से उद्दाइ' त्ति चीर्णं च-आहारितं सत्तत् पुद्गलजातम् 'अपद्रवति' अपयाति विनश्यतीति मलवत् सारश्चास्य शरीरेन्द्रियतया परिणमति, एतदेवाह-'पलिसप्पइ व' त्ति परिसर्पति च परि-समन्ताद्गच्छति, एवं सन्नाइ वत्ति 'एवं' वक्ष्यमाणोल्लेखेन 'सञ्ज्ञा' व्यावहारिकार्थावग्रहरूपा मति प्रवर्त्तत इति शेषः, 'पन्नाइ व' त्ति प्रज्ञा-सूक्ष्मार्थविषया मतिरेव, 'मणोइ व' त्ति मनोद्रव्यस्वभावं, 'वईइ व' त्ति वागू द्रव्यश्रुतरूपा।

प्राणातिपातादिद्वारे-'पाणाइवाए उवक्खाइज्जती' त्यादि प्राणातिपाते स्थिता इति शेषः प्राणातिपातवृत्तय इत्यर्थः, उपाख्यायन्ते-अभिधीयन्ते, यच्चेह वचनाद्यभावेऽपि पृथिवीकायिकानां मृषावादादिभिरुपाख्यानं तन्मृषावादाद्यविरतिमाश्रित्योच्यत इति, अथ हन्तव्यादिजीवानां का वार्त्ता ? इत्याह-'जेसिंपि ण' मित्यादि, येषामपि जीवानामतिपातादिविषयभूतानां प्रस्तावात्पृथिवीकायिकानामेव सम्बन्धिनाऽतिपातादिना 'ते जीव' त्ति ते-अतिपातादिकारिणो जीवाः 'एवमाहिज्जंति' त्ति अतिपातादिकारिण एते इत्याख्यायन्ते, तेषामपि जीवानामतिपातादिविषयभूतानां न केवलं घातकानां 'नो' नैव 'विज्ञातम्' अवगतं 'नानात्वं' भेदो यदुत वयं वध्यादय एते तु वधकादय इत्यमनस्कत्वात्तेषामिति ॥

उत्पादद्वारे-'एवं जहा वक्कतीए' इत्यादि, इह च व्युत्क्रान्ति प्रज्ञापनायाः षष्ठं पदं, अनेन च यत्सूचितं तदिदं-'किं नेरइएहिंतो उववज्जंति तिरिक्खजोणिएहिंतो उववज्जंति मणुस्सेहिंतो उववज्जंति देविहिंतो उववज्जंति ?, गोयमा ! नो नेरइएहिंतो उववज्जंति तिरिक्खजोणिएहिंतो उववज्जंति मणुस्सेहिंतो उववज्जंति देवेहिंतो उव्वज्जंति' ॥

समुद्घातद्वारे-'समोहयावि' त्ति समुद्घाते वर्त्तमानाः कृतदण्डा इत्यर्थः 'असोमहयावि' त्ति दण्डादुपरता अकृतसमुद्घाता वा।

उद्धर्त्तनाद्वारे-'एव उव्वट्टणा जहा वक्कंतीए' त्ति, अनेन चेदं सूचितं-किं नेरइएसु जाव देवेसु ?, गोयमा ! नो नेरइएसु उववज्जंति तिरिक्खजोणिएसु उव० मणुस्सेसु उववज्जंति नो देवेसु उववज्जंति' त्ति।

तेजस्कायिकदण्डके 'नवरं उववाओ ठिई उव्वट्टणा य जहा पन्नवणाए' त्ति, इह स्यादादिद्वाराणि पृथिवीकायिकदण्डकवद्वाच्यानि, उत्पादादिषु पूनर्विशेषोऽसति स च प्रज्ञापनायामिवेह द्रष्टव्यः, स चैवमर्थतः-तेषामुपपातस्तिर्यग्मनुष्येभ्य एव स्थितिस्तूत्कृष्टाऽहोरात्रत्रयं तत उद्वृत्तास्तु ते तिर्यक्ष्वेवोत्पद्यन्ते, यथा चेहोत्पादविशेषोऽस्ति तथा लेश्यायामपि यतस्तेजसोऽप्रशस्तलेश्या एव, पृथिवीकायिकास्त्वाद्यचतुर्लेश्याः, यच्चेदमिह न सूचितं तद्विचित्रत्वात्सूत्रगतेरिति।

वायुकायदण्डके 'चत्तारि समुग्घाय' त्ति पृथिव्यदीनामाद्यायः समुद्घाताः वायूनां तु वेदनाकषायमारणान्तिकवैक्रियलक्षणाश्चत्वारः समुद्घाताः संभवन्ति तेषां वैक्रियशरीरस्य सम्भवादिति। वनस्पतिकायदण्डके 'नवरं आहारो नियमं छद्दिसिं' ति यदुक्तं तत्रावगम्यते लोकान्तनिष्कु-टान्याश्रित्य त्रिदिगादेरप्याहारस्य तेषां सम्भवाद् बादरनिगोदान् वाऽऽश्रित्येदमवसेयं, तेषां पृथिव्याद्याश्रितत्वेन षडदिक्काहारस्यैव सम्भवादिति ॥ अथैषामेव पृथिव्यादीनामवगाहनाऽल्पत्वादिनिरूपणायाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (७६२) एएसि णं भंते ! पुढविकाइयाणं आउतेउवाउवणस्सइकाइयाणं सुहुमाणं बादराणं पज्जत्तगाणं अपज्जत्तगाणं जाव जहन्नुक्कोसियाए ओगाहणाए कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा सुहुमनिओयस्स अपज्जत्तस्स जहन्निया ओगाहणा १ ।*

*सुहुमवाउक्काइयस्स अपज्जत्तगस्स जहन्निया ओगाहणा असंखेज्जगुणा २ सुहुमतेऊअपज्जत्तस्स जह० ओगाहणा असंखेज्जगुणा ३ सुहुमआऊअपज्ज० जह० असं० ४ सुहुमपुढविअपज्जत्त० जहन्निया ओगाहणा असंखेज्जगुणा ५ ।*

*बादरवाउकाइयस्स अपज्जत्तगस्स जहन्निया ओगाहणा असंखेज्जगुणा ६ बादरतेऊअपज्जत्तजहन्निया ओगाहणा असंखेज्जगुणा ७ बादरआउअपज्जत्तजहन्निया ओगा० असंखे० ८ ।*

*बादरपुढवीकाइयअपज्जत्त जहन्निया ओगाहणा असंखेज्जगुणा ९ पत्तेयसरीरबादरवणस्सइकाइयस्स बादरनिओयस्स एएसि णं पज्जत्तगाणं एएसि णं अपज्जत्तगाणं जहन्निया ओगाहणा दोण्हवि तुल्ला असंखे० १०–११ ।*

*सुहुमनिगोयस्स पज्जत्तगस्स जहन्निया ओगाहणा असं० १२ तस्सेव अपज्जत्तगस्स उक्कोसि० ओगा० विसेसा १३ तस्स चेव अपज्जत्तगस्स उक्को० ओगा० विसेसा० १४ ।*

*सुहुमवाउकाइयस्स पज्जत्तग० जह० ओगा० असं० १५ तस्स चेव अपज्जत्तगस्स उक्कोसिया ओगाहणा विसे० १६ तस्स चेव पज्जत्तगस्स उक्कसा विसे० १७ एवं सुहुमतेउक्काइयस्सवि १८–१९–२० एवं सहुमआउक्कइयस्सवि २१–२२–२३ एवं सुहुमपुढविकाइयस्स विसेसा २४–२५–२६ एवं बादरवाउकाइयस्स वि० २७–२८–२९ एवं बायरतेऊकाइयस्स वि० ३०–३१–३२ एवं बादरआउकाइयस्स वि० ३३–३४–३५ एवं बादरपुढविकाइयस्स वि० ३६–३७–३८ । सव्वेसिं तिविहेणं गमेणं भाणियव्वं, बादरनिगोयस्स पज्जत्तगस्स जहन्निया ओगाहणा असंखेज्जगुणा ३९ तस्स चेव अपज्जत्तगस्स उक्कोसिया ओगाहणा विस० ४० ।*

*तस्स चेव पज्जत्तगस्स उक्कोसिया ओगाहणा विसेसाहिया ४१ पत्तेयसरीरबादरवणस्सइकाइयस्स पज्जत्तगस्स ज० ओगा० असं ४२ तस्स चेव अपज्जत्त० उक्को० ओगाहणा असं० ४३ तस्स चेव पज्ज० उ० ओगा० असं० ४४ ।*

**वृ.** 'एएसि ण'मित्यादि, इह किल पृथिव्यप्तेजोवायुनिगोदाः प्रत्येकं सूक्ष्मबादरभेदाः एवमेते दशैकादशश्च प्रत्येकवनस्पति एते च प्रत्येकं पर्याप्तकापर्याप्तकभेदाः २२ तेऽपि जघन्योत्कृष्टावगाहना इत्येवं चतुश्चत्वारिंशति जीवभेदेषु स्तोकादिपदन्यासेनावगाहना व्याख्येया ।

स्थापना चैवं–पृथिवीकायस्याधः सूक्ष्मबादरपदे तयोरधः प्रत्येकं पर्याप्तापर्याप्तपदे तेषामधः प्रत्येकं जघन्योत्कृष्टावगाहनेति, एवमप्कायिकादयोऽपि स्थाप्याः, प्रत्येकवनस्पतेश्चाधः पर्याप्तपर्याप्तपदद्वयं तयोरधः प्रत्येकं जघन्योत्कृष्टा चावगाहनेति, इह च पृथिव्यादीनामङ्गुलासङ्घयेयभागमात्रावगाहनत्वेऽप्यसङ्घयेयभेदत्वादङ्गुलासङ्घयेयभागस्येतरेतरापेक्षयाऽसङ्घयेयगुणत्वं न विरुध्यते

प्रत्येकशरीरवनस्पतीनां चोत्कृष्टाऽवगाहना योजनसहं समधिकमवगन्तव्येति । पृथिव्यादीनां येऽवगाहनाभेदास्तेषां स्तोकत्वाद्युक्तम्, अथ कायमाश्रित्य तेषामेवेतरेतरापेक्षया सूक्ष्मत्वनिरूपणायाह–



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (७६३) एयस्स णं भंते! पुढविकाइयस्स आउक्काइयस्स तेऊ० वाऊ० वणस्सइकाइयस्स कयरे काये सव्वसुहुमे कयरे काए सव्वसुहुमतराए ?, गोयमा ! वणस्सइकाइए सव्वसुहमे वणस्सइकाइए सव्वसुहुमतराए २, एयस्स णं भंते ! पुढविकाइयस्स आउक्काइ तेउ० वाउक्काइयस्स कयरे काये सव्वसुहुमे कयरे काये सव्वसुहुमतराए ?, गोयमा ! वाउकाए सव्वसुहुमे वाउक्काये सव्वसुहुमतराए २ ।

एयस्स णं भंते ! पुढविकाइयस्स आउक्काइयस्स तेउकाइयस्स कयरे काये सव्वसुहुमे कयरे काए सव्वसुहुमतराए ?, गोयमा ! तेउक्काएसव्वसुहुमे तेउक्काएसव्वसुहुमतराए ३, एयस्स णं भंते ! पुढविकाइयस्स आउक्काइयस्स कयरे काए सव्वसुहुमे कयरे काये सव्वसुहुमतराए ?, गोयमा ! आउक्काए सव्वसुहुमे आउक्काए सव्वसुहुमतराए ४ ।

एयस्स णं भंते ! पुढविकाइयस्स आउ० तेउ० वाउ० वणस्सइकाइयस्स कयरे काये सव्वबादरे कयरे काये सव्वबादरतराए ?, गोयमा ! वणस्सइकाये सव्वबादरे वणस्सइकाये सव्वबादरतराए १, एयस्स णं भंते ! पुढविकाइयस्स आउक्काइ० तेउक्काइय० वाउक्काइयस्स कयरे काए सव्वबादरे कयरे काए सव्वबादरतराए ?, गोयमा ! पुढविकाए सव्वबादरे पुढविक्काए सव्वबादरतराए २ ।

एयस्स णं भंते ! आउक्काइयस्स तेऊकायस्स वाउकाइयस्स कयरे काए सव्वबादरे कयरे काए सव्वबादरतराए ?, गोयमा ! आउक्काए सव्वबादरे आउक्काए सव्वबादरतराए ३, एयस्स णं भंते ! तेउकाइयस्स वाउक्काइयस्स कयरे काए सव्वबादरे कयरे काए सव्वबादरतराए ?, गोयमा ! तेउक्काए सव्वबादरे तेउक्काए सव्वबादरतराए ४ ॥

केमहालए णं भंते ! पुढविसरीरे पन्नत्ते ?, गोयमा ! अनंताणं सुहुमवणस्सइकाइयाणं जावइया सरीरा से एगे सुहुमवाउसरीरे असंखेज्ञाणं सुहुमवाउसरीराणं जावतिया सरीरा से एगे सुहुमतेऊसरीरे, असंखेज्ञाणं सुहुमतेऊकाइयसरीराणं जावतिया सरीरा से एगे सुहुमे आऊसरीरे, असंखेज्ञाणं सुहुमआउक्काइयसरीराणं जावइया सरीरा से एगे सुहुमे पुढविसरीरे, असंखेज्ञाणं सुहुमपुढविकाइयसरीराणं जावइया सरीरा से । एगे बादरवाउसरीरे, असं० बादरवाउक्काइयाणं जावइया सरी० से एगे बादरतेऊसरीरे, असंखेज्ञाणं बादरतेउकाइयाणं जावया सरीरा से एगे बादरआउसरीरे, असंखेज्ञाणं बादरआउ० जावतिया सरीरा से एगे बादरपुढविसरीरे, एमहालए णं गोयमा ! पुढविसरीरे पन्नत्ते ॥

**वृ.** 'एयस्से'त्यादि, 'कयरे काए'त्ति कतरो जीवनिकायः 'सव्वसुहुमे'त्ति सर्वथा सूक्ष्मः सर्वसूक्ष्मः, अयं च चक्षुरग्राह्यतामात्रेण पदार्थान्तरमनपेक्ष्यापि स्याद् यथा सूक्ष्मो वायुः सूक्ष्मं मन इत्यत आह–'सव्वसुहुमतराए'त्ति सर्वेषां मध्येऽतिशयेन सूक्ष्मतरः स एव सर्वसूक्ष्मतरक इति सूक्ष्मविपरीतो बादर इति सूक्ष्मत्वनिरूपणानन्तरं पृथिव्यादीनामेव बादरत्वनिरूपणायाह–'एयस्स ण'मित्यादि ।

पूर्वोक्तमेवार्थं प्रकारान्तरेणाह– 'केमहालए ण'मित्यादि, 'अनंताणं सुहुमवणस्सइकाइयाणं जावइया सरीरा से एगे सुहुमवाउसरीरे'त्ति, इह यावद्ग्रहणेनासङ्ख्यातानि शरीराणि ग्राह्याणि अनन्तानामपि वनस्पतीनामेकादसङ्ख्येयान्तशरीरत्वाद् अनन्तानां च तच्छरीराणामभावात् प्राक्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सूक्ष्मवनस्पत्यवगाहनाऽपेक्षया सूक्ष्मवाय्ववगाहनाया असङ्ख्यातगुणत्वेनोक्तत्वादिति, 'असंखेज्जाण'मित्यादि ।

'सुहुमवाउसरीराणं'ति वायुरेव शरीरं येषां ते तथा सूक्ष्माश्च ते वायुशरीराश्च—वायुकायिकाः सूक्ष्मवायुशरीरास्तेषामसङ्ख्येयानां 'सुहुमवाउक्काइयाणं'ति क्वचित्पाठः स च प्रतीत एव, 'जावइया सरीर'त्ति यावन्ति शरीराणि प्रत्येकशरीरत्वात्तेषमासङ्ख्येयान्येव 'से एगे सुहुमे तेउसरीरे'त्ति तदेकं सूक्ष्मतेजःशरीरं तावच्छरीरप्रमाणमित्यर्थ ।

प्रकारान्तरेण पृथिवीकायिकावगाहनाप्रमाणमाह—

**मू. (७६४)** *पुढविकाइयस्स णं भंते ! केमहालिया सरीरोगाहणा पन्नत्ता ?, गोयमा ! से जहानामए रन्नो चाउरंतरचक्कवट्टिस्स वन्नगपेसिया तरुणी बलवं जुगवं जुवाणी अप्पायंका वन्नओ जाव निउणसिप्पोवगया नवरं चम्मेट्ठदुहणमुट्ठियसमाहयणिचियगत्तकाया न भण्णति सेसं तं चेव जाव निउणसिप्पोवगया तिक्खाए वयरामईए सण्हकरणीए तिक्खेणं वइरामएणं वट्टावरएणं एगं महं पुढविकाइयं जतुगोलासमाणं गहाय पडिसाहरिय प० २ पडिसंखिविय पडि० २ जाव इणामेवत्तिकट्टुतिसत्तक्खुत्तो उप्पीसेज्ञा तत्थ णं गोयमा ।*

*अत्थेगतिया पुढविक्काइया आलिद्धा अत्थेगइया पुढविक्काइया नो आलिद्धा अत्थेगइया संघट्टिया अत्थेगइयानो संघट्टिया अत्थेगइया परियाविया अत्थेगइया नो परियाविया अत्थेगइया उद्दविया अत्थेगइया नो उद्दविया अत्थेगइया पिट्ठा अत्थेगतिया नो पिट्ठा, पुढविकाइयस्स णं गोयमा ! इमहालिया सरीरोगाहणा पन्नत्ता ।*

*पुढविकाइएणं भंते ! अक्कंते समाणे केरिसियं वेदणं पच्चणुब्भवमाणे विहरति ?, गोयमा से जहानामए—केइ पुरिसे तरुणे बलवं जाव निउणसिप्पोवगए एगं पुरिसं जुन्नं जराजज्जरियदेहं जावदुब्बलं किलंतं जमलपाणिणा मुद्धाणंसि अभिहणिज्ञा से णं गोयमा ! पुरिसे तेण पुरिसेणं जमलपाणिणा मुद्धाणंसि अभिहए समाणे केरिसियं वेदणं पच्चणुब्भवमाणे विहरति ?, अनिट्ठं समणाउसो ! —*

*—तस्स णं गोयमा ! पुरिसस्स वेदणाहिंतो पुढविकाइए अक्कंते समाणे एत्तो अनिट्ठतरियं चेव अकंततरियं जाव अमणामतरियं चेव वेदणं पच्चणुब्भवमाणे विहरति । आउयाए णं भंते ! संघट्टिए समाणे केरिसियं वेदणं पच्चणुब्भवमाणे विहरति ?, गोयमा ! जहा पुढविकाइए एवं चेव, एवं तेऊयाएवि, एवं वाऊयाएवि, एवं वणस्सइकाएवि जाव विहरति सेवं भंते ! २ त्ति ॥*

**वृ.** 'पुढवी'त्यादि, 'वन्नगपेसिय'त्ति चन्दनपेषिका तरुणीति प्रवर्द्धमानवयाः 'बलवं'ति सामर्थ्यवती 'जुगवं'ति सुषमदुष्षमादिविशिष्टकावती 'जुवाणि'त्ति वयःप्राप्ता 'अप्पयंक'त्ति त्याद्यप्यधीतं तदिह न वाच्यं, एतस्य विशेषणस्य स्त्रिया असम्भवात् ।

अत एवाह—'चम्मेट्ठदुहणमुट्ठियसमाहयनिचियगत्तकाया न भन्नइ'त्ति, तत्र च चर्मेष्टकादीनि व्यायामक्रियायामुपकरमानि तैः समाहतानि व्यायामप्रवृत्तावत एव निचितानि च—घनीभूतानि गात्राणि—अङ्गानि यत्र स तथा तथाविधः कायो यस्याः सा तथेति ।

'तिक्खाए'त्ति परुषायां 'वइरामईए'त्ति वज्रमय्यां सा हि नीरन्ध्रा कठिना च भवति सण्हकरणीए'त्ति श्लक्ष्णानि—चूर्णरूपाणि द्रव्याणि क्रियन्ते यस्यां सा श्लक्ष्णकरणी—पेषणशिला

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां 'चट्टावरएणं'ति वर्त्तकवरेण—लोष्टकप्रधानेन 'पुढविकाइयं'ति पृथिवीकायिकसमुदयं 'जतुगोलासमाणं'ति डिम्भरूपक्रीडनकजतुगोलकप्रमाणं नीतिमहान्तमित्यर्थ 'पडिसाहरिए'त्यादि इह प्रतिसंहरणं शिलायाः सिलापुत्रकाच्च संहत्य पिण्डीकरणं प्रतिसङ्क्षेपणं तु शिलायाः पततः संरक्षणं।

'अत्थेगइय'त्ति सन्ति 'एके' केचन 'आलिद्ध'त्ति आदिग्धाः शिलायां शिलापुत्रके वा लग्नाः 'संघट्टिय'त्ति सङ्घर्षिताः 'परिताविय'त्ति पीडिताः 'उद्दविय'त्ति मारिताः, कथम् ? यतः 'पिट्ठ'त्ति पिष्टाः 'एमहालिय'त्ति एवंमहतीति महती चातिसूक्ष्मेति भावः यतो विशिष्टायामपि पेषणसामग्रया केचिन्न पिष्टा नैव च छुप्ता अपीति।

'अत्थेगइया संघट्टिय'त्ति प्रागुक्तं सङ्घट्टश्चाक्रमणभेदोऽत आक्रान्तानां पृथिव्यादीनां यादृशी वेदना भवति ततप्ररूपणायाह—'पुढवी'त्यादि, 'अक्कंते समाणे'त्ति आक्रमणे सति 'जमलपाणिण'त्ति मुष्टिनेति भावः 'अनिट्ठं समणाउसो !'त्ति गौतमवचनम् 'एत्तो'त्ति उक्तलक्षणाया वेदनायाः सकाशादिति ॥

शतक—१९ उद्देशकः—३ समाप्तः

## —: शतक—१९ उद्देशकः—४ :—

**वृ.** पृथिवीकायिकादयो महावेदना इति तृतीयोद्देशकेऽभिहितं, चतुर्थे तु नारकादयो महावेदनादिधर्म्मैर्निरूप्यन्त इत्येवंसंबद्धस्यास्येदमादिसूत्रम्—

**मू. (७६५)** *सिय भंते ! नेरइया महासवा महाकिरिया महावेयणा महानिज्ररा ? गोयमा नो तिणट्ठे समट्ठे १ सिय भंते ! नेरइया महासवा महाकिरिया महावेयणा अप्पनिज्ररा ? हंता सिया २, सिय भंते ! नेरइया महासवा महाकिरिया अप्पवेयणा महानिज्ररा ?, गोयमा ! नो तिणट्ठे समट्ठे ३ । सिय भंते ! नेरइया महासवा महाकिरिया अप्पवेदणा अप्पनिज्ररा ?, गोयमा ! नो तिणट्ठे समट्ठे ४, सिय भंते ! नेरइया महासवा अप्पकिरिया महावेदणा महानिज्ररा ?, गोयमा नो तिणट्ठे समट्ठे ५ ।*

*सिय भंते ! नेरइया महासवा अप्पकिरिया महावेयणा अप्पनिज्ररा ?, गोयमा ! नो तिणट्ठे समट्ठे ६, सिय भंते ! नेरतिया महासवा अप्पकिरिया अप्पवेदणा महानिज्ररा ?, नो तिणट्ठे समट्ठे, सिय भंते ! नेरतिया महासवा अप्पकिरिया अप्पवेदणा अप्पनिज्ररा ?, नो तिणट्ठे समट्ठे ८ । सिय भंते ! नेरइया अप्पासवा महाकिरिया महावेदणा महानिज्ररा ?, नो तिणट्ठे समट्ठे ९, सिय भंते ! नेरइया अप्पासवा महाकिरिया महावेदणा अप्पनिज्ररा ?, नो तिणट्ठे समट्ठे १०, सिय भंते ! नेरइया अप्पासवा महाकिरिया अप्पवेयणा महानिज्ररा ?, नो तिणट्ठे समट्ठे ११ ।*

*सिय भंते ! नेरइया अप्पासवा महाकिरिया अप्पवेदणा अप्पनिज्ररा ?, नो तिणट्ठे समट्ठे १२, सिय भंते ! नेरइया अप्पासवा अप्पकिरिया महावेयणा महानिज्ररा ? नो तिणट्ठे समट्ठे १३, सिय भंते ! नेरतिया अप्पासवा अप्पकिरिया महावेदणा अप्पनिज्ररा ?, नो तिणट्ठे समट्ठे १४ ।*

*सिय भंते ! नेरइया अप्पासवा अप्पकिरिया अप्पवेयणा महानिज्ररा ?, नो तिणट्ठे समट्ठे १५, सिय भंते ! नेरइया अप्पासवा अप्पकिरिया अप्पवेयणा अप्पनिज्ररा ?, नो तिणट्ठे समट्ठे १६, एते सोलस भंगा ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सिय भंते ! असुरकुमारा महासवा महाकिरिया महावेदणा महानिज्ञरा ?, नो तिणट्ठे समट्ठे, एवं चउत्थो भंगो भाणियव्वो। सेसा पन्नरस भंगा खोडेयव्वा, एवं जाव थणियकुमारा।*

*सिय भंते ! पुढविकाइया महासवा महाकिरिया महावेयणा महानिज्ञरा ? हंता, एवं जाव सिया भंते ! पुढविकाइया अप्पासवा अप्पकिरिया अप्पवेयणा अप्पनिज्ञरा ? हंता सिया, एवं जाव मणुस्सा, वाणंतरजोइसियवेमाणिया जहा असुरकुमारा सेवं भंते ! २ त्ति॥*

**वृ.** 'सिय भंते'इत्यादि, 'सिय'त्ति 'स्यु': भवेयुर्नैरयिका महाश्रवाः प्रचुरकर्म्मवन्धनात् महाक्रियाः कायिक्यादिक्रियाणां महत्वात् महावेदना वेदनायास्तीव्रत्वात् महानिर्जराः कर्मक्षपण-बहुत्वात्, एषां च चतुर्णां पदानां षोडश भङ्गा भवन्ति, एतेषु च नारकाणां द्वितीयभङ्कोऽ-नुज्ञातस्तेषामाश्रवादित्रयस्य महत्वात् कर्म्मनिर्ज्जरायास्त्वल्पत्वात्, शेषाणां तु प्रतिषेधः ।

असुरादिदेवेषु चतुर्थभङ्गोऽनुज्ञातः, ते हि महाश्रवा महाक्रयाश्च विशिष्टाविरतियुक्तत्वात् अल्पवेदनाश्च प्रायेणासातोदयाभावात् अल्पनिर्जराश्च प्रायोऽशुभपरिणामत्वात्, शेषास्तु निषेधनीयः, पृथिव्यादीनां तु चत्वार्यपि पदानि तत्परिणतेर्विचित्रत्वात् सव्यभिचाराणीति षोडशापि भङ्गका भवन्तीति, उक्तञ्च–

॥१॥ "बीएण उ नेरइया होंति चउत्थेण सुरगणा सव्वे।
ओरालसरीरा पुण सव्वेहि पएहिं भणियव्वा ॥" इति

शतकं–१९ उद्देशकः–४ समाप्तः

## –: शतक–१९ उद्देशकः–५ :–

**वृ.** चतुर्थे नारकादयो निरूपिताः पञ्चमेऽपि त एव भङ्ग्यन्तरेण निरूप्यन्त इत्येवंसम्बद्ध-स्यास्येदमादिसूत्रम्–

**मू. (७६६)** *अत्थि णं भंते ! चरिमावि नेरतिया परमावि नेरतिया ?, हंता अत्थि, से नूनं भंते ! चरमेहिंतो नेरइएहिंतो परमा नेरइया महाकम्मतराए चेव महस्सवतराए चेव महावेय-णतराए चेव परमेहिंत वा नेइरएहिंतो वा चरमा नेरइया अप्पकम्मतराए चेव अप्पकिरियतराए चेव अप्पासवतराए चेव अप्पवेयणतराए चेव ?, हंता गोयमा ! चरमेहिंतो नेरइएहिंतो परमा जाव महावेयणतराए चेव परमेहिंतो वा नेरइएहिंतो चरमा नेरइया जाव अप्पवेयणतरा चेव ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ जाव अप्पवेयणतरा चेव ?, गोयमा ! ठितिं पडुच्च, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जाव अप्पवेदणतरा चेव ।*

*अत्थि णं भंते ! चरमावि असुरकुमारा परमावि असुरकुमारा ?, एवं चेव, नवरं विवरीयं भाणियव्वं, परमा अप्पकम्मा चरमा महाकम्मा, सेसं तं चेव जाव थणियकुमारा ताव एवमेव, पुढविकाइया जावमणुस्सा एवं जहा नेरइया, वाणमंतरजोइसिय वेमाणिया जहा असुरकुमारा*

**वृ.** 'अत्थि ण'मित्यादि, 'चरमावि'त्ति अल्पस्थितयोऽपि 'परमावि'त्ति महास्थितयोऽपि, 'ठिइं पडुच्चे'ति येषां नारकाणां महती स्थितिस्ते इतरेभ्यो महाकर्म्मतरादयोऽशुभकर्म्मापेक्षया भवन्ति, येषां त्वल्पा स्थितिस्ते इतरेभ्योऽल्पकर्मतरादयो भवन्तीति भावः ।

असुरसूत्रे 'नवरं विवरीयं'ति पूर्वोक्तापेक्षया विपरीतं वाच्यं, तच्चैवं–'से नूणं भंते ! चरमेहिंतो असुरकुमारेहिंतो परमा असुरकुमारा अप्पकम्मतरा चेव अप्पकिरियतरा विपरीतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्यं, तच्चैवं–'से नूनं भंते ! चरमेहिंतो असुरकुमारेहिंतो परमा असुरकुमारा अप्पकम्मतरा चेव अप्पकिरियतरा चेवे'त्यादि, अल्पकर्मत्वं च तेषामसाताद्यशुभकर्मापेक्षं अल्पक्रियत्वं च तथाविधकायिक्या- दिकष्टक्रियाऽपेक्षं अल्पाश्रवत्वं त तथाविधकष्टक्रियाजन्यकर्म्मबन्धापेक्षं अल्पवेदनत्वं च पीडाभावा-पेक्षमवसेयमिति ।

'पुढविक्काइए'त्यादि, औदारिकशरीरा अल्पस्थितिकेभ्यो महास्थितिकेभ्यो महास्थितयो महाकर्म्मादयो भवन्ति, महस्थितिकत्वादेव ।

वैमानिका अल्पवेदना इत्युक्तम्, अथ वेदनास्वरूपमाह–

**मू. (७६७)** *कइविहा णं भंते ! वेदणा प० ?, गोयमा ! दुविहा वेदणा प० तं० निदा य अनिदा य । नेरइया णं भंते ! किं निदायं वेदणं वेयंति अनिदायं जहा पन्नवणाए जाव वेमाणियत्ति सेवं भंते ! सेवं भंतेत्ति ॥*

**वृ.** 'कई'त्यादि, 'निदा य'त्ति नियतं दानं–शुद्धिर्जीवस्य 'दैप् शोधने' इति वचनान्निदा–ज्ञानमाभोग इत्यर्थः तद्युक्ता वेदनाऽपि निदा–आभोगवतीत्यर्थः चशब्दः समुच्चये 'अनिदा य'त्ति अनाभोगवती 'किं निदायं'ति ककारस्य स्वार्थिकप्रत्ययत्वान्निदामित्यर्थः ।

'जहा पन्नवणाए'त्ति तत्र चेदमेवं–'गोयमा ! निदायंपि वेयणं वेयंति अनिदायंपि वेयणं वेयंती'त्यादि ॥

शतक–१९ उद्देशकः–५ समाप्तः

## –: शतक–१९ उद्देशकः–६ :–

'छफासे' इत्यादि, तत्र सर्व्वकर्क्कशो १ गुरुश्च २ देशश्च शीतः ३ उष्णः ४ स्निग्धो ५ रूक्षश्चे ६ ति, इह च देशशीतादीना चतुर्णां पदानामेकत्वादिना षोडश भङ्गाः, एते च सर्वकर्कशगुरुभ्यां लब्धाः, एत एव कर्कशलघुभ्यां लभ्यन्ते तदेवं द्वात्रिंशत्, इयं च सर्व्वकर्कशपदेन लब्धा इयमेव च सर्वमृदुना लभ्य इति चतुःषष्टिर्भङ्गाः, इयं च चतुःषष्टि सर्वकर्कशगुरुलक्षणेन द्विकसंयोगेन सविपर्ययेण लब्धा, तदेवमन्योऽप्येवंविध द्विकसंयोगस्तां लभते, कर्कशगुरुशीतस्निग्धलक्षणानां च चतुर्णां पदानां षड् द्विकसंयोगास्तदेवं चतुःषष्टि षडिद्विकसंयोगैर्गुणितानि शतानि चतुरशीत्यधिकानि भवन्तीति अत एवोक्तं-'सव्वेवेते छफासे' इत्यादि ।

'जइ सत्तफासे' इत्यादि, इहाद्यं कर्क्कशाख्यं पदं स्कन्धव्यापकत्वाद्विपक्षरहितं शेषाणि तु गुर्वादीनि षट् स्कन्धदेशाश्रितत्वात् सविपक्षाणीत्येवं सप्त स्पर्शा, एषां च गुर्वादीनां षण्णां पदानामेकत्वानेकत्वाभ्यां चतुःषष्टिरभङ्गका भवन्ति, ते च सर्वशब्दविशेषितेनादिन्यस्तेन कर्क्कशपदेन लब्धाः, एवं मृदुपदेनात्येवमष्टविंशत्यधिकं शतं, एवं गुरुलघुभ्यां शेषैः षड्भिःसह १२८, शीतोष्णाभ्यामप्येवमेव १२८, एवं स्निग्धरूक्षाभ्यामपि १२८, तदेवमष्टाविंशत्युत्तरशतस्य चतुर्भिर्गुणने पञ्च शतानि द्वादशोत्तराणि भवन्तीति, अत एवाह-'एवं सत्तफासे पंच बारसुत्तरा भंगसया भवंती'ति

'अट्ठफासे' इत्यादि० चतुर्णां कर्क्कशादिपदानां सविपर्ययाणामाश्रयणादष्टौ स्पर्शा, एते च बादरस्कन्धस्य द्विधा विकल्पितस्यैकत्र देशे चत्वारो विरुद्धास्तु द्वितीये इति, एषु चैकत्वानेकत्वाभ्यां भङ्गका भवन्ति, त्र च रूक्षपदेनैकवचनान्तेन बहुवचनान्तेन द्वौ, एतौ च स्निग्धैकवचनेन लब्धावेतावेव स्निग्धबहुवचनं लभेते, एते चत्वारः, एते च सूत्रपुस्तके चतुष्ककन सूचिताः, ततैतेष्वेवाष्टासु पदेषूष्णपदेन बहुवचनान्तेनोक्तचतुर्भङ्गीयुक्तेनान्ये चत्वारः ४, एवं शीतपदेन बहुवचनान्तेनैव ४, तथा शीतोष्णपदाभ्यां बहुवचनान्ताभ्यामेत एव ४ एवं चैते १६, तथा लघुपदेन बहुवचनान्तेनैत एव ४, तता लघुशीतपदाभ्यां बहुवचनान्ताभ्यामेत एव ४, एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लघुष्णपदाभ्यां ४, एवं लघुशी- तोष्णपदैरिति ४ एवमेतेऽपि षोडश १६, एतेव दर्शयति

'एवं गुरुएणं एगत्तएण' मित्यादि, तथा कर्कशादिनैकवचनान्तेन गुरुपदेन च बहुवचनान्तेनैत एव, तथा गुरूष्णाभ्यां बहुवचनान्ताभ्यामेत एव ४, एवं गुरुशीतभ्यां ४, एवं गुरुशीतोष्णैः४ एवं चैते षोडश, तथा गुरुलघुभ्यां बहुवचनान्ताभ्यामेत एव ४, एवं गुरुलघूष्णैः ४, एवं गुरुलघुशीतैः ४, एवं गुरुलघुशीतोष्णैः ४, एतेऽपि षोडश, सर्वेऽप्यादित एते चतुःषष्टि 'कक्खडमउएहिं एगत्तेहिं' ति कर्कशमृदुपदाभ्यामेकवचनवद्भयां चतुःषष्टिरेते भङ्गा लब्धा इत्यर्थः, 'ताहे' त्ति तदनन्तरं 'कक्खडेणं एगत्तएणं' ति कर्क०शपदेनैकत्वगेन एकवचनान्तेनेत्यर्थः 'मउएणं पोहत्तएणं' ति मृदुकपदेन पृथक्त्वगेनानेकवचनान्तेनेत्यर्थः 'एते चेव' त्ति एत एव पूर्वोक्तक्रमाच्चतुःषष्टिर्भङ्गकाः कर्त्तव्या इति।

'ताहेकक्खडेण' मित्यादि, 'ताहे' त्ति ततः कर्क०शपदेन बहुवचनान्तेन मृदुपदेन चैकवचनान्तेन चतुःषष्टिर्भङ्गाः पूर्वोक्तक्रमेणैवकर्त्तव्याः, ततश्चैतानेव कर्कशमृदुपदाभ्यां बहुवचनान्ताभ्यां पूर्ववच्चतुष्षष्टिर्भङ्गाः कर्त्तव्याः एताश्चादितश्चतश्चतुःषष्ट्यो मीलिता द्वे शते षटपञ्चाशदधिते स्यातामिति। एतदेवाह-'सव्वे ते अट्ठफासे दो छप्पन्ना भंगसया भवंति' त्ति,

'बारसछन्नउया भंगसया भवंति' त्ति बादरस्कन्धे चतुरादिकाः स्पर्शा भवन्ति, तत्र च चतुःस्पर्शादिषु क्रमेण षोडशानामष्टविंशत्युत्तरसतस्य चतुरशीत्यधिकशतत्रयस्य द्वादशोत्तरशतपञ्चकस्य षट्पञ्चाशदधिकशतद्वयस्य च भावाद्यथोक्तं मानं भवतीति।

*मू. (७८८) कइविहे भंते! परमाणु पं०?, गोयमा! चउव्विहे परमाणु प० तं०-दव्वपरमाणु खेत्तपरमाणू कालपरमाणू भावपरमाणू।*

*दव्वपरमाणु णं भंते! कइविहे प०?, गोयमा! चउव्विहे प० तं०-अच्छेज्जे अभेज्जे अडज्झे अगेज्झे, खेत्तपरमाणू णं भंते! कइविहे प०?, गोयमा! चउव्विहे प० तं०-अणद्धे अमज्झे अपदेसे अविभाइणे।*

*कालपरमाणू पुच्छा, गोयमा! चउव्विहे प० तं०-अवन्ने अगंधे अरसे अफासे।*

*भावपरमाणू णं भंते! कइविहे प०?, गोयमा! चउव्विहे प० तं०-वन्नमंते गंधमंते रसमंते फासमंते। सेवं भंते २ ति जाव विहरति॥*

**वृ.** परमाण्वाद्यधिकारादेवेदमाह-'कई' त्यादि, तत्र द्रव्यरूपः परमाणुर्द्रव्यपरमाणुः-एकोऽणुर्वर्णादिभावानामविवक्षणात् द्रव्यत्वस्यैव विवक्षणादिति, एवं क्षेत्रपरमाणुः-आकाशप्रदेशः कालपरमाणुः समयः भावपरमाणुः-परमाणुरेव वर्णादिभावानां प्राधान्यविवक्षणात् सर्वजघन्यकालत्वादिर्वा।

'चउव्विहे' त्ति एकोऽपि द्रव्यपरमाणुर्विवक्षया चतुःस्वभावः 'अच्छेज्ज' त्ति छेद्यः-शादिना लतादिवत्तन्निषेधादच्छेद्यः 'अभेज्ज' त्ति भेद्यः-शूच्यादिना चर्म्मवत्तन्निषेधादभेद्यः 'अडज्झे' त्ति आदाह्योऽग्निना सूक्ष्मत्वात्, अत एवाग्राह्यो हस्तादिना।

'अणद्धे' त्ति समसङ्ख्यावयवाभावात् 'अमज्झे' त्ति विषमसङ्ख्यावयवाभावात् 'अपएसे' त्ति निरंशोऽवयवाभावात् 'अविभाइणे' त्ति अविभागेन निर्वृत्तोऽविभागिम एकरूप इत्यर्थः विभाजयितुमशक्यो वेत्यर्थः॥

शतकं-२० उद्देशकः-५ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं–२० उद्देशकः–६ :–

**वृ.** पञ्चमे पुद्गलपरिणाम उक्तः, षष्ठे तु पृथिव्यादिजीवपरिणामोऽभिधीयत इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

**मू. (७८९)** *पुढविक्काइए णं भंते ! इमीसे रयणप्पभाए पुढवीए सक्करप्पभाए पुढवीए अंतरा समोहए समोहणित्ता जे भविए सोहम्मे कप्पे पुढविकाइयत्ताए उववज्जित्तए से णं भंते ! किं पुव्विं उववज्जित्ता पच्छा आहारेज्जा पुव्विं आहारित्ता पच्छा उववज्जेज्जा ?, गोयमा ! पुव्विं वा उववज्जित्ता एवं जहा सत्तरसमसए छट्ठुद्देसे जाव से तेणट्ठेणं गोयमा ! एवं वुच्चइ पुव्विं वा जाव उववज्जेज्जा नवरं तहिं संपाउणेज्जा इमेहिं आहारो भन्नति सेसं तं चेव ।*

*पुढविक्काइए णं भंते ! इमीसे रयणप्पभाए सक्करप्पभाए पुढवीए अंतरा समोहए जे भविए ईसाणे कप्पे पुढविक्काइयत्ताए उववज्जित्तए एवं चेव एवं जाव ईसीपब्भाराए उववाएयव्वो । पुढविकाइए णं भंते ! सक्करप्पभाए वालुयप्पभाए पुढवीए अंतरा समोहते स० २ जे भविए सोहम्मे जाव ईसिपब्भाराए एवं एतेण कमेणं जाव तमाए अहेसत्तमाए य पुढवीए अंतरा समोहए समाणे जे भविए उववएयव्वो ।*

*पुढविकाइए णं भंते ! सोहम्मीसाणसणंकुमारमाहिंदाण य कप्पाणं अंतरा समोहए स० २ जे भविए इमीसे रयणप्पभाए पुढवीए पुढविक्काइयत्ताए उववज्जित्तए से णं भंते ! पुव्विं उववज्जित्ता पच्छा आहारेज्जा सेसं तं चेव जाव से तेणट्ठेणं जाव निक्खेवओ ।*

*पुढविक्काइए णं भंते ! सोहम्मीसाणाणं सणंकुमारमाहिंदाण य कप्पाणं अंतरा समोहए २ जे भविए सक्करप्पभाए पुढवीए पुढविकाइयत्ताए उववज्जित्तए एवं चेव एवं जाव अहेसत्तमाए उववाएयव्वो, एवं सणंकुमारमाहिंदाणं बंभलोगस्स कप्पस्स अंतरा समोहए समोह० २ पुनरवि जाव अहे सत्तमाए उववाएयव्वो एवं बंभलोगस्स लंगस्स य कप्पस्स अंतरा समोहए पुनरवि जाव अहेसत्तमाए ।*

*एवं लंतगस्स महासुक्कस्स कप्पस्स य अंतरा समोहए पुनरवि जाव अहेसत्तमाए, एवं महासुक्कसहस्सारस्स य कप्पस्स अंतरा पुनरवि जाव अहेसत्तमाए । एवं सहस्सारस्स आणय-पाणयकप्पाम अंतरा पुनरवि जाव अहेसत्तमाए, एवं आणयपाणयाणं आरणअच्चुयाण य कप्पाणं अंतरा पुनरवि जाव अहेसत्तमाए, एवं आरणच्चुयाणं गेवेज्जविमाणाय य अंतरा जाव अहेसत्तमाए, एवं गेवेज्जविमाणाणं अनुत्तरविमाणाण य अंतरा पुणरवि जाव अहेसत्तभाए, एवं अनुत्तरविमाणाणं ईसीपब्भाराए य पुणरवि जाव अहेसत्तमाए उववाएयव्वो १ ।*

**वृ.** 'पुढवी'त्यादि, 'एवं जहा सत्तरसमसए छट्ठुद्देसे' त्ति, अनेन च यत्सूचितं तदिदं–'पुव्विं वा उववज्जित्ता पच्छा आहारेज्जा पुव्विं वा आहारित्ता पच्छा उववज्जेज्जे'त्यादि ।

अस्य चायमर्थः–यो गेन्दुकसंनिभसमुद्घातगामी स पूर्वं समुत्पद्यते–तत्र गच्छतीत्यर्थः पश्चादाहारयति–शरीरप्रायोग्यान् पुद्गलान् गृह्णातीत्यर्थः अत उच्यते–'पुव्विं वा उववज्जित्ता पच्छा आहारेज्ज' त्ति, यः पुनरीलिकासन्निभसमुद्घातगामी स पूर्वमाहारयति–उत्पत्तिक्षेत्रे प्रदेश-प्रक्षेपणेनाहारं गृह्णातीति तत्समनन्तरं च प्राक्तनशरीरस्थप्रदेशानुत्पत्तिक्षेत्रे संहरति अत उच्यते–'पुव्विं आहारित्ता पच्छा उववज्जेज्ज' त्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (७९०)** *आउक्काइए णं भंते ! इमीसे रयणप्पभाए सक्करप्पभाए पुढवीए अंतरा समोहए समो० २ जे भविए सोहम्मे कप्पे आउक्काइयत्ताए उववज्जित्तए सेसं जहा पुढविकाइयस्स जाव से तेणट्ठेणं एवं पढमदोच्चाणं अंतरा समोहए जाव ईसीपब्भाराए उववाएयव्वो एवं एएणं कमेणं जाव तमाए अहेसत्तमाए य पुढवीए अंतरा समोहए समोह० २ जाव ईसीपब्भाराए उववाएयव्वो आउक्काइयत्ताए।*

*आउयाए णं भंते ! सोहम्मीसाणाणं सणंकुमारमाहिंदाण य कप्पाणं अंतरा समोहए समोहणित्ता जे भविए इमीसे रयणप्पभाए पुढवीए घनोदधिवलएसु आउक्काइयत्ताए उववज्जित्तए सेसं तं चेव एवं एएहिं चेव अंतरा समोहओ जाव अहेसत्तमाए पुढवीए घनोदधिवलएसु आउक्काइयत्ताए उववाएयव्वो एवं जाव अनुत्तरविमाणाणं ईसिपब्भाराए पुढवीए अंतरा समोहए जाव अहे सत्तमाए घनोदधिवलएसु उववाएयव्वो।*

**मू. (७९१)** *वाउक्काइए णं भंते ! इमीसे रयणप्पभाए पुढवीए सक्करप्पभाए पुढवीए अंतरा समोहए समोहणित्ता जे भविए सोहम्मे कप्पे वाउक्काइयत्ताए उववज्जित्तए एवं जहा सत्तरसमसए वाउक्काइयउद्देसए तहा इहवि नवरं अंतरेसु समोहणा नेयव्वा।*

*सेसं तं चेव जाव अनुत्तरविमाणाणं ईसीपब्भाराए य पुढवीए अंतरा समोहए समोह० २ जे भवि घनवायतणुवाए घनवायतमुवायवलएसु वाउक्काइयत्ताए उववज्जित्तए सेसं तं चेव जाव से तेणट्ठेणं जाव उववज्जेज्जा। सेवं भंते २ त्ति॥*

**वृ.** वाचनान्तराभिप्रायेण तु पृथिव्यब्वायुविषयत्वादुद्देशकत्रयमिदमतोऽष्टमः॥

शतकं-२० उद्देशकः-६ समाप्तः

## -: शतकं-२० उद्देशकः-७ :-

**वृ.** षष्ठोद्देशके पृथिव्यादीनामाहारो निरूपितः, स च कर्म्मणो बन्ध एव भवतीति सप्तमे बन्धो निरूप्यते, इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (७९२)** *कइविहे णं भंते ! बंधे प० ?, गोयमा ! तिविहे पं० तं०-जीवप्पयोगबंधे १ अनंतरपओगबंधे २ परंपरबंधे ३। नेरइयाणं भंते ! कइविहे प० एवं चेव, एवं जाव वेमाणियाणं*

*नाणावरणिज्जस्स णं भंते ! कम्मस्स कइविहे बंधे प० ?, गोयमा ! तिविहे बंधे प० तं०-जीवप्पयोगबंधे अनंतरबंधे परंपरबंधे, नेरइयाणं भंते ! नाणावरणिज्जस्स कम्मस्स कइविहे बंधे प० एवं चेव जाव वेमाणियाणं, एवं जाव अंतराइयस्स।*

*नाणावरणिज्जोदयस्स णं भंते ! कम्मस्स कइविहे बंधे प० ?, गोयमा ! तिविहे बंधे पं० एवं चेव एवं नेरइयाणवि एवं जाव वेमाणियाणं, एवं जाव अंतराइउदयस्स, इत्थीवेदस्स णं भंते ! कइविहे बंधे प० ?, गोयमा ! तिविहे बंधे प० एवं चेव, असुरकुमाराणं भंते ! इत्थीवेदस्स कतिविहे बंधे प० ?, गो० ! तिविहे बंधे प० एवं चेव एवं जाव वेमाणियाणं, नवरं जस्स इत्थिवेदो अत्थि, एवं पुरिसवेदस्सवि एव नपुंसगवे० जाव वेमाणियाणं,*

*नवरं जस्स जो अत्थि वेदो, दंसणमोहणिज्जस्स णं भंते ! कम्मस्स कइविहे बं ?, एवं चेव निरंतरं जाव वेमा०, एवं चरित्तमोहणिज्जस्सवि जाव वेमाणियाणं, एवं एएणं कमेणं ओरालियसरीरस्स जाव कम्मगसरीरस्स आहारसन्नाए जाव परिग्गहस० कण्हलेसाए जाव*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

*सुक्कलेसाए सम्मदिट्ठीए मिच्छादिट्ठीए सम्मामिच्छादिट्ठीए आभिनिबोहियणामस्स जाव केवलनाणस्स मइअन्नाणस्स सुयअन्नाणस्स विभंगनाणस्स एवं आभिणिबो० नाणविसयस्स भंते ! कइविहे बं० प० ? जाव केवलनाणविसयस्स मइअन्नाणविसयस्स सुयअन्नाणविसयस्स विभंगनाणविस० ।*

*एएसिं सव्वेसिं पदाणं तिविहे बंधे प० सव्वेऽवेते चउव्वीसं दंडगा भा० नवरं जाणियव्वं जस्स जइ अत्थि जाव वेमाणि० भंते ! विभंगणाणविसयस्स कइवि० बंधे प०, गोयमा ! तिविहे बंधे प०-जीवप्पयोगबंधे अनंतरबंधे परंपरबंधे, सेवं भंते ! २ जाव विहरति ॥*

**वृ.** 'कतिविहे ण'मित्यादि, 'जीवप्पओगबंधे'त्ति जीवस्य प्रयोगेण-मनःप्रभृतिव्यापारेण बन्धःकर्म्मपुद्गलानामात्मप्रदेशेषु संश्लेषो बद्धस्पृष्टादिभावकरणं जीवप्रयोगबन्धः, 'अनंतरबंधे'त्ति येषां पुद्गलानां बद्धानां सतामनन्तरः समयो वर्त्तते ते तेषामनन्तरबन्ध उच्यते, येषां ते बद्धानां द्वितीयादि समयो वर्त्तते तेषां परम्परबन्ध इति ।

'नाणावरणिज्जोदयस्स'त्ति 'ज्ञानावरणीयोदयस्य' ज्ञानावरणीयोदयरूपस्य कर्म्मण उदयप्राप्तज्ञानावरणीयकर्म्मण इत्यर्थः, अस्य च बन्धो भूतभावपिक्षयेति, अथवा ज्ञानावरणीयोदयरूपस्य कर्म्मण उदयप्राप्तज्ञानावरणीयकर्म्मण इत्यर्थः, अस्य च बन्धो भूतभावपिक्षयेति, अथवा ज्ञानावरणीयतयोदयो यस्य कर्मणस्तत्तथा, ज्ञानावरणीयोदये यद्बध्यते वेद्यते वा तज्ज्ञानावरणीयोदयमेव तस्येति, एवमन्यत्रापि ।

'सम्मद्दिट्ठीए'इत्यादि, ननु 'सम्मद्दिट्ठी'त्यादौ कथं बन्दो दृष्ट्ज्ञानाज्ञानानामपौद्गलिकत्वात् जीवप्योगबन्धादिव्यप्रदेश्यत्वं च तस्य जीववीर्यप्रभवत्वात् अत एवाभिनिबोधिकज्ञानविषयस्येत्याद्यपि निरवद्यं ज्ञानस्य ज्ञेयेन सह सम्बन्धविवक्षणादिति, इह सङ्ग्रहगाथे-

॥ १ ॥ "जीवप्पओगबंधे अनंतरपरंपरे च बोद्धव्वे ८
पगडी ८ उदए ८ वेए ३ दंसणमोहे चरित्ते य ॥

॥ २ ॥ ओरालियवेउव्विय आहारगतेयकम्मए चेव ।
सन्ना ४ लेस्सा ६ दिट्ठी ३ नाणा ५ नाणेसु ३ तव्विसए ८ ॥

शतकं-२० उद्देशकः-७ समाप्तः

## -: शतकं-२० उद्देशकः-८ :-

**वृ.** सप्तमे बन्ध उक्तस्तद्विभागश्च कर्म्मभूमिषु तीर्थकरैः प्ररूप्यत इति कर्म्मभूम्यादिकमष्टमे प्ररूप्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्-

**मू. (७९३)** *कइणं भंते ! कम्मभूमीओ प० ?, गोयमा ! पन्नरस कम्मभूमीओ प० तं०-पंच भरहाइं पंच एरवयाइं पंच महाविदेहाइं ।*

*कति णं भंते ! अकम्मभूमीओ प० ?, गो० तीसं अकम्मभूमीओ प० तं० पंच हेमवयाइं पंच हेरन्नवयाइं पंच हरिवासाइं पंच रम्मगवासाइं पंच देवकुराइं पंच उत्तराकुराइं ।*

*एयासु णं भंते ! तीसासु अकम्मभूमीसु अत्थि उस्सप्पिणीति वा ओसप्पिणीति वा ?, नो तिणट्ठे समट्ठे, एएसु णं भंते ! पंचसु भरहेसु पंचसु एरवएसु अत्थ उस्सप्पिणीति वा ओसप्पिणीति वा ?, हंता अत्थि, एएसुणं पंचसु महाविदेहेसु०, नेवत्थि उस्सप्पिणी नेवत्थि ओसप्पिणी अवट्ठिए णं तत्थ काले० समणाउसो ! ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. (७९४) एएसु णं भंते! पंचसु महाविदेहेसु अरिहंता भगवंतो पंचमहव्वइयं सपडिक्कमणं धम्मं पन्नवयंति ?, नो तिणट्ठे समट्ठे, एएसु णं भंते ! पंचसु भरहेसु पंचसु एरवएसु पुरच्छिमपच्छिमगा दुवे अरिहंता भगवंतो पंचमहव्वइयं पंचाणुव्वइयं सपडिक्कमणं धम्मं पन्नवयंति अवसेसा णं अरिहंता भगवंतो चाउज्जामं धम्मं पन्नवयंति, एएसु णं पंचसु महाविदेहेसु अरहंता भगवंतो चाउज्जामं धम्मं पन्नवयंति ।*

*जंबुद्दीवे णं भंते ! दीवे भारहे वासे इमीसे ओसप्पिणीए कति तित्थगरा पन्नत्ता ?, गोयमा चउवीसं तित्थगरा पन्नत्ता, तंजहा—उसभमजियसंभव अभिनंदनं च सुमतिसुप्पभसुपासससिपुप्फदंतसीयलेज्जंसवासपुज्जं च विमलअनंतधम्मसंतिकुंथुअरमल्लिमुनिसुव्वयनमिनेमिपासवद्धमाणा २४ ।*

*मू. (७९५) एएसि णं भंते ! चउवीसाए तित्थगराणं कति जिनंतरा प० ?, गोयमा ! तेवीसं जिणंतरा प० । एएसि णं भंते ! तेवीसाए जिणंतरेसु कस्स कहिं कालियसुयस्स वोच्छेदे प० ?, गो० ! एएसु णं तेवीसाए जिनंतरेसु पुरिमपच्छिमएसु अट्ठसु २ जिनतरेसु एत्थ णं कालियसुयस्स अवोच्छेदे प० मज्झिमएसु सत्तसु जिनंतरेसु एत्थ णं कालियसुयस्स वोच्छेदे प०, सव्वत्थवि णं वोच्छिन्ने दिट्ठिवाए ।*

**वृ.** 'कइ ण'मित्यादि, 'कस्स कहिं कालियसुयस्स वोच्छेए पन्नत्ते'त्ति कस्य जिनस्य सम्बन्धिनः कस्मिन् जिनान्तरेकयोर्जिनयोरन्तरे 'कालिकश्रुतस्य' एकादशङ्गीरूपस्य व्यवच्छेदः प्रज्ञप्तः ? इति प्रश्नः, उत्तरं तु 'एएसि ण'मित्यादि, इह च कालिकस्य व्यवच्छेदेऽपि पृष्टे यदपृष्टस्याव्यवच्छेदस्याभिधानं तद्विपक्षज्ञापने सति विवक्षितार्थबोधनं सुकरं भवतीतिकृत्वा कृतमिति, 'मज्झिमएसु सत्तसु'त्ति अनेन 'कस्स कहिं' इत्यस्योत्तरमवसेयं, तथाहि 'मध्यमेषु सप्तसु' इत्युक्ते सुविधिजिनतीर्थस्य सुविधिशीतलजिनयोरन्तरे व्यवच्छेदो बभूव, तद्वयवच्छेदकालश्च पल्योपमचतुर्भागः, एवमन्येऽपि षड् जिनाः षट् च जिनान्तराणि वाच्यानि, केवलं व्यवच्छेदकालः सप्तस्वप्येवमवसेयः—

॥१॥ "चउभागो १ चउभागो २ तिन्नि य चउभाग ३ पलियमेगं च ४ ।
तिन्नेव य चउभागा ५ चउत्थभागो य ६ चउभागो ७ ॥" इति ।

'एत्थ णं'ति 'एतेषु' प्रज्ञापकेनोपदर्श्यमानेषु जिनान्तरेषु कालिकश्रुतस्य व्यवच्छेदः प्रज्ञप्तः, दृष्टिवादापेक्षया त्वाह—'सव्वत्थवि णं वोच्छिन्ने दिट्ठिवाए'त्ति 'सर्वत्रापि' सर्वेष्वपि जिनान्तरेषु न केवलं सप्तस्वेव क्वचित् कियन्तमपि कालं व्यवच्छिन्नो दृष्टिवाद इति ।

*मू. (७९६) जंबुद्दीवे णं भंते ! दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं केवतियं कालं पुव्वगए अणुसज्जिस्सति ?, गोयमा ! जंबुद्दीवे णं दीवे भारहे वासे इमीसे उस्सप्पिणीए ममं एगं वाससहस्सं पुव्वगए अणुसज्जिस्सति ।*

*जहा णं भंते ! जंबुद्दीवे २ भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं एगं वाससहस्सं पुव्वगए अणुसज्जिस्सइ तहा णं भंते ! जंबुद्दीवे २ भारहे वासे इमीसे ओसप्पिणीए अवसेसाणं तित्थगराणं केवतियं कालं पुव्वगए अणुसज्जित्था ?, गोयमा ! अत्थेगतियाणं संखेज्जं कालं अत्थेगइयाणं असंखेज्जं कालं ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** व्यवच्छेदाधिकारादेवेदमाह–'जंबुद्दीवेण'मित्यादि, 'देवाणुप्पियाणं'ति युष्माकं सम्बन्धि 'अत्थेगइयाणं संखेज्जं कालं'ति पश्चानुपूर्व्या पार्श्वनाथादीनां सङ्ख्यातं कालं 'अत्थेगइयाणं संखेज्जं कालं'ति ऋषभादीनाम्।

**मू. (७९७)** *जंबुद्दीवे णं भंते! दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पयाणं केवतियं कालं तित्थे अणुसज्जिस्सति?, गोयमा! जंबुद्दीवे २ भारहे वासे इमीसे ओसप्पिणीए ममं एगवीसं वाससहस्साइं तित्थे अणुसज्जिस्सति।*

**मू. (७९८)** *जहा णं भंते! जंबुद्दीवे २ भारहे वासे इसीसे ओसप्पिणीए देवाणुप्पियाणं एक्कवीसं वाससहस्साइं तित्थं अणुसिज्जस्सति तहा णं भंते जंबुद्दीवे २ भारहे वासे आगमेस्साणं चरिमतित्थगरस्स केवतियं कालं तित्थे अणुसज्जिस्सति?*

*गोयमा! जावतिए णं उसभस्स अरहओ कोसलियस्स जिनपरियाए एवइयाणं संखेज्जाइं आगमेस्साणं चरिमतित्थगरस्स तित्थे अणुसज्जिस्सति॥*

**वृ.** 'आगमेस्साणं'ति आगमिष्यतां–भविष्यतां महापद्मादीनां जिनानां 'कोसलियस्स'त्ति कोशलदेशे जातस्य 'जिनपरियाए'त्ति केवलिपर्यायः स च वर्षसहस्रन्यूनं पूर्वलक्षमिति॥

**मू. (७९९)** *तित्थं भंते! तित्थं तित्थगरे तित्थं?, गोयमा! अरहा ताव नियमं तित्थकरे तित्थं पुण चाउवन्नाइन्ने समणसंघो, तं०–समणा समणीओ सावया सावियाओ॥*

**वृ.** तीर्थप्रस्तावादिदमाह–'तित्थं भंते!' इत्यादि, 'तीर्थं' सङ्घरूपं भदन्त! 'तित्थं'ति तीर्थशब्दवाच्यं उत तीर्थकरः 'तीर्थं' तीर्थशब्दवाच्यः? इति प्रश्नः, अत्रोत्तरम्–'अर्हन्' तीर्थकरस्तावत् 'तीर्थङ्करः' तीर्थप्रवर्त्तयिता न तु तीर्थं, तीर्थं पुनः 'चाउवन्नाइन्ने समणसंघे'त्ति चत्वारो वर्णा यत्र स चतुर्वर्णः स चासावाकीर्णश्चक्षमादिगुणैर्व्याप्तश्चतुर्वर्णाकीर्णः, क्वचित् 'चाउवन्ने समणसंघे'त्ति पठ्यते, तच्च व्यक्तमेवेति।

**मू. (८००)** *पवयणं भंते! पवयणं पावयणी पवयणं?, गोयमा! अरहा ताव नियमं पावयण पवयणं पुन दुवालसंगे गणिपिडगे तं०–आयारो जाव दिट्ठिवाओ।*

*जे इमे भंते! उग्गा भोगा राइन्ना इक्खागा नाया कोरव्वा एए णं अस्सिं धम्मे ओगाहंति अस्सिं २ अट्ठविहं कम्मरयमलं पवाहेंति पवा० तओ पच्छा सिज्झंति जाव अंतं करेंति?, हंता गोयमा! जे इमे उग्गा भोगा तं चेव जाव अंतं करेंति। अत्थेगइया अन्नयरेसु देवलोएसु देवत्ताए उववत्तारो भवंति।*

*कइविहा णं भंते! देवलोया पं?, गोयमा! चउव्विहा देवलोया पं० तं०–भवणवासी वाणमंतरा जोतिसिया वेमाणिया। सेवं भंते २ त्ति॥*

**वृ.** उक्तानुसार्येवाह–'पवयणं भंते!' इत्यादि प्रकर्षेणोच्यतेऽभिधियमनेनेति प्रवचनम्–आगमस्तद् भदन्त! 'प्रवचनं' प्रवचनशब्दवाच्यं काक्वाऽध्येतव्यम् उत 'प्रवचनी' प्रवचनप्रणेता जिनः प्रवचनं, दीर्घता च प्राकृतत्वात्।

प्राक् श्रमणादिसङ्घ इत्युक्तं श्रमणाश्चोग्रादिकुलोत्पन्ना भवन्ति ते च प्रायः सिद्धान्तीति दर्शयन्नाह–'जे इमे'इत्यादि, 'अस्सिं धम्मे'त्ति अस्मिन्नैर्ग्रन्थे धर्म्मे इति॥

शतकं–२० उद्देशकः–८ समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं–२० उद्देशकः–९ :—

**वृ.** अष्टमोद्देशकस्यान्ते देवा उक्तास्ते चाकाशचारिण इत्याकाशचारिद्रव्यदेवा नवमे प्ररूप्यन्ते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्—

**मू. (८०१)** *कइविहा णं भंते ! चारणा पन्नत्ता ?, गोयमा ! दुविहा चारणा पं० तं०–विज्ञाचारणा य जंघाचारणा य, से केणट्ठेणं भंते ! एवं वुच्चइ विज्ञाचारणा वि० ?, गोयमा ! तस्स णं छट्ठंछट्ठेणं अनिक्खित्तेणं तवोकम्मेणं विज्ञाए उत्तरगुणलद्धिं खममाणस्स विज्ञाचारणलद्धीनामं लद्धी समुप्पज्जइ, से तेणट्ठेणं जाव विज्ञाचार० ।*

*विज्ञाचारणस्स णं भंते कहं सीहा गती कहं सीहे गतिविसए प० ?, गोयमा ! अयन्नं जंबुद्दीवे २ जाव किंचिविसेसाहिए परिक्खेवेणं देवे णं महड्ढीए जाव महेसक्खे जाव इणामेवत्तिकट्टु केवलकप्पं जंबुद्दीवं २ तिहिं अच्छरानिवाएहिं तिक्खुत्तो अणुपरियट्टित्ता णं हव्वमागच्छेज्ञा ।*

*विज्ञाचारणस्स णं गोयमा ! तहा सीहा गती तहा सीहे गतिविसए प० ।*

*विज्ञाचारणस्स णं भंते ! तिरियं केवतियं गतिविसए प० ?, गो० ! से णं इओ एगेणं उप्पाएणं माणुसुत्तरे पव्वए समोसरणं करेति माणु० २ तहिं चेइयाइं वंदति तहिं २ बितिएणं उप्पाएणं नंदीसरवरे दीवे समोसरणं करेति नंदीस० २ तहिं चेइयाइं वंदति तहिं० २ तओ० २ इहमागच्छइ इहमा० २ इहं चेइयाइं वं० २ । विज्ञाचारणस्स णं गोयमा ! उड्ढं एवतिए गतिविसए प०, से णं तस्स ठाणस्स अना- लोइयपडिक्कंते कालं करेति नत्थि तस्स आराहणा, से णं तस्स ठाणस्स आलोइयपडिक्कंते कालं करेति अत्थि तस्स आराहणा ।*

**वृ.** 'कइ ण'मित्यादि, तत्र चरणं–गमनमतिशयदाकाशे एषामस्तीति चारणाः 'विज्ञाचारण'त्ति विद्या–श्रुतं तच्च पूर्वगतं तत्कृतोपकाराश्चारणा विद्याचारणाः, 'जंघाचारण'त्ति जङ्घाव्यापारकृतोपकाराश्चारणा जङ्घाचारणाः, इहार्थे गाथाः–

॥ १ ॥ "अइसयचरणसमत्था जंघाविज्ञाहिं चारणा मुणओ ।
जंघाहिं जाइ पढमो निस्सं काउं रविकरेवि ॥
॥ २ ॥ एगुप्पाएण तओ रुयगवरंमि उ तओ पडिनियत्तो ।
बीएणं नंदीसरमिहं तओ एइ तइएणं ॥
॥ ३ ॥ पढमेणं पंडगवनं बीउप्पाएण नंदणं एइ ।
तइउप्पाएण तओ इह जंघाचारणो एइ ॥
॥ ४ ॥ पढमेण माणुसोत्तरनगं स नंदिस्सरं विईएणं ।
एइ तओ तइएणं कयचेइयवंदणो इहयं ॥
॥ ५ ॥ पढमेण नंदनवणं बीउप्पाएण पंडगवनंमि ।
एइ इहं तइएणं जो विज्ञाचारणो होइ ॥

'तस्स णं'ति यो विद्याचारणो भविष्यति तस्य षष्ठंषष्ठेन तपःकर्म्मणा विद्यया च–पूर्वगतश्रुतविशेषरूपया करणभूतया 'उत्तरगुणलद्धिं'ति उत्तरगुणाः–पिण्डविशुद्ध्यादयस्तेषु चेह प्रक्रमात्तपो गृह्यते ततश्च 'उत्तरगुणलब्धिं' तपोलब्धिं 'क्षममाणस्य' अधिसहमानस्य तपः कुर्वत इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कहं सीहा गइ'त्ति कीदृशी शीघ्रा 'गति' गमनक्रिया 'कहं सीहे गइविसए'त्ति कीदृशः शीघ्रो गतिविषयः, शीघ्रत्वेन तद्विषयोऽप्युपचारात् शीघ्र उक्तः, 'गतिविषयः' गतिगोचरः ?, गमनाभावेऽपि शीघ्रगतिगोचरभूतं क्षेत्रं किम् ? इत्यर्थः, 'अयन्न'मित्यादि, अयं जम्बुद्वीप एवंभूतो भवति ततश्च 'देवेण'मित्यादि 'हव्वमागच्छेज्ञा' इत्यत्र यथा शीघ्राऽस्य देवस्य गतिरित्ययं वाक्यशेषो दृश्यः

**मू. (८०२)** *से केणट्टेणं भंते ! एवं वुच्चइ जंघाचारणे २ ?, गोयमा ! तस्स णं अट्ठमंअट्ठेणं अनिक्खित्तेणं तवोकम्मेणं अप्पाणं भावेमाणस्स जंघाचारणलद्धी नाम लद्धी समुप्पज्ञति, से तेणट्ठेणं जाव जंघाचारणे २ ।*

*जंघाचारणस्स णं भंते ! कहं सीहा गति कहं सीहे गतिविसए प० ?, गोयमा ! अयन्नं जंबुद्दीवे २ एवं जहेव विज्ञाचारणस्स नवरं तिसत्तखुत्तो अणुपरियट्टित्ताणं हव्वमागच्छेज्ञा जंघाचारणस्स णं गोयमा ! तहा सीहा गती तहा सीहे गतिविसए प० सेसं तं चेव ।*

*जंघाचारणस्स णं भंते ! तिरियं केवतिए गतिविसए प० ?, गोयमा ! से णं इओ एगेणं उप्पाएण रुयगवरे दीवे समोसरणं करेति रुयग० २ तहिं चेइयाइं वंदइ तहिं चे० २ तओ पडिनियत्तमाणे वितिएणं उप्पाएणं नंदीसरवरदीवे समोसरणं करेति नंदी० २ तहिं चेइयाइं वंदइ तहिं चेइयाइं वं २ इहमागच्छइ २ इहं चेइयाइं वंदइ, जंघाचारणस्स णं गो० ! तिरियं एवतिए गइविसए पं० ।*

*जंघाचारणस्स णं भंते ! उड्ढं केवतिए गतिविसए पन्नत्ते ?, गोयमा ! से णं इओ एगेणं उप्पाएणं नंदनवणे समोसरणं करे नंदनवने २ तहिं चेइयाइं वंदति तहिं २ इह आगच्छइ २ इह चेइयाइं वंदति । जंघाचारणस्स णं गोयमा ! उड्ढं एवतिए गतिविसए पं०, से णं तस्स ठाणस्स अनालोइ- यपडिक्कंते कालं करेइ नत्थि तस्स आराहणा से णं तस्स ठाणस्स आलोइयपडिक्कंते कालं करेति अत्थि तस्स आराहणा, सेवं भंते ! सेवं भंते ! जाव विहरइ ॥*

**वृ.** 'से णं तस्स ठाणस्से'त्यादि, अयमत्र भावार्थः—लब्ध्युपजीवनं किल प्रमादस्तत्र चासेविते अनालोचिते न भवति चारित्रस्याराधना, तद्विराधकश्च न लभते चारित्राराधनाफलमिति, यच्चेहोक्तं विद्याचारणस्य गमनमुत्पादद्वयेन आगमनं चैकेन जङ्घाचारणस्० तु गमनमेकेनागमनं च द्वयेनेति तल्लब्धिस्वभावात्, अन्ये त्वाहुः—विद्याचारणस्यागमनकाले विद्याऽभ्यस्ततरा भवतीत्येकेनागमनं गमने तु न तथेति द्वाभ्यां, जङ्घाचारणस्य तु लब्धिरुपजीव्यमानाऽल्पसामर्थ्या भतीत्यागमनं द्वाभ्यां गमनं त्वेकेनैवेति ॥

शतकं—२० उद्देशकः—९ समाप्तः

## —: शतकं—२० उद्देशकः—१० :—

**वृ.** नवमोद्देशके चारणा उक्तास्ते च सोपक्रमायुष इतरे च संभवन्तीति दशमे सोपक्रमादितया जीवा निरूप्यन्त इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्—

**मू. (८०३)** *जीवा णं भंते ! किं सोवक्कमाउया निरुवक्कमाउया ?, गोयमा ! जीवा सोवक्कमाउयावि निरवक्कमाउयावि ।*

*नेरइया णं पुच्छा, गोयमा ! नेरइया नो सोवक्कमाउया निरुवक्कमाउया, एवं जाव थ०*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पुढविक्काइया जहा जीवा, एवं जाव मणुस्सा, वाणमं० जोइसि० वेमा० जहा नेरइया ॥*

**वृ.** 'जीवा ण'मित्यादि, 'सोवक्कमाउय'त्तिउपक्रमणमुपक्रमः--अप्राप्तकालस्यायुषो निर्जरणं तेन सह यत्तत्सोपक्रमं तदेवंविधमायुर्येषां ते तथा तद्विपरीतास्तु निरुपक्रमायुषः, इह गाथे–

॥१॥ "देवा नेरइयावि य असंखवासाउया य तिरिमणुया।
उत्तमपुरिसा य तहा चरिमसरीरा निरुवकमा॥

॥२॥ सेसा संसारत्था हवेज्ञ सोवक्कमाउ इयरे य।
सोवक्कमनिरुवक्कमभेओ भणिओ समासेणं॥

–उपक्रमाधिकारादेवेदमाह–

***मू. (८०४)*** *नेरइया णं भंते! किं आओवक्कमेणं उववज्जंति परोवक्कमेणं उवव० निरुवक्कमेणं उववज्जंति ?, गोयमा ! आओवक्कमेणवि उवव० परोवक्कमेणवि उववज्जंति निरुवक्कमेणवि उववज्जंति एवं जाव वेमाणियाणं।*

*नेरइया णं भंते ! किं आओवक्कमेणं उववट्टंति परोवक्कमेणं उव० निरुवक्कमेणं उववट्टंति गोयमा ! नो आओवक्कमेणं उव्वट्टंति नो परोवक्कमेणं उवव० निरुवक्कमेणं उव्वट्टंति, एवं जाव थणियकुमारा, पुढविकाइया जाव मणुस्सा तिसु उव्व०, सेसा जहा नेरइ० नवरं जोइसिय-वेमाणिया चयंति।*

*नेरइया णं भंते ! किं आइड्डीए उवव० परिड्डीए उवव० ?, गोयमा ! आइड्डीए उवव० नो परिड्डीए उव० एवं जाव वेमाणियाणं। नेरइया णं भंते ! किं आइड्डीए उववट्टइ परिड्डीए उववट्टइ गोयमा ! आइड्डीए उव्व० नो परिड्डीए उव० एवं जाव वेमाणि०, नवरं जोइसियवेमाणि० चयंतीति अभिलावो।*

*नेर० भंते ! किं आयकम्मुणा उववज्जंति ? गो० ! आयकम्मुणा उवव० परकम्मुणा उवव० ? गो! आयकम्मुणा उवव० नोपरकम्मुणा उवव० एवंजाव वेमाणि०, एवंउव्वट्टणादंडओवि।*

*नेरइया णं भंते ! किं आयप्पओगेणं उववज्जइ परप्पओगेणं उवव० ?, गोयमा! आयप्पओगेणं उव० नो परप्पयोगेणं उ० एवं जाव वेमाणि०, एवं उव्वट्टणादंडओवि।*

**वृ.** 'नेरइए'इत्यादि, 'आओवक्कमेणं उववज्जंति'त्ति आत्मना–स्वयमेवायुष उपक्रम आत्मोपक्रमस्तेन मृत्वेति शेषः उत्पद्यन्ते नारकाः यथा श्रेणिकः, 'परोपक्रमेण' परकृतमरणेन यथा कूणिकः, 'निरुपक्रमेण' उपक्रमणाभावेन यथा कालशौकरिकः यतः सोपक्रमायुष्का इतरे च तत्रोत्पद्यन्त इति उत्पादोद्वर्त्तनाऽधिकारादिदमाह। 'नेरइए'इत्यादि।

'आइड्डीए'त्ति नेश्वरादिप्रभावेणेत्यर्थः 'आयकम्मुण'त्ति आत्मकृतकर्म्मणा–ज्ञाना-वरणादिना 'आयप्पओगेणं'ति आत्मव्यापारेण ॥ उत्पादिधिकारादिदमाह–

***मू. (८०५)*** *नेरइया णं भंते ! किं कतिसंचिया अकतिसंचिया अव्वत्तगसंचिया ? गोयमा! नेरइया कतिसंचियावि अकतिसंचियावि अव्वत्तगसंचियावि, से केण० जाव अव्वत्तगसंचया ?, गोयमा ! जे णं नेरइया संखेज्जएणं पवेसणएणं पविसंतति ते णं नेरइया कतिसंचिया जे णं नेरइया असंखेज्जएणं पवेसएणं पविसंति ते णं नेरइया अकतिसंचिया।*

*जे णं नेरइया एक्कएणं पवेसएणं पविसंति ते णं नेरइया अव्वत्तगसंचिया, से तेणट्ठेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोयमा! जाव अव्वत्तगसंचियावि, एवं जाव थणिय०, पुढविक्काइयाणं पुच्छा, गोयमा! पुढविकाइया नो कइसंचिया अकइसंचिया नो अव्वत्तगसं०, से केणट्ठेणं एवं वुच्चइ जाव नो अव्वत्तगसंचिया गोयमा! पुढविकाइया असंखेज्जएणं पवेसणएणं पविसंति से तेणट्ठेणं जाव नो अव्वत्तगसंचया, एवं जाव वणस्स०, बेंदिया जाव वेमाणि० जहा नेरइया।

सिद्धा णं पुच्छा, गोयमा! सिद्धा कतिसंचिया नो अकतिसंचया अव्वत्तगसंचियावि, से केणट्ठे० जाव अवत्तगसंचियावि ?, गो०! जे णं सिद्धा संखेज्जएणं पवेसणएणं पविसंति ते णं सिद्धा कतिसंचिया जे णं सिद्धा एक्कएणं पवेसणएणं पविसंति ते णं सिद्धा अव्वत्तगसंचिया। से तेणट्ठेणं जाव अव्वत्तगसंचियावि ॥

एएसि णं भंते! नेरइ० कतिसंचियाणं अकतिसंचियाणं अव्वत्तगसंचियाण य कयरे २ जाव विसेसा० ?, गोयमा! सव्वत्थोवा नेरइया अव्वत्तगसंचिया कतिसंचिया संखेज्जगुणा अकतिसंचिया असं० एवं एगिंदियवज्जाणं जाव वेमाणियाणं अप्पाबहुगं, एगिंदियाणं नत्थि अप्पाबहुगं।

एएसि णं भंते! सिद्धाणं कतिसंचियाणं अव्वत्तगसंचियाण य कयरे २ जाव विसेसाहिया वा ?, गो०! सव्वत्तोवा सिद्धा कतिसंचिया अवत्तगसंचिया संखेज्जगुणा।

नेरइयाणं भंते! किं छक्कसमज्जिया १ नोछक्कसमज्जिया २ छक्केण य नोछक्केण य समज्जिया ३ छक्केहि य समज्जियां ४ छक्केहि य नोछक्केण य समज्जिया ५ ?, गोयमा! नेरइया छक्कसमज्जियावि १ नोछक्कसमज्जियावि २ छक्केण य नोछक्केण य समज्जियावि ३ छक्केहि य समज्जियावि ४ छक्केहि य नोछक्केण य समज्जियावि ५।

से केणट्ठेणं भंते! एवं वुच्चइ नेरइया छक्कसमज्जियावि जाव छक्केहि य नोछक्केण य समज्जियावि गोयमा! जे णं नेरइया छक्कएणं पवेसणएणं पविसंति ते णं नेरइया छक्कसमज्जिया १ जे णं नेरइया जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचएणं पवेसणएणं पविसंति ते णं नेरइया नोछक्कसमज्जिया २ जे णं नेरइया एगेणं छक्कएणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचएणंपवेसणएणं पविसंति ते णं नेरइया छक्केहिं समज्जिया ४ जे णं नेरइया नेगेहिं छक्केहिं अन्नेण जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचएणं पवेसणएणं पविसंति ते णं नेरइया छक्केहिं य नोछक्केण य समज्जिया ५ से तेणट्ठेणं तं चेव जाव समज्जियावि, एवं जाव थणियकुमारा

\ पुढविकाइयाणं पुच्छा, गोयमा! पुढविकाइया नो छक्कसमज्जिया १ नो नोछक्कसमज्जिया २ नोछक्केण य समज्जिया ३ छक्केहिं समज्जियावि ४ छक्केहि य नोछक्केण य समज्जियावि ५।

से केणट्ठेणं जाव समज्जियावि ?, गोयमा! जे णं पुढविकाइया नेगेहिं छक्कएहिं पवेसणगं पविसंति ते णं पुढविकाइया छक्केहिं समज्जिया जे णं पुढविकाइया नेगेहिं छक्कएहि य अन्नेण य जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं पंचएणं पवेसणएणं पविसंति ते णं पुढविक्काइया छक्केहि य नोछक्केण य समज्जिया, से तेणट्ठेणं जाव समज्जियावि, एवं जाव वणस्सइकाइयावि, बेंदिया जाव वेमाणिया, सिद्धा जहा नेरइया।

एएसि णं भंते! नेरइयाणं छक्कसमज्जियाणं नोछक्कसमज्जियाणं छक्केण य नोछक्केण य समज्जियाणं छक्केहि य समज्जियाणं छक्केहि य नोछक्केण य समज्जियाणं कयरे २ जाव विसेसाहिया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा ?, गोयमा ! सव्वत्थोवा नेरइया छक्कसमज्जिया नोछक्कसमज्जिया संखेज्जगुणाछक्केण य नोछक्केण य समज्जिया संखेज्जहगुणा छक्केहि य समज्जिया असंखेज्जगुणा छक्केहि य नोछक्केण य समज्जिया संखेज्जगुणा एवं जाव थणियकुमारा ।

एएसि णं भंते ! पुढविकाइयाणं छक्केहिं समज्जियाणंछक्केहि य नोछक्केण य समज्जियाणं कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पुढविकाइया छक्केहिं समज्जिया छक्केहि य नोछक्केण य समज्जिया संखेज्जगुणा एवं जाव वणस्सइकाइयाणं, बेइंदियाणं जाव वेमाणियाणं जहा नेरइयाणं ।

एएसि णं भंते ! सिद्धाणं छक्कसमज्जियाणं नोछक्कसमज्जियाणं जाव छक्केहि य नोछक्केण य समज्जियाण य कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा सिद्धा छक्केहि य नोछक्केण य समज्जिया छक्केहिं समज्जिया संखज्जगुणा छक्केण य नोछक्केण य समज्जिया संखेज्जगुणा छक्कसमज्जिया संखेज्जगुणा नोछक्कसमज्जिया संखेज्जगुणा ।

नेरइया णं भंते ! किं बारससमज्जिया १ नोबारसमज्जिया २ बारसएण य नोबारसएण य समज्जिया ३ बारसएहिं समज्जिया ४ बारसएहिं नोबारसएण य समज्जियावि ५ ?, गोयमा ! नेरतिया बारससमज्जियावि जाव बारसएहि य समज्जियावि, से केणट्ठेणं जाव समज्जियावि ।

गोयमा ! जे णं नेरइया बारसएणं पवेसणएणं पविसंति ते णं नेरइया बारसमज्जिया १ जे णं नेरइया जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं एक्कारसएणं पवेसणएणं पविसंति ते णं नेरइया नोबारससमज्जिया २ जे णं नेरइया बारसएणं अन्नेण य जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं एक्कारसएणं पवेसणएणं पविसंति ते णं नेरइया बारसएण य नोबारसएण य समज्जिया ३ ।

जे णं नेरइया नेगेहिं बारसएहिं पवेसणगं पविसंति ते णं नेरतिया बारसएहिं समज्जिया ४ जे णं नेरइया नेगेहिं बारसएहिं अन्नेण य जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं एक्कारसएणं पवेसणएणं पविसंति ते णं नेरइया बारसएहि य नोबारसएण य समिज्जिया ५ । से तेणट्ठेणं जाव समज्जियावि, एवं जाव थणियकुमारा ।

पुढविक्काइयाणं पुच्छा गोयमा ! पुढविकाइया नोबारससमज्जिया १ नो नोबारससमज्जिया २ नो बारसएण य समज्जिया ३ बारसएहिं समज्जिया ४ बारसेहि य नो बारसेण य समज्जियावि ५, से केणट्ठेणं जाव समज्जियावि २ नो बारसएण य समज्जिया ३ बारसएहिं समज्जिया ४ बारसेहि य नो बारसेण य समज्जियावि ५, केणट्ठेणं जाव समज्जियावि ?

गोयमा ! जे णं पुढविकाइया नेगेहिं बारसएहिं पवेसणगं पविसंति ते णं पुढविकाइया बारसएहिं समज्जिया जे णं पुढविकाइया नेगेहिं बारसएहिं अन्नेण य जहन्नेणं एक्कण वा दोहिं वा तीहिं वा उक्कोसेणं एक्कारसएणं पवेसणएणं पविसंति ते णं पुढविकाइया बारसएहिं नोबारसएण य समज्जिया से तेणट्ठेणं जाव समज्जियावि, एवं जाव वणस्सइकाइया ।

बेइंदिया जाव सिद्धा जहा नेरइया । एएसि णं भंते ! नेरतियाणं बारससमज्जियाणं० सव्वेसि अप्पाबहुगं जहा छक्कसमज्जियाणं नवरं बारसाभिलावो सेसं तं चेव । नेरतिया णं भंते ! किं चुलसीतिसमज्जिया नोचुलसीतिसमज्जिया २ चुलसीते य नोचुलसीते य समज्जिया ३ चुलसीतीहिं समज्जिया ४ चुलसीतीहि य नोचुलसीतीए समज्जिया ५ ? गोयमा ! नेरतिया चुलसीतीए समज्जियावि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जाव चुलसीतीहि य नोचुलसीतिए य समज्जियावि ।*

*से केणट्ठेणं भंते ! एवं वुच्चइ जाव समज्जियावि ?, गोयमा ! जे णं नेरइया चुलसीतीएणं पवेसणएणं पविसंति ते णं नेरइया चुलसीतिसमज्जिया १ जे णं नेरइया जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं तेसीतीपवेसणएणं पविसंति ते णं नेरइया नोचुलसीतिसमज्जिया २ जे णं नेरइया चुलसीतीएणं अन्नेण य जहन्नेणं एक्केण वा दोहिं वा तीहिं वा जाव उक्कोसेणं तेसीतीएणं पेसणएणं पविसंति ते णं नेरतिया चुलसीतीए नोचुलसीतिएण य समज्जिया ३ ।*

*जे णं नेरइया नेगेहिं चुलसीतीएहि पवेसणगं पविसंति ते णं नेरतिया चुलसीतीएहिं समज्जिया ४ जे णं नेरइया नेगेहिं चुलसीतिएहिं अन्नेण य जहन्नेणं एक्केण वा जाव उक्कोसेणं तेसीइएणं जाव पवेसणएणं पविसंति ते णं नेरतिया चलुसीतीहि य नोचुलसीतिए य समज्जिया ५, से तेणट्ठेण जाव समज्जियावि, एवं जाव थणियकुमारा ।*

*पुढविक्काइया तहेव पच्छिल्लएहिं दोहिं २ नवरं अभिलावो चुलसीतीओभंगो एवं जाव वणस्सइकाइया, बेंदिया जाव वेमाणिया जहा नेरतिया । सिद्धा णं पुच्छा, गोयमा ! सिद्धा चुलसीतिसमज्जियावि १ नो चुलसीतिसमज्जियावि २ चुलसीते य नोचुलसीतीए समज्जियावि ३ नोचुलसीतीहिं समज्जिया ४ नोचुलसीतीहि य नोचुलसीतीए य समज्जिया ५ ।*

*से केणट्ठेणं जाव समज्जिया ?, गोयमा ! जे णं सिद्धा चुलसीतीएणं पवेसणएणं पविसंति ते णं सिद्धा चुलसीतिसमज्जिया जे णं सिद्धा जहन्नेणं एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं तेसीतीएणं पवेसणएणं पविसंति ते णं सिद्धा नोचुलसीतिसमज्जिया, जे णं सिद्धा चुलसीयएणं अन्नेण य जह० एक्केण वा दोहिं वा तीहिं वा उक्कोसेणं तेसीएणं पवेसणएणं पविसंति ते णं सिद्धा चुलसीतीए य नोचुलसीतीए य समज्जिया, से तेणट्ठेणं जाव समज्जिया ।*

*एएसि णं भंते ! नेरतियाणं चुलसीतिसमज्जियाणं नोचुलसी० सव्वेसिं अप्पाहुगं जहा छक्कसमज्जियाणं जाव वेमाणियाणं नवरं अभिलावो चुलसीतिओ । एएसि णं भंते ! सिद्धाणं चुलसीतिसमज्जियाणं नोचुलसीतिसमज्जियाणं चुलसीतीए नोचुलसीतीए य समज्जियाणं कयरे २ जाव विसेसा० ?, गोयमा ! सव्वत्थोवा सिद्धा चुलसीतीए य नोचुलसीतीए य समज्जिया चुलसीतीसमज्जिया अनंतगुणा नोचुलसीतिसमज्जिया अनंतगुणा ।*

*सेवं भंते ! २ त्ति जाव विहरइ ॥*

**वृ.** 'नेरइए'त्यादि, 'कइसंचिय'त्ति कतीति सङ्ख्यावाची ततश्च कतित्वेन सञ्चिताः –एकसमये सङ्ख्यातोत्पादेन पिण्डिताः कतिसञ्चिताः, एवम् 'अकइसंचिय'त्ति नवरम् 'अकइ'त्ति सङ्ख्यानिषेधः–असङ्ख्यातत्वमनन्तत्वं चेति, 'अव्वत्तगसंचिय'त्ति द्वयादिसङ्ख्याव्यवहारतः शीर्षप्रहेलिकायाः परतोऽसङ्ख्याव्यवहारतश्च सङ्ख्यातत्वेनासङ्ख्यातत्वेन च वक्तुं न शक्यतं सावक्तव्यः स चैकक्सेतनावक्तव्येन–एककेन एकत्वोत्पादेन सञ्चिता अवक्तव्यसञ्चिताः, तत्र नारकादयास्त्रिवधा अपि एकसमयेन तेषामेकादीनासङ्ख्यातान्तानामुत्पाद्, पृथिवीकायिकादय ५ ।

स्त्वकतिसञ्चिता एव, तेषां समयेनासङ्ख्यातत्तामेव प्रवेशाद्, वनस्पतयस्तु यद्यप्यनन्ता उत्पद्यन्ते तथाऽपि प्रवेशनकं विजातीयेभ्य आगतानां यस्तत्रोत्पादस्तद्विवक्षितं, असङ्ख्याता एव विजातीयेभ्य उद्वृत्तास्तत्रोत्पद्यन्त इति सूत्रे उक्तम् 'एवं जाव वणस्सइकाइय'त्ति, सिद्धा

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

नो अकतिसञ्चित अनन्तानामसङ्ख्यातानां वा तेषां समयेनासम्भवादिति।

एषामेवाल्पबहुत्वं चिन्तयन्नाह 'एएसी'त्यादि, अवक्तव्यकसञ्चिताः स्तोकः अवक्तव्यकस्थानस्यैकत्वात्, कतिसञ्चिताः असङ्ख्यातगुणाः, सङ्ख्यातत्वात् सङ्ख्यातस्थानकानाम्, अकतिसञ्चितास्त्वसङ्ख्यातगुणाः असङ्ख्यातस्थानकानामसङ्ख्यातत्वादित्येके, अन्ये त्वाहुः–वस्तुस्वभावोऽत्र कारणं न तु स्थानकाल्पत्वादि कथमन्यथा सिद्धाः कतिसञ्चिताः स्थानकबहुत्वेऽपि स्तोका अवक्तव्यकस्थानकस्यैकत्वेऽपि सङ्ख्यातगुणा द्वयादित्वेन केवादिनामल्पानामायुःसमाप्तेः इयं च लोकस्वभावादेवेति।

नारकाद्युत्पादविशेषणभूतसङ्ख्याऽधिकारादिदमाह–'नेरइया ण'मित्यादि 'छक्कसमज्जिय'त्ति षट् परिमाणमस्येति षट्कं वृन्दं तेन समर्जिताः–पिण्डिताः षट्कसमर्जिताः, अयमर्थः–एकत्र समये ये समुत्पद्यन्ते तषां यो राशि स षट्प्रमाणो यदि स्यात्तदा ते षट्कसमर्जिता उच्यन्ते १ 'नोछक्कसमज्जिय'त्ति शेषट्कंषट्काभावः ते चैकादयः पञ्चान्तास्तेन नोषट्केन–एकाद्युत्पादेन ये समर्जितास्ते तथा २ तथा 'छक्केण य नोछक्केण समज्जिय'त्ति एकत्र समये येषां षट्कमुत्पन्नमेकाद्यधिकं ते षट्केन नोषट्केन च समर्जिता उक्ताः 'छक्केहि य समज्जिय'त्ति एकत्र समये येषां बहूनि षट्कान्युत्पन्नानि ते षट्कैः समर्जिता उक्ताः ४ तथा 'छक्केहि य नोछक्केण य समज्जिय'त्ति एकत्र समये यषां बहूनि षट्कान्येकाद्यधिकानि ते षट्कैः नोषट्केन च समर्जिताः, एते पञ्च विकल्पाः, इह च नारकादीनां पञ्चापि विकल्पाः संभवन्ति एकादीनासमङ्ख्यातान्तानां तेषां समयेनोत्पत्तेः।

असङ्ख्यातेष्वपि च ज्ञानिनः षट्कानि व्यवस्थापयन्तीति, एकन्द्रियाणां त्वसङ्ख्यातानामेव प्रवेशनात् षट्कैः समर्जिताः, तथा षट्कैर्नोषट्केन च समर्ज्जिता इति विकल्पद्वयस्यैव सम्भव इति, अत एवाह–'पुढविक्काइयाण'मित्यादि। एषामल्पबहुत्वचिन्तायां नारकादयः स्तोका आद्याः, षट्कस्थानस्यैकत्वात्, द्वितीयास्तु सङ्ख्यातगुणाः, नोषट्कस्थानानां बहुत्वात्, एवं तृतीयचतुर्थपञ्चमेषु स्थानबाहुल्यात्सूत्रोक्तं बहुत्वमवसेयमित्येके अन्ये तु वस्तुस्वभावादित्याहुरिति एवं द्वादश सूत्राणि चतुरशीतिसूत्राणि चेति॥

शतकं–२० उद्देशकः–१० समाप्तः

॥१॥　विंशतितमशतकमलं विकाशितं वृद्धवचनरविकिरणैः।
विवरणकरणद्वारेण सेवितं मधुलिहेव मया॥

**शतकं–२० समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे**
**वींशतितमशतकस्य अभयदेवसुरिविरचिता टीका परिसमाप्ता।**

## शतकं–२१

**वृ.** व्याख्यातं विंशतितमशतम्, अथावसरायातमेकविंशतितममारभ्यते, अस्य चावावेवोद्देशकवर्गसङ्ग्रहायेयं गाहा–

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

*मू. (८०६) सालि कल अयसि वंसे इक्खू दब्भे य दब्भ तुलसीय।*
*अट्ठेए दस वग्गा असीतिं पुण होंति उद्देसा।*

**वृ.** 'साली'त्यादि सूत्रम्, 'सालि'त्ति शाल्यादिधान्यविशेषविषयोद्देशकदशात्मकः प्रथमो वर्ग सालिरेवोच्यते, एवमन्यत्रापीति, उद्देशकदशकं चैवं—

॥१॥ "मूले १ कंदे २ खंधे ३ तया य ४ साले ५ पवाल ६ पत्ते य ७।
पुप्फे ८ फल ९ बीए १० बिय एक्केक्को होइ उद्देसो ॥" इति

'कल'त्ति कलायादिधान्यविषयो द्वितीयः २ 'अयसि'त्ति अतसीप्रभृतिधान्य-विषयस्तृतीयः ३ 'वंसे'त्ति वंशादिपर्वगविशेषविषयश्चतुर्थः ४ 'इक्खु'त्ति इक्ष्वादिपर्वगविशेषविषयः पञ्चमः ५

'दब्भे'त्ति दर्भशब्दस्योपलक्षणार्थत्वात् 'सेडियभंडियकोन्तियदब्भे' इत्यादितृणभेदविषयः षष्ठः ६ 'अब्भे'त्ति वृक्षे समुत्पन्नो विजातीयो वृक्षविशेषोऽध्यवरोहकस्तत्प्रभृतिशाकप्रायवनस्पति-विषयः सप्तमः ७ 'तलसी य'त्ति तुलसीप्रभृतिवनस्पतिविषयोऽष्टमो वर्ग ८ 'अट्ठेते दसवग्ग'त्ति अष्टावेतेऽनन्तरोक्ता दशानां दसानामुद्देशकानां सम्बन्धिनो वर्गासमुदाया दशवर्गा अशीति पुनरुद्देशका भवन्ति, वर्गे वर्गे उद्देशकदशकभावादिति, तत्र प्रथमवग्रस्तत्रापि च प्रथम उद्देशको व्याख्यायते।

## —: शतकं—२१ वर्ग—१ उद्देशकः—१ :—

*मू. (८०७) रायगिहे जाव एवं वयासी—अह भंते! साली वीही गोधूमजवजवाणं एएसि णं भंते! जीवा मूतताए वक्कमंति ते णं भंते! जीवा कओहिंतो उव० किं नेरइएहिंतो उव० तिरि० मणु० देव० जहा वक्कंतीए तहेव उववाओ नवरं देववज्जं।*

*ते णं भंते! जीवा एगसमएणं केवतिया उववज्जंति?, गोयमा! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्ञा वा असंखेज्ञा वा उववज्जंति, अवहारो जहा उप्पलुद्देसे, तेसि णं भंते जीवाणं केमहालिया सरीरोगाहणा प०?, गोयमा! जहन्नेणं अंगुलस्स असंखेज्जइ भागं उक्कोसेणं धनुहपुहुत्तं, ते णं भंते जीवा! नाणावरणिज्ञस्स कम्मस्स किं बंधगा अबंधगा? जहा उप्पलुद्देसे, एवं वेदेवि उदएवि उदीरणाएवि।*

*ते णं भंते! जीवा किं कण्हलेस्सा नील० काउ० छव्वीसं भंगा दिट्ठी जाव इंदिया जहा उप्पलुद्देसे, ते णं भंते! सालीवीही गोधूम जवजवगमूलगजीवे कालओ केवचिरं होंति?, गोयमा जह० अंतोमु० उक्कोसे० असंखेज्जं कालं।*

*से णं भंते! साली वीही गोधूमजवजवगमूलगजीवे पुढवीजीवे पुनरवि सालीवीही जाव जवजवगमूलगजीवे केवतियं कालं सेवेज्ञा?, केवतियं कालं कतिरागतिं करिज्ञा?, एवं जहा उप्पलुद्देसे। एएणं अभिलावेणं जाव मणुस्सजीवे आहारो जहा उप्पलुद्देसे ठिती जह० अंतोमु० उक्कोसे० वासपुहुत्तं समुग्घायसमोहया उव्वट्टणा य जहा उप्पलुद्देसे।*

*अह भंते! सव्वपाणा जाव सव्वसत्ता साली वीही जाव जवजवगमूलगजीवत्ताए उववन्नपुव्वा?, हंता गोयमा! असतिं अदुवा अनंतखुत्तो। सेवं भंते! २ त्ति॥*

**वृ.** तस्य चेदमादिसूत्रम्—'रायगिहे' इत्यादि, 'जहा वक्कंतीए'त्ति यथा 'प्रज्ञापनायाः षष्ठपदे, तत्र चैवमुत्पादो—नो नारकेभ्य उत्पद्यन्ते किन्तु तिर्यग्मनुष्येभ्यः, तथा व्युत्क्रान्तिपदे देवानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनस्पतिषूत्पत्तिरुक्ता इह तु सा न वाच्या मूले देवानामनुत्पत्तेः पुष्पादिष्वेव शुभेषु तेषामुत्पत्तेरत एवोक्तं 'नवरं देववज्जं' ति । 'एक्को वे'त्यादि, यद्यपि सामान्येन वनस्पतिषु प्रतिसमयमनन्ता उत्पद्यन्त इत्युच्यते तथाऽपीह शाल्यादीनां प्रत्येकशरीरत्वादेकाद्युत्पत्तिर्न विरुद्धेति । 'अवहारो जहा उप्पलुद्देसए' त्ति उत्पलोद्देशक एकादशशतस्य प्रथमस्तत्र चापहार एवं ।

'ते णं भंते ! जीवा समये २ अवहीरमाणा २ केवतिकालेणं अवहीरंति ? गोयमा ! तेणं असंखेज्जा समए २ अवहीरमाणा २ असंखेज्जाहिं उस्सप्पिणीहिं अवसप्पिणीहिं अवहीरंति नो चेव णं अवहिया सिय' त्ति 'ते णं भंते ! जीवा नाणावरणिज्जस्स कम्मस्स किं बंधगा अबंधगा ?' इतः परं यदुक्तं 'जहा उप्पलुद्देसए' त्ति अनेनेदं सूचितं-'गोयमा ! नो अबंधगा बंधए वा बंधगा वे' त्यादि, एवं वेदोदयोदीरणा अपि वाच्याः, लेश्यासु तु तिसृषु षड्विंशतिर्भङ्गाः-एकवचनान्तत्वे ३ बहुवचनान्तत्वे ३तथा त्रयाणां पदानां त्रिषु द्विकसंयोगेषु प्रत्येकं चतुर्भङ्गिकाभावाद् द्वादश एकत्र च त्रिकसंयोगेऽष्टाविति षड्विंशतिरिति ।

'दिट्ठी' त्यादि, दृष्टिपदादारभ्येन्द्रियपदं यावदुदुत्पलोद्देशकवन्नेयं, तत्र दृष्टौ मिथ्यादृष्टयस्ते ज्ञानेऽज्ञानिनः योगे काययोगिनः उपयोगे द्विविधोपयोगाः, एवमन्यदपि तत एव वाच्यं ।

'से णं भंते' इत्यादिना 'असंखेज्जं काल' मित्येतदन्तेनानुबन्ध उक्तः, अथ कायसंवेधमाह-'से ण' मित्यादि, 'एवं जहा उप्पुलुद्देसए' त्ति, अनेन चेदं सूचितं-'गोयमा ! भवादेसेणं जहन्नेणं दो भवग्गहणाइं उक्कोसेणं असंखेज्जाइं भवग्गहणाइं कालादेसेणं जहन्नेणं दो अंतोमुहुत्ता उक्कोसेणं असंखेज्जं काल' मित्यादि, 'आहारो जहा उप्पलुद्देसए' त्ति एवं चासौ-

'ते णं भंते ! जीवा किमाहारमाहारेंति ?, गोयमा ! दव्वओ अनतपएसियाइं' इत्यादि, 'समुग्घए' इत्यादि, अनेन च यत्सूचितं तदर्थलेशोऽयं-तेषां जीवानामाद्यास्त्रयः समुद्घातास्तथा मारणान्तिकसमुद्घातेन समवहता म्रियन्ते असमवहता वा, तथोद्वृत्तास्ते तिर्यक्षु मनुष्येषु चोत्पद्यन्त इति

शतकं-१ वर्गः-१ उद्देशकः-१ समाप्तः

## -: शतकं-१ वर्गः-१ उद्देशकः-२ :-

**मू. (८०८)** *अह भंते ! साली वीही जाव जवजवाणं एएसि णं जे जेवी कंदत्ताए वक्कमंति ते णं भंते ! जीवा कओहिंतो उववज्जंति एवं कंदाहिकारेण सच्चेव मूलुद्देसो अपरिसेसो भाणियव्वो जाव असतिं अदुवा अनंतखुत्तो सेवं भंते २ ति ।*

## शतकं-१ वर्गः-१-उद्देशकाः-३...१० :-

**मू. (८०९)** *एवं खंधेवि उद्देसओ नेयव्वो ।*

**मू. (८१०)** *एवं तयाएवि उद्देसो भाणियव्वो ॥*

**मू. (८११)** *सालेवि उद्देसो भाणियव्वो ॥*

**मू. (८१२)** *पवालेवि उद्देसो भाणियव्वो ॥*

**मू. (८१३)** *पत्तेवि उद्देसो भाणियव्वो ॥*

**मू. (८१४)** *एएसत्तवि उद्देसगा अपरिसेसं जहा मूले तहा नेयव्वा ॥*

*एवं पुप्फेवि उद्देसओ नवरं देवा उववज्जंति जहा उप्पलुद्देसे चत्तारि लेस्साओ असीति भंगा ओगाहणा जह० अंगुलस्स असंखेज्जइभागं उक्कोसेणं अंगुलपुहुत्तं सेसं तं चेव सेवं भंते ! २*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जहा पुप्फे एवं फलेवि उद्देसओ अपरिसेसो भाणियव्वो ।। एवं बीएवि उद्देसओ ।।*

**–: शतकं–२१ वर्गः–२ :–**

**मू. (८१५)** *अह भंते ! कलायमसूरतिलमुग्गमासनिप्फावकुलत्थआलिसंदगसडिण–पलिमंथगाणं एएसि णं जे जीवा मूलत्ताए वक्कमंति ते णं भंते ! जीवा कओहिंतो उवव० ? एवं मूलादीया दस उद्देसगा भाणियव्वा जहेव सालीणं निरवसेसं तं चेव ।।*

**–: शतकं–२१ वर्गः–३ :–**

**मू. (८१६)** *अह भंते ! अयसिकुसुंभकोद्दवकंगुरालगतुवरीकोदूसासणसरिसवमूलगबीयाणं एएसि णं जे जीवा मूलत्ताए वक्कमंति ते णं भंते ! जीवा कओहिंतो उववज्जंति ? एवं एत्थवि मूलादीया दस उद्देसगा जहेव सालीणं निरवसेसं तहेव भाणियव्वं ।।*

**–: शतक–२१ वर्गः–४ :–**

**मू. (८१७)** *अह भंते ! वंसवेणुकणककक्कवंसवारुवंसदंडाकुडाविमाचंडावेणुयाकल्ला–णीणं एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं एत्थवि मूलादीया दस उद्देसगा जहेव सालीणं, नवरं देवो सव्वत्थवि न उववज्जति, तिन्नि लेसाओ सव्वत्थवि छव्वीसं भंगा सेसं तं चेव ।।*

**–: शतकं–२१ वर्गः–५ :–**

**मू. (८१८)** *अह भंते ! उक्खुइक्खुवाडियावीरणाइक्कडभमाससुंठिसत्तवेत्ततिमिरसत–पोरगनलाणं एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं जहेव वंसवग्गो तहेव एत्थवि मूलादीया दस उद्देसगा, नवरं खंधुद्देसे देवा उववज्जंति, चत्तारि लेसाओ सेसं तं चेव ।।*

**–: शतकं–२१ वर्गः–६ :–**

**मू. (८१९)** *अह भंते! सेडियभंडियदब्भकोतियदब्भकुसदब्भगयोइदलअंजुलआसाढ–गरोहियंसमुतवखीरभुसएरिंडकुरुभकुंदकरवरसुंठविभंगमंगुमहु वणथुरगसिप्पियसुंकलितणाणं एसि णं जे जीवा मूलत्ताए वक्कमंति एवं एत्थवि दस उद्देसगा निरवसेसं जहेव वंसस्स ।।*

**–: शतकं–२१ वर्गः–७ :–**

**मू. (८२०)** *अह भंते ! अब्भरुहवोयाणहरिगतगतंदुलेज्जगतणवत्थुलचोरगम–ज्जारयाईचिल्लियालक्कदगपिप्पलियदव्विसोत्थिकसायमंडुक्किमूलगसिसवअंबिलसागजिवंतगाणं एएसि णं जे जीवा मूल एवं एत्थवि दस उद्देगा जहेव वंसस्स ।।*

**–: शतकं–२१ वर्गः–८ :–**

**मू. (८२१)** *अह भंते ! तुलसीकण्हदलफणेज्जाअज्जाचूयणाचोराजीरादमणामरुयाइं दीवरसयपुप्फा णं एएसिणं जे जीवा मूलत्ताए वक्कमंति एत्थवि दस उद्देसगा निरवसेसं जहा वंसाणं ।। एवं एएसु अट्ठसु वग्गेसु असीतिं उद्देसगा भवंति ।।*

**वृ.** एवं समस्तोऽपि वर्गः सूत्रसिद्धः, एवमन्येऽपि नवरमशीतिर्भङ्गा एवं–चतसृषु लेश्यास्वेकत्वे ४ बहुत्वे ४ तथा पदचतुष्टये षट्सु द्विकसंयोगेषु प्रत्येकं चतुर्भङ्गिकासद्भावात् २४ तथा चतुर्षु त्रिकसंयोगेषु प्रत्येकमष्टानां सद्भावात् ३२ चतुष्कसंयोगे च १६ एवमशीतिरिति।

इह चेयमवगाहनाविशेषाभिधायिका वृद्धोक्ता गाथा–

॥१॥ "मूले कंदे खंधे तयाय साले पवाल पत्ते य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तसुवि घनुपुहुत्तं अंगुलिमो पुप्फफलबीए ।।" इति

शतकं-२१ वर्गा १-८ समाप्तः

एकविंशं शतं प्रायो, व्यक्तं तदपि लेशतः ।
व्याख्यातं सद्गुणाधायी, गुडक्षेपो गुडेऽपि यत् ।।

**शतकं-२१ समाप्तम्**

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे एकविंशतिशतकस्य अभयदेवसूरि विरचिता टीका परिसमाप्ता ।**

## शतकं-२२

**वृ.** व्याख्यातमेकविंशतितमं शतम्, अथ क्रमायातं द्वाविंश व्याख्यायते, तस्य चादावेवोद्देशकवर्गसङ्ग्रहायेयं गाथा-

**मू. (८२२)** *तालेगट्ठियबहुबीयगा य गुच्छा य गुम्म वल्ली य ।*
*छद्दस वग्गा एए सट्ठिं पुण होंति उद्देसा ।*

**-: शतकं-२२ वर्गः-१:-**

**मू. (८२३)** *रायगिहे जाव एवं वयासी-अह भंते ! तालतमालतक्कलितेतेतलिसालसरलासारगल्लाणं जाव केवतिकदलचम्मरुक्खगुंतरुक्खहिंगुरुक्खलवंगरुक्ख- पूयफलखज्जूरिनालएरीणं एएसि णं जे जीवा मूलत्ताए वक्कमंति ते णं भंते ! जीवा कओहिंतो उववज्जंति ।*

*एवं एत्थवि मूलादीया दस उद्देसगा कायाव्वा जहेव सालीणं, नवरं इमं नाणत्तं मूले कंदे खंधे तयाय साले य एएसु पंचसु उद्देसगेसु देवो न उववज्जंति, तिन्नि लेसाओ, ठिती जहन्नेणं अंतोमु० उक्कोसेणं दसवाससहस्साइं, उवरिल्लेसु पंचसु उद्देसएसु देवो उववज्जति ।*

*चत्तारि लेसाओ ठिती जहन्नेणं अंतोमु० उक्कोसेणं वासपुहुत्तं ओगाहणा मूले कंदे घनुहपुहुत्तं खंधे तयाय साले य गाउयपुहुत्तं पवाले पत्ते घनुहपुहुत्तं, पुप्फे हत्थपुहुत्तं, फले बीए य अंगुलपुहुत्तं, सव्वेसिं जहन्नेणं अंगुलस्स असंखेज्जइभागं सेसं जहा सालीणं, एवं एए दस उद्देसगा ।*

**-: शतकं-२२ वर्गः-२ :-**

**मू. (८२४)** *अह भंते ! निबंबजंबुकोसंबतालअंकोल्लपीलुसेलुसल्लइमोयइमालुयचउलपलासकरंजपुत्तंजीवगरिट्ठवहेडगहरितगभल्लायउंबरियखीरणि धायईपियालपूइयणिवायगसेण्हयपासियसीसवअयसिपुन्नागनागरुक्खसीवन्नअसोगाण ।*

*एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं मूलादीया दस उद्देसगा कायव्वा निरवसेसं जहा तालवग्गो ।।*

**-: शतकं-२२ वर्गः-३ :-**

**मू. (८२५)** *अहं भंते ! अत्थियातिंदुयबोरकविट्ठअंबाडगमाउंलिंगबिल्लआमलगफणसदाडिमआसत्थउंबरवडणग्गोहनंदिरुक्खपिप्पलिसतरपिलक्खुरुक्खाउंबरियकुच्छंभरियदेवदालितिलगलउयछत्तेहसिरीससत्तवन्नदहिवन्नलोद्धधवचंदणअज्जुणणीवकुडुगकलंबाणं एएसि णं जे जीवा मूलत्ताए वक्कमंति ते णं भंते ! एवं एत्थवि मूलादीया दस उद्देसगा तालवग्गसरिसा नेयव्वा जाव बीयं ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: शतकं—२२ वर्गः—४ :—

**मू. (८२६)** *अह भंते ! वाइंगणिअल्लइपोडइ एवं जहा पन्नवणाए गाहाणुसारेणं नेयव्वं जाव गंजपाडलवासिअंकोल्लाणं एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं एत्थवि मूलादीया दस उद्देसगा तालवग्गसीसा नेयव्वा जाव बीयंति निरवसेसं जहा वंसवग्गो ॥*

## —: शतकं—२२ वर्गः—५ :—

**मू. (८२७)** *अह भंते ! सिग्विकाणवनालियकोरंटगबंधुजीवग मणोज्ञा जहा पन्नवणाए पढमपदे गाहाणुसारेणं जाव नलणी य कुंदमवजाईणं एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं एत्थवि मूलादीया दस उद्देसगा निरवसेसं जहा सालीणं ॥*

## —: शतकं—२२ वर्गः—६ :—

**मू. (८२८)** *अह भंते ! पूसफलिकालिंगीतुंबीतउसीएलावालुंकी एवं पदाणि छिंदियाणि पन्नवणागाहाणुसारेणं जहा तालवग्गे जाव दधिफोल्लइकाकलिसोक्कलिअक्कबोंदीणं एएसि णं जे जीवा एलत्ताए वक्कमंति एवं मूलादीया दस उ० कायव्वा जहा तालवग्गो नवरं फलउद्देसे ओगाहणाए जहन्ने० अंगुल० असंखे० भागं उक्को धनुहपुहुत्तं ठिती सव्वत्थ जहन्नेणं अंतोमु० उक्कोसेणं वासपुहुत्तं सेसं तं चेव ॥ एवं छसुवि वग्गसु सट्ठि उद्देसगा भन्नंति ॥*

**वृ.** 'ताले'त्यादि, तत्र 'ताले'त्ति ताडतमालप्रभृतिवृक्षविशेषविषयोद्देशकदशकात्मकः प्रथमो वर्गः, उद्देशकदशकं च मूलकन्दादिविषयभेदात् पूर्ववत् ।

'एगट्ठिय'त्ति एकमस्थिकं फलमध्ये येषां ते तथा, ते निम्बाम्रजम्बूकौशाम्बादयस्ते द्वितीये वाच्याः । 'बहुबीयगा य'त्ति बहूनि बीजानि फलानि येषां ते तथा, ते चात्थिकतेन्दुकबदरकपित्थादयो वृक्षविशेषास्ते तृतीये वाच्याः ।

'गुच्छा य'त्ति गुच्छा—वृन्ताकीयप्रभृतयस्ते चतुर्थे वाच्याः 'गुम्म'रि गुल्माः सिरियकनवमालिकाकोरण्टकादयस्ते पञ्चमे वाच्याः 'वल्लीय'त्ति वल्यः पुंफलीकालिङ्गीतुम्बीप्रभृतयस्ताः षष्ठे च वाच्या ।

इत्येवं षष्ठवर्गो वल्लीत्यभिधीयते 'छद्दसवग्गा एए'ति षड्दशोद्देशकप्रमाणा वर्गा 'एते' अनन्तरोक्ताः अत एव प्रत्येकं दशोद्देशकप्रमाणत्वात् वर्गाणामिह षष्टिरुद्देशका भवन्तीति ।

इदं च शतमनन्तरशतवत्सर्वं व्याख्येयं, यस्तु विशेषः स सूत्रसिद्ध एव, इयं चेह वृद्धोक्ता गाथा—

॥१॥ "पत्त पवाले पुप्फे फले य बीए य होइ उववाओ ।
रुक्खेसु सुरगणाणं पसत्थसवन्नगंधेसु ॥

शतकं—२२ वर्गाः—१—६ समाप्ताः

॥१॥ द्वाविंशं तु शतं व्यक्तं, गम्भीरं च कथञ्चन ।
व्यक्तगम्भीरभावाभ्यामिह वृत्तिः करो किम् ? ॥

शतकं—२२ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादीता भगवतीअङ्गसूत्रे द्वाविंशतितमशतकस्य अभयदेवसूरिविरचिता टीका परिसमाप्ता ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शतकं–२३

**वृ.** व्याख्यातं द्वाविंशं शतम्, अथावसरायातं त्रयोविंशं शतमारभ्यते, अस्य चातावेवंद्दश-कवर्गसङ्ग्रहायेयं गाथा– [नमो सुयदेवयाए भगवईए।]

**मू. (८२९)** *आलुयलोहो अवया पाढी तह मासवन्निवल्ली।*
*पंचेते दसवग्गा पन्नासा होंति उद्देसा॥*

### –: शतकं–२३ वर्गः–१ :–

**मू. (८३०)** *रायगिहे जाव एवं० अह भंते! आलुयमूलगसिंगबेरहलिद्दरुककंडरिय-जारुच्छीरविरालिकिट्टिकुंदुकण्हकडडसुमहुपयलइ-महुसिंगिणिरुहासप्पसुगंधा छिन्नरुहा बीयरुहा णं एएसि णं जे जीवा मूलत्ताए वक्कमंति एवं मूलादीया दस उ० कायव्वा वंसवग्गसरिसा नवरं परिमाणं जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा असंखेज्जा वा अनंता वंसगवग्गसरिसा नवरं परिमाणं जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा असंखेज्जा वा अनंता वा उववज्जंति।*

*अवहारो गोयमा! ते णं अनंता समये अवहीरमाणा २ अनंताहिं ओसप्पिणीहिं उस्सप्पिणीहिं एवतिकालेणं अवहीरंति नो चेव णं अवहरिया सिया ठिती जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, सेसं तं चेव॥*

### –: शतकं–२३ वर्गः–२ :–

**मू. (८३१)** *अह भंते! लोहीणीहूथीहुथिवगा अस्सकन्नी सीउंढी मुसंढीणं एएसि णं जीवा मूल एवं एत्थवि दस उद्देसगा जहेव आलुवग्गे, नवरं ओगाहणा तालवग्गसरिसा, सेसं तं चेव सेवं भंते!॥*

### –: शतकं–२३ वर्गः–३ :–

**मू. (८३२)** *अह भंते! आयकायकुहुणकुंदुरुक्कउव्वेहलियासफासज्जाछत्तावंसा-णियकुमाराणं एतेसि णं जे जीवा मूलत्ताए एवं एत्थवि मूलादीया दस उद्देसगा निरवसेसं जहा आलुवग्गो नवरं ओगाहणा तालुवग्गसरिसा, सेसं तं चेव, सेवं भंते! २ त्ति॥*

### –: शतकं–२३ वर्गः–४ :–

**मू. (८३३)** *अह भंते! पाढामिए वालुंकि मधुररसारा वल्लिपउमामोंढरिद्दंतिचंडीणं एतेसि णं जे जीवा मूल एवं एत्थवि मूलादीया दस उद्देसगा आलुयवग्गसरिसा नवरं ओगाहणा जाह वल्लीणं, सेसं तं चेव, सेवं भंते! २ त्ति॥*

### –: शतकं–२३ वर्गः–५ :–

**मू. (८३४)** *अह भंते! मासपन्नीमुग्गपन्नीजीवसरिसवकएणुयकाओलिखीर-काकोलिभंगिणहिंकिमिरासिभद्दमुच्छणंगलइपओयकिंणापउलपाढेहरेणुया लोहीणं एएसि णं जे जीवा मूल० एवं एत्थवि दस उद्देसगा निरवसेसं आलुयवग्गसरिसा॥*

*एवं एत्थ पंचसुवि वग्गेसु पन्नासं उद्देसगा भाणियव्वा सव्वत्थ देवा ण उववज्जंतित्ति तिन्नि लेसाओ। सेवं भंते! २॥*

**वृ.** 'आलुए'त्यादि, तत्र 'आलुय'त्ति आलुकमूलकादिसाधारणशरीरवनस्पतिभेद-विषयोद्देशकदशकात्मकः प्रथमो वर्गः, 'लोही'ति लोहीप्रभृत्यनन्तकायिकविषयो द्वितीयः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अवइ'त्ति अवककवकप्रभृत्यनन्तकायिकभेदविषयस्तृतीयः ।

'पाढ'त्ति पाठामृगवालुङ्कीमधुररसादिवनस्पतिभेदविषयश्चतुर्थः ।

'मासवन्नीमुग्गवन्नी य'त्ति माषर्णीमुद्रपणीप्रभृतिवल्लीविशेषविषयः पञ्चमः तन्नामक एवेति पञ्चैतेऽनन्तरोक्ता दशोद्देशकप्रमाणा वर्गा दशवर्गा यत एवमतः पञ्चाशदुद्देशका भवन्तीह शत इति ॥

**–: शतक–२३ वर्गाः–१...५ समाप्ताः**

॥ १ ॥ प्राक्तनशतवन्नेयं, त्रयोविंशं शतं यतः ।
प्रायः समं तयो रूपं, व्याख्याऽतोऽत्रापि निष्फला ॥

## शतकं–२४

**वृ.** व्याख्यातं त्रयोविंशं शतम्, अथावसरायातं चतुर्विंशं शतं व्याख्यायते, तस्य चादावेवेदं सर्वोद्देशकद्वारसङ्ग्रहगाथाद्वयम्–

**मू. (८३५)** *उववायपरीमाणं संघयणुच्चत्तमेव संठाणं ।*
*लेस्सा दिट्ठी नाणे अन्नाणे जोग उवओगे ।*

**मू. (८३६)** *सन्नाकसायइंदियसमुग्घाया वेदणा य वेदे य ।*
*आउं अज्झवसाणा अनुबंधो कायसंवेहो ॥*

**वृ.** 'उववाए'त्यादि, एतच्च व्यक्तं, नवरं 'उववाय'त्ति नारकादयः कुत उत्पद्यन्ते ? इत्येवमुपपातो वाच्यः 'परीमाणं'ति ये नारकादिषूत्पत्स्यन्ते तेषां स्वकाये उत्पद्यमानानां परिमाणं वाच्यं 'संघयणं'ति तेषामेव नारकादिषुत्पित्सूनां संहननं वाच्यम् 'उच्चत्तं'ति नारकादियायिनामवगाहनाप्रमाणं वाच्यम्, एवं संस्थानाद्यप्यवसेयम् ।

'अनुबंधो'त्ति विवक्षितपर्यायेणाव्यवच्छिन्नेनावस्थानं 'कायसंवेहो'त्ति विवक्षितकायात् कायान्तरे तुल्यकाये वा गत्वा पुनरपि यथासम्भवं तत्रैवागमनम् ।

*एएसि णं भंते। परिमंडलवट्टतंसचउरंसआयतअनित्थंथाणं संठाणाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे२ हिंतो जाव विसेसाहिया वा?*

*गोयमा! सव्वत्थोवा परिमंडलसंठाणा दव्वट्ठयाए वट्टा संठाणा दव्वट्ठयाए संखेज्ञगुणा चउरंसा संठाणा दव्वट्ठयाए संखेज्ञगुणा तंसा संठाणा दव्वट्ठयाए संखेज्ञगुणा आयतसंठाणा दव्वट्ठयाए संखेज्ञगुणा अनित्थंथा संठाणा दव्वट्ठयाए असंखेज्ञगुणा, पएसट्ठयाए सव्वत्थोवा परिमंडला संठाणा पएसट्ठयाए वट्टा संठाणा संखेज्ञगुणा जहा दव्वट्ठयाए तहा पएसट्ठयाएवि जाव अनित्थंथा संठाणा पएसट्ठयाए असंखेज्ञगुणा।*

*दव्वपएसट्ठयाए सव्वत्थोवा परिमंडला संठाणा दव्वट्ठयाए सो चेव गमओ भाणियव्वो जाव अनित्थंथा संठाणा दव्व० असंखे० अनित्थंथेहिंतो संठाणेहिंतो दवट्ठयाए परिमंडला संठाणा पएसट्ठ० असंखे० वट्टा संठाणा पएसट्ठ० संखे० सो चेव पएसट्ठयाए गमओ भाणि० जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनित्थंथासंठा- णा पएसट्ठयाए असंखेज्जगुणा ॥*

**वृ.** 'कइ णं भंते !' इत्यादि, संस्थानानि—स्कन्धाकाराः 'अनित्थंथे'त्ति इत्थम्—अनेन प्रकारेण परिमण्डलादिना तिष्ठतीति इत्थंस्थं न इत्थंस्थमनित्थंस्थं परिमण्डलादिव्यतिरिक्तमित्यर्थः, 'परिमंडला णं भंते ! संठाण'त्ति परिमण्डलसंस्थानवन्ति भदन्त ! द्रव्याणीत्यर्थ ।

'दव्वट्ठयाए'त्ति द्रव्यरूपमर्थमाश्रित्येत्यर्थः 'पएसट्ठयाए'त्ति प्रदेशरूपमर्थमाश्रित्येत्यर्थः 'दव्वट्ठपएसट्ठयाए'त्ति तदुभयमाश्रित्येत्यर्थः 'सव्वत्थोवा परिमंडलसंठाणे'ति इह यानि संस्थानानि यत्संस्थानापेक्षया बहुतरप्रदेशावगाहीनि तानि तदपेक्षया स्तोकानि तथाविधस्वभावत्वात् ।

तत्र च परिमण्डलसंस्थानं जघन्यतोऽपि विंशतिप्रदेशावगाहाद्बहुतरप्रदेशावगाहि वृत्तचतुरस्रत्र्यस्रायतानि तु क्रमेण जघन्यतः पञ्चतुस्त्रिद्विप्रदेशावगाहित्वादल्पप्रदेशावगाहीन्यतः सर्वेभ्यो बहुतरप्रदेशावगाहित्वात्परिमण्डलस्य परिमण्डलसंस्थानानि सर्वेभ्यः सकाशात्स्तोकानि, तेभ्यश्च क्रमेणान्येषामल्पाल्पतरप्रदेशावगाहित्वाक्रमेण बहुतरत्वमिति सङ्ख्येयगुणानि तान्युक्तानि ।

'अनित्थंथा संठाणा दव्वट्ठयाए असंखेज्जगुण'त्ति अनित्थंस्थसंस्थानवन्ति हि परिमण्डलादीनां द्वयादिसंयोगनिष्पन्नत्वेन तेभ्योऽतिबहूनीतिकृत्वाऽसङ्ख्यातगुणानि पूर्वेभ्य उक्तानि, प्रदेशार्थचिन्तायां तु द्रव्यानुसारित्वात्प्रदेशानां पूर्ववदल्पबहुत्वे वाच्ये, एवं द्रव्यार्थप्रदेशार्थचिन्तायामपि, विशेषस्त्वयं—द्रव्यतोऽनित्थंस्थेभ्यः परिमण्डलानि प्रदेशतोऽसङ्ख्येयगुणानीत्यादि वाच्यमिति । कृता सामान्यतः संस्थानप्ररूपणा, अथ रत्नप्रभाद्यपेक्षया तां चिकीर्षु पूर्वोक्तमेवार्थं प्रस्तावनार्थमाह—

**मू.** *(८७१) कति णं भंते ! संठाणा पन्नत्ता ?, गोयमा ! पंच संठाणा पं०—परिमंडले जाव आयते । परिमंडला णं भंते ! संठाणा किं संखेज्जा असंखेज्जा अनंता ?, गोयमा ! नो संखे० नो असं० अनंता, वट्टा णं भंते ! संठाणा किं संखेज्जा० ?, एवं चेव एवं जाव आयता ।*

*इमीसे णं भंते ! रयणप्पभाए पुढवीए परिमंडला संठाणा किं संखेज्जा असंखे० अनंता ?, गोयमा ! नो असंखे० अनंता, वट्टा णं भंते ! संठाणा किं संखे० असं० एवं चेव, एवं जाव आयया सक्करप्पभाए णं भंते ! पुढवीए परिमंडला संठाणा एवं चेव एवं जाव आयया एवं जाव अहेसत्तमाए*

*सोहम्मे णं भंते ! कप्पे परिमंडला संठाणा एवं चेव एवं जाव अच्चुए, गेविज्जविमाणा णं भंते ! परिमंडलसंठाणा एवं चेव, एवं अनुत्तरविमाणेसुवि, एवं ईसिपब्भाराएवि ॥*

*जत्थ णं भंते ! एगे परिमंडले संठाणे जवमज्झे तत्थ परिमंडला संठाणा किं संखेज्जा असंखेज्जा अनंता ?, गोयमा ! नो संखे० नो असं० अनंता ।*

*वट्टा णं भंते ! संठाणा किं संखेज्जा असं० चेव एवं जाव आयता । जत्थ णं भंते ! एगे वट्टे संठाणे जवमज्झे तत्थ परिमंडला संठाणा एवं चेव वट्टा संठाणा एवं चेव एवं जाव आयता, एवं एक्केक्केणं संठाणेणं पंचवि चारेयव्वा, जत्थ णं भंते ! इमीसे रयणप्पभाए पुढवीए एगे परिमंडले संठाणे जवमज्झे तत्थ णं परिमंडलासंठाणा किं संखेज्जा पुच्छा, गोयमा ! नो संखेज्जा नो असंखेज्जा अनंता ।*

*वट्टा णं भंते ! संठाणा किं संखे० पुच्छा, गोयमा ! नो संखे० नो असंखेज्जा अनंता एवं चेव जाव आयता, जत्थ णं भंते ! इमीसे रयण० पुढवीए एगे वट्टे संठाणे जवमज्झे तत्थ णं परिमंडला*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संठाणा किं संखेज्ज० ? पुच्छा, गोयमा ! नो संखे० नो असं० अनता, वट्टा संठाणा एवं चेव जाव आयता ।*

*एवं पुनरवि एक्केक्केणं संठाणेणं पंचवि चारेयव्वा जहेव हेट्ठिल्ला जाव आयताणं एवं जाव अहेसत्तमाए एवं कप्पेसुवि जाव ईसीपब्भाराए पुढवीए ।*

**वृ.** 'कइ ण'मित्यादि, इह षष्ठसंस्थानस्य तदन्यसंयोगनिष्पन्नत्वेनाविवक्षणात् पञ्चेत्युक्तम् अथ प्रकारान्तरेण तान्याह–

'जत्थ ण'मित्यादि, किल सर्वोऽप्ययं लोकः परिमण्डलसंस्थानद्रव्यैर्निरन्तरं व्याप्तस्तत्र च कल्पनया यानि २ तुल्यप्रदेशावगाहीनि तुल्यप्रदेशानि तुल्यवर्णादिपर्यवाणि च परिमण्डलसंस्थानवन्ति द्रव्याणि तानि तान्येकपङ्क्त्यां स्थाप्यन्ते, एकमेकैकजातीयेष्वेकैकपङ्क्त्यामौत्तराधर्येण निक्षिप्यमाणेष्वल्पबहुत्वभावाद् यवाकारः परिमण्डलसंस्थानसमुदायो भवति ।

तत्र किल जघन्यप्रदेशिकद्रव्याणां वस्तुस्वभावेन स्तोकत्वादाद्या पङ्क्तिर्ह्रस्वा ततः शेषाणां क्रमेण बहुबहुतरत्वाद्दीर्धदीर्घतरा ततः परेषां क्रमेणाल्पतरत्वात् ह्रस्वह्रस्वतरैव यावदुत्कृष्टप्रदेशानामल्पतमत्वेन ह्रस्वतमेत्येवं तुल्यैस्तदन्यैश्च परिमण्डलद्रव्यैर्यवाकारं क्षेत्रं निष्पाद्यत इति, इदमेवाश्रित्योच्यते ।

'जत्थ'त्ति यत्र देशे 'एगे'त्ति एकं 'परिमंडले'त्ति परिमण्डलं संस्थानं वर्त्तत इति गम्यते, 'जवमज्झे'त्ति यवस्येव मध्यं–मध्यभागो यस्य विपुलत्वसाधर्म्यात्तद् यवमध्यं यवाकारमित्यर्थः, तत्र यवमध्ये परिमण्डलसंस्थानानि–यवाकारनिर्वर्त्तकपरिमण्डलसंस्थानव्यतिरिक्तानि किं सङ्ख्यातानि ?

इत्यादिप्रश्नः उत्तरं त्वनन्तानि यवाकारनिर्वर्त्तकेभ्यस्तेषामनन्तगुणत्वात् तदपेक्षया च यवाकारनिष्पादकानामनन्तगुणहीनत्वादिति ।। पूर्वोक्तामेव संस्थानप्ररूपणां रत्नप्रभादिभेदेनाह– 'जत्थे'त्यादि सूत्रसिद्धम् । अथ संस्थानान्येव प्रदेशतोऽवगाहतश्च निरूपयन्नाह–

**मू. (८७२)** *वट्टे णं भंते ! संठाणे कतिपदेसिए कतिपदेसोगाढे प० ?, गोयमा ! वट्टे संठाणे दुविहे प०–घणवट्टे य पयरवट्टे य, तत्थ णं जे से पययरवट्टे से दुविहे प० तं०–ओयपएसे य जुम्मपएसे य, तत्थ णं जे से ओयपएसिए से जहन्नेणं पंचपएसिए पंचपएसोगाढे उक्कोसेणं अनंतपएसिए असंखेज्जपएसोगाढे ।*

*तत्थ णं जे से जुम्मपएसिए से जहन्नेणं बारसपएसिए बारसपएसोगाढे उक्कोसेणं अनंतपएसिए असंखेज्जपएसोगाढे, तत्थ णं जे से घणवट्टे से दुविहे प०, तं०–ओयपएसिए य जुम्मपएसिए य ।*

*तत्थ णं जे से ओयपएसिए से जह० सत्तपएसिए सत्तपएसोगाढे प० उक्कोसेणं अनंतपएसिए असंखेज्जपएसोगाढे प०, तत्थ णं जे से जुम्मपएसिए से जहन्नेणं बत्तीसपएसिए बत्तीसपएसोगाढे प०, उक्कोसेणं अनंतपएसिए असंखेज्जपएसोगाढे ।*

*तेसिं णं भंते ! संठाणे कतिपदेसिए कतिपदेसोगाढे प० ?, गोयमा ! तंसे णं संठाणे दुविहे पं० तं० घणतंसे य पयरतंसे य, तत्थ णं जे से पयरतंसे से दुविहे पं०, तं०–ओयपएसिए य जुम्मपएसि य, तत्थ णं जे से ओयपएसिए से जह० तिपएसिए तिपएसोगाढे प० उक्कोसेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनंतपएसिए असंखेज्ञपएसोगाढे।*

*तत्थ णं जे से जुम्मपएसिए जे जहन्नेणं छप्पएसिए छप्पएसोगाढे प० उक्कोसेणं अनंतपएसिए असंखेज्ञपएसोगाढे प०, तत्थ णं जे से घणतंसे से दुविहे प० तं०–ओयपएसिए जुम्मपएसिए य, तत्थ णं जे से ओयपएसिए से जहन्नेणं पणतीसपएसिए पणतीसपएसोगाढे उक्कोसेणं अनंतपएसिए तं चेव, तत्थ णं जे से जुम्मपएसिए जे जहन्नेणं चउप्पएसिए चउप्पएसोगाढे प० उक्को० अनंतपएसिए तं चेव।*

*चउरंसे णं भंते! संठाणे कतिपदेसिए? पुच्छा, गोयमा! चउरंसे संठाणे दुविहे प० भेदो जहेव वट्टस्स जाव तत्थ णं जे से ओयपएसिए से जहन्नेणं नवपएसिए नवपएसोगाढे प०, उक्कोसेणं अनंतपएसिए असंखेज्ञपएसोगाढे प०।*

*तत्थ णं जे से जुम्मवदेसिए जे जहन्नेणं चउपएसिए चउपएसोगाढे प० उक्कोसेणं अनंतपएसिए तं चेव तत्थ णं से घनचउरंसे से दुविहे प०, तंजहा–ओयपएसिए जुम्मपएसिए, तत्थ णं जे से ओयपएसिए से जहन्नेणं सत्तावीसइपएसिए सत्तावीसतिपएसोगाढे उक्को० अनंतपएसिए तहेव तत्थ जे से जुम्मपएसि से जहन्नेणं अट्ठपएसिए अट्ठपएसोगाढे प० उक्को० अनंतपएसिए तहेव।*

*आयए णं भंते! संठाणे कतिपदेसिए कतिपएसोगाढे प०? गोयमा! आयए णं संठाणे तिविहे प० तं०–सेढिआयते पयरायते घणायते, तत्थ णं जे से सेढिआयते से दुविहे प०, तं०– ओयपएसिए य जुम्मपएसिए य।*

*तत्थ णं जे ओयप० से जह० तिपएसिए तिपएसोगाढे उक्को० अनंतपए तं चेव, तत्थ णं जे से जुम्मपएसे जह० दुपएसिए दुपएसोगाढे उक्कोसेणं अनंता तहेव तत्थ णं जे से पयरायते से दुविहे पं० तं०–ओयपएसिए य जुम्मपएसिए य, तत्थ णं जे से ओयपएसिए से जहन्नेणं पन्नरसपएसिए पन्नरसपएसोगाढे उक्कोसेणं अनंत तहेव।*

*तत्थ णं जे से जुम्मपएसिए से जहन्नेणं छप्पएसिए छप्पएसोगाढे उक्कोसेणं अनंत तहेव, तत्थ णं जे से घणायते से दुविहे पं० तं०–ओयपएसिए जुम्मपएसिए, तत्थ णं जे से ओयपएसिए से जहन्नेणं पणयालीसपएसिए पणयालीसपएसोगाढे उक्कोसेणं अनंत० तहेव। तत्थ णं जे से जुम्मपएसिए से जह० बारसपएसिए बारसपएसोगाढे उक्कोसेणं अनंत० तहेव।*

*परिमंडले णं भंते! संठाणे कतिपदेसिए? पुच्छा, गोयमा! परिमंडले णं संठाणे दुविहे पं०, तं०–घनपरिमंडले य पयरपरिमंडले य, तत्थ णं जे से पयरपरिमंडले से जहन्नेणं वीसतिपदेसिए वीसइपएसोगाढे उक्कोसेणं अनंतपदे० तहेव।*

*तत्थ णं जे से घनपरिमंडले से जहन्नेणं चत्तालीसतिपदेसिए चत्तालीसपएसोगाढे प०, उक्कोसेणं अनंतपएसिए असंखेज्ञपएसोगाढे पन्नत्ता॥*

**वृ.** 'वट्टे ण' मित्यादि, अथ परिमण्डलं पूर्वमादावुक्तं इह तु कस्मात्त्यागेन वृत्तादिना क्रमेण तानि निरूप्यन्ते?, उच्यते, वृत्तादीनि चत्वार्यपि प्रत्येकं समसङ्ख्यविषमसङ्ख्यप्रदेशान्यतस्तत्साधर्म्यात्तेषां पूर्वमुपन्यासः परिमण्डलस्य पुनरेतदभावात्पश्चाद् विचित्रत्वाद्वा सूत्रगतेरिति, 'घनवट्टे' त्ति सर्वतः समं धनवृत्तं मोदकवत् 'पयरवट्टे' त्ति बाहल्यतो हीनं तदेव प्रतरवृत्तं मण्डकवत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ओयपएसिए'त्ति विषमसङ्ख्यप्रदेशनिष्पन्नं 'जुम्मपएसिए'त्ति समसङ्ख्यप्रदेशनिष्पन्नं, 'तत्थ णं जे से ओयपएसिए पयरवट्टे से जहन्नेणं पंचपएसिए' इत्यादि, इत्थं पञ्चप्रदेशावगाढं पञ्चाणुकात्मकमित्यर्थः, उत्कर्षेणानन्तप्रदेशिकमसङ्ख्येयप्रदेशावगाढं लोकस्याप्यसङ्ख्येय-प्रदेशात्मकत्वात्।

'जे से जुम्मपएसिए से जहन्नेणं बारसपएसिए' इति, 'जे से ओयपएसिए घनवट्टे से जहन्नेण सत्तपएसिए सत्तपएसोगाढे'त्ति, अस्य मध्यपरमाणोरुपर्येकः स्थापितोऽधश्चैक इत्येवं सप्तप्रदेशिकं घनवृत्तं भवतीति, 'जे से जुम्पएसिए से जहन्नेणं बत्तीसइपएसिए' इत्यादि, अस्य चोपरीदृश एव प्रतरः स्थाप्यस्ततः सर्वे चतुर्विंशतिस्ततः प्रतरद्वयस्य मध्याणूनां चतुर्णामुपर्यन्ये चत्वारोऽधश्चेत्येवं द्वात्रिंशदिति।

त्र्यस्रसूत्रे-'जे से ओयपएसिए से जहन्नेणं तिपएसिए'त्ति, अस्य स्थापना- 'जे से जुम्मपएसिए से जहन्नेणं छप्पएसिए'त्ति 'जे से ओयपएसिए से जहन्नेणं पणतीसपएसिए'त्ति, अस्य पञ्चदश-प्रदेशिकस्य प्रतरस्योपरि दशप्रदेशिकः एतस्याप्युपर षट्प्रदेशिकः एतस्याप्युपरि त्रिप्रदेशिकः प्रतरः एतस्याप्युपर्येकः प्रदेशो दीयते इत्येवं पञ्चत्रिंशत्प्रदेशा इति।

'जे से जुम्मपएसिए से जहन्नेणं चउप्पएसिए' इति, अस्य स्थापना-अत्रैकस्योपरि प्रदेशो दीयत इत्येवं चत्वार इति।

चतुरस्रसूत्रे-'जे से ओयपएसिए जे जहन्नेणं नवपएसिए'त्ति एवं 'जे से जुम्मपएसिए से जहन्नेणं चउप्पएसिए'त्ति, एवं जेसे ओयपएसिए से जहन्नेणं सत्तावीसपएसिए''त्ति, एवमेतस्य नवप्रदेशिकप्रतरस्योपर्यन्यदपि प्रतरद्वयं स्थाप्यत इत्येवं सप्तविंशतिप्रदेशिकं चतुरस्रं भवतीति, 'जे से जुम्मपएसिए से जहन्नेणं अट्ठपएसिए' अस्योपर्यन्यश्चतुष्प्रदेशिकप्रतरो दीयत इत्येवमष्टप्रदेशिकं स्यादिति।

आयतसूत्रे-'सेढिआयए'त्ति श्रेण्यायतं-प्रदेशश्रेणीरूपं 'प्रतरायतं' कृतविष्कम्भ-श्रेणीद्वयादिरूपं 'घनायतं' बाहल्यविष्कम्भोपेतमनेकश्रेणीरूपं, तत्र श्रेण्यायतमोजःप्रदेशिकं जघन्यं त्रिप्रदेशिकं, १ तदेव युग्मप्रदेशिकं द्विप्रदेशिकं 'जे से ओयपएसिए से जहन्नेणं पन्नरस-पएसिए'त्ति एवं- तदेव युग्मप्रदेशिकं जघन्यं षट्प्रदेशिकं तच्चैवं- एवं घनायतमोजःप्रदेशिकं जघन्यं पञ्चचत्वारिंशत्प्रदेशिकं अस्योपर्यन्त् प्रतरद्वयं स्थाप्यत इत्येवं पञ्चचत्वारिंशत्प्रदेशिकं जघन्यमोजः प्रदेशिकं घनायतं भवति, तदेव युग्मप्रदेशिकं द्वादशप्रदेशिकं, तच्चैवम्- एतस्य षड्प्रदेशिकस्योपरि षट्प्रदेशिक एवान्यः प्रतरः स्थाप्यते ततो द्वादशप्रदेशिकं भवतीति।

'परिमंडले ण'मित्यादि, इह ओजोयुग्मभेदौ न स्तः, युग्मरूपत्वेनैकरूपत्वात्परिमण्डलस्येति, तत्र प्रतरपरिमण्डलं जघन्यतो विंशतिप्रदेशिकं भवति, एतस्यैवोपरि विंशतिप्रदेशिकेऽन्यस्मिन् प्रतरे दत्ते चत्वारिंशत्प्रदेशिकघनपरिमण्डलं भवतीति। अनन्तरं परिमण्डलं प्ररूपितम्, अथ परिमण्डलमेवादौ कृत्वा संस्थानानि प्रकारान्तरेण प्ररूपयन्नाह-

***मू. (८७३)** परिमंडले णं भंते! संठाणे दव्वट्ठयाए किं कडजुम्मे तेओए दावरजुम्मे कलियोए गोयमा! नो कडजुम्मे नो तेयोए नो दावरजुम्मे कलियोए, वट्टे णं भंते! संठाणे दव्वट्ठयाए एवं चेव एवं जाव आयते।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिमंडला णं भंते ! संठाणा दव्वट्ठयाए किं कडजुम्मा तेयोया दावरजुम्मा कलियोगा पुच्छा, गोयमा ! ओघादेसेणं सिय कडजुम्मा सिय तेओगा सिय दावरजुम्मा सिया कलियोगा, विहाणादेसेणं नो कडजुम्मा नो तेओगा नो दावरजुम्मा कलिओगा एवं जाव आयता।

परिमंडले णं भंते ! संठाणे पएसट्ठयाए किं कडजुम्मे ? पुच्छा, गोयमा ! सिय कडजुम्मे सिय तेयोगे सिय दावरजुम्मे सिय कलियोए एवं जाव आयते, परिमंडला णं भंते ! संठाणा पएसट्ठयाए किं कडजुम्मा ? पुच्छा, गोयमा ! ओघादेसेणं सिय कडजुम्मा जाव सिय कलियोगा विहाणादेसेणं कडजुम्मावि तेओगावि दावरजुम्मावि कलियोगावि ४ एवं जाव आयता।

परिमंडले णं भंते ! संठाणे किं कडजुम्मपएसोगाढे जाव कलियोगपएसोगाढे ?, गोयमा कडजुम्मपएसोगाढे नो तेयोगपएसोगाढे नो दावरजुम्मपएसोगाढे सिय तेयोगपएसोगाढे नो दावरजुम्मपएसोगाढे सिय क़लियोगपएसोगाढे ॥

तंसे णं भंते ! संठाणे पुच्छा, गोयमा ! सिय कडजुम्पएसोगाढे सिय तेयोगपएसोगाढे सिय दावरजुम्मपदेसोगाढे नो कलिओगपएसोगाढे। चउरंसे णं भंते ! संठाणे जहा वट्टे तहा चउइरंसेवि।

आयए णं भंते ! पुच्छा, गोयमा ! सिय कडजुम्मपएसोगाढे जाव सिय तेयोगपएसो गाढा ? पुच्छा, गोयमा ! ओघादेसेणवि विहाणादेसेणवि कडजुम्मपएसोगाढा नो तेयोगपएसोगाढा नो दावरजुम्मपएसोगाढा नो कलियोगपएसोगाढा।

वट्टा णं भंते ! संठाणा किं कडजुम्मपएसोगाढा पुच्छा, गोयमा ! ओघादेसेणं कडजुम्म-पएसोगाढा नो तेयोगपएसोगाढा नो दावरजुम्मपएसोगाढा नो कलियोगपएसोगाढावि

तंसा णं भंते ! संठाणा किं कडजुम्मा पुच्छा, गोयमा ! ओघादे० कडजुम्मपएसोगाढा नो तेयोगपएसोगाढा नो दावरजुम्म० नो कलियोगपएसोगाढावि विहाणादे० कडजुम्मपएसोगा० तेयोगप० नो दावरजुम्मपएसोगा० नो कलियोगपएसोगाढा। चउरंसा जहा वट्टा। आयया णं भंते ! संठाणा पुच्छा, गोयमा ! ओघादेसेणं कडजुम्मपएसोगाढा नो तेयोगपएसोगाढा नो दावरजुम्म-पएसोगाढा नो कलिओगपएसोगाढा विहाणादेसेणं कडजुम्मपएसोगाढावि जाव कलि-ओगपएसोगाढावि।

परिमंडले णं भंते ! संठाणे किं कडजुम्मसमयठितीए तेयोगसमयठितीए दावरजुम्मसमय-ठ्ठितीए कलिओगसमयठितीए ?, गोयमा ! सिय कडजुम्मसमयठितीए जाव सिय कलिओग-समयठितीए एवं जाव आयते।

परिमंडला णं भंते ! संठाणा किं कडजुम्मसमयठितीया पुच्छा, गोयमा ! ओघादेसेणं सिय कडजुम्मसमयट्ठितीया जाव सिय कलियोगसमयट्ठितीया, विहाणादेसेणं कडजुम्मसमय-ठितीयावि जाव कलियोगसमयठितीयावि, एवं जाव आयता।

परिमंडले णं भंते ! संठाणे कालन्नपज्जवेहिं किं कडजुम्मे जाव सिय कलियोगे ?, गोयमा ! सिय कडजुम्मे एवं एएणं अभिलावेणं जहेव ठितीए एवं नीलवन्नपज्जवेहिं एवं पंचहिं वन्नेहिं दोहिं गंधेहिं पंचहिं रसेहिं अट्ठहिं फासेहिं जाव लुक्खफासपज्जवेहिं ॥

**वृ.** 'परिमंडले'त्यादि, परिमण्डलं द्रव्यार्थतयैकमेव द्रव्यं, न हि परिमण्डलस्यैकस्य चतुष्का-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पहारोऽस्तीत्येकत्वचिन्तायां न कृतयुग्मादिव्यपदेशः किन्तु कल्योजव्यपदेश एव, यदा तु पृथकत्वचिन्ता तदा कदाचिदेतावन्ति तानि परिमण्डलानि भवन्ति यावतां चतुष्कापहारेण निच्छेदता भवति कदाचित्पुनस्त्रीण्यधिकानि भवन्ति कदाचिद्द्वे कदाचिदेकमधिकमित्यत एवाह–'परिमंडला णं भंते' इत्यादि, 'ओघादेसेणं'ति सामान्यतः 'विहाणादेसेणं'ति विधानादेशो यत्समुदितानामप्येकैकस्यादेशनं तेन च कल्योजतैवेति ।

अथ प्रदेशार्थचिन्तां कुर्वन्नाह–'परिमंडले ण'मित्यादि, तत्र परिमण्डलं संस्थानं प्रदेशार्थतया विंशत्यादिषु क्षेत्रप्रदेशेषु ये प्रदेशाः परिमण्डलसंस्थानष्पादका व्यवस्थितास्तदपेक्षयेत्यर्थः 'सियकडजुम्मे'त्ति तत्प्रदेशानां चतुष्कापहारेणापह्रियमाणानां चतुष्पर्यवसितत्वे कृतयुग्मं स्यात्, यदा त्रिपर्यवसानां तत्तदा त्र्योजः, एवं द्वापरं कल्योजश्चेति, यस्मादेकत्रापि प्रदेशे बहवोऽणवोऽवगाहन्त इति ।

अथावगाहप्रदेशनिरूपणायाह– 'परिमंडले'त्यादि, 'कडजुम्मपएसोगाढे'त्ति यस्मात्परिमण्डलं जघन्यतो विंशतिप्रदेशावगाढमुक्तं विंशतेश्च चतुष्कापहारे चतुष्पर्यवसितत्वं भवति एवं परिमण्डलान्तरेऽपीति

'वट्टे ण'मित्यादि, 'सिय कडजुम्मपएसोगाढे'त्ति यत्प्रतरवृत्तं द्वादशप्रदेशिकं यच्च घनवृत्तं द्वात्रिंशत्प्रदेशिकमुक्तं तच्चतुष्कापहारे चतुरग्रत्वात्कृतयुग्मप्रदेशावगाढं 'सिय तेओयपएसोगाढे'त्ति यच्च घनवृत्तं सप्तप्रदेशिकमुक्तं त्र्यग्रत्वात्त्र्योजःप्रदेशावगाढं 'सिय कलिओयपएसो गाढे'त्ति यत्प्रवरवृत्तं पञ्चप्रदेशिकमुक्तं तदेकाग्रत्वात्कल्योज प्रदेशावगाढमिति ।.

'तं से णं'मित्यादि 'सिय कडजुम्मपएसोगाढे'त्ति यद् धनत्र्यस्रं चतुष्प्रदेशिकं तत्कृतयुग्मप्रदेशावगाढं 'सिय तेओगपएसोगाढे'त्ति यत् प्रतरत्र्यस्रं त्रिप्रदेशा- वगाढं धनत्र्यस्रं च पञ्चत्रिंशत्प्रदेशावगाढं तत्त्र्यग्रत्वात्त्र्योजःप्रदेशवागाढ, 'सिय दावरजुम्मपएसोगाढे- 'त्ति यत्प्रतरत्र्यस्रं षटप्रदेशिकमुक्तं तद् द्वयग्रत्वाद् द्वापरप्रदेशावगाढमिति ।

'चउरंसे ण'मित्यादि, 'जहा वट्टे'त्ति 'सिय कडजुम्मपएसोगाढे सियतेओयपएसोगाढे सियकलिओयपएसोगाढे' इत्यर्थः तत्र यत्प्रतरचतुरस्रं चतुष्प्रदेशिकं घनचतुरस्रं चाष्टप्रदेशिकमुक्तं तच्चतुरग्रत्वात्कृतयुग्मप्रदेशावगाढं, तथा यद् धनचतुरस्रं सप्तविंशतिप्रदेशिकमुक्तं तत्त्र्यग्रत्वात्त्र्योजः प्रदेशावगाढं, तथा यत्प्रतरचतुरस्रंन वप्रदेशिकमुक्तं तदेकाग्रत्वात् कल्योजःप्रदेशावगाढमिति ।

'आयए ण'मित्यादि 'सिय कडजुम्मपएसोगाढे'त्ति यद् घनायतं द्वादशप्रदेशिकमुक्तं तत्कृतयुग्मप्रदेसावगाढं यावत्करणात् 'सिय तेओयपएसोगाढे सिय दावरजुम्मपएसोगाढे'त्ति दृश्यं, तत्र च यत् श्रेण्यायतं त्रिप्रदेशावगाढं यच्च प्रतरायतं पञ्चदशप्रदेशिकमुक्तं तत्त्र्यग्रत्वात्त्र्योजःप्रदेशावगाढं, यत्पुनः श्रेण्यायतं द्विप्रदेशिकं यच्च प्रतरायतं षटप्रदेशिकं तद् द्वयग्रत्वाद् द्वापरयुग्मप्रदेशावगाढं, 'सिय कलिओयपएसोगाढे'त्ति यद् धनायतं पञ्चत्वारिंशत्प्रदेशिकं तदेकाग्रत्वात्कल्योजःप्रदेशावगाढमिति ॥

एवमेकत्वेन प्रदेशावगाढमाश्रित्य संस्थानानि चिन्तितानि अथ पृथक्त्वेन तानि तथैव चिन्तयन्नाह–'परिमंडला ण'मित्यादि, 'ओघादेसेणवि'त्ति सामान्यतः समस्तान्यपि परिमण्डलानीत्यर्थः 'विहाणादेसेणवि'त्ति भेदतः एकैकं परिमण्डलमित्यर्थः कृतयुग्मप्रदेशावगाढान्येव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विंशतिचत्वारिंशत्प्रभृतिप्रदेशावगाहित्वेनोक्तत्वात्तेषामिति।

'वट्टा ण'मित्यादि, 'ओघादेसेणं कडजुम्मपएसोगाढे'त्ति वृत्तसंस्थानाः स्कन्धाः सामान्येन चिन्त्यमानाः कृतयुग्मप्रदेशावगाढाः सर्वेषां तत्प्रदेशानां मीलने चतुष्कापहारे तत्स्वभावत्वेन चतुष्पर्यवसितत्वा, विधानादेशेन पुनर्द्वापरप्रदेशावगाढवर्जाःशेषावगाढा भवन्ति, यथा पूर्वोक्तेषु पञ्चसप्तादिषु जघन्यवृत्तभेदेषु चतुष्कापहारे द्वयावशिष्टता नास्ति एवं सर्वेष्वपि तेषु वस्तु स्वभावात्वाद्, अत एवाह-'विहाणादेसेण'मित्यादि।

एवं त्र्यस्रादिसंस्थानसूत्राण्यपि भावनीयानि ॥ एवं तावत्क्षेत्रत एकत्वपृथक्त्वाभ्यां संस्थानानि चिन्तितानि, अथ ताभ्यामेव कालतो भावतश्च तानि चिन्तयन्नाह।

'परिमंडले ण'मित्यादि, अयमर्थः-परिमंडलेन संस्थानेन परिणताः स्कन्धाः कियन्तं कालं तिष्ठन्ति ? किं चतुष्कापहारेण तत्कालस्य समयाश्चतुरग्रा भवन्ति त्रिद्व्येकाग्रा वा ?, उच्यते, सर्वे संभवन्तीति, इह चैता वृद्धोक्ताः सङ्ग्रहगाथाः।

॥१॥ "परिमंडले य १ वट्टे २ तंसे ३ चउरंस ४ आयए ५ चेव।
घनपयरपढमवज्जं ओयपएसे य जुम्मे य ॥

॥२॥ पंच य बारसयं खलु सत्तय बतीसयं च वट्टंमि
तियछक्कय पणतिसा चउरोय हवंति तंसंमि ॥

॥३॥ नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे।
तिगदुगपन्नरसे चेव छच्चेव य आयए होंति ॥

॥४॥ पणयालीसा बारस छब्भेया आययम्मि संठाणे।
परिमंडलम्मि वीसा चत्ता य भवे पएसग्गं ॥

॥५॥ सव्वेवि आययम्मि गेण्हसु परिमंडलंमि कडजुम्मं।
वज्जेज्ज कलिं तंसे दावरजुम्मं च सेसेसु ॥ इति ॥

द्रव्याद्यपेक्षया संस्थानपरिमाणस्याधिकृतत्वासंस्थानविशेषितस्य लोकस्य तथैव परिमाणनिरूपणायाह-

*मू. (८७४) सेढीओ णं भंते ! दव्वट्ठयाए किं संखेज्जाओ असंखेज्जाओ अनंताओ ?, गोयमा ! नो संखेज्जाओ नो असंखे० अनंताओ, पाईणपडीणायताओ णं भंते ! सेढीओ दव्वट्ठयाए किं संखेज्जाओ एवं चेव ३।*

*एवं दाहिणुत्तरायताओवि एवं उड्ढमहायताओवि। लोगागाससेढीओ णं भंते ! दव्वट्ठयाए किं संखेज्जाओ असंखेज्जाओ अनंताओ ?, गोयमा ! नो संखेज्जाओ असंखेज्जाओ नो अनंताओ*

*पाईणपडीणायताओ णं भंते ! लोगागाससेढीओ दव्वट्ठयाए किं संखेज्जाओ एवं चेव, एवं दाहिणुत्तराययाओवि, एवं उड्ढमहायताओवि। अलोयागाससेढीओ णं भंते ! दव्वट्ठयाए किं संखेज्जाओ असंखेज्जाओ अनंताओ ?, गोयमा ! नो संखेज्जाओ असंखेज्जाओ अनंताओ।*

*एवं पाईणपडीणाययाओवि एवं दाहिणुत्तराययाओवि एवं उड्ढमहायताओवि सेढीओ णं भंते ! पएसट्ठयाए किं संखेज्जाओ जहा दव्वट्ठयाए तहा पएसट्ठयाएवि जाव उड्ढमहाययाओवि सव्वाओ अनंत०।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*लोयागाससेढीओ णं भंते ! पएस० किं संखेज्ञाओ पुच्छा, गोयमा ! सिय संखे० सिंय असं० नो अनंताओ एवं पाईणपडीणायताओ दाहिणुत्तरायताओवि एवं चेव उड्डमहायताओवि नो संखेज्ञाओ असंखे० नो अनंताओ ।*

*अलोगागाससेढीओ णं भंते ! पएसट्ठयाए पुच्छा, गोयमा ! सिय संखे० सिय असं० सिय अनंताओ पाईणपडीणाययाओ णं भंते ! अलोया० पुच्छा, गोयमा ! नो संखेज्ञाओ नो असंखेज्ञाओ अनताओ । एवं दाहिणुत्तरायताओवि, उड्डमहायताओ पुच्छा, गोयमा ! सिय संखेज्ञाओ सिय असं० सिय अनंताओ ॥*

**वृ.** 'सेढी'त्यादि, श्रेणीशब्देन च यद्यपि पङ्क्तिमात्रमुच्यते तथाऽपीहाकाशप्रदेशपङ्क्तयः श्रेणयो ग्राह्याः, तत्र श्रेणयोऽविवक्षितलोकालोकभेदत्वेन सामान्याः १ तथा ता एव पूर्वापरायताः २ दक्षिणोत्तरायताः ३ ऊर्ध्वाधआयताः ४, एवं लोकसम्बन्धिन्योऽलोकसम्बन्धिन्यश्चेति, तत्र सामान्ये श्रेणीप्रश्ने 'अनंताओ'त्ति सामान्याकाशास्तिकायस्य श्रेणीनां विवक्षितत्वादनन्तास्ताः, लोकाकाशश्रेणीप्रश्ने त्वसङ्ख्याता एव ताः, असङ्ख्यातप्रदेशात्मकत्वाल्लोकाकाशस्य, अलोकाकाशश्रेणीप्रश्ने पुनरनन्तास्ताः, अनन्तप्रदेशात्मकत्वादलोकाकाशस्य ।

तथा 'लोगागाससेढीओ णं भंते ! पएसट्ठयाए' इत्यादौ 'सियसंखेज्ञाओ सिय असंखेज्ञाओ'त्ति अस्येयं चूर्णिकारव्याख्या–लोकवृत्तान्निष्क्रान्तस्यालोके प्रविष्टस्य दन्तकस्य याः श्रेणयस्ता द्वित्रादिप्रदेशा अपि सभवन्ति तेन ताः सङ्ख्यातप्रदेशा लभ्यन्ते शेषा असङ्ख्यातप्रदेशा लभ्यन्त इति, टीकाकारस्तु साक्षेपपरिहारं चेह प्राह–

॥ १ ॥ "परिमंडलं जहन्नं भणियं कडमुझवट्टियं लोए ।
तिरियायसेढीणं संखेज्ञपएसिया किह नु ॥

॥ २ ॥ दो दो दिसासु एक्केक्कओ य विदिसासु एस कडजुम्मे ।
पढमपरिमंडलाओ वुड्डी किर जाव लोगंतो ॥

इत्याक्षेपः, परिहारस्तु–

॥ ३ ॥ अट्ठंसया पसज्जइ एवं लोगस्स न परिमंडलया ।
वट्टालेहेण तओ वुड्डी कडजुम्मियाजुत्ता ॥

एवं च लोकवृत्तपर्यन्तश्रेणयः सङ्ख्यातप्रदेशिका भवन्तीति 'नो अनंताओ'त्ति लोकप्रदेशानामनन्तत्वाभावात्, 'उड्डमहाययाओ' 'नो संखेज्ञाओ असंखेज्ञाओ'त्ति यतस्यासामुच्छ्रितानामूर्ध्वलोकान्ता दधोलाकान्तेऽधोलाकन्तादूर्ध्व लोकान्ते प्रतिघातोऽतस्ता असङ्ख्यातप्रदेशा एवेति, याअप्यधोलोककोणतो ब्रह्मलोकतिर्यग्मध्यप्रान्ताद्वोत्तिष्ठन्ते ता अपि न सङ्ख्यातप्रदेशा लभ्यन्ते, अत एव सूत्रवचनादिति ॥ 'अलोगागाससेढीओ णं भंते ! पएसट्ठयाए' इत्यादि, 'सिय संखेज्ञाओ सिय असंखेज्ञाओ'त्ति यदुक्तं तत्सर्वं क्षुल्लकप्रतरप्रत्यासन्ना ऊर्ध्वधआयता अधोलोकश्रेणीराश्रित्येत्यवसेयं, ता हि आदिमाः सङ्ख्यातप्रदेशास्ततोऽसङ्ख्यातप्रदेशास्ततः परं त्वनन्तप्रदेशाः, तिर्यगायतास्त्वलोकश्रेणयः प्रदेशतोऽनन्ता एवेति ॥

**मू.** *(८७५) सेढीओ णं भंते ! किं साइयाओ सपज्ञवसियाओ १ साईयाओ अपज्ञवसि० २ अनादीयाओ सपज्ञवसियाओ ३ अनादीयाओ अप० ४ ?, गोयमा ! नो सादीयाओ सप० नो*

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

*सादीयाओ अप० णो अणादीयाओ सप० अणादीयाओ अप० एवं जाव उड्ढमहायताओ।*

*लोयागाससेढीओ णं भंते! किं सादीयाओ सप० पुच्छा, गो०! सादीयाओ सपज्जवसियाओ नो सादीयाओ अपज्जवसियाओ नो अनादीयाओ सपज्जव० नो अनादीयाओ अपज्ज० एवं जाव उड्ढमहायताओ।*

*अलोयागाससेढीओ णं भंते! किं सादीयाओ सप० पुच्छा, गोयमा! सिय साइयाओ सपज्जवसियाओ १ सिय साईयाओ अपज्जवसियाओ २ सिय अनादीयाओ सपज्जवसियाओ ३ सिय अनाइयाओ अपज्जवसियाओ ४, पाईणपडीणाययाओ दाहिणुत्तरायताओ य एवं चेव, नवरं नो सादीयाओ सपज्जवसियाओ सिय साईयाओ अपज्जवसियाओ सेसं तं चेव, उड्ढमहायताओ जाव ओहियाओ तहेव चउभंगो।*

*सेढीओ णं भंते! दव्वट्ठयाए किं कडजुम्माओ तेओयाओ? पुच्छा, गोयमा! कडजुम्माओ नो तेओयाओ नो दावरजुम्माओ नो कलियोगाओ एवं जाव उड्ढमहायताओ, लोगागाससेढीओ एवं चेव, एवं अलोगागासेढीओवि।*

*सेढीओ णं भंते! पएसट्ठयाए किं कडजुम्माओ पुच्छा, एवं चेव एवं जाव उड्ढमहायताओ*

*लोयागाससेढीओ णं भंते! पएसट्ठयाए पुच्छा, गोयमा! सिय कडजुम्माओ नो तेओयाओ सिय दावरजुम्माओ नो कलिओगाओ, एवं पाईणपडीणायताओवि दाहिणुत्तरायताओवि, उड्ढमहाययाओ णं पुच्छा, गोयमा! कडजुम्माओ नो तेओगाओ नो दावरजुम्माओनो कलियोगाओ*

*अलोगागाससेढीओ णं भंते! पएसट्ठयाए पुच्छा, गोयमा! सिय कडजुम्माओ जाव सिय कलिओगाओ, एवं पाईणपडीणायताओवि एवं दाहिणुत्तरायताओवि, उड्ढमहायताओवि एवं चेव, नवरं नो कलिओगाओ सेसं तं चेव।*

**वृ.** 'सेढीओ णं भंते! किं साईयाओ' इत्यादिप्रश्नः, इह च श्रेण्योऽविशेषितत्वाद्या लोके चालोके तासां सर्वासां प्रतिग्रहणं, सर्वग्रहणाच्च ता अनादिका अपर्यवसिताश्चेत्येक एव भङ्गकोऽनुमन्यते शेषभङ्गकत्रयस्य तु प्रतिषेधः। 'लोगागाससेढीओ ण' मित्यादौ तु 'साइयाओ सपज्जवसियाओ' इत्येको भङ्गकः सर्वश्रेणीभेदेष्वनुम्यते, शेषाणां तु निषेधः, लोकाकाशस्य परिमितत्वादिति

'अलोगागाससेढी' त्यादौ 'सिय साईयाओ सपज्जवसियाओ' त्ति प्रथमो भङ्गकः क्षुल्लकप्रतरप्रत्यासत्तौ ऊर्ध्वायतश्रेणीराश्रित्यावसेयः, 'सिय साइयाओ अपज्जवसियाओ' त्ति द्वितीयः, स च लोकान्तादवधेरारभ्य सर्वतोऽवसेयः, 'सिय अणाईयाओ सपज्जवसियाओ' त्ति तृतीयः, स च लोकान्तसन्निधौ श्रेणीनामन्तस्य विवक्षणात्, 'सिय अनाईयाओ अपज्जवसियाओ' त्ति चतुर्थः, स च लोकं परिहृत्य याः श्रेणयस्तदपेक्षयेति।

'पाईणपडीणाययाओ' इत्यादौ 'नो साईयाओ सपज्जवसियाओ' त्ति अलोके तिर्यक्श्रेणीनां सादित्वेऽपि सपर्यवसितत्वस्याभावान्न प्रथमो भङ्गः, शेषास्तु त्रयः संभवन्त्यत एवाह–'सिय साइयाओ' इत्यादि।

'सेढी णं भंते! दव्वट्ठयाए किं कडजुम्माओ?' इत्यादि प्रश्नः, उत्तरं तु 'कडजुम्माओ' त्ति, कथं? वस्तुस्वभावात्, एवं सर्वा अपि, यः पुनर्लोकालोकश्रेणीषु प्रदेशार्थतया विशेषोऽसावुच्यते

तत्र 'लोगागाससेढीओ णं भंते! पएसट्ठयाए' इत्यादौ स्यात् कृतयुग्मा अपि स्यात् द्वापरयुग्मा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येतदेवं भावनीयं—रुचकार्द्धादारभ्य यत्पूर्वं दक्षिणं वा लोकार्द्धं तदितरेणं तुल्यमतः पूर्वापरश्रेणयो दक्षिणोत्तरश्रेणयश्च समसङ्ख्यप्रदेशाः, ताश्च काश्चित् कृतयुग्माः काश्चिद् द्वापरयुग्माश्च भवन्ति न पुनस्त्र्योजप्रदेशाः कल्योजप्रदेशा वा, तथाहि—असद्भावस्थापनया दक्षिणपूर्वाद् रुचकप्रदेशात्पूर्वतो यल्लोकश्रेण्यर्द्धं तत्प्रदेशशतमानं भवति, यच्चापरदक्षिणाद्रुचकप्रदेशादपरतो लोकश्रेण्यर्द्धं तदपि प्रदेशतमानं, ततश्च शतद्वयस्य चतुष्कापहारे पूर्वापरायतलोकश्रेण्याः कृतयुग्मता भवति, तथा दक्षिणपूर्वाद्रुचकप्रदेशाद्दक्षिणो योऽन्यः प्रदेशस्तत आरभ्य पूर्वतो यल्लोकश्रेण्यर्द्धं तन्नवनवतिप्रदेशमानं, यच्चापरदक्षिणायताद्रुचकप्रदेशाद्दक्षिणो योऽन्यत्यः प्रदेशस्तत आरभ्यापरतो लोकश्रेण्यर्द्धंतदपि च नवनवतिप्रदेशमानं, ततश्च द्वयोर्नवनत्योर्मीलने चतुष्कापहारे च पूर्वापरायतलोकश्रेण्या द्वापरयुग्मता भवति, एवमन्यास्वपि लोकश्रेणीषु भावना कार्या, इह चेयं सङ्ग्रहगाथा—

॥ १ ॥ "तिरियाययाउ कडबायराओ लोगस्स संखसंखा वा ।
सेढीओ कडजुम्मा उड्ढमहेआययमसंखा ॥" इति ।

तथा 'अलोगागाससेढीओ णं भंते ! पएसे'त्यादौ 'सिय कडजुम्माओ'त्ति याः क्षुल्लकप्रतरद्वयसामीप्यात्तिरश्चीनतयोत्थिता याश्च लोकमस्पृशन्त्यः स्थितास्ता वस्तुस्वभावात्कृतयुग्माः, यावत्करणात् 'सिय तेओयओ सिय दावरजुम्माओ'त्ति दृश्यं, तत्र च याः क्षुल्लकप्रतरद्वयस्याधस्तनादुपरितनाद्वा प्रतरादुत्थितास्तास्त्र्योजाः, यतः क्षुल्लकप्रतरद्वयस्याध उपरि च प्रदेशतो लोकस्य वृद्धिभावेनालोकस्य प्रदेशत एव हानिभावादेकैकस्य प्रदेशस्यालोकश्रेणीभ्योऽपगमो भवतीति, एवं तदनन्ताराभ्यामुत्थिता द्वापरयुग्माः, 'सिय कलिओगाओ'त्ति तदनन्तराभ्यामेवोत्थिताः कल्योजाः, एवं पुनः पुनस्ता एव यथासम्भवं वाच्या इति ।

'उड्ढाययाण'मित्यादि, इह क्षुल्लकप्रतरद्वयमाने या उत्थिता ऊर्द्धायतास्ता द्वापरयुग्माः तत ऊर्द्धमधश्चैकैकप्रदेशवृद्ध्या कृतयुग्माः क्वचिच्चैकप्रदेशवृद्ध्याऽन्यत्र वृद्ध्यभावेन त्र्योजाः, कल्योजास्त्विह न संभवन्ति वस्तुस्वभावात्, एतच्च भूमौ लोकमालिख्य केदाराकारप्रदेशवृद्धिमन्तं ततः सर्वं भावनीयमिति ॥ अथ प्रकारान्तरेण श्रेणीप्ररूपणायाह—

**मू. (८७६)** *कति णं भंते ! सेढीओ प० ?, गोयमा ! सत्त सेढीओ पन्नत्ताओ, तंजहा—उज्जुआयता एगओवंका दुहओवंका एगओखहा दुहओखहा चक्कवाला अद्धचक्कवाला ।*

*परमाणुपोग्गलाणं भंते ! किं अणुसेढीं गती पवत्तति विसेढिं गती पवत्तति ?, गोयमा ! अणुसेढीं गति पवत्तति नो विसेढीं गती पवत्तति ।*

*दुपएसियाणं भंते ! खंधाणं अणुसेढीं गती पवत्तति विसेढीं गती पवत्तति एवं चेव, एवं जाव अनंतपएसियाणं खंधाणं । नेरइयाणं भंते ! किं अणुसेढीं गती पवत्तति विसेढीं गती पवत्तति एवं चेव, एवं जाव वेमाणियाणं ॥*

**वृ.** 'कइ ण'मित्यादि, 'श्रेणयः'प्रदेशपङ्क्तयो जीवपुद्गलसञ्चरणविशेषिताः तत्र 'उज्जुयायत'त्ति ऋजुश्चासावायता चेति ऋज्वायता यया जीवादय ऊर्ध्वलोकादेरधोलोकादौ ऋजुतया यान्तीति, 'एगओ वंक'त्ति 'एकत' एकस्यां दिशि 'वङ्का' वक्र ।यया जीवपुद्गला ऋजु गत्वा वक्रं कुर्वन्ति—श्रेण्यन्तरेण यान्तीति, 'दुहओवंक'त्ति यस्यां वारद्वयं वक्र कुर्वन्ति सा द्विधावक्रा, इयं चोर्ध्वक्षेत्रादाग्नेयदिशोऽधःक्षेत्रे वायव्यदिशि गत्वा य उत्पद्यते तस्य भवति, तथाहि —

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमसमये आग्नेय्यास्तिर्यग् नैऋत्यां याति ततस्तिर्यगेव वायव्यां ततोऽधो वायव्यामेवेति, त्रिसमयेयं त्रसनाड्या मध्ये बहिर्वा भवतीति, 'एगओखह'त्ति यया जीवः पुद्‌गलो वा नाड्या वामपाश्वदिस्तां प्रविष्टस्त यैव गत्वा पुनस्तद्वामपार्श्वादावुत्पद्यते सा एकतःखा, एकस्यां दिशि वामादिपार्श्वलक्षणायां खस्य–आकाशस्य लोकनाडीव्यतिरिक्तलक्षणस्य भावादिति, इयं च द्वित्रिचतुर्वक्रोपेताऽपि क्षेत्रविशेषाश्रितेति भेदेनोक्ता, 'दुहओखह'त्ति नाड्या वामपाश्वदिर्नाडीं प्रविश्य तथैव गत्वाऽस्या एव दक्षिणपार्श्वादौ ययोत्पद्यते सा द्विधाखा।

नाडीबहिर्भूतयोर्वामदक्षिणपार्श्वलक्षणयोर्द्वयोराकाशयोस्तया स्पृष्टत्वादिति, 'चक्कवाल'त्ति चक्रवालं–मण्डलं, ततश्च यया मण्डलेन परिभ्रम्य परमाण्वादिरुत्पद्यते सा चक्रवाला, 'अद्धचक्कवा-ल'त्ति चक्रवालार्द्धरूपा।

अनन्तरं श्रेणय उक्ताः, अथ ता एवाधिकृत्य परमाण्वादिगतिप्रज्ञापनायाह'परमाणु-पोग्गलाणं भंते! इत्यादि,' 'अणुसेढि'न्ति अनुकूला–पूर्वादिदिगभिमुखा श्रेणिर्यत्र तदनुश्रेणि, तद्यथा भवत्येवं गतिः प्रवर्तते, 'विसेढिं'ति विरुद्धा विदिगाश्रिता श्रेणी यत्र तद्विश्रेणि, इदमपि क्रियाविशेषणम्।

अनुश्रेणिविश्रेणिगमनं नारकादिजीवानां प्रागुक्तं, तच्च नारकावासादिषु स्थानषु भवतीतिसम्बन्धात्पूर्वोक्तमपि नारकावासादिकं प्ररूपयन्नाह–

**मू.** *(८७७) इमीसे णं भंते! रयणप्पभाए पुढवि० केवतिया निरयावाससयसहस्सा पप० ?, गोयमा! तीसं निरयावाससयसहस्स प०, एवं जहा पढमसते पंचमुद्देसगे जाव अनुत्तरविमाणत्ति*

**वृ.** 'इमीसे ण'मित्यादि, इदं च नरकावासादिकं छद्मस्थैरपि द्वादशाङ्गप्रभावादवसीयत इति तत्प्ररूपणायाह–

**मू.** *(८७८) कइविहे णं भंते! गणिपिडए प० ?, गोयमा! दुवालसंगे गणिपिडए पं० तं०–आयारो जाव दिट्ठिवाओ, से किं तं आयारो ?, आयारे णं समणामं निग्गंथाणं आयारगो० एवं अंगपरूवणा भाणियव्वा जहा नंदीए। जाव–*

**वृ.** 'कइविहे ण'मित्यादि, 'से किं तं आयारो'त्ति प्राकृतत्वात्, अथ कोऽसावाचारः ?, अथवा किं तद्वस्तु यदाचार इत्येवं व्याख्येयमु, 'आयारेणं'ति आचारेण शास्त्रेण करणभूतेन अथवा आचारे अधिकरणभूते णमित्यलङ्कारे 'आयाइत्येवं व्याख्येयम्, 'आयारेणं'ति आचारेण शास्त्रेण करणभूतेन अथवा आचारे अधिकरणभूते णमित्यलङ्कारे 'आयारगो' इत्यनेनेदं सूचितम्– 'आयारगोयरविणयवेणइयसिक्खाभासाअभासाचरणकरणजायामायवित्तीओ आघवेज्जंति'त्ति, तत्राचारो–ज्ञानाद्यनेकभेदभिन्नः गोचरो–भिक्षाग्रहणविधिलक्षणः विनयो–ज्ञानादिविनयः वैनयिकं–विनयफलं कर्म्मक्षयादि शिक्षा–ग्रहणासेवनाभेदभिन्ना –

–अथवा 'वेणइय'त्ति वैनयिको विनयो वा–शिष्यस्तस्य शिक्षा वैनयिकशिक्षा विनेयशिक्षा वा भाषा–सत्याऽसत्यामृषा च अभाषा–मृषा सत्यामृषा च चरणं–व्रतादि करणं–पिण्डविशुद्ध्यादि यात्रा–संयमयात्रा मात्रा–तदर्थमाहारमात्रा वृत्ति–विविधैरभिग्रहविशेषैर्वर्त्तनं आचारश्च गोचरश्चेत्यादिर्द्वन्द्वस्ततश्च ता आख्यायन्ते–अभिधियन्ते, इह च यत्र कृवचिदन्यतरोपा-दानेऽन्य-तरगतार्थाभिधानं तत्सर्वं तत्प्राधान्यख्यापनार्थमेवावसेयमिति। 'एवं अंगपरूवणा भाणियव्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जहा नंदीए' त्ति एवमिति–पूर्वप्रदर्शितप्रकारवता सूत्रेणाचाराद्यङ्गप्ररूपणा भणितव्या यथा नन्द्यां सा च तत एवावधार्या, अथ कियद्दूरमियङ्गप्ररूपणा नन्द्युक्ता वक्तव्या इत्याह–

**मू. (८७९)** *सुत्तत्थो खलु पढमो बीओ निज्जुत्तिमीसिओ भणिओ।*
*तइओ य निरवसेसो एस विही होइ अनुओगे ॥*

**वृ.** 'जाव सुत्तत्थो' गाहा, सूत्रार्थमात्रप्रतिपादनपरः सूत्रार्थोऽनुयोग इति गम्यते, खलुशब्दस्त्वेवकारार्थः स चावाधारणे इति, एतदुक्तं भवति–गुरुणा सूत्रार्थमात्राभिधानलक्षण एव प्रथमोऽनुयोगः कार्यो, मा भूत् प्राथमिकविनेयानां मतिमोह इति, द्वितीयोऽनुयोगः सूत्रस्पर्शकनिर्युक्तिमिश्रः कार्य इत्येवंभूतो भणितो जिनादिभि, 'तृतीयश्च' तृतीयः पुनरनुयोगो निरवशेषो निरवशेषस्य प्रसक्तानुप्रसक्तस्यार्थस्य कथनात्, 'एषः' अनन्तरोक्तः प्रकारत्रयलक्षणो 'भवति' स्यात् 'विधि' विधान्म् 'अनुयोगे' सूत्रस्यार्थेनानुरूपतया योजनलक्षणे विषयभूते इति गाथार्थ।

**मू. (८८०)** *एएसि णं भंते! नेरतियाणं जाव देवाणं सिद्धाण य पंचगतिसमासेणं कयरे २? पुच्छा, गोयमा! अप्पाबहुयं जहा बहुवत्तव्वयाए अट्ठगइसमासअप्पाबहुगं च।*

*एएसि णं भंते! सइंदियाणं एगिंदियाणं जाव अनिंदियाण य कयरे २?, एयंपि जहा बहुवत्तव्वयाए तहेव ओहियं पयं भाणियव्वं, सकाइयअप्पाबहुगं तहेव ओहियं भाणियव्वं।*

*एएसि णं भंते! जीवाणं पोग्गलाणं जाव सव्वपज्जवाण य कयरे २ जाव बहुवत्तव्वयाए, एएसि णं भंते जीवाणं आउयस्स कम्मस्स बंधगाणं अबंधगाणं जहा बहुवत्तव्वयाए जाव आउयस्स कम्मस्स अबंधगा विसेसाहिया। सेवं भंते! सेवं भंतेत्ति ॥*

**वृ.** अनन्तरमङ्गप्ररूपणोक्ता, अङ्गेषु च नारकादयः प्ररूप्यन्त इति तेषामेवाल्पबहुत्वप्रतिपादनायाह– 'एएसि ण' मित्यादि, 'पंचगइसमाणेणं' ति पञ्चगत्यन्तर्भाविन, एषां चाल्पबहुत्वं तथा वाच्यं यथा बहुवक्तव्यतायां प्रज्ञापनायास्तृतीयपदे इत्यर्थः, तच्चैवमर्थतः।

॥१॥ "नरनेरइया देवा सिद्धा तिरिया कमेण इह होंति।
थोवमसंखअसंखा अनंतगुणिया अनंतगुणा ॥"

अट्ठगइसमासप्पाबहुयं च' त्ति अष्टगतिसमासेन यदल्पबहुत्वं तदपि यथा बहुवक्तव्यतायां तथा वाच्यम्, अष्टगतयश्चैवं–नरकगतिस्तथा तिर्यग्नरामरगतयः स्त्रीपुरुषभेदाद्द्वेधा सिद्धगतिश्चेत्यष्टौ, अल्पबहुत्वं चैवमर्थतः–

॥१॥ "नारी १ नर २ नेरइय ३ तिरित्थि ४ सुर ५ देवि ६ सिद्ध ७ तिरिया य ८।
थोव असंखगुणा चउ संखगुणा नंतगुण दोन्नि ॥"

'सइंदियाणं एगेंदियाण' मित्यादौ यावत्करणाद् द्वीन्द्रियादीनि चत्वारि पदानि वाच्यानि 'एयंपि जहा बहुवत्तव्वयाए तहेव' त्ति एतदप्यल्पबहुत्वं यथा बहुवक्तव्यतायामुक्तं तथ वाच्यं, तच्च पर्याप्तकापर्याप्तकभेदेनापि तत्रोक्तं इह तु यत्सामान्यतस्तदेव वाच्यमिति दर्शयितुमाह– 'ओहियं पदं भाणियव्वं' ति तच्चैवमर्थतः।

"पण १ चउ २ ति ३ दुय ४ अनिंदिय ५ एगिंदि ६ सइंदिया ७ कमा हुंति।
थोवा १ तिन्नि य अहिया ४ दोनंत गुणा ६ विसेसहिया ७ ॥

सकाइयअप्पाबहुगं तहेव ओहियं भाणियव्वं' ति सकायिकपृथिव्यप्तेजोवायुवनस्पतित्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकायिकाकायिकनां यथाऽल्पबहुत्वं सामान्यतस्तत्रोक्तं तथैवेहापि भणितव्यं, तच्चैवमर्थतः-

॥ १ ॥ "तस १ तेउ २ पुढवि ३ जल ४ वाउकाय ५ अकाय ६ वणस्सइ ७ सकाया ८।
थोव १ असंखगुणा २ हिय तिन्नि उ ५ दोनंतगुण ७ अहिया ८॥"

अल्पबहुत्वाधिकारादेवेदमाह-- 'एएसि णं'मित्यादि, 'जीवाणं पोग्गलाणं' इह यावत्करणादिदं दृश्यं- 'समयाणं दव्वाणं पएसाणं'ति 'जहा बहुवत्तव्वयाए'त्ति, तदेवमर्थतः-

॥ १ ॥ "जीवा १ पोग्गल २ समया ३ दव्व ४ पएसा य ५ पज्जवा ६ चेव।
थोवा १ नंता २ नंता ३ विसेसअहिया ४ दुवेऽनंता ६ ॥"

इह भावना-यतो जीवाः प्रत्येकमनन्तानन्तैः पुद्गलैर्बद्धाः प्रायो भवन्ति, पुद्गलास्तु जीवैः संबद्धा असंबद्धाश्च भवन्तीत्यतः स्तोकाः पुद्गलेभ्यो जीवाः, यदाह-

॥ २ ॥ "जं पोग्गलावबद्धा जीवा पाएण होंति तो थोवा।
जीवेहिं विरहिया अविरहिया व पुन पोग्गला संति ॥"

जीवेभ्योऽनन्तगुणाः पुद्गलाः, कथं ?, यत्तैजसादिशरीरं येन जीवेन परिगृहीतं तत्ततो जीवात्पुद्गलपरिमाणमाश्रित्यानन्तगुणं भवति, तथा तैजसशरीरात्प्रदेशतोऽनन्तगुणं कार्म्मणं, एवं चैते जीवप्रतिबद्धे अनन्तगुणे, जीवविमुक्ते च ते ताभ्यामनन्तगुणे भवतः, शेषशरीरचिन्ता त्विह च कृता, यस्मात्तानि मुक्तान्यपि स्वस्वस्थाने तयोरनन्तभागे वर्त्तन्ते, तदेवमिह तैजसशरीरपुद्गला अपि जीवेभ्योऽनन्तगुणाः किं पुनः कार्म्मणादिपुद्गलराशिसहिताः, तथा पञ्चदशविधप्रयोगपरिणताः पुद्गलाः स्तोकास्तेभ्यो मिश्रपरिणताः अनन्तगुणास्तेभ्योऽपि विस्रसापरिणता अनन्तगुणास्त्रिविधा एव च पुद्गलाः सर्व एव भवन्ति, जीवाश्च सर्वेऽपि प्रयोगपरिणतपुद्गलानां प्रतनुकेऽनन्तभागे वर्तन्ते, यस्मादेवं तस्माज्जीवेभ्यः सकाशात्पुद्गला बहुभिरनन्तानन्तकैर्गुणिताः सिद्धा इति, आह च-

॥ १ ॥ "जं जेण परिग्गहियं तेयादि जिएण देहमेक्केकं।
तत्तो तमनंतगुणं पोग्गलपरिणामओ होइ ॥
॥ २ ॥ तेयाओ पुण कम्मगमनंतगुणियं जओ विणिद्दिट्ठं।
एवं ता अवबद्धाइं तेयगकम्माइं जीवेहिं ॥
॥ ३ ॥ इत्तोऽनंतगुणाइं तेसिं चिय जाणि होंति मुक्का इं।
इह पुण थोवत्ताओ अग्गहणं सेसदेहाणं ॥
॥ ४ ॥ जं तेसिं मुक्का इंपि होंति सट्ठाणऽनंतभागंमि।
तेणं तदग्गहणमिहं बद्धाबद्धाण दोण्हंपि ॥
॥ ५ ॥ इह पुण तेयसरीरगबद्धच्चिय पोग्गला अनंतगुणा।
जीवेहिंतो किं पुण सहिता अवसेसरासीहिं ? ॥
॥ ६ ॥ थोवा भणिया सुत्ते पन्नरसविहप्पओगपाओग्गा।
तत्तो मीसपरिणया नंतगुणा पोग्गला भणिया ॥
॥ ७ ॥ तो वीससापरिणया तत्तो भणिया अनंतसंगुणिया।
एवं तिविहपरिणया सव्वेवि य पोग्गला लोए ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥८॥ जं जीवा सव्वेवि य एक्कंमि पओगपरिणयाणंपि ।
वट्टंति पोग्गलाणं अनंतभागंमि तणुयम्मि ॥
॥९॥ बहुएहिं अनंतानंतएहिं तेण गुणिया जिएहिंतो ।
सिद्धा हवंति सव्वेवि पोग्गला सव्वलोगंमि ॥

ननु पुद्गलेभ्योऽनन्तगुणाः समया इति यदुक्तं तन्न संगतं, तेभ्यस्तेषां स्तोकत्वात्, स्तोकत्वं च मनुष्यक्षेत्रमात्रवर्त्तित्वात् समयानां पुद्गलानां सकललोकवर्त्तित्वादिति, अत्रोच्यते, समयक्षेत्रे ये केचन द्रव्यपर्यायाः सन्ति तेषामेकैकस्मिन् साम्प्रतसमयो वर्त्तते, एवं च साम्प्रतः समयो यस्मात्समयक्षेत्रद्रव्यपर्यवगुणो भवति तस्मादनन्ताः समया एकैकस्मिन् समये भवन्तीति, आह च–

॥१॥ 'होंति य अनंतगुणिया अद्धासमया उ पोग्गलेहिंतो ।
ननु थोवा ते नरखेत्तमेत्ततव्वत्तणाओत्ति ॥
॥२॥ भन्नइ समयक्खेत्तंमि सन्ति जे केइ दव्वपज्जाया ।
वट्टइ संपयसमओ तेसिं पत्तेयमक्केक्क॥
॥३॥ एवं संपयसमओ जं समयक्खेत्तपज्जवब्भत्थो ।
तेणानंता समया भवंति एक्केक्कसमयंमि ॥

एवं च वर्त्तमानोऽपि समयः पुद्गलेभ्योऽनन्तगुणो भवति, एकद्रव्यस्यापि पर्यवाणामनन्तानन्तत्वात्, किञ्चि–न केवलमित्थं पुद्गलेभ्योऽनन्तगुणाः समयाः सर्वलोकद्रव्यप्रदेशपर्यायेभ्योऽप्यनन्तगुणास्ते संभवन्ति, तथाहि–यत् समस्तलोकद्रव्यप्रदेशपर्यवराशेः–समयक्षेत्र द्रव्यप्रदेशपर्यवराशिना भक्ताल्लभ्यते तावत्सु समयेषु तात्विकेषु गतेषु लोकद्रव्यप्रदेशपर्यवसङ्ख्यासमाना औपचारिकसमयसङ्ख्या लभ्यते ।

एतद्भावना चैवं–किलासद्भावकल्पनया लक्षं लोकद्रव्यप्रदेशपर्यवाणां तस्य समयक्षेत्रद्रव्यप्रदेशपर्यवराशिना कल्पनया सहस्रमानेन भागे हते शतंलब्धं, ततश्च किल तात्विकसमय शते गते लोकद्रव्यप्रदेशपर्यवसङ्ख्यातुल्या समयक्षेत्रद्रव्यप्रदेशपर्यवरूपसमयसङ्ख्या लभ्यते, समयक्षेत्रापेक्षयाऽसङ्ख्यातगुणलोकस्य कल्पनया शतगुणत्वात् ।

तथाऽन्येष्वपि तावत्सु तात्विकसमयेषु गतेषु तावन्त एवौपचारिकसमया भवन्तीति, एवमसङ्ख्यातेषु कल्पनया शतमानेषु तात्विकसमयेषु पौनःपुन्येन गतेष्वनन्ततमायां कल्पनया सहस्रतमायां वेलायां गता भवन्ति तात्त्विकसमयालोकद्रव्यप्रदेशपर्यवमात्राः कल्पनया लक्षप्रमाणाः, एवं चैकैकस्मिंस्तात्विकसमयेऽनन्तानामौपचारिकसमयानां भावात्सर्वलोकद्रव्यप्रदेशपर्यवराशेरपि समया अनन्तगुणाः प्राप्नुवन्ति किं पुनः पुद्गलेभ्य इति, यदाह–

॥१॥ "जं सव्वलोगदव्वप्पएसपज्जवगणस्स भइयस्स ।
लब्भइ समयक्खेत्तप्पएसपज्जायपिंडेण ॥
॥२॥ एवइसमएहिं गएहिं लोगपज्जवसमा समयसंखा ।
लब्भइ अन्नेहिंपि य तत्तियमेत्तेहिं तावइया ॥
॥३॥ एवमसंखेज्जेहिं समएहिं गएहिं तो गया होंति ।
समयाओ लोगदव्वप्पएसपज्जायमेत्ताओ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥४॥ इय सव्वलोगपज्ञवरासीओवि समया अनंतगुणा।
पावंति गणेहंता किं पुण ता पोग्गलेहिंतो ॥

अन्यस्तु प्रेरयतिउत्कृष्टतोऽपि षण्मासमात्रमेव सिद्धिगतेरन्तरं भवति तेन च सेत्स्यद्भ्यः सिद्धेभ्योऽपि च जीवेभ्योऽसङ्ख्यातगुणा एव समया भवन्ति कथं पुनः सर्वजीवेभ्योऽनन्तगुणा भविष्यन्तीति, इहाप्यौपचारिकसमयोपेक्षया समयानामनन्तगुणत्वं वाच्यमिति, अथ समयेभ्यो द्रव्याणि विशेषाधिकानीति, कथम् ?, अत्रोच्यते,यस्मात्सर्वे समयाः प्रत्येकं द्रव्याणि शेषाणि च जीवपुद्गलधर्मास्तिकायादीनि तेष्वेव क्षिप्तानीत्तः केवलेभ्यः समयेभ्यः सकाशात् समस्तद्रव्याणि विशेषाधिकानि भवन्ति न सङ्ख्यातगुणादीनि, समयद्रव्यापेक्षया जीवादिद्रव्याणमल्पतरत्वादिति, उक्तञ्च–

॥१॥ "एत्तो समएहिंतो होंति विसेसाहियाइं दव्वाइं।
जं भेया सव्वेच्चिय समया दव्वाइं पत्तेयं ॥

॥२॥ सेसाइ जीवपोग्गलधम्माधम्मंबराइं छूढाइं।
दव्वट्ठाए समएसु तेण दव्वा विसेसहिया ॥

नन्वद्धासमयानां कस्माद्रव्यत्वमेवेष्यते ? समयस्कन्धापेक्षया प्रदेशार्थत्वस्यापि तेषां युज्यमानत्वा, तथाहि–यथा स्कन्धो द्रव्यं सिद्धं स्कन्धावयवा अपि यथा प्रदेशाः सिद्धाः एवं समयस्कन्धवर्त्तिनः समया भवन्ति प्रदेशाश्च द्रव्यं चेति, अत्रोच्यते, परमाणूनामन्योऽन्यसव्यपेक्षत्वेन स्कन्धत्वं युक्तं, अद्धासमयानां पुनरन्योऽन्यापेक्षिता नास्ति, यतः कालसमयाः प्रत्येकत्वे च काल्पनिकस्कन्धाभावे च वर्त्तमानाः प्रत्येकवृत्तय एव तत्स्वभावत्वात् तस्मात्तेऽन्योऽन्यनिरपेक्षाः अन्योऽन्यनिरपेक्षत्वाच्च न ते वास्तवस्कन्धनिष्पादकास्ततश्च नैषां प्रदेशार्थतेति, उक्तश्चात्र–

॥१॥ "आहऽद्धासमयाणं किं पुण दव्वट्ठए व नियमेणं।
तेसि पएसट्ठाविहु जुज्जइ खंधं समासज्ज ॥

॥२॥ सिद्धं खंधो दव्वं तदवयवाविय जहा पएसत्ति।
इय तव्वत्ती समया होंति पएसा य दव्वं च।

॥३॥ भन्नइ परमाणूणं अन्नोन्नमवेक्ख खंधया सिद्धा।
अद्धासमयाणं पुण अन्नोन्नावेक्खया नत्थि ॥

॥४॥ अद्धासमया जम्हा पत्तेयत्ते य खंधभावे य।
पत्तेयवत्तिणो च्चिय ते तेणऽन्नोन्ननिरवेक्खा ॥

अथ द्रव्येभ्यः प्रदेशा अनन्तगुणा इत्येतत्कथम् ?, उच्यते, अद्धासमयद्रव्येभ्य आकाशप्रदेशानामन्तगुणत्वात्, ननु क्षेत्रप्रदेशानां कालसमयानां च समानेऽप्यनन्तत्वे किं कारणमाश्रित्याकाशप्रदेशा अनन्तगुणाः कालसमयाश्च तदनन्तभागवर्त्तिनः ? इति, उच्यते, एकस्यामनाद्यपर्यवसितायामाकाशप्रदेशश्रेण्यामेकैकप्रदेशानुसारतस्तिर्यगायत श्रेणीनां कल्पनेन ताभ्योऽपि चैकैकप्रदेशानुसारेणैवोर्ध्वाधआयतश्रेणीविरचनेनाकाशप्रदेशघनो निष्पाद्यते, कालसमयश्रेण्यां तु सैव श्रेणी भवति न पुनर्घनस्ततः कालसमयाः स्तोका भवन्तीति, इह गाथाः–

॥१॥ "एत्तो सव्वपएसानंतगुणा खप्पएसनंतत्ता।
सव्वागासमनंतं जेण जिणिंदेहिं पन्नत्तं ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥२॥ आह समेऽनंतत्तंमि खेत्तकालाण किं पुण निमित्तं ।
भणियं खमनंतगुणं कालो य सिमनंतभागंमि ॥
॥३॥ भन्नइ नभसेढीए अणाइयाए अपज्जवसियाए ।
निप्फज्जइ खंमि घणो न उ कालो तेण सो थोवो ॥
–प्रदेशोभ्योऽनन्तगुणाः पर्याया इति, एतद्भावनार्थं गाथा–
॥१॥ "एत्तो य अनंतगुणा पज्जाया जेण नहपएसम्मि ।
एक्केक्कमि अनता अगुरुलहू पज्जवा भणिया ॥"

शतकं–२५ उद्देशकः–३ समाप्तः

## –: शतकं–२५ उद्देशकः–४ :–

वृ. तृतीयोद्देशके संस्थानादीनां परिमाणमुक्तं, चतुर्थे तु परिमाणस्यैव भेदा उच्यन्ते, इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

*मू. (८८१) कति णं भंते ! जुम्मा पन्नत्ता ?, गोयमा ! चत्तारि जुम्मा पं०, तं०–कडजुम्मे जाव कलिओगे, से केण० एवं वु० चत्तारि जुम्मा पं० कडजुम्मे जहा अट्ठारसमसते चउत्थे उद्देसए तहेव जाव से तेण० गोयमा ! एवं वु० ।*

*नेरइयाणं भंते ! कति जुम्मा प० ?, गोयमा ! चत्तारि जुम्मा पं०, तंजहा–कडजुम्मे जाव कलियोए, से केण० एव वु० नेरइयाणं चत्तारि जुम्मा पं०, तं०–कडजुम्मे अट्ठो तहेव एवं जाव वाउकाइयाणं, वणस्सइकाइयाणं भंते ! पुच्छा, गोयमा ! वणस्सइकाइया सिय कडजुम्मा सिय तेयोया सिय दावरजुम्मा सिय कलियोगा ।*

*से केणट्ठे० एवं वुच्चइ वणस्सइकाइया जाव कलियोगा ?, गोयमा ! उववायं पडुच्च, से तेणट्ठेणं तं चेव, बेंदियाणं जहा नेरइयाणं एवं जाव वेमाणि०, सिद्धाणं जहा वणस्सइकाइयाणं ।*

*कतिविहा णं भंते ! सव्वदव्वा प० ?, गोयमा ! छव्विहा सव्वदव्वा प० तंजहा–धम्मत्थिकाए अधम्मत्थिकाए जाव अद्धासमए ।*

*धम्मत्थिकाए णं भंते ! दव्वट्ठयाए किं कडजुम्मे जाव कलिओगे ?, गोयमा ! नो कडजुम्मे नो तेयोए नो दावरजुम्मे कलिओए, एवं अहम्मत्थिकाएवि, एवं आगासत्थिकाएवि, जीवत्थिकाए णं भंते ! पुच्छा, गोयमा ! कडजुम्मे नो तेयोये नो दावरजुम्मे नो कलियोये, पोग्गलत्थिकाए णं भंते ! पुच्छा, गोयमा ! सिय कडजुम्मे जाव सिय कलियोगे, अद्धासमये जहा जीवत्थिकाए ।*

*धम्मत्थिकाए णं भंते ! पएसट्ठयाए किं कडजुम्मे ? पुच्छा, गोयमा ! कडजुम्मे नो तेयोए नो दावरजुम्मे नो कलियोगे एवं जाव अद्धासमए ।*

*एएसि णं भंते ! धम्मत्थिकाय अधम्मत्थिकाय जाव अद्धासमयाणं दव्वट्ठयाए० एएसि णं अप्पाबहुगं जहा बहुवत्तव्वयाए तहेव निरवसेसं ।*

*धम्मत्थिकाए णं भंते ! किं ओगाढे अनोगाढे ?, गोयमा ! ओगाढे नो अनोगाढे, जइ ओगाढे किं संखेज्जपएसोगाढे असंखेज्जपएसोगाढे अनंतपएसोगाढे ?, गोयमा ! नो संखेज्जपएसोगाढे असंखेज्जपएसोगाढे नो अनंतपएसोगाढे ।*

*जइ असंखेज्जपएसोगाढे किं कडजुम्मपएसोगाढे ?, पुच्छा, गोयमा ! कडजुम्मपएसोगाढे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नो तेओगे नो दावरजुम्मे नो कलियोगपएसोगाढे, एवं अधम्मत्थिकायेवि, एवं आगासत्थिकायेवि, जीवत्थिकाये पुग्गलत्थिकाये अद्धासमए एवं चेव ।*

*इमा णं भंते ! रयणप्पभा पुढवी किं ओगाढा अनोगाढा जहेव धम्मत्थिकाए एवं जाव अहेसत्तमा, सोहम्मे एवं चेव, एवं जाव इसिपब्भारा पुढवी ।*

**वृ.** 'कति ण'मित्यादि, 'जुम्म'त्ति संज्ञाशब्दत्वाद्राशिविशेषाः । 'नेरइयाणं भंते ! कइ जुम्मा ?' इत्यादौ 'अट्ठो तहेव'त्ति स चार्थः-'जेणं नेरइया चउक्कएणं अवहारेणं २ अवहीरमाणा २ चउपज्जवसिया ते णं नेरइया कडजुम्मे'त्यादि इति ।

वनस्पतिकायिकसूत्रे 'उववांं पडुच्च'त्ति, यद्यपि वनस्पतिकायिका अनन्तत्वेन स्वभावात् कृतयुग्मा एव प्राप्नुवन्ति तथाऽपि गत्यन्तरेभ्य एकादिजीवानां तत्रोत्पादमङ्गीकृत्य तेषां चतूरूपत्वमयौगपद्येन भवतीत्युच्यते, उद्वर्त्तनामप्यङ्गीकृत्य स्यादेतत् केवलं सेह न विवक्षितेति ।

अथ कृतयुग्मादिभिरेव राशिभिर्द्रव्याणां प्ररूपणायेदमाह-'कतिविहा णं भंते ! सव्वदव्वा' इत्यादि, तत्र 'कतिविधानि' कतिस्वभावानि कतीत्यर्थः, 'धम्मत्थिकाए ण'मित्यादि 'कलियोगे'त्ति एकत्वाद्धर्म्मास्तिकायस्य चतुष्कापहाराभावेनैकस्यैवावस्थानात्कल्योज एवासाविति, 'जीवत्थी'-त्यादि, जीवद्रव्यामामवस्थितानन्तत्वात्कृतयुग्मतैव, 'पोग्गलत्थिकाए' इत्यादि ।

पुद्‌गलास्तिकायस्यानन्तभेदत्वेऽपि सङ्घातभेदभाजनत्वाच्चातुर्विध्यमध्येयं, अद्धासमयानां त्वतीतानागतानामवस्थितानन्तत्वात्कृतयुग्मत्वमत एवाह-'अद्धासमए जहा जीवत्थिकाए'त्ति उक्ता द्रव्यार्थता, अथ प्रदेशार्थता तेषामेवोच्यते-'धम्मत्थी'त्यादि, सर्वाण्यपि द्रव्याणि कृतयुग्मानि प्रदेशार्थतया । अवस्थितासङ्घातप्रदेशत्वादवस्थितानन्तप्रदेशत्वादवस्थितान- न्तप्रदेशत्वाच्चेति

अथैतेषामेवाल्पबहुत्वमुच्यते-'एएसि ण'मित्यादि, 'जहा बहुवत्तव्वयाए'त्ति यथा प्रज्ञापनायास्तृतीयपदे, तच्चैवमर्थतः-धर्मास्तिकायादयस्त्रयो द्रव्यार्थतया तुल्या एकैकद्रव्यरूपत्वात्, तदन्यापेक्षया चाल्पे, जीवास्तिकायस्ततोऽनन्तगुणो जीवद्रव्याणामनन्तत्वात्, एवं पुद्‌गलास्तिकायाद्धासमयः, प्रदेशार्थचिन्तायां त्वाद्यौ प्रत्येकसमङ्ख्येयप्रदेशत्वेन तुल्यौ तदन्येभ्यः स्तोकौ च, जीवपुद्‌गलाद्धासमयाकाशास्तिकायास्तु क्रमेणानन्तगुणा इत्यादि ०।अथ द्रव्याण्येव क्षेत्रापेक्षया कृतयुग्मादिभि स्तोकौ च, जीवपुद्‌गलाद्धासमयाकाशास्तिकायास्तु क्रमेणानन्तगुणा इत्यादि अथ द्रव्याण्येव क्षेत्रापेक्षया कृतयुग्मादिभि प्ररूपयन्नाह-'धम्मत्थिकाए' इत्यादि ।

'असंखेज्जपएसोगाढे'त्ति असङ्ख्यातेषु लोकाकाशप्रदेशेष्ववगाढोऽसौ लोकाकाशप्रमाणत्वात्तस्येति, 'कडजुम्मपएसोगाढे'त्ति लोकस्यावस्थितासङ्ख्येयप्रदेशत्वेन कृतयुग्मप्रदेशता, लोकप्रमाणत्वेन च धर्म्मास्तिकायस्यापि कृतयुग्मतैव, एवं सर्वास्तिकायानां लोकावगाहित्वात्तेषां नवरमाकाशास्तिकायस्यावस्थितानन्तप्रदेशत्वादात्मावगाहित्वाच्च कृतयुग्मप्रदेशावगाढताऽद्धासमयसय चावस्थितासङ्ख्येयप्रदेशात्मकमनुष्यक्षेत्रावगाहित्वादिति अथावगाहप्रस्तावादिदमाह-'इमा ण'मित्यादि ॥ अथ कृतयुग्मादिभिरेव जीवादीनि षड्विंशतिपदान्येकत्वपृथक्त्वाभ्यां निरूपयन्नाह-

***मू. (८८२)*** *जीवे णं भंते ! दव्वट्ठयाए किं कडजुम्मे पुच्छा, गोयमा ! नो कडजुम्मे नो तेयोगे नो दावरजुम्मे कलिओए, एवं नेरइएवि एवं जाव सिद्धे ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जीवा णं भंते ! दव्वट्ठयाए किं कडजुम्मा ? पुच्छा, गोयमा ! ओघादेसेणं कडजुम्मा नो तेयोगा नो दावर० नो कलिओगा, विहाणादेसेणं नो कडजुम्मा नो तेयोगा नो दावरजुम्मा कलियोगा, नेरइया णं भंते ! दव्वट्ठयाए पुच्छा, गोयमा ! ओघादेसेणं सिय कडजुम्मा जाव सिय कलियोगा, विहाणादेसेणं नो कडजुम्मा नो तेयोगा णो दावरजुम्मा कलिओगा एवं जाव सिद्धा ।*

*जीवे णं भंते ! पएसट्ठयाए किं कड० पुच्छा, गोयमा ! जीवपएसे पडुच्च कडजुम्मे नो तेयोगे नो दावर० नो कलियोगे, सरीरपएसे पडुच्च० सिय कडजुम्मे जीव सिय कलियोगे, एवं जाव वेमाणिए । सिद्धे णं भंते ! पस० किं कडजुम्मे ? पुच्छा, गोयमा ! कडजुम्मे नो तेयोगे नो दावरजुम्मे नो कलिओए ०*

*जीवा णं भंते ! पएसट्ठयाए किं कडजुम्मे ? पुच्छा, गोयमा ! जीवपएसे पडुच्च ओघादेसेणवि विहाणादेसेणवि कडजुम्मा नो तेयोगा नो दावर० नो कलिओगा, सरीरपएसे पडुच्च ओघादेसेणं सिय कडजुम्मा जाव सिय कलियोगा, विहाणादेसेणं कडजुम्मावि जाव कलियोगावि, एवं नेरइयावि, एवं जाव वेमाणिया ।*

*सिद्धा णं भंते ! पुच्छा, गोयमा ! ओघादेसेणवि विहाणादेसेणवि कडजुम्मा नो तेयोगा नो दावरजुम्मा नो कलिओगा ॥*

**वृ.** 'जीवे ण'मित्यादि, द्रव्यार्थतयैको जीवः एकमेव द्रव्यं तस्मात्कल्योजो न शेषाः । 'जीवा ण'मित्यादि, जीवा अवस्थितानन्तत्वादोघादेशेन–सामान्यतः कृतयुग्माः, 'विहाणादेसेणं'ति भेदप्रकारेणैकैकश इत्यर्थः कल्योजा एकत्वात्तस्वरूपस्य ।

'नेरइया ण'मित्यादौ 'ओघादेसेणं'ति सर्व एव परिगण्यमानाः 'सिय कडजुम्म'त्ति कदाचिच्चतुष्कापहारेण चतुरग्रा भवन्ति, एवं 'सिय तेओयाओ' इत्याद्यप्यवगन्तव्यमिति ।

उक्ता द्रव्यार्थतया जीवादयः, अथ तथैव प्रदेशार्थयोच्यन्ते–'जीवे ण'मित्यादि, 'जीवपएसे पडुच्च कडजुम्म'त्ति असङ्ख्यातत्वादवस्थितत्वाच्च जीवप्रदेशानां चतुरग्र एव जीवः प्रदेशतः 'सरीरपएसे पडुच्चे'त्यादि, औदारिकाशरीरप्रदेशानामनन्तत्वेऽपि संयोगवियोगधर्म्मत्वादयुगपच्चतुर्विधता स्यात् ।

'जीवा ण'मित्यादि, 'ओघादेसेणवि विहाणादेसेणवि कडजुम्म'त्ति समस्तजीवानां प्रदेशा अनन्तत्वादवस्थितत्वाच्च एकैकस्य जीवस्य प्रदेशा असङ्ख्यातत्वादवस्थितत्वाच्च चतुरग्रा एव, शरीरप्रदेशापेक्षया त्वोघादेशेन सर्वजीवशरीरप्रदेशानामयुगपच्चातुर्विध्यमनन्तत्वेऽपि तेषां सङ्घातभेदभावेनानवस्थितत्वात्, 'विहाणादेसेणं कडजुम्मावी'त्यादि, विधानादेशेनैकैकजीवशरीरस्य प्रदेशगणनायां युगपच्चातुर्विध्यं भवति, यतः कस्यापि जीवशरीरस्य कृतयुग्मप्रदेशता कस्यापि त्र्योजप्रदेशतेत्येवमादीति ॥ अथ क्षेत्रतो जीवादि तथैवाह–

**मू. (८८३)** *'जीवे णं भंते ! किं कडजुम्मपएसोगाढे पुच्छा, गोयमा ! सिय कडजुम्मपएसोगाढे जाव सिय कलिओगपएसोगाढे, एवं जाव सिद्धे ।*

*जीवा णं भंते ! किं कडजुम्मपएसोगाढा पुच्छा, गोयमा ! ओघादेसेणं कडजुम्मपएसोगाढा नो तेयोग० नो दावर० नो कलियोग०, विहाणादेसेणं कडजुम्मपएसोगाढावि जाव कलियोगपएसोगाढावि ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नेरइयाणं पुच्छा, गोयमा ! ओधादेसेणं सिय कडजुम्मपएसोगाढा जाव सिय कलियोगपए-सोगाढा, विहाणादेसेणं कडजुम्मपएसोगाढावि जाव कलियोगपएसोगाढावि, एवं एगिंदियसिद्ध-वज्ञा सव्वेवि, सिद्धा एगिंदिया य जहा जीवा ।*

*जीवे णं भंते ! किं कडजुम्मसमयट्ठितीए जाव सिय क० पुच्छा, गोयमा ! कडजुम्मसमयट्ठितीए नो तेयोग० नो दावर० नो कलियोगसमयट्ठितीए ।*

*नेरइए णं भंते ! पुच्छा, गोयमा ! सिय कडजुम्मसमयट्ठितीए जाव सिय कलियोग-समयट्ठितीए, एवं जाव वेमाणिए, सिद्धे जहा जीवे । जीवा णं भंते ! पुच्छा गोयमा ! ओधादेसेणवि विहाणादेसेणवि कडजुम्मसमयट्ठितीया नो तेओग० नो दावर० नो कलिओग० ।*

*नेरइया णं० पुच्छा, गोयमा ! ओघादेसेणं सिय कडजुम्मसमयट्ठितीया जाव सिय कलियोग-समयट्ठितीयावि, विहाणादेसेणं कडजुम्मसमयट्ठितीयावि जाव कलियोगसमयट्ठितीयावि, एवं जाव वेमाणिया, सिद्धा जहा जीवा ॥*

**वृ.** 'जीवे ण'मित्यादि, औदारिकादिशरीराणां विचित्रावगाहनत्वाच्चतुरग्रादित्वमस्तीत्यत एवाह–'सिय कडजुम्मे'त्यादि । जीवा णं भंते !' इत्यादि, समस्तजीवैरवगाढानां प्रदेशानामसङ्ख्यात-त्वादवस्थितत्वाच्चतुरग्रता एवेत्योघादेशेन कृतयुग्मप्रदेशावगाढाः, विधानादेशतस्तु विचित्रत्वाद-वगाहनाया युगपच्चतुर्विधास्ते, नारकाः पुनरोघतो विचित्रपरिणामत्वेन विचित्रशरीरप्रमाणत्वेन विचित्रावगाहप्रदेशप्रमाणत्वादयौगपद्येन चतुर्विधा अपि, विधानतस्तु विचित्रावगाहनत्वादेकदाऽपि चतुर्विधास्ते भवन्ति ।

एवं एगिंदियसिद्धवज्ञा सव्वेवि'त्ति असुरादयो नारकवद्वक्तव्या इत्यर्थः, तत्रौघतस्ते कृतयुग्मादयोऽयौगपद्येन विधानतस्तु युगपदेवेति, 'सिद्धा एगिंदिया य जहा जीव'त्ति सिद्धा एकेन्द्रियाश्च यथा जीवास्तथा वाच्या इत्यर्थः, ते चौधतः कृतयुग्मा एव विधानतस्तु युगपच्चतुर्विधा अपि, युक्तिस्तूभयत्रापि प्राग्वत् ।

अथ स्थितिमाश्रित्य जीवादि तथैव प्ररूप्यते–'जीवे ण'मित्यादि, तत्रातीतानागवर्त्तमान-कालेषु जीवोऽस्तीति सर्वाद्धाया अनन्तसमयात्मकत्वादवस्थितत्वाच्चासौ कृतयुग्मसमयस्थितिक एव, नारकादिस्तु विचित्रसमयस्थितिकत्वात्कदाचिच्चतुरग्रः कदाचिदन्यत्रितयवर्त्तीति ।

'जीवा ण'मित्यादि, बहुत्वे जीवा ओघतो विधानतश्च चतुरग्रसमयस्थितिका एव अनाद्यनन्तत्वेनान्तसमयस्थितिकत्वात्तेषां, नारकादयः पुनर्विचित्रसमयस्थितिकाः, तेषां च सर्वेषां स्थितिसमयमीलने चतुष्कापहारे चौघादेशेन स्यात् कृतयुग्मसमयस्थितिका इत्यादि, विधानतस्तु युगपच्चतुर्विधा अपि । अथ भावतो जीवादि तथैव प्ररूप्यते–

**मू. (८८४)** *जीवे णं भंते ! कालवन्नपज्ञवेहिं किं कडजुम्मे ? पुच्छा, गोयमा ! जीवपएसे पडुच्च नो कडजुम्मे जाव नो कलियोगे सरीरपएसे पडुच्च सिय कडजुम्मे जाव सिय कलियोगे, एवं जाव वेमाणिए, सिद्धो न चेव पुच्छिज्ञति ।*

*जीवा णं भंते ! कालवन्नपज्ञवेहिं पुच्छा, गोयमा ! जीवपएसे पडुच्च ओघादेसेणवि विहाणा-देसेणवि नो कडजुम्मा जाव नो कलिओगा, सरीरपएसे पडुच्च ओघादेसेणं सिय कडजुम्मा जाव सिय कलियोगा, विहाणादेसेणं कडजुम्मावि जाव कलि०, एवं जाव वेमा०, एवं नीलवन्नपज्ञवेहिं*

'नियंठे ण'मित्यादौ 'कप्पातीते होज्ञ'त्ति निर्ग्रन्थः कल्पातीत एव भवेद्, यतस्तस्य जिनकल्पस्थविरकल्पधर्म्मा न सन्तीति ।

**मू.** *(९०४) पुलाए णं भंते ! किं सामाइयसंजमे होज्ञा छेओवट्ठावणियसंजमे होज्ञा परिहारविसुद्धियसंजमे होज्ञा सुहुमसंपरागसंजमे होज्ञा अहक्खायसंजमे होज्ञा ?, गोयमा ! सामाइयसंजमे वा होज्ञा छेओवट्ठावणियसंजमे वा होज्ञा नो परिहारविसुद्धियसंजमे होज्ञा नो सुहुमसंपरागे होज्ञा नो अहक्खायसंजमे होज्ञा, एवं बउसेवि एवं पडिसेवणाकुसीलेवि ।*

*कसायकुसीले णं पुच्छा, गोयमा ! सामाइयसंजमे वा होज्ञा जाव सुहुमसंपरागसंजमे वा होज्ञा नो अहक्खायसंजमे होज्ञा । नियंठे णं पुच्छा, गोयमा ! नो सामाइयसंजमे होज्ञा जाव णो सुहुमसंपरागसंजमे हो० अहक्खायसं० होज्ञा, एवं सिणाएवि ५ ।*

**वृ.** चारित्रद्वारं व्यक्तमेव ।

**मू.** *(९०५) पुलाए णं भंते ! किं पडिसेवए होज्ञा अपडिसेवए होज्ञा ?, गोयमा ! पडिसेवए होज्ञा नो अपडिसेवए होज्ञा ।*

*जइ पडिसेवए होज्ञा किं मूलगुणपडिसेवए होज्ञा उत्तरगुणपडिसेवए होज्ञा ?, गोयमा ! मूलगुणपडिसेवए वा होज्ञा उत्तरगुणपडिसेवए वा होज्ञा, मूलगुण पडिसेवमाणे पंचण्हं आसवाणं अन्नयरं पडिसेवेज्ञा, उत्तरगुण पडिसेवमाणे दसविहस्स पच्चक्खाणस्स अन्नयरं पडिसेवेज्ञा ।*

*बउसे णं पुच्छा, गोयमा ! पडिसेवए होज्ञा नो अपडिसेवए होज्ञा, जइ पडिसेवए होज्ञा किं मूलगुणपडिसेवए होज्ञा उत्तरगुणपडिसेवए वा होज्ञा ?, गोयमा ! नो मूलगुणपडिसेवए होज्ञा उत्तरगुणपडिसेवए होज्ञा, उत्तरगुण पडिसेवमाणे दसविहस्स पच्चक्खाणस्स अन्नयरं पडिसेवेज्ञा, पडिसेवणाकुसीले जहा पुलाए ।*

*कसायकुसीले णं पुच्छा, गोयमा ! नो पडिसेवए होज्ञा अपडिसेवए होज्ञा, एवं निग्गंथेवि, एवं सिणाएवि ६ ।*

**वृ.** प्रतिसेवनाद्वारे च–'पुलाए ण'मित्यादि, 'पडिसेवए'त्ति संयमप्रतिकूलार्थस्य सञ्ज्वलनकषायोदयात्सेवकः प्रतिसेवकः संयमविराधक इत्यर्थः ।

'मूलगुणपडिसेवए'त्ति मूलगुणाः–प्राणातिपातविरमणादयस्तेषां प्रातिकूल्येन सेवको

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलगुणप्रतिसेवकः, एवमुत्तरगुणप्रतिसेवकोऽपि नवरमुत्तरगुणा–दशविधप्रत्याख्यानरूपाः।

'दसविहस्स पच्चक्खाणस्स'त्ति तत्र दशविधं प्रत्याख्यानं 'अनागतमइक्कंतंकोडीसहिय'-मित्यादि प्राग्व्याख्यातस्वरूपम्।

अथवा 'नवकारपोरिसीए' इत्याद्यावश्यकप्रसिद्धम् 'अन्नयरं पडिसेवेज्ज'त्ति एकतरं प्रत्याख्यानं विराधयेत्।

उपलक्षणत्वाच्चास्य पिण्डविशुद्ध्यादिविराधकत्वमपि संभाव्यत इति ६ ०। ज्ञानद्वारे–

**मू. (९०६)** *पुलाए णं भंते! कतिसु नाणेसु होज्जा?, गोयमा! दोसु वा तिसु वा होज्जा, दोसु होज्जमाणे दोसु आभिनिबोहियनाणे सुअनाणे होज्जा तिसु होज्जामाणे तिसु आभिनिबोहियनाणे सुयनाणे ओहिनाणे होज्जा, एवं बउसेवि, एवं पडिसेवणाकुसीलेवि।*

*कसायकुसीले णं पुच्छा, गोयमा! दोसु वा तिसु वा चउसु वा होज्जा, दोसु होज्जामाणे दोसु आभिनिबोहियनाणे सुयनाणे होज्जा, तिसु होज्जामाणे तिसु आभिनिबोहियनाणसुयनाणओहिनाणेसु होज्जा अहवा तिसु होमाणे आभिनिबोहियनाणसुयनाणमणपज्जवनाणेसु होज्जा, चउसु होज्जमाणे चउसु आभिनिबोहियनाणसुयनाणओहिनाणमणपज्जवनाणेसु होज्जा, एवं नियंठेवि*

*सिणाए णं पुच्छा, गोयमा! एगंमि केवलनाणे होज्जा।*

**वृ.** आभिनिबोधिकादिज्ञानप्रस्तावात् ज्ञानविशेषभूतं श्रुतं विशेषेण चिन्तयन्नाह–

**मू. (९०७)** *पुलाए णं भंते! केवतियं सुयं अहिज्जेज्जा?, गोयमा! जहन्नेणं अट्ठ पवयणमायाओ उक्कोसेणं दस पुव्वाइं अहिज्जेज्जा। एवं पडिसेवणाकुसीलेवि।*

*कसायकुसीले पुच्छा, गोयमा! जहन्नेणं अट्ठ पवयणमायाओ उक्कोसेणं चोद्दस पुव्वाइं अहिज्जेज्जा, एवं नियंठेवि।*

*सिणाए पुच्छा, गोयमा! सुयवतिरित्ते होज्जा ७।*

**वृ.** 'पुलाए णं भंते! केवइयं सुय'मित्यादि, 'जहन्नेणं अट्ठपवयणमायाओ'त्ति अष्टप्रवचन-मातृपालनरूपत्वाच्चारित्रस्य तद्वतोऽष्टप्रवचनमातृपरिज्ञानेनावश्यं भाव्यं, ज्ञानपूर्वकत्वाच्चारित्रस्य

तत्परिज्ञानं च श्रुतादतोऽष्टप्रवचनमातृप्रतिपादनपरं श्रुतं बकुशस्य जघन्यतोऽपि भवतीति, तच्च 'अट्ठण्हं पवयणमाईणं' इत्यस्य यद् विवरणसूत्रं तत्संभाव्यते।

यत्पुनरुत्तराध्ययनेषु प्रवचनमातृनामकमध्ययनं तद्गुरुत्वाद्विशिष्टतरश्रुतत्वाच्च न जघन्यतः संभवतीति, बाहुल्याश्रयं चेदं श्रुतप्रमाणं तेन न माषतुषादिना व्यभिचार इति। तीर्थद्वारे–

**मू. (९०८)** *पुलाए णं भंते! किं तित्थे होज्जा अतित्थे होज्जा?, गोयमा! तित्थे होज्जा नो अतित्थे होज्जा, एवं बउसेवि, एवं पडिसेवणाकुसीलेवि।*

*कसायकुसीले पुच्छा, गोयमा! तित्थे वा होज्जा अतित्थे वा होज्जा, जइ अतित्थे होजा किं तित्थयरे होज्जा पत्तेयबुद्धे होज्जा?, गोयमा! तित्थगरे वा होज्जा पत्तेयबुद्धे वा होज्जा, एवं नियंठेवि, एवं सिणावि ८।*

**वृ.** 'तित्थे'त्ति सङ्घे सति, 'कसायकुसीले'त्यादि कषायकुशीलश्छद्मस्थावस्थायां तीर्थङ्करोऽपि स्यादतस्तदपेक्षया तीर्थव्यवच्छेदे च तदन्योऽप्यसौ स्यादिति तदन्यापेक्षया च 'अतित्थे वा होज्जे'त्युच्यते, अत एवाह–'जइ अतित्थे होज्जा किं तित्थयरे होज्जे'त्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिङ्गद्वारे लिङ्गं द्विधा–द्रव्यभावभेदात्, तत्र च भावलिङ्गं–ज्ञानादि, एतच्च स्वलिङ्गमेव, ज्ञानादिभावस्यार्हतानामेव भावात्, द्रव्यलिङ्गं तु द्वेधा–स्वलिङ्गपरलिङ्गभेदात्, तत्र स्वलिङ्ग–रजोहरणादि, परलिङ्गं च द्विधा–कुतीर्थिकलिङ्गं गृहस्थलिङ्ग चेत्यत आह–

**मू. (९०९)** *पुलाए णं भंते! किं सलिंगे होज्जा अन्नलिंगे होज्जा गिहिलिंगे होज्जा?, गोयमा दव्वलिंगिं पडुच्च सलिंगे वा होज्जा अन्नलिंगे वा होज्जा गिहिलिंगे वा होज्जा, भावलिंगिं पडुच्च नियमा सलिंगे होज्जा एवं जाव सिणाए ९।*

**वृ.** 'पुलाए णं भंते ! किं सलिंगे'त्यादि । त्रिविधलिङ्गेऽपि भवेद्, द्रव्यलिङ्गान-पेक्षत्वाच्चरणपरिणामस्येति ।

**मू. (९१०)** *पुलाए णं भंते! कइसु सरीरेसु होज्जा?, गोयमा! तिसु ओरिलयतेयाकम्मएसु होज्जा।*

*बउसे णं भंते! पुच्छा, गोयमा! तिसु वा चउसु वा होज्जा, तिसु होज्जमाणे तिसु ओरालियतेया-कम्मएसु होज्जा, चउसु होज्जमाणे चउसु ओरालियवेउव्वियतेयाकम्मएसु होज्जा, एवं पडिसेवणाकुसीलेवि।*

*कसायकुसीले पुच्छा, गोयमा! तिसु वा चउसु वा पंचसु वा होज्जा, तिसु होज्जमाणे तिसु ओरालियतेयाकम्मएसु होज्जा, चउसु होमाणे चउसु ओरालियवेउव्वियतेयाकम्मएसु होज्जा पंचसु होज्जमाणे पंचसु ओरालियवेउव्वियआहारगतेयाकम्मएसु होज्जा, नियंठे सिणाओ य जहा पुलाओ*

**वृ.** शरीरद्वारं व्यक्तं ।

**मू. (९११)** *पुलाए णं भंते! किं कम्मभूमीए होज्जा अकम्मभूमीए होज्जा?, गोयमा! जम्मणसंतिभावं पडुच्च कम्मभूमीए होज्जा नो अकम्मभूमीए होज्जा, बउसे णं पुच्छा, गोयमा! जम्मणसंतिभावं पडुच्च कम्मभूमीए होज्जा नो अकम्भूमीए होज्जा, साहरणं पडुच्च कम्मभूमीए वा होज्जा अकम्मभूमीए वा होज्जा, एवं जाव सिणाए ।*

**वृ.** क्षेत्रद्वारे–'पुलाए णं भंते! किं कम्मभूमीए' इत्यादि, 'जम्मणसंतिभावं पडुच्च'त्ति जन्म–उत्पादः सद्भावश्च–विवक्षितक्षेत्रादन्यत्र तत्र वा जातस्य तत्र चरणभावेनास्तित्वमेव तयोश्च समाहारद्वन्द्वोऽतस्तत्प्रतीत्य पुलाकः कर्म्मभूमौ भवेत्, तत्र जायते विहरति च तत्रैवेत्यर्थः ।

अकर्म्मभूमौ पुनरसौ न जायते तज्जातस्य चारित्राभावात्, न च तत्र वर्त्तते, पुलाकलब्धौ वर्त्तमानस्य देवादिभिः संहर्त्तुमशक्यत्वात् । बकुशसूत्रे 'नो अकम्मभूमीए होज्ज'त्ति अकर्म्मभूमौ बकुशो न जन्मतो भवति स्वकृतविहारतश्च, परकृतविहारतस्तु कर्म्मभूम्यामकर्म्मभूम्यां च संभवतीत्येतदेवाह–

'साहरणं पडुच्चे'त्यादि, इह च संहरणं–क्षेत्रान्तरात् क्षेत्रान्तरे देवादिभिर्नयनम् ।। कालद्वारे–

**मू. (९१२)** *पुलाए णं भंते ! किं ओसप्पिणिकाले होज्जा उस्सप्पिणिकाले हो० नोओसप्पिणिनोउस्सप्पिणिकाले वा होज्जा?, गोयमा! ओसप्पिणिकाले वा होज्जा उस्सप्पिणिकाले वा होज्जा नोउस्सप्पिणिनोओसप्पिणिकाले वा होज्जा ।*

*जइ ओसप्पिणिकाले होज्जा किं सुसमसुसमाकाले होज्जा १ सुसमाकाले होज्जा २ सुसमदूसमाकाले होज्जा ३ दूसमसुसमाकाले होज्जा ४ दूसमाकाले होज्जा ५ दूसमदूसमाकाले*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होज्ञा ६ ?, गो० ! जंमणं पडुच्च नो सुसमसुसमाकाले होज्ञा १ नो सुसमाकाले होज्ञा २ सुसमदूसमाकाले होज्ञा ३ दूसमसुसमाकाले वा होज्ञा ४ नो दूसमाकाले होज्ञा ५ नो दूसमदूसमाकाले होज्ञा ६, संतिभावं पडुच्च नो सुसमसुसमाकाले होज्ञा नो सुसमाकाले होज्ञा सुसमदूसमाकाले वा होज्ञा दूसमसुसमाकाले वा होज्ञा दूसमाकाले वा होज्ञा नो दूसमदूसमाकाले होज्ञा ।

जइ उस्सप्पिणिकाले होज्ञा किं दूसमदूसमाकाले होज्ञा दूसमाकाले होज्ञा दूसमसुसमाकाले होज्ञा सुसमदूसमाकाले होज्ञा सुसमाकाले होज्ञा सुसमसुसमाकाले होज्ञा ?, गो० ! जंमणं पडुच्च नो दूसमदूसमाकाले होज्ञा १ दूसमाकाले वा होज्ञा २ दूसमसुसमाकाले वा होज्ञा ३ सुसमदूसमाकाले वा होज्ञा ४ नो सुसमाकाले होज्ञा ५ नो सुसमसुसमाकाले होज्ञा ६, संतिभावं पडुच् नोदूसमदूसमाकाले होज्ञा १ दूसमाकाले होज्ञा २ दूसमसुसमाकाले वा होज्ञा ३ सुसमदूसमाकाले वा होज्ञा ४ नो सुसमाकाले होज्ञा ५ नो सुसमसुसमाकाले होज्ञा ६ ।

जइ नोउस्सप्पिणिनोअवसप्पिणिकाले होज्ञा किं सुसमसुसमापलिभागे हो० सुसमपलिभागे० सुसमदूसमापलिभागे हो० दूसमसुसमापलिभागे ?, गोयमा ! जंमणं संतिभावं च पडुच्च नो सुसमसुसमापलिभागे होज्ञा नो सुसमपलि भागे० नो दूसमदूसमापलिभागे होज्ञा दूसमसुसमापलिभागे हो० ।

बउसे णं पुच्छा, गोयमा ! ओसप्पिणिकाले वा होज्ञा उस्सप्पिणिकाले वा हो० नोओसप्पिणिनोउस्सप्पिणिकाले वा होज्ञा, जइ ओसप्पिणिकाले हो० किं सुसमसुसमाकाले पुच्छा, गोयमा ! जंमणं संतिभावं च पडुच्च नो सुसमसुसमाकाले होज्ञा नो सुसमाकाले होज्ञा सुसमदूसमाकाले वा होज्ञा दूसमसुसमाकाले वा होज्ञा दूसमाकेले वा हो० नो दूसमदूसमाकाले हो०, साहरणं पडुच्च अन्नयरे समाकाले होज्ञा ।

जइ उस्सप्पिणिकाले होज्ञा किं दूसमदूसमाकाले हो० ६ ? पुच्छा, गोयमा ! जम्मणं पडुच्च नो दूसमदूसमाकाले होज्ञा जहेव पुलाए, संतिभावं पडुच्च नो दूसमदूसमाकाले होज्ञा नो दूसमाकाले होज्ञा एवं संतिभावेणवि जहा पुलाए जाव नो सुसमसुसमाकाले हो०, साहरणं पडुच्च अन्नयरे समाकाले हो० ।

जइ नोओसप्पिणिनोउस्सप्पिणिकाले हो० ? पुच्छा, गोयमा ! जम्मणसंतिभावं पडुच्च नो सुसमसुसमापलिभागे होज्ञा जहेव पुलाए जाव दूसमसुसमापलिभागे हो०, साहरणं पडुच्च अन्यरे पलिभागे होज्ञा, जहा बउसे एवं पडिसेवणाकुसीलेवि, एवं कसायकुसीलेवि ।

नियंठो सिणाओ य जहा पुलाओ, नवरं एतेसिं अब्भहियं साहरणं भाणियव्वं, सेसं तं चेव १२ ।

**वृ.** त्रिविधः कालोऽवसर्प्पिण्यादि, तत्राद्यद्वयं भरतैरावतयोस्तृतीयस्तु महाविदेहहेमवतादिषु, 'सुसमदूसमाकाले वा होज्ञ'त्ति आदिदेवकाले इत्यर्थः, 'दुस्समसुसमकाले व'त्ति चतुर्थेऽरके इत्यर्थः, उक्तात्समाद्वयान्नान्यत्रासौ जायते, 'संतिभावं पडुच्चे'त्यादि ।

अवसर्प्पिण्यां सद्भावं प्रतीत्य तृतीयचतुर्थपञ्चमारकेषु भवेत्, तत्र चतुर्थारके जातः सन् पञ्चमेऽपि वर्त्तते, तृतीयचतुर्थारके सद्भावस्तु तज्ञन्मपूर्वक इति ।

'जई उस्सप्पिणी'त्यादि, उत्सर्पिण्यां द्वितीयतृतीयचतुर्थेष्वरकेषु जन्मतो भवति, तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीतियस्यान्ते जायते तृतीये तु चरणं प्रतिपद्यते, तृतीयचतुर्थयोस्तु जायते चरणं च प्रतिपद्यत इति, सद्‌भावं पुनः प्रतीत्य तृतीयचतुर्थयोरेव तस्य सत्ता, तयोरेव चरणप्रतिपत्तेरिति ।

'जइ नोओसप्पीणी'त्यादि, 'सुसमपलिभागे'त्ति सुषमसुषमायाः प्रतिभागः–सादृश्यं यत्र काले स तथा, स च देवकुरूत्तरकुरुषु, एवं सुषमाप्रतिभागो हरिवर्षरम्यकवर्षेषु, सुषमदुष्षमाप्रतिभागो हैमवतैरण्यवतेषु दुष्षसुषमाप्रतिभागो महाविदेहेषु ।

'नियंठो सिणाओ य जा पुलाओ'त्ति एतौ पुलाकवद्वक्तव्यौ, विशेषं पुनराह–'नवरं एएसिं अब्भहियं साहरणं भाणियव्वं'ति पुलाकस्य हि पूर्वोक्तयुक्तया संहरणं नास्ति एतयोश्च तत्संभवतीति कृत्वा तद्वाच्यं, संहरणद्वारेण च यस्तयोः सर्वकालेषु सम्भवोऽसौ पूर्वसंहतयोर्निर्ग्रन्थस्नातकत्वाप्रातौ द्रष्टव्यो, यत्तो नापगतवेदानां संहरणमस्तीति, यदाह–

॥१॥ समणीमवगयवेयं परिहारपुलायमप्पमत्तं च ।
चोद्दसपुव्वि आहारयं च ण य कोइ संहरइ ॥ इति ॥

गतिद्वारे सौधर्मादिका देवगतिरिन्द्रादयस्तद्‌भेदास्तदायुश्च पुलाकादीनां निरूप्यते–

**मू. (९१३)** *पुलाए णं भंते ! कालगए समाणे किं गतिं गच्छति ?, गोयमा ! देवगतिं गच्छति, देवगतिं गच्छमाणे कं भवणवासीसु उववज्जेज्जा वाणमंतरेसु उववज्जेज्जा जोइवसेमाणिएसु उववज्जेज्जा ?, गोयमा !नो भवणवासीसु नो वाण० णो जोइस० वेमाणिएसु उवव०, वेमाणिएसु उववज्जमाणे जह० सोहम्मे कप्पे उक्कोसेणं सहस्सारे कप्पे उववज्जेज्जा ।*

*बउसे णं एवं चेव नवरं उक्कोसेणं अच्चुए कप्पे, पडिसेवणाकुसीले जहा बउसे, कसायकुसीले जहा पुलाए, नवरं उक्कोसेणं अनुत्तरविमाणेसु उववज्जेज्जा ।*

*नियंठे णं भंते ! एवं चेव, एवं जाव वेमाणिएसु उववज्जमाणे अजहन्नमणुक्कोसेणं अनुत्तरविमाणेसु उववज्जेज्जा ।*

*सिणाए णं भंते ! कालगए समाणे किं गतिं गच्छइ ?, गोयमा ! सिद्धिगतिं गच्छइ ।*

*पुलाए णं भंते ! देवेसु उववज्जमाणे किं इंदत्ताए उववज्जेज्जा सामाणियत्ताए उववज्जेज्जा तायत्तीसाए वा उववज्जेज्जा लोगपालत्ताए वा उववज्जेज्जा अहमिंदत्ताए वा उववज्जेज्जा गोयमा ! अविराहणं पडुच्च इंदत्ताए उवव० सामाणियताए उववज्जेज्जा लोगपालत्ताए वा उवव० तायत्तीसाए वा उववज्जेज्जा नो अहमिंदत्ताए उववज्जेज्जा, विराहणं पडुच्च अन्नयरेसु उववज्जेज्जा, एवं बउसेवि, एवं पडिसेवणाकुसीलेवि ।*

*कायकुसीले पुच्छा, गोयमा ! अविराहणं पडुच्च इंदत्ताए वा उववज्जेज्जा जाव अहमिंदत्ताए उवव० विराहणं पडुच्च अन्नयरेसु उवव०, नियंठे पुच्छा, गोयमा अविराहणं पडुच्च नो इंदत्ताए उवव० जाव नो लोगपालत्ताए उवव० अहमिंदत्ताए उवव०, विराहणं पडुच्च अन्नयरेसु उवव०*

*पुलायस्स णं भंते ! देवलोगेसु उववज्जमाणस्स केवतियं कालं ठिती प० ?, गोयमा ! जहन्नेणं पलिओवमपुहुत्तं उक्कोसे० अट्ठारस सागरोवमाइं, बउसस्स पुच्छा, गोयमा ! जहन्नेणं पलिओवमपुहुत्तं उक्कोसेणं बावीसं सागरोवमाइं, एवं पडिसेवणाकुसीलेवि ।*

*कसायकुसीलस्स पुच्छा, गोयमा ! जहन्नेणं पलिओवमपुहुत्तं उक्कोसेणं तेत्तीसं सागरोवमाइं, नियंठस्स पुच्छा, गोयमा ! अजहन्नमणुक्कोसेणं तेत्तीसं सागरोवमाइं ९१३ ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. तत्र च 'अविराहणं पडुच्च'त्ति अविराधना ज्ञानादीनां अथवा लब्धेरनुपजीवनाऽतस्तां प्रतीत्य अविराधकाः सन्त इत्यर्थः, 'अन्नयरेसु उववज्जेज्ज'त्ति भवनपत्यादीनामन्यतरेषु देवेषूत्पद्यन्ते विराधितसंयमानां भवनपत्याद्युत्पादस्योक्तत्वात्, यच्च प्रागुक्तं 'वेमाणिएसु उववज्जेज्ज'त्ति तत्संयमाविराधकत्वमाश्रित्यावसेयम्।

संयमद्वारे संयमस्थानानि तेषां चाल्पत्वादि चिन्त्यते, तत्र–

**मू. (९१४)** *पुलागस्स णं भंते ! केवतिया संयमट्ठाणा प० ?, गो० ! असंखेज्जा संयमट्ठाणा प० एवं जाव कसायकुसीलस्स। नियंठस्स णं भंते ! केवइया संजमट्ठाणा प० ?, गोयमा ! एगे अजहन्नमणुक्कोसए संजमट्ठाणे, एवं सिणायस्सवि।*

*एतेसि णं भंते ! पुलागबउसपडिसेवणाकसायकुसीलनियंठसियाणायाणं संजमट्ठाणाणं कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे नियंठस्स सिणायस्स य एगे अजहन्नमणुक्कोसए संजमट्ठाणे पुलागस्स णं संजमट्ठाणा असखेज्जगुणा बउसस्स संजमट्ठाणा असंखेज्जगुणा पडिसेवणाकुसीलस्स संजमट्ठाणा असंखेज्जगुणा कसायकुसीलस्स संजमट्ठाणा असंखेज्जगुणा।*

**वृ.** 'पुलागस्से'त्यादि, संयमः–चारित्रं तस्य स्थानानि–शुद्धिप्रकर्षाप्रकर्षकृता भेदाः संयमस्थानानि, तानि च प्रत्येकं सर्वाकाशप्रदेशाग्रगुणितसर्वाकाशप्रदेशपरिमाणपर्यवोपेतानि भवन्ति, तानि च पुलाकस्यासङ्ख्येयानि भवन्ति, विचित्रत्वाच्चारित्रमोहनीयक्षयोपशमस्य, एवं यावत्कषायकुशीलस्य, 'एगे अजहन्नमणुक्कोसए संजमठाणे'त्ति निर्ग्रन्थस्यैकं संयमस्थानं भवति, कषायाणामुपशमस्य क्षयस्य चाविचित्रत्वेन शुद्धेरेकविधत्वात्, एकत्वादेव तदजघन्योत्कृष्टं, बहुष्वेव जघन्योत्कृष्टभावसद्भावादिति।

अथ पुलाकादीनां परस्परतः संयमस्थानाल्पबहुत्वमाह–'एएसि ण'मित्यादि, सर्वेभ्यः स्तोकं सर्वस्तोकं निर्ग्रन्थस्य स्नातकस्य च संयमस्थानं, कुतः ?, यस्मादेकं, किंभूतं तत् ? इत्याह– 'अजहन्ने'त्यादि, एत्तच्चैवं शुद्धेरेकविधत्वात्, पुलाकादीनां परस्परेण संयोजनं, तस्य च प्रस्तावनार्थमाह--

**मू. (९१५)** *पुलागस्स णं भंते ! केवतिया चरित्तपज्जवा प० ?, गो० ! अनंता चरित्तपज्जवा प०, एवं जाव सिणायस्स।*

*पुलाए णं भंते ! पुलागस्स सट्ठाणसन्निगासेणं चरित्तपज्जवेहिं किं हीणे तुल्ले अब्भहिए ?, गोयमा ! सिय हीणे १ सिय तुल्ले २ सिय अब्भहिए ३, जइ हीणे अनंतभागहीणे वा अंखेज्जभागहीणे वा संखेज्जइभागहीणे वा संखेज्जगुणहीणे वा असंखेज्जगुणहीणे वा अनंतगुणहीणे वा, अह अब्भहिए अनंतभागमब्भहिए वा असंखेज्जइभागमब्भहिए वा संखेज्जभागमब्भहिए वा संखेज्जगुणब्भहिए वा असंखेज्जुणमब्भहिए वा अनंतगुणमब्भहिए वा।*

*पुलाए णं भंते ! बउसस्स परट्ठाणसन्निगासेणं चरित्तपज्जवेहिं किं हीणे तुल्ले अब्भहिए ?, गोयमा ! हीणे नो तुल्ले नो अब्भहिए, अनंतगुणहीणे, एवं पडिसेवणाकुसीलस्सवि, कसायकुसीलेणं समं छट्ठाणवडिए जहेव सट्ठाणे, नियंठस्स जहा बउसस्स, एवं सिणायस्सवि।*

*बउसे णं भंते ! पुलागस्स परट्ठाणसन्निगासेणं चरित्तपज्जवेहिं किं हीणे तुल्ले अब्भहिए ?, गोयमा ! नो हीणे नो तुल्ले अब्भहिए अनंतगुणमब्भहिए। बउसे णं भंते ! बउसस्स सट्ठाणसन्निगासेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*चरित्तपज्जवेहिं पुच्छा, गोयमा ! सिय हीणे सिय तुल्ले सिय अब्भहिए, जइ हीणे छट्ठाणवडिए। बउसे णं भंते! पडिसेवणाकुसीलस्स परट्ठाणसन्निगासेणं चरित्तपज्जवेहिं किं हीणे० ?, छट्ठाणवडिए, एवं कसायकुसीलस्सवि।*

*बउसे णं भंते ! नियंठस्स परट्ठाणसन्निगासेणं चरित्तपज्जवेहिं पुच्छा, गोयमा ! हीणे नो तुल्ले नो अब्भहिए अनंतगुणहीणे, एवं सिणायस्सवि, पडिसेवणाकुसीलस्स एवं चेव बउसवत्तव्वया भाणियव्वा, कसायकुसीलस्स एस चेव बउसवत्तव्वया नवरं पुलाएणवि समं छट्ठाणवडिए।*

*नियंठे णं भंते ! पुलागस्स परट्ठाणसन्निगासेणं चरित्तपज्जवेहिं पुच्छा, गोयमा ! नो हीणे नो तुल्ले अब्भहिए अनंतगुणमब्भहिए, एवं जाव कसायकुसीलस्स। नियंठे णं भंते ! नियंठस्स सट्ठाणसन्निगासेणं पुच्छा, गोयमा ! नो हीणे तुल्ले नो अब्भहिए, एवं सिणायस्सवि।*

*सिणाए णं भंते ! पुलागस्स परट्ठाणसन्नि० एवं जहा नियंठस्स वत्तव्वया तहा सिणायस्सवि भाणियव्वा जाव सिणाए णं भंते ! सिणायस्स सट्ठाणसन्निगासेणं पुच्छा, गोयमा ! नो हीणे तुल्ले नो अब्भहिए।*

*एएसि णं भंते ! पुलागबकुसपडिसेवणाकुसीलकसायकुसीलनियंठसिणायाणं जहन्नुक्कोसगाणं चरित्तपज्जवाणं कयरे २ जाव विसेसाहिया वा ?, गोयमा ! पुलागस्स कसायकुसीलस्स य एएसि णं जहन्नगा चरित्तपज्जवा दोण्हवि तुल्ला सव्वत्थोवा, पुलागस्स उक्कोसगा चरित्तपज्जवा अनंतगुणा, बउसस्स पडिसेवणाकुसीलस्स य एएसि णं जहन्नगा चरित्तपज्जवा दोण्हवि तुल्ला अनंतगुणा, बउसस्स उक्कोसगा चरित्तपज्जवा अनंतगुणा।*

*पडिसेवणाकुसीलस्स उक्कोसगा चरित्तपज्जवा अनंतगुणा, कसायकुसीलस्स उक्कोसगा चरित्तपज्जवा अनंतगुणा, नियंठस्स सिणायस्स य एतेसि णं अजहन्नमणुक्कोसगा चरित्तपज्जवा दोण्हवि तुल्ला अनंतगुणा १५।*

**वृ.** 'पुलागस्से' त्यादि, 'चरित्तपज्जव' त्ति चारित्रस्य—सर्वविरतिरूपपरिणामस्य पर्यवा—भेदाश्चारित्रपर्यवास्ते च बुद्धिकृता अविभागपलिच्छेदा विषयकृता वा 'सट्ठाणसन्निगासेणं' ति स्वं—आत्मीयं सजातीयं स्थानं—पर्यवाणामाश्रयः स्वस्थानं—पुलाकादेः पुलाकादिरेव तस्य संनिकर्ष—संयोजनं स्वस्थानसंनिकर्षस्तेन, किं ?—'हीणे' त्ति विशुद्धसंयमस्थानसम्बन्धित्वेन विशुद्धतर-पर्यवापेक्षया अविशुद्धतरसंयमस्थानसम्बन्धित्वेनाविशुद्धतराः पर्यवा हीनास्तद्योगात्साधुरपि हीनः 'तुल्ले' त्ति तुल्यशुद्धिकपर्यवयोगात्तुल्यः।

'अब्भहिय' त्ति विशुद्धतरपर्यवयोगादभ्यधिकः, 'सिय हीणे' त्ति अशुद्धसंयमस्थानवर्त्तित्वात् 'सिय तुल्ले' त्ति एकसंयमस्थानवर्त्तित्वात् 'सिय अब्भहिए' त्ति विशुद्धतरसंयमस्तानवर्त्तित्वात्, 'अनंतभागहीणे' त्ति किलासद्भावस्थापनया पुलाकस्योत्कृष्टसंयमस्थानपर्यवाग्रं दश सहस्राणि तस्य सर्वजीवानन्तकेन शतपरिमाणतया कल्पितेन भागे हृते शतं लब्धं द्वितीयप्रतियोगिपुला-कचरणपर्यवाग्रं नव सहस्राणि नवशताधिकानि पूर्वभागलब्धं शतं तत्र प्रक्षिप्तं जातानि दश सहास्राणि, ततोऽसौ सर्वजीवानन्तकभागहारलब्धेन शतेन हीनमित्य- नन्तभागहीनः।

अंखेज्जभागहीणे व' त्ति पूर्वोक्तकल्पितपर्यायराशेर्दशसहस्रस्य लोकाकाश...



Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणेनासङ्ख्येयकेन कल्पनया पञ्चाशत्प्रमाणेन भागे हृते लब्धं द्विशती, द्वितीयप्रतियोगिपुलाचरण-पर्यवाग्रं नव सहस्राण्यष्टौ च शतानि पूर्वभागलब्धा च द्विशती तत्र प्रक्षिप्ता, जातानि दश सहस्राणि, ततोऽसौ लोकाकाशप्रदेशपरिमाणासङ्ख्येयकभागहारलब्धेन शतद्वयेन हीन इत्यसङ्ख्येयभागहीनः

'संखेज्जभागहीणे व'त्ति पूर्वोक्तकल्पितपर्यायराशेर्दशसहस्रस्य उत्कृष्टसङ्ख्येयकेन कल्पनया दशकपरिमामेन भागे हृते लब्धं सहस्रं, द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं नव सहस्राणि पूर्वभागलब्धं च सहस्रं तत्र प्रक्षिप्तं जातानि दश सहस्राणि, ततोऽसावुत्कृष्टसङ्ख्येयकभाग-हारलब्धेन सहस्रेण हीनः ।

'संखेज्जगुणहीणे व'त्ति किलैकस्य पुलाकस्य चरणपर्यवाग्रं कल्पनया सहस्रदशकं द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं च सहस्रं ततश्चोत्कृष्टसङ्ख्येयकेन कल्पनया दशकपरिमाणेन गुणकारेण गुणितः साहस्रो राशिर्जायते दश सहस्राणि, स च तेनोत्कृष्टसङ्ख्येयकेन कल्पनया दशक- परिमाणेन गुणकारेण हीनः—अनभ्यस्त इति सङ्ख्येयगुणहीनः ।

'असंखेज्जगुणहीणे व'त्ति किलैकस्य पुलाकस्य चरणपर्यवाग्रं कल्पनया सहस्रदशकं द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं च द्विशती, ततश्च लोकाकाशप्रदेशपरिमाणेनासङ्ख्येयकेन कल्पनया पञ्चाशत्परिमाणेन गुणकारेण गुणितो द्विशतिको राशिर्जायते दश सहस्राणि, स च तेन लोकाकाशप्रदेशपरिमाणासङ्ख्येयकेन कल्पनया पञ्चाशत्प्रमाणेन गुणकारेण हीन इत्यसङ्ख्येयगुणहीन इति

'अनंतगुणहीणे व'त्ति किलैकस्य पुलाकस्य चरणपर्यवाग्रं कल्पनया सहस्रदशकं द्वितीयप्रतियोगिपुलाकचरणपर्यवाग्रं च शतं, ततश्च सर्वजीवानन्तकेन कल्पनया शतपरिमाणेन गुणकारेण गुणितः शतिको राशिर्जायते दश सहस्राणि, स च तेन सर्वजीवानन्तकेन कल्पनया शतपरिमाणेन गुणकारेण हीन इत्यनन्तगुणहीनः, एवमभ्यधिकषट्स्थानकशब्दार्थोऽप्येभिरेव भागापहारगुणकारैर्व्याख्येयः, तथाहि—

एकस्य पुलाकस्य कल्पनया दश सहस्राणि चरणपर्यवमानं तदन्यस्य नवशताधिकानि नव सहस्राणि, ततो द्वितीयापेक्षया प्रथमोऽनन्तभागाभ्यधिकः, तथा यस्य नव सहस्राण्यष्टौ च शतानि पर्यवाग्रं तस्मात्प्रथमोऽसङ्ख्येयभागाधिकः, तथा यस्य नव सहस्राणि चरणपर्यवाग्रं तस्मा-त्प्रथमः सङ्ख्येयभागाधिकः, तथा यस्य चरणपर्यवाग्रं सहस्रमानं तदपेक्षया प्रथमः सङ्ख्येयगुणाधिकः, तथा यस्य चरणपर्यवाग्रं द्विशती तदपेक्षयाऽऽद्योऽसङ्ख्येयगुणाधिकः, तथा यस्य चरणपर्यवाग्रं शतमानं तदपेक्षयाऽऽघोऽनन्तगुणाधिक इति ॥

'पुलाए णं भंते ! बउसस्से' त्यादि, 'परट्ठाणसन्निगासेणं' ति विजातीययोगमाश्रित्येत्यर्थः, विजातीयश्च पुलाकस्य बकुशादि, तत्र पुलाको बकुशाद्धीनसतथाविधविशुद्ध्यभावात्, 'कसाय-कुसीलेणं समं छट्ठाणवडिए जहेव सट्ठाणे' त्ति पुलाकः पुलाकापेक्षया यथाऽभिहितस्तथा कषायकु-शीलापेक्षयाऽपि वाच्य इत्यर्थः, तत्र पुलाकः कषायकुशीलाद्धीनो वा स्यात् अविशुद्ध-संयमस्थान-वृत्तित्वात् तुल्यो वा स्यात् समानसंयमस्थानवृत्तित्वाद् अधिको वा स्यात् शुद्धतरसंयमस्थान-वृत्तित्वात् ।

यतः—पुलाकस्य कषायकुशीलस्य च सर्वजघन्यानि संयमस्थानान्यधः, ततस्तौ युगपद-सङ्ख्येयानि गच्छतस्तुल्याध्यवसानत्वात्, ततः पुलाको व्यवच्छिद्यते हीनपरिणामत्वात्, व्यवच्छिन्ने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च पुलाके कषायकुशील एकक एवासङ्ख्येयानि संयमस्थानानि गच्छति शुभतरपरिणामत्वात्, ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसङ्ख्येयानि संयमस्थानानि गच्छन्ति, ततश्च बकुशो व्यवच्छिद्यते, प्रतिसेवनाकुशीलकषायकुशीलावसङ्खयेयानि संयमस्थानानि गच्छतस्ततश्च प्रतिसेवनाकुशीलो व्यवच्छिद्यते, कषायकुशीलस्त्वसङ्खयेयानि संयमस्थानानि गच्छति, ततः सोऽपि व्यवच्छिद्यते, ततो निर्ग्रन्थस्नातकावेकं संयमस्थानं प्राप्नुत इति ।

'नियंठस्स जह बउसस्स'त्ति पुलाको निर्ग्रन्थादनन्तगुणहीन इत्यर्थः ॥ चिन्तितः पुलाकोऽवशेषैः सह, अथ बकुशश्चिन्त्यते–

'बउसे ण'मित्यादि, बकुशः पुलाकादनन्तगुणाभ्यधिक एव विशुद्धतरपरिणामत्वात्, बकुशात्तु हीनादिर्विचित्रपरिणामत्वात्, प्रतिसेवाकषायकुशीलाभ्यामपि हीनादिरेव, निर्ग्रन्थस्नातकाभ्यां तु हीन एवेति, 'बउसवत्तव्वया भाणियव्व'त्ति प्रतिसेवाकुशीलस्तथा वाच्यो यथा बकुश इत्यर्थः, कषायकुशीलोऽपि बकुशवद्वाच्यः, केवलं पुलाकाद्बकुशोऽभ्यधिक एवोक्तः सकषायस्तु षट्स्थानपतितो वाच्यो हीनादिरित्यर्थः, तत्परिणामस्य पुलाकापेक्षया हीन सभाधिकस्वभावत्वादिति । अथ पर्यवाधिकारात्तेषामेव जघन्यादिभेदाना पुलाकादिसम्बन्धिनामल्पत्वादि प्ररूपयन्नाह–'एएसि ण'मित्यादि ।

**मू.** *(९१६) पुलाए णं भंते ! किं सयोगी होज्ञा अजोगी वा होज्ञा ?, गोयमा ! सयोगी होज्ञा नो अयोगी होज्ञा ।*

*जइ सयोगी होज्ञा किं मणजोगी होज्ञा वइजोगी होज्ञा काययोगी होज्ञा ?, गोयमा ! मणजोगी वा होज्ञा वयजोगी वा होज्ञा कायजोगी वा होज्ञा, एवं जाव नियंठे ।*

*सिणाए णं पुच्छा, गोयमा ! सयोगी वा होज्ञा अयोगी वा होज्ञा, जइ सयोगी होज्ञा किं मणजोगी होज्ञा सेसं जहा पुलागस्स १६ ॥*

**वृ.** योगद्वारे–'अयोगी वा होज्ज'त्ति इहायोगी शैलेशीकरणे ।

**मू.** *(९१७) पुलाए णं भंते ! किं सागारोवउत्ते होज्ञा अनागारोवउत्ते होज्ञा ?, गोयमा ! सागारोवउत्ते वा होज्ञा अनागारोवउत्ते वा होज्ञा एवं जाव सिणाए १७ ।*

**वृ.** उपयोगद्वारं तु सुगमत्वान्नालिखितम् ।

**मू.** *(९१८)' पुलाए णं भंते ! सकसायी होज्ञा अकसायी होज्जा?, गोयमा ! सकसायी होज्ञा नो अकसायी होज्ञा ।*

*जइ सकसाई से णं भंते ! कतिसु कसाएसु होज्ञा ?, गोयमा ! चउसु कोहमाणमायालोभेसु होज्ञा, एवं बउसेवि, एवं पडिसेवणाकुसीलेवि ।*

*कसायकुसीले णं पुच्छा, गोयमा ! सकसायी होज्ञा नो अकसायी होज्ञा, जइ सकसायी होज्ञा से णं भंते ! कतिसु कसाएसु होज्ञा ?, गोयमा ! चउसु वा तिसु वा दोसु वा एगंमि वा होज्ञा, चउसु होज्जमाणे चउसु संजलणकोहमाणमायालोभेसु होज्ञा तिसु होज्जमाणे तिसु संजलणमाणमायालोभेसु होज्ञा दोसु होज्जमाणे संजलणमायालोभेसु होज्ञा एगंमि होमाणे संजलणलोभे होज्ञा ।*

*नियंठे णं पुच्छा, गोयमा ! नो सकसायी होज्ञा अकसायी होज्ञा, जइ अकसायी होज्ञा किं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उवसंतकसायी होज्ञा खीणकसायी होज्ञा ?, गोयमा ! उवसंतकसायी वा होज्ञा खीणकसायी वा होज्ञा, सिणाए एवं चेव, नवरं नो उवसंतकसायी होज्ञा, खीणकसायी होज्ञा १८ ।*

**वृ.** कषायद्वारे–'सकसाई होज्जं'त्ति पुलाकस्य कषायाणां क्षयस्योपशमस्य चाभावात् । 'तसु होमाणे'इत्यादि, उपश्रमश्रेण्यां क्षपकश्रेण्यां वा सञ्जवलनक्रोधे उपशान्ते क्षीणे वा सेशेषु त्रिषु, एवं माने विगते द्वयोर्मायायां तु विगतायां सूक्ष्मसम्परायगुणस्थानके एकत्र लोभे भवेदिति ॥ लेश्याद्वारे–

**मू. (९१९)** *पुलाए णं भंते ! किं सलेस्से होज्ञा अलेस्से होज्ञा ?, गोयमा ! सलेस्से होज्ञा नो अलेस्से होज्ञा ।*

*जइ सलेस्से होज्ञा से णं भंते ! कतिसु लेस्सासु होज्ञा ?, गोयमा ! तिसु विसुद्धलेस्सासु होज्ञा, तं०–तेउलेस्साए पम्हलेस्साए सुक्कलेस्साए, एवं बउसस्सवि, एवं पडिसेवणाकुसीलेवि ।*

*कसायकुसीले पुच्छा, गोयमा ! सलेस्से होज्ञा नो अलेस्से होज्ञा, जइ सलेस्से होज्ञा से णं भंते ! कतिसु लेसासु होज्ञा ? गोयमा ! छसु लेसासु होज्ञा, तं०–कण्हलेस्साए जाव सुक्कलेस्साए*

*नियंठे णं भंते ! पुच्छा, गोयमा ! सलेस्से होज्ञा नणो अलेस्से होज्ञा, जइ सलेसे हो० से णं भंते ! कतिसु लेस्सासु होज्ञा ?, गोयमा ! एक्काए सुक्कलेस्साए होज्ञा ।*

*सिणाए पुच्छा, गोयमा ! सलेस्से वा अलेस्से वा होज्ञा, जइ सलेस्से हो० से णं भंते ! कतिसु लेस्सासु होज्ञा ? गोयमा ! एगाए परमसुक्कलेस्साए होज्ञा १९ ।*

**वृ.** 'तिसु विसुद्धलेसासु'त्ति भावलेश्यापेक्षया प्रशस्तासु तिसृषु पुलाकादययो भवन्ति, कषायकुशीलस्तु षटएस्वपि, सकषायमेव आश्रित्य 'पुव्वपडिवन्नओ पुण अन्नयरीए उ लेसाए' इत्येतदुक्तमिति संभाव्यते, 'एक्काए परमसुक्काए'त्ति शुक्लध्यानतृतीयभेदावसरे या लेश्या सा परमशुक्लाऽन्यदा तु शुक्लैव, साऽपीतरजीवशुक्ललेश्यापेक्षया स्नातकस्य परमशुक्लेति ।

**मू. (९२०)** *पुलाए णं भंते ! किं वड्ढमाणपरिणामे होज्ञा हीयमाणपरिणामे होज्ञा अवट्ठियपरि० ?, गोयमा ! वड्ढमाणपरि० वा होज्ञा हीयमाणपरिणामे वा होज्ञा अवट्ठियपरिणामे वा होज्ञा, एवं जाव कसायकुसीले ।*

*नियंठे णं पुच्छा, गोयमा ! वड्ढमाणपरिणामे हो० नो हीयमाणप० हो०, अवट्ठियपरिणामे वा होज्ञा, एवं सिणाएवि ।*

*पुलाए णं भंते ! केवइयं कालं वड्ढमाणपरिणामे होज्ञा ?, गोयमा ! जहन्नेणं एक्कं समयं उक्को० अंतोमु०, केवतियं कालं हीयमाणपरिणामे होज्ञा ?, गोयमा ! जह० एक्कं, समयं उक्को० अंतोमु०, केवइयं कालं अवट्ठियपरिणामे होज्ञा ?, गोयमा ! जहन्ने० एक्कं समयं उक्कोसेणं सत्त समया, एवं जाव कसायकुसीले ।*

*नियंठे णं भंते ! केवतियं कालं वड्ढमाणपरिणामे होज्ञा ?, गोयमा ! जहन्ने० अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, केवतियं कालं अवट्ठियपरिणामे होज्ञा ? गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं ।*

*सिणाए णं भंते ! केवइयं कालं वड्ढमाणपरिणामे होज्ञा ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, केवइयं कालं अवट्ठियपरिणामे होज्ञा ?, गोयमा ! जह० अंतोमु०*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उक्कोसे० देसूणा पुव्वकोडी २० ।*

**वृ.** परिणामद्वारे-'वड्डमाणपरिणामे'इत्यादि, तत्र च वर्द्धमानः-शुद्धेरुत्कर्षं गच्छन् हीयमानस्त्वपकर्षं गच्छन् अवस्थितस्तु स्थिर इति, तत्र निर्ग्रन्थो हीयमानपरिणामो न भवति, तस्य परिणामहानौ कषायकुशीलव्यपदेशात्, स्नातकस्तु हानिकारणाभावान्न हीयमानपरिणामः स्यादिति परिणामाधिकारादेवेदमाह- 'पुलाए णं'मित्यादि, तत्र पुलाको वर्द्धमानपरिणामकाले कषायविशेषेण बाधिते तस्मिंस्तस्यैकादिकं समयमनुभवतीत्यत उच्यते जघन्येनैकं समयमिति 'उक्कोसेणं अंतोमुहुत्तं'ति एतस्त्वभावत्वाद्वर्द्धमानपरिणामस्येति ।

एवं बकुशप्रतिसेवाकुशीलकषायकुशीलेष्वपि, नवरं बकुशादीनां जघन्यत एकसमयता रणादपीष्टा, न पुनः पुलाकस्य, पुलाकत्वे मरणाभावात्, स हि मरणकाले कषायकुशीलत्वादिना परिणमति, यच्च प्राक् पुलाकस्य कालगमनं तद्भूतभावापेक्षयेति, निग्रन्थो जघन्येनोत्कर्षेण चान्तर्मुहूर्त्तं वर्द्धमानपरिणामः स्यात्, केवलज्ञानोत्पत्तौ परिणामान्तरभावात्, अवस्थितपरिणामः पुनर्निर्ग्रन्थस्य जघन्यत एकं समयं मरणात्स्यादिति ।

'सिणाए णं भंते!' इत्यादि, स्नातको जघन्येतराभ्यामन्तर्मुहूर्त्तं वर्द्धमानपरिणामः, शैलेश्यां तस्यास्तत्प्रमाणत्वात्, अवस्थितपरिणामकालोऽपि जघन्यतस्तस्यान्तर्मुहूर्त्तं, कथम् ?, उच्यते, यः स केवलज्ञानोत्पादानन्तरमन्तर्मुहूर्त्तमवस्थितपरिणामो भूत्वा शैलेशीं प्रतिपद्यते तदपेक्षयेति, 'उक्कोसेणं देसूणा पुव्वकोडी'त्ति पूर्वकोट्यायुषः पुरुषस्य जन्मतो जघन्येन नवसु वर्षेष्वतिगतेषु केवलज्ञानमुत्पद्यते ततोऽसौ तदूनां पूर्वकोटीमवस्थितपरिणामः शैलेशीं यावद्विहरति, शैलेश्यां च वर्द्धमानपरिणामः स्यादित्येवं देशोनामिति ।। बन्धद्वारे-

**मू. (९२१)** *पुलाए णं भंते! कति कम्मपगडीओ बंधति ?, गोयमा! आउयवज्जाओ सत्त कम्मप्पगडीओ बंधति ।*

*बउसे पुच्छा, गोयमा! सत्तविहबंधए वा अट्ठविहबंधए वा, सत्त बंधमाणे आउयवज्जाओ सत्त कम्मप्पगडीओ बंधति, अट्ठ बंधमाणे पडिपुन्नाओ अट्ठ कम्मप्पगडीओ बंधइ, एवं पडिसेवणा-कुसीलेवि ।*

*कसायकुसीले पुच्छा, गोयमा! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा, सत्त बंधमाणे आउयवज्जाओ सत्त कम्मप्पगडीओ बंधइ, अट्ठ बंधमाणे पडिपुन्नाओ अट्ठ कम्म-प्पगडीओ बंधइ, छ बंधमाणे आउयमोहणिज्जवज्जाओ छक्कम्मप्पगडीओ बंधइ ।*

*नियंठे णं पुच्छा, गोयमा! एगं वेयणिज्जं कम्मं बंधइ ।*

*सिणाए पुच्छा, गोयमा! एगविहबंधए वा अबंधए वा, एगं बंधमाणे एगं वेयणिज्जं कम्मं बंधइ २१ ।*

**वृ.** 'आउयवज्जाओ'त्ति पुलाकस्यायुर्बन्धो नास्ति, तद्बन्ध्याध्यवसायस्थानानां तस्याभावादिति । 'बउसे' इत्यादि, त्रिभागाद्यवशेषायुषो हि जीवा आयुर्बध्नन्तीति त्रिभागद्वयादौ तत्र बध्नन्तीतिकृत्वा बकुशादयः सप्तानामष्टनां वा कर्म्मणां बन्धका भवन्तीति, 'छव्विहं बंधेमाणा' इत्यादि ।

कषायकुशीलो हि सूक्ष्मसम्परायत्वे आयुर्न बध्नाति, अप्रमत्तान्तत्वात्तद्बन्धस्य, मोहनीयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च बादरकषायोदयाभावान्न बध्नातीति शेषाः षडेवेति ।

'एगं वेयणिज्जं'ति निर्ग्रन्थो वेदनीयमेव बध्नाति, बन्धहेतुषु योगानामेव सद्भावात्, 'अबंधएव'त्ति अयोगी बन्धहेतूनां सर्वेषामभावादबन्धक एवेति ।

**मू. (९२२)** *पुलाए णं भंते ! कति कम्मप्पगडीओ वेदेइ ?, गोयमा ! नियमं अट्ठ कम्मप्पगडीओ वेदेइ, एवं जाव कसायकुसीले ।*

*नियंठे णं पुच्छा, गोयमा ! मोहणिज्जवज्जाओ सत्त कम्मप्पगडीओ वेदेइ ।*

*सिणाए णं पुच्छा, गो० ! वेयणिज्जआउयनामगोयाओ चत्तारि कम्मप्प० वेदेइ २२ ॥*

**वृ.** वेदनद्वारे–'मोहणिज्जवज्जाओ'त्ति निर्ग्रन्थो हि मोहनीयं न वेदयति, तस्योपशान्तत्वात् क्षीणत्वाद्वा, स्नातकस्य तु घातिकर्म्मणां क्षीणत्वाद्वेदनीयादीनामेव वेदनमत उच्यते–'वेयणिज्जे'त्यादि ।

**मू. (९२३)** *पुलाए णं भंते ! कति कम्मप्पगडीओ उदीरेति ?, गोयमा ! आउयवेयणिज्जवज्जाओ छ कम्मप्पगडीओ उदीरेइ ।*

*बउसे पुच्छा, गोयमा ! सत्तविहउदीरए वा अट्ठविहउदीरए वा छव्विहउदीरए वा, सत्त उदीरेमाणे आउयवज्जाओ सत्त कम्मप्पगडीओ उदीरेति, अट्ठ उदीरेमाणे पडिपुन्नाओ अट्ठ कम्मप्पगडीओ उदीरेति, छ उदीरेमाणे आउयवेयणिज्जवज्जाओ छ कम्मपगडीओ उदीरेति, पडिसेवणाकुसीले एवं चेव ।*

*कसायकुसीले णं पुच्छा, गो० ! सत्तविहउदीरए वा अट्ठविहउदीरए वा छव्विहउदीरए वा पंचविहउदीरए वा, सत्त उदीरेमाणे आउयवज्जाओ सत्त कम्मप्पगडीओ उदीरेति, अट्ठ उदीरेमाणे पडिपुन्नाओ अट्ठ कम्मप्पगडीओ उदीरेति, छ उदीरेमाणे आउयवेयणिज्जवज्जाओ छ कम्मप्पगडीओ उदीरेति, पंच उदीरेमाणे आउयवेयणिज्जमोहणिज्जवज्जाओ पंच कम्मप्पगडीओ उदीरेति ।*

*नियंठे णं पुच्छा, गोयमा ! पंचविहउदीरए वा दुविहउदीरए वा, पंच उदीरेमाणे आउयवेयणिज्जमोहणिज्जवज्जाओ पंच कम्मप्पगडीओ उदीरेति, दो उदीरेमाणे नामं च गोयं च उदीरेति*

*सिणाए पुच्छा, गोयमा ! दुविहउदीरए वा अनुदीरए वा, दो उदीरेमाणे नामं च गोयं च उदीरेति २३ ॥*

**वृ.** उदीरणाद्वारे–'आउयवेयणिज्जवज्जाओ'त्ति, अयमर्थः–पुलाक आयुर्वेदनीयप्रकृतीर्नोदीरयति तथाविधाध्यवसायस्थानाभावात्, किन्तु पूर्वं ते उदीर्य्य पुलाकतां गच्छति, एवमुत्तरत्रापि यो याः प्रकृतीर्नोदीरयति स ताः पूर्वमुदीर्य बकुशादितां प्राप्नोति, स्नातकः सयोग्यवस्थायां तु नामगोत्रयोरेवोदीरकः, आयुर्वेदनीये तु पूर्वोदीर्णे एव, अयोग्यवस्थायां त्वनुदीरक एवेति ।

'उपसंपजहन्न'त्तिद्वारं, तत्रोपसम्पत् उपसम्पत्ति–प्राप्ति 'जहन्न'त्ति हानं–त्यागः उपसम्पन्न हानं चोपसम्पद्धानं–किं पुलाकत्वादि त्यक्त्वा किं सकाषयत्वादिकमुपसम्पद्यते इत्यर्थः, तत्र–

**मू. (९२४)** *पुलाए णं भंते ! पुलायत्तं जहमाणे किं जहति किं उवसंपज्जति ?, गोयमा ! पुलायत्तं जहति कसायकुसीलं वा अस्संजमं वा उवसंपज्जति ।*

*बउसे णं भंते ! बउसत्तं जहमाणे किं जहति किं उवसंपज्जति ?, गोयमा ! बउसत्तं जहति*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पडिसेवणाकुसीलं वा कसायकुसीलं वा असंजमं वा संजमासंजमं वा उवसंपज्जति।*

*पडिसेवणाकुसीले णं भंते! पडि० पुच्छा, गोयमा! पडिसेवणाकुसीलत्तं जहति बउसं वा कसायकुसीलं वा अस्संजमं वा संयमासंयम वा उवसंपज्जति।*

*कसायकुसीले पुच्छा, गोयमा! कसायकुसीलत्तं जहति पुलायं वा बउसं वा पडिसेवणाकुसीलं वा नियंठं वा अस्संजमं वा संयमासंयमं वा उवसंपज्जति।*

*नियंठे पुच्छा, गोयमा! नियंठत्तं जहति कसायकुसीलं वा सिणायं वा अस्संजमं वा उवसंपज्जति। सिणाए पुच्छा, गोयमा! सिणायत्तं जहति सिद्धिगतिं उवसंपज्जति २४॥*

**वृ.** 'पुलाए ण' मित्यादि, पुलाकः पुलाकत्वं त्यक्त्वा संयतः कषायकुशील एव भवति, तत्सदृशसंयमस्थानसद्भावात्, एवं यस्य यत्सदृशानि संयमस्थानानि सन्ति स तद्भावमुपसम्पद्यते मुक्त्वा कषायकुशीलादीन्, कषायकुशीलो हि विद्यमानस्वसदृशसंयमस्थानकान् पुलाकादिभावानुपसम्पद्यते, अविद्यमानसमानसंयमस्थानकं च निर्ग्रन्थभावं, निर्ग्रन्थस्तु कषायित्वं वा स्नातकत्वं वा याति, स्नातकस्तु सिद्धत्वमेवेति।

निर्ग्रन्थसूत्रे 'कसायकुसीलं वा सिणायं वा' इह भावप्रत्ययलोपात् कषायकुशीलत्वमित्यादि दृश्यं, एवं पूर्वसूत्रेष्वपि, तत्रोपशमनिर्ग्रन्थः श्रेणीतः प्रच्यवमानः सकषायो भवति, श्रेणीमस्तके तु मृतोऽसौ देवत्वेनोत्पन्नोऽसंयतो भवति नो संयतासंयतो, देवत्वे तदभावात्, यद्यपि च श्रेणीपतितोऽसौ संयतासंयतोऽपि भवति तथाऽपि नासाविहोक्तः, अनन्तरं तदभावादिति।

**मू. (९२५)** *पुलाए णं भंते! किं सन्नोवउत्ते होज्जा नोसन्नोवउत्ते वा होज्जा नोसन्नोवउत्ते वा होज्जा, एवं पडिसेवणाकुसीलेवि, एवं कसायकुसीलेवि, नियंठे सिणाए य जहा पुलाए २५।*

**वृ.** संज्ञाद्वारे—'सन्नोवउत्ते'त्ति, इह संज्ञा—आहारादिसंज्ञा तत्रोपयुक्तः— कथञ्चिदाहाराद्यभिष्वङ्गवान् संज्ञोपयुक्तः, नोसंज्ञोपयुक्तस्त्वाहाराद्युपभोगेऽपि तत्रानभिष्वक्तः।

तत्र पुलाकनिर्ग्रन्थस्नातका नोसंज्ञोपयुक्ता भवन्ति, आहारादिष्वनभिष्वङ्गात्, ननु निर्ग्रन्थस्नातकावेवं युक्तौ वीतरागत्वात्, न तु पुलाकः सरागत्वात्, नैवं, न हि सरागत्वे निरभिष्वङ्गता सर्वथा नास्तीति वक्तुं शक्यते, बकुशादीनां सरागत्वेऽपि निसङ्गताया अपि प्रतिपादितत्वात्।

चूर्णिकारस्त्वाह—'नोसन्ना नाणसन्न' त्ति, तत्र च पुलाकनिर्ग्रन्थस्नातकाः नोसंज्ञोपयुक्ताः, ज्ञानप्रधानोपयोगवन्तो न पुनराहारादिसंज्ञोपयुक्ताः, बकुशादयस्तूभयथाऽपि, तथाविधसंयमस्थानसद्भावादिति।

**मू. (९२६)** *पुलाए णं भंते! किं आहारए होज्जा अनाहारए होज्जा?, गोयमा! आहारए होज्जा नो अनाहारए होज्जा, एवं जाव नियंठे।*

*सिणाए पुच्छा, गोयमा! आहारए वा होज्जा अनाहरए वा होज्जा २६॥*

**वृ.** 'आहारकद्वारे—''आहारए होज्ज' त्ति पुलाकादेर्निर्ग्रन्थान्तस्य विग्रहगत्यादीनामनाहारकत्वकारणानामभावादाहारकत्वमेव।

'सिणाए' इत्यादि, स्नातकः केवलिसमुद्घाते तृतीयचतुर्थपञ्चमसमयेषु अयोग्यवस्थायां चानाहारकः स्यात्, ततोऽन्यत्र पुनराहारक इति॥ भवद्वारे—

**मू. (९२७)** *पुलाए णं भंते! कति भवग्गहणाइं होज्जा?, गोयमा! जहन्नेणं एक्कं उक्कोसेणं तिन्नि।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*बउसे पुच्छा, गोयमा! जह० एक्कं उक्कोसेणं अट्ठ, एवं पडिसेवणाकुसीलेवि, एवं कसायकुसीलेवि, नियंठे जहा पुलाए। सिणाए पुच्छा, गोयमा! एक्कं २७॥*

**वृ.** 'पुलाए णं'मित्यादि, पुलाको जघन्यत एकस्मिन् भवग्रहणे भूत्वा कषायकुशीलत्वादिकं संयतत्वान्तरमेकशोऽनेकशो वा तत्रैव भवे भवान्तरे वाऽवाप्य सिद्धयति, उत्कृष्टतस्तु देवादिभवान्तरितान् त्रीन् भवान् पुलाकत्वमवाप्नोति।

'बउसे'त्यादि, इह कश्चिदेकत्र भवे बकुशत्वमवाप्य कषायकुशीलत्वादि च सिद्धयति, कश्चित्वेकत्रैव बकुशत्वमवाप्य भवान्तरे तदनवाप्यैव सिद्धयतीत्यत उच्यते-'जहन्नेणं एक्कं भवग्गहणं'ति, 'उक्कोसेणं अट्ठ'त्ति किलाष्टौ भवग्रहणानि उत्कृष्टतया चरणमात्रमवाप्यते, तत्र कश्चित्तान्यष्टौ बकुशता पर्यन्तिमभवे सकषायत्वादियुक्तया, कश्चित्तु प्रतिभवं प्रतिसेवाकुशीलत्वादियुक्तया पूरयतीत्यत उच्यते-'उक्कोसेणं अट्ठ'त्ति।

अथाकर्षद्वारं, तत्राकर्षणमाकर्षः-चारित्रस्य प्राप्तिरिति।

**मू.** *(९२८) पुलागस्स णं भंते! एवभवग्गहणीया केवतिया आगरिसा प० ?, गोयमा! जहन्नेणं एक्कं उक्कोसेणं तिन्नि।*

*बउसस्स णं पुच्छा, गोयमा! जहन्नेणं एक्कं उक्कोसेणं सतग्गसो, एवं पडिसेवणाकुसीलेवि, कसायकुसीलेवि।*

*नियंठस्स णं पुच्छा, गो०! जहन्नेणं एक्कं उक्कोसेणं दोन्नि सिणायस्स णं पुच्छा, गो० एक्कं।*

*पुलागस्स णं भंते! नाणाभवग्गहणिया केवतिया आगरिसा पन्नत्ता?, गोयमा! जहन्नेणं दोन्नि उक्कोसे० सत्त।*

*बउसस्स पुच्छा, गोयमा! जहन्नेणं दोन्नि उक्कोसेणं सहस्सग्गसो, एवं जाव कसायकुसीलस्स*

*नियंठस्स णं पुच्छा, गोयमा! जहन्नेणं दोन्नि उक्कोसेणं पंच।*

*सिणायस्स पुच्छा, गोयमा! नत्थि एक्कोवि २८।*

**वृ.** 'एवभवग्गहणिय'त्ति एकभवग्रहणे ये भवन्ति 'सयग्गसो'त्ति शतपरिमाणेनेत्यर्थः, शतपृथक्त्वमिति भावना, उक्तञ्च-"तिण्ह सहस्सपुहुत्तं सयपुहुत्तं च होति विरईए।"त्ति 'उक्कोसेणं दोन्नि'त्ति एकत्र भवे वारद्वयमुपश्रेणिकरणादुपशमनिर्ग्रन्थत्वस्य द्वावाकर्षाविति।

'पुलागस्से'त्यादौ 'नाणाभवग्गहणिय'त्ति नानाप्रकारेषु भवग्रहणेषु ये भवन्तीत्यर्थः, "जहन्नेणं दोन्नि'त्ति एक आकर्ष एकत्र भवे द्वितीयोऽन्यत्रेत्येवमनेकत्र भवे आकर्षौ स्यातां, 'उक्कोसेणं सत्त'त्ति पुलाकत्वमुत्कर्षतस्त्रिषु भवेषु स्यादेकत्र च तदुत्कर्षतो वारत्रयं भवति ततश्च प्रथमभवे एक आकर्षोऽन्यत्र च भवद्वये त्रयस्त्रय इत्यादिभिर्विकल्पैः सप्त ते भवन्तीति।

'बउसे'त्यादि, 'उक्कोसेणं सहस्सग्गसो'त्ति बकुशस्याष्टौ भवग्रहणानि उत्कर्षत उक्तानि, एकत्र च भवग्रहणे उत्कर्षत आकर्षाणां शतपृथकत्वमुक्तं, तत्र च यदाऽष्टास्वपि वग्रहणेषूत्कर्षतो नव प्रत्येमाकर्षशतानि तदा नवानां शतानामष्टाभिर्गुणनात्सप्त सहाणि शतद्वयाधिकानि भवन्तीति

'नियंठस्से'त्यादौ 'उक्कोसेणं पंच'त्ति निर्ग्रन्थस्योत्कषतीणि भवग्रहणान्युक्तानि, एकत्र च भवे द्वावाकर्षावित्येवमेकत्र द्वावन्यत्र च द्वावपरत्र चैकं क्षपकनिर्ग्रन्थत्वाकर्षं कृत्वा सिद्धयतीति कृत्वोच्यते पञ्चेति॥ कालद्वारे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मू. (९२९)** *पुलाए णं भंते ! कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं ।*

*बउस पुच्छा, गोयमा ! जह० एक्कं समयं उक्कोसेणं देसूणा पुव्वकोडी, एवं पडिसेवणा-कुसीलेवि कसायकुसीलेवि ।*

*नियंठे पुच्छा, गोयमा ! जह० एक्कं समयं उक्कोसेणं अंतोमुहुत्तं । सिणाए पुच्छा, गोयमा जहन्नेणं अंतोमुहुत्तं उक्कोसेणं देसूणा पुव्वकोडी ।*

*पुलाया णं भंते ! कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं बउसे णं पुच्छा, गोयमा ! सव्वद्धं, एवं जाव कसायकुसीला, नियंठा जहा पुलागा, सिणाया जहा बउसा २९ ।*

**वृ.** 'पुलाए ण'मित्यादौ, 'जहन्नेणं अंतोमुहुत्तं'ति पुलाकत्वं प्रतिपन्नोऽन्तर्मुहूर्त्तापरिपूर्त्तौ पुलाको न म्रियते नापि प्रतिपततीतिकृत्वा जघन्यतोऽन्तर्मुहूर्तमित्युच्यते, उत्कर्षतोऽप्यन्त-र्मुहूर्त्तमितत्प्रमाणत्वादेतत्स्वभावस्येति ।

'बउसे'इत्यादि, 'जहन्नेणमेक्कं समयं'ति बकुशस्य चरणप्रतिपत्त्यनन्तरसमय एव मरणसम्भवादिति, 'उक्कोसेणं देसूणा पुव्वकोडि'त्ति पूर्वकोट्यायुषोऽष्टवर्षान्ते चरणप्रतिपत्ताविति

'नियंठे ण'मित्यादौ 'जहन्नेणं एक्कं समयं'ति उपशान्तमोहस्य प्रथमसमयसमनन्तमेव मरणसम्भवात्, 'उक्कोसेणं अंतोमुहुत्तं'ति निर्ग्रन्थाद्धाया एतत्प्रमाणत्वादिति ।

'सिणाये'त्यादौ 'जहन्नेणं अंतोमुहुत्तं'ति आयुष्कान्तिमेऽन्तर्मुहूर्ते केवलोत्पत्तावन्तर्मुहूर्त जघन्यतः स्नातककालः स्यादिति ।

पुलाकादीनामेकत्वेन कालमानमुक्तं अथ पृथक्त्वेनाह–'पुलाया ण'मित्यादि, 'जहन्नेणं एक्कं समयं'ति, कथम् ?, एकस्य पुलाकस्य योऽन्तर्मुहूर्तकालस्तस्यान्त्यसमयेऽन्यः पुलाकत्वं प्रतिपन्न इत्येवं जघन्यत्वविवक्षायां द्वयोः पुलाकयोरेकत्र समये सद्भावो द्वित्वे न जघन्यं पृथक्त्वं भवतीति ।

'उक्कोसेणं अंतोमुहुत्तं'ति यद्यपि पुलाका उत्कर्षत एकदा सहस्रपृथकत्वपरिमाणाः प्राप्यन्ते तथाऽप्यन्तर्मुहूर्तत्वात्तदद्धाया बहुत्वेऽपि तेषामन्तर्मुहूर्तमेव तत्कालः, केवलं बहूनां स्थितौ यदन्तर्मुहूर्त्त तदेकपुलाकस्थि त्यन्तर्मुहूर्त्तान्महत्तमित्यवसेयं, बकुशादीनां तु स्थितिकालः सर्वाद्धा, प्रत्येकं तेषा बहुस्थितिकत्वादिति । 'नियंठा जहा पुलाय'त्ति ते चैवं–जघन्यत एकं समय-मुत्कर्षतोऽन्तर्मुहूर्त्तमिति ।

**मू. (९३०)** *पुलागस्स णं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जह० अंतोमु० उक्को० अनंतं कालं अनंताओ ओसप्पिणिउस्सप्पिणीओ कालओ खेत्तओ अवड्ढपोग्गलपरियट्टं देसूणं, एवं जाव नियंठस्स ।*

*सिणायस्स पुच्छा, गोयमा ! नत्थि अंतरं ॥ पुलायाणं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जह० एक्कं समयं उक्को संखेज्जाइं वासाइं ।*

*बउसाणं भंते ! पुच्छा, गोयमा ! नत्थि अंतरं, एवं जाव कसायकुसीलाणं । नियंठाणं पुच्छा, गोयमा ! जह० एक्को० स० उक्कोसेणं छम्मासा, सिणायाणं जहा बउसाणं ३० ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** अन्तरद्वारे–'पुलागस्स ण'मित्यादि, तत्र पुलाकः पुलाको भूत्वा कियता कालेन पुलाकत्वमापद्यते ?, उच्यते, जघन्यतोऽन्तर्मुहूर्तं स्थित्वा पुनः पुलाक एव भवति, उत्कर्षतः पुनरनन्तेन कालेन पुलाकत्वमाप्नोति ।

कालान्त्यमेव कालतो नियमयन्नाह–'अनंताओ' इत्यादि, इदमेव क्षेत्रतोऽपि नियमयन्नाह–'खेत्तओ' इति, स चानन्तः कालः क्षेत्रतो मीयमानः किमानः ? इत्याह–'अवड्ढ'मित्यादि ।

तत्र पुद्गलपरावर्त्त एवं श्रूयते–किल केनापि प्राणिना प्रतिप्रदेशं म्रियमाणेन मरणैर्यावता कालेन लोकः समस्तोऽपि व्याप्यते तावता क्षेत्रतः पुद्गलपरावर्त्तो भवति, स च परिपूर्णोऽपि स्यादत आह –'अपार्द्धम्' अपगतार्द्धमर्द्धमात्रमित्यर्थः, अपार्द्धोऽप्यर्द्धतः पूर्ण स्यादत आह–'देसूणं' ति देशेन–भागेन न्यूनमिति । 'सिणायस्स नत्थि अंतरं' ति प्रतिपाताभावात् ।

एकत्वापेक्षया पुलाकत्वादीनामन्तरमुक्तमथ पथक्त्वापेक्षया तदेवाह–'पुलायाण' मित्यादि, व्यक्तम् । समुद्घातद्वारे–

*'मू. (९३१) पुलागस्स णं भंते ! कति समुग्घाया पन्नत्ता ?, गोयमा ! तिन्नि समुग्घाया प०, तं–वेयणासमुग्घाए कसायसमुग्घाए मारणंतियसमुग्घाए ।*

*बउसस्स णं भंते ! पुच्छा, गोयमा ! पंच समुग्घाया प०, तं०–वेयणासमुग्घाए जाव तेयास-मुग्घाए, एवं पडिसेवणाकुसीलेवि ।*

*कसायकुसीलस्स पुच्छा, गोयमा ! छ समुग्घाया प०, तं०–वेयणासमुग्घाए जाव आहार-समुग्घाए ।*

*नियंठस्स णं पुच्छा, गोयमा ! नत्थि एक्कोवि,*

*सिणायस्स पुच्छा, गोयमा ! एगे केवलिसमुग्घाए प० ३१ ।*

**वृ.** 'कसायसमुग्घाए' त्ति चारित्रवतां संज्वलनकषायोदयसम्भवेन कषायसमुद्घातो भवतीति, 'मारणंतियसमुग्घाए' त्ति, इह पुलाकस्य मरणाभावेऽपि मारणान्तिकसमुद्घातो न विरुद्धः समुद्घातान्निवृत्तस्य कषायकुशीलत्वादिपरिणामे सति मरणभावात्, 'नियंठस्स नत्थि एक्कोवि' त्ति तथास्वभावत्वादिति ।

**मू.** *(९३२) पुलाए णं भंते ! लोगस्स किं संखेज्जइभागे होज्जा १ असंखेज्जइभागे होज्जा २ संखेज्जेसु भागेसु होज्जा ३ असंखेज्जेसु भागेसु होज्जा ४ सव्वलोए होज्जा ५ ?, गोयमा ! नो संखेज्जइभागे होज्जा असंखेज्जइभागे होज्जा नो संखेज्जेसु भागेसु होज्जा नो असंखेज्जेसु भागेसु होज्जा नो सव्वलोए होज्जा, एवं जाव नियंठे ।*

*सिणाए णं पुच्छा, गोयमा ! नो संखेज्जइभागे होज्जा असंखेज्जइभागे होज्जा नो संखेज्जेसु भागेसु होज्जा असंखेज्जेसु भागेसु होज्जा सव्वलोए वा होज्जा ३२ ।*

**वृ.** अथ क्षेत्रद्वारं, तत्र क्षेत्रं–अवगाहनाक्षेत्रं, तत्र 'असंखेज्जइभागे होज्ज' त्ति पुलाकशरीरस्य लोकासङ्खयेयभागमात्रावगाहित्वात् ।

'सिणाए ण' मित्यादि, 'असंखेज्जइभागे होज्ज' त्ति शरीरस्थो दण्डकपाटकरणकाले च लोकासङ्ख्येयभागवृत्ति केवलिशरीरादीनां तावन्मात्रत्वात् ।

'असंखेज्जेसु भागेसु होज्ज' त्ति मथिकरणकाले बहोर्लोकस्य व्याप्तत्वेन स्तोकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाव्याप्ततयोक्तत्वाल्लोकस्यासङ्ख्येयेषु भागेषु स्नातको वर्त्तते, लोकापूरणे च सर्वलोके वर्त्तत इति

**मू. (९३३)** *पुलाए णं भंते ! लोगस्स किं संखेज्जइभागं फुसइ असंखेज्जइभागं फुसइ ?, एवं जहा ओगाहणा भणिया तहा फुसणावि भाणियव्वं जाव सिणाए ३३ ।*

**वृ.** स्पर्शनाद्वारे-स्पर्शना क्षेत्रवन्नवरं क्षेत्रं अवगाढमात्रं स्पर्शना त्ववगाढस्य तत्पार्श्ववर्तिश्चेति विशेषः ।

**मू. (९३४)** *पुलाए णं भंते ! कतरंमि भावे होज्जा ?, गो० ! खओवसमिए भावे होज्जा, एवं जाव कसायकुसीले । नियंठे पुच्छा, गोयमा ! उवसमिए वा भावे होज्जा खइए वा भावे होज्जा सिणाए पुच्छा, गो० ! खाइए भावे होज्जा ३४ ।*

**वृ.** भावद्वारं च व्यक्तमेव ॥ परिमाणद्वारे च-

**मू. (९३५)** *पुलाया णं भंते ! एगसमएणं केवतिया होज्जा ?, गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्क वादो वा तिन्नि वा उक्कोसेणं सयपुहत्तं, पुव्वपडिवन्नए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सहस्सपुहत्तं ।*

*बउसा णं भंते ! एगसमएणं पुच्छा, गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सयपुहत्तं, पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिसयपुहुत्तं उक्कोसेणवि कोडिसयपुहुत्तं, एवं पडिसेवणाकुसीलेवि ।*

*कसायकुसीलाणं पुच्छा, गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सहस्सपुहुत्तं, पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिसहस्सपुहुत्तं उक्कोसेणवि कोडिसहस्सपुहुत्तं ।*

*नियंठाणं पुच्छा, गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्ना वा उक्कोसेण बावट्ठं सतं, अट्ठसयं खवगाणं चउप्पन्नं उवसामगाणं, पुव्वपडिवन्नए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सयपुहुत्तं ।*

*सिणायाणं पुच्छा, गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं अट्ठसतं, पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिपुहुत्तं उक्कसेणवि कोडिपुहुत्तं ।*

*एएसि णं भंते ! पुलागबकुसपडिसेवणाकुसीलकसायकुसीलनियंठसिणायाणं कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा नियंठा पुलागा संखेज्जगुणा सिणाया संखेज्जगुणा बउसा संखेज्जगुणा पडिसेवणाकुसीला संखेज्जगुणा कसायकुसीला संखेज्जगुणा ।*

*सेवं भंते ! सेवं भंतेति जाव विहरति ।*

**वृ.** 'पुलाया ण' मित्यादि, ननु सर्वसंयतानां कोटीसहस्रपृथक्त्वं श्रूयते, इह तु केवलानामेव कषायकुशीलानां तदुक्तं ततः पुलाकादिमानानि ततोऽतिरिच्यन्त इति कथं न विरोधः ?, उच्यते, कषायकुशीलानां यत् कोटीसहस्रपृथक्त्वं तद्द्वित्रादिकोटीसहस्ररूपं कल्पयित्वां पुलाकबकुशादिसङ्ख्या तत्र प्रवेश्यते ततः समस्तसंयतमानं यदुक्तं तन्नातिरिच्यत इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अल्पबहुत्वद्वारे–'सव्वत्थोवा नियंठ'त्ति तेषामुत्कर्षतोऽपि शतपृथक्त्वसङ्ख्यत्वात्, 'पुलागा संखेज्जगुण'त्ति तेषामुत्कर्षतः सहपृथकत्वसङ्ख्यत्वात्, 'सिणाया संखेज्जगुण'त्ति तेषामुत्कर्षतः कोटीपृथक्त्वमानत्वात्, 'बउसा संखेज्जगुण'त्ति तेषामुत्रक्षतः कोटीशतपृथकत्वमानत्वात्।

'पडिसेवणाकुसीला संखेज्जगुण'त्ति, कथमेतत् तेषामप्युत्कर्षतः कोटीशतपृथक्त्वमानतयोक्तत्वात्?, सत्यं, किन्तु बकुशानां यत्कोटीशतपृथक्त्वं तद्द्वित्रादिकोटीशतमानं प्रतिसेविनां तु कोटीशतपृथक्तंव चतुःषट्कोटीशतमानमिति न विरोधः।

कषायिणां तु सङ्ख्यातगुणत्वं व्यक्तमेवोत्कर्षतः कोटीसहस्रपृथक्त्वमानतया तेषामुक्तत्वादिति

शतकं–२५ उद्देशकः–६ समाप्तः

## –: शतकं–२५ उद्देशकः–७ :–

वृ. षष्ठोद्देशके संयतानां स्वरूपमुक्तं, सप्तमेऽपि तदेवोच्यते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–'कइ णं भंते!' इत्यादि, इहापि प्रज्ञापनादीनि द्वाराणि वाच्यानि, तत्र प्रज्ञापनाद्वारमधिकृत्योक्तम्–

मू. (९३६) *कति णं भंते! संजया पन्नत्ता?, गोयमा! पंच संजया पं० तं०–सामाइयसंजए छेदोवट्ठावणियसंजए परिहारविसुद्धियसंजए सुहुमसंपरायसंजए अहक्खायसंजए।*

*सामाइयसंजए णं भंते! कतिविहे पन्नत्ते? गोयमा! दुविहे पन्नत्ते, तंजहा–इत्तरिए य आवकहिए य।*

*छेओवट्ठावणियसंजए णं पुच्छा, गोयमा! दुविहे प०, तं०–सातियारे य निरतियारे य।*

*परिहारविसुद्धियसंजए पुच्छा, गा०! दुविहे प०, तं०–निव्विसमाणए य निव्विट्ठकाइए य।*

*सुहुमसंपरागपुच्छा, गोयमा! दुविहे पं०, तं०–संकिलिस्समाणए य विसुद्धमाणए व।*

*अहक्खायसंजए पुच्छा, गोयमा! दुविहे पं०, तं०–छउमत्थे य केवली य।*

वृ. 'कति णं भंते!' इत्यादि, 'सामाइयसंजए'त्ति सामायिकं नाम चारित्रविशेषस्तत्प्रधानस्तेन वा संयतः सामायिकसंयतः, एवमन्येऽपि, 'इत्तरिए य'त्ति इत्वरस्य–भाविव्यपदेशान्तरत्वेनाल्पकालिकस्य सामायिकस्यास्तित्वादित्वरिकः, स चारोपयिष्यमाणहाव्रतः प्रथमपश्चिमतीर्थकरसाधुः।

'आवकहिए य'त्ति यावत्कथिकस्य–भाविव्यपदेशान्तराभावाद् यावज्जीविकस्य सामायिकस्यास्तित्वाद्यावत्कथिकः, स च मध्यमजिनमहाविदेहजिनसम्बन्धी साधुः, 'साइयारे य'त्ति सातिचारस्य यदारोप्यते तत्सातिचारमेव छेदोपस्थापनीयं, तद्योगात्साधुरपि सातिचार एव, एवं निरतिचारच्छेदोपस्थापनीययोगान्निरतिचारः स च शैक्षकस्य पार्श्वनाथतीर्थान्महावीरतीर्थसङ्क्रान्तौ वा, छेदोपस्थापनीयसाधुश्च प्रथमपश्चिमतीर्थयोरेव भवतीति।

निव्विसमाणए य'त्ति परिहारिकतपस्तपस्यन् 'निव्विट्ठकाइए य'त्ति निर्विशमानकानुचरक इत्यर्थः, 'संकिलिस्समाणए'त्ति उपशमश्रेणीतः प्रच्यवमानः 'विसुद्धमाणए य'त्ति उपशमश्रेणीं क्षपकश्रेणीं वा समारोहन्, 'छउमत्थे य केवली य'त्ति व्यक्तम्।

मू. (९३७) *सामाइयंमि उ कए चाउज्जामं अनुत्तरं धम्मं।*
*तिविहेणं फासयंतो सामाइयसंजओ स खलु॥*

वृ. अथ सामायिकसंयतादीनां स्वरूपं गाथाभिराह–'सामाइयंमि उ'गाहा, सामायिक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव प्रतिपन्ने न तु छेदोपस्थापनीयादौ 'चतुर्यामं' चतुर्महाव्रतम् 'अनुत्तरं धर्मं' श्रमणधर्म्ममित्यर्थः 'त्रिविधेन' मनःप्रभृतिना 'फासयंतो' त्ति स्पृशन्—पालयन् यो वर्त्तते इति शेषः सामायिकसंयतः सः 'खलु' निश्चितमित्यर्थः, अनया च गाथया यावत्कथिकसामायिकसंयतः उक्तः, इत्वरसामायिकसंयतस्तु स्वयं वाच्यः ।

**मू. (९३८)** *छेत्तूण उ परियागं पोराणं जो ठवेइ अप्पाणं ।*
*धम्मंमि पंचजामे छेदोवट्ठावणो स खलु ॥*

**वृ.** 'छेत्तूण' गाहा, कण्ठया, नवरं 'छेदोवट्ठावणे' त्ति छेदेन—पूर्वपर्यायच्छेदेन उपस्थापनं व्रतेषु यत्र तच्छेदोपस्थानं तद्योगाच्छेदोपस्थापनः, अनया च गाथया सातिचार इतरश्च द्वितीयसंयत उक्तः ।

**मू. (९३९)** *परिरइ जो विसुद्धं तु पंचयामं अनुत्तरं धम्मं ।*
*तिविहेणं फासयंतो परिहारियसंजओ स खलु ॥*

**वृ.** 'परिहरइ' गाहा, परिहरति—निर्विशमानकादिभेदं तप आसेवते यः साधुः, किं कुर्वन् ? इत्याह—विशुद्धमेव 'पञ्चयामं' अनुत्तरं धर्मं त्रिविधेन स्पृशन्, परिहारिकसंयतः स खल्विति, पञ्चयाममित्यनेन च प्रथमचरमतीर्थयोरेव तत्सत्तामाह ।

**मू. (९४०)** *लोभाणु वेययंतो जो खलु उवसामओ व खवओ वा ।*
*सो सुहुमसंपराओ अहखाया ऊणओ किंचि ॥*

**वृ.** 'लोभाणु' गाहा, 'लोभाणून्' लोभलक्षणकषायसूक्ष्मकिट्टिकाः वेदयन् यो वर्त्तत इति, शेषं कण्ठयम् ।

**मू. (९४१)** *उवसंते खीणंमि व जो खलु कम्मंमि मोहणिज्जंमि ।*
*छउमथो व जिणो वा अहखाओ संजमो स खलु ॥*

**वृ.** 'उवसंते' गाहा, अयमर्थः—उपशान्ते मोहनीये कर्म्मणि क्षीणे वा यच्छद्मस्थो जिनो वा वर्त्तते स यथाख्यातसंयतः खल्विति । वेदद्वारे—

**मू. (९४२)** *सामाइयसंजए णं भंते ! किं सवेदए होज्जा अवेदए होज्जा ?, गोयमा ! सवेदए वा होज्जा अवेदए वा होज्जा, जइ सवेदए एवं जहा कसायकुसीले तहेव निरवसेसं, एवं छेदोवट्ठावणियसंजएवि, परिहारविसुद्धियसंजओ जहा पुलाओ, सुहुमसंपरायसंजओ अहक्खायसंजओ य जहा नियंठो २ ।*

*सामाइयसंजए णं भंते ! किं सरागे होज्जा वीयरागे होज्जा ?, गोयमा ! सरागे होज्जा नो वीयरागे होज्जा, एवं सुहुमसंपरायसंजए, अहक्खायसंजए जहा नियंठे ३ ।*

*सामाइयसंजमे णं भंते ! किं ठियकप्पे होज्जा अट्ठियकप्पे होज्जा ?, गोयमा ! ठियकप्पे वा होज्जा अट्ठियकप्पे वा होज्जा, छेदोवट्ठावियसंजए पुच्छा, गोयमा ! ठियकप्पे होज्जा नो अट्ठियकप्पे होज्जा, एवं परिहारविसुद्धियसंजएवि, सेसा जहा सामाइयसंजए ।*

*सामाइयसंजए णं भंते ! किं जिणकप्पे होज्जा थेरकप्पे वा होज्जा कप्पातीते वा होज्जा ?, गोयमा ! जिणकप्पे वा हो० जहा कसायकुसीले तहेव निरवसेसं, छेदोवट्ठावणिओ परिहारविसुद्धिओ य जहा बउसो, सेसा जहा नियंठे ४ ।*

**वृ.** सामायिकसंयतोऽवेदकोऽपि भवेत्, नवमगुणस्थानके हि वेदस्योपशमः क्षयो वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति, नवमगुणस्थानकं च यावत्सामायिकसंयतोऽपि व्यपदिश्यते, 'जहा कसायकुसीले'त्ति सामायिकसंयतः सवेदस्त्रिवेदोऽपि स्यात्, अवेदस्तु क्षीणोपशान्तवेद इत्यर्थः।

'परिहारविसुद्धियसंजए जहा पुलागो'त्ति पुरुषवेदो वा पुरुषनपुंसकवेदो वा स्यादित्यर्थः, 'सुहुमसंपराये'त्यादौ 'जहा नियंठो'त्ति क्षीणोपशान्तवेदत्वेनावेदक इत्यर्थः। एवमन्यान्यप्यतिदेशसूत्राण्यनन्तरोद्देशकानुसारेण स्वयमवगन्तव्यानीति।

कल्पद्वारे–'नो अट्ठियकप्पे'त्ति अस्थितकल्पो हि मध्यमजिनमहाविदेहजिनतीर्थेषु भवति, तत्रच छेदोपस्थापनीयं नास्तीति।

*मू. (९४३) सामाइयसंजए णं भंते! किं पुलाए होज्ञा बउसे जाव सिणाए होज्ञा?, गोयमा! पुलाए वा होज्ञा बउसे जाव कसायकुसीले वा होज्ञा नो नियंठे होज्ञा नो सिणाए होज्ञा, एवं छेदोवट्ठावणिएवि।*

*परिहारविसुद्धियसंजए णं भंते! पुच्छा, गोयमा! नो पुलाए नो बउसे नो पडिसेवणाकुसीले होज्ञा कसायकुसीले होज्ञा नो नियंठे होज्ञा नो सिणाए होज्ञा, एवं सुहुमसंपराएवि।*

*अहक्खायसंजए पुच्छा, गोयमा! नो पुलाए होज्ञा जाव नो कसायकुसीले होज्ञा नियंठे वा होज्ञा सिणाए वा हो० ५।*

*सामाइयसंजए णं भंते! किं पडिसेवए हो० अपडिसेवए होज्ञा?, गोयमा! पडिसेवए वा होज्ञा अपडिसेवए वा होज्ञा, जइ पडिसेवए होज्ञा किं मूलगुणपडिसेवए होज्ञा सेसं जहा पुलागस्स, जहा सामाइयसंजए एवं छेदोवट्ठावणिएवि, परिहारविसुद्धियसंजए पुच्छा, गोयमा! नो पडिसेवए होज्ञा अपडिसेवए होज्ञा एवं जाव अहक्खायसंजए ६।*

*सामाइयसंजए णं भंते! कतिसु नाणेसु होज्ञा?, गोयमा! दोसु वा तिसु वा चउसु वा नाणेसु होज्ञा, एवं जहा कसायकुसीलस्स तहेव चत्तारि नाणाइं भयणाए, एवं जाव सुहुसंपराए, अहक्खायसंजयस्स पंच नाणाइं भयणाए जहा नाणुद्देसए।*

*सामाइयसंजए णं भंते! केवतियं सुयं अहिज्ञेज्ञा?, गोयमा! जहन्नेणं अट्ठ पवयणमायाओ जहा कसायकुसीले, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धियसंजए पुच्छा, गोयमा! जहन्नेणं नवमस्स पुव्वस्स ततियं आयारवत्थुं उक्कोसेणं असंपुन्नाइं दस पुव्वाइं अहिज्ञेज्ञा, सुहुमसंपरायसंजए जहा सामाइयसंजए, अहक्खायसंजए पुच्छा, गोयमा! जहन्नेणं अट्ठ पवयणमायाओ उक्कोसेणं चोद्दस पुव्वाइं अहिज्ञेज्ञा सुयवतिरित्ते वा होज्ञा ७।*

*सामाइयसंजए णं भंते! किं तित्थे हो० अतित्थे होज्ञा?, गोयमा! तित्थे वा होज्ञा अतित्थे वा होज्ञा जहा कसायकुसीले, छेदोवट्ठावणिए परिहारविसुद्धिए य जहा पुलाए, सेसा जहा सामाइयसंजए ८।*

*सामाइयसंजए णं भंते! किं सलिंगे होज्ञा अन्नलिंगे होज्ञा गिहिलिंगे होज्ञा जहा पुलाए, एवं छेदोवट्ठावणिएवि, परिहारिविसुद्धियसंजए णं भंते! किं पुच्छा, गोयमा! दव्वलिंगंपि भावलिंगंपि पडुच्च सलिंगे होज्ञा नो अन्नलिंगे होज्ञा नो गिहिलिंगे होज्ञा, सेसा जहा सामाइयसंजए ९।*

*सामाइयसंजए णं भंते! कतिसु सरीरेसु होज्ञा?, गोयमा! तिसु वा चउसु वा पंचसु वा जहा कसायकुसीले, एवं छेदोवट्ठावणिएवि, सेसा जहा पुलाए १०।*

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

*सामाइयसंजए णं भंते ! किं कम्मभूमीए होज्ञा अकम्मभूमीए होज्ञा ?, गोयमा ! जम्मणं संतिभावं च पडुच्च कम्मभूमीए नो अकम्मभूमीए जहा बउसे, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए य जहा पुलाए, सेसा जहा सामाइयसंजए ११ ॥*

**वृ.** चारित्रद्वारमाश्रित्येदमुक्तम्–'सामाइयसंजए णं भंते ! किं पुलाए'इत्यादि, पुलाकादिपरिणामस्य चारित्रत्वात् ।

ज्ञानद्वारे–'अहक्खायसंजयस्स पंच नाणाइं भयणाए जहा नाणुद्देसए'त्ति, इह च ज्ञानोद्देशकः–अष्टमशतद्वितीयोद्देशकस्य ज्ञानवक्तव्यतार्थमवान्तरप्रकरणं, भजना पुनः केवलियथाख्यातचारित्रिणः केवलज्ञानं छद्मस्थवीतरागयथाख्यातचारित्रिणो द्वे वा त्रीणि वा चत्वारि वा ज्ञानानि भवन्तीत्येवंरूपा ।

श्रुताधिकारे यथाख्यातसंयतो यदि निर्ग्रन्थस्तदाऽष्टप्रवचनमात्रादिचतुर्दशपूर्वान्तं श्रुतं यदि तु स्नातकस्तदा श्रुतातीतोऽत एवाह– 'जहन्नेणं अट्ठ पवयणमायाओ'इत्यादि ॥ कालद्वारे–

**मू. (९४४)** *सामाइयसंजए णं भंते ! किं ओसप्पिणीकाले होज्ञा उस्सप्पिणिकाले होज्ञा नोओसप्पिणिनोउस्सप्पिणिकाले होज्ञा ?, गोयमा ! ओसप्पिणिकाले जहा बउसे, एवं छेदोवट्ठावणिएवि, नवरं जम्मणं संतिभावं(च) पडुच्च चउसुवि पलिभागेसु नत्थि साहरणं पडुच्च अन्नयरे पडिभागे होज्ञा, सेसं तं चेव ।*

*परिहारविसुद्धिए पुच्छा, गोयमा ! ओसप्पिणिकाले होज्ञा जहा पुलाओ, उस्सप्पिणिकालेवि जहा पुलाओ, सुहुमसंपराइओ जहा नियंठो, एवं अहक्खाओवि १२ ।*

**वृ.** 'एवं छेओवट्ठावणिएवि'त्ति, अनेन बकुशसमानः कालतश्छेदोपस्थापनीयसंयत उक्तः, तत्र च बकुशस्योत्सर्पिण्यवसर्पिणीव्यतिरिक्तकाले जन्मतः सद्भावतश्च सुषमसुषमादिप्रतिभागत्रये निषेधोऽभिहितः दुष्षमसुषमाप्रतिभागे च विधिः छेदोपस्थापनीयसंयतस्य तु तत्रापि निषेधार्थमाह–'नवर'मित्यादि ।

**मू. (९४५)'** *सामाइयसंजए णं भंते ! कालगए समाणे किं गतिं गच्छति ?, गोयमा ! देवगतिं गच्छति, देवगतिं गच्छमाणे किं भवणवासीसु उवव० वाणमंतर० उववज्ञेज्ञा जोइसिएसु उववज्ञेज्ञा वेमाणिएसु उववज्ञेज्ञा ?, गो० ! नो भवणवासीसु उववज्ञेज्ञा जहा कसायकुसीले, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए जाव पुलाए, सुहुमसंपराए जहा नियंठे ।*

*अहक्खाए पुच्छा, गोयमा ! एवं अहक्खायसंजएवि जाव अजहन्नमणुक्कोसेणं अनुत्तरविमानेसु उववज्ञेज्ञा, अत्थेगतिए सिज्झंति जाव अंतं करेंति ।*

*सामाइयसंजए णं भंते ! देवलोगेसु उववज्ञमाणे किं इंदत्ताए उववज्ञति पुच्छा, गोयमा ! अविराहणं पडुच्च एवं जहा कसायकुसीले, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए जहा पुलाए, सेसा जहा नियंठे ।*

*सामाइयसंजयस्स णं भंते ! देवलोगेसु उववज्ञमाणस्स केवतियं कालं ठिती प० ?, गोयमा ! जहन्नेणं दो पलिओवमाइं उक्कोसेणं तेत्तीसं सागरोवमाइं, एवं छेदोवट्ठावणिएवि ।*

*परिहारविसुद्धियस्स पुच्छा, गोयमा ! जहन्नेणं दो पलिओवमाइं उक्कोसेणं अट्ठारस सागरोवमाइं, सेसाणं जहा नियंठस्स १३ ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** संयमस्थानद्वारे-'सुहुमसंपराये'त्यादी 'असंखेज्जा अंतोमुहुत्तिया संजमट्ठाण'त्ति अन्तर्मुहूर्त्ते भवानि आन्तर्मुहूर्त्तिकानि, अन्तर्मुहूर्त्तप्रमाणा हि तदद्धा, तस्याश्च प्रतिसमयं चरण-विशुद्धिविशेषभावादसङ्खयेयानि तानि भवन्ति, यथाख्याते त्वेकमेव, तदद्धायाश्चरण-विशुद्धेर्निर्विशेषत्वादिति।

**मू. (९४६)** *सामाइयसंजयस्स णं भंते! केवइया संजमट्ठाणा पन्नत्ता?, गोयमा! असंखेज्जा संजमट्ठाणा प०, एवं जाव परिहारविसुद्धियस्स।*

*सुहुमसंपरायसंजयस्स पुच्छा, गोयमा! असंखेज्जा अंतोमुहुत्तिया संजमट्ठाणा प०, अहक्खायसंजयस्स पुच्छा, गोयमा! एगे अजहन्नमणुक्कोसए संजमट्ठाणे।*

*एएसि णं भंते! सामाइयछेदोवट्ठावणियपरिहारविसुद्धियसुहुमसंपरागअहक्खायसंजयाणं संजमट्ठाणाणं कयरे २ जाव विसेसाहिया वा?, गोयमा! सव्वत्थोवे अहक्खायसंजमस्स एगे अजहन्नमणुक्कोसए संजमट्ठाणे सुहुमसंपरागसंजयस्स अंतोमुहुत्तिया संजमट्ठाणा असंखेज्जगुणा परिहारविसुद्धियसंजयस्स संजमट्ठाणा असंखेज्जगुणा सामाइयसंजयस्स छेदोवट्ठावणियसंजयस्सय एएसि णं संजमट्ठाणा दोण्हवि तुल्ला असंखेज्जगुणा १४।*

**वृ.** संयमस्थानाल्पबहुत्वचिन्तायां तु किलासद्भावस्थापनया समस्तानि संयमस्थाना-न्येकविंशति, तत्रैकसमुपरितनं यथाख्यातस्य, ततोऽधस्तनानि चत्वारि सूक्ष्मसम्परायस्य, तानि च तस्मादसङ्खयेयगुणानि दृश्यानि, तेभ्योऽधश्चत्वारि परिहृत्यान्यान्यष्टौ परिहारिकस्य, तानि च पूर्वेभ्योऽसङ्खयेयगुणानि दृश्यानि, ततः परिहृतानि, या चत्वार्यष्टौ च पूर्वोक्तानि तेभ्योऽन्यानि च चत्वारीत्येवं तानि षोडश सामायिकच्छेदोपस्थापनीयसंयतयोः पूर्वेभ्यश्चैतान्यसङ्ख्यातगुणानीति

**मू. (९४७)** *सामाइयसंजयस्स णं भंते! केवइया चरित्तपज्जवा प०?, गोयमा! अनंता चरित्तपज्जवा प० एवं जाव अहक्खायसंजयस्स।*

*सामाइयसंजए णं भंते! सामाइयसंजयस्स सट्ठाणसन्निगासेणं चरित्तपज्जवेहिं किं हीणे तुल्ले अब्भहिए?, गोयमा! सिय हीणे छट्ठाणवडिए, सामाइयसंजए णं भंते! छेदोवट्ठावणियसंजयस्स परट्ठाणसन्निगासेणं चित्तपज्जवेहिं पुच्छा, गोयमा! सिय हीणे छट्ठाणवडिए, एवं परिहार-विसुद्धियस्सवि।*

*सामाइयसंजए णं भंते! सुहमसंपरागसंजयस्स परट्ठाणसन्निगासेणं चरित्तपज्जवे पुच्छा, गोयमा! हीणे नो तुल्ले नो अब्भहिए अनंतगुणहीणे, एवं अहक्खायसंजयस्सवि, एवं छेदोवट्ठाव-णिएवि, हेट्ठिल्लेसु तिसुवि समं छट्ठाणवडिए उवरिल्लेसु दोसु तहेव हीणे, जहा छेदोवट्ठावणिए तहा परिहारविसुद्धिएवि।*

*सुहुमसंपरागसंजए णं भंते! सामाइयसंजयस्स परट्ठाण पुच्छा, गोयमा! नो हीणे नो तुल्ले अब्भहिएअनंतगुणमब्भहिए, एवं छेओवट्ठावणियपरिहारविसुद्धिएसुवि समं सट्ठाणे सिय हीणे नो तुल्ले सिय अब्भहिए। जइ हीणे अणंतगुणहीणे अह अब्भहिए अनंतगुणमब्भहिए, सुहुमसंप-रायसंजयस्स अहक्खायसंजयस्स परट्ठाणे पुच्छा, गोयमा! हीणे नो तुल्ले नो अब्भहिए अनंतगुणहीणे, अहक्खाए हेट्ठिल्लाणं चउण्हवि नो हीणे नो तुल्ले अब्भहिए अनंतगुणमब्भहिए सट्ठाणे नो हीणे तुल्ले नो अब्भहिए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एएसि णं भंते ! सामाइयछेदोवट्ठावणियपरिहारविसुद्धियसुहुमसंपराय अहक्खासंजयाणं जहन्नुक्कोसगाणं चरित्तपज्जवाणं कयरे २ जाव विसेसाहिया वा ?, गोयमा ! सामाइयसंजयस्स छेओवट्ठावणियसंजयस्स य एएसि णं जहन्नगा चरित्तपज्जवा दोण्हवि तुल्ला सव्वत्थोवा परिहार-विसुद्धियसंजयस्स जहन्नगा चरित्तपज्जवा अनंतगुणा तस्स चेव उक्को सगा चरित्तपज्जवा अनंतगुणा सानाइयसंजयस्स छेओवट्ठावणियसंजयस्स य एएसि णं उक्कोसगा चरित्तपज्जवा दोण्हवि तुल्ला अनंतगुणा सुहुमसंपरायसंजयस्स जहन्नगा चरित्तपज्जवा अनंतगुणा तस्स चेव उक्कोसगा चरित्तपज्जवा अनंतगुणा अहक्खायसंजयस्स अजहन्नमणुक्कोसगा चरित्तपज्जवा अनंतगुणा १५ ।*

*सामाइयसंजए णं भंते ! किं सजोगी होज्ञा अजोगी होज्ञा ? गोयमा ! सजोगी जहा पुलाए एवं जाव सुहुमसंपरायसंजए अहक्खाए जहा सिणाए १६ ।*

*सामाइयसंजए णं भंते ! किं सागारोवउत्ते होज्ञा अनागारोवउ० ?, गोयमा ! सागारोवउत्ते जहा पुलाए एवं जाव अहक्खाए, नवरं सुहुमसंपराए सागारोवउत्ते होज्ञा नो अनागारोवउत्ते होज्ञा १७ ।*

*सामाइयसंजए णं भंते ! किं सकसायी होज्ञा अकसायी होज्ञा, गोयमा ! सकसायी होज्ञा नो अकसायी होज्ञा, जहा कसायकुसीले, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए जहा पुलाए, सुहुमसंपरागसंजए पुच्छा, गोयमा ! सकसायी होज्ञा नो अकसायी होज्ञा, जइ सकसायी होज्ञा से णं भंते ! कतिसु कसायेसु होज्ञा ?, गोयमा ! एगंमि संजलणलोभे होज्ञा, अहक्खायसंजए जाव नियंठे १८ ।*

*सामाइयसंजए णं भंते ! किं सलेस्से होज्ञा अलेस्से होज्ञा ?, गोयमा ! सलेस्से होज्ञा जहा कसायकुसीले, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए जहा पुलाए, सुहुमसंपराए जहा नियंठे, अहक्खाए जहा सिणाए, नवरं जइ सलेस्से होज्ञा एगाए सुक्कलेस्साए होज्ञा १९ ॥*

**वृ.** सन्निकर्षद्वारे–'सामाइयसंजमे णं भंते ! सामाइयसंजयस्से'त्यादौ 'सिय हीणे'त्ति असङ्ख्यातानि तस्य संयमस्थानानि, तत्र च यदैको हीनशुद्धिकेऽन्यस्त्वितरत्र वर्त्तते तदैको हीनोऽन्यस्त्वभ्यधिकः, यदा तु समाने संयमस्थाने वर्त्तेते तदा तुल्ये, हीनाधिकत्वे च षट्स्थानपतितत्वं स्यादत एवाह–'छट्ठाणवडिए'त्ति ।

उपयोगद्वारे–सामायिकसंयतादीनां पुलाकवदुपयोगद्वं भवति, सूक्ष्मसम्परायसंयतस्य तु विशेषोपदर्शनार्थमाह–'नवरं सुहुमसंपराइए'इत्यादि, सूक्ष्मसम्परायः साकारोपयुक्तस्तथास्व-भावत्वादिति । लेश्याद्वारे–यथाख्यातसंयतः स्नातकसमान उक्तः, स्नातकश्च सलेश्यो वा स्यादले-श्यो वा, यदि सलेश्यस्तदा परमशुक्ललेश्यः स्यादित्येवमुक्तः, यथाख्यातसंयतस्य तु निर्ग्रन्थत्वापे-क्षया निर्विशेषेणापि शुक्ललेश्या स्यादयोऽस्य विशेषस्याभिधानार्थमाह–'नवरं जई'त्यादि ॥ परिणामद्वारे–

**मू. (९४८)** *सामाइयसंजए णं भंते ! किं वड्ढमाणपरिणामे होज्ञा हीयमाणपरिणामे अवट्ठियपरिणामे ?, गोयमा ! वड्ढमाणपरिणामे जहा पुलाए, एवं जाव परिहारविसुद्धिए, सुहुम-संपराय पुच्छा, गोयमा ! वड्ढमाणपरिणामे वा होज्ञा हीयमाणपरिणामे वा होज्ञा नो अवट्ठियपरिणामे*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*होज्रा, अहक्खाए जहा नियंठे ।*

*सामाइयसंजए णं भंते ! केवतियं कालं वड्ढमाणपरिणामे होज्रा ?, गोयमा ! जह० एक्कं समयं जहा पुलाए, एवं जाव परिहारविसुद्धिएवि, सुहुमसंपरागसंजए णं भंते ! केवतियं कालं वड्ढमाणपरिणामे होज्रा ?, गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं, केवतियं कालं हीयमाणपरिणामे एवं चेव ।*

*अहक्खायसंजए णं भंते ! केवतियं कालं वड्ढमाणपरिणामे होज्रा ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, केवतियं कालं अवट्ठिये परिणामे होज्रा?, गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं देसूणा पुव्वकोडी २० ।*

**वृ.** 'सुहुमसंपराये' इत्यादी, 'वड्ढमाणपरिणामे वा होज्रा हीयमाणपरिणामे वा होज्रा नो अवट्ठियपरिणामे होज्र' त्ति सूक्ष्मसम्परायसंयतः श्रेणिं समारोहन् वर्द्धमानपरिणामस्ततो भ्रस्यन् हीयमानपरिणामः,अवस्थितपरिणामस्त्वसौ न भवति, गुणस्थानकस्वभावादिति ।

तथा 'सुहुमसम्परायसंजए णं भंते ! केवइयं कालं' इत्यादी 'जहन्नेणं एक्कं समयं' ति सूक्ष्मसम्परायस्य जघन्यतो वर्द्धमानपरिणाम एकं समयं प्रतिपत्तिसमयानन्तरमेव मरणात्, 'उक्कोसेणं अंतोमुहुत्तं' ति तद्‌गुणस्थानकस्यैतावत्प्रमाणत्वात्, एवं तस्य हीयमानपरिणामोऽपि भावनीय इति

तथा 'अहक्खायसंजए णं भंते !' इत्यादी 'जहन्नेणं अंतोहमुत्तं उक्कोसेणंपि अंतोमुहुत्तं' त्ति यो यथाख्यातसंयतः केवलज्ञानमुत्पादयिष्यति यश्च शैलेशीप्रतिपन्नस्तस्य वर्द्धमानपरिणामो जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तं तदुत्तरकालं तद्व्यवच्छेदात्, अवस्थितपरिणामस्तु जघन्येनैकं समयं, उपशमाद्धायाः प्रथमसमयानन्तरमेव मरणात् ।

उक्कोसेणं देसूणा पुव्वकोडि त्ति एतच्च प्राग्वद्भावनीयमिति ।। बन्धद्वारे–

***मू. (९४९)*** *सामाइयसंजए णं भंते ! कइ कम्मप्पगडी बंधइ ?, गोयमा ! सत्तविहबंधए वा अट्ठविहबंधए वा एवं जहा बउसे, एवं जाव परिहारविसुद्धिए ।*

*सुहुसंपरागसंजए पुच्छा, गोयमा ! आउयमोहणिज्रवज्राओ छ कम्मप्पगडीओ बंधति, अहक्खाएसंजए जहा सिणाए २१ ।*

*सामाइयसंजए भंते ! कति कम्मप्पगडीओ वेदेति ?, गोयमा ! नियमं अट्ठ कम्मप्पगडीओ वेदेति, एवं जाव सुहुमसंपराए । अहक्खाए पुच्छा, गोयमा ! सत्तविहवेयए वा चउव्विहवेयए वा, सत्तविह वेदेमाणे मोहणिज्रवज्राओ सत्त कम्मप्पगडीओ वेदेति, चत्तारि वेदेमाणे वेयणिज्राउयनामगोयाओ चत्तारि कम्मप्पगडीओ वेदेति २२ ।*

*सामाइयसंजए णं भंते ! कति कम्मप्पगडीओ उदीरेति ?, गोयमा ! सत्तविह जहा बउसो, एवं जाव परिहारविसुद्धीए ।*

*सुहुमपंसपराए पुच्छा, गोयमा ! छव्विह उदीरए वा पंचविह उदीरए वा, छ उदीरेमाणे आउयवेयणिज्रवज्राओ छ कम्मप्पगडीओ उदीरेइ पंच उदीरेमाणा आउयवेयणिज्रमोहणिज्रवज्राओ पंच कम्मप्पगडीओ उदीरेइ ।*

*अहक्खायसंजए पुच्छा, गोयमा ! पंचविह उदीरए वा दुविह उदीरए वा अनुदीरए वा, पंच उदीरेमाणे आउय० सेसं जहा नियंठस्स २३ ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'सुहुमसंपराए' इत्यादौ 'आउयमोहणिज्जवज्जाओ छ कम्मप्पगडीओ बंधइ'त्तति सूक्ष्मसम्परायसंयतो ह्यायुर्न बध्नाति अप्रमत्तान्तत्वात्तद्बन्धस्य, मोहनीयं च बादरकषायोदयाभावान्न बध्नातीति तद्वर्जा षट् कर्म्मप्रकृतीर्बध्नातीति ।

वेदद्वारे 'अहक्खाये'त्यादौ 'सत्तविहवेयए वा चउव्विहवेयए व'त्ति यथाख्यातसंयतो निर्ग्रन्थावस्थायां 'मोहवज्ज'त्ति मोहवर्जानां सप्तानां कर्म्मप्रकृतीनां वेदको, मोहनीयस्योपशान्तत्वात् क्षीणत्वाद्वा, स्नातकावस्थायां तु चतसृणामेव, घातिकर्म्मप्रकृतीनां तस्य क्षीणत्वात् ।

**मू.** *(९५०) सामाइयसंजए णं भंते ! सामाइयसंजयत्तं जहमाणे किं जहति किं उवसंपज्ञति ?, गो० सामाइयसंजयत्तं जहत्ति छेदोवट्ठावणियसंजयं वा सुहुमसंपरागसंजयं वा असंजमं वा संजमासंजमं वा उवसंपज्जति ।*

*छेओवट्ठावणिए पुच्छा, गोयमा ! छेओवट्ठावणियसंजयत्तं जहति सामाइयसंज० परिहारवि० सुहुमसं० असंज० संजमासंजमं वा उव० ।*

*परिहारविसुद्धिए पुच्छा, गोयमा ! परिहारविसुद्धियसंजयत्तं जहति छेदोवट्ठावणियसंजयं वा असंजमं वा उपसंपज्ञति ।*

*सुहुमसंपराए पुच्छा, गोयमा ! सुहुमसंपरायसंजयत्तं जहति सामाइयसंजयं वा छेओवट्ठावणियसंजयं वा अहक्खायसंजयं वा असंजमं वा उवसंपज्ञइ ।*

*अहक्खायसंजए णं पुच्छा, गोयमा ! अहक्खायसंजयत्तं जहति सुहुमसंपरागसंजयं वा असंजमं वा सिद्धिगतिं वा उवसंपज्ञति २४ ।*

**वृ.** उपसम्पद्धानद्वारे–'सामाइयसंजए ण'मित्यादि, सामायिकसंयतः सामायिकसंयतत्वं त्यजति छेदोपस्थापनीयसंयतत्वं प्रतिपद्यते, चतुर्यामधर्मात्पञ्चयामधर्म्मसङ्क्रमे पार्श्वनाथशिष्यवत्, शिष्यको वा महाव्रतारोपणे, सूक्ष्मसम्परायसंयतत्वं वा प्रतिपद्यते, श्रेणिप्रतिपत्तितः असंयादिर्वा भवेद्भावप्रतिपातादिति ।

तथा छेदोपस्थापनीयसंयतश्छेदोपस्थापनीयसंयतत्वं त्यजन् सामायिकसंयतत्वं प्रतिपद्यते, यथाऽऽदिदेवतीर्थसाधुः अजितस्वामितीर्थं प्रतिपद्यमानः, परिहारविशुद्धिकसंयतत्वं वा प्रतिपद्यते, छेदोपस्थापनीयवत एव परिहारविशुद्धिसंयमस्य योग्यत्वादिति ।

तथा परिहारविशुद्धिकसंयतः परिहारविशुद्धिकसंयतत्वं त्यजन् छेदोपस्थापनीयसंयतत्वं प्रतिपद्यते पुनर्गच्छाद्याश्रयणात् असंयमंवा प्रतिपद्यते देवत्वोत्पत्ताविति ।

तथा सूक्ष्मसम्परायसंयतः सूक्ष्मसम्परायसंयतत्वं श्रेणीप्रतिपातेन त्यजन् सामायिकसंयतत्वं प्रतिपद्यते यदि पूर्वं सामायिकसंयतो भवेत छेदोपस्थापनीयसंयतत्वं वा प्रतिपद्यते यदि पूर्वं छेदोपस्थापनीयसंयतो भवेत्, यथाख्यातसंयतत्वं वा प्रतिपद्यते श्रेणीसमारोहणत इति ।

तथा यथाख्यातसंयतो यथाख्यातसंयतत्वं त्यजन् श्रेणिप्रतिपतनात् सूक्ष्मसम्परायसंयतत्वं प्रतिपद्यते असंयमं वा प्रतिपद्यते, उपशान्तमोहत्वे मरणात् देवोत्पत्तौ, सिद्धिगतिं वोपसम्पद्यते स्नातकत्वे सतीति ॥ आकर्षद्वारे–

**मू.** *(९५१) सामाइयसंजए णं भंते ! किं सन्नोवउत्ते हो० नोसन्नोवउत्तो होज्ञा ?, गो० ! सन्नोवउत्ते जहा बउसो, एवं जाव परिहारवि० सुहुमसंपराए अहक्खाए य जहा पुलाए २५ ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*सामाइयसंजए णं भंते ! किं आहारए होजा अनाहारए होज्रा जहा पुलाए, एवं जाव सुहुमसंपराए, अहक्खायसंजए जहा सिणाए २६ ।*

*सामाइयसंजए णं भंते ! कति भवग्गहणाइं होज्रा ?, गोयमा ! जह० एक्कं समयं उक्कोसेणं अट्ठ, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए पुच्छा, गोयमा ! जह० एक्कं समयं उक्कोसेणं तिन्नि, एवं जाव अहक्खाए २७ ।*

**मू. (९५२)** *सामाइयंसंजयस्स णं भंते ! एगभवग्गहणिया केवतिया आगरिसा प०, गोयमा ! जहन्नेणं जहा बउस्स, छेदोवट्ठावणियस्स पुच्छा, गोयमा ! जहन्नेणं एक्कं उक्सेणं वीसपुहुत्तं*

*परिहारविसुद्धियस्स पुच्छा, गोयमा ! जहन्नेणं एक्कं उक्कोसेणं तिन्नि ।*

*सुहुमसंपरायस्स पुच्छा, गोयमा ! जहन्नेणं एक्कं उक्कोसेणं चत्तारि अहक्खायस्स पुच्छा, गोयमा ! जहन्नेणं एक्कं उक्कोसेणं दोन्नि ।*

*सामाइयसंजयस्स णं भंते ! नानाभवग्गहणि केवतिया आगारिसा प० ?, गोयमा ! जहा बउसे । छेदोवट्ठावणियस्स पुच्छा, गोयमा ! जहन्नेणं दोन्नि उक्कोसेणं उवरिं नवण्हं सयाणं अंतो सहस्सस्स ।*

*परिहारविसुद्धियस्स जहन्नेणं दोन्नि उक्कोसणं सत्त, सुहुमसंपरागस्स जहन्नेणं दोन्नि उक्कोसेणं नव, अहक्खायस्स जहन्नेणं दोन्नि उक्कोसेणं पंच ।*

**वृ.** 'छेदोवट्ठावणीयस्से'त्यादी 'वीसपुहुत्तं' ति छेदोपस्थापनीयस्योत्कर्षतो विंशतिपृथक्त्वं पञ्चषादिविंशतयः आकर्षाणां भवन्ति 'परिहारविसुद्धियस्से' त्यादौ 'उक्कोसेणं तिन्नि'त्ति परिहारविसुद्धिकसंयतत्वं त्रीन् वारान् एकत्र भवे उत्कर्षतः प्रतिपद्यते, 'सुहुमसंपरायस्से'त्यादौ 'उक्कोसेणं चत्तारि' ति एकत्र भवे उपशमश्रेणीद्वयसम्भवेन प्रत्येकं सङ्क्लिश्यमान विसुध्ध्यमानलक्षणसूक्ष्मसम्परायद्वयभावाच्चतः प्रतिपत्तयः सूक्ष्मसमपरायसंयत्वे भवन्ति, 'अहक्खाए' इत्यादौ 'उक्कोसेणं दोन्नि' त्ति उपशमश्रेणीद्वयसम्भवादिति ।

नानाभवग्रहणाकर्षाधिकारे 'छेओवट्ठावणीयस्से'त्यादौ 'उक्कोसेणं उवरिं नवण्हं सयाणं अंतोसहस्स'त्ति, कथं ? किलैकत्र भवग्रहणे षड्विंशतय आकर्षाणां भवन्ति, ताश्चाष्टाभिर्भवैर्गुणिता नव शतानि षष्ट्यधिकानि भवन्ति इदं च सम्भवमात्रमाश्रित्य सङ्ख्याविशेषप्रदर्शनमतोऽन्यथाऽपि यथा नव शतान्यधिकानि भवन्ति तथा कार्यं, 'परिहारविसुद्धियस्से'त्यादौ 'उक्कोसेणं सत्त'त्ति, कथम् ?, एकत्र भवे तेषां त्रयाणामुक्तत्वात् भवत्रयस्य च तस्याभिधानादेकत्र भवे त्रयं द्वितीये द्वयं तृतीये द्वयमित्यादिविकल्पतः सप्ताकर्षाः परिहारविशुद्धिकस्येति ।

'सुहुमसंपरायस्से'त्यादौ 'उक्कोसेणं नव'त्ति, कथं ?, सूक्ष्मसम्परायस्यैकत्र भवे आकर्षचतुष्कस्योक्तत्वाद्भवत्रयस्य च तस्याभिधानादेकत्र चत्वारो द्वितीयेऽपि चत्वारस्तृतीये चैक इत्येवं नवेति । 'अहक्खाए' इत्यादौ 'उक्कोसेणं पंच'त्ति, कथं ?, यथाख्यात-संयतस्यैकत्रभवे द्वावाकर्षौ द्वितीये च द्वावेकत्र चैक इत्येवं पञ्चेति ।। कालद्वारे–

**मू. (९५३)** *सामाइयसंजए णं भंते ! कालओ केवच्चिरं होइ ?, गोयमा ! जहन्नेणं एक्कं समयं उक्कोसेणं देसूणएहिं नवहिंवासेहिं ऊणिया पुव्वकोडी, एवं छेदोवट्ठावणिएवि, परिहारविसुद्धिए जहन्नेणं एक्कं समयं उक्कोसेणंदेसूणएहिं एकूणतीसाए वासेहिं ऊणिया पुव्वकोडी,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुहुमसंपराए जहा नियंठे, अहक्खाए जहा सामाइयसंजए ।

सामाइयसंजया णं भंते ! कालओ केवच्चिरंहोइ ?, गोयमा ! सव्वद्धा, छेदोवट्ठावणिएसु पुच्छा, गोयमा ! जहन्नेणं अड्ढाइज्जाइं वाससयाइं उक्को० पन्नासं सागरोवमकोडियसहस्साइं ।

परिहारविसुद्धीए पुच्छा, गोयमा ! जहन्नेणं देसूणाइं दो वाससयाइं उक्को देसूणाओ दो पुव्वकोडीओ, सुहुमसंपरागसंजया णं भंते ! पुच्छा, गोयमा ! जह० एक्कं समयं उक्कोसेणं अंतोमुहुत्तं, अहक्खायसंजया जहा सामाइयसंजया २९ ॥

सामाइयसंजयस्स २ णं भंते ! केवतियं कालं अंतरं होइ ?, गोयमा ! जहन्नेणं जहा पुलागस्स एवं जाव अहक्खायसंजयस्स, सामाइयसं० भंते ! पुच्छा, गोयमा ! नत्थि अंतरं, छेदोवट्ठावणिय पुच्छा, गोयमा ! जहन्नेणं तेवट्ठिं वाससहस्सां उक्कोसेणं अट्ठारस सागरोवमकोडाकाडीओ, परिहारविसुद्धियस्स पुच्छा, गोयमा ! जहन्नेणं चउरासीइं वाससहस्साइं उक्कोसेणं अट्ठारस सागरोवमकोडाकोडीओ, सुहुमसंपरायाणं जहा नियंठाणं, अहक्खायाणं जहा सामाइयसंजयाणं ३० ।

सामाइयसंजयस्स णं भंते ! कति समुग्घाया पन्नत्ता ?, गोयमा! छ समुग्घाया पन्नत्ता, तं जहाकसायकुसीलस्स, एवं छेदोवट्ठावणियस्सवि, परिहारविसुद्धियस्स जहा पुलागस्स, सुहुमसंपरागस्स जहा नियंठस्स, अहक्खायस्स जहा सिणायस्स ३१ ।

सामाइयसंजए णं भंते ! लोगस्स किं संखेज्जइभागे होज्जा असंखेज्जइभागे पुच्छा, गोयमा नो संखेज्जइजहा पुलाए, एवं जाव सुहुमसंपराए । अहक्खायसंजए जहा सिणाए ३२ ।

सामाइयसंजए णं भंते ! लोगस्स किं संखेज्जइभागं फुसइ जहेव होज्जा तहेव फुसइ ३३ ।

सामाइयसंजए णं भंते ! कयरंमि भावे होज्जा ?, गोयमा ! उवसमिए भावे होज्जा, एवं जाव सुहुमसंपराए, अहक्खायसंपराए पुच्छा, गोयमा ! उवसमिए वा खइए वा भावे होज्जा ३४

सामाइयसंजयाणं भंते ! एगसमएणं केवतिया होज्जा ?, गोयमा ! पडिवज्जमाणए य पडुच्च जहा कसायकुसीला तहेव निरवसेसं, छेदोवट्ठावणिया पुच्छा, गोयमा ! पडिवज्जमाणे पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सयपुहुत्तं, पुव्वपडिवन्नए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं कोडिसयपुहुत्तं उक्कोसेणवि कोडिसयपुहुत्तं, परिहारविसुद्धिया जहा पुलागा, सुहुमसंपराया जहा नियंठा ।

अहक्खायसंजयाणं पुच्छा, गोयमा ! पडिवज्जमाणए पडुच्च सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं बावट्ठसयं अट्ठुत्तरसयं खवगाणं चउप्पन्नं उवसामगाणं, पुव्वपडिवन्नए पडुच्च जहन्नेणं कोडिपुहुत्तं उक्कोसेणवि कोडिपुहुत्तं ।

एएसि णं भंते ! सामाइयछेओवट्ठावणियपरिहारविसुद्धियसुहुमसंपरायअहक्खायसंजयाणं कयरे २ जाव विसेसाहिया ?, गोयमा ! सव्वत्थोवा सुहुमसंपरायसंजया परिहारविसुद्धियसंजया संखेज्जगुणा अहक्खायसंजया संखे० छेओवट्ठवणियसंजया संखे० सामाइयसंजया संखेज्ज० ३६ ।

**वृ.** 'सामाइय' इत्यादौ सामायिकप्रतिपत्तिसमयसमनन्तरमेव मरणादेकः समयः, 'उक्कोसेणं देसूणएहिं नवहिं वासेहिं ऊणिया पुव्वकोडी' त्ति यदुक्तं तद्गर्भसमयादारभ्यावसेयम्, अन्यथा जन्मदिनापेक्षयाऽष्टवर्षोनिकैव सा भवतीति, 'परिहारविसुद्धिए जहन्नेणं एक्कं समयं' ति मरणापेक्षमेतत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उक्कोसेणं देसूणएहिं' ति, अस्यायमर्थः—देशोननववर्षजन्मपर्यायेण केनापि पूर्वकोट्यायुषा प्रव्रज्या प्रतिपन्ना, तस्य च विंशतिवर्षप्रव्रज्यापर्यायस्य दृष्टिवादोऽनुज्ञातस्ततश्चासौ परिहारविशुद्धिकं प्रतिपन्नः, तच्चाष्टादशमासमानमप्यविच्छिन्नतत्परिणामेन तेनाजन्म पालितमित्येवमेकोनत्रिंशद्वर्षोनां पूर्वकोटिंयावत्तत्स्यादिति, 'अहक्खाए जहा सामाइयसंजए' त्ति तत्र जघन्यत एकं समयं उपशमावस्थायां मरणात्, उत्कर्षतो देशोना पूर्वकोटी, स्नातकयथाख्यातापेक्षयेति।

पृथक्त्वेन कालचिन्तायां 'छेओवट्ठावणिए' इत्यादि, तत्रोत्सर्प्पिण्यामादितीर्थकरस्य तीर्थं यावच्छेदोपस्थापनीयं भवतीति, तीर्थं च तस्य सार्द्धे द्वे वर्षशते भवतीत्यत उक्तं—'अड्ढाइज्जाइं' इत्यादि, तथाऽवसर्प्पिण्यामादितीर्थकरस्य तीर्थं यावच्छेदोपस्थापनीयं प्रवर्त्तते तच्च पञ्चाशत्सागरोपमकोटीलक्षा इत्यतः 'उक्कोसेणं पन्नास' मित्याद्युक्तमिति।

परिहारविशुद्धिककालो जघन्येन 'देसूणाइं दो वाससयाइं' ति, कथम्?, उत्सर्प्पिण्यामाद्यस्य जिनस्य समीपे कश्चिद्वर्षशतायुः परिहारविशुद्धिकं प्रतिपन्नस्तस्यान्तिके तज्जीवितान्तेऽन्यो वर्षशतायुरेव ततः परतो न तस्य प्रतिपत्तिरस्तीत्येवं द्वे वर्षशते, तयोश्च प्रत्येकमेकोनत्रिंशति वर्षेषु गतेषु तत्प्रतिपत्तिरित्येवमष्टपञ्चाशता वर्षैर्न्यूने ते इति देशोने इत्युक्तं। एतच्च टीकाकारव्याख्यानं, चूर्णिकारव्याख्यानमप्येवमेव, किन्त्वसर्प्पिण्यन्तिमजिनापेक्षमिति विशेषः, 'उक्कोसेणं देसूणाओ दो पुव्वकोडीओ' त्ति, कथम्?, अवसर्प्पिण्यामादितीर्थकरस्यान्तिके पूर्वकोट्यायुः कश्चित्परिहारविशुद्धिकं प्रतिपन्नस्तस्यान्तिके तज्जीवितान्तेऽन्यस्तादृश एव तत्प्रतिपन्न इत्येवं पूर्वकोटीद्वयं तथैव देशोनं परिहारविशुद्धिकसंयतत्वं स्यादिति।

अनन्तरद्वारे—'छेओवट्ठावणिए' त्यादौ 'जहन्नेणं तेवट्ठिं वाससहस्साइं' ति, कथम्?, अवसर्पिण्यां दुष्षमां यावच्छेदोपस्थापनीयं प्रवर्त्तते ततस्तस्या एवैकविंशतिवर्षसहस्रमानायामेकान्तदुष्षमायामुत्सर्प्पिण्याश्चैकान्तदुष्षमायां च तत्प्रमाणायामेव तदभावः तु एवं चैकविंशतिवर्षसहस्रमानत्रयेण त्रिषष्टिवर्षसहस्राणामन्तरमिति, 'उक्कोसेणं अट्ठारस सागरोवमकोडाकोडीओ' त्ति किलोत्सर्प्पिण्यां चतुर्विंशतितमजिनतीर्थे छेदोपस्थापनीयं प्रवर्त्तते ततश्च सुषमदुष्षमादिसमात्रयेक्रमेण द्वित्रिचतुःसागरोपमकोटीकोटीप्रमाणे अतीते अवसर्प्पिण्याश्चैकान्तसुषमादित्रये क्रमेण चतुस्त्रिद्विसागरोपमकोटी२प्रमाणे अतीतप्राये प्रथमजिनतीर्थे छेदोपस्थापनीयं प्रवर्त्तत इत्येवं यथोक्तंछेदोपस्थापनीयस्यान्तरं भवति, यच्चेह किञ्चिन्न पूर्यते यच्च पूर्वसूत्रेऽतिरिच्यते तदल्पत्वान्न विवक्षितमिति, 'परिहारविसुद्धिस्से' त्यादि।

परिहारविशुद्धिकसंयतस्यान्तरं जघन्यं चतुरशीतिवर्षसहस्राणि, कथम्?, अवसर्प्पिण्या दुष्षमैकान्तदुष्षमयोरुत्सर्प्पिण्याश्चैकान्तदुष्षमादुष्षमयोः प्रत्येकमेकविंशतिवर्षसहस्रप्रमाणत्वेन चतुरशीतिवर्षसहस्राणां भवति तत्र च परिहारविशुद्धिकं न भवतीतिकृत्वा जघन्यमन्तरं तस्य यथोक्तं स्यात्, यश्चेहान्तिमजिनानन्तरो दुष्षमायां परिहारविशुद्धिककालो यश्चोत्सर्प्पिण्यास्तृतीयसमायां परिहारविशुद्धिकप्रतिपत्तिकालात्पूर्व कालो नासौ विवक्षितोऽल्पत्वादिति, 'उक्कोसेणं अट्ठारस सागरोवमकोडाकोडीओ' त्ति छेदोपस्थापनीयोत्कृष्टान्तरवदस्य भावना कार्येति।

परिणामद्वारे 'छेदोवट्ठावणिये' इत्यादौ 'जहन्नेणं कोडिसयपुहुत्तं उक्कोसेणवि कोडिसयपुहुत्तं' त्ति, इहोत्कृष्टं छेदोपस्थापनीयसंयतपरिमाणमादितीर्थकरतीर्थान्याश्रित्य संभवति, जघन्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु तत्समयग् नावगम्यते, यतो दुष्षमान्ते भरतादिषु दशसु क्षेत्रेषु प्रत्येकं तद्द्वयस्य भावाद्विंशतिरेव तेषां श्रूयते, केचित्पुनराहुः–इदमप्यादितीर्थकराणां यस्तीर्थकालस्तदपेक्षयैव समवसेयं, कोटीशतपृथकत्वं च जघन्यमल्पतरमुत्कृष्टं च बहुतरमिति।

अल्पबहुत्वद्वारे–'सव्वत्थोवा सुहुमसंपरायसंजय'त्ति स्तोकत्वात्तत्कालस्य निर्ग्रन्थतुल्यत्वेन च शतपृथक्त्वप्रमाणत्वात्तेषां, 'परिहारविसुद्धियसंजया संखेज्जगुण'त्ति तत्कालस्य बहुत्वात्, पुलाकतुल्यत्वेन च सहस्रपृथक्त्वमानत्वात्तेषाम्, 'अहक्खायसंजया संखेज्जगुण'त्ति कोटीपृथक्त्वमानत्वात्तेषां 'छेदोवट्ठावणियसंजया संखेज्जगुण'त्ति कोटीशतपृथक्त्वामानतया तेषामुक्तत्वात, 'सामाइयसंजया संखेज्जगुण'त्ति कषायकुशीलतुल्यतया कोटीसहस्रपृथक्त्वमानत्वेनोक्तत्वात्तेषामिति

अनन्तरं संयता उक्तास्तेषां च केचित्प्रतिसेवावन्तो भवन्तीति प्रतिसेवाभेदान् प्रतिसेवा च निर्दोषमालोचयितव्येति आलोचनादोषान् आलोचनासम्बन्धादालोचकगुणान् गुरुगुणांश्च दर्शयन्नाह–

**मू. (९५४)** *पडिसेवण दोसालोयणा य आलोयणारिहे चेव।*
*तत्तो सामायारी पायच्छित्ते तवे चेव ॥*

**मू. (९५५)** *कइविहा णं भंते! पडिसेवणा प० गो० ?, गोयमा! दसविहा पडिसे० पं०, तं०–*

**मू. (९५६)** *दप्प १ प्पमाद २ ऽणाभोगे ३, आउरे ४ आवती ५ ति य।*
*संकिन्ने ६ सहसक्कारे, ७ भय ८ प्पओसा ९ य वीमंसा १०।*

**वृ.** 'दसविहे'त्यादि, 'दप्पप्पमायऽणाभोगे'त्ति, इह सप्तमी प्रत्येकं दृश्या, तेन दर्पे सति प्रतिसेवा भवति दर्पश्चवल्गनादि, तथा प्रमादे सति, प्रमादश्च मद्यविकथादिः, तथाऽनाभोगे सति, अनाभोगश्चाज्ञानम्, 'आतुरे'त्ति आतुरत्वे सति, आतुरश्च बुभुक्षापिपासादिबाधितः, आवईय ति आपदि सत्यां, आपच्च द्रव्यादिभेदेन चतुर्विधा, तत्र द्रव्यापत् प्रासुकादिद्रव्यालाभः, क्षेत्रापत् कान्तारक्षेत्रपतितत्वं, कालापत् दुर्भिक्षकालप्राप्ति, भावापद् ग्लानत्वमिति।

'संकिण्णे'त्तिसङ्कीर्णे स्वपक्षपरपक्षव्याकुले क्षेत्रे सति, 'संकिय'त्तिक्वचित्पाठस्तत्र च शङ्किते–आधाकर्म्मादित्वेन शङ्कितभक्तादिविषये, निशीथपाठे तु 'तिंतिण' इत्यभिधीयते, तत्र च तिन्तिणत्वे सति, तच्चाहाराद्यलाभे सखेदं वचनं, 'सहसक्कारे'त्ति सहसाकारे सति–आकस्मिकक्रियायां, तथा च–

॥१॥ "पुव्विं अपासिऊणं पाए छूढंमि जं पुणो पासे।
न तरइ नियत्तेउं पायं सहसाकरणमेयं ॥ इति।

भयप्पओसाय त्ति भयात्–सिंहादिभयेन प्रतसेवा भवति, तथा प्रद्वेषाच्च, प्रद्वेषश्चक्रोधादिः, 'वीमंस'त्ति विमर्शात्–शिक्षकादिपरीक्षणादिति, एवं कारणभेदेन दश प्रतिसेवाभेदा भवन्ति।

**मू. (९५७)** *दस आलोयणादोसा पन्नत्ता, तंजहा–*

**मू. (९५८)** *आकंपइत्ता १ अणुमाणइत्ता २ जं दिट्ठं ३ बायरं च ४ सुहुमं वा ५।*
*छन्नं ६ सद्दाउलयं ७ बहुजण ८ अव्वत्त ९ तस्सेवी १०॥*

**वृ.** 'आकंपइत्ता'गाहा, आकम्प्य–आवर्जितः सन्नाचार्य स्तोकं प्रायश्चित्तं मे दास्यती-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिबुद्धयाऽऽलोचनाऽऽचार्यं वैयावृत्यकणादिनाऽऽवर्ज्य यदालोचनमसावालोचनादोषः 'अणुमाणइत्त'त्ति अनुमान्य–अनुमानं कृत्वा लघुतरापराधनिवेदनेन मृदुदण्डादित्वमाचार्यस्याकालय्य यदालोचनमसौ तद्दोषः, एवं 'जं दिट्ठं'त्ति यदाचार्यादिना दृष्टमपराधजातं तदेवालोचयति

'बायरं व'त्ति बादरमेवातिचारजातमालोचयति न सूक्ष्मं तत्रावज्ञापरत्वात्, 'सुहुमं व'त्ति सूक्ष्ममेवातिचारजातमालोचयति,यः किल सूक्ष्मं तदालोचयति स कथं बादरं तन्नालोचयतीत्येवंरूपभावसम्पादनायाऽऽचार्यस्येति, 'छन्नं'ति छन्नं प्रतिच्छन्नं प्रच्छनं–अतिलज्जालुतयाऽव्यक्तवचनं यथा भवति, एवमालोचयति यथाऽऽत्मनैव शृणोति।

'सद्दाउलयं'ति शब्दाकुलं–बृहच्छब्दं यथा भवत्येवमालोचयति, अगीतार्थान् श्रावयन्नित्यर्थः, 'बहुजण'त्ति बहवो जना–आलोचनागुरवो यत्रालोचने तद्बहुजनं यथा भवत्येवमालोचयति, एकस्याप्यपराधस्य बहुभ्यो निवेदनमित्यर्थः, 'अव्वत्त'त्ति अव्यक्तः–अगीतार्थस्तस्मै आचार्याय यदालोचनं तदप्यव्यक्तमित्युच्यते, 'तस्सेवि'त्ति यमपराधमालोचयिष्यति तमेवासेवते यो गुरु स तत्सेवी तस्मै यदालोचनं तदपि तत्सेवीति, यतः समानशीलाय गुरवे सुखेनैव विवक्षितापराधो निवेदयितुं शक्यत इति तत्सेविने निवेदयतीति।

**मू. (९५९)** *दसहिं ठाणेहिं संपन्ने अनगारे अरिहति अत्तदोसं आलोइत्तए, तंजहा–जातिसंपन्ने १ कुलसंपन्ने २ विनयसंपन्ने ३ नाणसंपन्ने ४ दंसणसंपन्ने ५ चरित्तसंपन्ने ६ खंते ७ दंते ८ अमायी ९ अपच्छाणुतावी १०।*

*अट्ठहिं ठाणेहिं संपन्ने अणगारे अरिहति आलोयणं पडिच्छित्तए, तंजहा–आयारवं १ आहारवं २ ववहारवं ३ उव्वीलए ४ पकुव्वए ५ अपरिस्सावी ६ निज्जवए ७अवायदंसी ८।*

**वृ.** 'जाइसंपन्ने' इत्यादि, नन्वेतावान् गुणसमुदाय आलोचकस्य कस्मादन्विष्यते? इति, उच्यते, जातिसम्पन्नः प्रायोऽकृत्यं न करोत्येव कृतं च सम्यगालोचयतीति, कुलसम्पन्नोऽङ्गीकृतप्रायश्चित्तस्य वोढा भवति, विनयसम्पन्नो वन्दनादिकाया आलोचनासामाचार्या प्रयोक्ता भवतीति, ज्ञानसम्पन्नः कृत्याकृत्यविभागं जानाति, दर्शनसम्पन्नः प्रायश्चित्ताच्छुद्धिं श्रद्धत्ते, चारित्रसम्पन्नः प्रायश्चित्तमङ्गिकरोति, क्षान्तो–गुरुभिरुपालम्भितो न कुप्यति, दान्तो–दान्तेन्द्रियतया शुद्धिं सम्यग् वहति, अमायी–अगोपयन्नपराधमालोचयति, अपश्चात्तापी आलोचितेऽपराधे पश्चात्तापमकुर्वन्निर्जराभागी भवतीति।

'आयारव'मित्यादि, तत्र'आचारवान्' ज्ञानादिपञ्चप्रकाराचारयुक्तः 'आहारवं'ति आलोचितापराधानामवधारणावान् 'ववहारवं'ति आगमश्रुतादिपञ्चप्रकारव्यवहाराणामन्यतमयुक्तः 'उव्वीलए'त्ति अपव्रीडकः लजजयाऽतीचारान् गोपायन्तं विचित्रवचनैर्विलज्जीकृत्य सम्यगालोचनां कारयतीत्यर्थः 'पकुव्वए'त्ति आलोचितेष्वपराधेषु प्रायश्चित्तदानतो विशुद्धिं कारयितुं समर्थः 'अपरिस्सावि'त्ति आलोचकेनालोचितान् दोषान् योऽन्यस्मै न कथयत्यसावपरिश्रावी 'निज्जवए'त्ति 'निर्य्यापकः' असमर्थस्य प्रायश्चित्तिनः प्रायश्चित्तस्य खण्डशः करणेन निर्वाहकः 'अवायदंसि'त्ति आलोचनाया अदाने पारलौकिकापायदर्शनशील इति।

अनन्तरमालोचनाचार्य उक्तः, स च सामाचार्या प्रवर्त्तको भवतीति तां प्रदर्शयन्नाह–

**मू. (९६०)** *दसविहा सामायारि प० तं०–*

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वृ. 'दसविहा सामायारी'त्यादि, प्रतीता चेयं ।

मू. (९६१) *इच्छा १ मिच्छा २ तहक्कारे ३, आवस्सिया य ४ निसीहिया ५ ।*
*आपुच्छणा य ६ पडिपुच्छा ७, छंदणा य ८ निमंतणा ९ ॥*
*उवसंपया १० य काले, सामायीरा भवे दसहा ॥*

वृ. नवरमापृच्छा—कार्ये प्रश्न इति, प्रतिपृच्छा तु पूर्वनिषिद्धे कार्य एव, तथा छन्दना—पूर्वगृहीतेन भक्तादिना निमन्त्रणा त्वगृहीतेन, उपसम्पच्च—ज्ञानादिनिमित्तमाचार्यान्तराश्रयणमिति

मू. (९६२) *दसविहे पायच्छित्ते पं० तं० आलोयणारिहे पडिक्कमणारिहे तदुभयारिहे विवेगारिहे विउसग्गारिहे तवारिहे छेदारिहे मूलारिहे अणवट्ठप्पारिहे पारंचियारिहे ।*

वृ. अथ सामाचारीशेषत्वात्प्रायश्चित्तस्य तदभिधातुमाह—'दसविहे'त्यादि, इह प्रायश्चित्त-शब्दोऽपराधे तच्छुद्धौ च दृश्यते तदिहापराधे दृश्यः ।

तत्र 'आलोयणारिहे'त्ति आलोचना—निवेदना तल्लक्षणां शुद्धिं यदर्हत्यतिचारजातं तदालोचनार्हं, एवमन्यान्यपि, केवलं प्रतिक्रमणं—मिथ्यादुष्कृतं तदुभयं आलोचनामिथ्यादुष्कृते, विवेकः—अशुद्धभक्तादित्यागः । व्युत्सर्ग—कायोत्सर्ग तपोःनिर्वकृतिकादि, छेदः—प्रव्रज्याप-र्यायह्रस्वीकरणं मूलं—महाव्रता- रोपणं अनवस्थाप्यं—कृततपसो व्रतारोपणं पाराञ्चिकं—लिङ्गादिभेदमिति ।

प्रायश्चित्तं च तप ऊक्तं, अथ तप एव भेदत आह—

मू. (९६३) *दुविहे तवे पन्नते, तंजहा—बहिरिए याब्भितरए य, से किं तं बाहिरए तवे?, बाहिरए तवेछव्विहे प०, तं०—*

मू. (९६४) *अणसण ऊणोयिया भिक्खायरिया य रसपरिच्चाओ ।*
*कायकिलेसो पडिसंलीणया बज्झो (तवोहोइ) ॥*

मू. (९६५)' *से किं तं अणसणे ?, अ० २ दुविहे पं०, तं०—इत्तरि य आवकहिए य, से किं तं इत्तरिए ?, २ अनेगविहे पन्नत्ते, तंजहा—चउत्थे भत्ते छट्ठे भत्ते अट्ठमे भत्ते दसमे भत्ते दुवालसमे भत्ते चोदसमे भत्ते अद्धमासिए भत्ते मासिए भत्ते दोमासिए भत्ते तेमासिए भत्ते जाव छम्मासिए भत्ते, सेत्तं इत्तरिए ।*

*से किं तं आवकहिए ?, आवक० २ दुविहे पं०, तं०—पाओवगमणे य भत्तपच्चक्खाणे य से कं तं पाओवगमणे ?, पा० २ दुविहे० पं०, तं०—नीहारिमे य अनीहारिमे य नियमं अपडिकम्मे, से तं पाओवगमणे, से किं तं भत्तपच्चक्खाणे ?, भत्त० २ दुविहे प०, तं०—नीहारिमे य अनीहारिमे य नियमं सपडिक्कमे, सेत्तं भत्तपच्चक्खाणे, सेत्तं आवकहिए, सेत्तं अणसणे ।*

*से किं तं ओमोयरिया ?, ओमोयरिया दुविहा पं०, तं०—दव्वोमोयरिया य भावोमोयरिया य से किं तं दव्वोमोयरिया ?, २ दुविहा प० तं०—उवगरणदव्वोमोयरिया य भत्तपाणदव्वोमोयरिया य से किं तं उवगरणदव्वोमोयरिया ?, २ एगे वत्थे एगे पादे चियत्तोवगरणसातिज्जणया, सेत्तं उवकरणदव्वोमोय०, से किं तं भत्तपाणदव्वोमोयरिया ?, अट्ठकुक्कडिअंडगप्पमाणमेत्ते कवले आहारं आहारेमाणस्स अप्पाहारे दुवालस जहा सत्तमसए पढमोद्देसए जाव नो पकामरसभोतीति वत्तव्वं सिया, सेत्तं भत्तपाणदव्वोमोयरिया, सेत्तं दव्वोमोयरिया ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं भावमोयरिया ?, भावो० २ अनेगविहा पं०, तं०—अप्पकोहे जाव अप्पलोभे अप्पसद्दे अप्पझञ्झे अप्पतुमंतुमे, सेत्तं भावोमोदरिया, सेत्तं ओमोयरिया।

से किं तं भिक्खा० ?, भि० २ अनेगविहा प० तं०—दव्वाभिग्गहचरए जहा उववाइए जाव सुद्धेसणिए संखादत्तिए, सेत्तं भिक्खायरिया।

से किं तं रसपरिच्चाए ?, र० र अणेगविहे पं० तं०—निव्विगितिए पणीयरसविवज्जए जहा उववाइए जाव लूहाहारे, सेत्तं रसपरिच्चाए।

से किं तं कायकिलेसे ?, कायकिलेसे अनेगविहे पं० तं०—ठाणादीए उक्कुडुयासणिए जहा उववाइए जाव सव्वगायपडिकम्मविप्पमुक्क, सेत्तं कायकिलेसे।

से किं तं पडिसंलीणया ?, पडिसंलीणया चउव्विहा पं० तं०—इंदियपडिसंलीणया कसायपडिसंलीणया जोगपडिसंलीणया विवित्तसयणासणसेवणया।

से किं तं इंदियपडिसंलीणया ?, २ पंचविहा पं० तं०—सोइंदियविसयप्पयारनिरोहो वा सोइंदियविसयप्पत्तेसु वा अत्थेसु रागदोसविणिग्गहो चक्खिदियविसय एवं जाव फासिंदियविसयपयारनिरोहो वा फासिंदियविसयप्पत्तेसु वा अत्थेसु रागदोसविणिग्गहो, सेत्तं इंदियपडिसंलीणया।

से किं तं कसायपडिसंलीणया ?, कसायपडिसंलीणया चउव्विहा पं०, तंजहा—कोहोदयनिरोहो वा उदयप्पत्तस्स वा कोहस्स विफलीकरणं एवं जाव लोहोदयनिरोहो वा उदयपत्तस्स वा लोभस्स विफलीकरणं, सेत्तं कसायपडिसंलीणया।

से किं तं जोगपडिसंलीणया ?, जोगपडिसंलीणया तिविहा पन्नत्ता, तंजहा—अकुसलमणनिरोहो वा कुसलमणउदीरणं वा मणस्स वा एगत्तीभावकरणं अकुसलवइनिरोहो वा कुसलवइउदीरणं वा वइए वा एगत्तीभावकरणं।

से किं तं कायपडिसंलीणया ?, २ जन्नं सुसमाहियपसंतसाहरियपाणिपाए कुम्मो इव गुत्तिंदिए अल्लीणे पल्लीणे चिट्ठति, सेत्तं कायपडिसंलीणया, सेत्तं जोगपडिसंलीणया।

से किं तं विवित्तसयणासणसेवणया ?, विवित्तसय० २ जन्नं आरामेसु वा उज्जाणेसु वा जहा सोमिलुद्देसए जाव सेज्जासंथारगं उवसंपज्जित्ताणं विहरइ, सेत्तं विवित्तसयणासणसेवणया सेत्तं पडिसंलीणया, सेत्तं बाहिरए तवे १।

से किं तं अब्भितरए तवे ?, २ छव्विहे पं०, तं०—पायच्छित्तं विणओ वेयावच्चं सज्झाओ। झाणं विउसग्गो।

से किं तं पायच्छित्ते ?, पाय० दसविहे पं०, तं०—आलोयणारिहे जाव पारंचियारिहे, सेत्तं पायच्छित्ते।

से किं तं विनए ?, विनए सत्तविहे पन्नत्ते, तंजहा—नाणविनए दंसणविनए चरित्तविनए मणविनए वयविनए कायविनए लोगोवयारविनए।

से किं तं नाणविनए ?, ना० २ पंचविहे प० तं०—आभिनिबोहियनाणविनए जाव केवलनाण-विनए, सेत्तं नाणविनए।

से किं तं दंसणविनए ?, दंसनविनए दुविहे० पं०, तं०—सुस्सूसणाविनए य अणच्चासाद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाविणए य, से किं तं सुस्सूसनाविनए?, सुं० २ अनेगविहे पं०, तं०–सक्कारेइ वा सम्माणेइ वा जहा चोद्दसमसए ततिए उद्देसए जाव पडिसंसाहणया, सेत्तं सुस्सूसणाविनए।

से किं तं अणच्चासायनाविनए?, अ० २ पणयालीसइविहे पं० तं०–अरिहंताणं अणच्चासादनया अरिहंतपन्नत्तस्स धम्मस्स अणच्चासा० आयरियाणं अणच्चासाद० उवज्झायाणं अणच्चासा० थेराणं अणच्चासा० कुलस्स अणच्चासा० गणस्स अणच्चासा० संघस्स अणच्चासा० किरियाए अणच्चासा० संभोगस्स अणच्चासाय० आभिनिबोहिय- नाणस्स अणच्चासा० जाव केवलनाणस्स अणच्चासादनया १५, एएसि चेव भत्तिबहुमाणेणं एएसिं चेव वन्नसंजलणया, सेत्तं अणच्चचासयणयाविनए, सेत्तं दंसणविनए।

से किं तं चरित्तविनए?, च २ पंचविहे पं० तं०–सामाइयचरित्तविनए जाव अहक्खायचरित्तविनए, सेत्तं चरित्तविनए ।

से किं तं मणविनए?, म० २ दुविहे पं०, तं०–पसत्थमणविनए अपसत्थमणविनए य, से किं तं पसत्थमणविनए?, पस० २ सत्तविहे प०, तंजहा–अपावए असावज्जे अकिरिए निरुवक्के अणण्हवकरे अच्छविकरे अभूयाभिसंकणे, सेत्तं पसत्थमणविनए, से किं तं अपसत्थमणविनए?, अप्प० २ सत्तविहे पं० तं–पावए सावज्जे सकिरिए सउवक्कसे अण्हवयकरे छविकरे भूयाभिसंकणे, सेत्तं अप्पसत्थमणविणए, सेत्तं मणविनए।

से किं तं वइविनए?, व० २ दुविहे पं० तं०–पसत्थवइविनए अप्पसत्थवइविनए य, से किं तं पसत्थवइविनए?, प० २ सत्तविहे पं० तं०–अपावए जाव अभूयाभिसंकणे, सेत्तंपसत्थवइविणए, से किं तं अप्पसत्थवइविणए?, अ० २ सत्तविहे पं० तं०–पावए सावज्जे जाव भूयाभिसंकणे, सेत्तं अपसत्थवयविनए से तं वयविनए, से किं तं कायवि०? २ दुविहे प० तं० –पसत्थकायविनए य अपसत्थकायविनए सेकिं तं पसत्थकायवि०? पस० २ सत्तविहे पं० तंजहा–आउत्तं गमणं आउत्तं ठाणं आउत्तं निसीयणं आउत्तं तुयट्टणं आउत्तं उल्लंघणं आउत्तं पल्लंघणं आउत्तं सव्विंदिय-जोगजुंजणया, सेत्तं पसत्थकायविणए, से किं तं अप्पसत्थकायविनए अ० २ सत्तविहे पन्नत्ते, तंजहा–अणाउत्तं गमणं जाव अणाउत्तं सव्विंदियजोगजुंजणया, सेत्तं अप्पसत्थकायविनए, सेत्तं कायविनए।

से किं तं लोगोवयारविनए?, लोगो० २ सत्तविहे पं०, तं०–अब्भासवत्तियं परच्छंदाणुवत्तियं कज्जहेऊ कयपडिकतिया अत्तगवेसणया देसकालण्णया सव्वत्थेसु अप्पडिलोमया, सेत्तं लोगोवयारविनए, सेत्तं विनए।

**वृ.** 'दुविहे'त्यादि, 'बाहिरिए य'त्ति बाह्यं–बाह्यस्यापि शरीरस्य तापनात् मिथ्यादृष्टिभिरपि तपस्याऽभ्युपगमाच्च 'अब्भितरिए य'त्ति आभ्यन्तरम्–अभ्यन्तरस्यैव कार्म्मणाभिदानशरीरस्य प्रायस्तापनात्सम्यग्दृष्टिभिरेव प्रायस्तपस्तयाऽभ्युपगमाच्चेति 'ओमोयरिए'त्ति अवमस्य–ऊनस्योदरस्य करणमवमोदरिका, व्युत्पत्तिमात्रमेतदितिकृत्वोपकरणादेरपि न्यूनताकरणं सोच्यते, 'इत्तरिए य'त्ति अल्पकालीनं 'आवकहिए य'त्ति यावत्कथिकं–यावज्जीविकं, 'पाओवगमणे'त्ति पादपवन्निस्पन्दतयाऽवस्थानं, 'नीहारिमे'त्ति यदाश्रयस्यैकदेशे विधीयते, तत्र हि कडेवरमाश्रयान्निर्हरणीयं स्यादितिकृत्वा निर्हारिमं, 'अनीहारिमे य'त्ति अनिर्हारिमं यद् गिरिकन्दरादौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपद्यते, 'चियत्तोवगरणसाइज्ञणय'त्ति 'चियत्तस्स'त्ति लक्षणोपेततया संयतस्यैव 'साइज्ञणय'त्ति स्वदनता परिभोजनमिति, चूर्ण्यां तूक्तं-'जं वत्थाइ धारेइ तंमिवि ममत्तं नत्थि, जइ कोइ मग्गइ तस्स देइ'त्ति।

'अप्पकोहे'त्ति अल्पक्रोधः पुरुषोऽवमोदरिको भवत्यभेदोपचारादिति 'अप्पसद्दे'त्ति अल्पशब्दो रात्र्यादावसंयतजागरणभयात् 'अप्पझंझे'त्ति इह झञ्झा विप्रकीर्णा कोपविशेषाद्वचन-पद्धतिः, चूर्ण्यां तूक्तं – 'झंझा अनत्थयबहुप्पलावितं' 'अप्पतुमंतुमे'त्ति तुमन्तुमो–हृदयस्थः कोपविशेष एव

'दव्वाभिग्गचरए'त्ति भिक्षाचर्यायास्तद्वतश्चाभेदविवक्षणाद्रव्याभिग्रहचरको भिक्षाच-र्येत्युच्यते, द्रव्याभिग्रहाश्च लेपकृतादिद्रव्यविषयाः 'जहा उववाइए'त्ति, अनेनेदं सूचितं'खेत्ता-भिग्गहचरए कालाभिग्गहचरए भावाभिग्गहचरए' इत्यादि, 'सुद्धेसणिए'त्ति शुद्धैषणाशङ्किता-दिदोषपरिहारतः पिण्डग्रहस्तद्वांश्च शुद्धैषणिकः 'संखादत्तिए'त्ति सङ्ख्याप्रधानाः पञ्चषादयो दत्तयोभिक्षाविशेषा यस्य स तथा, 'जहा उववाइए'त्ति अनेनेदं सूचितम्–'आयंबिलिए आयाम-सित्थभोई अरसाहारे'इत्यादि।

'ठाणाइए'त्ति स्थानं–कायोत्सर्गादिकमतिशयेन ददाति गच्छतीति वा स्थानातिदः स्थानातिगो वा, 'जहा उववाइए'त्ति, अनेनेदं सूचितं–'पडिमट्ठाई वीरासणिए नेसज्जिए' इत्यादि, इह च प्रतिमाः–मासिक्यादयः, वीरासनं च–सिंहासननिविष्टस्य भून्यस्तपादस्य सिंहासनेऽपनीते यादशमवस्थानं, निषद्या च–पुताभ्यां भूमावुपवेशनं, 'सोइंदियविसयप्पयारनिरोहोव'त्ति श्रोत्रेन्द्रियस्य यो विषयेषु–इष्टानिष्टशब्देषु प्रचारः–श्रवणलक्षणा प्रवृत्तिस्तस्य यो निरोधो–निषेधः स तथा शब्दानां श्रवणवर्जनमित्यर्थः 'सोइंदियविसए'इत्यादि श्रोत्रेन्द्रियविषयेषु प्राप्तेषु च 'अर्थेषु' इष्टानिष्टशब्देषु रागद्वेषविनिग्रहो–रागद्वेषनिरोधः।

'मणस्स वा एगत्तीभावकरणं' मनसो वा 'एगत्त'त्ति विशिष्टैकाग्रत्वेनैकता तद्रूपस्य भावस्य करणमेकताभावकरणं, आत्मना वा सह यैकता–निरालम्बनत्वं तद्रूपो भावस्तस्य करणं यत्तत्तथा 'वईए वा एगत्तीभावकरणं'ति वाचो वा विशिष्टैकाग्रत्वनैकतारूपभावकरणमिति 'सुसमाहिय-पसंतसाहरियपाणिपाए'त्ति सुष्ठु समाहितः–समाधिप्राप्तो बहिर्वृत्या स चासौ प्रशान्तश्चान्तर्वृत्या यः स तथा संहृतं–अविक्षिप्ततया धृतं पाणिपादं येन स तथा ततः कर्म्मधारयः 'कुम्मो इव गुत्तिंदिए'त्ति गुप्तेन्द्रियो गुप्त इत्यर्थः, क इव ? कूर्म्म इव, कस्यामवस्थायामित्यत एवाह– 'अल्लीणे पल्लीणे'त्ति आलीनः–ईषल्लीनः पूर्वं प्रलीनः पश्चात् प्रकर्षेण लीनस्ततः कर्म्मधारः, 'सोमिलुद्देसए'त्ति अष्टादश-शतस्य दशमोद्देशके, एतेन च यत्सूचितं तत्तत एवावधार्यम्। 'पायच्छित्ते'त्ति इह प्रायश्चित्त-शब्देनापराधशुद्धिरुच्यते, 'वेयावच्चं'ति वैयावृत्यं–भक्तपाना- दिभिरुपष्टम्भः।

'नाणविनए'त्ति ज्ञानविनयो–मत्यादिज्ञानानां श्रद्धानभक्तिबहुमानतदष्टार्थभावना-विधिग्रहणाभ्यासरूपः 'दंसनविणए'त्ति दर्शनविनयः–सम्यग्दर्शनगुणाधिकेषु शुश्रूषादिरूपः 'चरित्त विनए'त्ति सामायिकादिचारित्राणां सम्यक्श्रद्धानकरणप्ररूपणानि 'लोगोवयारविनए'त्ति लोकानामुपचारो–व्यवहारः पूजा वा तद्रूपो यो विनयः स तथा 'सुस्सूसणाविनए'त्ति शुश्रूषणा–सेवा सैव विनयः शुश्रूषणाविनयः 'अनच्चासायणाविनए'त्ति अत्याशातना–आशातना तन्निषेधरूपो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनयोऽनत्याशातनाविनयः।

'किरियाए अणच्चासायणाए' त्ति इह क्रिया—अस्ति परलोकोऽस्त्याऽस्ति च सकलक्लेशा-कलङ्कितं मुक्तिपदमित्यादिप्ररूपणात्मिका गृह्यते 'संभोगस्सअनच्चासायणाए' त्तिसम्भोगस्य—समानधार्म्मिकाणांपरस्परेण भक्तादिदानग्रहणरूपस्यानत्याशातना—विपर्यासवत्करणपरिवर्जनं 'भत्तिबहुमाणेणं' ति इह णंकारो वाक्यालङ्कारे भक्त्या सह बहुमानो भक्तिबहुमानः भक्तिश्च इह बाह्या परिजुष्टि बहुमानश्च—आनन्तरः प्रीतियोगः 'वन्नसंजलणय' त्ति सद्भूतगुणवर्णनेन यशोदीपनं 'पसत्थमणविनए' त्ति प्रशस्तमन एव प्रवर्त्तनद्वारेण विनयः—कर्म्मापनयनोपायः प्रशस्तमनोविनयः, अप्रशस्तमन एव निवर्त्तनद्वारेण विनयोऽप्रशस्तमनोविनय 'अपावए' त्ति सामान्येन पापवर्जितं वेशेषतः पुनरसावद्यं—क्रोधाद्यवद्यवर्जितं।

'अकिरिए' त्ति कायिक्यादिक्रियाऽभिष्वङ्गवर्जितं 'निरुवक्केसं' ति स्वगतशोकाद्युपक्लेश-वियुक्तं 'अणण्हयकरे' त्ति अनआश्रवकरं प्राणातिपाताद्याशर्वणकरणरहितमित्यर्थः 'अच्छवि-करे' त्ति क्षपिः—स्वपरयोरायासो यत् तत्करणशीलं न भवति तदक्षपिकरं 'अभूयाभिसंक' ' त्ति यतो भूतान्यभिशङ्कन्ते—बिभ्यति तस्माद्यदन्यत्तदभूताभिराङ्कनं, प्रशस्तवाग्विनयसूत्रे 'अपावए' त्ति अपापवाकप्रवर्त्तनरूपो वाग्विनयोऽपापक इति, एवमन्येऽपि।

'आउत्तं' ति आगुप्तस्य—संयतस्य सम्बन्धि यत्तदागुप्तमेव 'उल्लंघणं' ति ऊर्ध्वं लङ्घनं द्वारार्गलावरण्डकादेः 'पल्लंघणं' ति प्रलङ्घनं—प्रकृष्टं लङ्घनं विस्तीर्णभूखातादेः 'सव्विंदियजोग-जुंजण' त्ति सर्वेषामिन्द्रिय व्यापाराणां प्रयोग इत्यर्थः 'अब्भासवत्तियं' ति अभ्यासो—गौरव्यस्य समीपं तत्र वर्त्तितुं शीलमस्येत्यभ्यासवर्त्ती तदभावोऽभ्यासवर्त्तित्वं, अभ्यासे वा प्रीतिकं—प्रेम।

'परछंदाणुवत्तियं' ति परस्—आराध्यस्य छन्दः—अभिप्रायस्तमनुवर्त्तयतीत्येवंशीलः परच्छन्दानुवर्त्ती तद्भावः परच्छन्दानुवर्त्तित्वं 'कज्जहेउं' ति कार्यहेतो—ज्ञानादिनिमित्तं भक्तादि-दानमिति गम्यं 'कयपडिकइय' त्ति कृतप्रतिकृ(ति)ता नाम विनयात्प्रसादिता गुरवः श्रुतं दास्यन्तीत्यभिप्रायेणाशनादिदानप्रयत्नः 'अत्तगवेसणय' त्ति आर्त्त—ग्लानीभूतं गवेषयति भैषज्यादिना योऽसावार्त्तगवेषणस्तद्भाव आर्त्तगवेषणता 'देसकालण्णय' त्ति प्रस्तावज्ञता—अवसरो चितार्थसम्पादनमित्यर्थः 'सव्वत्थेसु अपडिलोमय' त्ति सर्वप्रयोजनेष्वाराध्यसम्बन्धिष्वानुकूल्यमिति

**मू. (९६६)** *से किं तं वेयावच्चे ?, वे० २ दसविहे पं० तं०—आयरियवेयावच्चे उवज्झायवेया-वच्चे थेरवेयावच्चे तवस्सीवेया० गिलाणवेया० सेहवेया० कुलवेया० गणवेया० संघवेया० साहम्मियवेयावच्चे, सेत्तं वेयावच्चे।*

**मू. (९६७)** *से किं तं सज्झाए ?, सज्झाए पंचविहे पन्नत्ते, तं०—वायणा पडिपुच्छणा परियट्टणा अनुप्पेहा धम्मकहा, सेत्तं सज्झाए।*

**वृ.** वैयावृत्यस्वाध्यायभेदाः प्रतीता एव, नवरं 'थेरवेयावच्चे' त्ति इह स्थविरो जन्मादिभिः 'तवस्सिवेयावच्चे' त्ति तपस्वी चाष्टमादिक्षपकः।

**मू. (९६८)** *से किं तं झाणे ?, झाणे चउव्विहे पन्नत्ते, तंजहा—अट्टे झाणे रोद्दे झाणे धम्मे झाणे सुक्के झाणे। अट्टे झाणे चउव्विहे पन्नत्ते, तंजहा—अमणुन्नसंपयोगसंपउत्ते तस्स विप्पयोग-सतिसमन्नागए यावि भवइ १ मणुन्नसंपओगसंपउत्ते तस्स अविप्पयोगसतिसमन्नागए यावि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भवइ २ आयंकसंप-योगसंपउत्ते तस्स विप्पयोगसतिसमन्नागए यावि भवइ ३ परिज्झुसियकाम-भोगसंपयोगसंपउत्ते तस्स अविप्पयोगसतिसमन्नागए यावि भवइ४, अट्टस्स णं झाणस्स चत्तारि लक्खणा पं० तं०—कंदणया सोयणया तिप्पणया परिदेवणया १।*

*रोद्दज्झाणे चउव्विहे पं० तं०—हिंसानुबंधी मोसाणुबंधी तेयानुबंधी सारक्खणानुबंधी, रोद्दस्स णं झाणस्स चत्तारि लक्खणा पं०, तं०—ओस्सन्नदोसे बहुलदोसे अन्नाणदोसे आमरणांतदोसे २*

*धम्मे झाणे चउव्विहे चउप्पडोयारे पं० तं०--आणाविजए अवायविजए विवेगविजए संठाणविजए, धम्मस्स णं झाणस्स चत्तारिल क्खणा पं०, तं०—आणाविजए अवायविजए विवेगविजए संठाणविजए, धम्मस्स णं झाणस्स चत्तारि लक्खणा पं० तं०—आणारुयी निसग्गरुयी सुत्तरुयी ओगाढरुयी, धम्मस्स णं झाणस्स चत्तारि आलंबणा प० तं--वायणा पडिपुच्छणा परियट्टणा धम्मकहा। धम्मस्स णं झाणस्स चत्तारि अनुप्पेहाओ पं० तं०—एगत्तानुप्पेहा अनिच्चानुप्पेहा असरणा-नुप्पेहा संसारानुप्पेहा ३।*

*सुक्कझाणे चउव्विहे चउप्पडोयारे पं० तं०—पुहुत्तवियक्क सवियारी १ एगंतवियक्क अवियारी २ सुहुमकिरिए अनियट्टी ३ समोच्छिन्नकिरिए अप्पडियावी ४, सुक्कस्स णं झाणस्स चत्तारी लक्खणा पं० तं०–खंती मुत्ती अज्जवे मद्दवे, सुक्कस्स णं झाणस्स चत्तारि आलंबणा पं० तं०—अव्वहे असंमोहे विवेगे विउसग्गे। सुक्कस्स णं झाणस्स चत्तारि अनुप्पेहाओ पं० तं०—अनंतवत्तियानुप्पेहा विप्परिणामानुप्पेहा असुभानुप्पेहा अवायानुप्पेहा ४, सेत्तं झाणे।*

**वृ.** ध्यानसूत्रे--'अमणुन्नसंपओगसंपउत्ते तस्स विप्पओगसइसमन्नागए यावि भवइ' त्ति अमनोज्ञः अनिष्टो यः शब्दादिस्तस्य यः सम्प्रयोगो—योगस्तेन सम्प्रयुक्तो यः स तथा स च तथाविधः सन् तस्यामनोज्ञस्य शब्दादेर्विप्रयोगस्मृतिसमन्वागतश्चापि भवति—विप्रयोगचिन्तानुगतः स्यात्, चापीत्युत्तरवाक्यापेक्षया समुच्चयार्थः।

असावार्त्तध्यानं स्यादिति शेषः, धर्म्मधर्म्मिणोरभेदादिति १ 'मणुन्नसंपओगसंपउत्ते तस्स अविप्पओगसइसमन्नागए यावि भवइ' त्ति प्राग्वन्नवरं मनोज्ञं—धनादि 'तस्स' त्ति मनोज्ञस्य धनादेः २ 'आयंकसंपओ' इत्यादि, इहातङ्को—रोगः ३ 'परिझुसियकामभोगसंपओगसंपउत्ते तस्स अविप्प-ओगसइसमन्नागए यावि भवइ' त्ति व्यक्तं नवरं 'परिझुसिय' त्ति 'जुषीप्रीति-सेवनयोः' इतिवचनात् सेवितः प्रीतो वा यः कामभोगः—शब्दादिभोगो मदनसेवा वा 'तस्स' त्ति तस्य कामभोगस्येति ४ 'कंदणय' त्ति महता शब्देन विरवणं 'सोयणय' त्ति दीनता 'तिप्पणय' त्ति तेपनता तिपः क्षरणार्थत्वा-दश्रुविमोचनं 'परिदेवणय' त्ति परिदेवनता—पुनः पुनः क्लिष्टभाषणतेति

'हिंसानुबंधि' त्ति हिंसा—सत्वानां वधबन्धबन्ध नादिभिः प्रकारैः पीडामनुबध्नाति—सततप्रवृत्तां करोतीत्येवंशीलं यत्प्रणिधानं हिंसानुबंधो वा यत्रास्ति तद्धिंसानुबन्धि 'मोसानुबंधि' त्ति मृषा--असत्यं तदनुबध्नाति पिशुनासत्यासद्भूतादिभिर्वचनभेदैस्तन्मृषानुबन्धि 'तेयाणुबंधि' त्ति स्तेनस्यचौरस्य कर्म स्तेयं तीव्रक्रोधाद्याकुलतया तदनुबन्धवत् स्तेयानुबन्धि 'सारक्खणाणुबंधि' त्ति संरक्षणे—सर्वोपायैः परित्राणे विषयसाधनस्य धनस्यानुबन्धो यत्र तत्संरक्षणानुबन्धि।

'ओसन्नदोसे' त्ति 'सन्नं' ति बाहुल्येन—अनुपरतत्वेन दोषोहिंसाऽनृतादत्तादानसंरक्षणा-नामन्यतम ओसन्नदोषः 'बहुदोसे' त्ति बहुष्वपि—सर्वेष्वपि हिंसादिषु ४ दोषः—प्रवृत्तिलक्षणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुदोषः 'अन्नाणदोसे'त्ति अज्ञानात्–कुशास्त्रसंस्कारात् हिंसादिषु अधर्म्मस्वरूपेषु धर्मबुद्ध्या या प्रवृत्तिस्तल्लक्षणो दोषोऽज्ञानदोषः 'आमरणंतदोसे'त्ति मरणमेवान्तो मरणान्तः आमरणान्त-मसंजातानुतापस्यकालकशौकरिकादेरिव या हिंसादिप्रवृत्ति सैव दोषः आमरणान्तदोषः।

'चउप्पडोयारे'त्ति चतुर्षु भेदलक्षणालम्बनानुप्रेक्षा ४ लक्षणेषु पदार्थेषु प्रत्यवतारःसमवतारो विचारणीयत्वेन यस्य तच्चतुष्प्रत्यवतारं, चतुर्विधशब्दस्यैव पर्यायो वाऽयम्, 'आणाविजये'त्ति आज्ञा–जिनप्रवचनं तस्या विचयो–निर्णयो यत्र तदाज्ञाविचयं प्राकृतत्वाच्च 'आणाविजए'त्ति एवं शेषपदान्यपि, नवरमपाया–रागद्वेषादिजन्या अनर्था विपाकः–कर्म्मफलं संस्थानानि लोकद्वीप-समुद्राद्याकृतयः 'आणारूइ'त्ति आज्ञा–सूत्रस्य व्याख्यानं निर्युक्त्यादि तत्र तया वा रुचिः–श्रद्धानं साऽऽज्ञारुचिः 'निसग्गरुइ'त्ति स्वभावत एव तत्त्वश्रद्धानं 'सुत्तरुइ'त्ति आगमात्तत्त्वश्रद्धानम् 'ओगाढरुइ'त्ति अवगाढनमवगाढं–द्वादशाङ्गावगाहो विस्ताराधिगमस्तेन रुचि अथवा 'ओगाढ'त्ति साधुप्रत्यासन्नीभूतस्तस्य साधूपदेशाद् रुचिरवगाढरुचिः, 'आलंबण'त्ति धर्म्मध्यानसौधशिखरा-रोहणार्थं यान्यालम्बव्यन्ते तान्यालम्बनानि–वाचनादीनि, 'अणुप्पेह'त्ति धर्म्मध्यानस्य पश्चा-त्प्रेक्षणानि–पर्यालोचनान्यनुप्रेक्षाः।

'पुहुत्तवियक्क सवियारे'त्ति पृथक्त्वेन–एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन वितर्को–विकल्पः पूर्वगतश्रुतालम्बनो नानानयानुसरणलक्षणो यत्र तत्पृथक्त्ववितर्कं, तथा विचारः–अर्थाद्व्यञ्जने व्यञ्जनादर्थे मनःप्रभृतियोगानां चान्यस्मादन्य स्मिन् विचरणं सह विचारेण यत्तत्सविचारि, सर्वधनादित्वादिन् समासान्तः १।

'एगत्तवियक्के अवियार'त्ति एकत्वेन अभेदेनोत्पादादिपर्यायाणामन्यतमैकपर्याया-लम्बनतयेत्यर्थ वितर्क–पूर्वगतश्रुताश्रयो व्यञ्जनरूपोऽर्थरूपो वा यस्य तदेकत्ववितर्कं, तथा विद्यते विचारोऽर्थव्यञ्जनयोतरस्मादितरत्र तथा मनःप्रभृतीनामन्यस्मादन्यत्र यस्य तदविचारीति २। 'सुहुमकिरिए अनियट्टि'त्ति सूक्ष्मा क्रिया यत्र निरुद्धवाग्मनोयोगत्वे सत्यर्द्धनिरुद्धकाय-योगत्वात्तत्सूक्ष्मक्रियं न निवर्त्तत इत्यनिवर्त्ति वर्द्धमानपरिणामत्वात्, एतच्च निर्वाणगमनकाले केवलिन एव स्यादिति ३।

'समुच्छिन्नकिरिए अप्पडिवाइ'त्ति समुच्छिन्ना क्रिया–कायिक्यादिका शैलेशीकरण-निरुद्धयोगत्वेन यस्मिंस्तत्तथा अप्रतिपाति–अनुपरतस्वभावम्, 'अव्वहे'त्ति देवाद्युपसर्गजनितं भयं चलनं वा व्यथा तदभावोऽव्यथम् 'असंमोहे'त्ति देवादिकृतमायाजनितस्य सूक्ष्मपदार्थविषयस्य च संमोहस्य–मूढताया निषेधोऽसंमोहः 'विवेगे'त्ति देहादात्मनः आत्मनो सर्वसंयोगानां विवेचनं बुद्ध्या पृथक्करणं विवेकः ४।

**मू. (९६९)** *से किं तं विउसग्गे?, विउसग्गे दुविहे पं०, तं०–दव्वविउसग्गे य भावविउसग्गे य, से किं तं दव्वविउसग्गे?, दव्वविउसग्गे चउव्विहे पं० तं०–गणविउसग्गे सरीरविउसग्गे उवहिविउसग्गे भत्तपाणविउसग्गे, सेत्तं दव्वविउसग्गे।*

*से किं तं भावविउसग्गे?, भावविउसग्गे तिविहे पं०, तं०–कसायविउसग्गो संसारविउसग्गो कम्मविउसग्गो, से किं तं कसायविउसग्गे?, कसायविउसग्गे चउव्विहे पं०, तंजहा–कोहविउसग्गे मानविउसग्गे मायाविउसग्गे लोभविउसग्गे, सेत्तं कसायविउसग्गे।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से किं तं संसारविउसग्गे ?, संसारविउसग्गे चउव्विहे पन्नत्ते, तंजहा–नेरइयसंसारविउसग्गे जाव देवसंसारविउसग्गे, सेत्तं संसारविउसग्गे।*

*से किं तं कम्मविउसग्गे ?, कम्मविउसग्गे अट्ठविहे प०, तंजहा–नाणावरणिज्जकम्मविउसग्गे जाव अंतराइयकम्मविउसग्गे, सेत्तं कम्मविउसग्गे, सेत्तं भावविउसग्गे, सेत्तं अब्भिंतरिए तवे। सेवं भंते २ त्ति।*

**वृ.** 'विउसग्गे' त्ति व्युत्सर्गो–निस्सङ्गतया देहोपधित्यागः 'अनंतवत्तियाणुप्पेह' त्ति भवसन्तानस्यानन्तवृततिताऽनुचिन्तनं 'विप्परिणाभाणुप्पेह' त्ति वस्तूनां प्रतिक्षणं विविध-परिणामगमनानुचिन्तनम् 'असुभाणुप्पेह' त्ति संसाराशुभत्वानुचिन्तनम् 'अवायामुप्पेह' त्ति अपायानां–प्राणातिपाताद्याश्रवद्वारजन्यानर्थानामनुप्रेक्षा–अनुचिन्तनमपायानुप्रेक्षा, इह च यत्तपोऽधिकारे प्रशस्ताप्रशस्तध्यानवर्णनं तदप्रशस्तस्य वर्जने प्रशस्तस्य च तस्यासेवने तपो भवतीति कृत्वेति। व्युत्सर्गसूत्रे–'संसारविउसग्गो' त्ति नारकायुष्कादिहेतूनां मिथ्यादृष्टित्वादीनां त्यागः 'कम्मविउसग्गो' त्ति ज्ञानावरणादिकर्म्मबन्धहेतूनां ज्ञानप्रत्यनीकत्वादीनां त्याग इति॥

शतकं–२५ उद्देशकः–७ समाप्तः

## –: शतकं-२५ उद्देशकः–८ :–

**वृ.** सप्तमोद्देशके संयता भेदत उक्तास्तद्विपक्षभूताश्चासंयता भवन्ति ते च नारकादयस्तेषां च यथोत्पादो भवति तथाऽष्टमेऽभिधीयते इत्येवंसम्बन्धस्यास्येदमादिसूत्रम्–

**मू. (९७०)** *रायगिहे जाव एवं वयासी–नेरइया णं भंते! कहं उववज्जंति ?, से जहानामए–पवए पवमाणे अज्झवसाणनिव्वत्तिएणं करणोवाएणं सेयकाले तं ठाणं विप्पजहित्ता पुरिमं ठाणं उवसंपज्जित्ताणं विहरइ एवामेव एएवि जीवा पएओविव पवमाणा अज्झवसाणनिव्वत्तिएणं करणोवाएणं सेयकाले तं भवं विप्पजहित्ता पुरिमं भवं उवसंपज्जित्ताणं विहरन्ति।*

*तेसि णं भंते! जीवाणं कहं सीहा गती कहं सीहे गतिविसए प० ?, गो०! से जहनामए–केइ पुरिसे तरुणे बलवं एवं जहा चोद्दसमसए पढमुद्देसए जाव तिसमएण वा विग्गहेणं उववज्जंति, तेसि णं जीवाणं तहा सीहा गई तहा सीहे गतिविसए प०।*

*ते णं भंते! जीवा कहं परभवियाउयं पकरेंति ?, गोयमा! अज्झवसाणजोगनिव्वत्तिएणं करणोवाएणं एवं खलु ते जीवा परभवियाउयं पकरेन्ति।*

*तेसि णं भंते! जीवाणं कहं गती पवत्तइ ?, गोयमा! आउक्खएणं भवक्खएणं ठिइक्खएणं, एवं खलु तेसिं जीवाणं गति पवत्तति, ते णं भंते! जीवा किं आयड्ढीए उववज्जंति परिड्ढीए उवव० गोयमा! आइड्ढीए उवव० नो परिड्ढीए उवव०।*

*ते णं भंते! जीवा किं आयकम्मुणा उवव० परकम्मुणा उवव० ?, गोयमा! आयकम्मुणा उवव० नो परकम्मुणा उवव०, ! ते णं भंते! जीवा किं आयप्पयोगेणं उवव० परप्पयोगेणं उवव० ?, गोयमा! आयप्पयोगेणं उववज्जंति नो परप्पयोगेणं उवव०।*

*असुरकुमारा णं भंते! कहं उववज्जंति ?, जहा नेरतिया तहेव निरवसेसं जाव नो परप्पयोगेणं उववज्जंति एवं एगिंदियवज्जा जाव वेमाणिया, एगिंदिया तं चेव नवरं चउसमइओ विग्गहो, सेसं तं चेव, सेवं भंते! २ त्ति जाव विहरइ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'रायगिहे' इत्यादि 'पवए'त्ति प्लवकः-उत्पलवनकारी 'पवमाणे'त्ति प्लवमानः-उत्लुतिं कुर्वन् 'अज्झवसाणनिव्वत्तिएणं'ति उत्पलोतव्यं मयेत्येवंरूपाध्यवसायनिर्वर्त्तितेन 'करमोपायेणं'ति उत्प्लवनलक्षणं यत्करणं-क्रियाविशेषः स एवोपायः-स्थानान्तरप्राप्तौ हेतुः करणोपायस्तेन 'सेयकाले'त्ति एष्यति काले विहरतीति योगः, किं कृत्वा ? इत्याह।

'तं ठाणं'ति यत्र स्थाने स्थितस्तत्स्थानं 'विप्रजहाय' प्लवनतस्त्यक्त्वा 'पुरिमं'ति पुरोवर्त्तिस्थान्म् 'उपसम्पद्य' विहरतीति योगः 'एवामेव तेजीव'त्ति दार्ष्टान्तिकयजनार्थः, किमुक्तं भवति ? इत्याह

'पवओविव पवमाण'त्ति, 'अज्झवसाणनिव्वत्तिएणं'ति तथाविधाध्यवसायनिर्वर्त्तितेन 'करणोवाएणं'ति क्रियते विविधाऽवस्था जीवस्यानेन क्रियते वा तदिति करणंकर्म्म प्लवनक्रियाविशेषो वा करणं करणमिव करणं-स्थानान्तरप्राप्तिहेतुतासाधर्म्यात्कर्मैव तदेवोपायः करणोपायस्तेन 'तंभवं'ति मनुष्यादिभवं 'पुरिमं भवं'ति प्राप्तव्यं नारकभवमित्यर्थः।

'अज्झवसाणजोगनिव्वत्तिएणं'ति अध्यवसानं जीवपरिणामो योगश्च-मनःप्रभृतिव्यापारस्ताभ्यांनिर्वर्त्तितोयः सतथा तेन 'करणोवाएणं' तिकरणोपायेन-मिथ्यात्वादिना कर्म्मबन्ध-हेतुनेति

क्वचिट्टीकावाक्यं क्वचिदपि वचश्चौर्णमनधं, क्वचिच्छाब्दीं वृत्तिं क्वचिदपि गमं वाच्यविषयम् क्वचिद्विद्वद्वाचं क्वचिदपि महाशास्त्रमपरं, समाश्रित्य व्याख्या शत इह कृता दुर्गमगिराम्

**शतकं-२५ समाप्तम्**

शतकं-२५ उद्देशकः-८ समाप्तः

**-: शतकं-२५ उद्देशकः-९ :-**

**मू. (९७१)** *भवसिद्धियनेरइया णं भंते ! कहं उवव० ?, गोयमा ! से जहानामए पवए पवमाणे अवसेसं तं चेव जाव वेमाणिए, सेवं भंते ! २ त्ति ॥*

शतकं-२५ उद्देशकः-९ समाप्तः

**-: शतकं-२५ उद्देशकः-१० :-**

**मू. (९७२)** *अभवसिद्धियनेरइया णं भंते ! कहं उवव० ?, गोयमा ! से जहानामए पवए पवमाणे अवसेसं तं चेव एवं जाव वेमाणिए, सेवं भंते २ त्ति।*

शतकं-२५ उद्देशकः-१० समाप्तः

**-: शतकं-२५ उद्देशकः-११ :-**

**मू. (९७३)** *सम्मदिट्ठिनेरइया णं भंते ! कहं उवव० ?, गोयमा ! से जहानामए पवए पवमाणे अवसेसं तं चेव एवं एगिंदियवज्जं जाव वेमाणिया, सेवं भंते ! २ त्ति ॥*

शतकं-२५ उद्देशकः-११ समाप्तः

**-: शतकं-२५ उद्देशकः-१२ :-**

**मू. (९७४)** *मिच्छदिट्ठिनेरइया णं भंते ! कहं उवव० ?, गोयमा ! से जहानामए-पवए पवमाणे अवसेसं तं चेव एवं जाव वेमाणिए, सेवं भंते २ त्ति ॥*

शतकं-२५ उद्देशकः-१२ समाप्तः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## शतकं-२६

वृ. व्याख्यातं पञ्चविंशतितमं शतम्, अथ षड्विंशतितममारभ्यते, अस्य चायमभिसबन्धः- -अनन्तरशते नारकादिजीवानामुत्पत्तिरिभिहिता सा च कर्म्मबन्धपूर्विकेतषड्विंशतितमशते मोहकर्मबन्धोऽपि विचार्यते इत्येवंसम्बन्धस्यास्यैकादशोद्देशकप्रमाणस्य प्रत्युद्देशकं द्वारनिरूणाय तावद्गातामाह- *[ नमो सुयदेवयाए भगवईए] ।*

**मू.** *(९७५)जीवा १ य लेस्स २ पक्खिय ३ दिट्ठी ४ अन्नाण ५ नाण ६ सन्नाओ ७ ।*
*वेय ८ कसाए ९ उवओग १० जोग ११ एक्कारवि ठाणा ॥*

**वृ.** 'जीवा य' इत्यादि, 'जीवा य'त्ति जीवाः प्रत्युद्देशकं बन्धवक्तव्यतायाः स्थानं, ततो लेश्याः पाक्षिकाः ष्टयः अज्ञानं ज्ञानं सज्ञा वेदः कषाया योग उपयोगश्च बन्धवक्तव्यतास्थानं, तदेवमेतान्येकादशापि स्थानानीति गाथार्थः ।

**मू.** (९७६) तेणं कालेणं तेणं समएणं रायगिहे जाव एवं वयासीजीवे णं भंते ! पावं कम्मं *किं बंधी बंधइ बंधिस्सइ १ बंधी बंधइ न बंधिस्सइ २ बंधी न बंधइ बंधिस्सइ ३ बंधी न बंधइ न बंधिस्सइ ४ ?, गोयमा ! अत्थेगतिए बंधी बंधइ बंधस्सइ १ अत्थेगतिए बंधी बंधइ न बंधिस्सइ २ अत्थेगतिए बंधी ण बंधइ बंधिस्सइ ३ अत्थेगतिए बंधी न बंधइ न बंधिस्सइ ४-१*

*सलेस्से णं भंते ! जीवे पावं कम्मं किं बंधी बंधइ बंधिस्सइ १ बंधी बंधइन बंधिस्सइ ? पुच्छा, गोयमा ! अत्थेगतिए बंधी बंधइ बंधिस्सइ १ अत्थेगतिए एवं चउभंगो । कण्हलेसे णं भंते जीवे पावं कम्मं किं बंधी पुच्छा, गोयमा ! अत्थेगतिए बंधी बंधइ बंधिस्सइ अत्थेगतिए बंधी बंधइ न बंधिस्सइ एवं जाव पम्हलेसे सव्वत्थ पढमबितिय भंगा, सुक्कलेस्से जहा सलेस्से तहेव चउभंगो ।*

*अलेस्से णं भंते ! जीवे पावं कम्मं कि बंधी पुच्छा, गोयमा ! बंधी न बंधइ न बंधिस्सइ २*

*कण्हपक्खिए णं भंते ! जीवे पावं कम्मं पुच्छा, गोयमा ! अत्थेगतिए बंधी पढमबितिया भंगा । सुक्कपक्खिए णं भंते ! जीवे पुच्छा, गोयमा ! चउभंगो भाणियव्वो ॥*

**वृ.** तत्रानन्तरोत्पन्नादिविशेषविरहितं जीवमाश्रित्यैकादशभिरुक्तरूपैर्द्वारैर्बन्धवक्तव्यतां प्रथमोद्देशकेऽभिधातुमाह- 'तेण'मित्यादि 'पावं कम्मं'ति अशुभं कर्म 'बंधी'ति वर्त्तमाने 'बंधिस-इ'त्ति अनागते इत्येवं चत्वारो भङ्गा बद्धवानित्येतत्पदलब्धाः, 'न बंधी' त्येतत्पदलभ्यास्त्विह न भवन्ति । अतीतकालेऽबन्धकस्य जीवस्यासम्भवात्, तत्र च बद्धवान् बघ्नाति भन्त्सयति चेत्येष प्रथमोऽभव्यमाश्रित्य, बद्धवान् बघ्नाति न भन्त्सयतीति द्वितीयः प्राप्तव्यक्षपकत्वं भव्यविशेष-माश्रित्य, बद्धवान् न बघ्नाति भन्त्सयतीत्येष तृतीयो मोहोपशमे वर्त्तमानं भव्यविशेषमाश्रित्य, ततः प्रतिपतितस्य तस्य पापकर्मणोऽवश्यं बन्धनात्, बद्धवान् न बघ्नाति न भन्त्सयतीति चतुर्थः क्षीणमोहमाश्रित्येति ।

लेश्याद्वारे-सलेश्यजीवस्य चत्वारोऽपि स्युर्यस्च्छुक्ललेश्यस्य पापकर्म्मणो बन्धकत्वम-प्यस्तीति, कृष्णलेश्यादिपञ्चकयुक्तस्य त्वाद्यमेव भङ्गकद्वयं, तस्य हि वर्त्तमानकालिको मोहलक्षणपापकर्मण उपशमः क्षयो वा नास्तीत्येवमन्त्यद्वयाभावः, द्वितीयवस्तु तस्य संभवति, कृष्णादिलेश्यावतः कालान्तरे क्षपकत्वप्राप्तौ न भन्त्सयतीत्येतस्य सम्भवादिति, अलेश्यः-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

अयोगिकेवली तस्य च चतुर्थ एव, लेश्याभावे बन्धकत्वाभावादिति।

पाक्षिकद्वारे–कृष्णपाक्षिकस्याद्यमेव भङ्गकद्वयं, वर्त्तमाने बन्धाभावस्य तस्याभावात्, शुक्लापाक्षिकस्य तु चत्वारोऽपि, स हि बद्धवान् बध्नाति भन्त्सयति च प्रश्नसमयापेक्षयाऽनन्तरे भविष्यति समये १ तथा बद्धवान् बध्नाति न भन्त्सयति क्षपकत्वप्राप्तौ २ तथा बद्धवान् न बध्नाति चोपशमे भन्त्सयति च तत्प्रतिपाते ३ तथा बद्धवान्न बध्नाति न च भन्त्सयति क्षपकत्वप्राप्तौ २ तथा बद्धवान् न बध्नाति चोपशमे भन्तन्स्यति च तत्प्रतिपाते ३ तथा बद्धवान्न बध्नाति न च भन्त्सयति क्षपकत्व इति ४, अत एव आह।

'चउभंगो भाणियव्वो'त्ति, ननु यदि कृष्णपाक्षिकस्य न भन्त्स्यतीत्यस्यासम्भवाद्द्वीतीयो भङ्गक इष्टस्तदा शुक्लपाक्षिकस्यावश्यं सम्भवात्कथं तत्प्रथमभङ्गकः? इति, अत्रोच्ये, पृच्छानन्तरे भविष्यत्कालेऽबन्धकत्वस्याभावात्, उक्तं च वृद्धैरिह साक्षेपपरिहारं–

॥१॥ "बंधिसयबीयभंगो जुज्झइ जइ कण्हपक्खियाईणं।
तो सुक्कपक्खियाणं पढमो भंगो कहं गेज्झो॥

॥२॥ (अच्यते) पुच्छानंतरकालं पइ पढमो सुक्कपक्खियाईणं।
इयरेसिं अवसिट्ठं कालं पइ बीयओ भंगो॥ त्ति।

**मू. (९७७)** *सम्मद्दिट्ठीणं चत्तारि भंगा, मिच्छादिट्ठीणं पढमबितिया भंगा, सम्मामिच्छादिट्ठीणं एवं चेव। नाणीणं चत्तारि भंगा, आभिनिबोहियणाणीणं जाव मणपज्जवनाणीणं चत्तारि भंगा, केवलनाणीणं चरमो भंगो जहा अलेस्साणं ५।*

*अन्नाणीणं पढमबितिया, एवं मइअन्नाणीणं सुयअन्नाणीणं विभंगनाणीणवि ६। आहारसन्नोवउत्ताणं जाव परिग्गहसन्नोवउत्ताणं पढमबितिया नोसन्नोवउत्ताणं चत्तारि ७।*

*सवेदगाणं पढमबितिया, एवं इत्थिवेदगा पुरिसवेदगा नपुंसगवेदगावि, अवेदगाणं चत्तारि*

*सकसाईणं चत्तारि, कोहकसायीणं पढमबितिया भंगा, एवं माणकसायिस्सवि मायाकसायिस्सवि लोभकसायिस्सवि चत्तारि भंगा, अकसायी णं भंते! जीवे पावं कम्मं किं बंधी? पुच्छा, गोयमा! अत्थेगतिए बंधी न बंधइ बंधिस्सइ ३ अत्थेगतिए बंधी न बंधइ ण बंधिस्सइ ४*

*सजोगिस्स चउभंगो, एवं मणजोगस्सवि वइजोगस्सवि कायजोगस्सवि, अजोगिस्स चरिमो, सागारोवउत्ते चत्तारि, अनागारोवउत्तेवि चत्तारि भंगा ११॥*

**वृ.** दृष्टिद्वारे–सम्यग्दृष्टेश्चत्वारोऽपि भङ्गाः शुक्लपाक्षिकस्येव भावनीयाः, मिथ्यादृष्टिमिश्रदृष्टीनामाद्यौ द्वावेव, वर्त्तमानकाले मोहलक्षणपापकर्मणो बन्धभावेनान्त्यद्वयाभावात्, अत एवाह–'मिच्छे'त्यादि।

ज्ञानद्वारे–'केवलनाणीणं चरमो भंगो'त्ति वर्त्तमाने एष्यत्काले च बन्धाभावात् 'अन्नाणीणं पढमबीय'त्ति, अज्ञाने मोहलक्षणपापकर्म्मणः क्षपणोपशमनाभावात्।

संज्ञाद्वारे–'पढमबीय'त्ति आहारादिसंज्ञोपयोगकाले क्षपकत्वोपशमकत्वाभावात्, 'नोसन्नोवउत्ताणं चत्तारि'त्ति नोसंज्ञोयुक्ता–आहारादिषु गृद्धिवर्जितास्तेषां च चत्वारोऽपि क्षपणोपशमसम्भवादिति।

वेदद्वारे–'सवेयगाणं पढमबीय'त्ति वेदोदये हि क्षपणोपशमौ न स्यातामित्याद्यद्वयम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अवेदगाणं चत्तारि'त्ति स्वकीये वेदे उपशान्ते बध्नाति भन्त्स्यति च मोहलक्षणं पापं कर्म्म यावत्सूक्ष्मसम्परायो न भवति प्रतिपतितो वा भन्त्स्यतीत्यवं प्रथमः, तथा वेदे क्षीणे बध्नाति सूक्ष्म-संपरायाद्यवस्थायां च न भन्त्स्यतीत्येवं द्वितीयः , तथोपशान्तवेदः सूक्ष्मसम्परायादौ न बध्नाति प्रतिपतितस्तु बन्त्स्यतीति तृतीयः, तथा क्षीणे वेदे सूक्ष्मसम्परायादिषु न बध्नाति न चोत्तरकालं भन्त्सयतीत्येवं चतुर्थः, बद्धवानिति च सर्वत्र प्रतीतमेवेतिकृत्वा न प्रदर्शितमिति ।

कषायद्वारे–'सकसाईणं चत्तारि'त्ति तत्राद्योऽभव्यस्य द्वितीयो भव्यस्य प्राप्तव्यमोहक्षयस्य तृतीय उपशमकसूक्ष्मसम्परायस्य चतुर्थ क्षपकसूक्ष्मसम्परायस्य, एवं लोभकषायिणामपि वाच्यं

'कोहकसाईणं पढमबीय'त्ति इहाभव्यस्य प्रथमो द्वितीयो भव्यविशेषस्य तृतीयचतुर्थौ त्विह न स्तो वर्त्तमानेऽबन्धकत्वस्याभावात् 'अकसाईण'मित्यादि, तत्र 'बंधी न बंधइ बंधिस्सइ'त्ति उपशमकमाश्रित्य, 'बंधी न बंधइ न बंधिस्सइ'त्ति क्षपकमाश्रित्येति ।

योगद्वारे–'सजोगिस्स चउभंगो'त्ति अभव्य भव्यविशेषोपशमकक्षपकाणां क्रमेण चत्वारोऽप्यवसेयाः, 'अजोगिस्स चरमो'त्ति बध्यमानभन्त्स्यमानत्वयोस्तस्याभावादिति ।।

**मू. (९७८)** *नेरइए णं भंते! पावं कम्मं किं बंधी बंधइ बंधिस्सइ?, गोयमा! अत्थेगतिए बंधी पढमबितिया १ ।*

*सलेस्से णं भंते! नेरतिए पावं कम्मं चेव, एवं कण्हलेस्सेवि नीललेस्सेवि काउलेसेवि, एवं कण्हपक्खिए सुक्कपक्खिए, सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी, नाणी आभिनिबोहियनाणी सुयनाणी ओहिनाणी अन्नाणी मइअन्नाणी सुयअन्नाणी विभंगनाणी आहारसन्नोवउत्ते जाव परिग्गहसन्नोवउत्ते ।*

*सवेदए नपुंसकवेदए, सकसायी जाव लोभकसया, सजोगी मणजोगी वयजोगी कायजोगी, आगारोवउत्ते अनागारोवउत्ते, एएस सव्वेसु पदेसु पढमबितिया भंगा भाणियव्वा ।*

*एवं असुरकुमारस्सवि वत्तव्वया भाणियव्वा नवरं तेउलेस्सा इत्थिवेयगपुरिसवेयगा य अब्भहिया नपुंसगवेदगा न भन्नंति सेसं तं चेव सव्वत्थ पढमबितिया भंगा, एवं जाव थणियकुमारस्स*

*एवं पुढविकाइयस्सवि आउकाइयस्सवि जाव पंचिंदियतिरिक्खजोणियस्सवि सव्वत्थवि पढमबितिया भंगा नवरं जस्स जा लेस्सा, दिट्ठी नाणं अन्नाणं वेदो जोगो य जं जस्स अत्थि तं तस्स भाणियव्वं सेसं तहेव । मणूसस्स जच्चेव जीवपदे वत्तव्वया सच्चेव निरवसेसा भाणियव्वा, वानंतरस्स जहा असुरकुमारस्स, जोइसियस्स वेमाणियस्स एवं चेव नवरं लेस्साओ जाणियव्वाओ, सेसं तहेव भाणियव्वं ।*

**वृ.** 'नेरइए ण'मित्यादि, 'पढमबीय'त्ति नारकत्वादौ श्रेणीद्वयाभावात् प्रथमद्वितीयावेव, एवं सलेश्यादि– विशेषितं नारकपदं वाच्यं, एवमसुरकुमारादिपदमपि ।

'मणूसस्से'त्यादि, या जीवस्य निर्विशेषणस्य सलेश्यादिपदविशेषितस्य च चतुर्भङ्ग्यादिव-क्तव्यतोक्ता सा मनुष्यस्य तथैव निरवशेषा वाच्या, जीवमनुष्ययोः समानधर्म्मत्वादिति ।

तदेवं सर्वेऽपि पञ्चविंशतिर्दण्डकाः पापकर्म्माश्रित्योक्ताः, एवं ज्ञानावरणीयमप्याश्रित्य पञ्चविंशतिर्दण्डका वाच्याः, एतदेवाह–

**मू. (९७९)** *जीवे णं भंते! नाणा० कम्मं किं बंधी बंधइ बंधिस्सइ एवं जहेव पावकम्मस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वत्तव्वया तहेव नाणावरणिज्जस्सवि भा० नवरं जीवपदे मणुस्सपदे य सकसाई जाव लोभकसाइंमि य पढमबितिया भंगा अवसेसं तं० जाव वेमा०, एवं दरिसणावरणिज्जेणवि दंडगो भाणियव्वो निरवसेसो।*

*जीवे णं भंते! वेयणिज्जं कम्मं किं बंधी पुच्छा, गो० ! अत्थेगतिए बंधी बंधइ बंधिस्सइ १ अत्थेगतिए बंधी बंधइ न बंधिस्सइ २ अत्थेगतिए बंधी न बंधइ न बंधिस्सइ ४।*

*सलेस्सेवि एवं चेव ततियविहूणा भंगा, कण्हलेस्से जाव पम्हलेस्से पढमबितिया भंगा, सुक्कलेस्से ततियविहूणा भंगा, अलेस्से चरिमो भंगो।*

*कहण्पक्खिए पढमबितिया भंगा, सुक्कपक्खिया ततियविहूणा।*

*एवं सम्मदिट्ठिस्सवि, मिच्छादिट्ठिस्स सम्मामिच्छादिट्ठिस्स य पढमबितिया, नाणस्स ततियविहूणा आभिनिबोहियनाणी जाव मणपज्जवणाणी पढमबितिया केवलनाणी ततियविहूणा, एवं नोसन्नोवउत्ते अवेदए अकसायी सागरोवउत्ते अनागारोवउत्ते एएसु ततियविहूणा, अजोगिम्मि य चरिमो, सेसेसु पढमबितिया।*

*नेरइए णं भंते! वेयणिज्जं कम्मं बंधी बंधइ एवं नेरतिया जाव वेमाणियत्ति जस्स जं अत्थि सव्वत्थवि पढमबितिया, नवरं मणुस्से जहा जीवो, जीवे णं भंते! मोहणिज्जं कम्मं किं बंधइ ?, जहेव पावं कम्मं हेव मोहणिज्जंपि निरवसेसं जाव वेमाणिए।*

**वृ.** 'जीवे णं भंते !'इत्यादि, एतच्च समस्तमपि पूर्ववदेव भावनीयं, यः पुनरत्र विशेषस्तत्प्रतिपादनार्थमाह–'नवर'मित्यादि।

पापकर्म्मदण्डके जीवपदे मनुष्यपदे च यत्सकषायिपदं लोभकषायिपदं च तत्र सूक्ष्म सम्परायस्य मोहलक्षणपापकर्म्माबन्धकत्व चत्वारो भङ्गा उक्ता इह त्वाद्यावेव वाच्यौ, अवीतरागस्य ज्ञानावरणीयबन्धकत्वादिति, एवं दर्शनावरणीयण्डकाः।

वेदनीयदण्डके–प्रथमे भङ्गेऽभव्यो द्वितीये भव्यो यो निर्वास्यति तृतीयो न संभवति वेदनीयमबध्ध्वा पुनस्तद्बन्धनस्यासम्भवात्, चतुर्थे त्वयोगी, 'सलेस्सेवि एवं चेव तइयविहूणा भंग'त्ति, इह तृतीयस्वाभावः पूर्वोक्तयुक्तेरवसेयः, चतुर्थ पुनरिहाभ्युपेतोऽपि सम्यग् नावगम्यते यतः 'बंधी न बंधइ न बंधिस्सइ' इत्येतदयोगिन एव संभवति, स च सलेश्यो न भवतीति।

केचित्पुनराहुः–अत एव वचनादयोगिताप्रथमसमये घण्टालालान्यायेन परमशुक्ल-लेश्याऽस्तीति सलेश्यस्य चतुर्भङ्गकः संभवति, तत्त्वं तु बहुश्रुतगम्यमिति, कृष्णलेश्यादिप-ञ्चकेऽयोगित्वस्याभावादाद्यावेव, शुक्ललेश्ये जीवे सलेश्यभाविता भङ्गा वाच्याः

एतदेवाह–'सुक्कलेसे'त्यादि, अलेश्यः–शैलेशीमतः सिद्धश्च, तस्य च बद्धवान्न बध्नाति न भन्त्सयतीत्येक एवेति, एतवेदाह–'अलेस्स चरमो'त्ति।

'कण्हपक्खिए पढमबीय'त्ति कऋणपाक्षिकस्यायोगित्वाभावात्, 'सुक्कपक्खिए तईयविहूण'त्ति शुक्लपाक्षिको यस्मादयोग्यपि स्यादतस्तृतीयविहीनाः सेषास्तस्य स्युरिति।

'एवं सम्मदिट्ठीस्सवि'त्ति तस्याप्ययोगित्वसम्भवेन बन्धासम्भवान्मिथ्यादृष्टिभि-श्रदृष्ट्योश्चायोगित्वाभावेन वेदनीयाबन्धकत्व नास्तीत्याद्यावेव स्यातामत एवाह–'मिच्छ-दिट्ठी'त्यादि, ज्ञानिनः केवलिनश्चायोगित्वेऽन्तिमोऽस्ति, आभिनिबोधिकादिष्वयोगित्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावान्नान्तिम इत्यत आह–

'नाणस्से'त्यादि, एवं सर्वत्र यत्रायोगित्वं संभवति तत्र चरमो यत्र तु तन्नास्ति तत्राद्यौ द्वावेवेति भावनीयाविति ॥ आयुष्कर्म्मदण्डके–

**मू. (९८०)** *जीवे णं भंते ! आउयं कम्मं किं बंधी बंधइ ? पुच्छा, गोयमा ! अत्थेगतिए बंधी चउभंगो सलेस्से जाव सुक्कलेस्से चत्तारि भंगा अलेस्से चरिमो भंगो।*

*कण्हपक्खिए णं पुच्छा, गोयमा ! अत्थेगतिए बंधी बंधइ बंधिस्सइ अत्थेगतिए बंधी न बंधइ बंधिस्सइ, सुक्कपक्खिए सम्मदिट्ठी मिच्छादिट्ठी चत्तारि भंगा, सम्मामिच्छादिट्ठीपुच्छा, गोयमा ! अत्थेगतिए बंधी न बंधइ बंधिस्सइ अत्थेगतिए बंधी न बंधइ न बंधिस्सइ।*

*नाणी जाव ओहिनाणी चत्तारि भंगा, मणपज्जवनाणीपुच्छा, गोयमा ! अत्थेगतिए बंधी बंधइ बंधिस्सइ, अत्थेगतिए बंधी न बंधइ बंधिस्सइ, अत्थेगतिए बंधी न बंधइ न बंधिस्सइ, केवलनाणे चरमो भंगो। एवं एएणं कमेणं नोसन्नोवउत्ते बितियविहूणा जहेव मनपज्जवनाणे, अवेदए अकसाई य तितियचउत्था जहेव सम्मामिच्छत्ते, अजोगिम्मिचरिमो, सेसेसु पदेसु चत्तारि भंगा जाव अनागारोवउत्ते।*

*नेरइए णं भंते ! आउयं कम्मं किं बंधी पुच्छा, गोयमा ! अत्थेगतिए चत्तारि भंगा एवं सव्वत्थवि नेरइयाणं चत्तारि भंगा नवरं कण्हलेस्से कण्हपक्खिए य पढमततिया भंगा, सम्मामिच्छत्ते ततियचउत्था।*

*असुरकुमारे एवं चेव, नवरं कण्हलेस्सेवि चत्तारि भंगा भाणियव्वा सेसं जहा नेरइयाणं एवं जाव थणियकुमाराणं।*

*पुढविक्काइयाणं सव्वत्थवि चत्तारि भंगा, नवरं कण्हपक्खिए पढमततिया भंगा।*

*तेऊलेस्से पुच्छा, गोयमा ! बंधी न बंधइ बंधिस्सइ सेसेसु सव्वत्थ चत्तारि भंगा, एवं आउक्काइयवणस्सइकाइयाणवि निरवसेसं, तेउकाइयवाउक्काइयाणं सव्वत्थवि पढमततिया भंगा*

*बेइंदियतेइंदियचउरिंदियाणंपि सव्वत्थवि पढमततिया भंगा, नवरं सम्मत्ते नणे आभिनिबोहियनाणे सुयनाणे ततिओ भंगो।*

*पंचिंदियतिरिक्खजोणियाणं कण्हपक्खिए पढमततिया भंगा, सम्मामिच्छत्ते ततियचउत्थो भंगो, सम्मत्ते नाणे आभिनिबोहियनाणे सुयनाणे ओहिनाणे एएसु पंचसुवि पदेसु बितियविहूणा भंगा, सेसेसु चत्तारि भंगा।*

*मणुस्साणं जहा जीवाणं, नवरं सम्मत्ते ओहिए नाणे आभिनिबोहियनाणे सुयनाणे ओहिनाणे एएसु बितियविहूणा भंगा, सेसं तं चेव, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा, नामं गोयं अंतरायं च एयाणि जहा नाणावरणिज्जं। सेवं भंते ! २ त्ति जाव विहरति।*

**वृ.** 'चउभंगो'त्ति तत्र प्रथमोऽभव्यस्य द्वितीयो यश्चरमशरीरो भविष्यति तस्य, तृतीयः पुनरुपशमकस्य, स ह्यायुर्बद्धवान् पूर्वं उपशमकाले न बध्नाति तत्प्रतिपतितस्तु भन्त्स्यति, चतुर्थस्तु क्षपकस्य, स ह्यायुर्बद्धवान् न बध्नाति न च भन्त्स्यतीति।

'सलेस्से' इह यावत्करणात् कृष्णलेश्यादिग्रहस्तत्र यो न निर्वास्यति तस्य प्रथमः, यस्तु चरमशरीरतयोत्पत्स्यते तस्य द्वितीयः, अबन्धकाले तृतीयः, चरमशरीरस्य च चतुर्थः, एवमन्यत्रापि 'अलेस्से चरमो'त्ति अलेश्यः–शैलेशीगतः सिद्धश्च, तस्य च वर्त्तमानभविष्यत्कालयोरायुषोऽबन्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कत्वाच्चरमो भङ्गः ।

कृष्णपाक्षिकस्य प्रथमस्तृतीयश्च संभवति, तत्र च प्रथमः प्रतीत एव, तृतीयस्त्वायुष्काबन्धकाले न बध्नात्येव उत्तरकालं तु तद् भन्त्स्यतीत्येवं स्यात्, द्वितीयचतुर्थौ तु तस्य नाभ्युपगम्येते, कृष्णपाक्षिकत्वे सति सर्वथा तदभन्त्स्यमानताया अभाव इति विवक्षणात्, शुक्लपाक्षिकस्य सम्यग्दृष्टेश्चत्वारः, तत्र बद्धवान् पूर्वं बध्नाति च बन्धकाले भन्त्स्यति चाबन्धकालस्योपरीत्येकः १ ।

बद्धवान् बध्नाति न भन्त्सयति च चरमशरीरत्वे इति द्वितीयः २ तथा बद्धवान् न बध्नात्यबन्धकाले उपशमावस्थायां वा भन्त्स्यति ध पुनर्बन्धकाले प्रतिपतितो वेति तृतीयः ३ चतुर्थस्तु क्षपकस्येति ४ ।

मिथ्यदृष्टिस्तु द्वितीयभङ्गके न भन्त्स्यति चरमशरीरप्राप्तौ, तृतीये न बध्नात्यबन्धकाले चतुर्थे न बध्नात्यबन्धकाले न भन्त्स्यति चरमशरीरप्राप्ताविति, 'सम्मामिच्छे'त्यादि, सम्यग्मिथ्यादृष्टिरायुर्न बध्नाति, चरमशरीरत्वे च कश्चिन्न भन्त्सयत्यपीतिकृत्वाऽन्त्यावेवेति ।

ज्ञानिनां चत्वारः प्राग्वद्भावयितव्याः, मनःपर्यायज्ञानिनो द्वितीयवर्जास्तत्रासौ पूर्वमायुर्बद्धवान् इदानीं तु देवायुर्बध्नाति ततो मनुष्यायुर्भन्त्स्यतीति प्रथमः, बध्नाति न भन्त्स्यतीति न संभवति, अवश्यं देवत्वे मनुष्यायुषो बन्धनादितिकृत्वा द्वितीयो नास्ति, तृतीय उपशमकस्य, सहि न बध्नाति प्रतिपतितश्च भन्त्सयति, क्षपकस्य चतुर्थ, एतदेव दर्शयति ।

'मनपज्जवे'त्यादि, 'केवलनाणे चरमो'त्ति केवली ह्यायुर्न बध्नाति न च भन्त्स्यतीतिकृत्वा, नोसंज्ञोपयुक्तस्य भङ्गकत्रयं द्वितीयवर्जं मनःपर्यावद्भावनीयं, एतदेवाह–'एएण'मित्यादि, 'अवेदए'इत्यादि, अवेदकोऽकषायी च क्षपक उपशमको वा तपोश्च वर्त्तमानबन्धो नास्त्यायुषः उपशमकश्च प्रतिपतितो भन्त्स्यति क्षपकस्तु नैवं भन्त्स्यतीतिकृत्वा तयोस्तृतीयचतुर्थौ ।

'सेसेसु'त्ति शेषपदेषु–उक्तव्यतिरिक्तेषु अज्ञान १ मत्यज्ञानादि ३ संज्ञोयुक्ताहारादिसंज्ञोपयुक्त ४ सवेद १ स्त्रीवेदादि ३ सकषाय १ क्रोधादिकषाय ४ सयोगि १ मनोयोग्यादि २ साकारोपयुक्तानाकारोपयुक्तलक्षणेषु चत्वार एवेति ।

नारकदण्डके–'चत्तारि भंग'त्ति, तत्र नारक आयुर्बद्धवान् बध्नाति बन्धकाले भन्त्स्यति भवान्तर इत्येकः १, प्राप्तव्यसिद्धिकस्य द्वितीयः, बन्धकालाभावं भाविबन्धकालं चापेक्ष्य तृतीयः, बद्धपरभविकायुषोऽनन्तरं प्राप्तव्यचरमभवस्य चतुर्थ, एवं सर्वत्र, विशेषमाह ।

'नवर'मित्यादि, लेश्यापदे कृष्णलेश्येषु नारकेषु प्रथमतृतीयौ, तथाहि–कृष्णलेश्यो नारको बद्धवान् बध्नाति भन्त्स्यति चेति प्रथमः प्रतीत एव, द्वितीयस्तु नास्ति, यतः कृष्णलेश्यो नारकस्तिर्यक्षूत्पद्यते मनुष्येषु चाचरमशरीरेषु, कृष्णलेश्या हि पञ्चमनरकपृथिव्यादिषु भवति न च तत उद्वृत्त– सिद्ध्यतीति, तदेवमसौ नारकस्तिर्यगाद्यायुर्बद्धा पुनर्भन्त्स्तयति अचरमशरीरत्वादिति

तथा कृष्णलेश्यो नारक आयुष्काबन्धकाले तन्न बध्नाति बन्धकाले तु भन्त्स्यतीति तृतीयः, चतुर्थस्तु तस्य नास्ति आयुरबन्धकत्वस्याभावादिति । तथा कृष्णपाक्षिकनारकस्य प्रथमः प्रतीत एव, द्वितीयो नास्ति, यतः कृष्णपाक्षिको नारक आयर्बद्धा पुनर्न भन्त्सयतीत्येतन्नास्ति, तस्य चरमभवाभावात्, तृतीयस्तु स्यात्, चतुर्थोऽपि न उक्तयुक्तेरेवेति ।

'सम्मामिच्छत्त तइयचउत्थ'त्ति सम्यग्मिथ्यादृष्टेरायुषो बन्धाभावादिति । असुरकुमारदण्डके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कण्हलेसेवि चत्तारि भंग'त्ति नारकदण्डके कृष्णलेश्यनारकस्य किल प्रथमतृतीयावुक्तौ, असुरकुमारस्य तु कृष्णलेश्यस्यापि चत्वार एव, तस्य हि मनुष्यगत्यवाप्तौ सिद्धिसम्भवेन द्वितीय-चतुर्थयोरपि भावादिति ।

पृथिवीकायिकदण्डके 'कण्हपक्खिए पढमतइया भंग'त्ति, इह युक्ति पूर्वोक्तैवनुसरणीया

तेजोलेश्यापदे तृतीयो भङ्गः, कथं ?, कश्चिद्देवस्तेजोलेश्यः पृथिवीकायिकेषूत्पन्नः स चापर्याप्तकावस्थायां तेजोलेश्यो भवति, तेजोलेश्याद्धायां चापगतायामायुर्बध्नाति तस्तेजोलेश्यः पृथिवीकायिक आयुर्बद्धवान्, देवत्वे न बध्नाति तेजोलेश्यावस्थायां भन्त्स्यति च तस्यामपगतायामित्येवं तृतीयः, एवं आउक्काइयवणस्सइकाइयाणवि त्ति उक्तन्यायेन कृष्णपाक्षिकेषु प्रथमतृतीयौ भङ्गौ, तेजोलेश्यायां च तृतीयभङ्गसम्भवस्तेष्वित्यर्थः, अन्यत्र तु चत्वारः, 'तेऊ-क्काइए'इत्यादि, तेजस्कायिकवायुकायिकानां सर्वत्र एकादशस्वपि स्थानकेष्वित्यर्थ प्रथमतृतीयभङ्गौ भवस्तत उद्वृत्तानामनन्तरं मनुष्येष्वनुत्पत्त्या सिद्धिगमनाभावेन द्वितीयचतुर्थासम्भवाद्, मनुष्येषु अनुत्पत्तिश्चैतेषां ।

॥१॥ "सत्तममहिनेरइया तेउवाऊ अनंतरुव्वट्टा ।
न य पावे माणुस्सं तहेवऽसंखाउआ सव्वे ॥"
–इति वचनादिति –।

'बेइंदिए'इत्यादि, विकलेन्द्रियाणां सर्वत्र प्रथमतृतीयभङ्गौ, यतस्तत उद्वृत्तानामानन्तर्येण सत्यपि मानुषत्वे निर्वाणाभावस्तस्मादवश्यं पुनस्तेषामायुषो बन्ध इति, यदुक्तं विकलेन्द्रियाणां सर्वत्र प्रथमतृतीयभङ्गाविति तदपवादमाह– 'नवरं सम्मत्ते'इत्यादि, सम्यक्त्वे ज्ञाने आभिनिबोधिके श्रुते च विकलेन्द्रियाणां तृतीय एव, यतः सम्यक्त्वादीनि तेषां सासादनभावेनापर्याप्तकावस्थायामेव, तेषु चापगतेष्वायुषो बन्ध इत्यतः पूर्वभवे बद्धवन्तः सम्यक्त्वाद्यवस्थायां च न बध्नन्ति तदनन्तरं च भन्त्स्यंतीति तृतीय इति ।

'पंचिंदियतिरिक्खे'त्यादि, पञ्चेन्द्रियतिरश्चां कृष्णपाक्षिकपदे प्रथमतृतीयौ, कृष्णपाक्षिको ह्यायुर्बद्धाऽबद्धा वा तदबन्धकोऽनन्तरमेव भवति तस्य सिद्धिगमानायोग्यत्वादिति ।

'सम्मामिच्छत्ते तईयचउत्थ'त्ति सम्यग्मिथ्यादृष्टेरायुषो बन्धाभावात्तीयचतुर्थावेव, भावितं चैतत्प्रागेवेति । 'सम्मत्ते'इत्यादि, पञ्चेन्द्रियतिरश्चां सम्यक्त्वादिषु पञ्चसु द्वितीयवर्जा भङ्गा भवन्ति, कथं ?, यदा सम्यग्दृष्ट्यादि पञ्चेन्द्रियतिर्यगायुर्भवति तदा देवेष्वेव स च पुनरपि भन्त्स्यतीति न द्वितीयसम्भवः, प्रथमतृतीयौ तु प्रतीतावेव, चतुर्थ पुनरेवं–यथा मनुष्येषु बद्धायुरसौ सम्यक्त्वादि प्रतिपद्यते अनन्तरं च प्राप्तस्य चरमभवस्तदैवेति ।

'मणुस्साणं जहा जीवाणं'ति, इह विशेषमाह– 'नवर'मित्यादि, सम्यक्त्वसामान्यज्ञानादिषु पञ्चसु पदेषु मनुष्या द्वितीयविहीनाः, भावना चेह पञ्चेन्द्रियतिर्यक्सूत्रवदवसेयेति ॥

शतकं–२६ उद्देशकः–१ समाप्तः

## –: शतकं–२६ उद्देशकः–२ :–

**वृ.** प्रथमोद्देशके जीवादिद्वारे एकादशकप्रतिबद्धैर्नवभिः पापकर्मादिप्रकरणैर्जीवादीनि पञ्चविंशतिजीवस्थानानि निरूपितानि द्वितीयेऽपि तथैव तानि चतुर्विंशतिर्निरूप्यन्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

**मू. (९८१)** *अनंतरोववन्नए णं भंते ! नेरइए पावं कम्मं किं बंधी ? पुच्छा तहेव, गोयमा ! अत्थेगतिए बंधी पढमबितिया भंगा।*

*सलेस्से णं भंते ! अनंतरोववन्नए नेरइए पावं कम्मं किं बंधी पुच्छा, गोयमा ! पढमबितिया भंगा, एवं खलु सव्वत्थ पढमबितिया भंगा, नवरं सम्मामिच्छत्तं मणजोगो वइजोगो य न पुच्छिज्जइ, एवं जाव थणियकुमाराणं, बेइंदियतेइंदियचउरिंदियाणं वयजोगो न भन्नइ, पंचिंदियतिरिक्खजोणियाणंपि सम्मामिच्छत्तं ओहिनाणं विभंगनाणं मणजोगो वयजोगो एयाणि पंच पदाणि न भन्नंति।*

*मणुस्सां अलेस्ससम्मामिच्छत्तमनपज्ञवनाणकेवलनाणविभंगनाणनोसन्नोवउत्तअवेदगअकसायीमणजोगवयजोगअजोगिएयाणि एक्कारस पदाणि न भन्नंति, वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं तहेव ते तिन्नि न भन्नंति सव्वेसिं, जाणि सेसाणि ठाणाणि सव्वत्थ पढमबितिया भंगा, एगिंदियाणं सव्वत्थ पढमबितिया भंगा, जहा पावे एवं नाणावरणिज्ञेणवि दंडओ, एवं आउयवज्ञेसु जाव अंतराइए दंडओ।*

*अनंतरोववन्नए णं भंते ! नेरइए आउयं कम्मं किं बंधी पुच्छा, गोयमा ! बंधी न बंधइ बंधिस्सइ। सलेस्से णं भंते ! अनतरोववन्नए नेरइए आउयं कम्मं किं बंधी ?, एवं चेव ततिओ भंगो, एवं जाव अनागारोवउत्ते, सव्वत्थवि ततिओ भंगो, एवं मणुस्सवज्ञं जाव वेमाणियाणं।*

*मणुस्साणं सव्वत्थ ततियचउत्था भंगा, नवरं कण्ह पक्खिएसु ततिओ भंगो, सव्वेसिं नाणत्ताइं ताइं चेव। सेवं भंते ! २ त्ति ॥*

**वृ.** 'अनंतरोववन्नए ण'मित्यादि, इहाद्यावेव भङ्गौ अनन्तरोपपन्ननारकस्य मोहलक्षणपापकर्म्माबन्धकत्वासम्भवात्, तद्धि सूक्ष्मसम्परायादिषु भवति, तानि च तस्य न संभवन्तीति।

'सव्वत्थ'त्ति लेश्यादिपदेषु, एतेषु च लेश्यादिपदेषु सामान्यतो नारकादीनां संभवन्त्यपि, यानि पदान्यनन्तरोत्पन्ननारकादीनामपर्याप्तकत्वेन न सन्ति तानि तेषां न प्रच्छनीयानीति दर्शयन्नाह–'नवर'मित्यादि, तत्र सम्यग्मिथ्यात्वाद्युक्तत्रयं यद्यपि नारकाणामस्ति तथाऽपीहानन्तरोत्पन्नतया तेषां तन्नास्तीति न पृच्छनीयं, एवमुत्तरत्रापि।

आयुष्कर्म्मदण्डके–'मणुस्साणं सव्वत्थतईयचउत्थ'त्ति यतोऽनन्तरोत्पन्नो मनुष्यो नायुर्बध्नाति भन्त्स्यति पुनः चरमशरीरस्त्वसौ न बध्नाति न च भन्त्स्यतीति।

'कण्हपक्खिएसु तइओ'त्ति कृष्णपाक्षिकत्वेन न भन्त्स्यतीत्येतस्य पदस्यासम्भवात्त तीय एव, 'सव्वेसिं नाणत्ताइं ताइं चेव'त्ति सर्वेषां नारकादिजीवानां यानि पापकर्म्मदण्डकेऽभिहितानि नानात्वानि तान्येवायुर्दण्डकेऽपीति ॥

शतकं–२६ उद्देशकः–२ समाप्तः

## –: शतकं–२६ उद्देशकः–३ :–

**वृ.** द्वितीयोद्देशकोऽनन्तरोपपन्नकान्नारकादीनाश्रित्योक्तस्तृतीयस्तु परम्परोपपन्नकानाश्रित्योच्यते इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

**मू. (९८२)** *परंपरोववन्नए णं भंते ! नेरइए पावं कम्मं किं बंधी पुच्छा, गोयमा ! अत्थेगतिए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पढमबितिया, एवं जहेव पढमो उद्देसओ तहेव परंपरोववन्नएहिवि उद्देसओ भाणियव्वो नेरइयाइओ तहेव नवदंडगसहिओ।*

*अट्ठण्हवि कम्मप्पगडीणं जा जस्स कम्मस्स वत्तव्वया सा तस्स अहीणमतिरित्ता नेयव्वा जाव वेमाणिया अनागारोवउत्ता । सेवं भंते ! २ त्ति ॥*

**वृ.** 'परंपरोववन्नए ण'मित्यादि, 'जहेव पढमो उद्देसओ'त्ति जीवनारकादिविषयः, केवलं तत्र जीवनारकादिपञ्चविंशति पदान्यभिहितानि इह तु नारकादीनि चतुर्विंशतिरेवेति, एतवेदाह—

'नेरइयाइओ'त्ति नारकादयोऽत्र वाच्या इत्यर्थः, 'तहेव नवदंडगसंगहिओ'त्ति पापकर्मज्ञानावरणादिप्रतिबद्धा ये नव दण्डकाः प्रागुक्तास्तैः सङ्गृ हीतो—युक्तो य उद्देशकः स तथा।

शतकं—२६ उद्देशकः—३ समाप्तः

## —: शतकं—२६ उद्देशकः—४ :—

**मू. (९८३)** *अनंतरोगाढए णं भंते ! नेरइए पावं कम्मं किं बंधी ? पुच्छा, गोयमा ! अत्थेगतिए० एवं जहेव अनंतरोववन्नएहिं नवदंडगसंगहिओ उद्देसो भणिओ तहेव अनतरोगाढएहिवि अहीणमतिरित्तो भाणियव्वो नेरइयादीए जाव वेमाणिए। सेवं भंते ! २ ।*

**वृ.** एवं चतुर्थादय एकादशान्ताः, नवरम् 'अनंतरोगाढे'त्ति उत्पत्तिसमयापेक्षयाऽत्रानन्तरावगाढत्वमवसेयं, अन्यथाऽनन्तरोत्पन्नानन्तरावगाढयोर्निर्विशेषता न स्यात्, उक्ता चासौ 'जहेवाणंतरोववन्नएही'त्यादिना, ।

## —: शतकं—२६ उद्देशकः—५ :—

**मू. (९८४)** *परंपरोगाढए णं भंते ! नेरइए पावं कम्मं किं बंधी जहेव परंपरोववन्नएहिं उद्देसो सो चेव निरवसेसो भाणियव्वो। सेवं भंते ! २ ॥*

**वृ.** एवं परम्परावगाढोऽपि।

## —: शतकं—२६ उद्देशकः—६ :—

**मू. (९८५)** *अनंतराहारए णं भंते ! नेरतिए पावं कम्मं कि बंधी ? पुच्छा, एवं जहेव अणंतरोवन्नेएहिं उद्देसो तहेव निरवसेसं। सेवं भंते ! २ ॥*

**वृ.** 'अनंतराहारए'त्ति आहारकत्वप्रथमसमयवर्त्ती।

## —: शतकं—२६ उद्देशकः—७ :—

**मू. (९८६)** *परंपराहारए णं भंते ! नेरइए पावं कम्मं किं बंधी पुच्छा, गोयमा ! एवं जहेव परंपरोववन्नेएहिं उद्देसो तहेव निरवसेसो भाणियव्वो। सेवं भंते ! सेवं भंते ! ॥*

**वृ.** परम्पराहारकस्त्वाहारकत्वस्य द्वितीयादिसम्यवर्त्ती, ।

## —: शतकं—२६ उद्देशकः—८ :—

**मू. (९८७)** *अनंतरपज्जत्तए णं भंते ! नेरइए पावं कम्मं किं बंधी ? पुच्छा, गोयमा ! जहेव अनंतरोववन्नएहिं उद्देसो तहेव निरवसेसं। सेवं भंते २ ॥*

**वृ.** अनंतरपज्ञत्ति'त्ति पर्याप्तक्त्वप्रथमसमयवर्त्ती, स च पर्याप्तिसिद्धावपि तत उत्तरकालमेव पापकर्माद्यबन्धलक्षणकार्यकारी भवतीत्यसावनन्तरोपपन्नवद्यपदिश्यते, अत एवाह—'एवं जहेव अनंतरोववन्नएही'त्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## –: शतकं–२६ उद्देशकः–९ :–

**मू. (९८८)** *परंपरपज्जत्तए णं भंते ! नेरइए पावं कम्मं किं बंधी ? पुच्छा, गोयमा ! एवं जहेव परंपरोववन्नएहिं उद्देसो तहेव निरवसेसो भाणियव्वो । सेवं ! २ जाव विहरइ ।*

## –: शतकं–२६ उद्देशकः–१० :–

**मू. (९८९)** *चरिमे णं भंते ! नेरइए पावं कम्मं किं बंधी ? पुच्छा, गोयमा ! एवं जहेव परंपरोववन्नएहिं उद्देसो तहेव चरिमेहिं निरवसेसो । सेवं भंते ! २ जाव विहरति ।*

**वृ.** तथा–'चरमे णं भंते ! नेरइए' त्ति, इह चरमो यः पुनस्तं भवं न प्राप्स्यति, 'एवं जहेवे' त्यादि, इह च यद्यप्यविशेषेणातिदेशः कृतस्तथाऽपि विशेषोऽवगन्तव्यः ।

## –: शतकं–२६ उद्देशकः–११ :–

**मू. (९९०)** *अचरिमे णं भंते ! नेरइए पावं कम्मं किं बंधी ? पुच्छा, गोयमा ! अत्थेगइए एवं जहेव पढमोद्देसए पढमबितिया भंगा भाणियव्वा सव्वत्थ जाव पंचिंदियतिरिक्खजोणियाणं*

*अचरिमे णं भंते ! मणुस्से पावं कम्मं किं बंधी ? पुच्छा, गोयमा ! अत्थेगतिए बंधी बंधइ बंधिस्सइ अत्थे० बंधी बंधइ न बंधिस्सइ अत्थेगतिए बंधी न बंधइ बंधिस्सइ ।*

*सलेस्से णं भंते ! अचरिमे मणूसे पावं कमू किं बंधी ?, एवं चेव तिन्नि भंगा चरमविहूणा भाणियव्वा एवं जहेव पढमुद्देसे, नवरं जेसु तत्थ वीससु चत्तारि भंगा तेसु इह आदिल्ला तिन्नि भंगा भाणियव्वा चरिमभंगवज्ञा, अलेस्से केवलनाणी य अजोगीय एए तिन्निवि न पुच्छिज्जंति, सेसं तहेव, वाणमंतरजोइ० वेमा० जहा नेरइए ।*

*अचरिमे णं भंते ! नेरइए नाणावरणिज्जं कम्मं किं बंधी पुच्छा, गोयमा ! एवं जहेव पावं नवरं मणुस्सेसु सकसाईसु लोभकसाईसु य पढमबितिया भंगा सेसा अट्ठारस चरमविहूणा सेसं तहेव जाव वेमाणियाणं, दरिसणावरणिज्जंपि एवं चेव निरवसेसं, वेयणिज्जे सव्वत्थवि पढमबितिया भंगा जाव वेमाणियामं नवरं मणुस्सेसु अलेस्से केवली अजोगी य नत्थि । अचरिमे णं भंते ! नेरइए मोहणिज्जं कम्मं किं बंधी ? पुच्छा, गोयमा ! जहेव पावं तहेव निरवसेसं जाव वेमाणिए ।*

*अचरिमे णं भंते ! नेरइए आउयं कम्मं किं बंधी ? पुच्छा, गोयमा ! पढबितिया भंगा, एवं सव्वपदेसुवि, नेरइयाणं पढमततिया भंगा नवरं सम्मामिच्छत्ते ततिओ भंगो, एवं जाव थणियकुमाराणं ।*

*पुढविक्काइयआउक्काइयवणस्सइकाइयाणं तेउलेस्साए ततिओ भंगो सेसेसु पदेसु सव्वत्थ पढमततिया भंगा, तेउकाइयवाउक्काइयाणं सव्वत्थ पढमततिया भंगा, बेइंदियतेइंदियचउ० एवं चेव नवरं सम्मत्ते ओहिनाणे आभिनिबोहियनाणे सुयनाणे एएसु चउसुवि ठाणेसु ततिओ भंगो, पंचिंदियतिरिक्खजोणियाणं सम्मामिच्छत्ते ततिओ भंगो, सेसेसु पदेसु सव्वत्थ पढमततिया भंगा*

*मणुस्साणं सम्मामिच्छत्ते अवेदए अकसाइम्मि य ततिओ भंगो, अलेस्स केवलनाण अजोगी य न पुच्छिज्जंति, सेसपदेसु सव्वत्थ पढमततिया भंगा, वाणमंतरजोइसियवेमाणिया जहा नेरइया नामं गोयं अंतराइयं च जहेव नानावरणिज्जं तहेव निरवसेसं । सेवं भंते ! २ जाव विहरइ ॥*

**वृ.** तथाहि–चरमोद्देशकः परम्परोद्देशकवद्वाच्य इत्युक्तं, परम्परोद्देशकश्च प्रथमोद्देशकवत्, तत्र च मनुष्यपदे आयुष्कापेक्षया सामान्यतश्चत्वारो भङ्गा उक्ताः, तेषु च चरममनुष्यस्यायुष्क-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्म्मबन्धमाश्रित्य चतुर्थ एव घटते, यतो यश्चरमोऽसावायुर्बद्धवान् न बध्नाति न च भन्त्स्यतीति, अन्यथा चरमत्वमेव न स्यादिति, एवमन्यत्रापि विशेषोऽवगन्तव्य इति, अचरमो यस्तं भवं पुनः प्राप्स्यति, तत्राचरमोद्देशके पञ्चेन्द्रियतिर्यगन्तेषु पदेषु पापं कर्म्माश्रित्याद्यौ भङ्गकौ, मनुष्याणां तु चरमभङ्गकवर्जास्त्रयो, यतश्चतुर्थश्चरमस्येति, एतदेव दर्शयति–

'अचरिमे णं भंते ! मणूसे'इत्यादि, 'वीससु पएसु'त्ति, तानि चैतानि–जीव १ सलेश्य २ शुक्ललेश्य ३ शुक्लपाक्षिक ४ सम्यग्दृष्टि५ ज्ञानि ६ मतिज्ञानादिचतुष्टय १० नोसंज्ञोपयुक्त ११ वेद १२ सकषाय १३ लोभकषाय १४ सयोगि १५ मनोयोग्यादित्रय १८ साकारोपयुक्ता १९ नाकारोपयुक्त २० लक्षणानि, एतेषु च सामान्येन भङ्गकचतुष्कसम्भवेऽप्यचरमत्वान्मनुष्यपदे चतुर्थो नास्ति, चरमस्यैव तद्भावादिति।

'अलेस्से'इत्यादि, अलेश्यादयस्त्रयश्चरमा एव भवन्तीतिकृत्वेह न प्रष्टव्याः।

ज्ञानावरणीयदण्डकोऽप्येवं, नवरं विशेषोऽयं–पापकर्मदण्डके सकषायलोभकषायादिष्वाद्यास्त्रयो भङ्गका उक्ता इह त्वाद्यौ द्वावे, यत एते ज्ञानावरणीयमबद्धा पुनर्बन्धका न भवन्ति, कषायिणां सदैव ज्ञानावरणबन्धकत्वात्, चतुर्थस्त्वचरमत्वादेव न भवतीति, 'वेयणिज्जे सव्वत्थ पढमबीय'त्ति, तृतीयचतुर्थयोरसम्भवात्, एतयोर्हि प्रथमः प्रागुक्तयुक्तेर्न संभवति द्वितीयस्त्वयोगित्व एव भवतीति।

आयुर्दण्डके–'अचरिमे णं भंते ! नेरइए'इत्यादि, 'पढमततिया भंग'त्ति, तत्र प्रथमः प्रतीत एव द्वितीयस्त्वचरमत्वान्नास्ति, अचरमस्य हि आयुर्बन्धोऽवश्यं भविष्यत्यन्यथाऽचरमत्वमेव न स्यात्, एवं चतुर्थोऽपि, तृतीये तु न बध्नात्यायुस्तदबन्धकाले पुनर्भन्त्स्यत्यचरमत्वादिति, शेषपदानां तु भावना पूर्वोक्तानुसारेण कर्त्तव्येति।

'बंधिसयं'ति प्रत्युद्देशकं बन्धीतिशब्देनोपलक्षितं शतं बन्धिशतम्।

शतकं–२६ उद्देशकाः–४–११ समाप्ताः

येषां गौरिव गौः सदर्थपयसां दात्री पवित्रात्मिका,
सालङ्कारसुविग्रहा शुभपदक्षेपा सुवर्णान्विता।
निर्गत्यास्यगृहाङ्गणद्बुधसभाग्रामाजिरं राजयेद्,
ये चास्यां विवृतौ निमित्तमभवन्नन्दन्तु ते सूरयः॥

शतकं–२६ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे षड्विंशतितमशतकस्य अभयदेवसूरि विरचिता टीका परिसमाप्ता**

## शतकं–२७

वृ. व्याख्यातं षड्विंशं शतं, अथ सप्तविंशमारभ्यते, अस्य चायमभिसम्बन्धः–अनन्तरशते जीवस्य कर्मबन्धनक्रिया भूतादिकालविशेषेणोक्ता सप्तविंशशते तु जीवस्य तथाविधैव कर्म्मकरणक्रियोच्यत इत्येवंसम्बद्धस्यास्येदमादिसूत्रम्–

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

-: शतकं-२७ उद्देशकाः-१...११ :-

**मू. (९९१)** *जीवे णं भंते ! पावं कम्मं किं करिंसु करेन्ति करिस्संति १ ? करिंसु करेंति न करिस्संति २ ? करिंसु न करेंति करिस्संति ३ ? करिंसु न करेंति न करेस्संति ४ ?, गोयमा ! अत्तेगतिए करिंसु करेति करिस्संति १ अत्थे० करिंसु करेंति न करिस्संति २ अत्थे० करिंसु न करेंति करेस्संति ३ अत्थेगतिए करिंसु न करेंति न करेस्संति ।*

*सलेस्से णं भंते ! जीवे पावं कम्मं एवं एएणं अभिलावेणं जच्चेव बंधिसए वत्तव्वया सच्चेव निरवसेसा भाणियव्वा, तहेव नवदंडगसंगहिया एक्कारस उद्देसगा भाणियव्वा ।*

**वृ.** 'जीवे ण'मित्यादि, ननु बन्धस्य करणस्य च कः प्रतिविशेषः ?, उच्यते, कश्चित्, तर्हि किमिति भेदेनोपन्यासः ?, उच्यते, येयं जीवस्य कर्म्मबन्धक्रिया सा जीवकर्तृका न त्वीश्वरादिकृतेत्यस्यार्थस्योपदर्शनार्थं, अथवा बन्धः सामान्यतः करमं त्ववश्यं विपाकदायित्वेन निष्पादनं निधत्तादिस्वरूपमिति ।

'करिसुयसयं' ति 'करिंसु'इत्यनेन शब्देनोपलक्षितं शतं प्राकृतभाषया 'करिंसुयसयं' ति ।

शतकं-२७ उद्देशकाः-१...११ समाप्ताः

व्याख्यातशतसमानं शतमिदमित्यस्य नो कृता विवृतिः ।
दृष्टसमाने मार्गे किं कुरुताद्दशकस्तस्य ? ॥

शतकं-२७ समाप्तम्

**मुनी दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे**
**विंशतिशतकस्य अभयदेवसूरिविरचिता टीका परिसमाप्ता ।**

## शतकं-२८

**वृ.** व्याख्यातं कर्म्मवक्तव्यताऽनुगतं सप्तविंशं शतम्, अथ क्रमायतां तताविधमेवाष्टाविंशं व्याख्यायते, तत्र चैकादशोद्देशका जीवाद्येकादशद्वारानगतपापकर्मादिदण्डकनवकोपेता भवन्ति तत्र चाद्योद्देशकस्येदमादिसूत्रम्

-: शतकं-२८ उद्देशकः-१ :-

**मू. (९९२)** *जीवा णं भंते ! पावं कम्मं कहिं समज्ञिणिंसु कहिं समायरिंसु ?, गोयमा ! सव्वेवि ताव तिरिक्खजोणिएसु होज्ञा १ अहवा तिरिक्खजोणिएसु य नेरइएसु य होज्ञा २ अहवा तिरिक्खजोणिएसु य मणुस्सेसु य होज्ञा ३ अहवा तिरिक्खजोणिएसु य देवेसु य होज्ञा ४ अहवा तिरिक्खजोणिएसु य मणुस्सेसु देवेसु य होज्ञा ५ अहवा तिरिक्खजोणिएसु य नेरइएसु य देवेसु य होज्ञा ६ अहवा तिरिक्खजोणिएसु य मणुस्सेसु देवेसु य होज्ञा ७ अहवा तिरिक्ख० नेरइएसु य मणुस्सेसु देवेसु य होज्ञा ८ ।*

*सलेस्सा णं भंते ! जीवा पावं कम्मं कहं समज्ञिणिंसु कहिं समायरिंसु ?, एवं चेव, एवं कण्हलेस्सा जाव अलेस्सा, कण्हपक्खिया सुक्कपक्खिया एवं जाव अनागारोवउत्ता ।*

*नेरइया णं भंते ! पावं कम्मं कहिं समज्ञिणिंसु कहिं समायरिंसु ?, गोयमा ! सव्वेवि ताव तिरिक्खजोणिएसु होज्ञत्ति एवं चेव अट्ठ भंगा भाणियव्वा, एवं सव्वत्थ अट्ठ भंगा, एवं जाव*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनागारोवउत्तावि, एवं जाव वेमाणियाणं, एवं नाणावरणिज्जेणवि दंडओ, एवं जाव अंतराइएणं, एवं एए जीवादीया वेमाणियपज्जवसामा नव दंडगा भवंति। सेवंभंते! २ जाव विहरइ।*

**वृ.** 'जीवा णं भंते!' इत्यादि, 'कहिं स मज्जिणेंसु'त्ति कस्यां गतौ वर्त्तमानाः 'समर्जितवन्तः'? गृहीतवन्तः 'कहिं समायरिंसु'त्ति कस्यां समाचरितवन्तः? पापकर्म्महेतुसमाचरणेन, तद्विपाकानुभवनेनेति वृद्धाः, अथवा पर्यायशब्दावेताविति, 'सव्वेवि ताव तिरिक्खजोणिएसु होज्ज'त्ति। इह तिर्यग्योनि सर्वजीवीनां मातृस्थानीया बहुत्वात् ततश्च सर्वेऽपि तिर्यग्भ्योऽन्ये नारकादयस्तिर्यग्भ्य आगत्योत्पन्नाः कदाचिद् भवेयुस्ततस्ये सर्वेऽपि तिर्यग्योनिकेष्वभूवन्निति व्यपदिश्यन्ते, अयमभिप्रायः—ये विवक्षितसमये नारकादयोऽभूवंस्तेऽल्पत्वेन समस्तः अपि सिद्धिगमनेन तिर्यग्गतिप्रवेशेन च निर्लेपतयोद्‌वृत्तास्ततश्च तिर्यग्गतेरनन्तत्वेनानिर्लेपनीयत्वात्तत उद्‌वृत्तास्तिर्यस्तत्स्थानेषु नारकादित्वेनोत्पन्नास्ततस्ते तिर्यग्गतौ नरकगत्यादिहेतुभूतं पापं कर्म्म समर्जितवन्त इत्युच्यत इत्येकः।

अहवा तिरिक्खजोणिएसु नेरइएसु होज्ज त्ति विवक्षितसमये ये मनुष्यदेवा अभूवंस्ते निर्लेपतया तथैवोद्‌वृत्ताः तत्स्थानेषु च तिर्यग्नारकेभ्य आगत्योत्पन्नाः, ते चैवं व्यपदिश्यन्ते— तिर्यगनैरयिकेष्वभूवन्नेते, ये च यत्राभूवंस्ते तत्रैव कर्ममोपार्जितवन्त इत्यर्थो लभ्यत इति द्वितीयः

'अहवा तिक्खजोणिएसु य मणुएसु य होज्ज'त्ति विवक्षितसमये ये नैरयिकदेवास्ते तथैव निर्लेपतयोद्‌वृत्ताः तत्स्थानेषु च तिर्यग्मनुष्येभ्य आगत्योत्पन्नाः, ते चैवं व्यपदिश्यन्ते— तिर्यग्मनुष्येभूवन्नेते,। ये च यत्राभूवंस्ते तत्रैव कर्मोपार्जितवन्त इति सामर्थ्यगम्यमिति तृतीयः, तदेवमनया भावनयाऽष्टावेते भङ्गाः, तत्रैकस्तिर्यग्गत्यैव, अन्ये तु तिर्यग्नैरयिकाभ्यां तिर्यग्मनुष्याभ्यां तिर्यग्देवाभ्यामिति त्रयो द्विकंयोगाः, तथा तिर्यग्नैरयिकमनुष्यैस्तिर्यग्नैरयिकदेवैस्तिर्यग्मनुष्यदेवैरिति त्रयस्त्रिकसंयोगा एकश्चतुष्कसंयोग इति।

'एवं सव्वत्थ'त्ति सलेश्यादिपदेषु 'नव दंडगा भवंति'त्ति पापकर्मादिभेदेन पूर्वोक्तेनेति।

शतकं—२८ उद्देशकः—१ समाप्तः

## —: शतकं—२८ उद्देशकः—२ :—

**मू. (९९३)** *अनंतरोववन्नगा णं भंते! नेरइया पावं कम्मं कहिं समज्जिणिंसु कहिं समायरिंसु?, गोयमा! सव्वेवि ताव तिरिक्खजोणिएसु होज्ज, एवं एत्थवि अट्ठ भंगा।*

*एवं अनंतरोववन्नगाणं नेरइयाईणं जस्स जं अत्थि लेसादीयं अनागारोवओगपज्जवसाणं तं सव्वं एयाए भयणाए भाणियव्वं जाव वेमाणियाणं, नवरं अनंतरेसु जे परिहरियव्वा ते जहा बंधिसए तहा इहंपि, एवं नाणावरणिज्जेणविदंडओ एवं जाव अंतराइएणं निरवसेसं एसोवि नवदंडगसंगहिओ उद्देसओ भाणियव्वो। सेवं भंते! २ त्ति।*

## —: शतकं—२८ उद्देशकाः—३—११ :—

**मू. (९९४)** *एवं एएणं कमेणं जहेव बंधिसए उद्देसगाणं परिवाडी तहेव इहंपि अट्ठसु भंगेसु नेयव्वा नवरं जाणियव्वं जं जस्स अत्थि तं तस्स भाणियव्वं जाव अचरिमुद्देसो। सव्वेवि एए एक्कारस उद्देसगा। सेवं भंते! २ इति जाव विहरइ॥*

**वृ.** 'अनंतरोववन्नगा ण'मित्यादिर्द्वितीयस्तत्र च 'अनंतरेसु जे परिहरियव्वा ते जहा बंधिसए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहा इहंपि'त्ति, अनन्तरोपपन्ननारकादिषु यानि सम्यग्मिथ्यात्वमनोयोगवाग्योगादीनि पदानि 'परिहरियव्व'त्ति असम्भवान्न प्रच्छनीयानि तानि यथा बन्धिशते तथेहापीति। ननु प्रथमभङ्गके सर्वे तिर्यग्भ्य उत्पन्नाः कथं संभवन्ति, आनतादिदेवानां तीर्थङ्करादिमनुष्यविशेषाणां च तेभ्य आगतानामनुत्पत्तेः ?, एवं द्वितीयादिभङ्गकेष्वपि भावनीयं, सत्यं, किन्तु बाहुल्यमाश्रित्यैते भङ्गा ग्राह्याः, इदं च वृद्धवचनेन दर्शयिष्यामः। 'कम्मसमज्जणणसयं'ति कर्मसमर्जनलक्षणार्थप्रतिपादकं शतं कर्म्समर्जनशतम्।

शतकं-२८ उद्देशकाः-३-११ समाप्तः

इति चूर्णिवचनरचनाकुञ्चिकयोद्घाटितं मयाऽप्येतत्।
अष्टाविंशतितमशतमन्दिरमनधं महार्थचयम्॥

शतकं-२८ समाप्तम्

**मुनि दीपरत्नसागरेण संशोधिता सम्पादीता भगवतीअङ्गसूत्रे अष्टाविंशतितम शतकस्य अभदेवसूरि विरचिता टीका परिसमाप्ता।**

## शतकं-२९

वृ. व्याख्यातं पापकर्मादिवक्तव्यताऽनुगतमष्टाविंशं शतम्, अथ क्रमायातं तथाविधमेवैकोनत्रिंशं व्याख्यायते, तत्र च तथैवैकादयशोद्देशका भवन्ति, तेषु चाद्योद्देशकस्येदमादिसूत्रम्–

### –: शतकं-२९ उद्देशकः-१ :–

**मू. (९९५)** *जीवा णं भंते ! पावं कम्मं किं समायं पट्ठविंसु समायं निट्ठविंसु १ ? समायं पट्ठविंसु विसमायं निट्ठविंसु २ ? विसमायं पट्ठविंसु समायं निट्ठविंसु ३ ? विसमायं पट्ठविंसु विसमायं निट्ठविंसु ?, गोयमा ! अत्थेगइया समायं पट्ठविंसु समायं निट्ठविंसु जाव अत्थेगइया विसमायं पट्ठविंसु विसमायं निट्ठविंसु।*

*से केणट्ठेणं भंते ! एवं वुच्चइ अत्थेगइया समायं पट्ठविंसु समायं निट्ठविंसु ? तं चेव, गोयमा ! जीवा चउव्विहा पन्नत्ता, तंजहा–अत्थेगइया समाउया समोववन्नगा १ अत्थेगइया समाउया विसमोववन्नगा २ अत्थेग० विसमाउया समोववन्नगा ३ अत्थेग० विसमाउया विसमोववन्नगा ४।*

*तत्थ णं जे ते समाउया समोववन्नगा ते णं पावं कम्मं समायं पट्ठविंसु समायं निट्ठविंसु, तत्थ णं जे ते समाउया विसमोववन्नगा ते णं पावं कम्मं समायं पट्ठविंसु विसमायं निट्ठविंसु, तत्थ णं जे ते विसमाउया समोववन्नगा ते णं पावं कम्मं विसमायं पट्ठविंसु समायं निट्ठविंसु, तत्थ णं जे ते विसमाया विसमोववन्नगा ते णं पावं कम्मं विसमायं पट्ठविंसु विसमायं निट्ठविंसु।*

*से तेणट्ठणं गोयमा ! तं चेव। सलेस्सा णं भंते ! जीवा पावं कम्मं एवं चेव, एवं सव्वट्ठाणेसुवि जाव अनागारोवउत्ता, एए सव्वेवि पया एयाए वत्तव्वयाए भाणियव्वा।*

*नेरइया णं भंते ! पावं कम्मं किं समायं पट्ठविंसु समायं निट्ठविंसु ? पुच्छा, गोयमा ! अत्थेगइया समायं पट्ठविंसु एवं जहेव जीवाणं तहेव भाणियव्वं जाव अनागारोवउत्ता, एवं जाव वेमाणियाणं जस्स जं अत्थि तं एएणं चेव कमेणं भाणियव्वं जहा पावेण दंडओ, एएणं कमेणं अट्ठसुवि कम्मप्पगडीसु अट्ठ दंडगा भाणियव्वा जीवादीया वेमाणियापज्जवसाणा एसो नवदंडगसंगहिओ पढमो उद्देसो भाणियव्वो। सेवं भंते ! २ इति॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'जीवा णं भंते! पाव'मित्यादि, 'समायं'ति समकं बहवो जीवा युगपदित्यर्थः 'पट्ठविंसु'त्ति प्रस्थापितवन्तः–प्रथमतया वेदयितुमारब्धवन्तः, तथा समकमेव 'निट्ठविंसु' त्ति 'निष्ठापितवन्तः' निष्ठां नीतवन्त इत्येकः, तथा समकं प्रस्थापितवन्तः 'विसम'त्ति विषमं यथा भवति विषमतयेत्यर्थः निष्ठापितवन्त इति द्वितीयः, एवमन्यौ द्वौ।

'अत्थेगइया समाउया'इत्यादि चतुर्भङ्गी, तत्र 'समाउय'त्ति समायुषः उदयापेक्षया समकालायुष्कोदया इत्यर्थ : 'समोववन्नग'त्ति विवक्षितायुषः क्षये समकमेव भवान्तरे उपपन्नाः समोपपन्नकाः, ये चैवंविधास्ते समकमेव प्रस्थापितवन्तः समकमेव च निष्ठापितवन्तः, नन्वायुःकर्मैवाश्रित्येवमुपपन्नं भवति न तु पापं कर्म्म, तद्धि नायुष्कोदयापेक्षं प्रस्थाप्यते निष्ठाप्यते चेति, नैवं, यतो भवापेक्षः कर्म्मणामुदयः क्षयश्चेष्यते।

उक्तश्च–"उदयकखयक्खओवसमे"त्यादि, अत एवाह–'तत्थ णं जे ते समाउया समोववन्नया ते णं पावं कम्मं समायं पट्ठविंसु समायं निट्ठविंसु'त्ति प्रथमः, तथा 'तत्थ णं जे ते समाउया विसमोववन्नग'त्ति समकालायुष्कोदया विषमतया परभवोत्पन्ना मरणकालवैषम्यात् 'ते समायं पट्ठविंसु'त्ति आयुष्कविशेषोदयमस्पाद्यत्वात्पाकर्म्मवेदनविशेषस्य 'विसमायं निट्ठविंसु'त्ति मरणवैषम्येण पापकर्मवेदनविशेषस्य विषमतया निष्ठासम्भवादिति द्वितीयः।

तथा 'विसमाउया समोववन्नग'त्ति विषमकालायुष्कोदयाः समकालभवनान्तरोत्पत्तयः 'ते णं पावं कम्मं विसमायं पट्ठविंसु समायं निट्ठविंसु'त्ति तृतीयः, चतुर्थ सुज्ञात एवेति, इह चैतान् भङ्गकान् प्राक्तनशतभङ्गकांश्चाश्रित्य वृद्धैरुक्तम्–

॥१॥ "पट्ठवणसए किहणु हु समाउउववन्नएसु चउभंगो।
किह व समज्ञणणसए गमणिज्ञा अत्थओ भंगा॥

पट्ठवणसए भंगा पुच्छाभंगाणुलोमओ वच्चा। यथापृच्छ भङ्गाः समकप्रस्थापनादयो न बध्यन्ते तथेह समायुष्कादयः अन्यत्रान्यथाव्याख्याता अपि व्याख्येया इत्यर्थः।

"कम्मसमज्ञणसए बाहुल्लाओ समाउज्ञा॥

शतकं–२९ उद्देशकः–१ समाप्तः

## –: शतकं–२९ उद्देशकः–२ :–

मू. (९९६) *अनंतरोववन्नगा णं भंते ! नेरइया पावं कम्मं किं समायं पट्ठविंसु समायं निट्ठविंसु ? पुच्छा, गोयमा ! अत्थेगइया समायं पट्ठविंसु समायं निट्ठविंसु अत्थेगइया समायं पट्ठविंसु विसमायं निट्ठविंसु, से केणट्ठेणं भंते ! एवं वुच्चइ अत्थेगइया समायं पट्ठविंसु ? तं चेव, गोयमा ! अनंतरोववन्नगा नेर० दुविहा पं० तं०–अत्थेगइया समाउया समोववन्नगा अत्थेगइया समाउया विसमोववन्नगा०। तत्थ णं जे ते समाउया समोवन्नगा ते णं पावं कम्मं समायं पट्ठविंसु समायं निट्ठविंसु, तत्थ णं जे ते समाउया विसमाववन्नगा ते णं पावं कम्मं समायं पट्ठविंसु विसमायं निट्ठविंसु, से तेण० तं चेव।*

*सलेस्सा णं भंते ! अनंतरो० नेर० पावं एवं चेव, एवं जाव अनागारोव०, एवं असुरकु० एवं जाव वेमा० नवरं जं जस्स अत्थि तं तस्स भाणिय, एवं नाणावरणिज्ञेणवि दंडओ, एवं निरवसेसं जाव अंतराइएणं। सेवं भंते ! २ त्ति जाव विहरति।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## -: शतकं-२९ उद्देशकाः-३-११ :-

**मू.** *(९९७) एवं एएणं गमएणं जच्चेव बंधिसए उद्देसगपरिवाडी सच्चेव इहवि भा० जाव अचरिमोत्ति, अनंतउद्देसगाणं चउण्हवि एक्का वत्तव्वया सेसाणं सत्तण्हं एक्का।*

**वृ.** 'अणंतरोववन्नगा ण'मित्यादिर्द्वितीयः, तत्र चानन्तरोपपन्नका द्विविधाः 'समाउया समोववन्नग'त्ति अनन्तरोपपन्नानां सम एवायुरुदयो भवति तद्वैषम्येऽनन्तरोपपन्नत्वमेव न स्यादायुःप्रथमसमयवर्त्तित्वात्तेषां 'समोववन्नग'त्ति मरणानन्तरं परभवोत्पत्तिमाश्रित्य, ते च मरणकाले भूतपूर्वगत्याऽनन्तरोपपन्नका उच्यन्ते, 'समाउया विसमोववन्नग'त्ति विषमोपपन्नकत्वमिहापि मरणवैषम्यादिति, तृतीयचतुर्थभङ्गावनन्तरोपपन्नेषु न संभवतः, अनन्तरोपपन्नत्वादेवेति द्वितीयः।

**वृ.** एवं शेषा अपि, नवरम् 'अनंतरोद्देसगाणं चउण्हवि'त्ति अनन्तरोपपन्नानन्तरावगाढानन्तराहारकानन्तरपर्याप्तकोद्देशकानाम् ॥ 'कम्मपट्ठवणसयं'ति कर्म्मप्रस्थापनाद्यर्थप्रतिपादनपरं शतं कर्म्मप्रस्थापनशतम् ॥

शतकं-२९ उद्देशकाः-३-११ समाप्तः

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता भगवतीअङ्गसूत्रे एकोनत्रिंशत्शतकस्य अभयदेवसूरि विरचित टीका परिसमाप्ता।**

## शतकं-३०

**वृ.** व्याख्यातमेकोनत्रिंशं शतम्, अथ त्रिंशमारभ्यते, अस्य चायं पूर्वेण सहाभिसम्बन्धः-प्राक्तनशते कर्म्मप्रस्थापनाद्याश्रित्य जीवा विचारिताः इह तु कर्म्मबन्धादिहेतुभूतवस्तुवादमाश्रित्य त एव विचार्यन्ते इत्येवंसम्बद्धस्यास्यैकादशोद्देशकात्मकस्येदं प्रथमोद्देशकादिसूत्रम्-

## -: शतकं-३० उद्देशकः-१ :-

**मू.** *(९९८) कइ णं भंते ! समोसरणा पन्नत्ता ?, गोयमा ! चत्तारि समोसरणा पन्नत्ता, तंजहा-किरियावादी अकिरियावादी अन्नाणियवाई वेणइयवाई।*

*जीवा णं भंते ! किं किरियावादी अकिरियावादी अन्नाणियवादी वेणइयावादी ?, गोयमा जीवा किरियावादिवि अकिरियावादिवि अन्नाणियवादीवि वेणइयवादीवि।*

*सलेस्सा णं भंते ! जीवा किं किरियावादी ?, गोयमा ! किरियावादीवि अकिरियावादीवि अन्नाणियवादीवि वेणइयवादीवि, एवं जाव सुक्कलेस्सा, अलेस्सा णं भंते ! जीवा पुच्छा, गोयमा किरियावादी नो अकिरियावादी नो अन्नाणियवादी नो वेणइयवादी।*

*कण्हपक्खिया णं भंते ! जीवा किं किरियावादी ? पुच्छा, गोयमा ! नो किरियावादी अकिरियावादीअन्नाणिकयवादीवि नो वेणइयवादी वि, सुक्कपक्खिया जहा सलेस्सा ।*

*सम्मदिट्ठी जहा अलेस्सा, मिच्छादिट्ठी जहा कण्हपक्खिया, सम्मामिच्छादिट्ठीणं पुच्छा, गोयमा ! नो किरियावादी नो अकिरियावादी अन्नाणियवादीवि वेणइयवदीवि।*

*नाणी जाव केवलनाणी जहा अलेस्से, अन्नाणी जाव विभंगनाणी जहा कण्हपक्खिया।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहारसन्नोवउत्ता जाव परिग्गहसन्नोवउत्ता जहा सलेस्सा, नोसन्नोवउत्ता जहा अलेस्सा सवेदगा जाव नपुंसगवेदगा जहा सलेस्सा, अवेदगा जहा अलेस्सा।

सकसायी जाव लोभकसायी जहा सलेस्सा। अकसायी जहा अलेस्सा।

सजोगी जाव काययोगी जहा सलेस्स, अजोगी जहा अलेस्सा, सागरोवउत्ता अनागारोवउत्ता जहा सलेस्सा।

नेरइया णं भंते! किं किरियावादी? पुच्छा, गोयमा! किरियावादीवि जाव वेणइयवादीवि, एवं एएणं कमेणं जच्चेव जीवाणं वत्तव्वया सच्चेव नेरइयाणं वत्तव्वयावि जाव अनागारोवउत्ता नवरं जं अत्थि तं भाणियव्वं सेसं न भण्णति, जहा नेरइया एवं जाव थणियकुमारा।

पुढविकाइया णं भंते! किं किरियावादी? पुच्छा, गोयमा! नो किरियावादी अकिरियावादीवि अन्नाणियवादीवि नो वेणइयवादी, एवं पुढविकाइयाणं जं अत्थि तत्थ सव्वत्थवि एयाइं दो मज्झिल्लाइं समोसरणाइं जाव अनागारोवउत्तावि, एवं जाव चउरिंदियाणं सव्वट्ठाणेसु एयाइं चेव मज्झिल्लगाइं दो समोसरणाइं, सम्मत्तनाणेहिवि एयाणि चेव मज्झिल्लगाइं दो समोसरणाइं, पंचिंदियरतिक्खजोणिया जहा जीवा नवरं जं अत्थि तं भाणियव्वं, मणुस्सा जहा जीवा तहेव निरवसेसं, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा।

किरियावादी णं भंते! जीवा किं नेरइयाउयं पकरेइ तिरिक्खजोणियाउयं पकरेइ मणुस्साउयं पकरेइ देवाउयं पकरेइ ?, गोयमा! नो नेरइयाउयं पकरेइ नो तिरिक्खजोणियाउयं पकरेइ मणुस्साउयंपि पकरेइ देवाउयंपि पकरेइ, जइ देवाउयं पकरेइ किं भवणवासिदेवाउयं पकरेइ जाव वेमाणियदेवाउयं पक० ?, गोयमा! नो भवमवासीदेवाउयं प० नो वाणमंतरदेवाउयं पक० नो जोइसियदेवाउयं पकरेइ वेमाणियदेवाउयं पकरेइ।

अकिरियावादी णं भंते! जीवा किं नेरइयाउयं पकरेइ? तिरिक्ख० पुच्छा, गोयमा! नेरइयाउयंपि पकरेइ जाव देवाउयंपि पकरेइ, एवं अन्नाणियवादीवि वेणइयवादीवि। सलेस्सा णं भंते! जीवा किरियावादी किं नेरइयाउयं पकरेइ? पुच्छा, गोयमा! नो नेरइयाउयं एवं जहेव जीवा तहेव सलेस्सावि चउहिवि समोसरणेहिं भाणियव्वा।

कण्हलेस्सा णं भंते! जीवा किरियावादी किं नेरइयाउयं पकरेइ? पुच्छा, गोयमा! नो नेरइयाउयं पकरेइ नो तिरिक्खजोणियाउयं पकरेइ मणुस्साउयं पकरेइ नो देवाउयं पकरेइ, अकिरिय० अन्नाणियवेणइयवादी य चत्तारिवि आउयाइं पकरेइ, एवं नीललेस्सावि।

तेउलेस्सा णं भंते! जीवा किरियावादी किं नेरइयाउयं पकरेइ? पुच्छा, गोयमा! नो नेरइयाउयं पकरेइ नो तिरिक्ख० मणुस्साउयं प० देवाउयंपि पकरेइ, जइ देवाउयं पकरेइ तहेव, तेउलेस्सा णं भंते! जीवा अकिरियावादी किं नेरइयाउयं पुच्छा, गोयमा! नेरइयाउयं पकरेइ मणुस्साउयंपि तिरिक्खजोणियाउयंपि पकरेइ देवाउयंपि पकरेइ, एवं अन्नाणियवादीवि वेणइयवादीवि, जहा तेउलेस्सा एवं पम्हलेस्सावि सुक्कलेस्सावि नेयव्वा।

अलेस्सा णं भंते! जाव किरियावादी किं नेरइयाउयं पुच्छा, गोयमा! नेरइयाउयंपि पकरेइ एवं चउविहंपि, एवं अन्नाणियदीवि वेणइयवादीवि, सुक्कपक्खिया जहा सलेस्सा।

सम्मदिट्ठी णं भंते! जीवा किरियावादी किं नेरइयाउयं पुच्छा, गोयमा! नो नेरइयाउयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पकरेइ नो तिरिक्ख० मणुस्साउयं पकरेइ देवाउयंपि पकरेइ, मिच्छादिट्ठी जहा कण्हपक्खिया, सम्मामिच्छादिट्ठी णं भंते! जीवा अन्नाणियवादी किं नेरइयाउयं जहा अलेस्सा, एवं वेणइयवादीवि, नाणी आभिणिबोहियनाणी य सुयनाणी य ओहिनाणी य जहा सम्मद्दिट्ठी।*

*मणपज्ञवनाणी णं भंते ! पुच्छा, गोयमा ! नो नेरइयाउयं पकरेइ नो तिरिक्ख० नो मणुस्स० देवाउयं पकरेइ, जइ देवाउयं पकरेइ किं भवणवासि० पुच्छा, गोयमा ! नो भवणवासिदेवाउयं पकरेइ नो वाणमंतर० नो जोइसिय० वेमाणियदेवाउयं, केवलनाणी जहा अलेस्सा, अन्नाणी जाव विभंगनाणी जहा कण्हपक्खिया।*

*सन्नासु चउसुवि जहा सलेस्सा, नोसन्नोवउत्ता जहा मणपज्ञवनाणी, सवेदगा जाव नपुंसगवेदगा जहा सलेस्सा, अवेदगा जहा सलेस्सा, सकसायी जाव लोभकसायी सजहा सलेस्सा, अकसायी जहा अलेस्सा, सयोगी जाव काययोगी जहा सलेस्सा, अजोगी जहा अलेस्सा, सागारोवउत्ता य अनागारोवउत्ता य जहा सलेस्सा।*

